Institut Français de Pondichéry

Collection Indologie - 100.2

Rashtriya Sanskrit Sansthan

संस्कृतवर्षस्मृतिग्रन्थमाला - ७

शाब्दबोधमीमांसा

ŚĀBDABODHAMĪMĀṂSĀ

AN INQUIRY INTO INDIAN THEORIES OF VERBAL COGNITION

सुबर्थविचारात्मकः द्वितीयो भागः

PART II - CASE TERMINATIONS AND THEIR SIGNIFICANCE



By

N.S. RAMANUJA TATACHARYA

शाब्दबोधमीमांसा

ŚĀBDABODHAMĪMĀṂSĀ

An Inquiry into Indian Theories of Verbal Cognition

सुबर्थविचारात्मकः द्वितीयो भागः

Part II - Case Terminations and Their Significance.

COLLECTION INDOLOGIE – 100.2

संस्कृतवर्षस्मृतिग्रन्थमाला – ७

शाब्दबोधमीमांसा

ŚĀBDABODHAMĪMĀṂSĀ

An Inquiry into Indian Theories of Verbal Cognition

सुबर्थविचारात्मकः द्वितीयो भागः

Part II - Case Terminations and Their Significance

By

N.S. Ramanuja Tatacharya

INSTITUT FRANÇAIS DE PONDICHÉRY

RASHTRIYA SANSKRIT SANSTHAN

CONTENTS

Overview of the work iii
Acknowledgements v
Abbreviations .... vii-xi
Introduction १-३५
Detailed table of contents ३७-६१
Text of Śābdabodhamīmāṃsā 1-871
1. Kārakalakṣaṇam 1-35
2. Prathamārthavicāraḥ 37-66
3. Saṃbodhanaprathamārthavicāraḥ 67-83
4. Dvitīyārthavicāraḥ 85-301
5. Tṛtīyārthavicāraḥ 303-449
6. Caturthyarthavicāraḥ 451-564
7. Pañcamyarthavicāraḥ 565-704
8. Ṣaṣṭhyarthavicāraḥ 705-773
9. Saptamyarthavicāraḥ 775-871
Appendix 873-940
Bibliography 875-887
Index of śloka-s 889-896
Index of examples 897-932
Index of notions 933-940

शाब्दबोधमीमांसाग्रन्थस्य संक्षिप्तपरिचयः

शब्दजन्यो बोधः शाब्दबोध इत्युच्यते। आप्तवाक्यं शब्दः, अथ वा अनाप्तानुक्तं वाक्यं शब्दः। प्रमाणेषु मध्ये शब्दस्य महत्त्वमस्ति। सर्वेऽपि लौकिकाः परीक्षकाश्च शब्देनैव व्यवहारं प्रवर्तयन्ति। अतः वाक्यस्वरूपं वाक्यप्रतिपाद्यार्थस्वरूपं वाक्यार्थबोधे प्रधानकारणस्य सहकारिकारणस्य च स्वरूपमवश्यं ज्ञातव्यं भवति। तथा वाक्यं पदसमूहात्मकम्। पदं च नामाख्यातोपसर्गनिपातभेदेन चतुर्धा यास्केन विभक्तम्। तत्र सुबन्तं नाम। तिङन्तमाख्यातम्। सुबन्ते प्रकृतिः प्रत्ययश्चेति अवयवद्वयमस्ति। तिङन्ते धातुः तिङ् चेति अवयवद्वयमस्ति। सुप्प्रकृतौ अव्युत्पन्नप्रातिपदिकं कृदन्तं तद्धितान्तं समासः ङ्यन्तमाबन्तं च अन्तर्गतम्। तत्र प्रकृतीनां प्रत्ययानां चार्थाः तेषां परस्परमन्वयश्च ज्ञातव्या भवन्ति। एतत्सर्वमधिकृत्य शाब्दबोधनिरूपणपरेषु ग्रन्थेषु निरूपणमस्ति। तत्र व्याकरणशास्त्रे वाक्यपदीय-भूषणसार-लघुमञ्जूषाग्रन्थाः, न्यायशास्त्रे मणिग्रन्थस्थशब्दखण्ड-शब्दशक्तिप्रकाशिका-न्यायकौस्तुभ-व्युत्पत्तिवाद-पदवाक्यरत्नाकर-विभक्त्यर्थनिर्णयाः, मीमांसायां भाट्टचिन्तामणि-भाट्टरहस्यग्रन्थौ च निर्देशार्हाः। शब्दप्रमाणविषये च न्यायदर्शन-न्यायमञ्जरी-न्यायभूषण-तत्त्वचिन्तामणिप्रभृतयो ग्रन्था अपि निर्देशमर्हन्ति। उक्तग्रन्थेभ्यः तत्तच्छास्त्रप्राचीनग्रन्थेभ्यश्च विषयसंकलनं कृत्वा विमर्शपूर्णः शाब्दबोधमीमांसात्मकः ग्रन्थः चिकीर्षितः। अयं ग्रन्थः भागचतुष्टयरूपः। तत्र प्रथमो भागः वाक्यवाक्यार्थविचारात्मको भवति। द्वितीये भागे नामार्थविचारनाम्नि जातिगुणक्रियावाचकत्वेन प्रसिद्धानां कुत्र शक्तिः इति विचार्यते। तथा कृदन्तानां तद्धितान्तानां समासानां निपातानामुपसर्गाणां चार्थविचारपूर्वकमन्वयबोधप्रकारः विचार्यते। तृतीये भागे सुबर्थविचारः क्रियते। अयमतिविस्तीर्णः उपकारकतमश्च भागद्वयात्मना प्रकाशयितुमिष्यते। चतुर्थे भागे धात्वर्थविचारः लकारार्थविचारश्च भवति। उपर्युक्तविषयाः तत्तच्छास्त्रप्राचीनग्रन्थेषु यदि स्युः ततोऽपि गृह्यन्ते, विशिष्य च शाब्दबोधग्रन्थेभ्यः उद्धरणं क्रियते। द्वैताद्वैतविशिष्टाद्वैतवेदान्तग्रन्थेभ्योऽपि यथालाभं संगृह्यन्ते।

कृतज्ञतानिवेदनम्

यदाहं तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिपदात् निवृत्तः १९९३ एप्रिल्-मासे तत्रैव नगरे षण्मासपर्यन्तं न्यवसम्, तदा पाण्डिच्चेरिस्थ-फ्रेञ्च्-इन्स्टिट्यूट् इण्डालजीविभागाध्यक्षाः डा. ग्रिमाल्-महोदयाः तत्रैव कार्यं कुर्वाणैः पण्डितवर्यैः आञ्जनेयशर्मभिः सह तिरुपतिमागत्य सादरं पाण्डिच्चेरीं प्रति मामागन्तुमाह्वयन्। अहं च अनुसन्धानकर्मणि रुचिमान् ससन्तोषं पाण्डिच्चेरीं प्रति आगन्तुमन्वमन्ये। फ्रेञ्च्-इन्स्टिट्यूट् अनुसन्धानशाखायां प्राजेक्ट्रूपेण शाब्दबोध-मीमांसाख्यग्रन्थ-निर्माणमङ्गीकृत्य भागचतुष्टयरूपेण तं ग्रन्थं नानाशास्त्रग्रन्थेभ्यो विषयसंकलन-पूर्वकमरचयम्। अस्य महतः कार्यस्य निष्पादने मूलकारणभूताः डा. ग्रिमाल्-महोदयाः। अतस्तेभ्यः तदा तदा आलोचनदातृभ्यः प्रथमं कृतज्ञतामाविष्करोमि।

अस्य ग्रन्थस्य वाक्यवाक्यार्थविचारात्मकः प्रथमो भागः २००५ फर्वरीमासे लोकार्पणीकृतः। एतद्ग्रन्थप्रकाशनाय सर्वविधव्यवस्थां कृतवद्भ्यः फ्रेञ्च्-इन्स्टिट्यूट् निदेशकेभ्यः डा. मुल्लर्-महोदयेभ्यः कार्तज्ञ्यं प्रकटयामि।

अस्य द्वितीयभागस्य मुद्रणाय द्रविणप्रदानादिना उपकृतवत्सु राष्ट्रियसंस्कृत-संस्थानस्य कुलपतिषु प्रो. वेम्पटि कुटुम्बशास्त्रिषु कृतज्ञतावाकं प्रयुञ्जे।

अस्य द्वितीयभागस्य शोधनपूर्वकं गणकयन्त्रे मुद्रणे, विषयसूच्यनुबन्धादि-निर्माणे च साहाय्यं कृतवद्भ्यःविद्वद्भ्यः डा. लक्ष्मीनरसिंहमहोदयेभ्यः कृतज्ञता-निवेदनपूर्वकं मङ्गलमाशासे।

अन्ते पुनरेकवारं निदेशकेषु डा. मुल्लर्-महोदयेषु, डा. ग्रिमाल्-महोदयेषु, प्रो. वेम्पटि कुटुम्बशास्त्रिषु च कृतज्ञतां निवेद्य धन्यो भवामि।

एन्. एस्. रामानुजताताचार्यः

संकेताक्षरसूची

अ.व्या.	अनुव्याख्यानम्
अ.व्या.व्या.न्या.सु.	अनुव्याख्यानव्याख्या न्यायसुधा
अ.को.	अमरकोशः
अ.सं.	अर्थसंग्रहः
आ.श्रौ.	आश्वलायनश्रौतसूत्रम्
ऋजु.	ऋजुविमला
क.त.	कल्पतरुः
क.प.	कल्पपरिमलः
का.	कारिकावली
का.आ.	काव्यादर्शः
का.प्र.	काव्यप्रकाशः
का.प्र.व्या.वि.	काव्यप्रकाशव्याख्याविवरणम्
का.प्रदी.	काव्यप्रदीपः
कु.सं.	कुमारसंभवः
खं.खं.खा.	खण्डनखण्डखाद्यम्
ग.सू.	गणसूत्रम्
ग.	गादाधरीयम्
ग.अव.	गादाधरीयम् अवयवः
ग.व्यु.का.	गादाधरीयः व्युत्पत्तिवादः, कारकम्
गू.त.	गूढार्थतत्त्वालोकः
चि.अव.	चिन्तामणिः अवयवः
जै.सू.	जैमिनिसूत्रम्
जै.न्या.वि.	जैमिनीयन्यायमालाविस्तरः
कणिका.	तत्त्वकणिका
त.चिं.म.	तत्त्वचिन्तामणिः
त.चिं.म.व्या.मा.	तत्त्वचिन्तामणिव्याख्या माथुरी
त.चिं.म.व्या.माथुरी.	तत्त्वचिन्तामणिव्याख्या माथुरी
त.चिं.म.व्या.प्र.	तत्त्वचिन्तामणिव्याख्या प्रकाशः
त.चिं.म.व्या.रहस्यम्.	तत्त्वचिन्तामणिव्याख्या रहस्यम्

त.प्र.	तत्त्वप्रदीपिका
त.बिं.	तत्त्वबिन्दुः
त.मु.क.	तत्त्वमुक्ताकलापः
त.र.	तत्त्वरत्नाकरः
त.वै.	तत्त्ववैशारदी
तं.वा.	तन्त्रवार्त्तिकम्
त.कौ.	तर्ककौमुदी
त.तां	तर्कताण्डवम्
त.प्र.	तर्कप्रकाशः
त.भा.	तर्कभाषा
त.सं.	तर्कसंग्रहः
त.सं.दी.	तर्कसंग्रहदीपिका
ता.टी.	तात्पर्यटीका
ता.टी.प.	तात्पर्यटीकापरिशुद्धिः
तै.सं.	तैत्तिरीयसंहिता
दी.व्या.रा.	दीपिकाव्याख्या रामरुद्रीयम्
द्र०	द्रष्टव्यम्
नि.भा.	निरुक्तभाष्यम्
नि.	निरुक्तम्
नी.प्र.	नीलकण्ठप्रकाशिका
नृ.प्र.	नृसिंहप्रकाशिका
नैषध.	नैषधीयचरितम्
न्या.कं.	न्यायकन्दली
न्या.कु.	न्यायकुसुमाञ्जलिः
न्या.को.	न्यायकोशः
न्या.कौ.	न्यायकौस्तुभः
न्या.परि.	न्यायपरिशुद्धिः
न्या.बो.	न्यायबोधिनी
न्या.भा.	न्यायभाष्यम्
न्या.भू.	न्यायभूषणम्
न्या.मं.	न्यायमञ्जरी
न्या.र.मा.	न्यायरत्नमाला

न्या.रत्ना.	न्यायरत्नाकरः
न्या.ली.	न्यायलीलावती
न्या.वा.ता.टी.	न्यायवार्त्तिकतात्पर्यटीका
न्या.वा.	न्यायवार्त्तिकम्
न्या.सि.मं.	न्यायसिद्धान्तमञ्जरी
न्या.सु.	न्यायसुधा
न्या.सू.	न्यायसूत्रम्
प.वा.र.	पदवाक्यरत्नाकरः
प.त.नि.	पदार्थतत्त्वनिर्णयः
पा.सू.	पाणिनिसूत्रम्
पूर्वपक्षे	ग्रन्थस्य पूर्वपक्षे
प्र.पं.	प्रकरणपञ्चिका
प्र.स.	प्रमाणसमुच्चयः
प्र.पा.भा.	प्रशस्तपादभाष्यम्
ब्र.सू.शां.भा.	ब्रह्मसूत्रशांकरभाष्यम्
ब्र.सू.शां.भा.व्या.भा.	ब्रह्मसूत्रशांकरभाष्यव्याख्या भामती
बृ.टी.	बृहट्टीका
भट्टि.	भट्टिकाव्यम्
भा.चिं.म.	भाट्टचिन्तामणिः
भारवि.	भारविकाव्यम् किरातार्जुनीयम्
मनु.	मनुस्मृतिः
म.भा.	महाभाष्यम्
माघ.	माघकाव्यम् शिशुपालवधम्
मी.को.	मीमांसाकोशः
मी.कौ.	मीमांसाकौस्तुभः
मी.न्या.प्र.	मीमांसान्यायप्रकाशः
मी.बा.	मीमांसाबालप्रकाशः
मी.वा.	मीमांसावार्त्तिकम्
मी.सू.	मीमांसासूत्रम् पूर्वमीमांसासूत्रम्
मु.	मुक्तावली
मु.व्या.दि.	मुक्तावलीव्याख्या दिनकरी
मु.व्या.प्र.	मुक्तावलीव्याख्या प्रभा

मेदिनी.	मेदिनीकोशः
मे.सं.	मेघसंदेशः
या.स्मृ.	याज्ञवल्क्यस्मृतिः
यो.भा.	योगभाष्यम्
यो.सू.	योगसूत्रम्
र.वं.	रघुवंशः
रा.ता.	रामानुजताताचार्यः
रामा.	रामायणम्
ल.चं.	लघुचन्द्रिका
ल.मं.	लघुमञ्जूषा
वा.पा.	वाक्यपदीयम्
वा.पा.व्या.अ.	वाक्यपदीयव्याख्या अम्बाकर्त्री
वा.वृ.	वाक्यवृत्तिः
वा.न्या.सु.	वार्त्तिकन्यायसुधा
वे.प.	वेदान्तपरिभाषा
वे.प.व्या.शि.	वेदान्तपरिभाषाव्याख्या शिखामणिः
वे.सं.	वेणीसंहारः
वै.भू.सा.	वैयाकरणभूषणसारः
वै.सि.का.	वैयाकरणसिद्धान्तकारिका
वै.सू.	वैशेषिकसूत्रम्
व्या.वा.	व्याकरणवार्त्तिकम्
व्यु.वा.	व्युत्पत्तिवादः
व्यु.वा.व्या.प्र.	व्युत्पत्तिवादव्याख्या प्रकाशः
व्यु.वा.व्या.गू.त.	व्युत्पत्तिवादव्याख्या गूढार्थतत्त्वालोकः
श.वा.	शक्तिवादः
श.कौ.	शब्दकौस्तुभः
श.नि.	शाब्दनिर्णयः
श.श.प्र.	शब्दशक्तिप्रकाशिका
शा.भा.	शाबरभाष्यम्
शा.त.	शाब्दतरङ्गिणी
शा.दी.	शास्त्रदीपिका
श्लो.वा.	श्लोकवार्त्तिकम्

श्रीभा.	श्रीभाष्यम्
श्रु.प्र.	श्रुतप्रकाशिका
सं.शा.	संक्षेपशारीरकम्
सं.र.	संगीतरत्नाकरः
सा.सु.	सारस्वतीसुषमापत्रिका
सां.का.	सांख्यकारिका
सां.त.कौ.	सांख्यतत्वकौमुदी
सां.सू.	सांख्यसूत्रम्
सोम.	सोमनाथीयम्
स्फो.वा.	स्फोटवादः
स्फो.सि.	स्फोटसिद्धिः

।। श्रीः ।।

शाब्दबोधमीमांसायां

सुबर्थविचारात्मकस्य द्वितीयभागस्य

भूमिका

अस्माभिः संकल्पितायां शाब्दबोधमीमांसायां वाक्यवाक्यार्थविचारात्मकः प्रथमो भागः अतिविस्तृतः अचिरात् प्रकाशमुपगतः। इदानीं सुबर्थविचारात्मकः द्वितीयो भागः प्रथमभागात् अपि विस्तृतः प्रकाश्यते। तत्र आदौ अवश्यज्ञातव्यं किंचित् संगृह्यते।

शब्दस्तावत् द्विविधः सार्थकः निरर्थकश्चेति। ध्वन्यात्मकः शब्दो निरर्थकः। सार्थकः शब्दः प्रकृतिः प्रत्ययः निपातश्चेति त्रिविधः। प्रकृतिः नाम धातुश्चेति द्विविधा। नामैव प्रातिपदिकमित्यप्युच्यते। नाम चतुर्विधं रूढं लक्षकं योगरूढं यौगिकं चेति। परे तु यौगिकरूढमधिकमन्तर्भाव्य नाम पञ्चविधमाहुः। रूढं संज्ञेत्यपि कीर्त्यते। संज्ञा च नैमित्तिकी पारिभाषिकी औपाधिकी चेति त्रिविधा। लक्षकं नामापि, लक्षणायाः जहत्स्वार्था अजहत्स्वार्था निरूढा आधुनिकी इत्यादिभेदमनुसृत्य अनेकविधं भवति। योगरूढं सामासिकं तद्धितान्तं चेति द्विविधम्। कृदन्तस्य पङ्कजादेः सामासिकेऽन्तर्भावात् न त्रैविध्यशङ्का। यौगिकं नाम समासः तद्धितान्तं कृदन्तं चेति त्रिविधम्। समासः कर्मधारय-द्विगु-तत्पुरुषाव्ययीभाव-बहुव्रीहि-द्वन्द्व-भेदात् षड्विधः।

धातुः मूलधातुः सौत्रः प्रत्ययान्तश्चेति त्रिविधः। प्रत्ययः चतुर्विधः विभक्तिः धात्वंशः तद्धितं कृत् इति। धात्वंशः सन्, क्यच् प्रभृतिः। विभक्तिः द्विविधा सुप् तिङ् चेति। सुप् प्रथमादिभेदेन सप्तविधा। सा पुनर्द्विविधा कारकार्था कारकेतरार्था चेति। कारकेतरार्था विभक्तिः उपपदविभक्तिरित्युच्यते। तत्र कारकं षड्विधम् अपादानसंप्रदानकरणाधिकरणकर्मकर्तृभेदात्। तिङ् लडादिभेदेन दशविधा। लडादयः परस्मैपदात्मनेपदभेदेन द्विविधाः। धात्वंशप्रत्ययः द्विविधः नामप्रकृतिकः धातुप्रकृतिकश्चेति। आद्यः क्यच्क्यङादिः। द्वितीयः सन्यञादिः। अर्थभेदेन तद्धितोऽनेकविधः।

तत्रेदानीं सुबर्थविचारः विस्तरेण प्रस्तूयते। श्रीभट्टोजीदीक्षितविरचितायां सिद्धान्तकौमुद्यां कारक- प्रकरणे यः सूत्राणां क्रमः तमेव क्रममाश्रित्य सुपामर्थः सूत्रव्याख्यानपूर्वकम् उदाहरणेषु वाक्येषु शाब्दबोधप्रकारश्च वर्ण्यते। शाब्दबोध-वर्णनविषये वैयाकरणनैयायिकमीमांसकग्रन्थेषु यो विचारः वर्तते तमाधृत्य तत्तन्मतानुसारेण शाब्दवोधवर्णनमत्र क्रियते। वैयाकरणग्रन्थेष्वेव मतभेदो दरीदृश्यते। किमु वक्तव्यं नैयायिकादिग्रन्थेषु। सर्वमस्मिन् ग्रन्थे मया प्रदर्शितमस्ति। अनुसन्धानकर्तॄणामयं ग्रन्थः महते उपकाराय कल्पत इति विश्वसिमि।

तत्र प्रथमतः सामान्यतः कारकलक्षणं प्रस्तूयते। कारकसामान्यलक्षणज्ञानं विना कारकविशेषाणामपादानादीनां लक्षणस्य दुर्ज्ञानत्वात्।

कारकलक्षणम्

भवानन्दोक्तं कारकलक्षणम्

तत्र क्रियानिमित्तत्वं कारकत्वमिति न सामान्यलक्षणम्। संप्रदानादेः अनुमतिप्रकाशनद्वारा यथा दानादिक्रियनिमित्तत्वं तथा तण्डुलादिसंपादनद्वारा संबन्धिनः चैत्रादेरपि पाकादिक्रियानिमित्तत्वमस्तीति 'चैत्रस्य तण्डुलं पचति' इत्यादौ संबन्धिनि चैत्रादौ कारकलक्षणातिव्याप्तेः। किं तु विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यभाक्तसाधारणं कारकत्वम्। क्रियानिमित्तत्वे सति क्रियान्वयित्वं मुख्यं कारकत्वम्। स्तोकं पचतीत्यादौ क्रियाविशेषणे स्तोकेऽतिव्याप्तिवारणाय विभक्त्यर्थद्वारेत्युक्तम्। ग्रामं गच्छतीत्यादौ मुख्यं कारकं ग्रामादि। घटं जानातीत्यादौ भाक्तं कर्म घटादि। यदि च 'गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक्स्वभेषजैः' इत्यादिप्रयोगे विनापि नामाध्याहारं धात्वर्थे षष्ठ्यर्थः संबन्धोऽन्वीयते, तदा कर्तृत्वकर्मत्वादिषट्कान्यतमत्वे सति क्रियान्वयित्वं कारकत्वमिति कारकचक्रे भवानन्दतर्कवागीशाः प्राहुः।

जगदीशोक्तं कारकलक्षणम्

तर्कालंकारास्तु — 'धात्वर्थांशे प्रकारो यः सुबर्थः सोऽत्र कारकम्' इति वदन्ति।

नागेशोक्तं कारकलक्षणम्

अत्राहुः बृहन्मञ्जूषायां नागेशभट्टाः[१] — कारकत्वं क्रियान्वयित्वम्। सुपां कर्त्रादिकारकवाचकत्वात् तेषां च कर्त्रादीनां क्रियान्वयित्वात् समन्वयः।

---

[१] पृ. १४४

ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यत्र ब्राह्मणस्य क्रियान्वयित्वाभावात् न कारकत्वम्। यत्तु क्रियान्वितप्रत्ययार्थान्वितत्वं कारकत्वमिति। तन्न। पक्व इत्यादौ प्रत्ययार्थस्य कर्मणः क्रियान्वयित्वेऽपि क्रियान्वितप्रत्ययार्थान्वयित्वाभावेन कारकत्वानुपपत्तेः।

क्रियाजनकत्वं कारकत्वमित्यपि न। ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीत्यत्र पुत्रस्य प्रश्नक्रियारजनकत्वाभावेन कारकत्वानुपपत्तेः। क्रियान्वयिनः कारकत्वादेव 'कारकाणां क्रियायामेवान्वय' इति प्रवादोऽपि संगच्छते इति। त एव लघुमञ्जूषायाम्[१] — कारकत्वं नाम क्रियाजनकत्वयोग्यताबुद्धिविषयत्वम्। 'इदं क्रियाजनकत्वयोग्यम्' इत्याकारकबुद्धिविषयत्वम्, क्रियाजनकत्वयोग्यत्वप्रकारक-बुद्धिविशेष्यत्वमिति यावत्। यद्वा कारकत्वं क्रियाजनकत्वशक्तिः। क्रियाजनक-त्वानुकूला शक्तिरिति यावत्। भाष्ये 'करोति क्रियां निवर्तयति' इति कारक-शब्दस्य व्युत्पत्तिप्रदर्शनात्।

यत्तु क्रियान्वयित्वं कारकत्वमिति। तन्न। 'कारकाणां क्रियान्वयः' इत्यस्य क्रियान्वयिनां क्रियान्वय इत्यर्थप्राप्त्या असंगत्यापत्तेः; उद्देश्यतावच्छेदकविधेययोः भेदाभावात्। 'अधिकरणस्य कारकत्वेन क्रियान्वयः' इत्यादिव्यवहारस्या-संगत्यापत्तेश्च। न हि क्रियान्वयः क्रियान्वये हेतुः।

यदपि क्रियान्वितप्रत्ययार्थान्वितत्वं कारकत्वमिति। तदपि न। पक्व ओदन इत्यादौ क्तप्रत्ययार्थस्य कर्मणः कारकत्वव्यवहारानुपत्तेः। प्रत्ययार्थस्य प्रत्ययार्था-न्वयित्वाभावात्।

एवं क्रियान्वितविभक्त्यर्थान्वितत्वं कारकत्वमित्यपि न। पक्व ओदन इत्यादौ ओदनादेः कारकत्वानुपपत्तेः। क्तप्रत्ययस्य विभक्तित्वाभावेन तदर्थान्वितस्याप्यो-दनस्य विभक्त्यर्थान्वयित्वाभावात् — इति प्राहुः।

विभक्त्यर्थनिर्णये गिरिधरोपाध्यायोक्तं कारकलक्षणम्

कारकत्वं न क्रियान्वयित्वम्। 'कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च' इत्यत्र षष्ठ्यर्थस्य शेषस्यापि (संबन्धस्यापि) क्रियान्वयित्वात् तत्रातिव्याप्तेः। न च षष्ठ्यर्थभिन्नत्वे सति क्रियान्वयित्वं कारकत्वम्। अतो नातिव्याप्तिरिति वाच्यम्। तथा सति तण्डुलस्य पाक इत्यादौ षष्ठ्यर्थस्य कर्मत्वस्याकारकत्वापत्तेः।

---

[१] पृ. ११७७

एतेन धात्वर्थान्वितसुबर्थत्वं कारकत्वं विभक्त्यर्थस्य, विभक्त्यर्थद्वारकक्रियान्वयित्वं कारकत्वं विभक्तिप्रकृत्यर्थस्य इत्यपि निरस्तम्। कुमार्य इव कान्तस्य त्रस्यन्तीत्यत्र षष्ठ्यर्थे शेषे तत्प्रकृत्यर्थे चातिव्याप्तेः।

यत्तु एतद्दोषवारणाय अपादानत्वादिषट्कान्यतमत्वे सति क्रियान्वयित्वं कारकत्वमिति कारकचक्रे उक्तम्। तन्न। अपादानत्वादीनामेकविधत्वाभावात् ध्रुवत्वासोढत्वादिभेदेन बहुविधत्वात् इति कथमुक्तान्यतमत्वं कारकत्वमिति। न च ध्रुवाद्यन्यतमत्वेन अपादानादिकं निरुच्य तावदन्यतमत्वं कारकत्वमिति निर्वाच्यमिति वाच्यम्। कतिपयापादानादिकं जानतां सकलापादानादिकमजानतां ध्रुवादौ कारकत्वग्रहासंभवात्। प्रतियोगिज्ञानं विना यावदपादानादिभेदस्यैव दुर्ग्रहत्वेन तदवच्छिन्नभेदरूपस्यान्यतमत्वस्य सुतरां दुर्ग्रहत्वात्।

उच्यते। नामार्थान्वयप्रयोजकतानवच्छेदकीभूतक्रियान्वयितावच्छेदकधर्मवत्त्वे सति पदान्तरासमभिव्याहृतसुबर्थत्वं कारकत्वम्। पदान्तरपदेन क्रियावाचकपदातिरिक्तं पदं गृह्यते। ग्रामं गच्छतीत्यत्र नामार्थान्वयप्रयोजकतावच्छेदकः क्रियान्वयितावच्छेदकश्च धर्मः कर्मतात्वं तद्वत्त्वं सुबर्थत्वं च कर्मतायामस्तीति तत्र कारकलक्षणसमन्वयः। कान्तस्य त्रस्यतीत्यादौ षष्ठ्यर्थे संबन्धेऽतिव्याप्तिवारणाय भूतान्तम्। संबन्धत्वं हि राज्ञः पुरुष इत्यादौ नामार्थान्वयप्रतियोजकतावच्छेदकमिति न तद्वत्त्वमादाय संबन्धेऽतिव्याप्तिः।

न च नामार्थान्वयाप्रयोजकत्वमेव तद्वारणार्थं सुबर्थविशेषणमस्तु, किमनवच्छेदकत्वविवक्षयेति वाच्यम्। व्याघ्रात् बिभेतीत्यादौ हेतुत्वादिकारकेऽव्याप्तेः। व्याघ्रस्य भयम् इत्यादौ हेतुत्वादेः संबन्धत्वेन रूपेण नामार्थभयाद्यन्वयित्वात्। अनवच्छेदकत्वविवक्षणे तु नामार्थान्वयप्रयोजकतानवच्छेदकस्य हेतुतात्वादेः सत्त्वान्नाव्याप्तिः। हेतुत्वनिष्ठं संबन्धत्वं हि नामार्थान्वयप्रयोजकतावच्छेदकम्। अनवच्छेदकान्तविशेषणेऽपि व्याघ्रस्य भयमित्यादौ षष्ठ्यर्थेऽतिव्याप्तिः। तत्र हेतुतादेः संबन्धत्वेन रूपेण नामार्थभयाद्यन्वयात् संबन्धत्वस्य निरुक्तानवच्छेदकत्वविरहेऽपि तादृशस्य रूपान्तरस्य हेतुतात्वादेः सत्त्वात्। अतः क्रियान्वयितावच्छेदकेति धर्मविशेषणम्। तेन भयहेतुतात्वादेः रूपान्तरस्य प्रकृते क्रियान्वयितानवच्छेदकत्वान्न दोषः। भयहेतुतादिरूपकारकस्य संबन्धत्वेन रूपेण नामार्थान्वयेऽपि हेतुतात्वेन रूपेणानन्वयात्। कर्मादिपदोपात्तानां कर्मादीनां कारकत्ववारणाय सुबर्थत्वमुक्तम्। तत्रापि दण्डं दधातीत्यादौ दण्डवृत्तित्वादिरूपकर्मत्वस्य अनुदण्डं जातिः इत्यादौ नामार्थजातावन्वयात् कर्मकारकेऽव्याप्तिः स्यात्। तद्वारणाय पदान्तरासमभिव्याहृतत्वं सुपो विशेषणम्। दर्शितकर्मत्वादेर्नामार्थान्वये

कर्मप्रवचनीयान्वादिसमभिव्याहारस्य तन्त्रत्वात् न दोषः इति। एवमन्यान्यपि कारकलक्षणानि तत्रोक्तानि ग्रन्थेऽनूदितानि द्रष्टव्यानि।

मीमांसकोक्तं कारकलक्षणम्

न तावत् क्रियाप्रयोजकत्वं कारकत्वम्। देवदत्तस्य तण्डुलं पचतीत्यत्र अनुमतिदानेन पाकप्रयोजके देवदत्ते कारकत्वप्रसङ्गात्। नापि क्रियाजनकत्वम्। यथाज्ञानं पचतीत्यत्र ज्ञानेऽतिव्याप्तेः। ज्ञानस्यापि पाकक्रियाजनकत्वात्। नापि धात्वर्थान्वितविभक्त्यर्थान्वितत्वम्। धनाय गच्छति, स्वर्गाय यजते इत्यत्र अकारकयोः धनस्वर्गयोरतिव्याप्तेः। न पचतीत्यादौ नञर्थाभावेऽतिव्याप्तेश्च। तत्र हि पाकानुकूलकृतिः अभावप्रतियोगिनी इति बोधात् नञर्थस्याभावस्य धात्वर्थ-पाकान्विततिङ्विभक्त्यर्थकृत्यन्वितत्वात्। निपातार्थातिरिक्तत्वे सतीति विशेषणे च नक्तं पचतीत्यादौ अधिकरणे नक्तादावव्याप्तेः। तस्मात् कर्तृकर्माद्यन्यतमत्वं कारकत्वमिति नैयायिकाः।

वस्तुतस्तु — आख्यातार्थान्वितविभक्त्यर्थान्वितत्वं कारकत्वम्। लिङ्गसंख्यादीनां कारकत्वमिष्टमेव। आज्यस्य यजतीत्यादौ लाक्षणिकषष्ठ्यर्थस्यापि आख्यातार्थेऽन्वयात् आज्यादेः आख्यातार्थान्वितविभक्त्यर्थान्वयित्वात् कारकत्वम्। उपपदविभक्त्यर्थानां तु कल्पितधात्वर्थेऽन्वयात् श्रुतभावनानन्वयित्वेन न कारकत्वम्। अत एवोपपदविभक्तेः कारकविभक्त्यपेक्षया दुर्बलत्वमित्याहुः।

खण्डदेवास्तु कारकत्वं कर्तृत्वकर्मत्वादिकं च अनुगतव्यवहारसिद्धम् अखण्डोपाधिरूपं सामान्यमित्याहुः मीमांसकाः।

प्रथमार्थविचारः

वैयाकरणोक्तः प्रथमार्थः

प्रथमाद्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तम्याख्याः सप्त सुब्विभक्तयः। तत्र प्रथमायाः शक्तिग्राहकं सूत्रं 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'[१] इति। यस्मिन् प्रातिपदिके उच्चरिते यस्यार्थस्य नियमेनोपस्थितिर्भवति स तस्य प्रातिपदिकस्यार्थः। तेन शक्यलक्ष्यगौणानां सर्वेषां संग्रहः। 'कृष्णः सुन्दर' इत्यादौ प्रकृत्यर्थानुवादिका विभक्तिः। अभेदः संसर्गः। कृष्णाभिन्नः सुन्दर इति बोधः। लिङ्गं तु प्रातिपदिकस्यैवार्थः, प्रत्ययो द्योतकः। शंख्यापि वाच्या द्योत्या वा। 'सिंहो

[१] सू. २.३.४६

माणवकः', 'द्रोणो व्रीहिः' इत्यादौ सिंहद्रोणादिपदानां सिंहसदृशे द्रोणपरिच्छेद्यादौ च लक्षणा, प्रथमा तदनुवादिका। अभेदः संसर्गः। सिंहसदृशाभिन्नो माणवकः, द्रोणपरिच्छेद्याभिन्नो व्रीहिरिति बोधः।

अत्र सूत्रे प्रातिपदिकपदेन तत्प्रकृतिकलिङ्गबोधकप्रत्ययविशिष्टमपि गृह्यते। 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषणात्। तेन 'इन्द्राणी' इत्यादौ प्रथमायाः सिद्धिः।

इदमपि सूत्रं क्रियायोग एव प्रवर्तते। 'कर्मणि द्वितीया' इत्यादिभिः साहचर्यात्। अत एव 'तिङ्समानाधिकरणे प्रथमा' 'अस्तिर्भवन्तीपरः अप्रयुज्यमानोऽप्यस्ति' इति भाष्यादिग्रन्थः संगच्छते। यत्र तु क्रिया न श्रूयते तत्रापि क्रियापदाध्याहारो बोध्यः। एकद्व्यादिशब्दादावपि अनन्वितार्थकप्रयोगापेक्षया अनुवादकप्रयोगस्य न्याय्यत्वात् एकादिशब्दोक्तैकत्वाद्यनुवादकमेकवचनादीति बोध्यम् — इति बृहन्मञ्जूषायां नागेशभट्टाः प्राहुः। त एव लघुमञ्जूषायाम् — प्रातिपदिकार्थशब्देन प्रवृत्तिनिमित्तं तदाश्रयश्चोच्यते। अन्यथा पञ्चकं प्रातिपदिकार्थ इति पक्षे लिङ्गादीनामपि प्रातिपदिकार्थत्वेन प्रातिपदिकार्थे इत्यनेनैव लिङ्गादिषु प्रथमायाः सिद्ध्या लिङ्गादिग्रहणमनर्थकं स्यात्। प्रवृत्तिनिमित्ताश्रयश्च आरोपितप्रवृत्तिनिमित्ताश्रयोऽपि। तेन 'सिंहो माणवक' इत्यादौ माणवकस्य वास्तवसिंहत्वाश्रयत्वाभावेन माणवकेऽर्थे सिंहशब्दात् प्रथमा न स्यात्।

प्रवृत्तिनिमित्ततदाश्रययोः नियतोपस्थितिकत्वात् प्रातिपदिकार्थत्वम्। लिङ्गादीनां तु न तथात्वम्। तटः तटी तटम् इत्याद्यनियतलिङ्गेषु नियमेन कस्यापि लिङ्गस्योपस्थित्यभावात्। अतो लिङ्गादिग्रहणम्। यद्यपि केवलानां लिङ्गादीनां प्रातिपदिकार्थं विना क्वाप्यनुपस्थितेः लिङ्गादिमात्रे प्रथमेत्यनुपपन्नम्। तथापि लिङ्गमात्रेऽधिके प्रथमेति विवक्षितम्। एवं च अलिङ्गानि उच्चैः नीचैः इत्यादीनि अव्ययानि नियतलिङ्गानि कृष्णः गौः ज्ञानम् इत्यादीनि च प्रातिपदिकार्थमात्रे प्रथमेत्यस्य उदाहरणम्।

'अव्ययादाप्सुपः'[१] इति सूत्रे 'आप्-ग्रहणं व्यर्थमलिङ्गत्वात्' इति भाष्योक्तरीत्या अव्यये कस्यापि लिङ्गस्यानुपस्थितिरिति प्रातिपदिकार्थमात्रे इत्यस्य अव्ययं भवति उदाहरणम्। कृष्णशब्दे पुंस्त्वस्य, श्रीशब्दे स्त्रीत्वस्य, ज्ञानशब्दे नपुंसकत्वस्य च नियमेन भानमस्ति; तेषां नियतलिङ्गत्वात्। अतस्तेषु लिङ्गानामपि प्रातिपदिकार्थान्तर्भावात् कृष्णादिशब्दानां प्रातिपदिकार्थमात्रे इत्यस्योदाहरणत्वं निर्बाधम्। न

---

[१] सू. २.४.८२

च प्रातिपदिकोक्तार्थे किं प्रथमयेति वाच्यम्। एकत्वादिसंख्याबोधार्थत्वात्। अव्ययेभ्यस्तु पदत्वार्थं प्रथमा। तेन उच्चैः इत्यादौ रुत्वविसर्गौ 'उच्चैस्ते सम्यगुच्चारणम्' इत्यादौ तेमयादिसिद्धिश्च।

अनियतलिङ्गास्तु तटादिशब्दाः लिङ्गमात्राधिक्यस्य उदाहरणम्। तत्र लिङ्गानामनियतोपस्थितिकतया प्रातिपदिकार्थानन्तर्भावात्। एवं च तत्र लिङ्गं प्रथमार्थः।

परिमाणमात्रे द्रोणो व्रीहिः इत्युदाहरणम्। द्रोणरूपं यत् परिमाणं तत्परिच्छिन्नो व्रीहिः। प्रत्ययार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्। प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणम्। अत्र परिमाणत्वेन सामान्यरूपेण द्रोणस्य भानाय परिमाणग्रहणम्।

वचनं संख्या। एकः द्वौ बहवः इति उदाहरणम्। यद्यप्यत्र एकत्वद्वित्वबहुत्वानाम् एकादिशब्दैः नियमेनोपस्थित्या प्रातिपदिकार्थ इत्येव सिद्धे वचनग्रहणं किमर्थमिति शङ्का भवति, तथापि प्रकृतिभिरेव एकत्वादीनामुक्तत्वात् उक्तार्थानामप्रयोग इति न्यायेन प्रथमादेरप्राप्तौ वचनग्रहणम्। तथा च विभक्तिरिहानुवादः साधुत्वार्था। 'न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्यय' इत्यभिहितसूत्रस्थभाष्यसिद्धान्तात्। मात्रग्रहणात् कारकाद्याधिक्ये प्रथमा न भवति।

एवं च प्रातिपदिकार्थे प्रातिपदिकेन विवक्षिते तदुत्तरम् अव्ययानां पदत्वार्थम्, नियतलिङ्गानां संख्याबोधनार्थम्, प्रथमा भवति। अनियतलिङ्गानां लिङ्गबोधनाय, परिमाणार्थकेभ्यः परिमाणसामान्यबोधनाय, एकद्यादिसंख्यावाचकशब्देभ्यः साधुत्वाय च प्रथमा भवतीति — निष्कर्षमकुर्वन् वैयाकरणाः।

शब्दशक्तिप्रकाशिकायां जगदीशतर्कालङ्कारोक्तः प्रथमार्थः

तर्कालंकारास्तु —

> 'तादात्म्यभिन्ने स्वार्थे या प्रकृत्यर्थस्य बोधने।
> न समर्था विभक्तिः सा प्रथमा परिकीर्त्यते।।'

इति प्राहुः। तेषामयमाशयः — या विभक्तिः तादात्म्यभिन्नस्वार्थधर्मिकप्रकृत्यर्थबोधं प्रति न समर्था न स्वरूपयोग्या सा प्रथमा। तथा च यादृशानुपूर्वीप्रकारकनिश्चयत्वं तादात्म्यभिन्नस्वार्थधर्मिकप्रकृत्यर्थप्रकारकबोधजनकतावच्छेदकं तादृशानुपूर्वीमच्छब्दत्वं प्रथमात्वमिति पर्यवसितम्। घट इत्यत्र घटपदोत्तरसुप्रत्ययस्य एकत्वं पुंस्त्वं **चार्थः**, तदुभयं प्रकृत्यर्थे घटे प्रकारतया भासते। एकत्वपुंस्त्वविशिष्टो घट इति बोधः। सुप्रत्ययस्य स्वार्थसंख्यादिप्रकारकप्रकृत्यर्थविशेष्यकबोधनकर्तृत्वेऽपि

स्वार्थविशेष्यकप्रकृत्यर्थप्रकारकबोधजननयोग्यता नास्तीति समन्वयः। नीलो घट इत्यत्र नीलपदोत्तरसुप्रत्ययस्य तादात्म्यमर्थः। तत्र नीलस्य प्रतियोगितया तादात्म्यस्य घटे चानुयोगितया अन्वयः, नीलप्रतियोगिकतादात्म्यवान् घट इति बोधः। तथा च नीलपदोत्तरसुप्रत्ययस्य स्वार्धतादात्म्यधर्मिकप्रकृत्यर्थनीलप्रकारक-बोधजनकतया तत्राव्याप्तिरिति तादात्म्यभिन्नस्वार्थेत्युक्तम्। तथा च नीलपदोत्तर-सुप्रत्ययस्य स्वार्थतादात्म्यधर्मिकप्रकृत्यर्थप्रकारकबोधजनकत्वेऽपि तादात्म्यभिन्न-स्वार्थधर्मिकप्रकृत्यर्थबोधजनकत्वाभावात् नाव्याप्तिः इति। द्वितीयादिविभक्तीनां स्वार्थकर्मत्वादिविशेष्यकप्रकृत्यर्थप्रकारबोधजनकत्वात् न तेषु अतिव्याप्तिः।

व्युत्पत्तिवादे गदाधरभट्टाचार्योक्तः प्रथमार्थः

तत्र प्रथमार्थः प्रकृत्यर्थे विशेषणविधया अन्वयिनी संख्यैव। अत एव यत्र विशेष्यवाचकसमानविभक्तिकपदं निपातपदं वा नास्ति तत्र प्रथमान्तार्थस्य विशेष्यभासकसामग्र्याभावात् असौ मुख्यविशेष्यतयैव भासते — इति।

तत्र व्याख्यातारः

संख्यैवेति। अत्र एवकारस्य प्रथमार्थे एव, प्रकृत्यर्थे विशेषणविधया अन्वयिन्येव संख्यैवेति त्रिषु स्थलेषु संबन्धः। तेन स्वाश्रयकर्तृकत्वसंबन्धेन क्रियायां संख्यान्वयो वारितः। एकपदोपात्तत्वेन प्रकृत्यर्थे एवान्वयस्य युक्तत्वात्। विशेषणविधया अन्वयिन्येव इत्युक्त्या च संख्यायां प्रकृत्यर्थस्य विशेषणत्वभ्रमो वारितः। 'घटम्' इत्यादौ द्वितीयादिस्थले संख्यायाः प्रकृत्यर्थे विशेषणतयैव भानात्। अन्यथा कर्मत्वादौ प्रकृत्यर्थस्य विशेषणतयैव भानस्य व्यवस्थापितत्वात् संख्यायामपि तस्य विशेषणतया उद्देश्यविधेयभावभेदेन वाक्यभेदापत्तेः। इत्थं च प्रथमास्थलेऽपि संख्यायाः प्रकृत्यर्थविशेषणतयैव भानमुचितमिति।

संख्यैवेत्युक्त्या लिङ्गपरिमाणयोः प्रथमार्थत्वनिरासः। तथा हि — ब्राह्मणवति गृहादौ अत्र ब्राह्मणी नास्तीति व्यवहारात् योन्यादिमत्त्वरूपलिङ्गस्य ब्राह्म-णादिपदजन्यबोधे भानेऽपि न तस्य प्रथमार्थत्वम्। ब्राह्मणं ब्राह्मणीमित्यादि-द्वितीयान्तस्थलेऽपि तद्भानात्। अतः प्रातिपदिकस्यैव निरूढलक्षणया स्त्रीत्व-पुरुषत्वादिविशिष्टोऽर्थ इति अङ्गीकार्यम्। तटादावचेतने तु उक्तलिङ्गाभावात् न तटादिशब्दजन्यबोधे लिङ्गं भासते। अतो नास्य प्रथमार्थत्वम्। येषामपि मते तटादौ लिङ्गस्य भानम्, तेषामपि मते तस्य प्रत्ययार्थत्वं न युक्तम्। तटी-मित्यादावपि तन्मते लिङ्गभानस्याङ्गीकरणीयत्वादिति।

एवं परिमाणमत्र द्विविधं विवक्षितम् — गुरुत्वं परिमितिश्च। 'द्रोणो व्रीहिः' इत्यादौ गुरुत्वरूपं परिमाणं प्रथमार्थः। तत्र प्रकृत्यर्थस्य द्रोणपदार्थस्याभेदेनान्वयः। गुरुत्वस्य समवायेन व्रीहावन्वयः। तथा च द्रोणाभिन्नगुरुत्ववान् व्रीहिः इत्यन्वयबोधः। एवं 'वितस्तिः शङ्ख' इत्यत्र द्वादशाङ्गुलिपरिमाणवाचिनो वितस्तिशब्दात् जायमानायाः प्रथमायाः परिमाणमर्थः। तत्र वितस्तिशब्दार्थस्याभेदेनान्वयः। परिमाणस्य च समवायेन शङ्खेऽन्वयः। तथा च वितस्त्यभिन्नपरिमाणवान् शङ्ख इत्यन्वयबोधः। एतदुपपत्त्यर्थं प्रथमायाः परिमाणार्थकत्वमावश्यकमिति वैयाकरणाः केचिदाहुः।

तन्न। द्रोणशब्दार्थस्य गुरुत्वविशेषविशिष्टस्य अभेदेन व्रीहौ, एवं वितस्तिशब्दार्थस्य परिमाणविशेषविशिष्टस्य अभेदेन शङ्खे चान्वयेनोपपत्त्या परिमाणस्य स्वातन्त्र्येण भानाभावात् प्रथमायास्तादृशार्थकत्वे प्रमाणाभावात्।

इत्थं च 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'[१] इति सूत्रे सति सप्तम्येव, न तु वाचकत्वार्था सप्तमी। तथा चैतत्सूत्रे प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रातिपदिकेन विवक्षिते सति प्रथमेति लभ्यते। एतावता सूत्रेण प्रथमार्थानिरूपणात् अनन्यलभ्यतया संख्यैव प्रथमार्थ इति सिध्यति। संख्यापि प्रातिपदिकार्थ इति मतं तु पृथक् दूषितं व्युत्पत्तिवाद एव।

अत एवेति। प्रकृत्यर्थे विशेषणविधया अन्वययोग्यायाः संख्यायाः प्रथमार्थत्वादेवेत्यर्थः। **यत्रेत्यादि**। 'चैत्रः' इत्यादौ समानविभक्तिकपदाद्यसत्त्वस्थले प्रथमान्तार्थस्य चैत्रादेः यद्विशेष्यं तद्वाचकपदाभावात् असौ प्रथमान्तार्थश्चैत्रादिः विशेष्यतयैव भासत इत्यर्थः।

एतेन 'चैत्रः' इत्यादौ एकत्वप्रकारकचैत्रादिमुख्यविशेष्यकबोधस्य जायमानत्वेन सति संभवेऽन्यत्रापि प्रथमान्तार्थस्यैव मुख्यविशेष्यत्वमिति सूचितम्। अत्र 'सति संभवे' इत्युक्तत्वात् 'पचति' इत्यतः पाककृतिमात्रविषयकस्य, 'चैत्रेण सुप्यते' इत्यादौ चैत्रकर्तृकशयनमात्रविषयकस्य बोधस्य नैयायिकैः अङ्गीकृतत्वात् क्वचित् प्रथमान्तार्थस्य मुख्यविशेष्यत्वविरहेऽपि न क्षतिः।

---

[१] सू. १.३.४६

पदवाक्यरत्नाकरोक्तः प्रथमार्थः

एतावता एतत् सिद्धं प्रथमाविभक्तेः संख्या अर्थ इति। तत्रापि एकवचनस्य एकत्वमर्थः, द्विवचनस्य द्वित्वमर्थः, बहुवचनस्य बहुत्वमर्थः इति 'द्व्येकयोर्द्विवचनैकवचने'[१] 'बहुषु बहुवचनम्' इति सूत्रानुसारेण नैयायिकाः स्वीकुर्वन्ति।

अयं च विषयः पदवाक्यरत्नाकरेऽपि स्पष्टीकृतः। संबोधनप्रथमाव्यतिरिक्तप्रथमायाः संख्यार्थकत्वम्, संबोधनप्रथमायाः संख्यया सह संबोध्यत्वार्थकत्वं च —

'ऐक्यद्वित्वबहुत्वानां क्रमेण प्रतिपादकाः।
विभक्तीनामवयवाः प्रत्येकं स्युस्त्रयस्त्रयः।।'[२]

'विभक्तिः प्रथमा तेषु स्वौजसः प्रथमास्त्रयः।
आभिमुख्यं तदर्थस्तदभीष्टप्रत्ययात्मकम्।।'[३]

इति कारिकाभ्यां स्पष्टीकृतम्। क्वचित् प्रथमायाः लिङ्गसंख्यार्थकत्वमप्यस्तीति तु —

'अन्यत्रामन्त्रणाल्लिङ्गवचने प्राह केवलम्।
विभक्तिः प्रथमा कर्माद्याधिक्येऽन्या विभक्तयः।।'

इति कारिकयोक्तम्। आमन्त्रणप्रथमाभिन्ना प्रथमा 'नरः' इत्यादौ पुंस्त्वम्, 'लक्ष्मीः' इत्यादौ स्त्रीत्वं, 'बृहन्नलम्' इत्यादौ नपुंसकत्वम्, एकत्वादिसंख्यास्वरूपं वचनं चाभिधत्ते। द्वितीयादयस्तु कर्माद्यधिकमभिदधाना एव लिङ्गवचने प्रतिपादयन्ति, न तु कैवल्येनेति तदर्थो विवृतः।

तदुपरि 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इत्यनुशासनात् जातिमात्रं प्रातिपदिकार्थ इति मते जातिवाचकात् गवादिशब्दात् व्यक्तिलाभार्था प्रथमायाः व्यक्तौ शक्तिः, 'द्रोणो व्रीहिः' इत्यादौ द्रोणशब्दार्थस्य गुरुत्वस्य व्रीहौ समवायाख्यभेदसंबन्धेन नामार्थत्वेन हेतुना अन्वयासंभवात् प्रथमायाः गुरुत्वे शक्तिः, तथैव 'अरत्निः कुण्डम्' इत्यादौ परिमाणेऽपि शक्तिः आवश्यकी इत्याशङ्क्य

'अन्यलभ्यतया जातिमतो गुणवतस्तथा।
निरर्थः प्रातिपदिकाद्यर्थेषु प्रथमाविधिः।।' (६०)

---

[१] सू. १.४.२२
[२] प.वा.र.पृ. ४०६
[३] प.वा.र.पृ. ४४०

गवादिप्रातिपदिकात् आक्षेपतो लक्षणया शक्त्या वा व्यक्तेः गुरुत्ववतः परिमाणवतश्च लाभेन तस्याभेदेन इतरनामार्थेऽन्वयेन वाक्यार्थनिष्पत्त्या व्यर्थः व्यक्त्यादेः प्रथमावाच्यत्वविधिः — इति प्रतिपाद्य तर्हि सूत्रं किमर्थमिति शङ्कायामुक्तम् —

सूत्रेण प्रातिपदिकार्थः सत्ता व्यक्तिरेव सा।
आकृतिः परिमाणं तद्वृत्तिधर्मोपलक्षणम्।। ६१ ।।
प्रसिद्धे लिङ्गवचने तावन्मात्रे विवक्षिते।
प्रथमान्तप्रयोगस्य साधुत्वमनुशिष्यते।। ६२ ।।

प्रातिपदिकार्थः सत्ता। सा च व्यक्तिरेव। परिमाणं नाम आकृतिः अवयवसंस्थानस्वरूपा। एतत्त्रितयं तद्वृत्तिधर्माणामुपलक्षणम्। ततश्च व्यक्त्याकृतिपरिमाणानि तद्धर्माश्च प्रातिपदिकार्थः। लिङ्गं पुंस्त्वादि। वचनं संख्या। एतेषु विवक्षितेषु प्रथमान्तप्रयोगस्य साधुत्वं प्रातिपदिकार्थसूत्रेणानुशिष्यते। न तु प्रातिपदिकार्थवाचिका प्रथमेत्यनुशासनमिदम्। 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः' इति वाक्यपदीयोक्तेः। प्रथमायाः कुत्रार्थे शक्तिरिति लाघवादिप्रमाणान्तरेणैव निर्णेतव्यम्। तथा च सूत्रेण व्यक्तिलिङ्गप्रवृत्तिनिमित्तसंख्याबोधकं प्रथमान्तं साधु इति कण्ठत उक्ते बोधकत्वान्यथानुपपत्त्या शक्तौ कल्प्यमानायां प्रातिपदिकाप्राप्ययोः लिङ्गसंख्ययोः सुपां सुबप्राप्ययोः व्यक्तिप्रवृत्तिनिमित्तयोश्च प्रातिपदिकानां शक्तिः कल्प्या इति प्रमाणान्तरोत्थापकतया न तु साक्षात् व्याकरणस्य शक्तिग्राहकत्वमिति।

प्रथमाविभक्त्यर्थविषये मीमांसकमतम्

भाट्टरहस्ये प्रथमार्थः

लिङ्गं संख्या संबोध्यत्वं प्रातिपदिकार्थश्च प्रथमाविभक्त्यर्थः। तत्र लिङ्गसंख्यातिरिक्तस्य सुबर्थस्य प्रकारतया भावनायामन्वयः। 'प्रातिपदिकार्थलिङ्गसंख्यापरिमाणवचनमात्रे प्रथमा'[१] इति सूत्रं लिङ्गादीनामिव प्रातिपदिकार्थस्यापि प्रथमाशक्यत्वमनुशास्ति। न च तत् सूत्रं प्रातिपदिकार्थे प्रातिपदिकेन विवक्षिते प्रथमायाः साधुत्वमित्येवंपरम् इति वाच्यम्। सूत्रवैयर्थ्यापत्तेः। लिङ्गाद्यंशे प्रथमायाः शक्तिग्राहकत्वं प्रातिपदाकार्थांशे साधुत्वार्थकत्वमिति वैरूप्यापत्तेश्च। अतः 'चैत्रः' इत्यादौ प्रातिपदिकार्थश्चैत्रादिरेव प्रथमाया अर्थः। न च प्रातिपदिकार्थस्य प्रातिपदिकेनैव बोधसिद्धेः प्रथमायाः तदंशे साधुत्वार्थतेति वाच्यम्। प्रथमायाः

---

[१] सू. २.३.४६

प्रातिपदिकार्थत्वेन संमतार्थवाचकत्वमङ्गीकृत्य प्रातिपदिकस्य तत्तात्पर्यग्राहकत्वाङ्गीकारात्। प्रथमार्थस्य चैत्रादेरपि आख्यातार्थभावनायामेव प्रकारता।

कात्यायनमतेन प्रथमार्थः

कात्यायनमतेन प्रथमार्थः भाट्टरहस्ये इत्थं प्रदर्शितः — न प्रातिपदिकार्थे प्रथमा। तथात्वे प्रातिपदिकस्य तात्पर्यग्राहकत्वमात्रकल्पनया शाब्दबोधजनकत्वानापत्तेः। अपि तु आख्याताभिहितं कारकत्वमेव प्रथमार्थः। तथा च चैत्रः पचति इत्यत्र चैत्रपदोत्तरप्रथमायाः कर्तृत्वमर्थः। तत्र प्रातिपदिकार्थस्य चैत्रस्य आधेयतासंबन्धेनान्वयः। कर्तृत्वस्य स्वनिरूपकत्वसंबन्धेन क्रियायां स्वनिरूपकधात्वर्थक्रियानुकूलत्वसंबन्धेन आख्यातार्थभावनायां वा अन्वयः। प्रथमार्थसंख्याया अपि तदर्थकर्तृत्वे सामानाधिकरण्यसंबन्धेनान्वयः, द्वितीयाद्यर्थसंख्यायाः तदर्थकर्मत्वादाविव। तण्डुलः पच्यते इत्यादौ आख्याताभिहितं कर्मत्वं प्रथमार्थः। तस्यापि पूर्ववत् भावनायामन्वयः।

न चाख्याताभिहितस्य कर्तृत्वस्य भावनायामन्वितत्वात् पुनः प्रथमार्थस्य तत्रान्वयबोधस्य वैयर्थ्यमिति वाच्यम्। आख्यातेन कर्तृत्वत्वरूपसामान्यधर्मेण कर्तृत्वबोधनेऽपि चैत्रवृत्तित्वेन रूपेण तदबोधात्। तथा बोधाय पुनः प्रथमार्थबोधेन वैयर्थ्याभावात् इति। विस्तरो ग्रन्थे द्रष्टव्यः।

संबोधनप्रथमार्थः

नैयायिकमतेन संबोधनप्रथमार्थः

'चैत्र त्वया भुज्यताम्' इत्यत्र चैत्रपदोत्तरसंबोधनप्रथमायाः संबोधनमर्थः। 'संबोधने च'[१] इति सूत्रात्। संबोधनं नाम वक्तृनिष्ठा संबोधनप्रथमान्ताव्यवहितशब्दजन्यशाब्दबोधाश्रयत्वप्रकारकेच्छा। सा च त्वया भुज्यताम् इति शब्दजन्यशाब्दबोधाश्रयः चैत्रो भवतु इत्याकारिका। सा चैत्रप्रातिपदिकार्थे विशेष्यतासंबन्धेनान्वेति। तथा च त्वत्कर्तृकभोजनकर्मोदनविषयकः त्वया भुज्यताम् इति वाक्याधीनो यो बोधः तदाश्रयत्वप्रकारकवक्त्रिच्छाविशेष्यः चैत्रः इति उक्तस्थले बोधः इति व्युत्पत्तिवादे। संबोधनविभक्तिप्रकृत्यर्थस्यान्यत्र विशेषणतयैवान्वयः। तथा हि ज्ञानोद्देश्यकेच्छा संबोधनम्। तत्र ज्ञानमिच्छा च खण्डशः 'ब्रह्मन् पालय' इत्यादौ प्रथमार्थः। तत्र प्रातिपदिकार्थः समवेतत्वसंबन्धेन ज्ञानेऽन्वेति। ज्ञाने च उद्देश्यतासंबन्धेन इच्छा अन्वेति। ज्ञानस्य विषयतासंबन्धेन धात्वर्थे पालनेऽन्वयः।

---

[१] सू. २.३.४७

एवं च ब्रह्मसमवेतं यत् इच्छोद्द्‌श्यभूतं ज्ञानं तद्विषयः एकत्वाश्रयत्वत्कर्तृकमाशंसाविषयभूतं पालनमिति वैयाकरणमते बोधः। ब्रह्मसमवेतेच्छोद्देश्यभूतज्ञानविषयः आशंसाविषयभूतपालनकर्ता एकस्त्वम् इति नैयायिकमते शाब्दवोधः। ज्ञानसमवायितया इच्छाविषयत्वरूपं संबोध्यत्वं चैत्रादावर्थतः प्रतीयते इति पदवाक्यरत्नाकरे।

संबोधनं नाम अभिमुखीभावः। 'सिद्धस्याभिमुखीभावमात्रं संबोधनं विदुः' इति हरिणा कथनात्। 'राम त्राहि' इत्यतः अभिमुखीभवद्रामोद्देश्यकप्रवर्तनविषयः रक्षणमिति बोधः इति नागेशः।

भाट्टरहस्ये प्रतिपादितः संबोधनविभक्त्यर्थः

संबोधनविभक्तेः अभिमुखत्वमर्थः। अभिमुखत्वं नाम प्रकृतशाब्दवोधाश्रयत्वप्रकारकवक्तृभिन्नविशेष्यकवक्त्रिच्छाविषयीभूतशाब्दज्ञानवत्त्वम्। प्रकृतशाब्दबोधः संबोधनविभक्तिसमभिव्याहृतवाक्यजन्यशाब्दबोधः तदाश्रयत्वप्रकारिका वक्तृभिन्नविशेष्यिका च या वक्तुरिच्छा तद्विषयभूतं यत् शाब्दज्ञानं तदाश्रयत्वम् अभिमुखत्वमित्यर्थः। 'देवदत्त गामानय' इति वाक्यस्य वक्तुः यज्ञदत्तस्य 'देवदत्तः गामानयेति वाक्यजन्यशब्दबोधाश्रयो भवतु' इत्याकारिका इच्छा। सा च वक्तृभिन्नदेवदत्तविशेष्यिका प्रकृतशाब्दबोधाश्रयत्वप्रकारिका च। तस्यामिच्छायां विषयभूतं यत् शाब्दज्ञानं तद्वत्त्वं देवदत्तस्यास्तीति समन्वयः। अथवा प्रकृतशाब्दबोधनिष्ठविषयतानिरूपितवक्तृभिन्ननिष्ठवक्त्रिच्छाविषयतावत्त्वमभिमुखत्वम। प्रकृतशाब्दबोधनिष्ठविषयता (प्रकारता) निरूपिता या वक्तृभिन्ननिष्ठा वक्त्रिच्छीया विषयता विशेष्यता तद्वत्त्वमित्यर्थः। इच्छायाः आकारस्तु पूर्वोक्त एव।

एवं च 'देवदत्त गामानय' इत्यत्र अभिमुखत्वं कर्तृत्वं चेत्युभयं प्रथमाया अर्थः। उभयत्र आधेयतासंबन्धेन प्रातिपदिकार्थस्यान्वयः। अभिमुखत्वस्य शाब्दज्ञानात्मकस्य विषयतासंबन्धेन भावनायां कर्तृत्वस्य च निरूपकतासंबन्धेन तस्यामन्वयः। देवदत्तनिष्ठाभिमुखत्वविषयीभूता देवदत्तनिष्ठकर्तृत्वनिरूपिका च गोकर्मकानयनानुकूलभावनेति बोधः।

कारकद्वितीयार्थनिरूपणम्

कारकचक्रानुसारं द्वितीयार्थः

कर्मणि द्वितीया इति सूत्रात् कर्मत्वं द्वितीयार्थः। कर्मत्वं च तत्तद्धात्वर्थतावच्छेदकफलशालित्वम्। त्यजधातोः विभागावच्छिन्नव्यापारः, पतधातोः अधः-

संयोगावच्छिन्नव्यापारः, गमधातोः संयागावच्छिन्नव्यापारोऽर्थः। अवच्छिन्नत्वं च जनकतासंबन्धेन विशिष्टत्वम्। त्यजधात्वर्थेन संयोगस्य, गमधात्वर्थेन विभागस्य जननेऽपि संयोगस्य त्यजधात्वर्थतावच्छेदकत्वविरहात्, विभागस्य गमधात्वर्थतावच्छेदकत्वविरहाच्च न तदाश्रये तत्तद्धात्वर्थकर्मत्वापत्तिः।

ननु चैत्रो ग्रामं गच्छति इत्यत्र गमिधातोः संयोगावच्छिन्नव्यापारवाचकत्वेऽपि धात्वर्थतावच्छेदकसंयोगस्य चैत्रग्रामोभयनिष्ठतया चैत्रस्यापि तदाश्रयस्य कर्मत्वापत्तिः। तथा च चैत्रः स्वं गच्छति इति प्रयोगापत्तिः। एवं खगः तरुं त्यजति इत्यत्र त्यजधातोः विभागागावच्छिन्नव्यापारवाचकत्वेऽपि विभागस्य तरुखगोभयनिष्ठतया तदाश्रयस्य खगस्यापि कर्मत्वापत्तिः। तथा च खगः स्वं त्यजति इति प्रयोगापत्तिरिति चेत् — न।

धात्वर्थे परसमवेतत्वमपि विशेषणं देयम्। तथा च स्वभिन्नसमवेतो यो धात्वर्थः तन्निष्ठं यत् धात्वर्थत्वं तदवच्छेदकधर्मवत्त्वं तद्धार्थकर्मत्वम्। स्वं कर्मत्वेनाभिमतम्। स्वसमवेतायां धात्वर्थक्रियायां स्वभिन्नसमवेतत्वविरहात् न स्वस्य कर्मत्वापत्तिः।

चैत्रो ग्रामं गच्छति इत्यत्र गमिधातोः संयोगानुकूलव्यापारोऽर्थः। द्वितीयायाः आधेयत्वं भेदश्चार्थः। आधेयत्वे प्रकृत्यर्थस्य ग्रामस्य निरूपितत्वसंबन्धेनान्वयः। भेदे च तस्य प्रतियोगितासंबन्धेनान्वयः। आधेयत्वस्य आश्रयतासंबन्धेन धात्वर्थतावच्छेदकसंयोगे, भेदस्य स्वाश्रयसमवेतत्वसंबन्धेन चान्वयः। आख्यातार्थः कृतिः। तत्रानुकूलतासंबन्धेन धात्वर्थव्यापारस्यान्वयः। कृतेश्चाश्रयतया प्रथमान्तार्थचैत्रेऽन्वय इति ग्रामनिरूपिताधेयताश्रयसंयोगजनकः ग्रामप्रतियोगिकभेदवत्समवेतो यो व्यापारः तदनुकूलकृत्याश्रयः चैत्र इति बोधः।

वस्तुतस्तु आधेयत्वं भेदप्रतियोगितावच्छेदकत्वं च द्वितीयार्थः। उभयमपि आश्रयतासंबन्धेन फले क्रियायां च यथासंख्यमन्वेति। आधेयत्वे प्रकृत्यर्थस्य निरूपितत्वसंबन्धेन भेदे च आधेयतासंबन्धेनान्वयः। तथा च चैत्रो ग्रामं गच्छति इति वाक्यात् ग्रामनिष्ठसंयोगजनिका ग्रामनिष्ठभेदप्रतियोगितावच्छेदिका च या क्रिया तदनुकूलकृतिमांश्चैत्र इति बोधः इति।

जगदीशमतं द्वितीयार्थकर्मत्वम्

शब्दशक्तिप्रकाशिकायां तर्कालंकारा अपि धात्वर्थतावच्छेदकफलाश्रयत्वं कर्मत्वमित्येवाभिप्रयन्ति। परं तु परसमवेतत्वस्य द्वितीयार्थत्वं कर्मत्वशरीरे प्रवेशं च विनैव चैत्रः स्वं गच्छति इति प्रयोगं वारयन्ति। तथा हि — चैत्रो ग्रामं गच्छति

इत्यत्र संयोगरूपं फलं द्वितीयार्थः। तत्र स्वप्रतियोगिकत्वसंबन्धेन प्रकृत्यर्थस्य ग्रामस्यान्वयः। संयोगस्य जनकत्वस्वाश्रयवृत्तित्वोभयसंबन्धेन धात्वर्थव्यापारेऽन्वयः। तथा च ग्रामप्रतियोगिकत्वविशिष्टसंयोगाश्रयवृत्तितज्जनकक्रियानुकूलकृत्याश्रयः चैत्र इत्यन्वयबोधः। चैत्रप्रतियोगिकत्वविशिष्टसंयोगाश्रयत्वस्य चैत्रेऽभावात् स्वाश्रयवृत्तित्वरूपसंबन्धबाधात् न चैत्रः स्वं गच्छति इति प्रयोगापत्तिः इति।

व्युत्पत्तिवादरीत्या कर्मत्वस्वरूपं द्वितीयार्थश्च

व्युत्पत्तिवादे भट्टाचार्यैः तर्कालंकारप्रस्तुतं प्राचीनमतं नवीनमतं च परिष्कृत्य उपन्यस्य स्वमतं सयुक्तिकमाविष्कृतम्। ग्रन्थे विस्तृतम्, अत्र संगृह्यते। कर्मणि द्वितीया इत्यनुशासनात् कर्मत्वं द्वितीयार्थः। कर्मत्वं च क्रियाजन्यफलशालित्वम्। तत्र क्रिया धातुत एव लभ्यते। क्रियाफलयोः जन्यजनकभावः संसर्गमर्यादया लभ्यत इति फलमात्रं द्वितीयार्थः। फलत्वं च धात्वर्थव्यापारे विशेषणतया भासमानत्वे सति धात्वर्थजन्यत्वम्। तत्र मन्दं गच्छति, द्रुतं गच्छति इत्यादौ धात्वर्थव्यापारे मन्दादेः तादात्म्येनान्वयात् मन्दादावतिव्याप्तिवारणाय धात्वर्थजन्यत्वनिवेशः। गम्यादिधात्वर्थसंयोगानुकूलव्यापारजन्यत्वस्य पूर्वदेशविभागादौ सत्त्वात् तदाश्रयपूर्वदेशादावतिव्याप्तिवारणाय सत्यन्तनिवेशः।

न च संयोगविभागादिरूपं फलमपि धातुलभ्यमेव। गमित्यजिप्रभृतीनां संयोगविभागाद्यवच्छिन्नव्यापारवाचकत्वादिति वाच्यम्। व्यापारमात्रस्य धात्वर्थत्वात् इति प्राचीनमतम्। तन्मते ग्रामं गच्छति इत्यत्र संयोगो द्वितीयार्थः। व्यापारो धात्वर्थः। संयोगे ग्रामस्य आधेयतासंबन्धेनान्वयः। संयोगस्य जनकतासंबन्धेन धात्वर्थव्यापारेऽन्वयः। व्यापारस्य आख्यातार्थकृतौ अनुकूलतासंबन्धेनान्वयः। कृतेश्चाश्रयतासंबन्धेन चैत्रेऽन्वयः। तथा च ग्रामवृत्तिसंयोगजनकव्यापारानुकूलकृत्याश्रयश्चैत्रः इत्यन्वयबोधः।

नवीनास्तु संयोगादिरूपफलविशेषावच्छिन्नव्यापारो गम्याद्यर्थः। तत्तद्धात्वर्थतावच्छेदकफलशालित्वमेव तत्तद्धातुकर्मत्वम्। अतो गम्यादिकर्मत्वस्य पूर्वदेशादौ न प्रसङ्गः। पूर्वदेशस्य गम्यर्थगमनजन्यविभागवत्त्वेऽपि गम्यर्थतावच्छेदकसंयोगवत्त्वाभावात्। अत्र तत्तद्धात्वर्थानधिकरणत्वे सतीत्यपि विशेषणीयम्। तेन चैत्रादौ कर्तरि गम्-धात्वर्थतावच्छेदकसंयोगवत्त्वेऽपि चैत्रो गच्छति इत्यादौ न गमनकर्मत्वापत्तिः। फलपदं च क्रियाजन्यपरम्। तेन धात्वर्थतावच्छेदकं व्यापारत्वमादाय तदाश्रये व्यापारे न कर्मत्वापत्तिः। एवं च धातोरेव फलविशेषलाभात्

फलान्वयि आधेयत्वमेव द्वितीयार्थः। चैत्रो ग्रामं गच्छति इति वाक्यात् ग्राम-निरूपिताधेयत्वाश्रयसंयोगावच्छिन्नव्यापारानुकूलकृतिमांश्चैत्रः इत्यन्वयबोध इत्याहुः।

एतन्मतद्वयेऽपि सुदूरं गुणदोषविचारं कृत्वा आधेयत्वं द्वितीयाया अर्थः। फलं व्यापारश्च धात्वर्थः। आधेयत्वस्य फले फलस्य जनकतया व्यापारेऽन्वय इति निष्कर्षः कृतः।

परसमवेतत्वविचारः

चैत्रः स्वं गच्छति इति प्रयोगवारणाय परसमवेतत्वमपि द्वितीयार्थः इष्यते। परसवेतत्वं च भेदवत्समवेतत्वम्। भेदे च एकदेशेऽपि आकाङ्क्षावैचित्र्यात् प्रकृत्यर्थस्य प्रतियोगितासंबन्धेनान्वयः। एवं च ग्रामं गच्छति चैत्रः इत्यत्र ग्रामप्रतियोगिकभेदवत्समवेता ग्रामनिष्ठसंयोगजनिका या क्रिया तदनुकूलकृत्या-श्रयश्चैत्रः इत्यन्वयबोधः। संयोगजनकस्वनिष्ठक्रियायां स्वभिन्नसमवेतत्वस्य बाधात् चैत्रः स्वं गच्छति इति न प्रयोगः।

एवं सत्यपि बहवो दोषा भवन्तीति आक्षिप्य कारकचक्रानुसारेण आधेयत्वं भेदप्रतियोगितावच्छेदकत्वं च द्वितीयार्थः। आधेयत्वे निरूपितत्वसंबन्धेन, भेदे च आधेयत्वसंबन्धेन प्रकृत्यर्थस्यान्वयः। आधेयत्वस्य भेदप्रतियोगितावच्छेदकत्वस्य च आश्रयत्वसंबन्धेन धात्वर्थफले क्रियायां चान्वयः। तथा च ग्रामनिष्ठभेद-प्रतियोगितावच्छेदिका ग्रामनिष्ठसंयोगजनिका या क्रिया तदनुकूलकृतिमांश्चैत्र इत्यन्वयबोधः इत्युक्तम्।

परं त्वेवमपि विहगो भूमिं गच्छति इतिवत् विहगो विहगं गच्छति इति प्रयोगापत्तिः। विहगनिष्ठभूमिसंयोगजनकक्रियायाः विहगान्तरनिष्ठभेदप्रतियोगिता-वच्छेदकतया विहगनिष्ठभेदप्रतियोगितावच्छेदकविहगवृत्तिसंयोगजनकक्रियाश्रयत्व-स्याबाधितत्वात् इत्याक्षिप्य, तर्हि आधेयत्वमात्रं धात्वर्थसंयोगादिफलान्वयि द्वितीयार्थः। विहगवृत्तित्वविशिष्टस्य संयोगस्य धात्वर्थक्रियायां स्वजनकत्व-स्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वोभयसंबन्धेन अन्वयः। स्वं = संयोगः। विहगनिष्ठक्रियायाः तद्विहगनिष्ठसंयोगजनकत्वेन जनकतासंबन्धेन तत्संयोगवत्त्वे-ऽपि विहगवृत्तित्वविशिष्टतत्संयोगाश्रयतद्विहगनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावात् नोक्तोभयसंबन्धेन विशिष्टसंयोगवत्त्वमिति नातिप्रसङ्गः इति समाहितम्।

भट्टाचार्यैरेव लकारार्थप्रकरणे तु एवं प्रतिपादितम् — ग्रामं गच्छति इत्यादौ फलं भेदश्च द्वितीयार्थः। आधेयतासंबन्धेन ग्रामस्य फलेऽन्वयः। फलस्य अपरस्मिन् द्वितीयार्थे भेदे सामानाधिकरण्यस्वजनकक्रियावच्छिन्नप्रतियोगिता-

कत्वोभयसंबन्धेनान्वयः। भेदस्य स्वप्रतियोगितावच्छेदकत्वसंबन्धेन धात्वर्थे तस्याख्यातार्थकृतौ तस्य प्रथमान्तार्थे ऽन्वयः। तथा च ग्रामवृत्तिसंयोगसमानाधिकरणः तादृशसंयोगजनकक्रियावत्प्रतियोगिकश्च यो भेदः तत्प्रतियोगितावच्छेदकीभूता या क्रिया तदनुकूलकृत्याश्रयश्चैत्र इति चैत्रो ग्रामं गच्छति इति वाक्यात् बोधः — इति।

खण्डदेवमतानुसारेण द्वितीयार्थः

खण्डदेवास्तु नैयायिकमतं बहुधा दूषयित्वा चैत्रः स्वं गच्छति इति प्रयोगवारणमेवं कुर्वन्ति — कर्मत्वमखण्डोपाधिरूपम्। तच्च परसमवेतक्रियाजन्यफलशालित्वसमनियतमेव। अतः परिचायकस्य परसमवेतक्रियाजन्यफलशालित्वस्याभावात् तत्परिचेयं कर्मत्वम् अखण्डोपाधिरूपं चैत्रे नास्तीति न चैत्रश्चैत्रं गच्छति इति प्रयोगापत्तिः। परसमवेतक्रियाजन्यफलशालित्वाज्ञानेऽपि गोकर्मकमानयनम्, ओदनकर्मकः पाकः, ग्रामकर्मकं गमनम् इति व्यवहारात् अखण्डोपाधिरूपं कर्मत्वं सिध्यति। तच्च कर्मत्वम् उक्तव्यवहाररूपकर्मत्वाख्यधर्मिग्राहकप्रमाणेन ससंबन्धिकमेव कल्प्यत इति तस्य तत्तद्धात्वर्थनिरूपितत्वसिद्धिः — इति।

यत्तु वैयाकरणाः — आकडारादेका संज्ञा[१] इति सूत्रेण एकसंज्ञाप्रयुक्तकार्यसत्त्वे संज्ञान्तरप्रयुक्तं कार्यं निषिध्यते। तथा हि — तेन सूत्रेण, इत आरभ्य कडाराः कर्मधारये[२] इत्यतः प्राक् एकस्यैकैव संज्ञा न संज्ञाद्वयमिति नियम्यते। तत्र या संज्ञा प्रवर्तते तन्निमित्तकमेव कार्यं भवति। तत्रापि या संज्ञा परा अनवकाशा च सा संज्ञान्तरं बाधित्वा प्रवर्तते। यथा वैकुण्ठमधिशेते हरिः इत्यत्र वैकुण्ठस्य आधारोऽधिकरणम्[३] इत्यनेनाधिकरणसंज्ञा अधिशीङ्स्थासां कर्म[४] इति सूत्रेण कर्मसंज्ञा च प्राप्ता। तयोर्मध्ये अधिकरणसंज्ञां बाधित्वा परत्वात् कर्मसंज्ञैव प्रवर्तते। तेन तन्निमित्तिका द्वितीयैव भवति, न त्वधिकरणसंज्ञानिमित्ता सप्तमी। तद्वत् प्रकृतेऽपि चैत्रश्चैत्रं गच्छति इत्यत्र धात्वर्थतावच्छेदकसंयोगरूपफलाश्रयत्वेन कर्तुरीप्सिततमं कर्म[५] इत्यनेन चैत्रस्य कर्मसंज्ञा, धात्वर्थव्यापाराश्रयत्वेन स्वतन्त्रः कर्ता[६] इत्यनेन कर्तृसंज्ञा च प्राप्ता। तत्र परंसूत्रविहितत्वात् कर्तृसंज्ञैव प्रवर्तते।

---

[१] सू. १.४.१
[२] सू. २.२.३८
[३] सू. १.४.४५
[४] सू. १.४.४६
[५] सू. १.४.४९
[६] सू. १.४.५४

तया कर्मसंज्ञाया बाधनात् तत्प्रयुक्ता द्वितीया न प्रवर्तते। कर्तृसंज्ञायाः सत्वात् तिङा कर्तुः उक्तत्वात् अभिहिते तु प्रथमैवेत्युक्त्या प्रथमैव भवति। एवं च परसमवेतत्वादौ न शक्त्यन्तरमिति।

तन्न। चैत्रोऽहं स्वात्मानं जानामि आत्मानमात्मना वेत्सि इत्यादावेकस्यैव अनेकसंज्ञाप्रयुक्तानेकविभक्तिदर्शनात् आकडारादेका संज्ञा इति परिभाषणस्यायुक्तत्वात्।

ननु तत्र शरीरमनोरूपावच्छेदकभेदमादाय आत्मभेदं स्वीकृत्य संज्ञाभेदः तत्प्रयुक्तविभक्तिभेदश्च उपपादनीयः। तदुक्तं णेरणौ[1] इत्यादिसूत्रे भाष्ये — यदा एकमेव वस्तु बुद्ध्या प्रविभज्य कर्मत्वेन कर्तृत्वेन च विवक्ष्यते तदा आत्मनेपदं प्राप्नोतीत्याशङ्क्य — द्वावात्मानौ अन्तरात्मा शरीरात्मा च। अन्तरात्मा तत्कर्म करोति, येन शरीरात्मा सुखदुःखे अनुभवति इति । वस्तुत एवात्र आत्मभेदः, न त्वेकस्यैव कर्तृत्वं कर्मत्वं चेत्यर्थः इति कैयटः। एवं च आत्मन एकस्यापि अवच्छेदकभेदेन भिन्नतया नैकत्र संज्ञाद्वयकार्यप्रवृत्तिरिति चेत् — मैवम्। तथात्वे स्वपदप्रयोगानुपपत्तेः। ज्ञात्रपेक्षया ज्ञेयस्य भिन्नत्वात्। अन्यथा चैत्रः चैत्रं गच्छति इत्यपि प्रयोगः स्यात्। एकस्यैव चैत्रस्य आत्मन इव अवान्तरभेदमादाय भेदस्य सुलभत्वात् — इति भाट्टरहस्ये न्यरूपि।

वैयाकरणमतानुसारेण कर्मत्वविचारः

भूषणसारे कर्मत्वनिर्वचनम्

कर्मणि द्वितीया[2] इति सूत्रात् कर्म द्वितीयार्थः। कर्म च कर्तुरीप्सिततमम्। क्रियाजन्यफलाश्रय इति तदर्थः। तत्र क्रियायाः फलस्य च धातुनैव लाभात् अनन्यलभ्यः आश्रय एव द्वितीयार्थः। ओदनं पचति इत्यत्र ओदनः पाकजन्यविक्लित्त्याश्रय इति कर्म भवति। द्वितीयार्थे आश्रये प्रकृत्यर्थस्य ओदनस्य अभेदसंबन्धेनान्वयः। आश्रयस्य स्ववृत्तित्वसंबन्धेन विक्लित्तावन्वयः। ओदनाभिन्नाश्रयवृत्तिविक्लित्तिजनको व्यापार इति बोधः।

चैत्रश्चैत्रं गच्छति इति प्रयोगवारणं तु द्वेधा — प्रथमं तु परया कर्तृसंज्ञया कर्मसंज्ञाया बाधः इत्येकम्। इदं तु खण्डदेवेन दूषितम्। द्वितीयं तु — प्रकारतासंबन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणीभूताश्रयोपस्थितिः कारणमिति कार्यकारणभावान्तरकल्पनात् प्रकृते चैत्रस्य व्यापारानधि-

---

[1] सू. १.३.६७
[2] सू. २.३.२

करणत्वाभावान्न दोष इति। परसमवेतत्वस्य द्वितीयार्थत्वं तु भूषणसारे बहुधा दूषितम्। तत्सर्वं मया विस्तरेण लिखितं द्रष्टव्यम्।

नागेशमतम्

लघुमञ्जूषायां नागेशभट्टाः कर्मत्वं द्वितीयार्थं च प्रकारान्तरेण निष्कर्षन्ति। तथा हि — द्वितीयायाः कर्मत्वशक्तिमान् विशेषणत्वं क्रियाकारकभावसंबन्धश्चार्थः। क्रियाजन्यफलाश्रयत्वातिरिक्तैव कर्मत्वशक्तिरखण्डा। अत एव क्रियाजन्यफलाश्रयत्वात् कर्मत्वमिति व्यवहार उपपद्यते। अन्यथा कर्मत्वात् कर्मत्वमिति व्यवहारवत् अयोग्यं तादृशवाक्यं स्यात्। कर्मणि द्वितीया[1] इति सूत्रस्वरसात् कर्मत्वशक्तिमान् अर्थः। कष्टं श्रितो भवति इत्यत्र क्रियाकारकयोरभिसंबन्धस्य द्वितीया वाचिका भवति इति समर्थसूत्रभाष्यात् क्रियाकारकभावसंबन्धोऽर्थः। भेदसमानाधिकरणविशेषणत्वज्ञाने एव संबन्धाकाङ्क्षा जायत इति विशेषणत्वमप्यर्थः। कर्मत्वशक्तिश्च द्वितीयाद्योत्या प्रकृत्यर्थविशेषणमेव। पञ्चकं प्रातिपदिकार्थ इति व्यवस्थापितत्वात्। आख्यातस्यापि कर्तृत्वादिशक्तिमानर्थः। कर्मभूततण्डुलविशिष्टः चैत्राभिन्नकर्तृकः वर्तमानः पाकः इति चैत्रस्तण्डुलं पचति इति वाक्याधीनो बोधः।

पदवाक्यरत्नाकरे विभक्त्यर्थनिर्णये च भूयान् विचारः वर्तते। तथा कर्तुरीप्सिततमं कर्म[2] तथायुक्तं चानीप्सितम्[3] इति सूत्रद्वयावश्यकताविषये च न्यायमीमांसाव्याकरणग्रन्थेषु बहु पराक्रान्तम्। एवं कर्मविभागः द्वितीयाविधायकसूत्रान्तराणां च विवेचनं शाब्दबोधमीमांसायां द्रष्टव्यम्। उपोद्घातत्वात् मुख्यविषयसारांशोऽत्र प्रादर्शि।

तृतीयार्थविचारः

तत्र वैयाकरणमतम्

कर्तृकरणयोस्तृतीया[4] इति सूत्रेण कर्तरि करणे च तृतीया अनुशिष्टा। तत्र कर्तृत्वं करणत्वं च किंरूपमिति विचार्यते। स्वतन्त्रः कर्ता[5] इति सूत्रम्। कारकाधिकारात् क्रियाजनने स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्। स्वातन्त्र्यं

---

[1] सू. २.३.२
[2] सू. १.४.४९
[3] सू. १.४.५०
[4] सू. २.३.२८
[5] सू. १.४.५४

प्राधान्यमिति भाष्ये स्पष्टम्। प्रधानीभूतधात्वर्थं प्रति आश्रयत्वं प्राधान्यमिति प्रौढमनोरमायाम्। प्राधान्यं च कर्तृप्रत्ययसमभिव्याहारे धात्वर्थनिष्ठविशेष्यता-निरूपितप्रकारतानाश्रयधात्वर्थत्वमिति शब्दरत्ने। स्थाली पचति इत्यादौ स्थाल्या-दीनां स्वातन्त्र्याभावात् कर्तृत्वं न स्यात्। अत उक्तं स्वातन्त्र्येण विवक्षितोऽर्थ इति। विवक्षातः कारकाणि भवन्तीति भाष्यात्। लघुमञ्जूषायां तु तृतीयायाः कर्तृकरणे अर्थः। कर्तृत्वं च कर्तृसंज्ञाबोधितकर्तृत्वशक्तिमत्वम्। सा च शक्तिः कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रये वर्तते। प्रकारतानाश्रयेति धात्वर्थे विशेषणम्। चैत्रस्तण्डुलं पचति इत्यादौ विक्लित्त्यनुकूलव्यापारः पच्यर्थः। तन्निष्ठा या विशेष्यता तन्निरूपिता प्रकारता विक्लित्तिनिष्ठा तदाश्रयः विक्लित्तिः तदनाश्रयः व्यापारः, तदाश्रयत्वात् चैत्रस्य कर्तृत्वम्। उक्तधात्वर्थाश्रयत्वमेव स्वातन्त्र्यम्। स्थालीस्थे यत्ने पचिना कथ्यमाने स्थाली स्वतन्त्रेति कारके[1] इति सूत्रे भाष्योक्तेः। तत्र सति संभवे तद्धात्वर्थ-कृतिव्यापारोभयाश्रयसमानाधिकरणैव कर्तृताशक्तिः। अतो गुरुतरोत्तोलनादिविषय-कयत्नसत्त्वेऽपि तत्क्रियाया अनिष्पत्तौ न तत्र कर्तृत्वव्यवहारः। कालिकादिसंबन्धेन व्यापाराश्रये काष्ठादौ कर्तृत्ववारणाय व्यापारतावच्छेदकसंबन्धेन व्यापाराश्रयत्वं वक्तव्यम्। एतेन सामग्रीसाध्यायां क्रियायां सर्वेषां स्वव्यापारे स्वातन्त्र्यात् सूत्रे स्वतन्त्र इत्यव्यावर्तकमित्यपास्तम्। धात्वर्थघटितप्रागुक्तस्वातन्त्र्यस्य युगपत् सर्वेष्व-भावात्। यन्निष्ठो व्यापारो धातुना अभिधीयते स स्वतन्त्र इत्यर्थात् न सर्वकारकेषु युगपत् स्वातन्त्र्यं, किं तु विवक्षावशेनेति ज्ञापनार्थं स्वतन्त्रग्रहणम् — इति न्यरूपि।

भूषणसारोक्तः तृतीयार्थः

कर्तृतृतीयाया आश्रयोऽर्थः। तथा हि — स्वतन्त्रः कर्ता। स्वातन्त्र्यं च धात्वर्थव्यापाराश्रयत्वम्। धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते इति वाक्यपदीयात्। अत एव यदा यदीयो व्यापारो धातुना अभिधीयते तदा स कर्तेति स्थाली पचति, अग्निः पचति, एधांसि पचन्ति, तण्डुलः पच्यते स्वयमेव इत्यादि संगच्छते। एवं च व्यापारांशस्य धातुलभ्यत्वात् आश्रयमात्रं तृतीयार्थः। अयं कर्ता त्रिविधः — शुद्धः, प्रयोजको हेतुः, कर्मकर्ता च। मया हरिः सेव्यते, कार्यते हरिणा, गमयति कृष्णं गोकुलम् इति क्रमेणोदाहरणानि। मदभिन्नाश्रयको हरि-कर्मकसेवनानुकूलो व्यापारः, हर्यभिन्नाश्रयकः उत्पादनानुकूलो व्यापारः, गोकुल-

---

[1] सू. १.४.२३

कर्मकगमनानुकूलकृष्णाश्रयकतादृशव्यापारानुकूलो व्यापार इति शाब्दबोधः — इति प्रत्यपादि।

कारकचक्रे भवानन्दतर्कवागीशोक्तं तृतीयार्थकर्तृत्वम्

अनुकूलकृतिमत्त्वं कर्तृत्वम्, न तु अनुकूलव्यापारवत्त्वम्। पाकानुकूलव्यापारवत्त्वप्रतिसन्धाने सत्यपि काष्ठादौ स्वरसतः कर्तृपदाप्रयोगात्। अपि च कृताकृतविभागादिना कृधातोः यत्नार्थकत्वं निश्चीयते। तथा हि — ओदनसाधककृतिजन्ये कलायपाके मत्तो भूतं न तु मया कृतमिति व्यपदेशात् ओदनपाकः कृतः न तु कलायपाकः इति विभागः कृताकृतविभागः। एवं च कृधातोः यत्नार्थकत्वात् कृदन्तकर्तृपदस्य यत्नाश्रय एव स्वारसिकोऽर्थः। अचेतने कर्तृपदप्रयोगस्तु लाक्षणिकः। यदि चान्यविषयककृतिजन्ये नान्तरीयके मत्तो भूतं न तु मया कृतमिति व्यवहारात् न मुख्यं कर्तृत्वं तदा तत्तद्विषयकत्वेनापि कृतिर्विशेषणीया। एवं च स्वविषयकत्वस्वजनकत्वोभयसंबन्धेन तत्तत्क्रियाविशिष्टकृतिमत्त्वं कर्तृत्वमिति फलितम्। एवं च चैत्रेण पच्यते तण्डुलः इत्यादौ तृतीयायाः कृतिरर्थः। चैत्रवृत्तिकृतिजन्यतद्विषयपाकनिरूपितकर्मतावान् तण्डुलः इति बोधः इत्याहुः।

व्युत्पत्तिवादे भट्टाचार्योक्तं तृतीयार्थकर्तृत्वम्

कारकविभक्तितृतीयायाः क्रियान्वयि कर्तृत्वं करणत्वं चार्थः। कर्तृत्वं च मुख्यं क्रियानुकूला कृतिरेव। सा च कर्त्राख्यातस्थले चैत्रः पचति इत्यादौ क्रियाविशेष्यतया आख्यातेन प्रतिपाद्यते। चैत्रः पाकानुकलकृतिमानिति बोधः। कर्मभावाख्यातश्थले च चैत्रेण पच्यते, शय्यते इत्यादौ क्रियायां विशेषणतया तृतीयया कृतिः प्रत्याय्यते। चैत्रवृत्तिकृतिजन्यपाकर्म ओदनः, चैत्रवृत्तिकृतिजन्यं शयनम् इति बोधः इत्याहुः।

एतावता वैयाकरणमते चैत्रेण पच्यते ओदनः इत्यत्र तृतीयायाः आश्रयोऽर्थः। तत्राभेदेन प्रकृत्यर्थस्यान्वयः। आश्रयस्य धात्वर्थव्यापारे अन्वयः। चैत्राभिन्नाश्रयकविक्लित्त्यनुकूलो व्यापार इति बोधः। नागेशमते तु तृतीयायाः कर्तृत्वशक्तिमान् अर्थः। अन्यत् पूर्ववत्। नैयायिकमते तत्र तृतीयायाः कृतिरर्थः। तत्र आधेयतासंबन्धेन प्रकृत्यर्थस्यान्वयः। कृतेर्जन्यतासंबन्धेन धात्वर्थव्यापारे अन्वयः। आख्यातस्य कर्मत्वमर्थः। तत्र निरूपितत्वसंबन्धेन धात्वर्थस्य, कर्मत्वस्य च आश्रयतासंबन्धेन प्रथमान्तार्थे ओदनेऽन्वयः। तथा च चैत्रवृत्तिकृतिजन्यव्यापारनिरूपितकर्मतावान् ओदन इति बोधः।

मीमांसकोक्तं कर्तृत्वम्

मीमांसकमते कृत्याश्रयत्वं मुख्यकर्तृत्वम्। यत्नवाचिकृञ्-धातुघटितत्वात् कर्तृशब्दस्य। अन्यत्र कर्तृत्वव्यवहारो भाक्त एव। वस्तुतस्तु — धर्मे चार्थे च कामे नातिचरितव्या त्वयेयं पत्युर्नो यज्ञसंयोगे[१] जायापती अग्नीनादधीयाताम् इत्यादिप्रमाणानुसारात् पत्न्या अपि यजमानवदेव कर्तृत्वे अवगते वसन्ते ब्राह्मणोऽग्नीनादधीत यजेत स्वर्गकामः इत्यादौ एकत्वश्रवणं लक्षणायां प्रमाणाभावात् व्यासज्यवृत्ति एकं कर्तृत्वमवगमयति। तच्च न सखण्डोपाधिरूपम्, बाधात्। प्रयत्नस्य भेदात्। अपि तु पूर्वोक्तसखण्डोपाधिव्यापकमखण्डोपाधिरूपम्। तद्गतमेव चैकत्वादिकम्। इदमेव च कर्तृत्वं तृतीयार्थः। तस्य च चैत्रेण पच्यते इत्यत्र स्वनिरूपकपाकानुकूलत्वसंबन्धेन निरूपकत्वसंबन्धेन वा लिङ्गानन्वयिभावनायामन्वयः। ओदनकर्मकचैत्रकर्तृकपाकानुकूला कृतिरिति वा ओदनकर्मकपाकानुकूला चैत्रकर्तृककृतिरिति वा बोधः — इति भाट्टरहस्ये निष्कृष्टम्। एतेषु मतेषु संभवदाक्षेपपरिहाराः प्रकृतग्रन्थे विस्तृताः द्रष्टव्याः।

करणत्वनिर्वचनम्

करणत्वनिर्वचनं वैयाकरणानुसारेण

कर्तृकरणयोस्तृतीया[२] इति सूत्रेण करणत्वेऽपि तृतीया अनुशिष्टा। साधकतमं करणम्[३] इति सूत्रेण करणत्वं निरुक्तम्। क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यादिति तदर्थः। यद्व्यापारादनन्तरं क्रियानिष्पत्तिः तत् प्रकृष्टम्। उक्तं च वाक्यपदीये —

> क्रियायाः परिनिष्पत्तिः यद्व्यापारादनन्तरम्।
> विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्।।

इति। यत्र = येषां कारकाणां मध्ये। विवक्ष्यत इत्यनेन स्थाल्यादीनामपि वैवक्षिकं करणत्वमस्तीति ध्वनयति। आह च तत्रैव —

> वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
> स्थाल्या पच्यत इत्येषा व्यवस्था दृश्यते यतः।।

---

[१] सू. ४.१.३३
[२] सू. २.३.१८
[३] सू. १.४.४२

इति। वस्तुतः = वस्तुनि। सार्वविभक्तिकस्तसिः। तत् कर्तृत्वादि। अनिर्देश्यम् = इदं वस्तु कर्तैव करणमेव इत्यादिक्रमेण न निर्देष्टुं शक्यम्। हि यतः वस्तु तत्तद्रूपेण न व्यवस्थितम्। तामेवाव्यवस्थां दर्शयति — स्थाल्येत्यादिना। कर्तरि करणे च तृतीयाया उदाहरणम् — रामेण बाणेन हतो वाली इति। रामेणेत्यत्र तृतीयायाः कर्ता अर्थः। बाणेनेति तृतीयायाः करणमर्थः। रामाश्रयको यो व्यापारः तद्विषयो यो वाणाश्रयकव्यापारसाध्यप्राणवियोगः तदाश्रयो वाली इति शाब्दबोधः इति प्रौढमनोरमादौ निरूपणम्।

लघुमञ्जूषायां तु करणत्वं च करणत्वशक्तिमत्त्वम्। सा च शक्तिः यदीयव्यापाराव्यवधानेन क्रियानिष्पत्तिः विवक्ष्यते तन्निष्ठा। अधिकरणादिव्यापारव्यवधानेन यदा क्रियानिष्पत्तिर्विवक्ष्यते तदा तेषामपि करणत्वमिष्टमेव। पूर्वोदाहृतवाक्यपदीयानुसारात्। तथा च करणत्वशक्तिमान् तृतीयार्थः। तत्र प्रकृत्यर्थस्याभेदान्वयः। तस्य च स्वनिष्ठव्यापाराव्यवहितोत्तरोत्पत्तिकत्वसंबन्धेन धात्वर्थेऽन्वय इत्येके। करणबाणनिष्ठो वध इति बाणाभिन्नकरणको वध इति वा बोधः इति वा तत्त्वम्। विस्तरः सर्वो ग्रन्थे।

कारकचक्रे निरुक्तं करणत्वम्

करणत्वं च कारकान्तरे चरितार्थत्वे सति हेतुत्वम्। तत्र चरितार्थत्वं च तद्व्यापारमुत्पाद्यैव फलहेतुत्वम्। कर्ता हि सिद्धं कुठारादिकं व्यापारयन् छेदनरूपं फलमुत्पादयतीति करणे चरितार्थो न तु फले। कर्मापि करणे चरितार्थं, कर्मासिद्धौ करणव्यापारासिद्धेः। न हि छेद्यासिद्धौ कुठारादिकरणानां छिदानुकूलव्यापारः संभवति। अत एव करणव्यापारविषयत्वं कर्मत्वमिति प्राञ्चः। अधिकरणमपि कर्तृकर्मान्यतरव्यापारकक्रियानिष्पादकम्। यथा गृहे चैत्रः स्थाल्यां तण्डुलं पचति इत्यत्र चैत्रव्यापारसंपादनेन गृहस्य, तण्डुलव्यापारसंपादनेन स्थाल्याश्च कारकत्वम्। चैत्रव्यापारः चैत्रस्थितिरूपश्चैत्रसंयोगः। तण्डुलव्यापारः तण्डुलसंयोगः। संप्रदानापादानयोश्च क्रियासामान्यहेतुत्वम्। दाने अनुमतिप्रकाशनेन कर्तुरिच्छामुत्पाद्य संप्रदानस्य, पर्णादौ पतनप्रतिबन्धकसंयोगनाशकविभागमुत्पाद्य अपादानस्य चरितार्थत्वमिति।

एवं च तदनुकूलव्यापारमद्वारीकृत्य तज्जनकत्वं फलायोगव्यवच्छिन्नकारणत्वपर्यवसितं करणत्वमिति फलितम्। एवं च फलाव्यवहितपूर्वकारणत्वमेव करणत्वमिति कुठारादौ करणपदं गौणमिति भवानन्दमतम्।

परं तु तत्रैव वस्तुतस्तु इत्यादिना पक्षान्तरमुक्तम्। तद्यथा — व्यापारवत् कारणं करणम्। तेन कुठारादौ नाव्याप्तिः। न चैवमदृष्टद्वारा कार्यसामान्यं प्रति, विशेषतो मनस्संयोगद्वारा ज्ञानेच्छादिकं प्रति आत्मनः कारणत्वात् करणत्वापत्तिरिति वाच्यम्। उपधेयसंकरेऽप्युपाधेरसंकरात्। धर्मभेदेऽपि धर्मिण ऐक्यादिति तदर्थः। एकस्मिन् धर्मिणि कर्तृत्वकरणत्वयोः सत्त्वेऽपि न विरोध इति तात्पर्यम्। जगदीशेनापि व्यापारवत् कारणं करणमिति पक्ष एव आदृतः।

गदाधरोक्तं करणत्वम्

गदाधरभट्टाचार्यैरपि स एव पक्षः स्वीकृतः। परं तु यथाश्रुते कांश्चित् दोषानाशङ्क्य तत्परिहाराय परिष्कारः कृतः। स चेत्थम् — स्वव्यापारप्रयोज्यत्वस्वावृत्तित्वोभयसंबन्धेन समभिव्याहृतकर्तृविशिष्टव्यापारवत्कारणत्वं करणत्वमिति।

भाट्टरहस्योक्तं करणत्वम्

भाट्टरहस्ये तु पूर्वोक्तलक्षणेषु दोषमुपन्यस्य अन्ते करणं करणम् इत्याद्यनुगतप्रतीत्या सिद्धम् अखण्डोपाधिरूपमेव करणत्वम्। तदेव च तृतीयार्थः। तस्य करणत्वस्य स्वनिरूपकधात्वर्थानुकूलत्वसंबन्धेन भावनायामन्वयः। तथा च कुठारनिष्ठकरणतानिरूपकछेदनानुकूला भावनेति कुठारेण छिनत्ति इति वाक्यात् बोधः। इतरसूत्राणामकारकतृतीयाविधायकसूत्राणां व्याख्यानं तत्तदुदाहरणेषु बोधप्रकारश्च ग्रन्थे द्रष्टव्यः। विशिष्य सहशब्दार्थविचारः सावधानमवलोकनीयः इति प्रार्थये।

चतुर्थ्यर्थसंप्रदानत्वविवेचनम्

वैयाकरणोक्तः चतुर्थ्यर्थः

चतुर्थी संप्रदाने[1] इति सूत्रेण संप्रदाने चतुर्थी विहिता। "कर्मणा यमभिप्रैति स संप्रदान"मिति सूत्रेण संप्रदानसंज्ञा विवृता। दानक्रियायाः कर्मकारकेण यमभिप्रैति स संप्रदानमित्यर्थः। संप्रदीयते यस्मै तत् संप्रदानमिति अन्वर्थसंज्ञा एषा। देयद्रव्योद्देश्यं संप्रदानमिति फलितम्। विप्राय गां ददाति इत्युदाहरणम्। विप्रमुद्दिश्य गां ददातीत्यर्थः। अनभिहिते इति अनुवर्तते। तेन दानीयो विप्रः इत्यत्र विप्रशब्दान्न चतुर्थी। तत्र हि कृत्यल्युटो बहुलम्[2] इति बहुलग्रहणात् संप्रदाने अनीयर्। दानोद्देश्य इत्यर्थः। तेन कृत्प्रत्ययेन संप्रदानस्य विप्रस्याभिहितत्वान्न चतुर्थी।

---

[1] सू. २.३.१३
[2] सू. ३.३.१३३

लघुमञ्जूषायाम्

कारकचतुर्थ्याः संप्रदानत्वशक्तिमानर्थः। सा शक्तिश्च तद्धात्वर्थकर्मनिष्ठफल-निरूपकत्वेन इच्छाविषयो यस्तन्निष्ठा। यथा विप्राय गां ददाति इत्यत्र दानकर्म गौः। तन्निष्ठं फलं स्वत्वम्। तन्निरूपकत्वेन दातुः इच्छाविषयः विप्रः। विप्रः गोनिष्ठदानजन्यस्वत्वनिरूपको भवतु इति दातुरिच्छा। कर्मणा यमभिप्रैति इति सूत्रादयमर्थो लभ्यते। कर्मणा संबन्धुं यमिच्छति कर्मनिष्ठफलनिरूपकत्वेन यमिच्छति स संप्रदानमिति सूत्रार्थात्।विप्राय गां ददाति इत्यत्र संप्रदानं चतुर्थ्यर्थः। तत्राभेदेन विप्रस्यान्वयः। संप्रदानस्यस्वनिष्ठोद्देश्यतानिरूपकत्वसंबन्धेन धात्वर्थदाने अन्वयः। विप्राभिन्नसंप्रदाननिष्ठोद्देश्यतानिरूपकं दानमित्यन्वयबोधः। वस्तुतस्तु संप्रदानविप्रीयं, विप्राभिन्नसंप्रदानकं दानमिति वा बोधः — इति प्रतिपादितम्।

कारकचक्रपरिष्कृतं संप्रदानत्वम्

कारकचक्रे तावदेवं परिष्कृतम् — कर्मणा यमभिप्रैति स संप्रदानम्[१] इति सूत्रम्। तत्क्रियाकरणीभूतेन तत्क्रियाकर्मणा यं सबन्धीकर्तुमभिप्रैति कर्ता स संप्रदानमिति सूत्रार्थः। एवं च तत्क्रियाकरणीभूतकर्मजन्यफलभागित्वेन उद्देश्यत्वं संप्रदानत्वमिति पर्यवसितम्। चैत्रो ग्रामं गच्छति इत्यत्र गमनकर्मग्रामजन्य-फलभागित्वेन उद्देश्यत्वस्य चैत्रे सत्त्वात् तस्य संप्रदानत्ववारणाय करणीभूतेति कर्मविशेषणम्। तत्र गमने कर्मणः ग्रामस्याकरणत्वान्न दोषः। दानादौ च गवादिदेयद्रव्यं कारणमिति तज्जन्यफलाश्रयस्य विप्रादेः संप्रदानत्वम्। काष्ठैः स्थाल्यामोदनं पचति इत्यादौ पाकक्रियाकारणजन्यविक्लित्त्यादिफलभागित्वेन ओदनस्य उद्देश्यत्वात् तस्य संप्रदानत्ववारणाय कर्मेति। तथा च विप्राय गां ददाति इत्यत्र जन्यफलप्रकारकेच्छापूर्वकत्वं चतुर्थ्यर्थः। तदेकदेशजन्यत्वे व्युत्पत्ति-वैचित्र्यात् अप्रकृत्यर्थस्यापि कर्मणो गोः निरूपितत्वसंबन्धेनान्वयः। स्वस्वत्व-ध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागः दाधातोरर्थः। तत्र चतुर्थ्यर्थस्य स्वरूप-संबन्धेनान्वयः। एवं च विप्रविषयकगोजन्यफलप्रकारकेच्छापूर्वकगोवृत्तिस्वनिरू-पितस्वत्वध्वंसपूर्वकपरस्वत्वावच्छिन्नत्यागानुकूलकृतिमान् इत्यन्वयबोधः। स्वं = दाता। परः = विप्रः। इति प्रोक्तम्।

शब्दशक्तिप्रकाशिकायां परिष्कृतं संप्रदानत्वम्

गत्यादिभिन्ने यद्धातूपस्थाप्ये यादृशेऽर्थे विग्रहस्थचतुर्थ्या यः स्वार्थो बोधयितुं शक्यते स तद्धातूपस्थाप्यतादृशक्रियायां संप्रदानत्वमुच्यते। तथा च कारकत्वे

---

[१] सू. १.४.३२

सति यद्धातूपस्थाप्यगत्यादिभिन्नयादृशार्थधर्मिकबोधप्रकारो यश्चतुर्थ्यर्थः, स तद्धातूपस्थाप्यतादृशार्थे संप्रदानत्वमिति निष्कर्षः। ब्राह्मणाय दानं धनस्य इत्यत्र ददातेः स्वत्वजनकत्यागोऽर्थः। तन्निविष्टे च स्वत्वे ब्राह्मणादेः प्रतियोगित्वं निरूपकत्वं वा चतुर्थ्या बोध्यत इति तदेव संप्रदानत्वम्। गत्यादिभिन्नधात्वर्थतावच्छेदकस्वत्वनिरूपकत्वं संप्रदानत्वमिति फलितम्। ब्राह्मणप्रतियोगिकं ब्राह्मणनिरूपितं वा यत् धनवृत्ति स्वत्वं तज्जनकस्त्याग इति बोधः। स्वत्त्वाख्यफलवत्तया धनादेः दानकर्मत्वम्। गत्यादिभिन्ने इत्यनुक्तौ धात्वर्थे प्रकारीभूतो योऽर्थः स संप्रदानमित्युक्ते ग्रामाय गतः इत्यत्र चतुर्थ्यर्थस्य कर्मत्वस्य संप्रदानत्वरूपता स्यात्। कर्मत्वस्य तत्र गम्-धात्वर्थे गमने प्रकारत्वात्। अतो गत्यादिभिन्ने इति धात्वर्थविशेषणम् इति।

गदाधरभट्टाचार्यपरिष्कृतं संप्रदानत्वम्

ब्राह्मणाय गां ददाति इत्यादौ संप्रदानार्थकचतुर्थ्या ब्राह्मणादिसंप्रदानकत्वं दानादौ बोध्यते। संप्रदानत्वं च मुख्यभाक्तसाधारणं क्रियाकर्मसंबन्धितया कर्त्रभिप्रेतत्वं कर्तृगतेच्छाविषयत्वम्। क्रियाकर्मत्वं च क्रियाजन्यफलशालित्वम्। तद्वता कर्मत्ववता संबन्धः तन्निष्ठफलशालित्वम्। कर्मत्ववन्निष्ठफलशालित्वम्। तथा च क्रियाजन्यफलशालितया कर्तुरिच्छाविषयत्वं संप्रदानत्वमिति फलितम्। उक्तस्थले त्यागरूपक्रियाजन्यगोनिष्ठस्वत्वभागितया दातुः इच्छाविषयो ब्राह्मण इति तस्य संप्रदानत्वम्। एतदुपरि कर्मत्वसंप्रदानत्वयोः को भेद इति शङ्का अवतरति। अत्र विषये सुदूरं विचार्य धात्वर्थतावच्छेदकफलाश्रयतया इच्छाविषयत्वं कर्मत्वम्। धात्वर्थतावच्छेदकफलसंबन्धितया इच्छाविषयत्वं संप्रदानत्वमिति निष्कर्षः कृतः। ब्राह्मणादिश्च न त्यागजन्यस्वत्वाश्रयतया दातुरिच्छाविषयः, अपि तु तादृशस्वत्वनिरूपकतया। अतो न तस्य कर्मता।

एवं च ब्राह्मणाय गां ददाति इत्यत्र स्वत्वजनकत्यागः दाधात्वर्थः। द्वितीयान्तार्थगोवृत्तित्वस्य स्वत्वेऽन्वयः। निरूपितत्वप्रकारकेच्छाविषयत्वं चतुर्थ्यर्थः। निरूपितत्वे प्रकृत्यर्थस्य ब्राह्मणस्यान्वयः। ब्राह्मणनिरूपितत्वप्रकारकेच्छाविषयगोनिष्ठस्वत्वजनकत्यागानुकूलकृतिमान् देवदत्त इति बोधः। ब्राह्मणनिरूपितं गोनिष्ठं स्वत्वं भवतु इति इच्छायाः आकारः। विचारविस्तरो ग्रन्थे द्रष्टव्यः।

पदवाक्यरत्नाकरे गोकुलनाथोपाध्यायोक्तं संप्रदानत्वम्

संप्रदानत्वं चतुर्थ्यर्थः। दानस्य वा क्रियासामान्यस्य वा यत् फलं तदाश्रयत्वं संप्रदानत्वम्। दाधातोः स्वत्वानुकूलः त्यागः अर्थः। स्वत्वध्वंसानुकूलस्य

व्यापारस्य दाधात्वर्थत्वे उपेक्षायामपि ददातीति व्यवहारः स्यात्। त्यागस्तु न मम, किं त्वस्य इत्याकारक- इच्छाविशेषः। न ममेत्यनेनांशेन उपेक्षासाधारणेन स्वत्वध्वंसं प्रति जनकः। स्वरूपसंबन्धेन तत्पुरुषीयस्वत्वध्वंसं प्रति स्वत्वध्वंसनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन तत्पुरुषीयत्यागः कारणम्। किं तु अस्येत्यनेनांशेन परस्वत्वं प्रति जनकता। स्वत्वध्वंसो व्यापारः। ब्राह्मणाय गां ददाति इत्यत्र निरूपकत्वं चतुर्थ्यर्थः। निरूपकत्वे आधेयतासंबन्धेन ब्राह्मणस्यान्वयः। निरूपकत्वस्य स्वनिरूपितनिरूप्यतासंबन्धेन धात्वर्थस्वत्वेऽन्वयः। यद्वा स्वत्वं चतुर्थ्यर्थः। तत्र ब्राह्मणस्य स्वसमवेतस्वामित्वनिरूपितत्वसंबन्धेनान्वयः। स्वत्वस्य जनकतासंबन्धेन त्यागेऽन्वयः। तथा च ब्राह्मणनिरूपितस्य ब्राह्मणसमवेतस्वामित्वनिरूपितस्य स्वत्वस्य स्वत्वध्वंसद्वारा जनकः त्याग इति बोधः इत्याहुः। परं त्वेतन्मते कर्मत्वसंप्रदानत्वयोः वैलक्षण्यं कथमिति शङ्का अवतिष्ठते।

संप्रदानप्रभेदाः

इदं च संप्रदानं कर्तुः अनिराकरणात्, कर्तुः प्रेरणात्, कर्तुः अनुमतेश्चेति त्रिविधम् —

> अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।
> प्रेरणानुमतिभ्यां च लभते संप्रदानताम्।।

इति वाक्यपदीयोक्तेः। कर्त्रा दीयमानं संप्रदानत्वेन अभिमतः न निराकरोति चेत् अनिराकर्तृसंप्रदानमिति कथ्यते। यथा — सूर्याय अर्घ्यं ददाति। नात्र सूर्यः प्रार्थयते, नानुमन्यते, न निराकरोति। अनिराकर्तृसंप्रदानत्वं चतुर्थ्यर्थः। द्वितीयस्य उदाहरणम् — विप्राय गां ददाति विप्रोऽत्र दातुः प्रेरकः। तृतीयस्योदाहरणम् — उपाध्यायाय गां ददाति। उपाध्यायोऽत्र दातुः अनुमन्ता। त्यागाङ्गं कर्मणा ईप्सितं कर्तुः अनिराकरणात्, कर्तुः प्रेरणात्, कर्तुः अनुमतेश्चेति त्रिभिः हेतुभिः संप्रदायव्यपदेशं लभत इति कारिकाया अर्थः। त्यागाङ्गत्वं नाम स्वनिष्ठोद्देश्यतानिरूपकत्वसंबन्धेन समभिव्याहृतधात्वर्थे विशेषणतया प्रतीयमानत्वम्। स्वं संप्रदानम्। उद्देश्यं चतुर्थ्यर्थः इति फलति।

भाट्टरहस्योक्तं संप्रदानत्वम्

अथ भाट्टरहस्यानुसारेण संप्रदानत्वं चतुर्थ्यर्थश्च निरूप्यते। उद्देश्यत्वं स्वीकारश्च चतुर्थ्यर्थः। तत्रोद्देश्यत्वस्य स्वनिरूपकद्रव्यविषयकत्यागानुकूलत्वसंबन्धेन आख्यातार्थभावनायामन्वय इति न्यायसुधाकारादयः। वस्तुतस्तु — न्यायसुधाकृन्मते

चतुर्थ्याः उद्देश्यत्वस्वीकाररूपार्थद्वये शक्तिद्वयकल्पनम्। नव्यवैयाकरणमते उद्देश्यत्वनिरूपितत्वरूपार्थद्वये शक्तिद्वयकल्पनमिति गौरवम्, वैयाकरणमते धात्वर्थैकदेशे चतुर्थ्यर्थान्वयस्वीकारेण पदार्थः पदार्थेनान्वेति न तु तदेकदेशेन इति व्युत्पत्तिविरोधात् उभयनिरुक्तसंप्रदानत्वस्य अज्ञानेऽपि विप्राय गां ददाति इति वाक्यात् विप्रसंप्रदानकं गोकर्मकं दानमिति बोधोदयाच्च देयद्रव्यनिष्ठस्वत्वनिरूपकत्वरूपं तत्समनियतमखण्डोपाधिरूपमेव वा संप्रदानत्वमिति युक्तमाश्रयितुम्। तदेव च चतुर्थीशक्यार्थः। तत्र प्रकृत्यर्थो विप्रः साक्षात् आधेयत्वसंबन्धेनान्वेति। तस्य च संप्रदानत्वस्य धर्मिग्राहकप्रमाणेन ससंबन्धिकत्वकल्पनात् निरूपकापेक्षायां कर्मणा यमभिप्रैति स संप्रदानम्[१] इति सूत्रात् कर्मकारकस्य निरूपकत्वावगतेः स्वनिरूपकदेयद्रव्यकर्मकदानानुकूलत्वसंबन्धेन भावनायामन्वयः। द्वितीयार्थोऽपि अखण्डोपाधिरूपं कर्मत्वम्। तस्य स्वनिरूपकदानानुकूलत्वसंबन्धेन भावनायामन्वयः। विप्रनिष्ठसंप्रदानत्वविशिष्टा गोनिष्ठकर्मत्वविशिष्टा भावनेति बोध इति। इतरसूत्रार्थविचारः ग्रन्थे द्रष्टव्यः।

अपादानत्वविचारः

वैयाकरणोक्तमपादानत्वम्

अपादानेऽर्थे अपादाने पञ्चमी[२] इति सूत्रेण पञ्चमी विहिता। अपादानसंज्ञा तु ध्रुवमपायेऽपादानम्[३] इति सूत्रेण विवृता। अपायो नाम विश्लेषः। वियोग इति यावत्। द्वयोः संयुक्तयोः अन्यतरस्य चलनात् वियोगः।

तादृशचलनानाश्रयभूतं ध्रुवम्। तच्चेहार्थादवधिभूतं विवक्षितम्। विश्लेषे साध्ये तदवधिभूतं कारकमपादानसंज्ञं स्यादिति सूत्रार्थः। ग्रामादायाति इत्युदाहरणम्। कस्मात् आगच्छतीत्याकाङ्क्षाविषयत्वात् ग्रामोऽवधिरित्यपादानम्। अवधिः पञ्चम्यर्थः। ग्रामावधिकमागमनमिति बोधः। माथुराः पाटलिपुत्रेभ्यः आढ्यतराः इत्यादौ बुद्धिकल्पितविश्लेषावधित्वमादाय अपादानत्वमिति भाष्ये स्पष्टम्। ध्रुवशब्दस्य चलनानाश्रय इति यथाश्रुतार्थं परित्यज्य अवधिभूतमिति व्याख्यानात् धावतोऽश्वात् पतति इत्यत्र अश्वस्यापादानत्वोपपत्तिः। अश्वस्य चलनाश्रयत्वेऽपि पतनक्रियां प्रति कस्मात् इत्याकाङ्क्षाविषयत्वलक्षणमवधित्वं वर्तत इति अपादानसंज्ञेति। इदं चापादानम् —

---

[१] सू. १.४.३२
[२] सू. २.३.२८
[३] सू. १.४.२४

निर्दिष्टविषयं किंचिदुपात्तविषयं तथा।
अपेक्षितक्रियं चेति त्रिधापादानमिष्यते।।

इति वाक्यपदीयात् त्रिविधम्। यत्र साक्षात् धातुना विभागजनकक्रिया निर्दिश्यते तन्निर्दिष्टविषयम् — यथा अश्वात् पतति। यत्र धात्वन्तरार्थाङ्गकं स्वार्थं धातुराह तत् उपात्तविषयम् — यथा वलाहकात् विद्योतते विद्युत्। अत्र निःसरणाङ्गकं विद्योतनं द्युतधातोरर्थः। अनुपात्तधात्वर्थक्रियासाकाङ्क्षमपेक्षितक्रियमित्युच्यते। यथा कुतो भवान्, पाटलिपुत्रात् अत्र आगमनरूपमर्थमध्याहृत्यान्वयः कार्य इति वैयाकरणाः।

नैयायिकेषु भवानन्दतर्कवागीशोक्तमपादानत्वम्

परकीयक्रियाजन्यविभागाश्रयत्वमपादानत्वम्। परकीयत्वं परसमवेतत्वम्। यस्यापादानत्वं विवक्ष्यते तदपेक्षया परत्वमत्र बोध्यम्। वृक्षात् पर्णं पतति इत्यत्र अपादानवृक्षापेक्षया परं पर्णम्, तत्समवेता पतनक्रिया, तज्जन्यः विभागः वृक्ष-पर्णविभागः, तदाश्रयत्वं वृक्षस्यास्तीति तस्य अपादानता। पर्णनिष्ठपतनजन्य-विभागस्य वृक्षपर्णोभयनिष्ठतया पतनक्रियाजन्यविभागाश्रयस्य पर्णस्यापादानत्व-वारणाय क्रियायां परकीयत्वनिवेशः। अत्र तु पञ्चम्याः विभागजनकत्वं भेदप्रति-योगितावच्छेदकत्वं चार्थः। विभागे भेदे च वृक्षस्य आधेयतासंबन्धेनान्वयः। पञ्चम्यर्थयोः आधेयत्वसंबन्धेन धात्वर्थे पतने अन्वयः। एवं च वृक्षनिष्ठविभाग-जनकवृक्षनिष्ठभेदप्रतियोगितावच्छेदकपतनाश्रयः पर्णमिति बोधः। भेदः, वृक्षः पतनवान्नेति प्रतीतिसिद्धः तत्प्रतियोगितावच्छेदकं पतनं भवति इति प्राहुः।

जगदीशतर्कालंकारोक्तः पञ्चम्यर्थः

वृक्षात् पर्णं पतति इत्यत्र पञ्चम्याः विभागोऽर्थः। तत्र वृक्षस्य स्वावधिकत्व-संबन्धेनान्वयः। विभागस्य सामानाधिकरण्यानुकूलत्वोभयसंबन्धेन धात्वर्थे पतने अन्वयः। तथा च वृक्षावधिको यो विभागः तत्समानाधिकरणं तदनुकूलं च यत् पतनं तदाश्रयः पर्णमिति बोधः इत्याहुः।

गदाधरभट्टाचार्योक्तः पञ्चम्यर्थः

व्युत्पत्तिवादे आदौ कारकचक्रानुसारेण विभागजनकत्वं भेदप्रतियोगिताव-च्छेदकत्वं च पञ्चम्यर्थ इत्युक्तम्। परं त्वत्र पक्षे वृक्षात् पर्णं पतति न स्वस्मात् इत्यत्र पञ्चमीसमभिव्याहृतनञा किं पञ्चम्यर्थयोः भेदप्रतियोगितावच्छेदकत्व-विभागजनकत्वयोः द्वयोः अभावद्वयं बोध्यते, उत यथायोग्यमेकतरस्य वा। नाद्यः,

वृक्षात् पर्णं पतति न स्वस्मात् इत्यत्र स्वनिष्ठपतने स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावसत्त्वेऽपि स्वनिष्ठविभागजनकत्वाभावासत्त्वेन अयोग्यतापत्तेः। वृक्षात् पतति न भूतलात् इत्यत्र पतने भूतलनिष्ठविभागजनकत्वाभावासत्त्वेन अयोग्यतापत्तेश्च। नापि द्वितीयः, वृक्षात् पर्णं पतति न पर्णात् इत्यत्र पर्णनिष्ठपतने पर्णनिष्ठविभागजनकत्वसत्त्वेन तदभावः बाधितः, तथा पर्णान्तरनिष्ठभेदप्रतियोगितावच्छेदकत्वसत्त्वेन तदभावोऽपि बाधित इति योग्यतायाः निर्वाहयितुमशक्यत्वादिति आक्षेपः भवति।

तत्रेत्थं समाधानमभिहितम् — विभागो जनकत्वं च पञ्चम्यर्थः। विभागे प्रकृत्यर्थस्य अवधिकत्वं सबन्धः। तेन संबन्धेन प्रकृत्यर्थविशिष्टस्य विभागस्य विशिष्टनिरूपितत्वसबन्धेन जनकत्वेऽन्वयः। विशिष्टविभागनिरूपितजनकत्वस्य क्रियायामन्वयः। नञ्-समभिव्याहारे नञर्थेऽभावे तस्य प्रतियोगित्वसंबन्धेनान्वयः। अभावस्य क्रियायामन्वयः। जनकत्वं च फलोपाधानरूपम्। फलोपाधानं नाम कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वे सति कार्यसमानाधिकरणत्वम्। वृक्षपर्णविभागजनकपर्णनिष्ठपतनक्रिया च न पत्रावधिकत्वविशिष्टविभागोपाधायिका। पर्णस्य स्वावधिकत्वविशिष्टविभागानधिकरणत्वेन पर्णक्रियायां विशिष्टविभागसमानाधिकरणत्वाभावात्। अतो वृक्षात् पर्णं पतति न स्वस्मात् इति प्रयोगस्य नानुपपत्तिः। वृक्षावधिकत्वविशिष्टविभागजनकं स्वावधिकत्वविशिष्टविभागजनकत्वाभाववच्च यत् पतनं तदाश्रयः पर्णमिति हि तत्र बोधः। स च बाधितार्थविषयक इति।

खण्डदेवाचार्योक्तमपादानत्वम्

क्रियानाश्रयत्वे सति क्रियाजन्यविभागाश्रयत्वसमनियतम् अपादानमपादानमिति अनुगतव्यवहारसाक्षिकतया अखण्डोपाधिरूपमपादानत्वं कल्पयित्वा तत्रैव पञ्चम्याः शक्तिं कल्पयित्वा तत्र प्रकृत्यर्थस्य आधेयतासंबन्धेन अन्वयः अपादानत्वस्य स्वनिरूपकधात्वर्थानुकूलत्वसंबन्धेन आख्यातार्थभावनायामन्वयः स्वीकरणीयः। तथा च वृक्षात् पर्णं पतति इति वाक्यात् वृक्षनिष्ठापादानतानिरूपकपतनानुकूला पर्णनिष्ठा कृतिः इति बोधः इति निष्कर्षं चक्रुः। तत्कृतं मतान्तरपरिशीलनादिकं ग्रन्थे द्रष्टव्यम्। पञ्चमीविधायकानामितरसूत्राणां विवेचनमपि ग्रन्थ एव विस्तृतम्।

षष्ठ्यर्थविचारः

षष्ठी शेषे[1] इति षष्ठीविधायकं सूत्रम्। कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसंबन्धः शेषः। तत्र षष्ठी स्यात् इति सूत्रार्थः। राज्ञः पुरुषः। राजसंबन्धी पुरुषः। कर्मत्वकर्तृत्वादीनामपि संबन्धत्वसामान्यरूपेण विवक्षायां षष्ठ्येव। सतां गतम्. सत्संबन्धि गमनमित्यर्थः। कर्तृत्वेन विवक्षायां तु सद्भिर्गतम् इति तृतीया भवत्येव। सत्कर्तृकं गमनमित्यर्थः। कृद्योगलक्षणा षष्ठी तु न भवति. न लोकाव्ययनिष्ठाखलर्थतृनाम्[2] इति निषेधात्।

अत्र नागेशनिरूपितः षष्ठ्यर्थः

राज्ञः पुरुषः इत्यत्र स्वस्वामिभावः षष्ठ्यर्थः। स च स्वत्वस्वामित्वसमूहरूपः। यत्तु स्वामित्वं स्वत्वं वा षष्ठ्यर्थः इति। तन्न। तस्यैकमात्रवृत्तितया संबन्धत्वायोगात्। संबन्धो हि संबन्धिभ्यां भिन्नः उभयसंबन्धी। न च तदपि एकत्र आश्रयतया अन्यत्र निरूपकतया अस्त्येवेति वाच्यम्। निरूपकत्वस्य वृत्त्यनियामकतया उभयत्र संबन्धत्वप्रतीत्यनापत्तेः। उक्तं च हरिणा —

> द्विष्ठोऽप्यसौ परार्थत्वात् गुणेषु व्यतिरिच्यते।
> तत्राभिधीयमानश्च प्रधानेऽप्युपयुज्यते।।

इति। परार्थत्वात् गुणानां परं प्रति विशेषणत्वेन विवक्षितत्वादित्यर्थः। अयं भावः — भेदे सति विशेषणतया विवक्षितस्य संबन्धं विना विशेषणत्वासंभवेन तदाकाङ्क्षितत्वात् तत्र विशेषणे संबन्धो व्यतिरिच्यते उद्भूततया प्रतीयते इति तत्रैव षष्ठी। विशेष्ये तु पदान्तरासमभिव्याहारे स्वार्थनिरूपितविशेष्यत्वेन भासमानत्वरूपस्वनिष्ठत्वादेव न विशेष्यतानियामकसंबन्धापेक्षा। तत्र विशेषणे शब्देन षष्ठ्यादिना अंशतः प्रतीयमानः प्रधानेऽप्युपयुज्यते। तस्य संबन्धस्य द्विष्ठत्वस्वभावत्वात् राजादिनिरूपितविशेष्यतायाः राजादिपदसंनिधाने प्रतीयमानायाः उपकारको भवतीत्यर्थः।

एवं च सर्वत्र संबन्धिद्वयवृत्तिधर्मसमूहः स्वसंबन्धिनोः भेदे संबन्धः। स्पष्टं चेदं यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी[3] इति सूत्रे भाष्ये। तत्र हि अधिब्रह्मदत्ते पञ्चालाः इत्यत्र अनेन सूत्रेण ब्रह्मदत्ते सप्तम्यां पञ्चालात् द्वितीया प्राप्नोति।

---

[1] सू. २.३.५०
[2] सू. २.३.६९
[3] सू. २.३.९

अधिद्योत्यस्य ब्रह्मदत्तनिष्ठस्य संबन्धस्य तया असंप्रत्ययात् इत्युक्तम्। अन्यतरस्यैव संबन्धत्वे तु भाष्यासङ्गतिः स्पष्टैव।

धर्मद्वयसमूहस्य संबन्धत्वादेव स्वस्वामिभावः अवयवावयविभावः आधाराधेयभावः प्रतियोग्यनुयोगिभावः विशेष्यविशेषणभावः संबन्धः इत्यादिव्यवहार उपपद्यते। तत्राभावप्रतियोगिनोः प्रतियोगित्वानुयोगित्वसमूहः संबन्धः। इति निष्कर्षः।

व्युत्पत्तिवादानुसारेण शेषषष्ठ्यर्थः

संबन्धविवक्षायां कारकविभक्त्यप्रसक्तेः शेषे षष्ठी इत्यनेन चैत्रस्येदम् इत्यादौ षष्ठी विधीयते। चैत्रस्य द्रव्यम् इत्यत्र स्वत्वं षष्ठ्यर्थः। चैत्रनिरूपितस्वत्ववत् द्रव्यमिति बोधः। चैत्रस्य स्वम्, घटस्य कारणम् इत्यादौ निरूपितत्वं षष्ठ्यर्थः। चैत्रनिरूपितस्वत्ववत्, घटनिरूपितकारणत्ववत् इति बोधः। चैत्रस्य हस्तः इत्यादौ अवयवत्वं षष्ठ्यर्थः। चैत्रनिरूपितावयवत्ववान् हस्त इति बोधः। अत्र स्वत्वनिरूपितत्वावयवत्वादीनां संबन्धत्वेनैव षष्ठ्यर्थता, न तु विशिष्य स्वत्वत्वादिना। शक्त्यानन्त्यप्रसङ्गात्।

न च संबन्धत्वेन रूपेण संबन्धानां षष्ठीवाच्यत्वे चैत्रस्य नेदं वासः इति प्रयोगानुपपत्तिः, अन्यदीयवाससि चैत्रसंयोगदशायां चैत्रसंबन्धाभावस्य बाधितत्वात् इति वाच्यम्। चैत्रस्वत्वाभावतात्पर्येण हि तथा प्रयोगः। अतस्तत्र विशेषरूपेण स्वत्वत्वेन स्वत्वे षष्ठ्याः लक्षणा। चैत्रनिरूपितस्वत्वाभाववत् वासः इति तत्र बोध इति नानुपपत्तिः प्रयोगस्य। न च तथा सति सुब्विभक्तौ न लक्षणेति प्रवादासंगतिरिरिति वाच्यम्। तादृशप्रवादस्य अनुशासनासत्त्वे एकविभक्त्यर्थेऽपरविभक्तेर्न लक्षणेत्येतत्परत्वात्। अत एव चैत्रो गच्छति इत्यादौ प्रथमादेः न द्वितीयार्थकर्मत्वे लक्षणा। अतो न तत्र चैत्रकर्मकगमनप्रतीतिः। अनुशासनसत्त्वे तु पशुना रुद्रं यजते इत्यादौ कर्मत्वे तृतीयायाः, संप्रदानत्वे द्वितीयायाश्च लक्षणा इष्टैव। एवं च प्रकृते अनुशासनविरहेऽपि स्वत्वादेः विभक्त्यन्तरार्थत्वविरहेण षष्ठ्याः स्वत्वत्वेन रूपेण स्वत्वे लक्षणायां बाधकाभावः — इति।

पदवाक्यरत्नाकरानुसारेण शेषषष्ठ्यर्थः

प्रथमादीनां यानि प्रवृत्तिनिमित्तानि संबुद्धित्वादीनि तदितरधर्मविशेषः शेषः। तं षष्ठी संबन्धत्वेन प्रवृत्तिनिमित्तेनाभिधत्ते। संबन्धत्वं हि नाम संयोगसमवायस्वस्वामिभाववैशिष्ट्यकरणत्वकर्मत्वादिषु अनुगतम् अनुयुक्तत्वप्रतियुक्तत्वादिकम्। अनुयुक्तत्वं सानुयोगिकत्वम्। प्रतियुक्तत्वं सप्रतियोगिकत्वम्। एकमात्रनिष्ठस्य

संबन्धत्वविरहात् उभयनिष्ठस्यैव तथात्वेन च संयोगादीनाम् उभयोरेकं प्रतियोगि अपरं चानुयोगि। यत्संबन्धेन यस्य यस्मिन् बुद्धिः प्रमा तत्संबन्धस्य तदनुयोगिकत्वं तत्प्रतियोगिकत्वं च। अनुयोगित्वप्रतियोगित्वे स्वरूपसंबन्धविशेषात्मके। यतः समवाये वाय्वनुयोगिकत्वावच्छिन्नरूपप्रतियोगिकत्वविरहात् न वायौ रूपमिति प्रतीतिव्यवहारौ। स एव चानुयुक्तत्वादिर्धर्मः संबन्धत्वम्। एकशतं षष्ठ्यर्थाः इति महाभाष्यवचनमपि न प्रवृत्तिनिमित्तानामपरिमितत्वं ग्राहयति, किं तु विशेष्यसंबन्धव्यक्तीनाम्।

एवं च राज्ञः पुरुषः घटस्य रूपम् इत्यादौ राजप्रतियोगिकत्वघटानुयोगिकत्वादिना रूपेण स्वत्वसमवायादिः पुरुषरूपादौ भासते। राजप्रतियोगिकवान् पुरुषः, घटानुयोगिकवत् रूपम् इति बोधः। न तु स्वत्वत्वसमवायत्वादिना स्वत्वसमवायादिः भासते। तथा सति मातुः स्मरति इत्यादौ कर्मतात्वेन कर्मतायाः षष्ठीवाच्यतापत्त्या कर्मतात्वस्य च द्वितीयावाच्यतावच्छेदकतया तद्विशिष्टस्य पूर्वोक्तशेषत्वानुपपत्त्या शेषे षष्ठी न स्यात्। न च मातुः स्मरति इत्यत्र या षष्ठी सा अधीगर्थदयेशां कर्मणि[1] इत्यनुशासनसिद्धा कारकषष्ठी, न तु शेषषष्ठीति वाच्यम्। तत्रापि सूत्रे शेषे इत्यस्यानुवृत्तेः — इति।

सप्तम्यर्थविचारः

दीक्षितादिनिरूपितः सप्तम्यर्थः

सप्तम्यधिकरणे च[2] इति सूत्रेण अधिकरणेऽर्थे सप्तमी विधीयते। आधारोऽधिकरणम्[3] इति सूत्रेणाधिकरणसंज्ञा विवृता। तत्र सूत्रे कारके इत्यधिकृतं प्रथमान्ततया विपरिणम्यते। तच्चआधारस्य विशेषणम्। कारकमाधारः अधिकरणमिति लभ्यते। क्रियान्वयि कारकम्। कस्याधारः इत्याकाङ्क्षायाम् उपस्थितत्वात् क्रियाया इति लभ्यते। क्रिया च कर्तृकर्मगता विवक्षिता। तदाधारत्वं च न साक्षात्, किं तु कर्तृकर्मद्वारैव, व्याख्यानात्। तथा च कर्तृकर्मद्वारा तन्निष्ठक्रियायाः आधारभूतं कारकमधिकरणसंज्ञकं स्यादिति सूत्रार्थः। आधारः त्रिविधः। औपश्लेषिकः, वैषयिकः, अभिव्यापकश्चेति। उपश्लेषः संबन्धः संयोगादिः तत्कृतः आधारः औपश्लेषिकः। विषयतासंबन्धकृत आधारः वैषयिकः। सकलावयवव्याप्तिकृतः आधारः अभिव्यापकः। कटे आस्ते देवदत्तः अत्र साक्षात् देवदत्त-

---

[1] सू. २.३.५२

[2] सू. २.३.३६

[3] सू. १.४.४५

रूपकर्तृगतामासनक्रियां प्रति कटस्य संयोगसंबन्धं पुरस्कृत्य देवदत्तद्वारा क्रियाधारत्वात् अधिकरणत्वम्। स्थाल्यां पचति तण्डुलम् अत्र साक्षात् कर्मभूत-तण्डुलगतां पाकक्रियां प्रति स्थाल्याः संयोगसंबन्धं पुरस्कृत्य तण्डुलद्वारा आधारत्वात् अधिकरणत्वम्। मोक्षे इच्छा अस्ति अत्र कर्तृभूतेच्छागतां सत्ताक्रियां प्रति मोक्षस्य विषयतासंबन्धपुरस्कारेण इच्छाधारत्वात् अधिकरणत्वम्। सर्वस्मिन् आत्मा अस्ति अत्र आत्मरूपकर्तृगतां सत्ताक्रियां प्रति सर्वव्याप्तिं पुरस्कृत्य आत्मद्वारा सत्ताधारत्वात् सर्वस्याधिकरणत्वम्। अत्र सर्वत्र सप्तम्याः आश्रयोऽर्थः। तस्य स्वनिष्ठकर्तृकर्मान्यतरनिष्ठत्वसंबन्धेन धात्वर्थक्रियायामन्वयः इति दीक्षितादयः।

नागेशस्तु

अधिकरणसप्तम्याः अधिकरणत्वशक्तिमानर्थः। सा च शक्तिः कर्तृकर्मद्वारा क्रियाश्रयनिष्ठेति। अन्यत् पूर्ववदित्याह।

अत्र भवानन्दोक्तः सप्तम्यर्थः

स्थाल्यामोदनं पचति इत्यादौ अधस्सन्तापनस्य पाकस्य साक्षात् स्थाल्यवृत्तित्वेऽपि स्वाश्रयकर्मवत्त्वरूपपरम्परासंबन्धेन अधिकरणत्वमाधेयत्वं वा सप्तम्यर्थः पाकादावन्वेति।

तदुक्तं वाक्यपदीये —

कर्तृकर्मव्यवहितमसाक्षात् धारयत्क्रियाम्।
उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।।

इति। एवं च कर्तृकर्मान्यतरद्वारा क्रियाश्रयत्वे सति क्रियोपकारकत्वमधिकरणत्व-मिति पर्यवसन्नम्।

वस्तुतस्तु — कर्तृकर्मान्यतरद्वारेत्येतत् परित्यज्य परम्परया क्रियाश्रयत्व-मधिकरणत्वमित्येव वक्तव्यम्। अत एव प्राङ्गणस्थेन दीर्घदण्डादिना काष्ठादि-चालनद्वारा गृहान्तर्वर्तिपाककरणे कर्तृद्वारा क्रियानाश्रयत्वेऽपि गृहस्य गृहे चैत्रः पचति इति प्रयोग उपपद्यते। न चैवं परम्परयेति व्यर्थमिति वाच्यम्। साक्षात्क्रियाश्रयत्वेऽतिव्याप्तिवारकतया तत्सार्थक्यात्। तथा हि — अधस्संतापनं हि अधोवह्निसंयोगानुकूलकाष्ठवह्न्यादिव्यापारः। तस्य च साक्षात् वह्न्यादि-वृत्तित्वात् काष्ठे वह्नौ वा पचति इति प्रयोगः स्यात्, तद्वारणाय परम्परयेति।

न चैवं क्रियानिरूपिताधिकरणत्वस्यैव सर्वत्र सप्तम्यर्थत्वे क्रियायोगं विना भूतले घटः इत्यादिप्रयोगो न स्यादिति वाच्यम्। इष्टत्वादिति वैयाकरणाः।

अधिकरणत्वमाधेयत्वं वा सप्तम्यर्थः। स च यत्र क्रियान्वयी तत्र कारकत्वव्यवहारः। अत एव भूतले घटः इत्यादिक्रियाशून्यवाक्यात् भूतलनिरूपिताधेयतावान् घट इति शाब्दबोधो भवत्येवेति नैयायिकाः।

अत्र प्राञ्चः

गृहे स्थाल्यामोदनं पचति इत्यत्र परम्परासंबन्धेन गृहाधिकरणकस्थाल्यधिकरणकौदनकर्मकपाकानुकूलकृतिमानित्यन्वयबोधः। भूतले घट इत्यादौ सप्तम्याः अधिकरणत्वमर्थः। तत्र प्रकृत्यर्थस्य आधेयतासंबन्धेनान्वयः। अधिकरणत्वस्य सप्तम्यर्थस्य निरूपकतासंबन्धेन घटेऽन्वयः। तथा च भूतलनिष्ठाधिकरणतानिरूपको घटः इत्यन्वयधीः इत्याहुः।

नव्यास्तु

निरूपकत्वस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकतया नञा निरूपकतासंबन्धावच्छिन्नप्रतियोगिताकाधिकरणत्वाभावस्य बोधयितुमशक्यतया भूतले न घटः इति वाक्यार्थानुपपत्तिरिति भूतले घटः इत्यादावाधेयत्वमेव सप्तम्यर्थः। तत्र प्रकृत्यर्थस्य निरूपितत्वसंबन्धेनान्वयः। आधेयत्वस्याश्रयतासंबन्धेन घटेऽन्वयः। भूतलनिरूपिताधेयताश्रयो घट इति बोधः। भूतले न घटः इति वाक्यात् भूतलनिरूपिताधेयतानिष्ठाश्रयतासंबन्धावच्छिन्नप्रतियोगिताकाभाववान् घट इति बोधः। आश्रयत्वस्य वृत्तिनियामकतया प्रतियोगितावच्छेदकत्वसंभवात् नानुपपैत्तरित्याहुः। अधिकविस्तरो ग्रन्थे द्रष्टव्यः।

एवमेतावता तत्तद्विभक्तिविधायकानामारम्भसूत्राणामेवाभिप्रायः मतभेदेन संगृहीतः। कारकाधिकारीयाणि अन्यानि तत्तद्विभक्तिविधायकसूत्राणि अकारकविभक्तिविधायकसूत्राणि वार्तिकानि च सोदाहरणम् उदाहरणवाक्येषु शाब्दबोधवर्णनपूर्वकं तत्र तत्र तत्तच्छास्त्रानुसारिमतभेदप्रदर्शनपूर्वकं च प्रबन्धे विस्तरेण व्याख्यातानि। अत्र सर्वत्र विद्वांसः प्रमाणमिति विज्ञाप्य उपोद्घातनिगमनं करोमि।

इति
विद्वज्जनविधेयः
एन्. एस्. रामानुजताताचार्यः

विषयसूची

कारकलक्षणम् पृ. 1-35

१. सुबर्थविचारस्य प्राग्रूपम् 1
२. शब्दशक्तिप्रकाशिकानुसारेण प्रकृतित्वप्रत्ययत्वविभक्तित्वानां निर्वचनम् 2
३. प्रकृतिलक्षणम् 3
 १. स्वेतरार्थानवच्छिन्नेति विशेषणस्य प्रयोजनम् 3
 २. प्रकारान्तरेण प्रकृतिलक्षणम् 4
४. प्रत्ययलक्षणम् 4
 १. प्रकारान्तरेण प्रत्ययलक्षणम् 7
५. विभक्तिलक्षणम् 7
६. शब्दशक्तिप्रकाशिकानुसारेण सुपां लक्षणम् 8
७. विभक्त्यर्थनिर्णयानुसारेण विभक्तित्वादिनिर्वचनम् 8
 १. पूर्वपक्षः 8
 २. सिद्धान्तः 10
 ३. प्रत्ययत्वनिर्वचनम् 11
 ४. प्रकृतिलक्षणम् 14
८. न्यायदर्शनानुसारेण कारकत्वनिर्वचनम् 15
९. न्यायवार्तिकरीत्या कारकशब्दार्थः 15
१०. तात्पर्यटीकायां कारकशब्दार्थः 15
११. वार्तिके कारकशब्दार्थः 16
१२. तात्पर्यटीकायां च कारकशब्दार्थः 16
१३. सुबर्थविचारः शब्दशक्तिप्रकाशिङ्कानुसारेण 16
१४. शब्दशक्तिप्राकाशिकोक्तं कारकलक्षणम् 17
१५. कारकचक्रोक्तं कारकलक्षणम् 18
१६. बृहन्मञ्जूषानुसारेण कारकलक्षणम् 19
१७. लघुमञ्जूषायां कारकत्वनिरुक्तिः 20

१७. विभक्त्यर्थनिर्णयानुसारेण कारकत्वनिर्वचनम् 23
१. पूर्वपक्षः 23
२. सिद्धान्तः 24
३. प्रकारान्तरेण कारकलक्षणम् 26
४. प्रकारान्तरेण कारकत्वनिरुक्तिः 27
५. प्रकारान्तरेण कारकत्वनिरुक्तिः 34
६. कारकपदस्य नानाविधं शक्यम् 34
१८. भाट्टचिन्तामणौ कारकत्वविचारः 35

प्रथमार्थविचारः पृ. 37-66

१. बृहन्मञ्जूषायां प्रथमार्थविचारः 37
२. प्रथमार्थविचारः बालमनोरमामञ्जूषादौ 37
३. प्रौढमनोरमायां प्रथमार्थविचारः 40
४. शब्दशक्तिप्रकाशिकानुसारेण प्रथमायाः लक्षणम् 40
५. विभक्त्यर्थनिर्णयानुसारेण सुपां लक्षणम् 41
६. व्युत्पत्तिवादरीत्या प्रथमाविभक्त्यर्थः 41
७. पदवाक्यरत्नाकरानुसारं प्रथमार्थः 43
८. विभक्त्यर्थनिर्णयानुसारेण संबैंधनेतरप्रथमाविभक्त्यर्थनिरूपणम् 45
१. आक्षेपः 45
२. समाधानम् 46
३. प्रथमाया अभिहितकारकवाचित्वमतम् 50
४. तन्मतखण्डनम् 51
५. लिङ्गस्य प्रथमार्थत्वम् 52
६. परिमाणस्य प्रथमार्थत्वम् 53
७. संख्यायाः प्रथमार्थत्वम् 53
९. प्रथमाविभक्त्यर्थविषये मीमांसकमतम् 59
१०. कात्यायनमतेन प्रथमार्थः 61
११. तिङ्निपाताभिहिताभिहितकारकत्वं प्रथमार्थ इत्यत्र शङ्का 62
१२. उक्तशङ्कासमाधानम् 62
१३. पदवाक्यरत्नाकरे एतन्मतपरिशीलनम् 64
१४. भाट्टचिन्तामणौ प्रथमार्थविचारः 65

संबोधनप्रथमार्थविचारः पृ. ६७-८३

१. व्युत्पत्तिवादरीत्या संबोधनप्रथमार्थः 67
२. गोकुलनाथमतेन संबोधनप्रथमार्थः 68
३. बृहन्मञ्जूषायामुपपादितः संबोधनप्रथमार्थः 68
४. विभक्त्यर्थनिर्णयानुसारेण संबोधनप्रथमार्थः 70
५. प्रसङ्गाद् आशीर्लिङर्थः 73
६. युष्मच्छब्दार्थः 73
७. लिङर्थविचारः 74
८. प्रकारान्तरेण युष्मच्छब्दार्थः 75
९. संबोध्यत्वस्य क्रियाविशेषणत्वम् 77
१०. नागेशमतं संबोधनं लघुमञ्जूषायाम् 79
११. संबोधनपदस्य क्रियाविशेषणत्वम् 81
१२. भाट्टरहस्यरीत्या संबोधनविभक्त्यर्थः 82

द्वितीयार्थविचारः पृ. 85-301

१. कारकचक्रोक्तरीत्या कारकद्वितीयार्थः 85
२. परसमवेतत्वस्यापि द्वितीयार्थत्वम् 86
३. द्वितीयार्थस्यान्वयप्रकारः 86
४. जगदीशरीत्या कर्मत्वनिर्वचनम् 87
   १. परसमवेतत्वस्य द्वितीयार्थत्वं विनापि निर्वाहः 88
   २. परसमवेतत्वस्य द्वितीयार्थत्वखण्डनम् 88
   ३. भेदस्य द्वितीयार्थत्वखण्डनम् 89
   ४. प्राचां मतम् 90
   ५. मतान्तरम् 92
५. व्युत्पत्तिवादोक्तरीत्या कर्मत्वपरिष्कारः द्वितीयार्थश्च 93
   १. प्राचीनमतपरिष्कारः 93
   २. नवीनमतम् 95
   ३. अत्र आलोचनम् 96
   ४. मतान्तरम् 97
   ५. द्वितीयाया आधेयार्थकत्वे अनुपपत्तिपरिहारौ 98

६. भूमिं पततीति प्रयोगापत्तिवारणम् 98
७. हुधातुयोगे द्वितीयाविचारः 99
८. पतधातुयोगे द्वितीया वा सप्तमी वेति विचारः 100
९. परसमवेतत्वविचारः 101
६. विभक्त्यर्थनिर्णयानुसारेण द्वितीयाविभक्त्यर्थनिरूपणम् 104
१. विभक्त्यर्थनिर्णये सकर्मकत्वाकर्मकत्वपरिष्कारः 106
२. विभक्त्यर्थनिर्णये शाब्दिकमतम् 108
३. शाब्दबोधे क्रियायाः प्राधान्यम् 109
४. वैयाकरणमतखण्डनपूर्वकं तार्किकमतोपन्यासः 112
५. तान्त्रिकमतम् 113
७. विभक्त्यर्थनिर्णये द्वितीयायाः परसमवेतत्वे लक्षणा न तु शक्तिरिति मतखण्डनम् 116
८. नव्यशाब्दिकमतखण्डनम् 117
९. विभक्त्यर्थनिर्णये कर्माख्यातस्थले आख्यातार्थः शाब्दबोधश्च 119
१०. विभक्त्यर्थनिर्णये व्यापारमात्रं धात्वर्थ इति प्राचीनमतानुसारेण द्वितीयार्थनिष्कर्षः 120
१. विभक्त्यर्थनिर्णये भाट्टमतानुवादः 122
२. विभक्त्यर्थनिर्णये भाट्टमतपरिशीलनम् 123
३. विभक्त्यर्थनिर्णये भेदस्य द्वितीयार्थत्वे आक्षेपः 123
४. विभक्त्यर्थनिर्णये तस्य समाधानम् 124
५. विभक्त्यर्थनिर्णये विभक्तेर्लक्षणाविचारः 124
६. विभक्त्यर्थनिर्णये स्वमतोपन्यासः 125
११. विभक्त्यर्थनिर्णये सविषयकधातुयोगे द्वितीयार्थविचारः 126
१२. विभक्त्यर्थनिर्णये एकस्य ज्ञातृज्ञेयभावो न भवतीत्याक्षेपः तत्समाधानं च 128
१३. भाट्टरहस्येऽनूदितानि नैयायिकमतानि तद्दूषणानि च 129
१. नवीनतार्किकमतनिरसनम् 132
२. फलं भेदश्च द्वितीयार्थ इति मतनिराकरणम् 135
३. भेदार्थकत्वं विनैव स्वं गच्छतीति प्रयोगवारणप्रकारः 136
४. कर्मत्वस्याखण्डोपाधिरूपत्वम् 138
५. कर्मत्वस्याखण्डोपाधित्वनिरासः 140
१४. अभिहितं च नागेशभट्टैः लघुमञ्जूषायां तिङर्थनिरूपणे 141
१५. भाट्टचिन्तामणौ द्वितीयार्थः 142

१६. भूषणसाररीत्या कर्मत्वनिर्वचनं द्वितीयार्थश्च 142
१. नैयायिकमतनिरासः 144
२. वैयाकरणमते पक्षान्तरम् 145
१७. अस्य वैयाकरणमतस्य भाट्टरहस्ये दूषणम् 146
१८. पदवाक्यरत्नाकरे वैयाकरणमतपरिशीलनम् 147
१९. पदवाक्यरत्नाकरमतेन द्वितीयार्थनिर्णयः 148
२०. नागेशमतः द्वितीयार्थः 150
२१. कर्मत्वविचारशेषः 151
२२. प्रौढमनोरमास्थो विशेषः 153
२३. कर्मविभागः 154
१. व्युत्पत्तिवादे कर्मविभागः 157
२. पदवाक्यरत्नाकरे प्रदर्शितः कर्मविभागः 161
१. सतीवाविद्यमाना वेत्यस्यार्थः 162
२. प्रकृत्युच्छेदेत्यादिकारिकार्थः 163
२४. तथायुक्तमिति सूत्रार्थः 164
२५. विभक्त्यर्थनिर्णये प्रदर्शितः कर्मविभागः 164
२६. भाट्टचिन्तामणौ प्रदर्शितः कर्मविभागः 167
२७. द्विकर्मकधातुस्थले द्वितीयार्थविचारः 167
२८. अकथितं चेति सूत्रार्थः 167
१. गां दोग्धि पयः इति वाक्यार्थः 168
१. बृहन्मञ्जूषायां गां दोग्धि पयः इति वाक्यार्थः 169
२. तत्र शब्दशक्तिप्रकाशिकोक्तरीतिः 169
३. तत्र व्युत्पत्तिवादोक्तरीतिः 170
४. तत्र शाब्दिकमतचिन्तनम् 173
५. भाट्टरहस्ये गां दोग्धि पयः इति वाक्यार्थविचारः 174
२. याच्-धातुयोगे द्वितीयार्थः 175
१. शब्दशक्तिप्रकाशिकायाम् 175
२. व्युत्पत्तिवादे 175
३. पदवाक्यरत्नाकरे 175
४. विभक्त्यर्थनिर्णये 176
५. बालमनोरमायाम् 178
६. बृहन्मञ्जूषायाम् 178

७. शेखरे 179
८. लघुमञ्जषायाम् 179
३. पच्-धातुयोगे द्वितीयार्थः 180
१. व्युत्पत्तिवादे 180
२. पदवाक्यरत्नाकरे 180
३. बालमनोरमायाम् 180
४. शेखरे 181
५. लघुमञ्जूषायाम् 181
६. बृहन्मञ्जूषायाम् 181
४. दण्ड्-धातुयोगे द्वितीयार्थः 181
१. बालमनोरमायाम् 181
२. बृहन्मञ्जूषायाम् 182
३. शब्दशक्तिप्रकाशिकायाम् 182
४. पदवाक्यरत्नाकरे 182
५.विभक्त्यर्थनिर्णये 182
५. रुधिर्-धातुयोगे द्वितीयार्थः 183
१. बालमनोरमायाम् 183
२. बृहन्मञ्जूषायाम् 183
३. शब्दशक्तिप्रकाशिकायाम् 183
४. पदवाक्यरत्नाकरे 183
५. व्युत्पत्तिवादे 184
६. विभक्त्यर्थनिर्णये 184
६. प्रच्छि-धातुयोगे द्वितीयार्थः 184
१. बालमनोरमायाम् 184
२. बृहन्मञ्जूषायाम् 185
३. शेखरे 185
४. शब्दशक्तिप्रकाशिकायाम् 185
५. व्युत्पत्तिवादे 185
६. पदवाक्यरत्नाकरे 186
७. विभक्त्यर्थनिर्णये 186
७. चिधातुयोगे द्वितीयार्थः 187
१. बालमनोरमायाम् 187

२. लघुमञ्जूषायाम् 187
३. बृहन्मञ्जूषायाम् 188
४. शब्दशक्तिप्रकाशिकायाम् 188
५. पदवाक्यरत्नाकरे 188
६. विभक्त्यर्थनिर्णये 188
८. ब्रूञ्, शास्-धातुयोगे द्वितीयार्थः 190
१. बालमनोरमायाम् 190
२. शेखरे 190
३. लघुमञ्जूषायाम् 190
४. बृहन्मञ्जूषायाम् 190
५. शब्दशक्तिप्रकाशिकायाम् 191
६. व्युत्पत्तिवादे 191
७. पदवाक्यरत्नाकरे 191
८. विभक्त्यर्थनिर्णये 191
९. जिधातुयोगे द्वितीयार्थः 192
१. बालमनोरमायाम् 192
२. बृहन्मञ्जूषायाम् 192
३. शब्दशक्तिप्रकाशिकायाम् 192
४. पदवाक्यरत्नाकरे 192
५. विभक्त्यर्थनिर्णये 192
१०. मथ् धातुयोगे द्वितीयार्थः 193
१. बालमनोरमायाम् 193
२. बृहन्मञ्जूषायाम् 193
३. शब्दशक्तिप्रकाशिकायाम् 193
४. पदवाक्यरत्नाकरे 194
५. विभक्त्यर्थनिर्णये 194
११. मुष् धातुयोगे द्वितीयार्थः 194
१. बालमनोरमायाम् 194
२. बृहन्मञ्जूषायाम् 195
३. पदवाक्यरत्नाकरे 195
४. विभक्त्यर्थनिर्णये 195
१२. णीञ् धातुयोगे द्वितीयार्थः 195

१. बालमनोरमायाम्........195
२. बृहन्मञ्जूषायाम्........196
३. व्युत्पत्तिवादे........196
४. पदवाक्यरत्नाकरे........197
५. विभक्त्यर्थनिर्णये........197
१३. कृष्, वह् धातुयोगे द्वितीयार्थः........198
१. बालमनोरमायाम्........198
२. शेखरे........198
३. पदवाक्यरत्नाकरे........198
४. विभक्त्यर्थनिर्णये........198
२९. प्रधानाप्रधानकर्माभिधानानभिधानविवेकः........199
३०. अकर्मकधातुभिर्योगे इति वार्तिकविचारः........200
१. शब्दशक्तिप्रकाशिकायाम्........201
२. पदवाक्यरत्नाकरे........202
३. विभक्त्यर्थनिर्णये........203
४. भाट्टरहस्ये........204
३१. गतिबुद्धिसूत्रार्थविचारः........204
३२. नीवह्योर्न इति वार्तिकार्थः........205
३३. नियन्तृकर्तृकस्य वहेरनिषेधः इति वार्तिकार्थः........206
३४. आदिखाद्योर्न इति वार्तिकार्थः........206
३५. भक्षेरहिंसार्थस्य न इति वार्तिकार्थः........206
३६. जल्पतिप्रभृतीनामुपसंख्यानम् इति वार्तिकार्थः........207
३७. दृशेश्च इति वार्तिकार्थः........207
३८. शब्दायतेर्न इति वार्तिकार्थः........207
३९. विभक्त्यर्थनिर्णये जल्पश्रुग्रहदृशामुपसंख्यानम्
इति वार्तिकव्याख्यानम्........208
१. विभक्त्यर्थनिर्णये शाब्दिकमतखण्डनम्........210
२. विभक्त्यर्थनिर्णये ग्रहधातुयोगे द्वितीयार्थः........210
३. विभक्त्यर्थनिर्णये दृशधातुयोगे द्वितीयार्थः........210
४०. प्रधानाप्रधानकर्मणोः आख्यातेनाभिधाने व्यवस्था........213
४१. गत्यादिसूत्रार्थविषये जगदीशमतम्........215
४२. गतिबुद्धिसूत्रार्थविषये गदाधरमतम्........215

४३. गतिबुद्धिसूत्रस्य विध्यर्थत्वपक्षः 216
४४. पदवाक्यरत्नाकरे गत्यादिसूत्रार्थविचारः.. 217
४५. गत्यादिसूत्रार्थविषये नवीनमतम् 219
४६. पदवाक्यरत्नाकरे गत्यादिभिन्नधातुयोगे द्वितीयार्थविचारः.. 220
४७. विभक्त्यर्थनिर्णये गतिबुद्धिसूत्रव्याख्यानम्.. 222
१. विभक्त्यर्थनिर्णये नवीनास्तु.. 223
२. विभक्त्यर्थनिर्णये व्युत्पत्तिवादानुवादः.. 225
३. विभक्त्यर्थनिर्णये तत्खण्डनम् 226
४८. सविषयकधातुसमभिव्याहारस्थले द्वितीयार्थनिरूपणम्.. 227
१. वैयाकरणभूषणसारे 227
२. बृहन्मञ्जूषायाम् 227
३. व्युत्पत्तिवादे 227
४. शब्दशक्तिप्रकाशिकायाम्.. 228
५. पदवाक्यरत्नाकरे 229
६. भाट्टरहस्ये 230
४९. हृक्रोरन्यतरस्याम् इति सूत्रार्थः 233
१. पदवाक्यरत्नाकरे.. 234
२. शब्दशक्तिप्रकाशिकायाम्.. 234
५०. अधिशीङ्स्थासां कर्म इति सूत्रार्थः 235
१. बालमनोरमायैम् 235
२. शब्दशक्तिप्रकाशिकायाम्.. 235
३. विभक्त्यर्थनिर्णये 235
५१. अभिनिविशश्च इति सूत्रार्थः.. 236
१. बालमनोरमायाम् 236
२. विभक्त्यर्थनिर्णये 236
५२. उपान्वध्याङ्वसः इति सूत्रार्थः 237
१. विभक्त्यर्थनिर्णये.. 237
२. शब्दशक्तिप्रकाशिकायाम्.. 238
५३. अधिशीङादिसूत्रार्थविचारः.. 239
१. पदवाक्यरत्नाकरे 239
२. व्युत्पत्तिवादे 239
३. भाट्टरहस्ये.. 241

५४. उभसर्वतसोः इति वार्तिकार्थः 241
५५. अभितः परितः समया इत्यादिवार्तिकार्थः 242
१. शब्दशक्तिप्रकाशिकायाम् 243
२. पदवाक्यरत्नाकरे 243
३. विभक्त्यर्थनिर्णये 244
४. लघुमञ्जूषायाम् 247
५६. भाट्टरहस्ये उपपदद्वितीयाविभक्तीनां विवरणम् 249
५७. विभक्त्यर्थनिर्णये उपपदद्वितीयाविभक्तीनां विवरणम् 250
५८. क्रियाविशेषणानां कर्मत्वम् 251
१. विभक्त्यर्थनिर्णये 251
२. शाब्दिकमतखण्डनम् 252
५९. पदवाक्यरत्नाकरे भाट्टरहस्ये च क्रियाविशेषणानां कर्मत्वविचारः 253
६०. व्युत्पत्तिवादे क्रियाविशेषणानां कर्मत्वविचारः 257
६१. अन्तरान्तरेण युक्ते इति सूत्रार्थः 258
१. बालमनोरमायाम् 258
२. लघुमञ्जूषायाम् 259
३. शब्दशक्तिप्रकाशिकायाम् 259
४. पदवाक्यरत्नाकरे 259
५. विभक्त्यर्थनिर्णये 260
६. भाट्टरहस्ये 261
७. भाट्टचिन्तामणौ 261
८. पदवाक्यरत्नाकरे 262
६२. विनादिशब्दयोगे द्वितीयार्थविचारः 262
६३. यावच्छब्दयोगे द्वितीयार्थविचारः 265
१. शब्दशक्तिप्रकाशिकायाम् 265
२. व्युत्पत्तिवादे 265
६४. कर्मप्रवचनीयाः 268
६५. अनुर्लक्षणे इत्यादिसूत्रार्थः 268
१. बृहन्मञ्जूषायाम् 269
२. शब्दशक्तिप्रकाशिकायाम् 269
३. व्युत्पत्तिवादे 269
४. पदवाक्यरत्नाकरे 269

५. विभक्त्यर्थनिर्णये 270
६. भाट्टरहस्ये 270
७. बालमनोरमायाम् 271
८. लघुशब्देन्दुशेखरे 271
९. शब्दशक्तिप्रकाशिकायाम् 271
१०. भाट्टरहस्ये 271
६६. हीने इति सूत्रार्थः 272
१. बालमनोरमायाम् 272
२. लघुमञ्जूषायाम् 272
३. शब्दशक्तिप्रकाशिकायाम् 272
४. पदवाक्यरत्नाकरे 272
६७. उपोऽधिके च इति सूत्रार्थः 272
१. चन्द्रकलायाम् 272
२. विभक्त्यर्थनिर्णये 273
३. भाट्टरहस्ये 273
६८. लक्षणेत्थंभूतेत्यादिसूत्रार्थः 273
१. बृहन्मञ्जूषायाम् 274
२. व्युत्पत्तिवादे 275
३. पदवाक्यरत्नाकरे 275
४. भाट्टरहस्ये 276
६९. इत्थंभताख्याने उदाहरणं शाब्दबोधश्च 276
१. शब्दशक्तिप्रकाशिकायाम् 277
२. व्युत्पत्तिवादे 277
३. पदवाक्यरत्नाकरे 277
४. भाट्टरहस्ये 278
७०. भागे उदाहरणं शाब्दबोधश्च 278
१. शब्दशक्तिप्रकाशिकायाम् 279
२. व्युत्पत्तिवादे 279
३. भाट्टरहस्ये 279
७१. वीप्सार्थकप्रतियोगे वाक्यार्थः 280
१. मञ्जूषायाम् 280
२. शब्दशक्तिप्रकाशिकायाम् 280

३. व्युत्पत्तिवादे 280
४. भाट्टरहस्ये 282
५. विभक्त्यर्थनिर्णये लक्षणेत्थंभूतेत्यादिसूत्रार्थः 283
७२. अपिः पदार्थेत्यादिसूत्रार्थः 285
७३. कालाध्वनोरिति सूत्रार्थः 287
१. विभक्त्यर्थनिर्णये 287
२. लघुशब्देन्दुशेखरे 289
३. शेखरव्याख्यायां चन्द्रकलायाम् 289
४. लघुमञ्जूषायाम् 289
५. भाट्टरहस्ये 290
६. भाट्टचिन्तामणौ 291
७४. दृश्यादिसमभिव्याहृतद्वितीयार्थः व्युत्पत्तिवादे 291
१. अत्र आक्षेपः 291
२. समाधानम् 291
७५. अनुमित्यर्थकधातुसमभिव्याहृतद्वितीयार्थः व्युत्पत्तिवादे 294
७६. विभक्त्यर्थे विभक्त्यर्थानन्वयः 295
७७. आरोपस्थले यज्ञपतिमतानुसारेण बोधप्रकारः 297
१. आक्षेपः 299
२. समाधानम् 299
७८. इच्छार्थकधातुयोगे द्वितीयार्थः 300

तृतीयार्थविचारः पृ. 303-449

१. कर्तृत्वविचारः वैयाकरणग्रन्थस्थः 303
१. नैयायिकमतदूषणम् 305
२. लघुमञ्जूषायां नागेशस्य मतान्तरम् 306
३. भूषणसारे कर्तृतृतीयार्थनिरूपणम् 308
४. कारकचक्रे तृतीयार्थकर्तृत्वनिर्वचनम् 308
५. जगदीशेन कर्तृत्वनिर्वचनम् 310
६. व्युत्पत्तिवादे कर्तृत्वनिर्वचनम् 311
१. तृतीयार्थविषये मतान्तरं तस्य दूषणं च 315
७. पदवाक्यरत्नाकरे तृतीयार्थकर्तृत्वनिरूपणम् 316

८. विभक्त्यर्थनिर्णये तृतीयार्थकर्तृत्वनिरूपणम् 318
१. कर्तृत्वनिर्वचनम् 318
२. शाब्दिकमतम् 319
३. तार्किकमतम् 319
९. भाट्टचिन्तामणौ कर्तृत्वनिर्वचनम् 323
१०. भाट्टरहस्यरीत्या कर्तृतृतीयार्थः कर्तृत्वनिर्वचनं च 323
१. भाट्टरहस्ये प्राचीनमतम् 324
२. नव्यवैयाकरणमतम् 324
३. तत्खण्डनम् 324
४. स्वमतेन कर्तृत्वनिर्वचनम् 325
५. कर्तृत्वं कृत्याश्रयत्वमथ वा अखण्डमिति पक्षः 328
११. करणत्वपरिष्कारः 328
१२. प्रौढमनोरमायां करणत्वनिरूपणम् 330
१३. लघुमञ्जूषायां करणत्वविवेचनम् 332
१४. करणत्वनिर्वचनविषये नैयायिकमतोपन्यासः 333
१. तत्र तात्पर्यटीका 333
१५. न्यायवार्तिके पक्षान्तरम् 334
१. तत्र तात्पर्यटीका 334
१६. न्यायवार्तिके पुनः पक्षान्तरम् 335
१. तत्र तात्पर्यटीका 335
१७. न्यायवार्तिके पक्षान्तरम् 335
१८. न्यायवार्तिके कल्पान्तरम् 335
१९. न्यायवार्तिके कल्पान्तरम् 336
१. तात्पर्यटीकायाम् 336
२०. न्यायवार्तिके कल्पान्तरम् 336
१. तात्पर्यटीकायाम् 336
२१. परिशुद्ध्युक्तं करणलक्षणम् 337
२२. वार्तिके कल्पान्तरम् 337
१. तात्पर्यटीकायाम् 337
२३. परिशुद्धौ प्रोक्तं करणलक्षणम् 337
२४. न्यायमञ्जर्यां करणत्वनिर्वचनम् 337
१. तत्र आक्षेपः 338

२. तत्र समाधानम् 338
३. आक्षेपः समाधानं च 339
४. जयन्तभट्टप्रदर्शितं मतान्तरम् 340
२५. कारकचक्रानुसारेण करणत्वनिर्वचनम् 340
१. करणस्य लक्षणान्तरम् 341
२. कारकचक्रे मतान्तरेण करणत्वनिर्वचनम् 341
२६. जगदीशप्रदर्शितं करणत्वविवेचनम् 343
२७. गदाधरभट्टाचार्यकृतं करणत्वविवेचनम् 344
२८. पदवाक्यरत्नाकररीत्या करणत्वविवेचनम् 346
२९. विभक्त्यर्थनिर्णयानुसारेण करणत्वनिर्वचनम् 348
३०. मीमांसकमतं करणत्वम् 350
३१. भाट्टरहस्ये निरूपितं करणत्वम् 350
३२. प्रकृत्यादिभ्य उपसंख्यानम् इति वार्तिकव्याख्यानम् 352
१. लघुमञ्जूषायाम् 352
२. शब्दशक्तिप्रकाशिकायाम् 353
३. पदवाक्यरत्नाकरे 354
४. विभक्त्यर्थनिर्णये 359
५. भाट्टरहस्यानुसारेण प्रकृत्यादिशब्दोत्तरतृतीयार्थविवरणम् 368
६. कारकचक्रानुसारेण प्रकृत्यादितृतीयार्थः 369
३३. दिवः कर्म चेति सूत्रार्थविचारः 369
१. प्रौढमनोरमायाम् 369
२. लघुशब्देन्दुशेखरे 370
३. पदवाक्यरत्नाकरे 371
४. विभक्त्यर्थनिर्णये 372
५. भाट्टरहस्यरीत्या "दिवः कर्म च" इति सूत्रार्थविचारः 373
३४. अपवर्गे तृतीया सूत्रार्थविचारः 374
१. लघुमञ्जूषायाम् 374
२. बृहन्मञ्जूषायाम् 374
३. भाट्टचिन्तामणौ 375
४. भाट्टरहस्ये 375
३५. विभक्त्यर्थनिर्णये संज्ञोऽन्यतरस्यामित्यादिसूत्राणां व्याख्यानम् 375

३६. सहयुक्तेऽप्रधाने इति सूत्रार्थविचारः 377
१. प्रौढमनोरमायाम् 378
२. लघुशब्दरत्ने 378
३. तत्र भैरवीव्याख्याने विशेषाः 378
४. लघुमञ्जूषायां 379
५. लघुशब्देन्दुशेखरे 381
३७. शब्दशक्तिप्रकाशिकानुसारेण सहशब्दार्थनिरूपणम् 382
३८. कारकचक्रानुसारेण सहयुक्ततृतीयार्थः 384
३९. व्युत्पत्तिवादोक्तरीत्या सहयुक्ततृतीयार्थविचारः 385
४०. भाट्टचिन्तामणौ सहयुक्ततृतीयार्थः 388
४१. भाट्टरहस्ये सहयुक्ततृतीयार्थः 388
४२. पदवाक्यरत्नाकरानुसारेण सहशब्दार्थ तृतीयार्थयोः निष्कर्षः 389
१. तृतीयार्थस्याभेदस्योदाहरणानि 390
२. तृतीयार्थस्य कारकस्योदाहरणानि 390
३. समानकालीनत्ववत् तादात्म्यमपि क्वचित् सहशब्दार्थः 395
४३. विभक्त्यर्थनिर्णये सहयुक्तेऽप्रधाने इति सूत्रार्थविचारः 396
१. दैशिकस्योदाहरणम् 396
२. कालिकस्योदाहरणम् 397
३. दैशिककालिकोभयस्योदाहरणम् 397
४. सहयोगे काशिकायामुदाहरणानि 397
५. अप्रधानशब्दार्थविचारः 398
६. संबन्धस्य सहार्थत्वम् 398
७. समानकालिकत्वस्य सहार्थत्वम् 398
८. कर्मत्वं यथा 401
९. करणत्वं यथा 401
१०. मतान्तरखण्डनम् 402
११. समानगुरुकत्वस्य सहार्थत्वम् 405
१२. सामानाधिकरण्यस्य सहार्थत्वम् 407
१३. शाब्दिकमतपरिशीलनम् 409
१४. अन्ये सहशब्दार्थाः 410
१५. समाननिरूपकत्वस्य सहार्थत्वम् 411
१६. अभेदस्य सहार्थत्वम् 411

१७. सामग्रीघटकसामग्रीकत्वस्य सहार्थत्वम् 411
४४. येनाङ्गविकारः इति सूत्रव्याख्यानम् 413
१. लघुमञ्जूषायाम् 413
२. शब्दशक्तिप्रकाशिकायाम् 414
३. पदवाक्यरत्नाकरे 415
४. लाघवात् पक्षान्तरम् 416
५. विभक्त्यर्थनिर्णये 417
६. विभक्त्यर्थनिर्णये 420
७. भाट्टचिन्तामणौ 422
८. भाट्टरहस्ये 422
४५. इत्थंभूतलक्षणे इति सूत्रार्थविचारः 422
१. शब्दशक्तिप्रकाशिकायाम् 423
२. व्युत्पत्तिवादोक्तरीत्या इत्थंभतलक्षणतृतीयार्थविचारः 423
३. विभक्त्यर्थनिर्णये इत्थंभूतलक्षणतृतीयार्थविचारः 425
४. नवीनमतम् 430
५. वैशिष्ट्यस्य तृतीयार्थत्वखण्डनम् 430
६. संबन्धमात्रस्य तृतीयार्थत्वखण्डनम् 431
७. भाट्टचिन्तामणौ इत्थंभूतलक्षणतृतीयार्थविचारः 431
८. भाट्टरहस्ये इत्थंभूतलक्षणतृतीयार्थविचारः 432
४६. संज्ञोऽन्यतरस्यां कर्मणि इति सूत्रार्थः 432
१. भाट्टचिन्तामणौ 432
४७. हेतौ इति सूत्रव्याख्यानम् 432
४८. अशिष्टव्यवहार इति वार्तिकार्थः 433
१. अत्र शेखरकाराः 433
४९. बृहन्मञ्जूषायां हेतावितिसूत्रव्याख्यानम् 435
५०. शब्दशक्तिप्रकाशिकानुसारेण हेतुतृतीयार्थविचारः 435
५१. व्युत्पत्तिवादोक्तरीत्या हेतुतृतीयार्थविचारः 435
५२. पदवाक्यरत्नाकरोक्तरीत्या हेतुतृतीयार्थविचारः 439
१. एकदेशिमतोपन्यासः 440
५३. विभक्त्यर्थनिर्णये हेतुतृतीयार्थनिरूपणम् 441
१. मणिकृन्मतम् 442
२. एकदेशिमतखण्डनम् 442

३. वास्तविकसूत्रार्थः 443
४. फलमपीह हेतुः 443
५४. विभक्त्यर्थनिर्णये षष्ठीहेतुप्रयोग इति सूत्रार्थः 444
५५. विभक्त्यर्थनिर्णये सर्वनाम्नस्तृतीया चेति सूत्रार्थः 444
५६. विभक्त्यर्थनिर्णये निमित्तकारणेत्यादिवार्तिकव्याख्यानम् 445
५७. विभक्त्यर्थनिर्णये प्रसितेत्यादिसूत्रव्याख्यानम् 445
५८. विभक्त्यर्थनिर्णये नक्षत्रे च लुपीति सूत्रार्थः 445
५९. विभक्त्यर्थनिर्णये तुल्यार्थैरित्यादिसूत्रव्याख्यानम् 446
६०. भाट्टचिन्तामणौ हेताविति सूत्रार्थः 448
६१. भाट्टरहस्ये हेतावितिसूत्रार्थः 448

चतुर्थ्यर्थविचारः पृ. 451-564

१. चतुर्थी संप्रदाने इति सूत्रार्थविचारः 451
२. प्रौढमनोरमायां विशेषाः 452
३. लघुशब्देन्दुशेखरे विशेषाः 452
४. भूषणसाररीत्या संप्रदानचतुर्थ्यर्थः 453
५. लघुमञ्जूषोक्तप्रकारेण संप्रदानचतुर्थ्यर्थः 455
६. कारकचक्रानुसारेण संप्रदानत्वनिर्वचनम् 458
७. जागदीशं संप्रदानत्वनिर्वचनम् 461
१. अत्र मैथिलानां मतस्य खण्डनम् 463
८. व्युत्पत्तिवादोक्तरीत्या संप्रदानत्वनिर्वचनम् 463
१. व्यत्पत्तिवादे मतान्तरानुवादः 466
२. तत्खण्डनम् 467
९. पदवाक्यरत्नाकरोक्तरीत्या संप्रदानचतुर्थ्यर्थः 470
१. शाब्दिकमतम् 470
१०. विभक्त्यर्थनिर्णये चतुर्थीविवरणम् 472
१. विभक्त्यर्थनिर्णये शाब्दिकमतम् 476
२. विभक्त्यर्थनिर्णये उक्तशाब्दिकमतखण्डनम् 477
११. भाट्टचिन्तामणिकारमतम् 479
१. अभिनवास्तु 479

१२. खण्डदेवग्रन्थानुसारेण संप्रदानत्वनिरूपणम्.......480
१. वैयाकरणमतम्.......481
२. तत्र शाब्दबोधप्रकारः.......481
३. वैयाकरणमतनिराकरणम्.......482
४. संप्रदानत्वस्याखण्डोपाधिरूपता.......483
५. भाक्तसंप्रदानस्थले बोधप्रकारः.......483
६. क्रियाग्रहणमपि कर्तव्यमिति वार्तिकस्य आवश्यकता.......484
१३. रुच्यर्थानां प्रीयमाणः इति सूत्रार्थः.......485
१. शेखरे.......486
२. मञ्जूषायाम्.......486
३. लघुमञ्जूषायाम्.......486
४. कारकचक्रे.......487
५. शब्दशक्तिप्रकाशिकायाम्.......487
६. व्युत्पत्तिवादे.......487
७. पदवाक्यरत्नाकरे.......487
८. विभक्त्यर्थनिर्णये.......487
९. भाट्टचिन्तामणौ.......488
१०. भाट्टरहस्ये.......488
१४. श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः इति सूत्रार्थः.......489
१. लघुमञ्जूषायाम्.......489
२. पदवाक्यरत्नाकरे.......490
३. विभक्त्यर्थनिर्णये.......491
४. भाट्टचिन्तामणौ.......494
५. भाट्टरहस्ये.......494
१५. धारेरुत्तमर्णः इति सूत्रार्थविचारः.......495
१. लघुशब्देन्दुशेखरे.......495
२. लघुमञ्जूषायाम्.......495
३. कारकचक्रे.......496
४. शब्दशक्तिप्रकाशिकायाम्.......496
५. व्युत्पत्तिवादे.......497
६. पदवाक्यरत्नाकरे.......498

७. विभक्त्यर्थनिर्णये 499
८. भाट्टचिन्तामणौ 500
९. भाट्टरहस्ये 500
१६. स्पृहेरीप्सितः इति सूत्रार्थः 501
१. प्रौढमनोरमायाम् 501
२. लघुशब्देन्दुशेखरे 501
३. व्युत्पत्तिवादे 502
४. पदवाक्यरत्नाकरे 502
५. विभक्त्यर्थनिर्णये 503
६. भाट्टचिन्तामणौ 504
७. भाट्टरहस्ये 504
१७. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः इति सूत्रार्थः 505
१. लघुशब्देन्दुशेखरे विशेषाः 505
२. भैरवमिश्रास्तु 506
३. लघुमञ्जूषायां विशेषाः 506
४. शब्दशक्तिप्रकाशिकायाम् 507
५. व्युत्पत्तिवादे 507
६. पदवाक्यरत्नाकरे 508
७. विभक्त्यर्थनिर्णये 509
८. भाट्टचिन्तामणौ 512
९. भाट्टरहस्ये 512
१८. क्रुधद्रुहोरुपसृष्टयोः कर्म इति सूत्रार्थः 513
१९. राधीक्ष्योर्यस्य विप्रश्नः इति सूत्रार्थः 513
१. शेखरे 513
२. लघुमञ्जूषायाम् 513
३. शब्दशक्तिप्रकाशिकायाम् 514
४. पदवाक्यरत्नाकरे 514
५. विभक्त्यर्थनिर्णये 514
६. भाट्टचिन्तमणौ 515
७. भाट्टरहस्ये 515
२०. प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता इति सूत्रार्थः 515
१. लघुमञ्जूषायाम् 516

२. शब्दशक्तिप्रकाशिकायाम् 516
३. पदवाक्यरत्नाकरे 516
४. विभक्त्यर्थनिर्णये 516
५. भाट्टचिन्तामणौ 518
६. भाट्टरहस्ये 519
२१. अनुप्रतिगृणश्च इति सूत्रार्थः 519
१. शब्दरत्ने 519
२. शब्दशक्तिप्रकाशिकायाम् 519
३. पदवाक्यरत्नाकरे 520
४. विभक्त्यर्थनिर्णये 520
५. भाट्टचिन्तामणौ 521
६. भाट्टरहस्ये 521
२२. परिक्रयणे संप्रदानमन्यतरस्याम् इति सूत्रार्थः 521
१. पदवाक्यरत्नाकरे 522
२. विभक्त्यर्थनिर्णये 522
३. विभक्त्यर्थनिर्णये कर्मणः करणसंज्ञेति वार्तिकव्याख्यानम् 524
४. भाट्टरहस्ये 524
२३. तादर्थ्ये चतुर्थी वाच्या इति वार्तिकार्थः 525
१. शब्दशक्तिप्रकाशिकायाम् 525
२. लघुमञ्जूषायाम् 525
३. व्युत्पत्तिवादे 526
४. पदवाक्यरत्नाकरे 527
५. विभक्त्यर्थनिर्णये 528
६. भाट्टरहस्ये 528
२४. क्लृपि संपद्यमाने च इति वार्तिकव्याख्यानम् 529
१. लघुमञ्जूषायाम् 529
२. विभक्त्यर्थनिर्णये 530
२५. उत्पातेन ज्ञापिते च इत्यादिवार्तिकार्थः 530
१. शब्दशक्तिप्रकाशिकायाम् 531
२. पदवाक्यरत्नाकरे 531
३. विभक्त्यर्थनिर्णये 531
२६. विभक्त्यर्थनिर्णये हितयोगे च इति वार्तिकव्याख्या 532

२७. भाट्टरहस्ये क्लृपि संपद्यमाने च इति वार्तिकव्याख्या 532
२८. क्रियार्थोपपदस्य कर्मणि स्थानिनः इति सूत्रव्याख्यानम् 533
१. लघुशब्देन्दुशेखरे 533
२. शब्दशक्तिप्रकाशिकायाम् 534
३. व्युत्पत्तिवादे 534
४. पदवाक्यरत्नाकरे 534
५. विभक्त्यर्थनिर्णये 535
६. भाट्टरहस्ये 536
२९. तुमर्थाच्च भाववचनात् इति सूत्रव्याख्यानम् 536
१. शब्दशक्तिप्रकाशिकायाम् 537
२. व्युत्पत्तिवादे 537
३. पदवाक्यरत्नाकरे 538
४. शाब्दिकास्तु 538
५. विभक्त्यर्थनिर्णये 538
६. भाट्टरहस्ये 540
३०. नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च इति सूत्रार्थः 540
३१. उपपदविभक्तेः कारकविभक्तिर्बलीयसी 540
१. लघुमञ्जूषायाम् 541
२. शब्दशक्तिप्रकाशिकायाम् 543
३. व्युत्पत्तिवादोक्तरीत्या नम आदिशब्दयोगे चतुर्थीविचारः 544
४. पदवाक्यरत्नाकरे नमःस्वस्त्यादिसूत्रव्याख्यानम् 549
५. विभक्त्यर्थनिर्णये नमःस्वस्त्यादिसूत्रव्याख्यानम् 552
६. काशिकाकृतस्तु 556
७. भाट्टरहस्यरीत्या नमःस्वस्त्यादिसूत्रव्याख्यानम् 557
३२. मन्यकर्मण्यनादरे विभाषाऽप्राणिषु इति सूत्रार्थः 557
१. बृहन्मञ्जूषायाम् 558
२. शब्दशक्तिप्रकाशिकायाम् 558
३. पदवाक्यरत्नाकरोक्तरीत्या न त्वां तृणं मन्य इति वाक्यार्थः 559
४. विभक्त्यर्थनिर्णये मन्यकर्मण्यनादर इति सूत्रव्याख्यानम् 561
५. भाट्टरहस्ये मन्यकर्मणीति सूत्रव्याख्यानम् 562
३३. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि इति सूत्रार्थः 563
१. विभक्त्यर्थनिर्णये 564

पञ्चम्यर्थविचारः 565-704

१. ध्रुवमपायेऽपादानम्, अपादाने पञ्चमी इति सूत्रयोः व्याख्यानम् 565
१. प्रौढमनोरमायाम् 565
२. भूषणसारे 566
२. लघुशब्देन्दुशेखररीत्या अपादानत्वविचारः 568
१. भाष्यानुसारिणस्तु 568
२. शेखरे अविद्यमानाः लघुमञ्जूषायां विशेषाः 571
३. नैयायिकमतखण्डनम् 571
३. कारकचक्रानुसारेणापादानपञ्चम्यर्थनिरूपणम् 573
१. मतान्तरम् 574
४. शब्दशक्तिप्रकाशिकानुसारेण अपादानत्वनिर्वचनम् 575
१. मतान्तरखण्डनम् 576
५. व्युत्पत्तिवादरीत्या अपादानत्वनिरुक्तिः 577
१. आक्षेपः 578
२. समाधानम् 578
६. पदवाक्यरत्नाकरानुसारेण अपादानपञ्चम्यर्थः 579
७. विभक्त्यर्थनिर्णये अपादाने पञ्चमी विचारः 581
१. शाब्दिकैकदेशिमतखण्डनम् 583
२. पत्रात् पत्रं पततीति प्रयोगापत्तिशङ्का 583
३. गुरुचरणोक्तं समाधानम् 584
४. विभागभेदयोः पञ्चम्यर्थत्वम् 586
५. परम्परायाः संसर्गत्वोपपादनम् 586
६. गुणात् समवायादभावैर्द्वा न पततीति प्रयोगविचारः 588
७. वृक्षात् वेपते स्पन्दते वेत्यादिप्रयोगवारणप्रकारः 589
८. तरोः त्यजतीति प्रयोगवारणप्रकारः 589
९. शाब्दिकास्तु 590
१०. सदसोऽपसरतीति प्रयोगसाधुत्वम् 590
११. संयोगफलकधातुयोगे पञ्चमी 591
१२. विभागार्थकधातुयोगे पञ्चम्युपपादनम् 592
१३. नानाविधापायार्थकपञ्चम्युदाहरणानि 592
८. भाट्टचिन्तामण्यनुसारेण अपादानत्वनिष्कर्षः 594

९. भाट्टरहस्यानुसारेण अपादानत्वनिरूपणम् 595
१. अन्येषां नैयायिकानां मतम् 596
२. अपादानत्वलक्षणस्य क्वचित् अतिव्याप्तिशङ्का तत्परिहारौ 597
३. अपादानत्वमखण्डोपाधिरिति स्वमतम् 598
१०. जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् इति वार्तिकव्याख्यानम् 599
१. लघुशब्देन्दुशेखरे 600
२. लघुमञ्जूषायाम् 600
३. नैयायिकमतखण्डनम् 601
४. कारकचक्रे 601
५. शब्दशक्तिप्रकाशिकायाम् 602
६. पदवाक्यरत्नाकरे 602
७. विभक्त्यर्थनिर्णये 602
८. भाट्टरहस्ये 604
११. भीत्रार्थानां भयहेतुः इति सूत्रव्याख्या 605
१. प्रौढमनोरमायाम् 605
२. लघुशब्देन्दुशेखरे 605
३. लघुमञ्जूषायाम् 605
४. कारकचक्रे 606
५. शब्दशक्तिप्रकाशिकायाम् 606
६. व्युत्पत्तिवादे 607
७. पदवाक्यरत्नाकरे 607
८. विभक्त्यर्थनिर्णये 609
९. स्वमताविष्करणम् 611
१०. भाट्टरहस्ये 613
१२. पराजेरसोढः इति सूत्रव्याख्यानम् 614
१. लघुमञ्जूषायाम् 614
२. शब्दशक्तिप्रकाशिकायाम् 614
३. पदवाक्यरत्नाकरे 614
४. विभक्त्यर्थनिर्णये 615
५. भाट्टरहस्ये 616
१३. वारणार्थानामीप्सितः इति सूत्रार्थविचारः 616
१. लघुशब्देन्दुशेखरे 617

२. बृहन्मञ्जूषायाम् 617
३. लघुमञ्जूषायाम् 618
४. कारकचक्रे 618
५. शब्दशक्तिप्रकाशिकायाम् 619
६. व्युत्पत्तिवादरीत्या वारणार्थकधातुयुक्तपञ्चम्यर्थविचारः 620
७. पदवाक्यरत्नाकरे 621
८. विभक्त्यर्थनिर्णये 622
१. मतान्तरखण्डनम् 624
२. स्वमतोपन्यासः 624
३. आक्षेपः समाधानं च 625
४. शाब्दिकमतखण्डनम् 627
९. भाट्टरहस्यानुसारेण वारणार्थधातुयोगे पञ्चम्यर्थः 628
१. सूत्राणां प्रत्याख्यानस्याशयः 629
१४. अन्तर्धौ येनादर्शनमिच्छति इति सूत्रार्थः 630
१. लघुशब्देन्दुशेखरे 630
२. लघुमञ्जूषायाम् 631
३. कारकचक्रे 631
४. व्युत्पत्तिवादे 631
५. पदवाक्यरत्नाकरे 631
६. विभक्त्यर्थनिर्णये 632
७. भाट्टरहस्ये 633
१५. आख्यातोपयोगे इति सूत्रार्थः 633
१. लघुमञ्जूषायाम् 634
२. व्युत्पत्तिवादे 634
३. पदवाक्यरत्नाकरे 634
४. विभक्त्यर्थनिर्णये 634
५. भाट्टरहस्ये 636
१६. जनिकर्तुः प्रकृतिः इति सूत्रव्याख्यानम् 636
१. प्रौढमनोरमायां विशेषाः 637
२. लघुमञ्जूषायाम् 638
३. शब्दशक्तिप्रकाशिकायाम् 638

४. व्युत्पत्तिवादे 639
१. अत्र प्रकाशः 639
५. पदवाक्यरत्नाकरे 640
६. विभक्त्यर्थनिर्णये 641
१७. भुवः प्रभवः इति सूत्रार्थः............ 643
१. कारकचक्रे 643
२. शब्दशक्तिप्रकाशिकायाम्............ 644
३. व्युत्पत्तिवादे 644
४. पदवाक्यरत्नाकरे 644
५. विभक्त्यर्थनिर्णये 645
६. भाट्टरहस्ये विशेषाः 647
७. विभक्त्यर्थनिर्णये करणे चेत्यादिसूत्रव्याख्यानम्............ 647
१८. ल्यब्लोपे पञ्चम्यधिकरणे चैंति वार्तिकार्थः............ 648
१. लघुमञ्जूषायाम् 648
२. पदवाक्यरत्नाकरे............ 649
३. विभक्त्यर्थनिर्णये 649
१९. यतश्चाध्वकालनिर्माणं ततः पञ्चमी इत्यादिवार्तिकार्थः 650
१. लघुमञ्जूषायाम् 650
२. पदवाक्यरत्नाकरे............ 651
२०. विभक्त्यर्थनिर्णये अकारकपञ्चम्यर्थः 652
२१. भाट्टरहस्ये 653
२२. अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते इति सूत्रार्थः 654
१. लघुमञ्जूषायाम् 655
२. शब्दशक्तिप्रकाशिकायाम्............ 657
३. व्युत्पत्तिवादानुसारेण अन्यादिपदयोगे पञ्चम्यर्थविचारः............ 658
४. पदवाक्यरत्नाकरे अन्यारादित्यादिसूत्रव्याख्यानसरणिः............ 661
५. विभक्त्यर्थनिर्णये 663
६. भाट्टरहस्ये 668
२३. अपपरी वर्जने इत्यादिसूत्रव्याख्यानम्............ 670
१. लघुमञ्जूषायाम् 670
२. शब्दशक्तिप्रकाशिकायाम्............ 671
३. पदवाक्यरत्नाकरे............ 671

४. विभक्त्यर्थनिर्णये 672
५. व्युत्पत्तिवादपरिशीलनम् 673
२४. प्रतिः प्रतिनिधिप्रतिदाने च यस्मात् 679
१. लघुमञ्जूषायाम् 680
२. पदवाक्यरत्नाकरे 680
३. विभक्त्यर्थनिर्णये 680
४. भाट्टरहस्ये 682
२५. अकर्तर्यृणे पञ्चमी इति सूत्रार्थः 682
१. पदवाक्यरत्नाकरे 682
२. भाट्टरहस्ये 683
२६. विभाषा गुणेऽस्त्रियाम् इति सूत्रार्थः 683
१. शेखरे 683
२. लघुमञ्जूषायाम् 684
३. शब्दशक्तिप्रकाशिकायाम् 684
४. व्युत्पत्तिवादे धूमेन वह्निमान् पर्वतः इति वाक्यार्थवर्णनम् 684
५. पदवाक्यरत्नाकरे विद्यमानं निरूपणम् 688
६. मणिकारमतम् 688
७. नवीनमतम् 689
८. नञ्समभिव्याहृतपञ्चम्यर्थविचारः 689
९. विभक्त्यर्थनिर्णये विभाषागुण इति सूत्रार्थनिरूपणम् 691
१०. भाट्टरहस्ये 697
२७. पृथग्विनानानाभिस्तृतीयान्यतरस्याम् इति सूत्रार्थः 697
१. लघुमञ्जूषायाम् 698
२. पदवाक्यरत्नाकरे 698
३. विभक्त्यर्थनिर्णये 698
४. भाट्टरहस्ये 699
२८. करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य इति सूत्रार्थः 700
१. लघुशब्देन्दुशेखरे 700
२. पदवाक्यरत्नाकरे 700
३. भाट्टरहस्ये 700
४. विभक्त्यर्थनिर्णये 701
२९. विभक्त्यर्थनिर्णये पञ्चमी विभक्त इति सूत्रव्याख्यानम् 701

३०. दूरान्तिकार्थेभ्यो द्वितीया च इति सूत्रार्थः 703
१. लघुमञ्जूषायाम् 704
२. भाट्टरहस्ये 704

षष्ठ्यर्थविचारः पृ. 705-773

१. षष्ठी शेषे इति सूत्रार्थः 705
१. प्रौढमनोरमायाम् 706
२. लघुमञ्जूषायाम् 707
३. व्युत्पत्तिवादानुसारेण शेषषष्ठ्यर्थनिरूपणम् 710
४. पदवाक्यरत्नाकरानुसारेण शेषषष्ठ्यर्थप्रतिपादनम् 711
५. विभक्त्यर्थनिर्णये षष्ठीविभक्त्यर्थनिर्णयः 713
६. भाट्टरहस्यानुसारेण शेषषष्ठ्यर्थः 715
२. षष्ठी हेतुप्रयोगे इति सूत्रार्थः 716
१. भाट्टरहस्ये 716
२. लघुमञ्जूषायाम् 717
३. सर्वनाम्नस्तृतीया चेति सूत्रार्थः 717
१. पदवाक्यरत्नाकरे 718
४. षष्ठ्यतसर्थप्रत्ययेन इति सूत्रार्थः 718
१. प्रौढमनोरमायाम् 718
५. एनपा द्वितीया इति सूत्रार्थः 718
६. दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् इति सूत्रार्थः 719
१. पदवाक्यरत्नाकरे 719
२. भाट्टरहस्ये 720
७. ज्ञोऽविदर्थस्य करणे इति सूत्रार्थः 721
१. भाट्टरहस्ये 721
२. विभक्त्यर्थनिर्णये 721
८. अधीगर्थदयेशां कर्मणि इति सूत्रार्थः 722
१. भाट्टरहस्ये 722
२. विभक्त्यर्थनिर्णये 723
९. कृञः प्रतियत्ने इति सूत्रार्थः 723

१. भाट्टरहस्ये 723
२. विभक्त्यर्थनिर्णये 723
१०. रुजार्थानां भाववचनानामज्वरेः इति सूत्रार्थः 724
११. अज्वरिसंताप्योरिति वाच्यम् 725
१. विभक्त्यर्थनिर्णये 725
२. भाट्टरहस्ये 726
१२. आशिषि नाथः इति सूत्रव्याख्यानम् 726
१. विभक्त्यर्थनिर्णये 726
२. भाट्टरहस्ये 727
१३. जासिनिप्रहणनाटक्राथपिषां हिंसायाम् इति सूत्रार्थः 727
१. भाट्टरहस्ये 727
२. विभक्त्यर्थनिर्णये 727
१४. व्यवहृपणोः समर्थयोः इति सूत्रार्थः 728
१. भाट्टरहस्ये 728
२. विभक्त्यर्थनिर्णये 729
१५. विभक्त्यर्थनिर्णये कृत्वोऽर्थप्रयोगे कालेऽधिकरणे चेति सूत्रार्थः 729
१. शाब्दिकमतपरामर्शः 730
१६. दिवस्तदर्थस्य इति सूत्रव्याख्यानम् 732
१. भाट्टरहस्ये 732
२. विभक्त्यर्थनिर्णये 733
१७. विभाषोपसर्गे 733
१८. प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने इति सूत्रार्थः 734
१. भाट्टरहस्ये 734
२. विभक्त्यर्थनिर्णये 734
१९. विभक्त्यर्थनिर्णये चतुर्थ्यर्थे बहुलं छन्दसि इति सूत्रार्थः 735
२०. विभक्त्यर्थनिर्णये यजेश्च करणे इति सूत्रार्थः 735
२१. कृत्वोऽर्थप्रयोगे कालेऽधिकरणे इति सूत्रार्थः 736
१. भाट्टरहस्ये 736
२२. कर्तृकर्मणोः कृति इति सूत्रार्थः 736
२३. गुणकर्मणि वेष्यते इति वार्तिकार्थः 736
२४. कृतपूर्वी कटम् इति वाक्यार्थविचारः 736
१. आक्षेपः समाधानं च 738

२. भाट्टरहस्यरीत्या उक्तस्थले निर्णयः 740
३. अत्र वैयाकरणनव्याः 740
४. वैयाकरणनव्यमतखण्डनम् 740
५. स्वमतं खण्डदेवस्य 741
६. अत्रैव मतान्तरम् 742
२५. पदवाक्यरत्नाकरे कर्तृकर्मणोः कृतीति सूत्रार्थविचारः 742
१. कृतपूर्वी कटमिति वाक्यार्थः 743
२. भट्टोजिमतखण्डनम् 743
३. भाट्टमतखण्डनम् 744
४. विषयान्तरम् 747
२६. विभक्त्यर्थनिर्णये कर्तृकर्मणोरिति सूत्रार्थविचारः 747
१. कृतपूर्वी कटमिति वाक्यार्थविचारः 747
२. भाट्टमतखण्डनम् 748
३. शब्दिकमतानुवादः 749
४. तत्खण्डनम् 749
२७. उभयप्राप्तौ कर्मणि इति सूत्रार्थः 752
२८. स्त्रीप्रत्यययोरककारयोर्नायं नियमः 752
२९. शेषे विभाषा 753
१. पदवाक्यरत्नाकरे उभयप्राप्ताविति सूत्रव्याख्यानम् 753
२. विभक्त्यर्थनिर्णये उभयप्राप्ताविंत सूत्रव्याख्यानम 753
३. भाट्टरहस्ये उभयप्राप्ताविंत सूत्रव्याख्यानम 755
३०. क्तस्य च वर्तमाने इति सूत्रव्याख्यानम् 755
१. विभक्त्यर्थनिर्णये 756
२. भाट्टरहस्ये 756
३१. अधिकरणवाचिनश्च इति सूत्रार्थः 757
१. विभक्त्यर्थनिर्णये 757
२. भाट्टरहस्ये 758
३२. न लोकाव्ययनिष्ठाखलर्थतृनाम् इति सूत्रार्थः 758
३३. कमेरनिषेधः इति वार्तिकार्थः 759
१. विभक्त्यर्थनिर्णये 759
२. प्रौढमनोरमायाम् 761

३. पदवाक्यरत्नाकरे 761
४. भाट्टरहस्ये विशेषाः 761
३४. अकेनोर्भविष्यदाधमर्ण्ययोः इति सूत्रार्थः 762
१. पदवाक्यरत्नाकरे 763
२. विभक्त्यर्थनिर्णये 764
३. शाब्दिकमतखण्डनम् 765
३५. कृत्यानां कर्तरि वा इति सूत्रार्थः 765
१. पदवाक्यरत्नाकरे 766
२. विभक्त्यर्थनिर्णये 766
३. भाट्टरहस्ये 767
३६. तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् इति सूत्रार्थः 767
१. प्रौढमनोरमायाम् 768
२. पदवाक्यरत्नाकरे 768
३. भाट्टरहस्ये 769
३७. चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः इति सूत्रार्थः 770
१. पदवाक्यरत्नाकरे 770
२. विभक्त्यर्थनिर्णये 770
३. भाट्टरहस्ये 772

सप्तम्यर्थविचारः पृ. 775-871

१. आधारोऽधिकरणम् इति सूत्रार्थः 775
२. सप्तम्यधिकरणे च इति सूत्रार्थः 775
१. भूषणसारे 777
२. लघुमञ्जूषायाम् 777
३. कारकचक्रग्रन्थरीत्या अधिकरणत्वविचारः 785
४. शब्दशक्तिप्रकाशिकानुसारेण अधिकरणसप्तम्यर्थनिरूपणम् 787
५. व्युत्पत्तिवादोक्तरीत्या अधिकरणसप्तम्यर्थः 788
१. आक्षेपः समाधानं च 790
६. पदवाक्यरत्नाकरानुसारेण आधारसप्तम्यर्थनिरूपणम् 791
७. विभक्त्यर्थनिर्णये आधारसप्तम्यर्थनिरूपणम् 792

८. भाट्टरहस्यानुसारेण आधारसप्तम्यर्थनिरूपणम् 795
१. पूर्वपक्षः 795
२. नैयायिकैकदेशिमतम् 796
३. सिद्धान्तः 796
४. तार्किकमतम् 797
५. तन्मतखण्डनम् 797
६. स्वमतम् 797
३. भूतले घटो नास्ति' इत्यादौ बोधविचारः 800
१. प्रकारान्तरनिराकरणम् 801
२. मतान्तरनिराकरणम् 801
३. स्वमते 'भूतले घटो नास्ति' इति वाक्यात् बोधप्रकारः 802
४. वायौ रूपं नास्तीत्यादौ बोधप्रकारः 803
५. गृहे चैत्रो न पचति इत्यत्र बोधप्रकारः 804
६. चैत्रो न पचति इत्यत्र बोधप्रकारः 805
७. चैत्रो न पचेत् इत्यत्र बोधप्रकारः 805
८. अधिकरणत्वत्रैविध्यम् 805
९. क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् इति वार्तिकार्थः 806
१. शेखरे 806
२. लघुमञ्जूषायाम् 806
३. पदवाक्यरत्नाकरे 806
४. भाट्टरहस्ये 806
१०. विभक्त्यर्थनिर्णये अधिकरणादिसप्तम्यर्थविचारः 807
१. गुरुचरणमतम् 809
२. क्रियान्वयी सप्तम्यर्थः 811
११. साध्वसाधुप्रयोगे चेति वार्तिकार्थः 812
१. विभक्त्यर्थनिर्णये 812
२. भाट्टरहस्ये 813
१२. निमित्तात् कर्मयोगे इति वार्तिकव्याख्यानम् 813
१. व्युत्पत्तिवादे 814
२. कारकचक्रे 814
३. शब्दशक्तिप्रकाशिकायाम् 815

४. व्युत्पत्तिवादे.......816
५. पदवाक्यरत्नाकरे.......817
१. भर्तृहरिमतम्.......818
६. विभक्त्यर्थनिर्णये.......818
७. भाट्टरहस्ये.......820
१३. यस्य च भावेन भावलक्षणम् इति सूत्रार्थः.......821
१. प्रौढमनोरमायाम्.......821
२. लघुशब्देन्दुशेखरे.......821
३. भैरवमिश्रास्तु.......822
४. लघुमञ्जूषायाम्.......823
५. कारकचक्रे.......825
६. शब्दशक्तिप्रकाशिकायाम्.......826
१. कालार्थककृदन्तेति निवेशस्य प्रयोजनम्.......827
७. व्युत्पत्तिवादे.......828
८. पदवाक्यरत्नाकरे.......829
९. विभक्त्यर्थनिर्णये.......830
१०. भाट्टरहस्ये.......833
१४. षष्ठी चानादरे इति सूत्रार्थः.......835
१. लघुमञ्जूषायाम्.......835
२. विभक्त्यर्थनिर्णये.......835
३. भाट्टरहस्ये.......836
१५. स्वामीश्वराधिपतिदायादसाक्षिप्रतिप्रसूतैश्च इति सूत्रार्थः.......836
१. लघुशब्देन्दुशेखरे.......837
२. विभक्त्यर्थनिर्णये.......837
३. भाट्टरहस्ये.......838
१६. आयुक्तकुशलाभ्यां चासेवायाम् इति सूत्रार्थः.......838
१. विभक्त्यर्थनिर्णये.......838
१७. यतश्च निर्धारणम् इति सूत्रव्याख्यानम्.......839
१. लघुशब्देन्दुशेखरे.......840
२. लघुमञ्जूषायाम्.......841
३. कारकचक्रे.......843
४. शब्दशक्तिप्रकाशिकानुसारं निर्धारणषष्ठ्यर्थविचारः.......844

५. व्युत्पत्तिवादानुसारेण निर्धारणविभक्त्यर्थः 847
१. मतान्तरखण्डनम् 850
६. विभक्त्यर्थनिर्णये निर्धारणविभक्त्यर्थविचारः 850
१. मतान्तरोपन्यासः 851
२. तत्खण्डनम् 853
३. अन्यमतखण्डनम् 853
४. स्वमतम् 854
७. भाट्टरहस्ये निर्धारणविभक्त्यर्थः 859
१८. पञ्चमी विभक्ते इति सूत्रार्थः 859
१. लघुमञ्जूषायाम् 859
१९. साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः इति सूत्रार्थः 860
१. भाट्टरहस्ये 860
२०. प्रसितोत्सुकाभ्यां तृतीया च इति सूत्रार्थः 861
१. भाट्टरहस्ये 861
२. विभक्त्यर्थनिर्णये साधुनिपुणाभ्यामिति सूत्रव्याख्यानम् 861
२१. नक्षत्रे च लुपि इति सूत्रव्याख्यानम् 862
१. लघुमञ्जूषायाम् 862
२. भाट्टरहस्ये 862
२२. सप्तमीपञ्चम्यौ कारकमध्ये इति सूत्रव्याख्यानम् 863
१. लघुमञ्जूषायाम् 863
२. भाट्टरहस्ये 864
२३. अधिकशब्दयोगे पञ्चमी 864
१. कौमुद्याम् 864
२. शेखरे 864
३. भाट्टरहस्ये 865
२४. यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी इति सूत्रार्थः 865
१. भाट्टरहस्ये 866
२५. अधिरीश्वरे इति सूत्रव्याख्यानम् 866
२६. विभाषा कृञि इति सूत्रव्याख्यानम् 866
१. विभक्त्यर्थनिर्णये 867
२. विभक्त्यर्थनिर्णये अधिरीश्वर इत्यादिसूत्रव्याख्यानम् 869

शाब्दबोधमीमांसा

सुबर्थविचारात्मकः द्वितीयो भागः

कारकलक्षणम्

सुबर्थविचारस्य प्राग्रूपम्

शब्दस्तावत् द्विविधः सार्थकः निरर्थकश्चेति। निरर्थकःध्वन्यात्मकः। सार्थकश्च प्रकृतिः प्रत्ययः निपातश्चेति त्रिविधः। प्रकृतिः द्विविधा नाम धातुश्चेति। नामैव प्रातिपदिकमित्यप्युच्यते। नाम चतुर्विधं रूढं लक्षकं योगरूढं यौगिकं चेति। परे तु रूढयौगिकमधिकमन्तर्भाव्य नाम पञ्चविधमाहुः। रूढं संज्ञेत्यपि कीर्त्यते। संज्ञा च नैमित्तिकी पारिभाषिकी औपाधिकी चेति त्रिविधा। लक्षकं नामापि लक्षणायाः जहत्स्वार्था अजहत्स्वार्था निरूढा आधुनिकी इत्यादिभेदमनुसृत्य अनेकविधं भवति। योगरूढं सामासिकं तद्धितात्मकं चेति द्विविधम्। कृदन्तस्य पङ्कजादेः-सामासिकेऽन्तर्भावात् न त्रैविध्यशङ्का। यौगिकं नाम समासःतद्धितान्तं कृदन्तं चेति त्रिविधम्। समासः कर्मधारयद्विगुतत्पुरुषाव्ययीभावबहुव्रीहिद्वन्द्वभेदात् षड्विधः। द्विगुः तद्धितार्थोत्तरपदसमाहारभेदात् त्रिविधः। तत्पुरूषः द्वितीया-तत्पुरुषादिभेदेन षड्विधः। बहुव्रीहिः द्विविधः तद्गुणसंविज्ञानः अतद्गुणसंविज्ञान-श्चेति। द्वन्द्वो द्विविधः समाहारः इतरेतरयोगश्चेति। नाम पुनः त्रिविधं स्त्रीलिङ्गं पुंलिङ्गं नपुंसकलिङ्गमिति।

धातुः मूलधातुः सौत्रः प्रत्ययान्तश्चेति त्रिविधः। प्रत्ययः चतुर्विधः विभक्तिः धात्वंशः तद्धितं कृत् इति। धात्वंशः सन्क्यजादिः।

विभक्तिः द्विविधा सुप् तिङ्चेति। सुप् प्रथमादिप्रभेदेन सप्तविधा। पुनर्द्विविधा कारकार्था कारकेतरार्था चेति। कारकं षड्विधं अपादानसंप्रदानकरणाधि-करणकर्मकर्तृभेदात्। तिङ् लडादिभेदेन दशविधा। लडादयः परस्मैपदा-त्मनेपदभेदेन द्विविधाः।

धात्वंशप्रत्ययः द्विविधः नामप्रकृतिकः धातुप्रकृतिकश्चेति। आद्यः क्यच्क्य-ङादिः, द्वितीयः सन्यङादिः। अर्थभेदेन तद्धितोऽनेकविधः।

शब्दशक्तिप्रकाशकानुसारेण प्रकृतित्वप्रत्ययत्वविभक्तित्वानां निर्वचनम्[1]

स्वार्थान्वयगोचरो बोधः साकाङ्क्षैरपि सार्थकैरेव शब्दैः संपादनीयः, न तु निरर्थकैः। तत्र कोऽसौ सार्थकः कतिविधश्चेत्याकाङ्क्षायामाह —

शब्दान्तरमपेक्ष्यैव सार्थकः स्वार्थबोधकृत्।
प्रकृतिः प्रत्ययश्चैव निपातश्चेति स त्रिधा।

यादृशः शब्दः शब्दान्तरं सहकृत्यैव स्वस्य स्वघटकस्य वा वृत्त्युपस्थाप्यया-दृशार्थावगाहिबोधं प्रति अनुकूलः स तथाविधार्थे सार्थकः। पटपाचकाद्याः प्रकृतयः सुप्तिङाद्याः प्रत्ययाः चादयो निपाताश्च स्वोपस्थाप्यार्थस्य बोधं नियमतः शब्दान्तरं सहकृत्य जनयन्ति। वाक्यानि पुनः असहकृत्यापि। अत्र स्वार्थशब्दस्य स्ववृत्त्युपस्थाप्यार्थपरत्वे पाचकादिशब्देऽतिव्याप्तिः, तस्य वृत्त्यप्रसिद्धेः। वृत्तिम-निवेश्य स्वोपस्थाप्यार्थपरत्वे घटपदादेरप्याकाशाद्युपस्थापकत्वेन तद्बोधने तस्य सार्थकत्वापत्तिः। स्वघटकवृत्त्युपस्थाप्यार्थपरत्वे पाचकशब्दस्य पाकबोधने तथा-त्वापत्तिः। अतः स्वार्थपदस्य स्वविषयिताव्यापकविषयिताकशब्दत्वरूपेणा-जहल्लक्षणया तदुभयपरत्वमुक्तम्। घटमित्यादिवाक्यस्य आनयनादिसहकारेणापि स्वार्थस्य घटकर्मत्वादेः बोधकत्वात् तत्रातिप्रसङ्गवारणार्थं नियमत इत्युक्तम्। तथा च तदसहकारेणापि स्वार्थबोधकत्वान्न दोषः। शशविषाणादिकः शब्दोऽपि शशीयत्वादिना विषाणादेरन्वयबोधमादधानः तादृशविषयताकबोधजनने सार्थक एव। परं त्वयोग्यः। स चायं त्रिविधः प्रकृतिः, प्रत्ययः, निपातश्चेति। शप्श्य-नादिविकरणः नुमाद्यागमश्चान्वयबोधने प्रकृत्यादीनां सहायोऽपि न स्वार्थोप-स्थितिद्वारा, येन तमादाय सार्थकः चतुःपञ्चविधः स्यात्। "पुत्रो वः" इत्यादावपि युष्मदादिसंबन्धो न वसाद्यादेशस्यार्थः, अपि तु तत्स्थानिनः युष्माकमित्यादि-वाक्यस्य। अतः पूर्वपदमपेक्ष्यैव तादृशसंबन्धबोधानुकूले तत्र न प्रसङ्गः।

सदृशाद्यर्थे प्रकृत्यादिभ्यो भिन्नेषु निभनीकाशादिशब्देषु शब्दान्तरं सहकृत्यै-वान्वयबोधजनकेषु अतिप्रसङ्गस्तु समासान्तर्गतत्वनियतस्वार्थबोधकताकान्यत्वेन विशेषणाद्वारणीयः।

समासान्तर्गतत्वे सति स्वघटितसमासान्तर्गतत्वनियतस्वार्थबोधकताकं यद्यत् स्वं तदन्यत्वं समानाधिकरण्यसंबन्धेन लक्षणविशेषणम्। सामानाधिकरण्य-मात्रनिवेशे चन्द्रनिभोऽयमित्यत्र चन्द्रादिशब्दस्यापि सार्थकत्वानुपपत्तिरित्यतो

---

[1] श.श.प्र.पृ. २९-५३

नियतेत्युक्तम्। चन्द्रस्य निभ इत्याद्यप्रयोगात् तेषु निरुक्तभेदासत्त्वेन अतिव्याप्त्यसंभवादिति भावः।

प्रकृतिलक्षणम्

तत्र प्रकृतिं लक्षयति —

> स्वेतरार्थानवच्छिन्नयत्स्वार्थस्यावबोधने।
> यच्छब्दनिश्चयो हेतुः प्रकृतिः सा तदर्थिका।।

स्वेतरशब्दार्थाविशेषितस्य यादृशस्वार्थस्यान्वयबोधं प्रति स्वाव्यवहितोत्तरत्वसंसर्गेण यादृशशब्दवत्तायाः निश्चय एव हेतुः तादृशशब्दः तथाविधार्थे प्रकृतिः। (यच्छब्दस्य निश्चयः स्वभिन्नार्थासंबद्धस्य स्वकीयार्थस्य बोधं प्रति कारणं स शब्दः तदर्थे प्रकृतिः)। स्वेतरशब्दवृत्तिज्ञानजन्योपस्थितिप्रयोज्यप्रकारतानिरूपितविशेष्यताभिन्नयादृशार्थनिष्ठविषयताशालिशाब्दबोधं प्रति अव्यवहितोत्तरत्वसंसर्गावच्छिन्नयादृशानुपूर्व्यवच्छिन्नप्रकारताशालिनिश्चय एव हेतुः तादृशानुपूर्वीमत्त्वं तथाविधार्थे प्रकृतित्वमिति पर्यवसितम्। पटभूप्रभृतयो हि शब्दाः स्वेतरविभक्त्याद्यंशे निश्चिता एव स्वोपस्थाप्यस्य वसनजननादेः प्रत्ययार्थे कर्मत्वकतृत्वादावन्वयं बोधयन्ति न त्वन्यथेति लक्षणसमन्वयः।

प्रत्ययास्तु पदार्थान्तरावच्छिन्नस्यापि स्वार्थस्य संख्याकालेष्टसाधनत्वादेरन्वयबोधं प्रत्यनिश्चिता अप्युपयुज्यन्ते। चैत्रः पचति यजेत इत्यादौ शब्दान्तरधर्मिकसुबादिनिश्चयस्यासत्त्वेऽपि तदर्थस्य एकत्ववर्तमानेत्वेष्टसाधनत्वादेः चैत्रपाकयागादावन्वयात्।

स्वाव्यवहितोत्तरत्वसंसर्गेण यादृशशब्दवत्तायाः निश्चय एव तदुपस्थाप्ययादृशार्थप्रकारकान्वयबोधं प्रति हेतुः तादृशस्यैव शब्दस्य प्रकृते तथाविधः स्वार्थः। स च पाकेत्यादेः (समुदायस्य) शक्याद्यर्थविरहेऽपि पचनादिरूपः सुवच एव। पचनादेः कर्मत्वादावन्वयबोधं प्रति अमादिधर्मिकतादृशशब्दवत्तायाः निश्चयस्यैव हेतुत्वात्।

स्वेतरार्थानवच्छिन्नेति विशेषणस्य प्रयोजनम्

"बहुगुडो द्राक्षे" इत्यादौ ईषदसमाप्तत्वादिरूपस्य स्वार्थस्य द्राक्षादावन्वयबोधं प्रति गुडादिपदधर्मिकः स्वोत्तरत्वसंबन्धेन बहुजातिप्रत्ययस्य निश्चय एव हेतुः। तथापि सः न पदार्थान्तरानवच्छिन्नस्य ईषदसमाप्तत्वादिरूपस्वार्थस्य द्राक्षादावन्वयबोधकः। प्रत्ययानां प्रकृत्यर्थावच्छिन्नस्यैव संख्यादिभिन्नस्वार्थस्य कर्तृकृदा-

दावन्वयबोधजनकत्वव्युत्पत्तेः। अतो नाम्नः प्राग्विहिते बहुचि नातिव्याप्तिः। नापि चन्द्रनिभोऽयं कुम्भकारोऽयमित्यादौ सदृशकर्त्राद्यर्थके निभकारादावतिव्याप्तिः। पूर्वपदार्थावच्छिन्नस्यैव सदृशाद्यर्थस्य बोधकतायास्तत्र व्युत्पन्नत्वात्।

न चैवमेवकारादेरन्ययोगव्यवच्छेदाद्यर्थे प्रकृतित्वं न स्यात्। पार्थ एव धनुर्धर इत्यादौ पार्थादिपदार्थविशेषितस्यैव तादृशस्वार्थस्यान्वयबोधं प्रति हेतुत्वादिति वाच्यम्। इष्टत्वात्। प्रकृतेः स्वोत्तरविभक्तिसाकाङ्क्षसजातीयत्वनियमात्। एवकारादेश्च सविभक्तिकत्वे एव प्रमाणाभावात्।

प्रकारान्तरेण प्रकृतिलक्षणम्

स्वोपस्थाप्ययदर्थस्य बोधने यस्य निश्चयः।
तत्त्वेन हेतुरथवा प्रकृतिः सा तदर्थिका।।

तत्त्वेन यन्निश्चयत्वेन स्वोपस्थाप्ययादृशार्थस्यान्वयबोधं प्रति स्वाव्यवहितोत्तरत्वसंसर्गेण यादृशशब्दवत्तानिश्चयत्वेन हेतुत्वं तादृश एव शब्दस्तथाविधार्थे प्रकृतिरिति फलितार्थः। तथा च किंचिद्धर्मावच्छिन्नविशेष्यकाव्यवहितोत्तरत्वसंबन्धावच्छिन्नयादृशानुपूर्व्यवच्छिन्नप्रकारताशालिनिश्चयत्वं स्वोपस्थाप्ययादृशार्थविषयकताकान्वयबोधजनकतावच्छेदकतापर्याप्त्यधिकरणं तादृशानुपूर्वीमच्छब्द एव तथाविधार्थे प्रकृतिरिति पर्यवसितम्। अमादिधर्मिकघटादिनिश्चयत्वस्य घटीयं कर्मत्वमित्याद्यन्वयबोधजनकतावच्छेदकतापर्याप्त्यधिकरणत्वात् घटाद्यर्थे घटादेः प्रकृतित्वम्।

बहुगुडो द्राक्षेत्यादौ बहुजाद्यर्थस्यान्वयबोधं प्रति न गुडादिपदधर्मिकबहुजादिनिश्चयत्वेन हेतुत्वम्। अपि तु सुबादिधर्मिकबहुगुडादिपदनिश्चयत्वेन। अन्यथा केवलादपि बहुगुडादिशब्दात् द्राक्षादौ बहुजाद्यर्थस्यान्वयबोधापत्तेरिति न तत्रातिव्याप्तिः।

प्रत्ययलक्षणम्

यादृशार्थे प्रकृत्यन्यो निपातान्यश्च वृत्तिमान्।
स तादृशार्थे शब्दः स्यात् प्रत्ययोऽसौ चतुर्विधः।।

यादृशार्थ इति प्रकृतौ निपाते वृत्तौ चान्वेति। तेन यादृशार्थकप्रकृतिनिपाताभ्यां भिन्नः यादृशार्थे शक्तिनिरूढलक्षणान्यतराख्यप्रशस्तवृत्तिमान् यादृशः शब्दः स तादृशार्थकः प्रत्ययः। प्रशंसायां मतुपो विधानात् प्रशस्तवृत्तिमानिति लभ्यते। शक्त्या निरूढलक्षणया च गुणगुणिनोः स्थितिप्रस्थानयोश्च बोधकेषु शुक्लस्था-

प्रभृतिषु अतिव्याप्तिवारणाय निपातान्य इत्युक्तम्। सुबादिषु स्वात्मकवर्णपरेषु अव्याप्तिवारणाय प्रकृत्यन्यत्वमपहाय यादृशार्थकप्रकृत्यन्यत्वं निवेशितम्। तथा च सुबादीनां सामान्यतः प्रकृत्यन्यत्वाभावेऽपि एकत्वाद्यर्थे प्रकृत्यन्यत्वसत्त्वात् एकत्वाद्यर्थे प्रत्ययत्वमस्त्येवेति नाव्याप्तिः। निपातस्य कस्मिन्नप्यर्थे प्रत्ययत्वासंभवात् तत्र यादृशार्थकत्वं न निविष्टं, प्रयोजनाभावात्।

तृतीयादेः कर्मत्वादौ विद्यमानापि लक्षणा न निरूढा, प्रायशः प्रयोगविरहात्। अत एव यत्रास्ति प्रयोगः तत्र तृतीयादितोऽपि कर्मत्वादेरवगमः। यथा पशुना रुद्रं यजत इत्यादौ। पशुं रुद्राय ददातीत्यर्थः। ततश्च तृतीयादेः कर्मत्वार्थकप्रत्ययत्ववारणाय निरूढेति लक्षणायां विशेषणम्।

अत एव प्रत्ययानां प्रशस्तवृत्त्यैव बोधकत्वमिति नियमस्य प्रामाणिकत्वादेव एकमर्थं वक्तीत्येकवचनमिति योगबलादेव एकवचनादेः एकत्वादिबोधकत्वप्राप्तौ "द्व्येकयोर्द्विवचनैकवचने"[१] "बहुषु बहुवचनम्"[२] इति यत् पाणिनिः प्राह तदिदं द्वित्वैकत्वादावेव द्विवचनैकवचनादिनियमार्थमिति फणिभाष्यकृतः। तेन द्वित्वादावपि नैकवचनादिप्रयोगः प्रमाणम्।

तद्धिताख्यातकृतोऽप्येतेन व्याख्याताः। तत्रापि शक्तिवन्निरूढलक्षणाया एव प्रत्ययत्वसम्पादकत्वात्। भक्षक इत्यत्र कृता भोजनकर्ता प्रतीयते न तु तदधिकरणीभूतदेशः। दाक्षिरित्यत्र तद्धितेन दक्षापत्यमेव प्रतीयते न तु धनादिकम्। पक्ष्यतीत्यत्र आख्यातेन पाकनिष्ठं भविष्यत्त्वं प्रतीयते न तु वर्तमानत्वम्।

न च सनादिस्वार्थिकप्रत्ययेऽव्याप्तिः, तस्य निरर्थकत्वात्। "जुगुप्सत" इत्यादौ कुत्सादेः धात्वर्थमात्रस्य बोधात् इति वाच्यम्। स्वार्थिकप्रत्ययानां धात्वर्थादिस्वरूपार्थकत्वेन निरर्थकत्वविरहात्। तथा च जुगुप्सते देवतेत्यादौ सन्तलादौ नाव्याप्तिः।

भावविहितानामपि घञादीनामुक्तैव गतिः। तत्रापि भावपदस्य धात्वर्थस्वरूपपरत्वात्। अन्यथा पाकं पश्येत्यादौ धात्वर्थस्य पचनादेः कर्मत्वादावन्वयानुपपत्तेः, सुबर्थे धात्वर्थान्वयस्याव्युत्पन्नत्वात्।

इत्थमेव च स्तोकः पाक इत्यादिप्रयोगस्य परिशिष्टाद्युक्तस्य प्रामाण्यम्। अन्यथा स्तोकादीनां धात्वर्थविशेषणत्वे नियमतो द्वितीयापत्तेः। "क्रियाविशेषणानां कर्मत्वं नपुंसकत्वं च" इत्यनुशासनात्।

---

[१] सू. १.४.२२
[२] सू. १.४.२१

अत एव —

संचारो रतिमन्दिरावधि सखीकर्णावधि व्याहृतं
हास्यं चाधरपल्लवावधि पदन्यासावधि प्रेक्षितम्।
चेतः कान्तसमीहितावधि महामौनोऽपि मानावधिः
सर्वं सावधि नावधिः कुलभुवां प्रेम्णः परं केवलम्।।

इति काव्यं संगच्छते। अन्यथा अवधिशब्दोत्तरं यथा द्वितीया तथा स्तोकशब्दोत्तरमपि, क्रियाविशेषणत्वाविशेषात्। अत एव च

"आगमो निष्फलस्तत्र भुक्तिः स्तोकापि यत्र नो"[१]

इत्यादिस्मृतिश्च संगच्छत इति नव्याः।

शाब्दिकसंप्रदायस्तु — स्वोत्तरप्रत्ययार्थसाकाङ्क्षस्यैव धातोरर्थे विशेषणतापन्नस्य बोधने तदर्थकनाम्नः द्वितीयाद्यपेक्षा, न तु धातुमात्रस्य। तथा च स्तोकः पाकः इत्यादिरेव प्रमाणं न तु स्तोकं पाक इत्यादिः। "अपृथग्रूपक्रियाया विशेषणं कर्म" इत्यनुशासनस्यापि स्वोत्तरप्रत्ययार्थसाकाङ्क्षधात्वर्थविशेषणं कर्मेत्यत्रैव तात्पर्यम्। अत एव "स्तोकं स्थीयते, साधु गतम्, चकितं द्रष्टव्यम्" इत्यादौ धात्वर्थस्य तिङाद्यर्थकालादिसाकाङ्क्षत्वान्न तद्विशेषणस्य द्वितीयाद्यनुपपत्तिः इति।

यत्तु वाक्यपदीये भर्तृहरिणोक्तम् —

यः स्वेतरस्य यस्यार्थे स्वार्थस्यान्वयबोधने।
यदपेक्षस्तयोः पूर्वा प्रकृतिः प्रत्ययः परः।।

यः शब्दः स्वभिन्नयच्छब्दस्य यादृशार्थधर्मिकयादृशार्थप्रकारकान्वयबोधे यादृशशब्दसाकाङ्क्षः तयोर्मध्ये पूर्वशब्दः तादृशार्थे प्रकृतिः, परशब्दः प्रत्ययः इति। तत् बहुच्कल्पवादावव्याप्त्यतिव्याप्तिप्रसङ्गादुपेक्षितम्। बहुचि परत्वाभावादव्याप्तिः। कल्पार्थे पचतीत्यस्य प्रकारतयाऽभानात् प्रत्यये प्रत्ययलक्षणस्य प्रकृतौ प्रकृतिलक्षणस्य चाव्याप्तिः। इदमुपलक्षणं बहुचि कल्पप्रत्यये च प्रकृतिलक्षणस्यातिव्याप्तिरपि बोध्या।

यदपि —

स्वेतरार्थानवच्छिन्नस्वार्थस्यान्वयबोधने।
योऽसमर्थः सैष शब्दः प्रत्ययोऽयं चतुर्विधः।।

इत्युमापतिनोक्तं, तदपि अयुक्तम्। सुप्तिङोः पदार्थान्तरावच्छिन्नस्वार्थसंख्यादिप्रकारकबोधसमर्थत्वेन तयोः तव्यादौ चाव्याप्तेः।

---

[१] याज्ञवल्क्यस्मृतिः।

प्रकारान्तरेण प्रत्ययलक्षणम्

इतरार्थानवच्छिन्ने स्वार्थे यो बोधनक्षमः।
तिङर्थस्य निभाद्यन्यः स वा प्रत्यय उच्यते।।

यः शब्दः शब्दान्तरार्थाविशेषिते यादृशस्वार्थे धर्मणि तिङर्थस्यान्वयबोधने स्वरूपायोग्यः स वा निभादिशब्देभ्योऽन्यः तादृशार्थे प्रत्यय इत्यर्थः। "चैत्रोऽस्ति" इत्यादौ अर्थान्तरावच्छिन्ने स्वार्थे नाम्नां तिङर्थान्वयबोधकत्वम्। एवं "यजेत स्थीयत" इत्यादौ यजादिधातूनामिति नातिप्रसङ्गः। 'पचति' इत्यादौ तिङां, 'पाचकोऽस्ति' इत्यादौ कृतां, 'काश्यपिः' इत्यादौ च तद्धितानां प्रकृत्यर्थावच्छिन्न एव स्वार्थे कृत्यादौ तिङर्थस्य वर्तमानत्वादेर्बोधकत्वम्, न तु तदनवच्छिन्न इति नाप्रसङ्गः। निभनिपातादिकस्तु शब्दान्तरार्थानवच्छिन्ने सदृशसमुच्चयादिस्वार्थे तिङर्थस्यान्वयबोधं प्रति स्वरूपायोग्योऽपि निभादिरेव, न तु निभादिभिन्न इति न तत्रातिव्याप्तिः।

विभक्तिलक्षणम्[१]

संख्यात्वव्याप्यसामान्यैः शक्तिमान् प्रत्ययस्तु यः।
सा विभक्तिर्द्विधा प्रोक्ता सुप् तिङ् चेति विभेदतः।।

संख्यात्वव्याप्यजात्यवच्छिन्नशक्तिमान् यः प्रत्ययः सा विभक्तिः। सा द्विधा सुप् तिङ् चेति। एकत्वत्वाद्यवच्छिन्नशक्तिमानपि तदादिः न प्रत्ययः। प्रत्ययश्च तृजादिः न संख्याशक्त इति तयोः व्युदासः।

यद्याख्यातमात्रस्य तदेकवचनस्य वा न संख्याशक्तत्वे प्रमाणं तदा अन्यथा निर्वक्ति —

प्रकृत्यर्थस्य यः स्वार्थे विधेयत्वेन बोधने।
समर्थः सोऽथवा शब्दो विभक्तित्वेन गीयते।।

यः शब्दः स्वार्थे धर्मिणि स्वप्रकृत्यर्थविधेयकान्वयबोधं प्रति समर्थः स सुबादिः विभक्तिरित्युच्यते। "घटम्" इत्यादौ सुपा कर्मत्वं घटीयम् इति, "पचति" इत्यादौ तिङा कृतिः पाकीया इत्युद्देश्यविधेयभावे स्वार्थे प्रकृत्यर्थस्य धीः उत्पद्यते। न तु प्रत्ययान्तरेण तृजादिना तथा धीः उत्पद्यते। तस्य प्रकृत्यर्थावच्छिन्नस्वार्थविषयताशालिन्येव शाब्दे समर्थत्वात्। न हि "दाक्षिः" इत्यादौ अपत्यं दक्षस्य इत्यादिः उद्देश्यविधेयभावेन बोधः कस्यापि भवति। किं तु दक्षापत्यत्वावच्छिन्ने धर्मिण्येव

---

[१] श.श.प्र.पृ. २८४

सुबर्थैकत्वादेः बोधः। अन्यथा अपत्यं दक्षस्य चैत्रस्य च इत्यादाविव दाक्षिश्चैत्रस्य चेत्यादावपि अपत्यादिधर्मिकस्य दक्षचैत्राद्योः विधेयभावेन युगपदन्वयबोधस्य दुर्वारतापत्तेः।

प्रथमापि अभेदादौ स्वार्थे प्रकृत्यर्थस्य विधेयभावेन धियं जनयत्येव। न चेदेवं, "नीलो घट" इत्यादौ नीलाद्यभेदरूपस्यावान्तरवाक्यार्थस्य पूर्वमप्रतीतौ महावाक्यार्थबोधस्य तत्पूर्वकत्वहान्यापत्तिः। अतः प्रथमायां नाव्याप्तिः। तथा च "नीलो घट" इत्यत्र तादात्म्यं नीलीयम् इत्यादौ बोधः, तदनन्तरं नीलतादात्म्यवान् घट इति बोधः।

शब्दशक्तिप्रकाशिकानुसारेण सुपां लक्षणम्[१]

प्रकृत्यर्थे स्वार्थसंख्यान्वयधीहेतवः सुपः।
प्रथमादिप्रभेदेन ताश्च सप्तविधा मताः।।

प्रकृत्यर्थधर्मिकस्वार्थसंख्यान्वयबोधिका विभक्तयः सुप इत्युच्यन्ते। ताश्च प्रथमाद्वितीयादिभेदेन सप्तविधाः। तिङस्तु स्वार्थभावनान्वयिन्येव स्वार्थसंख्यां बोधयन्ति न तु स्वप्रकृत्यर्थ इति तासां व्युदासः।

विभक्त्यर्थनिर्णयानुसारेण विभक्तित्वादिनिर्वचनम्[२]

पूर्वपक्षः

ननु कारकाकारकौ कथं विभक्त्यर्थौ स्याताम्। विभक्तित्वस्यैव दुर्निरूपत्वात्। तथा हि — विभक्तित्वं न सुब्निराकाङ्क्षप्रत्ययत्वम्। "पाचयति पिपक्षति" इत्यादौ णिच्सनोरतिव्याप्तेः। न च सुप्तिङोरन्यतरनिराकाङ्क्षत्वं प्रवेशनीयमिति णिच्सनोर्नातिव्याप्तिः, तयोस्तिङ्सापेक्षत्वादिति वाच्यम्। "चैत्रः पचति फूत्कारविशेषात्" इत्यादौ पञ्चमीतिपोः परस्परसाकाङ्क्षत्वेनोभयोरव्याप्तेः। "तार्तीयीक" इत्यादौ तीयादितद्धितेऽतिव्याप्तेश्च। ईकक्प्रकृतेस्तीयस्य सुप्तिङ्निराकाङ्क्षत्वात्।

अत एव सुप्तिङोरप्रकृतित्वं तन्निराकाङ्क्षत्वमिति दर्शितयोः पञ्चमीतिपोर्नातिव्याप्तिरिति परास्तम्। सुप्तिङन्यतरत्वस्यैव सम्यक्त्वे तदन्यतराप्रकृतित्वे व्यर्थविशेष्यत्वाच्च।

---

[१] पृ. २८६

[२] विभक्त्यर्थनिर्णये पृ. २०

यत्तु प्रकृत्यर्थविधेयतानिरूपितस्वीयोद्देश्यताकशाब्दज्ञानजनकशब्दत्वम्, सुप्तिङोरेव तथाभूतशाब्दजनकत्वमिति लक्षणसंगमः। कृत्तद्धितादेरर्थे प्रकृत्यर्थस्य न विधेयतयान्वय इति न तत्रातिव्याप्तिरिति।

तदसत्। सुप्तिङोरर्थे प्रकृत्यर्थस्य विधेयत्वेनान्वयेऽननुभवात् मानाभावाच्च। किं च "तण्डुलं पचति" इत्यादौ तण्डुलीया कर्मतेत्यवान्तरवाक्यार्थबोधे तण्डुलस्य विधेयत्वं कर्मत्वस्य उद्देश्यत्वं यदि भवति तदा तण्डुलमोदनीयत्वात् इति द्वितीयार्थकर्मतापक्षकन्यायप्रयोगः स्यात्। यदि प्रकृत्यर्थविशेषणतानिरूपितस्वार्थविशेष्यताकबोधजनकत्वमेवाभ्युपेयते तदा प्रत्ययान्तरसाधारण्यान्नेदं लक्षणम्।

अपि च दाक्षिरित्यादौ तद्धितार्थेऽपत्ये दक्षादेः प्रकृत्यर्थस्य तुल्ययुक्त्या विधेयतयान्वये बाधकाभावात् तद्धितेऽतिव्याप्तिः। एवं पिपक्षेत्यादौ सन्नर्थे इच्छायां पाकस्य तथान्वयात् सन्प्रत्यये, कर्तेत्यादौ कृदर्थे आश्रये कृतेस्तथान्वयात् कृत्प्रत्यये चातिव्याप्तिः।

न च दर्शितस्थलेषु प्रकृत्यर्थस्य विधेयतया न प्रत्ययार्थेऽन्वयः, तथा सति "अपत्यं दक्षस्य, चैत्रस्य चेच्छा, पाकस्य भोजनस्य चाश्रयः कृतेर्ज्ञानस्य च" इत्यादौ दक्षचैत्रयोः पाकभोजनयोः कृतिज्ञानयोः युगपत् विधेयताद्वयशाल्यन्वयबोध इव "दाक्षिश्चैत्रस्य पिपक्षा भोजनस्य कर्ता ज्ञानस्य" इत्यादौ दक्षचैत्रयोः पाकभोजनयोः कृतिज्ञानयोः युगपद्विधेयताद्वयशाल्यन्वयबोधः स्यादिति वाच्यम्। प्रत्ययार्थे प्रकृत्यर्थान्वयस्य व्युत्पन्नत्वेन प्रकृत्यर्थस्य चैत्रादेः तद्धितार्थे विधेयतयान्वयबोधस्यानुपपत्तेः।

अन्यथा तवापि "तण्डुलमोदनस्य" इत्यादौ तण्डुलौदनोभयविधेयकताकान्वयबोधः स्यात्। न चेयमिष्टापत्तिः। तथा सति सर्वदर्शनसिद्धान्तविरोधमदूषणमभ्युपगच्छतो भगवतः प्रदर्शितस्थले तद्धितार्थे चैत्रादेरन्वये कुतो नेष्टापत्तिः।

न चैवं "दाक्षिः सुन्दर" इत्यादौ सुन्दरतादात्म्यस्य प्रकृत्यर्थान्वयस्य तद्धितार्थेऽन्वयो न स्यादिति वाच्यम्। दक्षापत्यस्वरूपविशिष्टस्य तद्धितान्तवाक्यार्थस्याप्रत्ययार्थतया तत्र सुन्दरतादात्म्यान्वयस्य निष्प्रत्यूहत्वात्। तद्धितार्थे केवलापत्ये सुन्दरतादात्म्यान्वयस्य केनाप्यनभ्युपगमात्।

न चैवं "तण्डुलमोदनस्य" इत्यादौ तण्डुलकर्मत्वे वाक्यार्थे ओदनादेरन्वयः स्यादिति वाच्यम्। प्रकृत्यर्थविशेषितप्रत्ययार्थस्वरूपवाक्यार्थस्य विशेष्यतयान्वये कृत्तद्धितान्तार्थस्यैव प्रयोजकत्वात्। तण्डुलकर्मत्वादिरूपवाक्यार्थस्य विशेषणतयान्वये धात्वर्थस्य प्रयोजकत्वात् "तण्डुलमोदनस्य" इत्यादौ ओदनादेरन्वयासंभवात्।

यत्र प्रकृत्यर्थस्य प्रत्ययार्थे नान्वययोग्यता पारिमाण्डल्यादौ तत्र नञ्समभिव्याहारेऽन्वयबोधस्य प्रामाणिकत्वे तु तत्रैव प्रकृत्यर्थविशेषितनञर्थस्य अप्रकृत्यर्थस्य प्रकृतिलक्ष्यस्य वान्वय इति वक्ष्यते।

एतेन प्रथमोक्तपदार्थस्यैवोद्देश्यत्वं भवति। "यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणम्" इति व्युत्पत्तेः। अत एव "न्यक्कारो ह्ययमेव मे" इत्यादावविमृष्टविधेयांशत्वं दोषमाचक्षते काव्यविदः। तथा च "तण्डुलम्" इत्यादौ तण्डुलीया कर्मतेतिबोधे तण्डुलस्य विधेयत्वं न भवति। किं तु "पर्वते वह्निः" इत्यादौ विशेषणीभूतपर्वतादेरिव तण्डुलस्योद्देश्यत्वमेव। तथा च प्रकृत्यर्थोद्देश्यतानिरूपितसुबर्थविधेयताकशाब्दजनकशब्दत्वं विभक्तित्वमिति परास्तम्। तद्धितादिप्रकृत्यर्थस्योद्देश्यतयान्वये बाधकाभावात् तद्धितादावतिव्याप्तेरिति चेत् —

सिद्धान्तः

उच्यते। संख्यावाचकप्रत्ययत्वं विभक्तित्वम्। प्रत्ययत्वमात्रोक्तौ कृत्तद्धितादावतिव्याप्तिरिति संख्यावाचकत्वमुक्तम्। यद्यपि संख्यात्वविशिष्टस्य वाचकत्वं न विभक्तीनाम्; किं तु एकत्वत्वविशिष्टस्य द्वित्वत्वविशिष्टस्य बहुत्वत्वविशिष्टस्येति संख्यात्वव्याप्यजातिविशिष्टवाचकत्वं वक्तुमुचितम्। तथापि लाघवेन संख्यामात्रविशेष्यताकबोधोद्देश्यकसंकेतवत्त्वं निवेशनीयम्। तावतैव समीहितसिद्धेः। पार्थिवमित्यादितद्धितस्य संबन्धित्वेन संख्यावबोधकत्वोपगमे तत्रातिव्याप्तिवारणाय मात्रपदमुक्तम्। तदर्थस्तु संख्येतरावृत्तित्वम्। तथा च संख्येतरावृत्तिविशेष्यताकबोधोद्देश्यकसंकेतवत्त्वं संख्यावाचकत्वं बोध्यमिति।

ननु "चैत्रो मैत्रश्च पचत" इत्यादौ द्वित्वस्य "चैत्रो मैत्रो जैत्रश्च पचति" इत्यादौ बहुत्वस्य बोधात् द्विवचनबहुवचनतिङोः संख्यावाचकत्वमस्तु। तिङेकवचनस्य संख्यावाचकत्वे न मानमस्तीति तिङेकवचनेऽव्याप्तिरिति चेत् —

न। तथा सति 'पुरुषौ पचति' इति प्रयोगप्रसङ्गात्। मम तु तिङुपस्थाप्यैकत्वस्य द्वित्वविशिष्टपुरुषेऽन्वययोग्यत्वं नास्तीति 'वह्निना सिञ्चति' इतिवत् न तादृशप्रयोगः संभवति।

न च द्विवचनप्रथमान्ते द्विवचनतिङन्तस्य समभिव्याहारः तयोः परस्परानुभवे तन्त्रमिति न तथा प्रयोगः संभवतीति वाच्यम्। "पुरुषौ स्त्री च पचन्ति" इत्यादौ बहुवचनतिङन्तसमभिव्याहारेऽपि प्रथमान्तार्थेऽन्वयदर्शनेन तिङन्तसमभिव्याहारस्य अतन्त्रत्वात्।

न च तथा प्रथमान्तबहुवचनतिङन्तस्यापि समभिव्याहारस्तन्त्रमिति न दर्शित-समभिव्याहारस्यातन्त्रत्वमिति वाच्यम्। तथापि तथाप्रथमान्ते बहुवचनान्तस्येव एकवचनान्तस्य तिङन्तस्य समभिव्याहारः कुतो न तन्त्रमिति बीजस्यानुयोगे संस्यान्वयायोग्यत्वस्यैव बीजत्वेन प्रदर्शनीयत्वात्।

अत एव "पचति" इत्यादौ तृतीयाप्रसङ्गवारणाय कर्तृसंख्यानभिधानं तृतीया-प्रयोजकमित्याख्यातवादे दीधितिकृद्भिः प्रमाणीकृतमिति। इत्थं च संख्यावाचकत्वं शतादिशब्देऽतिव्याप्तमिति प्रत्ययत्वमुपात्तम्।

प्रत्ययत्वनिर्वचनम्

ननु प्रत्ययत्वं दुर्निरूपमिति विभक्तित्वं दुर्निरूपमेव। तथा हि प्रत्ययत्वं न तावत् पदार्थान्वितस्वार्थकत्वम्, नामधात्वादावतिव्याप्तेः। नापि पूर्वपदार्थान्वित-स्वार्थकत्वम्। 'राजपुरुष' इत्यादिसमासेऽतिव्याप्तेः। अत एव पूर्वपदार्थान्वित-प्रधानीभूतस्वार्थकत्वमपि परास्तम्।

यत्तु शब्दान्तरार्थाविशेषिते यादृशे स्वार्थे धर्मणि तिङर्थस्यान्वयबोधने स्वरूपा-योग्यः स निभतुल्यसदृशप्रतियोग्यनुयोगिअधिकरणाधेयादिशब्देभ्यो निपातेभ्यश्च भिन्नः शब्दः तादृशार्थे प्रत्ययः। कृत्तद्धितादीनां स्वार्थे तिङर्थान्वयस्वरूपयोग्यत्वात् तेष्वव्याप्तिरिति शब्दान्तरार्थाविशेषितत्वं स्वार्थस्य विशेषणम्। तस्या अङ्कक-मित्यादौ कादिप्रत्ययस्य कमस्तीत्यादौ शिरःप्रभृतिस्वार्थे तिङर्थान्वयस्वरूप-योग्यत्वात् तत्राव्याप्तिरिति यादृशत्वं विशेषणम्। तेन कादिप्रत्ययस्य अल्पादि-स्वरूपस्वार्थे तिङर्थान्वयस्वरूपयोग्यत्वान्न तत्रातिव्याप्तिः।

अस्तीन्द्राणीत्यादाविन्द्रशब्दार्थाविशेषिते ङीबर्थे स्त्रियां तिङर्थान्वयस्वरूपायोग्ये आनुगागमेऽतिव्याप्तिरिति स्वार्थ इत्युक्तम्।

प्रत्ययमात्रस्य स्वार्थे प्रकृत्यर्थान्वयस्वरूपयोग्यत्वादसंभवः स्यादिति तिङर्थस्ये-त्युक्तम्। चन्द्रनिभोऽस्तीत्यादौ निभादिशब्दानां पूर्वपदार्थचन्द्राद्यविशेषिते स्वार्थे सदृशादौ तिङर्थान्वयस्वरूपायोग्यत्वात् तत्रातिव्याप्तिरिति निभादिभिन्नत्वं शब्दस्य विशेषणम्। समुच्चयविकल्पार्थकानां चवादिनिपातानां स्वार्थे तिङर्थान्वयस्वरूपा-योग्यत्वात् तत्रातिव्याप्तिरिति निपातभिन्नत्वं विशेषणम्। कादिशब्दस्य शिरः-प्रभृत्यर्थे प्रत्ययत्ववारणाय तादृशार्थे इत्युक्तमिति मतम् —

तदपि न सम्यक्। निभादिसकलशब्दस्य प्रतियोगिनोऽवगमस्याशक्यतया तावद्भिन्नत्वस्य दुर्ग्रहत्वात्। किं च संबन्धीत्यादाविन्प्रत्ययार्थस्य संबन्धिनः शब्दान्तरसम्बन्धेन विशेषितत्वात् तदविशेषितस्वार्थाप्रसिद्ध्या तत्रातिव्याप्तिः। यदि

च अविशेषितत्वमनन्वितत्वमित्युच्यते तदपि खलेकपोतन्यायेन शाब्दमते "दाक्षिरस्ति पाचकोऽस्ति" इत्यादौ प्रकृत्यर्थेन समं तिङर्थस्य तद्धितकृत्प्रत्ययार्थे युगपत् अन्वयेन तयोरव्याप्तिः।

अपि च संबोधनान्तस्य निर्विभक्तिकस्य च चैत्रादिप्रातिपदिकस्य स्वार्थे तिङर्थान्वयायोग्यत्वात् तादृशतादृशचैत्रादिपदेऽतिव्याप्तिः।

न च चैत्रोऽस्तीत्यादावन्वयदर्शनेन चैत्रादिपदानां न तिङर्थान्वयायोग्यत्वमिति दर्शितस्थलेषु संबन्धीतरप्रथमासमभिव्याहारस्य सहकारिणो विरहान्नान्वयबोध इति वाच्यम्। एवं सति हि कृत्तद्धितस्थलेऽपि प्रकृतिसमभिव्याहारस्य सहकारित्वान्न तिङर्थान्वयायोग्यत्वमिति तत्राव्याप्तिः।

न च कृत्तद्धितस्थले प्रकृतिसमभिव्याहारो न तिङर्थान्वये तन्त्रम्, किं तु प्रकृत्यर्थान्वय एवेति वाच्यम्। प्रत्यये प्रकृतिसमभिव्याहारस्य प्रत्ययार्थान्वयमात्रे तन्त्रत्वात् प्रकृतिविनाकृतस्य कुत्राप्यनुभावकत्वाभावात्। एवं च 'पाकोऽस्ति' इत्यादौ घञ्प्रत्ययेऽव्याप्तिश्च। पदार्थान्तरानन्विते धातुघञुभयोपस्थापिते पाके तिङर्थान्वस्य सर्वजनसिद्धतया घञस्तिङर्थान्वययोग्यत्वादिति। यदपि शब्दान्तरार्थाविशेषितस्य स्वार्थस्य विशेषणतया अन्वयबोधनायोग्यः शब्दः प्रत्यय इति।

तदपि तादृशयोः लिङ्गसंख्ययोः विशेषणतयान्वययोग्ये सुपि, 'पाकम्' इत्यादौ तादृशस्य पाकस्य कर्मत्वे विशेषणतयान्वययोग्ये घञ्प्रत्यये चाव्याप्त्या अनादरणीयमिति। तस्मात् प्रत्ययत्वं दुर्वचमिति चेत् —

उच्यते। सार्थकशब्दोत्तरत्वज्ञानाविषयो यः शब्दः शाब्दबोधं नार्जयति स शब्दः प्रत्ययः। प्रकृतीनां नामधातूनां सार्थकशब्दोत्तरत्वज्ञानविषयाणामपि शाब्दबोधार्जकत्वम्। प्रत्ययानां तु सार्थकशब्दोत्तरत्वज्ञानविषयाणामेव तथात्वमिति।

तथा च स्वार्थविषयकशाब्दसामान्यीयाभावप्रयोजकाभावप्रतियोगिसार्थकशब्दोत्तरत्वज्ञानीयोत्तरत्वप्रकारतानिरूपितविशेष्यतावत्सार्थकशब्दत्वं प्रत्ययत्वम्।

"राज्ञः पुरुष" इत्यादौ पुरुषपदे राजपदोत्तरत्वप्रकारकज्ञानविषयतायाः सत्त्वादतिव्याप्तिरिति प्रतियोग्यन्तं ज्ञानविशेषणम्।

पुरुषपदे षष्ठ्यन्तराजपदोत्तरत्वज्ञानस्य निरुक्तप्रतियोगित्वविरहात् 'पुरुषो राज्ञ' इत्यतोऽपि शाब्दोदयात् नातिव्याप्तिः।

असभववारणाय स्वार्थविषयकत्वं शाब्दविशेषणम्। 'राजपुरुष' इत्यादिसमासे पुरुषपदे राजपदोत्तरत्वज्ञानं राजपदार्थविशेषणकपुरुषपदार्थविशेष्यताकशाब्दबोधस्य जनकम्। अतः "पुरुषराज्ञ" इत्यादौ न तथा शाब्दबोधः।

"पुरुषो राजा" इत्यादौ राजपदार्थान्वितविभक्त्यर्थतादात्म्यस्य पुरुषपदार्थे विशेषणतयान्वयात् राजपदार्थस्यानन्वयान्न व्यभिचारः।

राजपदार्थविशेषणताकपुरुषविशेष्यताकशाब्दाभावप्रयोजकाभावप्रतियोगिनो राजपदोत्तरत्वज्ञानस्य विषये पुरुषपदेऽतिव्याप्तिरिति तद्वारणाय तादृशशाब्दसामान्यीयत्वेनाभावो विशेषितः। तेन पुरुषपदार्थविषयकशाब्दसामान्यं प्रति राजपदोत्तरत्वज्ञानं न जनकम्। "पुरुषस्तिष्ठति" इत्यादौ व्यभिचारात् न तादृशशाब्दसामान्याभावप्रयोजकाभावप्रतियोगिराजपदोत्तरत्वज्ञानमिति तद्विषये पुरुषपदे नातिव्याप्तिः।

संयोगाद्युत्तरत्वज्ञानस्य तादृशप्रतियोगित्वात् असंभवः स्यादिति शाब्दपदमुपात्तम्। अध्युत्तरत्वेन इङः ज्ञानमध्ययनशाब्दं प्रति हेतुरिति तादृशाभावप्रतियोगिनोऽप्युत्तरत्वज्ञानस्य विषये इङ्धातावतिव्याप्तिः। तद्वारणाय सार्थकत्वं शाब्दविशेषणम्। अध्यादिशब्दस्य निरर्थकत्वान्न तत्रातिव्याप्तिः।

सार्थकशब्दोत्तरत्वज्ञानस्य प्रकृतितावच्छेदकप्रकारतानिरूपितविशेष्यतावति प्रकृतिशब्देऽतिव्याप्तिरिति विशेष्यतायामुत्तरत्वप्रकारतानिरूपितत्वं विशेषणम्।

न च सार्थकशब्दोत्तरत्वप्रकारतानिरूपितज्ञानविशेष्यतावत्त्वं प्रवेश्यताम्। तावतैव समीहितसिद्धेः तादृशोत्तरत्वज्ञानीयत्वस्योत्तरत्वप्रकारतायां निवेशो व्यर्थ इति वाच्यम्।

यत्र "इन्द्राणी" इत्यादौ, "पचति" इत्यादौ इन्द्रोत्तरानुगुत्तरत्वेन ङीपो ज्ञानं पजुत्तरशबुत्तरतिङो ज्ञानं शाब्दजनकं तत्र सार्थकशब्दोत्तरत्वप्रकारतानिरूपितविशेष्यतायाः ङीपि तिङि चासत्त्वात् तयोः अव्याप्तिप्रसङ्गात्। तादृशोत्तरत्वज्ञानोत्तरत्वप्रकारतायाः निवेशे तु तादृशागमोत्तरत्वप्रकारतानिरूपितविशेष्यतायाः ङीपि तिङि सत्त्वान्न तयोरव्याप्तिः।

एवं शबानुगाद्यागमेऽतिव्याप्तिवारणाय सार्थकपदम्। आगमस्य निरर्थकत्वान्न तत्रातिव्याप्तिः। "स्वं रूपं शब्दस्याशब्दसंज्ञा"[१] इति शबाद्यागमानां स्वरूपार्थकत्वात् अतिव्याप्तितादवस्थ्यमिति शब्दपदं वृत्तिमदर्थकम्। तेन सार्थकपदं वृत्त्या स्वरूपेतरार्थस्मारकपरम्।

अत्र विशेष्यता तादृशाभावप्रतियोगितावच्छेदिका बोध्या। तेन "अस्ति घट" इत्यादौ असुत्तरतिबुत्तरं घटपदमित्याकारकासुत्तरत्वज्ञानीयोत्तरत्वप्रकारतानिरूपितविशेष्यतायाः घटपदे सत्त्वेऽपि नातिव्याप्तिः। घटपदनिष्ठतादृशविशेष्यतायाः

[१] सू. १.१.६८

तादृशाभावप्रतियोगितानवच्छेदकत्वात्। तादृशोत्तरत्वेन घटपदज्ञानस्य शाब्दाहेतुत्वात्। असुत्तरस्तिप् घटपदं चेत्याकारकज्ञानादपि तथा शाब्दोदयात्।

अत्र "चैत्रोऽस्ति" इत्यादौ चैत्रपदार्थविशेष्यकसुबर्थलिङ्गसंख्याप्रकारकशाब्दं प्रति प्रातिपदिकोत्तरः सुबिति चैत्रपदोत्तरः सुबिति वा ज्ञानं हेतुः। असर्थसत्ताविशेषविशेषणकतिङर्थाश्रयत्वविशेष्यकशाब्दं प्रति धातूत्तरस्तिङ् असुत्तरस्तिप् इति वा ज्ञानं हेतुः। एवम् "इन्द्राणी" इत्यादाविन्द्रपदार्थप्रकारकस्वस्वामिभावसंसर्गकङीबर्थस्त्रीविशेष्यकशाब्दं प्रति इन्द्रपदोत्तरानुगुत्तरो ङीबिति ज्ञानं हेतुः। "पचति" इत्यादौ पजर्थविशेषणकतिङर्थयत्नविशेष्यकशाब्दं प्रति पजुत्तरशबुत्तरस्तिबिति ज्ञानं हेतुः। तेन स्वचैत्रेत्यादौ आनीइन्द्रेत्यादौ तिपचेत्यादौ न तथा शाब्दबोधः। उत्तरत्वं तु ध्वंसः, तद्विशिष्ट उत्तरः।

तथा च चैत्र इत्यादौ चैत्रपदध्वंसविशिष्टं सुपदमिति ज्ञानस्य चैत्रपदत्वावच्छिन्नप्रकारतानिरूपितध्वंसत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपितप्रकारत्वावच्छिन्नविशेष्यताकज्ञानत्वेन, अस्तीत्यादौ उत्तरत्वज्ञानस्य अस्त्वावच्छिन्नप्रकारतानिरूपितध्वंसत्वावच्छिन्नविशेष्यताकज्ञानत्वेन, इन्द्राणीत्यादावुत्तरत्वज्ञानस्य इन्द्रत्वावच्छिन्नप्रकारतानिरूपितध्वंसत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपिताण्(न्)त्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपिते कारकत्वा(निरूपितेकारत्वा)वच्छिन्नविशेष्यताकज्ञानत्वेन, "पचति" इत्यादौ उत्तरत्वज्ञानस्य पच्त्वावच्छिन्नप्रकारतानिरूपितध्वंसत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपिताकारत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपितध्वंसत्वावच्छिन्नविशेष्यत्वावच्छिन्नप्रकारतानिरूपितेत्वावच्छिन्नविशेष्यताकज्ञानत्वेन हेतुत्वम्। एवमन्यत्राप्यूह्यम्।

शबानुक्तिपामनुबन्धानामानुपूर्वी न ज्ञानहेतुतायां निविशते, व्यर्थत्वात् गौरवप्रयोजकाच्च। प्रयोगव्युत्पादनार्थमेव ते सूत्रकारेण निर्दिष्टाः।

एवमानुपूर्वीज्ञानहेतुत्वे सिद्धे तत्र पदाव्यवधानस्य निवेशनमफलं नितरां तन्निर्वचनायासासादनमिति व्यवहितेऽपीदृशविशिष्टवैशिष्ट्यज्ञानात् शाब्दबोधो निष्प्रत्यूह एव।

प्रकृतिलक्षणम्

एवं यत्पदध्वंसवैशिष्ट्यज्ञानं शाब्दहेतुः तत् सार्थकं बहुजन्यत् पदं प्रकृतिः। विशेषणकृत्यं दर्शितप्रायम्। यदि बहुजपि प्रत्ययत्वेन संग्राह्यः तदा प्रत्ययलक्षणे तादृशनिरुक्तशब्दबहुजन्यतरत्वं निवेशनीयमिति।

वस्तुतस्तु निपातादिवत् भेदान्वययोग्यं शब्दान्तरमेव बहुच्। अन्यथा तद्धितत्वे "बहुगुड" इत्यादौ बहुशब्दानन्तरं सुबुत्पत्तिप्रसङ्गात्। कृत्तद्धितेति सूत्रे तद्धितान्तस्यैवोपादानात्। अन्यथा "पचतकि भवतकि" इत्यादौ सुबुत्पत्तिप्रसङ्गात्। तद्धितसूत्रसहचरितं बहुच्सूत्रं बहुजघटितसमुदायस्य तद्धितसाम्यं ज्ञापयति। तेन प्रातिपदिकत्वं तद्धितसुबादिकं च भवतीति।

अत एव यदि बहुच्प्रत्ययः स्यात् तदा "प्रत्ययः"[१] "परश्च"[२] इत्यनन्तरं "न बहुच्" इति मुनिः सूत्रयेत्। बहुच्सूत्रे पुरस्तात् इत्यपेक्षया मात्रालाघवात्। तावतैव बहुचः प्रकृतिपूर्वत्वलाभसंभवात् इति परास्तम्।

एवं निभशब्दोऽपि संनिभशब्दवत् न पदोत्तरत्वेन ज्ञातः शाब्दहेतुः, तादृशहेतुताग्राहकाभावात्। प्रत्ययस्य तथा हेतुत्वे प्रत्ययः परश्चेत्यनुशासनस्यैव ग्राहकत्वात्। तथा च 'निभं कमलस्य मुखम्' इत्यादौ शाब्दोदयोऽभीष्ट एव।

एवं शाब्दहेतोः पदध्वंसविशिष्टपदज्ञानस्य ध्वंसविशेषणतया भातं सार्थकं पदं प्रकृतिः। ध्वंसविशेष्यतया भातं सार्थकं पदं प्रत्ययः। तदुक्तं वाक्यपदीये भर्तृहरिणा —

यः स्वेतरस्य यस्यार्थे स्वार्थस्यान्वयबोधने।
यदपेक्षस्तयोः पूर्वा प्रकृतिः प्रत्ययः परः।।

अपेक्षा पूर्वापरभावापन्नत्वेन ज्ञानम्। तत्र प्रकृतेः पूर्वतया ज्ञानं शब्दाङ्गमित्यत्र न प्रमाणम्। उत्तरत्वेन प्रत्ययज्ञानस्य वाचकतावच्छेदकत्वविरहेऽपि विभक्तित्वावलीढस्य रूपान्तरेण वाचकत्वमक्षतमेव।

न्यायदर्शनानुसारेण कारकत्वनिर्वचनम्

न्यायवार्तिकरीत्या[३] कारकशब्दार्थः

न्यायदर्शने प्रथमसूत्रे करणार्थकल्युडन्तस्य प्रमाणशब्दस्य अर्थविचारावसरे वार्तिककारेण एवमुक्तम् — न च कारकशब्दाः क्रियासंबन्धमन्तरेणात्मानं लभन्ते। न च द्रव्यमात्रं कारकं न च क्रियामात्रमिति। कारकशब्दो हि प्रवर्तमानः क्रियासाधने क्रियाविशेषयुक्ते प्रवर्तते — इति।

---

[१] सू. ३.१.१
[२] सू. ३.१.२
[३] न्या.वा.पृ. ९

तात्पर्यटीकायां[1] कारकशब्दार्थः

प्रधानक्रियासाधने हेतौ अवान्तरक्रियाविशेषयुक्ते कारकशब्दः प्रवर्तते। द्वैधीभावे हि फले प्रधानव्यापारे कर्तुः करणगोचरः उद्यमननिपतनादिः अवान्तरव्यापारः। कर्मणश्च दारुणःस्पर्शवद्वेगवत्तीक्ष्णतरकुठारसंयोग एवावान्तरव्यापारः। तेन हि दारु स्वावयवपरिस्पन्दजन्यात् अवयवविभागात् द्वैधीभावमनुभवति। तस्मादवान्तरप्रधानव्यापारसंपन्नं कारकम् — इति प्रत्यपादि।

वार्तिके[2] कारकशब्दार्थः

कारकशब्दो हि इत्यादि वाक्यानन्तरं — प्रमातृप्रमेयशब्दौ च कारकशब्दौ। तौ क्रियाम् अन्तरेण न प्रवर्तेयाताम्। पाचकादिशब्दवत् त्रिकालविषयत्वात्। न ब्रूमः क्रियासंबन्धेनैव कारकशब्दाः प्रवर्तन्त इति। अपि तु त्रिकालविषया एते। यदि क्रियासंबन्धनिमित्ता एव स्युः न क्रियामन्तरेण प्रवर्तेरन् । क्रियासंबन्धमन्तरेण तु प्रवर्तन्ते। किं पुनर्निमित्तं, सामर्थ्यम्। तच्च त्रिष्वपि कालेष्वस्तीति — इति प्रतिपादितम्।

तात्पर्यटीकायां च कारकशब्दार्थः

लोकाधीनावधारणः खलु अयं शब्दार्थसंबन्धः। लोकश्च अतीतानागतवर्तमानक्रियासंबन्धमात्रविवक्षया कारकशब्दान् प्रयुङ्क्ते। पाचकमानय पक्ष्यतीति, पाचकोऽयमपाक्षीदिति, पाचकोऽयं पचतीति च तुल्यवत् त्रैकाल्यविषयप्रयोगदर्शनम्। तत् कस्य हेतोः? अपचत्यपि देवदत्तादौ पाकसंबन्धं प्रत्यस्ति स्वरूपशक्तिः इति। द्वयी हि शक्तिः कारकाणां कार्योपजननं प्रति स्वरूपं च सहकारिग्रामसमवधानं च। तत्रासत्यपि सहकारिग्रामसमवधाने कारकशब्दानां प्रवृत्तेः, त्रैकाल्ययोगिकार्योपहितमर्यादमेव स्वरूपं कारकशब्दानां प्रवृत्तौ निमित्तमिति — इति ग्रन्थश्चात्रावधानमर्हति।

सुबर्थविचारः[3] शब्दशक्तिप्रकाशिकानुसारेण

सुपः द्विविधाः कारकार्थकाः तदितरार्थकाश्चेति। तत्र कारकार्थकसुपः निरूप्यन्ते। तत्र आदौ कारकलक्षणमुच्यते —

---

[1] पृ. ३७
[2] पृ. ९
[3] श.श.प्र.पृ. २९४

शब्दशक्तिप्रकाशिकोक्तं कारकलक्षणम्

कारकार्थेतरार्था च सुप् द्विधा च विभज्यते।
धात्वर्थांशे प्रकारो यः सुबर्थः सोऽत्र कारकम्।।

वृत्त्या कारकस्य बोधिका तदन्यस्य चेत्येवं द्विविधोऽपि सुपो विभागः। तत्र यद्धातूपस्थाप्ययादृशार्थेऽन्वयप्रकारीभूय यः सुबर्थो भासते स तद्धातूपस्थाप्यतादृशक्रियायां कारकम्।

"वृक्षात् पतति, व्याघ्रात् बिभेति" इत्यादौ, "ब्राह्मणाय ददाति, पुत्राय क्रुध्यति" इत्यादौ, "स्थाल्यां पचति, शुक्तौ भासते" इत्यदौ, "ग्रामं गच्छति, घटं पश्यति" इत्यदौ, "चैत्रेण पच्यते, घटेन भूयते" इत्यदौ च पतिप्रभृतिधात्वर्थे पतनादौ पञ्चम्याद्युपस्थापितो विभागादिः प्रकारीभूय भासत इति तत्तद्धातूपस्थापिततत्तत्क्रियायां विभागादिकं प्रकृते कारकम्। अतो धात्वर्थे स्वार्थबोधकतया तत्र पञ्चम्यादिः कारकविभक्तिरुच्यते। तथा च तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वे सति सुबर्थत्वं कारकत्वमित्युक्तं भवति।

न चैवं सति प्रकृत्यर्थवृक्षादौ कथं कारकत्वव्यवहार इति वाच्यम्। वृक्षादिप्रकृत्यर्थावच्छिन्नस्य सुबर्थस्य धात्वर्थेऽन्वयात् वृक्षादेः कारकत्वव्यवहारः। तथा च वृक्षादौ कारकव्यवहारं प्रति तद्धात्वर्थनिष्ठविशेष्यतानिरूपितसुबर्थनिष्ठप्रकारत्वाभिन्नविशेष्यतानिरूपितप्रकारत्वं तन्त्रमित्यदोषात्।

"स्तोकं पचति" इत्यादौ स्तोकपदार्थस्य धात्वर्थपाकनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वेऽपि सुबर्थत्वविरहात् न कारकत्वम्। सुपस्तत्र साधुत्वार्थकतया अर्थविरहात् न सुबर्थस्य कारकत्वम्।

षष्ठ्यर्थस्तु संबन्धः न धात्वर्थे प्रकारीभूय भासते तण्डुलस्य पचतीत्यप्रयोगात्। अतः संबन्धो न कारकम्, न वा तदर्थिका षष्ठ्यादिः कारकविभक्तिः। अत एव —

क्रियाप्रकारीभूतोर्थः कारकं तच्च षड्विधम्।
कर्तृकर्मादिभेदेन, शेषः संबन्ध इष्यते।।

इति शाब्दिकाः स्मरन्ति। शेषः — कारकादन्यः। "संबन्धः कारकादन्यः" इत्यपि पठन्ति।

न च "रजकस्य वस्त्रं ददाति" इत्यत्र षष्ठ्यर्थस्य संबन्धस्य धात्वर्थे दानेऽन्वयात् धात्वर्थप्रकारत्वसत्त्वेन कारकत्वापत्तिरिति वाच्यम्। तत्र परिष्कार्यत्वरूपस्य षष्ठ्यर्थसंबन्धस्य वस्त्र एवान्वयेन धात्वर्थान्वयित्वाभावात्। रजकपरिष्कार्यं "वस्त्रं ददाति" इति वाक्यार्थः।

न च "तण्डुलस्य पाकः मैत्रस्य भोक्तव्यम्" इत्यादौ कर्मत्वकर्तृत्वरूप-षष्ठ्यर्थस्य "कर्तृकर्मणोः कृति"[१] इति सूत्रविहितस्य पाकभोजनादिक्रियान्वयित्वेन कारकत्वापत्तिः इति वाच्यम्। इष्टापत्तेः।

अत्राहुः जयरामभट्टाचार्याः — क्रियानिमित्तत्वं कारकत्वमिति केचित्। तन्न। "चैत्रस्य तण्डुलं पचति" इत्यादौ संबन्धिनि चैत्रादावतिव्याप्तेः। अनुमतिप्रकाशन-द्वारा संप्रदानादेरिव तण्डुलादिसंपादनद्वारा संबन्धिनोऽपि पाकादिक्रियानिमित्त-त्वात्। किं तु क्रियान्वितविभक्त्यर्थान्वितत्वं कारकत्वम्। अस्ति च कर्तृकर्मादौ क्रियान्विततिङ्सुप्-विभक्त्यर्थान्वयः, न तूदाहृते संबन्धिनि षष्ठ्यर्थसंबन्धस्य तण्डुलादिनामार्थान्विततया क्रियानन्वितत्वात् इति।

कारकचक्रोक्तं कारकलक्षणम्

भावानन्दतर्कवागीशाः अपि कारकचक्रे एवमाहुः[२]

क्रियानिमित्तत्वं कारकत्वमिति न सामान्यलक्षणम्। संप्रदानादेः अनुमतिप्रका-शनद्वारेव तण्डुलादिसंपादनद्वारा संबन्धिनोऽपि पाकादिक्रियानिमित्तत्वेन "चैत्रस्य तण्डुलं पचति" इत्यादौ संबन्धिनि चैत्रादावतिव्याप्तेः।

किं तु विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यभाक्तसाधारणं कारकत्वम्। क्रिया-निमित्तत्वसहितं मुख्यमिति। "स्तोकं पचति" इत्यादौ क्रियाविशेषणेऽतिव्याप्ति-वारणाय विभक्त्यर्थद्वारेति।

एतदुक्तं भवति — क्रियानिष्ठविषयतानिरूपितविभक्त्यर्थनिष्ठविषयतानिरूपित-विषयताश्रयत्वं मुख्यभाक्तसाधारणं कारकत्वम्। "ग्रामं गच्छति" इत्यादौ मुख्यं कारकं ग्रामादि, "घटं जानाति" इत्यादौ भाक्तं कर्म घटादि। तत्साधारणमित्यर्थः। तथा च क्रियानिमित्तत्वे सति विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यं कारकत्वम्। क्रियाया अनिमित्तत्वे सति विभक्त्यर्थद्वारा क्रियान्वयित्वं भाक्तकारकत्वम्। उभयत्र क्रियानिमित्तत्वं साक्षात्परम्परासाधारणं प्रयोजकत्वं बोध्यम्।

यदि च "गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक्स्वभेषजैः" इत्यादिप्रयोगे विनापि नामाध्याहारं धात्वर्थे षष्ठ्यर्थः संबन्धोऽन्वीयते, तदा कर्तृत्वकर्मत्वादि-षट्कान्यतमत्वे सति क्रियान्वयित्वं कारकत्वमिति तत्त्वम्।

---

[१] सू. २.३.६५
[२] पृ. २-५

अयं भावः — रोगोपशमो यदि धात्वर्थः तदाध्यहारं विनैव षष्ठ्यर्थस्याधेयत्वस्य धात्वर्थैकदेशे रोगेऽन्वयात् अतिव्याप्तिः। यद्युपशम एव धात्वर्थः तदा रोगमिति पदाध्याहारेणैवान्वयबोध इति क्रियान्वयित्वाभावान्नातिव्याप्तिः इत्यतो यदि चेत्युक्तम्। तथा च विभक्त्यर्थकर्तृत्वाद्यन्यतमद्वारा तत्क्रियान्वयित्वं तत्कारकत्वमित्युक्तं भवति।

बृहन्मञ्जूषानुसारेण कारकलक्षणम्[१]

अत्राहुः बृहन्मञ्जूषायां नागेशभट्टाः — द्वितीयादयो द्विविधाः कारकविभक्तयः उपपदविभक्तयश्च। तत्र कारकाणि षट् — कर्ता, कर्म, करणम्, संप्रदानम्, अपादानम्, अधिकरणं चेति।

तत्र कारकत्वं क्रियान्वयित्वम्, न तु क्रियाव्याप्यत्वम्। अत एव "ब्राह्मणस्य पुत्रं पन्थानं पृच्छति" इत्यादौ ब्राह्मणस्य न कारकत्वम्, क्रियान्वयित्वाभावात्। यदि क्रियाव्याप्यत्वं कारकत्वं तदा सुन्दरादिविशिष्टस्य पुत्रस्य क्रियाव्याप्यत्वेन सुन्दरादीनां कर्मकारकत्ववत् ब्राह्मणसंबन्धिपुत्रस्य विशिष्टस्य क्रियाव्याप्यत्वेन विशेषणस्य ब्रह्मणस्यापि कारकत्वं स्यात्।

यत्तु क्रियान्वितप्रत्ययार्थान्वयित्वं कारकत्वमिति, तन्न। "पक्व" इत्यादौ प्रत्ययार्थस्य कारकत्वानापत्तेः।

यदपि क्रियाजनकत्वं कारकत्वमिति। तन्न। "ब्राह्मणस्य पुत्रं पन्थानं पृच्छति" इत्यादौ पुत्रस्य कारकत्वानापत्तेः। पुत्रं विना प्रश्नक्रियायाः अनिष्पत्तेः पुत्रस्यापि क्रियाजनकत्वमिति चेत् — तथापि संप्रदानेऽव्याप्तिः। अविद्यमानसंप्रदानकस्यापि दानस्य जायमानत्वेन तस्य नियतपूर्ववृत्तित्वाभावात्। "घटो जायते घटं करोति" इत्यादौ कर्तृकर्मणोः अव्याप्तेश्च। उत्पत्तिकृतिक्रियापूर्ववृत्तित्वाभावात् तज्जनकत्वाभावात्।

न च यागस्य स्वर्गपूर्ववृत्तित्वाभावेऽपि अपूर्वद्वारा जनकत्ववत् संप्रदानादिज्ञानस्य पूर्ववृत्तित्वेन तद्द्वारा संप्रदानादेरपि क्रियापूर्ववृत्तित्वरूपं जनकत्वं सूपपादमिति वाच्यम्। क्रियानिष्ठशाब्दबोधीयविषयतानिरूपितविषयतावृत्तित्वघटितस्य क्रियाजनकत्वस्य गुरुत्वात्।

आश्रयत्वरूपकृदर्थोपपत्तिस्तु जनक इवान्वयिन्यपि सूपपादा। अखण्डजन्यतानिरुपकजनकत्वमखण्डोपाधिरूपं तत्र निविष्टमित्यपि विनिगमनाविरहग्रस्तम्।

---

[१] पृ. १४४

ननु यदि क्रियान्वयित्वं कारकत्वं तदा कारकशब्दार्थस्य तत्र कथं संगमः? कृञ्धातोः कर्तरि ण्वुल्प्रत्ययेन कारकशब्दस्य निष्पत्त्या क्रियाश्रयः कारकशब्दार्थः। तत्र क्रियान्वयिनः क्रियाश्रयत्वविरहेण कारकशब्दवाच्यत्वानुपपत्तिरिति चेत् — न। क्रियाजनकत्वं कारकत्वमिति पक्षेऽपि क्रियाजनकस्य कारकशब्दवाच्यत्वानुपपत्तिरिति तुल्यम्।

किं च संप्रदानापादानयोः सर्वथा क्रियाश्रयत्वविरहात् कारकत्वानुपपत्तिः। यदि तु कारकशब्दे प्रकृतिभूतकृञ्धातोः क्रियाजनकत्वे लक्षणां स्वीकृत्य ण्वुलातदाश्रयत्वबोधनात् क्रियाजनकत्वाश्रयः कारकम् इत्युच्यते, तदा जनकत्वापेक्षया लघुनि क्रियाविषयत्वे कृञः लक्षणां स्वीकृत्य क्रियाविषयत्वं कारकत्वमिति निरुच्य क्रियान्वयिनः प्रकारत्वेन विशेष्यत्वेन वा क्रियाविषयतास्तीति कारकत्वमुपपादनीयम्। विषयत्वं च स्वरूपसंबन्धविशेषः।

अत एव "पक्वस्तण्डुलः, पाचको देवदत्तः" इत्यादौ तण्डुलस्य कर्मत्वं देवदत्तस्य कर्तृत्वं च संगच्छते। तयोः क्रियां प्रति विशेष्यतया भानात्।

क्रियान्वयिनः कारकत्वादेव कारकाणां क्रियायामेवान्वय इति सिद्धान्तोऽपि संगच्छते।

"कारकाद्दत्तश्रुतयोः०"[१] इति सूत्रे कारकशब्दे स्वरितत्वस्वीकारात् कारकाधिकारोक्तं कर्त्रादिषट्कं कारकशब्देनोच्यते। एवं च संकेतविशेषसंबन्धेन कारकशब्दवत्त्वं परमार्थ इति बृहन्मञ्जूषायां नागेशस्य निरूपणम्।

लघुमञ्जूषायां कारकत्वनिरुक्तिः[२]

परं तु लघुमञ्जूषायां नागेशेन कारकत्वनिर्वचनं प्रकारान्तरेण कृतमस्ति। तथाहि — कारकत्वं नाम क्रियाजनकत्वयोग्यताबुद्धिविषयत्वम्, "इदं क्रियाजनकत्वयोग्यम्" इत्याकारकबुद्धिविषयत्वम्, क्रियाजनकत्वयोग्यत्वप्रकारकबुद्धिविशेष्यत्वमिति यावत्।

कारकत्वं च क्रियाजनकत्वशक्तिः। क्रियाजनकत्वानुकूला शक्तिः। भाष्ये "करोति क्रियां निर्वर्तयति" इति कारकशब्दस्य व्युत्पत्तिप्रदर्शनात्।

---

[१] सू. ६.२.१४८
[२] पृ. ११७७

न च परम्परया क्रियाजनकत्वस्य सत्त्वात् "ब्राह्मणस्य पुत्रं पन्थानं पृच्छति" इत्यादौ ब्राह्मणस्य कारकत्वापत्तिरिति वाच्यम्। पुत्रेणान्यथासिद्धत्वेन ब्राह्मणस्य क्रियाजनकत्वाभावात्। हरिरप्याह —

स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे।
क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः।।

स्वाश्रये — सामर्थ्याश्रये, आश्रयान्तरे — सामर्थ्यानाश्रये। समवेतानां क्रियाणां निष्पत्तौ सामर्थ्यं निष्पत्तिनिरूपितं सामर्थ्यं साधनं विदुः इति तदर्थः।

द्रव्यगता क्रियाजनकत्वशक्तिरेव कारकं साधनम् इति चोच्यते। सिद्धस्य द्रव्यस्य स्वरूपतः क्रियाजनकत्वानुपपत्त्या शक्तिविशिष्टस्यैव जनकत्वं वाच्यमिति प्राप्ताप्राप्तविवेकेन शक्तिरेव साधनम्।

तदुक्तम् अनभिहितसूत्रे भाष्ये "गुणाः साधनम्" इति। गुणपदेन परतन्त्रभूता शक्तिरेवोच्यते। तत्र कर्तृकर्मणोः स्वाश्रयसमवेतक्रियाजनकत्वम्, करणादीनामाश्रयान्तरसमवेतक्रियाजनकत्वम्। स्वं जनकत्वम्।

किं च द्रव्यस्य कारकत्वे तस्यैकरूपत्वेन कार्यवैचित्र्यानुपपत्तिः। दृश्यते च "घटं पश्य, घटेन जलमाहर, घटेन जलं निधेहि" इत्यादौ कार्यवैचित्र्यम्।

ननु शक्तिभेदेऽपि द्रव्यस्यैकरूपत्वे तस्मिन् कथं कार्यवैचित्र्यम् इति चेन्न। सर्वस्य द्रव्यस्य सर्वशक्त्याश्रयतया तत्स्वरूपसत्ताप्रयुक्तकार्यस्य विनिगमकाभावेनासंभवात् कदाचित् कस्यश्चित् शक्तेर्विवक्षया तत्तत्कार्योत्पत्तेरुपपैदनीयत्वात्।

क्वचित् दण्डो घटसाधनमिति शक्तिमतोऽपि साधनत्वव्यवहारः शक्तिशक्तिमतोरभेदस्यापि सत्त्वात् उपपद्यते।

न च शक्त्या करोतीत्यादौ शक्तेः कारकत्वं कथम्? शक्तौ शक्त्यभावादिति वाच्यम्। शक्तेरपि पारिभाषिकद्रव्यतया शक्त्यन्तरस्वीकारात्।

शक्तेः कारकत्वादेव विभक्त्यर्थेनाव्ययेन अव्ययीभावः संगच्छते "अधिहरि" इत्यादौ। द्रव्यस्यैव कारकत्वे तु तस्य शब्देनैवोक्तत्वात् द्रव्यस्य प्रयोग एव नेति कथं तेन समासः स्यात्।

न च द्रव्यस्य कारकत्वाभावे "पशौ कर्तरि" इत्यादिः व्यपदेशः कथमिति वाच्यम्। कर्तरीत्यस्य कर्तृशक्त्याश्रये इत्यर्थात्।

सर्वेषां च कारकाणां स्वस्वावान्तरक्रियाद्वारा प्रधानक्रियानिष्पादकत्वमस्ति। अत एव तेषां भावनायामेवान्वयः। क्रियाजनकत्वावगतौ का सा क्रियेत्याकाङ्क्षोत्पत्त्या तत्रैवान्वयस्योचितत्वात्।

यत्तु — क्रियाजनकत्वं न कारकत्वम्। "ब्राह्मणस्य पुत्रं पन्थानं पृच्छति" इत्यादौ पुत्रस्य कारकत्वानुपपत्तेः। न च पुत्रं विना प्रश्नक्रियायाः अनिष्पत्तेः तस्यापि जनकत्वमिति वाच्यम्। तथापि संप्रदानेऽव्याप्तेः। अविद्यमानसंप्रदानस्यापि दानस्य जायमानत्वेन तस्य क्रियानियतपूर्ववृत्तित्वाभावात्। न च यागस्य पूर्ववृत्तित्वाभावेऽपि अपूर्वद्वारा जनकत्ववत् संप्रदानादिज्ञानस्य पूर्ववृत्तित्वेन तद्द्वारा तस्यापि जनकत्वं सूपपादितमिति वाच्यम्। क्रियानिष्ठविषयतानिरूपितविषयताश्रयत्वरूपक्रियान्वयित्वापेक्षया अनन्यथासिद्धनियतपूर्ववृत्तित्वघटितस्य क्रियाजनकत्वस्य गुरुत्वात्। आश्रयत्वरूपकृदर्थोपपत्तिस्तु जनके इव अन्वयिन्यपि सूपपादा। किं च असदुत्पत्तिवादे "घटो जायते घटं करोति" इत्यादौ कर्तृकर्मणोरव्याप्तिश्च इति भूषणादिषूक्तम्। तन्न।

असंनिहितस्यापि संप्रदानादेः दातृबुद्धिस्थत्वेन दातृनिष्ठं यत् संप्रदानादिविषयकं ज्ञानं तस्य पूर्वकालवृत्तित्वमादाय तद्विषये जनकत्वम्, तावतैव दानक्रियानिष्पत्तेः।

"घटं स्मरति घटं करोति" इत्यादौ बौद्धघटादेः पूर्वकालिकत्वात् स्मृत्यादिनिष्पादकत्वम्।

यत्तु क्रियान्वयित्वं कारकत्वमिति। तदपि न। "कारकाणां क्रियान्वयः" इत्यस्य क्रियान्वयिनां क्रियान्वयः इत्यर्थस्य प्राप्त्या असंगत्यापत्तेः। उद्देश्यतावच्छेदकविधेययोर्भेदाभावात्। "अधिकरणस्य कारकत्वेन क्रियान्वयः" इत्यादि व्यवहारस्यासंगत्यापत्तेश्च। न हि क्रियान्वयः क्रियान्वये हेतुः।

यत्तु क्रियान्वितप्रत्ययार्थान्वितत्वं कारकत्वमिति। तन्न। "पक्व ओदन" इत्यादौ प्रत्ययार्थे कारकत्वकर्मत्वव्यवहारानुपपत्तेः। प्रत्ययार्थस्य प्रत्ययार्थान्वयित्वाभावात्।

एतेन क्रियान्वितविभक्त्यर्थान्वयित्वं कारकत्वम् इत्यप्यपास्तम्। "पक्व ओदन" इत्यादौ ओदनादेस्तदनुपपत्तेः। क्तप्रत्ययस्य विभक्तित्वाभावेन तदर्थान्वितस्याप्योदनस्य विभक्त्यर्थान्वयित्वाभावात्।

विभक्त्यर्थनिर्णयानुसारेण कारकत्वनिर्वचनम्

पूर्वपक्षः

इह खलु सर्वेषां विभक्त्यर्थानां क्रियायामन्वय इति विभक्त्यर्थो निरूप्यते। तत्र कारकाकारकभेदात् विभक्त्यर्थो द्विविधः।

कारकत्वस्यानुगतत्वाभावेन न तेन रूपेण विभक्त्यर्थता। कारकाणां प्रातिस्विकरूपेण तदर्थत्वे द्वेधा विभागोऽनुपपन्नः।

न च क्रियान्वयित्वरूपं कारकत्वं नाननुगतमिति वाच्यम्। "कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" इत्यादौ षष्ठ्यर्थस्य शेषस्यापि क्रियान्वयित्वात् तत्रातिव्याप्तेः।

न च षष्ठ्यर्थभिन्नत्वमपि विशेषणम्, अतो नातिव्याप्तिरिति वाच्यम्। तथा सति "तण्डुलस्य पाक" इत्यादौ षष्ठ्यर्थस्य कर्मत्वस्याकारकत्वापत्तेः।

अथ "कर्तृकर्मणोः कृति"[१] इति सूत्रविहितषष्ठ्याः कारकार्थकत्वेन तण्डुलस्य पाक इत्यादौ षष्ठ्यर्थस्य कारकत्वेऽपि नाव्याप्तिः, कृद्युक्तान्यषष्ठ्यर्थभिन्नत्वे सति क्रियान्वयित्वस्वरूपस्य कारकत्वस्य कारकलक्षणत्वेनाभ्युपगमात् दर्शितषष्ठ्याः कृद्युक्तत्वेन तदर्थस्य निरुक्तकारकत्वानपायादिति चेत् — न।

"सुराणां पातासौ" इत्यादौ कृद्युक्तशेषषष्ठ्यर्थे अतिव्याप्तेः। तत्र निरुक्तकारकत्वस्य सत्त्वात्।

न च धात्वर्थेतरान्वयायोग्यत्वमस्तु विशेषणम्। तथा च शेषषष्ठ्यर्थस्य धात्वर्थेतरस्मिन् "राज्ञः पुरुषः" इत्यादौ पुरुषादावन्वयात् नातिव्याप्तिरिति वाच्यम्। एवं सति द्वितीयार्थकारकेऽव्याप्तेः। "दण्डं दधाति" इत्यादौ यादृशोऽधिकरणादिः द्वितीयार्थो धारणान्वयी तादृशस्यैवाधिकरणादेः अनुदण्डं जातिः इत्यादौ जातान्वयात् धात्वर्थेतरान्वयायोग्यत्वविरहात्।

किं च धात्वर्थेतरान्वयायोग्यत्वं धात्वर्थेतरान्वययोग्यत्वमविज्ञाय ज्ञातुमशक्यम्। धात्वर्थेतरान्वययोग्यत्वं च कारकान्यत्वमेव। तथा सत्यन्योन्याश्रयः स्यात्। तादृशान्वयायोग्यत्वरूपकारकत्वज्ञानस्य तादृशान्वययोग्यत्वरूपकारकान्यत्वज्ञानस्य च परस्पराधीनत्वात्।

---

[१] सू. २.३.६५

एतेन धात्वर्थान्वयायोग्यत्वं शेषत्वम्, शेषभिन्नत्वं कारकत्वमित्यपि परास्तम्। धात्वर्थान्वयायोग्यत्वस्य कारकत्वस्वरूपाग्रहे दुर्ग्रहत्वेनान्योन्याश्रयात्।

किं च शेषत्वमपि नेदृशं भवति। ''मम प्रतिभाति'' ''कान्तस्य त्रस्यति'' इत्यादौ शेषस्य धात्वर्थान्वयित्वात्।

एतेन धात्वर्थान्वितसुबर्थत्वं कारकत्वं विभक्त्यर्थस्य, विभक्त्यर्थद्वारकक्रियान्वयित्वं कारकत्वं विभक्तिप्रकृत्यर्थस्येत्यपि परास्तम्। दर्शितषष्ठ्या अर्थे तत्प्रकृत्यर्थे चातिव्याप्तेः।

यत्तु अपादानाद्यन्यतमत्वं कारकत्वम्। अतः न क्वाप्यव्याप्तिरतिर्व्याप्तिर्वा इति।

तन्न। अपादानत्वादेरपि क्वचित् षष्ठ्यर्थत्वात्। किं चापादानत्वादिकमपि नैकम्। ध्रुवत्वासोढत्वादिभेदेन बहुविधत्वादिति कथमुक्तान्यतमत्वं कारकत्वमिति।

न च ध्रुवाद्यन्यतमत्वेनापादानादिं निरुच्य तावदन्यतमत्वं कारकत्वं निर्वाच्यमिति वाच्यम्। कतिपयापादानादिकं जानतां सकलापादानादिकमजानतां ध्रुवादौ कारकत्वग्रहानुपपत्तेः। प्रतियोगिज्ञानं विना यावदपादानादिभेदस्यैव दुर्ग्रहत्वेन तदवच्छिन्नभेदरूपस्यान्यतमत्वस्य सुतरां दुर्ग्रहत्वात्।

एतेन तावदन्यतमत्वं कारकपदप्रवृत्तिनिमित्तमिति कारकपदवाच्यत्वमेव कारकत्वमिति निरस्तम्। तावदन्यतमत्वस्य निर्वचनासहत्वादिति चेत् —

सिद्धान्तः

उच्यते। नामार्थान्वयप्रयोजकतानवच्छेदकीभूतक्रियान्वयितावच्छेदकधर्मवत्त्वे सति पदान्तरासमभिव्याहृतसुबर्थत्वं कारकत्वम्। कान्तस्य त्रस्यतीत्यादौ षष्ठ्यर्थवारणाय भूतान्तं धर्मविशेषणम्।

न च नामार्थान्वयाप्रयोजकत्वमेव तद्वारणार्थमस्तु, किमनवच्छेदकत्वविवक्षयेति वाच्यम्। ''व्याघ्रात् बिभेति'' इत्यादौ हेतुतादौ कारकेऽव्याप्तेः। ''व्याघ्रस्य भयम्'' इत्यादौ हेतुतादेः नामार्थभयाद्यन्वयित्वात्।

अनवच्छेदकत्वविवक्षणे तु नामार्थान्वयप्रयोजकतानवच्छेदस्य हेतुतात्वादेः सत्त्वान्नाव्याप्तिः। हेतुत्वनिष्ठं संबन्धत्वं हि नामार्थान्वयप्रयोजकतावच्छेदकम्।

अनवच्छे कान्तविशेषणेऽपि ''व्याघ्रस्य भयम्'' इत्यादौ षष्ठ्यर्थेऽतिव्याप्तिः। तत्र हेतुतादेः संबन्धत्वेन रूपेणान्वयात् संबन्धत्वस्य निरुक्तानवच्छेदकत्वविरहेऽपि तादृशस्य रूपान्तरस्य हेतुतात्वादेः पत्त्वात्। अतः क्रियान्वयितावच्छेदकेति धर्म-

विशेषणम्। तेन भयहेतुतात्वादेः रूपान्तरस्य प्रकृते क्रियान्वयितानवच्छेदकत्वान्न दोषः। संबन्धत्वेन भयहेतुतादेः कारकस्यान्वयेऽपि हेतुतात्वादिना अनन्वयात्।

अत एव कर्तृत्वादिकारकस्य कृदन्तार्थे कर्तृत्वत्वादिना अन्वयार्थं "कर्तृ-कर्मणोः कृति"[१] इत्यादिपृथक्सूत्रारम्भः संगच्छते। अन्यथा शेषत्वेन कारकस्य सर्वस्यान्वयसम्भवे पृथक्सूत्रप्रणयनस्य वैयर्थ्यापत्तेः। शेषत्वं तु संबन्धत्वं सप्रतियोगिकत्वं वेत्यन्यदेतदित्यादिकं षष्ठीविवरणे व्यक्तीभविष्यति।

कर्मादिपदोपात्तानां कर्मादीनां कारकत्ववारणाय सुबर्थत्वमुक्तम्। तत्रापि "दण्डं दधाति" इत्यादौ दण्डवृत्तित्वादिरूपकर्मत्वस्य "अनुदण्डं जातिः" इत्यादौ नामार्थ-जातावन्वयात् कर्मकारकेऽव्याप्तिः स्यात्। तद्वारणाय पदान्तरासमभिव्याहृतत्वं सुपो विशेषणम्। दर्शितकर्मत्वादेर्नामार्थान्वये कर्मप्रवचनीयान्वादिसमभिव्याहारस्य तत्र सत्त्वात् (तन्त्रत्वात्)। अन्यथा "दण्डं जातिः" इत्यत्रापि दण्डवृत्तिः जातिः इत्यन्वयबोधप्रसङ्गात्।

नन्वेवमपि "गेहे पचति" इत्यादौ गेहवृत्तित्वस्य पाकान्वयित्वेन कारकत्व-मिष्टम्। तस्य "गेहे घट" इत्यादौ घटादिनामार्थेऽन्वयात् निरुक्तकारकत्वविरहात् सप्तम्यर्थकारकेऽव्याप्तिः।

न च कर्तृकर्मान्यतरघटितपरम्परासंबन्धावच्छिन्नवृत्तित्वस्यैव सप्तम्यर्थतया कारकत्वम्। तादृशवृत्तित्वस्य नामार्थेऽन्वयासंभवात् कथमव्याप्तिरिति वाच्यम्। "सप्तम्यधिकरणे च"[२] इति सूत्रेण आधेयत्वसामान्यस्यैव सप्तम्यर्थत्वेन प्रतिपादने "गेहे घट" इत्यादौ आधेयत्वसामान्यस्यानानुशासनिकत्वापत्तेः इति चेत् —

मैवम्। दर्शितसूत्रेण आधेयत्वसामान्यस्य दर्शितपरम्परासंसर्गावच्छिन्नाधेयत्वस्य च द्वयोः योगविभागेन सप्तम्यर्थत्वप्रतिपादनात्।

यद्वा यादृशसंबन्धेन क्रियायामन्वयः तादृशसंबन्धेनैव नामार्थेऽन्वयो विवक्षितः। एवमाधेयत्वसामान्यस्य सप्तम्यर्थत्वेऽपि न क्षतिः। तस्य दर्शितपरम्पराघटिताधेय-त्वीयस्वरूपसंबन्धेन क्रियायामन्वयात्। नामार्थे तु संयोगाद्यवच्छिन्नाधेयत्वीयस्व-रूपसंबन्धेनेति। दर्शितपरम्पराघटिताधेयत्वीयस्वरूपसंबन्धेनान्वयसंभवात् सप्तम्यर्था-धेयत्वकारके नाव्याप्तिः।

नामार्थान्वयस्तु नामार्थविशेष्यकशाब्दबोधे बोध्यः। अन्यथा सुपां लिङ्गसंख्या-तिरिक्तस्वार्थे प्रकृतिभूतनामार्थविशेषणकशाब्दजनकत्वनियमादसंभवापत्तेः।

---

[१] सू. २.३.६५
[२] सू. २.३.३६

तथापि "गगनं न पश्यति" इत्यादौ द्वितीयादेः स्वार्थविशेषणकनञर्थ-विशेष्यकबोधजनकत्वादव्याप्तिरिति नाम्नि निपातातिरिक्तत्वविशेषणं देयम्।

यदि तिङर्थकर्तृकर्मणोरपि करकत्वं, तदा न्यायमते तत्राव्याप्तिः, तिङः प्रथमान्तार्थविशेष्यकबोधजनकत्वादिति विभाव्यते, तदा नामार्थान्वयप्रयोजकतावच्छेदके तिङर्थतानवच्छेदकत्वं विशेषणम् देयम्। सुप्पदस्थाने विभक्तिपदं च निवेश्यम्। शाब्दिकमते च नाव्याप्तिः, अतो न तद्विशेषणम्।

ननु यदि क्रियायां नामार्थे चान्वये एकसंबन्धावच्छिन्नत्वं विशेषणम्, तदा सप्तम्यर्थकारकेऽव्याप्तिः। दर्शितपरम्पराघटिताधेयत्वीयसंसर्गेण आधेयत्वप्रकारक-नामार्थविशेष्यकशाब्दबोधाप्रसिद्धेः तादृशसंसर्गकाधेयत्वविषयकशाब्दबोधौपयिका-काङ्क्षायाः नाम्नि विरहात्। तथा च तादृशशाब्दबोधप्रयोजकतानवच्छेदकत्व-घटितलक्षणाप्रसिद्ध्या सर्वत्रैवासंभवः। षष्ठीं विना पदान्तरासमभिव्याहृतविभक्ती-नामर्थस्य क्रियान्वयघटकसंबन्धेन नामार्थेऽनन्वयादिति चेत् — न।

द्विविधस्याधेयत्वस्य सप्तम्यर्थत्वाभ्युपगमेन संबन्धविशेषानवच्छिन्नान्वयस्य लक्षणेऽप्रवेशात्।

प्रकारान्तरेण कारकलक्षणम्

एवं धातुभिन्ननिराकाङ्क्षताप्रयोजकार्थवद्भिन्ना तिङन्या या विभक्तिः तद्भिन्नायाः पदान्तरासमभिव्याहृतायाः विभक्तेरर्थः कारकम्। अत्रार्थस्य निराकाङ्क्षता-प्रयोजकत्वं विभक्त्यर्थतावच्छेदकरूपेण क्रियान्वयनिरूपकसंबन्धप्रतियोगित्वेन च बोध्यम्। अतो न पूर्वोक्तः "व्याघ्रस्य दरं, भूतले घट" इत्यादौ नामसा-काङ्क्षत्वेऽपि दोषः।

यदि पततीति विनाकृतायाः वृक्षादिति पञ्चम्याः अर्थो न कारकमिति मन्यते तदा धातुसमभिव्याहृतत्वं चरमविभक्तौ विशेषणं बोध्यम्।

एवं "कान्तस्य त्रस्यति" इत्यादौ षष्ठ्यर्थशेषस्य नामनिराकाङ्क्षप्रयोजकत्वात् न तत्र कर्मत्वेऽव्याप्तिः।

तिङन्यत्वविशेषणात् तिङर्थकर्तृत्वादौ नाव्याप्तिः। पदान्तरासमभिव्याहृतत्व-विशेषणात् "दण्डमनु जातिः" इत्यादौ द्वितीयार्थाधेयत्वे नातिव्याप्तिः। एवमीदृश-सुप्तिङ्विभक्त्यर्थद्वारा नामार्थस्यापि कारकत्वं मन्तव्यम्।

प्रकारान्तरेण कारकत्वनिरुक्तिः

यदि च तिङर्थस्य कारकत्वं न मन्यते, तदा धातुभिन्ननिराकाङ्क्षत्वप्रयोजकः पदान्तरसमभिव्याहृतस्य धातुसमभिव्याहृतसुपोऽर्थः कारकम्। अत्र धातुभिन्ननिराकाङ्क्षत्वप्रयोजकत्वं धातुभिन्नपदव्यतिरेकप्रयुक्तव्यतिरेकाप्रतियोगिस्वप्रकारकशाब्दसामान्यकत्वं तथाभूतसुबर्थस्य बोध्यम्।

सामान्यपदोपादानात् "कान्तस्य त्रस्यति" इत्यादौ षष्ठ्यर्थस्य शेषस्य तादृशशाब्दप्रकारत्वेऽपि न तत्रातिव्याप्तिः। शेषप्रकारकशाब्दसामान्ये धातुभिन्नपदव्यतिरेकप्रयुक्तव्यतिरेकाप्रतियोगित्वविरहात्। "कान्तस्य केश" इत्यादौ धातुभिन्नपदेनापि शेषप्रकारकबोधजननात्।

"तण्डुलस्य पाक" इत्यादौ षष्ठ्यर्थकर्मत्वादौ नाव्याप्तिः। कर्मत्वप्रकारकशाब्दसामान्यस्य तादृशव्यतिरेकाप्रतियोगित्वात्। धातुभिन्नपदेन कर्मत्वप्रकारकशाब्दाजननात्।

एवं स्वप्रकारता स्वार्थकसुबर्थतावच्छेदकरूपेण क्रियानिरूपितसंबन्धेन चावच्छिन्ना बोध्या। तेन "व्याघ्रात् बिभेति" इत्यादौ पञ्चम्यर्थहेतुत्वस्य, "गेहे पचति" इत्यादौ सप्तम्यर्थाधेयत्वस्य, "व्याघ्रस्य दरम्" इत्यादौ "भूतले घट" इत्यादौ शेषत्वेन क्रियानिरूपकान्यसंबन्धेन शाब्दप्रकारत्वेऽपि नाव्याप्तिः। पञ्चम्यर्थतावच्छेदकहेतुत्वेन क्रियानिरूपककर्तृकर्मान्यतरघटितपरम्परासंबन्धेन च दर्शितस्थले शाब्दप्रकारताया अनवच्छिन्नत्वात्।

एवं सति "तण्डुलं पचति" इत्यादौ तण्डुलनिष्ठा कर्मतेत्यवान्तरवाक्यार्थबोधस्य द्वितीयाप्रकृतिभूतधातुभिन्नतण्डुलादिपदव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वेनासंभवः स्यात्। तद्वारणार्थमुपात्तस्य स्वप्रकारकेत्यत्र प्रकारकत्वस्य निवेशो निष्प्रयोजन एव। स्वविषयताकत्वनिवेशेनापि तद्वारणसंभवात्। विषयतायाः क्रियानिरूपकत्वोपलक्षिततत्तत्संबन्धावच्छिन्नत्वविशेषणात् तण्डुलनिष्ठा कर्मतेत्यत्र कर्मतायाः विशेष्यत्वेऽपि तस्य दर्शितसंबन्धानवच्छिन्नत्वात्।

न चैवं "पश्य मृगो धावति" इत्यादौ दृशिक्रियायां शाब्दिकमते धावनक्रियायाः, न्यायमते धावनकर्तृमृगादेर्वाक्यार्थस्य कर्मतासंसर्गेणान्वयात् तादृशवाक्यार्थबोधस्य निरुक्तव्यतिरेकाप्रतियोगित्वेन तद्विषयसंसर्गीभूतकर्मत्वे अतिव्याप्तिरिति वाच्यम्। संसर्गीभूतकर्मत्वस्य सुबर्थत्वाभावात्।

यदि च कर्मत्वादिकं न द्वितीयार्थः। कर्मत्वादिसंसर्गकशाब्दबोधे द्वितीयादिसमभिव्याहारस्तन्त्रमिति मतमाश्रीयते, तदा "पश्य मृगो धावति" इत्यत्र

कर्मत्वस्य कारकत्वमिष्टमेव। यदि तु नेष्यते तदा स्वविषयताकशाब्दे सुप्समभिव्याहारप्रयोज्यत्वं विशेषणं देयम्।

एवं पदान्तरासमभिव्याहृतत्वं निरर्थकपदासमभिव्याहृतत्वरूपम्। "दण्डमनु जातिः" इत्यादौ अन्वादिपदस्य निरर्थकतायाः वक्ष्यमाणत्वात्।

तथा च निरर्थकपदसमभिव्याहारज्ञानाभावविशिष्टसुब्ज्ञानजन्योपस्थितिप्रकारीभवद्धर्मावच्छिन्नदर्शितसंबन्धावच्छिन्नप्रकारताकशाब्दसामान्ये निरुक्तव्यतिरेकाप्रतियोगित्वोपपत्तये पदान्तरसमभिव्याहृतसुबर्थत्वमुपात्तम्। एवं च धातुविनाकृतसुबर्थस्य कारकत्ववारणाय धातुसमभिव्याहृतत्वं साकाङ्क्षत्वार्थकमुपात्तम्।

इत्थं च धातुपदव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वमेव निरुक्तशाब्दसामान्ये विशेषणं बोध्यम्। एतावतैव षष्ठ्यर्थशेषातिप्रसङ्गवारणसंभवात्।

तदयं समुदायार्थः — धातुपदव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिनिरर्थकपदसमभिव्याहारज्ञानाभावविशिष्टस्वार्थकसुब्ज्ञानजन्योपस्थितिप्रकारीभवद्धर्मावच्छिन्नक्रियानिरूपकत्वोपलक्षितसंबन्धावच्छिन्नस्वप्रकारताकशाब्दसामान्यनिरूपकसुबर्थत्वं कारकत्वमिति।

"कान्तस्य केश" इत्यादौ षष्ठ्यर्थशेषेऽतिव्याप्तिवारणाय प्रतियोग्यन्तं शाब्दविशेषणम्। तावतापि कान्तस्य त्रस्यति इत्यादौ षष्ठ्यर्थशेषेऽतिव्याप्तितादवस्थ्यमिति सामान्यपदम्।

शाब्दसामान्ये निरुक्तप्रतियोगित्वासंभवः स्यादिति शाब्दे स्वप्रकारताकत्वं विशेषणम्। तावतापि "व्याघ्रात् बिभेति" इत्यादौ पञ्चम्यर्थभयहेतुत्वादेः, "व्याघ्रस्य दरम्" इत्यादौ षष्ठ्यर्थशेषत्वेन प्रकारतया अव्याप्तिरसंभवो वा स्यादिति धर्मावच्छिन्नान्तं प्रकारताविशेषणम्।

तावतापि शेषत्वस्य सुब्जन्योपस्थितिप्रकारतया तद्दोषतादवस्थ्यमिति स्वार्थकत्वं सुपो विशेषणम्। तत्रापि तादृशोपस्थितिप्रकारकरणत्वस्य शत्य इत्यादौ शाब्दप्रकारतावच्छेदकतया करणत्वेऽतिव्याप्तिरिति प्रकारपदं विहाय प्रकारीभवदित्युक्तम्। तदर्थस्तु सुबन्यज्ञानजन्योपस्थितिप्रकारत्वाभावविशिष्टं तादृशोपस्थितिप्रकारत्वमापन्नो बोध्यः। तादृशप्रकारत्वाभावस्तु सामानाधिकरण्यकालिकविशेषणताभ्यामवच्छिन्नप्रतियोगिताको बोध्यः। तेन शत्य इत्यादौ करणतात्वप्रकारतायाः सुबन्यतद्धितज्ञानजन्योपस्थितिप्रकारत्वेन स्वेनैव दर्शितोभयसंबन्धेन विशिष्टत्वात् तदभाववैशिष्ट्यविरहान्नाव्याप्तिरिति।

न च सुब्ज्ञानजन्योपस्थितिप्रकारत्वावच्छिन्न एव प्रकारीभवदित्यन्तेनोच्यताम्, तावतैव 'शत्य' इत्यादौ शाब्दसंभवेऽपि करणत्वे नाव्याप्तिः। तत्र करणतात्वप्रकारतायाः तद्धितप्रयोज्यत्वात् किं तादृशप्रकारतायां निरुक्तप्रकारत्वाभाववैशिष्ट्यनिवेशेनेति वाच्यम्।

यत्र 'शत्य' इत्यादौ शतेनेति निराकाङ्क्षं केनचिदुक्तं तत्र तृतीयाजन्योपस्थितिप्रकारत्वापन्नकरणतात्वस्य शाब्दप्रकारतावच्छेदकत्वेनाव्याप्तितादवस्थ्यात्। निरुक्तप्रकारत्वाभाववैशिष्ट्यनिवेशे तु तृतीयाप्रयोज्यप्रकारतायाः तद्धितप्रयोज्यप्रकारत्वेन दर्शितोभयसंबन्धविशिष्टत्वात् निरुक्तप्रकारत्वाभाववैशिष्ट्यविरहात् दर्शितस्थले शाब्दसंभवेऽपि करणत्वे नाव्याप्तिरिति।

निरुक्तप्रकारत्वाभावप्रतियोगितायाः सामानाधिकरण्यमात्रावच्छिन्नत्वोक्तौ "शतेन क्रीणाति" इत्यादौ करणत्वे अव्याप्तिः। तत्र करणतात्वप्रकारतायाः सामानाधिकरण्येन तद्धितप्रयोज्यप्रकारताविशिष्टत्वात्। अतः कालिकविशेषणतावच्छिन्नत्वमपि तत्प्रतियोगितायामुक्तम्। एतावन्मात्रोक्तौ प्रकृत्यर्थतावच्छेदकप्रकारतया कालिकसंबन्धेन विशिष्टायाः सुप्प्रयोज्यतायाः सर्वत्रैव करणतात्वादौ सत्त्वात् निरुक्तप्रकारत्वाभावविशिष्टप्रकारताविरहादसंभवः स्यादिति सामानाधिकरण्यावच्छिन्नत्वमपि प्रतियोगितायां निवेशितमिति।

"दण्डं दधाति" इत्यादौ दृष्टस्य दण्डकर्मत्वस्य "अनुदण्डं जातिः" इत्यादौ द्वितीयार्थतावच्छेदकाधेयतात्वेन शाब्दप्रकारत्वेन तत्राव्याप्तिरिति विशिष्टान्तं सुब्ज्ञानस्य विशेषणम्।

न च निरर्थकपदासमभिव्याहृततया सुप् विशेष्यताम्। तावतैवाव्याप्तिवारणसंभवात्; किं तादृशसमभिव्याहारज्ञानाभावस्य सुब्ज्ञाने वैशिष्ट्यनिवेशनेनेति वाच्यम्। "दण्डं जातिः" इत्यादौ तादृशसमभिव्याहारज्ञानबलात् शाब्दसंभवेन उक्ताव्याप्त्यनुद्धारात्।

न चैवमपि तादृशसमभिव्याहारज्ञानाविषयत्वं सुपो विशेषणमस्तु, दर्शितस्थले द्वितीयायास्तादृशसमभिव्याहारज्ञानविषयत्वात् शाब्दसंभवेऽव्याप्तिसंभवात् किं सुब्ज्ञाने तादृशज्ञानाभाववैशिष्ट्यनिवेशनेनेति वाच्यम्।

यत्र "दण्डो जातिः" इत्यादौ प्रथमायां तादृशसमभिव्याहृतद्वितीयात्वभ्रमः। तत्र शाब्दसंभवेन उक्ताव्याप्तिसंभवात्, तत्र प्रथमायास्तादृशसमभिव्याहारज्ञानाविषयत्वात्। सुब्ज्ञाने तु तादृशसमभिव्याहारज्ञानाभाववैशिष्ट्यनिवेशनेऽव्याप्तिर्न भवति,

स्वविषयतावच्छेदकप्रकारकत्वसंबन्धावच्छिन्नप्रतियोगिताकस्य तादृशसमभिव्याहारज्ञानाभावस्य सुब्ज्ञाने वैशिष्ट्यनिवेशात्।

"दण्डो जातिः" इत्यादौ प्रथमज्ञाने तादृशसमभिव्याहारज्ञानस्य स्वविषयतावच्छेदकद्वितीयात्वप्रकारकत्वेन संबन्धेन तत्र तदभाववैशिष्ट्यविरहात्।

एवं सति "दण्डं दधाति" इत्यदौ द्वितीयाज्ञाने स्वविषयतावच्छेदकप्रकारकत्वसंबन्धेन कालान्तरीयस्य पुरुषान्तरीयस्य तादृशसमभिव्याहारज्ञानाभावस्य सत्त्वेन तादृशज्ञानाभावविशिष्टस्वार्थकसुब्ज्ञानाप्रसिद्ध्या दण्डकर्मत्वेऽव्याप्तिः स्यादिति तादृशसमभिव्याहारज्ञानाभावप्रतियोगिता कालिकविशेषणतासामानाधिकरण्याभ्यां संबन्धाभ्यामवच्छिन्ना बोध्या।

अत एव "शत्य" इत्यादौ शाब्दसंभवेनाव्याप्तेर्वारणार्थं सुबन्यज्ञानजन्योपस्थितिप्रकारत्वाभावविशिष्टत्वं धर्मे विशेषणमस्तु, तावतैवाव्याप्तिवारणसंभवात् स्वार्थकेत्यादिप्रकारीभवदित्यन्तं व्यर्थमिति परास्तम्। स्वार्थकेत्याद्यनुक्तौ तादृशसमभिव्याहारज्ञानाभावस्य सुब्ज्ञानं विना निवेशयितुमशक्यत्वात् "अनुदण्डं जातिः" इत्यादौ शाब्दप्रकारतया दण्डकर्मत्वेऽव्याप्त्यनुद्धारात्।

न चास्तु स्वार्थकेत्यादिकं धर्मविशेषणम्, तथापि सुबन्यजन्योपस्थितिप्रकारत्वाभावस्य वैशिष्ट्यं धर्मे धर्मविशेषणीभूततत्तादृशोपस्थितिप्रकारत्वे वा निवेशनीयमित्यत्र विनिगमकाभाव इति वाच्यम्।

पुरुषान्तरीयतद्धितजन्योपस्थितेः सार्वदिकत्वसंभावनेन शतकरणत्वेऽव्याप्तिसंभावनात्। सुबन्यजन्योपस्थितौ शाब्दे च तत्पुरुषीयत्वं निवेश्याव्याप्तिसंभावननिरासेऽपि पुरुषभेदेन कारकभेदापत्तेः। तादृशोपस्थितिप्रकारतायां तु सुबन्यजन्योपस्थितिप्रकारत्वाभावस्य वैशिष्ट्यनिवेशे तत्प्रतियोगितायां स्वनिरूपकज्ञानसमानाधिकरणज्ञानीयत्वसंबन्धेनाप्यवच्छिन्नत्वप्रवेशात् पुरुषान्तरीयतद्धितजन्योपस्थितेः सार्वदिकत्वसंभावनेऽप्यव्याप्तिसंभावननिरासात् तत्पुरुषीयत्वानिवेशेन विनिगमकसंभवात्।

एवं "गेहे पचति" इत्यादौ सप्तम्यर्थाधेयत्वस्य, "गेहे घट" इत्यादौ शाब्दप्रकारतया तत्राव्याप्तिः स्यात्। तद्वारणाय क्रियानिरूपकत्वोपलक्षितसंबन्धावच्छिन्नत्वं स्वप्रकारताविशेषणम्। तेन "गेहे घट" इत्यादौ सप्तम्यर्थाधेयत्वस्य आधेयत्वीयस्वरूपसंबन्धेन शाब्दप्रकारत्वेऽपि क्रियानिरूपकेण कर्तृकर्मान्यतरघटितपरम्परासंबन्धावच्छिन्नाधेयत्वस्वरूपसंबन्धेन तत्र शाब्दप्रकारत्वविरहान्नाव्याप्तिरिति।

तत्र हि क्रियानिरूपकत्वविशिष्टसंबन्धावच्छिन्नत्वोक्तौ "कान्तस्य त्रस्यति" इत्यादौ षष्ठ्यर्थशेषस्य त्रासनिरूपकत्वविशिष्टस्वरूपसंबन्धेन, "कान्तस्य चेष्टा" इत्यादौ चेष्टान्वयविषयकशाब्दप्रकारत्वविरहात् षष्ठ्यर्थशेषेऽतिव्याप्तिः स्यादिति क्रियानिरूपकत्वोपलक्षितत्वेन संबन्धो विवक्षितः। तेन तथोपलक्षितेन स्वरूपसंबन्धेन षष्ठ्यर्थशेषस्य चेष्टान्वयविषयकशाब्दप्रकारत्वान्न तत्रातिव्याप्तिः।

यदि च सप्तम्याः द्विविधमाधेयत्वमर्थः, तदा "तण्डुलं न पचति" इत्यादाविव "तण्डुलं न" इत्यादौ तण्डुलकर्मत्वस्य नञर्थान्वयविषयकशाब्दप्रकारकर्मत्वादावव्याप्तिरसंभवो वा स्यात्। तद्वारणाय क्रियानिरूपकत्वविशिष्टसंबन्धावच्छिन्नत्वं स्वप्रकारताविशेषणं बोध्यम्।

यदि च धातुविनाकृतात् "तण्डुलं न" इत्यादिवाक्यात् कर्मत्वादेः नञर्थान्वयविषयकशाब्दबोधो नाङ्गीक्रियते, नञर्थे कर्मत्वादेरन्वयबोधे नञो धातुसमभिव्याहारस्य तन्त्रत्वादिति, तदा निरुक्तसंबन्धावच्छिन्नत्वं न स्वप्रकारताविशेषणम्। "तण्डुलं न पचति" इत्यादौ कर्मत्वस्य नञर्थान्वयविषयकशाब्दप्रकारत्वेऽपि तादृशशाब्दस्य धातुपदव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वान्न तत्राव्याप्तिरिति।

एवं निरुक्तशाब्दसामान्यस्य लक्षणत्वे श्रोतरि निरुक्तशाब्दसामान्यस्य समवायेन सत्त्वात्तत्रातिव्याप्तिः स्यात् (अतः) अनिरूपकत्वमुक्तम्। निरूपकत्वं प्रकारत्वम्। तावतापि धात्वर्थतावच्छेदकादावतिव्याप्तिरिति सुबर्थत्वमुक्तम्। सुबर्थत्वं तु सुब्जन्योपस्थितिप्रकारीभवद्धर्मत्वं बोध्यमिति।

अत्रेयमनुपपत्तिः, निरर्थकपदासमभिव्याहृतद्वितीयार्थकर्मत्वप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दं प्रति भावप्रत्ययान्यप्रत्ययप्रकृतिधातुजन्योपस्थितेर्विशेष्यतासंबन्धेन हेतुत्वम्। तेन घटादिपदेन लक्षणया पाकोपस्थितौ योग्यतासत्त्वेऽपि "तण्डुलं घट" इत्यादौ न तथा शाब्दबोधः।

भावाख्यातस्थले द्वितीयान्तपदत्वेऽपि "तण्डुलं पच्यत" इत्यादौ न शाब्दबोध इत्यन्वयव्यभिचारवारणाय प्रकृत्यन्तं धातुविशेषणम्।

न चोक्तव्यभिचारवारणाय भावप्रत्ययाप्रकृतित्वमेव धातुविशेषणमस्तु, किं द्वितीयप्रत्ययपदप्रवेशेनेति वाच्यम्। तथा सति "तण्डुलं पच्" इत्यादौ शाब्दबोधापत्तेः। इत्थमेव निर्विभक्तिकस्य शब्दस्य शाब्दप्रयोजकत्वरूपमसाधुत्वमुपपद्यते।

इदमेवासाधुत्वं "लःकर्मणि च भावे चाकर्मकेभ्यः"[१] इति सूत्रे अकर्मकेभ्य इति पदं भावप्रत्ययान्तधातोः कर्मत्वप्रकारकशाब्दाप्रयोजकत्वलक्षणं ज्ञापयति।

---

[१] सू. ३.४.६९

एवं षष्ठ्यर्थस्य कर्मत्वस्य कर्तृत्वस्य च प्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दं प्रति कृदन्तधातुजन्योपस्थितेः विशेष्यतासंबन्धेन हेतुत्वम्। तेन "तण्डुलस्य पाकः पाचकः मैत्रस्य पाकः पाच्यो वा" इत्यादौ तण्डुलकर्मत्वमैत्रकर्तृत्व-प्रकारकपाकविशेष्यकशाब्दबोधस्य नानुपपत्तिः इति षष्ठ्यर्थयोः कर्मत्वकर्तृत्वयोः न कारकत्वानुपपत्तिः।

एवं लादेशादियोगे "न लोक०"[१] इति सूत्रेण षष्ठ्या निषेधेनासाधुतया "तण्डुलस्य पचनं मैत्रस्य पच्यमानो वा" इत्यादौ कर्मत्वकर्तृत्वप्रकारकशाब्दानुत्पत्त्या अन्वयव्यभिचारः स्यात्, तद्वारणाय लादेशादिभिन्नत्वं कृति विशेषणं देयम्।

यदि "तण्डुलं पाचकः" इत्यादौ द्वितीयार्थकर्मत्वस्य धात्वर्थे नान्वयः, "कर्तृकर्मणोः कृति"[२] इति सूत्रेण षष्ठीविधायकेन द्वितीयाया अपवादादिति, तदा लादेशादिभिन्नकृदन्यत्वमपि भावप्रत्ययान्यप्रत्यये विशेषणं देयम्।

एवं 'पच्यत' इत्यादौ कर्माख्यातस्थले द्वितीयार्थकर्मत्वस्य न धात्वर्थेऽन्वय इति कर्मप्रत्ययान्यत्वमपि तत्र विशेषणं बोध्यम्।

अथ कर्मकर्मतान्यतरबोधकशब्दासमभिव्याहृतत्वं धातोरेव विशेषणं बोध्यम्। तेन "छेत्तुं सांप्रतं वृक्ष" इत्यादौ "नारद इत्यबोधि सः" इत्यादौ निपातेन कर्मकर्मत्वयोर्बोधने धात्वर्थे द्वितीयार्थस्य नान्वयः इति इदमेवासाधुत्वं कर्मप्रत्यय-निपातसमभिव्याहृतधातोरर्थे स्वार्थान्वयबोधाप्रयोजकत्वलक्षणं द्वितीयायाम् "अनभिहिते" इति सूत्रं ज्ञापयति।

एवं तृतीयार्थकर्तृत्वकरणत्वनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधं प्रति कर्तृबोधकपदासमभिव्याहृतकरणबोधकपदासमभिव्याहृतसप्रत्ययधातुजन्योप-स्थितेः विशेष्यतासंबन्धेन यथायोग्यं हेतुत्वम्। तेन घटादिपदेन लक्षणया पाकोपस्थितावपि "चैत्रेण घटः, चैत्रेण काष्ठेन घट" इत्यादौ न तथा शाब्दबोधः, न वा "पचनं पचति वा" इत्यादौ चैत्रेणेति तृतीयार्थकर्तृत्वस्य धात्वर्थेऽन्वयबोधः।

न्यायमते एवं कार्यकारणभावाः। शाब्दिकमतेऽपि एते कार्यकारणभावाः। परं तु कर्मत्वकर्तृत्वकरणत्वानि न विभक्तीनामर्थाः, किं तु कर्मकर्तृकरणानि। ते कर्मत्वकर्तृत्वकरणत्वान्यनिवेश्य कार्यकारणभावा यथोक्ता बोध्याः।

एवं पञ्चम्यर्थविभागजनकत्वाद्यपादानत्वादिप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दं प्रति प्रत्ययान्तधातुजन्योपस्थितेः विशेष्यतासंबन्धेन हेतुत्वम्। तेन घटादि-

---

[१] सू. २.३.६९

[२] सू. २.३.६५

पदेन लक्षणया पतनोपस्थितावपि न तथा "वृक्षात् घट" इत्यादौ शाब्दबोधः। "वृक्षात् पतति पत्यते पतनम्" इत्यादौ तु तथा बोधः।

चोराद्बिभेतीत्यादौ हेतुतासामान्यविलक्षणस्य भयहेतुत्वस्य पञ्चम्यर्थस्य बिभेत्याद्यर्थ एवान्वयात् न भयहेतुत्वेऽव्याप्तिशङ्का। "भीत्रार्थानां भयहेतुः"[१] इति सूत्रे भयपदोपादानमेतदर्थमेवेत्यादिकं वक्ष्यते। अत्र कृत्तद्धितयोरपादानबोधकत्वं न दृश्यते। समासे तु "चोरभीत" इत्यादौ चोरपदस्य चोरभीते लक्षणा भीतशब्दः तात्पर्यग्राहकः। तथा च धातुजन्योपस्थितिविरहात् पञ्चम्यर्थान्वयसंभवात् अपादानबोधकपदासमभिव्याहृतत्वं धातोर्न विशेषणम्, न्यायमते प्रयोजनविरहात्। शाब्दिकमते कृत्तद्धितसमासेषु वृत्तिस्वीकारात् धातुजन्योपस्थितिसंभवात् तद्विशेषणमेव।

यदि च "व्याघ्र इति बिभेति, भेत्तुं सांप्रतं व्याघ्रः" इत्यादिप्रयोगानुरोधात् निपातः भयापादानमभिधत्ते तदा न्यायमतेऽपि तद्विशेषणम्।

एवं चतुर्थ्यर्थस्वत्वनिरूपकत्वादिप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दं प्रति संप्रदानबोधकपदासमभिव्याहृतसप्रत्ययधातुजन्योपस्थितिः विशेष्यतासंबन्धेन हेतुः। तेन घटादिपदेन लक्षणया दानोपस्थितावपि न तथा शाब्दबोधः। न वा "दानीयो ब्राह्मणाय" इत्यादौ चतुर्थ्यर्थसंप्रदानत्वस्य धात्वर्थेऽन्वयबोधः। भवति च ब्राह्मणाय ददाति दीयते दानमित्यादौ तथा बोधः।

एवं सप्तम्यर्थस्य कर्तृकर्मान्यतरघटितसंबन्धावच्छिन्नाधेयत्वस्य प्रकारतया आधेयत्वसामान्यस्य निरुक्तसंबन्धावच्छिन्नप्रकारतया वा निरूपितं यद्विशेष्यत्वं तेन संबन्धेन शाब्दं प्रति विशेष्यतासंबन्धेनाधिकरणबोधकपदासमभिव्याहृतधातुजन्योपस्थितेर्हेतुत्वम्। तेन घटादिपदेन पाकोपस्थितावपि न तथा शाब्दबोधः, न वा "पचनी स्थाल्याम्" इत्यादौ सप्तम्यर्थाधेयत्वस्य धात्वर्थेऽन्वयबोधः। भवति च "स्थाल्यां पचति पच्यते पाक" इत्यादौ तथा शाब्दबोधः।

एवं कारकलक्षणे सम्पन्ने कर्तृत्वादीनां धात्वर्थविशेष्यकनिरुक्तसुब्ज्ञानजन्योपस्थितिप्रकारीभवद्धर्मावच्छिन्नप्रकारताकशाब्दकालावच्छेदेन कारकत्वम्, यथा धूमादीनां व्याप्तिपक्षधर्मताज्ञानकालावच्छेदेनैव वह्निगमकत्वस्वरूपं वह्निलिङ्गत्वमिति।

इत्थं च क्रियान्वयित्वमित्यपि प्राचीनलक्षणं संगच्छते। तथा हि अन्वयित्वमात्रोक्तौ नामार्थान्वयिनि शेषत्वादौ षष्ठ्यर्थेऽतिव्याप्तिः। तद्वारणार्थमुपात्तेऽपि

---

[१] सू. १.४.२५

क्रियापदे कान्तस्य त्रस्यतीत्यादौ सा तदवस्थैवेति क्रियामात्रान्वयित्वं तद्वाच्यम्। तदर्थस्तु धातुं विना स्वविशेषणताकान्वयबोधजनकसुबर्थत्वमिति। तिङर्थस्य-कारकत्वमते सुप्पदस्थाने विभक्तिपदं बोध्यम्। विभक्तिज्ञानजन्योपस्थितिविषयो विभक्त्यर्थः। तत्र तादृशोपस्थितौ निरुक्तान्वयबोधस्याजनकत्वमनुपधानं बोध्यम्।

प्रकारान्तरेण कारकत्वनिरुक्तिः

एवं धातुं विना स्वविशेषणताकान्वयबोधानुपहितस्य विभक्तिज्ञानजन्योपस्थिति-सामान्यस्य विषयः नामार्थान्वययोग्यः कारक इति।

अत्र स्वविशेषणतायां सुप्पदस्थाने विभक्तिपदं प्रक्षिप्य पूर्वोक्तं विशेषणं बोध्यम्। षष्ठ्यर्थशेषेऽतिव्याप्तिवारणाय अनुपहितस्येत्यन्तं सामान्यविशेषणम्। तत्राप्यसंभववारणाय धातुं विनेत्युक्तम्। "कान्तस्य त्रस्यति" इत्यादौ षष्ठ्यर्थ-शेषेऽतिव्याप्तिवारणाय सामान्यपदम्। इष्टसाधनत्वादावतिव्याप्तिवारणाय नामार्था-न्वययोग्यत्वं विशेषणम्। स्वविशेषणताविशेषणकृत्यं पूर्वोक्तं बोध्यम्। इयांस्तु विशेषः — प्रथमान्तार्थविशेष्यताकतिङर्थकर्तृत्वकर्मत्ववृत्तिप्रकारतया शाब्दं प्रति धातुसमभिव्याहृततिङ्जन्योपस्थितेः विशेष्यतया हेतुत्वमिति शाब्दिकमतेऽपि अयं हेतुहेतुमद्भावः। परं तु प्रथमान्तार्थविशेषणताककर्तृकर्मविशेष्यतया शाब्दं प्रतीति विशेषः। तेन "ति देवदत्त" इत्यादौ न तथा शाब्दबोध इति।

कारकपदस्य नानाविधं शक्यम्

एवं निरर्थकपदसमभिव्याहारज्ञानाभावविशिष्टद्वितीयादिज्ञानजन्योपस्थितिविशे-ष्यतापन्नं कर्मत्वम्। तत्तद्विभक्तिजन्योपस्थितिविशेष्यतापन्नं कर्तृत्वं करणत्वं संप्र-दानत्वमपादानत्वमधिकरणत्वं नानाविधं कारकपदस्य शक्यम्। नानार्थमेव कारक-पदम्। तथा च कर्मत्वादिसकलसाधारणं कारकपदवाच्यत्वमेव कारकत्वमिति।

ननु नानार्थत्वाभ्युपगमेऽपि कारकपदस्य कारकपदवाच्यत्वं कारकत्वं न भवति, कारकपदाधुनिकसंकेतविषये द्रव्यादावतिव्याप्तेः। न च नित्यसंकेतेन कारकपदवत्त्वं तत्, आधुनिकसंकेतविषये द्रव्यादौ नित्यसंकेताभावान्नातिव्याप्ति-रिति वाच्यम्। तथा सति कर्मत्वादीनामपि तथात्वादसंभवापत्तेः। तेषां शाब्दिक-संकेतेन कारकपदवत्त्वात् इति चेत् — न।

कर्मत्वादौ कारकपदस्य नित्यसंकेतात्। व्याकरणे कुत्रापि कारकसंज्ञाया अभावात् शाब्दिकसंकेताप्रसक्तेः। अत एव "कारके"[१] इत्यधिकारसूत्रमुक्त्वा

[१] सू. १.४.२३

व्याकरणे "ध्रुवमपायेऽपादानम्"[१] इत्यादिना कारकगणाभिधानं संगच्छते। कारकपदस्यानित्यसंकेतसत्त्वे कारकसंज्ञाग्राहकसूत्रं विना अधिकारसूत्राभिधानस्य असंगत्यापत्तेरिति कारकपदवाच्यत्वमपि कारकलक्षणं निष्प्रत्यूहमित्यास्तां विस्तरः।

ईदृशकारकत्वस्य विभक्त्यर्थतावच्छेदकत्वविरहेऽपि ईदृशकारकत्वावलीढस्य रूपान्तरेण विभक्त्यर्थत्वमक्षतमेव। एवमीदृशकारकत्वशून्यः अकारकः। तस्यापि तथैव विभक्त्यर्थत्वमिति।

भाट्टचिन्तामणौ कारकत्वविचारः[२]

ननु किमिदं कारकत्वम्? न तावत् क्रियाप्रयोजकत्वम्? "देवदत्तस्य तण्डुलं पचति" इत्यत्र अनुमतिदानेन पाकप्रयोजके देवदत्ते कारकत्वप्रसङ्गात्। नापि क्रियाजनकत्वम्। "यथाज्ञानं पचति" इत्यत्र ज्ञानेऽतिप्रसक्तेः। ज्ञानस्यापि पाकक्रियाजनकत्वात्। नापि धात्वर्थान्वितविभक्त्यर्थान्वयित्वम्। "धनाय गच्छति, स्वर्गाय यतते" इत्यादावकारकयोर्धनस्वर्गयोरतिव्याप्तेः। "न पचति" इत्यादौ नञर्थेऽभावेऽतिव्याप्तेश्च। तस्य पाकान्विताख्यातविभक्त्यर्थान्वयित्वात्। निपातार्थातिरिक्तत्वे सतीति विशेषणे "नक्तं पचति" इत्यादावधिकरणे नक्तादावव्याप्तेः। तस्मात् कर्तृकर्माद्यन्यतमत्वं कारकत्वमिति नैयायिकाः।

कारकत्वादिकं कर्तृत्वादिकं चानुगतव्यवहारसिद्धमखण्डोपाधिरूपं सामान्यमिति रत्नकोषकृतः।

सिद्धान्तस्तु — आख्यातार्थान्वितविभक्त्यर्थान्वयित्वं कारकत्वम्। लिङ्गसंख्यादीनां कारकत्वमिष्टमेव। "आज्यस्य यजति" इत्यादौ लाक्षणिकषष्ठ्यर्थस्यापि आख्यातार्थेऽन्वयात् आज्यादेः कारकत्वम्। उपपदविभक्त्यर्थानां तु कल्पितधात्वर्थान्तरेऽन्वयात् श्रुतभावनानन्वयित्वेन न कारकत्वम्। अत एव उपपदविभक्तेः कारकविभक्त्यपेक्षया दुर्बलत्वमिति संप्रदायः — इति।

इति कारकलक्षणविचारः

---

[१] सू. १.४.२४
[२] पृ. ९५

प्रथमार्थविचारः

बृहन्मञ्जूषायां प्रथमार्थविचारः[1]

प्रथमाद्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तमीत्याख्याः विभक्तयः सप्त। तत्र प्रथमायाः शक्तिग्राहकं सूत्रम् — "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"[2] इति। यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्योपस्थितिर्भवति स तत्प्रातिपदिकार्थः। तेन शक्यलक्ष्यगौणानां सर्वेषां संग्रहः। "कृष्णः सुन्दर" इत्यादौ प्रकृत्यर्थानुवादिका विभक्तिः। अभेदः संसर्गः। कृष्णाभिन्नः सुन्दर इति बोधः। लिङ्गं तु प्रातिपदिकस्यैवार्थः। प्रत्ययो द्योतक इति निरूपितं नामार्थवादे। संख्यापि वाच्या द्योत्या वेति तत्रैव निरूपितम्। "सिंहो माणवकः, द्रोणो व्रीहिः" इत्यादौ सिंहद्रोणादिपदानां सिंहसदृशे द्रोणपरिच्छेद्यादौ च लक्षणा। प्रथमा तदनुवादिका, अभेदः संसर्गः। सिंहसदृशाभिन्नो माणवकः, द्रोणपरिच्छेद्याभिन्नो व्रीहिः इति बोधः।

अत्र सूत्रे प्रातिपदिकशब्देन तत्प्रकृतिकलिङ्गबोधकप्रत्ययविशिष्टमपि गृह्यते, "प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्" इति परिभाषणात्। तेन 'इन्द्राणी' इत्यादौ प्रथमासिद्धिः।

इदमपि सूत्रं क्रियायोग एव प्रवर्तते, "कर्मणि द्वितीया"[3] इत्यादिभिः साहचर्यात्। अत एव "तिङ्समानाधिकरणे प्रथमा" "अस्तिर्भवन्तीपरः अप्रयुज्यमानोऽप्यस्ति" इति भाष्यादिग्रन्थः संगच्छते। यत्र तु क्रिया न श्रूयते, तत्राप्यध्याहारो बोध्यः। एकशब्दादावपि अनन्वितार्थकप्रयोगापेक्षयानुवादकप्रयोगस्य न्याय्यत्वात् एकादिशब्दोक्तैकत्वाद्यनुवादकमेकवचनादि बोध्यम्।

प्रथमार्थविचारः[4] बालमनोरमामञ्जूषादौ

अथ प्रातिपदिकप्रकृतिकसुबर्थो निर्णीयते। तत्र प्रथमाद्वितीयाचतुर्थीपञ्चमीषष्ठीसप्तमीत्याख्याः सप्त विभक्तयः। तासां मध्ये प्रथमायाः विधायकं सूत्रं "प्राति-

---

[1] पृ. १४१-१४३

[2] सू. २.३.४६

[3] सू. २.३.२

[4] ल.म.पृ.११.

पदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"[१] इति। तत्र सूत्रे प्रातिपदिकार्थशब्देन प्रवृत्तिनिमित्तं तदाश्रयश्चोच्यते। अन्यथा पञ्चकं प्रातिपदिकार्थ इति पक्षे लिङ्गादीनामपि प्रातिपदिकार्थत्वेन प्रातिपदिकार्थे प्रथमेत्यनेनैव लिङ्गादिषु प्रथमायाः सिद्ध्या लिङ्गादिग्रहणमनर्थकं स्यात्।

प्रवृत्तिनिमित्ताश्रयश्च आरोपितप्रवृत्तिनिमित्ताश्रयोऽपि। तेन "सिंहो माणवक" इत्यादौ माणवकस्य वास्तवसिंहत्वाश्रयत्वाभावेन माणवकेऽर्थे सिंहशब्दात् प्रथमा न स्यात्। वस्तुतस्तु वास्तवप्रवृत्तिनिमित्ताश्रयरूपे शक्यार्थे प्रथमां कृत्वा पदस्य साधुत्वं सम्पाद्य पश्चात् पदान्तरसंनिधाने तदर्थान्वयानुपपत्त्या वक्तृश्रोतृभ्यां लक्षणाश्रयणमिति न दोषः। अन्यथा "गङ्गायां घोष" इत्यादौ सुबुत्पत्तेः प्राक् प्रातिपदिकस्य तीरे लक्षणाश्रयणे तीरस्य नपुंसकतया गङ्गापदस्य नपुंसकतया "ह्रस्वो नपुंसके प्रातिपदिकस्य"[२] इति ह्रस्वापत्तिः।

न च "तिङ्समानाधिकरणे प्रथमा" इत्यादिना तिङन्तसंनिधानानन्तरमेव प्रातिपदिकात् प्रथमेत्यवगमात् आदावेव प्रातिपदिकार्थे प्रथमायां तद्विरोध इति वाच्यम्। तेन तिङन्तार्थे सामानाधिकरण्येनान्वययोग्यार्थबोधकं प्रथमान्तमेव साधु इत्येतावन्मात्रबोधनात्। न तु तिङन्तार्थेनान्वयोत्तरं प्रथमोत्पत्तिर्बोध्यते। एवमन्यैरपि कारकाधिकारस्थसूत्रैः "युष्मद्युपपदे०"[३] इत्यादिसूत्रैश्च बोध्यते।

अत एवार्थवत्सूत्रे भाष्ये — "शुक्लमित्युक्ते कर्म निर्दिष्टम्, कर्ता क्रिया चानिर्दिष्टे। अभ्याजेत्युक्ते क्रिया निर्दिष्टा कर्ता कर्म चानिर्दिष्टे। देवदत्तेत्युक्ते कर्ता निर्दिष्टः इतरत् अनिर्दिष्टम्। इहेदानीं गामभ्याज कृष्णां देवदत्त इत्युक्ते सर्वं निर्दिष्टं गामेव कर्म देवदत्तैव कर्ता अभ्याजैव क्रिया।" इत्युक्तम्।

तत्तत्कारकादिमात्रप्रयोगे योग्यसर्वक्रियाध्याहारे प्रसक्ते नियमार्थस्तत्तक्रियाप्रयोग इति तात्पर्यम्। एवं च सामान्यतः क्रियान्वययोग्यताबुद्धिरेव कारकविभक्तिप्रयोजिका, न तु विशिष्येति लभ्यते। कारकत्वं च क्रियाजनकत्वयोग्यताबुद्धिविषयत्वमेव।

वृद्धिसूत्रे भाष्येऽप्युक्तम् — "संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते, तेषां यथेष्टमभिसंबन्धो भवति आहर पात्रं पात्रमाहरेति" तत्र प्रातिपदिकार्थमात्रे प्रथमेत्यस्य उच्चैः नीचैः इत्यादीन्यव्ययानि, स्त्री पुमान् नपुंसकम् इत्यादिशब्दाश्च उदाहरणम्। नियतोपस्थितिकः प्रातिपदिकार्थः। यस्मिन् प्रातिपदिके उच्चरिते सति

---

[१] सू. २.३.४६

[२] सू. १.२.४७

[३] सू. १.४.१०५

यस्यार्थस्य नियमेनोपस्थितिः भवति स प्रातिपदिकार्थः। प्रवृत्तिनिमित्ततदाश्रययोः नियतोपस्थितिकत्वात् प्रातिपदिकार्थत्वम्। लिङ्गादीनां तु न तथात्वम्। "तटः तटी तटम्" इत्याद्यनियतलिङ्गेषु नियमेन कस्यापि लिङ्गस्योपस्थित्यभावात्। अतो लिङ्गादिग्रहणम्।

यद्यपि केवलानां लिङ्गादीनां प्रातिपदिकार्थं विना क्वाप्यनुपस्थितेः लिङ्गादिमात्रे प्रथमेत्यनुपपन्नं तथापि लिङ्गमात्रेऽधिके प्रथमेति विवक्षितम्। एवं च अलिङ्गानि अव्ययानि नियतलिङ्गानि 'कृष्णः श्रीः ज्ञानम्' इत्यादीनि च प्रातिपदिकार्थमात्रे प्रथमेत्यस्योदाहरणम्।

"अव्ययादाप्सुपः"[१] इति सूत्रे "आब्ग्रहणं व्यर्थमलिङ्गत्वात्" इति भाष्योक्त-रीत्या अव्यये कस्यापि लिङ्गस्यानुपस्थितिरिति प्रातिपदिकार्थमात्रे इत्यस्य अव्ययं भवत्युदाहरणम्। कृष्णशब्दे पुंस्त्वस्य श्रीशब्दे स्त्रीत्वस्य ज्ञानशब्दे नपुंसकत्वस्य च नियमेन भानमस्ति। तेषां नियतलिङ्गत्वात्। अतस्तेषु लिङ्गानामपि प्राति-पदिकार्थान्तर्भावात् कृष्णादिशब्दानां प्रातिपदिकार्थमात्रे इत्युदाहरणत्वं निर्बाधम्।

न च प्रातिपदिकोक्तार्थे किं प्रथमयेति वाच्यम्। एकत्वादिसंख्याबोधार्थत्वात्। अव्ययेभ्यस्तु पदत्वार्थं प्रथमा। तेन उच्चैरित्यादौ रुत्वविसर्गौ "उच्चैस्ते सम्य-गुच्चारणम्" इत्यादौ तेमयादिसिद्धिश्च।

अनियतलिङ्गास्तु तटादिशब्दाः लिङ्गमात्राधिक्यस्य उदाहरणम्। तत्र लिङ्गानाम-नियतोपस्थितिकतया प्रातिपदिकार्थानन्तर्भावात्। एवं च तत्र लिङ्गं प्रथमार्थः।

परिमाणमात्रे द्रोणो व्रीहिः। द्रोणरूपं यत् परिमाणं तत्परिच्छेद्यो व्रीहिः। प्रत्य-यार्थे परिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्, प्रत्ययार्थस्तु परिच्छेद्य-परिच्छेदकभावेन व्रीहौ विशेषणम्। अत्र परिमाणत्वेन सामान्यरूपेण द्रोणस्य भानाय परिमाणग्रहणम्।

वचनं संख्या। एकः, द्वौ, बहवः। यद्यप्यत्र एकत्वद्वित्वबहुत्वानां एकादिशब्दैः नियमेनोपस्थित्या प्रातिपदिकार्थे इत्येव सिद्धे वचनग्रहणं किमर्थमिति शङ्का भवति तथापि प्रकृतिभिरेव एकत्वादीनामुक्तत्वात् उक्तार्थानामप्रयोग इति न्यायेन प्रथमादेरप्राप्तौ वचनग्रहणम्। तथा च विभक्तिरिह अनुवादः शब्दसाधुत्वार्थं प्रयोज्या। "न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः" इत्यतभिहितसूत्रस्थभाष्य-सिद्धान्तात्। मात्रग्रहणात् कारकाद्याधिक्ये प्रथमा न भवति। एवं च प्रातिपदिकार्थे प्रातिपदिकेन विवक्षिते तदुत्तरं अव्ययानां पदत्वार्थं नियतलिङ्गानां संख्याबोधनार्थं

[१] सू. २.४.८२

च प्रथमा भवति। अनियतलिङ्गानां लिङ्गबोधनाय, परिमाणार्थकेभ्यः परिमाणसामान्यबोधनाय एकद्व्यादिशब्देभ्यः साधुत्वाय च प्रथमा भवति इति कौमुद्यनुसारेण अवगम्यते।

प्रौढमनोरमायां प्रथमार्थविचारः

इह सूत्रे अर्थे लिङ्गे च प्रथमेत्येतावदेव सुवचम्। इतरत् सर्वं त्यक्तुं शक्यम्। तथा हि अर्थे प्रथमेत्युक्ते कस्यार्थे इत्याकाङ्क्षायां यस्मात् स्वादिविधिः तस्येति लभ्यत एव। स्वादयश्च प्रातिपदिकात् लिङ्गप्रत्ययविशिष्टाश्च विधीयन्ते। तदर्थत्वं च ततो नियतोपस्थितिकत्वमेव। एवं च "मृडानी" इत्यादौ पुंयोगमहत्त्वादेरपि ङ्यन्तान्नियतभानेन प्रथमा सिध्यतीत्यपरमनुकूलम्। यथान्यासे तु सा न स्यात्। यथा न्यासे प्रातिपदिकार्थशब्देन प्रवृत्तिनिमित्ततदाश्रययोरेव ग्रहणेन लिङ्गपदेन लिङ्गमात्राधिक्यस्यैव ग्रहणेन "हिमानी" इत्यादौ महत्वस्याधिक्यसत्त्वेन प्रथमाया असिद्धेः।

यदि तु अर्थशब्दो वृत्तिविषयपरः, वृत्तिस्तु शक्तिर्लक्षणा च। गौणी तु लक्षणान्तर्भूता पृथग्वा अस्तु, त्रिकं प्रातिपदिकार्थः इत्याश्रीयते, तदा लिङ्गेत्यपि मास्तु। क्वचित् लिङ्गस्य नियमेन भानं क्वचिदनियमेनेत्येवं लक्ष्याणां विचित्रत्वेऽपि न क्षतिः। नियतोपस्थितिक इत्यत्र नियमांशस्य त्यागात्। तथा च अर्थे प्रथमेत्येव सारम्।

'द्रोणो व्रीहिः' इत्यपि द्रोणशब्दस्य तत्परिमिते उपचारात् सिद्धम्। 'गोर्वाहीक' इतिवत्। एको द्वौ इत्याद्यपि "न केवला प्रकृतिः प्रयोक्तव्या" इति निषेधादेव सिद्धम्। अनन्वितार्थकशब्दप्रयोगापेक्षया अनुवादकमात्रप्रयोगस्य न्याय्यत्वात् न द्व्यादिभ्यःसर्वविभक्त्यापत्तिः।

एवं च मात्रग्रहणमपि व्यर्थम्। "संबोधने च"[1] इति ज्ञापकेन कर्माद्याधिक्ये प्रथमायाः अप्रवृत्तेः। — इति निरूपितम्। सर्वथा प्रथमाविभक्त्यर्थः संख्येति तेषामाशयः।

शब्दशक्तिप्रकाशिकानुसारेण प्रथमायाः लक्षणम्[2]

तादात्म्यभिन्ने स्वार्थे या प्रकृत्यर्थस्य बोधने।
न समर्था विभक्तिः सा प्रथमा परिकीर्त्यते।।

या विभक्तिः तादात्म्यभिन्नस्वार्थधर्मिकप्रकृत्यर्थबोधं प्रति न समर्था न स्वरूपयोग्या सा प्रथमा। तथा च यादृशानुपूर्वीप्रकारकनिश्चयत्वं तादात्म्यभिन्नस्वार्थ-

---

[1] सू. २.३.४७
[2] पृ. २८६

धर्मिकप्रकृत्यर्थप्रकारकबोधजनकतानवच्छेदकं, विभक्तित्वे सति तादृशानुपूर्वीमच्छब्दत्वं प्रथमात्वमिति पर्यवसितम्। द्वितीयादयस्तु स्वार्थे कर्मत्वादौ प्रकृत्यर्थस्यान्वयबोधं प्रति समर्थाः। प्रथमा तु विशेषणपदोत्तरस्था तादृशि तादात्म्ये तथान्वयबोधं जनयन्त्यपि न तादात्म्यभिन्ने तथा। न च प्रथमाद्विवचनवृत्त्यानुपूर्व्याः द्वितीयाद्विवचनेऽपि सत्त्वात् तत्रातिव्याप्तिरिति वाच्यम्। औ प्रथमायाः द्विवचनम्, औट् द्वितीयायाः द्विवचनम् इत्यानुपूर्वीभेदात्।

यदि "स्वर्गकामो यजेत" इत्यादौ प्रथमोपस्थाप्यस्य नियोज्यत्वस्य यागादौ, आधेयत्वस्य वा विध्यर्थकृतिसाध्यत्वादिघटककृत्यादौ प्रकृत्यर्थावच्छिन्नस्यान्वयः प्रामाणिकः, यदि वा "धृतिः स्वाहा" इत्यादौ चतुर्थ्याः स्थाने न प्रथमा, किं तु प्रथमैवोद्देश्यत्वबोधिका, तदा तस्यां प्रथमायामव्याप्तिः इत्यतः अन्यथा निर्वक्ति —

धात्वर्थेन विशिष्टस्य तिङर्थस्यान्वयं प्रति।
यदन्तनामबोध्यत्वं तन्त्रं सुप् साथवा तथा।।

धात्वर्थावच्छिन्नतिङर्थस्यान्वयबोधं प्रति यदन्तनामोपस्थाप्यत्वं तन्त्रं तादृशी सुप् प्रथमा। "यजेत" इत्यादौ तिङर्थस्येष्टसाधनत्वादेः न प्रकृत्यर्थावच्छिन्नस्य यागादावन्वयः, किं तु केवलस्य। अतस्तस्य प्रथमान्तनामानुपस्थाप्यत्वेऽपि न क्षतिः। चैत्रमैत्रौ स्त इत्यादौ द्वन्द्वेनैव प्रथमान्तनाम्ना चैत्रस्योपस्थापनान्न व्यभिचारः।

विभक्त्यर्थनिर्णयानुसारेण सुपां लक्षणम्[१]

विभक्तिर्द्विधा सुप्तिङ्भेदात्। लिङ्गवाचिका विभक्तिः सुप्। लिङ्गावाचिका विभक्तिस्तिङ्। स्त्रीप्रत्यये कृदादौ चातिव्याप्तिवारणायोभयत्र विभक्तिपदम्। सुपोऽपि प्रथमाद्वितीयातृतीयाचतुर्थीपञ्चमीषष्ठीसप्तमीभेदात् सप्तविधाः। तिङोऽपि प्रथममध्यमोत्तमपुरुषभेदात्त्रयः।

व्युत्पत्तिवादरीत्या प्रथमाविभक्त्यर्थः

व्युत्पत्तिवादेऽपि[२] — "प्रत्ययाश्च विभक्तिकृत्तद्धितादिभेदेन नानाविधाः। विभक्तिश्च सुप्तिङ्भेदेन द्विविधा। सुब्विभक्तयः प्रथमाद्वितीयादयः सप्त। तत्र प्रथमार्थः प्रकृत्यर्थे विशेषणविधया अन्वयिनी संख्यैव। अत एव यत्र विशेष्यवाचकसमानविभक्तिकपदं निपातपदं वा नास्ति तत्र प्रथमान्तार्थस्य विशेष्यभासकसामग्र्यभावादसौ मुख्यविशेष्यतयैव भासते।" इत्युक्तम्। तत्र व्याख्यातारः —

---

[१] पृ. ३०
[२] पृ. ९३

संख्यैवेति। अत्र एवकारस्य प्रथमार्थ एव, प्रकृत्यर्थे विशेषणविधया अन्वयिन्येव संख्यैवेति त्रिषु स्थलेषु संबन्धः। तेन स्वाश्रयकर्तृकत्वसंबन्धेन क्रियायां संख्यान्वयो वारितः। एकपदोपात्तत्वेन प्रकृत्यर्थे एवान्वयस्य युक्तत्वात्।

विशेषणविधयान्वयिन्येवेत्युक्त्या च संख्यायां प्रकृत्यर्थस्य विशेषणत्वभ्रमो वारितः। "घटम्" इत्यादौ द्वितीयादिस्थले संख्यायाः प्रकृत्यर्थे विशेषणतयैव भानस्य व्यवस्थापितत्वात् संख्यायामपि तस्य विशेषणतया भाने उद्देश्यविधेयभावभेदेन वाक्यभेदापत्तेः। इत्थं च प्रथमास्थलेऽपि संख्यायाः विशेषणतयैव भानम् उचितमिति।

संख्यैवेत्युक्त्या लिङ्गपरिमाणयोः प्रथमार्थत्वनिरासः। तथा हि — ब्राह्मणवति गृहादौ "अत्र ब्राह्मणी नास्ति" इति व्यवहारात् लिङ्गयोन्यादिमत्त्वरूपलिङ्गस्य ब्राह्मणादिपदजन्यबोधे भानेऽपि तस्य न प्रथमार्थत्वम्। "ब्राह्मणं ब्राह्मणीम्" इत्यादावपि तद्भानात्। अतः प्रातिपदिकस्यैव स्त्रीत्वपुंस्त्वादिविशिष्टेऽर्थे निरूढलक्षणा अङ्गीकार्या। तटादावचेतने तूक्तलिङ्गाभावात् न तटादिशब्दजन्यबोधे लिङ्गं भासते। अतो नास्य प्रथमार्थत्वम्। येषामपि मते तटादौ लिङ्गस्य भानं तेषामपि मते तस्य प्रथमार्थत्वं न युक्तम्। तटीमित्यादावपि तन्मते लिङ्गभानस्याङ्गीकरणीयत्वादिति।

एवं परिमाणमत्र द्विविधं विवक्षितं गुरुत्वं परिमितिश्च। तत्र "द्रोणो व्रीहिः" इत्यादौ गुरुत्वरूपं परिमाणं प्रथमार्थः। तत्र प्रकृत्यर्थस्य द्रोणपदार्थस्याभेदेनान्वयः। गुरुत्वस्य समवायेन व्रीहावन्वयः। तथा च द्रोणाभिन्नगुरुत्ववान् व्रीहिः इत्यन्वयबोधः। एवं "वितस्तिः शङ्कुः" इत्यादौ द्वादशाङ्गुलिपरिमाणवाचिनो वितस्ति शब्दात् जायमानायाः प्रथमायाः परिमाणमर्थः। तत्र वितस्तिशब्दार्थस्याभेदेनान्वयः। परिमाणस्य च समवायेन शङ्कावन्वयः। तथा च वितस्त्यभिन्नपरिमाणवान् शङ्कु इत्यन्वयबोधः। एतदुपपत्त्यर्थं प्रथमायाः परिमाणार्थकत्वमावश्यकमिति वैयाकरणाः केचिदाहुः।

तन्न। द्रोणशब्दार्थस्य गुरुत्वविशेषविशिष्टस्य अभेदेन व्रीहौ, एवं वितस्तिशब्दार्थस्य परिमाणविशेषविशिष्टस्याभेदेन शंङ्कौ चान्वयेनैवोपपत्त्या परिमाणस्य स्वातन्त्र्येण भानाभावात् प्रथमायास्तादृशार्थकत्वे प्रमाणाभावात्।

इत्थं च "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"[१] इति सूत्रे सति सप्तम्येव, न तु वाचकत्वार्था सप्तमी। तथा चैतत्सूत्रे प्रातिपदिकार्थलिङ्गपरि-

---

[१] सू. १.३.४६

माणवचनमात्रे प्रातिपदिकेन विवक्षिते न प्रथमेति लभ्यते। एतावता सूत्रेण प्रथमार्थानिरूपणात् अनन्यलभ्यतया संख्यैव प्रथमार्थ इति सिध्यति। संख्यापि प्रातिपदिकार्थ इति मतं तु पृथक् दूषितं व्युत्पत्तिवाद एव।

अत एवेति। प्रकृत्यर्थे विशेषणविधयान्वययोग्यायाः संख्यायाः प्रथमार्थत्वादेवेत्यर्थः। यत्रेत्यादि। "चैत्रः" इत्यादौ समानविभक्तिकपदाद्यसत्त्वस्थले प्रथमान्तार्थस्य चैत्रादेः यद्विशेष्यं तद्भासकसामग्र्यभावात् असौ प्रथमान्तार्थःचैत्रादिः विशेष्यतयैव भासत इत्यर्थः।

एतेन "चैत्र" इत्यादौ एकत्वप्रकारकचैत्रादिमुख्यविशेष्यकबोधस्य जायमानत्वे सति संभवेऽन्यत्रापि प्रथमान्तार्थस्यैव मुख्यविशेष्यत्वमिति सूचितम्। अत्र "सति संभवे" इत्युक्तत्वात् "पचति" इत्यतः पाककृतिमात्रविषयकस्य "चैत्रेण सुप्यत" इत्यादौ चैत्रकर्तृकशयनमात्रविषयकस्य बोधस्य नैयायिकैरङ्गीकृतत्वात् क्वचित् प्रथमान्तार्थस्य मुख्यविशेष्यत्वविरहेऽपि न क्षतिः। अन्यत् पश्चात् विस्तरेणायं विषयः प्रस्तोष्यते।

एतावता एतत् सिद्धं प्रथमाविभक्तेः संख्यार्थः इति। तत्रापि एकवचनस्य एकत्वमर्थः, द्विवचनस्य द्वित्वमर्थः। बहुवचनस्य बहुत्वमर्थः इति "द्व्येकयोर्द्विवचनैकवचने"[१] "बहुषु बहुवचनम्"[२] इति सूत्रानुसारेण नैयायिकाः स्वीकुर्वन्ति।

पदवाक्यरत्नाकरानुसारं प्रथमार्थः

अयं च विषयः पदवाक्यरत्नाकरेऽपि स्पष्टीकृतः। संबोधनप्रथमाव्यतिरिक्तप्रथमायाः संख्यार्थकत्वम् संबोधनप्रथमायाः संख्यया सह संबोध्यत्वार्थकत्वं च

"ऐक्यद्वित्वबहुत्वानां क्रमेण प्रतिपादकाः।
विभक्तीनामवयवाः प्रत्येकं स्युस्त्रयस्त्रयः ॥४०॥"

"विभक्तिः प्रथमा तेषु स्वौजसः प्रथमास्त्रयः।
आभिमुख्यं तदर्थस्तदभीष्टप्रत्ययात्मकम् ॥५३॥"

इति कारिकाभ्यां स्पष्टीकृतम्। क्वचित् प्रथमायाः लिङ्गार्थकत्वमप्यस्तीति तु —

अन्यत्रामन्त्रणाल्लिङ्गवचने प्राह केवलम्।
विभक्तिः प्रथमा कर्माद्याधिक्येऽन्या विभक्तयः ॥५९॥

---

[१] सू. १.४.२२
[२] सू. १.४.२१

इति कारिकयोक्तम्। आमन्त्रणप्रथमाभिन्ना प्रथमा 'नर' इत्यादौ पुंस्त्वं, 'लक्ष्मीः' इत्यादौ स्त्रीत्वम्, बृहन्नलमित्यादौ नपुंसकत्वमेकत्वादिसंख्यास्वरूपं वचनं चाभिधत्ते। द्वितीयादयस्तु कर्माद्यधिकमभिदधाना एव लिङ्गवचने प्रतिपादयन्ति, न तु कैवल्येनेति तदर्थः विवृतः।

संबोध्यत्वं पुंस्त्वादिलिङ्गमेकत्वादिसंख्या चेति त्रितयं प्रथमार्थ इति गोकुलनाथोपाध्यायमतम्।

तदुपरि — "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"[1] इत्यनुशासनात् जातिमात्रं प्रातिपदिकार्थ इति मते जातिवाचकात् गवादिशब्दात् व्यक्तिलाभार्थम् प्रथमायाः व्यक्तौ शक्तिः, "द्रोणो व्रीहिः" इत्यादौ द्रोणशब्दार्थस्य गुरुत्वस्य व्रीहौ समवायाख्यभेदसंबन्धेन नामार्थत्वेन हेतुना अन्वयासंभवात् प्रथमायाः गुरुत्वे शक्तिः, तथैवारत्निः कुण्डमित्यादौ परिमाणेऽपि शक्तिः आवश्यकीत्याशङ्क्य,

अन्यलभ्यतया जातिमतः गुणवतस्तथा।
निरर्थः प्रातिपदिकाद्यर्थेषु प्रथमाविधिः ।।६०।।

गवादिप्रातिपदिकात् आक्षेपतो लक्षणया शक्त्या वा व्यक्तेः गुरुत्ववतः परिमाणवतश्च लाभेन तस्याभेदेन इतरनामार्थेऽन्वयेन वाक्यार्थनिष्पत्त्या व्यर्थः व्यक्त्यादेः प्रथमावाच्यत्वविधिः — इति प्रतिपाद्य, तर्हि सूत्रं किमर्थमिति शङ्कायामुक्तम् —

सूत्रेण प्रातिपदिकार्थः सत्ता व्यक्तिरेव सा।
आकृतिः परिमाणं तद्वृत्तिधर्मोपलक्षणम्।।६१।।

प्रसिद्धे लिङ्गवचने तावन्मात्रे विवक्षिते।
प्रथमान्तप्रयोगस्य साधुत्वमनुशिष्यते।।६२।।

प्रातिपदिकार्थः सत्ता, सा च व्यक्तिरेव। परिमाणं नाम आकृतिः अवयवसंस्थानस्वरूपा। एतत्त्रितयं तद्वृत्तिधर्माणामुपलक्षणम्। ततश्च व्यक्त्याकृतिपरिमाणानि तद्धर्माश्च प्रातिपदिकार्थः। लिङ्गं पुंस्त्वादि, वचनं संख्या। एतेषु विवक्षितेषु प्रथमान्तप्रयोगस्य साधुत्वं प्रातिपदिकार्थसूत्रेणानुशिष्यते। न तु प्रातिपदिकार्थवाचिका प्रथमेत्यनुशासनमिदम्।

"साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः" इति वाक्यपदीयोक्तेः। प्रथमायाः कुत्रार्थे शक्तिरिति लाघवादिप्रमाणान्तरेणैव निर्णेतव्यम्। तथा च सूत्रेण व्यक्तिलिङ्गप्रवृत्तिनिमित्तसंख्याबोधकं प्रथमान्तं साधु इति कण्ठत उक्ते बोधकत्वा-

---

[1] सू. १.३.४६

न्यथानुपपत्त्या शक्तौ कल्प्यमानायां प्रातिपदिकाप्राप्ययोः लिङ्गसंख्ययोः सुपां, सुबप्राप्ययोर्व्यक्तिप्रवृत्तिनिमित्तयोश्च प्रातिपदिकानां शक्तिः कल्प्यते इति प्रमाणान्तरोत्थापकतया न तु साक्षात् व्याकरणस्य शक्तिग्राहकत्वमिति।

विभक्त्यर्थनिर्णयानुसारेण संबोधनेतरप्रथमाविभक्त्यर्थनिरूपणम्[१]

सुबर्थास्तु सुपां क्रमेणैव निरूपणीया इति क्रमेण सुपस्तदर्थाश्च निरूप्यन्ते। तत्र सु औ जस् इति त्रयः प्रत्ययाः प्रथमा। तदर्था अनुशासनसिद्धाः। अनुशासनं तु "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"[२] इति। प्रातिपदिकार्थः सत्ता व्यक्तिरिति यावत्। लिङ्गं पुमान् स्त्री नपुंसकं च। परिमाणं गुरुत्वं परिमितिश्च। वचनं संख्या एकत्वं द्वित्वं बहुत्वं चेति। मात्रग्रहणं द्वितीयाद्यर्थकर्मत्वादिव्यवच्छेदार्थमिति।

आक्षेपः

ननु "रामो राजा" इत्यादौ व्यक्तेः प्रातिपदिकात् प्रकृतित एव लाभात् कथं प्रथमार्थत्वम्। न चैकदा अनेकवृत्तिरामत्वादिजातिवचनात् रामादिशब्दान्न व्यक्तिलाभ इति वाच्यम्। जातिशक्तिवादिनामपि मते जात्या व्यक्त्याक्षेपसंभवेन व्यक्तेरन्यलभ्यतया प्रत्ययार्थत्वाप्रसक्तेः। अत एव तेषां मते तिङो भावनावाचित्वे भावनया आक्षेपेण कर्तुर्बोधने "पचति" इत्यादावनभिहिताधिकारीयतृतीयायाः न प्रसक्तिरिति।

यत्तु घटाद्यर्थेषु सुपां शक्तिः। घटादिपदानामनन्तानां शक्तत्वे शक्ततावच्छेदकानन्त्येन सुपाम् एकविंशतिसंख्याकानां शक्ततावच्छेदकलाघवसंभवेन तथात्वौचित्यादिति।

तदपि न सम्यक्। घटादिपदानां निरर्थकत्वे प्रातिपदिकसंज्ञाविरहेण तदनन्तरं सुबुत्पत्तेरप्रसक्तेः। "दधि भवति" इत्यादौ सुपो लोपात् तत्र दध्यादिपदार्थानवगमप्रसङ्गाच्च।

न च तत्रानुसन्धीयते विभक्तिरिति सांप्रतम्। तथापि "राजपुरुष" इत्यादिसमासे राजपदार्थावगमस्याशक्यत्वात्। न चात्राप्यनुसन्धीयते षष्ठीति वाच्यम्। तथा सति "ऋद्धस्य राजपुरुष" इत्यत्रापि ऋद्धादे राजान्वयप्रसङ्गात्। दर्शितसमासे नैयायिकानां राजपदलक्षणायाः शाब्दिकानां वृत्तेश्च वैयर्थ्येनाकल्पनापत्तेश्च।

---

[१] पृ. ३३

[२] सू. २.३.४६

किं च "चैत्र" इत्यादौ सुबर्थचैत्रव्यक्तौ सुबर्थयोर्लिङ्गसंख्ययोर्भेदान्वयोऽवश्यमभ्युपेयः। तथा सति "रूपं घट" इत्यादौ "तन्तुपटौ" इत्यादौ रूपघटयोः तन्तुपटयोर्भेदान्वयबोधः स्यात्।

अथ प्रातिपदिकानां घटादिपदानां घटत्वेन सकलघटवाचकत्वेऽपि घटोऽस्तीत्यादावस्तित्वान्विततद्धटव्यक्तिबोधः प्रथमयेति चेत् — न। घटपदेन घटोपस्थितौ अस्तिपदेनास्तित्वोपस्थितौ अबाधितत्वात् तद्धटव्यक्तेः घटत्वेन शाब्दभानसंभवादिति चेत् —

समाधानम्

अत्राहुः — "घटो नील" इत्यादौ विशेषणविभक्तेः नीलपदोत्तरप्रथमायाः अभेदोऽर्थः। स घटादौ विशेषणीभूयान्वेतीति।

तत्राभेदो यदि भेदत्वावच्छिनाभावत्वेन रूपेणार्थः तदा अप्रसिद्धिः। भेदत्वावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः। सर्वत्र यत्किंचिद्भेदसत्त्वात्।

यदि च भेदप्रतियोगिकाभावत्वेनार्थः तदा नीलभेदगगनोभयत्वावच्छिन्नाभाववति पीते नीलाभेदावगमप्रसङ्गः।

यदि च नीलप्रतियोगिकभेदत्वावच्छिन्नाभावत्वेन तदा यत्किंचिन्नीलभेदवति नीले नीलभेदानवगमप्रसङ्गः।

यदि च नीलत्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नाभावत्वेन प्रथमार्थः, तदा शक्त्यानन्त्यम्। नीलादेः पदार्थैकदेशे नीलत्वावच्छिन्नप्रतियोगिताकभेदेऽनन्वयप्रसङ्गः। नीलपटतात्पर्येण "घटो नील" इति वाक्यस्य प्रामाण्यप्रसङ्गश्च।

तस्मात् भेदोऽत्यन्ताभावश्च द्वयमर्थः। तत्र भेदे नीलव्यक्तिः स्वरूपात्मिकया प्रतियोगितया, भेदस्तु तद्भेदव्यक्तिस्वरूपावच्छिन्नया प्रतियोगितया अत्यन्ताभावे अन्वेति।

यदि निरवच्छिन्नप्रतियोगितया नीलादेः प्रतियोगिनो भेदादौ भानम्, भेदविशेषणतया भासमानस्य नीलादेः भेदव्यक्तिस्वरूपनिष्ठप्रतियोगितावच्छेदकताया अनवच्छेदकत्वं च न सांप्रदायिकमित्युच्यते, तदा तु उभयावृत्तित्वोपलक्षितधर्मावच्छिन्नप्रतियोगिताकान्योन्याभावेऽत्यन्ताभावे च खण्डशः शक्तिः, तदादिपदवत्। स्मरणं तु उपलक्षणोभयावृत्तित्वांशपरिहारेण प्रातिपदिकोपस्थापिततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदत्वेन भेदविषयकम् अत्यन्ताभावत्वेनात्यन्ताभावविषयकं च भवति। तत्र नीलीदिपदार्थस्य तत्तद्व्यक्तित्वेऽन्वयः। नीलान्वित-

तादृशभेदत्वावच्छिन्नप्रतियोगितया भेदोऽत्यन्ताभावेऽन्वेति। तादृशात्यन्ताभावः समानविभक्तिकघटादिपदार्थेऽन्वेति।

यदि नीलादेस्तद्व्यक्तित्वे पदार्थैकदेशेऽन्वयो न व्युत्पत्तिसिद्ध इत्युच्यते, तदा उभयावृत्तित्वोपलक्षितधर्मावच्छिन्नप्रतियोगितायां भेदेऽत्यन्ताभावे च त्रिषु सुब्विभक्तेः शक्तिः। तत्रोभयावृत्तित्वांशमपहाय प्रातिपदिकोपस्थापितव्यक्तिवृत्तितद्व्यक्तित्वावच्छिन्नप्रतियोगितायाः स्मरणम्। तादृशप्रतियोगितायां नीलादेः प्रकृत्यर्थस्यान्वयः। नीलाद्यन्विततादृशप्रतियोगितायाः भेदेऽन्वयः। तथाविधान्वितभेदत्वावच्छिन्नप्रतियोगितासंसर्गेण भेदस्यात्यन्ताभावेऽन्वयः। तथाविधान्वितात्यन्ताभावस्य समानविभक्तिकघटादिपदार्थेऽन्वयः।

एवमीदृशभेदात्यन्ताभावः प्रतियोगिस्वरूप एव। यत्र प्रतियोगी अननुगतः तत्रैव सामान्यधर्मावच्छिन्नभेदस्यात्यन्ताभावः प्रतियोगितावच्छेदकस्वरूप इति स्वरूपभेदाभावः तन्नीलादिव्यक्तिस्वरूपो नीलपदादिप्रातिपदिकार्थो दर्शितरीत्या भवति प्रथमार्थः।

न च भेदस्याभावः प्रतियोगिस्वरूपो न संभवति, भेदेन समं प्रतियोगिनो विरोधाभावात्, घटवत्यपि भूतले घटभेदसत्त्वात्। किं तु प्रतियोगितावच्छेदकस्वरूप इति वाच्यम्। प्रतियोगितावच्छेदकसंबन्धेनैव प्रतियोगिनोऽभावविरोधित्वात्तस्यात्राप्यविकलत्वात्। तत्तद्व्यक्तित्वस्वरूपतादात्म्येन संबन्धेन प्रतियोगिन्याः तद्व्यक्तेः भेदविरोधित्वात्।

न च तद्व्यक्तित्वस्य धर्मविधया प्रतियोगिताया अवच्छेदकत्वं [न तु] संसर्गविधयेति कथं तेन संबन्धेन विरोधित्वमिति वाच्यम्। भेदे संसर्गविधया प्रतियोगिताया अवच्छेदकस्यैव धर्मविधया अवच्छेदकत्वात्। तादृशस्यैवावच्छेदकस्य भेदाभावत्वोपगमात्।

तदभिसंधानेन योग्यानुपलब्धिहेतुतावादे प्रत्यक्षालोके मिश्रैः "न हि यथा तादात्म्यमन्योन्याभावस्याभावः तथान्योन्याभावोऽपि तदभावरूपः घटाप्रतियोगित्वात्" इत्युक्तम्। भेदप्रतियोगितायां संसर्गविधया अवच्छेदकस्य तादात्म्यस्य धर्मविधया अवच्छेदकात्मकान्योन्याभावविरहरूपस्वरूपप्रदर्शनं संसर्गीभूतावच्छेदकयोः ऐक्यं विना नोपपद्यत इति।

गुरुचरणास्तु — भवतु स्वरूपभेदाभावः तद्व्यक्तिस्वरूपः तथापि स न प्रथमार्थः, मानाभावात्। "घटो नील" इत्यादौ स्वरूपभेदाभावात्मकतादात्म्यसंसर्गेणैव शाब्दबोधोपपत्तेः।

न चाभेदस्य संसर्गत्वोपगमे स्वन्तनीलपदेन स्वन्तघटपदस्य पौर्वापर्यरूपायाः तद्यङ्ग्याया आकाङ्क्षायाः शाब्दबोधप्रयोजकत्वे गौरवम्, अधिकवर्णघटितत्वात्। अभेदस्य पदार्थत्वे नीलविशेषणकाभेदविशेष्यकशाब्दबुद्धौ नीलपदस्य सुना सहाकाङ्क्षायाः, अभेदप्रकारकघटविशेष्यकशाब्दबुद्धौ तेनैव सुना सह स्वन्तघटपदस्याकाङ्क्षायाः प्रयोजकत्वस्वीकारे लाघवम्। नीलघटपदयोरेकत्राकाङ्क्षायामप्रवेशेन तयोर्विशेष्यविशेषणभावव्यत्यासप्रयुक्तस्य आकाङ्क्षाधीहेतुताभेदस्य [स्वन्तनीलपदाव्यवहितोत्तरस्वन्तघटपदज्ञानं वा कारणमित्येवंरूपस्य] गुरुतरस्याप्रसक्तेरिति वाच्यम्।

नीलाभेदविधेयकघटोद्देश्यकबुद्धौ नीलघटपदयोः पौर्वापर्यरूपाकाङ्क्षायाः प्रयोजकत्वस्य तवाप्यावश्यकत्वात्। अन्यथा [नीली ?] घट इत्यादितो नीलाभेदविधेयकबोधापत्तेः।

न च "नीलो घटो जलपूर्ण" इत्यादौ जलपूर्णत्वविधेयकबोधस्थले अभेदस्य प्रथमार्थत्वपक्षे घटे नीलाभेदविशेषणकान्वयबोधो दर्शितरीत्या आकाङ्क्षाद्वयस्य प्रयोजकत्वेनैवोपपद्यते। भेदस्य संसर्गतापक्षे स्वन्तनीलघटपदयोः एकत्राकाङ्क्षाप्रवेशे विशेष्यविशेषणभावव्यत्यासप्रयुक्तं गौरवं दुष्परिहरमिति वाच्यम्।

यतोऽभेदस्य सुबर्थत्वपक्षेऽपि स्वन्तघटपदस्य पदोत्तरत्वाद्यविशेषितेन सुना सहाकाङ्क्षा न तथाविधान्वयबोधोपयोगिनी। "नीलः पटः घटो दण्डः" इत्यादौ स्वन्तघटपदस्य दण्डपदोत्तरसुना सह आकाङ्क्षाग्रहे घटे नीलाभेदान्वयबोधः स्यात्। अतोऽवश्यं नीलपदोत्तरसुना सहाकाङ्क्षा वक्तव्या। तथा चैकस्यामाकाङ्क्षायां नीलघटपदयोः प्रवेशे विशेष्यविशेषणभावव्यत्यासप्रयुक्तं गौरवं तवापि दुष्परिहरमिति।

न च प्रथमान्तनीलपदप्रथमान्तघटपदयोः आकाङ्क्षाज्ञानस्य नीलविशेषणकतादात्म्यसंसर्गकघटविशेष्यकशाब्दबोधं प्रति हेतुत्वे "नीलघट" इत्यादिकर्मधारयस्थले व्यतिरेकव्यभिचारः, तत्र स्वन्तनीलपदघटिताकाङ्क्षाज्ञानविरहादिति वाच्यम्। "कलशः कृष्णः" इत्यादौ व्यभिचारवारणार्थमव्यवहितोत्तरोत्पत्तिकत्वं जन्यतावच्छेदकेऽवश्यं प्रवेशनीयम्। तत एव कर्मधारयस्थले व्यभिचाराप्रसक्तेः।

न च "शिखी विनष्टः, क्षुदुपहन्तुं शक्या, सुरभि चन्दनमाघातम्" इत्यादौ विनष्टशक्याघ्रातानां तादात्म्यसंसर्गेण शिखिनि क्षुधि सुरभिचन्दने चान्वयो बाधित इति सामानाधिकरण्यानुपपत्तिः। अभेदस्य सुबर्थत्वपक्षे तस्य स्वाश्रयशिखावत्त्वेन स्वाश्रयोपहननवत्त्वेन स्वाश्रयसौरभवत्त्वेन संसर्गेणान्वयसंभवात् भवति सामा-

नाधिकरण्यमिति वाच्यम्। "क्षुदुपहन्तुं शक्ये" इत्यत्र स्वाश्रयोपहननवत्त्वरूप-परंपरासंबन्धावच्छिन्नशक्तिकर्मतावतोऽभिधानात् क्षुधो न द्वितीया। तादृशस्य कर्मणः तादात्म्यसंसर्गेण क्षुधि अन्वयः निष्प्रत्यूह एव। "शिखी विनष्ट" इत्यत्र शिखाविशिष्टे विनष्टस्य, सुरभि चन्दनमाघ्रातमित्यत्र सौरभविशिष्टचन्दने आघ्रातस्य च तादात्म्यसंसर्गेणान्वयः शिखां सौरभं च विशेषणमादाय पर्यवस्यति। अत्रैवार्थे "सविशेषणे हि विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसंक्रामतः" इति प्रमाणं प्रदर्शयन्ति तान्त्रिकाः।

एवं युक्त्या अभेदस्य विभक्त्यर्थत्वे प्रतिहते अनुशासनमपि विभक्तीनां साधुत्वमात्रं ज्ञापयति। तथा हि "लुपि युक्तवद्व्यक्तिवचने"[१] इत्येकं सूत्रम्। लुप्ते प्रत्यये प्रकृतिलिङ्गवचने प्रयोक्तव्ये, न तु "लवणा यवागूः" इत्यादौ लवणादि-पदवत् विशेष्यनिघ्नतया लिङ्गवचनान्तप्रयोगः। यथा "पञ्चाला नाम क्षत्रियाः" नियतबहुवचनान्तपुंलिङ्गपञ्चालशब्दविषयाः तेषां निवासे जनपदे प्रवृत्तस्य तद्धित-स्याण्प्रत्ययस्य लुपि सति पञ्चाला जनपदः इति, तथा विदेहाः कुरवः मगधाः मत्स्याः अङ्गा वङ्गाः कलिङ्गा इत्यादीत्यर्थकम्। "विशेषणानां चाजातेः"[२] इत्यपरं सूत्रम् तद्विशेषणवाचिनां पदानां तद्वल्लिङ्गवचने स्यातां जातिवाचिपदं वर्जयित्वा तथा पञ्चाला रमणीयाः, जातौ तु पञ्चाला जनपदः एवं गोदयोर्निवासग्रामे गोदौ बहुक्षीरघृतौ, जातौ तु गोदौ ग्राम इत्यर्थकम्।

तदेतत् सूत्रद्वयं पूर्वाचार्याणामनूद्य "तदशिष्यं संज्ञाप्रमाणत्वात्"[३] इति पाणिनि-मुनिरसूत्रयत्। तत् प्रकृतिनियतलिङ्गवचनत्वं लुप्ततद्धितकानां पञ्चालादिशब्दानां तद्विशेषणपदानां च विशेष्यतुल्ययोगक्षेमं नियतलिङ्गवचनत्वं न शिष्यं न वक्तव्यम्। संज्ञा नियतव्यवहारः तत्प्रमाणकत्वादिति सूत्रार्थः।

तथा च यथा क्षत्रियविशेषे प्रवर्तमानानां पञ्चालादिशब्दानां नियतपुंलिङ्ग-बहुवचनत्वं व्यवहारेणैव, तथा लुप्ततद्धितेऽपि। व्यवहारस्तु लिङ्गवचनादिनिय-तोऽपि न लिङ्गवचनार्थकः किं तु साधुत्वार्थः। अत एव नियतस्त्रीलिङ्गबहु-वचनत्वेन अप्शब्दस्य तद्विशेषणपदस्य च, नियतपुंलिङ्गबहुवचनत्वेन दारशब्दस्य तद्विशेषणपदस्य व्यवहारः लिङ्गवचनस्वरूपमर्थं विशेष्ये विशेषणे वा न तु क्वापि बोधयति। यथा "आपो रसमय्यः, रामस्य दाराः पुण्यमयाः" इति विशेषण-

---

[१] सू. १.२.५१
[२] सू. १.२.५२
[३] सू. १.२.५३

विभक्तीनां साधुत्वार्थतया उपपत्तौ निरर्थकत्वे तदनुपपत्तिर्न भवतीति पदवाक्यरत्नाकरे प्राहुः।

युज्यते चायमर्थः। स्वरूपभेदाभावस्य तद्व्यक्तिस्वरूपस्य प्रथमार्थत्वे नीलेऽपि यत्किंचिन्नीलव्यक्तिभेदसत्त्वात् 'नीलो न नील' इति प्रयोगः स्यात्। न च तवापि तादृशाभेदसंसर्गावच्छिन्नप्रतियोगिताकभेदस्य नीले सत्त्वात् कथं न तथा प्रयोग इति वाच्यम्। नञ्स्थले अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यैव भेदे भानोपगमात् नीलत्वावच्छिन्नप्रतियोगिताकभेदस्य नीलेऽसत्त्वात्। भवतस्तु स्वरूपभेदाभावत्वस्य पदार्थतावच्छेदकतया तदवच्छिन्नप्रतियोगिताकभेदस्य नीले सत्त्वात् तथा प्रयोगो दुर्वार इति।

प्रथमाया अभिहितकारकवाचित्वमतम्

यत्तु तिङ्निपाताभिहितकारकः प्रथमार्थः। "चैत्रः पचति, तण्डुलः पच्यते, छेत्तुं सांप्रतं वृक्षः" इत्यादौ कर्तृत्वं कर्मत्वं च प्रथमयाप्यभिधीयते। अत एव प्रातिपदिकार्थविशेष्यकतिङर्थान्वयबोधे प्रातिपदिकस्य प्रथमान्ततानियमः। तेन ब्राह्मणस्य पक्तृत्वसंप्रदानत्वोभयविवक्षायां "पचति ब्राह्मणाय देही" इति न प्रयोगः। तिङा प्रथमया च कर्तृतात्वेनैका कर्तृता प्रतिपाद्यते, एकत्वत्वेन एकत्वसंख्येव।

एवं प्रातिपदिकार्थविशेष्यकतिङर्थप्रकारकान्वयबोधे तिङ्जन्याया इव सुब्जन्याया अपि उपस्थितेः सहकारित्वम्। अत एव "चैत्रः पच्यत" इति न प्रयोगः। न वा "पचति ब्राह्मणाय देहि" इत्यस्य शतृशानजापत्त्या वारणेऽपि "पक्ष्यति देवदत्ताय देहि" इत्यादिप्रयोगो दुर्वारः। चतुर्थ्यास्तिङर्थकारकानभिधायित्वात्।

न च "चैत्रः सुन्दर" इत्यादौ न कारकार्थोपपत्तिरिति वाच्यम्। तत्राप्यध्याहृतास्तिक्रियाकर्तृत्वस्य प्रथमया अभिधानात्। "अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽस्ति" इति कात्यायनस्मरणात्।

न च "रामो रावणस्य कल्की म्लेच्छस्य हन्ता" इत्यादौ कथं क्रियापदाध्याहारः, अस्तीत्यस्यान्वेतुमयोग्यत्वात् इति वाच्यम्। अत्र वाक्यभेदस्यावश्यकत्वे आसीदिति रामे भविष्यतीति कल्किन्यध्याहारसंभवात्। भवन्तीपर इत्यस्य उपलक्षणत्वात्।

न च भगवतो दशावताराः मत्स्यः कूर्मो वराहो नरसिंहो वामनो रामो बलभद्रो बुद्धः कल्की चेत्यादिविभागवाक्ये आसीत् अस्ति भविष्यतीत्येकतमस्याप्यध्याहारासंभवः, केषाञ्चिदवताराणामतीतत्वात् कस्यचित् विद्यमानत्वात् कस्यचित्

भावित्वादिति वाच्यम्। उद्देशवाक्यार्थे विभागवाक्यार्थस्यान्वयविवक्षणे सन्तीत्यध्याहारसंभवात्। विभागवाक्यार्थे उद्देश्यवाक्यार्थस्यान्वयविवक्षणे तु अस्ति सन्ति इत्येवाध्याहारसंभवात् तत्रैकवचनान्तबहुवचनान्तयोस्तिङन्तयोरुभयोरपि साधुत्वात्।

न चातीतानागतयोः अध्याहृततिङन्तार्थस्य वर्तमानसत्तायाः अन्वयः इति वाच्यम्। वर्तमानत्वाविवक्षायामपि धात्वर्थेऽर्थस्य संबन्धे विवक्षिते लट्प्रयोगस्य साधुत्वात्। "वारिदः सुखमाप्नोति सुखमक्षय्यमन्नदः" इत्यादिप्रयोगदर्शनात्।

न च "हंसीव धवला कीर्तिः" इत्यादौ धवलपदात् कीर्तिपदाच्च अध्याहृतास्तिपदार्थस्वरूपभवनकर्तृत्वार्थिका प्रथमोत्पद्यताम्, हंसीपदात् कथं सेति वाच्यम्। तत्रापि इवेतिनिपातार्थभवनकर्तृत्वार्थकतया प्रथमाया उपपत्तेः।

न चैवं निपातस्य कर्तृत्वार्थकत्वोपगमे करणत्वकर्मत्वार्थकत्वस्याप्युपगमः स्यात्। तथा च —

"शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव" इत्यादौ इवनिपातेन करणत्वकर्मत्वाभिधानात् तृतीयाद्वितीयानुपपत्तिरिति वाच्यम्। दर्शितस्थले इवनिपातस्य सादृश्यमात्रार्थकत्वात्। करणत्वकर्मत्वाद्यर्थकत्वे मानाभावात्। "उस्रै रसान्" इत्यादौ समानलिङ्गवचनत्वेन साधुत्वार्था तृतीया द्वितीया च। तेन "उस्रसदृशैः शरैः, रससदृशानुदीच्यान्" इति प्राथमिको बोधः। अत एवेवपदद्वयं संगच्छते। ततो रविकर्तृकोस्रकरणकरसकर्मकोद्धरणसदृशशरकरणकोदीच्यकर्मकोद्धरणकर्ता रघुरिति विशिष्टवाक्यार्थबोधः। तत्र द्वितीयातृतीयार्थयोः करणत्वकर्मत्वयोः धात्वर्थेनान्वयात् तृतीयाद्वितीययोः नानुपपत्तिरिति कालापैरुक्तम्।

तन्मतखण्डनम्

तदसत्। "घटो नास्ति" इत्यादौ घटात्यन्ताभावविषयकशाब्दबोधे प्रथमया कर्तृत्वाभिधानासंभवात्।

यदि च तत्र असधात्वर्थान्विततिङर्थात्यन्ताभावविशेष्यतया घटः प्रतीयते सत्ताश्रयत्वात्यन्ताभाववान् घट इति। तथापि प्रथमया कर्तृत्वाभिधानमसंभवि। प्रथमोक्तकर्तृत्वस्य नञर्थान्वयासंभवात्।

न च तिङ्प्रथमाभ्यामेकमेव कर्तृत्वमुपस्थाप्यते। तत् नञर्थे, स घटे विशेषणतयान्वेतीति प्रथमया कर्तृत्वाभिधानं निराबाधमिति वाच्यम्। प्रथमार्थप्रतियोगिकाभावस्य प्रातिपदिकार्थे प्रत्ययार्थप्रतियोगिकाभावान्वयस्याव्युत्पन्नत्वात्।

न च तत्राश्रयत्वस्वरूपकर्तृत्वाभाव एव तिङ्प्रथमयोरर्थः। तस्य घटेऽन्वयः। नञ्पदं तात्पर्यग्राहकम्। अत एव तिङर्थान्वयिनि प्रथमान्तार्थे तिङर्थसंख्यान्वयस्य व्युत्पन्नत्वात् घटौ घटा वा नास्तीति न प्रयोग इति वाच्यम्। तथा सति कर्तृत्वस्यैकदेशतया तत्र धात्वर्थानन्वयप्रसङ्गात्।

धात्वर्थान्वितकर्तृत्वाभावस्य तिङर्थत्वाभ्युपगमे "तण्डुलं पचति न" इत्यादौ धात्वर्थस्यैकदेशतया तत्र तण्डुलकर्मकत्वस्यानन्वयप्रसङ्गात्।

धात्वर्थान्विततिङर्थान्वयिनि तादृशतिङर्थान्वितनञर्थान्वयिनि च प्रथमान्तार्थे तिङर्थसंख्यान्वयस्य व्युत्पन्नत्वात् न "घटौ घटा वा नास्ति" इति प्रयोग इति।

वस्तुतस्तु कर्तृत्वस्य तिङर्थत्वमावश्यकमेव। "पचति" इत्यादौ प्रथमां विना तिङा प्रतीयमानत्वात्। प्रथमार्थत्वं तु न युज्यते। तिङं विना प्रथमया कुत्रापि अप्रतीयमानत्वात् अन्यलभ्यत्वाच्च।

"घटो न पट" इत्यादौ पटघटभेदान्वयबुद्धौ जायमानायां घटपदोत्तरप्रथमायाः कथमपि कर्तृत्वप्रत्यायकत्वं न संभवतीति न कर्तृत्वं प्रथमार्थः। "पचति" इत्यादौ तृतीयाया असाधुत्वात् षष्ठ्या असाधुत्वात् षष्ठ्यर्थस्याविवक्षणाद्वा द्वितीया-देरर्थस्यायोग्यत्वात् प्रयोगबाधे "न केवला प्रकृतिः प्रयोक्तव्या" इति साधुत्वार्थं प्रथमोपात्ता प्रथमा चैत्रादिपदानन्तरं प्रयुज्यते।

लिङ्गस्य प्रथमार्थत्वम्

एतावता प्रातिपदिकार्थस्य प्रथमाविभक्त्यर्थत्वमुक्तम्। अथ लिङ्गस्य प्रथमार्थत्वं निरूप्यते। लिङ्गं पुंस्त्वं स्त्रीत्वं क्लीबत्वं च। तत्र शोणिताधिकशुक्रसमवेतप्राणित्वं पुंस्त्वम्। शुक्राधिकशोणितसमवेतप्राणित्वं स्त्रीत्वम्। समशुक्रशोणितोभयसमवेत-प्राणित्वं क्लीबत्वम्। तथा च निरुक्तम् — "शुक्रातिरेके पुमान् भवति शोणि-तातिरेके स्त्री भवति द्वाभ्यां समेन षण्ढो भवति" इति। "चतुर्भुजो हलायुधः मकरध्वज" इत्यादौ पुंस्त्वम्, "अदितिः श्रीः धेनुः" इत्यादौ स्त्रीत्वम्, "मार्दङ्गिकं कुण्डलि गायनं बृहन्नलम्" इत्यादौ क्लीबत्वं प्रथमाभिधत्त इति लिङ्गं प्रथमार्थो-ऽनन्यलभ्यत्वात्। घटादिशब्दे तु पुंस्त्ववाचकसुप्प्रकृतित्वं पुंस्त्वमौपचारिकम्।

एवं "तटी" इत्यादौ तटशब्दे ईत्वेन स्त्रीत्ववाचकङीप्प्रत्ययस्य प्रकृतित्वं स्त्रीत्वम्। "भुज" इत्यादौ भुजशब्दे आत्वेन स्त्रीत्ववाचकस्य टाप्प्रत्ययस्य प्रकृतित्वं स्त्रीत्वम्। "दधि" इत्यादौ दधिशब्दे नपुंसकत्ववाचकस्य लोपस्मारित-सुपः प्रकृतित्वं नपुंसकत्वम्। "कुण्डम्" इत्यादौ कुण्डशब्दे नपुंसकत्ववाचकस्य अम्स्मारितसुपः प्रकृतित्वं नपुंसकत्वं सर्वत्र शब्देष्वौपचारिकमिति।

परिमाणस्य प्रथमार्थत्वम्[१]

परिमाणं गुरुत्वं परिमितिश्च। "द्रोणो व्रीहिः" इत्यादौ गुरुत्वविशेषवाचिनो द्रोणशब्दात् प्रथमा गुरुत्वमभिधत्ते। प्रथमार्थे गुरुत्वे द्रोणपदार्थस्याभेदेनान्वयः। तादृशगुरुत्वं व्रीहावन्वेति। एवं च द्रोणाभिन्नगुरुत्ववान् व्रीहिरिति वाक्यार्थबोधः।

"वितस्तिः शङ्कुः" इत्यादौ द्वादशाङ्गुलपरिमाणवाचिनो वितस्तिशब्दात् प्रथमा परिमाणमभिधत्ते। प्रथमार्थपरिमाणे वितस्तिशब्दार्थस्याभेदेन अन्वयः। तादृशपरिमाणस्य शङ्कावन्वयः। एवं च वितस्त्यभिन्नपरिमाणवान् शङ्कुः इति बोधः। अनन्यलभ्यत्वात् गुरुत्वत्वेन गुरुत्वं परिमाणत्वेन परिमाणं च प्रथमार्थः।

अत्र गुरुत्वविशेषविशिष्टवाचिनो द्रोणशब्दस्यार्थः व्रीहौ, परिमाणविशेषविशिष्टवाचिनो वितस्तिशब्दस्यार्थः शङ्कौ तादात्म्येनान्वेति। तावतैव व्रीहौ गुरुत्वविशेषवैशिष्ट्यस्य शङ्कौ परिमाणविशेषवैशिष्ट्यस्य चावगमसंभवात् गुरुत्वत्वेन गुरुत्वस्य परिमाणत्वेन परिमाणस्य च भानमप्रमाणिकमेवेति गुरुत्वं परिमाणं च न प्रथमार्थ इति पदवाक्यरत्नाकरे गुरुचरणाः।

युज्यते चैतत्। तथा हि — यदि परिमाणं प्रथमार्थः, तस्य प्रकृत्यर्थविशेषितस्य प्रातिपदिकान्तरार्थेऽन्वयः तदा "राज्ञः पुरुष" इत्यादाविव "द्रोणो व्रीहिः" इत्यादौ समानविभक्तिकतानियमो न स्यात्। तथा च "द्रोणो व्रीहिः व्रीहिणा व्रीहेः व्रीहौ वा" इत्यादिप्रयोगः स्यात्। यदि च "द्रोणो व्रीहिः वितस्तिः शङ्कुः" इत्यादौ गुरुत्वत्वेन गुरुत्वं परिमाणत्वेन परिमाणं प्रतीयत एव तदा गुरुत्वं परिमाणं च प्रथमार्थ एव, अनन्यलभ्यत्वात्। यदि च प्रकृत्यर्थविशेषितयोः तयोः प्रथमार्थयोः समानविभक्तिकपदान्तरार्थ एवान्वयः तदा तादात्म्यान्वय इव गुरुत्वपरिमाणान्वयेऽपि समानविभक्तिकत्वं तन्त्रमित्यभ्युपेयमिति।

संख्यायाः प्रथमार्थत्वम्[२]

वचनम् एकत्वं द्वित्वं बहुत्वं च। तत्रैकत्वं क्वचित् प्रकृत्यर्थतावच्छेदकव्यापकसंसर्गेण प्रकृत्यर्थेऽन्वेति। यथा "परमेश्वर" इत्यादौ समग्रैश्वर्यरूपप्रकृत्यर्थतावच्छेदकव्यापकसमवायेन एकत्वं परमेश्वरेऽन्वेति। क्वचित् पदान्तरार्थव्यक्तिविशेषघटितेन प्रकृत्यर्थतावच्छेदकव्यापकेन संसर्गेण प्रकृत्यर्थेऽन्वेति। यथा "पशुना रुद्रं यजत" इत्यादौ तद्यागव्यक्तिकर्मपशुत्वव्यापकसमवायेन एकत्वं पशावन्वेति। ईदृशसंसर्गेणैकत्ववैशिष्ट्यमेव सजातीयद्वितीयराहित्यं ज्ञापयति।

---

[१] पृ. ४५
[२] पृ. ४६

एवं द्वित्वमपि आश्विनेयौ इत्यादावश्विनीपुत्रत्वरूपप्रकृत्यर्थतावच्छेदकव्यापक-संसर्गेण द्वित्वमाश्विनेययोरन्वेति। "सारस्वतौ मेषौ भवतः" इत्यादौ मेषकर्तृक-भावनाक्षिप्तायां यागभावनायां यस्यां सरस्वतीदेवताकयोर्मेषयोः कर्मतयान्वयः तद्भावनाकर्ममेषनिष्ठभेदप्रतियोगितानवच्छेदकपर्याप्तिसंसर्गेण द्वित्वं मेषयोरन्वेति। ईदृशसंसर्गेण द्वित्ववैशिष्ट्यमेव सजातीयतृतीयराहित्यं ज्ञापयति।

इत्थं संसर्गवैचित्र्येण एकत्वद्वित्वयोरन्वयसंभवेन नाव्यावर्तकत्वम्, न वा द्विपशुको रुद्रयागः, न च त्रिमेषकः सरस्वतीयागः। यागस्वर्गयोर्हेतुहेतुमद्भावे एकत्वद्वित्वयोः यागे कर्मतायां वा वैशिष्ट्यं प्रवेशनीयम्।

बहुत्वं तु नेदृशसंसर्गेणान्वेति। सजातीयराहित्यस्य ज्ञापयितुमशक्यत्वात्। बहुत्वस्य सकलसंख्याव्यापकत्वात्। "कपिञ्जलानालभेत" इत्यादौ बहुत्वेन त्रित्वस्य बोधः तात्पर्येणैव। संसर्गवैचित्र्येण त्रित्वबोधनासंभावात्। एवं यत्र प्रकृत्यर्थतावच्छेदकमेकं तत्र प्रकृत्यर्थतावच्छेदकव्याप्यसंसर्गेण द्वित्वबहुत्वयो-रन्वयः। तेन घटाकाशयोः द्वित्वस्य घटपटाकाशानां बहुत्वस्य च गगने सत्त्वात् आकाशौ आकाशा इति न प्रयोगः।

यत्र प्रकृत्यर्थतावच्छेदकं नाना "धवखदिरौ" इत्यादौ, तत्र द्वन्द्वस्थले व्युत्पत्तिवैचित्र्येण धवत्वखदिरत्वनिष्ठभेदप्रतियोगितानवच्छेदकपर्याप्त्या द्वित्वं तयोः प्रकृत्यर्थतावच्छेदकयोरन्वेति। तादृशपर्याप्त्या स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्व-संबन्धेन प्रकृत्यर्थयोर्वा अन्वेति। एवं बहुत्वमपि "धवखदिरपलाशा" इत्यादौ प्रकृत्यर्थतावच्छेदकेषु प्रकृत्यर्थेषु वा दर्शितरीत्या अन्वेति।

एवं "वामे बहून् कुशान् कृत्वा दक्षिणे तु कुशात्रयम्" इत्यादौ तात्पर्यविशेषेण बहुशब्दार्थतावच्छेदके त्रित्वे तात्पर्यविशेषेण बहुवचनार्थत्रित्वस्यान्वयः, किं वा वचनार्थबहुत्वात्मकत्रित्वविशिष्टेषु बहुशब्दार्थत्रित्वविशिष्टस्य तादात्म्येन निरा-काङ्क्षत्वमिति। बहुशब्दप्रयोगसार्थक्याय कुशविशेषणत्रित्वे तथान्वयविशेषे योग्यताया इव निराकाङ्क्षताया अपि विशेषणान्वयप्रयोजकत्वात्। एवं च वामे नवकुशधारणं सांप्रदायिकं युज्यते विशिष्टानामिति।

एवं "यदादिशन्ति पूज्यपादाः" इत्यादौ पादविशेषणपूजायामनिर्धारितविशेषस्य बहुत्वस्य विवक्षितस्य बहुवचनार्थस्य "सविशेषणे हि विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसंक्रामतः" इति न्यायात् अन्वयः।

एवं "गोदौ ग्राम" इत्यादौ द्वित्वस्य गोदयोः निवासग्रामविशेषणीभूतयोरन्वयः निराबाध एव। गोदशब्दोऽपि नासत्यशब्दवत् नित्यद्विवचनान्तोऽपि न द्वित्व-विशिष्टवाचकः, येन निराकाङ्क्षतया अनन्वयः प्रसज्येत।

ननु गगनपदस्य शब्दविशिष्टवाचकतया गगनपदार्थैकदेशे शब्दे बहुत्वान्वय-विवक्षायां गगनानि इति प्रयोगः स्यात्। एकदेशेऽन्वयानभ्युपगमे पूज्यपादा इत्यत्र पूजायां बहुत्वान्वयो न स्यात्।

एवं "वेदाः प्रमाणम्" इत्यत्र प्रमाणत्वे एकत्वान्वयो न स्यादिति चेत् — व्युत्पत्तिवैचित्र्येणान्वयोपगमेन समीहितसिद्धौ नैकदेशान्वयोऽङ्गीक्रियते।

पूज्यपादा इत्यत्र पूजाविशिष्टपादे बहुत्वान्वयः पादे बाधात् पूजायां पर्यवस्यति, शिखी विनष्ट इत्यादिवत्। एवं प्रमाणमित्यत्र प्रमाविशिष्टल्युडर्थकरणे एकत्वान्वयः करणे बाधात् प्रमायां पर्यवस्यति। तत्रापि स्वाश्रयशब्दत्ववत्त्वसंबन्धेन प्रमाया-मन्वेति। "सविशेषणे हि" इति न्यायात्। तदेव विशेषणं यत् सामान्यधर्मवतः व्यावर्तयति यथा घटे नीलादिः नीलान्यघटात् स्वाश्रयघटं व्यावर्तयति। शब्दस्तु नेदृशं विशेषणं, येन गगनानि इति प्रयोगः स्यात्। पूजा प्रमा चेदृशमेव विशेषणमिति। "सविशेषणे हि" इति न्यायस्य विशेष्ये योग्यताया इव आकाङ्क्षाया अपि बाधः प्रापक एव। सति विशेष्यबाधे इत्यस्य विशेष्या-न्वयाभावे सतीत्यर्थः।

एवं "वामे बहून् कुशान्" इत्यत्र बहुत्वविशिष्टकुशे बहुशब्दार्थस्य बहुत्व-विशिष्टस्य तादात्म्येनान्वयो निराकाङ्क्ष इति कुशविशेषणबहुत्वे अन्वयः पर्यव-स्यति। बहुशब्दोत्तरबहुवचनं साधुत्वार्थमेव। कुशशब्दोत्तरबहुवचनाच्च त्रित्वो-पस्थितिः तात्पर्यविशेषेणैव।

क्वचिदेकत्वस्याप्येवंरीत्या अन्वयः। यथा "वेदाः प्रमाणम्" इत्यादौ प्रकृत्यर्थ-तावच्छेदकप्रमाणत्वे तद्द्वारा प्रमाणे वा एकत्वस्यान्वयः। यत्र तु "विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः" इति कोशेनानुशिष्टस्य एकवचनस्यार्थः एकत्वं विंशतित्वादिसंख्यायामन्वेति। यथा "विंशतिः ब्राह्मणाः, शतं धार्तराष्ट्राः, सहस्रं भानोः कराः" इत्यादौ। विंशतित्वादौ बहुत्वान्वयविवक्षायां तु बहुवचनमपि प्रमाणम्। यथा — "असंख्याताःसहस्राणि ये रुद्रा अधिभूम्याम्" इति श्रुतौ, "तिस्रः कोट्योऽर्धकोटी च तीर्थानां वायुरब्रवीत्" इति पुराणे,

> किमेकयैव विंशत्या बाहुभिस्त्वं विकत्थसे।
> पश्य रावण नाराचैश्छिन्नान्मि कति विंशतीः।।

इत्यादौ लोके च तथा प्रयोगदर्शनात्।

"ते शतानि वयं पञ्च" इत्यत्र बहुवचनान्ततच्छब्दविशेषणात् संख्येयवाचिनः शतशब्दात् बहुवचनं बहुवचनान्तास्मच्छब्दविशेषणात् पञ्चशब्दात् बहुवचनं तु साधुत्वार्थमेव।

एवं "दश शतान्यम्भोजसंवर्तिका" इत्यादौ संख्येयवाचिनो दशशब्दस्यार्थः संख्येयवाचिशतशब्दार्थे तादात्म्येनान्वेति। शिखी विनष्ट इत्यादाविव "सविशेषणे हि" इति न्यायेन शतत्वसंख्यामादाय पर्यवसानम्। शतत्वे दशत्वविशिष्टतादात्म्यावगमे सति सहस्रत्वसंख्यालाभः।

जातिगतैकत्वविवक्षायामेकवचनं बहुवचनं च प्रमाणम्। "जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्" इत्यनुशासनात्। जातिरूपे एकस्मिन्नर्थे बहुवचनमेकवचनं च स्यादिति सूत्रार्थः। यथा "संपन्नो व्रीहिः संपन्ना व्रीहय" इत्यादौ व्रीहित्वजातावेकत्वम् एकवचनबहुवचनाभ्यां प्रत्याय्यते। तत्राप्येकजातिर्विवक्षिता। तत्रैवेयं वचनव्यवस्था। एकजातिविवक्षणात् "संपन्नौ व्रीहियवौ" इत्यादौ नैकवचनबहुवचने। "एको व्रीहिः" इत्यादौ न बहुवचनम्। "संख्यायोगे प्रतिषेधो वक्तव्यः" इति वार्तिकेन निषेधात्।

एवं "ब्राह्मणेन हतः पतति" इत्यादौ ब्राह्मणत्वजातावेकत्वमन्वेति। ब्रह्मणत्वरूपैकजातिमतः सामान्येन हननान्वयविवक्षणात् ब्राह्मणसामान्यकर्तृकहननस्यैव पातित्यप्रयोजकत्वं न तु ब्राह्मणविशेषकर्तृकस्य।

एवं "ग्रहं संमार्ष्टि" इत्यादौ ग्रहत्व एवैकत्वमन्वेति, ग्रहसामान्यकर्मत्वस्यैव संसर्गेऽन्वयात्, न तु ग्रहविशेषकर्मत्वस्येति।

"अस्मदो द्वयोश्च"[१] इत्यनुशासनेन 'अहं ब्रवीमि, आवां ब्रूवः' इत्यर्थेऽन्यतरस्यां 'वयं ब्रूमः' इति बहुवचनम्। अस्मदर्थान्वितमेकत्वं द्वित्वं चाभिधत्ते। "सविशेषणस्य प्रतिषेधो वक्तव्यः" इति वार्तिकेन विशेषणयोगे बहुवचनस्य निषेधः यथा "देवदत्तोऽहं ब्रवीमि" इत्यादौ।

"युष्मदि गुरावेकेषाम्" इत्यनुशासनेन 'त्वं गुरुः आवां गुरू' इत्यर्थेऽन्यतरस्यां बहुवचनम्। 'यूयं गुरवः' इत्यादौ युष्मदर्थान्वितमेकत्वं द्वित्वं चाभिधत्ते।

"फल्गुनीप्रोष्ठपदानां च नक्षत्रे"[२] इत्यनुशासनेन फल्गुनीप्रोष्ठपदाभ्यां शब्दाभ्यामुत्तरम् अन्यतरस्यां बहुवचनं फल्गुनीनक्षत्रगतं प्रोष्ठपदानक्षत्रगतं च द्वित्वमभिधत्ते। नक्षत्रग्रहेण "फल्गुन्यो माणविके" इत्यादौ न बहुवचनम्।

---

[१] सू. १.२.५९

[२] सू. १.२.६०

"छन्दसि पुनर्वस्वोरेकवचनम्"[१] इत्यनुशासनेन "विशाखयोश्च"[२] इत्यनुशासनेन च पुनर्वसुशब्दात् विशाखाशब्दाच्चोत्तरमन्यतरस्यामेकवचनं पुनर्वसुनक्षत्रगतं विशाखानक्षत्रगतं च द्वित्वमभिधत्ते छन्दसि यथा "पुनर्वसुर्नक्षत्रमदितिर्देवता, पुनर्वसू नक्षत्रमदितिर्देवता", यथा वा "विशाखा नक्षत्रमिन्द्राग्नी देवता, विशाखे नक्षत्रमिन्द्राग्नी देवता" इति। लोके तु पुनर्वसुविशाखाशब्दौ नित्यद्विवचनान्तौ नासत्यशब्दवत्।

"तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्"[३] इत्यनुशासनेन तिष्यश्च पुनर्वसू चेति विग्रहसमानार्थकात् तिष्यपुनर्वसू इति द्वन्द्वात् उत्तरं द्विवचनं तिष्ये पुनर्वस्वोश्च वर्तमानं बहुत्वमभिधत्ते। फल्गुनीसूत्रात् नक्षत्रग्रहणेऽनुवर्तमानेऽस्मिन् सूत्रे पुनर्नक्षत्रग्रहणं पर्यायेणापि द्वन्द्वं सूचयति। तेन तिष्यपुनर्वसू सिध्यपुनर्वसू इत्यादिद्वन्द्वेऽपि द्विवचनं, तथा नित्यग्रहणं बहुवचनं निषेधति। बहुवचनस्य इति विशेषोपादानं तिष्यपुनर्वस्विति क्लीबैकवचनान्तद्वन्द्वं सूचयति, ज्ञापयति च सर्वो द्वन्द्वो विभाषा एकवद्भवतीति। क्लीबैकवचनान्तज्ञापनेन क्लीबद्विवचनान्तद्वन्द्वस्य निषेधोऽवगम्यते। तेन तिष्यपुनर्वसुनी इति न द्वन्द्वः।

"जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्"[४] इत्यादि "तिष्यपुनर्वस्वोः०"[५] इत्यन्तसूत्राणां तात्पर्यार्थाः काशिकासंमताः प्रदर्शिताः।

एवं तिङर्थानामेकत्वादीनां प्रथमान्तार्थेऽन्वयः। भावाख्यातस्थले तिङर्थभावनाया विरहात् तदन्वयिप्रथमान्तार्थासंभवात् न तिङर्थसंख्यान्वयसंभव इति 'चैत्रेण स्थीयत' इति साधुत्वार्थमेकवचनं भावाख्यातस्थले, न तु द्विवचनबहुवचने।

फणिभाष्यकृतस्तु उष्ट्रासिका आस्यन्ते हतशायिकाः शय्यन्ते इति भावाख्यातबहुवचनं दर्शयन्ति स्म। तेषामयमाशयः — भावाख्यातस्थले एकत्वादिसंख्या धात्वर्थेऽन्वेति। न च "पच्यते चैत्रेण" इत्यादौ धात्वर्थव्यापाराणां बहुत्वात् कथमेकत्वान्वय इति वाच्यम्। व्यापाराणां बहुत्वेऽपि पूर्वापरीभूतानां तेषामेकबुद्धिविषयतया ऐक्यसंभवात्। बुद्धिगतस्यैकत्वस्य स्वाश्रयविषयत्वसंबन्धेन व्यापारेष्वन्वयसंभवात्। तदुक्तम् —

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते।।

---

[१] सू. १.२.६१
[२] सू. १.२.६२
[३] सू. १.२.६३
[४] सू. १.२.५८
[५] सू. १.२.६३

इति। "पूर्वापरीभूतं भावमाख्यातमाचष्टे। यथा पचति व्रजतीत्यापवर्गपर्यन्तम्" इति निरुक्तमप्यमुमर्थं संवदति।

न चैकबुद्धिविषयतया व्यापाराणामैक्ये भावाख्याते कथं द्विवचनबहुवचनोपपत्तिरिति वाच्यम्। तादृशव्यापाराणां पुनः संभवे बुद्ध्यन्तरविषयतया तथा द्वित्वान्वयसंभवात् द्विवचनस्य, पुनःपुनः संभवे पुनः बुद्ध्यन्तरविषयतया तथा बहुत्वान्वयसंभवात् बहुवचनस्य चोपपत्तेः।

एवम् 'आस्यन्त' इत्यादौ उपवेशनव्यापाराणां मुहुरन्तरा उत्थाने त्रिचतुःकृत्वो जातानां बहुतया बहुवचनोपपत्तिः।

इत्थं चोपवेशनक्रियाविशेषणस्य उष्ट्रासिकाशब्दस्य, शयनक्रियाविशेषणस्य हतशायिकाशब्दस्य बहुवचनान्तत्वम्। बहुत्वविशिष्टव्यापारे बहुत्वान्यसंख्याविशिष्टस्य तादात्म्येनान्वयायोगात् समानवचनत्वं तन्त्रम्। उष्ट्रासनसदृश उष्ट्रासिकार्थः। हतशयनसदृशो हतशायिकार्थ इति उष्ट्रासनसदृशानि वर्तमानासनानि हतशयनसदृशानि वर्तमानशयनानीति वाक्यार्थबोधः।

नन्वेवं धात्वर्थे संख्यान्वयोपगमे लिङ्गसंख्यान्वयायोग्यत्वरूपमसत्त्वं व्याहन्येत। तत्रापि लिङ्गान्वयायोग्यत्वस्य घटपटादिप्रातिपदिकादिसाधारणतया संख्यान्वयायोग्यत्वस्यैवासत्त्वशब्दार्थत्वादिति चेत् — साक्षात् संख्यान्वयायोग्यत्वमसत्त्वं धात्वर्थस्य बुद्धिद्वारा संख्यान्वयित्वेऽपि निरुक्तासत्त्वमव्याहतमेव।

न चैवं "वेदाः प्रमाणम्" इत्यादौ संख्यायाः प्रमितिकरणे साक्षादनन्वयात् असत्त्वं स्यादिति वाच्यम्। प्रमाणानीत्यादौ प्रमाणे साक्षात् संख्यान्वयात् अयोग्यताया विरहात्। अयोग्यतापर्यन्तधावनेन क्वचित् संख्याया अनन्वयेऽपि नासत्त्वम्।

यद्वा प्रातिपदिकार्थत्वं सत्त्वं तदभावोऽसत्त्वम्। तच्च धात्वर्थे निराबाधमेव। अत एव "प्रातिपदिकार्थः सत्ता" इति काशिकावृत्तिः। प्रातिपदिकार्थ इति भावप्रधानो निर्देशः। तेन प्रातिपदिकप्रतिपाद्यता सत्तेत्यवगम्यते। प्रातिपदिकार्थोदाहरणम् उच्चैः नीचैः इत्यपि तत्र वृत्तौ दृश्यते। अन्यथा लिङ्गसंख्यान्वययोग्यत्वरूपसत्त्वस्य अव्ययस्थले उदाहरणमलग्नं स्यादिति। तथा च सूत्रे प्रातिपदिकार्थोक्तिः यत्र लिङ्गाद्यन्वययोग्यो नार्थः तत्रापि साधुत्वार्थं प्रातिपदिकसंज्ञाबलात् प्रथमा भवतीति ज्ञापनार्थम्।

एवं सु औ जस् इत्यत्र उकारजकारावनुबन्धौ न वाचकताकुक्षिप्रविष्टौ। 'श्रीकृष्णस्त्राता' इत्यत्र श्रूयमाणस्य 'कृष्णः पालयिता' इत्यादौ विसर्गभावं

प्राप्तस्यापि सकारस्य रुत्वेन रूपेण पुंस्त्वैकत्ववाचकत्वम्। "सारस्वतौ मेषौ भवत" इत्यादौ श्रूयमाणस्य 'अवी' इत्यादौ दीर्घेकारभावं प्राप्तस्याप्यौकारस्य औत्वेन औटः साधारणेन रूपेण पुंस्त्वद्वित्ववाचकत्वम्। एवं 'सुमनसस्त्रिदिवे' इत्यादौ श्रूयमाणस्य, 'सुमनसो नाके' इत्यादावोकारभावं प्राप्तस्यापि असः अस्त्वेन शस् साधारणेन रूपेण पुंस्त्वबहुत्ववाचकत्वम्, लिङ्गवाचकता तु असः जस्शस्ङसिङस्साधारणेनास्त्वेन रूपेण बोध्या।

एवं सुबन्तस्यापि लिङ्गसंख्यावाचकतावच्छेदकं साधारणं रूपं सुधीभिरूह्यमिति द्वितीयादीनां लिङ्गसंख्यार्थकत्वम्, सूत्रे मात्रग्रहणं प्रथमायां कर्मत्वाद्यर्थकत्वव्यवच्छेदमुखेन प्रथमार्थस्य सर्वसुबर्थत्वं ज्ञापयत् सूचयति।

इति संबोधनेतरप्रथमार्थनिर्णयः

प्रथमाविभक्त्यर्थविषये मीमांसकमतम्

भाट्टरहस्ये खण्डदेवभट्टाचार्याः एवं निरूपयन्ति — लिङ्गं संख्या संबोध्यत्वं प्रातिपदिकार्थश्च प्रथमाविभक्त्यर्थः। तत्र लिङ्गसंख्यातिरिक्तस्य सुबर्थस्य प्रकारतया भावनायामन्वयः। संबोध्यत्वविचारः पृथक् प्रस्तोष्यते। संबोधनार्थकप्रथमायाः संबोधनार्थकत्ववत् तदतिरिक्तप्रथमाया अपि प्रातिपदिकार्थवाचकत्वमस्ति। तथा हि — "प्रातिपदिकार्थलिङ्गसंख्यापरिमाणवचनमात्रे प्रथमा"[१] इति सूत्रम्। इदं हि लिङ्गादीनां प्रथमाशक्यत्वमिव प्रातिपदिकार्थस्यापि प्रथमाशक्यत्वमनुशास्ति। न तु तत् सूत्रं प्रातिपदिकार्थे प्रातिपदिकेन विवक्षिते प्रथमायाः साधुत्वम् इत्येवंपरम्। सूत्रवैयर्थ्यापत्तेः, लिङ्गाद्यंशे शक्तिग्राहकत्वं प्रातिपदिकार्थांशे प्रथमायाः साधुत्वार्थत्वमिति वैरूप्यापत्तेश्च। अतः "चैत्र" इत्यादौ प्रातिपदिकार्थश्चैत्रादिरेव प्रथमार्थः। न च प्रातिपदिकार्थस्य प्रातिपदिकेनैव बोधसिद्धेः प्रथमायास्तदंशे साधुत्वार्थतेति वाच्यम्। प्रथमायाः प्रातिपदिकार्थत्वेन संमतार्थवाचकत्वमङ्गीकृत्य प्रातिपदिकस्य तत्तात्पर्यग्राहकत्वाङ्गीकारात्। अन्यथा द्वितीयाद्यर्थस्य धात्वर्थेऽन्वयाङ्गीकारेण तदनुसारेण कल्पनीये सुबर्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति धात्वादिजन्योपस्थितिः कारणमित्येवंविधे कार्यकारणभावे सुपि प्रथमातिरिक्तत्वस्य निवेशे गौरवात्। अपि च प्रथमायाः अर्थाभावे प्रातिपदिकार्थस्य धात्वर्थेऽन्वयो वाच्यः। तथा च प्रत्यार्थेऽन्वयो नास्तीति वाच्यम्। तथा सति द्वितीयाद्यन्तस्थले प्रकृत्यर्थस्य द्वितीयादिप्रत्ययार्थे कर्मत्वादावन्वयेन तदनुरोधेन कल्प्ये कार्यकारणभावे प्रकृत्यर्थ-

[१] सू. २.३.४६

निष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबुद्धिं प्रति विशेष्यतासंबन्धेन प्रत्ययजन्योपस्थितिः कारणमित्येवंरूपे प्रकृतौ प्रथमान्तप्रातिपदिकातिरिक्तत्वं निवेश्यमिति गौरवम्।

अतो लाघवात् इतरसुबर्थवत् सुबर्थत्वेन हेतुना प्रथमार्थस्य चैत्रादेरपि आख्यातार्थभावनायामेव प्रकारता।

अत एव यत्र प्रकृतिप्रत्ययार्थौ अभिन्नौ तादृशस्थले चैत्रादेर्न प्रथमार्थचैत्रादावभेदेनान्वयः अव्युत्पन्नत्वात्। नापि भेदसंबन्धेनान्वयः, बाधितत्वात्। अतः प्रातिपदिकं प्रथमार्थविशेषचैत्रादितात्पर्यग्राहकम्। प्रथमोपस्थितः चैत्रादिरेव आख्यातार्थभावनान्वयी।

न च "नीलो घट" इत्यादावाख्याताभावस्थले प्रथमार्थस्यानन्वयापत्तिरिति वाच्यम्। "काष्ठैरोदनम्" इत्यादौ पचतीति क्रियापदाध्याहारवत् "नीलो घट" इत्यादौ अस्तीत्यध्याहारेण तदाख्यातार्थे प्रथमार्थान्वयात्। "अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति कात्यायनवचनात्"। नीलपदं तात्पर्यग्राहकम्। तदुत्तरप्रथमायाः नीलगुणविशिष्टद्रव्यमर्थः। तस्य न घटपदार्थेऽभेदेनान्वयः। अपि तु आख्यातार्थभावनायामाश्रयत्वरूपायाम्। नीलद्रव्यनिष्ठा घटनिष्ठा च सत्ताश्रयतेति बोधः। तदुत्तरं नीलद्रव्यघटयोरभेदान्वयबोधः मानसः।

यत्तु "स्तोकं पचति" इत्यादौ नामार्थस्य स्तोकस्य पाकेऽभेदान्वयार्थं अभेदसंबन्धेन निरर्थकसुप्समभिव्याहृतनामार्थप्रकारकशाब्दत्वावच्छिन्नं प्रति निरुक्त नामसमभिव्याहृतपदजन्योपस्थितिः कारणमिति कार्यकारणभावस्यावश्यकत्वात् तेनैव "चैत्रः पचति" इत्यादौ प्रातिपदिकार्थस्य चैत्रादेः योग्यतामनुसृत्य कर्त्रादावभेदेनान्वयोपपत्तिरिति।

तन्न। चैत्रपदोत्तरप्रथमायाः निरर्थकत्वस्य पाणिन्यादिविरुद्धत्वात्। स्तोकमित्यत्र स्तोकप्रातिपदिकार्थः स्तोकत्वम्, द्वितीयार्थः लक्षणया आश्रयत्वम्। तस्य च साक्षात् (आश्रयत्वसंबन्धेन) धात्वर्थ पाकादौ परंपरया (स्वाश्रयानुकूलत्वसंबन्धेन) आख्यातार्थभावनायां वा अन्वयान्न निरर्थकसुप्त्वमिति पूर्वोक्तकार्यकारणभावकल्पनायाः असिद्धेश्च। तथा च स्तोकत्वनिरूपिताश्रयतावान् पाक इति वा स्तोकत्वनिरूपिताश्रयतावत्पाकानुकूला कृतिरिति वा बोधः।

यस्य मते स्तोकत्वविशिष्टं प्रातिपदिकार्थः तस्य मतेऽपि अभेदो लक्षणया द्वितीयार्थः। स च स्तोकप्रतियोगिकान्योन्याभावरूपः। अभेदो हि भेदाभावः, भेदे च स्तोकपदार्थस्य प्रतियोगितासंबन्धेनान्वय इति स्तोकप्रतियोगिकान्योन्याभाव-

लाभः। स च स्तोकत्वरूपः। भेदाभावस्य भेदप्रतियोगितावच्छेदकधर्मरूपत्वात्। तस्य आश्रयत्वरूपभेदसंबन्धेन पाकादावन्वयः। 'द्रव्यं पटः' इति वाक्यात् द्रव्यत्वावच्छिन्नवृत्तिद्रव्यत्ववान् पट इति बोधवत् 'स्तोकं पचति' इत्यतः स्तोकत्वावच्छिन्नवृत्तिस्तोकत्ववान् पाकादिरिति शाब्दबोध इति, क्वापि न नामार्थस्य अभेदसंबन्धेनान्वयः, क्वापि च न द्वितीयायाः निरर्थकत्वम्।

न च लक्षणादोषभिया व्युत्पत्त्यन्तरकल्पनं द्वितीयायाः निरर्थकत्वकल्पनं च न दोष इति वाच्यम्। तथात्वे "चैत्रो जानाति" इत्यादावाख्यातस्य आश्रयत्वे लक्षणायाः शिरोमणिसंमतायाः अनुपपत्तेः। तत्रापि कृत्यविषयीभूतज्ञानाद्यर्थकधात्वर्थस्य आश्रयत्वसंबन्धेन नामार्थे प्रकारतयान्वयसंभवात्, तदर्थं व्युत्पत्त्यन्तरकल्पनसंभवाच्च। व्युत्पत्त्यन्तरं च कृत्यविषयीभूतार्थकधात्वर्थनिष्ठभेदसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधं प्रति विशेष्यतासंबन्धेन नामजन्योपस्थितिः कारणमित्येवंरूपः कार्यकारणभावः। किं च लक्षणा न दोषः, फलमुखत्वात्। — इति पाणिनिमतेन प्रथमार्थनिष्कर्षः।

कात्यायनमतेन प्रथमार्थः

कात्यायनस्तु — न प्रातिपदिकार्थे प्रथमा। तथात्वे प्रातिपदिकस्य तात्पर्यग्राहकत्वमात्रकल्पनया शाब्दबोधजनकत्वानापत्तेः। अपि तु आख्याताभिहितं कारकत्वमेव प्रथमार्थः। तथा च "चैत्रः पचति" इत्यत्र चैत्रपदोत्तरप्रथमायाः कर्तृत्वमर्थः। तत्र प्रातिपदिकार्थस्य चैत्रस्य आधेयतासंबन्धेनान्वयः। कर्तृत्वस्य स्वनिरूपकत्वसंबन्धेन धात्वर्थक्रियायां, स्वनिरूपकधात्वर्थक्रियानुकूलत्वसंबन्धेन आख्यातार्थभावनायां वा अन्वयः। प्रथमार्थसंख्याया अपि तदर्थकर्तृत्वे सामानाधिकरण्यसंबन्धेनान्वयः, द्वितीयाद्यर्थसंख्यायाः तदर्थकर्मत्वादाविव। "तण्डुलः पच्यत" इत्यादौ आख्याताभिहितं कर्मत्वं प्रथमार्थः। अन्वयः पूर्ववत्।

न च आख्याताभिहितकर्तृत्वस्य भावनायामन्वितत्वात् पुनः प्रथमार्थस्य तत्रान्वयबोधस्य वैयर्थ्यमिति वाच्यम्। आख्यातेन कर्तृत्वत्वरूपसामान्यधर्मेण कर्तृत्वबोधेऽपि चैत्रवृत्तित्वेन रूपेण तदबोधात्, तथा बोधाय पुनः प्रथमार्थबोधेन वैयर्थ्याभावात्।

न च प्रथमान्तात् चैत्रवृत्तित्वेन कर्तृत्वबोधे जाते पुनराख्यातात् सामान्यरूपेण कर्तृत्वबोधो निरर्थक इति वाच्यम्। तस्य बोधस्य प्रथमोत्पत्तिप्रयोजकत्वात्। आख्यातेन कर्तृत्वाद्यभिधानस्यैव प्रथमाविभक्तिप्रयोजकत्वात्। न हि कृत्याद्यभिधानमात्रं तत्प्रयोजकम्। "चैत्रेण सुप्यत" इत्यादौ भावाख्यातेऽपि स्वापः क्रियते

इति कृञा विवरणेन कृत्यभिधानेन चैत्रपदोत्तरं प्रथमोत्पत्त्यापत्तेः। अतः कर्तृत्वाद्यभिधानमेव प्रथमाप्रयोजकम्। तच्च शक्त्या लक्षणया वेत्यन्यदेतत्। तस्मादभिहितकारकत्वं प्रथमार्थः। "अभिहितकारकवाचिनी प्रथमा" इति कात्यायनोक्तेः।

न च "प्रासादे आस्ते, पक्वं भुङ्क्ते" इत्यादौ घञा क्तप्रत्ययेन च अधिकरणत्वकर्मत्वयोरुक्तत्वात् प्रथमापत्तिरिति वाच्यम्। तिङ्निपाताभिहितकर्तृत्वकर्मत्वयोरेव प्रथमार्थत्वात्। "प्रासादे" इत्यत्र प्रकर्षेण सीदत्यस्मिन् इत्यर्थविवक्षया सदिधातूत्तरघञा अधिकरणत्वाभिधानेऽपि तिङ्निपाताभ्यामनभिधानात् सप्तम्युपपत्तेः। तथैव "पक्वम्" इत्यत्र क्तप्रत्ययेन कर्मत्वाभिधानेऽपि द्वितीयाया उपपत्तेः। 'तिङः चैत्रः पचति' इत्यादिकमुदाहरणम्। निपातस्य "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्" इत्यादिकम्।

तिङ्निपाताभिहितकारकत्वं प्रथमार्थ इत्यत्र शङ्का

ननु एतावता तिङ्निपाताभ्यामभिहिते कारके प्रथमा, तदनभिहिते तु कारके तृतीयादिः इत्यर्थस्य पर्यवसानात् तिङर्थकारकान्वयिनि प्रथमायाः "चैत्रः पचति" इत्यादावुपपत्तावपि कर्त्रर्थककृदुपात्तभावनान्वये विवक्षिते तन्निरूपितकर्तृत्वस्य आख्यातेनानभिधानात् तृतीयायाः प्रसक्त्या "चैत्रेण पाचको भुङ्क्ते" इति प्रयोगापत्तिः। चैत्रकर्तृकपाकभावनाश्रयः भुङ्क्ते इत्यर्थोऽत्र विवक्षितः। न च कृदुपात्तभावनायां कारकाणामन्वयो नेति वाच्यम्। "काष्ठैः स्थाल्यामोदनस्य पाचकः अन्नं भुङ्क्ते" इत्यादौ काष्ठादीनामन्वयदर्शनात्। काष्ठकरणकस्थाल्यधिकरणकौदनकर्मकभावानाश्रयकर्तृका अन्नकर्मकभोजनभावनेति ततो बोधात्। अतश्च तद्वदेव कर्तृकारकस्यापि अन्वयोपपत्तेः। तत्र च तिङुपात्तक्रियान्वयविवक्षाविरहेण प्रथमानुपपत्तेः कृदुपात्तक्रियान्वयित्वेन विवक्षितस्य चैत्रस्य तिङाद्यनभिहितकर्तृत्वार्थकतया प्राप्नोति। एवं "ओदनं पक्वो भुज्यते चैत्रेण" इति प्रयोगापत्तिः। पाकनिरूपितकर्मत्वस्य तिङानुक्तत्वात्। वारद्वयं कर्तृत्वस्य कर्मत्वस्य च बोधो नानुपपन्नः, निरूपकभेदात् — इति चेत् —

उक्तशङ्कासमाधानम्

उच्यते। "अनभिहिते"[१] इत्यस्य स्वान्वयिभिः (स्वान्वय्यर्थबोधकैः) कृदादिभिरनभिहिते कर्तृत्वादौ तृतीयादिविभक्तिरित्यर्थः। अभिहिते प्रथमेत्यस्य तिङ्निपाताभिहिते कर्तृत्वादौ प्रथमेत्यर्थः। अतो न किञ्चिदनुपपन्नम्। "चैत्रेण पाचको

---

[१] सू. २.३.१

भुङ्क्ते'' इत्यत्र तृतीयार्थकर्तृत्वस्य पाकभावनान्वयविवक्षायां कृतः अकप्रत्ययस्य कर्तृत्वान्वय्यर्थबोधकतया तेन कर्तृत्वस्याभिहिततया च न कर्तृत्वे तृतीयाया आपत्तिः। एवम् ''ओदनं पक्तौ भुज्यते चैत्रेण'' इत्यत्र कर्मत्वान्वय्यर्थककृता कर्मत्वस्योक्ततया न द्वितीयायाः साधुता। प्रथमायास्तु कृदर्थक्रियाविवक्षायां निमित्ताभाव एव, तिङ्निपाताभिहितकर्तृत्वाभावात्।

ननु एवमपि तिङ्निपाताभिहितकारकवाचिनी प्रथमेति स्वीकारे प्रातिपदिकोत्तरं प्रथमायां विवक्षितायां प्रातिपदिकस्य तिङ्निपातान्यतर सामानाधिकरण्यं प्रथमोत्पत्तौ निमित्तमित्यायाति। तथा सति चैत्र पच् ल् इति स्थितिदशायां तिङोऽभावात् प्रथमायाः निमित्ताभावेन अप्रथमासमानाधिकरणपदत्वरूपस्य शर्तृशानचोर्निमित्तस्य सत्त्वात् ''लटः शतृशानचावप्रथमासमानाधिकरणे''[1] इति विशेषविधिना लटः स्थाने शतृशानचोरेव प्राप्त्यापत्त्या तिङोऽभावापत्तिः। तिङ्विधायकसूत्रं तु लिडादिविषयकतया चरितार्थम्। सामान्यसूत्रत्वात् तस्य — इति चेत् —

उच्यते। यदि लटः शतृशानचावेव स्यातां न तिङ् तदा ''लटः शतृशानचौ'' इत्येवालम्। अप्रथमासमानाधिकरणे इति व्यर्थम्। तत् व्यर्थं सत् ज्ञापयति लट्यपि प्रथमा भवतीति प्रथमायाश्च तिङ्सामानाधिकरण्यं विनानुपपत्तेः तिङपि भवतीति ज्ञापयति। ''यावता विना नोपपद्यते तावत् सर्वं ज्ञाप्यत'' इति वचनात्। एवं च प्रथमासमानाधिकरण्ये शत्रादिवारणाय सूत्रे अप्रथमासमानाधिकरणे इत्युक्तमिति स्वांशे चारितार्थ्यम्। परं तु तत्सूत्रीयविध्यंशप्रयोजकद्वितीयादिविभक्त्युत्पत्तिरप्यनेन ज्ञाप्यते तेन विना सूत्रप्रवृत्तेरयोगात्। तेन द्वितीयादिसामानाधिकरण्ये शतृशानचोः प्रवृत्त्या ''पचन्तं चैत्रं पश्य'' इत्यादिसिद्धिः। तावता पूर्वप्रमिततिङ् न बाध्यते। एवं च तिङर्थकर्तृत्वविवक्षायां प्रथमा निराबाधा। सर्वथा तिङ्निपातान्यतराभिहितकर्तृत्वकर्मत्वयोः प्रथमा — इत्याह।

न चैवं प्रथमार्थस्य आख्यातार्थे एवान्वयः। द्वितीयाद्यर्थस्यतु कृदाद्यर्थेऽपीति अनेककार्यकारणभावापत्तिरिति वाच्यम्। विशेष्यतासंबन्धेन सुबर्थप्रकारकशाब्दत्वावच्छिन्नं प्रति लिङ्गानन्वयिपदजन्योपस्थितिः भावनानिष्ठविशेष्यतासंबन्धेन कारणमिति एकेनैव कार्यकारणभावेन निर्वाहात्। कात्यायनोक्त्यादिप्रमाणजन्याभिहितत्वाद्युपस्थितिसहकारेण प्रथमार्थस्य अन्यविभक्त्यर्थस्य कृदाद्यर्थे इति विशेषलाभसंभवात् इत्याहुः।

---

[1] सू. ३.२.१२४

पदवाक्यरत्नाकरे एतन्मतपरिशीलनम्

अत्राहुः — पदवाक्यरत्नाकरकृतः —

सुबर्था एव नामार्थाः सुपामल्पत्वलाघवात्।
व्यञ्जकं प्रातिपदिकं मतमित्यप्यसंगतम्।।

"चैत्र" इत्यादौ चैत्रादिर्न प्रातिपदिकवाच्यः, किं तु सुपामेव वाच्याः। प्रातिपदिकानां बहुत्वेन तदपेक्षया सुपामल्पत्वेन तत्कृतलाघवात्। प्रातिपदिकं तु व्यञ्जकम् (सुबर्थतात्पर्यग्राहकम्) इति वदन्ति।

तेषां मते व्यञ्जकत्वं नाम किम्? यदि वाचकतावच्छेदककोटिप्रविष्टम् वाचकतावच्छेदकं च घटादिप्रातिपदिकोत्तरसुत्त्वम् इत्युच्यते, तदा अनन्तानां प्रातिपदिकानां विभक्तिनिष्ठवाचकतायामवच्छेदकत्वेन प्रवेशापेक्षया सुत्वाद्यघटितघटपदत्वादीनां वाचकतावच्छेदकत्व एव लाघवम्। यदि च सुत्वमेव वाचकतावच्छेदकम्। घटादिप्रातिपदिकानां व्यञ्जकत्वं तु घटादिबोधप्रयोजकसमभिव्याहारवत्त्वम्, घटादिसमभिव्याहृतस्यैव सुपः घटादिबोधजनकत्वात् इत्युच्यते, तदापि समासे "राजपुरुष" इत्यादौ सुब्विनाकृतात् राजादिपदात् प्रातिपदिकार्थबोधो न स्यात्। न स्याच्चार्थवत्त्वाभावे प्रातिपदिकसंज्ञापि। अतः तन्मतं न युक्तम्।

यत्तु "चैत्रः पचति, ओदनः पच्यते, छेत्तुं सांप्रतं वृक्षः" इत्यादौ तिङ्निपातादिभिरभिहितं कारकं प्रथमार्थः। तथा च कर्तृकर्तृत्वयोर्मतभेदेन आख्यातवाच्यत्वे चैत्राभिन्ने कर्तरि पाककर्ता, चैत्रीये कर्तृत्वे वा पाककर्तृत्वं तादात्म्येन अन्वेति — इत्यादि। तन्न।

उक्तार्थानामप्रयोगात् विभक्त्यन्तरदर्शनात्।
अर्थतः प्रथमोपात्ता प्रथमैव प्रयुज्यते ।।६५।।

पार्थ एव घटो नास्ति हंसीव विमलं जलम्।
कल्की म्लेच्छान्तकः कालास्त्रय इत्यादिदर्शनात् ।।६६।।

"चैत्रः पचति" इत्यत्राख्यातेन कर्तृत्वेऽभिहितेऽनभिहिताधिकारीयतृतीया न भवत्येव। अनभिहिताधिकारश्च "उक्तार्थानामप्रयोगः" इति न्यायमूलकः। तथा च सति तिङोक्तस्य कर्तृत्वस्य बोधनाय कथं प्रथमा भवेत्। उक्तार्थानामप्रयोग इति न्यायानङ्गीकारे कल्पप्विधायके "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः"[१] इति सूत्रे

---

[१] सू. ५.३.६७

"अनभिहिते" इत्यधिकाराभावात् बहुपटुकल्पाः इति प्रयोगापत्तिः। उक्तन्यायाङ्गीकारे तु बहुचोक्तार्थत्वात् न अग्रे कल्पप् इति।

न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः इति न्यायात् चैत्रपदानन्तरं सुपः प्रयोगस्य आवश्यकत्वात् प्रथमोपात्तस्य त्यागे मानाभावाच्च प्रथमाविभक्तिरेव साधुः।

भाट्टचिन्तामणौ[१] प्रथमार्थविचारः

प्रथमाविभक्त्यर्थ इत्थं निरूपितः — "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"[२] इति सूत्रम्। लिङ्गपरिमाणवचनानां लिङ्गत्वपरिमाणत्वसंख्यात्वप्रकारकशक्त्या लिङ्गादिषु प्रथमायाः शक्तिः। प्रातिपदिकार्थ इति क्वचित् प्रथमाया अर्थो नास्तीति सूचनाय। "पुमान् देवदत्तः, द्रोणो व्रीहिः, एको घट" इत्यादौ पुमादिप्रातिपदिकार्थानां पुंस्त्वद्रोणत्वैकत्वानां देवदत्तादौ न समवायसंबन्धेनान्वयः संभवति। नामार्थयोर्भेदेनान्वयस्याव्युत्पत्तेः। अतो लिङ्गादिकं प्रथमार्थः। तत्र प्रातिपदिकार्थानां पुंस्त्वादीनामभेदेनान्वयः। विभक्त्यर्थश्च देवदत्तादौ प्रकारतया अन्वेति। एवं च 'पुंस्त्वाभिन्नलिङ्गवान् देवदत्तः, द्रोणाभिन्नपरिमाणवान् व्रीहिः, एकत्वाभिन्नसंख्यावान् घट' इत्यादिबोधोपपत्तिरिति वैयाकरणाः।

अत्राहुः — नामार्थयोरभेदेनान्वय इति व्युत्पत्तिरक्षणाय विभक्त्यर्थप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिकल्पनं न युक्तम्।

किं चैवं सति नामार्थयोरभेदान्वयः क्वापि न स्यात्। प्रातिपदिकार्थत्वेन प्रातिपदिकार्थे प्रथमायाः शक्त्या "नीलो घट" इत्यादावपि नीलाभिन्नप्रातिपदिकार्थस्य समवायसंबन्धेन घटेऽन्वयप्रसक्तेः। न चेष्टापत्तिः। प्रातिपदिकार्थत्वस्य शक्यतावच्छेदकत्वे गौरवात्।

किं च "तण्डुलः पचति" इत्यादावपि प्रातिपदिकार्थरूप विभक्त्यर्थस्य कर्मत्वसंबन्धेन पाकेऽन्वयापत्त्या तद्वाक्यादपि तण्डुलकर्मकपाकबोधापत्तेः। विभक्त्यर्थस्य निरूपकत्वादिसंबन्धेन धात्वर्थेऽन्वयवत् कर्मत्वसंबन्धेनान्वये बाधकाभावात्। अतः प्रातिपदिकार्थेन विभक्त्यर्थस्याभेदातिरिक्तसंबन्धेन अन्वयबोधो नास्तीति व्युत्पत्त्यन्तरकल्पने गौरवम्। अतो नेदं शक्तिग्राहकम्। किं तु प्रथमाविभक्त्युच्चारणे प्रातिपदिकार्थातिरिक्तस्यार्थस्याभानात् नेयं कारकविभक्तिरिति सूत्राशयः। एवं च मात्रपदं संगच्छते। शक्तिग्राहकत्वे मात्रपदवैयर्थ्यप्रसङ्गः।

---

[१] पृ. ९२-९३

[२] सू. २.३.४६

एवं "संबोधने च"[१] इत्यत्रापि संबोध्यत्वे प्रथमायाः न शक्तिरित्युच्यते। "हे देवदत्त! पच" इत्यत्रापि संबोध्यस्य विभक्त्यर्थस्य धात्वर्थे कर्तृत्वेनान्वयापत्तेः। तेन आमन्त्रितादिसंज्ञान्तरप्रयुक्तकार्यप्राप्त्यर्थं संबोधने चेति सूत्रम्। संबोधने या प्रथमा सा आमन्त्रितम् इति सूत्रार्थः। अतो न प्रथमायाः किञ्चित् वाच्यम्। किं तु आख्याताद्युक्तार्थानुवादः — इति।

इति प्रथमार्थविचारः

---

[१] सू. २.३.४७

संबोधनप्रथमार्थविचारः

व्युत्पत्तिवादरीत्या संबोधनप्रथमार्थः

"संबोधने च"[१] इति सूत्रेण विहितायाः प्रथमायाः संबोधनमर्थः । "चैत्र त्वया भुज्यताम्" इत्यत्र चैत्रपदोत्तरसंबोधनप्रथमायाः संबोधनमर्थः। संबोधनं नाम वक्तृनिष्ठा संबोधनप्रथमान्ताव्यवहितशब्दजन्यशाब्दबोधाश्रयत्वप्रकारेच्छा। सा च त्वया भुज्यतामितिशब्दजन्यशाब्दबोधाश्रयश्चैत्रो भवतु इत्याकारिका। सा च चैत्रप्रातिपदिकार्थे विशेष्यतासंबन्धेनान्वेति। तथा च त्वत्कर्तृकभोजनकर्मौदनविषयकः 'त्वया भुज्यताम्' इति वाक्याधीनो यो बोधः तदाश्रयत्वप्रकारकवक्त्रिच्छाविशेष्यः चैत्रः इति उक्तस्थले बोधः।

अथ संबोध्यत्वज्ञानं विनापि 'त्वया भुज्यताम्' इत्यादिवाक्यात् शाब्दबोधस्य भोजनादौ प्रवृत्तेश्च दर्शनात् 'चैत्र' इत्यादिप्रथमान्तपदप्रयोगोऽनर्थक इति चेत् — न।

यत्र चैत्रस्य संमुखस्थित एव वक्ता 'त्वया भुज्यताम्' इत्यभिदधाति तत्र विचक्षणश्चैत्रः विलक्षणप्रेक्षणचेष्टादिना स्वस्मिन् पूर्वोक्तं संबोध्यत्वमनुमाय गृहीतयुष्मत्पदसंकेतः 'त्वया भुज्यताम्' इति वाक्यार्थं ज्ञातुं प्रभवति। यत्र तु अन्तरितो वक्ता त्वया भुज्यतामिति ब्रवीति, श्रोतारश्च बहवः सन्ति, तत्र युष्मत्पदशक्तेः परिच्छेत्तुमशक्यतया न बोधः संभवतीत्यतः संबोधनप्रथमान्तपदप्रयोगस्यावश्यकत्वात्। चैत्रत्वाद्यवच्छिन्ने संबोध्यत्वज्ञानं विना संबोध्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नवाचकस्य युष्मत्पदस्य विशिष्य चैत्रत्वावच्छिन्ने शक्तेर्निश्चेतुमशक्यत्वात्।

न चैवमपि यत्रानन्तरवाक्यं न युष्मच्छब्दघटितं "चैत्र! अत्र घटोऽस्ति" इत्यादौ, तत्र संबोधनपदसार्थक्यं दुरुपपादम्, युष्मत्पदशक्तिग्रहनिर्वाहरूपप्रयोजनाभावात् इति वाच्यम्। तत्रापि चैत्रेति संबोधनपदे प्रयुज्यमाने वक्तृनिष्ठा या मदुच्चरितवाक्यजन्यबोधाश्रयश्चैत्रो भवतु इति इच्छा तया उच्चरितत्वरूपं तात्पर्यं सुखेन अवधारयितुं शक्नोति संबोध्यः। तादृशतात्पर्यनिश्चयार्थमेव च संबोधनपदस्य प्रयोक्तव्यत्वात्। तादृशतात्पर्यनिश्चयं विना श्रुतादपि तत्तद्वाक्यात् चैत्रादेः शाब्दबोधासंभवात्। चैत्रस्याश्वानयनादिबोधाय मैत्रस्य च लवणानयनबोधाय उच्चरितात् सैन्धवमानयेतिवाक्यात् वैपरीत्येन चैत्रमैत्रयोः तत्तद्वाक्यार्थबोधवारणाय (चैत्रस्य

---

[१] सू. २.३.४७

लवणानयनबोधवारणाय मैत्रस्य अश्वानयनबोधवारणाय च) चैत्रगते तद्वाक्यार्थ-बोधे चैत्रगततद्वाक्यार्थबोधेच्छया उच्चरितत्वरूपतात्पर्यनिश्चयस्य मैत्रगते तद्वाक्यार्थ-बोधे मैत्रगततद्वाक्यार्थबोधेच्छया उच्चरितत्वरूपतात्पर्यनिश्चयस्य च विशिष्य हेतुताया आवश्यकत्वात्। सुबर्थः प्रकृत्यर्थविशेष्यतयैव भासत इति नियमे सुबर्थसंख्यायाः प्रकृत्यर्थविशेषणतया भाननिर्वाहार्थं सुबर्थे संख्यातिरिक्तत्व-निवेशवत् संबोधनभिन्नत्वमपि निवेश्यम्; अतः संबोधनस्य प्रकृत्यर्थविशेषणतया भानेऽपि न क्षतिः। तथा च संख्यातिरिक्तः संबोधनातिरिक्तश्च सुबर्थः प्रकृत्यर्थ-विशेष्यतयैव भासत इति नियमः संपन्नः।

गोकुलनाथमतेन संबोधनप्रथमार्थः

पदवाक्यरत्नाकरे गोकुलनाथोपाध्यायास्तु — संबोधनविभक्तिप्रकृत्यर्थस्यान्यत्र विशेषणतयैवान्वयः। तथा हि ज्ञानोद्देश्यकेच्छा संबोधनम्। तत्र ज्ञानमिच्छा च खण्डशः 'ब्रह्मन् पालय' इत्यादौ प्रथमार्थः। तत्र प्रातिपदिकार्थः समवेतत्वसंबन्धेन ज्ञानेऽन्वेति। ज्ञाने चोद्देश्यतासंबन्धेनेच्छा अन्वेति। ज्ञानस्य विषयतासंबन्धेन धात्वर्थेऽन्वयः। लोटः आशंसा अर्थः। तस्याः विषयतासंबन्धेन धात्वर्थे पालनेऽन्वयः। एवं च ब्रह्मसमवेतं यत् इच्छोद्देश्यभूतं ज्ञानं तद्विषयः एकत्वाश्रयत्वत्कर्तृकमाशंसाविषयभूतं पालनमिति वैयाकरणमते शाब्दबोधः। ब्रह्मसमवेतेच्छोद्देश्यभूतज्ञानविषयः आशंसाविषयभूतपालनकर्ता एकस्त्वम् इति नैयायिकमते शाब्दबोधः। ज्ञानसमवायितया इच्छाविषयत्वरूपं संबोध्यत्वं चैत्रादावर्थतः प्रतीयते। अत्र यादृशरूपावच्छेदेन संबोध्यत्वं प्रथमया प्रत्याय्यते तादृशरूपविशिष्टमेव युष्मच्छब्देन परामृश्यते। संबोध्यतावच्छेदकत्वो-पलक्षितधर्मविशिष्टे एव युष्मत्पदस्य शक्तेः। तथा च "देव त्वं पुरुषोत्तमोऽसि" इत्यादौ पुंस्त्वैकत्वविशिष्टदेवत्वावच्छेदेन संबोध्यत्वमेकवचनरूपप्रथमया प्रत्याय्यते। त्वंपदेनापि पुंस्त्वैकत्वविशिष्टदेवत्वविशिष्टः उच्यते। अत एव 'हे ब्राह्मणाः त्वं प्रसीद' इति न प्रयोगः — इत्याहुः।

बृहन्मञ्जूषायाम् उपपादितः संबोधनप्रथमार्थः

संबोधनमपि प्रथमार्थः। "संबोधने च"[१] इति सूत्रस्वरसात्। तत्र संबोधनं ज्ञापनम्। अत एव ज्ञाप्यमान इत्यर्थकः "संबोध्यमानो देवदत्तः" इति व्यवहारः संगच्छते। संबोधनज्ञापनार्थमेव संबोधनविभक्त्यन्तपदघटितवाक्यप्रयोगः। तत्प्रयोजनं

---

[१] सू. २.३.४७

(संबोधनज्ञापनप्रयोजनं) प्रवृत्तिनिवृत्त्यादि। संबोधनविभक्तिश्चानुवाद्यविषयिणी क्रियान्वयिनी च। तेन "राजा भव, युध्यस्व," "इन्द्रशत्रुर्वर्धस्व" इत्यादौ न संबोधनविभक्तिः। राजत्वादेः असिद्धत्वेनानुवाद्यत्वाभावात्। सिद्धस्यैवानुवाद्यत्वात्। अत एव "राजन् युध्यस्व" इत्यस्य कुमारावस्थायां "राजा भव युध्यस्व" इत्यस्य च राजावस्थायां न प्रयोगः। हेशब्दादिकं च संबोधनतात्पर्यग्राहकम्। अचेतने चेतनत्वारोपेण गौणः प्रयोगः। "यमुने गङ्गे सरस्वति" इत्यादौ। अत्र च संबोधनं प्रकृत्यर्थं प्रति विशेष्यम्, क्रियां प्रति च विशेषणम्। तेन "रामः! पाहि" इत्यादौ रामसंबन्धिसंबोधनविषयस्त्राणमिति बोधः। संबोधनविभक्तेरनुवाद्यविषयकतया अनुवाद्यस्य च विधेयसाकाङ्क्षतया विधेयस्य च क्रियारूपत्वेन तदन्वयस्यैवोचितत्वात्। "हे देवदत्त, त्वं सुन्दरः" इत्यादौ असीत्यध्याहारो बोध्यः। अत एव "धिङ्मूर्ख" इत्यादौ क्रियाध्याहारे प्रथमा। मूर्खसंबन्धिसंबोधनविषया निन्द्या क्रियेति बोधः। क्रियायाः निन्द्यत्वं च सर्वासंमतमूर्खादिकर्तृकत्वमेव। क्रियाया अभावे "धिङ्मूर्खम्" इति द्वितीया। मूर्खसंबन्धिनिन्देति बोधः।

अत एव "व्रजानि देवदत्त" इत्यादौ एकतिङ्वाक्यम् इति एकवाक्यत्वात् "आमन्त्रितस्य च"[१] इति निघातसिद्धिः। क्रियां प्रति संबोधनस्याविशेषणत्वे तु एकवाक्यत्वं न सिध्येत्।

यत्तु "राम पाहि" इत्यत्र संबोध्यरामकर्तृकं रक्षणमर्थः। संबोधनं प्रकृत्यर्थं प्रति विशेषणम्। प्रकृत्यर्थश्चाभेदेन आख्यातार्थे विशेषणम्। उक्तरीत्या रामसंबन्धिसंबोधनविषयस्त्राणम् इति बोधे तु "भो ब्राह्मणाः त्वं पच" इति प्रकृत्यर्थस्य आख्यातार्थेऽभेदेनान्वयेन समानवचनकत्वनिर्बन्धाभावात्। न चैवं "राम पाहि" इत्यादौ प्रथमपुरुषापत्तिरिति वाच्यम्। "युष्मद्युपपदे"[२] इत्यत्र युष्मदित्यस्यार्थपरत्वेन युष्मदश्च संबोध्यमानार्थकतया रामेत्यस्यापि संबोध्यार्थकत्वाक्षतेः इति।

तन्न। "हे राम शिवो गच्छति काशीम्" इत्यादौ प्रत्ययार्थान्वयस्य वक्तुमशक्यत्वात्। गमनस्य संबोध्यरामकर्तृकत्वाभावात्। किं च युष्मदित्यस्यार्थपरत्वे "हे राम भवान् गच्छति" इत्यत्र मध्यमपुरुषानापत्तिः। भवदर्थस्य संबोध्यासंबोध्यसाधारणत्वेऽपि प्रकृते संबोधनसमभिव्याहारेण संबोध्यमात्रार्थकत्वात्। अर्थपरत्वाभावे तु "राम पाहि" इत्यादौ मध्यमपुरुषो दुरुपपादः। त्वमित्यध्याहारे तु तस्यैव आख्यातार्थेनान्वयात् रामेत्यनेनान्वयो दुरुपपादः। ततश्चैकवाक्यत्वानुपपत्तिः।

---

[१] सू. ६.२.१९८
[२] सू. १.४.१०५

यत्तु "भो ब्राह्मणाः त्वं पच" इति स्यादिति, तन्न। किमत्र सर्वेषां संबोध्यमानब्राह्मणानां कर्तृत्वम्, उत अन्यतमस्यैव, उत संबोध्यमानातिरिक्तस्य। नाद्यः, 'त्वम्' इत्येकवचनान्तेनोल्लेखानुपपत्तेः। न द्वितीयः, अन्येषां ज्ञापने फलाभावेन तज्ज्ञापनस्य व्यर्थत्वापत्तेः। "त्वं भुङ्क्ष्व, त्वं स्नाहि" इत्यादिभिन्नभिन्नक्रियाप्रतिपादनतात्पर्ये तु इष्टापत्तिः। एतेन तृतीयोऽपि निरस्तः।

किं च शब्दशक्तिस्वाभाव्येन संबोधनविभक्त्यन्तपदसमभिव्याहारे युष्मदः तत्पदबोध्यपरामर्शकत्वस्यैव लोकसिद्धत्वेन तदतिरिक्तस्य त्वंपदार्थता वक्तुमशक्या। अत एव तव मते "हे देवदत्त अयं पचति" इत्यादौ संबोध्यस्य कर्तृत्वं न। शब्दशक्तिस्वाभाव्येन संबोध्यातिरिक्तस्यैव इदंशब्दार्थत्वात् — इति।

विभक्त्यर्थनिर्णयानुसारेण संबोधनप्रथमार्थः[१]

संबोधनमपि प्रथमार्थः। "संबोधने च"[२] इत्यनुशासनात्। संबोधनं बोधोद्देश्यकेच्छा। तत्र ज्ञानमिच्छा च खण्डशः प्रथमार्थः। तत्र प्रातिपदिकार्थः समवेतत्वसंबन्धेन ज्ञाने अन्वेति। प्रातिपदिकार्थान्विते ज्ञाने उद्देश्यतासंबन्धेनेच्छा अन्वेति। ज्ञानं च विशिष्टविषयतासंबन्धेन वाक्यार्थेऽन्वेति। एवं प्रातिपदिकार्थसमवेतज्ञानस्य उद्देश्यतया ज्ञानसमवायितया उद्देश्यत्वस्वरूपं संबोध्यत्वमर्थतः प्रातिपदिकार्थस्य प्रतीयते। एतदेव संबोध्यत्वं काशिकायामाभिमुख्यपदेनोक्तम्। एवं सति "ब्रह्मन् पालय" इत्यादौ ब्रह्मसमवेतेष्टज्ञानविषय एकत्ववत्त्वत्कर्तृकमाशंसाविषयपालनमिति शाब्दिकस्य, ब्रह्मसमवेतेष्टज्ञानविषय आशंसाविषयपालनकर्ता एकस्त्वमिति तार्किकस्य शाब्दबोधः।

एवं यादृशरूपावच्छेदेन संबोध्यत्वं प्रथमया प्रत्याय्यते तादृशरूपविशिष्टमेव युष्मच्छब्देन परामृश्यते। संबोध्यतावच्छेदकोपलक्षितधर्मविशिष्ट एव युष्मत्पदस्य शक्तेः। "देव त्वं पुरुषोत्तमोऽसि" इत्यादौ पुंस्त्वैकत्वविशिष्टदेवत्वावच्छेदेन संबोध्यत्वं एकवचनप्रथमया प्रत्याय्यते। त्वंशब्देनापि पुंस्त्वैकत्वविशिष्टदेवत्वविशिष्ट उच्यते। अत एव सर्वलिङ्गेऽपि युष्मदस्मदोः समानरूपता। इत्थं च "हे ब्राह्मणास्त्वं प्रसीद" इति न प्रयोगः। संबोध्यतावच्छेदकतया उपलक्षितेन बहुत्वविशिष्टब्राह्मणत्वेन विशिष्टस्य युष्मदा परामर्शे तत्रैकवचनार्थस्य अनन्वितार्थकत्वात् असाधुत्वाच्च।

---

[१] पृ. ५४-६८

[२] सू. २.३.४७.

"हे चण्ड हे मुण्ड बलैर्बहुभिः परिवारितौ।
तत्र गच्छत गत्वा च सा समानीयतां लघु।।"

इत्यादावेकत्वविशिष्टचण्डत्वैकत्वविशिष्टमुण्डत्वस्वरूपधर्मद्वयावच्छेदेन प्रथमया संबोध्यत्वबोधनेऽपि तादृशचण्डत्वविशिष्टस्य तादृशमुण्डत्वविशिष्टस्य च युष्मदा परामर्शात् ततो न द्विवचनमनुपपन्नम्। "एकघटैकपटौ" इत्यादिद्वन्द्वस्थले इव द्वित्वान्वयसंभवात्।

"हे सौमित्रे सखा यस्ते निर्विशेषस्त्वया गुहः।
युवां गत्वा नदीमेनां शीघ्रमानयतां पयः।।"

इत्यादौ यच्छब्दाकाङ्क्षापूरणक्षमेन तच्छब्देन युष्मदः एकशेषे स्मृततच्छब्देन शक्त्या, युष्मदा लक्षणया वा उपस्थापितं गुहमादाय द्वित्वान्वयसंभवात् युष्मच्छब्दोत्तरं द्विवचनोपपत्तिः। रीतिरियं भवच्छब्देऽपि बोध्या। तेन "हे ब्राह्मणा भवान् प्रसीदतु" इत्यादिको न प्रयोगः।

यत्र "अर्जुनार्जुन सात्यके सात्यके!

कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।
नरकरिपुणा सार्धं तेषां सभीमकिरीटिना-
मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम्।।

इत्यादौ संबोध्यस्य द्वित्वे भवच्छब्दो बहुवचनान्तस्तत्र न संबोध्यार्थको भवच्छब्दः। किं तु शत्रन्तः। तेन मनुजपशुभवनविशिष्टैरिति यैः इत्यस्य विशेषणम्।

यत्तु "नाथ पालय" इत्यादौ पालनकर्तृत्वस्य संबोधनप्रथमान्तार्थ एवान्वय इति। तदसत्। गुणीभूते प्रथमान्तार्थे आख्यातार्थान्वयायोगात्। संबोधनप्रथमान्तार्थस्य संबोध्यत्वे गुणीभूतत्वात्। अन्यथा "नारायण इव नरो गच्छति" इत्यादौ नारायणेऽपि गमनकर्तृत्वान्वयप्रसङ्गात्। किं च युष्मदोऽसामानाधिकरण्ये मध्यमपुरुषो न स्यात्। न च युष्मत्पर्यायो यः संबोधनप्रथमान्त इति मध्यमपुरुषोपपत्तिरिति वाच्यम्। तथा सति भवच्छब्दसामानाधिकरण्येऽपि मध्यमपुरुषप्रसङ्गात्।

नन्वेवं —

अकाण्डशक्तिनिर्भिन्ने वत्से जहति चेतनाम्।
हताश राम कस्यार्थे दग्धं जीवितमिच्छसि।।

इत्यादौ रामस्य वक्तुः संबोध्यत्वमनुपपन्नम्। तदा हि तस्य वाक्यार्थज्ञानाभावे वाक्यप्रयोगोऽनुपपन्नः। वाक्यार्थज्ञानस्य सत्त्वे तु तस्य सिद्धतया तत्रेच्छाविरहः,

वाक्यार्थसिद्धौ शाब्दबोधश्च न भवतीति चेत् — न। मानान्तरजन्यवाक्यार्थ-ज्ञानसत्त्वेऽपि वाक्यार्थगोचरशाब्दत्वावच्छेदेनेच्छायाः संभवात्। श्रवणसिद्धौ मननेच्छावत् सिद्धेः शाब्दं प्रत्यप्रतिबन्धकत्वात्। प्रतिबन्धकत्वे वा शाब्देच्छा-विरहविशिष्टायास्तस्याः प्रतिबन्धकत्वाच्च। वक्तुरपि स्ववाक्यजन्याभीष्टवाक्यार्थ-बुद्धिसमवायितया संबोध्यत्वमबाधितमिति संप्रदायः।

ननु संबोध्यपुरुषवृत्तिवाक्यार्थज्ञानस्य सिद्धत्वनिश्चये करणापाटवेन प्रयुक्तस्य "चैत्र त्वं गच्छ" इति वाक्यस्य प्रामाण्यापत्तिः। भाविन्याः भूतायाश्च पुरुषान्त-रीयायाः इच्छाया विषयत्वस्य चैत्रीयवाक्यार्थज्ञानेऽबाधितत्वात्। एवं संबोध्यपुरुष-वृत्तिवाक्यार्थज्ञानस्य वाक्यजन्यत्वेऽपि अगृहीतपदसंकेतं म्लेच्छमुद्दिश्य आर्यैः प्रयुज्यमानस्य शङ्गापरे(शुङ्गापसरे?)त्यादिवाक्यस्य? प्रामाण्यसंभवात् उपहास्य-त्वाभावप्रसङ्गश्च। म्लेच्छे मानान्तरजन्यवाक्यार्थज्ञानस्य म्लेच्छवाक्यार्थज्ञाने च आर्येच्छाविषयत्वस्याबाधितत्वात् म्लेच्छस्य संबोध्यत्वोपपत्तौ दर्शितवाक्य-प्रामाण्यस्य निष्प्रत्यूहत्वात्। तत्तत्कालीनत्वेन तत्तत्पुरुषीयत्वेन चेच्छायां तत्तद्वाक्यजन्यत्वेन ज्ञानस्य च संबोधनप्रथमार्थत्वे शक्त्यानन्त्यमिति चेत् — न।

यतः स्वघटितवाक्यप्रयोगोपधायकत्वोपलक्षितेच्छायां स्वघटितवाक्यजन्यत्वो-पलक्षिते ज्ञाने च संबोधनप्रथमायाः शक्तिः। यथा तदादिपदानां स्वप्रयोगोप-धायकबुद्धिप्रकारत्वोपलक्षितधर्मविशिष्टे शक्तिः। शक्तिग्रहस्तु सामान्योपलक्षित-विशेषावगाही सर्वोपसंहारेण। तथा हि — तत्पदत्वव्याप्यतत्तात्वोपलक्षिताः तत्तत्पदत्वव्यक्तीः धर्मितावच्छेदकीकृतस्य तत्तत्पदप्रयोगोपधायकबुद्धिप्रकारक-बुद्धिप्रकारत्वावान्तरतत्तात्वोपलक्षितधर्मविशिष्टबोधकत्वावगाही वृत्तिग्रहः फलत-स्तत्पदत्वावच्छेदेन तत्तद्धर्मविशिष्टवाचकतामेवावगाहते। तथा सम्बुद्धिप्रथमाया अपि प्रथमात्वावान्तरतत्तात्वोपलक्षिततत्तत्प्रथमात्वावच्छेदेन संबोधनप्रथमात्वा-वच्छेदेन संबोधन-प्रथमाप्रयोगोपधायकत्वावान्तरतत्तात्वोपलक्षितधर्मविशिष्टेच्छा-वाचकत्वं गृह्यते। इच्छायां तादृशोपलक्षितधर्मस्तद्व्यक्तित्वमेव। न च तद्व्यक्तित्वेन इच्छावगमे वाचकतायामिच्छाप्रवेशो व्यर्थ इति वाच्यम्। इच्छावृत्तितद्व्यक्ति-त्वलाभार्थमिच्छाप्रवेशात्। अथ वा इच्छावृत्तित्वोपपलक्षितत्वेनापि धर्मो विवक्ष-णीयः। इच्छा वाचकतायां न प्रवेशनीयेति। एवं स्वघटितवाक्यजन्यत्वोपलक्षितं ज्ञानमपि दर्शितरीत्या संबुद्धिप्रथमावाच्यमिति यथा तदादिपदानां न शक्त्यानन्त्यं तथा संबोधनप्रथमाया अपीति पदवाक्यरत्नाकरे गुरुचरणाः।

अत्रेदं तत्त्वम् — ज्ञानेच्छा संबोधनप्रथमार्थः। सा चेच्छा चैत्रस्य मैत्रीय-गमनकर्तृत्वज्ञानं भवतु इत्यादिविशेषाकारा सर्वत्र संबोधनस्थले। एवं च "चैत्र

मैत्रों गच्छति'' इति वाक्ये चैत्रश्चैत्रप्रातिपदिकार्थः मैत्रीयगमनकर्तृत्वं मैत्रो गच्छतीति वाक्यात् प्रतीयते। अनन्यलभ्यतया ज्ञानेच्छा संबोधनप्रथमार्थः। तत्रेच्छायां चैत्रप्रातिपदिकार्थस्य समवेतत्वसंसर्गावच्छिन्नस्य प्रकारतानिरूपित-ज्ञानत्वावच्छिन्नविशेष्यत्वावच्छिन्नोद्देश्यताप्रतियोगित्वेन संबन्धेनान्वयः। इच्छा तु स्वोद्देश्यत्वावच्छिन्नज्ञानत्वावच्छिन्नविशेष्यतानिरूपितविषयितासंसर्गावच्छिन्नप्रकारता संबन्धेन वाक्यार्थे मैत्रीयगमनकर्तृत्वेऽन्वेति। एवं ''चैत्र मैत्रो गच्छति'' इत्यादौ चैत्रस्य व्यासङ्गवशात् वाक्यार्थज्ञानानुत्पादेऽपि न संबोध्यत्वहानिः। दर्शितसंसर्गेण चैत्रस्य इच्छायामिच्छायाश्च वाक्यार्थेऽन्वयस्य निष्प्रत्यूहत्वात्। उद्देश्यता तु वाक्यप्रयोगप्रयोजकतत्तदिच्छीयोद्देश्यतात्वेन संसर्गमध्ये निविशते।

प्रसङ्गात् आशीर्लिङर्थः

एवमेवाशीर्लिङ्लोटोरर्थस्येच्छायाः अपि उद्देश्यता प्रयोक्तृतत्तदिच्छीयोद्देश्य-तात्वेन संसर्गमध्ये निविशते। भवतु वा स्वप्रयोक्तृतावच्छेदकत्वोपलक्षित-धर्मविशिष्टे प्रयोक्तरि संबोधनप्रथमायाः आशीर्लिङ्लोटोश्च शक्तिः। तत्र देवदत्तादेः प्रयोक्तुः तत्तत्कालावच्छिन्नसमवेतत्वेन संबन्धेनेच्छायामन्वयः। तेन चैत्रस्य कालान्तरे देवदत्तसंबोध्यस्य मैत्रीयगमनकर्तृत्वादिस्वरूपवाक्यार्थज्ञाने सिद्धत्व-निश्चयदशायां पुरुषान्तरस्य तादृशचैत्रीयवाक्यार्थज्ञानेच्छायां यज्ञदत्तं संबोधयता देवदत्तेन करणापाटवेन प्रयुक्ते ''चैत्र मैत्रो गच्छति'' इत्यादौ चैत्रस्य संबोध्य-त्वविरहात् अप्रामाण्यम्। कालान्तरीयपुरुषान्तरीयेच्छयोः तद्वाक्याप्रयोजकत्वात् तयोरिच्छयोः तत्तदिच्छीयोद्देश्यताघटितसंबन्धमध्ये प्रवेशाभावात् प्रयोगजनकयज्ञ-दत्तविषयकसंबोधनेच्छायां तदिच्छीयोद्देश्यत्वघटितेन दर्शितसंसर्गेण चैत्रस्यान्वया-संभवात्। प्रयोक्तुः प्रथमार्थत्वपक्षे देवदत्तसमवेततत्तत्कालिकेच्छायां दर्शितसंसर्गेण चैत्रस्यान्वयासंभवाच्च।

युष्मच्छब्दार्थः

एवं प्रयोक्तृपुरुषेणोपलक्षितया ज्ञानेच्छया उद्देश्यतयानुपलक्षितया तत्तदिच्छी-योद्देश्यतया वा अवच्छिन्नं यत् ज्ञानत्वावच्छिन्नविशेष्यत्वं तन्निरूपितसमवेतत्व-संसर्गावच्छिन्नप्रकारतावच्छेदकत्वसंबन्धेन ज्ञानेच्छोपलक्षितधर्मविशिष्टे युष्मत्पदस्य शक्तिः। तत्तदिच्छोद्देश्यताव्यक्तेरुद्देश्यतात्वेनैव संबन्धमध्ये प्रवेशः। यथा — ''स्वर्गकामो यजेत'' इत्यादौ इष्टसाधनत्वं विध्यर्थः, तत्राव्यवहितपूर्वकालः अधि-करणम् अभावः प्रतियोगितावच्छेदकत्वं धर्मश्च खण्डशो विध्यर्थः। तत्रेष्टत्वे-नोपस्थितः स्वर्गः अव्यवहितपूर्वकाले, सोऽधिकरणे तत् अभावे, स धर्मेऽन्वेति।

तत्र स्वर्गाव्यवहितपूर्वकालस्य अननुगमेऽपि तत्तत्क्षणावच्छिन्नाधिकरणतया अभावस्य स्वर्गादिकार्याधिकरणेऽन्वयः। तेन तत्तत्क्षणावच्छेदेन स्वर्गाधिकरणवृत्तिर्योऽभावः तत्प्रतियोगितावच्छेदकत्वाभाववान् धर्म इति लिङर्थबोधः, तत्र यथा न शक्त्यानन्त्यम्, तथात्रापि।

लिङर्थविचारः

यदि च अव्यवहितपूर्वकालो लिङर्थे न निविशते। किं तु अधिकरणम् अभावः प्रतियोगिता अवच्छेदकत्वं धर्मश्चेति पञ्च लिङर्थाः। तत्र स्वर्गः अधिकरणे, अधिकरणं तत्तत्स्वर्गाव्यवहितपूर्वक्षणावच्छिन्नाधेयतासंबन्धेनाभावे, स प्रतियोगितायां, सा अवच्छेदकत्वे, तत् अभावे, स धर्मेऽन्वेति। एवं च यागत्वावच्छेदेन स्वर्गाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वाभाववद्धर्मवत्ताज्ञानमेव यागप्रवृत्तौ हेतुः। स धर्मस्तु यागत्वमेव दर्शितधर्मत्वेन रूपेण यागत्वावच्छेदेन गृह्यते। एवमेवान्यत्रापि इष्टसाधनताज्ञानस्य प्रवर्तकत्वं संसर्गघटितविशेषं सामान्येनावगाहमानमिष्टसाधनताज्ञानं सामान्येन व्यभिचारग्रहः प्रतिरोद्धुं न शक्नोति। अतः स्वर्गत्वावच्छेदेन सामान्यतो व्यभिचारग्रहेऽपि न क्षतिः।

न चैवं व्यभिचारग्रहेऽपि दण्डविशेषत्वादिना घटकारणताग्रहः स्यात्, घटत्वावच्छेदेन सामान्यतो व्यभिचारग्रहस्य सामान्यतः कारणताया ग्रहविरोधित्वे निष्प्रत्यूहत्वात्। प्रकृतेऽपि स्वर्गत्वावच्छेदेन सामान्यतो न यागकारणताग्रहः। दण्डविशेषत्वादिना सामान्यतो विशेषावगाही कारणताग्रहस्तु न संभवति। घटत्वावच्छिन्नं प्रति दण्डत्वादिना सामान्यतः कारणत्वस्यावश्यकत्वे विशेषघटितकारणताया एवाप्रसिद्धेः। प्रकृते तु स्वर्गत्वावान्तरवैजात्यावच्छिन्नं प्रति यागत्वेन कारणतायाः सत्त्वात् सामान्येन तदवगाही कारणताग्रहः संभवत्येवेति लिङो न शक्त्यानन्त्यम्। युष्मच्छब्दस्य तु तत्तदिच्छीयोद्देश्यतायाः संसर्गविधयापि संकेतप्रवेशे कुतो न शक्त्यानन्त्यमिति विभाव्यते — तदा युष्मच्छब्दस्य स्वप्रयोगोपधायकेच्छीयोद्देश्यत्वावच्छिन्नविशेष्यतानिरूपितसमवेतत्वसंसर्गावच्छिन्नप्रकारतावच्छेदकत्वसंबन्धेन स्वोपलक्षितधर्मविशिष्टे शक्तिः। युष्मच्छब्दपरस्य स्वशब्दस्योभयत्र परिचायकतया कथनमिति कालान्तरीयपुरुषान्तरीयेच्छाघटितसंबन्धेन विद्यमानस्य एतत्पुरुषप्रयुक्तस्य युष्मच्छब्दस्य अन्यत्रासत्त्वान्नातिप्रसङ्गः। तत्तद्युष्मच्छब्दस्य तत्तत्कालीनज्ञानेच्छाविषयेऽर्थतः शक्तिपर्यवसानेऽपि न शक्त्यानन्त्यम्। युष्मच्छब्दस्य सामान्यरूपेणैव संकेतग्रहे प्रवेशात्।

प्रकारान्तरेण युष्मच्छब्दार्थः

यदि च युष्मच्छब्दात् चैत्रत्वादिना चैत्रादिर्न प्रतीयते, तथा सति "त्वं चैत्र" इत्यादौ "चैत्रश्चैत्र" इत्यादाविव निराकाङ्क्षतयानन्वयः स्यादिति विभाव्यते, तदा ज्ञानेच्छाप्रकार एव युष्मच्छब्दस्य शक्तिः। तत्र ज्ञानेच्छायाः स्वप्रयोज्यवाक्यप्रयोगोपधायकेच्छीयोद्देश्यत्वावच्छिन्नज्ञानत्वावच्छिन्नविशेष्यतानिरूपितसमवेतत्वसंसर्गतानिरूपितत्वसंबन्धेन वैशिष्ट्यं प्रकारत्वे, विशिष्टप्रकारत्वस्य वैशिष्ट्यं धर्मिणि स्वरूपसंबन्धेन बोध्यम् इति ज्ञानेच्छाविशिष्टप्रकारत्वविशिष्टो युष्मच्छब्दार्थः। स्वप्रयोज्येत्याद्युपादानात् कालान्तरीयायाः स्वज्ञानेच्छायाः प्रकारे नातिप्रसङ्गः। स्वशब्दस्य ज्ञानेच्छापरिचायकत्वान्न शक्त्यानन्त्यम् इति। एवं ज्ञानेच्छायाः स्वप्रयोज्यवाक्यप्रयोगोपधायकेच्छीयसमवायेन वैशिष्ट्यवानस्मच्छब्दार्थ इति।

एवं "चैत्र त्वं पश्य" इत्यादौ चैत्रप्रकारकज्ञानेच्छाप्रकारः आशंसाविषयदर्शनकर्ता ज्ञानेच्छाप्रकार इति शाब्दबोधस्य विशेषणविशिष्टयोरुद्देश्यतावच्छेदकविधेययोः विशेषणभेदात् भेदेनोपपत्तिः "कनककुण्डलवान् मणिकुण्डलवान्" इतिवत्।

एवं म्लेच्छमुद्दिश्य आचार्यैः प्रयुज्यमानस्य "शुङ्गापसर" इत्यादिवाक्यस्य म्लेच्छे संबोध्यत्वयुष्मदर्थत्वयोर्निराबाधतया शक्तिभ्रमजन्यत्वसंभवेऽपि अगृहीतसंकेतकोद्देश्यकतया उपहास्यत्वं संभवत्येव। शक्तिभ्रमजन्यत्वस्य उपहास्यत्वाप्रयोजकत्वात्। तथा सति अपभ्रंशेऽप्युपहास्यत्वापत्तेः। इच्छाविषयज्ञानस्य संबोधनार्थत्वे तत्समवायितावच्छेदकत्वोपलक्षितधर्मस्य वा युष्मत्पदप्रवृत्तिनिमित्तत्वेऽभ्युपेतेऽपि शक्तिभ्रमजन्यत्वं नोपहास्यताप्रयोजकम्। अन्यथा भगवज्ज्ञानस्य सिद्धतया तत्रेच्छाविरहात् भगवत्संबोध्यकस्य भगवत्परयुष्मच्छब्दघटितस्य

"स्वकर्मफलनिर्दिष्टां यां यां योनिं व्रजाम्यहम्।
तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढास्तु मे।"

इत्यादिवाक्यस्य शक्तिभ्रमजन्यतया उपहास्यत्वापत्तेः। अगृहीतपदसंकेतकोद्देश्यकवाक्यत्वस्योपहासप्रयोजकत्वे भगवतो गृहीतसंकेतकत्वात् तदुद्देश्यकवाक्यस्य नोपहास्यत्वमिति ज्ञानेच्छायाः संबोधनप्रथमार्थत्वे भगवतः संबोध्यत्वं निराबाधमेव। भगवत्प्रत्यक्षस्य सिद्धत्वेऽपि भगवतः शाब्दज्ञानं जायतामितीच्छायाः संभवात्। न च भगवतः शाब्दबोधे कथं तादृशी इच्छा संभवेत् इति वाच्यम्। बाधितविषयेऽपीच्छायाः संभवात्।

"नवपल्लवसंस्तरेऽपि ते मृदु दूयेत यदङ्गमर्पितम्।
तदिदं विषहिष्यते कथं वद वामोरु चिताधिरोहणम्।।"

इत्यादौ मृतेन्दुमतीवचनशुश्रूषादेर्दर्शनात्, "स्वकर्मफल" इत्याद्युक्तवाक्ये—

"विश्वरूपकृतविश्व कियत्ते वैभवाद्भुतमणौ हृदि कुर्वे।
हेम नह्यति कियन्निजचारे काञ्चनाद्रिमधिगत्य दरिद्रः।।"

इत्यादौ भगवतः संबोध्यत्वं निष्प्रत्यूहमेव।

एवं "जानीहि नाथ दीनोऽस्मि" इत्यादौ दीनाभिन्नमत्कर्तृकभवनविषयके आशंसाविषयत्वत्कर्तृकज्ञाने, अथवा भवनकर्तृत्वान्वितदीनाभिन्नमद्विषयकस्य आशंसाविषयज्ञानस्य कर्तृत्वान्विते त्वंपदार्थे नाथप्रकारकज्ञानेच्छाप्रकारत्वस्य संबुद्धिप्रथमान्तार्थस्यान्वयः। नाथस्य मदीयदीनभावविषयज्ञानविषयकं ज्ञानं जायताम् इतीच्छायाः संभवात्। इच्छाविषयत्वस्य ज्ञानविषयकज्ञानवृत्तित्वपर्यन्तधावनं मदीयदीनभावज्ञानस्य अपेक्षात्मकत्वार्थमपेक्षाज्ञानस्य अनुव्यवसायविषयत्वनियमात् इति।

यत्र संबोधनघटितवाक्यं "नारायणि नमोऽस्तु ते" इत्यादिस्वरूपं मुहुः श्रूयते, तत्र ज्ञानान्तरेच्छया संबोध्यत्वनिर्वाहः। एवम् "अकाण्डशक्तिनिर्भिन्न" इत्यादिवाक्ये ज्ञानान्तरेच्छया वक्तुरपि संबोध्यत्वनिर्वाहः। एवम्—

"शोचनीयासि वसुधे या त्वं दशरथच्युता।
रामहस्तमनुप्राप्य कष्टात् कष्टतरं गता।।"

इत्यादावचेतनस्य वसुधादेः बाधितविषयेऽपीच्छासंभवेन ज्ञानेच्छाप्रकारतया संबोध्यत्वयुष्मत्पदप्रतिपाद्यत्वयोः निर्वाहेऽपि कष्टतरगततादात्म्यान्वयबाधात् वसुधाशब्दस्य लोके लक्षणा। तत्प्रयोजनं तु रामवशगतत्वरूपवसुधाधर्मस्य लोके प्रतिपत्तिरिति। एवं सति गृहीतपदसंकेतकोद्देश्यकतया नास्य वाक्यस्य उपहास्यत्वमिति दार्शनिकसिद्धान्तः चेतनतादात्म्यारोपेण वसुधायाः संबोध्यत्वं युष्मत्पदप्रतिपाद्यत्वं कष्टतरगततादात्म्यान्वयश्च संभवतीति। अत एव तुल्ये प्रस्तुते तुल्यस्याभिधानमिति अप्रस्तुतप्रशंसालंकारः ईदृशस्थले स्फुरति। पुत्रशोकसंतप्तस्य वक्तुर्ब्राह्मणस्य प्रस्तुतस्य तादात्म्यारोपेण युष्मत्प्रतिपाद्यत्वसंबोध्यत्वयोर्वसुधायामुपपत्तौ युष्मदर्थे संबोधनान्तार्थे वसुधातादात्म्येनाध्यवसितः प्रस्तुतोऽर्थोऽन्वेति व्यञ्जनयोपस्थित इति रसविद्याविदः। युष्मदेकवचनादिव्यवस्था पूर्वोक्ता स्मर्तव्या। "श्रीस्त्राहि" इत्यादौ संबोधनैकवचनस्य स् इत्यस्य श्रूयमाणत्वात् स्त्वेनैव वाचकत्वम्। हरे, विष्णो, राम इत्यादौ लोपः सः [स् इत्यस्य] स्मारकः।

संबोध्यत्वस्य क्रियाविशेषणत्वम्

तदिदं संबोध्यत्वं क्रियायां विशेषणम्। "एकतिङ् वाक्यम्" इति कात्यायनवाक्यात्। तत्र भाष्यकारेण "ब्रूहि देवदत्त" इति वाक्यमुक्तम्। तस्यायमभिसन्धिः — "आमन्त्रितस्य च"[१] इति सूत्रेण आमन्त्रणार्थकप्रत्ययान्तपदानां पदात् पराणामेव निघातो नाम सर्वानुदात्तः स्वरो विधीयते। स च देवदत्तपदे तदा स्यात् यदि देवदत्तपदब्रूहिपदयोर्व्यपेक्षा स्यात्। पदयोर्व्यपेक्षारूपसामर्थ्यविरहे "समर्थः पदविधिः" इति व्यवस्थापनात् पदसंबन्धिनो निघातविधेरप्रवृत्तेः देवदत्तपदे निघातो न स्यात्। तथा च वार्तिकम् — "समानवाक्ये निघातयुष्मदस्मदादेशाः वक्तव्याः"[२] इति। समानवाक्यं समर्थवाक्यमेव। ब्रूहिपददेवदत्तपदयोर्व्यपेक्षा तदैव भवति यदि देवदत्तसंबोध्यत्वं वचनक्रियायामन्वेति।

न च ब्रूहीत्यत्र तिङर्थकर्तरि संबोधनप्रथमान्तार्थस्य देवदत्तस्य तादात्म्येन, संबोधनार्थस्य वा समवायेनान्वयोऽस्तु, तावताप्येकवाक्यत्वरूपसामर्थ्यमुपपद्यत इति वाच्यम्। मध्यमपुरुषार्थे कर्तरि युष्मदर्थातिरिक्तस्य तादात्म्येनान्वयायोगात्। व्रजानि देवदत्तेत्यत्र तिङर्थकर्तरि संबोधनप्रथमान्तार्थस्य तादात्म्येन संबोधनार्थस्य समवायेन अयोग्यतया अन्वयासंभवाच्च। तथा चोक्तं हरिणा —

संबोधनपदं यच्च तत् क्रियायां विशेषणम्।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति।।

तस्मात् प्रातिपदिकार्थविशेषितं संबोध्यत्वं क्रियायां विशेषणम्। तिङन्तविनाकृतं वाक्यमेव नास्तीति कात्यायनानुसारिणो वैयाकरणाः। फणिभाष्यकृतस्तु — "एकतिङ् वाक्यम्"[३] इति नानुमन्यन्ते। "पश्य मृगो धावति, जानीहि जगत् जगन्नाथाज्जायते, अस्ति साधवः सीदन्ति, भवति दुर्जना मोदन्ते" इत्याद्यनेकतिङन्तमप्येकं वाक्यं मन्यन्ते। तत्र मृगकर्तृकधावनस्य धावनकर्तृमृगस्य वा कर्मतया दर्शने, जगत्कर्तृकनाथहेतुकजननस्य, नाथहेतुकजननकर्तृजगतो वा कर्मतया ज्ञाने, साधुकर्तृकसीदनस्य सीदनकर्तृसाधोर्वा कर्तृतया सत्तायां दुर्जनकर्तृकमोदस्य मोदकर्तृदुर्जनस्य वा कर्तृतया संसर्गेण भवने यथादर्शनमन्वयोपगमात् एकवाक्यतानिर्वाहः। तथोक्तं च —

सुबन्तं हि यथानेकं सुबन्तस्य विशेषणम्।
तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम्।।

---

[१] सू. ६.१.१९८

[२] वा. ४७१४

[३] वा. ११९९

अत एव "तिङ्ङतिङः"[१] इति सूत्रम् अतिङन्तात् परं तिङन्तं निहन्यत इत्यर्थकम् "अग्निं दूतं वृणीमहे" इत्यादौ तिङन्ते वृणीमहेशब्दे निघातस्वरं विदधाति। तत्र सूत्रे "पचति भवति" इत्यादौ भवतीत्यादितिङन्ते निघातवारणाय अतिङ इति पदं सार्थकम्। अन्यथा तिङन्तयोः एकवाक्यताविरहे सामर्थ्याश्रितनिघातविधेः तिङन्तपरे तिङन्ते प्रसक्तिर्न भवतीति व्यर्थमेवातिङ्पदं स्यात्। न च एकतिङ् वाक्यम् इत्यनेन नानेकतिङन्तवाक्यस्य निषेधः, किं तु वाक्यं सतिङन्तमेवेति नियम इति वाच्यम्।

"कष्टा वेधव्यथा कष्टं नित्यमुद्वहनक्लमः।
श्रवणानामलंकारः कपोलस्य तु भूषणम्।।"

इत्यादेः तिङन्तशून्यवाक्यस्य दर्शनात्।

न च "अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति" इति कात्यायनवचनात् तिङन्तशून्यवाक्येऽस्तीत्यध्याहार इति वाच्यम्। अध्याहारे मानाभावात्। तिङन्तविनाकृतं वाक्यं नानुभावकमिति व्युत्पत्तिरपि न संभवति। तथा हि — प्रथमान्ततिङन्तघटितवाक्यस्थले प्रथमान्तार्थस्य तिङन्तेऽन्वयोऽभ्युपेयते। "भूतले न घट" इत्यादौ अस्तीत्यध्याहारे तिङर्थे नञर्थविशेषणघटस्यान्वयासंभवात्। एकत्र विशेषणतयोपस्थितस्यान्यत्रानन्वय इति व्युत्पत्तेः। न च भूतलवृत्तित्वाभावो घटेऽन्वेतीति वाच्यम्। कारकस्य कारकान्वितनञर्थस्य वा क्रियातिरिक्ते अन्वयस्याव्युत्पन्नत्वात्। न च भूतलाधेयत्वाभावः अस्तीत्यत्र धात्वर्थ एवान्वेति, धात्वर्थविशेषणे तिङर्थकर्तरि घटस्य तादात्म्येनान्वय [घटाभिन्नकर्तृकसत्ता भूतलवृत्तित्वाभाववती इति बोधः] इति वाच्यम्। घटपदस्यातीतघटपरतायां घटस्य तिङर्थकर्तरि योग्यताविरहात् तादात्म्येनान्वयसंभवात्।

न च भूतलाधेयत्वमध्याहृतास्तिधात्वर्थे सत्तायामन्वेति, तद्विशेषणे तिङर्थकर्तरि घटविशेषितो नञर्थभेदोऽन्वेति। भूतलाधेयत्ववती सत्ता घटभिन्नकर्तृका इति बोध इति वाच्यम्। तथा सति "घटवत्यपि भूतले घटान्योऽस्ति" इतिवत् "घटो नास्ति" इति प्रयोगापत्तेः।

न च भूतलाधेयत्वान्वितेनाध्याहृतास्तिधात्वर्थेन सत्तया विशेषितस्य तिङर्थकर्तुः नञर्थभेदेऽन्वयः, तथान्वितो भेदो घटेऽन्वेति। "भूतलनिरूपिताधेयत्ववत्सत्ताश्रयकर्तृभिन्नो घट" इति बोध इति वाच्यम्। तथा सति शाब्दबोधस्य क्रियामुख्यविशेष्यकत्वनियमरक्षार्थम् अस्तीत्यध्याहारो व्यर्थ एव। तादृशनियमभङ्गस्य स्वयमेव स्वहस्तितत्वात् इति।

---

[१] सू. ८.१.२८

अत एव "भूतले न घट" इत्यादौ प्रतियोगितासंबन्धेन प्रातिपदिकार्थविशेषितस्य स्वार्थात्यन्ताभावस्यान्वयबोधने नञनुयोगिवाचकपदे सप्तमी अपेक्ष्यते। नापेक्ष्यते विभक्त्यर्थविशेषितस्येति सर्वतान्त्रिकसिद्धा व्यवस्थितिरिति।

एवं सुबन्तसमुदायः तिङन्तसमुदायः सुबन्ततिङन्तोभयसमुदायः इति त्रिविधं वाक्यम्। तत्र प्रधानार्थे संबोध्यत्वान्वय इति महाभाष्यानुसारिणः।

एवं "चैत्रः पचति" इत्यादौ धात्वर्थः प्रधानमिति शाब्दिकाः। तिङर्थो भावना प्रधानमिति भाट्टाः। प्रथमान्तार्थः प्रधानमिति तार्किकाः, तदनुसारिणोऽन्ये दार्शनिकाः। तेषां तेषां तत्र तत्र प्रधानेऽर्थे संबोध्यत्वस्यान्वयः। एवं संबोधनान्तपदं तिङन्तमात्रसाकाङ्क्षमिति भ्रमः।

एवं प्रथमार्थः संबोध्यत्वं लिङ्गं संख्या च नञर्थेऽभावे नान्वेति। तेन "यज्ञदत्तः समागतो देवदत्तेन" इत्यादौ समागतयज्ञदत्ते देवदत्तसंबोध्यत्वाभावस्य न प्रतीतिः, न वा "घटो न" इत्यादौ लिङ्गसंख्याभावप्रतीतिरिति।

नागेशमतं संबोधनं लघुमञ्जूषायाम्

'संबोधने च'[१] इत्यनेन संबोधनाधिक्ये विवक्षिते प्रातिपदिकार्थे वर्तमानात् प्रातिपदिकात् प्रथमा। तत्र संबोधनं नाम अभिमुखीभावः। तस्य फलं प्रवृत्तिनिवृत्ती। यत्र पूर्वं ज्ञातोऽर्थः (सिद्धोऽर्थः) तस्याभिमुखीभाव एव संबोधनविभक्तिः भवति। तेन संबोधनविभक्तिः अनुवाद्यविषया (सिद्धविषया) संबोध्यतावच्छेदकरूपेण संबोध्यस्य सिद्धिं विना संबोध्यत्वासंभवात्। तेन 'राजा भव युध्यस्व, इन्द्रशत्रुर्वर्धस्व' इत्यादौ न संबोधनविभक्तिः, राजत्वादेः असिद्धत्वेन अनुवाद्यत्वासंभवात्। (अराजानं कंचन योग्यमुद्दिश्य कश्चिदाशास्ते 'त्वं राजा भव' इति। अत्रेदानीं राजत्वमसिद्धम्। अतो न संबोधनविभक्तिः।)

केचित्तु — संबोधनं सम्यक् ज्ञापनं = ज्ञानानुकूलो व्यापारः। संबोध्यस्य ज्ञानमुत्पादयितुमेव संबोधनविभक्त्यन्तपदघटितवाक्यस्य प्रयोगात्। तत्फलं प्रवृत्तिनिवृत्ती। ज्ञापने सम्यक्त्वं च अवश्यकर्तव्यत्वविषयकज्ञापनानुकूलत्वम्। तथा च अवश्यकर्तव्यत्वविषयकज्ञापनानुकूलो व्यापारः संबोधनमित्युक्तं भवति। तादृशज्ञानानुकूलव्यापारश्च संबोधनविभक्त्यन्तपदघटितवाक्यप्रयोग एव। ममेदमवश्यं कर्तव्यमित्याकारकं यत् ज्ञानं तदनुकूलव्यापारानुकूलव्यापार इति यावत्।

---

[१] सू. २.३.४७

यत्तु सम्यग्ज्ञानानुकूलो व्यापारः संबोधनम्। ज्ञाने सम्यक्त्वं च प्रयोक्त्रिच्छा-विषयत्वम्। प्रयोक्तुः इच्छाविषयीभूतं यत् ज्ञानं तदनुकूलो व्यापारः संबोधनमिति।

तन्न। वाक्यजन्यज्ञाने प्रयोक्त्रिच्छाविषयत्वस्य वाक्यप्रयोगानुमेयतया तस्य विभक्तिबोध्यतावच्छेदककोटौ निवेशे मानाभावात्। वाक्यजन्यं ज्ञानं वाक्यप्रयो-क्त्रिच्छाविषयः तत्प्रयुज्यमानवाक्यजन्यत्वात् इत्यनुमानम्। अथ वा अयं प्रयोक्ता श्रोतृगतज्ञानविषयकेच्छावान् तज्ज्ञानोद्देशेन शब्दप्रयोक्तृत्वात्। अनन्यलभ्यः शब्दार्थः इति न्यायात्। संबोधनपदाघटितवाक्यप्रयोगस्थलेऽपि बोध्यबोधे प्रयोक्तु-रिच्छाविषयत्वस्यानुमानात्। अन्यथा प्रयोक्तुरिच्छाविरहे वाक्यप्रयोग एव न स्यात्। 'त्वं पच' इत्यादौ प्रयोज्यनिष्ठायाः प्रवृत्तेः प्रयोक्त्रिच्छाविषयत्वस्य प्रवर्तनानुमेयत्वदर्शनाच्च। अयं प्रेर्यनिष्ठप्रवृत्तिविषयकेच्छावान् तज्जनकव्यापार-वत्त्वात् इत्यनुमानम्।

हेशब्दादिकं संबोधनतात्पर्यग्राहकम्। अचेतने तु चेतनत्वारोपेण गौणः संबोधनविभक्त्यन्तपदप्रयोगः। संबोधनं चाभिमुखीकरणपूर्वक-अज्ञातार्थविषयक-ज्ञानानुकूलव्यापारानुकूलव्यापारः प्रयोक्तृनिष्ठः। स विभक्त्यर्थः। प्रयोक्तृगतव्यापार-जन्यो यो ज्ञानानुकूलो व्यापारः तदाश्रयत्वं संबोध्यत्वम्। एवं च 'चैत्र जलमाहर' इत्यत्र प्रयोक्तृगतो यो व्यापारः शब्दप्रयोगरूपः, तज्जन्यो व्यापारः तादृशशब्द-श्रवणरूपः, स च अज्ञातजलाहरणविषयकज्ञानानुकूलः तदाश्रयत्वं चैत्रस्येति तस्य संबोध्यत्वम्। तत्त्वेन बुद्धश्च संबोध्यत्वेन रूपेण ज्ञातश्च स्वनिष्ठज्ञानसाकाङ्क्षः स्वं प्रयोज्यः तन्निष्ठं यत् ज्ञानं जलमाहरणीयमिति ज्ञानं तद्विषयः जलाहरणं तत्साकाङ्क्षः इति हेतोः ज्ञेयेऽर्थे जलाहरणादौ तस्य संबोध्यत्वस्यान्वयः। स एव च जलाहरणादिः ज्ञाप्योऽर्थः। तेन 'चैत्र! जलमाहर' इत्यादौ चैत्रनिष्ठसंबोधन-विषयः जलाहरणं, राम त्रायस्व इत्यादौ रामनिष्ठसंबोधनविषयः जलाहरणम् इत्याकारकः शाब्दबोधः।

अभिमुखीकरणं नाम स्ववचनार्थग्रहणे सादरत्वकरणम्। स्वं शब्दप्रयोक्ता तस्य वचनं वाक्यम्। तदर्थज्ञाने सादरत्वकरणं प्रयोज्यस्य सादरत्वसंपादनम्। सादरत्व-व्यञ्जकं च मुखपरावृत्त्यादि। 'हे राम त्वं सुन्दरः' इत्यादौ 'असि' इत्यध्याहारः। एवं च 'धिङ्मूर्ख' इत्यादौ क्रियाध्याहारे प्रथमा, तदभावे द्वितीया — इत्याहुः।

तन्न। 'सिद्धस्याभिमुखीभावमात्रं संबोधनं विदुः' इति हरिग्रन्थविरोधात्।

संबोधनपदस्य क्रियाविशेषणत्वम्

संबोधनपदं यच्च तत् क्रियायां विशेषणम्।
व्रजानि देवदत्तेति निघातोऽत्र तथा सति।।

इति भर्तृहरिः। अत्र व्याख्याता पुण्यराजः - 'आख्यातं सविशेषणं वाक्यम्' इति समर्थसूत्रभाष्ये वाक्यलक्षणमुक्तम्। 'व्रजानि देवदत्त' इत्यादौ संबोधनपदार्थस्य क्रियाविशेषणत्वाभावे तिङन्तस्य आख्यातस्य सविशेषणत्वाभावेन वाक्यलक्षण-विरहात् 'समानवाक्ये' इति प्रकृत्य 'आमन्त्रितस्य च'[1] इति सूत्रेण पदात्परस्य अपादादिस्थस्य आमन्त्रितस्य सर्वस्यानुदात्तः स्यादित्यर्थकेन विहितः देवदत्त इत्यस्य सर्वानुदात्तस्वरः न स्यात्। अपि च संबोधनविभक्तेरनुवाद्यविषयकतया अनुवाद्यस्य च विधेये एवान्वयेन क्रियाया एव विधेयतया तस्यामेवान्वय इति युक्तम् इति। संबोधनविभक्त्यन्तार्थस्य क्रियायामेवान्वय इत्येतच्च 'न ङिसंबुद्ध्योः'[2] इति सूत्रे भाष्ये ध्वनितम्। तत्र हि — संबुद्ध्यन्तानां राजन् बृन्दारक इत्यादौ न समासः। इह तावत् समानार्थेन वाक्येन भवितव्यं समासेन च। यश्चेहार्थो वाक्येन गम्यते नासौ जातुचित् समासेन गम्यते। अवयवसंबोधनं वाक्येन गम्यते। समुदायसंबोधनं समासेन — इत्युक्तं भाष्ये। 'हे राजन्, हे बृन्दारक' इत्यनयोः संबुद्ध्यन्तयोः गच्छेत्यादिक्रियायामेवान्वयेन परस्परमनन्वयात् एकार्थीभावाभावात् तयोः समासो नेति भष्याशयः। अनेन संबुद्ध्यन्तस्य क्रियायामेवान्वयः इति ध्वन्यते। अन्यथा संबुद्ध्यन्तार्थयोः परस्परमन्वये समुदायसंबोधनस्य भानात् वाक्यसमासयोरर्थभेदकथनं भाष्यकृतोऽसंगतं स्यात्।

तदुक्तं हरिणा च —

सिद्धस्याभिमुखीभावमात्रं संबोधनं विदुः।
प्राप्ताभिमुख्यो ह्यर्थात्मा क्रियासु विनियुज्यते।।[3] इति।।

संबोधनं न वाक्यार्थ इति वृद्धेभ्य आगमः।।[4]

एवं च केचिन्मते उक्तः यः संबोधनपदार्थः 'अभिमुखीकृत्य अज्ञातार्थज्ञानानु-कूलव्यापारानुकूलव्यापारः' तस्य फलभूतः अभिमुखीभावः = प्रयोक्तृवचनार्थ-ग्रहणे सादरत्वभावनं स एव संबोधनपदार्थः न तु सर्वः। तदुक्तम् अभिमुखी-

---

[1] सू. ८.१.१९
[2] सू. ८.२.८
[3] सू. ३.७.१६३
[4] सू. ३.७.१६४

भावमात्रमिति। एवं च क्रियासु विनियोग(प्रवर्तन)फलकोऽभिमुखीभावः संबोधनमिति सूचितम्।

अत्र सिद्धस्येत्युक्त्या संबोध्यस्यानुवाद्यत्वं, विनियुज्यते इत्यनेन प्रवर्तना-विषयक्रियासंबन्धस्तस्य संबोध्यस्येति सूचितम्। एवं च 'राम त्राहि' इत्यतः अभिमुखीभवद्रामोद्देश्यकप्रवर्तनाविषयः रक्षणमिति बोधः। 'व्रजानि देवदत्त' इत्यादौ जानाहीत्यध्याहारो वाक्यैकदेशन्यायेन तत्र व्रजनस्य ज्ञाधात्वर्थकर्मत्वात् उभयोः समानवाक्यस्थत्वम्। एवं चाभिमुखीभावरूपस्य संबोधनस्य प्रकृत्यर्थ-विशेषणत्वमिति फलितम्।

यत्तु संबोधनस्य प्रकृत्यर्थविशेषणत्वे 'भो ब्राह्मणाः त्वं पच' इति प्रयोगा-पत्तिरिति ।

तन्न। शब्दशक्तिस्वाभाव्येन संबोधनविभक्त्यन्तपदसमभिव्याहारे युष्मदः तत्पद-बोध्ययावत्परामर्शकत्वस्य व्युत्पत्तिसिद्धत्वेन एकवचनस्यासाधुत्वात् इति।

भाट्टरहस्यरीत्या संबोधनविभक्त्यर्थः[१]

सुबर्थस्यापि लिङ्गसंख्याभिन्नस्य प्रकारतया भावनायामेवान्वयः। तथा हि प्रथमार्थस्तावत् लिङ्गसंख्याभिन्नः तस्यां प्रकारत्वेनान्वेति। न च प्रथमायाः साधुत्व-मात्रार्थमुच्चारणेन तदर्थे प्रमाणाभाव इति वाच्यम्। संबोधनेऽभिमुखत्वस्यापि भासमानत्वेन साधुत्वमात्रत्वासिद्धेः।

अभिमुखत्वं च प्रकृतशाब्दबोधाश्रयत्वप्रकारकवक्तृभिन्नविशेष्यकवक्त्रिच्छा-विषयीभूतशाब्दज्ञानवत्त्वम्। प्रकृतशाब्दबोधः संबोधनविभक्तिसमभिव्याहृतवाक्य-जन्यशाब्दबोधः तदाश्रयत्वप्रकारिका वक्तृभिन्नविशेष्यिका च या वक्तुरिच्छा तद्विषयभूतं यत् शाब्दज्ञानं तदाश्रयत्वम् अभिमुखत्वमित्यर्थः। 'देवदत्त गामानय' इत्यस्य देवदत्तः गामानयेतिवाक्यजन्यशाब्दबोधाश्रयो भवतु इति वक्तुः यज्ञदत्त-स्येच्छा - सा च वाक्तृभिन्नदेवदत्तविशेष्यिका प्रकृतशाब्दबोधाश्रयत्वप्रकारिका च। तस्यामिच्छायां विषयभूतं यत् शाब्दज्ञानं तद्वत्त्वं देवदत्तस्यास्तीति समन्वयः। अथ वा प्रकृतशाब्दबोधनिष्ठविषयतानिरूपितवक्तृभिन्ननिष्ठवक्त्रिच्छाविषयतावत्त्वमभि-मुखत्वम्। प्रकृतशाब्दबोधनिष्ठविषयतानिरूपिता (प्रकारतानिरूपिता) या वक्तृ-भिन्ननिष्ठा वक्त्रिच्छीया विषयता (विशेष्यता) तद्वत्त्वमित्यर्थः। इच्छायाः आकारस्तु

[१] पृ. ७२-७३

पूर्वोक्त एव तदीया प्रकृतशाब्दबोधनिष्ठप्रकारतानिरूपिता विशेष्यता देवदत्तेऽस्तीति समन्वयः। युष्मत्पदशक्यतावच्छेदकमपि तदेव।

न च यत्र स्नुषां बोधयितुं कन्यां संबोध्य वाक्यप्रयोगः 'कन्ये इदं कुरु' इति तत्र स्नुषायाः अपि तादृशबोधाश्रयत्वात् संबोध्यत्वस्य तस्यामतिव्याप्तिः इति वाच्यम्। स्नुषायां संबोध्यत्वसत्त्वेऽपि तत्संबोधनस्य शब्दतात्पर्यविषयत्वाभावेन तस्यां संबोधनप्रथमायाः अप्रसङ्गात्। तात्पर्यविषयत्वे च भवत्येव ततः प्रथमा। अत एव चेतने एव मुख्यं संबोधनम्, अचेतने तु ज्ञानवत्त्वारोपेण गौणो व्यवहारः।

एवं च 'देवदत्त गामानय' इत्यत्र अभिमुखत्वं कर्तृत्वं चेत्युभयं प्रथमायाः अर्थः। उभयत्र आधेयतासंबन्धेन प्रातिपदिकार्थस्यान्वयः। अभिमुखत्वस्य शाब्द-ज्ञानात्मकस्य विषयतासंबन्धेन भावनायां कर्तृत्वस्य च निरूपकतासंबन्धेन तस्यामन्वयः। देवदत्तनिष्ठाभिमुखत्वविषयीभूता देवदत्तनिष्ठकर्तृत्वनिरूपिका च गोकर्मकानयनानुकूलभावना इति बोधः।

'देवदत्त चैत्रो गामानयति' इति वाक्यात् देवदत्तनिष्ठशाब्दज्ञानविषयभूता चैत्रनिष्ठकर्तृत्वनिरूपिका गोकर्मकानयनभावनेति बोधः। तत्राभिमुखत्वमात्रं संबो-धनप्रथमार्थः। कर्तृत्वं तु चैत्रपदोत्तरप्रथमार्थः।

'चैत्र! मैत्रो ग्रामं गच्छतु' इत्यत्र लोडर्थप्रार्थनाविषयभूतायां भावनायां विषय-त्वसंबन्धेन संबोधनस्य स्वरूपसंबन्धेन स्वनिष्ठव्यापारप्रयोज्यत्वस्य चान्वयः। व्यापारप्रयोज्यत्वे च लक्षणा।

'चैत्र! मैत्रः कीदृश?' इत्यादौ अस्तिर्भवन्तीपरः इत्यनुशासनानुसारेण क्रिया-पदाध्याहारस्यावश्यकत्वात् शाब्दबोधनिर्वाहः।

इति संबोधनप्रथमार्थविचारः

द्वितीयार्थविचारः

कारकचक्रोक्तरीत्या कारकद्वितीयार्थः[1]

भवानन्दतर्कवागीशाः द्वितीयार्थमेवं निरूपयन्ति — "कर्मणि द्वितीया"[2] इत्यनुशासनात् कर्मत्वं द्वितीयार्थः। कर्मत्वं न तावत् करणव्यापार्यत्वम्। तद्धि करणजन्यक्रियानुकूलव्यापाराश्रयत्वम्। तच्च "दात्रेण धान्यं लुनाति" इत्यादौ हस्तादिकरणजन्यहस्तसंयोगादिव्यापाराश्रये दात्रेऽतिव्याप्तम्।

नापि परसमवेतक्रियाजन्यफलशालित्वम्। कर्मापेक्षया अन्यस्मिन् समवेता या क्रिया तज्जन्यं यत् फलं तदाश्रयत्वमिति तदर्थः। "चैत्रः ग्रामं गच्छति" इत्यादौ कर्म ग्रामः तदन्यचैत्रसमवेता गमनक्रिया तज्जन्यसंयोगरूपफलाश्रयत्वात् ग्रामस्य कर्मत्वम्। चैत्रस्य गमनजन्यं यत् फलं संयोगः तदाश्रयत्वमस्ति, संयोगस्य चैत्रग्रामोभयनिष्ठत्वात्। तथापि स्वसमवेतक्रियाजन्यफलाश्रयत्वमेवास्तीति न तस्य कर्मत्वापत्तिः। — इति युक्तम्।

गमिधात्वर्थगमनक्रियया पूर्वदेशविभागस्य उत्तरदेशसंयोगस्य च जननात् तादृशक्रियाजन्यविभागरूपफलाश्रयत्वस्य पूर्वदेशे सत्त्वात् तस्य कर्मत्वापत्त्या यदा पूर्वदेशात् अपरदेशं गच्छति तदा पूर्वदेशं गच्छतीति प्रयोगस्य साधुतापत्तेः।

एवं पतधातोः अधस्संयोगावच्छिन्नक्रियार्थकतया तज्जन्यविभागरूपफलाश्रयत्वस्य पूर्वदेशे सत्त्वात् पूर्वदेशं पततीति प्रयोगापत्तिः।

एवं विभागानुकूलव्यापारार्थकत्वात् त्यजधातोः तेन व्यापारेण पूर्वदेशविभागस्य उत्तरदेशसंयोगस्य च जायमानतया संयोगरूपफलाश्रयत्वमादाय उत्तरदेशस्य कर्मत्वापत्त्या उत्तरदेशं त्यजतीति प्रयोगप्रसङ्गः।

एवं स्पन्दधातोरकर्मकस्य क्रियार्थकतया तादृशक्रियाजन्यविभागरूपफलवत्त्वमादाय पूर्वदेशे, तादृशसंयोगरूपफलवत्त्वमादायोत्तरदेशे च कर्मत्वापत्तिः।

एवं "तीरे नदी वर्धत" इत्यादौ धात्वर्थस्य वृद्धेरवयवोपचयरूपायाः परंपरया तीरप्राप्तिफलकत्वात् तज्जन्यफलाश्रये तीरे कर्मत्वापत्तिः। (परंपरा स्वसमवायिसंयोगः, तीरप्राप्तिः = नदीतीरसंयोगः)

---

[1] पृ. १८

[2] सू. २.३.२

अत्रोच्यते। तत्तद्धात्वर्थतावच्छेदकफलशालित्वं तत्तद्धात्वर्थकर्मत्वम्। त्यजधातोः विभागावच्छिन्नव्यापारः, पतधातोरधस्संयोगावच्छिन्नव्यापारश्चार्थः। अवच्छिन्नत्वं च जनकतासंबन्धेन विशिष्टत्वम्। त्यजधात्वर्थेन संयोगस्य, गमधात्वर्थेन विभागस्य च जननेऽपि संयोगस्य त्यजधात्वर्थतावच्छेदकत्वविरहात् विभागस्य गमधात्वर्थतावच्छेदकत्वविरहाच्च न तदाश्रये कर्मत्वापत्तिः।

स्पन्दिधातोः वृधिधातोश्च केवलव्यापारवाचकतया फलावच्छिन्नव्यापारवाचकत्वविरहात् तद्धात्वर्थतावच्छेदकफलस्याप्रसिद्ध्या न पूर्वापरदेशयोस्तीरस्य च तत्कर्मत्वापत्तिः।

परसमवेतत्वस्यापि द्वितीयार्थत्वम्

ननु "चैत्रो ग्रामं गच्छति" इत्यत्र गमिधातोः संयोगावन्छिन्नव्यापारवाचकत्वेऽपि धात्वर्थतावच्छेदकस्य संयोगस्य चैत्रग्रामोभयनिष्ठतया चैत्रस्यापि तदाश्रयस्य कर्मत्वापत्तिः। तथा च "चैत्रः स्वं गच्छति" इति प्रयोगापत्तिः।

एवं "खगः तरुं त्यजति" इत्यत्र त्यजिधातोः विभागावश्छिन्नव्यापारवाचकत्वेऽपि धात्वर्थतावच्छेदकविभागस्य तरुखगोभयनिष्ठतया तदश्रयस्य खगस्यापि कर्मत्वापत्तिः। एवं च "खगं त्यजति" इति प्रयोगापत्तिः इति चेत् — न। धात्वर्थे परसमवेतत्वमिति विशेषणस्य दातव्यत्वात्। स्वभिन्नसमवेतो यो धात्वर्थः तन्निष्ठं यत् धात्वर्थत्वं तदवच्छेदकधर्मवत्त्वं तद्धात्वर्थकर्मत्वम्। स्वं - कर्मत्वेन अभिमतम्। स्वसमवेतायां क्रियायां स्वभिन्नसमवेतत्वविरहात् न स्वस्य कर्मत्वापत्तिः —

द्वितीयार्थस्यान्वयप्रकारः

ननु एतावता कर्मत्वमेतादृशमिति परिष्कृतम्। द्वितीयायाः कोऽर्थः? धात्वर्थश्च कः? द्वितीयार्थस्य कुत्र केन संबन्धेनान्वय इति न स्पष्टीकृतमिति चेत् — श्रूयताम्।

"चैत्रो ग्रामं गच्छति" इत्यत्र गमिधातोः संयोगानुकूलः व्यापारोऽर्थः। द्वितीयायाः आधेयत्वं भेदश्चार्थः। आधेयत्वे प्रकृत्यर्थस्य ग्रामस्य निरूपितत्वसंबन्धेन, भेदे च तस्य प्रतियोगितासंबन्धेनान्वयः। आधेयतायाः आश्रयतासंबन्धेन धात्वर्थतावच्छेदसंयोगे, भेदस्य स्वाश्रयसमवेतत्वसंबन्धेन चान्वयः। आख्यातार्थः कृतिः, तत्रानुकूलतासंबन्धेन धात्वर्थव्यापारस्यान्वयः। कृतेश्चाश्रयतया प्रथमान्तार्थचैत्रे इति ग्रामनिरूपिताधेयताश्रयसंयोगजनकः ग्रामप्रतियोगिकभेदवत्समवेतो यो व्यापारः तदनुकूलकृत्याश्रयः चैत्र इति बोधः।

वस्तुतस्तु आधेयत्वं भेदप्रतियोगितावच्छेदकत्वं च द्वितीयार्थः। उभयमपि आश्रयतासंबन्धेन फले क्रियायां च यथासंख्यमन्वेति। आधेयत्वे प्रकृत्यर्थस्य निरूपितत्वसंबन्धेन, भेदे चाधेयतासंबन्धेनान्वयः। तथा च "चैत्रो ग्रामं गच्छति" इति वाक्यात् ग्रामनिरूपिताधेयताश्रय (ग्रामनिष्ठ) संयोगजनिका ग्रामनिष्ठभेदप्रतियोगितावच्छेदिका च या क्रिया तदनुकूलकृतिमांश्चैत्र इति बोधः। संयोगजनकस्वनिष्ठक्रियायां स्वनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्ति। स्वस्मिन् क्रियावद्भेदविरहात् इति न "चैत्रः स्वं गच्छति" इति प्रयोगापत्तिः।

"चैत्रेण ग्रामो गम्यत" इति कर्मणि प्रयोगस्थले च ग्रामवृत्तिभेदप्रतियोगितावच्छेदकचैत्रनिष्ठकृतिजन्यगमनजन्यफलाश्रयो ग्राम इत्यन्वयबोधः। तृतीयायाः गमनान्वयिनी कृतिरर्थः। आख्यातस्य भेदप्रतियोगितावच्छेदकत्वमर्थः। तस्य धात्वर्थगमनेऽन्वयः। भेदे आधेयतासंबन्धेन ग्रामस्यान्वयः। फले धात्वर्थस्य जन्यतासंबन्धेन फलस्य चाश्रयतासंबन्धेन ग्रामेऽन्वयः। ग्रामस्य भेदविशेषणतया फलविशेषणतया च भानम् — इति।

जगदीशरीत्या कर्मत्वनिर्वचनम्[१]

यगन्तधातोरर्थो यस्तिङा स्वार्थेऽनुभाव्यते।
यत्रासौ कर्मता नाम कारकं कर्तृतेरः।।

इति कारिकया कर्मत्वस्य लक्षणमुक्तम्। यगन्तयद्धातूपस्थाप्ययादृशार्थप्रकारकान्वयबोधो जायते कर्तृताभिन्नस्तादृशोऽर्थः तद्धातूपस्थाप्यतादृशक्रियाकर्मत्वमिति तदर्थः। "ग्रामो गम्यत" इत्यत्र यगन्तधातूपस्थाप्या क्रिया संयोगावच्छिन्ना क्रिया। सा च स्वजन्यत्वसंबन्धेन तिङ्पदोपस्थाप्ये संयोगेऽन्वेति न तु विभागे। धात्वर्थतावच्छेदकफलस्यैव कर्मणि विहिततिङा प्रतिपादनात्। अतश्च यगन्तोत्तरतिङ् संयोगविशेष्यकजन्यत्वसंसर्गकव्यापारप्रकारकबोधं जनयतीति तत्र गमनकर्मत्वं गमनजन्यसंयोगरूपम् न तु विभागरूपम्। अतः गमनजन्यविभागरूपफलाश्रयत्वमादाय तरोः कर्मत्वं स्वीकृत्य तरोस्त्यागिनि "खगे तरुं गच्छति खग" इति न प्रयोगः। तथा च धात्वर्थतावच्छेदकफलाश्रयत्वं कर्मत्वमित्येतदेव प्रकारान्तरेण जगदीशतर्कालंकारेणाप्युक्तं भवति। कर्तृताभिन्नमित्यनिवेशे कर्मकर्तरि प्रयोगस्थले "गम्यते रथः स्वयमेव" इत्यादौ गमननिरूपितकर्मत्वकर्तृत्वोभयस्य रथे बोधात् धात्वर्थप्रकारकतिङर्थकर्तृत्वविशेष्यकबोधस्य तिङा उत्पादनेन कर्तृत्वस्य कर्मतारूपत्वं स्यात्। तद्वारणाय तन्निवेशः। कर्तृत्वं हि तत्रानुकूलव्यापारवत्त्वात्मकम्।

---

[१] पृ. ३१७

परसमवेतत्वस्य द्वितीयार्थत्वं विनापि निर्वाहः

ननु चैत्रकर्तृकगमनजन्यसंयोगस्य ग्रामे इव चैत्रेऽपि सत्त्वात् "चैत्रेण गम्यते चैत्र" इत्यपि प्रयोगः स्यात् इति चेन्न। तिङर्थसंयोगे धात्वर्थस्य गमनस्य स्वजन्यत्वस्वाश्रयप्रतियोगिकत्वविशिष्टसंयोगस्य ग्रामे सत्त्वेऽपि चैत्रेऽभावात्। संयोगस्य द्विनिष्ठत्वेऽपि तत्प्रतियोगिकत्वविशिष्टसंयोगस्य तदन्यस्मिन्नेव स्वीकारात्। तथा च "चैत्रेण गम्यते चैत्र" इति वाक्यात् स्वजन्यत्वस्वाश्रयप्रतियोगिकत्वोभयसंबन्धेन चैत्रकर्तृकगमनविशिष्टसंयोगाश्रयश्चैत्र इति बोधः वक्तव्यः। स च बाधितार्थविषयकः। उक्तरीत्या विशिष्टसंयोगाश्रयत्वस्य चैत्रेऽभावात्। अत उक्तप्रयोगस्य न प्रामाणिकता। चैत्रकर्तृकगमनाश्रयचैत्रप्रतियोगिकत्वविशिष्टसंयोगस्य ग्रामे सत्त्वात् "चैत्रेण गम्यते ग्राम" इति प्रयोगस्य प्रामाणिकता।

"चैत्रो ग्रामं गच्छति" इत्यत्र संयोगरूपं फलं द्वितीयार्थः। तत्र स्वप्रतियोगिकत्वसंबन्धेन प्रकृत्यर्थस्य ग्रामस्य अन्वयः। संयोगस्य जनकत्वस्वाश्रयवृत्तित्वोभयसंबन्धेन धात्वर्थव्यापारेऽन्वयः। तथा च ग्रामप्रतियोगिकत्वविशिष्टसंयोगाश्रयवृत्तितज्जनकक्रियानुकूलकृत्याश्रयः चैत्र इत्यन्वयबोधः। चैत्रप्रतियोगिकत्वविशिष्टसंयोगाश्रयत्वस्य चैत्रेऽभावात् (स्वाश्रयवृत्तित्वरूपसंबन्धबाधात्) न 'चैत्रश्चैत्रं गच्छति' इति प्रयोगापत्तिः।

एतावता संयोगविभागादिरूपं फलं द्वितीयायाः कर्माख्यातस्य चार्थः। फलाश्रयत्वमेव च कर्मत्वमित्युक्तं भवति।

परसमवेतत्वस्य द्वितीयार्थत्वखण्डनम्

यत्तु — संयोगादिरूपं फलं परसमवेतत्वं च कर्मतावाचिप्रत्ययार्थः। परसमवेतत्वं च भेदवत्समवेतत्वम्। "चैत्रः ग्रामं गच्छति" इत्यत्र प्रकृत्यर्थस्य ग्रामस्य संयोगे आधेयतासंबन्धेन, भेदे स्वप्रतियोगिकत्वसंबन्धेनान्वयः। संयोगस्य जनकतासंबन्धेन, समवेतत्वस्य च आश्रयतासंबन्धेन क्रियायामन्वयः। तथा च ग्रामनिष्ठसंयोगजनकग्रामप्रतियोगिकभेदवत्समवेतक्रियानुकूलकृतिमान् इति बोधः। "चैत्रेण गम्यते ग्राम" इत्यत्र आख्यातार्थः संयोगः भेदवत्समवेतत्वं च। भेदे स्वप्रतियोगिकत्वसंबन्धेन ग्रामस्यान्वयः। समवेतत्वस्य धात्वर्थक्रियायामन्वयः। क्रियायाः जन्यतासंबन्धेन आख्यातार्थसंयोगेऽन्वयः। संयोगस्याश्रयतासंबन्धेन ग्रामेऽन्वयः। तथा च चैत्रकर्तृकं ग्रामप्रतियोगिकभेदवत्समवेतं च यत् गमनं तज्जन्यसंयोगाश्रयो ग्राम इति बोधः। चैत्रान्यसमवेतस्य गमनस्य चैत्रे बाधात् 'चैत्र-

श्चैत्रं गच्छति' इति न प्रयोगः। चैत्रकर्तृकस्य चैत्रान्यसमवेतस्य गमनस्य अप्रसिद्ध-त्वेन चैत्रे तज्जन्यसंयोगाभावात् न 'चैत्रेण गम्यते चैत्र' इति प्रयोगः — इति।

तन्न। संख्याकालातिरिक्तस्य तिङर्थस्य धात्वर्थं प्रति विशेष्यत्वमिति नियमेन "चैत्रेण गम्यते ग्राम" इत्यत्र तिङर्थस्य भेदवत्समवेतत्वस्य धात्वर्थं प्रति विशेषणत्वस्याव्युत्पन्नत्वात्। प्रथमान्तपदोपस्थाप्यस्य ग्रामादेः अभेदातिरिक्त-संबन्धेन प्रत्ययार्थे तिङर्थे वा अन्वयस्यादृष्टचरत्वेन तिङर्थे भेदे प्रतियोगिता-संबन्धेन अन्वयस्याव्युत्पन्नत्वाच्च।

किं च चैत्रनिष्ठद्वित्वावच्छिन्नप्रतियोगिताकभेदस्य चैत्रेऽपि सत्त्वेन 'चैत्रश्चैत्रं गच्छति' इति प्रयोगवारणाय अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकभेदस्यैव परसमवेतत्वशरीरे निवेशनीयतया "चैत्रेण गम्यते द्रव्यम्" "चैत्रो द्रव्यं गच्छति" इत्यादौ द्रव्यान्यसमवेतगमनस्याप्रसिद्धत्वेन अयोग्यतापत्त्या तादृशवाक्याप्रामाण्या-पत्तेश्च।

भेदस्य द्वितीयार्थत्वखण्डनम्

नव्यास्तु — फलमिव भेदोऽपि कर्मतावाचिप्रत्ययार्थः। तथा च "चैत्रेण गम्यते ग्रामः" इत्यत्र तृतीयान्तस्य चैत्रनिष्ठं कर्तृत्वमर्थः। तस्य निरूपकतासंबन्धेन धात्वर्थे गमनेऽन्वयः। गमनस्य जन्यतासंबन्धेन तिङर्थे संयोगे सामानाधि-करण्यसंबन्धेन (स्वाश्रयवृत्तित्वसंबन्धेन) तिङर्थे भेदेऽन्वयः। तिङः संयोगः भेदश्चार्थः। संयोगस्याश्रयतासंबन्धेन, भेदस्य च प्रतियोगितासंबन्धेन प्रथमान्तार्थ-ग्रामेऽन्वयः। चैत्रकर्तृकगमनजन्यसंयोगाश्रयः तादृशगमनाश्रयवृत्तिभेदप्रतियोगी च ग्राम इत्यन्वयबोधः। गमनाश्रये चैत्रे ग्रामभेदस्य सत्त्वात् गमनाश्रयचैत्रवृत्ति-भेदप्रतियोगी ग्रामो भवति। "चैत्रो ग्रामं गच्छति" इत्यत्र द्वितीयायाः संयोगः भेदश्चार्थः। संयोगे ग्रामस्य आधेयतासंबन्धेन, भेदे च प्रतियोगितासंबन्धेन तस्या-न्वयः। संयोगस्य जनकतासंबन्धेन भेदस्य च स्वाश्रयवृत्तित्वसंबन्धेन धात्वर्थ-गमनक्रियायामन्वयः। धात्वर्थस्याख्यातार्थकृतौ कृतेश्च प्रथमान्तार्थे अन्वयः। तथा च ग्रामवृत्तिसंयोगजनकं ग्रामप्रतियोगिकभेदाश्रयवृत्ति च यत् गमनं तदनुकूल-कृतिमांश्चैत्रः इति बोधः। चैत्रवृत्तिगमने चैत्रभिन्नवृत्तित्वस्य बाधान्न "चैत्रश्चैत्रं गच्छति" इति, न वा "चैत्रश्चैत्रेण गम्यत" इति प्रयोगः। द्वित्वावच्छिन्नचैत्र-निष्ठप्रतियोगिताकभेदमादाय उक्तप्रयोगवारणाय तु प्रतियोगित्वमुभयावृत्तिधर्मा-वच्छिन्नं ग्राह्यम्। अत एव 'द्रव्यं गच्छति' इति प्रयोगस्य साधुत्वम्। तद्व्यति-रिक्तत्वावच्छिन्नप्रतियोगिताकभेदस्यैव द्वितीयया बोधनात् तस्य च चैत्रेऽक्षतत्वात् इति प्राहुः। तच्चिन्त्यम्।

पूर्वोक्तरीत्यैव सामञ्जस्ये तिङादेः शक्त्यन्तरकल्पने गौरवात्, भेदानुपस्थितावपि शाब्दबोधस्यानुभविकत्वाच्च।

"खगः वृक्षं त्यजति" इत्यत्र विभागावच्छिन्नक्रिया त्यजेरर्थः। द्वितीयायाः विभागोऽर्थः। विभागे प्रकृत्यर्थस्य स्वावधिकत्वसंबन्धेनान्वयः। विभागस्य जनकतास्वाश्रयवृत्तित्वोभयसंबन्धेन धात्वर्थक्रियायामन्वयः। वृक्षावधिकविभागजनकविभागाश्रयवृत्तिविभागावच्छिन्नक्रियानुकूलकृतिमान् खगः इत्यन्वयबोधः। खगावधिकत्वविशिष्टविभागाश्रयत्वं खगे नास्तीति न 'खगं त्यजति खग' इति प्रयोगः।

नन्वेवं केवलसामानाधिकरण्यसंबन्धेन तादृशविभागान्वयेनापि उक्तदोषवारणसंभवेन किं जनकत्वस्य संसर्गघटकतया प्रवेशेनेति चेत् — न।

'वृक्षं गच्छति' इत्यादावपि 'वृक्षं त्यजति' इति प्रयोगापत्तेः। गमनक्रियाया अपि तादृशविभागसमानाधिकरणत्वात्।

एवं "खगेन त्यज्यते वृक्षः" इत्यत्र आख्यातस्य विभागोऽर्थः। धात्वर्थक्रियायाः स्वजन्यत्वस्वाश्रयावधिकत्वोभयसंबन्धेन विभागेऽन्वयः। विभागस्याश्रयतासंबन्धेन वृक्षेऽन्वयः। खगकर्तृकविभागावच्छिन्नक्रियाजन्यतादृशक्रियाश्रयावधिकविभागाश्रयो वृक्ष इति बोधः। वस्तुतः विभागे जन्यत्वसंबन्धेन धात्वर्थस्य विभागस्य अवधित्वसंबन्धेन वृक्षेऽन्वयं स्वीकृत्य खगकर्तृकक्रियाजन्यविभागावधिः वृक्ष इति बोधवर्णनं युक्तमिति भाति।

प्राचां मतम्[१]

प्राञ्चस्तु — "ग्रामं गच्छति त्यजति" इत्यादौ सर्वत्र क्रियामात्रं धात्वर्थः। न चोभयोः धात्वोरेकार्थत्वेन पर्यायत्वापत्त्या "ग्रामं गच्छति" इत्यत्र "ग्रामं त्यजति" इति प्रयोगापत्तिरिति वाच्यम्। गमधातुसमभिव्याहृतद्वितीयया क्रियान्वयिसंयोगरूपं फलमेव प्रतिपाद्यते, त्यजधातुसमभिव्याहृतद्वितीयया विभागरूपं फलमेव प्रतिपाद्यते इति स्वीकारेण क्षत्यभावात्। धातोः तत्तत्फलावच्छिन्नव्यापारवाचकत्वमतेऽपि समभिव्याहृतधात्वर्थतावच्छेदकफलमेव द्वितीयया प्रतिपाद्यत इत्यङ्गीकार्यत्वात् अन्यथा विभागतात्पर्येण "ग्रामं गच्छति" इति प्रयोगस्य वारयितुमशक्यत्वात्।

ननु यदि व्यापारमात्रं धात्वर्थः फलस्य न धात्वर्थे प्रवेशः तदा स्पन्दे स्पन्दभेदस्य बाधितत्वात् यथा 'स्पन्दो न स्पन्द' इति न प्रयोगः, तथा 'त्यागो न

[१] पृ. ३२२

गतिः' इति प्रयोगोऽपि न स्यात्। त्यागगति शब्दयोः व्यापारमात्रार्थकत्वात् व्यापारे व्यापरभेदविरहात्। यदि तु फलावच्छिन्नव्यापारो धात्वर्थः तदा त्यागशब्दार्थे विभागावच्छिन्नव्यापारे गतिशब्दार्थसंयोगावच्छिन्नव्यापारभेदसद्भावात् 'त्यागो न गतिः' इति प्रयोग उपपद्यत इति चेन्न।

'त्यागो न गतिः' इत्यत्र त्यागशब्दस्य विभागावच्छिन्नव्यापारे गतिशब्दस्य संयोगावच्छिन्नव्यापारे च लक्षणास्वीकारेण अन्वययोग्यतायाः संपादनीयत्वात्।

ननु धातोः फलावच्छिन्नव्यापारवाचकत्वस्वीकारे गमिप्रभृतीनां सकर्मकत्वं फलवच्छिन्नव्यापारवाचकतारूपम्, यतिप्रभृतीनामकर्मकत्वं तु फलानवच्छिन्न-व्यापारवाचकत्वरूपमिति व्यवस्था कर्तुं शक्या। सर्वेषामपि धातूनां व्यापारमात्र-वाचित्वे सकर्मकत्वाकर्मकत्वव्यवस्था कथमिति चेत् — न। द्वितीयासाकाङ्क्ष-तुमन्तधातुत्वं सकर्मकत्वम्, द्वितीयाकाङ्क्षारहिततुमन्तधातुत्वमकर्मकत्वम् इति व्यवस्थापनात्। गन्तुमिति तुमन्तं ग्राममिति द्वितीयासाकाङ्क्षम्, यतितुमिति न तथेति भेदात्।

युज्यते चेयमेव व्यवस्था। फलावच्छिन्नव्यापारवाचकत्वं सकर्मकत्वमित्युक्तौ ज्ञाप्रभृतिधातूनां फलावच्छिन्नव्यापारवाचकत्वविरहेण सकर्मकत्वानुपपत्तेः।

न च तुमन्तानां स्मृत्यर्थकधातूनाम् "अधीगर्थदयेशां कर्मणि"[१] इति सूत्रेण षष्ठीसाकाङ्क्षत्वेऽपि द्वितीयासाकाङ्क्षत्वविरहात् सकर्मकत्वानुपपत्तिरिति वाच्यम्। "उत्तरत्र नित्यग्रहणादनित्यमिह प्रकरणे स्यात्" इति दुर्गसिंहोक्त्यनुसारेण स्मृत्यर्थकधातूनां कर्मणि षष्ठ्या इव द्वितीयाया अपि साधुत्वात्।

एवं च द्वितीयायाः तत्तत्फलमर्थः, धातोस्तु व्यापारसामान्यमर्थः इति "ग्रामं गच्छति" इत्यतः ग्रामनिष्ठसंयोगजनकक्रियावानिति बोधः, न तु ग्रामनिष्ठसंयोग-जनकसंयोगावच्छिन्नक्रियावान् इति, तरुनिष्ठविभागजनकविभागावच्छिन्नक्रियावा-निति बोधः। संयोगविभागयोः द्विधाभानस्यानुभवविरुद्धत्वात् नीलघटजनकदण्ड-वानित्यादौ घटादेरिव निराकाङ्क्षत्वेनासंभवाच्चेत्याहुः।

अस्मिन् मते अस्वारस्यम् — लक्षणायाः अग्रहदशायां त्यागो न गतिः इत्या-देरयोग्यताप्रसङ्गः। न च भवन्मतेऽपि निराकाङ्क्षत्वं दुष्परिहरमिति। करोतीत्या-दाविव संभेदेनान्यतरवैयर्थ्याभावेन संयोगादेरेकदैव भानात्।

---

[१] सू. २.३.५२

मतान्तरम्[१]

परे तु धातोः गम्यादेः फलं व्यापारश्चेत्युभयं प्रत्येकं शक्यम्। तयोः जन्य-जनकभावः संसर्गमर्यादया भासते। एवकारार्थयोः अन्ययोगव्यवच्छेदयोरिव गम्यर्थयोः संयोगक्रिययोः मिथ एवान्वये साकाङ्क्षत्वात् नैकमात्रे गमिप्रयोगः। यथा वा पुष्पवन्तपदस्य चन्द्रत्वावच्छिन्ने सूर्यत्वावच्छिन्ने च एका शक्तिः स्वीक्रियते, तथा गमधातोः संयोगत्वावच्छिन्ने व्यापारत्वावच्छिन्ने च एका शक्तिः स्वीक्रियते, न तु शक्यतावच्छेदकभेदात् शक्तिद्वयम्। इयांस्तु विशेषः यत् तत्र चन्द्रसूर्ययोर्न परस्परमन्वयः, प्रकृते तु संयोगव्यापारयोः परस्परमन्वयः इति।

तथा च "ग्रामं गच्छति" इत्यत्र धातोः संयोगो व्यापारश्चार्थः। द्वितीयायाः आधेयत्वं प्रतियोगित्वं वा अर्थः। तस्य संयोगेऽन्वयः संयोगस्य स्वाश्रय-वृत्तित्वसहितजनकतासंबन्धेन क्रियायामन्वयः। ग्रामस्य आधेयत्वे निरूपितत्व-संबन्धेन प्रतियोगित्वे आधेयतासंबन्धेनान्वयः। ग्रामनिरूपिताधेयताश्रयः (ग्रामनिष्ठः) ग्रामनिष्ठप्रतियोगितानिरूपको वा यः संयोगः तज्जनकतदाश्रयवृत्तिक्रियाश्रयः चैत्रः इति बोधः।

"तरुं त्यजति खगः" इत्यत्र विभागः व्यापारश्च धात्वर्थः। आधेयत्वमवधित्वं वा द्वितीयार्थः। तदन्वितस्य विभागस्य व्यापारे स्वाश्रयवृत्तित्वजनकत्वोभय-संबन्धेनान्वयः। तरुवृत्तिः तर्ववधिको वा यो विभागः उक्तोभयसंबन्धेन तद्विशिष्ट-क्रियाश्रयः खग इति बोधः।

धातोः सकर्मकत्वमपि स्वार्थफलावच्छिन्नस्वार्थक्रियाबोधकत्वम्। जानातीत्यादौ सकर्मकत्वव्यवहारो भाक्तः इत्याहुः।

प्रथमोक्तप्रकारस्यैव सम्यक्त्वात् किं व्युत्पत्तिसंकोचेन मिथः साकाङ्क्षत्व-कल्पनेनेत्यस्वरसः आहुः इत्यनेन सूचितः।

एतावता इमानि मतानि एवं निष्कृष्टानि भवन्ति।

१. गम्यादिधातोः फलावच्छिन्नव्यापारोऽर्थः। द्वितीयायाः फलमर्थः। तत्र स्व-प्रतियोगिकत्वसंबन्धेन प्रकृत्यर्थस्यान्वयः। प्रकृत्यर्थविशिष्टस्य स्वजन-कत्वस्वाश्रयवृत्तित्वोभयसंबन्धेन व्यापारेऽन्वयः। कर्माख्यातस्य फल-मर्थः। तत्र धात्वर्थस्य व्यापारस्य स्वजन्यत्वस्वाश्रयप्रतियोगिकत्वोभय-संबन्धेनान्वयः। अस्मिन्मते परसमवेतत्वस्य द्वितीयार्थत्वं विनापि निर्वाहः।

---

[१] श.श.प्र.पृ. ३२४

२. क्रियामात्रं धात्वर्थः। फलविशेषः द्वितीयार्थः। फलस्यान्वयस्तु पूर्ववत्।

३. संयोगः क्रिया च प्रत्येकमुभयं धातुशक्यम्। द्वितीयायाः आधेयत्वं प्रतियोगित्वं वा अर्थः। फलस्य क्रियायामन्वयः पूर्ववत्।

४. परसमवेतत्वमपि कर्मप्रत्ययार्थ इति पक्षे मतद्वयम् —

a. फलमिव परसमवेतत्वमपि द्वितीयायाः कर्माख्यातस्य चार्थः। परत्वे द्वितीयाप्रकृत्यर्थस्य प्रतियोगितासंबन्धेनान्वयः। कर्माख्यातस्थले च प्रथमान्तार्थस्य कर्मणः आख्यातार्थैकदेशपरत्वे प्रतियोगितासंबन्धेनान्वयः। उभयत्र परसमवेतत्वस्य क्रियायामन्वयः।

b. फलमिव भेदोऽपि कर्मतावाचिप्रत्ययार्थः। प्रकृत्यर्थस्य द्वितीयार्थभेदे प्रतियोगितासंबन्धेन। भेदस्य सामानाधिकरण्यसंबन्धेन धात्वर्थक्रियायामन्वयः। कर्माख्यातस्थले आख्यातार्थभेदे धात्वर्थस्य सामानाधिकरण्यसंबन्धेनान्वयः। भेदस्य प्रतियोगितासंबन्धेन प्रथमान्तार्थेऽन्वयः। — इति।

अत्र पक्षे तृतीयमपि मतं कारकचक्रे उक्तम् — आधेयत्वं भेदप्रतियोगितावच्छेदकत्वं च द्वितीयार्थः। आधेयत्वस्य फले निरूपितत्वसंबन्धेनान्वयः। भेदप्रतियोगितावच्छेदकत्वस्य क्रियायामाश्रयतासंबन्धेनान्वयः। आधेयत्वे प्रकृत्यर्थस्य निरूपितत्वसंबन्धेन भेदे च आधेयतासंबन्धेनान्वयः इति।

व्युत्पत्तिवादोक्तरीत्या कर्मत्वपरिष्कारः द्वितीयार्थश्च[१]

व्युत्पत्तिवादे भट्टाचार्यैः शब्दशक्तिप्रकाशिकायां प्रस्तुतं प्राचीनमतं नवीनमतं च परिष्कृत्य उपन्यस्य स्वमतं सयुक्तिकमाविष्कृतम्। तत्तन्मतेषु गुणदोषचर्चा च कृता। तत्सर्वमत्र संकलय्य प्रतिपाद्यते।

प्राचीनमतपरिष्कारः

"कर्मणि द्वितीया"[२] इत्यनुशासनात् कर्मत्वं द्वितीयाविभक्त्यर्थः। सूत्रे कर्मपदस्य भावप्रधाननिर्देशरूपतया कर्मत्वमर्थः। सप्तम्याः वाचकत्वमर्थः। कर्मत्ववाचिका द्वितीयेति सूत्रार्थः। यथाश्रुतकर्मार्थकत्वं तु न युक्तम्। "ग्रामं गच्छति" इत्यदौ द्वितीयार्थे कर्मणि प्रकृत्यर्थस्य ग्रामस्य अभेदसंबन्धेनान्वयं स्वीकृत्य

---

[१] व्यु.वा.पृ. १२६

[२] सू. २.३.२

कर्मणश्च धात्वर्थे स्वनिष्ठकर्मतानिरूपकत्वसंबन्धेनान्वयस्य स्वीकार्यतया गौरवात्। तथा हि कर्मणः शक्यत्वे कर्मत्वं शक्यतावच्छेदकमिति वाच्यम्। कर्मत्वं च क्रियाजन्यफलवत्त्वं फलपर्यवसितम्। फलानां च संयोगविभागादीनामनन्तत्वात् तेषु शक्यतावच्छेदकत्वकल्पनापेक्षया कर्मत्वस्य शक्यत्वं स्वीकृत्य कर्मतात्व-रूपाखण्डोपाधेः शक्यतावच्छेदकत्वस्वीकारे लाघवमिति।

ननु 'इदं कर्म इदं कर्म' इत्यनुगतव्यवहारात् कर्मत्वमप्यखण्डोपाधिरेवेति कर्मत्वस्य शक्यतावच्छेदकत्वे न किंचित् गौरवमिति चेत् — न। "तण्डुलं पचति द्विदलं पचति" इत्यादौ सर्वत्रैव तण्डुलद्विदलादिषु शक्यतायाः कर्मत्वे शक्य-तावच्छेदकतायाश्च कल्पनापेक्षया एकस्मिन् कर्मत्वे शक्यत्वस्य एकस्मिन्नेव च कर्मतात्वे शक्यतावच्छेदकतायाश्च लाघवं सुव्यक्तमेवेति।

कर्मत्वं च क्रियाजन्यफलशालित्वमित्युक्तम्। तत्र क्रिया धातुत एव लभ्यते। क्रियाफलयोः जन्यजनकभावः संसर्गमार्यादया लभ्यत इति फलमात्रं द्वितीयार्थः। फलत्वं च धात्वर्थव्यापारे विशेषणतया भासमानत्वे सति धात्वर्थजन्यत्वम्। तत्र "मन्दं गच्छति द्रुतं गच्छति" इत्यादौ धात्वर्थव्यापारे मन्दादेः तादात्म्येन अन्वयान्मन्दादावतिव्याप्तिः। तद्वारणाय धात्वर्थजन्यत्वनिवेशः। गम्यादिधात्वर्थ-संयोगानुकूलव्यापारजन्यत्वस्य पूर्वदेशविभागादौ सत्त्वात्पूर्वदेशादावतिव्याप्तिवार-णाय सत्यन्तनिवेशः।

न च संयोगविभागादिरूपफलमपि धातुलभ्यमेव। गमित्यजिप्रभृतीनां संयोगवि-भागाद्यवच्छिन्नव्यापारवाचकत्वादिति वाच्यम्। व्यापारमात्रस्य धात्वर्थत्वात्।

न च व्यापारमात्रं यदि धात्वर्थः तदा "ग्रामं त्यजति ग्रामं गच्छति" इत्या-दावनुभूयमानप्रतीतिवैलक्षण्यस्यानुपपत्तिरिति वाच्यम्। संयोगादिफलविशेषान्वय-बोधं प्रति धातुविशेषजन्यव्यापारोपस्थितेर्हेतुतया "ग्रामं त्यजति" इत्यादौ धात्वर्थ-व्यापारे ग्रामनिष्ठविभागजनकत्वमेव, "ग्रामं गच्छति" इत्यादौ धात्वर्थव्यापारे ग्रामनिष्ठसंयोगजनकत्वमेव प्रतीयते, न तु विपरीततया "ग्रामं गच्छति" इत्यत्र ग्रामनिष्ठविभागजनकत्वं, "ग्रामं त्यजति" इत्यत्र ग्रामनिष्ठसंयोगजनकत्वं प्रतीयते इत्यभ्युपगमात् प्रतीतिवैलक्षण्योपपत्तेः।

'ग्रामं गच्छति' इत्यादिवच्च 'ग्रामं स्पन्दत' इत्यादयो न प्रयोगाः। द्वितीयादेः गम्याद्युपस्थापितव्यापारे एव फलान्वयबोधकत्वात्। न हि येन केनचिदुपस्था-पितयोरर्थयोः परस्परमन्वयबोधो भवति। तथा सति 'घटः कर्मत्वम्' इत्यादि-पदोपस्थापितयोरपि घटकर्मत्वाद्योः परस्परमन्वयबोधः स्यात्। कृञादिसमानार्थक-

यतिधातूपस्थाप्यत्ने द्वितीयार्थविषयत्वान्वयसंभवेन 'घटं करोति' इतिवत् 'घटं यतते' इति प्रयोगप्रसङ्गश्च।

अपि तु ययोर्यादृशान्वयबोधे आकाङ्क्षा तदुपस्थापितयोरेव तादृशान्वयबोधः। आकाङ्क्षा च द्वितीयादेःगम्यादिना कृञादिना च कल्प्यते, न तु तत्समानार्थकेनापि स्पन्दियतिप्रभृतिना। न चाकाङ्क्षात्र समभिव्याहारः, स च गम्यादिनेव स्पन्द्यादिनापि समान एवेति वाच्यम्। यतो द्वितीयादेर्गम्यादिसमभिव्याहारस्यैव फलबलात् अन्वयबोधौपयिकत्वमुपगम्यते न तु स्पन्दिप्रभृतिसमभिव्याहारस्येति न तस्य आकाङ्क्षात्वम्। अन्वयबोधौपयिकसमभिव्याहारस्यैव आकाङ्क्षात्वात्।

अत एव समानार्थकत्वेऽपि गम्यादेरिव न स्पन्द्यादेः सकर्मकत्वव्यवहारः। फलान्वितव्यापारबोधकधातुत्वस्यैव सकर्मकत्वव्यवहारनियामकत्वात्।

ननु "घटं जानाति" इत्यादौ ज्ञादेः सकर्मकत्वं न स्यात्। विषयत्वादेः अखण्डोपाधित्वेन नित्यतया पूर्वोपदर्शितजन्यत्वघटितफलत्वाभावादिति चेत् — न। धात्वर्थव्यापारे विशेषणतया भासमानत्वे सति व्यापारत्वभिन्नत्वे च सति धात्वर्थत्वमेव फलत्वम्। तच्च विषयत्वादावप्यक्षतमिति।

अथ फलविशेषान्वयबोधे धातुविशेषजन्योपस्थितेः कारणत्वं परिकल्प्य व्यापारमात्रस्य धात्वर्थत्वकल्पनेऽपि "ग्रामं गच्छति, ग्रामं त्यजति" इत्यादिभ्यः प्रतीतिवैलक्षण्योपपादनेऽपि, यत्र "गच्छति त्यजति त्यागः गमनम्" इत्यादिकमेव प्रयुक्तं न तु द्वितीयान्तादिकमपि तत्र तेभ्यो वाक्येभ्यः सर्वानुभवसिद्धं प्रतीतिवैलक्षण्यं नोपपद्यते। न चेष्टं प्रतीत्यवैलक्षण्यमिति वाच्यम्। तथा सति त्यागादि तात्पर्येण गमनादिपदं व्युत्पन्ना अपि प्रयुञ्जीरन् इति चेत् — मैवम्। कर्मप्रत्ययद्वितीयाद्यसमभिव्याहृतत्यागगमनादिपदस्य तत्तत्फलावच्छिन्नव्यपारेऽनादितात्पर्यकल्पनात्। अनादितात्पर्यमेव च स्वारसिकप्रयोगनियामकमिति एकार्थतात्पर्येण (गमनादितात्पर्येण) न प्रामाणिकानां स्वारसिकः त्यागगमनादिप्रयोगः — इति।

नवीनमतम्

नव्यास्तु — संयोगादिरूपफलविशेषावच्छिन्नव्यापारो गम्याद्यर्थः। तत्तद्धात्वर्थतावच्छेदकफलशालित्वमेव तत्तद्धातुकर्मत्वम्। नातो गम्यादिकर्मत्वस्य पूर्वदेशादौ प्रसङ्गः। पूर्वदेशस्य गम्यर्थगमनजन्यविभागवत्त्वेऽपि गम्यर्थतावच्छेदकसंयोगवत्त्वाभावात्। अत्र तद्धात्वर्थानधिकरणत्वे सतीत्यपि विशेषणीयम्। तेन चैत्रादौ कर्तरि गम्धात्वर्थतावच्छेदकसंयोगवत्त्वेऽपि "चैत्रो गच्छति" इत्यादौ न गमन-

कर्मत्वापत्तिः। फलपदं च क्रियाजन्यपरम्। तेन धात्वर्थतावच्छेदकं व्यपारत्वमादाय तदाश्रये व्यापारे न कर्मत्वापत्तिः। एवं च धातोरेव फलविशेषलाभात् फलान्वयि आधेयत्वमेव द्वितीयाविभक्तेरर्थः। 'चैत्रो ग्रामं गच्छति' इति वाक्यात् ग्रामनिरूपिताधेयत्वाश्रयसंयोगावच्छिन्नक्रियावांश्चैत्र इत्यन्वयबोधः।

न च कर्मणि द्वितीयेत्यनुशासनविरोध इति वाच्यम्। तस्य कर्मणि फलनिष्ठाधेयत्वान्वयिनि प्रकृतितात्पर्यविषये सति तदुत्तरं द्वितीयेत्यर्थकत्वात्।

न चैवं तस्य शक्तिग्राहकत्वानुपपत्तिः। आधेयत्वे अनादितात्पर्यग्रहसंपादकत्वेन परम्परया शक्तिग्राहकत्वसंभवात्। एतदुक्तं भवति - द्वितीया आधेयत्वशक्ता असति बाधके स्वघटितवाक्यघटकपदान्तराबोध्याधेयत्वान्वितस्वार्थतात्पर्यविषयप्रकृतिकत्वात् इत्यनुमानेनैव शक्तिग्रहः। अत्र प्रथमं स्वपदं द्वितीयापरम्। स्वार्थेत्यत्र स्वपदं प्रकृतिपरम्। सूत्रं तु उक्तहेतुघटकतथाविधतात्पर्यग्रहसंपादकत्वेनोपयुज्यते इति।

न च फलस्य धात्वर्थैकदेशतया तत्र द्वितीयार्थाधेयत्वान्वयासंभवः, पदार्थः पदार्थेनान्वेति न तु तदेकदेशेन इति व्युत्पत्तिविरोधादिति वाच्यम्। व्युत्पत्तिवैचित्र्येण प्रकृते एकदेशान्वयस्वीकारात्। नियमशरीरे पदार्थैकदेशे धात्वर्थतदवच्छेदकातिरिक्तत्वविशेषणं प्रक्षिप्यते तथा च "पदार्थः पदार्थेनान्वेति न तु धात्वर्थतावच्छेदकातिरिक्तपदार्थैकदेशेन" इति नियमशरीरं संपन्नम्। तेन पदार्थैकदेशे धात्वर्थतावच्छेदके इतरपदार्थान्वयो न दोषाय।

अत्र आलोचनम्

व्यापारमात्रं धात्वर्थः फलं द्वितीयार्थः इति प्राचीनमतेऽपि सर्वानुपपत्तीनामुद्धृतत्वात् फलावच्छिन्नव्यापारस्य गुरुतया धात्वर्थत्वमनुचितम्।

अथ फले द्वितीयायाः शक्त्यन्तरकल्पने गौरवात् धातोः फलविशिष्टव्यापारे शक्तिकल्पनमेवोचितम्। न च भवन्मतेऽप्याधेयत्वे द्वितीयादेः शक्त्यन्तरस्य कल्पनीयत्वात् तदंशे साम्यमिति वाच्यम्। "ग्राममध्यास्ते, ग्राममधिशेते, ग्राममधितिष्ठति" इत्यादौ आधारस्य कर्मसंज्ञाविधानेन सर्वमत एव द्वितीयायाः आधेयत्वबोधकतया फलवाचकत्वमतेऽपि आधेयत्ववाचकतायाः आवश्यकत्वात्। तथा च आधेयत्वे संयोगादौ च द्वितीयायाः, धातोः व्यापारे च शक्तिकल्पनापेक्षया धातोः विशिष्टशक्तिकल्पनमेवोचितम् इति चेत् — न।

नव्यमते "ग्रामं गच्छति" इत्यादिवाक्यज्ञानघटितशाब्दसामग्र्याः समानविषयकानुमित्यादिप्रतिबन्धकतायां धातुजन्योपस्थितेः फलनिष्ठप्रकारतानिरूपितव्यापार-

निष्ठविशेष्यताशालित्वेन वा व्यापारनिष्ठविशेष्यतानिरूपितफलनिष्ठप्रकारताशालित्वेन वा निवेश इत्यत्र विनिगमनाविरहात् सामग्रीप्रतिबन्धकतायामाधिक्यम्, प्रतिबन्धकतावच्छेदकगौरवं च। प्राचीनमते द्वितीयाजन्यफलोपस्थितेः सामग्र्यन्तर्निवेशस्तु नव्यमतसिद्धतज्जन्याधेयत्वोपस्थितिनिवेशस्थलीय इति न गौरवम्।

किं च नव्यमते आधेयत्वस्य प्रकारविधया भानात् आधेयत्वस्य यः संसर्गः तस्यापि शाब्दबोधविषयत्वम्। प्राचीनमते च संयोगादिफले ग्रामादेराधेयत्वसंबन्धेनान्वयात् आधेयत्वस्य संसर्गो न भासते। अतः नव्यमते शाब्दबोधस्याधिकविषयकत्वात् तात्पर्यज्ञानादिकमप्यधिकविषयकमेव शाब्दधीहेतुर्भविष्यतीति गौरवम्।

मतान्तरम्

अत्राहुः — नव्यमतेऽपि विभक्तेः संख्यामात्रमर्थः। फलावच्छिन्नव्यापारो धात्वर्थः। द्वितीयाप्रकृत्यर्थस्य ग्रामादेराधेयतासंबन्धेन फलेऽन्वयः। व्युत्पत्तिवैचित्र्येण (आधेयत्वसंबन्धावच्छिन्नग्रामादिनिष्ठप्रकारतानिरूपितधात्वर्थफलनिष्ठविशेष्यताकशाब्दबोधं प्रति द्वितीयान्तग्रामादिपदगम्यादिधातुसमभिव्याहारज्ञानत्वेन हेतुत्वात्) नामार्थधात्वर्थयोरपि भेदसंबन्धेन साक्षादन्वयबोधः।

न च तथा सति "ग्रामो गच्छति" इत्यत्रापि आधेयत्वसंबन्धेन ग्रामप्रकारकसंयोगविशेष्यकबोधापत्तिरिति वाच्यम्। आधेयत्वसंसर्गेण नामार्थप्रकारकसंयोगादिरूपधात्वर्थविशेष्यक शाब्दबोधं प्रति द्वितीयान्तग्रामादिपदसमभिव्याहृतगच्छतीत्यादिसमभिव्याहारज्ञानस्य कारणत्वकल्पनेन उक्तापत्तिपरिहारात्।

वस्तुतस्तु शाब्दबुद्धेरधिकविषयकत्वे "राज्ञः पुरुष" इत्यादौ स्वत्वादेः संसर्गतानिराकरणावसरे सामग्रीप्रतिबन्धकतायां लाघवस्य दर्शितत्वात् द्वितीयादेः आधेयत्वमर्थः, फलावच्छिन्नव्यापारश्च धातोरर्थ इत्येव युक्तम्।

कर्माख्यातस्य फलमर्थः। अन्यथा "चैत्रेण ग्रामो गम्यत" इत्यादौ ग्रामादेः व्यापारजन्यफलाश्रयत्वरूपकर्मत्वप्रतीत्यनुपपत्तेः। तत्र चैत्रपदोत्तरतृतीयायाः कर्तृत्वमर्थः। तत्र आधेयतासंबन्धेन चैत्रस्यान्वयः। कर्तृत्वस्य निरूपकतासंबन्धेन धात्वर्थव्यापारेऽन्वयः। धात्वर्थव्यापारस्य जन्यत्वसंबन्धेन आख्यातार्थसंयोगे अन्वयः। संयोगस्य आश्रयतासंबन्धेन ग्रामेऽन्वयः। चैत्रकर्तृकसंयोगावच्छिन्नव्यापारजन्यसंयोगाश्रयो ग्राम इति बोधः।

फलस्य द्विधा भानं चेत् अनुभवविरुद्धम्, तदा पुनरगत्या फलव्यापारयोः खण्डशः शक्तिद्वयमेव धातोः स्वीकरणीयम्। आख्यातस्याश्रयत्वमर्थः। तत्र निरूपितत्वसंबन्धेन फलस्यान्वयः। फले व्यापारस्य जन्यतासंबन्धेन अन्वयः चैत्रकर्तृकव्यापारजन्यसंयोगनिरूपिताश्रयतावांश्चैत्र इति बोधः। कर्त्राख्याते फलस्य जनकतासंबन्धेन व्यापारेऽन्वयः। व्यापारस्याख्यातार्थकृतावाश्रयत्वे वान्वयः। तस्य प्रथमान्तार्थचैत्रादाविति विशेषः।

द्वितीयायाः आधेयार्थकत्वे अनुपपत्तिपरिहारौ

अथ द्वितीयायाः आधेयत्वार्थकत्वे व्यापारे तदन्वयतात्पर्येण सप्तम्या इव द्वितीयाया अपि प्रयोगापत्तिः। न चेष्टापत्तिः। 'गृहे पचति' इतिवत् 'गृहं पचति' इति प्रयोगविरहात्।

मैवम्। धात्वर्थतावच्छेदकफलांशे आधेयत्वान्वये एव द्वितीयायाः साकाङ्क्षत्व कल्पनात् व्यापारे तदुपस्थापिताधेयत्वान्वयासंभवात्। सप्तम्यधीनाधेयत्वोपस्थिति-सप्तमीसमभिव्याहारज्ञानघटिताया एव सामग्र्याः तादृशान्वयबोधनियामकत्वात्। द्वितीयासप्तम्योः समानार्थकत्वेऽपि कार्यकारणभावभेदज्ञापनायैव पृथक्पृथक्सूत्रेण द्वितीयासप्तम्योर्विधानात्।

तथा च फलविशेष्यकाधेयत्वान्वयबोधं प्रति द्वितीयासमभिव्याहारज्ञानस्य कारणत्वम्। व्यापारविशेष्यकाधेयत्वान्वयबोधं प्रति सप्तमीसमभिव्याहारज्ञानस्य कारणत्वमिति कार्यकारणभावद्वयं सूत्राभ्यां बोध्यते।

भूमिं पततीति प्रयोगापत्तिवारणम्

ननु पतधातोः अधस्संयोगावच्छिन्नव्यापारार्थकतया संयोगरूपफले आधेयत्वान्वयतात्पर्येण 'भूमिं पतति' इति प्रयोगापत्तिः।

न च द्वितीयोपस्थापिताधेयत्वप्रकारकफलविशेष्यकान्वयबोधे गम्यादिजन्य-फलोपस्थितितत्समभिव्याहारज्ञानघटिता सामग्र्येव प्रयोजिका न तु पतधातुजन्य-फलोपस्थितिघटिता सामग्रीति नातिप्रसङ्ग इति वाच्यम्। पतधातुनैव यत्र संयोगा-वच्छिन्नव्यापारः लक्षणादिना उपस्थापितः तत्र द्वितीयार्थाधेयत्वान्वयात् इति चेत्—

अत्राहुः। अधिकरणानवच्छिन्नसंयोगनिष्ठविषयताशाल्युपस्थित्यादिघटितसामग्र्या एव संयोगविशेष्यकद्वितीयोपस्थाप्याधेयत्वप्रकारकबोधप्रयोजकत्वोपगमात् पतधातु-जन्यसंयोगोपस्थितेः अधोरूपदेशावच्छिन्नसंयोगनिष्ठविषयतानिरूपकतया तस्याः संयोगविशेष्यकाधेयत्वप्रकारकबोधप्रयोजकत्वविरहात् न 'भूमिं पतति' इति प्रयोगा-पत्तिः।

न चैवमपि फलावच्छिन्नव्यापारबोधकतया पतधातोः सकर्मकव्यवहारापत्तिरिति वाच्यम्। आश्रयानवच्छिन्नफलावच्छिन्नव्यापारबोधकत्वस्यैव सकर्मकत्वव्यवहार-नियामकत्वात्। पतधातोश्च अधोदेशात्मकाश्रयावच्छिन्नसंयोगावच्छिन्नव्यापारबोध-कत्वात् न सकर्मकत्वापत्तिः। गमधातोस्तु उत्तरदेशानवच्छिन्नसंयोगावच्छिन्न-व्यापारबोधकतया सकर्मकत्वम्।

एवं च आश्रयानवच्छिन्नधात्वर्थतावच्छेदकताश्रयफलवत्त्वं कर्मत्वमित्युक्तं भवति।

हुधातुयोगे द्वितीयाविचारः

अत एव अग्निसंयोगावच्छिन्नक्रियानुकूलव्यापारस्य हुधात्वर्थतया धात्वर्थता-वच्छेदकसंयोगाश्रयस्याप्यग्नेर्न जुहोतिकर्मता। संयोगनिष्ठायाः धात्वर्थतावच्छेद-कतायाः आश्रयेणाग्निना अवच्छिन्नत्वात्। तथा च "अग्नौ जुहोति" इत्येव प्रयोगः, न तु "अग्निं जुहोति" इति।

"घृतं जुहोति" इति तु प्रयोगोऽस्त्येव। घृतस्य आश्रयानवच्छिन्नं यत् धात्वर्थ-तावच्छेदकं फलं अग्निसंयोगावच्छिन्नक्षरणक्रियारूपं तदाश्रयत्वात्।

"अग्नौ घृतं जुहोति" इत्यत्रापि अग्निवृत्तित्वस्य संयोगे एवान्वयः। न चाग्नि-वृत्तित्वविशेषितसंयोगस्य धात्वर्थतावच्छेदकतया तत्र कथमग्निवृत्तित्वान्वयः। उद्देश्यतावच्छेदकविधेययोरैक्यादिति वाच्यम्। आधेयतासंबन्धेन अग्निविशिष्ट-संयोगः धात्वर्थतावच्छेदकः। अग्निरुद्देश्यतावच्छेदकः अग्निवृत्तित्वं विधेयमिति तयोर्भेदेन अनुपपत्त्यभावात्।

ननु व्यापारे एव सप्तम्यर्थाधेयत्वान्वयस्य पूर्वमुक्तत्वात् अत्र संयोगेऽन्वया-भिधानमयुक्तमिति चेत् — न। द्वितीयार्थाधेयत्वस्य फलेऽन्वयबोधं प्रति स्व-प्रकृत्यर्थरूपाधिकरणानवच्छिन्नफलनिष्ठविषयताकोपस्थितित्वेन कारणत्वस्य प्रदर्शि-तत्वेऽपि सप्तमीघटितस्यैव प्रयोगस्यात्र प्रामाणिकतया तदुपपत्तये सप्तम्यर्थाधे-यत्वस्य फलेऽन्वयबोधं प्रति स्वप्रकृत्यर्थरूपाधिकरणावच्छिन्नफलनिष्ठविषयताको-पस्थितित्वेन कारणत्वस्य कल्पनीयतया "अग्नौ घृतं जुहोति" इत्यत्र अग्निसंयोगे-सप्तम्यर्थाधेयत्वान्वयेऽनुपपत्तिविरहात्।

इत्थं च धात्वर्थतावच्छेदकफलांश इत्यादिपूर्वग्रन्थे प्रथमैवकारेण व्यापारे द्वितीयार्थाधेयत्वान्वयस्य व्यवच्छेदः। द्वितीयैवकारेण च व्यापारे विभक्त्यर्थान्वये द्वितीयासमभिव्याहारघटितकारणकलापस्य सामग्रीत्वव्यवच्छेदः।

तथा च "सप्तम्यधिकरणे च"[१] इति सूत्रस्य यत् व्यापारनिष्ठाधेयत्वं यच्च अधिकरणावच्छिन्नफलनिष्ठाधेयत्वं तदन्यतरान्वयित्वेन तात्पर्यविषये प्रकृत्यर्थे सप्तमी भवतीत्यर्थ इति न काचिदनुपपत्तिः।

यत्तु धात्वर्थतावच्छेदकत्वं धातुवृत्तिग्रहविशेष्यांशे साक्षात् प्रकारत्वम्। तच्च क्रियायामेव न संयोगांशेऽपीति नाग्नेर्जुहोतिकर्मतापत्तिः इति; तदसत्। "अजां ग्रामं नयति" इत्यादौ संयोगावच्छिन्नक्रियानुकूलव्यापारादिरूपे धात्वर्थे संयोगादेः साक्षात् अप्रकारतया तदाश्रयीभूतग्रामादेः कर्मत्वानुपपत्त्या नीवहादेः द्विकर्मकत्वव्याघातात्।

पतधातुयोगे द्वितीया वा सप्तमी वेति विचारः

अपि च "भूमौ पतति" इत्यादौ भूम्यादौ कर्मत्वापत्तिः। वृत्तिग्रहमुख्यविशेष्यांशे साक्षात् प्रकारीभूतस्य संयोगस्य तत्र सत्त्वात्। यदि चोक्तदोषवारणाय अधिकरणानवच्छिन्नत्वं साक्षात्प्रकारांशे विशेषणमुपादीयते तदा उक्तप्रयासवैफल्यम्। "अग्नौ घृतं जुहोति" इत्यादौ अग्नेः कर्मत्वस्य तत एव वारणात्।

यत्तु अधस्संयोगावच्छिन्नस्पन्दो न पतत्यर्थः। अपि तु गुरुत्वजन्यतावच्छेदक पतनत्वरूप जातिविशेषावच्छिन्न एव। अत एव फलावच्छिन्नव्यापाराबोधकत्वान्न सकर्मकत्वमिति। तन्न।

फलस्य धात्वर्थाघटकत्वे स्पन्दे एव सप्तम्यर्थान्वयस्योपगन्तव्यतया पर्णादिनिष्ठस्य स्पन्दस्य भूतलावृत्तितया "भूतले पतति" इति प्रयोगानुपपत्तिः। पर्णादिगतस्पन्दस्य स्वाश्रयप्रतियोगिकसंयोगवत्त्वरूपपरम्परासंबन्धेन भूतलवृत्तित्वमिति चेत् — तर्हि "वृक्षात् पतति" इतिवत् "वृक्षे पतति" इत्यपि स्यात्। स्वाश्रयप्रतियोगिकविभागवत्त्वरूपपरंपरासंबन्धेन पर्णवृत्तिव्यापारस्य वृक्षेऽपि सत्त्वात्। अस्मन्मते च "गृहे पचति" इत्यादौ व्यापारे सप्तम्यर्थान्वयेऽपि "भूमौ पतति" इत्यत्र व्युत्पत्तिवैचित्र्यात् अधस्संयोगरूपधात्वर्थतावच्छेदके एव सप्तम्यर्थान्वय इत्यदोषः।

अन्ये तु भूम्यादेः कर्मत्वविवक्षायां "भूमिं पतति" इति प्रयोग इष्यत एव। अत एव "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः"[२] इत्यादिसूत्रेण "नरकं पतितः नरकपतित" इति द्वितीयासमासविधानमुपपद्यते। धात्वर्थतावच्छेदकता-

---

[१] सू. २.३.३६

[२] सू. २.१.२४

वच्छेदकसंयोगरूपफले द्वितीयार्थान्वये एवाश्रयानवच्छिन्नफलोपस्थितेरपेक्षा "अग्निं जुहोति" इति प्रयोगवारणाय स्वीक्रियत इति वदन्ति।

तदपि न शोभनम्। तथा सति भूम्यादिपदोत्तरं कदाचित् सप्तमी कदाचित् द्वितीयेत्यत्र नियामकाभावप्रसङ्गात्। व्यापारांशे आधेयत्वविवक्षायां सप्तमी फलांशे तद्विवक्षायां द्वितीयेत्यस्य "भूमौ पतति" इत्यत्र दुर्घटत्वात्। तत्र स्पन्दस्य भूम्यवृत्तित्वात्।

अथैवमपि "नरकं पतति" इत्यस्य कथमुपपत्तिः। नरकस्याधिकरणानवच्छिन्नधात्वर्थतावच्छेदकफलाश्रयत्वाभावात्। न च तत्र 'नरके पतित' इत्येव प्रयोग इति वाच्यम्। तथा सति "द्वितीयाश्रितातीत०" इत्यादिसूत्रे पतितशब्दोपादानानुपपत्तेरिति चेत् —

अत्राहुः। अधस्संयोगावच्छिन्नक्रियार्थकपतधातुसमभिव्याहृतात् सुखसंभिन्नदुःखभोगावच्छेदकप्रदेशविशेषार्थकनरकपदात् द्वितीया नेष्यत एव। तत्र सप्तम्या एवेष्टत्वात्। किं तु भोगानुकूलपातित्यार्थकपतधातुसमभिव्याहृतात् सुखासंभिन्नदुःखार्थकनरकपदादेव विषयत्वरूपकर्मत्वार्थिका द्वितीया इष्यते। तस्य च विषयत्वस्य भोगेऽन्वयात् 'नरकं पतित' इत्यतो दुःखविशेषविषयकभोगानुकूलपातित्यवानित्यर्थः प्रतीयते। एतादृशार्थे एव च द्वितीयाश्रितातीतेत्यादिसूत्रेण समासो विधीयते इति।

एतेन यत् कारकचक्रे उक्तम् — अग्निप्रक्षेपश्च अग्निवृत्तिसंयोगानुकूलक्रियानुकूलघृतादिवृत्तिनोदनादिव्यापारः हुधातोरर्थः। न चैवम् "अग्नौ जहुयात्" इत्यत्र अग्निवृत्तिसंयोगानुकूलक्रियेत्यादिशाब्दबोधे पुनरुक्तिनिबन्धनोऽनन्वयः। धात्वर्थतावच्छेदकसंयोगरूपफलशालित्वेनाग्नेरपि कर्मत्वापत्तिश्चेति वाच्यम्। तत्र संयोगावच्छिन्नक्रियानुकूलव्यापारस्यैव धात्वर्थतावच्छेदकतया संयोगस्यानवच्छेदकतया तदन्वयिनोऽपि अग्नेः कर्मत्वासंभवेन द्वितीयदोषस्याभावात् — इति तदपि न युक्तमिति आवेदितं भवति।

परसमवेतत्वविचारः

"चैत्रः स्वं गच्छति" इत्यादिप्रयोगवारणाय परसमवेतत्वमपि द्वितीयार्थ इति विषये भट्टाचार्याणां निरूपणं तावत् इत्थम् — उक्तप्रयोगवारणाय परसमवेतत्वमपि द्वितीयार्थ इष्यते। परसमवेतत्वं च भेदवत्समवेतत्वम्। भेदे च एकदेशेऽपि आकाङ्क्षावैचित्र्यात् प्रकृत्यर्थस्य प्रतियोगितासंबन्धेनान्वयः। एवं च "ग्रामं

गच्छति चैत्रः'' इत्यादौ ग्रामप्रतियोगिकभेदवत्समवेता ग्रामनिष्ठसंयोगजनिका या क्रिया तदाश्रयतावांश्चैत्र इत्यन्वयबोधः। संयोगजनकस्वनिष्ठक्रियायां स्वभिन्नसमवेतत्वस्य बाधात् ''स्वं गच्छति'' इति न प्रयोगः।

यत्र चोभयकर्मभ्यां मल्लयोः संयोगः तत्र मल्लान्तरसमवेतक्रियायाः स्वनिष्ठसंयोगजनिकायाः स्वभिन्नसमवेतत्वेऽपि तादृशक्रियाश्रयतायाः स्वस्मिन् बाधात् ''मल्लः स्वं गच्छति'' इति न प्रयोगः।

ननु शब्दस्य सर्वेऽर्थाः सर्वत्र भासन्त इति न नियमः। न हि हर्यादिशब्दस्य सूर्याश्वादयः सर्वेऽर्थाः सर्वत्र प्रतीयन्ते। किं तु कश्चित् विवक्षित एक एवार्थः प्रतीयते। तथा च द्वितीयायाः आधेयत्वपरसमवेतत्वयोरर्थयोर्मध्ये अयोग्यतया परसमवेतत्वस्याभानेऽपि आधेयत्वस्य भाने बाधकाभावात् स्वनिष्ठसंयोगजनकत्वं विषयीकृत्य शाब्दबोधसंभवात् तदर्थमात्रतात्पर्येण ''चैत्रः स्वं गच्छति'' इति प्रयोगो दुर्वारा इति चेत् — न।

परसमवेत्वाविषयकस्य द्वितीयाधीनफलजनकत्वबोधस्य कुत्राप्यनभ्युपगमेन फलजनकत्वबोधे परसमवेतत्वभासकसामग्र्या अप्यपेक्षणीयत्वात्। एवं च ''चैत्रः स्वं गच्छति'' इत्यत्र परसमवेतत्वभासकयोग्यताज्ञानघटितकसामग्र्यभावात् न परसमवेतत्वाविषयकस्य संयोगजनकत्वबोधस्य प्रसङ्गः।

अथ स्वस्यापि द्वित्वावच्छिन्नस्वनिष्ठप्रतियोगिताको यो भेदः चैत्रमैत्रोभयं न इति भेदः तद्वत्वात् ''स्वं गच्छति'' इति प्रयोगो दुर्वारः। न च भेदे द्वितीयाप्रकृत्यर्थस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वयः वाच्यः। उभयत्वावच्छिन्नभेदस्य चैत्रत्वावच्छिन्नप्रतियोगिताकत्वविरहान्न दोष इति वाच्यम्। तथा सति ''चैत्रो द्रव्यं गच्छति, मल्लो मल्लं गच्छति'' इत्यादिवाक्यस्याप्रमाणतापत्तेः। चैत्रमल्लादिनिष्ठायां क्रियायां प्रकृत्यर्थतावच्छेदकीभूतद्रव्यत्वमल्लत्वाद्यवच्छिन्नप्रतियोगिताकभेदवत्समवेतत्वविरहात्। चैत्रे द्रव्यत्वावच्छिन्नप्रतियोगिताकभेदवत्समवेतत्वविरहात्। चैत्रे द्रव्यत्वावच्छिन्नप्रतियोगिताकभेदस्य मल्ले मल्लत्वावच्छिन्नप्रतियोगिताकभेदस्य चाभावात्।

न चैतद्दोषवारणाय द्वितीयाप्रकृत्यर्थस्य स्ववृत्तितत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन भेदेऽन्वयोऽस्तु। तथा चोक्तस्थले गमनकर्मीभूतद्रव्यव्यक्तिचैत्रव्यक्त्योः एवं गमनकर्मीभूतमल्लव्यक्तिगमनकर्तृमल्लव्यक्त्योश्च भेदात् नानुपपत्तिरिति वाच्यम्। तत्तद्व्यक्तित्वानुपस्थितावपि शाब्दबोधोदयेन तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगितासंबन्धेनान्वयोपगमासंभवात्।

न च संबन्धस्य संबन्धघटकस्य चानुपस्थितस्यापि भानसंभवान्न तद्व्यक्तित्वोपस्थितेरपेक्षेति वाच्यम्। तात्पर्यज्ञानस्य तत्तत्संबन्धावच्छिन्नतत्तद्धर्मावच्छिन्नप्रकारतानिरूपिततत्तद्धर्मावच्छिन्नविशेष्यताकबोधपरमित्याकारस्य तादृशबोधविषयकत्वेनैव हेतुत्वं वाच्यमिति तत्र संबन्धस्यापि विशेषणतया भानात् संबन्धस्य संबन्धघटकस्य चोपस्थितेः अवश्यापेक्षितत्वात्।

न च इदं वाक्यमेतद्विषयताविशिष्टबोधपरम् इत्याकारकमेव तात्पर्यज्ञानं कारणं वाच्यम्। वैशिष्ट्यं च स्वनिरूपितसंसर्गतानिरूपिततत्तद्धर्मावच्छिन्नविषयताकत्वसंबन्धेन। एवं च संसर्गस्यानुपस्थितस्यापि भानान्न तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगित्वस्योपस्थित्यपेक्षेति वाच्यम्। एवमपि एकधर्मावच्छिन्नप्रतियोगितायाः अपरधर्मावच्छिन्नप्रतियोगिकसंसर्गत्वे मानाभावात् तद्व्यक्तित्वावच्छिन्नप्रतियोगितायाः द्रव्यत्वावच्छिन्नसंसर्गत्वस्य मल्लत्वावच्छिन्नसंसर्गत्वस्य चासंभवात्। अत एव घटवति तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगितासंबन्धेन घटविशिष्टाभावस्य सत्त्वेऽपि तत्र 'घटो नास्ति' इति बुद्धेर्न प्रामाण्यम्।

न चास्तु द्रव्यत्वाद्युपलक्षितस्यैव भेदे विशेषणतया भानम्, तथा च तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताया अपि संसर्गत्वं संभवत्येवेति वाच्यम्। प्रतियोगिविशिष्टाभावबुद्धेर्विशिष्टवैशिष्ट्यावगाहित्वनियमात् प्रतियोगिविशेषणतानापन्नधर्मावच्छिन्नप्रतियोगितायाः संसर्गत्वासंभवात्।

न च नञभिलप्यमानाभावबुद्धेर्विशिष्टवैशिष्ट्यावगाहित्वनियमेऽपि द्वितीयार्थभेदबुद्धेः उपलक्षितवैशिष्ट्यावगाहित्वमेवोपेयम्। अतो "द्रव्यं गच्छति" इत्यादौ तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगितायाः संसर्गत्वमुपपद्यत इति वाच्यम्। तथा सति 'स्वं गच्छति' इत्यस्यापि प्रामाण्यापत्तेः। स्वस्मिन्नपि द्वित्वाद्यवच्छिन्नप्रतियोगिताकभेदस्य सत्त्वादिति द्वितीयार्थभेदबुद्धेरपि विशिष्टवैशिष्ट्यावगाहित्वमुपेयम् —

अत्रोच्यते। आश्रयतासंबन्धेन क्रियान्वयि भेदप्रतियोगितावच्छेदकत्वं द्वितीयार्थः। भेदे प्रकृत्यर्थस्य आधेयतासंबन्धेनान्वयः। तथा च ग्रामनिष्ठभेदप्रतियोगितावच्छेदिका ग्रामनिष्ठसंयोगजनिका च या क्रिया तदाश्रयश्चैत्र इति बोधः। ग्रामे गमनवान्नेति भेदस्य सत्त्वात्। चैत्रे स्वनिष्ठगमनवद्भेदस्यासत्त्वात् 'चैत्रः स्वं गच्छति' इति न प्रयोगः। अतो न काप्यनुपपत्तिः।

न चैवमपि 'विहगो भूमिं गच्छति' इतिवत् 'विहगो विहगं गच्छति' इति प्रयोगो दुर्वारः। विहगनिष्ठभूमिसंयोगजनकतत्क्रियायाः विहगान्तरनिष्ठभेदप्रतियोगितावच्छेदकतया विहगनिष्ठभेदप्रतियोगितावच्छेदकविहगवृत्तिसंयोगजनकक्रियाश्रयत्वस्याबाधितत्वादिति वाच्यम्। तर्हि आधेयत्वमात्रं धात्वर्थसंयोगादिफलान्वयि

द्वितीयार्थः। विहगवृत्तित्वविशिष्टसंयोगस्य धात्वर्थक्रियायां स्वजनकत्वस्वाश्रयनिष्ठभेदप्रतियोगितावच्छेदकत्वोभयसंबन्धेन अन्वयः। स्वं - संयोगः। विहगनिष्ठक्रियायाः तद्विहगनिष्ठसंयोगजनकत्वेन तज्जनकतासंबन्धेन तत्संयोगवत्त्वेऽपि विहगवृत्तित्वविशिष्टतत्संयोगाश्रयतद्विहगनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावान्नोक्तोभयसंबन्धेन विशिष्टसंयोगवत्त्वमित्यनतिप्रसङ्गात्।

एवं सति परसमवेतत्वं संबन्धघटकमेव, न तु द्वितीयार्थ इति चेत् — भवतु नाम। का क्षतिः।

"भूमिः विहगेन गम्यत" इत्यत्र धात्वर्थव्यापारस्य संयोगे स्वजन्यत्वस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवद्वृत्तित्वोभयसंबन्धेनान्वयः। तादृशोभयसंबन्धेन विहगवृत्तिक्रियाविशिष्टसंयोगाश्रयताया भूमौ सत्त्वात् समन्वयः। विहगे च विशिष्टसंयोगाश्रयताया बाधात् "विहगो विहगेन गम्यत" इति न प्रयोगः।

लकारार्थप्रकरणे तु एवं प्रतिपादितम् — "ग्रामं गच्छति" इत्यादौ फलं भेदश्च द्वितीयार्थः। आधेयतासंबन्धेन ग्रामस्य फलेऽन्वयः। फलस्य अपरस्मिन् द्वितीयार्थे भेदे सामानाधिकरण्य - स्वजनकक्रियावच्छिन्नप्रतियोगिताकत्वोभयसंबन्धेनान्वयः। भेदस्य स्वप्रतियोगितावच्छेदकत्वसंबन्धेन धात्वर्थे, तस्याख्यतार्थाश्रयत्वे तस्य प्रथमान्तार्थेऽन्वयः। "चैत्रेण ग्रमो गम्यत" इत्यादौ फलं भेदश्च कर्माख्यतार्थः। चैत्रेणेति तृतीयान्तार्थचैत्रवृत्तित्वान्वितक्रियायाः भेदे स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वयः। तस्यापरस्मिन्नाख्यतार्थे फले स्वसामानाधिकरण्यस्वप्रतियोगितावच्छेदकजन्यत्वोभयसंबन्धेनान्वयः — इति।

विभक्त्यर्थनिर्णयानुसारेण द्वितीयाविभक्त्यर्थनिरूपणम्[१]

अम् औट् शस् इति त्रयः प्रत्ययाः द्वितीयाविभक्तिः। तत्र सुमनसम् सुमनसौ सुमनसः इत्यादौ श्रूयमाणत्वात् अमः तत्त्वेन औकारस्य औत्वेन असः अस्त्वेन वाचकत्वम्। टशावनुबन्धौ क्वचिदप्यश्रूयमाणत्वान्न वाचकताकुक्षिप्रविष्टौ।

अनुशासनसिद्धः द्वितीयाया अर्थः। अनुशासनं च "कर्मणि द्वितीया"[२] इति। तत्र कर्म कर्मत्वं वा द्वितीयार्थ इत्यादिकमग्रे स्फुटीभविष्यति। कर्मपदसंकेतग्राहकमनुशासनं "कर्तुरीप्सिततमं कर्म"[३] इति। तत्र आप्नोतेः सन्नन्ततया निष्पन्नोऽपि ईप्साशब्दो रूढ्या इच्छामात्रमभिधत्ते न तु आप्तीच्छामिति सन्नन्त-

[१] पृ. ६९
[२] सू. २.३.२
[३] सू. १.४.४९

स्याप्नोतेरिच्छैवार्थः। यथा वीप्साशब्दो रूढ्या व्याप्तिमभिधत्ते न तु व्याप्तीच्छामिति सन्नन्तस्य व्याप्नोतेर्व्याप्तिरेवार्थः। एवं सन्नन्ताप्नोतेः कर्मप्रत्ययेन क्तेन विषयः विषयता आश्रयो वा अभिधीयते। एवं "क्तस्य च वर्तमाने"[१] इति विशेषानुशासनेन निष्ठायोगे सिद्धा षष्ठी कर्तृत्वमाधेयत्वस्वरूपमभिधत्ते। तमप्प्रत्ययस्तु प्रकृत्यर्थतावच्छेदकान्वितमतिशयं प्रकर्षमभिधत्ते। कर्मपदवाच्यं कर्मशब्दार्थः। धात्वर्थस्य तिङर्थस्य वा व्यापारस्याश्रयः कर्तृशब्दार्थः। एवं च व्यापाराश्रयनिष्ठेच्छाप्रकृष्टविषयः कर्मपदवाच्य इति सूत्रार्थः। इच्छा तु व्यापारजनिका बोध्या। ग्रामसंयोगो भवतु इतीच्छायां ग्रामसंयोगसाधनं स्पन्द इति ज्ञानात् प्रवृत्त्या गमनोत्पत्त्या गमनप्रयोजकेच्छाविषयत्वं ग्रामे कर्मत्वम्। व्यापारप्रयोजकत्वस्येच्छायां लाभार्थं कर्तुरिति पदम्। तेन माषेष्वश्वं बध्नातीत्यादौ अश्वभोजनेच्छाविषयत्वेऽपि माषस्य न कर्मत्वम्। तुरगभोजनेच्छायाः बन्धनाप्रयोजकत्वात्। तमब्ग्रहणं प्राधान्येन विषयत्वलाभार्थम्। तच्च क्रियाजन्यफले साक्षाद्विशेषणत्वम्। तेन भोजनव्यापारस्य पयस्सहितौदनकण्ठसंयोगो भवतु इतीच्छाप्रयोज्यत्वेऽपि पयसो न कर्मत्वम्। पयसः कण्ठसंयोगे फले साक्षाद्विशेषणतया इच्छाविषयत्वाभावात्। तेन पयसा सह 'ओदनं भुङ्क्ष्व' इत्यादौ पयः-पदान्न द्वितीया।

सर्वमेतत् बालोपलालनं न तु द्वितीयार्थोपवर्णनम्। द्वितीयातो दर्शितेच्छाविषयत्वस्य केनाप्यप्रतीयमानत्वात्।

एवं कारके इत्यधिकारः। कारकशब्दार्थः पूर्वमुक्तः। सप्तमी निर्धारणार्था। तेन ईप्सितादिभिन्नं कारकं न कर्म ईप्सितादिकारकं कर्मेत्यन्वयबोधः। तेन कर्मपदसंकेतोऽत्र कारके प्रदर्शितो न तु सर्वत्र। तेन कर्मपदार्थस्य उत्क्षेपणादेरप्रदर्शनेन न न्यूनत्वम्। एवं कारके इति सप्तमी प्रथमास्थान इति भ्रमः।

एवं "कर्मणि द्वितीया"[२] इत्यादौ "अनभिहिते"[३] इत्यधिकारसूत्रेणाभिहिते "कर्मणि द्वितीया" निषिध्यते। अभिधानं तिङ् कृत्तद्धितसमासैरन्येनापि। अतः "पच्यते पक्वो वा तण्डुल" इत्यादौ तिङा कृता च कर्मणोऽभिधानात् तण्डुलपदान्न द्वितीया। "नैयायिकः पण्डितः, शत्योऽश्वः" इत्यादौ तद्धितेन कर्माभिधानात् न्यायपदात्? अश्वपदाद्वा न द्वितीया। "प्राप्तानन्दः पुरुषः" इत्यादौ समासेन कर्माभिधानात् पुरुषपदान्न द्वितीया। समासस्याभिधायकत्वं शाब्दिकमते। न्यायमते तु आनन्दकर्तृकप्राप्तिकर्मणि आनन्दपदस्य लक्षणा, प्राप्तपदं तात्पर्यग्राहकमिति

---

[१] सू. २.३.६७

[२] सू. २.३.२

[३] सू. २.३.१

आनन्दपदेनैव कर्मप्रतिपादनात् पुरुषपदान्न द्वितीया। एवं "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्" इत्यादौ निपातेन कर्माभिधानात् वृक्षपदान्न द्वितीया। "उक्तार्थानामप्रयोगः" इति न्यायमेवानुवदतीदं सूत्रम्।

अत एव धात्वर्थान्तर्भूतकर्मकधातुयोगे न द्वितीया। यथा उदयगिरिसंयोगानुकूलव्यापारवाचिनः उदयतेर्योगे "उदयगिरिमुदेति" इति न द्वितीयाप्रयोगः।

एवम् अनभिहिते इति कर्त्रादौ सर्वत्र संबध्यते। तेनाभिहिते कर्तरि करणे च न तृतीया। संप्रदाने न चतुर्थी। तथापादाने न पञ्चमी। तथाधिकरणे न सप्तमी। कर्त्राद्यभिधानं तु कारकलक्षणे दर्शितम्।

नन्वभिहिते कर्मणि द्वितीयानिषेधे "पक्वमोदनं भुक्ते" इत्यादौ कृता कर्माभिधानात् ओदनपदात् न द्वितीयोपपत्तिरिति वाच्यम्। एवमपि "चैत्रेण गम्यमानं ग्रामं मैत्रो गच्छति" इत्यादौ गमिकर्मणः कृताभिधानात् द्वितीयानुपपत्तेः। न च चैत्रकर्तृकगमनकर्मणोऽभिधानेऽपि मैत्रकर्तृकगमनकर्मणोऽनभिधानान्न द्वितीयानुपपत्तिरिति वाच्यम्। एवमपि "दृष्टमपि कान्तं मुहुः पश्यति" इत्यादौ कर्तृभेदेनापि क्रियाभेदविरहात् दृशिक्रियाकर्मणः कृता अभिधानात् द्वितीयानुपपत्तेः। एवं "दृश्यं पश्यति" "कृत्यं करोति" इत्यादौ यत्प्रत्ययेन कर्मणोऽभिधानात् द्वितीयानुपपत्तेश्चेति चेत् —

न। यतः "अनभिहिते"[१] इति सूत्रस्य अन्य एव तात्पर्यार्थः। तथा हि — अनभिहिते इति सतिसप्तमी। तेन कर्मण्यनभिहिते सति द्वितीया भवतीत्यर्थः। अत एवाभिधानाभावः कर्मनिष्ठः द्वितीयावाच्यतायां न निवेश्यते। द्वितीयार्थविशेषणकान्वययोग्यार्थकपदे कर्म-बोधकशब्दासमभिव्याहृते सति द्वितीया भवतीत्यर्थः। "दृश्यं पश्यति कृत्यं करोति" इत्यादौ 'पश्यति' 'करोति' इति पदयोः कर्मबोधकपदासमभिव्याहृतत्वात् तदर्थयोः द्वितीयार्थान्वययोग्यत्वाच्च दृश्यकृत्यशब्दाभ्यां न द्वितीयानुपपत्तिरिति विशेषः कारकलक्षणोक्तरीत्या अवसेयः।

विभक्त्यर्थनिर्णये[२] सकर्मकत्वाकर्मकत्वपरिष्कारः

सकर्मकधात्वर्थो द्वितीयार्थान्वययोग्यः। सकर्मकत्वं तु न्यायमते अधिकरणाविशेषितफलावच्छिन्नव्यापारस्य तादृशफलव्यापारोभयस्य वाचकत्वम्।

---

[१] सू. २.३.१

[२] पृ. ७२

शाब्दिकमते तु फलाधिकरणावाचकत्वे सति स्वार्थफलव्यधिकरणव्यापारवाचित्वम्। तेन शब्दोत्पत्तेरनुकूलव्यापारे शक्तेन शब्दायतिना शब्दस्य, स्फिग्भूसंयोगानुकूलव्यापारार्थकेनोपविशतिना स्फिग्भूद्वयस्य, अधस्संयोगानुकूलव्यापारवाचिना पततिना अधःपदार्थस्य, सर्वावयवाधस्संयोगानुकूलव्यापारवाचिना शयतिना अधस्सर्वावयवद्वयस्य, उदयगिरिसंयोगानुकूलव्यापारार्थकेन उदेतिना उदयगिरेः, मिद्धामनोविभागानुकूलव्यापारवाचिना जागर्तिना मिद्धामनोद्वयस्य, मिद्धामनस्संयोगानुकूलव्यापारार्थकेन निद्रातिना मिद्धामनोद्वयस्य, अवयवापचयानुकूलव्यापारार्थकेन क्षीयतिना अवयवस्य, अवयवोपचयानुकूलव्यापारार्थकेन वर्धतिना अवयवस्य, प्राणशरीरसंयोगानुकूलव्यापारार्थकेन जीवतिना प्राणशरीरद्वयस्य प्राणशरीरात्यन्तवियोगफलकव्यापारार्थकेन म्रियतिना प्राणशरीरद्वयस्य च फलाधिकरणस्य अभिधानात् शब्दायति-उपविशति-पतति-शयति-उदेति-जागर्ति-निद्राति-क्षीयति-वर्धति-जीवति-म्रियतीनां न सकर्मकत्वमिति तेषां वारणाय सत्यन्तम्।

अनुचितकर्मानुत्पादफलकव्यापारो लज्जेरर्थः। अनुचितकर्म यद्धेतुकं ततः पञ्चमी, 'स्वतो लज्जते' 'परतो लज्जते' इति दर्शनात्। अनुत्पादरूपफलाधिकरणस्यानुचितकर्मणोऽभिधानादेव लज्जतिरकर्मकः।

एवं स्वगतानिष्टचिन्तनं बिभेतेरर्थः। चिन्तनविषयतारूपफलाधिकरणस्य चिन्तनसमानाधिकरणस्य फलस्य वा अनिष्टस्याभिधानात् बिभेतिरकर्मकः।

आत्मधारणानुकूलव्यापारार्थकस्य भवतेः आत्मधारणस्वरूपफलसमानाधिकरणव्यापारवाचकत्वम्।

एवं सुखस्य फलस्य समानाधिकरणं व्यापारमभिदधतो रमतेः, गतिरूपफलसमानाधिकरणनिवृत्तिमभिदधतस्तिष्ठतेश्च फलसमानाधिकरणव्यापारवाचकत्वमिति भवति-रमति-तिष्ठत्यादीनां वारणाय फलव्यधिकरणत्वं व्यापारे विशेषणम्। तच्च फलाधिकरणनिष्ठभेदप्रतियोगितावच्छेदकत्वम्। तेन गम्यादेः फलाधिकरणवृत्तिव्यापारवाचित्वेऽपि न सकर्मकत्वहानिः।

गम्यादेः धात्वन्तरार्थफलव्यधिकरणव्यापारार्थकत्वेऽपि सकर्मकत्वार्थं फले स्वार्थत्वं विशेषणम्। तेन स्पन्दमभिदधतः स्पन्देः, यत्नमभिदधतो यतेः, रुचिमभिदधतो रोचतेः, दुःखमभिदधतो बाधतेः, नाशमभिदधतो नश्यतेः, दीप्तिमभिदधतो दीप्यतेश्च व्यापारमात्रार्थकतया स्पन्दति-यति-रोचति-बाधति-नश्यति-दीप्यतीनां स्वार्थफलाभावान्न सकर्मकत्वम्।

अकर्मकपर्यायोऽकर्मक एव, यथा शब्दायतिपर्यायः पटपटायतिप्रभृतिः, लज्जतिपर्यायस्त्रपतिः, रमिपर्यायो दीप्यत्यादिः, बिभेतिपर्यायस्त्रस्यतिः, बाधतिपर्यायो व्यथतिः, रोचतिपर्यायः स्वदतिः। एवमन्येऽपि बोध्याः।

फलत्वं तु न धात्वर्थव्यापारजन्यत्वे सति धात्वर्थत्वम्। जन्यताप्रवेशेन गौरवात्। किं तु धात्वर्थव्यापारे विशेषणतया भासमानत्वे सति धात्वर्थत्वम्।

एवं विषयता ज्ञानं च जानातेः, उद्देश्यत्वमिच्छा चेच्छतेः, साध्यत्वाख्यविषयत्वं यत्नश्च, उत्पत्तिः तदनुकूलव्यापारश्च वा करोतेः, बाध्यत्वाख्यविषयत्वं द्वेषश्च द्विषेः, लौकिकविषयता प्रत्यक्षं च साक्षात्करोतेः, सा घ्राणजं च जिघ्रतेः, सा रासनं च रसयतेः, सा चाक्षुषं च पश्यतेः, सा स्पार्शनं च स्पृशतेः, सा श्रावणं च विषयता शाब्दं च शृणोतेः, विधेयता अनुमितिश्च तृतीयान्तविधेयबोधकशब्दयोगे उद्देश्यता अनुमितिश्चानुमातेः, विधेयता तर्कश्च तृतीयान्ततादृशशब्दयोगे उद्देश्यता तर्कश्च आपाद्यतेरर्थः।

विषयतादीनां ज्ञानादौ विशेषणतयान्वयित्वात् निरुक्तफलत्वं निराबाधमिति जानात्यादीनां निरुक्तसकर्मकत्वं निष्प्रत्यूहमिति।

''सुखवन्तमात्मानमिच्छति, सुरभि चन्दनं जिघ्रति, ध्वनन्तं शङ्खं शृणोति'' इत्यादौ सविशेषणे हि इति न्यायेन सुखसौरभनिध्वनानां द्वितीयार्थेऽन्वयः। तस्य च धात्वर्थफलेऽन्वयः। एवमेवेदृशस्थले कर्मलकारोपपत्तिः। अत एव ''दधानो निध्वानमश्रूयत पाञ्चजन्य'' इति माघः।

''पुष्पं जिघ्रति'' इत्यादौ घ्राणजानुगुणघ्राणसंनिकर्षः तदनुकूलव्यापारश्च शक्त्या वा जिघ्रतेरर्थः। एवं च धात्वर्थफलशालित्वं कर्मत्वमिति।

विभक्त्यर्थनिर्णये[१] शाब्दिकमतम्

अत्र शाब्दिकाः — आश्रयः कर्म द्वितीयार्थः। तथा हि धातूनां फले व्यापारे च शक्तिः। एकपदोपात्तयोरपि परस्परमन्वयो भवति, यथा तिङर्थानां साधनताघटकानामधिकरणाभावादीनां, यथा वा तिङर्थकर्तृसंख्ययोः। तत्र फलं विक्लित्तिसंयोगादि ताद्रूप्येण पचिगम्यादिनाभिधीयते। ''वह्निः पचति'' इत्यत्र ऊर्ध्वज्वलनत्वेन ''चैत्रः पचति'' इत्यत्र अधिश्रयणावतारणफूत्काराः ताद्रूप्येण व्यापाराः। ''पाचकः पचति'' इत्यत्र प्रयत्नत्वेन व्यापाराः पचिनाभिधीयन्ते। ''रथो गच्छति''

---

[१] पृ. ७४

इत्यत्र स्पन्दत्वेन "तुरगो गच्छति" इत्यत्र प्रयत्नत्वेन व्यापारा गमिनाभिधीयन्ते। तत्र सकलव्यापारानुगतस्य धर्मस्यासत्त्वात् सत्त्वे वा तेन धर्मेण व्यापाराणामप्रतीतेः नानुगतं प्रवृत्तिनिमित्तमिति बुद्धिविशेषोपलक्षितधर्मविशिष्टे सर्वनाम्नामिव, अथ वा फलजनकतावच्छेदकत्वोपलक्षितधर्मविशिष्टे धातूनां शक्तिः। अत एव विक्लित्तिजनकतावच्छेदकतया यो धर्मो गृहीतः तद्धर्मविशिष्टमेव पचिनोपस्थाप्यते। धात्वर्थव्यापार एव भावना उत्पादना क्रिया चेति व्यपदिश्यते। तत्र प्रधानतया भासमाने व्यापारेऽधिश्रयणादौ फलस्य विक्लित्त्यादेरनुकूलत्वादिना संसर्गेण, तिङर्थस्य वर्तमानकालस्य कर्तुश्च तत्तत्संसर्गावच्छिन्नाधेयतयान्वयः। कर्तरि तिङुपात्ता संख्या समवायादिना, प्रथमान्तार्थश्च तादात्म्येनान्वेति। प्रथमान्तार्थे सुबर्थसंख्यान्वेति। फले द्वितीयार्थस्याश्रयस्य आधेयतया आश्रये प्रकृत्यर्थस्याभेदेनान्वयः। एवं च "चैत्रस्तण्डुलं पचति" इत्यादौ एकतण्डुलाभिन्नाश्रयवृत्तिविक्लित्त्यनुकूलाधिश्रयणादिक्रिया वर्तमानकालवृत्तिः एकचैत्राभिन्नैकाश्रयवृत्तिश्चेत्यन्वयबोधः। तत्र फलस्य विक्लित्तेः धातुना, तण्डुलस्य प्रातिपदिकेन च लाभात् अनन्यलभ्यस्तण्डुलाभेदान्वययोग्य आश्रयो द्वितीयार्थः।

एवं कर्माख्यातस्यापि आश्रयोऽर्थः। इयांस्तु विशेषः — कर्माख्याते "चैत्रेण तण्डुलः पच्यत" इत्यादौ तण्डुलाभिन्नाश्रये तिङर्थसंख्याया अन्वयः। तृतीयार्थे आश्रये चैत्राभेदान्वयः, न तु संख्यायाः। "चैत्रः तण्डुलं पचति" इत्यादौ कर्त्राख्याते तिङर्थाश्रये तिङर्थसंख्यान्वयः, द्वितीयार्थाश्रये न संख्यान्वय इति संख्यातिरिक्ते विषये उभयविधवाक्यात् समानाकार एव शाब्दबोधः।

शाब्दबोधे क्रियायाः प्राधान्यम्

युज्यते च शाब्दबोधे क्रियायाः प्राधान्यम्। "भावप्रधानमाख्यातम्" इति निरुक्तात्। तिङन्तघटितवाक्ये भावस्य क्रियायाः प्राधान्यमिति तदर्थात्।

"धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते" इति परिभाषया क्रियाया भावपदार्थत्वात्। केवलः कारकानवच्छिन्नः, शुद्धः धात्वर्थतावच्छेदकानवच्छिन्नः। अत एव 'पचन्तिकल्पं पुरुषाः' इत्यादौ प्रधानीभूतक्रियायां कल्पबर्थस्य विशेषणत्वात् विशेष्यीभूतक्रियायां लिङ्गसंख्यान्वयायोग्यत्वात् कल्पशब्दस्य सामान्ये नपुंसकम् इति क्लीबत्वं, ततः साधुत्वार्थमेकवचनम्। यदि च कल्पबर्थस्य कर्तरि प्रथमान्तार्थेऽन्वयोऽङ्गीक्रियते, तदा विशेष्यस्य लिङ्गसंख्यान्वययोग्यतया कल्पशब्दस्य पुंस्त्वं ततो बहुवचनं च स्यात्। आचार्यकल्पाः द्विजाः इतिवत् पचन्तिकल्पाः इत्यपि स्यात्।

एवं च "तिङ्ङतिङः"[१] इति सूत्रेऽतिङ्ग्रहणं संगच्छते। तथा हि अतिङन्तात् परस्य तिङन्तस्य निघातस्वरो भवति। तत्रातिङ इति पदस्य प्रयोजनं महाभाष्येण 'पश्यति धावति मृग' इत्यत्र प्रदर्शितम्। तेन तिङन्तपरे धावतिपदे निघातस्वरो निषिध्यते। तत्र पदविधेर्निघातस्य सामर्थ्याश्रिततया तिङन्तयोर्व्यपेक्षायामेवेदं प्रयोजनं भवति। तिङन्तयोर्व्यपेक्षा तु तदैव संभवति यदि क्रियायाः प्राधान्यं स्यात्। तेन मृगकर्तृकधावनक्रियायाः कर्मतासंसर्गेण दृशिक्रियायामन्वयः संभवति। क्रियायाः धात्वर्थत्वात् धातोः अधातुरिति पर्युदासात् प्रातिपदिकसंज्ञाविरहान्न द्वितीयाप्रसङ्गः। धावनकर्तृमृगस्य प्रधानस्य दृशिक्रियायां कर्मतया अन्वये तु मृगपदात् द्वितीया स्यात्। द्वितीयायां लटोऽप्रथमासामानाधिकरण्येन शतृशानजापत्त्या दर्शितवाक्यप्रयोग एव न स्यात्।

एवमाश्रयस्य द्वितीयार्थत्वे तत्तत्संसर्गावच्छिन्नाधेयत्वेन संबन्धेन तस्य फलेऽन्वय इति व्युत्पत्तिवैचित्र्येण संसर्गविशेषलाभसंभवात् न संसर्गविशेषावच्छिन्नत्वमाश्रये विशेषणमिति संसर्गभेदेन भिन्नं नेति न शक्त्यानन्त्यम्।

अधिकरणताया आधेयताया वा द्वितीयार्थत्वपक्षो न युज्यते। अधिकरणतात्वस्य शक्यतावच्छेदकत्वे गौरवात्। 'कालं पचति' इति प्रयोगप्रसङ्गाच्च। कालवृत्त्यधिकरणतानिरूपकत्वस्य विक्लित्तावबाधितत्वात्। तत्तत्संसर्गावच्छिन्नाधिकरणत्वादेस्तत्तद्धातुसाकाङ्क्षद्वितीयाशक्यत्वे शक्त्यानन्त्यमिति।

अधिकरणस्य द्वितीयार्थत्वे तु अधिकरणत्वं जातिवत् स्वरूपेणैव द्वितीयाप्रवृत्तिनिमित्तम्। तच्चाखण्डोपाधिः गगनाभावस्वरूपः अतिरिक्तो वेत्यन्यदेतत्। अधिकरणस्य संसर्गविशेषलाभो व्युत्पत्तिवैचित्र्येणेत्युक्तमिति न शक्त्यानन्त्यम्।

"तण्डुलं पचति" इत्यादौ तण्डुलात्मकाधिकरणस्य अवयवशिथिलसंयोगस्वरूपायां विक्लित्तौ समवायघटितसामानाधिकरण्येन तदवच्छिन्नाधेयत्वेन वा संबन्धेनान्वयः।

"घटं जानाति" इत्यादौ घटाद्यात्मकाधिकरणस्य धात्वर्थफले विषयत्वे स्वरूपसंबन्धावच्छिन्नाधेयत्वेन संबन्धेनान्वयः।

"बर्हिर्जुहोति" इत्यत्र वह्निसंयोगानुकूलव्यापारो जुहोतेरर्थः। वह्नेर्धातुनोक्तत्वात् वह्निपदान्न द्वितीया। बर्हिस्स्वरूपाधिकरणस्य धात्वर्थफले वह्निसंयोगे समवायावच्छिन्नाधेयत्वसंबन्धेनान्वयः।

---

[१] सू. ८.१.२८

"ओदनं भुङ्क्ते" इत्यादौ पार्थिवद्रव्यप्रतियोगिककण्ठसंयोगानुकूलव्यापारो भुजेरर्थः। संयोगरूपे धात्वर्थफले ओदनरूपस्य अधिकरणस्य समवायावच्छिन्नाधेयत्वसंबन्धेनान्वयः। न च पार्थिवद्रव्यस्य फलाधिकरणस्य धातुनोक्तत्वात् ओदनपदात् कथं द्वितीयेति वाच्यम्। धातुना फलस्य संयोगस्य प्रतियोगित्वे विशेषणतया अधिकरणस्याभिधानेऽपि फलेऽधिकरणस्य आधेयतया विशेषणत्वेनानभिधानात् ओदनपदात् द्वितीयोपपत्तेः।

उपविशतिना तु फले स्फिग्भुवोरधिकरणयोः आधेयतया विशेषणत्वेनाभिधानात् स्फिग्भूपदाभ्यां द्वितीया न संभवति।

एवं द्रवद्रव्यप्रतियोगिकसंयोगः तदनुकूलव्यापारश्च सिञ्चतेरर्थः। फलेऽधिकरणस्य जलादेः आधेयत्वान्वयविवक्षायां 'जलमभिषिञ्चति' इत्यत्र जलपदात् द्वितीयोपपत्तिः। जलादिव्यापारजन्यत्वस्य फले विवक्षायां 'जलेनाभिषिञ्चति रोपिततरुम्' इत्यादौ जलपदात् तृतीयोपपत्तिः।

एवमन्यत्रापि धात्वर्थफले संसर्गविशेषावच्छिन्नाधेयत्वेन संबन्धेनाश्रयत्वस्यान्वयः सुधीभिरूहनीयः। एवं कर्तृकर्मणोराश्रयत्वेनाविशेषेऽपि व्यापाराश्रयः कर्ता, फलाश्रयः कर्मेति विशेषः संभवति।

नन्वेवं गम्यर्थस्य स्पन्दस्याश्रयत्वेन कर्तृत्वमिव तादृशस्य संयोगस्याश्रयत्वेन कर्मत्वमपि चैत्रस्य स्यात्। तथा च 'चैत्रो गमिकर्म' इति व्यवहारः, "चैत्रश्चैत्रं गच्छति" इति द्वितीयापत्तिश्चेति चेत् — न। परया कर्तृसंज्ञया कर्मसंज्ञायाः बाधात् कर्मव्यवहाराप्रसक्तेः, कर्मसंज्ञाया एव द्वितीयाप्रयोजकत्वात् कर्मसंज्ञाविरहे द्वितीयाया अप्रसक्तेश्च। न च कर्तृसंज्ञया कथं कर्मसंज्ञायाः बाध इति वाच्यम्। "या परानवकाशा च" इति परिभाषणात्। अत एवापादानसंप्रदानकरणाधिकरणकर्मणां कर्तुश्चोभयोः संप्राप्तौ परमेव प्रवर्तत इति पठन्ति।

एवं कर्मगतस्य फलस्य विवक्षायां प्रधानीभूतधात्वर्थाश्रयत्वेन कर्मणः कर्तृत्वमेव — यथा "पच्यते तण्डुलः स्वयमेव"।

एवमपादानत्वस्य विभागादेः धातुना प्राधान्येन बोधने अपादानस्य कर्तृत्वमेव — यथा "गिरिरपसरति" इत्यादौ। एवं संप्रदानकरणाधिकरणानामपि कर्तृत्वमाकलनीयमित्याहुः।

वैयाकरणमतखण्डनपूर्वकं तार्किकमतोपन्यासः[१]

तार्किकास्तु — आश्रयो न द्वितीयावाच्यः। आश्रयतात्वविशिष्टस्याश्रयत्वस्य शक्यतावच्छेदकत्वे गौरवात् तेन रूपेण वाच्यत्वासंभवात्।

न चाश्रयत्वमखण्डं गगनाभावाद्यात्मकं, तस्य निरवच्छिन्नशक्यतावच्छेदकत्वं संभवतीति वाच्यम्। जातीतरस्य निरवच्छिन्नावच्छेदकत्वासंभवात्। अन्यथा पृथिव्यादिचतुष्टयान्यतमत्वस्वरूपस्याखण्डोपाधेः द्रव्यारम्भकतायामवच्छेदकत्वसंभवे गुरुणः स्पर्शवत्त्वस्य अनवच्छेदकत्वं स्यात्। यदि अन्यतमत्वस्य पृथिव्यादिभिन्नप्रतियोगिघटितस्य भेदस्य नाखण्डत्वम्, तदा गगनादिप्रतियोगिघटितस्य गगनाभावादेरपि नाखण्डत्वम्, तुल्यत्वात्। निरवच्छिन्नविषयतया गगनाभावादेरप्रतीतेः।

न चातिरिक्तमेवाश्रयत्वं द्वितीयाप्रवृत्तिनिमित्तमिति वाच्यम्। शब्दप्रवृत्तिनिमित्तानुरोधेनातिरिक्तवस्तुकल्पनाया अन्याय्यत्वात्। अन्यथा समासवृत्तिवादिना खपुष्पादिशब्दप्रवृत्तिनिमित्ततया अतिरिक्तवस्तुकल्पनाप्रसङ्गः।

अथ खपुष्पादिकमधिकं क्लृप्तमेवेति चेत् — तर्हि अतिरिक्तखपुष्पादिसदृशस्यातिरिक्तवस्तुनः द्वितीयार्थत्वकल्पनापेक्षया "खपुष्पं पश्य" इत्यादौ कर्मत्वेन क्लृप्तस्य खपुष्पस्य लाघवात् द्वितीयार्थत्वं स्यात्।

अथाधिकरणत्वाधेयत्वयोरतिरिक्तत्वं दीधितिकृद्भिर्युक्त्या व्यवस्थापितमिति खपुष्पे न कापि तादृशी युक्तिरिति चेत् — तत्राप्यधिकरण[ता] त्वाधेय[ता]त्वयोरतिरेकित्वं दीधितिकृद्भिरङ्गीकृतम्। अन्यथा अधिकरणता इत्याकारकप्रतीतेरनुपपत्तेः। प्रकारत्वानिरूपितविशेष्यतायाः प्रकारं विना प्रकारतायाश्चासिद्धेः। दर्शितप्रतीतावधिकरण[ता]त्वं विना अन्यस्य प्रकारत्वायोगात्।

अगत्या अधिकरणतात्वविशिष्टस्याधिकरणत्वस्य द्वितीयाप्रवृत्तिनिमित्तत्वमिति चेत् — न। लाघवात् अधिकरणतात्वस्यैव द्वितीयाप्रवृत्तिनिमित्तत्वात् गतिसंभवात्।

न चाधिकरणतानां तत्तत्संसर्गावच्छिन्नानां द्वितीयार्थत्वे शक्त्यानन्त्यम्। अधिकरणतासामान्यस्य तथात्वे "कालं पचति" इति प्रयोगप्रसङ्ग इति पूर्वमेवोक्तमिति वाच्यम्। अधिकरणतासामान्यस्यैव द्वितीयार्थत्वात्। अधिकरणतायाः स्वनिरूपिततत्तत्संसर्गावच्छिन्नाधेयत्वसंबन्धेन फलेऽन्वयोपगमात् कालिकविशेषणतासंबन्धावच्छिन्नाधेयत्वस्य विक्लित्तिसंबन्धत्वानुपगमात्।

---

[१] पृ. ७९

न च "तण्डुलं पचति" इत्यत्र तण्डुलनिष्ठाधिकरणतायाः स्वनिरूपितेन तण्डुलसामानाधिकरण्यावच्छिन्नाधेयत्वेन संबन्धेन फले विक्लित्तावन्वयेन संबन्धे स्वनिरूपितत्वविशेषणं गौरवमावहति। आश्रयस्य तादृशाधेयत्वेनान्वये स्वनिरूपितत्वाप्रवेशान्न संबन्धगौरवमिति आश्रयस्यैव द्वितीयार्थत्वं युक्तमिति वाच्यम्। संबन्धगौरवस्याकिंचित्करत्वात्।

अपि च वाच्यतावच्छेदकगौरवस्य लक्षणाज्ञाने हेतुतागौरवापादकत्वम्। तथा हि — यत्र द्वितीयायाः आश्रयातिरिक्तेऽर्थे लक्षणा स्वीक्रियते तत्र द्वितीयाशक्याधिकरणसंबन्धीत्याकारकस्य लक्षणाज्ञानस्य हेतुत्वं वक्तव्यम्। तस्य ज्ञानस्य अधिकरणतात्वविशिष्टाधिकरणत्वावच्छिन्नाधिकरणविषयतानिरूपितसंबन्धविषयताकत्वेन हेतुता वक्तव्या। तदपेक्षया द्वितीयायाः अधिकरणतायां शक्तिवादिना द्वितीयाशक्याधिकरणतासंबन्धीत्याकारकस्य लक्षणाज्ञानस्य अधिकरणतात्वावच्छिन्नाधिकरणताविषयतानिरूपितसंबन्धविषयताकत्वेन हेतुत्वं स्वीक्रियमाणं लघुभूतम्। हेतुतावच्छेदकशरीरेऽधिकरणविषयताया अप्रवेशात्।

तान्त्रिकमतम् (तार्किकमतम्)[१]

परसमवेतधात्वर्थफलशालित्वं कर्मत्वमिति तान्त्रिका वदन्ति। तेषामाशयः — द्वितीयाकाङ्क्षाप्रयोजकतावच्छेदकधर्मवत्त्वं सकर्मकत्वम्। तादृशो धर्मो नानाविधः। पचिगम्यादीनामधिकरणाविशेषितफलव्यापारोभयवाचकत्वं तथा। शब्दायत्यादेः अधिकरणविशेषितफलवाचकत्वान्न द्वितीयाकाङ्क्षा। शीङ्स्थासामधिपूर्वकत्वं तथा। रमत्यादेः द्वितीयार्थभेदान्वययोग्यार्थकत्वविरहान्न द्वितीयाकाङ्क्षा। वसस्तु उपान्वध्याङन्यतमपूर्वकत्वं तथा। अधिकरणविशेषितफलवाचकानां शब्दायत्यादीनां, द्वितीयार्थभेदान्वयायोग्यार्थकानां रमत्यादीनाम्, फलावाचकानां यत्यादीनां च कालादिवाचकशब्दोत्तरद्वितीयाभिन्नद्वितीयानिराकाङ्क्षत्वस्वरूपाकर्मकत्वेन व्यवह्रियमाणानां णिजन्तत्वं तथा। न तु शाब्दिकोक्तं सकर्मकत्वम्। अधिशीङादावकर्मकणिजन्ते चाव्याप्तेः।

एवं धातुसाकाङ्क्षद्वितीयार्थत्वं कर्मत्वम्। तदपि नानाविधम्। अधिशीङ्स्थासादीनामाधारत्वं, अकर्मकणिजन्तानामणिजन्तस्वकर्तृत्वं, पचिगम्यादीनां परसमवेतधात्वर्थफलशालित्वम्। इदं कर्तृत्वं च गतिबुद्ध्यशनार्थकानां शब्दकर्मकाणां च णिजन्तानाम्। तत्र धात्वर्थफलस्य धातुना लाभात् परसमवेतत्वं द्वितीयार्थः। तत्रापि परत्वं भेदः समवेतत्वमाधेयत्वं खण्डशो द्वितीयार्थः। तत्र प्रातिपदिकार्थः

[१] पृ. ८४

आधेयत्वे निरूपितत्वसंबन्धेन, भेदे च तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वेति। आधेयत्वं फले स्वरूपेण, भेदो व्यापारे सामानाधिकरण्येनान्वेति। एवं च "चैत्रो ग्रामं गच्छति" इति वाक्यात् एकग्रामवृत्तिसंयोगानुकूलः तद्ग्रामप्रतियोगिकभेदसमानाधिकरणश्च यो व्यापारः तदनुकूलकृतिमान् एकश्चैत्र इति बोधः। तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगितायाः भेदसंबन्धत्वोपगमात् "मल्लो मल्लं गच्छति" इत्यादौ नान्वयबोधानुपपत्तिः। अन्यथा मल्लत्वावच्छिन्नप्रतियोगिताकभेदसमानाधिकरणायाः मल्लगमनक्रियाया अप्रसिद्धेः शाब्दबोधानुदयः स्यात्।

न च शब्दार्थे भेदेऽन्वयितावच्छेदकावच्छिन्नप्रतियोगितैव संबन्धः, तद्व्यक्तित्वं तु नान्वयितावच्छेदकमिति कथं तदवच्छिन्नप्रतियोगितायाः संबन्धत्वमिति वाच्यम्। नञर्थभेद एव तथा व्युत्पत्तेः।

अथ वा भेदे प्रातिपदिकार्थः आधेयत्वसंबन्धेनान्वेति। भेदः प्रतियोगितावच्छेदकतासंबन्धेन व्यापारेऽन्वेति। दर्शितस्थले गम्यमल्लवृत्तिभेदस्य गन्तृमल्लगमने प्रतियोगितावच्छेदकतायाः सत्त्वात् गन्तृभेदस्य गम्ये सत्त्वान्नानुपपत्तिः।

ननु भेदांशे द्वितीयाशक्तिकल्पनमप्रामाणिकम्, भेदानुभवस्य विवादग्रस्तत्वात्। कर्तृसंज्ञया कर्मसंज्ञाया बाधात् "चैत्रश्चैत्रं गच्छति" इति प्रयोगप्रसक्त्यभावात् इति चेत् —

न। निषेधप्रतीत्यन्यथानुपपत्तेः आख्यातवादे दीधितिकृद्भिः प्रमाणत्वेनोक्तत्वात्। तथा हि — "खगो भूमिं गच्छति न तु स्वम्" इति सर्वजनीनः प्रयोगः। तत्र भूमिकर्मकगमनकर्तृत्वं स्वकर्मकगमनकर्तृत्वाभावश्चेत्युभयं, यद्वा स्वकर्मकत्वाभाववतः भूमिकर्मकगमनस्य कर्तृत्वं खगे प्रतीयते। तत्र स्वपदोत्तरद्वितीया यदि आधेयत्वमात्रमभिधत्ते तदा गमिफले संयोगे स्वाधेयत्वस्य सत्त्वान्न तस्य निषेधः। न वा गमने स्वाधेयसंयोगजनकत्वस्य सत्त्वात्तस्य निषेधः, न वा स्वाधेयसंयोगजनकगमनकर्तृत्वस्य खगे सत्त्वात् तस्य निषेधो नञा बोधयितुं शक्य इति निषेधप्रतीत्यनुपपत्तिः। भेदस्य द्वितीयार्थत्वे तु स्वपदार्थविहगवृत्तिभेदस्य प्रतियोगितावच्छेदकतायाः विहगकर्तृकगमने विरहात् तस्य विरहो नञा बोध्यत इति निषेधप्रतीत्युपपत्तिः।

एवं "रूपं न गच्छति" इत्यादौ रूपवृत्तित्वाभाव एव गमिफले संयोगे नञा बोध्यते। रूपसमवेतसंयोगस्याप्रसिद्धेः रूपसमवेतसंयोगजनकव्यापारकर्तृत्वाभावस्य बोधयितुमशक्यत्वात्।

न च गम्यादिसमभिव्याहृतद्वितीयायाः समवायाद्यवच्छिन्नाधेयत्वं यद्यर्थः तदा शक्त्यानन्त्यम्। जातिमभावं वा न गच्छतीत्यादौ निषेधप्रतीत्यसंभवश्च। जातिनिरूपितस्याभावनिरूपितस्य च समवायावच्छिन्नाधेयत्वस्याप्रसिद्धेरिति वाच्यम्।

आधेयतात्वेनाधेयतासामान्यस्यैव द्वितीयार्थत्वेन शक्त्यानन्त्यविरहात्। गम्यादिसमभिव्याहारे तु समवायावचिछन्नाधेयत्वीयस्वरूपसंबन्धेन फले संयोगादावाधेयत्वस्यान्वयोपगमात् दर्शितस्थले जातिनिरूपितस्याभावनिरूपितस्य चाधेयत्वस्य समवायावच्छिन्नाधेयत्वीयस्वरूपसंसर्गावच्छिन्नप्रतियोगिताकमभावं संयोगे बोधयता नञा निषेधप्रतीतिसंभवाच्च। कालिकविशेषणतासंबन्धावच्छिन्नाधेयत्वीयस्वरूपसंसर्गस्य द्वितीयार्थाधेयताया अन्वयप्रयोजकत्वात् 'कालं पचति' इत्यादिको न प्रयोगः। अत एव कालिकविशेषणतादिघटितव्यापकत्वार्थं पृथगनुशासनं "कालाध्वनोरत्यन्तसंयोगे"[१] इति।

एवं स्वावयवावच्छेद्याधिकरणतानिरूपित्वसंबन्धेन प्रकृत्यर्थस्य द्वितीयार्थाधेयत्वे गम्यादिफलसंयोगाद्यन्वययोग्येऽन्वयः वक्तव्यः। स्वपदं परिचायकम्, अवयवः समवायी। तेन 'गगनं क्षेत्रज्ञं कालं दिशं वा गच्छति' इति न प्रयोगः। गगनाद्यवयवाप्रसिद्धेः।

ननु भेदस्य द्वितीयार्थत्वोपगमेन "विहगो भूमिं गच्छति न तु स्वम्" इत्यादौ निषेधप्रतीत्युपपादनेऽपि "चैत्रो ग्रामं गच्छति न तु मनुष्यम्" इत्यादौ निषेधप्रतीत्यनुपपत्तिस्तदवस्थैव। गम्यर्थसंयोगे चैत्रात्मकमनुष्यसमवेतत्वस्य व्यापारे च मनुष्यान्तरवृत्तिभेदप्रतियोगितावच्छेदकतायाश्च सत्त्वात् द्वितीयार्थयोराधेयत्वभेदयोर्निषेधस्य तत्र बोधयितुमशक्यत्वात्। "चैत्रो मनुष्यं गच्छति" इति प्रयोगापत्तिश्च।

न च तत्तन्मनुष्यनिष्ठभेदप्रतियोगितावच्छेदकं तत्तन्मनुष्यवृत्तिसंयोगजनकत्वविशिष्टं यावत् तावदभावकूट एव नञा प्रतिपाद्यते। तथा च चैत्रात्मकमनुष्यवृत्तिसंयोगजनकत्वविशिष्टं यत् चैत्रात्मकमनुष्यवृत्तिभेदप्रतियोगितावच्छेदकत्वं चैत्रकर्मकान्यदीयगमनेऽस्ति तदभावस्य नञा बोधनात् मनुष्यान्तरकर्मकचैत्रकर्तृकगमने यत्किञ्चिन्मनुष्यवृत्तिसंयोगजनकत्वविशिष्टस्य यत्किञ्चिन्मनुष्यनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य विरहेऽपि 'चैत्रो मनुष्यं गच्छति' इति न प्रयोगः, तादृशतावदभावकूटस्य तादृशचैत्रगमनेऽसत्त्वादिति वाच्यम्।

भेदस्यैव द्वितीयार्थतया तावदवच्छेदकत्वस्य अनुपस्थित्या तदभावग्रहासंभवात्। तावदभावकूटस्य युगसहस्रेणापि ज्ञातुमशक्यत्वाच्च।

---

[१] सू. २.३.५

तस्मात् द्वितीयायाः भेदार्थकत्वेऽपि निषेधप्रयोगोपपत्तिर्न संभवतीति चेत् — न। यतः "चैत्रो ग्रामं गच्छति न मनुष्यम्" इत्यादौ स्वसमवेतसंयोगजनकत्वस्ववृत्तिभेदप्रतियोगितावच्छेदकत्वोभयसंबन्धावच्छिन्नप्रतियोगिताकः मनुष्यसामान्याभावो गमने नञा बोध्यते। संयोगेन "घटो नास्ति" इत्यत्र तृतीयान्तसंयोगपदमिव द्वितीया प्रतियोगितावच्छेदकसंसर्गानुवादकतयोपयुज्यते। अतो न काप्यनुपपत्तिः।

न च दर्शितसंबन्धोभयस्य वृत्त्यनियामकत्वात् कथं प्रतियोगितावच्छेदकत्वमिति वाच्यम्। यतः स एव वृत्त्यनियामकः स्वावच्छिन्नप्रतियोगिताकतया अभावस्य जगद्वृत्तित्वप्रयोजको यः संबन्धः प्रतियोगिवैशिष्ट्यबुद्धिं न जनयति, यथा गगनादिसंयोगो गगनादिवैशिष्ट्यबुद्धिं न जनयति तदवच्छिन्नप्रतियोगिताकोऽभावो जगद्वृत्तिः। प्रकृते दर्शितसंबन्धेन स्वस्य गमने मनुष्यात्मकप्रतियोगिवैशिष्ट्यबुद्धिजनकत्वान्न तदवच्छिन्नप्रतियोगिताको जगद्वृत्तिरिति स्वावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वप्रयोजकत्वस्वरूपस्य वृत्त्यनियामकसंबन्धप्रतियोगितानवच्छेदकत्वबीजस्य दर्शितोभयसंबन्धे विरहान्नानुपपत्तिरिति।

न चैवमधिकरणं द्वितीयार्थोस्तु। तस्यैव दर्शितोभयसंबन्धावच्छिन्नप्रतियोगिताकोऽभावः प्रकृते प्रतीयेतेति वाच्यम्। अधिकरणस्य द्वितीयार्थत्वे शक्यतावच्छेदकगौरवस्य दर्शितत्वात्।

विभक्त्यर्थनिर्णये[1] द्वितीयायाः परसमवेतत्वे लक्षणा न तु शक्तिरिति मतखण्डनम्

यत्तु "ग्रामं गच्छति" इत्यादौ परसमवेतत्वे भेदसामानाधिकरण्यात्मके लक्षणैव, न तु शक्तिः। द्वितीयान्तार्थविशेषितभेदसामानाधिकरण्यं व्यापारे फले वान्वेतीति शाब्दिकैरुक्तम् —

तन्न विचारसहम्। तथा हि — द्वितीयान्तार्थः प्रतियोगितया भेदे तत्सामानाधिकरण्यं व्यापारेऽन्वेतीत्ययं पक्षो न संभवति। "मल्लो मल्लं गच्छति" इत्यादौ अन्वयितावच्छेदकीभूतमल्लत्वावच्छिन्नप्रतियोगिताकमल्लभेदस्य मल्लवृत्तिव्यापारे सामानाधिकरण्यासंभवात्। शब्दार्थाभावे अन्वयितावच्छेदकेतरधर्मावच्छिन्नप्रतियोगितया पदार्थान्वयस्याव्युत्पन्नत्वात्।

---

[1] पृ. ९३

न वा द्वितीयान्तार्थः आधेयतया व्यापारवान् प्रतियोगितया भेदे तत्सामानाधिकरण्यं फलेऽन्वेतीत्यपि संभवति। "ग्रामं गच्छति" इत्यत्र व्यापारवतः ताद्रूप्येणानुपस्थितेः। तव मते तु आश्रयत्वेन तिङोपस्थापितस्य तस्य धात्वर्थविशेषणतयान्वितत्वात् द्वितीयालक्ष्यप्रविष्टभेदेऽन्वयासंभवात्। एकत्र विशेषणतयोपस्थापितस्यापि पदार्थान्तरान्वयोपगमे तु "मृगो धावति पश्य" इत्यत्रापि मृगे विशेषणतयान्वितस्य धावनस्य दृश्यर्थान्वयप्रसङ्गात्। भेदस्य लक्ष्यैकदेशतया तत्र पदार्थान्वयस्य सर्वमतेऽप्यव्युत्पन्नत्वाच्च।

न च द्वितीयाया आश्रयो वाच्यः, भेदो लक्ष्यः। प्रकृत्यर्थस्य तादात्म्येनाश्रये आधेयतया भेदेऽन्वयः। आश्रयः आधेयतया फले भेदः प्रतियोगितया व्यापारेऽन्वेतीति ग्रामाभिन्नाश्रयवृत्तिसंयोगानुकूलः ग्रामवृत्तिभेदप्रतियोगी च चैत्राभिन्नाश्रयको व्यापार इति "ग्रामं गच्छति चैत्र" इति वाक्यात् बोध इति वाच्यम्। युगपत् वृत्तिद्वयविरोधात्। भेदस्य लघुतया शक्यत्वोपपत्तौ गुरुतया आश्रयस्यैव लक्ष्यत्वापत्तेश्च।

नव्यशाब्दिकमतखण्डनम्

यदपि भेदे द्वितीयायाः न शक्तिः। किं तु द्वितीयार्थाधिकरणविशेषितफलप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दं प्रति द्वितीयान्तार्थवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकव्यापारोपस्थितिः विशेष्यतासंबन्धेन कारणम्। अतश्चैत्रश्चैत्रं गच्छतीत्यत्र न शाब्दबोधः, तादृशव्यापारोपस्थितिविरहादिति नव्यशाब्दिकैरुक्तम्।

तदप्यसत्। द्वितीयान्तं विनापि 'गच्छति' इत्यादौ फलप्रकारतानिरूपितव्यापारविशेष्यताकशाब्दबोधोदयात् तत्र क्लृप्तसामग्र्यां द्वितीयान्तसमभिव्याहारेऽपि फलप्रकारकशाब्दसंभवात् ईदृशकार्यकारणभावे मानाभावात्। द्वितीयान्तसमभिव्याहारात् प्रकृत्यर्थविशेषितद्वितीयार्थस्य विशेषणतया फलेऽन्वयसंभवात् दर्शितकार्यतावच्छेदकस्यार्थसमाजग्रस्तत्वाच्च।

किं च दर्शितकार्यकारणभावेन "चैत्रश्चैत्रं गच्छति" इत्यत्र शाब्दवारणेऽपि "खगो भुवं गच्छति न तु स्वम्" इत्यत्र निषेधप्रतीत्युपपत्तिर्न भवति। स्वकर्मकत्वाभावस्य विना भेदं प्रत्येतुमशक्यत्वात् इति भेदस्य द्वितीयार्थत्वावश्यकत्वे तावतैव "चैत्रश्चैत्रंगच्छति" इत्यत्र चैत्रकर्मकत्वशाब्दासंभवात् निष्प्रामाणिकतरो दर्शितोऽयं कार्यकारणभावः।

यदि च 'पचति' इत्यादौ भेदप्रतीतिः निषेधमुखेनापि न भवति फलस्य द्विनिष्ठत्वाभावात्। गम्यादौ तु "भुवं गच्छति न तु स्वम्" इति निषेधप्रतीत्यन्यथानुपपत्त्या भेदप्रतीतिः आवश्यकी। तत्र भेदः फलविधया धात्वर्थः। तत्र द्वितीयार्थस्याधेयत्वस्यान्वयः। तस्य च प्रतियोगितावच्छेदकतया व्यापारेऽन्वयः। संयोग इव भेदोऽपि फलविधया धात्वर्थ एव। तावतापि न तु स्वमिति निषेधप्रतीत्युपपत्तिरिति भेदो धातोः द्वितीयाया वा शक्य इत्यत्र विनिगमनाविरहः।

न च भेदस्य फलविधया गम्यर्थत्वे भेदरूपफलवत्त्वात् ग्रामत्वं गच्छतीति प्रयोगापत्तिरिति वाच्यम्। संयोगभेदोभयफलवतो गमिकर्मत्वात् तदुभयविरहेण ग्रामत्वस्य कर्मत्वायोगात् तथा प्रयोगानापत्तेः।

न च "चैत्रो ग्रामं गच्छति न तु मनुष्यम्" इत्यत्र निषेधप्रतीत्यनुपपत्तिः, संयोगे चैत्रात्मकस्य मनुष्यस्य भेदे चैत्रान्यमनुष्यस्य आधेयतायाः सत्त्वात् तदभावप्रतीत्यसंभवादिति वाच्यम्। द्वितीयार्थाधेयत्वस्य संयोगसमानाधिकरणविशेषणतासंबन्धावच्छिन्नाधेयत्वीयस्वरूपसंबन्धेन भेदेऽन्वयोपगमात् दर्शितस्थले मनुष्यनिरूपिताधेयत्वस्य द्वितीयान्तार्थस्य दर्शितसंबन्धावच्छिन्नप्रतियोगिताकमभावं बोधयता नञा निषेधप्रतीतेः निष्प्रत्यूहत्वात्।

किं च भेदस्य द्वितीयार्थत्वोपगमे द्वितीयान्तपदघटितशाब्दसामग्र्यां भेदोपस्थितेः सर्वत्र प्रवेशेन भिन्नविषयकप्रत्यक्षादिप्रतिबन्धकतायां गौरवम्, विनिगमकाभावात् आनन्त्यं च स्यादिति संयोगादिव्यासज्यवृत्तिफलकगम्यादिधातोः भेदार्थकत्वे तु गम्यघटितशाब्दसामग्र्यामेव भेदोपस्थितेः प्रवेशेन सर्वत्राप्रवेशेन लाघवं स्यादिति विभाव्यते —

तदा भेदो न द्वितीयाया न वा धातोरर्थः। किं तु गम्यादिफले विभागे द्वितीयार्थाधेयत्वस्य व्यापारवद्भेदसमानाधिकरणत्वविशिष्टसमवायावच्छिन्नाधेयत्वीयस्वरूपसंबन्धेनान्वयोऽभ्युपेयते। तत एव "चैत्रः चैत्रं गच्छति" इत्यत्र न शाब्दबोधः। चैत्राधेयत्वस्य दर्शितसंसर्गेण संयोगेऽयोग्यत्वात्। "चैत्रो ग्रामं गच्छति न तु स्वं न वा मनुष्यम्" इत्यादौ स्वनिरूपिताधेयत्वस्य मनुष्यनिरूपिताधेयत्वस्य च दर्शितसंबन्धावच्छिन्नप्रतियोगिताकोभावो नञा संयोगे बोध्यते। अतो निषेधप्रतीतिरुपपद्यते।

एवमेव "चैत्रश्चैत्रं त्यजति" इत्यत्र न शाब्दबोधः, न वा "चैत्रो ग्रामं त्यजति न तु स्वं न वा मनुष्यम्" इत्यत्र निषेधप्रतीत्यनुपपत्तिरिति इयमभिनवा रीतिः सुधीभिराकलनीया।

विभक्त्यर्थनिर्णये[१] कर्माख्यातस्थले आख्यातार्थः शाब्दबोधश्च

एवं कर्माख्यातस्य फलान्वितमधिकरणत्वमर्थः। न च द्वितीयापर्यायत्वानुपपत्तिरिति वाच्यम्। अधिकरणत्वाधेयत्वयोः समानसंवित्संवेद्यतया कर्मत्वशब्दप्रतिपाद्यत्वात्।

न चैवं कर्माख्याते फलान्विताधेतत्वस्यानभिधानात् द्वितीयाप्रसङ्ग इति वाच्यम्। फलान्विताधिकरणत्वतद्वतोरन्यतरानभिधानस्यैव द्वितीयाप्रयोजकत्वात् तयोरन्यतरबोधकशब्दासमभिव्याहृते द्वितीयार्थान्वययोग्यार्थके पदे सति द्वितीया भवतीत्यस्योक्तत्वात्।

एवं "चैत्रेण ग्रामो गम्यते" इत्यादौ एकचैत्रकर्तृकव्यापारजन्यसंयोगाधिकरणतावानेकग्रामः इत्यन्वयबोधः। कर्माख्यातस्थले तृतीयार्थकर्तृत्वं व्यापारे व्यापारः फले फलं तिङर्थाधिकरणत्वे तिङर्थः प्रथमान्तार्थेऽन्वेति।

अत्रापि "चैत्रेण ग्रामो गम्यते न तु स्वात्मा न वा मनुष्य" इति निषेधप्रतीत्यनुरोधेन कर्माख्यातस्य भेदोऽप्यर्थः। स्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन व्यापारो भेदे, भेदो विशेषणतया प्रथमान्तार्थेऽन्वेति। तथा च एकचैत्रकर्तृकव्यापारजन्यसंयोगाधिकरणतावान् व्यापारावच्छिन्नप्रतियोगिताकभेदवान् एकग्राम इत्यन्वयबोधः।

संयोगविशिष्टविशेषणता भेदस्य संसर्गः। तादृशविशेषणतासंसर्गावच्छिन्नप्रतियोगिताकस्य व्यापारावच्छिन्नप्रतियोगिताकभेदाभावस्य स्वात्मनि मनुष्ये च सत्त्वात् निषेधप्रतीतिरुपपद्यते।

अभिनवरीतौ तु संयोगफलकगम्यादिना विभागफलकत्यज्यादिना च समभिव्याहृतस्य कर्माख्यातस्यार्थोऽधिकरणत्वं व्यापारवद्भेदसमानाधिकरणत्वविशिष्टसमवायावच्छिन्नाधिकरणत्वीयस्वरूपसंबन्धेन प्रथमान्तार्थे अन्वेति। "चैत्रेण ग्रामो गम्यते न तु स्वात्मा न वा मनुष्य" इत्यत्र गम्यर्थफलसंयोगान्वितं तिङर्थाधिकरणत्वं दर्शितसंसर्गेण ग्रामे निराबाधमिति तस्य ग्रामेऽन्वयो भवति। तस्य तु दर्शितसंबन्धावच्छिन्नप्रतियोगिताकोऽभावः स्वात्मनि मनुष्ये च निराबाध एव। स्वात्मनि दर्शितसंसर्गेण मनुष्यान्तरे स्वरूपसंबन्धेनापि चैत्रकर्तृकव्यापारजन्यसंयोगाधिकरणत्वस्यासत्त्वादिति निषेधप्रतीत्युपपत्तिः। एवमन्यत्रापि निषेधप्रतीत्युपपत्तिः सुधीभिरूहनीया।

---

[१] पृ. ९६

विभक्त्यर्थनिर्णये[1] व्यापारमात्रं धात्वर्थ इति प्राचीनमतानुसारेण द्वितीयार्थनिष्कर्षः

एतावता धातोः फलव्यापारोभयार्थकत्ववादिमतानुसारेण कर्मप्रत्ययद्वितीयाद्यर्थो निरूपितः। अथ धातोर्व्यापार एवार्थ इति प्राचीनमतानुसारेण द्वितीयार्थः निरूप्यते।

प्राञ्चस्तु — धातोर्व्यापार एवार्थः। फलं द्वितीयार्थः। कर्माख्यातस्यापि फलमर्थः। एवं द्वितीयाकर्माख्यातयोः पर्यायतापि स्पष्टा। "अनभिहिते"[2] इत्यनेन फलानभिधानस्यैव द्वितीयाप्रयोजकत्वमावेद्यते। सकर्मकत्वं तु पूर्ववत् द्वितीया-साकाङ्क्षत्वमेव। तत्र द्वितीयाकाङ्क्षाप्रयोजको धर्मः गमित्यजिपच्यादीनां फला-न्वितव्यापारानादितात्पर्यकत्वम्। तद्विरहादेव व्यापारमात्रार्थकानां स्पन्दियति-प्रभृतीनां न द्वितीयाकाङ्क्षा। अतो 'ग्रामं स्पन्दते, सुखं यतत' इति न प्रयोगः। शीङादेरधिपूर्वकत्वं तथा [द्वितीयाकाङ्क्षाप्रयोजको धर्मः] तत्राधिकरणत्वमाधेयत्वं वा द्वितीयार्थः।

पूर्वोक्ताकर्मकत्वेन व्यवह्रियमाणानां णिजन्तत्वं द्वितीयाकाङ्क्षाप्रयोजको धर्मः। तत्राणिजन्तधात्वर्थकर्तृत्वं द्वितीयार्थः। गतिबुद्ध्यशनार्थकानां शब्दकर्मकाणां च णिजन्तानां च फलम् अणिजन्तधात्वर्थकर्तृत्वं च द्वितीयार्थः। अधिकरणविशेषित-फलविशिष्टव्यापारवाचकाः शब्दायत्यादयः फलसमानाधिकरणव्यापारवाचकाः रमत्यादयश्चात्रापि मते तथैव। तत्र फलस्य धातुनोक्तत्वात् "उक्तार्थानामप्रयोगः" इति न्यायात् न फलार्थकद्वितीयाप्रसङ्गः।

ननु गमित्यज्योर्व्यापारमात्रार्थकत्वे पर्यायत्वं स्यात्। न च तदर्थार्थकत्वं तत्पर्यायत्वम्, स्वार्थव्यापारार्थकत्वं त्यजिगम्योः परस्परं तदिष्टमेवेति वाच्यम्। तथा सति त्यागे वक्तव्ये गमनमिति, गमने वक्तव्ये त्याग इति च प्रयोगप्रसङ्गादिति चेत् —

न। गमेः संयोगान्वितव्यापारानादितात्पर्यकत्वात्, त्यजेर्विभागान्वितव्यापारा-नादितात्पर्यकत्वाच्च तथा प्रयोगप्रसङ्गविरहात्।

न चैवं त्यजिगम्योस्तथा तात्पर्यावधारणे 'त्यजति गच्छति' इत्यादौ 'त्यजनं गमनम्' इत्यादौ च धातोर्व्यापारमात्रबोधने तात्पर्यविरहेण कर्मप्रत्ययाभावेन

---

[1] पृ. ९९

[2] सू. २.३.१

फलबोधनासंभवात् मूकत्वं स्यादिति वाच्यम्। कर्मप्रत्ययासमभिव्याहारस्थले निरूढलक्षणया विभागावच्छिन्नस्य त्यजिना संयोगावच्छिन्नस्य गमिना व्यापारस्य बोधनसंभवात्।

एवं "चैत्रः तण्डुलं पचति" इत्यत्र विक्लित्तिः द्वितीयार्थः। तत्र तत्तत्संसर्गावच्छिन्नाधेयत्वेन संबन्धेन प्रकृत्यर्थस्य तण्डुलादेरन्वयः। एकतण्डुलाधेयविक्लित्त्यनुकूलव्यापारानुकूलयत्नवानेकचैत्र इत्यन्वयबोधः।

एवं "ग्रामं गच्छति" इत्यत्र संयोगो द्वितीयार्थः। "ग्रामं त्यजति" इत्यत्र विभागो द्वितीयार्थः। एवमन्यत्रापि फलं द्वितीयार्थो बोध्यः। तत्र द्वितीयार्थस्य संयोगस्य व्यापारेऽन्वये गम्यादिसमभिव्याहारस्य, तथा विभागस्य व्यापारेऽन्वये त्यजादिसमभिव्याहारस्य च हेतुत्वात् 'ग्रामं स्पन्दत' इत्यादौ द्वितीयार्थसंयोगविभागयोः स्पन्दे नान्वयः इत्याहुः।

अत्र द्वितीयार्थे व्यासज्यवृत्तिसंयोगविभागादिके फले व्यापारवद्भेदावच्छिन्नसमवायावच्छिन्नाधेयत्वसंबन्धेन प्रकृत्यर्थस्यान्वयः। तेन "चैत्रश्चैत्रं गच्छति" इत्यत्र न शाब्दबोधः। दर्शितसंबन्धेन फले संयोगादौ चैत्रस्यान्वयायोग्यत्वात्। "चैत्रो ग्रामं गच्छति न तु स्वं न वा मनुष्यम्" इत्यत्र दर्शितसंबन्धावच्छिन्नप्रतियोगिताकः स्वस्य मनुष्यस्य वा अभावः नञा फले संयोगे बोध्यते। अस्मिन् मते प्रकृत्यर्थाभावः प्रत्ययार्थे नञा बोध्यते।

एवं "तण्डुलं पचति न तु गगनम्" इत्यत्र निषेधप्रतीतेरन्यथानुपपत्तेः 'ग्रामो गम्यते त्यज्यत' इत्यादौ कर्माख्याते दर्शितसंसर्गे आधेयत्वस्थानेऽधिकरणत्वं योजनीयम्। तेन संसर्गेण कर्माख्यातार्थस्य फलस्य संयोगविभागादेः ग्रामादौ प्रथमान्तार्थेऽन्वयः। तेन "चैत्रश्चैत्रेण गम्यत" इत्यत्र न शाब्दबोधः। "चैत्रेण ग्रामो गम्यते न तु स्वात्मा न वा मनुष्य" इत्यादौ तत्संसर्गावच्छिन्नप्रतियोगिताकस्तिङर्थसंयोगस्य अभावः स्वात्मनि मनुष्ये च नञा बोध्यते इति निषेधप्रतीत्युपपत्तिः।

यदा तु धातुना फलमेवाभिधीयते, तदा उक्तार्थानामिति न्यायात् द्वितीया न भवति। कर्मस्थभावको धातुर्भवति। तत्र तिङा फलान्वितमाश्रयत्वमभिधीयते। फलान्विताश्रयत्ववतः कर्मणः कर्तृत्वमेव तत्र निर्वर्त्यविकार्ययोः कर्मणोः कर्तृत्वे कर्मवद्भावः, यथा "ओदनः पच्यते स्वयमेव, वंशश्छिद्यते स्वयमेव" इत्यादौ। प्राप्यकर्मणः कर्तृत्वे तु न कर्मवद्भावः, यथा "ग्रामो गच्छति" इत्यादौ। अतः प्राचीनमतमप्यनवद्यम्।

विभक्त्यर्थनिर्णये[१] भाट्टमतानुवादः

आख्यातार्थभावनायां प्रधानीभूतायामेव कारकाणामन्वयः, न तु धात्वर्थे। धात्वर्थस्यापि कारकतया भावनायामेवान्वयात्। कारकाणां परार्थतया परस्परमन्वयायोगात्। "गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यात्" इत्युक्तत्वात्। कारकं तु कर्मत्वकर्तृत्वादिकमखण्डपदार्थः। अत एवाध्वर्युयजमानयोः संयमनभावनाकर्मत्वं दम्पत्योराधानभावनाकर्तृत्वं च व्यासक्तमित्युपपद्यत इति भाट्टाः।

नन्वाख्यातस्य फलव्यापारोभयवाचित्वाभावात् आख्यातार्थभावनायां सकर्मकत्वमनुपपन्नमिति कथं तत्र कर्मकारकान्वय इति चेत् —

न। यतो विवरणेनाख्यातस्य फलव्यापारोभयवाचित्वमवधार्यते। 'पचति' इत्यत्र पाकं करोति उत्पादयति जनयति वेति उत्पत्त्यनुकूलव्यापारार्थकेन करोत्यादिना तिङो विवरणेन आख्यातस्य उत्पत्त्यनुकूलव्यापारवाचित्वावगमात् उत्पत्त्यनुकूलव्यापार एव भावनाशब्दार्थः। तत्रानुकूलत्वं संबन्धविधया तिङ्जन्यबोधे भासते। उत्पत्तिव्यापारौ तिङोऽर्थः। एकपदोपात्तयोरपि धात्वर्थयोः फलव्यापारयोरिव तिङर्थयोरप्युत्पत्तिव्यापारयोः परस्परान्वयो निराबाध एव। तत्र तिङर्थभावनाफलोत्पत्त्यन्वितं कर्म द्विधा — क्वचित् धात्वर्थः क्वचित् प्रातिपदिकार्थः। धात्वर्थो यथा 'पचति' इत्यादौ। तिङर्थभावनाफलभूतोत्पत्तौ अधाराधेयभावसंसर्गेण धात्वर्थः पाकादिरन्वेति। अत एव 'पचति' इत्यस्य पाकं करोतीति विवरणे पाकपदात् कर्मानुवादिका द्वितीया। प्रातिपदिकार्थो यथा "ओदनं पचति" इत्यादौ द्वितीयार्थ ओदनान्वितमाधेयत्वं तिङर्थभावनाफलोत्पत्तावन्वेति। "ओदनार्थी पचति" इत्यादौ ओदनस्याधेयत्वसंसर्गेण भावनाफलोत्पत्तावन्वयः। यत्र प्रातिपदिकार्थेनान्वितस्य कर्मतासंसर्गेण तस्यैव वा भावनायामन्वयः तत्र धात्वर्थस्य करणतयान्वयः। अत एव तादृशस्थले 'पाकेन ओदनं भावयति' इति विवरणे पाकपदात् करणत्वानुवादिका तृतीया।

एवं यत्र नित्यस्थले फलं न भाव्यत्वान्वययोग्यं, तत्र नित्यतया प्राप्तकर्तव्यताको धात्वर्थ एव भाव्यतया भावनाकर्म। तत्र धात्वर्थविशेषणवाचिपदात् द्वितीया भवति, यथा "अग्निहोत्रं जुहोति" इत्यादौ कर्मनामधेयाग्निहोत्रपदात् द्वितीया "नीलं घटमानयति" इत्यत्र आनयनकर्मघटविशेषणनीलपदात् इवोपपद्यते।

यत्र तु तिङर्थभावनाया स्वर्गादिभाव्यं विना निष्फलतया तिङर्थप्रवर्तनाया नान्वयः काम्यस्थले धात्वर्थस्य कष्टतया भाव्यत्वायोगात् तत्र स्वर्गादिभाव्ये-

[१] पृ. १०२

नान्वितायां भावनायां प्रवर्तनान्वयः। यथा 'स्वर्गकामो यजेत' 'विश्वजिता यजेत' इत्यादौ स्वर्गकामशब्दोपात्तेन आक्षिप्तेन वा स्वर्गेण भाव्येन सकर्मिकायां भावनायां, तत्र धात्वर्थस्य न कर्मतया अन्वयः। एककर्मावरुद्धे कर्मान्तरस्यानाकाङ्क्षितत्वात्। किं तु करणतया। अत एव 'यजेत' इत्यस्य यागेन स्वर्गं भावयेदिति विवरणम्। एवं सति यागकरणिकायाः स्वर्गोत्पत्तेरनुकूलो व्यापारः प्रवर्तनागोचर इति वाक्यार्थबोधः। तत्र प्रवर्तना शब्दधर्मः। स च समवेतोऽतिरिक्तपदार्थः प्रवृत्तितात्पर्यकत्वं वेत्यन्यदेतत्। अत एव करणतयान्वितस्य यागस्य विशेषणवाचिपदात् तृतीया यथा "ज्योतिष्ठोमेन यजेत, वाजपेयेन यजेत" इत्यादौ कर्मनामधेयात् ज्योतिष्ठोमपदात् वाजपेयपदाच्च तृतीया 'कुटिलेन दण्डेन गां कालय' इत्यत्र कालनकरणदण्डविशेषणकुटिलपदादिव उपपद्यते इति भाट्टमतविवेकः।

विभक्त्यर्थनिर्णये[1] भाट्टमतपरिशीलनम्

अस्मिन्मते तिङर्थभावनाफलोत्पत्त्यन्वितस्य आधेयत्वस्य द्वितीयार्थत्वे 'ओदनं पचति' इतिवत् "स्वर्गं यजेत" इत्यादिप्रयोगप्रसङ्गः। "तण्डुलं पचति ग्रामं गच्छति" इत्यादौ तण्डुलयागयोर्भाव्यत्वविरहेण तण्डुलग्रामपदाभ्यां द्वितीयानुपपत्तिश्च। न चात्र संबन्धः संबन्धधीर्वा द्वितीयार्थः। तथा च तण्डुलसंबन्धिपाकग्रामसंबन्धिगमनयोरेवात्र प्रतीतिरिति वाच्यम्। तथा ग्रामो गमिकर्मेति प्रतीतिव्यवहारयोरनुपपत्तेः। भाव्यत्वसंस्कारत्वाभ्यां विना तदभिव्यङ्ग्यस्य अतिरिक्तस्य कर्मत्वस्याप्यभावेन कर्मत्वप्रतीतिव्यवहारयोरुत्पत्त्यसंभवादिकं चिन्तनीयम्।

विभक्त्यर्थनिर्णये[2] भेदस्य द्वितीयार्थत्वे आक्षेपः

ननु भेदस्य द्वितीयार्थत्वे 'आत्मानमात्मना वेत्सि' इत्यादौ कथं भेदान्वयः? कर्तृकर्मणोः युष्मदात्मशब्दार्थयोः ऐक्यात्। शाब्दिकमते परया कर्तृसंज्ञया कर्मसंज्ञया कर्मसंज्ञायाः बाधात् दर्शितस्थले द्वितीयाया एवानुपपत्तिः।

न च युष्मदात्मशब्दार्थयोरवच्छेदकभेदेन भेदोपगमादैक्येऽपि कर्तृत्वकर्मत्वोपपत्तिरिति वाच्यम्। अवच्छेदकभेदेन भेदोपगमस्य बाह्यमतप्रवेशप्रसञ्जकत्वात्। तथा सति "चैत्रश्चैत्रं गच्छति" इति प्रयोगप्रसङ्गाच्च। तथा चोभयमते प्रकृतानुपपत्तिरिति चेत्—

---

[1] पृ. १०७
[2] पृ. १३०

विभक्त्यर्थनिर्णये तस्य समाधानम्

अत्राहुः। पुष्पवन्तपदवत् द्वितीयायाः भेदाधेयत्वयोरेकशक्तिस्वीकारेण दर्शितस्थले भेदबाधे आधेयत्वमात्रलक्षणाभ्युपगमात्। विधेः श्येनादौ बलवदनिष्टाननुबन्धित्वबाधे इष्टसाधनत्वमात्रार्थकत्वादिव वाक्यार्थबोधोपपत्तिरिति तार्किकमतमुत्कर्षमावहति।

विभक्त्यर्थनिर्णये[1] विभक्तेर्लक्षणाविचारः

ननु लौकिकवाक्ये विभक्तेर्न लक्षणा। तथा हि वार्तिकम् —

सुपां कर्मादयोप्यर्थाः संख्या चैव तथा तिङाम्।
प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा।।

इति। सुपां तिडां च यथानुशासनम्। तत्रानुशासनानि नियमपर्यवसायीनि। स च नियमः एकवचनमेवैकत्वं द्विवचनमेव द्वित्वं द्वितीयैव कर्मत्वं बोधयतीत्याकारकः। तेन द्वितीयाभिन्ने कर्मत्वबोधकत्वाभावः पर्यवस्यति।

नन्वेवं कर्मत्वमपहाय क्वचित् गमनादिकमपि बोधयेत्। तावताप्युक्तनियमभङ्गात् इत्यतः पक्षान्तरमाह — नियमः प्रकृतेषु वेति। तथा च द्वितीया कर्मत्वमेव बोधयतीति नियमः। स च यावन्तोऽनुशासनसिद्धा द्वितीयार्थाः तेभ्यः प्रकृतेभ्योऽन्यमर्थं द्वितीया न प्रतिपादयतीति अर्थतः पर्यवसित इति तस्य वार्तिकस्य विवरणम्। अतः कथमननुशिष्टे आधेयत्वमात्रे द्वितीया साधुरिति चेत् —

न। नियमः प्रकृतेषु वेति नियमशरीरस्यासंभवदुक्तिकत्वात्। तत्र हि विभक्तित्वावच्छेदेन प्रकृतभिन्नाप्रतिपादकत्वं च प्रतीयते। ननु [न तु] विभक्तित्वसामानाधिकरण्येन, उद्देश्यतावच्छेदकावच्छेदेनोभयभागान्वययोग्यत्व एवैवकारस्य साधुत्वात्। अन्यथा विभक्तिः कर्मण्येव, शब्दो वाचक एवेति प्रयोगप्रसङ्गात्। न च विभक्तित्वावच्छेदेन प्रकृतप्रतिपादकत्वमस्ति। विशेषणवाचकसमभिव्याहृतनामाव्ययनिपातसमभिव्याहृतानां च सुपां निरर्थकत्वदर्शनात्। प्रातिपदिकार्थः सत्ता सुपामर्थ इत्यस्य प्रागेव निराकृतत्वात्।

ननु भवतु तर्हि विभक्तिः प्रकृतेष्विति परिसंख्या विभक्तिः प्रकृतेतरन्न प्रतिपादयतीत्येवंरूपा। तस्यैव छन्दसि प्रतिप्रसवः सुपां सुबिति। तेन "स्वर्गकामो यजेत" इत्यत्र भट्टमते प्रथमा यागभावनाकर्मत्वं लक्षणया स्वर्गस्य प्रतिपादयन्ती

---

[1] पृ. १३०

नाननुशिष्टविषया। एवं "संपन्ना व्रीहयः" इत्यत्र जातिगतैकत्वबोधकत्वं बहुवचनस्य "जात्याख्यायाम्०"[१] इत्यनुशासनप्रतिप्रसूतमेवेति नास्त्यननुशिष्टे विभक्तीनां लक्षणापीति चेत्—

तर्हि नानार्थवत् द्वितीयाया आधेयत्वे भेदे च शक्तिः। व्युत्पत्तिवैचित्र्येण एकपदोपात्तयोरप्याधेयत्वभेदयोः यौगपद्येनान्वयबुद्ध्यनुप्रवेश औत्सर्गिकः यत्र कर्तृकर्मणोः भिन्नयोः फलं कर्तृभिन्ने वा फलं, तत्र भेदाधेयत्वयोः व्यापारफलान्वयबुद्धिः द्वितीयया जन्यते। यत्र तु फलस्य व्यापाराधिकरणमात्रगतत्वं तत्र भेदान्वयबाधात् आधेयत्वमात्रं द्वितीया शक्त्या बोधयति न चानुशासनव्यत्यय इति बाधसापेक्षवृत्तित्वेनाभिधायामेव लक्षणाव्यपदेशः। बाधश्चात्र फलाधिकरणयत्किंचिद्व्यक्तिभिन्ने व्यापारो न वर्तत इति सामान्याकारेणोपतिष्ठते। तेन व्यासज्यवृत्तिसंयोगादिफलकधात्वर्थे भेदाधेयत्वयोरुभयोर्नियमेनान्वय इति 'चैत्रश्चैत्रं गच्छति' इति न प्रयोग इति वदन्ति।

विभक्त्यर्थनिर्णये[२] स्वमतोपन्यासः

इदमत्र चिन्त्यम्। यथा हि भेदस्य बाधे आधेयत्वमात्रं द्वितीया शक्त्या प्रतिपादयति, तथा आधेयत्वस्य बाधे भेदमात्रमपि बोधयेत्। तथा च "गगनं पचति पश्यति वा" इति प्रयोगप्रसङ्गः। विक्लित्तौ लौकिकविषयतायां च फले गगनाधेयत्वस्य बाधेऽपि गगनवृत्तिभेदस्य प्रतियोगितावच्छेदकतायाः फूत्कारादौ चाक्षुषे च व्यापारे निष्प्रत्यूहं विद्यमानत्वात्। तस्मात् पुष्पवन्तपदवत् द्वितीयाया भेदाधेयत्वयोः शक्तिः आधेयत्वमात्रे लक्षणेत्ययमेव पक्षः साधीयान्।

न च दर्शितवार्तिकविरोध इति वाच्यम्। नियमः प्रकृतेषु वेति वाकारेणानास्थायाः स्वयमेव वार्तिकेन सूचनात्। अन्यथा तिङामपि लक्षणा न स्यात्। न चेष्टापत्तिरिति वाच्यम्। 'घटो नश्यति' इत्यादौ शाब्दिकमते आश्रयस्य दार्शनिकमते यत्नादेस्तिङर्थस्य बाधेन प्रतियोगिनि प्रतियोगित्वे वा तिङो लक्षणां विनानुपपत्तिप्रसङ्गात्।

ननु भवतु तिङो लक्षणा, सुपोऽननुशिष्टेऽर्थे लक्षणायाः क्वाप्यदर्शनात् द्वितीयायाः नाधेयत्वमात्रे लक्षणा युज्यते। अत एव सुब्विभक्तौ न लक्षणेति प्रवादः। न च विषयत्वे लक्षणादर्शनात् नेदं युक्तम्। अत एव 'घटं जानाति'

---

[१] सू. १.२.५८
[२] पृ. १३२

इत्यादावन्वयबोधोपपत्तिरिति वाच्यम्। विषयत्वे द्वितीयाया लक्षणाभ्युपगमस्य निराकरिष्यमाणत्वात्। 'घटं जानाति' इत्यादावन्वयबोधोपपत्तेर्वक्ष्यमाणत्वाच्चेति चेत् —

न। द्वितीयाया लक्षणाभ्युपगमस्यावश्यकत्वात्। तथा हि — "शात्रवान् हिनस्ति, हन्ति पुण्यं पुराकृतम्" इत्यादौ नाशानुकूलव्यापारार्थकस्य हिंसेः हन्तेश्च फले नाशे शात्रवाधेयत्वस्य पुण्याधेयत्वस्य च बाधात् द्वितीयायाः प्रतियोगिनि प्रतियोगित्वे वा यथादर्शनं लक्षणाभ्युपगम आवश्यकः। अन्यथा अन्वयबोधानुपपत्तेः।

यदि च दर्शितस्थले प्रतियोगिता नाशश्च द्वयं धात्वर्थः। तिङर्थो व्यापारः। शात्रवाधेयत्वस्य पुण्याधेयत्वस्य च फले प्रतियोगितायां, सा नाशे, सोऽनुकूलतया तिङर्थे व्यापारे विशेषणीभूयान्वेतीति अन्यत्रापि धातोः शब्दान्तरस्य वा अर्थकल्पनयोपपत्तौ द्वितीयायाः लक्षणा न क्वाप्युपेयत इति, तदा पूर्वोक्ताभिनवरीत्या आधेयत्वमात्रं द्वितीयार्थः तावतैव 'स्वं जानाति' इत्यादौ अन्वयबोधोपपत्तिः। व्यासज्यवृत्तिसंयोगादौ गम्यादिफले द्वितीयार्थाधेयत्वस्य व्युत्पत्तिवैचित्र्येण व्यापारवद्भेदावच्छिन्नसमवायावच्छिन्नाधेयत्वीयस्वरूपसंबन्धेनान्वयोपगमादेव 'चैत्रश्चैत्रं गच्छति' इत्यादिप्रयोगवारणं संभवतीत्यादिकं पूर्वोक्तं स्मर्तव्यमिति।

विभक्त्यर्थनिर्णये[1] सविषयकधातुयोगे द्वितीयार्थविचारः

केचित्तु ज्ञाधातोः बुद्धिः फलम्, तदनुकूलो मनोयोगादिव्यापारश्चार्थः। बुद्ध्यन्वयिनि विषयत्वे द्वितीयायाः लक्षणा। विषये न कर्मसंज्ञा। अतः 'स्वं जानाति' इत्यत्र कर्तरि विषये द्वितीया नानुपपन्ना। "नियमः प्रकृतेषु वा" इति वार्तिकं तु निरूढलक्षणामेव नियमयति। इयं तु स्वारसिकी विषयत्वादौ विभक्तेर्लक्षणा। एवं 'स्वं हिनस्ति' इत्यत्र द्वितीया प्रतियोगित्वं ध्वंसात्मकफलान्वितं लक्षयति, न चापेक्षते प्रतियोगिनि कर्मसंज्ञाम्। "आकडारादेकासंज्ञा"[2] इति परया कर्तृसंज्ञया तदपवादात्। अभिधेयमात्रं न द्वितीया प्रतिपादयति। भेदमादायैव तस्याः स्वाभिधेयप्रतिपादकत्वात्। अतः 'चैत्रश्चैत्रं गच्छति' इति न प्रयोगः।

न चैवं स्वारसिकलक्षणया अनियम्यत्वे द्वितीया लक्षणया गगनमपि प्रतिपादयेदिति वाच्यम्। स्वारसिकलक्षणायामपि अप्रयोगस्य बाधकत्वात्। तदाहुः —

---

[1] पृ. १३४
[2] सू. १.४.१

निरूढा लक्षणाः काश्चित् प्रसिद्धा अभिधानवत्।
क्रियन्ते सांप्रतं काश्चित् काश्चिन्नैव त्वशक्तितः।।

इति। अशक्तिः — अप्रयोगः प्रयोजनराहित्यं च। उदाहरन्ति च रूपं वस्त्रमिति। नेयार्थतापीयमेव यत् अप्रयोगप्रतिहतलक्षणत्वम्। प्रयोजनराहित्यमपि प्रयोजनप्रतिपत्तिप्रयोजकतावच्छेदकलक्षणत्वविरहः इति तत्र तत्रावगन्तव्यमिति वदन्ति।

तदपि न सुन्दरम्। तथा हि — प्रयोजनवत्त्वे सति प्रयोगराहित्यं स्वारसिकलक्षणायां न दोषः। जाह्नव्यादिशब्दे लक्षणाप्रयोगविरहेऽपि 'जाह्नव्यां घोष' इत्याद्याधुनिकप्रयोगे जाह्नव्यादिशब्दे लक्षणायाः सर्वसंमतत्वात्।

किं चापूर्वचैत्रादिशब्दस्य शिष्टत्वप्राज्ञत्वादिचैत्रादिधर्मप्रतिपत्तये चैत्रादिसंबन्धिनि लक्षणा न स्यात्। प्रयोगविरहात्। प्रयोजनराहित्यस्यावश्यकतया दोषत्वे सति प्रयोगराहित्यस्य दोषत्वे मानाभावाच्च। 'रूपं वस्त्रम' इत्यादौ लक्षणायाः प्रयोजनराहित्येनैव दुष्टत्वात्। अत एव काव्यप्रकाशे प्रयोजनराहित्यं नेयार्थतेति व्यवस्थापितम्।

एवं ज्ञाधातोः बुद्धिः फलम्, तदनुकूलो मनोयोगादिर्व्यापारश्चार्थ इत्यपि न विचारसहम्। तथा सति 'भगवान् सर्वं जानाति' इत्यादावनन्वयापत्तेः। भगवज्ज्ञानस्य नित्यस्यानुकूलतासंसर्गेण व्यापारेन्वयायोगात्। मनोयोगादिव्यापारस्य भगवति बाधितत्वाच्च।

एतेन "अकथितं च"[१] इति सूत्रेण विषये कर्मसंज्ञा ज्ञाप्यत इति विषयत्वमनुशासनसिद्धमेव द्वितीयार्थः। विषयत्वस्वरूपकर्मत्वं न भेदघटितमिति 'स्वं जानाति' इत्यादौ नानुपपत्तिरित्यपि परास्तम्।

अत्र विषयत्वं फलान्वयि व्यापारान्वयि वा। आद्ये बुद्धेः फलत्वासंभवस्योक्तत्वात् जानात्यादियोगे द्वितीयानुपपत्तिः। अन्त्ये यत्नस्वरूपव्यापारान्वयसंभवात् यतधातोर्योगेऽपि द्वितीयाप्रसङ्गः।

यदपि कर्मस्थभावके निर्वर्त्यविकार्ययोः कर्मवद्भावस्यातिदेशेन द्वितीयानिषेधः। प्राप्यकर्मणि तदतिदेशविरहेण न द्वितीयानिषेध इति कर्मस्थभावके 'स्वं जानाति' इत्यादौ आधेयत्वमात्रार्थिका द्वितीया नानुपपन्नेति।

तदपि चिन्त्यम्। यत्र हि फलं धातुना तिङा वा प्राधान्येन प्रत्याय्यते तत्र कर्मस्थभावको धातुरिति पूर्वमेवोक्तम्। नात्र जानातिरीदृशः। प्राधान्येन ज्ञान-

---

[१] सू. १.४.५१

स्वरूपव्यापाराभिधायित्वात्। फलस्याभिधाने तु तदन्विताधिकरणत्वस्य तिङा अभिधानात् अनभिहिते इत्यनेनैव द्वितीयाया निषेधान्नोपपत्तिः। तिङा फलाभिधाने तु धातोर्व्यापारमात्रार्थकत्वेन अकर्मकत्वादेव न द्वितीयाप्रसङ्गः। अत एव "घटो घटं जानाति पश्यति वा, ग्रामं गच्छति त्यजति वा" इत्यादिको न कर्मस्थ-भावकप्रयोगः।

तस्मात् आधेयत्वमात्रं फलान्वयि द्वितीयार्थ इत्यभिनवरीत्यैव 'आत्मानमात्मना वेत्सि' इत्यादावन्वयोपपत्तिरिति।

विभक्त्यर्थनिर्णये[१] एकस्य ज्ञातृज्ञेयभावः न भवतीत्याक्षेपः तत्समाधानं च

नन्वेवमेकस्य कर्तृकर्मभावे ज्ञातृज्ञेयभावे च ब्रह्मसूत्रविरोधः। तथा हि — "मनोमयः प्राणशरीरः" इति वाक्यस्थमनोमयस्य अब्रह्मत्वशङ्कानिराकरणाय भगवता बादरायणेन "कर्मकर्तृव्यपदेशाच्च" इति सूत्रितम्। तत्र "एतमितः प्रेत्याभिसंभवितास्मि" इति श्रुतिवाक्ये एतच्छब्देन मनोमयस्याभिधानात् मनो-मयस्य जीवत्वे प्राप्तिकर्मत्वं द्वितीयया प्रतिपादितं, जीवस्य कर्तृत्वं चाख्याते-नोक्तमिति एकस्य कर्मत्वकर्तृत्वव्यपदेशो विरुद्ध इति सूत्रार्थः।

एवं कर्मत्वकर्तृत्वोपपत्तये तेनैव महर्षिणा "भेदव्यपदेशाच्च" इति सूत्रितम्। तत्र "तमेवैकं जानथात्मानम्" इत्यत्र तच्छब्देन द्युभ्वाद्यायतनस्याभिधानात् तस्य ज्ञेयत्वं द्वितीयया प्रतिपादितम्। जीवस्य ज्ञातृत्वमाख्यातेनोक्तमिति ज्ञेयज्ञातृभावेन भेदेन व्यपदेशात् मुमुक्षोः प्राणभृतः सकाशात् ज्ञेयस्य द्युभ्वाद्यायतनस्य भेद इति सूत्रार्थः। तत्र कर्मत्वकर्तृत्वयोरेकवृत्तित्वरूपविरोधाभावात् भेदकत्वं न संभवतीति चेत् —

उच्यते — ज्ञेयज्ञातृभावमात्रस्य न परस्परं विरोधः। 'अहं जानामि' इत्यादौ ज्ञातुरपि ज्ञेयत्वात्। किं तु विरुद्धधर्मविशिष्टयोः ज्ञेयत्वज्ञातृत्वयोः। एवं द्युभ्वाद्या-यतनत्वेन ज्ञेयत्वं ब्रह्मण्येव, मुमुक्षुतया ज्ञातृत्वं जीवेष्वेवेति स्पष्टो विरोधः। एवमेवात्र शांकरभाष्यम् —

"भेदव्यपदेशश्चेह भवति, 'तमेवैकं जानथात्मानम्' इति ज्ञेयज्ञातृभावेन। तत्र प्राणभृत् तावत् मुमुक्षुत्वात् ज्ञाता। परिशेषादात्मज्ञानशब्दवाच्यं ब्रह्म ज्ञेयं

---

[१] पृ. १३६-१३७

द्युभ्वाद्यायतनमिति गम्यते, न प्राणभृत्'' इति। एवं द्युभ्वाद्यायतनत्वेन ज्ञेयतया ब्रह्मण एव प्राप्तिकर्मत्वमिति मनोमयस्य ब्रह्मत्वं न जीवस्येति तादृशज्ञेयताविशिष्टं प्राप्तिकर्मत्वं तादृशज्ञातृताविशिष्टं प्राप्तिकर्तृत्वं च परस्परविरुद्धम्, न त्वविशेषितयोः कर्मत्वकर्तृत्वयोः ज्ञेयत्वज्ञातृत्वयोर्वा विरोधः। ''सर्वत आत्मानं गोपायेत्'' इत्यादिश्रुतिवाक्ये रक्षणकर्मत्वतत्कर्तृत्वयोरेकत्रैव प्रत्यगात्मनि दर्शनात्। ''आत्मानं रथिनं विद्धि शरीरं रथमेव च'' इत्यादिकठवल्लीवाक्ये रथित्वेन ज्ञेयत्वज्ञातृत्वयोरेकत्रैव संसारिणि दर्शनात्। तदिदं सर्वं तत्र तत्र द्रष्टव्यम्।

ननु धात्वर्थफलवत्त्वं कर्मत्वमित्यत्र फलादीनामन्यलभ्यतया आधेयत्वस्य द्वितीयार्थत्वमवधार्यते। तत्रेदं कर्मत्वं कुतोऽवगम्यते। कर्मसंज्ञासूत्रव्याख्यानेनाऽपि धात्वर्थफलवत्तयेप्सिततमत्वं तत्त्वमवगम्यते। तत् कथं परिशेषणाधेयत्वस्य द्वितीयार्थत्वमिति चेत्—

ज्ञापकादेवमवधार्यते। ज्ञापकं तु ''तथायुक्तं चानीप्सितम्''[१] इति सूत्रम्। तथा ईप्सिततमवत् युक्तं धात्वर्थफलेनेति शेषः। यद्वा तथा धात्वर्थफलेन युक्तम्, चोऽप्यर्थः। ईदृशमनीप्सितमपि कर्मसंज्ञकमित्यर्थकम्। अनीप्सितं द्वेधा ईप्साया अविषयः, द्वेषस्य विषयश्च। आद्यं यथा ''ग्रामं गच्छंस्तृणं स्पृशति'' इत्यत्र तृणमीप्साया अविषयः। द्वितीयं यथा ''रथ्यां गच्छंश्चण्डालं स्पृशति'' इत्यत्र स्पर्शवत्तया द्वेषस्य विषयश्चण्डालः। इत्थं च अप्यर्थकेन चकारेण ईप्सिततमानीप्सितयोरविवक्षणात् तथायुक्तं कर्मेति ज्ञाप्यत इति धात्वर्थफलवत्त्वं सूत्रादेवाधारितमिति।

भाट्टरहस्येऽनूदितानि नैयायिकमतानि तद्दूषणानि च

द्वितीयार्थस्तु ''कर्मणि द्वितीया''[२] इति सूत्रात् कर्मत्वम्। तदपि भावनायामेवान्वेति। अत्र विवदन्ते। तत्र नवीनतार्किकास्तावत् धात्वर्थानधिकरणत्वे सति धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वम्। पच्यादिधात्वर्थो विक्लित्यादिफलावच्छिन्नो व्यापारः। तादृश व्यापारानधिकरणत्वम् ओदनस्य वर्तते। एवं धात्वर्थतावच्छेदकफलं विक्लित्तिः तदाश्रयत्वं चौदनस्य वर्तते। अतः ''चैत्र ओदनं पचति'' इत्यत्र ओदनस्य कर्मत्वम्। ''चैत्रो ग्रामं गच्छति'' इत्यत्र संयोगावच्छिन्नव्यापारो गमिधात्वर्थः। धात्वर्थतावच्छेदकफलस्य संयोगस्य द्विनिष्ठतया ग्राम इव चैत्रेऽपि सत्त्वात् तस्य कर्मत्वापत्तिः। तद्वरणाय धात्वर्थानधिकरणत्वे

[१] सू. १.४.५०
[२] सू. २.३.२

सतीत्युक्तम्। चैत्रस्य व्यापारानधिकरणत्वं नास्तीति न तदापत्तिः। धात्वर्थतावच्छेदकेत्यनुक्तौ गमनजन्यपूर्वदेशविभागरूपफलशालिनि पूर्वदेशे गमनानधिकरणत्वविशिष्टस्य धात्वर्थजन्यफलशालित्वस्य सत्त्वात् तत्रातिव्याप्तिः। तद्वारणाय धात्वर्थतावच्छेदकेति फलविशेषणम्। पूर्वदेशविभागस्य गमिधात्वर्थतावच्छेदकत्वविरहान्नोक्तदोषः।

एवं "वृक्षात् भूमौ पर्णं पतति" इत्यत्र पतनक्रियाजन्यसंयोगविभागरूपफलाश्रययोः भूमिवृक्षयोः कर्मत्वापत्तिः। तद्वरणाय च धात्वर्थतावच्छेदकत्वनिवेशः। एवं च गमेः संयोग एव त्यजेर्विभाग एव धात्वर्थतावच्छेदकः पतस्पन्दत्योर्नैव किंचित् फलं धात्वर्थतावच्छेदकमिति नोक्तातिव्याप्तिः। फलपदानिवेशे धात्वर्थतावच्छेदकव्यापारत्वमादाय व्यापारे अतिव्याप्तिः। तथा अधोदेशसंयोगावच्छिन्नव्यापारस्य पतधात्वर्थतया धात्वर्थतावच्छेदक-अधोदेशाश्रयत्वस्य अधोदेशावयवे सत्त्वात् तस्य कर्मत्वापत्तिः। तद्वारणाय फलपदम् क्रियाजन्यार्थकम्। व्यापारत्वस्य अधोदेशस्य च क्रियाजन्यत्वाभावात् न तदाश्रयेऽतिव्याप्तिः।

पततेरधोदेशसंयोगः फलम्। तदाश्रयस्य नरकस्य कर्मतया 'नरकं पतति' इति प्रयोग इति केचित्।

द्वितीयायाः वृत्तित्वेऽभावे च शक्तिः। कर्मत्वघटकपदार्थानामन्यलभ्यत्वेन तत्र शक्तिकल्पने गौरवात्। तथा हि — "ग्रामं गच्छति" इत्यत्र द्वितीयार्थो वृत्तित्वमभावश्च। प्रकृत्यर्थस्य ग्रामस्य निरूपितत्वसंबन्धेन वृत्तित्वे, आधेयतासंबन्धेन अभावे चान्वयः। वृत्तित्वस्याश्रयतासंबन्धेन धात्वर्थतावच्छेदकसंयोगेऽन्वयः। अभावस्य प्रतियोगितासंबन्धेन धात्वर्थव्यापारेऽन्वयः। व्यापारस्यानुकूलतासंबन्धेनाख्यातार्थकृतौ, कृतेश्चाश्रयतासंबन्धेन चैत्रेऽन्वय इति ग्रामनिष्ठसंयोगजनकग्रामनिष्ठाभावप्रतियोगिव्यापारानुकूलकृत्याश्रयश्चैत्र इत्यन्वयबोधः। "ग्रामे गमनं नास्ति" इति प्रतीतिसिद्धोऽभावः अत्र ग्राह्यः।

यदि च गमनरूपव्यापारस्य कालिकाव्याप्यवृत्तितया गमनवति चैत्रे कालान्तरावच्छेदेन गमनात्यन्ताभावस्य सत्त्वात् चैत्रवृत्तिग्रामसंयोगजनकक्रियायां चैत्रवृत्त्यत्यन्ताभावप्रतियोगित्वसत्त्वात् "चैत्रः स्वं गच्छति" इति प्रयोगः स्यात् इत्याशङ् क्यते, तदा भेदस्य द्वितीयार्थत्वं स्वीकृत्य तस्य प्रतियोगितासमवायोभयघटितसामानाधिकरण्यसंबन्धेन धात्वर्थव्यापारेऽन्वयः स्वीकरणीयः। प्रतियोगितासंबन्धेन यत् भेदस्याधिकरणं तन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वसंबन्धेनेति यावत्। प्रतियोगितासंबन्धावच्छिन्नस्वनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितसम-

वायसंबन्धावच्छिन्नवृत्तित्वसंबन्धेनेति फलितम्। "चैत्रो ग्रामं गच्छति" इत्यत्र ग्रमनिष्ठो यो भेदः गमनवच्चैत्रभेदः तस्य प्रतियोगितासंबन्धेनाधिकरणं चैत्रः तन्निरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वं गमनेऽस्तीति समन्वयः। स्वप्रतियोगि-समवेतत्वसंबन्धेन भेदस्य व्यापारेऽन्वय इति फलितम्। ग्रामनिष्ठसंयोगजनकः ग्रामनिष्ठभेदप्रतियोगिसमवेतश्च यो व्यापारः तदनुकूलकृतिमान् इति शाब्दबोधः। चैत्रे चैत्रवृत्तिभेदप्रतियोगित्वविरहेण चैत्रवृत्तिगमनाख्यव्यापारस्य चैत्रवृत्तिभेदप्रति-योगिसमवेतत्वं नास्तीति "न चैत्रः स्वं गच्छति" इति प्रयोगापत्तिः। भेदस्य व्याप्यवृत्तितया गमनवति चैत्रे न कदापि गमनवद्भेदः इति भावः।

यदि तु अव्याप्यवृत्तिमद्भेदस्याव्याप्यवृत्तित्वमिति मथुरानाथाद्युक्तरीत्या गमन-वत्यपि चैत्रे गमनशून्यकालावच्छेदेन गमनवद्भेदोऽप्यस्तीति "चैत्रश्चैत्रं गच्छति" इति प्रयोगः अस्मिन् पक्षेऽपि दुर्वार इत्याशङ्क्यते, तदा द्वितीयार्थे भेदे प्रकृत्यर्थस्य ग्रामादेः स्वप्रतियोगिकत्वसंबन्धेनान्वयः। भेदस्य अभावीयविशेषणता-समवायोभयघटितसामानाधिकरण्यसंबन्धेन संयोगावच्छिन्नव्यापारेऽन्वयः। स्व-निष्ठस्वरूपसंबन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावन्निरूपितसमवायसंबन्धाव च्छिन्नवृत्तित्वसंबन्धेनान्वय इति यावत्। ग्रामप्रतियोगिकभेदवत्समवेतग्रामवृत्ति-संयोगजनकव्यापारानुकूलकृतिमांश्चैत्रः इति शाब्दबोधः। चैत्रे चैत्रप्रतियोगिकभेदा-भावात् "चैत्रश्चैत्रं गच्छति" इति न प्रयोगः।

द्वितीयायाः भेदरूपाधिकार्थकत्वस्वीकारादेव आधेयत्वापरपर्यायवृत्तित्वार्थक-सप्तमीतः वृत्तित्वार्थकद्वितीयायाः भेदः। अयं चापरो विशेषः यत् द्वितीयार्थो वृत्तित्वं धात्वर्थतावच्छेदके फले एवान्वेति। सप्तम्यार्थस्तु वृत्तित्वं धात्वर्थे नामार्थे वान्वेति। "स्थाल्यां पचति तण्डुलम्" इत्यादौ धात्वर्थे, "भूतले घट" इत्यादौ नामार्थे इति।

ग्रामस्य गन्तेत्यादिकर्मषष्ठीस्थलेऽपि भेदो वृत्तित्वं च द्वितीयार्थ इति ग्रामप्रति-योगिकभेदवत्समवेतग्रामवृत्तिसंयोगजनकक्रियाश्रयश्चैत्र इति बोधो वर्णनीयः।

एवं "चैत्रेण ग्रामो गम्यत" इति कर्मणि प्रयोगस्थले आत्मनेपदस्य आख्या-तस्य फलं भेदश्चार्थः। भेदे ग्रामस्य स्वप्रतियोगिकत्वसंबन्धेनान्वायः। भेदस्य धात्वर्थे व्यापारे स्वाधिकरणवृत्तित्वसंबन्धेनान्वयः। फले धात्वर्थव्यापारस्य जन्यत्वसंबन्धेनान्वयः। फलस्याश्रयतासंबन्धेन प्रथमान्तार्थचैत्रेऽन्वयः। तथा च चैत्रकर्तृकग्रामप्रतियोगिकभेदाधिकरणवृत्तिव्यापारजन्यसंयोगाश्रयो ग्राम इति बोधः।

एवं "चैत्रेण पक्व ओदनः" इत्यत्र कर्मकृत्प्रत्ययस्य प्रतियोगितावान् (प्रतियोगी) भेदः वृत्तित्वमाश्रयश्चार्थः। ओदनः अभेदसंबन्धेन प्रतियोगिन्यन्वेति। प्रतियोगिनः

स्वप्रतियोगिजनकत्वसंबन्धेन भेदेऽन्वयः। भेदस्य स्वाधिकरणवृत्तित्वसंबन्धेन धात्वर्थव्यापारे ऽन्वयः। व्यापारस्य स्वजन्यफलवृत्तित्वसंबन्धेन वृत्तित्वेऽन्वयः। वृत्तित्वस्य निरूपकतासंबन्धेन आश्रयेऽन्वयः। आश्रयस्याभेदसंबन्धेन ओदनेऽन्वयः। तथा च ओदनाभिन्नप्रतियोगिप्रतियोगिकभेदाधिकरणवृत्तिचैत्रकर्तृकव्यापारजन्यफलवृत्तिवृत्तित्वनिरूपकाश्रयाभिन्न ओदन इति बोधः। अनुभवानुसारेण कार्यकारणभावबाहुल्यस्यादोषत्वात्।

नन्वेवं भेदे किं प्रतियोगिताकत्वसामान्येनान्वयः, उत अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वयः। नाद्यः, चैत्रेऽपि पूर्वक्षणवृत्तित्ववैशिष्ट्य — व्यासज्यवृत्तिचैत्रघटोभयत्वावच्छिन्नप्रतियोगिताकभेदसत्त्वेन "चैत्रः स्वं गच्छति" इति प्रयोगापत्तेः। न द्वितीयः, जलत्वावच्छिन्नप्रतियोगिताकभेदस्य जलेऽसत्त्वेन "जलं गच्छति जलम्" इति प्रयोगानुपपत्तेः इति चेत् — न। धात्वर्थतावच्छेदकफलाश्रयत्वं यद्व्यक्तेः तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन प्रतियोगिनः भेदेऽन्वयस्य वाच्यत्वात् । एवं चान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं भेदस्येति व्युत्पत्तिभङ्गभिया जलपदं जलविशेषे लाक्षणिकम्। तत् सिद्धं आधेयत्वं भेदश्च द्वितीयार्थ इति — इत्याहुः।

नवीनतार्किकमतनिरसनम्

अत्रेदमवधेयम् — यदि फलावच्छिन्नव्यापारो धात्वर्थः, तदा द्वितीयाद्यर्थस्य वृत्तित्वस्य पदार्थैकदेशे संयोगादिफलेऽन्वयात् "पदार्थः पदार्थेनान्वेति न तु तदेकदेशेनेति व्युत्पत्तिभङ्गः। न च चैत्रस्य नप्ता, चैत्रादन्यः इत्यादौ षष्ठ्याद्यर्थस्य पदार्थैकदेशे नप्तृत्वान्यत्वादावन्वयवत् प्रकृतेऽप्यन्वयोऽस्तु इति वाच्यम्। तत्रापि स्वनिरूपितनप्तृत्वाश्रयत्वरूपस्य षष्ठ्यर्थस्य पदार्थे नप्तरि, स्वप्रतियोगिकभेदाश्रयत्वरूपस्य पञ्चम्यर्थस्य पदार्थेऽन्यस्मिंश्चान्वयस्वीकारेण एकदेशान्वयविरहात्। अथ वा पञ्चम्यर्थस्य प्रतियोगित्वस्य स्वनिरूपकभेदवत्त्वरूपपरम्परासंबन्धेन अन्यपदार्थेऽन्यस्मिन्नन्वयः स्वीक्रियत इत्यदोषात्। एतदुक्तं भवति नप्ता नाम प्रपौत्रः स्वजन्यशरीरजन्यशरीरावच्छिन्नः आत्मा। षष्ठ्यर्थस्य निरूपितत्वस्य न एकदेशे जन्यत्वेऽन्वयः स्वीक्रियते। अपि तु स्वनिरूपितजन्यत्वाश्रयशरीरजन्यशरीरावच्छिन्नत्वरूपः परम्परासंबन्धः षष्ठ्यर्थः तस्य पदार्थे नप्तर्यन्वय इति।

किं च किमिदं फलस्य अवच्छेदकत्वम्? न तावत् धातुशक्यतावच्छेदकत्वम्। फलविशिष्टव्यापारे धातोः शक्तौ प्रमाणाभावेन फलस्य धातुशक्यतावच्छेदकत्वाभावात्।

किं च "चैत्रो ग्रामं गमयति मैत्रम्" इत्यत्र णिजर्थतावच्छेदकतया गमनरूपव्यापारस्य प्रयोज्यनिष्ठस्य फलत्वेन तदाश्रयत्वेन प्रयोज्यस्य मैत्रादेः कर्मत्वमिष्टम्, तन्न सिध्येत्। शुद्धधातोः विशिष्टे शक्तिस्वीकारेऽपि ण्यन्ते तत्स्वीकारायोगात् गमनस्य णिजर्थतावच्छेदकत्वाभावात्। अथ फले व्यापारे च पृथगेव धातोः शक्तिः, फलस्य व्यापारे प्रकारत्वमेवावच्छेदकत्वम् तथा च द्वितीयार्थस्य वृत्तित्वस्य फलेऽन्वये पूर्वोक्ता एकदेशान्वयापत्तिरिति दोषस्य नावकाशः। गमयतीत्यत्र व्यापारमात्रस्य णिजर्थत्वेऽपि गम्यर्थस्य गमनस्य तत्र प्रकारत्वेनावच्छेदकतया तद्रूपफलाश्रयत्वेन प्रयोज्यस्य कर्मत्वसिद्धिः इति चेत् — न।

"चैत्रः मैत्रेण पाचयति" इत्यत्र विक्लित्तौ व्यापारे च पचधातोः, णिचः व्यापारे शक्तिस्वीकारेण पच्यर्थव्यापारे प्रकारत्वात् विक्लित्तेरिव, णिजर्थव्यापारे प्रकारत्वात् प्रयोज्यमैत्रनिष्ठव्यापारस्यापि फलत्वापत्त्या तदाश्रयस्य मैत्रस्य कर्मत्वापत्त्या द्वितीयान्तत्वापत्तिः। तथा च "चैत्रः पाचयति मैत्रम्" इति प्रयोगापत्तिः।

अतः सखण्डस्यावच्छेदकत्वस्य निर्वक्तुमशक्यतया स्वरूपसंबन्धरूपं पदार्थान्तरं वा अवच्छेदकत्वं कल्प्यम्। तच्च अवच्छेदकत्वरूपधर्मिग्राहकप्रमाणेन यदाश्रये द्वितीया प्रामाणिकी तत्रैव कल्प्यते नान्यत्रेति वक्तव्यम्। न च तत्र शाब्दव्यवहारातिरिक्तं किंचित् प्रमाणमस्ति। एतदुक्तं भवति — अवच्छेदकत्वरूपस्य धर्मिणः ग्राहकं प्रमाणं तावत् संयोगावच्छिन्नः विक्लित्त्यवच्छिन्नो व्यापारः इति शब्दप्रयोगात्मकम्। तेन प्रमाणेन संयोगादौ कल्प्यमानमवच्छेदकत्वं यदाश्रये (संयोगाद्याश्रये) द्वितीया प्रमाणसिद्धा यदाश्रयवाचकात् द्वितीया प्रमाणसिद्धा तादृशफले एवावच्छेदकत्वं कल्प्यते। "चैत्रो ग्रामं गच्छति" इत्यत्र संयोगाश्रयग्रामवाचकात् द्वितीया प्रमाणसिद्धेति संयोगस्यावच्छेदकत्वम्। "चैत्रो मैत्रं ग्रामं गमयति" इत्यत्र गमनाश्रयवाचकात् मैत्रपदात् द्वितीया गतिबुद्धिसूत्रत्मकप्रमाणसिद्धेति गमनेऽवच्छेदकत्वं कल्प्यते। "चैत्रो मैत्रेण पाचयति" इत्यत्र विक्लित्त्यनुकूलव्यापारात्मकपाकाश्रयमैत्रवाचकपदात् द्वितीया न प्रमाणसिद्धेति तादृशव्यापारेऽवच्छेदकत्वं न कल्प्यते इति वक्तव्यम्। न चोक्तकल्पनायां "चैत्रो ग्रामं गच्छति, तण्डुलं पचति, चैत्रो मैत्रं ग्रामं गमयति, चैत्रो मैत्रेण पाचयति" इत्यादिव्यवहारातिरिक्तं किंचित् प्रमाणमस्ति। तद्वत् कर्मत्वादिकारकाणामखण्डोपाधिरूपाणां द्वितीयादिवाच्यत्वकल्पनोपपत्तेः नाधेयत्वादेः द्वितीयादिवाच्यत्वकल्पनं युक्तम्, अनेकव्युत्पत्तिकल्पनापत्तेः इति। तथा हि — द्वितीयायाः वृत्तित्वे भेदे च शक्तिः इत्यनेकशक्तिकल्पना। धातोश्च फलावच्छिन्नव्यापारे एका शक्तिः, फले व्यापारे च नाना शक्तिरिति वा कल्पना।

अस्मन्मते तु तत्तत्फलावच्छिन्नव्यापारवृत्तिपाकत्वगमनत्वादिकमेव तत्तद्धातु-शक्यतावच्छेदकमिति नानेकशक्तिकल्पना।

किं च भवन्मते संयोगादिरूपफलस्य फलत्वेन सामान्यरूपेण बोधे पूर्वदेश-विभागस्यापि गमनरूपक्रियाजन्यत्वेन फलतया तदाश्रयस्य पूर्वदेशस्य कर्मतापत्त्या पूर्वदेशं गच्छतीति प्रयोगापत्तिः। संयोगत्वादिना विशिष्य फलबोधस्वीकारे उक्तदोषवारणेऽपि वृक्षस्थितस्यैव सर्पस्य मूलदेशादग्रदेशं गच्छतः "वृक्षं गच्छति" इति प्रयोगापत्तिः। प्रदेशान्तरादागत्य सर्पस्य वृक्षारोहणे "सर्पो वृक्षं गच्छति" इति प्रयोग इष्ट एव। परं तु आरोहणानन्तरं मूलदेशादग्रदेशं गच्छति सर्पे "वृक्षं गच्छति" इति प्रयोगापत्तिः। संयोगत्वेन रूपेण भासमानसंयोगाश्रयत्वात् वृक्षस्य।

न च नेयमापत्तिः संभवति, सर्पस्य वृक्षारोहणे अग्रदेशगमनसमयेऽपि संयोगस्य तत्र सत्त्वेन नूतनस्य संयोगान्तरस्याजननादिति वाच्यम्। अग्रदेशं प्रति सर्पस्य गमने पूर्वपूर्वावयवसंयोगा नश्यन्ति। तन्नाशेनावयविसंयोगा अपि नश्यन्ति। अपसर्पणक्रियया अभिनवा एव अवयवसंयोगा जायन्ते। तैश्चाभिनवा एवावयवि-संयोगा जायन्ते। तादृशावयविसंयोगाश्रयत्वेन वृक्षस्य कर्मत्वापत्तेर्दुवारत्वात्।

उक्तदोषवारणाय संयोगत्वेन फलस्य धात्वर्थतावच्छेदकत्वं त्यक्त्वा संयोगा-श्रयस्य यस्य कर्मत्वमिष्टं तद्व्यक्त्यात्मकोत्तरदेशसंयोगत्वेन फलस्य भानं स्वी-कार्यम्। "सर्पः मूलदेशादग्रदेशं गच्छति" इति प्रयोगदर्शनात् अग्रदेशसंयोगस्य फलत्वम्। "वृक्षं गच्छति" इति प्रयोगविरहात् वृक्षसंयोगस्य न फलत्वमिति वाच्यम्। उत्तरत्वं च यया क्रियया पूर्वदेशस्त्यज्यते तत्क्रियाजन्यतद्देशावधिकोत्त-रत्वरूपमिति तत्तत्क्रिया — तत्तद्देशघटितोत्तरत्वाश्रयसंयोगस्य फलत्वे क्रिया-देशादिभेदेनानन्तशक्तिकल्पना लक्षणा वा आश्रयणीयेति गौरवम्। न च तत्तत्फलानुभवबलादेव सा न दोषायेति वाच्यम्। अनुभवस्यानुमानादिनापि संभवेन शाब्दत्वे एव विप्रतिपत्तौ धातुजन्यत्वे सुतरां प्रमाणाभावात्। अन्यथा — धातुजन्यज्ञानविषयत्वस्य प्रामाणिकत्वे फलस्य धातुवाच्यत्वं द्वितीयावाच्यत्वं वेति भवद्ग्रन्थेऽपि नानापक्षप्रतिपादनानुपपत्तेः।

न हि "घटमानय" इत्यत्र घटो धातुवाच्यो नामपदवाच्यो वेति पक्षान् कश्चित् प्रतिपादयति। घटस्य तत्र शाब्दत्वनामवाच्यत्वयोः निश्चितत्वेन संदेहाभावात् तद्विषये नानापक्षा नोपन्यस्यन्ते। फलविषये तु नानापक्षोपन्यासात् तस्य शाब्दत्वं तत्रापि धातुवाच्यत्वं च विचिकित्सितमेव।

अत एव — फलस्य धातुवाच्यत्वे शक्त्यानन्त्यादेव धातुतः गमनत्वादिनैव क्रियायाः अनुभवात् वस्तुगत्या तत्तत्फलावच्छिन्नक्रियावृत्तिगमनत्वादिकमेव

तत्तद्धातुशक्यतावच्छेदकमित्युक्तं प्राक् धात्वर्थनिरूपणावसरे। तदेवं भवन्मते शक्त्यानन्त्यं तावत् स्फुटमेव।

तथा कार्यकारणभावरूपव्युत्पत्त्यानन्त्यमपि। तथा हि — "ग्रामं गच्छति" इत्यत्र प्रातिपदिकार्थस्य ग्रामस्य द्वितीयार्थे वृत्तित्वे भेदे च निरूपितत्वप्रतियोगित्वात्मकसंबन्धभेदेनान्वयस्वीकारात् ग्रामनिष्ठनिरूपितत्वसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधं प्रति वृत्तित्वनिष्ठविशेष्यतासंबन्धेन द्वितीयाधीनोपस्थितिः कारणम्। ग्रामनिष्ठप्रतियोगितासंबन्धवच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधं प्रति भेदनिष्ठविशेष्यतासंबन्धेन द्वितीयाधीनोपस्थितिः कारणमिति कार्यकारणभावद्वयं कल्पनीयम्। पुनश्च पूर्वोक्तरीत्या अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिभङ्गः, तदभङ्गाय वा ग्रामादिप्रातिपदिकेन ग्रामादिविशेषस्य लक्षणेति दोषः।

एवं द्वितीयार्थस्य वृत्तित्वस्य आश्रयतासंबन्धेन फले भेदस्य च स्वरूपसमवायोभयघटितसामानाधिकरण्यसंबन्धेन क्रियायामन्वय इति स्वीकारात् तदनुसारेण द्वितीयार्थवृत्तित्वनिष्ठाश्रयतासंबन्धावचिछन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधं प्रति फलनिष्ठविशेष्यतासंबन्धेन धातुजन्योपस्थितिः कारणम्, द्वितीयार्थभेदनिष्ठसामानाधिकरण्यसंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधं प्रति व्यापारनिष्ठविशेष्यतासंबन्धेन धातुजन्योपस्थितिः कारणमिति कार्यकारणभावद्वयं कल्पनीयम्।

अपि च "स्वं गच्छति" इति प्रयोगः भेदस्य द्वितीयार्थत्वं स्वीकृत्येव समवायस्य द्वितीयार्थत्वं स्वीकृत्यापि वारयितुं शक्यते। ग्रामस्य द्वितीयार्थे समवाये स्वप्रतियोगिकभेदवद्वृत्तित्वसंबन्धेनान्वयः। समवायस्याश्रयतासंबन्धेन क्रियायामन्वयः। ग्रामप्रतियोगिकभेदवद्वृत्तिसमवायाश्रयव्यापारवांश्चैत्र इति बोधः। चैत्रवृत्तिगमनसमवाये चैत्रप्रतियोगिकभेदवद्वृत्तित्वं नास्ति, चैत्रे चैत्रभेदाभावादिति न "चैत्रो गच्छति चैत्रम्" इति प्रयोगः। एवं च भेदो वा द्वितीयार्थः समवायो वेति विनिगमनाविरहः।

फलं भेदश्च द्वितीयार्थ इति मतनिराकरणम्[१]

एतेन फलं भेदश्च द्वितीयार्थः। फले आधेयतासंबन्धेन प्रकृत्यर्थस्यान्वयः। फलस्य जनकतासंबन्धेन अवच्छिन्नत्वसंबन्धेन वा व्यापारेऽन्वयः। व्यापार-

---

[१] भा.र.पृ. ८८

मात्रं धात्वर्थः। तत्तधातुसमभिव्याहाराच्च द्वितीयायाः फलविशेषबोधकत्वमिति प्राचीनमतमप्यपास्तम्।

अनेकशक्तिव्युत्पत्यादिकल्पनायाः तादवस्थ्यात्। एवं 'ग्रामस्य गन्ता' इत्यादि-कर्मणि षष्ठीस्थले शक्त्यनेकत्वं व्युत्पत्त्यनेकत्वं विनिगमनाविरहश्च।

एवं "चैत्रेण ग्रामो गम्यत" इति कर्माख्यातस्थले आत्मनेपदस्य फले भेदे च शक्त्यन्तरकल्पनम्, ग्रामस्य प्रथमान्तपदोपस्थाप्यस्यापि आख्यातार्थे भेदे प्रति-योगितासंबन्धेनान्वयकल्पनम्, तस्य भेदस्य प्रत्ययार्थस्यापि धात्वर्थव्यापारे सामा-नाधिकरण्यसंबन्धेनान्वयकल्पनम्, तस्य च व्यपारस्य धातूपस्थापितफलं प्रति विशेष्यभूतस्यापि पुनर्जन्यत्वसंबन्धेन आत्मनेपदार्थे फलेऽन्वयकल्पम्, तस्य फलस्य चाश्रयतासंबन्धेन प्रथमान्तपदोपस्थाप्ये ग्रामेऽन्वयकल्पनमिति दोषाः।

किं च ग्रामपदस्य आत्मनेपदस्य च युगपदेव प्रकारतया विशेष्यतया च बोधजनकत्वं न संभवति, विरोधात्। ग्रामपदस्याख्यातार्थभेदे प्रकारतया आख्या-तार्थफलं प्रति विशेष्यतया च युगपद्बोधः, तथा भेदस्य धात्वर्थव्यापारे प्रकारतया ग्रामं प्रति विशेष्यतया च युगपद्बोधः, तथा भेदस्य धात्वर्थव्यापारे प्रकारतया ग्रामं प्रति विशेष्यतया च युगपद्बोधो हि भवतां संमतः। किं च युगपद्बोधस्वीकारे विशेषणतावच्छेदकप्रकारकविशेषणनिश्चयस्य पूर्वमनुदयेन अनुभूयमानस्य विशिष्ट-वैशिष्ट्यावगाहिबोधस्यापलापापत्तिश्च।

ननु ग्रामपदेन आख्यतपदेन च युगपदेव विशेषणतया विशेष्यतया च न स्वार्थबोधकत्वम्। येनोक्तदोषः स्यात्। किं तु विशेषणतया स्वार्थबोधनानन्तरं विशेष्यतया स्वार्थबोधनमिति तयोः क्रमिकबोधजनकत्वस्वीकारान्न दोष इति चेत् —

मैवम्। एकवारं जनिकतान्वयबोधस्य द्वितीयबोधे आकाङ्क्षाविरहात्। किं च एकतरबोधजननकाले सामग्रीवशात् द्वितीयबोधेनावश्यमुत्पत्तव्यम्। तदनुत्पत्तौ प्रतिबन्धकान्तरं कल्प्यमिति गौरवान्तरम्।

एवं "पक्व ओदन" इत्यत्र कर्मकृत्स्थलेऽपि युगपदेव विशेषणतया विशेष्यतया च बोधजनकत्वे दोषद्वयम्, क्रमिकबोधजनकत्वे दोषद्वयं द्रष्टव्यम्।

भेदार्थकत्वं विनैव स्वं गच्छतीति प्रयोगवारणप्रकारः[१]

यत्तु — भेदो न द्वितीयार्थः। अपि तु आधेयत्वादिकमेव। न चैवं "चैत्रः चैत्रं गच्छति" इति प्रयोगापत्तिरिति वाच्यम्।

---

[१] भा.र.प्र. ८८

"आकडारादेका संज्ञा"[१] इति पाणिनिसूत्रेण एकसंज्ञाप्रयुक्तकार्यसत्त्वे संज्ञान्तरप्रयुक्तकार्यनिषेधात्। तथा हि तेन सूत्रेण इत आरभ्य "कडाराः कर्मधारये"[२] इत्यतः प्राक् एकस्य एकैव संज्ञा न तु संज्ञाद्वयमिति नियम्यते तत्र या संज्ञा प्रवर्तते तन्निमित्तकमेव कार्यं भवति। तत्रापि या संज्ञा परा अनवकाशा च सा संज्ञान्तरं बधित्वा प्रवर्तते। यथा "वैकुण्ठमधिशेते हरिः" इत्यत्र वैकुण्ठस्य "आधारोऽधिकरणम्"[३] इत्यनेनाधिकरणसंज्ञा "अधिशीङ्स्थासां कर्म"[४] इत्यनेन कर्मसंज्ञा च प्राप्ता। तयोर्मध्ये अधिकरणसंज्ञां बाधित्वा परत्वात् कर्मसंज्ञैव प्रवर्तते, तेन तन्निमित्तिका द्वितीयैव भवति, न त्वधिकरणसंज्ञानिमित्ता सप्तमी। तद्वत् प्रकृतेऽपि "चैत्रश्चैत्रं गच्छति" इत्यत्र धात्वर्थतावच्छेदकसंयोगरूपफलाश्रयत्वेन "कर्तुरीप्सिततमं कर्म"[५] इत्यनेन चैत्रस्य कर्मसंज्ञा धात्वर्थव्यपाराश्रयत्वेन "स्वतन्त्रः कर्ता"[६] इत्यनेन कर्तृसंज्ञा च प्राप्ता। तत्र परसूत्रविहितत्वात् कर्तृसंज्ञैव प्रवर्तते। कर्मसंज्ञायाः बाधनाच्च तत्प्रयुक्ता द्वितीया न भवति। कर्तृसंज्ञायाः सत्त्वात् तिङा कर्तुरुक्तत्वात् अभिहिते तु प्रथमैवेत्युक्त्या प्रथमैव भवति। एवं भेदे द्वितीयायाः न शक्त्यन्तरं न वा व्युत्पत्त्यनेकत्वमिति।

तन्न। "चैत्रोऽहं स्वात्मानं जानामि, आत्मानमात्मना वेत्सि" इत्यादावेकस्यैवानेकसंज्ञाप्रयुक्तानेकविभक्तिदर्शनात् "आकडारादेका संज्ञा"[७] इति वैयाकरणपरिभाषणस्यायुक्तत्वात्।

ननु तत्र शरीरमनोरूपावच्छेदकभेदमादय आत्मभेदं स्वीकृत्य संज्ञाभेदः तत्प्रयुक्तविभक्तिभेदश्च उपपादनीयः। तदुक्तं "णेरणौ०"[८] इत्यादिसूत्रे भाष्ये — यदैकमेव वस्तु बुद्ध्या विभज्य कर्मत्वेन कर्तृत्वेन च विवक्ष्यते तदा आत्मनेपदं प्राप्नोतीत्याशङ्क्य,

"द्वावात्मानौ अन्तरात्मा शरीरात्मा च।
अन्तरात्मा तत्कर्म करोति, येन शरीरात्मा सुखदुःखे अनुभवति"

---

[१] सू. १.४.१
[२] सू. २.२.३८
[३] सू. १.४.४५
[४] सू. १.४.४६
[५] सू. १.४.४९
[६] सू. १.४.५४
[७] सू. १.४.१
[८] सू. १.३.६७

इत्युक्तम्। ''वस्तुत एवात्र आत्मभेदः, न त्वेकस्यैव कर्तृत्वं कर्मत्वं चेत्यर्थः'' इति कैयटः। एवं चात्मन एकस्याप्यवच्छेदकभेदेन भिन्नतया नैकस्य संज्ञाद्वयकार्यप्रवृत्तिरिति चेत् —

न। तथात्वे स्वपदप्रयोगानुपपत्तेः। ज्ञात्रपेक्षया ज्ञेयस्य भिन्नत्वात्। अन्यथा ''चैत्रश्चैत्रं गच्छति'' इति प्रयोगोऽपि स्यात्। एकस्यैव चैत्रस्य आत्मन इवावान्तरभेदमादाय भेदस्य सुलभत्वात्।

कर्मत्वस्याखण्डोपाधिरूपत्वम्

मम तु कर्मत्वमखण्डोपाधिरूपम्। तच्च परसमवेतक्रियाजन्यफलशालित्वसमनियतमेव। अतः परिचायकस्य परसमवेतक्रियाजन्यफलशालित्वस्याभावात् तत्परिचेयं कर्मत्वमखण्डं चैत्रस्य नास्तीति न ''चैत्रश्चैत्रं गच्छति'' इति प्रयोगापत्तिः। परसमवेतक्रियाजन्यफलशालित्वाज्ञानेऽपि ''गोकर्मकमानयनम्'', ''ओदनकर्मकः पाकः'', ''ग्रामकर्मकं गमनम्'' इति व्यवहारात् अखण्डोपाधिरूपं कर्मत्वं सिध्यति। तच्च कर्मत्वं उक्तव्यवहाररूपकर्मत्वाख्यधर्मिग्राहकप्रमाणेन ससंबन्धिकमेव कल्प्यत इति तस्य तत्तद्धात्वर्थनिरूपितत्वसिद्धिः।

एतेन कर्मत्वस्य अखण्डत्वे तस्य एकत्वेन सर्वक्रियां प्रति सर्वस्य कर्मत्वापत्तिरिति शङ्कायाः नावसरः। तत्तद्धात्वर्थस्तु तत्तत्फलावच्छिन्नव्यापारविशेषत्वसमनियत-अखण्डोपाधिरूपपाकत्वगमनत्वादिरूपशक्यतावच्छेदकधर्मावच्छिन्नो व्यापारविशेषः।

निरूपकस्य तत्तद्धात्वर्थस्य भेदेन तन्निरूपितानां तत्तत्कर्मत्वानां भेदेऽपि, नैयायिकमते आधेयत्वस्य भेदेऽपि शक्यतावच्छेदकस्याधेयतात्वस्य एकत्वात् यथा नानेकशक्तिकल्पना, तथा कर्मतात्वस्य शक्यतावच्छेदकस्य एकत्वान्नानेकशक्तिकल्पना। तत्तद्धात्वर्थतावच्छेदकावच्छिन्नगमनादावन्वयवशाच्च ''चैत्रस्य घट'' इत्यत्रेव कर्मत्वविशेषस्य लाभः।

अतः ''चैत्रश्चैत्रं गच्छति, चैत्रः पाचयति मैत्रम्'' इत्यादिप्रयोगापत्तिशङ्कैव नावसारं लभते। कर्मत्वस्य सखण्डत्वे हि मैत्रे चैत्रप्रतियोगिकभेदस्य सत्त्वात् तस्य कर्मत्वमापद्यते। तद्वारणाय यत्नान्तरमास्थेयम्, न त्वखण्डत्वे।

''ग्रामे गच्छति, कारयति चैत्रो मैत्रेण'' इत्यादौ तु कर्मत्वाविवक्षायामधिकरणत्वकर्तृत्वविवक्षायां सप्तमीतृतीयाप्रयोगोऽपि साधुः।

एवं च द्वितीयायाः कर्मत्वे एकैव शक्तिः। प्रातिपदिकार्थस्य च तृतीयादि-साधारण्येन सुबर्थे कर्मत्वादावन्वयात् एकैव व्युत्पत्तिः। सुबर्थस्य कर्मत्वादेः निरूपकत्वसंबन्धेन वा स्वनिरूपकधात्वदर्थजनकत्वसंबन्धेन वा आख्यातार्थ-कृतावन्वयः।

कर्माख्यातस्थले तु आख्यातस्य कर्तरीव कर्मणि लक्षणा प्रथमायाः प्राति-पदिकार्थ एवार्थः प्रातिपदिकं तात्पर्यग्रहकमिति मतानुसारेण प्रथमार्थस्य ग्रामस्य स्ववृत्तिकर्मत्वनिरूपकधात्वर्थजनकत्वसंबन्धेन आख्यतवाच्यकृतावन्वयः। अभि-हितकारकवाचिनी प्रथमेति मतानुसानेण तु प्रथमार्थस्य कर्मत्वस्य स्वनिरूपक-धात्वर्थजनकत्वसंबन्धेन आख्यातार्थकृतावन्वयः।

कर्मकृत्स्थले "पक्व ओदनोऽस्ति" इत्यादौ पाकस्य क्तप्रत्ययलक्ष्यायां कृतावनु-कूलत्वसंबन्धेनान्वयः। क्तप्रत्ययस्य कर्मत्वेऽपि लक्षणा। कर्मणि शक्तिः। कृतेः निरूपितत्वसंबन्धेन कर्मत्वेऽन्वयः। कर्मणः स्ववृत्तिसत्तानिरूपितत्वसंबन्धेन अस्तीत्याख्यातार्थे आश्रयत्वेऽन्वयः। असधातोः सत्ता अर्थः। तस्याः निरूपितत्व-संबन्धेन आश्रयत्वेऽन्वयः। तथा च पाकानुकूलकृतिनिरूपितकर्मत्वाश्रयकर्म-वृत्तिसत्तानिरूपितम् ओदनवृत्तिसत्तानिरूपितं चाश्रयत्वमिति शाब्दबोधः। क्तप्रत्य-यार्थस्य कर्मणः ओदनस्य चाभेदान्वयबोधस्तु पार्ष्ठिकः मानसः।

अतश्च "चैत्रो ग्रामं गच्छति" इत्यादौ द्वितीयार्थकर्मत्वस्य स्वनिरूपकधात्वर्थ-जनकत्वरंबन्धेनाख्यातार्थकृतावेवान्वय इति सिद्धम्।

न च द्वितीयार्थकर्मत्वस्य निरूपकतासंबन्धेन धात्वर्थे एवान्वयोऽस्तु इति वाच्यम्। धात्वर्थस्यापि कर्मत्वकरणत्वान्यतरकारकत्वात् 'गुणानां च परार्थत्वात्' इति न्यायेन कर्मत्वस्य तत्रान्वयायोगात्। धात्वर्थसाधारण्येन विशेष्यतासंबन्धेन कारकप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति भावनानिष्ठविशेष्यतासंबन्धेन लिङ्गा-न्वयिपदजन्योपस्थितिः कारणमिति एकेनैव कार्यकारणभावेन उपपत्तौ द्विती-यार्थप्रकारकशाब्दबुद्धौ धात्वर्थनिष्ठविशेष्यतासंबन्धेन धातुजन्योपस्थितिः कारणम्, धात्वर्थप्रकारकशाब्दबुद्धौ भावनाविशेष्यतासंबन्धेन आख्यातजन्योपस्थितिः कारणमिति अनेककार्यकारणभावकल्पने गौरवात्।

अपि च धात्वर्थान्वयार्थमुपस्थितस्य भावनानिष्ठविशेष्यत्वस्यैव कर्मत्ववृत्ति-प्रकारतानिरूपकत्वकल्पनोपपत्तौ अनुपस्थितस्य धात्वर्थनिष्ठविशेष्यत्वस्य कर्मत्व-वृत्तिप्रकारतानिरूपकत्वकल्पनानुपपत्तेश्च।

किं च "काष्ठैरोदनं पचति" इत्यस्य काष्ठैः पाकेन ओदनं करोति इति विवरणात् विवरणवाक्ये च काष्ठादीनां कृञर्थेऽन्वयावश्यकत्वेन "पचति" इत्यत्रापि कृतावेवान्वयः स्वरसः। विवरणविवरणीयवाक्ययोः समानार्थकत्वात्।

तत् सिद्धं कर्मत्वमखण्डोपाधिरूपं द्वितीयार्थः। तस्योक्तसंबन्धेनाख्यातार्थभावनायामन्वयः इति।

कर्मत्वस्याखण्डोपाधित्वनिरासः

एतावता विस्तरेण निरूपितस्य खण्डदेवपक्षस्य दूषणप्रकारः व्युत्पत्तिवादगूढार्थतत्त्वालोके सर्वतन्त्रपारावारपारीणैः बच्चाझामहोदयैः संग्रहेण प्रदर्शितः।

स यथा — वस्तुतस्तु क्लृप्तपदार्थेष्वन्तर्भावासंभवात् कस्यचित् अखण्डोपाधेरभ्युपगमः, नान्यथा। अत्र तु प्रकृतधात्वर्थक्रियाजन्यस्य प्रकृतधात्वर्थतावच्छेदकस्य वा फलस्याश्रयत्वेन क्लृप्तेनैव कर्मत्वव्यवहारोपपत्तेः अखण्डोपाधौ तत्र मानाभावः। न च यत्र मते धातूनां व्यापारमात्रे शक्तिः तत्र नोक्तकर्मत्वस्य संभव इति वाच्यम्। प्रकृतधातुप्रयोज्यविषयताविशिष्टतात्पर्यीयविषयतानिरूपितविषयताश्रयफलाश्रयत्वस्य प्रकृतधातुकर्मत्वरूपतायाः वक्तुं शक्यत्वात्।

"इदं द्वितीयादिकं गम्यादिधात्वर्थव्यापारनिष्ठविषयतानिरूपितसंयोगादिनिष्ठविषयताकबोधं जनयतु" "गम्यादिधातुर्वा संयोगादिनिष्ठविषयतानिरूपितव्यापारनिष्ठविषयताकबोधं जनयतु" इतीच्छायास्तात्पर्यात्मिकायाः सत्त्वात्।

एतेन क्रियाजन्यफलाश्रयत्वस्य कर्मत्वे विभागरूपफलमादाय पूर्वदेशस्य कर्मत्वापत्तिरिति निरस्तम्।

तात्पर्यस्याहेतुत्वे प्रकृतधातुप्रयोज्यविशेष्यतानिरूपितद्वितीयाप्रयोज्यप्रकारताश्रयफलवत्त्वं कर्मत्वं वाच्यम्। तथा च तदादिवत् प्रकृतधात्वर्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्ने एकैव शक्तिः — इति।

यत्तु द्वितीयायाः धातोश्चानेकेष्वर्थेषु शक्तिस्वीकारे शक्त्यानन्त्यम्, तत्तदर्थस्य अन्यान्यसंबन्धेन तत्तदर्थेऽन्वयस्वीकारात् कार्यकारणभावानन्त्यम् इत्यादिकमुक्तम्।

तत्र ब्रूमः। भवद्भिरपि सर्वत्र संबन्धसामान्यसंसर्गकशाब्दबोधानन्तरं प्रवृत्त्यादिनिर्वाहाय पार्ष्ठिकस्य संसर्गविशेषावगाहिमानसबोधस्य स्वीकारात् सर्वत्र प्रवृत्तिः विलम्बेनेति कल्पनम्, सकलविभक्त्यन्तपदघटितवाक्यस्थले सर्वेषां विभक्त्यर्थानां कर्मत्वादीनां स्वनिरूपकधात्वर्थघटितपरंपरासंबन्धेन भावनायामन्वयात् धातूपस्था-

पितस्यैवार्थस्य अनेकधा परम्परासंबन्धघटकतया भानकल्पनम्, सुबर्थसंख्यायाः सुबर्थे परंपरासंबन्धेन अन्वयः इत्येवंरीत्या बोधस्य गुरुभूतपरम्परासंबन्ध-विषयकत्वकल्पनम्, "चैत्रः सुन्दर" इत्यादौ प्रतिपिपादयिषिताभेदस्य मानसबोध-विषयत्वस्वीकारात् शाब्दबोधानन्तरक्षणे विषयान्तरसंचारानुभवविरोधः इत्यादि बह्वसामञ्जस्यमस्ति। अतस्तत्तदर्थे तत्तदर्थस्य साक्षात्संबन्धावगाही बोधः एव श्रेयान्।

अपि च संबन्धत्वेन संबन्धसंसर्गकशाब्दबोधानन्तरं जायमाने संसर्गविशेषा-वगाहिमानसबोधे संसर्गविशेषभाननियमनिर्वाहाय, तादृशसमभिव्याहारज्ञानस्य तादृशवाक्यजन्यबोधस्य वा कारणत्वमवश्यकल्पनीयम्। अतश्चानिच्छयापि कार्य-कारणभावानन्त्यमापतति। न हि शाब्दबोधकारणतानन्त्यमेव दोषः, न तु मान-सबोधकारणतानन्त्यमित्यत्र नियामकमस्ति।

न च कार्यकारणभावकल्पनालाघवेन भावनामुख्यविशेष्यके बोधे सिद्धे, तदनुरोधिमानसबोधकारणतानन्त्यं न दोषः, फलमुखत्वादिति वाच्यम्। प्रयोगाति-प्रसङ्गाप्रसङ्गाप्रयोजकस्य साक्षात्संबन्धेन तत्र तत्र पदार्थान्वयावगाहिनः शाब्दबोध-स्यानुभवसिद्धत्वात् तद्बलायातकार्यकारणभावानन्त्यस्यपि फलमुखत्वेन दोषता-विरहात्। अनुभवसिद्धबोधानुसारेण व्युत्पत्तयः कल्प्यन्ते, न तु व्युत्पत्त्यनुसारेण बोधः शिक्ष्यते।

अभिहितं च नागेशभट्टैः लघुमञ्जूषायां तिङर्थनिरूपणे

"तत्तद्व्युत्पत्त्यनुसारेण तथा तथा बोधस्य तेषां तेषां जायमानत्वेन तथा तथा कार्यकारणभावानां सर्वेषामावश्यकत्वेन तल्लाघवगौरवविचारस्यायुक्तत्वात्" इति।

यत्तु "काष्ठैरोदनं पचति" इति वाक्यस्य काष्ठैः पाकेन ओदनं करोतीति विवरणात्, विवरणवाक्ये काष्ठादीनां करोत्यर्थेऽन्वयात् विव्रियमाणवाक्येऽपि तेषां कृतावेवान्वयो युक्त इति — तदपि न।

न हि विवरणवाक्यात् यद्विशेष्यकः यत्संसर्गकः यत्प्रकारकः बोधो जायते तादृश एव बोधो विव्रियमाणवाक्यात् जायत इति मीमांसकैरपि वक्तुं शक्यते। "पाकेन ओदनं करोति" इत्यत्र आख्यातार्थाश्रयत्वरूपभावनायामेव ओदनमिति द्वितीयान्तार्थस्य प्रकारतया भानात्, "ओदनं पचति" इत्यत्र आख्यातार्थकृति-रूपभावनायां तस्य प्रकारतया भानाच्च। तस्मात् निरुक्तविवरणं कर्मत्वादीनां नाख्यातार्थभावनान्वयित्वसाधकम्।

भाट्टचिन्तामणौ[१] द्वितीयार्थः

द्वितीयायाः कर्मत्वमर्थः। तच्च क्रियाजन्यफलशालित्वम्। "घटं पश्यति" इत्यत्र दर्शनजन्यज्ञाततारूपफलाश्रयत्वात् घटस्य कर्मत्वम्।

नन्वेवं "चैत्रो ग्रामं गच्छति" इत्यादौ चैत्रस्य कर्मत्वापत्तिः। क्रियाजन्यसंयोगशालित्वात्। किं च त्यजतिगच्छत्योः पर्यायत्वापत्तिरिति चेत् —

अत्र नैयायिकाः — परसमवेतत्वं क्रियाविशेषणम्। धात्वर्थतावच्छेदकत्वं फलविशेषणम्। परत्वं च प्रकृत्यर्थापेक्षया। एवं च "चैत्रो ग्रामं गच्छति" इत्यत्र चैत्रसमवेतव्यपारजन्यधात्वर्थतावच्छेदकसंयोगशालितया ग्रामस्य कर्मता। शाब्दबोधोऽपि ग्रामसमवेतसंयोगानुकूलग्रामान्यसमवेतव्यापारजनककृतिमांश्चैत्र इत्याकारकः। त्यजतेर्विभागजनकव्यापारे शक्तिरिति नोक्तदोष इत्याहुः। इत्युक्तम्। अनेन नैयायिकमतं न दूषितं न वा स्वमतमन्यत् किमप्युक्तम्। अतः भाट्टचिन्तामणिकारः नैयायिकपरिष्कृतमेव कर्मत्वमङ्गीकृतवानिति प्रतीयते।

भूषणसाररीत्या कर्मत्वनिर्वचनं द्वितीयार्थश्च[२]

सुबर्थमाह —

आश्रयोऽवधिरुद्देश्यः संबन्धः शक्तिरेव वा।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः।।

द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थः। अवधिः पञ्चम्यर्थः। उद्देश्यः चतुर्थ्यर्थः। संबन्धः षष्ठ्यर्थः। शक्तिरेव वा आश्रयत्वावधित्वोद्देश्यत्वरूपधर्म एव वा।

तथा हि — "कर्मणि द्वितीया"[३] इति सूत्रात् कर्म द्वितीयार्थः। कर्म च कर्तुरीप्सिततमम्। क्रियाजन्यफलाश्रय इति तदर्थः। यद्यपि यथाश्रुतसूत्रात् कर्तृसंबन्धिप्राप्तीच्छाविशेष्यं कर्मेति प्रतीयते। तथापि कर्तृनिष्ठक्रियाजन्यफलाश्रयत्वेनेच्छाविषयः कर्मेति फलितार्थः। "तथायुक्तं चानीप्सितम्"[४] इति सूत्रेण कर्तृनिष्ठक्रियाजन्यफलाश्रयत्वेनानिष्यमाणस्यापि वस्तुतः तादृशफलाश्रयस्यापि द्वेष्योदासीनसाधारणस्य कर्मत्वकथनात्। कर्तृनिष्ठक्रियाजन्यफलाश्रयः कर्मेत्येव युक्तम्।

---

[१] पृ. ९६
[२] भू.सा.पृ. १४७
[३] सू. २-३-२
[४] सू. १.४.५०

ईप्सितत्वानीप्सितत्वयोः शाब्दबोधे भानाभावेन संज्ञायामेव तस्योपयोगः न तु कर्मपदवाच्यकोटौ प्रवेशः।

तत्र क्रियायाः फलस्य च धातुनैव लाभात् अनन्यलभ्य आश्रय एव द्वितीयार्थः। न च आश्रयस्य शक्यत्वे आश्रयत्वं शक्यतावच्छेदकं वाच्यम्। तस्य निरूपकभेदेन भिन्नतया कथं शक्यतावच्छेदकत्वम्, अनुगतधर्मस्यैव शक्यतावच्छेदकत्वादिति वाच्यम्। आश्रयत्वमखण्डधर्मरूपमित्यङ्गीकारात्। इतरपदार्थाघटितमूर्तिकधर्मः अखण्डधर्म इत्युच्यते। आश्रय इत्यनुगतप्रतीत्या आश्रयपदशक्यतावच्छेदकतया च आश्रयत्वं सिध्यति। "ओदनं पचति" इत्यत्र ओदनः पाकजन्यविक्लित्त्याश्रय इति कर्म भवति। द्वितीयार्थे आश्रये प्रकृत्यर्थस्य ओदनस्याभेदसंबन्धेनान्वयः। आश्रयस्य स्ववृत्तित्वसंबन्धेन विक्लित्तावन्वयः। ओदनाभिन्नाश्रयवृत्तिविक्लित्तिजनको व्यापार इति बोधः।

"घटं करोति" इत्यत्र उत्पत्तिः प्रयत्नश्च धात्वर्थः। उत्पत्तिरूपफलाश्रयतया घटस्य कर्मता। घटाभिन्नाश्रयनिष्ठोत्पत्त्यनुकूलः यत्नः इति बोधः।

"घटं जानाति" इत्यत्र आवरणभङ्गः ज्ञानं च धात्वर्थः। आवरणभङ्गरूपफलाश्रयतया घटस्य कर्मता। घटाभिन्नाश्रयवृत्त्यावरणभङ्गजनकं ज्ञानमिति बोधः।

ननु "चैत्रो ग्रामं गच्छति" इत्यत्र ग्रामस्येव चैत्रस्यापि क्रियाजन्यसंयोगरूपफलाश्रयत्वात् कर्मत्वापत्तौ "चैत्रश्चैत्रं गच्छति" इति प्रयोगापत्तिः। प्रयागतः काशीं गच्छति चैत्रे "प्रयागं गच्छति" इति प्रयोगापत्तिश्च। क्रियाजन्यसंयोगस्य काश्यामिव क्रियाजन्यविभागस्य प्रयागे सत्त्वादिति चेत् —

मैवम्। ग्रामस्येव चैत्रस्यापि फलाश्रयत्वेऽपि व्यापाराश्रयत्वप्रयुक्तकर्तृसंज्ञया कर्मसंज्ञायाः बाधेन "चैत्रश्चैत्रं गच्छति" इति प्रयोगासंभवात्। द्वितीयोत्पत्तौ संज्ञाया एव नियामकत्वात् अन्यथा संज्ञायाः अनियामकत्वे 'गमयति कृष्णं गोकुलम्' इत्यत्र णिजर्थव्यापारजन्यसंयोगानुकूलव्यापाररूपधात्वर्थफलाश्रयत्वस्येव, पाचयति कृष्णेनौदनमित्यत्रापि तादृशव्यापारजन्यविक्लित्त्यनुकूलव्यापाराश्रयत्वस्य तत्र सत्त्वात् कृष्णपदात् द्वितीयापत्तिः। संज्ञाया नियामकत्वे तु पचधातुयोगे अणौ कर्तुः णौ कर्मसंज्ञाविधायकसूत्रविरहात् कर्तरि तृतीयैव भवति।

ननु "चैत्रश्चैत्रं गच्छति" इत्यतः चैत्रनिष्ठसंयोगानुकलः चैत्रकर्तृको वर्तमानो व्यापारः इति शाब्दबोधः स्यात्, तद्विषयस्याबाधादिति चेत् — न। सामान्यतः धात्वर्थफलनिष्ठविशेष्यतानिरूपितप्रकारतासंबन्धेन शाब्दबोधं प्रति आश्रयोपस्थितेर्हेतुत्ववादिनां तथाविधिबोधस्येष्टत्वात् इष्टापत्तेः।

अथ वा प्रकारतासंबन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापारानधिकरणभूताश्रयोपस्थितिः कारणमिति कार्यकारणभावान्तरकल्पनात् प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावान्न दोषः।

प्रयागतः काशीं गच्छति चैत्रे, "प्रयागं गच्छति चैत्रः" इति प्रयोगस्तु नापादयितुं शक्यः। समभिव्याहृतधात्वर्थफलशालित्वस्यैव कर्मत्वरूपत्वात् गम्यर्थजन्यस्यापि पूर्वदेशविभागस्य गम्यार्थत्वाभावेन प्रयागस्य विभागाश्रयत्वमादाय कर्मत्वाभावात्।

नैयायिकमतनिरासः[१]

नैयायिकास्तु — "चैत्रश्चैत्रं गच्छति" इति प्रयोगवारणाय परसमवेतत्वं द्वितीयार्थः। तच्च धात्वर्थव्यापारान्वयि। प्रयागतः काशीं गच्छति चैत्रे प्रयागस्य कर्मत्ववारणाय धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति वक्तव्यम्। परत्वं च द्वितीयया स्वप्रकृत्यर्थापेक्षया बोध्यते। तथा च "चैत्रस्तण्डुलं पचति" इत्यादौ तण्डुलान्यसमवेतव्यापारजन्यधात्वर्थतावच्छेदकविक्लित्तिमत्त्वात् तण्डुलानां कर्मता। शाब्दबोधस्तु तण्डुलसमवेतधात्वर्थतावच्छेदकविक्लित्त्यनुकूलतण्डुलान्यसमवेतक्रियाजनककृतिमांश्चैत्र इत्याकारकः इत्याहुः।

तन्न रोचयामहे, परसमवेतत्वादेर्गौरवेण अवाच्यत्वात्। अतिप्रसङ्गश्च किं द्वितीयायाः उत शाब्दबोधस्य। नाद्यः, परसमवेतत्वस्य वाच्यत्वेऽपि द्वितीयायाः वारयितुमशक्यत्वात्। "गमयति गोकुलं कृष्णम्" इतिवत् "पाचयति कृष्णं गोपः" इति कृष्णशब्दोत्तरं द्वितीयापत्तेः। द्वितीयोत्पत्तौ परसमवेतव्यापारजन्यधात्वर्थतावच्छेदकफलशालित्वरूपकर्मत्वस्य प्रयोजकत्वे "गमयति गोकुलं कृष्णम्" इत्यत्र णिजर्थनिरूपितनिरुक्तकर्मत्वस्येव पचिप्रकृतिकणिजर्थकर्मत्वस्य कृष्णे सत्त्वेन पाचयत्यादिप्रयोगेऽपि प्रयोज्यकर्तृवाचकात् द्वितीयापत्तेः। अतः संज्ञाया एव द्वितीयोत्पत्तौ प्रयोजकता अङ्गीकार्या। एवं च तत एवातिप्रसङ्गभङ्गे कृतं परसमवेतत्वे द्वितीयायाः शक्त्या।

ननु तादृशकर्मत्वमेव द्वितीयानियामकम्। उक्तस्थले कृष्णे तत्सत्त्वेऽपि उपात्तगत्यर्थकाद्यतिरिक्तणिजन्तधातुयोगे "गतिबुद्धि०"[२] इति सूत्रेण तदविवक्षाबोधनात् नोक्तापत्तिः। विवक्षायाः एव विभक्त्युत्पत्तौ नियामकत्वादिति चेत् — एवमपि "तण्डुलं पचति चैत्रः" इतिवत् 'तण्डुलं पच्यते स्वयमेव' इत्यापत्तेः।

---

[१] भू.सा.पृ. १५४

[२] सू. १.४.५२

विक्लित्त्यनुकूलतण्डुलान्यसमवेताग्निसंयोगरूपधात्वर्थाश्रयत्वात् तण्डुले भवदुक्त-द्वितीयानियामककर्मत्वस्य सत्त्वात्। मन्मते तु कर्तृसंज्ञया बाधान्न तदापत्तिः।

अपि च परसमवेतत्वस्य शक्यत्वेऽपि प्रकृत्यर्थस्य प्रतियोगितासंबन्धेन परसमवेतत्वैकदेशपरत्वे, परसमवेतत्वस्य चाश्रयतासंबन्धेन क्रियायामन्वयस्य भानाय अनेककार्यकारणभावाङ्गीकारेण गौरवम्।

तथा हि प्रकृत्यर्थप्रकारकशाब्दबुद्धिं प्रति द्वितीयाधीनाधेयत्वोपस्थितेरिव तदधीनपरत्वोपस्थितेः हेतुत्वम्, इति। एवं परसमवेतत्वप्रकारकशाब्दबुद्धिं प्रति धातुजन्योपस्थितिर्व्यापारत्वावच्छिन्नविशेष्यतासंबन्धेन हेतुः इति च कल्पनीयम्।

आश्रयस्य द्वितीयावाच्यत्वे प्रमाणं तु "कर्मणि द्वितीया"[१] इति सूत्रम्। कर्म-शब्दस्य धर्मिणि स्वारस्यात्।

"सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्" इति भाष्यं च तत्र प्रमाणम्। यदि कर्मत्वादिर्धर्मो द्वितीयार्थः स्यात् तदा सुपां कर्मत्वादयोऽप्यर्थाः इत्येवावक्ष्यत्।

वैयाकरणमते पक्षान्तरम्[२]

यद्वा संयोगादिफलाश्रयस्य ग्रामादेः प्रकृत्यैव लाभात् न आश्रयः द्वितीयार्थः। न च आश्रयत्वेन ग्रामादिप्रतीत्यर्थं आश्रयस्य द्वितीयार्थत्वमस्त्विति वाच्यम्। तथा प्रतीतेरसिद्धेः। अपि तु आश्रयत्वं द्वितीयार्थः।

न चाश्रयत्वस्य शक्यत्वे आश्रयत्वत्वं शक्यतावच्छेदकं वाच्यम्, तच्च आश्रयेतरावृत्तित्वे सति निखिलाश्रयवृत्तित्वरूपं गुर्विति शक्यतावच्छेदक-गौरवमेतस्मिन् कल्पे इति वाच्यम्। आश्रयत्वस्यैव तादात्म्यसंबन्धेन शक्यता-वच्छेदकत्वात्। आश्रयत्वं चाखण्डोपाधिरिति न तस्य धर्मान्तरापेक्षा। नानाव्यक्ति-विशेष्यकशक्तिग्रहे एव स्वेतरधर्मस्यावच्छेदकत्वापेक्षणात्।

एवं च "देवदत्तस्य गौः ब्राह्मणाय गेहात् गङ्गायां हस्तेन मया दीयते" इति वाक्यात् देवदत्तसंबन्धिनी या गौः तदभिन्नाश्रयकत्यागानुकूलः ब्राह्मणोद्देश्यकः गेहनिष्ठविभागजनकः गङ्गाधिकरणकः हस्तकरणको मन्निष्ठो व्यापारः इति बोधः।

---

[१] सू. २.३.२
[२] भू.सा.पृ. १९४

अस्य वैयाकरणमतस्य भाट्टरहस्ये दूषणम्[१]

यत्तु न कर्मत्वमाश्रयत्वं वा द्वितीयार्थः, तथात्वे आश्रयत्वत्वादेः गुरुभूतस्य शक्यतावच्छेदकत्वापत्तेः। कर्मत्वादिरूपाखण्डोपाधिसत्त्वे प्रमाणाभावाच्च। अपि तु आश्रयस्यैव द्वितीयार्थत्वम्। तस्य च धातूपात्तफलेऽन्वयः। एवं करणादिरेव तृतीयाद्यर्थः। एवं च "कर्तृकरणयोस्तृतीया"[२] "कर्मणि द्वितीया"[३] इत्यद्यनुशासनमपि संगच्छत इति कैश्चिदुक्तं, तन्न। संबन्धवाचिषष्ठीस्थले प्रातिपदिकार्थस्य प्रत्ययार्थसंबन्धे भेदेनान्वयाङ्गीकारात् इहापि व्युत्पत्त्यन्तरकल्पनागौरवपरिहारार्थं भेदसंबन्धबोधाय कर्मत्वादावेव द्वितीयादेः शक्तिकल्पनात्।

न चैवम् "ऐन्द्रं दधि" इत्यादौ तद्धितस्य अणः देवताविशिष्टद्रव्यवाचकत्वात् तदेकदेशदेवतायां इन्द्रप्रातिपदिकार्थस्य इन्द्रस्याभेदसंबन्धेनान्वयेन इन्द्राभिन्नदेवताविशिष्टं दधीति बोधस्य दर्शनात् तदनुसारेण अभेदसंसर्गकप्रकृत्यर्थप्रकारकबोधं प्रति प्रत्ययजन्योपस्थितिः कारणमिति व्युत्पत्त्यन्तरस्याप्यावश्यकतया भेदेनैव प्रकृत्यर्थस्य प्रत्ययार्थेऽन्वय इति नियमो नास्तीति वाच्यम्। देवतातद्धितस्यापि देवतात्वविशिष्टद्रव्ये शक्तिं स्वीकृत्य देवतात्वे आधेयतासंबन्धेन इन्द्रस्यान्वयस्वीकारात्। देवतात्ववैशिष्ट्यं च निरूपकतासंबन्धेन। न चैवं षष्ठ्यादौ सर्वत्र लाघवात् धर्मिण्येव शक्तिकल्पनात् अभेदेनैव सर्वत्र विभक्त्यर्थे प्रकृत्यर्थस्य प्रकारतास्तु इति वाच्यम्। तथात्वे ग्रामाभिन्नो यः आश्रयत्ववान् तन्निष्ठसंयोगजनकं गमनमिति शाब्दबोधापत्तेः आश्रयत्वादिकं किंनिरूपितमिति जिज्ञासायाः अपरिहार्यत्वात्। तथा च साकाङ्क्षतया वाक्यस्याप्रामाण्यापातः।

अतो न धर्मी द्वितीयाद्यर्थः, अपि त्वाधेयत्वम्। कर्मत्वमेव वा अखण्डम्। उभयथा फलस्य व्यापारस्य वा निरूपकस्य शाब्दबोध एव लब्धत्वान्न निरूपकजिज्ञासापत्तिः। कर्मत्वत्वस्य चैकस्याखण्डस्य शक्यतावच्छेदकत्वाङ्गीकारान्न गौरवम्।

आधेयत्वमेव च तत्तन्निरूपकभेदेन भिन्नमिति तवैव गौरवम्।

---

[१] भा.र.पृ. ९०

[२] सू. २.१.१८

[३] सू. २.३.२

पदवाक्यरत्नाकरे वैयाकरणमतपरिशीलनम्[१]

स्यादेतत् — निरूपकतासंबन्धेन धात्वर्थफलान्वयि अधिकरणत्वं वा, स्वरूपसंबन्धेन तदन्वयि आधेयत्वं वा न द्वितीयार्थः। 'कालं पचति' इति प्रयोगप्रसङ्गात्, कालस्य जगदाधारतया विक्लित्त्याधारत्वमस्तीति धात्वर्थस्य विक्लित्तिरूपफलस्य कालनिष्ठाधारतानिरूपकत्वात् कालनिरूपिताधेयताश्रयत्वाच्च वाक्यार्थाबाधात्। तत्तद्धातुसमभिव्याहृतद्वितीयायाः समवायादितत्तत्संबन्धावच्छिन्नाधिकरणत्ववाचकत्वस्वीकारेणोक्तदोषवारणेऽपि संसर्गभेदेन शक्त्यानन्त्यप्रसङ्गात्। अतः अधिकरणं द्वितीयार्थ इति मतं वरम्। तस्य तद्धातूपात्ते फले तेन संबन्धेनान्वय इति नानुपपत्तिः इति। तत्रोत्तरम् —

निमित्तमन्तरा शब्दप्रवृत्तेः सर्वकर्मसु।
निमित्तैक्यासंभवाच्च न द्वितीयाश्रयार्थिका।।

आश्रयस्य द्वितीयार्थत्वे विश्वेषामेव किंचिदाश्रयत्वेन विश्वस्मिन् शक्तिः। तया स्वरूपेण स्मारिते वस्तुनि तादात्म्यसंबन्धेन प्रातिपदिकार्थस्यान्वय इति कल्पो न संभवति। स्वरूपेण विश्वस्यानुपस्थित्या तत्र शक्तिग्रहासंभवात्। नापि विश्वत्वमुपलक्षणीकृत्य शक्तिग्रहः, तादृशेन ग्रहेण स्वरूपतो विश्वस्य स्मरणासंभवात्। तदादिपदेभ्यः बुद्धिविषयत्वमुपलक्षणीकृत्य स्वरूपतो घटत्वप्रकारकस्मरणस्य घटत्वादीनां जातित्वेन स्वरूपतो भानादुपपत्तिः। अत्र तु विश्वस्य जात्यखण्डोपाधिभिन्नत्वान्न तथोपपत्तिः। एवं च न कोऽपि शब्दः प्रवृत्तिनिमित्तविरहितशक्तिमान्।

अथ सर्वकर्मसाधारणं किमपि निमित्तमाश्रयणीयम् इति चेत् न च तत् तत्तत्संसर्गानुयोगित्वरूपमधिकरणत्वं भवितुमर्हति। संसर्गभेदेन तस्य भिन्नत्वात्। न च सर्वानुगतमधिकरणत्वं गगनाभावस्वरूपमस्तु इति वाच्यम्। गगनाभावसमनियतात्माभावादिना विनिगमनाविरहात् शक्त्यानन्त्यस्य दुर्वारत्वात्। न चाधिकरणं निमित्तं विना स्वरूपेण भासितुमर्हति। जात्यखण्डोपाधिव्यतिरिक्तत्वात्। न च तत्तत्संसर्गानुयोगित्वादन्यत् अखण्डमधिकरणत्वं गोत्वादिवदिति वाच्यम्। प्रमाणाभावात्।

तस्मात् तत्तत्संसर्गावच्छिन्नं संसर्गभेदेन भिन्नमधिकरणत्वम् आधेयत्वं वा द्वितीयार्थः। न चैवं शक्त्यानन्त्यम्। अधिकरणतात्वादिना अधिकरणतादिसामान्यस्यैव शक्यतया तदवच्छेदकस्य अधिकरणतात्वस्य ऐक्यात् शक्त्यैक्यात्।

---

[१] पृ. ५३७-५४२

यत्तु तार्किकमतेऽधिकरणत्वस्य शक्यत्वे शक्यतावच्छेदकमधिकरणतात्वमतिरिक्तं कल्पनीयमिति तदकल्पनप्रयुक्तलाघवात् द्वितीयाशक्तिग्राहकानुशासने "कर्मणि द्वितीया"[1] इति सूत्रे वाचकत्वार्थकसप्तम्यन्तेन कर्मणीत्यनेन अधिकरणस्य ग्रामादेः कर्मणि एव तद्वाच्यत्वज्ञापनाच्च स्वरूपतोऽधिकरणत्वविशिष्ट एव शक्तिरुचितेति।

तन्न। तार्किकमतेऽधिकरणतात्वादिकं नातिरिक्तः पदार्थः, किं तु स्वरूपसंबन्धविशेषात्मकः। अत एव तैः सप्तैव पदार्थाः इति सिद्धान्तितम्।

पदवाक्यरत्नाकरमतेन द्वितीयार्थनिर्णयः

परसमवेतक्रियाविशेषणीभूतधात्वर्थफलाश्रयत्वं कर्मत्वम्। भवति च "ग्रामं गच्छति" इत्यत्र ग्रामभिन्नसमवेतायां क्रियायां विशेषणीभूतं धात्वर्थभूतं फलं संयोगाख्यम्, तदाश्रयत्वं ग्रामस्यास्तीति तस्य कर्मत्वम्। गमेः संयोगावच्छिन्नव्यापारोऽर्थः।

कर्मत्वघटकपदार्थास्तु ग्रामक्रियाफलानि नामधातुभ्यामेव लभ्यन्ते। प्रतियोग्यनुयोगिभावादयस्तु संसर्गमर्यादया भासन्त इति न वाचकपदमपेक्षन्ते। कर्मफलयोः संबन्धः आधाराधेयभावः परत्वस्वरूपः भेदश्च अनन्यलभ्यत्वात् द्वितीयार्थः। प्रातिपदिकार्थस्य निरूपितत्वसंबन्धेन आधेयत्वे, तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन फले, भेदस्य सामानाधिकरण्यसंबन्धेन क्रियायामन्वयः। तथा च ग्रामनिष्ठसंयोगजनकग्रामव्यक्तित्वावच्छिन्नप्रतियोगिताकभेदाधिकरणवृत्तिक्रियाश्रयतावांश्चैत्र इति "चैत्रो ग्रामं गच्छति" इति वाक्यात् शाब्दबोधः।

प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य संसर्गत्वे "मल्लो मल्लं गच्छति" इत्यत्र मल्लत्वावच्छिन्नप्रतियोगिताकभेदस्य मल्लेऽभावात् शाब्दबोधानुपपत्तिरिति तत्तद्व्यक्तित्वेत्युक्तम्। एकमल्ले अपरमल्लभेदस्य निराबाधतया नानुपपत्तिः।

न चाभावबुद्धेः विशिष्टवैशिष्ट्यावगाहितया प्रतियोगिविशेषणतापन्नधर्मावच्छिन्नप्रतियोगिताकत्वमेव संसर्गः, न तु तदविशेषणतद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वमिति वाच्यम्। नञादिप्रतिपाद्याभावे तथात्वनियमेऽपि द्वितीयाप्रतिपाद्यभेदे प्रतियोग्यविशेषणधर्मावच्छिन्नप्रतियोगित्वस्यापि संसर्गत्वे बाधकाभावात्।

अथ वा द्वितीयार्थे भेदे प्रातिपदिकार्थस्य आधेयतासंबन्धेनान्वयः। भेदस्य प्रतियोगितावच्छेदकतासंबन्धेन क्रियायामन्वयः। ग्रामवृत्तिसंयोगजनकग्रामवृत्ति-

---

[1] सू. २.३.२

भेदप्रतियोगितावच्छेदकक्रियाश्रयतावांश्चैत्र इत्यन्वयबोधः। गमनवद्भेदस्य ग्रामवृत्तितया गमनक्रिया ग्रामनिष्ठभेदप्रतियोगितावच्छेदिका।

ननु भेदे द्वितीयायाः शक्तिः निरर्थिका। भेदानुभवस्य विवादग्रस्तत्वात्। "चैत्रश्चैत्रं गच्छति" इतिप्रयोगश्च परया कर्तृसंज्ञया बाधादेव वारयितुं शक्या। कर्मसंज्ञैव द्वितीयायाः प्रयोजिका, न तु वास्तविकं कर्मत्वम्। तदभावेऽपि अधिशीङोऽधिकरणादौ कर्मसंज्ञया "वैकुण्ठमधिशेते हरिः" इति द्वितीयायाः दर्शनात् — इति चेत् —

उच्यते। भवति तावत् सार्वजनीनः विहगः भूमिं गच्छति न तु स्वम् इति प्रयोगः। तत्र विहगे भूमिकर्मकगमनकर्तृत्वं स्वकर्मकगमनकर्तृत्वाभावश्चोभयं प्रत्याय्यते, अथ वा विहगकर्तृकगमने भूमिकर्मकत्वं स्वकर्मकत्वाभावश्चोभयं प्रत्याय्यते। यदि आधेयत्वमात्रं द्वितीयार्थः, तदा धात्वर्थफले नञा स्ववृत्तित्वाभावः बोध्यते चेत् बाधः। संयोगस्य द्विनिष्ठतया तत्र स्ववृत्तित्वसत्त्वात्। यदि स्ववृत्तिसंयोगजनकत्वाभावः क्रियायां बोध्यते, तदपि बाध एव। गमनक्रियायां स्ववृत्तिसंयोगजनकत्वसत्त्वात्। स्वनिष्ठसृंयोगजनकत्वसत्त्वात् स्वनिष्ठसंयोगजनकक्रियाकर्तृत्वाभावोऽपि विहगे बाधित एव।

तस्मात् भेदस्यापि द्वितीयार्थत्वं स्वीकरणीयम्। तथा सति नञा द्वितीयार्थस्य भेदस्य स्वप्रतियोगितावच्छेदकत्वसंबन्धावच्छिन्नप्रतियोगिताकत्वसंबन्धेन नञर्थेऽभावे तस्य च स्वरूपेण गमनेऽन्वयात् विहगवृत्तिभेदप्रतियोगितावच्छेदकत्वाभाववत् गमनमिति बोधः स चाबाधितः।

यदि तु प्रतियोगितावच्छेदकत्वस्य वृत्त्यनियामकतया तत्संबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धिरित्यालोच्यते तदा भेदप्रतियोगितावच्छेदकत्वं द्वितीयार्थोऽस्तु। तस्यैव स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावो नञा बोध्यत इति न काचिदनुपपत्तिः।

ननु यत्र फलव्यापारयोरुभयोरेव नञर्थव्यापारान्वययोग्यत्वं तत्र कथमन्वयबोधः। यथा "चैत्रो ग्रामं गच्छति न मनुष्यम्" इत्यत्र संयोगरूपफले चैत्ररूपमनुष्यसमवेतत्वस्य गमनरूपव्यापारे मनुष्यान्तरनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य च सत्त्वेन तयोरभावस्य बाधितत्वात् इति चेत् — मैवम्।

तत्र एकस्या एव प्रातिपदिकार्थव्यक्तेः आधेयत्वे भेदे चान्वय इति स्वीकारात्। आधेयत्वं फलान्वयि भेदः प्रतियोगितावच्छेदकतया व्यापारान्वयी। अतः "चैत्रः मनुष्यं गच्छति" इति न प्रयोगः। चैत्ररूपमनुष्यव्यक्तिवृत्तिसंयोगस्य जनिकायां क्रियायां चैत्ररूपमनुष्यव्यक्तिवृत्तिभेदप्रतियोगितावच्छेदकत्वविरहात्।

"चैत्रो न मनुष्यं गच्छति" इत्यत्र तु तत्तन्मनुष्यवृत्तिसंयोगजनकत्वविशिष्टं यावत्तत्तन्मनुष्यनिष्ठभेदप्रतियोगितावच्छेदकत्वं तावदभावकूट एव नञा प्रतिपाद्यते। एवं च चैत्रात्मकमनुष्यवृत्तिभेदप्रतियोगितावच्छेदकत्वस्य चैत्रकर्मकान्यदीयगमने प्रसिद्धस्य चैत्रकर्तृकग्रामगमनेऽभावस्य निराबाधतया "चैत्रो न मनुष्यं गच्छति" इति प्रयोगे नानुपपत्तिः।

मनुष्यान्तरकर्मकचैत्रकर्तृकगमने यत्किंचिन्मनुष्यवृत्तिभेदप्रतियोगितावच्छेदकत्वस्याभावसत्त्वेऽपि तादृशतदभावकूटस्य बाधात् "चैत्रो मनुष्यं न गच्छति" इति प्रयोगवारणाय कूटवत्त्वानुधावनम्।

भवतु वा स्वसमवेतसंयोगजनकत्वस्ववृत्तिभेदप्रतियोगितावच्छेदकत्वोभयसंसर्गावच्छिन्नप्रतियोगिताको मनुष्यसामान्याभाव एव "चैत्रो न मनुष्यं गच्छति" इत्यत्र नञा बोध्यः। तथा च मनुष्यान्तरवृत्तिभेदप्रतियोगितावच्छेदकत्वस्य तन्मनुष्यप्रतियोगिकत्वविरहेण तत्संसर्गत्वासंभवान्नोक्तानुपपत्तिः। तत्र द्वितीयाविभक्तिस्तु संयोगेन "घटो नास्ति" इत्यादौ संयोगादिपदमिव प्रतियोगितावच्छेदकसंसर्गानुवादकतया साधुः इति।

नागेशमतः द्वितीयार्थः

लघुमञ्जूषायां[1] नागेशभट्टाः कर्मत्वं द्वितीयार्थं च प्रकारान्तरेण निष्कर्षन्ति। तथा हि — कर्मत्वं व्याकरणशास्त्रबोधितकर्मसंज्ञकत्वम्। तत्र "कर्तुरीप्सिततमं कर्म"[2] इति सूत्रबोधितं कर्मत्वं कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्यं व्यापारव्यधिकरणं च यत् फलं तदाश्रयत्वेन कर्तुरुद्देश्यत्वम् (इच्छाविषयत्वम्) "तण्डुलं पचति" इत्यादौ तादृशविक्लित्तिरूपफलाश्रयत्वेन कर्तुरिच्छाविषयत्वात् तण्डुलस्य कर्मता। उद्देश्यत्वं तु सना लभ्यते। तथा हि — आप्तुमिष्यमाणम् ईप्सितम्। आप्लृ व्याप्तौ इति धातोः सन्नन्तात् "मतिबुद्धिपूजार्थेभ्यश्च"[3] इति सूत्रेण वर्तमाने क्तः।

मतिरिच्छा, बुद्धेः पृथग्ग्रहणात्। "क्तस्य च वर्तमाने"[4] इति कर्तरि षष्ठी। अतिशयेनेप्सितम् ईप्सिततमम्। धातूपात्तव्यापाराश्रयः कर्ता। केनाप्तुम् इत्याकाङ्क्षायां कर्तृविशेषणीभूतव्यापारेणेत्यर्थात् लभ्यते। आप्तिः संबन्धः। एवं च कर्त्रा स्वनिष्ठव्यापारप्रयोज्यफलेन संबन्धुमिष्यमाणं कर्मेत्यर्थः। इत्यादिना प्राचीनमतं निरूप्य — स्वमतमेवमुक्तम् —

---

[1] पृ. १२०१

[2] सू. १.४.४९

[3] सू. ३.२.१८८

[4] सू. २.३.६७

द्वितीयायाः कर्मत्वशक्तिमान् विशेषणत्वं क्रियाकारकभावसंबन्धश्चार्थः। क्रियाजन्यफलाश्रयत्वातिरिक्तैव कर्मत्वशक्तिरखण्डा। अत एव क्रियाजन्यफलाश्रयत्वात् कर्मत्वमिति व्यवहार उपपद्यते। अन्यथा कर्मत्वात् कर्मत्वमिति व्यवहारवत् अयोग्यं तादृशवाक्यं स्यात्। "कमणि द्वितीया"[१] इति सूत्रस्वरसात् कर्मत्वशक्तिमान् अर्थः। 'कष्टं श्रितो भवति इत्यत्र क्रियाकारकयोरभिसंबन्धस्य द्वितीया वाचिका भवति' इति समर्थसूत्रभाष्यात् क्रियाकारकभावसंबन्धोऽर्थः। भेदसमानाधिकरणविशेषणत्वज्ञाने एव संबन्धाकाङ्क्षा जायत इति विशेषणत्वमप्यर्थः। कर्मत्वशक्तिश्च द्वितीयाद्योत्या प्रकृत्यर्थविशेषणमेव। पञ्चकं प्रातिपदिकार्थ इति व्यवस्थापितत्वात्। आख्यातस्यापि कर्तृत्वादिशक्तिमानर्थः। कर्मीभूततण्डुलविशिष्टः चैत्राभिन्नकर्तृको वर्तमानः पाक इति "चैत्रः तण्डुलं पचति" इति वाक्याधीनो बोधः।

कर्माख्याते च धातुना व्यापारावच्छिन्नफलमुपस्थाप्यत। धात्वर्थफलमुख्यविशेष्यकश्च बोधो जायते। अत एव "इष्यते पुत्र इत्यर्थे पुत्रीयतीति न, भिन्नार्थकत्वात्। किं तु पुत्रमिच्छतीत्यर्थे एव" इति "सुप आत्मनः क्यच्"[२] इति सूत्रस्थं भाष्यमुपपद्यते। कर्माख्याते कर्त्राख्याते च व्यापारमुख्यविशेष्यकबोधस्वीकारे तयोः भिन्नार्थकत्वाभावेन भाष्यासंगतेः स्पष्टत्वात्। "चैत्रो न पचति" इत्यत्र आरोपिता चैत्रकर्तृकपाकक्रिया इति शाब्दबोधः। ततः पाकाभावबोधो मानसो जायते।

"चैत्र एव पचति" इत्यत्र एवार्थःअवधारणम्। तच्च ज्ञानविशेषः अवधारणत्वेन भासते। अवधारणविषयचैत्रकर्तृकः पाकः इत्यन्वयबोधः इति।

कर्मत्वविचारशेषः

व्युत्पत्तिवादे चतुर्थीकारके संप्रदानत्वपरिष्कारावसरे एवं विचारितम्[३] — संप्रदानत्वं च मुख्यभाक्तसाधारणं क्रियाकर्मसंबन्धितया कर्त्राभिप्रेतत्वम्। क्रियाकर्मत्वं च क्रियाजन्यफलशालित्वं तद्वता संबन्धः तन्निष्ठफलभागित्वम्। तथा च क्रियाजन्यफलाश्रयतया कर्तुरिच्छाविषयत्वं संप्रदानत्वमिति पर्यवसन्नम्। अयं क्रियाजन्यफलाश्रयो भवतु इति इच्छायाः आकारः। "ब्राह्मणाय गां ददाति" इत्यत्र त्यागरूपक्रियाजन्यगोनिष्ठस्वत्वभागितया दातुः इच्छाविषयो ब्राह्मणः इति तस्य संप्रदानत्वम्। स्वत्वभागित्वं च निरूपकत्वसंबन्धेन स्वत्वाश्रयत्वम्।

---

[१] सू. २.३.२
[२] सू. ३.१.८
[३] व्यु.वा.पृ. २३६-२३८

अथ निरुक्तसंप्रदानत्वस्य कर्मत्वस्य च नास्ति विशेषः। "कर्तुरीप्सिततमं कर्म"[१] इति सूत्रेण कर्तुः क्रियया व्याप्तुमिष्टस्य कर्मसंज्ञाविधानात् क्रियया व्याप्तुमिष्टत्वमपि हि क्रियाजन्यफलभागितया इच्छाविषयत्वमेव।

न च "तथायुक्तं चानीप्सितम्"[२] इति सूत्रेण क्रियाजन्यफलभागितया अनभिप्रेतस्यापि क्रियाजन्यफलाश्रयस्य कर्मसंज्ञाविधानात् कर्मत्वं क्रियाजन्यफलशालित्वमेव, न त्विच्छागर्भम्, संप्रदानत्वं तु इच्छागर्भम्, अतः कर्मत्वसंप्रदानत्वयोर्भेद इति वाच्यम्। कर्मत्वस्येच्छाऽघटितत्वे सूत्रभेदवैयर्थ्यापत्तेः।

न च "तथायुक्तं०" इत्येकमेव सूत्रम्। तस्य च क्रियाजन्यफलशालि कर्मेत्यर्थः। इदं च फलशालितयाभिप्रेतानभिप्रेतोभयसाधारणं कर्मत्वम्। तथा च इच्छाघटितकर्मतापरं "कर्तुरीप्सिततमं कर्म" इति सूत्रं व्यर्थमेवेति वाच्यम्। इच्छाघटितस्य कर्तृनिष्ठक्रियाजन्यफलशालितयेच्छाविषयत्वस्य यत्र बाधः तत्र क्रियाजन्यफलशालितयेच्छाविषयत्वमपि कर्मप्रत्ययेन बोध्यत इति प्रतिपादनाय सूत्रद्वयप्रणयनात्।

तथा हि — यत्र ओदनस्य गलाधस्संयोगेच्छया भोजने प्रवृत्तिः, तया च प्रवृत्त्या विषादेरपि गलाधस्संयोगो जातः तत्र 'विषमनेन न भुज्यत' इति प्रयोग इष्यते। स च कर्मत्वस्य इच्छागर्भत्वे एव युज्यते। तत्र कर्मलकारस्य फलाश्रयतयेच्छाविषयत्वमर्थः। तस्य नञर्थेऽभावेऽन्वयः, तस्य च विषेऽन्वयः इति एतत्समवेतकृतिजन्यगलाधस्संयोगानुकूलव्यापारजन्यगलाधस्संयोगाश्रयत्वप्रकारकेच्छाविशेष्यत्वाभाववत् विषमित्याकारकः शाब्दबोधः अबाधितार्थकः। तज्जनकतया च तस्य वाक्यस्य प्रामाण्यम्। क्रियाजन्यफलाश्रयत्वमात्रस्य कर्मत्वरूपत्वे तु उक्तस्थले विषे भोजनजन्यगलाधस्संयोगरूपफलाश्रयत्वस्य सत्त्वेन तदभावस्य बाधिततया उक्त प्रयोगस्य प्रामाण्यं न स्यात्। अत इच्छाघटितं कर्मत्वं कर्मप्रत्ययार्थ इति स्वीकार्यम्। एवम् इच्छाऽघटितमपि कर्मत्वं तदर्थ इति स्वीकार्यम्। अन्यथा उक्तस्थले — यत्र ओदनस्य गलाधस्संयोगेच्छया यो व्यापारः ततो विषादेरपि गलाधःसंयोगः तत्र दैवाद्विषं भुज्यत इति प्रयोगस्य अनुपपत्तिः। यदि तत्र तेप्रत्ययस्य इच्छागर्भं कर्मत्वं गलाधस्संयोगाश्रयतया इच्छाविषयत्वरूपमर्थः स्यात् तदा तस्य विषे बाधितत्वेन तथा प्रयोगस्य प्रामाण्यं न स्यात्।

एवं चोभयविधकर्मत्वे इच्छाघटितस्य कर्मत्वस्य संप्रदानत्वात् अविशेषः इत्याक्षेपः अवशिष्यते।

---

[१] सू. १.४.४९

[२] सू. १.४.५०

न च धात्वर्थतावच्छेदकफलशालित्वेनोद्देश्यत्वं कर्मत्वम्। धात्वर्थतानवच्छेदकफलशालित्वेनोद्देश्यत्वं संप्रदानत्वमिति भेदः। उद्देश्यत्वमिच्छाविषयत्वम्। जनकतासंबन्धेन स्वस्वत्वध्वंसविशिष्टः त्यागः दाधात्वर्थः, न तु परस्वत्वरूपफलस्य तत्र प्रवेशः। अतः परस्वत्वस्य धात्वर्थतानवच्छेदकतया तदाश्रयत्वेन उद्देश्यस्य ब्राह्मणस्य संप्रदानतेति वाच्यम्। उपेक्षायामपि ददातेर्मुख्यार्थतापत्तेः। तत्रापि स्वस्वत्वध्वंसजनकस्य त्यागस्य सत्त्वात्।

मैवम्। धात्वर्थतावच्छेदकफलाश्रयतया इच्छाविषयत्वं कर्मत्वम्। धात्वर्थतावच्छेदकफलाश्रयत्वभिन्नो यः फलसंबन्धः तद्वत्तयेच्छाविषयत्वं संप्रदानत्वमिति कर्मत्वसंप्रदानत्वयोर्भेदः। संयोगाश्रयतयेच्छाविषयत्वात् ग्रामस्य गमनकर्मता। ददात्यर्थतावच्छेदकस्वत्वनिरूपकतया ब्राह्मण इच्छाविषयः न तु स्वत्वाश्रयतयेति ब्राह्मणस्य संप्रदानतेति।

अनेन संदर्भेण कर्मत्वं द्विविधम् धात्वर्थतावच्छेदकफलाश्रयतया इच्छाविषयत्वमेकम्, धात्वर्थतावच्छेदकफलाश्रयत्वमपरम्। अतः सूत्रद्वयसार्थक्यमिति गदाधरभट्टाचार्याशयःअवगम्यते।

प्रौढमनोरमास्थो विशेषः[१]

प्रौढमानोरमायां तु भट्टोजीदीक्षिताः वर्णयन्ति — स्यादेतत् — धातूपस्थाप्यफलशालि कर्मेत्येवास्तु, किम् ईप्सितानीप्सितयोः पृथक्कथनेनेति चेत् — मैवम्। "अग्रेर्माणवकं वारयति" इत्यत्र "वारणार्थानाम्०"[२] इति सूत्रेण माणवकस्यापादानत्वं प्राप्तम्, तद्बाधनाय "कर्तुरीप्सिततमं कर्म"[३] इति वक्तव्यमेव। तथाहि कर्तृव्यापारजन्यफलाश्रयः कर्मेत्युक्तौ हि "वारणार्थानाम्०"[४] इति सूत्रमस्यापवादः स्यात्, विशेषविहितत्वात्। तथा च माणवकस्य कर्मत्वं न स्यात्। न चाग्नौ वारणार्थानामिति सावकाशमिति वाच्यम्। वारयतेर्हि अत्र स्पर्शफलकप्रवृत्तिविघटनमर्थः। तच्चान्यत्र नयनादिरूपम्। तादृशव्यापारप्रयोज्यफलं माणवककर्तृकस्पर्शफलकप्रवृत्तिविरहः। तत्र स्पर्शांशः अग्निनिष्ठः माणवकनिष्ठश्च संयोगरूपस्य स्पर्शस्य द्विनिष्ठत्वात्। प्रवृत्तिविरहश्च विषयतया अग्निनिष्ठः समवायेन माणवकनिष्ठश्च। तथा च कर्तृव्यापारप्रयोज्यफलाश्रयत्वलक्षणकर्मत्वस्य परत्वात् उभयत्रापि प्राप्तौ "वारणार्थानाम्०" इत्यपादानत्वं निरवकाशत्वादपवादः स्यादिति

[१] प्रौ.म.पृ. ८३०

[२] सू. १.४.२७

[३] सू. १.४.४९

[४] सू. १.४.२७

माणवकादिति पञ्चमी स्यात्। तद्बाधनार्थं "कर्तुरीप्सिततमं कर्म"[१] इत्यारब्धव्यम्। एवं च ईप्सितमात्रे अग्नौ सावकाशस्यापादानत्वस्य परत्वात् ईप्सिततमे माणवके बाधःसिध्यति। "कर्तुरीप्सिततमम्" इत्यारब्धे च द्वेष्योदासीनसंग्रहार्थं "तथा-युक्तं०"[२] इत्यप्यारब्धव्यमिति। अनीप्सितग्रहणं तु स्पष्टार्थमेव।

इदं त्ववधेयम् — ईप्सितानीप्सितयोः शाब्दबोधः एकरूप एव। ईप्सानीप्सादेः अधिशीङादिवत् संज्ञाप्रवृत्तावुपयोगेऽपि द्वितीयावाच्यकोटावप्रवेशात्। अनन्य-लभ्यस्यैव शब्दार्थत्वात्।

"कर्मणि द्वितीया"[३] इति सूत्रे हि तत्तत्सूत्रैर्यावतां कर्मसंज्ञा विहिता ते सर्वे तेन रूपेणोपस्थिताः, तेषु च विधीयमाना द्वितीया आधारवाचिका, लाघवात्। क्रियायाः धातुना कर्तुश्च देवदत्तादिशब्दैः लाभात्। इष्टतमत्वादेस्तु भानाभावात्।

प्रकृतिप्रत्ययार्थयोश्चाभेदः संबन्धः। एवं च "हरिं भजति" इत्यत्र हर्याधारिका या प्रीतिः तदनुकूलो व्यापारो वाक्यार्थः।

यद्यपि कर्मणि कर्तरि अधिकरणे च विहितानां द्वितीयादीनामाधारोऽर्थ इति तुल्यम्, तथापि तन्निरूपकं फलम् (कर्तुरीप्सिततममित्यादिविहितकर्मसंज्ञकविषये) व्यापारः (कर्तृविषये), "स्थाल्यां पचति तण्डुलम्" इत्यत्र कर्मद्वारा अधिकरणम्, "भूतले देवदत्तः पचति" इत्यादौ कर्तृद्वारा अधिकरणं चेति फलीभूते शाब्दबोधे वैलक्षण्यं संगच्छते। न चाधारतैव वाच्येति मन्तव्यम्। तन्निष्ठधर्मस्य वाच्यता-वच्छेदकत्वेऽतिगौरवात् — इत्याहुः।

इष्टतमत्वादेर्भानमावश्यकम् इति गदाधरभट्टाचार्यैः व्युत्पत्तिवादे निरूपितत्वात् तत्समाधानमालोचनीयमेतैः। मनोरमोक्तरीतिरेव भूषणसारेऽप्याश्रिता।

कर्मविभागः

"कर्तुरीप्सिततमं कर्म"[४] इति सूत्रेणान्येन च यत् कर्म द्वितीयार्थभूतमुक्तं तत् सप्तविधमिति हरिणा प्रोक्तम् —

निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्।
तच्चेप्सिततमं कर्म, चतुर्धान्यत्तु कल्पितम्।।

---

[१] सू. १.४.४९
[२] सू. १.४.५०
[३] सू. २.३.२
[४] सू. १.४.४९

औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम्।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्।।

इति। निर्वर्त्यादीनां त्रयाणां लक्षणं च तत्रैवमुक्तम् —

यदसज्जायते यद्वा जन्मना यत् प्रकाशते।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्।।

प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादि भस्मवत्।
किंचित् गुणान्तरोत्पत्त्या सुवर्णादि विकारवत्।।

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते।।

इति। एतेषां विवरणम् — ईप्सिततमं "कर्तुरीप्सिततमं कर्म" इति सूत्रविहितं कर्म निर्वर्त्यं विकार्यं प्राप्यमिति त्रिधा मतम्। अन्यत्तु — अन्यदपि सूत्रान्तरनिर्दिष्टमपि चतुर्धा। यत् औदासीन्येन ताटस्थ्येन प्राप्यम्, यच्च कर्तुरनीप्सितं यथा चोरविषादि। एतद्द्वयमपि "तथायुक्तं चानीप्सितम्"[१] इति सूत्रनिर्दिष्टम्। यत् संज्ञान्तरैः अपादानादिसंज्ञान्तरैः अनाख्यातम् अविवक्षितम्। एतत् "अकथितं च"[२] इति सूत्रनिर्दिष्टम्। यच्चापि अन्यपूर्वकम् अन्यत् कारकं पूर्वं यस्य तत्। यथा "देवदत्तमभिक्रुध्यति"। देवदत्तादिकं "क्रुधद्रुह०"[३] इत्यादिपूर्वसूत्रेण संप्रदान-संज्ञकमपि "क्रुधद्रुहोरुपसृष्टयोः कर्म"[४] इत्यनेन कर्मसंज्ञकमेव भवति। एवं च प्रथमसूत्रविहितं कर्म त्रिविधम्, सूत्रान्तरविहितं कर्म चतुर्विधमिति आहत्य कर्म सप्तविधं भवति। वाक्यपदीये निर्वर्त्यविकार्ययोर्लक्षणमेवमुक्तम् —

सती वाविद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते।।

प्रकृतेस्तु विवक्षायां विकार्यं — इति। अयमर्थः — यस्य सती परिणामिनी प्रकृतिः उपादानकारणं नाश्रीयते न विवक्ष्यते, यस्य वा प्रकृतिरविद्यमानैव तत् कर्म निर्वर्त्यमुच्यते। यथा "घटं करोति, संयोगं करोति"। प्रकृतिशब्दः उपादान-कारणपरः। यस्य प्रकृतिः उपादानकारणं विवक्ष्यते तद्विकार्यं कर्म। यथा "मृदं घटं करोति, सुवर्णं कुण्डलं करोति" इति।

---

[१] सू. १.४.५०
[२] सू. १.४.५१
[३] सू. १.४.३७
[४] सू. १.४.५०

एवं लोकप्रतीत्यनुसारेण निवर्त्यविकार्ययोर्लक्षणमभिधाय शास्त्रकृन्मतानुसारेण लक्षणमुक्तं तत्रैव —

....कैश्चिदन्यथा।
निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम् ।।

इति। कैश्चित् शास्त्रकृद्भिः शास्त्रे निर्वर्त्यं विकार्यं च कर्म अन्यथा प्रकारान्तरेण प्रदर्शितम्। कथं निदर्शितमित्यत्रोक्तम् —

यदसज्जायते सद्वा जन्मना यत् प्रकाशते ।

इत्यादिना। यत् असदेव सत् घटादिकं जायते तन्निर्वर्त्यं कर्म। इदं च वैशेषिकमतानुसारेण। असत्कार्यवादिनो हि ते। असदेव कार्यमुत्पद्यत इति तेषामभ्युपगमः। सत्कार्यवादिमतेनाह — सद्वा जन्मना यत् प्रकाशत इति। सदेव कार्यं कारणसामग्र्या अभिव्यज्यते। कारणव्यापारात् प्रागपि सदेव कार्यमिति सत्कार्यवादिनां मतम्। विकार्यं कर्म तु द्वेधा — आत्यन्तिकरूपान्तरप्राप्तितदभावाभ्याम्। तदेव दर्शयति — प्रकृत्युच्छेदेति। प्रकृतेः आत्मनः उच्छेदात् संभूतं — प्राप्तम्। भू प्राप्तौ इति चौरादिकस्य भूधातोः "आधृषाद्वा" इति णिचः विकल्पनात् तदभावे कर्तरि क्तः। उदाहरति — काष्ठादीति। भस्मवदिति मतुबन्तम्। भस्मरूपवत्, भस्मरूपधारीति यावत्। "काष्ठं भस्म करोति" इत्यत्र 'काष्ठं विकार्यं कर्म' इति यावत्। द्वितीयमाह — किंचिदिति। प्रकृतरूपपरित्यागेन गुणान्तरस्य अवयवसंनिवेशादेर्धर्मस्योत्पत्त्या। उपलक्षितमिति शेषः। उदाहरति —

सुवर्णादीति। तद्विशेषणं विकारवदिति। इदमपि मतुबन्तम्। विकारयुक्तं सुवर्णादि अपरं विकार्यं कर्मेत्यर्थः। अत्र हरिग्रन्थे काष्ठसुवर्णयोरेव विकार्यकर्मत्वं स्पष्टमेव प्रतिपादितम्। "काष्ठं भस्म करोति" इत्यादौ सती वाविद्यमाना वेति प्रथमकल्पे प्रकृतेरविवक्षायां काष्ठादिकं निर्वर्त्यकर्म, तद्विवक्षायां तु विकार्यकर्म। "यदसज्जायत" इति द्वितीयकल्पे तु प्रकृतेःअविवक्षायामपि काष्ठादिकं विकार्यमेवेति विशेषः। स्पष्टं चेदं हेलाराजीये। अयमत्र संग्रहः —

सती वाविद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते।।
प्रकृतेस्तु विवक्षायां विकार्यं, कैश्चिदन्यथा।
निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम् ।।
यदसज्जायते सद्वा जन्मना यत् प्रकाश्यते।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्।।

प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादि भस्मवत्।
किंचित् गुणान्तरोत्पत्त्या सुवर्णादि विकारवत्।।
क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।।

इति वाक्यपदीये। यत्र कर्मणि क्रियाकृतानां विशेषाणां सिद्धिः प्रत्यक्षादनुमानाद्वा न गम्यते तत् कर्म प्राप्यमिति कथ्यते। यथा "आदित्यं पश्यामि, ग्रामं गच्छति" इति।

एतेषां सप्तविधानां कर्मणां क्रमेणोदाहरणानि भूषणसारे प्रदर्शितानि — 'घटं करोति' इत्याद्यम्। 'काष्ठं भस्म करोति, सुवर्णं कुण्डलं करोति' इति च द्वितीयम्। 'घटं पश्यति' इति

तृतीयम्। 'तृणं स्पृशति' इत्युदासीनम्। 'विषं भुङ्क्ते' इति द्वेष्यम्। 'गां दोग्धि' इति संज्ञान्तरैरनाख्यातम्। 'क्रूरमभिक्रुध्यति' इत्यन्यपूर्वकम् — इति। लघुमञ्जूषादिग्रन्थेषु विभागोऽयं न विवेचितः।

भवानन्दतर्कवागीशेन कारकचक्रे[१] किंचित् विवेचितम्। तथा हि — कर्म च त्रिविधं प्राप्यं विकार्यं निर्वर्त्यं चेति। संयोगादिरूपक्रियाजन्यफलशालि प्राप्यम्, यथा "ग्रामं गच्छति" इत्यादौ ग्रामादिः। क्रिया यद्धर्मनाशकं फलं जनयति तद्विकार्यम्, यथा "काष्ठं लुनाति" इति। अत्र काष्ठपदेन लक्षणया अवयवा उच्यन्ते। लुनातिना च आरम्भकसंयोगविरोधिविभागहेतुकुठारादिव्यापारः। तथा च काष्ठावयववृत्तितादृशविभागावच्छिन्नव्यापारानुकूलकृतिमानित्यन्वयबोधः।

एवं च प्राप्यविकार्ययोः कारकत्वात् तादृशफलाश्रयत्वाच्च मुख्यं कर्मत्वम्। निर्वर्त्यं च निष्पाद्यम्। यथा "घटं कटं वा करोति" इति। अत्र च कृञ्धातोः फलावच्छिन्नव्यापारबोधकत्वात् कटादेः तादृशफलानाश्रयत्वेन गौणं कर्मत्वम्। तच्च साध्यत्वेन विषयत्वम्। अत एव वीरणादेः उपादानत्वेन विषयत्वेऽपि 'वीरणं करोति' इति न प्रयोगः।

व्युत्पत्तिवादे[२] कर्मविभागः

कर्म हि त्रिविधं भवति प्राप्यं प्रकृतिविकृती च। तत्र प्राप्यं कर्म क्रियाजन्यफलशालि क्रियाविषयश्च। गम्यादेः ग्रामादि, ज्ञानादेः विषयश्च। क्रिया-

---

[१] पृ. ३५
[२] पृ. १८०

निष्पाद्यं यत् तद्विकृतिरूपं यथा पाकादेरोदनादि, यथा वा कृतेर्माल्यादि कटादि च। प्रथमे तण्डुलादिरूपपूर्वद्रव्यं विनाश्य ओदनादेः निर्वर्तनम्। द्वितीये पुष्पादि-रूपपूर्वद्रव्यम् अविनाश्यैव संदर्भादि (संग्रथनादि) रूपविशेषणनिष्पादनेन तद्वि-शिष्टस्य माल्यादेः निर्वर्तनम्। तृतीये च काशादिरूपपूर्वधर्मिणमविनाश्य तत्रैव कटादिरूपधर्मिनिष्पादनम्। क्रियायाः ईदृशं कर्म च प्रकृतेरसमभिव्याहारस्थले निर्वर्त्यमुच्यते — 'ओदनं पचति, स्रजं करोति, कटं करोति' इत्यादौ। प्रकृति — समभिव्याहारस्थले 'तण्डुलानोदनं पचति, कुसुमानि स्रजं करोति, काशान् कटं करोति' इत्यादौ, यद्यपि निर्वर्त्यते निष्पाद्यते यदिति व्युत्पत्त्या ओदनादेरपि निर्वर्त्यतास्ति, तथापि तद्व्यावृत्तमेव पारिभाषिकं निर्वर्त्यत्वम्।

तदुक्तमभियुक्तैः — (वाक्यपदीये)

सती वाविद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते।।

इति। उक्तकारिकाया अयमर्थः — यस्य विकृतिभूतकर्मणः ओदनादेः कुण्डलादेर्वा प्रकृतिः समवायिकारणं कनकादिकं, सती वा — कार्योत्पत्तिक्षणे विद्यमानमपि, अविद्यमाना वा ओदनादिकार्योत्पत्तिसमयेऽविद्यमानमपि तण्डुलादिकं यस्य नाश्रीयते न प्रयुज्यते तस्य कर्मणः निर्वर्त्यत्वं प्रचक्षते इति। एवं च तत्र तत्र ओदनादेः विकार्यकर्मण्येवान्तर्भावः। तदुक्तम् —

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।।

यदसज्जायते सद्वा जन्मना यत् प्रकाश्यते।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्।।

प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादि भस्मवत्।
किंचित् गुणान्तरोत्पत्त्या सुवर्णादि विकारवत्।।

इति। अत्र विकार्यपदेन प्रकृतिरपि ग्राह्या। अन्यथा काष्ठसुवर्णादेः तुरीयत्वापत्तेः। विकार्यपदेन एकव्युत्पत्त्या प्रकृतिविकृत्युभयाबोधनेऽपि उभयसाधारणान्यतरत्वा-दिरूपावच्छिन्ने पारिभाषिकमेव विकार्यपदम्।

अत्रेदमवधेयम् — भर्तृहरिणा प्राप्यं निर्वर्त्यं विकार्यं चेति त्रिविधं कर्मोक्त्वा प्राप्यकर्मलक्षणं क्रियाकृतविशेषाणामिति कारिकया प्रदर्शितम्। निर्वर्त्यविकार्य-योर्मध्ये तु पक्षद्वयं प्रदर्शितम्। तत्रैकः पक्षः "सती वाविद्यमाना वा" इत्येक-कारिकासहितेन "प्रकृतेस्तु विवक्षायां विकार्यं, कैश्चिदन्यथा" इति कारिकयैव

स्फुटीकृतः। तथा च यस्य कर्मणः प्रकृतिरुपादानतया न विवक्षिता तत् कर्म निर्वर्त्यम्, यथा 'कटं करोति' इत्यादौ कटादिः। यस्य तु प्रकृतिरपि विवक्षिता तत्कर्म विकार्यम्, यथा 'काशान् कटं करोति' इत्यादौ कटादिरिति। एवं चैतत्पक्षे प्राप्यनिर्वर्त्यभिन्न कर्मत्वमेव विकार्यकर्मत्वमित्यवगम्यते। अपरश्च पक्षः "यदसञ्जायते" इत्यादिना "सुवर्णादिविकारवत्" इत्यन्तकारिकाद्वयेन प्रदर्शितः। अतो न विरुद्धार्थप्रतिपादकतत्तत्कारिकोल्लेखेन प्रकृतग्रन्थोऽसंगत इति।

क्रियाकृतविशेषाणामिति। ननु "ग्रामं गच्छति" इत्यादिस्थले ग्रामादावपि गमनादिकृतसंयोगविशेषो निष्पद्यत एवेति उक्तलक्षणेऽव्याप्तिरिति चेत् — न। क्रियाकृतविशेषपदेन उत्पत्तिविकारयोः विवक्षितत्वात्। तथा चोत्पत्तिविकारभिन्नेन फलेन यत् संसृष्टं कर्म तत् प्राप्यमिति पर्यवसितम्। तत्र विकारः क्वचिन्नाशरूपः। यथा "शत्रुं हिनस्ति" इत्यत्र शत्रोः। क्वचिन्नाशानुकूलोऽवयवविघटनादिः, यथा "तृणं छिनत्ति, काष्ठं भिनत्ति" इत्यादौ तृणकाष्ठादेः। एवं च ग्रामं गच्छतीत्यादौ ग्रामादिः उत्पत्तिविकारभिन्नेन संयोगेन संसृष्टतया प्राप्यकर्मेति नानुपपत्तिः।

विकार्यं कर्म द्विविधं, किंचित् प्रकृत्युच्छेदसंभूतं समवायिकारणनाशजन्यं यत् कर्म तद्विकार्यं यथा काष्ठविनाशजन्यं भस्म। किंचित् गुणान्तरोत्पत्त्या — प्रकृतौ विद्यमानायामेव सत्यां भुग्नावयवत्वादिधर्मान्तरोत्पत्त्या जायमानं यत् कर्म तद्विकार्यं यथा कुण्डलादिकम् इत्यर्थः। अत्र प्रकाशकारः —

वस्तुतस्तु "प्रकृत्युच्छेदसंभूतं" इति कारिकायाः न पूर्वोक्त आशयः। किं तु यदुच्छेदेन निवर्त्यं कर्म उत्पन्नं सा प्रकृतिः विकार्यं कर्मेत्युच्यते। तत्र दृष्टान्तः 'काष्ठादि भस्मवत्' इति। एवं च 'काष्ठं भस्म करोति' इत्यादौ काष्ठोच्छेदसंभूतं भस्म निवर्त्यं कर्म, काष्ठं विकार्यं कर्मेति। किंचित् गुणान्तरेत्यादेश्च यस्यां प्रकृतौ विद्यमानायामेव गुणोत्पत्तिः प्रत्याय्यते तदपि द्वितीयं विकार्यकर्म। तत्र दृष्टान्तः सुवर्णादिविकारवदिति। यथा "कनकं कुण्डलं करोति" इत्यादौ विद्यमानमेव शलाकास्वरूपं कनकम् अवयवानामनारम्भकसंयोगविरोधिकर्मणा भुग्नत्वगुणोत्पत्त्या विकार्यम्। एवं च एतत्पक्षे भस्मकुण्डलादिकमेव निर्वर्त्यं कर्म प्रकृतिरेव च विकार्यं कर्मेति न तुरीयत्वशङ्कावकाशः। न वा विकार्यपदस्य पारिभाषिकत्वम्। धात्वर्थफलात्मकविकारसंसृष्टस्यैव विकार्यपदार्थतया यौगिकत्वात् पदवाक्यरत्नाकरादावित्थमेव विवृतत्वाच्च — इत्याह।

प्रकृतमनुसरामः — प्रकृतिरूपं कर्म च वस्त्वन्तरनिष्पत्तये — ओदनादिरूपवस्त्वन्तरोत्पत्त्यर्थं पूर्वभावविशिष्टस्य यस्य तण्डुलादेः असत्त्वरूपः नाशरूपः विकारः निष्पाद्यते तत् तण्डुलादिकं पाकादेः। तण्डुलादिरूपधर्मिनाशादेव पूर्व-

भावविशिष्टतदसत्त्वमोदनादिरूपकर्मान्तरनिष्पादकम्। कृतेः कर्मभूतं पुष्पकाशाद्यपि प्रकृतिरूपं कर्म। तत्र धर्मिणः काशपुष्पादेः सत्त्वेऽपि कटसंदर्भादिविरहरूपपूर्वभावासत्त्वेन तद्विशिष्टस्यासत्त्वं कटसंदर्भादिनिष्पादकक्रियातो निर्वहति।

एवं च "तण्डुलान् ओदनं पचति" इत्यत्र प्रकृतिकर्मोत्तरद्वितीयायाः नाशजनकत्वमर्थः। नाशे प्रतियोगितासंबन्धेन प्रकृत्यर्थस्यान्वयः। जनकत्वस्य धात्वर्थे पाके आश्रयत्वसंबन्धेनान्वयः। विकृतिकर्मोत्तरद्वितीयायाः उत्पादकत्वमर्थः।

तत्रौदनस्यान्वयः। उत्पादकत्वस्य पाकेऽन्वयः। तथा च तण्डुलनाशकः ओदनोत्पादकश्च यः पाकः तदनुकूलकृतिमान् इत्यन्वयबोधः। नाशकत्वविशिष्टे पाके उत्पादकत्वस्यान्वयात् उद्देश्यविधेयभावमहिम्ना उद्देश्यतावच्छेदकनाशप्रयोज्यत्वमुत्पत्तौ लभ्यते। तण्डुलनाशप्रयोज्या या ओदनोत्पत्तिः तज्जनकपाकानुकूलकृतिमानिति बोधः। अतः पाकस्य तण्डुलाद्यारम्भकसंयोगनाशजनकत्वमस्तीति 'संयोगमोदनं पचति' इति प्रयोगापत्तिरिति शङ्कायाः नावकाशः। संयोगनाशस्य तण्डुलनाशद्वारैव ओदनोत्पादकतया तण्डुलनाशेनान्यथासिद्धस्य संयोगनाशस्य ओदनोत्पत्तिप्रयोजकत्वाभावेन ओदनोत्पत्तौ संयोगनाशप्रयोज्यत्वबाधेन न 'संयोगमोदनं पचति' इति प्रयोगापत्तिः।

यदि तु व्यापारेण व्यापारिणो नान्यथासिद्धिरिति विभाव्यते — तदा निर्वर्त्यकर्मासमभिव्याहारस्थले 'संयोगं पचति' इति प्रयोगवारणाय संयोगनाशद्वारा नाशकत्वमेव द्वितीयार्थो वक्तव्य इति कृतं प्रयोज्यप्रयोजकभावबोधेन। पाकनिष्ठं संयोगनाशकत्वं न संयोगनाशद्वारकमिति न 'संयोगं पचति' इति प्रयोगापत्तिः। पाकनिष्ठं तण्डुलनाशकत्वं तु तण्डुलारम्भकसंयोगनाशद्वारकमिति 'तण्डुलानोदनं पचति' इति प्रयोगस्योपपत्तिः।

तथा च "तण्डुलं पचति" इत्यत्र नाशप्रयोजकसंयोगनाशो द्वितीयार्थः। प्रथमनाशे प्रकृतिकर्मणः तण्डुलस्य प्रतियोगितासंबन्धेनान्वयः। द्वितीयनाशस्य जनकत्वसंन्धेन पाकेऽन्वयः। तण्डुलप्रतियोगिकनाशप्रयोजकसंयोगनाशप्रयोजकपाकानुकूलकृतिमानिति बोधः।

'संयोगं पचति' इति च नापत्तिः। संयोगनाशप्रयोजकनाशजनकत्वस्य पाके विरहादिति तात्पर्यम्।

"तण्डुलमोदनं करोति, काष्ठं भस्म करोति, दुग्धं दधि करोति" इत्यादावपि प्रकृतिकर्मोत्तरद्वितीयया तन्नाशकत्वं कृतौ प्रत्याय्यते। विकृतिकर्मोत्तरद्वितीयया च विषयताविशेषः उत्पादकत्वं मिलितं वा कृतौ बोध्यते। तण्डुलनाशिका ओदनविषयिका ओदनोत्पादिका च या कृतिः तद्वानिति रीत्या बोधः।

अथैकतरार्थकत्वोपगमेनैव निर्वाहे किमर्थमुभयार्थकत्वमङ्गीकार्यमिति चेत् — अत्राहुः। यत्र ईषदुष्णदुग्धे प्रचुरोष्णत्वभ्रमात् आमिक्षोद्देश्यकप्रवृत्त्या दधिप्रक्षेपात् दधिनिष्पत्तिः तत्र आमिक्षोद्देश्यकप्रवृत्तेः दध्युत्पादकत्वेऽपि 'दुग्धं दधि करोति' इति प्रयोगो यदि नानुभाविको यदि वा उपाये भ्रमवतो दध्यनुपायगोचर-दध्युद्देश्यकप्रवृत्त्या दध्यनुत्पत्तिः तत्र दुग्धं दधि करोतीति प्रयोगा नानुभविकः, तदा उक्तस्थलयोः उक्तवाक्यस्य प्रामाण्यवारणाय विषयताविशेषोत्पादकत्वयोः मिलित-योरेव द्वितीयार्थत्वं वक्तुमुचितमिति।

"काशान् कटं करोति, कुसुमानि मौक्तिकानि वा स्रजं करोति" इत्यादौ काशादिपदोत्तरद्वितीया उपादानताख्यविषयत्वमेव बोधयति, काशाद्युच्छेदक-तायास्तत्र बाधात्। कटादिपदोत्तरद्वितीयार्थः साध्यत्वाख्यं विषयत्वम् उत्पादकत्वं वा। काशोपादानककटसाध्यककृत्याश्रयः चैत्रः इति बोधः। स्रगादिपदार्थविन्या-सविशेषविशिष्टकुसुमादेः न कुसुमाद्युपादानककृतिविषयता, अपि तु विन्यासादि रूपविशेषणस्यैव। तस्यैव कृत्यधीनोत्पत्तिरिति स्रजम् इत्यादिद्वितीयान्तस्य विशिष्टसत्त्वनिर्वाहकत्वमर्थः।

विशेषणोत्पादकस्यापि स्वरूपसंबन्धविशेषरूपं विशिष्टसत्त्वनिर्वाहकत्वमक्षत-मेव। विशिष्टसत्त्वनिर्वाहकत्वं नाम विन्यासविशेषविशिष्टकुसुमस्थितिसंपादकत्वम्। कुसुमपदोत्तरद्वितीयायाः निर्वाह्यत्वमर्थः। तथा च कुसुमनिर्वाह्या विन्यासविशेष-विशिष्टकुसुमस्थितिसंपादिका या कृतिः तदाश्रय इत्यन्वयबोधः।

"अग्निः श्यामं घटं रक्तं करोति" इत्यादौ अचेतनकर्तृकव्यापारबोधककृधा-तुसमभिव्याहृतश्यामादिपदोत्तरद्वितीयाया अपि नोपादानताख्यविलक्षणविषयतार्थ-कत्वं संभवति। अपि तु तादृशद्वितीयान्तेन श्यामरूपादिविशिष्टासत्त्वनिर्वाहकता-रूपं विशिष्टोच्छेदकत्वं तादृशव्यापारे प्रत्याय्यते। रक्तपदोत्तरद्वितीयया जनकत्वं प्रत्याय्यते। तथा च श्यामरूपविशिष्टघटासत्त्वनिर्वाहिका रक्तरूपविशिष्टजनिका च या कृतिः तदाश्रय इति बोधः।

"घटं रक्तं करोति" इत्यत्र घटपदस्यारक्तत्वविशिष्टघटे लक्षणा। तदसत्त्व-निर्वाहकत्वं द्वितीयार्थः। अरक्तत्वविशिष्टघटासत्त्वनिर्वाहिका रक्तत्वविशिष्टघट-जनिका या कृतिः तदाश्रय इति बोधः।

पदवाक्यरत्नाकरे[1] प्रदर्शितः कर्मविभागः

ननु कोऽसौ निर्वर्त्यविकार्यप्राप्यकर्माणां विशेष इत्यत्राह —

---

[1] पृ. ५१३

यदुत्पत्तिस्वरूपेण फलेन व्यतिषज्यते।
तन्निर्वर्त्यं विकार्यं विकारैः प्राप्यमतोऽन्यथा।।

यत् कर्म उत्पत्तिस्वरूपेण क्रियाजन्यफलेन संसृज्यते तन्निर्वर्त्यम्। यथा "घटं करोति" इत्यत्र उत्पत्त्यनुकूलव्यापारः कृधातोरर्थः। तत्र उत्पत्तिः फलं तदाश्रयत्वात् कटः निर्वर्त्यकर्म। यत्तु धात्वर्थफलभूतविकाराश्रयः तद्विकार्यम्। विकारस्तु क्वचिन्नाशरूपः। यथा "शत्रुं हिनस्ति" इत्यत्र हिंसिधातोः नाशानुकूलव्यापारार्थकतया तदर्थफलस्य नाशस्य प्रतियोगितासंबन्धेनाश्रयः शत्रुः विकार्यकर्म। क्वचित् विकारः नाशानुकूलावयवविघटनादिरूपः। यथा "तृणं छिनत्ति कुसूलं भिनत्ति" इत्यादौ तृणकुसूलादिः। तत्र हि अवयवविघटनद्वारैव तृणादीनां नाशः, न तु साक्षात्। उत्पत्तिविनाशभिन्नेन फलेन संसृष्टं कर्म प्राप्यम्। यथा "ग्रामं गच्छति, रूपं पश्यति" इत्यादौ संयोगविषयत्वाधिकरणं ग्रामरूपादिः।

हरिस्तु —

सती वाविद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते।
प्रकृतेस्तु विवक्षायां विकार्यं ....। —

इत्येकं पक्षमुदाजहार। यस्य कर्मणः प्रकृतिः समवायिकारणम् परिणामितया उपादानतया नोपादीयते तत् क्रियाफलोत्पत्तिमत् निर्वर्त्यं कर्म। यथा "कटं करोति" इत्यत्र कटः। न ह्यत्र सदपि कटोपादानं वीरणं कटोपादानत्वेन विवक्ष्यते। यत्र च प्रकृतिरुपादीयते तद्विकार्यम्। यथा "कनकं कुण्डलं करोति" इत्यत्र कुण्डलम्। कनकपदं कनकोपादाने लाक्षणिकम्। अथ वा उपादानत्वं साध्यता च कृञर्थः फलम्। तत्रोपादानत्वेन साकं कनकस्य, साध्यत्वेन साकं कुण्डलस्यान्वयः। कनकनिष्ठोपादानतानिरूपकः (कनकोपादानकः) कुण्डलनिष्ठसाध्यतानिरूपकश्च (कुण्डलसाध्यकश्च) यः प्रयत्नः तदाश्रयः चैत्र इत्यन्वयबोधः।

सती वाविद्यमाना वेत्यस्यार्थः

विकार्ये कर्मणि प्रकृतिर्द्विविधा, क्वचित् सती उपादेयकालिकी। यथा "वीरणं कटं करोति, कनकं कुण्डलं करोति, वेणुदलं वक्रं करोति" इत्यादौ। क्वचिदविद्यमाना — कार्यासहवृत्तिः यथा "काष्ठं भस्म करोति, तण्डुलानोदनं पचति" इत्यादौ। अत्र ध्वंस उत्पत्तिश्च फलविधयाकृञोऽर्थः। काष्ठध्वंसस्य भस्मोत्पत्तेश्च अनुकूलो व्यापारो वाक्यार्थः। पचेरपि विक्लित्तिरुत्पत्तिश्चार्थः। "द्व्यर्थः पचिः" इति महाभाष्यात्। तण्डुलविक्लेदिका ओदनोत्पादिका क्रिया वाक्यार्थः।

प्रकृतित्वं तु काष्ठस्यामुख्यम्। साक्षात्समवायिकारणस्यैव मुख्यप्रकृतित्वात्। काष्ठस्य तु स्वनाशद्वारा भस्मकारणत्वात्।

हरिरेव कैश्चिदन्यथा निरुच्यमानं पक्षान्तरमप्याह —

निवर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम्।
यदसज्जायते सद्वा जन्मना यत् प्रकाश्यते।।
तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम्।
प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादि भस्मवत्।।
किंचित् गुणान्तरोत्पत्त्या सुवर्णादि विकारवत्।

इति। पूर्वमसत एव सत्त्वमध्वस्तसमयसंबन्धस्य समयसंबन्ध उत्पत्तिरिति वैशेषिकादयः। ध्वस्तः समयो यस्येति व्युत्पत्त्या यदधिकरणस्य समयस्य ध्वंसः इति विग्रहवाक्येन समासाच्च लक्षणया ध्वंसप्रतियोगिसमयवृत्तित्वस्य लाभः। नञ्पदसमभिव्याहारात् तादृशवृत्तितावच्छिन्नस्य लाभः। स्वाधिकरणक्षणध्वंसानधिकरणसमयवृत्तित्वमुत्पत्तिः। इति पर्यवसानम्। आद्यक्षणसंबन्ध उत्पत्तिः इत्यस्याप्ययमेवार्थः। सतः प्रकाश उत्पत्तिरिति कापिलाः इति।

धात्वर्थफलोत्पत्तिमत् निर्वर्त्यं कर्म, यथा "घटं करोति, ओदनं पचति" इत्यादौ कटौदनादिः। धात्वर्थफलीभूतविकारसंसृष्टं विकार्यम्, यथा "शत्रुं हिनस्ति, काष्ठं भिनत्ति" इत्यादौ शत्रुकाष्ठादिः। यथा वा "कनकं कुण्डलं करोति" इत्यादौ कनककुण्डलादिः।

प्रकृत्युच्छेदेत्यादिकारिकार्थः

यदुच्छेदेन संभूतं निर्वर्त्यं कर्म सा प्रकृतिः विकार्यं कर्म, यथा — काष्ठोच्छेदसंभूतं भस्म निर्वर्त्यं कर्मेति काष्ठं विकार्यम्। सत्यामेव यस्यां प्रकृतौ गुणोत्पत्तिर्धातुना प्रत्याय्यते, तदपि द्वितीयं विकार्यं कर्म। यथा सदेव शलाकास्वरूपं कनकम् अवयवानामनारम्भकसंयोगमात्रविरोधिना कर्मणा भुग्नत्वगुणोत्पत्त्या विकार्यम्। भुग्नत्वं वक्रत्वं संयोगविशेषः। कुण्डलपदस्य भुग्नं द्रव्यमर्थः। धात्वर्थोत्पत्तिस्तु भुग्नत्व एवार्थतोऽन्वेति।

प्राप्यलक्षणमाह हरिरेव —

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते।।

इति। तत्र क्रियाकृता विशेषाः उत्पत्तिक्षयोपचयादयः भावविकाराः एव।

भाट्टरहस्ये[1] कर्मविभाग इत्थं प्रदर्शितः — तच्च कर्म चतुर्विधम् उत्पाद्यम् आप्यं विकार्यं संस्कार्यं चेति। "घटं करोति घटं जानाति, व्रीहीनवहन्ति, व्रीहीन् प्रोक्षति" इत्युदाहरणानि।

पार्थसारथिस्तु साध्यत्वमेव द्वितीयार्थः। आप्यकर्मादावपि तत्फलोपहितत्वेन साध्यतेत्याह।

तदपि जन्यत्वस्य शक्यतावच्छेदकत्वे गौरवात् उपेक्षितम्। शक्ततावच्छेदकं तु द्वितीयात्वममादिनिष्ठो व्यापको धर्मः इत्युक्तम्।

तथायुक्तमिति सूत्रार्थः

तथा — ईप्सिततमवत्, युक्तं — क्रियया युक्तं, क्रियाजन्यफलयुक्तम् अनीप्सितमपि कारकं कर्मसंज्ञं स्यात्। पूर्वसूत्रे ईप्सिततमस्य कर्मत्वमुक्तम्। द्वेष्योपेक्ष्यसंग्रहार्थमिदं सूत्रम्। तत्रोपेक्ष्यस्य उदाहरणम् — 'ग्रामं गच्छन् तृणं स्पृशति'। संयोगानुकूलव्यापारः स्पृशधातोरर्थः। अत्र स्पृश्यमानस्य तृणस्येप्सिततमत्वाभावेऽपि क्रियाजन्यसंयोगात्मकफलाश्रयत्वात् कर्मत्वम्। 'गङ्गां स्पृशति' इत्यत्र ईप्सिततमस्य गङ्गादेरिव। द्वेष्यस्योदाहरणम् — 'विषं भुङ्क्ते' इति। यदा कश्चित् बलवता वैरिणा निगृह्यमाणो विषं भुङ्क्ते तदा इदमुदाहरणम्। भुजेर्हि गलविवरप्रवेशानुकूलः व्यापारः अर्थः। विषस्य द्वेष्यतया ईप्सिततमत्वाभावेऽपि 'ओदनं भुङ्क्ते' इत्यादौ भुज्यमानस्य ईप्सिततया ओदनादेरिव क्रियाजन्यगलविवरप्रवेशात्मकफलाश्रयत्वात् कर्मत्वम्।

विभक्त्यर्थनिर्णये[2] प्रदर्शितः कर्मविभागः

निर्वर्त्यविकार्यप्राप्यभेदेन कर्मत्रैविध्यम् ननु किमिदं निर्वर्त्यं विकार्यं प्राप्यं च कर्मेति चेत् — अत्र गुरुचरणाः — क्रियाजन्यफलोत्पत्तिस्वरूपेण धात्वर्थेन संसृज्यते यत् तन्निर्वर्त्यम्, यथा "कटं करोति" इत्यत्र उत्पादनार्थककरोत्यर्थफलीभूतोत्पत्तिसंसृष्टः कटः। यत्तु विकारैः धात्वर्थफलैः संसृज्यते तद्विकार्यम्। विकारस्तु क्वचिन्नाशस्वरूपः। यथा "शत्रुं हिनस्ति" इत्यत्र नाशनार्थकहिंस्यर्थफलीभूतनाशसंसृष्टः शत्रुः। क्वचिन्नाशानुकूलः अवयवविघटनादिः, यथा तृणं छिनत्ति "कुशूलं भिनत्ति" इत्यादौ धात्वर्थफलेनावयवविघटनेन परम्परया संसृष्टः तृणकुसूलादिः। उत्पत्तिविकारभिन्नेन फलेन संसृष्टं तु प्राप्यं कर्म यथा "ग्रामं

[1] पृ. ९५
[2] पृ. १२६

गच्छति रूपं पश्यति" इत्यादौ संयोगविषयत्वादिफलेन संसृष्टं ग्रामरूपादि। वाक्यपदीये हरिस्तु निर्वत्यादिलक्षणमाह —

सती वा विद्यमाना वा प्रकृतिः परिणामिनी।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते।।

प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा।

इति। यस्य कर्मणः प्रकृतिः समवायिकारणं परिणामितया उपादानतया नोपदीयते तत् क्रियाजन्यफलोत्पत्तिमत् निर्वर्त्यं कर्म — यथा "कटं करोति" इत्यत्र कटः। न ह्यत्र सदपि कटोपादानं वीरणं कटोपादानत्वेन विवक्ष्यते। यत्र च प्रकृतिः समवायिकारणमुपादीयते तद्विकार्यम् — यथा "कनकं कुण्डलं करोति" इत्यत्र कुण्डलम्। अत्रोपादानत्वविषयतयासंसर्गेण फलेन वा कुण्डलस्य कृञर्थयत्नेऽन्वयः।

विकार्ये कर्मणि प्रकृतिर्द्विविधा- क्वचिदुपादेयतुल्यकालिकी सती यथा "वीरणं कटं करोति, कनकं कुण्डलं करोति, वेणुदलं वक्रं करोति" इत्यादौ वीरण-कनकवेणुदलादिकाः। क्वचिदविद्यमाना कार्यासहवृत्तिः उपादेयासमानकालिकी — यथा "काष्ठं भस्म करोति, तण्डुलानोदनं पचति" इत्यादौ काष्ठतण्डुलादिकाः। अत्र हि ध्वंसः उत्पत्तिश्च कृञः, विक्लित्तिः उत्पत्तिश्च पचेः फलविधया अर्थः। काष्ठध्वंशस्य भस्मोत्पत्तेश्चानुकूलतया कृञोऽर्थे व्यापारे, तण्डुलविक्लित्तेः ओद-नोत्पत्तेश्चानुकूलतया पच्यर्थे व्यापारेऽन्वयः। प्रकृतित्वं तु काष्ठादेः परम्परया व्यावहारिकमिति कारिकार्थः। पक्षान्तरमाह हरिरेव कैश्चिदिति।

निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम्।
यदसज्जायते यद्वा जन्मना यत् प्रकाशते।।

तन्निर्वर्त्यं, विकार्यं तु द्वेधा कर्म व्यवस्थितम्।
प्रकृत्युच्छेदसंभूतं किंचित् काष्ठादिभस्मवत्।।

किंचिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्।

पूर्वमसतः सत्त्वं स्वाधिकरणसमयध्वंसानधिकरणसमयसंबन्धः उत्पत्तिरिति तार्किकवैशेषिकादयः। कालिकविशेषणतासामान्येन न कोऽपि कुत्रापि समये संसृष्टः। दैशिकसंसर्गभेदेन कालिकविशेषणतायां भेदस्यावश्यकत्वात्। अत एव गवावयवावच्छेदेन संयोगसंसर्गावच्छिन्नकालिकसंसर्गेणावच्छिन्नप्रतियोगिताको गवाभावो गोमत्यपि काले विद्यते, न तु समवायावच्छिन्नकालिकसंसर्गेण। इदा-नीमवयवेषु 'समवायेन गौः न तु संयोगेन' इति प्रतीत्या कालेऽवयवावच्छेदेन

गवाभावस्य विषयीकरणात् अवयवेषु संयोगेन गवाभावस्य व्यासज्यवृत्तितया कालावच्छिन्नत्वासंभवात्।

अत एव चिरान्तरितस्याप्यनुभवयागादेः भावनासुकृतादिसंसर्गावच्छिन्नकालिक-विशेषणतया स्मरणस्वर्गाद्यव्यवहितपूर्वक्षणवृत्तित्वेन तत्तत्कारणत्वं सूपपादम्।

तथा च ध्वंसप्रागभावस्वरूपदैशिकसंसर्गावच्छिन्नकालिकेन पूर्वस्मिन्नेव काले प्रत्यासन्नो भवति सर्वो भाव इति नाभावो विद्यते सतः। जन्मना तु प्रकाश एव। प्रकाशस्तु समवायतादात्म्याद्यवच्छिन्नकालिकविशेषणतया प्रथमः समवायसंबन्ध इति कापिलाः (सांख्याः)। तदाह हरिरेव —

उत्पत्तेः प्रागसद्भावो बुद्ध्यवस्थानिबन्धनः।
अविशिष्टः सतान्येन कर्ता भवति जन्मनः।।

कारणं कार्यभावेन यदा वा व्यवतिष्ठते।
कार्यं शब्दं तदा लब्ध्वा कार्यत्वेनोपजायते।।

यथाहेः कुटिलीभावो व्यग्राणां वा समग्रता।
तथैव जन्मरूपत्वं सतामेके प्रचक्षते।।

इति। एवं चासतः सत्त्वं सतः प्रकाशो वा भवत्युत्पत्तिः। धात्वर्थफली-भूतोत्पत्तिमत् निर्वर्त्यं कर्म। यथा 'घटं करोति, ओदनं पचति' इत्यादौ घटौदनादि, यथा वा 'कनकं कुण्डलं करोति' इत्यादौ कुण्डलादि। धात्वर्थफलीभूतविकार-संसृष्टं विकार्यं कर्म। यथा 'शत्रुं हिनस्ति काष्ठं छिनत्ति' इत्यादौ शत्रुकाष्ठादि, यथा वा 'कनकं कुण्डलं करोति, तण्डुलानोदनं पचति' इत्यादौ कनककुण्डलादि।

प्रकृत्युच्छेदेत्यादिकारिका तु — प्रकृत्युच्छेदेन संभूतं कर्म निर्वर्त्यम् — सा प्रकृतिर्विकार्यं कर्म यथा काष्ठच्छेदसंभूतं भस्म निर्वर्त्यमित्यतः काष्ठं विकार्यम्। सत्यामेव यस्यां प्रकृतौ गुणोत्पत्तिः धातुना प्रत्याय्यते सापि प्रकृतिः द्वितीयं विकार्यं कर्म — यथा सदेव शलाकास्वरूपं कनकमवयवानामनारम्भकसंयोग-मात्रविरोधिना कर्मणा भुग्नत्वगुणोत्पत्त्या विकार्यम्। कुण्डलपदस्य हि भुग्नं द्रव्यमर्थः। धात्वर्थोत्पत्तिस्तु भुग्नत्व एवार्थतोऽन्वेतीत्यर्थिका।

प्राप्यलक्षणमप्याह हरिरेव —

क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।
दर्शनादनुमानाद्वा तत् प्राप्यमिति कथ्यते।।

तत्र क्रियाकृतविशेषा उत्पत्तिक्षयोपचयादयो भावविकारा एव गणनीया इति पदवाक्यरत्नाकरे प्राहुः।

एवं च सकलकर्मगतफलान्वयि आधेयत्वं द्वितीयार्थः।

भाट्टचिन्तामणौ[१] प्रदर्शितः कर्मविभागः

तच्च कर्म द्विविधम् "कर्तृरीप्सिततमं कर्म"[२] "तथायुक्तं चानीप्सितम्"[३] इति व्याकरणात्। तत्राद्यं चतुर्धा — उत्पाद्यप्राप्यविकार्यसंस्कार्यभेदात्। उत्पत्तिर्नाम येनाकारेण कारकमभिधानोपात्तं तस्यासत एवोत्पादनम्। तस्यैव सतोऽप्राप्तस्य प्रापणं प्राप्तिः। तद्गतदृष्टातिशयोत्पादनं संस्कार इति। यथा "यूपं छिनत्ति, घटं कुरुते, पयो दोग्धि, व्रीहीनवहन्ति, व्रीहीन् प्रोक्षति" इति। अनीप्सितमपि चतुर्विधम् उदासीनं द्वेष्यं संज्ञान्तरैरनाख्यातम् अन्यपूर्वकं च। यथा "तृणं स्पृशति, विषं भुङ्क्ते, गां दोग्धि, विषमनुक्रुध्यति, अग्निमनुजपति" इति च।

अत्रेप्सितत्वानीप्सितत्वयोः शक्तिद्वयमिति सोमेश्वरः। ईप्सितानीप्सितानुवृत्तं साध्यत्वं न द्वितीयार्थः गौरवात्। न च सूत्रद्वयानर्थक्यम्। "वारणार्थानामीप्सितः"[४] इति "यवेभ्यो गां वारयति" इत्यत्र यवानामीप्सितत्वेनापादनतया ईप्सिततमे गवि द्वितीयाप्राप्त्यर्थत्वात् आद्यस्य, विषं भक्षयति इत्यादौ द्वितीयस्यापि सार्थक्यात् — इत्युक्तम्।

द्विकर्मकधातुस्थले द्वितीयार्थविचारः

अकथितं चेति सूत्रार्थः

अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। अपादानं संप्रदानम् अधिकरणं कर्म करणं कर्ता हेतुः इति कारकसप्तकम्। तदेतत् यदा अपादानत्वादिविशेषात्मना न विवक्ष्यते, किं तु संबन्धसामान्यात्मनैव तदा तत् कर्मसंज्ञकमित्यर्थः। अत्र परिगणनम् —

दुह्याच्पच्दण्डरुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्।।

---

[१] पृ. ९६
[२] सू. १.४.४९
[३] सू. १.४.५०
[४] सू. १.४.२७

दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यत् युज्यते तदेवाकथितं कर्मेतिपरिगणनं कर्तव्यमित्यर्थः। दुहप्रपूरणे, टु याचृ याच्ञायाम्, डु पचष् पाके, दण्ड दण्डनिपातने (निग्रहे), रुधिर् आवरणे, प्रच्छ ज्ञीप्सायाम्, चिञ् चयने, ब्रूञ् व्यक्तायां वाचि, शासु अनुशिष्टौ, जि अभिभवे, मन्थ विलोडने, मुष स्तेये इति द्वादशानां णीञ् प्रापणे, हृञ् हरणे, कृष विलेखने, वह प्रापणे इति चतुर्णां च कर्मणा यत् युज्यते तदेवाकथितं कर्मेति परिगणनं कर्तव्यमित्यर्थः।

गां दोग्धि पयः इति वाक्यार्थः

क्षरणानुकूलव्यापारः क्षारणपर्यायः दुहेरर्थः। क्षारणात्मकव्यापारप्रयोज्यक्षरणात्मकफलाश्रयत्वात् पयः कर्म। गौस्तु क्षरणे अपादानम्। तदपादानत्वमुपेक्ष्य सम्बन्धित्वात्मना गोः विवक्षायां कर्मत्वमनेन भवति। ततश्च शेषषष्ठीनिरासे द्वितीया भवति। तदिदमुक्तं प्रौढमनोरमायाम् — गोसंबन्धिपयःकर्मकं दोहनमर्थ इति। तथा च न माषाणामश्नीयादित्यत्रेव शेषत्वविवक्षायां प्राप्तां षष्ठीं बाधितुमिदं सूत्रम्। गोरपादानत्वविवक्षायां तु पञ्चम्येव, "गोः पयो दोग्धि" इति। गोसकाशात् पयः क्षारयतीत्यर्थः। यदि तु गौः पयोविशेषणं तदा षष्ठ्येव। गोसम्बन्धि यत् पयः तत् क्षारयतीत्यर्थः। एवमग्रेऽप्यूह्यमिति प्राचीनमतानुसारी पन्थाः।

वस्तुतस्तु अपादानत्वादिविशेषरूपेणाविवक्षितं किंतु कर्मत्वेनैव विवक्षितमकथितम्। तादृशमपादानादि कर्मसंज्ञकं स्यादित्यर्थः। कारकत्वसंज्ञानां स्वबोध्ये कर्मत्वादिशक्तिमत्त्वबोधकत्वात् बोधोऽपि तथैव। एवं च "गां दोग्धि पयः" इत्यत्र गोकर्मकं पयःकर्मकं च दोहनमित्येव बोधः। अवधेः सकाशात् द्रवद्रव्यविभागो हि क्षरणम्। तच्च गो निष्ठव्यापारप्रयोज्यम्। एवं च कर्तृव्यापारप्रयोज्यक्षरणात्मकविभागविशेषाश्रयत्वात् गोः पयसश्च पूर्वसूत्राभ्यां कर्मत्वमस्त्येव। अतः उभयकर्मकबोध एव युक्तः। न तु संबन्धत्वेन गोर्बोधः। अत एव प्रकृतसूत्रभाष्ये "अकथितम्" इत्यनेनैव सिद्धत्वात् पूर्वसूत्रद्वयस्य वैयर्थ्यमाशङ्क्य ईप्सितमात्रस्याप्यनेन कर्मसंज्ञायां "वारणार्थानाम्०"[१] इत्यस्य अनवकाशतया "अग्रेर्माणवकं वारयति" इत्यत्र माणवकस्य अपादानसंज्ञायां प्राप्तायां "कर्तुरीप्सिततमं कर्म"[२] इत्यारब्धव्यम्। ततश्च द्वेष्योपेक्ष्यसंग्रहाय "तथायुक्तं चानीप्सितम्"[३] इत्यारब्धव्यमिति समाहितम् —

---

[१] सू. १.४.२७
[२] सू. १.४.४९
[३] सू. १.४.५०

एतेन कर्मसंज्ञा सर्वा सिद्धा भवत्यकथितेन।
तत्रेप्सितस्य किं स्यात् प्रयोजनं कर्मसंज्ञायाः।।
यत्त्वकथितं पुरस्तादीप्सितयुक्तं च तस्य सिद्ध्यर्थम्।
ईप्सितमेव तु यत् स्यात् तस्य भविष्यत्यकथितेन।।

इति श्लोकद्वयेनेति शब्देन्दुशेखरे स्थितम्।

बृहन्मञ्जूषायाम्[1] गां दोग्धि पयः इति वाक्यार्थः

"गां दोग्धि पयः" इत्यत्र दुहेः अन्तस्थितद्रव्यविभागानुकूलव्यापारानुकूलव्यापारोऽर्थः। तत्र विभागानुकूलो व्यापारो गोनिष्ठः। कर्तृव्यापारगोव्यापारोभयप्रयोज्यफलाश्रयत्वात् पयसः प्राधान्यम्। गोस्तु तद्वैपरीत्यात् गौणत्वम्। तत्र यद्यपि "तथायुक्तं०"[2] इति "कर्तुरीप्सिततमं कर्म"[3] इति वा कर्मत्वं सिद्धयति, तथापि शेषत्वविवक्षायां षष्ठीबाधनार्थमिदम्। पयोनिष्ठविभागीयसंबन्धस्यैव फलतावच्छेदकत्वात् न गोर्विभागाश्रयत्वेन कर्मत्वम्।

एवं च गोसंबन्धी पयोनिष्ठविभागानुकूलो यो व्यापारः तदनुकूलो गोनिष्ठो व्यापार इति बोधः।

यदा तु द्रवद्रव्यनिष्ठविभागानुकूलव्यापार एव धात्वर्थः, तदा अपादानत्वविवक्षायां गोरिति पञ्चम्येव। तदविवक्षायां तु अनेन कर्मत्वमेव। अपादानत्वाद्यविवक्षा चेयम्, यत् धातोः व्यापारद्वयार्थकत्वविवक्षा तदर्थविभागाद्यवधित्वाविवक्षा चेति।

तत्र शब्दशक्तिप्रकाशिकोक्तरीतिः

ननु यङन्तधात्वर्थविशेष्यतापन्नस्तिङर्थो यदि कर्मत्वं तदा दुहादेर्मुख्यकर्मणि पयसि अव्याप्तिः, तन्निष्ठस्य फलस्य तिङा अप्रतिपादनात्। "गोपेन गौः पयो दुह्यत" इत्यादौ गोपकर्तृकव्यापारजन्यं यत् पयःकर्मकमोचनं तद्वती गौः इत्येवमन्वये मोचनबहिःक्षरणयोः द्वयोरेव दुहधात्वर्थतावच्छेदकफलत्वेऽपि गौणं यत् मोचनरूपं फलं तस्यैव यक्समभिव्याहृततिङाद्यैः बोधनात्। "गौणं कर्म दुहादिभ्यः तिङाद्यैरभिधीयते" इत्यनुशासनात्। मोचनं क्षरणानुकूलव्यापारः, क्षरणं च बहिस्संयोगः। तथा च गोपकर्तृकव्यापारजन्यो यः पयोनिष्ठबहिस्संयोगानुकूलव्यापारः तद्वती गौरित्यन्वयबोधः। अतः प्रकारान्तरेण कर्मत्वं निर्वक्ति —

---

[1] पृ. १५५
[2] सू. १.४.५०
[3] सू. १.४.४९

यस्य धातोर्यदर्थे यः प्रकारीभूय भासते।
द्वितीयया स्मारितोऽर्थस्तद्वा तत्कर्मतोच्यते।।७४।।

यद्धातोः यादृशार्थे द्वितीयया यादृशः स्वार्थोऽनुभाव्यते तद्धात्वर्थतादृशक्रियायां तत् कर्मत्वम्। यद्धातूपस्थाप्ययद्धर्मावच्छिन्नविशेष्यकयादृशार्थप्रकारकशाब्दबोधजनिका द्वितीयाविभक्तिः तद्धर्मवत्त्वं तादृशधात्वर्थनिरूपितकर्मत्वमिति पर्यवसितोऽर्थः। "चैत्रो ग्रामं गच्छति" इत्यत्र गमधातूपस्थप्यव्यापारे प्रकारीभूतस्य संयोगस्य प्रतिपादिका द्वितीयेति संयोगस्तत्र कर्मत्वम्।

"गां पयो दोग्धि गोप" इत्यत्र दुहेर्मोचनानुकूलव्यापारोऽर्थ इति तादृशमोचने गोराधेयत्वेन पयसः कर्मत्वेनान्वय इति पयःकर्मताकं यत् गोवृत्ति मोचनं तदनुकूलव्यापारवान् गोपः इति बोधः। तत्र बहिःक्षरणावच्छिन्नव्यापारो मोचनं तदनुकूलव्यापारो दोहनम्। अतो धात्वर्थतावच्छेदकीभूतं बहिःक्षरणरूपं फलमादाय पयसः मोचनात्मकं फलमादाय गोः कर्मत्वमुपपादनीयम्।

तत्र व्युत्पत्तिवादोक्तरीतिः

"गां दोग्धि पयः" इत्यादौ द्विकर्मकधातुसमभिव्याहृतगवादिपदोत्तरद्वितीया क्रियाजन्यफलशालित्वात् अन्यदेव (गौणं) कर्मत्वं बोधयति। कारकाधिकारीयेण "अकथितं च"[१] इति सूत्रेण अपादानत्वादिभिन्नं यत् धातुप्रतिपाद्यान्वयि धर्मान्तरं तदवच्छिन्नस्यापि कर्मसंज्ञाभिधानात्। "गवां पयो दोग्धि" इत्यादौ धातुप्रतिपाद्यान्वयि गवादिसंबन्धो न विवक्षितः अपि तु क्षीरान्वयी स इति कर्मत्वाविवक्षया द्वितीयाया अनवकाशः। किं तु शैषिकी षष्ठ्येवेति।

अत्र धातुप्रतिपाद्यत्वं धात्वर्थतावच्छेदककोटिप्रविष्टसाधारणम्। "गां दोग्धि" इत्यादौ धात्वर्थतावच्छेदककोटिप्रविष्टे एव द्वितीयार्थान्वयात्। तथा हि — क्षरणानुकूलव्यापारो दुहेरर्थः। गोपदोत्तरद्वितीयायाः विभागोऽर्थः। विभागे प्रकृत्यर्थस्य गोः आधेयतासंबन्धेनान्वयः। विभागस्य जनकत्वसंबन्धेन क्षरणेऽन्वयः। पयःपदोत्तरद्वितीयायाः क्षरणान्वय्याधेयत्वमर्थः। तथा च गोनिष्ठविभागजनकं यत् पयोनिष्ठं क्षरणं तदनुकूलव्यापारानुकूलकृतिमान् मैत्र इति "गां पयो दोग्धि मैत्र" इति वाक्याधीनो बोधः।

न च विभागोऽपादानत्वमेवेति तद्विवक्षायां पञ्चम्येव स्यात् न द्वितीयेति वाच्यम्। धातुवृत्तिग्रहविशेष्यान्वयिनो विभागस्यैवापादानत्वरूपत्वात्। प्रकृते "क्षरणानुकूलव्यापारः धातुशक्यः" इत्याकारके धातुवृत्तिग्रहे यः विशेष्यः व्यापारः

---

[१] सू. १.४.५१

तत्र न विभागोऽन्वेति अपि तु विशेषणे क्षरणे अन्वेतीति न विभागस्यापादानत्वरूपता। "वृक्षात् पर्णं पतति" इत्यादौ अधस्संयोगानुकूलव्यापारः पतेरर्थः। तत्र विशेष्ये व्यापारे पञ्चम्यर्थो विभागोऽन्वेति इति तत्र विभागस्यापादानत्वरूपता।

वस्तुतस्तु विभागावच्छिन्नक्षरणानुकूलव्यापारो दुह्यर्थः। गोपदोत्तरद्वितीयायाः विभागान्वय्याधेयत्वमर्थः। क्षरणान्वय्याधेयत्वं पयःपदोत्तरद्वितीयार्थः। बोधः पूर्ववत्। न च विभागस्य धात्वर्थतावच्छेदकशरीरे प्रवेशे तदाश्रयस्य धात्वर्थतावच्छेदकफलशालित्वरूपमेव कर्मत्वमिति नाकथितं चेति सूत्रस्य विषय इति वाच्यम्। धात्वर्थतावच्छेदकेत्यनेन धातुवृत्तिग्रहे विशेष्ये साक्षात् विशेषणं यत् फलं तस्यैव विवक्षितत्वात्। "विभागावच्छिन्नक्षरणानुकूलव्यापारः दुहधातुशक्यः" इत्याकारकवृत्तिग्रहे विशेष्यभूतव्यापारे साक्षात् विशेषणं क्षरणमेव, विभागस्तु विशेषणे क्षरणे विशेषणमिति साक्षाद्विशेषणफलाश्रयत्वाभावात् गोः कर्मत्वाप्राप्तौ "अकथितं च"[१] इति सूत्रारम्भात्।

यत्र च क्षरणानुकूलव्यापारमात्रं धात्वर्थतया विवक्षितं क्षरणान्वयिविभागश्च विभक्त्यर्थतया तत्रापादानत्वबोधिका पञ्चमी। यत्र तु विभागावच्छिन्नक्षरणानुकूलव्यापारो धात्वर्थतया विवक्षितः विभागावन्वय्याधेयत्वं च विभक्त्यर्थतया, तत्र द्वितीया। एवं च कदाचित् "गां दोग्धि पयः" इति, कदाचिच्च "गोभ्यो दोग्धि पय" इति च संगच्छते।

अथ वा "गोभ्यो दोग्धि पयः" इत्यत्रापि विभागो धात्वर्थतावच्छेदककोटिप्रविष्ट एव। विभागावच्छिन्नक्षरणानुकूलव्यापारो धात्वर्थ इति यावत्। तत्र विभागान्वय्यवधित्वविवक्षायां "वृक्षाद्विभज्यत" इत्यत्रेव पञ्चमी "गोभ्यो दोग्धि पयः" इति। आश्रयत्वविवक्षायां च द्वितीया "गां दोग्धि पयः" इति। गवावधिकविभागजनकपयोनिष्ठक्षरणानुकूलव्यापारानुकूलकृतिमान् चैत्रः, गोनिष्ठविभागजनकपयोनिष्ठक्षरणानुकूलव्यापारानुकूलकृतिमांश्चैत्र इति च यथाक्रमं बोधः।

ननु पयोनिष्ठविभागजनकं यत् पयोनिष्ठक्षरणं तदनुकूलव्यापारस्य चैत्रादौ सत्त्वात् 'चैत्रः पयः पयो दोग्धि' इति प्रयोगापत्तिरिति चेत् — न। क्षरणान्वयिनः परसमवेतत्वस्यापि द्वितीयार्थत्वात्। परत्वं च विभागान्वयितावच्छेदकावच्छिन्नापेक्षया बोध्यम्। तथा च "गां दोग्धि पय" इत्यत्र गोनिष्ठविभागजनकं गोभिन्नपयोनिष्ठं च यत् क्षरणं तदनुकूलव्यापारानुकूलकृतिमान् चैत्र इति बोधः। "पयः पयो दोग्धि" इत्यत्र पयोभिन्नपयोवृत्तिक्षरणाप्रसिद्ध्या न तथा प्रयोगप्रसङ्गः।

---

[१] सू. १.४.५१

"चैत्रेण दुह्यते गौः क्षीरम्" इति कर्मणि प्रयोगस्थले क्षरणजन्यविभागाश्रयत्वरूपं गोनिष्ठमप्रधानकर्मत्वमाख्यातार्थः।

"प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः।।"

इत्यनुशासनात्। क्षीरमिति द्वितीयान्तार्थस्य क्षीरवृत्तित्वस्य धात्वर्थक्षरण एवान्वयः। आख्यातार्थस्य स्वरूपसंबन्धेन गवि अन्वयः। एवं च विभागावच्छिन्नक्षीरनिष्ठक्षरणानुकूल व्यापारजन्यक्षरणजन्यविभागाश्रयो गौः इत्याकारकः शाब्दबोधः।

अथ वा "दुहादयः त्र्यर्थाः द्व्यर्थः पचिः" इति महाभाष्यस्वरसात् दुहधातोः विभागक्षरणव्यापारेषु विशकलितेषु शक्तित्रयम्। विशिष्टलाभोऽन्वयबलात्। कर्माख्याते च आकाङ्क्षावैचित्र्येण तेषां विशेषणविशेष्यभावे वैपरीत्यात् व्यापारजन्यक्षरणजन्यविभागपर्यन्तस्य धातुत एव लाभः। आश्रयत्वमेवाख्यातार्थः। एवं च क्षरणविभागयोः न द्विधा भानम्। तथा च "चैत्रेण दुह्यते गौः क्षीरम्" इत्यत्र चैत्रवृत्तिव्यापारजन्यं यत् क्षीरवृत्ति क्षरणं तज्जन्यविभागाश्रयो गौः इति बोधः।

गौणकर्मासमभिव्याहृते "दुह्यन्ते क्षीराणि" इत्यादौ आख्यातेन धातुसहितेन विभागावच्छिन्नक्षरणाश्रयत्वरूपप्रधानकर्मत्वस्य बोधनेऽपि एकधा उभयविधकर्मत्वबोधनस्य अव्युत्पन्नतया 'दुह्यन्ते क्षीराणि गौः' इत्यादयो न प्रयोगाः इति —

गां दोग्धि पयः गोपालः "गां दोग्धि दुग्धम्" इत्यादौ गवादेः कर्मत्वोपपत्तये "अकथितं च"[१] इत्यनुशासनम् अपादानादिभिरकथितं कारकं कर्मसंज्ञं भवतीत्यर्थकम्।

अत्र केचित् — दुहेः स्यन्दनं तदनुकूलव्यापारश्चार्थः। स्यन्दनत्वं द्रवत्वजन्यतावच्छेदिका क्षीरादिक्रियावृत्तिः जातिः। गोपदोत्तरद्वितीयायाः विभागोऽर्थः। दुग्धपदोत्तरद्वितीयाया आधेयत्वमर्थः। द्वितीयार्थविभागस्यानुकूलतया स्यन्दने, तस्य तथैव व्यापारेऽन्वयः। एवं च गोनिष्ठविभागानुकूलदुग्धवृत्तिस्यन्दनानुकूलव्यापारानुकूलकृतिमान् गोपालः इत्याकारकः "गां दोग्धि दुग्धं गोपाल" इत्यत्र शाब्दबोधः।

न च विभागः पञ्चम्यर्थत्वादपादानत्वमेव। तद्विवक्षायामपादानाद्यकथनासंभवात् कर्मत्वानुपपत्त्या द्वितीयानुपपत्तिरिति वाच्यम्। प्रधानीभूतधात्वर्थान्वयिनो विभागस्यापादानत्वरूपत्वात्। "वृक्षात् पर्णं पतति" इत्यादौ प्रधाने स्पन्दे पतत्यर्थे पञ्चम्यर्थविभागस्यान्वयात्। प्रकृते स्यन्दनानुकूलव्यापारे विभागस्यान्वयाप्रसक्तेः

[१] सू. १.४.५१

अपादानत्वासंभवात् दर्शितानुशासनेन द्वितीयोपपत्तेः। द्वितीयार्थविभागस्य स्यन्दनरूपफलेऽन्वयसंभवात्।

यद्वा विभागः स्यन्दनं व्यापारश्च त्रयो दुहेरर्थाः। तत्र फलविशेषणफलवतोऽपि कर्मत्वमिति ज्ञापयितुम् "अकथितं च"[१] इत्यनुशासनम्। तेन प्रधानीभूतधात्वर्थे साक्षाद्विशेषणस्य धात्वर्थविशेषणीभूतधात्वर्थे विशेषणस्यापि धात्वर्थस्य फलत्वमवसीयते। धात्वर्थविशेषणीभूतधात्वर्थमेव फलत्वम्। न तु प्रथमधात्वर्थे प्रधानीभूतत्वं प्रवेशनीयं, प्रयोजनविरहात् इति स्यन्दनादिविशेषणीभूतविभागादेरपि फलतया तद्वतो गवादेः कर्मत्वं स्पष्टमिति। अत्रापि गवादिपदोत्तरद्वितीयायाः आधेयत्वमर्थः। तच्च स्यन्दनविशेषणे विभागेऽन्वेति। अत्रापि परसमवेतत्वं द्वितीयार्थः। तेन पयोनिष्ठविभागजनकस्य स्यन्दनस्य पयोनिष्ठत्वेऽपि 'पयः पयो दोग्धि' इति न प्रयोग इत्याहुः।

अन्ये तु — विभागः स्यन्दनं व्यापारश्च त्रयो दुहेरर्थाः। तत्र विभागं प्रति प्रधानतया स्पन्दनं व्यापारः। तद्वत्तया दुग्धादेः कर्तृत्वात् कर्तृसंज्ञापवादार्थम्, अथ वा विभागावच्छिन्नस्यन्दनं व्यापारश्च दुहेरर्थः। तत्र फलैकदेशविभागादिमत्त्वं कर्मत्वं ज्ञापयितुम् 'अकथितं च'[२] इत्यनुशासनम्। विशेषानुशासनेन फलैकदेशे विभागादौ द्वितीयार्थाधेयत्वस्यान्वय इति वदन्ति।

तत्र शाब्दिकमतचिन्तनम्

शाब्दिकास्तु — गवादेः संबन्धिविवक्षायां शेषे षष्ठी प्रसक्ता 'रजकस्य वस्त्रं ददाति' इतिवत्। तदपवादाय "अकथितं च" इत्यनुशासनम्। तथा च गवादिपदोत्तरद्वितीयायाः संबन्धोऽर्थः। स विभागे, स क्षीरवृत्तिस्यन्दने, तच्च गोपालवृत्तिव्यापारेऽन्वेति। एवं च "गां दोग्धि दुग्धं गोपाल" इत्यत्र गोसंबन्धिविभागानुकूलक्षीराधिकरणस्यन्दनानुकूलः एकगोपालाभिन्नैकाश्रयको व्यापार इति बोधः।

यदि च गोर्विभागाधिकरणत्वविवक्षा तदा विभागस्य धात्वर्थफलत्वात् तद्वतो गवादेः ईप्सिततमानीप्सितसूत्रान्यतरेणैव कर्मसंज्ञा। शाब्दबोधस्तु गोसंबन्धिपदस्थाने गवाधिकरणकेत्युक्त्या प्रोक्ताकार एव। यदि च गोरवधित्वविवक्षा तदा "गोभ्यः पयो दोग्धि" इति पञ्चमी भवति। यदि च पयसि गोसंबन्धविवक्षा तदा "गवां पयो दोग्धि" इति शेषे षष्ठ्यपि प्रामाणिकी — इत्याहुः।

---

[१] सू. १.४.५१

[२] सू. १.४.५१

तच्चिन्त्यम् — तथा हि यद्यकथितसूत्रेण संबन्ध उच्यते तदा उक्तान्यत्वरूपशेषे षष्ठीति सूत्रस्य निर्विषयकत्वापत्तिः, 'गवां दुहन्' इत्यादौ शेषेषष्ठीप्रयोगविलोपप्रसङ्गश्च।

वस्तुतस्तु दुहादयः त्र्यर्थाः द्व्यर्थः पचिः इति फणिभाष्यस्वारस्यात् फलविशेषणगुणफलविभागादिमतः कर्मत्वज्ञापनार्थम् "अकथितं च"[१] इति सूत्रितमिति पूर्वोक्तो यद्वाकल्पः साधीयान्।

भाट्टरहस्ये गां दोग्धि पय इति वाक्यार्थविचारः

यानि त्वन्यानि "अकथितं च" इत्यादीनि द्वितीयानुशासनानि तेषां प्रचुरप्रयोगाभावात् लाक्षणिकानुशासनानि। तथा हि — दुह् याच् पच् दण्ड् रुधि प्रच्छ चिञ् ब्रूञ् शास् जि मथ् मुष् नीञ् हृ कृष् वह् रूपधातुसमानार्थकधातूनां यत् कर्मकारकं तत्संबन्धिनः अपादानादिकारकत्वाविवक्षायां "न माषाणामश्नीयात्" इतिवत् धात्वर्थसंबन्धमात्रविवक्षायां संबन्धसामान्यवाचिषष्ठीप्राप्तौ "अकथितं च" इत्याद्यनुशासनेन भाक्तकर्मसंज्ञाकरणात् द्वितीयादि। यथा "गां दोग्धि पय" इत्यादौ। अत्र गोपदोत्तरद्वितीयायाः गोदोहनसंबन्धोऽर्थः। स च स्वनिरूपकदोहनानुकूलत्वसंसर्गेण आख्यातार्थभावनायामन्वेति, न तु धात्वर्थे। द्वितीयार्थसंबन्धप्रकारकबोधं प्रति धातुजन्योपस्थितिः कारणमिति व्युत्पत्त्यन्तरकल्पनापत्तेः। दुहादिधातुयोगे कर्मत्वप्रतिपादकानुशासनमपि संसर्गप्रतिपादनपरम्। गोसंबन्धिदोहनानुकूला पयःकर्मकदोहनानुकूला भावनेत्याकारको बोधः।

गोरपादानत्वविवक्षायां तु "गोः पयो दोग्धि" इति पञ्चम्यन्तः प्रयोगः। गवापादानकदोहनानुकूला पयः कर्मकदोहनानुकूला भावनेति बोधः। गोः पयोरूपकर्मकारकसंबन्धविवक्षायां तु षष्ठ्यन्तप्रयोगोऽपि। गोसंबन्धि यत् पयः तत्कर्मकदोहनानुकूला भावनेति बोधः।

अत्र पयसः संबन्धसामान्येन धात्वर्थाद्यन्वयविवक्षायां पयसः कर्मत्वाभावात् तत्संबन्धिन्या अपि गोर्न कर्मत्वम् इत्येतदर्थं कर्मसंबन्धिन इति विशेषणम्। वैयाकरणैरपि परिगणनावसरे "कर्मयुक् स्यादकथितम्" इति पठ्यते। अत एव 'गां पयसो दोग्धि' इति न प्रयोगः। अतस्तदा "गोः पयसो दोग्धि" इत्येव प्रयोगः।

एवं च अपादानत्वादेः अपादानत्वत्वादिना अविवक्षायां सबन्धत्वेन विवक्षायां द्वितीयेति पर्यवसितम्।

---

[१] सू. १.४.५१

याच्-धातुयोगे द्वितीयार्थः

शब्दशक्तिप्रकाशिकायाम्[१]

"नृपमर्थं प्रार्थयते याचते भिक्षते" इत्यादौ दानाय प्रेरणं धात्वर्थः। तथा च नृपनिष्ठं यत् अर्थस्य दानं तत्प्रेरणावानित्यर्थः। प्रेरणा — प्रवर्तना। सा च दीयतामित्यभिलापरूपा।

व्युत्पत्तिवादे[२]

"पौरवं गां याचते विप्रः" इत्यादौ स्वोद्देश्यकदानेच्छा याचत्यर्थः। स्वं — याचको विप्रः। स्वनिरूपितस्वत्वप्रकारकत्वविशिष्टा या परस्वत्वनिवृत्त्यनुकूलेच्छा (दानं) तद्विषयिणी इच्छेति। प्रथमेच्छा दातृनिष्ठा। द्वितीयेच्छा याचकनिष्ठा। प्रधानकर्मगवाद्यन्वितद्वितीयार्थः विषयत्वं निरूपकतासंबन्धेन धात्वर्थतावच्छेदकदानेऽन्वेति। सविषयकज्ञानादिरूपविषयोपहितेच्छाबोधकधातुस्थले इच्छाविषयविषयत्वमेव प्रधानकर्मत्वम्। आदिपदात् इच्छाप्रयत्नद्वेषभावनाख्यसंस्कारपरिग्रहः। प्रकृते च दानविषयकेच्छाविषयीभूता या दानरूपेच्छा तद्विषयत्वेन प्रधानकर्मत्वम्। "घटो जिज्ञास्यत" इत्यादौ इच्छाविषयीभूतज्ञानविषयत्वात् घटस्य सन्नन्तकर्मता। पौरवपदोत्तरद्वितीयार्थः याचधात्वर्थतावच्छेदकदानान्वय्याधेयत्वम्। पौरवस्य तादृशदानाश्रयत्वमेवाप्रधानकर्मत्वम्। न चैवमिच्छाविषयदानाश्रयत्वं कर्तृत्वरूपमिति वाच्यम्। धातुजन्यप्रतिपत्तिविशेष्यीभूतदानाश्रयत्वस्यैव तत्कर्तृत्वरूपत्वात्। तथा च पौरवनिष्ठं यत् गोविषयकं दानं तद्विषयकेच्छाश्रयो विप्र इति बोधः।

"चैत्रेण (विप्रेण) पौरवो गां याच्यत" इत्यतः चैत्रवृत्तीच्छाविषयगोकर्मकदानाश्रयः पौरव इति बोधः।

पदवाक्यरत्नाकरे[३]

दानं प्रतिश्रवः व्यापारश्च याचेरर्थः। देयत्वेनाभ्युपगमः प्रतिश्रवः। अभ्युपगमश्च मयेदमस्मै देयमित्याकारकज्ञानविशेषः। "राजानं कनकं याचते" इत्यत्र राजपदोत्तरद्वितीयायाः दानान्वय्याधेयत्वमर्थः। कनकपदोत्तरद्वितीयायाः प्रतिश्रवान्वयिविषयत्वमर्थः। दानस्यानुकूलतासंबन्धेन प्रतिश्रवेऽन्वयः। व्यापारः स्वलिप्साप्रकाशकः देहीतिवाक्यादिरूपः। तत्र प्रतिश्रवस्य अनुकूलतासंबन्धेनान्वयः। राजनिष्ठ-

---

[१] पृ. ३३२
[२] पृ. १४४
[३] पृ. ५८०

कनकविषयकदानानुकूलप्रतिश्रवानुकूललिप्साप्रकाशकवाक्यानुकूलकृतिमान् भिक्षुः इति बोधः।

विभक्त्यर्थनिर्णये[१]

राजानं कनकं याचते भिक्षुः — अत्र दानं प्रतिग्रहः इच्छा च याचतेरर्थाः। दानं स्वत्वध्वंसेच्छा। प्रतिग्रहस्तु ममेदमित्याकारकज्ञानविशेषः स्वीकारः। राजपदोत्तरद्वितीयायाः राजपदार्थान्वितं समवेतत्वस्वरूपमाधेयत्वमर्थः। कनकपदोत्तरद्वितीयायाः कनकान्वितं विषयतासंबन्धावच्छिन्नमाधेयत्वमर्थः। दानं प्रयोज्यतासंबन्धेन प्रतिग्रहे, स उद्देश्यत्वाख्यविषयत्वसंबन्धेन इच्छायामन्वेति। राजान्वितद्वितीयार्थो दाने, कनकान्वितद्वितीयार्थः प्रतिग्रहेऽन्वेति। एवं च राजसमवेतदानप्रयोज्यस्य विषयतया कनकवृत्तेः प्रतिग्रहस्य उद्देश्यिनी या इच्छा तदाश्रयो भिक्षुः इति शाब्दबोधः। इच्छायां ज्ञाप्यमानत्वं विशेषणं बोध्यम्। तेन 'राज्ञः कनकं जिघृक्षति, जिघृक्षाबोधकं देहि' इति वाक्यादिव्यापारमप्रयुञ्जाने जने 'अयं राजानं कनकं याचते' इति न प्रयोगः, अपि तु 'राज्ञोऽयाचितं कनकं जिघृक्षति' इति प्रयोग इत्युपपद्यते।

शाब्दिकास्तु — दानं प्रतिश्रवः व्यापारश्च त्रयो याचतेरर्थाः। "राजानं कनकं याचते भिक्षुः" इत्यत्र राजसमवेतं दानमनुकूलतया कनकविषयके प्रतिश्रवे, स च स्वलिप्साप्रकाशके देहीतिवाक्यादौ भिक्षुव्यापारेऽन्वेति। प्रतिश्रवः देयत्वेनाभ्युपगमः। कनकान्वितं विषयत्वं द्वितीयार्थः। समवायेन दानप्रतिश्रवयोः सामानाधिकरण्येऽपि समवायविषयत्वाभ्यां वैयधिकरण्यमस्तीति प्रतिश्रवांशे धातोः सकर्मकत्वमक्षतमिति वदन्ति।

अन्ये तु प्रतिश्रवो व्यापारश्च द्वयमेव याचतेरर्थः। प्रतिश्रवश्च समवायिना विषयेण च कर्मणा साकाङ्क्ष इति भवति द्विकर्मको याचिरित्याहुः।

तत्रोभयमतेऽपि "राजानं कनकं याचते भिक्षुः राजा च भिक्षवे न प्रतिशृणोति" इत्यादौ गतिश्चिन्त्या।

भिक्षतिरपि द्विकर्मकः। न च भिक्षितेर्याचतिसमानार्थकत्वादेव द्विकर्मकत्वे सिद्धे "दुहियाचिरुधिपृच्छिभिक्षिचिञाम्" इत्यत्र पृथगुपादानमनर्थकमिति वाच्यम्। पर्यायग्रहणार्थमेव पृथगुपादानात्। तेन 'राजानं कनकं प्रार्थयते भिक्षुः' इत्यादिप्रयोगोऽपि साधुः।

---

[१] पृ. १४०

यत्तु भिक्षतेर्ज्ञानेच्छास्वरूपयाचत्यर्थार्थकत्वेऽपि याचतेरर्थान्तरेऽपि द्विकर्मकत्वज्ञापनार्थं पृथगुपादानम्। तथा हि — 'याचमानः शिवं सुरान्' इत्यादौ व्यापारजन्यत्वप्रकारिकेच्छा याचतेरर्थः। इच्छायां प्रधानकर्मकल्याणान्वितद्वितीयार्थविषयितायाः अन्वयः। व्यापारे च सुराधेयत्वस्य सुरानिति द्वितीयान्तार्थस्यान्वयः। तथा च सुरवृत्तिव्यापारजन्यत्वप्रकारककल्याणविषयिताकेच्छाश्रय इत्यन्वयबोध इति।

तच्चिन्त्यम्। भिक्षतेरप्यर्थान्तरे द्विकर्मकत्वात् तत्समानार्थकत्वस्य याचतावक्षतत्वात् पृथगुपादानसमर्थनानुपपत्तेः।

"भिक्षिता शतमखी न सुकृतं यत्" — इत्यादावर्थान्तरे भिक्षितेः द्विकर्मकत्वदर्शनात्। यत्कर्तृकं दानमप्रसिद्धं तत्र "कनकं कृपणं याचते" इत्यादिप्रयोगः "दण्डकावनतरून् सीतां याचते" इत्यादिप्रयोगः "दण्डकावनतरून् सीतां याचते रामभद्रः" इत्यादिप्रयोगेण तुल्ययोगक्षेमः। अत्र व्यापारः प्राप्तिः इच्छा च याचतेरर्थः। तेन तरुवृत्तिव्यापारप्रयोज्यायाः सीतावृत्तिप्राप्तेः उद्देश्यिनी या इच्छा तदाश्रयो रामभद्रः इत्यन्वयबोधः।

एवं "याचमानः शिवं सुरान्" इत्यादावपि सुरवृत्तिव्यापारप्रयोज्यायाः कल्याणवृत्तिप्राप्तेः उद्देश्यिनी या इच्छा तदाश्रय इत्यन्वयबोधः।

नन्वेवं सर्वत्रैव व्यापारप्राप्तीच्छानां त्रयाणां याचतिपर्यायधातूनामर्थत्वमस्तु। 'राजानं कनकं याचत' इत्यादावप्येतावतैव चरितार्थत्वात्। व्यापारस्तु क्वचित् दानं क्वचिदन्यादृशः। प्राप्तिस्तु संबन्धः। प्रकृते राजसमवेतं दानं प्रयोज्यतया कनकवृत्तिस्वस्वत्वरूपे संबन्धे, स उद्देश्यितया इच्छायामन्वेति। याचमानः शिवमित्यत्र सुरवृत्तिः कृपा व्यापारः, कल्याणवृत्ति स्वसमवेतत्वं प्राप्तिः। तयोरन्वयः पूर्ववत्।

"भिक्षिता शतमखी" इत्यत्र सकलाङ्गसाहित्यं शतमखीव्यापारः तदाश्रयः कर्मप्रत्ययक्तस्यार्थः। सुकृतवृत्तिस्वसमवेतत्वं प्राप्तिः। इच्छाया उद्देश्यतया सुकृतवृत्तिस्वसमवेतत्वे, तस्य प्रयोजकतया सकलाङ्गसाहित्यस्वरूपव्यापारे, तस्याश्रयैकदेशे आश्रयत्वे आश्रये वा विशेषणतयान्वयः। आश्रयस्याभेदेन शतमख्यामन्वयः इति "कृपणं कनकं याचते, दण्डकावनतरून् सीतां याचते" इत्यादौ कृपणवृत्तिव्यापारस्य कनकवृत्तिस्वत्वरूपप्राप्तौ दण्डकातरुवृत्तिव्यापारस्य सीतावृत्तिस्वसंनिधानस्वरूपप्राप्तौ प्रयोज्यत्वबाधेऽपि बाधितस्य प्रयोज्यत्वसंबन्धस्येच्छया अवगाहनसंभवात् नान्वयानुपपत्तिः। इच्छायाः बाधितार्थविषयकत्वस्य संबुद्धिप्रथमाविवरणे दर्शितत्वात्। संनिधानं तु संयोगः। स्वल्पतरसंयोगघटितपरंपरासंबन्धावच्छिन्नसामानाधिकरण्यं वा।

न चैवं दण्डव्यापारप्रयोज्यायाः घटप्राप्तेरिच्छा कुलालेऽस्तीति 'दण्डं घटं याचते कुलाल' इति प्रयोगः स्यादिति वाच्यम्। इच्छायां ज्ञाप्यमानत्वविशेषणेन तत्प्रयोग-वारणात्।

न च ज्ञाप्यमानत्वं ज्ञानविषयत्वं, तस्य विशेषणत्वं न संभवति, अव्यावर्तकत्वात्, भगवज्ज्ञानविषयत्वस्य सर्वत्र सत्त्वात्। याचत्यर्थव्यापाराश्रयज्ञान-विषयत्वस्य तत्त्वे 'दण्डकातरून् याचते' इति प्रयोगानुपपत्तिः। व्यापाराश्रयदण्ड-कातरुज्ञानाप्रसिद्धेरिति वाच्यम्।

व्यापाराश्रयज्ञनेच्छास्वरूपजिज्ञापयिषाविषयत्वस्य इच्छाविशेषणत्वोपगमात्। इच्छायाः बाधितार्थविषयकत्वेन तरुज्ञानाप्रसिद्धावपि तरुजिज्ञापयिषाविषयत्वस्य स्वसंबन्धेच्छायां संभवान्नानुपपत्तिः।

"घनं जलं याचन्ते सस्यानि' इत्यादौ अचेतनसस्यादिकर्तृकयाचनप्रयोगे याचतेः इच्छास्थाने पुष्टिरर्थः। तत्र घनवृत्तिव्यापारस्य प्रयोज्यतया जलवृत्तिस्वसंबन्धे, स प्रयोज्यतया पुष्टौ, स निरूपकतया तिङर्थे स्वरूपयोग्यत्वेऽन्वेति। इत्येवमन्य-त्राप्यूह्यमिति चेत् —

अस्तु व्यापारादित्रिकं याचतेः तत्पर्यायस्य भिक्षत्यादेश्चार्थः। अस्तु जिज्ञा-पयिषाविषयत्वमिच्छायां विशेषणम्। अस्तु चेच्छास्थाने पुष्यादिकं याचत्यादेरर्थः। तावतापि न नः कापि हानिः।

बालमनोरमायाम्[१]

"बलिं याचते वसुधां हरिः" इत्यत्र मह्यं देहीति प्रार्थना याचेरर्थः। बलिकर्तृकं वसुधाकर्मकं यत् दानं तद्विषयकप्रार्थनाश्रयः हरिः इति बोधः। बलिसंबन्धि यत् वसुधाकर्मकं दानं तत् प्रार्थयत इत्यर्थः इति प्राचीनाः।

बृहन्मञ्जूषायाम्[२]

याचधातोः स्वत्वनिवृत्तिजनकव्यापारानुकूलव्यापारोऽर्थः। तत्राद्यो व्यापारो बलिनिष्ठः। तदनुकूलो दीयतामित्याद्यभिलापादिरूपो याचकनिष्ठः। तथा च बलिसंबन्धी वसुधानिष्ठस्वत्वनिवृत्तिजनको यो व्यापारः तदनुकूलो याचकनिष्ठो व्यापार इति बोधः।

---

[१] पृ. ४०५
[२] पृ. १५५

शेखरे[१]

यदा परस्वत्वनिवृत्तिस्वस्वत्वोत्पत्यनुकूलो व्यापारो याचेरर्थः। परस्वत्वे बलेर्निरूपकतयान्वयः। बलिनिरूपितवसुधाश्रयकस्वत्वनिवृत्तिस्वनिरूपितस्वत्वोत्पत्त्युभयानुकूलः व्यापारः इति बोधःतदा अनेन कर्मत्वम्। न चात्रापादानत्वप्रसक्तिः, विभागस्य धात्वर्थत्वाभावात्। "न हि याचनादेव अपायो भवति, याचितो यदि ददाति तदापायेन युज्यते" इति भाष्योक्तेः। व्यापारद्वयार्थकत्वे तु "कर्तुरीप्सिततमं कर्म"[२] इति कर्मत्वं बोध्यम्। बलेः कर्मयुक्त्वं च वसुधानिष्ठस्वत्वनिरूपितस्वामित्वात्मकसंबन्धात्।

लघुमञ्जषायाम्[३]

स्वामिस्वत्वनिवृत्तिस्वत्वोत्पत्त्युभयानुकूलो दीयतामित्यभित्यभिलापादिरूपो व्यापारः दिदापयिषाव्यञ्जको याचेरर्थः। अत्र बलौ पूर्वविषयस्य कस्यापि न प्राप्तिरिति कर्मत्वम्। याचनामात्रादपायाभावेन 'बलेः वसुधां याचत' इति नेष्टमिति स्पष्टम् भाष्ये इत्यन्यत्र विस्तरः।

यत्तु स्वोद्देश्यकदानेच्छा याचनमिति। तन्न। 'पुत्रार्थं कन्यां याचते' इत्यनापत्तेः। स्वसंप्रदानकदानेच्छावति फलालाभशङ्कया देहीति अवदत्यपि तथा प्रयोगापत्तेश्च।

"अविनीतं विनयं याचते" इत्यत्र याचेः स्वीकारानुकूलव्यापारोऽर्थः। स्वीकारश्च इदमहं करिष्यामि इति शब्दप्रयोगजनको ज्ञानविशेषः। तदेकदेशज्ञाने विनयविषयकत्वस्य अविनीताश्रयकत्वस्य चान्वयः। अविनीताश्रयकः विनयविषयकः यः उक्तज्ञानविशेषः तदनुकूलो व्यापार इति बोधः। विनयेन च तद्विषयकज्ञानवत्त्वं संबन्धः।

अत्रापादानादिविषयाभावात् अनेन कर्मत्वम्। याचनमात्रेण विनयसंबन्धाभावान्नात्र संप्रदानत्वमिति स्पष्टं भाष्ये[४]।

---

[१] पृ. ६३५
[२] सू. १.४.४९
[३] पृ. १२२८
[४] ल.म.पृ. १२२८-२९

पच्-धातुयोगे द्वितीयार्थः

व्युत्पत्तिवादे[1]

"तण्डुलान् ओदनं पचति" इत्यत्र प्रकृतिकर्मतण्डुलपदोत्तरद्वितीयायाः नाशकत्वमर्थः। तस्य धात्वर्थेपाकेऽन्वयः। ओदनपदोत्तरद्वितीयायाः उत्पादकत्वमर्थः। तस्य नाशकत्वविशिष्टे पाकेऽन्वयः।

उद्देश्यतावच्छेदकविधेयभावमहिम्ना च नाशोत्पत्योः प्रयोज्यप्रयोजकभावो भासते। तण्डुलनाशकः तण्डुलनाशप्रयोज्यौदनोत्पत्तिजनकश्च यः पाकः तदनुकूलकृतिमांश्चैत्र इत्यन्वयबोधः।

यद्वा संयोगनाशद्वारा नाशकत्वमेव द्वितीयया बोध्यते। तथा च तण्डुलपदोत्तरद्वितीयायाः नाशप्रयोजकसंयोगनाशः अर्थः। प्रथमनाशे प्रकृतिकर्मणः तण्डुलस्य प्रतियोगित्वसंबन्धेन अन्वयः। संयोगनाशस्य जनकतासंबन्धेन पाकेऽन्वयः। तण्डुलप्रतियोगिकनाशप्रयोजकसंयोगनाशजनकः ओदनोत्पादकश्च यः पाकः तदनुकूलकृतिमांश्चैत्र इति शाब्दबोधः। प्रयोज्यप्रयोजकभावस्तु न भासते, वैयर्थ्यात्।

पदवाक्यरत्नाकरे

पचधातोः विक्लित्तिः उत्पत्तिश्चार्थः। विक्लित्तौ तण्डुलस्याधेयतया, उत्पत्तौ ओदनस्य आधेयतयान्वयः। तण्डुलनिष्ठविक्लेदजनिका ओदननिष्ठोत्पत्तिजनिका च या क्रिया तदनुकूलकृत्याश्रयः चैत्र इति बोधः। विक्लत्तिः — अवयवशैथिल्यम्। विभक्त्यर्थनिर्णयेऽप्येवम्।

बालमनोरमायाम्[2]

विक्लित्त्यनुकूलव्यापारः पचेरर्थः। तप्तोदकप्रस्वेदनजनितप्रशिथिलावयकत्वात्मकं मृदुविशदत्वं विक्लित्तिः। तया ओदनाख्यद्रव्यान्तरं प्रकृतिभूतेषु तण्डुलेषु समवेतं निष्पद्यत इति स्थितिः। तत्र शिथिलावयवसंयोगविशेषात्मिका विक्लित्तिः समवायसंबन्धेन तण्डुलेषु वर्तते। ओदने तु जन्यजनकभावेन वर्तते। तण्डुलैः प्रकृतिभूतैः ओदनं करोतीत्यर्थः। तण्डुलसमवायिकारणिकां तत्समवेतौदनजनिकां विक्लित्तिं निर्वर्तयतीत्यर्थः। तत्र व्यापारफलं विक्लित्तिं प्रति जन्यतया आश्रयत्वात् ओदनः प्रधानं कर्म। तादृशौदनजनिकां विक्लित्तिं प्रति समवायित्वेनाधारत्वात् तण्डुलानां गुणकर्मत्वम्। तण्डुलसम्बन्धिनीमोदनजनिकां विक्लित्तिं निर्वर्तयतीति तु प्राचीनाः।

---

[1] पृ. १८२
[2] पृ. ४५

शेखरे

तण्डुलानिति। तण्डुलान्विक्लेदयन् ओदनं निर्वर्तयतीत्यर्थस्य कर्तुरिति सूत्रस्थभाष्यकैयटसंमतत्वेन कर्तुरित्येव कर्मत्वसिद्धेःअस्यैतदुदाहरणत्वं चिन्त्यम्। तण्डुलाश्रयकविक्लित्त्यनुकूलः ओदनोत्पत्त्यनुकूलश्च व्यापार इति बोधः। एवं व्यापारद्वयार्थत्वेन सति प्रयोगे बहूनां धातूनां द्विकर्मकत्वं बोध्यम्।

लघुमञ्जूषायाम्[१]

"तण्डुलानोदनं पचति" इत्यत्र विक्लेदनं निर्वर्तनं च पचेरर्थः। तण्डुलान् विक्लेदयन् ओदनं निर्वर्तयतीत्यर्थ इति अनेनैव द्वयोः कर्मत्वम्। "तण्डुलानामोदनं पचति" इत्यादौ विकारयोगे षष्ठी। निर्वर्तने च पाकस्य करणत्वम्। तण्डुलविकारमोदनं पाकेन निर्वर्तयति इत्यर्थः। शेषषष्ठ्यन्तार्थस्य स्वान्वययोग्य-नामार्थसमभिव्याहारे तेनैवान्वय इति व्युत्पत्तेः न तदर्थस्य क्रियायामन्वय इति "कर्तुरीप्सिततमं कर्म"[२] इति सूत्र भाष्ये स्पष्टम्।

बृहन्मञ्जूषायाम्[३]

"तण्डुलानोदनं पचति" इत्यत्र उत्पत्तिजनकविक्लित्त्यनुकूलव्यापारः पचेरर्थः। तत्रौदनतण्डुलयोः उत्पत्तौ विक्लित्तौ चाश्रयतयान्वयः। उभयव्यापारोद्देश्यत्वात् ओदनः प्रधानम्। ओदननिष्ठोत्पत्तिजनिका या तण्डुलादिसंबन्धिनी विक्लित्तिः तज्जनको व्यापार इति बोधः। यदा तु विक्लित्तिजन्योत्पत्त्यनुकूलो व्यापारोऽर्थः तदा "तण्डुलानामोदनं पचति" इति। तण्डुविकारमोदनं विक्लित्त्या उत्पादयतीत्यर्थः। विक्लित्त्यनुकूलव्यापारमात्रवाचित्वे तण्डुलानामेव कर्मत्वम्।

दण्ड्-धातुयोगे द्वितीयार्थः

बालमनोरमायाम्

दण्डधातुः ग्रहणानुकूलव्यापारार्थकः। ताडनादिना गर्गेभ्यः सुवर्णशतं गृह्णा-तीत्यर्थः। ताडनादिव्यापारप्रयोज्यग्रहणविषयत्वात् शतं प्रधानकर्म। गर्गाणां तु तद्ग्रहणावधित्वात् गुणकर्मत्वम्। ग्रहणं हि परकीयद्रव्यस्य परस्वत्वनिवृत्ति-पूर्वकं स्वीकरणम्। तत्र स्वत्वविश्लेषे गर्गाणामवधित्वात् अपादानत्वम्। ग्रहण-

---

१ पृ. १२१७
२ सू. १.४.४९
३ पृ. १५६

घटकतादृशविश्लेषंप्रति अपादनत्वमनादृत्य कर्मत्वविवक्षायां द्वितीया। गर्ग-संबन्धिकमिति तु प्राञ्चः।

बृहन्मञ्जूषायाम्[१]

"गर्गान् शतं दण्डयति" इत्यत्र स्वसंप्रदानकदानानुकूलव्यापारानुकूलव्यापारः शासनरूपो दण्डेरर्थः। शासनं नियन्त्रणम्। शतं प्रधानम्, उद्देश्यत्वात्। दानानु-कूलव्यापारमात्रार्थकत्वे विभागाश्रयत्वविवक्षायां गर्गाणामपादानत्वम्, तदविवक्षायां संप्रदानत्वम्।

शब्दशक्तिप्रकाशिकायाम्[२]

"प्रजाः शतं दण्डयति" इत्यत्र ग्रहणावच्छिन्नशासनं दण्ड्यर्थः। तथा च शतग्रहणानुकूलं यत् प्रजानां शासनं तत्कर्तेत्येवं तत्र बोधः। शासनं — नियन्त्रणम्।

पदवाक्यरत्नाकरे[३]

स्वामित्वध्वंसः त्यागः व्यापारश्च दण्डेरर्थः। "गर्गं शतं दण्डयति" इत्यत्र गर्गविशेषितः स्वामित्वध्वंसः शतविषयके त्यागे स च प्राड्विवाकव्यापारेऽन्वेति। त्यागः स्वत्वनाशविषयकेच्छा। व्यापारः तदनुगुणेच्छा। गर्गनिष्ठस्वामित्वध्वंस-जनकशतविषयकत्यागानुकूलव्यापारवान् प्राड्विवाकः (न्यायाधिकृतः) इति बोधः।

विभक्त्यर्थनिर्णये[४]

गर्गं शतं दण्डयति — स्वत्वनिष्ठानिष्टसाधनताज्ञानप्रयोज्यद्वेषः त्यागः ग्रहण-व्यापारश्च दण्डयतेरर्थः। "गर्गं शतं दण्डयति" इत्यत्र गर्गवृत्तिस्तादृशद्वेषः विषय-तया शतवृत्तौ त्यागे स च ग्रहणव्यापारे प्रयोज्यतयान्वेति। शतानर्पणदण्डताड-नादिसंभावनया शतस्वत्वे द्वेषः। ततः शतस्वत्वनाशेच्छास्वरूपस्त्याग इत्युपपत्तिः।

---

[१] पृ. १५६
[२] पृ. ३३१
[३] पृ. ५८६
[४] पृ. १४९

रुधिर्-धातुयोगे द्वितीयार्थः

बालमनोरमायाम्[१]

"व्रजमवरुणद्धि गाम्" इत्यत्र निर्गमप्रतिबन्धपूर्वकयत्किंचिदधिकरणकचिरस्थित्यनुकूलबन्धनद्वारपिधानादिव्यापारो रुधेरर्थः। गां निर्गमप्रतिबन्धपूर्वकं व्रजे चिरस्थितिकां करोतीत्यर्थः। अत्र चिरस्थितिं प्रति व्रजस्याधिकरणत्वमुपेक्ष्य गोद्वारा तत्स्थित्याश्रयतया कर्मत्वविवक्षायां द्वितीया। लघुमञ्जूषायामप्येवम्।

बृहन्मञ्जूषायाम्[२]

"व्रजमवरुणद्धि गाम्" इत्यत्र उत्तरकालिकदेशान्तरगतिप्रतिबन्धानुकूलानुयोगितासंबन्धावच्छिन्नोत्तरदेशसंयोगानुकूलो व्यापारो रुधेरर्थः। अनुयोगितासंबन्धावच्छिन्नः सः व्रजनिष्ठः। गौः प्रधानम् उद्देश्यत्वात्। प्रतियोगितासंबन्धावच्छिन्नोत्तरदेशसंयोगार्थत्वे कर्मद्वारा क्रियाश्रयत्वविवक्षायामधिकरणत्वम्।

व्रजसंबन्धिनं गोकर्मकं चिरस्थित्यनुकूलव्यापारं करोतीत्यर्थः इति प्राचीनाः। व्यापारद्वयार्थत्वे कर्तुरिति कर्मत्वम् इति शेखरे।

शब्दशक्तिप्रकाशिकायाम्[३]

"गामवरुणद्धि व्रजम्" इत्यत्र गतिप्रतिरोधहेत्वावरणमवरुधेरर्थः। तेन गोगतिप्रतिरोधस्यानुकूलं यत् व्रजस्य आवरणं तत्कृतिमानित्यन्वयः।

पदवाक्यरत्नाकरे[४]

"व्रजं गां रुणद्धि" इत्यत्र विभागानुत्पादः कर्मानुत्पादः व्यापारश्च रुधेरर्थः। "व्रजं गां रुणद्धि" इत्यत्र व्रजविशेषितो विभागानुत्पादो गोः कर्मानुत्पादे, स च पुरुषव्यापारे योगक्षेमसाधारणतया जनकतयान्वेति। व्रजवृत्तिविभागानुत्पादप्रयोजको यो गोवृत्तिकर्मानुत्पादः तत्प्रयोजकव्यापारानुकूलकृतिमानिति बोधः। व्रजपदादिसमभिव्याहृता द्वितीया भेदमाधेयत्वं चाभिधत्ते। तेन 'गां गां रुणद्धि' इति न प्रयोगः। अत एव द्वितीयायाः केवलाधेयत्वे शक्त्या न निर्वाहः। कर्मसंज्ञायाः तां प्रति अबाधकत्वेन निरुक्तप्रयोगापत्तेः।

---

[१] पृ. ४०५
[२] पृ. १५६
[३] पृ. ३३२
[४] पृ. ५८३

व्युत्पत्तिवादे[१]

"गां व्रजं रुणद्धि" इत्यादौ देशान्तरसञ्चारविरोधिव्यापारो धात्वर्थः। संचारविरोधित्वं संचारानुत्पादप्रयोजकत्वम्। अनुत्पादे प्रधानकर्मगोवृत्तित्वान्वयः। देशविशेषणभेदे व्रजमिति द्वितीयान्तार्थव्रजप्रतियोगित्वान्वयः। तथा च गोवृत्तिर्यो व्रजान्यदेशसंचारानुत्पादः तत्प्रयोजकव्यापारानुकूलकृतिमानिति बोधः।

"रुध्यते गां व्रज" इत्यत्र चैत्रवृत्तिव्यापारप्रयोज्यप्रागभावप्रतियोगिव्यापारजन्यसंयोगाश्रयदेशवृत्तिभेदप्रतियोगी व्रज इति बोधः।

विभक्त्यर्थनिर्णये[२]

व्रजं गां रुणद्धि गोपालः — देशान्तरसंचारविरोधिव्यापारो रुधेरर्थः। देशान्तरमन्यदेशः। संचारविरोधित्वं संचारानुत्पादप्रयोजकत्वम्। व्यापारे साक्षाद्विशेषणीभूतानुत्पादस्वरूपफलवत्तया गोः प्रधानकर्मत्वम्। गोपदोत्तरद्वितीयायाः अन्यपदार्थैकदेशभेदान्वितं प्रतियोगित्वमर्थः। एवं च व्रजनिष्ठप्रतियोगितानिरूपकभेदवद्देशसंचारानुत्पादप्रयोजकव्यापारानुकूलकृतिमान् गोपाल इत्याकारकः शाब्दबोधः "व्रजं गां रुणद्धि गोपाल" इत्यत्र भवतीति कश्चित्।

गुरुचरणास्तु — विभागानुत्पादः कर्मानुत्पादः व्यापारश्च रुधेरर्थाः। "व्रजं गां रुणद्धि गोपालः" इत्यादौ द्वितीययोराधेयत्वमर्थः। विभागानुत्पादः कर्मानुत्पादे, स व्यापारे योगक्षेमसाधारण्या जनकतयान्वेति। एवं च व्रजवृत्तिविभागानुत्पादस्य प्रयोजको यो गोवृत्तिकर्मानुत्पादः तत्प्रयोजकव्यापारानुकूलकृतिमान् गोपालः इत्याकारकः शाब्दबोधः। व्रजपदोत्तरद्वितीयायाः भेदोऽप्यर्थः। तेन 'गां गां रुणद्धि' इति न प्रयोगः इति पदवाक्यरत्नाकरे प्राहुः।

युज्यते चैतत् — विभागानुत्पादस्वरूपगुणफलवत्तया व्रजस्य गौणकर्मत्वोपपत्तेरिति।

प्रच्छि-धातुयोगे द्वितीयार्थः

बालमनोरमायाम्[३]

"माणवकं पन्थानं पृच्छति" जिज्ञासितव्यार्थज्ञानानुकूलः केन पथा गन्तव्यमित्यभिलापादिरूपव्यापारः प्रच्छेरर्थः। तत्र विषयतया ज्ञानरूपफलाश्रयत्वात्

---

[१] पृ. १४६
[२] पृ. १४१
[३] पृ. ४०५

पन्थाः प्रधानकर्म। तज्ज्ञानं प्रति जनकतया आश्रयत्वात् माणवको गुणकर्म। माणवकेन पन्थानं ज्ञातुमिच्छतीत्यर्थः। अत्र माणवके करणत्वमुपेक्ष्य कर्मत्व-विवक्षायां द्वितीया। पथिविषयकं माणवकसंबन्धि ज्ञानमिच्छतीत्यर्थ इति प्राञ्चः।

बृहन्मञ्जूषायाम्[१]

"माणवकं पन्थानं पृच्छति" इत्यत्र प्रश्नविषयार्थज्ञापनानुकूलव्यापारः पृच्छेरर्थः। स च व्यापारः केन पथा गन्तव्यम् इत्याद्यभिलापादिरूपः। ज्ञापनाश्रयत्वात् माणवकस्य, ज्ञानविषयत्वाच्च पथः तत्वं (कर्मत्वम्) ज्ञानानुकूलव्यापारमात्रार्थकत्वे माणवकस्य सम्प्रदानत्वम्।

शेखरे[२]

पन्थानमिति। जिज्ञासविषयार्थज्ञानानुकूलः केन पथा गन्तव्यम् इत्यभिला-पादिरूपो व्यापारः पृच्छेरर्थः। [अभिलापः शब्दप्रयोगः] ज्ञानविषयत्वेन पथः कर्मत्वम्। माणवकेन तज्ज्ञानाश्रयत्वं संबन्धः। अपादानत्वं तु नात्र। "न प्रश्नादेवापायो भवति। पृष्टोसौ यदा आचष्टे तदा अपादानेन युज्यते" इति भाष्योक्तेः। संप्रदानत्वमपि न। कर्मसंबन्धवत्त्वेनेच्छाविषयत्वाभावात्। व्यापार-द्वयार्थकत्वे तु "कर्तुः" इति कर्मत्वम्। माणवकस्य व्यापारे संबन्धसामान्ये-नान्वयः इति लघुमञ्जूषा।

शब्दशक्तिप्रकाशिकायाम्[३]

"पान्थं पन्थानं पृच्छति" इत्यत्र अभिधानावच्छिन्नव्यापारः पृच्छा। तथा च पान्थनिष्ठं यत् पथोऽभिधानं तदनुकूलव्यापारवानिति बोधः। अभिधानमिहाभि-लापः तदनुकूलव्यापारश्च केन पथा गन्तव्यमित्यादिप्रश्नः।

व्युत्पत्तिवादे[४]

"गुरुं धर्मं पृच्छति" इत्यत्र जिज्ञासाज्ञानोद्देश्यकप्रवृत्त्यधीनशब्दः पृच्छतेरर्थः। ज्ञाने गुरुवृत्तित्वस्यान्वयः। शब्दे च धर्मविषयकत्वस्यान्वयः। गुरुवृत्ति यत् जिज्ञासाविषयकं ज्ञानं तदुद्देश्यकप्रवृत्त्यधीनो यो धर्मविषयकः शब्दः तदनुकूल-कृतिमान् इति बोधः।

---

[१] पृ. १५६

[२] पृ. ६३६

[३] पृ. ३३१

[४] पृ. १४६

पदवाक्यरत्नाकरे[1]

उत्तरमनुशास्यत्वमनुयोगश्च पृच्छेरर्थः। सामान्यवति = सामान्यधर्मप्रकारेण ज्ञायमाने विशेषधर्मप्रकारकज्ञानजनकं वचनमुत्तरम्। जिज्ञसिततत्वेन प्रतिपत्तिः — जिज्ञासाविषयत्वप्रकारकं ज्ञानमनुशास्यता। किमादिशब्दघटितवाक्यादिः अनुयोगः। "जानपदं पन्थानं पृच्छति पथिक" इत्यत्र परंपरया (स्वोच्चारणप्रयोजककृतिमत्त्वेन) जानपदाश्रितमुत्तरं पथिविषयकजिज्ञासिततत्वप्रतिपत्तौ सा च कः पन्था इत्यादिवाक्ये जनकतयान्वेति।

विभक्त्यर्थनिर्णये[2]

जानपदं पन्थानं पृच्छति पान्थः — व्यापारप्रयोज्यविशेषज्ञानेच्छा पृच्छतेरर्थः। तत्र व्यापारो विशेषज्ञानमिच्छा चेति त्रिषु खण्डशक्तिः। "जानपदं पन्थानं पृच्छति पान्थः" इत्यादौ पथिपदोत्तरायाः द्वितीयायाः विषयतासंबन्धावच्छिन्नमाधेयत्वं, जानपदोत्तरद्वितीयायाः व्यापारीयतत्संसर्गावच्छिन्नमाधेयत्वमर्थः। जानपदविशेषितमाधेयत्वं व्यापारे, पथिविशेषितमाधेयत्वं विशेषज्ञानेऽन्वेति। व्यापारस्य प्रयोज्यतया विशेषज्ञाने तस्योद्देश्यितया इच्छायामन्वयः। एवं च जानपदवृत्तिव्यापारप्रयोज्यस्य विषयतया पथिवृत्तेः विशेषज्ञनस्य उद्देश्यिनी या इच्छा तदाश्रयः पान्थ इत्याकारकः शाब्दबोधः। इच्छायां ज्ञाप्यमानत्वं विशेषणम्। तेन प्रतिवादिनो विशेषेण शास्त्रार्थं ज्ञातुमिच्छति जिज्ञासाबोधककिंशब्दघटितवाक्यादिव्यापारमप्रयुञ्जाने जने अयं प्रतिवादिनं शास्त्रार्थं पृच्छति इति न प्रयोगः। प्रयोगस्तु प्रतिवादिनोऽपृष्टं शास्त्रार्थं ज्ञातुमिच्छत्ययमित्युपपद्यते।

यत्तु जिज्ञासाबोधकशब्दः पृच्छतेरर्थः। जिज्ञासा विषयितया बोधे, बोधोऽनुकूलतया शब्देऽन्वेति। "गुरुं धर्मं पृच्छति शिष्य" इत्यादौ गुरुसमवेतत्वं द्वितीयान्तार्थो बोधे, धर्मविषयत्वं द्वितीयान्तार्थो जिज्ञासायामन्वेति इति।

तच्चिन्त्यम्। बोधस्य जिज्ञासाविशेष्यतया अन्वयोपगमे प्रधानफलत्वापत्त्या तद्वतो गुरोः प्रधानकर्मत्वापत्तेः। तथा च सति गुरुर्धर्मं पृच्छ्यत इत्यादिप्रयोगानुपपत्तेर्वक्ष्यमाणत्वात्।

न च शब्दत्वेन शब्दः पृच्छत्यर्थे निविशते। तथा सति अभिनयादिना जिज्ञासां ज्ञापयति जने अयं पृच्छतीति प्रयोगानुपपत्तेः।

---

[1] पृ. ५८२
[2] पृ. १४२

शाब्दिकास्तु — उत्तरम् अनुशास्यत्वमनुयोगश्च पृच्छतेरर्थः। विशेषबोधकवचनमुत्तरम्। जिज्ञासितत्वेन प्रतिपत्तिरनुशास्यता। किंशब्दघटितवाक्यादिरनुयोगः। "जानपदं पन्थानं पृच्छति पथिक" इत्यत्र परम्परया जानपदाश्रितायाम् उत्तरपथिविषयिण्यां जिज्ञासितत्वप्रतिपत्तौ, सा च कः पन्था इत्यादिवाक्यस्वरूपे पथिकानुयोगे जनकतयान्वेतीत्याहुः।

अन्ये तु — उत्तरमनुयोगश्च पृच्छतेरर्थः। उत्तरं कृतिद्वाराधिकरणेन ज्ञानद्वारा विषयेण च उभयविधेन कर्मणान्वितमिति वदन्ति।

तत्रोभयमते "जानपदं पन्थानं पृच्छति पथिकः, जानपदः पथिकाय न किंचिदुत्तरयति" इत्यादौ गतिः चिन्त्या।

"रक्ताशोककृशोदरी क्व नु गता त्यक्त्वानुरक्तं जनम्" इत्याद्यनुयोगदर्शनात् रक्ताशोकं कृशोदरीगतदेशं पृच्छति कामुकः इत्यादौ रक्ताशोकव्यापारस्य प्रयोज्यत्वस्वरूपव्यधिकरणसंसर्गस्य कृशोदरीगतदेशीयविशेषज्ञाने इच्छया अवगाहनसंभवात् पृच्छतेः दर्शितव्यापारादित्रितयार्थकत्वे नान्वयानुपपत्तिः इति।

चि-धातुयोगे द्वितीयार्थः

बालमनोरमायाम्[१]

"वृक्षमपचिनोति फलानि" इत्यत्र वृक्षात् प्रच्याव्य फलान्यादत्त इत्यर्थः। प्रच्याव्य आदानानुकूलव्यापारो लोष्टप्रहारादिरूपः अपपूर्वकचिञ्धातोरर्थः। तत्र प्रच्याव्यादानविषयत्वात् फलानि प्रधानकर्म। प्रच्यवावधित्वात् वृक्षः अपादानम्। तस्यापादानत्वमुपेक्ष्य कर्मत्वविवक्षायां द्वितीया। वृक्षस्य फलप्रच्यवाश्रयत्वेन कर्मत्वात् प्रच्यवस्य विभागस्य द्विनिष्ठत्वात् वृक्षसंबन्धि यत् प्रच्युतफलादानं तत् करोतीत्यर्थः इति प्राचीनाः।

लघुमञ्जूषायाम्[२]

वृक्षमवचिनोति फलानि। विभागपूर्वकमादानं चिधात्वर्थः। वृक्षात् फलानि आदत्ते इत्यर्थात्। अवधित्वाविवक्षायामनेन कर्मत्वम्।

---

[१] पृ. ४०६

[२] पृ. १२३०

बृहन्मञ्जूषायाम्[१]

वृक्षमवचिनोति फलानि। विभागानुकूलव्यापारानुकूलो ग्रहणोपसर्जन व्यापारः चिञोऽर्थः। विभागानुकूलव्यापारार्थकत्वे वृक्षस्यापादानत्वम्।

शब्दशक्तिप्रकाशिकायाम्[२]

"वृक्षं फलानि अवचिनोति" इत्यत्र छिदाहेतुविघट्टनं चिनोतेरर्थः। तथा च फलकर्मकच्छिदानुकूलं यत् वृक्षस्य विघट्टनं चालनं तद्वानित्येवं तत्र बोधः। व्युत्पत्तिवादे — चि धातुर्न गृहीतः।

पदवाक्यरत्नाकरे[३]

संयोगध्वंसः आकर्षणकर्म व्यापारश्च चिनोतेरर्थः। "तरुं पुष्पं चिनोति" इत्यत्र तरुसंयोगध्वंसः तदाकर्षणरूपे पुष्पकर्मणि तच्च पुरुषव्यापारे जनकतया विशेषणम्। तरुवृत्तिसंयोगध्वंसजनकं यत् पुष्पाकर्षणं तदनुकूलव्यापारवानिति बोधः।

विभक्त्यर्थनिर्णये[४]

तरुं पुष्पं चिनोति मालाकारः — प्रतियोग्युत्पत्तिद्वितीयक्षणोत्पन्नसंयोगस्य प्रतिद्वन्द्वी विभागः कर्म व्यापारश्च चिनोतेरर्थाः। अवयवसंयोगजसंयोगस्य प्रतियोग्युत्पत्तिद्वितीयक्षणेऽप्युत्पत्तिसंभवात् नानुपपत्तिः। "तरुं पुष्पं चिनोति मालाकार" इत्यत्र तरुवृत्तितादृशविभागः पुष्पवृत्तिकर्मणि, तत् मालाकारव्यापारे प्रयोजकतयाऽन्वेति। तरुवृत्तिर्यः प्रतियोग्युत्पत्तिद्वितीयक्षणोत्पन्नसंयोगस्य प्रतिद्वन्द्वी विभागः तज्जनकं यत् पुष्पवृत्तिकर्म तत्प्रयोजको यो व्यापारः तदनुकूलकृतिमान् मालाकारः इत्याकारकः शाब्दबोधः भवति।

यत्तु — भिदाहेतुविघटनं चिनोतेरर्थः। भिदा संयोगध्वंसः विघटनं कर्मानुकूलो व्यापारः। "तरुं पुष्पं चिनोति" इत्यत्र तरुवृत्तिसंयोगध्वंसः पुष्पवृत्तिकर्मणि, तत् व्यापारे प्रयोजकतयान्वेति। तरुवृत्तिसंयोगध्वंसप्रयोजककर्मानुकूलकृतिमानिति शाब्दबोध इति।

तच्चिन्त्यम्। तथा सति घटाज्जलमाददाने जने "अयं घटं जलं चिनोति" इति प्रयोगप्रसङ्गात्। घटवृत्तिसंयोगध्वंसानुकूलजलवृत्तिकर्मानुकूलव्यापारस्य तत्र जले सत्त्वात्।

---

[१] पृ. १५६

[२] पृ. ३३२

[३] पृ. ५८४

[४] पृ. १४६

न चोर्ध्वाकर्षणरूपं [ऊर्ध्वाकर्षणरूपं] कर्म विवक्षितमिति वाच्यम्। तथा सति "कूपं जलं चिनोति" इति प्रयोगापत्तेः, पुष्पस्याधराकर्षणे "तरुं पुष्पं चिनोति" इति प्रयोगानुपपत्तेश्च। प्रकृते तु जलीयकूपसंयोगस्य जलोत्पत्तिद्वितीयक्षणोत्पादे प्रमाणाभावान्न तथा प्रयोगः। वृत्ततरुसंयोगानन्तरमुत्पद्यमानस्य पुष्पस्य स्वावयववृत्तितरुसंयोगाधीनतरुसंयोगे पुष्पोत्पत्तिद्वितीयक्षणोत्पादनियमात् "तरुं पुष्पं चिनोति" इति प्रयोग उपपद्यते।

यदि च "खलं क्षेत्रं वा धान्यं चिनोति, वनं कच्छं वा शुष्कगोमयानि चिनोति" इति प्रयोगोऽपि मन्यते, तदा विभागः कर्म ग्रहणव्यापारश्च चिनोतेरर्थः। विभागः प्रयोजकतया कर्मणि, तत् ग्रहणव्यापारे अन्वेति। कर्मणि द्रवत्वासामानाधिकरण्यं विशेषणम्। तेन 'जलं चिनोति' इति न प्रयोगः।

न च दर्शितप्रयोगवारणार्थं कर्मणि पृथिवीवृत्तित्वं विशेषणमस्तु, तावतैव समीहितसिद्धेरिति वाच्यम्। तथा सति "भाण्डं तैलं चिनोति" इति प्रयोगापत्तेः।

अयमपि खरयोषित् कर्णकाषायमीषत्-
विसृमरतिमिरोर्णोजर्जरं शोणमर्चिः।
मदकलकलपिङ् कीकाकुनान्दीकरेभ्यः
क्षितिरुहशिखरेभ्यो भानुमानुच्चिनोति।

इत्यत्र भानुमान् क्षितिरुहशिखरेभ्यः अर्चिः चिनोतीति प्रयोगानुपपत्तेश्च। अर्चिषस्तेजस्त्वात् तत्कर्मणः पृथिव्यवृत्तित्वात्। विभागस्वरूपगुणफलस्य अवधित्वविवक्षायामत्रापि 'गोभ्यः पयो दोग्धि' इत्यत्रेव पञ्चमीप्रयोगोऽप्युपपद्यते। अत एव संयोगनाशो न चिनोतेर्गुणफलम्, तथा सति दर्शितपञ्चमीप्रयोगानुपपत्तेरिति।

यदि च 'इष्टकां चिनोति' इति प्रयोगः, तदा सजातीयसंयोगो व्यापारश्च चिनोतेरर्थः। इष्टकावृत्तिसजातीयप्रतियोगिकसंयोगो व्यापारे प्रयोजकतयान्वेति।

यदि च 'इष्टकां भित्तिं चिनोति' इति प्रयोगः तदा सजातीयप्रतियोगिकसंयोग उत्पत्तिः व्यापारश्च चिनोतेरर्थः। इष्टकावृत्तितादृशसंयोगस्य प्रयोज्यतया भित्तिवृत्त्युत्पत्तौ, सा प्रयोजकतया व्यापारेऽन्वेतीति चिनोतेरर्थान्तरेऽपि द्विकर्मकत्वम् इति।

ब्रूञ्, शास्-धातुयोगे द्वितीयार्थः

बालमनोरमायाम्[१]

"माणवकं धर्मं ब्रूते शास्ति वा" इत्यत्र बोधानानुकूलव्यापारः "चोदना-लक्षणोऽर्थो धर्मः" इत्यादिशब्दप्रयोगात्मकः ब्रूञोऽर्थः। माणवकाय धर्मं बोधयतीत्यर्थः। व्यापारप्रयोज्यबोधविषयत्वात् धर्मः प्रधानकर्म। बोधविषयेण कर्मणा अभिप्रेयमाणत्वात् माणवकः संप्रदानम्। तस्य संप्रदानत्वमुपेक्ष्य बोध्यधर्मद्वारा-बोधाश्रयत्वात् कर्मत्वविवक्षायां द्वितीया। धर्मविषयकं माणवकसंबन्धिनं बोधं जनयतीत्यर्थः इति तु प्राञ्चः। शासेस्तु धर्मं कुरु इत्यादिविधिघटितशब्दप्रयोगरूपो बोधनानुकूलःव्यापारोऽर्थः। इतरत् प्राग्वत्।

शेखरे[२]

"धर्मं ब्रूते" इत्यादि। ज्ञानानुकूलः शब्दप्रयोगरूपो व्यापारो ब्रूञर्थः। माणवक-संबन्धिधर्मविषयकज्ञानानुकूलो व्यापार इति बोधः। प्रवृत्तिपर्यवसायी पूर्वोक्तो व्यापारः शासेरर्थः। स च धर्मं कुरु इत्यादिविधिघटितोपदेशरूपः। विषयता च फलतावच्छेदकसंबन्धः। वचनादिकर्मणा धर्मेण माणवकस्य अभिप्रेयमाणत्वात् तस्य संप्रदानत्वम्। तदविवक्षायां च अकथितं चेति कर्मत्वम्। अत्र कर्तृव्यापा-रानन्तरं तज्ज्ञानाश्रयत्वरूपो माणवकस्य धर्मेण संबन्धः।

लघुमञ्जूषायाम्[३]

माणवकं धर्मं ब्रूते शास्ति वा। ब्रूञो विषयतया ज्ञानानुकूलशब्दप्रयोग-रूपोऽर्थः। प्रवृत्तिपर्यवसायी स शासेः। स च धर्मं कुरु इत्यादि विधिघटितोप-देशरूपः। अत्रोभयत्रापि कर्तृव्यापारानन्तरं तज्ज्ञानाश्रयत्वरूपो माणवकेन संबन्धः, वचनादिकर्मणा धर्मेण माणवकस्याभिप्रेयमाणत्वात् प्राप्तसंप्रदानत्वा-विवक्षायामनेन कर्मत्वमिति स्पष्टं भाष्ये।

बृहन्मञ्जूषायाम्

प्रतिपत्तिजनकव्यापारानुकूलव्यापारो ब्रूञः प्रवृत्तिपर्यवसायिप्रतिपत्तिजनकः स शासेः। यदा तु विषयतया ज्ञानानुकूलो व्यापारोऽर्थः तदा संप्रदानत्वं माणवकस्य।

---

[१] पृ. ४०६
[२] पृ. ६३६
[३] पृ. १२३०

शब्दशक्तिप्रकाशिकायाम्[१]

"शिष्यं धर्मं वदति वक्ति ब्रूते उपदिशति आचष्टे" इत्यादौ प्रतिपत्त्यवच्छिन्न-व्यापारो वदप्रभृतिधात्वर्थः, तन्निविष्टायां प्रतिपत्तौ शिष्यस्य आधेयत्वेन धर्मस्य च विषयत्वेनान्वयात् धर्मविषयिणी या शिष्यनिष्ठा प्रतिपत्तिः तदनुकूलव्यापारवान् इत्याकारको बोधः। तादृशव्यापारः "धर्मं सेव्यताम्" इत्यादिकः गुर्वाद्यभिलापः।

"पुत्रं धर्ममनुशास्ति" इत्यादौ अनुशासनं देशनया प्रवर्तना। तथा च पुत्रनिष्ठस्य देशनया प्रवर्तनस्यानुकूलव्यापारवानित्यर्थः। तथाविधो व्यापारः "सन्ध्यां विधेहि, समिधमाधेहि" इत्याद्युपदेशरूपः।

व्युत्पत्तिवादे[२]

"शिष्यं धर्मं ब्रूते" इत्यत्र ज्ञानोद्देश्यकप्रवृत्त्यधीनशब्दः ब्रूधात्वर्थः। ज्ञाने शिष्य-वृत्तित्वस्य शब्दे च धर्मविषयकत्वस्यान्वयः। शिष्यवृत्तिज्ञानोद्देश्यकप्रवृत्त्यधीन-धर्मविषयकशब्दानुकूलकृतिमान् इति बोधः।

पदवाक्यरत्नाकरे[३]

"नृपं हितं ब्रवीति" इत्यत्र शाब्दबोधः स्मरणं शब्दश्च ब्रुवेरर्थः। नृपसमवेत-शाब्दबोधजनकं यत् हितविषयकस्मरणं तज्जनकशाब्दानुकूलकृतिमानिति बोधः।

शाब्दबोधः शब्दश्च तदर्थः शाब्दबोधे नृपसमवेतत्वस्य हितविषयकत्वस्य चान्वय इत्यन्ये।

विभक्त्यर्थनिर्णये[४]

संस्कारः शाब्दबोधः वाक्यानुगुणेच्छा च ब्रुवेरर्थः। "नृपं हितं ब्रवीति" इत्यत्र नृपसमवेतसंस्कारः विषयतया हितवृत्तौ शाब्दबोधे प्रयोजकतया, स चोद्देश्यितया वाक्यानुगुणेच्छायामन्वेति।

यदि चाभिनयादिना बोधनेऽपि ब्रुविप्रयोगः तदा शाब्दबोधस्थाने ज्ञानसामान्यं वाक्यस्थाने व्यापारमात्रं ब्रुवेरर्थः। अन्वयस्तु पूर्ववत्।

यत्तु — ज्ञानानुकूलः शब्दो ब्रुवेरर्थः। शिष्यं धर्मं ब्रवीतीत्यत्र ज्ञानरूपफले शिष्यसमवेतत्वं धर्मविषयत्वं च द्वितीयान्तार्थद्वयमन्वेतीति।

---

[१] पृ. ३३१
[२] पृ. १४७
[३] पृ. ५८५
[४] पृ. १४८

तदसत्। ज्ञानस्यैकस्यैव फलतया गुणफलाभावेन शिष्यादेः गौणकर्मत्वानुपपत्तेः। शिष्यं धर्मं ब्रवीति, शिष्यस्तु न शृणोति इति प्रयोगानुपपत्तेश्च। ब्रुविपर्यायवदत्यादयोऽपि द्विकर्मका इति वदन्ति।

"शिष्यं धर्ममधर्मं वा शास्ती" इत्यत्र कृतिरूपदेशो व्यापारश्च शास्तेरर्थः। कृतिः प्रवृत्तिर्निवृत्तिश्च। उपदेशः कर्तव्यत्वेनाकर्तव्यत्वेन वा व्यवसायः। शिष्यसमवेता या प्रवृत्तिर्निवृत्तिर्वा तज्ज्ञनको यो धर्मविषयकोऽधर्मविषयको वा उपदेशः तज्ज्ञनकव्यापाराश्रयो गुरुः इत्यन्वयबोधः।

धर्ममधर्मं वा शास्ति गुरुः — कृतिः उपदेशः व्यापारानुगुणेच्छा च शास्तेरर्थः। कृतिः प्रवृत्तिर्निवृत्तिश्च। उपदेशः इष्टसाधनत्वेन अनिष्टसाधनत्वेन वा ज्ञाने प्रयोजकतया, तच्च उद्देश्यितयान्वेति। इच्छायाः धात्वर्थे निवेशात् शिष्यं धर्मं शास्ति, शिष्यो धर्मे न प्रवर्तते न वा तमिष्टसाधनत्वेन जानाति इत्यादिप्रयोगस्य नानुपपत्तिः।

जि-धातुयोगे द्वितीयार्थः

बालमनोरमायाम्[१]

"शतं जयति देवदत्तम्" इत्यत्र ग्रहणानुकूलताडनादिव्यापारो जयतेरर्थः। "गर्गान् शतं दण्डयति" इतिवत् व्याख्येयम्।

बृहन्मञ्जूषायाम्[२]

"शतं जयति देवदत्तम्" इत्यत्र दानानुकूलः पराभवाख्यो व्यापारो जयतेरर्थः। स्वत्वोत्पत्त्यनुकूलव्यापारमात्रार्थकत्वेऽपादानत्वं संप्रदानत्वं वा।

शब्दशक्तिप्रकाशिकायाम्[३]

"शत्रुं शतानि जयति" इत्यत्र ग्रहणावच्छिन्नपराभवो जयत्यर्थः:तथा च शतस्य ग्रहणानुकूलः यः शत्रुकर्मकः पराभवः तदनुकूलकृतिमानिति बोधः। पराभवश्च तिरस्कारः।

पदवाक्यरत्नाकरे[४]

"आक्षिकं शतं जयति" इत्यत्र स्वामित्वध्वंसः त्यागः व्यापारश्च जयतेरर्थः। आक्षिकनिष्ठस्वामित्वध्वंसजनकशतविषयकत्यागानुकूलव्यापारवान् द्यूतकर्ता इति बोधः।

---

[१] पृ. ४०६
[२] पृ. १५६
[३] पृ. ३३१
[४] पृ. ५८६

विभक्त्यर्थनिर्णये[१]

शत्रुं महीं जयति — भङ्गः त्यागः ग्रहणव्यापारश्च जयतेरर्थः। भङ्गो द्यूतादौ समीहिताक्षदायाद्यनुपहितेच्छा, युद्धादौ पलायनादिः। "आक्षिकं शतं जयति" इत्यत्र आक्षिकसमवेताक्षदायाद्यनुपहितेच्छा विषयतया शतवृत्तौ त्यागे, स च ग्रहण-व्यापारे प्रयोज्यतया अन्वेति। आक्षिकसमवेताक्षदायाद्यनुपहितेच्छाविषयशतवृत्ति-त्यागप्रयोज्यग्रहणानुकूलकृतिमानिति बोधः।

"शत्रुं महीं जयति" इत्यत्र वृत्तिपलायनादिकं विषयतया महीवृत्तौ त्यागे स च ग्रहणव्यापारे प्रयोज्यतयान्वेति।

मथ्-धातुयोगे द्वितीयार्थः

बालमनोरमायाम्[२]

सुधां क्षीरनिधिं मथ्नाति — इत्यत्र द्रवद्रव्यगतसारोद्भावनानुकूलः मन्थानदण्ड-भ्रमजनितसंक्षोभात्मकास्फालनपर्यायो व्यापारो मन्थेरर्थः। क्षीरोदधेः सकाशात् सुधां मन्थानदण्डभ्रमणेनोद्भावयतीत्यर्थः। व्यापारप्रयोज्योद्भवाश्रयत्वात् सुधा प्रधानकर्म। क्षीरोदधिस्तु उद्भवं प्रति अपादानम्। तस्यापादानत्वमुपेक्ष्य सुधाद्वारा उद्भवाश्रयत्वात् कर्मत्वविवक्षायां द्वितीया। सुधाश्रयं क्षीरोदधिसंबन्धिनं उद्भवं करोतीत्यर्थ इति तु प्राचीनाः।

बृहन्मञ्जूषायाम्

द्रवद्रव्यगतसारभागोत्थानानुकूलव्यापारो मन्थेरर्थः। उत्थानमूर्ध्वदेशसंयोगः। उत्थानानुकूलव्यापारमात्रार्थकत्वे कर्मद्वारा क्रियाश्रयत्वविवक्षणे अधिकरणत्म्। विभागाश्रयत्वविवक्षणेऽपादानत्वं वा।

शब्दशक्तिप्रकाशिकायाम्[३]

"सुधां समुद्रं मथ्नाति" इत्यत्र उत्थानावच्छिन्नोन्मन्थनं धात्वर्थः। सुधोत्था-नानुकूलं यत् समुद्रस्योन्मथनं तत्कर्तेत्यर्थः। उन्मन्थनमालोडनम्।

---

[१] पृ. १४९
[२] पृ. ४०६
[३] पृ. ३३१

पदवाक्यरत्नाकरे[१]

मज्जनाख्यसंयोगध्वंसः उद्गमनाख्यं कर्म व्यापारश्च मन्थेरर्थः। "क्षीरसागरं कौस्तुभं मथ्नाति" इत्यत्र क्षीरसागरसंयोगध्वंसानुकूलं यत् कौस्तुभोद्गमनं तज्जनकविलोडनात्मकव्यापारानुकूलकृतिमानित्यन्वयबोधः।

विभक्त्यर्थनिर्णये[२]

"दधि घृतं मथ्नाति" अवयवसंयोगनाशः उद्गमनकर्म व्यापारश्च मथ्नातेरर्थः। "दधि घृतं मथ्नाति" इत्यत्र सामानाधिकरण्येन दधिवृत्तिरवयवसंयोगनाशो घृतसमवेतोद्गमनकर्मणि प्रयोज्यतया, उद्गमनकर्म तु प्रयोजकतया विलोडनव्यापारे अन्वेति। घृतस्य दधिनाशजन्यत्वात् दध्यवयवसंयोगनाशस्य घृतकर्मप्रयोजकत्वात् भवत्युपपत्तिः। दधिवृत्त्यवयवसंयोगनाशप्रयोज्यघृतसमवेतोद्गमनकर्मप्रयोजकविलोडनाख्यव्यापारानुकूलकृतिमानित्यन्वयबोधः।

एवं "क्षीरसागरं कौस्तुभं मथ्नाति" इत्यत्रापि क्षीरसागरावयवकौस्तुभसंयोगानां कौस्तुभोद्गमनप्रतिबन्धकानां नाशे सति मन्दरादिसंयोगजं कौस्तुभोद्गमनं भवतीति तादृशसंयोगनाशप्रयोज्यत्वं कौस्तुभोद्गमने संभवतीति नानुपपत्तिः।

मुष्-धातुयोगे द्वितीयार्थः

बालमनोरमायाम्[३]

"देवदत्तं शतं मुष्णाति"। अपश्यति देवदत्ते तदीयं सुवर्णशतं तस्मादपनीय आदत्ते इत्यर्थः। परस्वामिकद्रव्यस्य स्वामिनः सकाशात् अपनीय आदानानुकूलः स्वाम्यज्ञातः निशासंचारभित्तिछिद्रकरणादिरूपव्यापारो मुषेरर्थः। व्यापारप्रयोज्यापनयनपूर्वकादानाश्रयत्वात् शतं प्रधानकर्म। अपनयनावधित्वात् देवदत्तोऽपादानम्। अपादानत्वमनादृत्य अपनीयादेयद्रव्यस्वामितया देवदत्तस्यापनीयादानाश्रयत्वात् कर्मत्वविवक्षायां द्वितीया। शतकर्मकं देवदत्तसंबन्धि अपनीयादानं करोतीत्यर्थ इति प्राञ्चः।

---

[१] पृ. ५८७
[२] पृ. १४९
[३] पृ. ४०६

बृहन्मञ्जूषायाम्[१]

"देवदत्तं शतं मुष्णाति" इत्यत्र पराज्ञानतद्द्रव्यग्रहणोभयानुकूलो व्यापारो मुषेरर्थः। यदा तु ग्रहणानुकूलव्यापार एवार्थः तदा देवदत्तस्यापादानत्वम्।

पदवाक्यरत्नाकरे[२]

स्वामित्वे सति यथेष्टाविनियोगः, स्वत्वाभावे सति यथेष्टविनियोगो व्यापारश्च मुष्णातेरर्थः। "वणिजं हिरण्यं मुष्णाति" इत्यत्र वणिक्कर्तृकहिरण्यवृत्तियथेष्ट-विनियोगाक्षमत्वप्रयोजकः तस्करकर्तृकहिरण्यवृत्तिविनियोगयोग्यत्वप्रयोजकश्च यो व्यापारः तदनुकूलकृतिमांस्तस्कर इत्यन्वयबोधः।

विभक्त्यर्थनिर्णये[३]

"वणिजं हिरण्यं मुष्णाति" स्वामित्वे सति विनियोगानुत्पादः अस्वामिसंबन्धः व्यापारश्च मुष्णातेरर्थः। "वणिजं हिरण्यं मुष्णाति" इत्यत्र स्वामिवणिग्वृत्तिः विनियोगानुत्पादः हिरण्यवृत्तौ अस्वामिसंबन्धे, स च तस्करव्यापारे प्रयोजक-तयान्वेति। विनियोगो दानविक्रयादिः। संबन्धः संयोगसामानाधिकरण्यादिः।

णीञ्-धातुयोगे द्वितीयार्थः

बालमनोरमायाम्[४]

"ग्राममजां नयति" इत्यत्र धातोः प्रापणमर्थः। ग्रामे अजां प्रापयतीत्यर्थः। देशान्तरसंयोगानुकूलः चलनगमनपर्यायो व्यापारः प्राप्तिः। न तु देशान्तर-संयोगमात्रम्। ग्रामं प्रति चलनदशायामेव प्राप्नोति गच्छतीति प्रयोगदर्शनात् चलनेन संयोगे जाते तदनुवृत्तिदशायां तददर्शनात्। एतादृशव्यापारप्रयोज्यग्रामसंयोग-तदनुकूलगमनोभयाश्रयत्वात् अजा प्रधानकर्म। तादृशाजाधारत्वात् ग्रामोऽधि-करणम्। अधिकरणत्वमनादृत्य ग्रामस्यापि तथाविधसंयोगाश्रयत्वात् कर्मत्वविव-क्षायां द्वितीया[५]। अजाकर्मकं ग्रामसंबन्धि नयनमिति तु प्राचीनाः।

---

[१] पृ. १५७
[२] पृ. ५८७
[३] पृ. १५०
[४] पृ. ४०६
[५] नयतेः संयोगानुकूलव्यापारोऽर्थः इति शेखरे पृ. ६३६

बृहन्मञ्जूषायाम्[1]

"अजां ग्रामं नयति हरति कर्षति वहति वा" इत्यत्र उत्तरदेशसंयोगानुकूलव्यापारानुकूलव्यापारो नयतेरर्थः। स एव स्कन्धग्रहणादिपूर्वको वहेः, गत्यनुकूलो व्यापारविशेषः कृषेः, बलाद्ग्रहणपूर्वकं देशान्तरप्रापणं हरतेः अर्थः। अजानयनस्योद्देश्यत्वात् अजा प्रधानम्। गमनमात्रार्थकत्वे ग्रामस्याधिकरणत्वं बोध्यम्। यदा तु ग्रामीयाजासंयोग एवोद्देश्यः तदा ग्राम एव प्रधानम्।

एतेन "तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा" इत्यत्र तच्छब्देन प्राधान्यात् पयसः परामर्श इति मीमांसकग्रन्था व्याख्याताः। पयःस्थाने दध्यागमनेनार्थप्राधान्यमादाय वा तेषामुपपत्तिः। अत एव सप्तम्युपादानं सार्थकमिति दिक्।

व्युत्पत्तिवादे[2]

"अजां ग्रामं नयति" इत्यादौ "ग्रामं भारं वहति" इत्यादौ च उत्तरदेशसंयोगावच्छिन्नक्रियानुकूलव्यापाररूपं प्रापणं धातोरर्थः। तत्र क्रियारूपे फले अजाभारादिवृत्तित्वस्यान्वयः। संयोगरूपे फले ग्रामादिवृत्तित्वस्यान्वयः। तथा च ग्रामवृत्तिसंयोगजनकाजादिवृत्तिक्रियानुकूलव्यापारानुकूलकृतिमानित्यन्वयबोधः।
"अजा ग्रामं नीयते" "उह्यते भारो ग्रामं चैत्रेण"

इत्यादौ उत्तरसंयोगावच्छिन्नक्रियारूपं फलं कर्माख्यातार्थः। तत्र च धात्वर्थस्य तादृशव्यापारस्य जन्यतासंबन्धेन, तस्य चाश्रयतासंबन्धेन अजाभारादिरूपप्रधानकर्मण्यन्वयः। ग्रामादिवृत्तित्वान्वयस्तु संयोग एव। एवं च चैत्रकृतिजन्यो यः संयोगावच्छिन्नक्रियानुकूलव्यापारः तज्जन्यग्रमवृत्तिसंयोगानुकूलकर्मवानजादिरित्यन्वयबोधः।

न च कारकविभक्त्यर्थस्य धात्वर्थ एवान्वयनियमात् प्रत्ययोपस्थाप्यसंयोगे कथं ग्रामादिवृत्तित्वान्वय इति वाच्यम्। "भूतले घट" इत्यादौ घटादिपदार्थेऽपि अधिकरणसप्तम्यर्थान्वयात् तादृशनियमासिद्धेः।

अस्तु वा धात्वर्थतावच्छेदकतावच्छेदकतया भासमान एव संयोगे तदन्वयः। फलव्यापारयोः पृथक्शक्तिमते च आश्रयत्वमेव अत्मनेपदार्थः। संयोगावच्छिन्नक्रियारूपधात्वर्थ एव व्यापाररूपधात्वर्थविशेष्यतया आश्रयत्वविशेषणतया च अन्वेति। तदेकदेशे संयोग एव ग्रामादिवृत्तित्वान्वयः। चैत्रीयकृतिजन्यव्यापारजन्यग्रामवृत्तिसंयोगानुकूलक्रियाश्रयतावानजादिरित्याकारको बोधः।

---

[1] पृ. १५७
[2] पृ. १४७

पदवाक्यरत्नाकरे[1]

संयोगः कर्म व्यापारश्च नयतेरर्थः। व्यापारश्च प्रेरणा। "ग्राममजां नयति" इत्यत्र ग्रामवृत्तिसंयोगजनकाजावृत्तिव्यापारानुकूलप्रेरणकर्ता पुरुष इति बोधः। नयतिना प्रेरणादि वहतिना पुनः आधेयकर्मानुकूलमाधारकर्म प्रत्याय्यत इति विवेकः।

"ग्रामं भारं वहति पुरुषः, द्वीपं सांयात्रिकं वहति नौः" इत्यतश्च ग्रामवृत्तिसंयोगप्रयोजकपोतवणिग्वृत्तिव्यापारानुकूलव्यापाराश्रयो नौः इत्याकारको बोधः। तत्र नौक्रिया आधेयसांयात्रिकव्यापारप्रयोजिका न प्रेरणारूपा।

विभक्त्यर्थनिर्णये[2]

"अजां ग्रामं नयति" प्रेरकपुरुषदेशावधिकप्रेर्यदेशवृत्तिपरत्वनिरूपितापरत्वसमानाधिकरणसंयोगः कर्म व्यापारः नयतेर्वहतेश्च अर्थः। वहतेरर्थे प्रेरकप्रेर्ययोः स्थाने वोढृवोढव्यौ बोध्यौ। तादृशापरत्वसमानाधिकरणः संयोगः आङ्पूर्वस्य नयतेरर्थे निविशते। व्यापारस्तु नयतेः प्रेरणादि वहतेराधेयकर्मानुकूलाधारकर्मादिः। "ग्राममजां नयति" इत्यत्र ग्रामवृत्तिः तादृशसंयोगः अजवृत्तिकर्मणि तच्च पुरुषप्रेरणास्वरूपे व्यापारे प्रयोजकतयान्वेति। "ग्रामं भारं वहति पुरुषः" "द्वीपं सांयात्रिकं वहति नौः" इत्यादौ ग्रामवृत्तिसंयोगो भारवृत्तिकर्मणि, तच्च पुरुषव्यापारे कर्मणि प्रयोजकतयान्वेति। तथा च ग्रामवृत्तिप्रेरकदेशावधिकप्रेर्यदेशवृत्तिपरत्वनिरूपितापरत्वसमानाधिकरणसंयोगप्रयोजकभारवृत्तिकर्मप्रयोजकप्रेषणाख्यव्यापारानुकूलकृतिमान् इति, ग्रामवृत्तिवोढृदेशावधिकवोढव्यदेशवृत्तिपरत्वनिरूपितापरत्वसमानाधिकरणसंयोगप्रयोजकभारवृत्तिकर्मप्रयोजकव्यापारानुकूलकृतिमान् इति च क्रमशो बोधः।

वहतेस्तु क्वचित् संबन्धप्रतियोगित्वे अप्यर्थौ। यथा — "वहति यः परितः कनकस्थलीः" इत्यत्र। अत्र हि कनकस्थलीवृत्तिः संयोगः स्वरूपेण प्रतियोगित्वे, तच्च निरूपकतया तिङर्थाश्रयत्वेऽन्वेति। एवमन्यत्रापि साक्षात्परम्परास्वरूपः संबन्धो बोध्यः। परंपरासंबन्धस्तु "गन्धं वहति वायुः" इत्यादौ बोध्यः। कनकस्थलीवृत्तिसंयोगवृत्तिप्रतियोगितानिरूपकाश्रयतावान् गन्धवृत्तिः यः संबन्धः (स्वाश्रयसंयोगाख्यः) तन्निष्ठप्रतियोगितानिरूपकाश्रयतावान् वायुः इति क्रमशः शाब्दबोधः।

---

[1] पृ. ५८८
[2] पृ. १५०

कृष्, वह्-धातुयोगे द्वितीयार्थः

बालमनोरमायाम्[1]

रज्जुबन्धनादिना बलाच्चालनं कृषेरर्थः। ग्राममजां कर्षति। शकटाद्यारोपणादिरूपदेशान्तरसंयोगानुकूलप्राप्त्यनुकूलो व्यापारो वहेरर्थः। देशान्तरसंयोगानुकूलव्यापारः स्कन्धग्रहणादिरूपो हरतेरर्थः।

शेखरे[2]

स्कन्धग्रहणादिपूर्वः संयोगानुकूलः व्यापारो वहेरर्थः इत्युक्तम्। गत्यनुकूलव्यापारविशेषः कृषेः, बलाद्ग्रहणपूर्वकं देशान्तरप्रापणं हरतेः इति चोक्तम्।

पदवाक्यरत्नाकरे[3]

नाश्यसंयोगसंनिकृष्टसंयोगः कर्म व्यापारश्च कृषेरर्थः। संयोगे तादृशसंयोगसंनिकृष्टत्वं च कर्षकदेशावधिककर्षणीयदेशवृत्तिपरत्वनिरूपितापरत्वसामानाधिकरण्यम्। तथा च "भूमिं शाखां कर्षति फलार्थी" इत्यत्र भूमिवृत्तितादृशसंयोगप्रयोजकशखावृत्तिकर्मानुकूलव्यापारकर्ता फलार्थी इति बोधः।

संयोगः कर्म व्यापारश्च वहतेः हरतेश्चार्थः। "स्वगृहं परधनं हरति तस्करः" इत्यादितः स्वगृहवृत्तिसंयोगप्रयोजकपरकीयधनवृत्तिव्यापरानुकूलव्यापारकर्ता चौर इति बोधः।

विभक्त्यर्थनिर्णये[4]

"भूमिं शाखां कर्षति फलार्थी" कर्षकदेशावधिककर्षणीयदेशवृत्तिपरत्वनिरूपितापरत्वसमानाधिकरणसंयोगः कर्म व्यापारश्च कृषेरर्थः। "भूमिं शाखां कर्षति फलार्थी" इत्यादौ भूमिवृत्तिः तादृशसंयोगः शाखावृत्तिकर्मणि, तच्च फलार्थिव्यापारे प्रयोजकतयान्वेति। भूमिवृत्तिकर्षकदेशावधिककर्षणीयदेशवृत्तिपरत्वनिरूपितापरत्वसमानाधिकरणसंयोगप्रयोजकशाखावृत्तिकर्मप्रयोजकव्यापारानुकूलकृतिमान् इत्यन्वयबोधः।

---

[1] पृ. ४०७
[2] पृ. ६३६
[3] पृ. ५८८
[4] पृ. १५०-१५३

संयोगः कर्म व्यापारश्च हरतेरर्थः। "स्वगृहं परधनं हरति तस्करः" इत्यादौ स्वगृहवृत्तिसंयोगः परधनवृत्तिकर्मणि, तच्च तस्करव्यापारे प्रयोजकतयान्वेति। स्वगृहवृत्तिसंयोगजनकपरधनवृत्तिक्रियाजनकव्यापारानुकूलकृतिमांस्तस्कर इत्याकारको बोधः।

प्रधानाप्रधानकर्माभिधानानभिधानविवेकः

द्वादश दुहादयः पञ्च ण्यादयः एते सप्तदश धातवः द्विकर्मकाः। ग्रहिरपि द्विकर्मक इति केचित्। तन्निर्मूलमित्यन्ये। तदुक्तम् —

दुह्याच्त्यज्रुधिपृच्छिचिब्रूशासिजिमन्थिमुषाम्।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्।।

युक् द्वितीयमित्यर्थः। तथा —

दुहियाचिरुधिप्रच्छिचिब्रूशासिजिदण्डयः।
मन्थिः पचिश्च मुष्णातिर्धातवोऽमी दुहादयः।।

नयतिवहतिकर्षतीन् करोतिनयतिगणेषु वदन्ति पाणिनीयाः। दुहादिभ्यो द्वादशभ्यः कर्मप्रत्ययेन प्रधानकर्मणो विवक्षणे अविवक्षणेऽपि गौणकर्माभिधीयते यथा "गौः पयांसि दुह्यते दुग्धा वा" प्रधानविवक्षणे "गौर्दुह्यते दुग्धा वा" गौणकर्माविवक्षणे प्रधानकर्माप्यभिधीयते यथा "पयांसि दुह्यन्ते दुग्धानि वा"।

न्यादिभ्यः पञ्चभ्यः कर्मप्रत्ययेन गुणकर्मणो विवक्षणे प्रधानकर्मैवाभिधीयते "अजा ग्रामं नीयते"। अविवक्षणे तु अजा नीयते। एवं "राजा कनकं याच्यते याचितो वा"। अत एव "राजा सुतं याचित" इति यथा वा "कनकं याच्यते याचितं वा"। एवं "व्रजो गामवरुध्यते अवरुद्धो वा", यथा वा "गौरवरुध्यते अवरुद्धा वा"। एवं "जानपदः पन्थानं पृच्छ्यते पृष्टो वा"। प्रच्छिपर्यायः चुदिर्बोध्यः। अत एव "अहमपीदमचोद्यं चोद्ये" इति भाष्यम्।

एवं "तरुः पुष्पमवचीयते अवचितो वा", यथा वा "पुष्पमवचीयते अवचितं वा"। अत एव "अवचितकुसुमा विहाय वल्लीः" इति। एवं "शिष्यो धर्ममुच्यते उक्तो वा", एवं "शिष्यो धर्ममनुशास्यते अनुशासितो वा", यथा वा "धर्मोऽनुशास्यतेऽनुशासितो वा"। एवम् "आक्षिकः शतं जीयते जितो वा", यथा वा "शतं जीयते जितं वा"। अत एव — "कृतप्रमाणस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः" इति। एवं "गर्गः शतं दण्ड्यते दण्डितं वा"। एवं "क्षीरनिधिः कौस्तुभं मथ्यते मथितो वा"। अत एव — "देवासुरैरमृतमम्बुनिधिर्ममन्थे" इति, यथा वा "कौस्तुभो मथ्यते मथितो वा"। एवं "तण्डुल ओदनं

पच्यते पक्वो वा'', यथा वा ''ओदनः पच्यते पक्वो वा''। एवं ''वणिक् हिरण्यं मुष्यते मुषितो वा''। अत एव — ''रत्नानि मुषितो वणिक्'' इति। यथा वा ''कनकं मुष्यते मुषितं वा''। एवं ''भारो ग्राममुह्यते ऊढो वा''। एवं ''परधनं स्वगृहं ह्रियते हृतं वा'', यथा वा ''परधनं ह्रियते हृतं वा''।

एवं ''शाखा भूमिं कृष्यते कृष्टा वा'', यथा वा ''शाखा कृष्यते कृष्टा वा''। एवं ''कटो वीरणं क्रियते कृतो वा'', यथा वा ''कटः क्रियते कृतो वा''। तदुक्तम् —

प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः।।

प्रधानफलवत् प्रधानकर्म। गुणफलवत् अप्रधानकर्म। तदिदं कर्म वाक्यपदीये प्रोक्तम् —

निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधामतम्।
तच्चेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम्।।
औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम्।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्।।

निर्वर्त्यविकार्यप्राप्यलक्षणं हरिणोक्तं पूर्वमेव प्रदर्शितम्। औदासीन्येन प्राप्यं ''ग्रामं गच्छंस्तृणं स्पृशति'' इत्यादौ तृणादि। अनीप्सितं तु ''रथ्यां गच्छन् चाण्डालं स्पृशति'' इत्यादौ चाण्डालादि। संज्ञान्तरैरनाख्यातं तु ''गां पयो दोग्धि'' इत्यादौ अकथितमित्यनेन कर्म गवादि। अन्यपूर्वकं तु क्रूरमभिक्रुध्यतीत्यादौ संप्रदानसंज्ञा-बाधकानुशासनेन कर्म क्रूरादि। तदनुशासनं तु वक्ष्यते।

अकर्मकधातुभिर्योगे ... इति वार्तिकविचारः[१]

''कुरून् स्वपिति'' देवदत्त इति शेषः। कुरुषु निद्रां करोतीत्यर्थः। देवदत्तात्तु न द्वितीया। तिङा अभिहितत्वादिति भावः। कुर्वादिशब्दाः जनपदविशेषेषु स्वभावान्नि-त्यबहुवचनान्ताः।

''मासमास्ते'' मासस्याधिकरणसंज्ञां बाधित्वा कर्मत्वम्।

''गोदोहमास्ते'' दोहनं दोहः, भावे घञ्। भावो धात्वर्थः। गोदोहनकालोऽत्र विवक्षितः। न चेह कालत्वादेव सिद्धिः शङ्क्या। अहोरात्रसमूहस्य मासादेरेव तत्र ग्रहणात्।

---

[१] वा. ११०३-११०४

"क्रोशमास्ते" गन्तव्यत्वेनाध्वनो विशेषितत्वात् नियतपरिमाणः क्रोशादिरेव गृह्यत इत्यभिप्रेत्येदमुदाहरणम्। गन्तव्यत्वविशेषणात् अध्वन्यास्ते इत्यत्र न भवति। अनत्यन्तसंयोगार्थमिदं वचनम्। अत्यन्तसंयोगे तु "कालाध्वनोरत्यन्त-संयोगे[१]" इत्येव सिद्धमिति प्रचीनानुसारी पन्थाः।

वस्तुतस्तु — "अकर्मकधातुभिर्योगे" इत्यादिवचनं भाष्ये न दृश्यते। किं तु अकर्मकधातूनां कथं द्विकर्मकत्वम् इत्याशङ्कायां

"कालाभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्। देशश्च" इत्युक्तम्। हिशब्द-घटितत्वात् इदं न विधायकम्, किं तु अनुवाद एव। तथा हि "कुरून् स्वपिति" इत्यादौ स्वापादिक्रियया कुर्वादीन् व्याप्नोतीत्यर्थः। धातूनामनेकार्थतया कदाचित्तेषां स्वापादिकरणकव्यापनेऽपि वृत्तेः। ततश्च "कर्तुरीप्सिततमं कर्म"[२] इत्येव सिद्धम्। यदा तु स्वपादिधातूनां स्वापादावेव वृत्तिः न तु व्याप्तिपर्यन्ते तदा "कुरुषु स्वपिति, मासे आस्ते"

इत्यधिकरणत्वमेव। एतच्च "अकथितं च"[३] इत्यत्र "कालाध्वनोरत्यन्त-संयोगे"[४] इत्यत्र च भाष्ये स्पष्टम्।

अत एव "समां समां विजायते"[५] इति सूत्रे समायां समायां विजायते इति विग्रहकथनं भाष्ये संगच्छते। अन्यथा द्वितीयाप्रसङ्गात्।

अत एव च लकारार्थप्रक्रियायां "अत्यन्तापह्नवे लिड्वक्तव्यः" इत्यत्र "कलि-ङ्गेष्ववात्सीः" "नाहं कलिङ्गान् जगाम" इति मूलकृदुदाहृते वाक्ये कलिङ्गेष्विति सप्तमी संगच्छते। उक्तं च हरिणा —

कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।
सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते।।

इति — इति शब्देन्दुशेखरे प्रपञ्चितम्।

शब्दशक्तिप्रकाशिकायाम्[६]

कालानामध्वमानानां क्रियाणां नीवृतामपि।
आधारता ध्रौव्यधातोः कर्मता स्याद्विभाषया।।

---

[१] सू. २.३.५
[२] सू. १.४.४९
[३] सू. १.४.५१
[४] सू. २.३.५
[५] सू. ५.२.१२
[६] पृ. ३३६

इति स्मृतिः। अत एव "मासश्चैत्रेण जीव्यते, जीवित" इत्यादौ कर्मतार्थकतिङादयः। तथा च मासाधिकरणताकजीवनवांश्चैत्रः, चैत्रकर्तृकजीवनाधिकरणतावान्मासः इत्यादिक्रमेण तत्र बोधः। "सन्ध्यायां पचति" इत्यादौ तु न ध्रौव्यस्य (अकर्मकस्य) धातोरर्थेन योगः, किं तु सकर्मकस्य।

"दिवसं सुप्यते सुन्दरीभिः, क्रोशं तत्सेनया स्थितम्" इत्यादौ तु द्वितीयया कालाध्वनोरभिव्यप्तिरेव बोध्यते, न त्वधिकरणत्वम्। नीवृत् जनपदः।

पदवाक्यरत्नाकरे[१]

कर्माणि देशकालाध्वभावाः स्युर्गतकर्मणाम्।
आधाराधेयतां धातुर्द्वितीया वात्र भाष्यते।।

अकर्मकधातूनां योगे देशादीनां कर्मसंज्ञा। देशो जनपदः कुरुपाञ्चालादिः। कालः कालावयवत्वेन परिभाषितः प्रहराहोरात्रमासादिः। अध्वा क्रोशगव्यूतियोजनादिः गन्तव्यः। भावः क्रिया।

तत्र "कुरून् स्वपिति, क्रोशमास्ते" इत्यत्र दैशिकसंबन्धावच्छिन्नाधेयताप्रयोजकव्यापारः धात्वर्थः। "मासमास्ते, गोदोहं तिष्ठति" इत्यत्र कालिकसंबन्धावच्छिन्नाधेयताप्रयोजकव्यापारः धात्वर्थः। आधेयत्वान्वितं कुर्वादिदेशादिनिरूपितत्वं द्वितीयार्थः इति केचित्।

एतन्मते धात्वर्थव्यापारविशेषणीभूतफलवत्त्वस्य मासादौ सत्त्वात् "कर्तुरीप्सिततमं कर्म"[२] इत्यनेनैव कर्मसंज्ञासिद्धावनुशासनान्तरवैयर्थ्यमित्यस्वारस्यं पर्यालोच्य अपरे वदन्ति — व्यापारमात्रं धात्वर्थः। आधेयत्वं द्वितीयार्थः। आधेयत्वे प्रकृत्यर्थस्य निरूपितत्वसंबन्धेनान्वयः। आधेयत्वस्य प्रयोजकता संबन्धेन धात्वर्थे व्यापारेऽन्वयः।

"मासमास्ते, क्रोशं रमत" इत्यादौ "कालाध्वनोरत्यन्तसंयोगे"[३] इत्यनेन द्वितीयोपपत्तावपि आसादीनामकर्मकत्वेन "मास आस्यत" इति कर्मणि तिङ उपादनासंभवात् मासादेः कर्मसंज्ञाविधानम् इति।

---

[१] पृ. ६०९
[२] सू. १.४.४९
[३] सू. २.३.५

विभक्त्यर्थनिर्णये[१]

"मासमास्त" इत्यादौ मासादेः कर्मत्वोपपत्तये "अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्" इति वार्तिकम्। अत्राकर्मकधातवस्तु सकर्मकलक्षणे प्रोक्ताः। देशः देशत्वावान्तरधर्मवान् कुरुपञ्चालादिः न तु सामान्यतो देशः न वा ग्रामत्वादिना ग्रामादिः। तेन "कुरून् स्वपिति तिष्ठति वा" इति प्रयोगः, न तु "देशं ग्रामं वा स्वपिति तिष्ठति" इति प्रयोगः।

कालः कालत्वावान्तरधर्मवान् माससंवत्सरादिः, न तु सामान्यतः कालः। तेन "मासं संवत्सरं वा आस्ते" इति प्रयोगः, न तु कालमास्ते इति प्रयोगः।

भावो गोदोहादिः। तेन "गोदोहं तिष्ठति" इति प्रयोगः। यद्यपि गोदोहादिशब्दस्य कालार्थकतया कालग्रहणेनैव दर्शितप्रयोगसिद्धेः भावग्रहणमनर्थकम्, तथापि घञन्तेन प्रतिपाद्यमानोऽपि कालः कर्म भवतीति प्रपञ्चार्थमेव भावग्रहणम्।

गन्तव्योऽध्वा अध्वत्वावान्तरधर्मवान् क्रोशयोजनादिः न तु सामान्यतोऽध्वा। सामान्यव्यवच्छेदार्थं गन्तव्यपदम्। तेन "क्रोशं योजनं वा रमते सांयात्रिक" इति प्रयोगः, न तु 'अध्वानं रमत' इति।

ननु "कालाध्वनोरत्यन्तसंयोगे द्वितीया"[२] इत्यनुशासनेनैव "मासमास्ते क्रोशं रमते" इत्यादिप्रयोगोपपत्तेः प्रकृतवार्तिके कालाध्वग्रहणमनर्थकमिति चेत् —

न। प्रकृतवार्तिकेन कर्मसंज्ञाज्ञापनेन कर्माख्यातप्रयोगोपपादनात्। तेन "कुरवः सुप्यन्ते, मास आस्यते, क्रोशो रम्यते, गोदोहः स्थीयते" इत्यादिप्रयोगः उपपद्यते।

अत्र "कुरून् स्वपिति, क्रोशं रमत" इत्यादौ दैशिकेन कर्तृघटितपरम्परया साक्षाद्वा संसर्गेण अवच्छिन्नमाधेयत्वं द्वितीयार्थः। स च स्वापादिप्रधानीभूतधात्वर्थान्वयी।

एवं "मासमास्ते गोदोहं तिष्ठति" इत्यादौ कालिकसंबन्धावच्छिन्नमाधेयत्वं द्वितीयार्थः। सोऽपि प्रधानीभूतासनादिधात्वर्थान्वयी।

एवं "कुरवः सुप्यन्ते, क्रोशो रम्यत" इत्यादौ दैशिकतादृशसंसर्गावच्छिन्नमधिकरणत्वं कर्माख्यातार्थः। एवं "मास आस्यते, गोदोहः स्थीयत" इत्यादौ कालिकतादृशसंसर्गावच्छिन्नमधिकरणत्वं कर्माख्यातार्थः।

---

[१] पृ. १५३

[२] सू. २.३.५

भाट्टरहस्ये[१]

एवम् "अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञकः" इत्यनुशासनात् "कुरून् स्वपिति, क्रोशमास्ते, मासमास्ते, गोदोहमास्ते" इत्यादौ द्वितीया। अत्र द्वितीयार्थोऽवच्छेदकत्वम्। तच्च देशस्याध्वनश्च। कालभावयोस्तु आधेयत्वम् कालिकं साक्षात् भावनान्वयि। कुरुनिष्ठावच्छेदकताका स्वापभावना, क्रोशनिष्ठावच्छेदकताका आसनभावना, मासनिरूपितकालिकसंबन्धावच्छिन्नाधेयतावती आसनभावना, गोदोहनिरूपितकालिकसंबन्धावच्छिन्नाधेयतावती आसनभावना इति बोधः इत्यभ्यधायि।

गतिबुद्धिसूत्रार्थविचारः

द्विकर्मकप्रयोगसमर्थकमिदमपि सूत्रम् "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ"[२] गत्यर्थकानां बुद्ध्यर्थकानां भक्षणार्थकानां शब्दकर्मकाणामकर्मकाणां धातूनामण्यन्तावस्थयां कर्तुः ण्यन्तावस्थायां कर्मसंज्ञा स्यादिति सूत्रार्थः। क्रमशः उदाहरणम् —

"शत्रूनगमयत् स्वर्गम्" शत्रवः युद्धे मृताः स्वर्गमगच्छन्, तान् यः शस्त्राघातेन अगमयत् स्वर्गं स श्रीहरिर्मे गतिरित्यन्वयः। अत्र गमेः अण्यन्तावस्थायां शत्रवः गमनक्रियां प्रति कर्तारः। स्वर्गस्तु कर्म। ण्यन्तावस्थायां तु णिज्वाच्यां प्रयोजकव्यापारात्मिकां शस्त्रघातक्रियां प्रति घातयिता हरिः कर्ता शत्रवस्तु कर्म।

शस्त्रघातजन्या या क्रिया स्वर्गप्राप्तिः तदाश्रयत्वात्। एवं च हरिः प्रयोजककर्ता, शत्रवस्तु प्रयोज्यकर्तारः। प्रयोजककर्तुः हरेः शाब्दं प्राधान्यम्। अन्यानधीनत्वलक्षणं चार्थप्राधान्यमस्ति। शत्रूणां तु अन्याधीनस्वर्गप्राप्तिकर्तृत्वं प्रयोजकाधीनत्वात् गुणभूतमेव। शेषित्वलक्षणमार्थं प्राधान्यं तु प्रयोज्यशत्रुगतकर्तृत्वस्यैव। प्रयोजकव्यापारस्य प्रयोज्यस्वर्गप्राप्त्यर्थत्वात् इति स्थितिः। तत्रान्यानधीनत्वलक्षणस्य आर्थप्राधान्यस्य शाब्दप्राधान्यस्य च प्रयोजकव्यापारे सत्त्वात् तदनुरोधि शत्रुगतं कर्मत्वं "कर्तुरीप्सिततमं कर्म"[३] इत्येव सिद्धम्। अतो नियमार्थमिदं सूत्रम्। णिजर्थेन आप्यमानस्य प्रयोज्यकर्तुः यदि कर्मत्वं भवति तर्हि गत्यर्थादीनामेवेति। तेन "पाचयत्योदनं देवदत्तेन" इत्यत्र प्रयोज्यकर्तुर्न कर्मत्वं,

---

[१] पृ. ९६

[२] सू. १.४.५२

[३] सू. १.४.४९

किं तु कर्तृत्वमेव। तदेतत् "हेतुमति च"[१] इति सूत्रे भाष्यकैयटयोः स्पष्टम्। उक्तं च हरिणा —

गुणक्रियायां स्वातन्त्र्यात् प्रेषणे कर्मतां गतः।
नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते।।

स्वधर्मेण — तृतीययेत्यर्थः।

एवं च स्वर्गकर्मकं शत्रुनिष्ठं यद्गमनम् तदनुकूलो यन्निष्ठो व्यापारः स श्रीहरिर्मे गतिरिति वाक्यार्थः।

वेदार्थं स्वानवेदयत् — बुद्ध्यर्थकधातोरिदमुदाहरणम्। स्वशब्दः आत्मीयपरः। स्वे स्वकीयाः विधिप्रमुखाः वेदार्थमविदुः। तान् हरिः वेदार्थमवेदयदित्यर्थः। अत्र स्वेषां प्रयोज्यकर्तॄणां कर्मत्वम्।

आशयच्चामृतं देवान् — प्रत्यवसानार्थस्य उदाहरणम्। देवाः अमृतमाश्नन्। तान् हरिराशयदित्यर्थः।

वेदमध्यापयद्विधिम् — शब्दकर्मकस्योदाहरणमिदम्। विधिः ब्रह्मा वेदमधीतवान्, तं हरिः अध्यापयदित्यर्थः। अत्र प्रयोज्यकर्तुः विधेः कर्मत्वम्।

आसयत् सलिले पृथ्वीम् — अकर्मकस्योदाहरणम्। सलिले पृथ्वी आस्त, तां हरिः आसयदित्यर्थः। अत्र पृथिव्याः प्रयोज्यकर्त्र्याः कर्मत्वम्। यः स मे श्रीहरिर्गतिरिति प्रतिवाक्यमन्वयः।

नीवह्योर्न[२] इति वार्तिकार्थः

णीञ् प्रापणे, वहप्रापणे इत्यनयोः ण्यन्तयोः प्रयोज्यकर्तुः गतिबुद्धिसूत्रोक्ता कर्मसंज्ञा नेत्यर्थः।

"नाययति वाहयति वा भारं भृत्येन" भृत्यो भारं नयति वहति वा तं प्रेरयतीत्यर्थः। अत्र प्रयोज्यकर्तुः भृत्यस्य णिच्प्रकृत्यर्थं नयनं वहनं च प्रति कर्तुः प्रयोजकव्यापारं प्रति कर्मत्वे निवृत्ते णिच्प्रकृत्यर्थं प्रति कर्तृत्वस्यैव निरपवादत्वेन अवस्थानात् तृतीया बोध्या।

---

[१] सू. ३.१.२६
[२] वा. ११०९

नियन्तृकर्तृकस्य वहेरनिषेधः[१] इति वार्तिकार्थः

एवं च तत्र प्रयोज्यकर्तुरुक्तस्य 'नीवह्योर्न' इति प्रतिषेधस्य अभावे सति प्रयोज्यस्य कर्मत्वं वक्तव्यमिति।

"वाहयति रथं वाहान् सूतः" वाहाः = अश्वाः, रथं वहन्ति, तान् सूतः प्रेरयतीत्यर्थः। "नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः" इत्यमरः। "वहन्ति बलीवर्दाः यवान्, वाहयति बलीवर्दान्" इति भाष्योदाहरणात् नियन्ता पशुप्रेरक एव विवक्षितः।

आदिखाद्योर्न[२] इति वार्तिकार्थः

अद भक्षणे, खाद भक्षणे अनयोः प्रयोज्यकर्तुः कर्मत्वं नेति वक्तव्यम्। प्रत्यवसानार्थकत्वात् प्राप्तस्य कर्मत्वस्य निषेधः।

"आदयति खादयति वा अन्नं वटुना" अत्ति खादति वा अन्नं वटुः, तं प्रेरयतीत्यर्थः।

भक्षेरहिंसार्थस्य न[३] इति वार्तिकार्थः

अहिंसार्थकस्य भक्षधातोः प्रयोज्यकर्तुः कर्मत्वं नेति वक्तव्यम् इत्यर्थः। ननु 'गतिबुद्धि०'[४] इति सूत्रे अणौ कर्तुः णौ कर्मत्वमुक्तम्। भक्षधातुस्तु चुरादित्वात् नित्यं स्वार्थिकण्यन्तः। तस्याणिकर्ता नास्त्येव। अतस्तस्य कर्मत्वनिषेधोऽनुपपन्नः, अप्रसक्तत्वात् इति चेत् — न। अत एव निषेधात् लिङ्गात् 'गतिबुद्धि०' इति सूत्रे णिग्रहणेन हेतुमत एव णिचो विवक्षितत्वात्। एवं च हेतुमण्णिचि अनुत्पन्ने सति अण्यन्तभिक्षिधातुवाच्यां क्रियां प्रति पर्यवस्यतीति न दोषः।

"भक्षयत्यन्नं वटुना" चुरादिण्यन्तात् भक्षधातोः हेतुमण्णिचि पूर्वलोपे हेतुमण्ण्यन्तात् तिबादौ सति भक्षयतीति रूपम्। एवं च "भक्षयत्यन्नं वटुः", खादतीत्यर्थः। तं प्रेरयतीति ण्यन्तस्यार्थः। अहिंसार्थस्य किम्? "भक्षयति बलीवर्दान् सस्यम्" क्षेत्रे प्ररूढमलूनं सस्यमिह विवक्षितम्। तस्य तदानीमन्तः प्रज्ञजीवत्वात् तद्भक्षणं हिंसैव।

---

[१] वा. १११०
[२] वा. ११०९
[३] वा. ११११
[४] सू. १.४.५२

जल्पतिप्रभृतीनामुपसंख्यानम्[1] इति वार्तिकार्थः

एतेषामणौ यः कर्ता स णौ कर्म स्यादिति वक्तव्यम्। "जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः" पुत्रो धर्मं जल्पति भाषते वा, तं देवदत्तः प्रेरयतीत्यर्थः।

दृशेश्च[2] इति वार्तिकार्थः

"दृशिर् प्रेक्षणे" अस्याप्यणौ यः कर्ता स णौ कर्म स्यादिति वक्तव्यमित्यर्थः। "दर्शयति हरिं भक्तान्" हरिं भक्ताः पश्यन्ति, तं प्रेरयति गुरुः इत्यर्थः।

ननु दृशेर्बुद्धिविशेषात्मकत्वात् बुद्ध्यर्थकत्वादेव सिद्धे वार्तिकारम्भः व्यर्थ इति चेत् — अत एव सूत्रे ज्ञानसामान्यार्थकानां 'विद ज्ञाने' 'ज्ञा अवधारणे' इत्यादीनामेव ग्रहणम्, न तु ज्ञानविशेषकार्थकानामिति ज्ञाप्यते। तेन "स्मरतिजिघ्रति" इत्यादीनामणौ कर्तुः णौ कर्मत्वं न।

"स्मारयति घ्रापयति देवदत्तेन" स्मरति प्रियां देवदत्तः, जिघ्रति चन्दनं देवदत्तः तं यज्ञदत्तः प्रेरयतीत्यर्थः।

शब्दायतेर्न[3] इति वार्तिकार्थः

"शब्दाययति देवदत्तेन" शब्दायेति क्यङन्तधातोरणौ यः कर्ता स णौ कर्म नेत्यर्थः। शब्दायते देवदत्तः, तं यज्ञदत्तः प्रेरयति।

ननु "मासमास्ते देवदत्तः, तं प्रेरयति मासमासयति देवदत्तं यज्ञदत्तः" इत्यत्र देवदत्तस्य प्रयोज्यकर्तुः कर्मत्वं न स्यात्। आसधातोर्गत्यादिष्वनन्तर्भावात्। न चाकर्मकत्वात् तदन्तर्भाव इति वाच्यम्। "अकर्मकधातुभिर्योगे" इति मासस्य कर्मतया आसेरकर्मकत्वासंभवात्। किं च ओदनादिकर्मणः अविवक्षायां देवदत्तः पचति, पाचयति देवदत्तेन यज्ञदत्तः इत्यत्र प्रयोज्यकर्तुः देवदत्तस्य कर्मत्वं न स्यात्। तदानीं पचेरकर्मकत्वेन गत्यादिष्वन्तर्भावात् इति चेत् — न। येषां देशकालादिभिन्नं कर्म न संभवति तेऽत्राकर्मकाः न त्वविवक्षितकर्माणोऽपि इति भाष्योक्तत्वान्न कोऽपि दोषः इति।

---

[1] वा. ११०८

[2] वा. ११०८

[3] वा. ११०५

विभक्त्यर्थनिर्णये[१] जल्पश्रुग्रहदृशामुपसंख्यानम् इति वार्तिकव्याख्यानम्

एवं "जल्पश्रुग्रहदृशामुपसंख्यानम्" इति वार्तिकेन जल्पतिप्रभृतिकर्तरि कर्मसंज्ञा ज्ञाप्यते। तेन "पुत्रमक्षराणि जल्पयति" इति प्रयोगः। तत्र वर्णतारावृत्तित्वेन विशेषिता उत्पत्तिः व्यापारश्च जल्पतेरर्थः। न च वर्णोत्पत्तिः फलविधया अर्थ इति वाच्यम्। तथा सति धात्वर्थान्तर्भूतकर्मकत्वात् शब्दायतिवत् जल्पतेरकर्मकत्वापत्तेः "वर्णान् पदं वा जल्पति" इति प्रयोगापत्तेः।

अथ वा उत्पत्तिः फलतया, विवृतस्पृष्टेषत्स्पृष्टाः प्रयत्नाः ताद्रूप्येण व्यापारतया जल्पतेरर्थः। जल्पतिवत् ब्रुविवचिवदिगदिप्रभृतयो बोध्याः।

"पुत्रमक्षराणि जल्पयति पिता" इत्यत्र पुत्रपदोत्तरद्वितीयायाः विवृतादिव्यापारान्वयि समवेतत्वमर्थः। णिचः शिक्षणाज्ञादिः प्रयोजकव्यापारोऽर्थः। एवं च अक्षरनिष्ठोत्पत्त्यनुकूलस्य पुत्रसमवेतविवृतादिव्यापारस्यानुकूलो यः शिक्षणादिः तदाश्रयः पितेति वाक्यार्थबोधः।

अत्र शब्दकर्मकतया जल्पतेः कर्तरि सूत्रेणैव कर्मसंज्ञासिद्धौ वार्तिके जल्पतिग्रहणमनर्थकमिति ध्येयम्।

एवं "यजमानं सूक्तमनुवाकं वा श्रावयति" इत्यत्र यजमानपदोत्तरद्वितीयायाः श्रावणप्रत्यक्षान्वयि समवेतत्वमर्थः। अत्रापि शृणोतेः शब्दकर्मकतया पृथग्ग्रहणमनर्थकमिति ध्येयम्।

न च शृणोतेः श्रावणत्वमिव शाब्दत्वमपि प्रवृत्तिनिमित्तम्। तथा च "शिष्यं धर्मं श्रावयति" इति प्रयोगोपपत्तये श्रुवः पृथग्ग्रहणमिति वाच्यम्।

शब्दकर्मेत्यत्र कर्मपदस्य कारकपरतया शब्दकारककार्थवाचिधातोरुपग्रहात् शाब्दबोधस्य शब्दकरणकतया शृणोतेस्तथात्वात्, शाब्दबोधार्थकस्य शृणोतेः बुद्ध्यर्थकतयोपग्रहसंभवाच्च।

न च सूत्रे बुद्धिपदेन ज्ञानसामान्यवाचिनामेवोपग्रहः, न तु ज्ञानविशेषवाचिनाम्; दृशेश्चेति पृथगनुशासनविरोधादिति वाच्यम्। ज्ञानातिरिक्तार्थेऽपि प्रवर्तमानस्य दृशेः कर्तरि कर्मत्वज्ञापनार्थं पृथगनुशासनसंभवात्।

यत्पथावधिरणुः परमा सा योगिधीरपि न पश्यति यस्मात्।
बालया निजमनःपरमाणौ ह्रीदरीशयहरीकृतमेनम्।।

---

[१] पृ. १६४-१६६

इत्यादौ दृशेरवगाहनार्थकत्वस्य दर्शनात्। तेन योगिधियं परमाणुं दर्शयति योगाभ्यास इति प्रयोगोपपत्तिः दृशेश्चेत्यनुशासनफलम्।

"स्मारयत्येनं वनगुल्मः स्वयमेव" इति प्रयोगोपपत्तिः णेरणाविति सूत्रव्याखयानं च — गतिबुद्धिसूत्रे बुद्धिपदस्य ज्ञानसामान्यार्थकत्वादेव "स्मारयत्येनं वनगुल्मः स्वयमेव" इत्यादाविदंपदात् द्वितीयोपपत्तिः। स्मरतेर्ज्ञानार्थकतया स्मरणकर्तरि गत्यादिसूत्रेणैव कर्मत्वज्ञापनात्। अन्यथा कर्मत्वेऽनुशासनदौर्लभ्यापत्तेः।

ननु "स्मरयत्येनम्" इत्यादिः क्व प्रयोगः, यदर्थं सूत्रे बुद्धिपदस्य ज्ञानसामान्यविशेषोभयवाचित्वमुपेयत इति चेत् —

"णेरणौ०" इति सूत्रे भाष्योदाहरणमिदम्। तथा हि — "णेरणौ यत्कर्म णौ चेत् स कर्तानाध्याने"[१] इति सूत्रस्यायमर्थः — ण्यन्ताद्धातोः आत्मनेपदं भवति अण्यन्तधातोर्यत् कर्म णिजन्तधातोः स कर्ता चेत् यथा "हस्तिनमारोहति" इत्यत्र अण्यन्तस्य आरोहतेः हस्ती कर्म। तत्रारोहणप्रयोजको न्यग्भावादिर्व्यापारः णिचा हस्तिगतः प्रत्याय्यते चेत् तदा "आरोहयते हस्ती स्वयमेव"। एवं "पश्यति शिवम्" इत्यत्र दर्शनकर्म शिवः। तत्र दर्शनप्रयोजकः करुणादिर्व्यापारः शिवगतो णिचा प्रत्याय्यते चेत् तदा दर्शयते शिवः स्वयमेवेति। ईदृशार्थस्य आध्यानार्थकप्रकृतिकण्यन्तसमुदायेन बोधनेऽपि आत्मनेपदं न भवति। तत्रेदमुदाहरणं "स्मरयत्येनं वनगुल्मः स्वयमेव" इति। अत्र स्मरणकर्मवनगुल्मगतः उद्बोधकसंबन्धादिः णिचा प्रत्याय्यते।

एवम् ऊर्ध्वदिगवच्छिन्नसंयोगानुकूलव्यापारार्थकस्य आरोहतेः गत्यर्थकत्वमक्षतमेव। ऊर्ध्वस्याधिकस्य निवेशेऽपि गत्यर्थकत्वहानेरयोगात्। "करेणुः आरोहयते निषादिनम्" इत्यत्र आरोहणकर्तरि कर्मत्वं गत्यादिसूत्रेणैव ज्ञाप्यते।

एवं "शिवो दर्शयते भक्तान्" इत्यत्र दृशेर्ज्ञानार्थकतया गत्यादिसूत्रे "दृशेश्च" इति वार्तिकेन च दर्शनकर्तरि कर्मत्वं ज्ञाप्यते।

नन्वत्रारोहतिफलोर्ध्वसंयोगाधिकरणतया हस्तिनः, दर्शनफलविषयत्वाधिकरणतया शिवस्य कर्मत्वसंभवे "हस्ती स्वयमारोहयते निषादिनम्" इति "शिवः स्वं दर्शयते भक्तान्" इति च प्रयोगः स्यादिति चेत् — इष्यत एवायं प्रयोगः। यदि नेष्यते तदा धात्वर्थफलान्वयिनि कर्मणि णिजर्थव्यापारवद्भेदोऽपि कर्मत्वे तन्त्रम्। स भेदः पूर्वोक्तरीत्या णिजर्थान्वयिफले कर्मत्वान्वयसंसर्गघटकः।

---

[१] सू. १.३.६७

विभक्त्यर्थनिर्णये शाब्दिकमतखण्डनम्

यत्तु "पश्यति भवः" इति कर्मस्थभावके धात्वर्थफलस्य णिचा प्रतिपादने दर्शयते भव इति तत्र कर्मस्थभावकधातोः अकर्मकत्वात् नैतद्योगे द्वितीयाप्रसङ्ग इति शाब्दिकैरुक्तम् —

तत् सूत्रार्थानभिज्ञानविजृम्भितम्। तथा हि "हेतुमति च"[१] इति सूत्रेण प्रयोजकव्यापारे णिचो विधानात् धात्वर्थव्यापारस्याप्रयोजकं फलं प्रतिपादयितुमसामर्थ्यमेव। किं च कर्मस्थभावके कर्मणः कर्तृत्वात् अणौ कर्मत्वायोगात् ण्यन्तस्यात्मनेपदमपि न संभवतीत्यन्यत्र विस्तरोऽनुसन्धेयः।

विभक्त्यर्थनिर्णये[२] ग्रहधातुयोगे द्वितीयार्थः

"धर्ममर्थं वा ग्राहयति शिष्यम्" अत्र गृह्णातेः ज्ञानार्थकत्वे शिष्यपदोत्तरद्वितीयायाः समवेतत्वमर्थः। संयोगादिलक्षणसंबन्धानुकूलव्यापारार्थकत्वे तु कृतिरर्थः। तत्र ग्रहिकर्तरि कर्मत्वं न प्रयोगसाधुत्वं सम्पादयति। तथा हि — "जायाप्रतिग्राहितगन्धमाल्याम्" इत्यत्र समासानुपपत्तिः। न ह्यत्र जायया प्रतिग्राहिते गन्धमाल्ये यामिति बहुव्रीहिः संभवति। "ण्यन्ते कर्तुश्च कर्मणः" इत्यनुशासनेन अण्यन्तधातुकर्तरि कर्मण्येव कर्मप्रत्ययस्य साधुत्वज्ञापनात् धात्वर्थकर्मगन्धमाल्यादिसामानाधिकरण्येन कर्मक्तस्य असाधुत्वात्। न वा जायया गन्धमाल्ये प्रतिग्राहिताम् इत्यर्धपिप्पल्यादिरसौ तत्पुरुषः। तथा सति तत्पुरुषस्य उत्तरपदलिङ्गतानियमेन टापोऽनुत्पादप्रसङ्गात्। इत्थं ग्रहिकर्तुः ण्यन्तेऽपि न कर्मत्वं, किं तु ग्रहिकर्मण एव। अतो जायया प्रतिग्राहिते गन्धमाल्ये ययेति बहुव्रीहिः। विग्रहवाक्यात् जायाप्रयोजितयत्कतृकप्रतिग्राहकर्मणी गन्धमाल्ये इति शाब्दबोधः। समासे तु जायापदस्य जायाप्रयोजकगन्धमाल्यकर्मकप्रतिग्रहकर्तरि लक्षणा। प्रतिग्राहितादिशब्दानां तात्पर्यग्राहकत्वमिति। एवं च वार्तिके ग्रहिग्रहणमप्यनर्थकमिति ध्येयम्।

विभक्त्यर्थनिर्णये दृशधातुयोगे द्वितीयार्थः

"माणवकं सूर्यं दर्शयत्याचार्यः" इत्यादौ माणवकपदोत्तरद्वितीयायाः दर्शनान्वयि समवेतत्वमर्थः। अत्रापि "दृशेश्च" इत्यनुशासनेन दर्शनकर्तरि कर्मत्वज्ञापनात् दृशेः पृथग्ग्रहणमनर्थकम्।

---

[१] सू. ३.१.२६

[२] पृ. १६७-१७३

(वस्तुतस्तु) दृशेश्चेत्यनुशासनं दर्शनकर्तरि कर्मत्वं ज्ञापयति। न च दृशेर्ज्ञानार्थकतया तत्कर्तरि गत्यादिसूत्रेणैव कर्मत्वसिद्धेः पृथगनुशासनं व्यर्थमिति वाच्यम्। ज्ञानभिन्नार्थकस्यापि दृशेः कर्तरि कर्मत्वज्ञापनार्थतया अवैयर्थ्यात्। यथा "दर्शयैनमपि केवलान्वयिनः सरणिम्" इत्यादौ जातिमत्त्वसाध्यकसत्त्वहेतोः इदंपदार्थतया तस्य दर्शनकर्तृत्वं बाधितमिति दृशेः प्राप्तौ लक्षणा। तथा च दर्शयेत्यस्य प्रापयेत्यर्थः। दृश्यर्थप्राप्तिकर्तरि सत्त्वादौ कर्मत्वज्ञापनं दृशेश्चेत्यनुशासनफलम्।

न च प्राप्तेर्गतित्वात् तदर्थकस्य दृशेः कर्तरि गत्यादिसूत्रेणैव कर्मत्वसिद्धेः पृथगनुशासनवैयर्थ्यमिति वाच्यम्। गत्यादिसूत्रे गतिवाचकानामेवोपादानात् न तु गतिलक्षकानाम्। अन्यथा पचेर्गतिलाक्षणिकत्वे "पाचयति देवदत्तं यज्ञदत्त" इति प्रयोगापत्तेः।

एवम् "अयस्कान्तमयो दर्शयति" इत्यत्राव्यवहितावस्थानं दृशेरर्थः। तत्रायः कर्मत्वमव्यवधाने फलेऽन्वेति। अयस्कान्तनिष्ठं कर्तृत्वलक्षणं कर्मत्वमवस्थानेऽन्वेति। अयःकर्मकाव्यवधानफलकायस्कान्तकर्तृकावस्थानानुकूलव्यापाराश्रयः अयः इति बोधः।

एवं "परमाणुं योगिधियं दर्शयति" इत्यत्र विषयताप्रतियोगित्वं दृशेरर्थः। तत्र परमाणुविशेषितमाधेयत्वं विषयत्वे फलेऽन्वेति। धीविशेषितं कर्तृत्वमाधेयत्वलक्षणं प्रतियोगित्वेऽन्वेति। तादृशप्रतियोगित्वं तु प्रयोजकतया णिजर्थे योगजधर्मलक्षणातिशयविशेषे योगाभ्यासादिव्यापारेऽन्वेति।

यत्तु दृशेश्चेति पृथगनुशासनेन गत्यादिसूत्रे बुद्धिपदेन ज्ञानत्वविशिष्टवाचिनामेव ग्रहणं, न तु ज्ञानत्वव्याप्यविशिष्टवाचिनाम्, स्मरतिजिघ्रत्यादीनामिति ज्ञायते। अन्यथा पृथगनुशासनवैयर्थ्यप्रसङ्गादिति शाब्दिकैरुक्तम्।

तन्न। पृथगनुशासनसार्थक्यस्य दर्शितत्वात्। स्मरतियोगे "स्मारयत्येनम्" इति भाष्यप्रयोगस्य दर्शितत्वाच्च।

जिघ्रतियोगेऽपि "घ्रापयत्योषधीगन्धं वाहान् सूतं स्पर्शयति कन्यां वरं परिचारिका" इत्यादिप्रयोग इष्ट एव।

"अभिवादिदृशोरात्मनेपदे वेति वाच्यम्" इति वार्तिकेनाभिवादिदृशोः कर्तरि कर्मत्वविकल्प आत्मनेपदसमभिव्याहारे ज्ञाप्यते तत्राभिवादेरात्मनेपदित्वात्। दृशः परस्मैपदित्वे तु न विकल्पः। किं तु दृशोः कर्तरि कर्मत्वमेव। "अभिवादयते विश्वामित्रं रामेण रामं वा दशरथः" इत्यादावभिवादेर्नमस्कारोऽर्थः। स चोत्कर्ष-

वत्तया ज्ञापनस्वरूपः। तत्रोत्कर्षप्रकारकज्ञानं व्यापारश्च खण्डशोऽर्थः। तत्राभिवादनविश्वामित्रादिविशेषितमाधेयत्वमुत्कर्षविशिष्टसमवायावच्छिन्नाधेयत्वीयस्वरूपसंबन्धेन ज्ञानेऽन्वेति। ज्ञानं तु प्रयोजकतया व्यापारेऽन्वेति। व्यापारश्च त्वत्तोऽहमपकृष्ट इति वाक्यादिस्वरूपः। उत्कर्षस्तु व्यापाराश्रयाभिवादकावधिको बोध्यः। रामपदोत्तरतृतीयाद्वितीययोः व्यापारान्वयिनी कृतिरर्थः। व्यापारस्तु प्रयोजकतया णिजर्थे दशरथव्यापारेऽन्वेति। विश्वामित्रनिष्ठोत्कर्षप्रकारकज्ञानप्रयोजकरामवृत्तिकृतिजन्यव्यापारप्रयोजकव्यापारानुकूलकृतिमान् दशरथ इति बोधः। द्वितीयार्थाधेयत्वस्य दर्शितसंसर्गेण ज्ञानेऽन्वयोपगमात् अभिवाद्यान्यस्याभिवाद्यगतोत्कर्षज्ञानेऽपि तमभिवादयते इति न प्रयोगः।

यदि चोत्कर्षप्रकारकज्ञानं भ्रमोऽपि धात्वर्थः, तदा उत्कर्षनिष्ठप्रकारतानिरूपितविशेष्यतया समवायेन च द्वाभ्यां संबन्धाभ्यामवच्छिन्नमाधेयत्वमभिवाद्यपदोत्तरद्वितीयाया अर्थ इति न काप्यनुपपत्तिः।

यदि चाभिवाद्यस्य व्यासङ्गवशात् उत्कर्षाज्ञानेऽपि अभिवादिप्रयोगः तदा उत्कर्षवत्त्वजिज्ञापयिषा धात्वर्थः फलम्, व्यापारस्तु पूर्वोक्त एव। तत्रोत्कर्षप्रकारकज्ञाननिष्ठोद्देश्यतावच्छेदकीभूतयोरुत्कर्षनिष्ठप्रकारतानिरूपितविशेष्यताकत्व समवेतत्वयोर्वर्तमानाभ्यामवच्छेदकत्वाभ्यां निरूपितयावच्छेदकतया संबन्धेनावच्छिन्नमाधेयत्वमभिवाद्यवाचिपदोत्तरद्वितीयाया अर्थः उत्कर्षजिज्ञापयिषायां फलीभूतायामन्वेति। सा च प्रयोज्यतया दर्शितव्यापारेऽन्वेति। शेषं तु पूर्ववत्।

अत्र विश्वामित्रसमवेतमुत्कर्षप्रकारतानिरूपितविशेष्यताकम् उत्कर्षप्रकारकज्ञानं भवतु इतीच्छाया उद्देश्यतावच्छेदकद्वयं समवेतत्वं दर्शितविशेष्यत्वं च। तदवच्छेदकता विश्वामित्रे स्पष्टा। सा चैका द्वयी वेत्यन्यदेतत्। विश्वामित्रस्य स्वविशेष्यतया निरूपितोत्कर्षप्रकारताकं ज्ञानं भवतु इतीच्छा। तत्रापि विशेष्यतानिरूपितप्रकारताकत्वावगाहने प्रकारतानिरूपितविशेष्यताकत्वावगाहननियमात् विशेष्यत्वस्योद्देश्यतावच्छेदकत्वमिति न विश्वामित्रस्योद्देश्यतावच्छेदकतावच्छेदकत्वहानिः।

भवतु वा प्रकारित्वस्योद्देश्यतावच्छेदकता, तथापि तन्निरूपकतावच्छेदकताघटितपरम्पराविशेष्यत्वविशेषणतया भासमानाभिवाद्यनिष्ठापि संबन्धः। तथा चान्यतरसंबन्धावच्छिन्नमाधेयत्वमभिवाद्यवाचिपदोत्तरद्वितीयाया अर्थः। तेन गालवसमवेतस्य विश्वामित्रसमवेतस्य शिवोत्कर्षज्ञानस्य विश्वामित्रविशेष्यकैगुणप्रकारकशिवोत्कर्षप्रकारकसमूहालम्बनज्ञानस्य वा इच्छायां विश्वामित्रमभिवादयत इति न

प्रयोगः। द्वितीयार्थस्य निरुक्ताधेयत्वस्यान्वेतुमयोग्यत्वात्। एवमभिवादिपर्याया नमस्करोत्यादयो बोध्याः।

एवं "सूर्यं दर्शयते माणवकेन माणवकं वा आचार्यः" इत्यादौ माणवक-पदोत्तरद्वितीयातृतीययोः दर्शनान्वयि समवेतत्वमर्थः।

"हृक्रोरन्यतरस्याम्"[१] इत्यनुशासनेन कर्मत्वविकल्पज्ञापकेन कर्मकार्य-द्वितीयाविकल्पो बोध्यते। अत एव गत्यादिसूत्रस्य गत्यादिकर्ता कर्मैवेति नियममात्रार्थकता न युज्यते। गत्यादिसूत्रेणैव गत्याद्यर्थकभिन्नानां कर्तरि कर्मत्व-विकल्पावगमेन हृक्रोः इत्यनुशासनस्य वैयर्थ्यप्रसङ्गात्।

तस्मात् गत्यादीनामेव कर्तेति नियमे गत्याद्यर्थकान्यधातुकर्तरि व्यवच्छिन्नस्य प्रतिप्रसवार्थं विधानार्थं वा हृक्रोः इत्यस्य पृथगारम्भः ण्यन्तयोः हृक्रोः अण्यन्त-हृकृकर्तरि कर्मत्वं विकल्पेन बोधयति। यथा "हारयति भारं भृत्येन भृत्यं वा प्रभुः" इत्यत्र भृत्यपदोत्तरद्वितीयातृतीययोः कृतिलक्षणं कर्तृत्वमर्थः हरणेऽन्वेति। गत्यर्थकतया हृञः कर्तरि कर्मत्वस्य नित्यताप्राप्तौ विकल्पार्थं ग्रहणम्। "सेतुं कारयति वानरैर्वानरान् वा राम" इत्यत्र कृञो यत्नार्थकत्वे वानरपदोत्तरतृतीया-द्वितीययोः समवेतत्वमर्थः। उत्पादनार्थत्वे तु कृतिरर्थ इति मन्तव्यम्।

प्रधानाप्रधानकर्मणोः आख्यातेनाभिधाने व्यवस्था

अत्र धात्वर्थकर्मणः प्रयोगेऽप्रयोगे वा धात्वर्थकर्तरि णिजर्थकर्मणि तिङादयः कर्मप्रत्यया भवन्ति यथा "दिगन्तं गम्यते गमितो वा रिपुः", "गम्यते गमितो वा रिपुः"; "धर्मं बोध्यते बोधितो वा माणवकः", "बोध्यते बोधितो वा माणवकः"; मिष्टं भोज्यते भोजितो वा अतिथिः", "भोज्यते भोजितो वा अतिथिः"; "पयः पाय्यते पायितो वा शिशुः", "पाय्यते पायितो वा शिशुः"; "ब्रह्म व्याहार्यते व्याहारितो वा माणवकः", "व्याहार्यते व्याहारितो वा माणवकः"; "मासमास्यते आसितो वा अतिथिः", "आस्यते आसितो वा अतिथिः" इति। तदुक्तम् —

प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः।।

इति। यत्र यादृशकर्तृत्वं द्वितीयार्थः तत्र तादृशकर्तृत्वं कर्माख्यातार्थः तद्वान् कर्मकृदर्थ इति मन्तव्यम्। यत्र धात्वर्थकर्तुः णिजर्थकर्मणो वा न प्रयोगः तत्र धात्वर्थकर्मण्यपि कर्मप्रत्यया भवन्ति — यथा गमितः प्रापितो वा गिरिः, बोधितो

[१] सू. १.४.५३

धर्मः, पायसं भोजितम्, पयः पायितं, वेदो व्याहारितः, मास आसितः, एवं सूर्यं दृश्यते दर्शितो वा माणवकः, केवलान्वयिनः सरणिं दर्शयतां दर्शनीयो वायम्। यद्धात्वर्थकर्तरि णिजर्थकर्मत्वं वैकल्पिकं तत्रापि णिजर्थकर्मण्येव कर्मप्रत्ययः "विश्वामित्रमभिवाद्यते अभिवादितो वा रामः", "अभिवाद्यते अभिवादितो वा रामः", "भारं हार्यते हारितो वा भृत्यः", "हार्यते हारितो वा भृत्यः", "सेतुं कार्यन्ते कारितो वा वानराः", एवं "सूर्यो दर्शितः"। अत एव "विस्तरो दर्शितः शब्दकौस्तुभे" इत्युपपद्यते। "विश्वामित्रोऽभिवादितः, भारो हारितः, सेतुः कारितः" इत्यादयः प्रयोगा अनुसन्धेयाः।

गमनानुकूलव्यापारवाचकस्य नयतेर्वहतेश्चाधिकस्य व्यापारस्य वाचकत्वेऽपि गत्यर्थकत्वस्य न हानिरिति गत्यर्थकतया नयतेर्वहतेश्च कर्तरि प्रसक्तं णिजर्थकर्मत्वं निषेधति "नीवह्योः प्रतिषेधो वक्तव्यः" इत्यनुशासनम्। तेन "नाययति वाहयति वा भारं भृत्येन" इति प्रमाणं, न तु 'नाययति वाहयति वा भारं भृत्यम्' इति।

वहेरनियन्तृकर्तृकस्येति वक्तव्यम् इति वार्तिकेन वहेः कर्तरि नियन्तृकर्तृकणिजर्थकर्मत्वस्याप्रतिषेधो ज्ञाप्यते। नियन्ता तु पशुशिक्षकः। तेन "वाहयति रथं वाहान् सूतः, वाहयति गोणीं बलीवर्दान् वणिक्" इत्याद्युपपत्तिः।

भोजनार्थतया आदिखादयत्योः कर्तरि प्रसक्तं णिजर्थकर्मत्वं निषेधति — "आदिखाद्योः प्रतिषेधो वक्तव्यः" इत्यनुशासनम्। तेन णिजन्तयोरादिखाद्योः अणिजन्तादिखादतिकर्तरि कर्मत्वनिषेधो ज्ञाप्यते। तेन "आदयति खादयति वा अन्नं वटुम्" इति।

"भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः" इत्यनुशासनं भक्षेः कर्तरि णिजर्थकर्मत्वं निषेधति। तेन भक्षयत्यन्नं वटुनेति प्रमाणं न तु भक्षयत्यन्नं वटुम् इति। हिंसार्थस्य कर्तरि न णिजर्थकर्मत्वनिषेधः। हिंसार्थत्वं तु हिंसानुगुणीभूतार्थकत्वं, न तु हिंसावाचकत्वम्। भक्षिणा मरणानुकूलव्यापारस्य क्वाप्यबोधनात्। तेन भक्षयति बलीवर्दान् सस्यमिति प्रयोग उपपद्यते। क्षेत्रस्थसस्यानां प्राणित्वात् सस्यभोजनस्य सस्यमरणानुकूलत्वात्।

अकर्मकतया शब्दायतेः कर्तरि प्रसक्तं णिजर्थकर्मत्वं निषेधति "शब्दायतेः प्रतिषेधो वक्तव्यः" इत्यनुशासनम्। तेन शब्दाययति सैनिकैः इति प्रमाणम्, न तु शब्दाययति सैनिकान् इति।

गत्यादिसूत्रार्थविषये जगदीशमतम्[१]

गतिभोजनधीप्राप्तिशब्दार्थध्रौव्यधातुषु।
कर्तृत्वं हेतुविहितण्यन्तेष्वेतेषु कर्मता।।

इत्यादिशाब्दिकस्मृतेः "गोपान् गमयति, द्विजान् भोजयति, गुरूननुज्ञापयति, शिष्यान् पाठयति, सुतान् स्नापयति" इत्यादौ मूलधात्वर्थस्य . अण्यन्तावस्थ-धात्वर्थस्य कर्तृत्वलक्षणं गौणमेव कर्मत्वं द्वितीयार्थः। तथा च गोपकर्तृक-गत्यनुकूलव्यापारवानित्याकारस्तत्र बोधः।

"पुत्रान् प्रीतिं प्रापयति" इत्यादौ च प्राप्तिर्न गतिः। "चैत्रो ग्रामं भावयते, ग्रामस्य भावकः" इत्यादौ प्राप्त्यर्थस्य भवतेः स्वार्थविहितण्यन्तस्य कर्तुः कर्मता-निरासाय णिचो हेतुविहितत्वमनुसृतम्।

हिंसायामेव भुज्यर्थभक्षेरेवं वहेरपि।
ण्यन्तस्य कर्तुः कर्मत्वं क्रियया वाहनं यदि।।

इति स्मरणात् "भक्षयति मूषिकां मार्जारं, भक्षयति लतां छागं" इत्यादावेव भक्षेः कर्तरि कर्मता, न तु "भक्षयत्योदनं देवदत्तेन" इत्यादौ। "भक्षयति प्रजाः परिजनैः कुनृपः" इत्यादौ तु न भोजनं भक्षेरर्थः। अपि तु हिंसनम्। "वाहयति रथमश्वान् सारथिः, वाहयति गोणीं वृषभान् वाहिकः" इत्यादाविव "वाहयति भारं भृत्येन धनिकः" इत्यादौ स्वचेष्टया वाहको न धनिकादिः।

गतिबुद्धिसूत्रार्थविषये गदाधरमतम्[२]

गत्यर्थादिभ्योऽन्यत्र च णिच्प्रत्ययप्रकृतिधात्वर्थकर्तृवाचकपदात् न द्वितीया, तादृशकर्तुः कर्मतातिदेशाविषयत्वात्। तेन "पाचयत्योदनं सहायेन" इत्यादय एव प्रयोगाः, न तु 'पाचयत्योदनं सहायम्' इत्यादयः।

केचित्तु पाकादिकर्तुः पाकादिकर्मत्वविरहेऽपि ण्यन्तसमुदायस्यापि धातुत्वेन तदर्थतावच्छेदकफलशालित्वेन सहायादेः "कर्तुरीप्सिततमं कर्म"[३] इति सूत्रेण कर्मतया पाचयत्योदनं सहायम्' इत्यादयः प्रयोगा अपि साधवः। अत एव "अजिग्रहत्तं जनको धनुस्तत्" इत्यादयो भट्टिप्रयोगा उपपद्यन्ते, ग्रहधातोः गत्यर्थकत्वविरहात् गतिबुद्धिसूत्रेण कर्मत्वाप्राप्तेः।

---

[१] पृ. ३३२
[२] व्युत्पत्तिवादे पृ. १४९
[३] सू. १.४.४९

ननु तर्हि गत्याद्यर्थकधातुस्थलेऽपि णिजन्तकर्मत्वमादाय "कर्तुरीप्सिततमं०" इति सूत्रेणैव कर्मत्वसिद्धेः गतिबुद्धिसूत्रं व्यर्थमिति चेत् — न। तत्सूत्रस्य नियमार्थत्वात्। गत्याद्यर्थकणिजन्तधातुकर्मवाचकपदात् द्वितीयैव भवति, न तु णिच्प्रकृतिधात्वर्थकर्तृत्वप्रयुक्ता तृतीयेति नियमशरीरम्। तेन "पाचयत्योदनं सहायेन" इत्यादिवत् "अजया ग्रामं यापयति" इत्यादयो न प्रयोगाः इत्याहुः।

एषामयमाशयः — "हेतुमति च"[१] इत्यनुशासनात् णिजर्थो हेतुकर्तृत्वम्। तच्च स्वतन्त्रकर्तृप्रेरणा अन्यनिष्ठकर्तृत्वनिर्वाहकव्यापाररूपा। कर्तृत्वं क्वचित् प्रयत्नः, क्वचिदाश्रयत्वादिकम्। यादृशधातूत्तराख्यातेन यादृशकर्तृत्वं बोध्यते तदुत्तरणिच्प्रत्ययेन तादृशकर्तृत्वनिर्वाहकव्यापारो बोध्यते। अत एव 'पाचयति' इत्यादौ पाककृतिनिर्वाहकः, 'ज्ञापयति' इत्यदौ ज्ञानाश्रयत्वनिर्वाहकः, 'नाशयति' इत्यादौ नाशप्रतियोगित्वनिर्वाहको व्यापारः प्रतीयते। एवं च ण्यन्तधात्वर्थतावच्छेदकं फलं कर्तृत्वमेव, निर्वाह्यस्यैव फलत्वात् तदाश्रयतया स्वतन्त्रस्य कर्तुः कर्मता। तादृशफलविशेषणतया स्वतन्त्रकर्तृवृत्तित्वविवक्षायां पाचयत्योदनं सहायमित्यादयः प्रयोगाः — सहायवृत्ति यत् ओदनपाककर्तृत्वं तन्निर्वाहकव्यापारानुकूलकृतिमानिति बोधः। यदा तु पाकादिविशेषणतया सहायकर्तृत्वं विवक्षितम्, तदा "पाचयत्योदनं सहायेन" इत्यादयः। सहायकर्तृको य ओदनपाकः तत्कर्तृत्वनिर्वाहकव्यापारानुकूलकृतिमानित्यन्वयबोधः।

"अजा ग्रामं याप्यते चैत्रेण" इत्यादौ संयोगावच्छिन्नक्रिया याधात्वर्थः। संयोगे ग्रामवृत्तित्वान्वयः। क्रियायाः णिजर्थकर्तृत्वेऽन्वयः। णिजर्थव्यापारे चैत्रेणेति तृतीयान्तार्थस्य चैत्रकर्तृकत्वस्यान्वयः। व्यापारस्य निर्वाह्यतासंबन्धेन कर्तृत्वेऽन्वयः। कर्तृत्वस्य आख्यातार्थाश्रयत्वे निरूपितत्वसंबन्धेनान्वयः। आश्रयत्वस्य प्रथमान्तार्थाजायामन्वयः। तथा च चैत्रकर्तृक व्यापारनिर्वाह्यं यत् ग्रामवृत्तिसंयोगानुकूलक्रियाकर्तृत्वं तदाश्रयोऽजा इति बोधः।

गतिबुद्धिसूत्रस्य विध्यर्थत्वपक्षः

ये तु गतिबुद्धीत्यादिसूत्रस्य संज्ञाविधायकत्वं वर्णयन्ति, तेषामयमाशयः। — व्यापार एव णिजर्थः। तत्र धात्वर्थ क्रियायाः स्वकर्तृत्वनिर्वाहकत्वसंबन्धेनान्वयः। अतो न कर्तुः कर्मत्वं सूत्रान्तरप्राप्तम्। धात्वर्थतावच्छेदकफलाश्रयस्यैव "कर्तुरीप्सिततमं कर्म"[२] इति सूत्रेण कर्मसंज्ञाविधानात्।

---

[१] सू. ३.१.२६
[२] सू. १.४.४९

तथा च कर्तरि तृतीयाया अपवादकं गतिबुद्धिसूत्रं विधायकमेव। तथा च "अजां ग्रामं यापयति" इति वाक्यात् अजाकर्तृका या ग्रामवृत्तिसंयोगजनकक्रिया तत्कर्तृत्वनिर्वाहकव्यापाराश्रयश्चैत्र इति बोधः।

"चैत्रेण याप्यते ग्राममजा" इत्यादौ आख्यातार्थः कर्तृत्वम् आश्रयत्वरूपम्। णिजर्थव्यापारस्य याधात्वर्थक्रियायां संयोगावच्छिन्नस्वनिर्वाह्यकर्तृतानिरूपकत्व-संबन्धेनान्वयः। णिजर्थव्यापारे तृतीयान्तार्थचैत्रकर्तृकत्वस्यान्वयः। याधात्वर्थ-तावच्छेदके संयोगे द्वितीयान्तार्थस्य ग्रामवृत्तित्वस्यान्वयः। याधात्वर्थक्रियायाः आख्यातार्थे आश्रयत्वेऽन्वयः। तस्य च प्रथमान्तार्थाजायामन्वयः। तथा च चैत्र-कर्तृकव्यापारनिर्वाह्यकर्तृतानिरूपकग्रामवृत्तिसंयोगजनकक्रियानिरूपितकर्तृत्वाश्रयो-ऽजा इत्याकारकः शाब्दबोधः — इति।

पदवाक्यरत्नाकरे[1] गत्यादिसूत्रार्थविचारः

पदवाक्यरत्नाकरे तूक्तम् —

गतिबुद्ध्यशनार्थेषु शब्दकर्मण्यकर्मके।
अणौ कर्ता स णौ कर्म नियमादथवा विधेः।।

गत्यर्थकाः गमिव्रज्यादयः, बुद्ध्यर्थाः ज्ञानत्वविशिष्टवाचकाः, ज्ञाबुध्यत्यादयः, न तु ज्ञानविशेषार्थाः जिघ्रत्यादयः। अशनार्थाः गलसंयोगफलकव्यापारवाचिनो भुज्याद्याः। शब्दकर्माणः शब्दवाचका इति केचित्। कर्मपदं कारकपरम्। तेन शब्दा-भिन्नकारकोपलक्षितक्रियावाचिन इत्यपरे। अकर्मकाः देशकालभावगन्तव्याध्वभिन्नैः कर्मभिरव्यपेक्षाः, न तु कर्मव्यपेक्षायोग्याः अविवक्षितकर्माणोऽपि गम्यादयः।

इदं च प्राचां मते। तथा हि तन्मतम् — गतिबुद्धिसूत्रस्य नियमार्थत्वे सिद्धे णिच्प्रकृतिधातूपात्तव्यापाराश्रयस्य चेत् कर्मसंज्ञा, तर्हि गत्याद्यर्थकधातूपात्तव्या-पाराश्रयस्यैवेत्याकारक एव नियमः। तस्य च सजातीयविषयकत्वात् सकर्मक-गत्याद्यर्थकधातुसजातीयसकर्मकधातुविषयक एवेति। "मासमासयति देवदत्तम्" इत्यत्र आसधातोरकर्मकतया उक्तनियमानाक्रान्तत्वेन "कर्तुरीप्सित०" सूत्रेणैव देवदत्तस्य कर्मसंज्ञासम्भवात् गत्यादिसूत्रेऽकर्मकग्रहणं व्यर्थं सत् न विद्यते देशकालादिभिन्नं कर्म येषां तेषामेव धातूनां बोधकम्। तेनोक्तस्थले कालात्मकस्य मासस्य कर्मणः सत्त्वेऽपि आसधातोरकर्मकत्वात् उक्तसूत्रेण देवदत्तस्य कर्म-संज्ञासिद्धिः। उक्तनियमेन तु तस्य मासादिकर्मकत्वेन सकर्मकतया गत्याद्यर्थ-कत्वाभावेन च न सा सिध्येत्।

---

[1] पृ. ५९४

ओदनादिकर्मणोऽविवक्षास्थले पचेरविवक्षितकर्मत्वादकर्मकत्वेऽपि देशादिभिन्नौदनादिस्वरूपकर्मसाकाङ्क्षत्वेन उक्तनियमाक्रान्तत्वात् "पाचयति चैत्रेण" इत्येव प्रमाणम्, न तु चैत्रमिति।

एवं च उक्तानां गत्याद्यर्थकधातूनां णिजभावे यस्य कर्तृसंज्ञा, तस्य णिच्समभिव्याहारे सति कर्मसंज्ञा भवति।

"अरातयो दिगन्तं गच्छन्ति, अरातीन् दिगन्तं गमयति" इत्यत्र अरातिपदोत्तरद्वितीयायाः कृतिरर्थः। तत्र प्रकृत्यर्थस्य आधेयतासंबन्धेनान्वयः। कृतेः जन्यतासंबन्धेन गमधात्वर्थे व्यापारेऽन्वयः। दिगन्तपदोत्तरद्वितीयायाः आधेयत्वमर्थः। तथा च गम्यर्थतावच्छेदकसंयोगजनको यो व्यापारः तदनुकूलव्यापारानुकूलकृतिमान् यज्ञदत्तः इत्याकारको बोधः।

"बोधयति धर्मं माणवाकान्" इत्यत्र माणवकपदोत्तरद्वितीयायाः आधारत्वमाधेयत्वं वा अर्थः। धर्मपदोत्तरद्वितीयायाः विषयत्वं विषयित्वं वा अर्थः। माणवकवृत्तिधर्मविषयकज्ञानानुकूलव्यापारानुकूलव्यापाराश्रय इति बोधः।

"एनं ब्रह्म व्याहारयति" इत्यत्र एतद्वृत्तिकृतिजन्यः यः ब्रह्मविषयकशब्दानुकूलो व्यापारः तदनुकूलव्यापाराश्रय इति बोधः।

"आसयत्यतिथिम्" इत्यत्र अतिथिवृत्तिकृतिजन्यं यत् आसनं तदनुकूलव्यापाराश्रयः इति बोधः।

वैयाकरणास्तु उक्तस्थलेषु णिच्प्रकृतिधात्वर्थान्वयी आश्रयो द्वितीयार्थ इत्याचक्षते।

ननु "गमयति दिगन्तमरीन्" इत्यत्र णिजन्तधात्वर्थव्यापारविशेषणीभूतगमनादिफलाश्रयस्य कर्मसंज्ञा कर्तुरीप्सितसूत्रेणैव सिद्धेति गतिबुद्धिसूत्रं व्यर्थमिति चेत् —

सत्यम्। नियमार्थमिदं सूत्रम्। णिजन्तप्रधानकर्मसंज्ञा ण्यन्तगत्यर्थादिष्वेव। अन्यत्र तु णिच्प्रकृतिधात्वर्थाधिकरणतया कर्तृसंज्ञैवावतिष्ठते। तेन "पाचयत्यन्नं चैत्रेण" इति प्रयोगः सूपपादः। तदाहुः —

गुणक्रियायां स्वातन्त्र्यात् प्रेषणे कर्मतां गतः।
नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते।।

इति। गुणक्रियायां — णिच्प्रकृत्यर्थव्यापारे स्वातन्त्र्यं साक्षात् आश्रयत्वम्। स्वधर्मेण — तृतीयया। तृतीयार्थः प्रयोज्यत्वम् अभिधानेनान्वेति। प्रेरणे — णिजर्थे कर्मतां गतोऽपि।

गत्यादिसूत्रार्थविषये नवीनमतम्

विधायकमेव गत्यादिकसूत्रम्। गत्यादिसूत्रविरहे परया कर्तृसंज्ञया कर्मसंज्ञायाः बाधप्रसङ्गात्। "कर्तुरीप्सिततमं कर्म[1]" इत्यतः "तत्प्रयोजको हेतुश्च"[2] इति कर्तृसंज्ञाविधायकसूत्रस्य परत्वात्। गत्यदिसूत्रसत्त्वे तु तस्य विशेषविधितया कर्तृसंज्ञाबाधकत्वम्।

न च णिच्प्रकृतिभूतधात्वर्थकर्तुः स्वातन्त्र्यविरहात् कर्तृसंज्ञायाः अप्रवृत्तेः तस्याः कर्मसंज्ञाबाधकत्वं नेति वाच्यम्। "हेतुमति च"[3] इति सूत्रेण हेतुसंज्ञकनामसमभिव्याहार एव णिज्विधानात् "तत्प्रयोजको हेतुश्च" इत्यनेन कर्तृप्रयोजकस्यैव हेतुसंज्ञाविधानात् चैत्रस्य कर्तृसंज्ञाविरहे तत्प्रयोजकस्य मैत्रस्य हेतुसंज्ञायाः अभावात् णिचोऽनुपपत्तेः। एवं च कर्तृसंज्ञामुपजीव्य कर्मसंज्ञा प्रवर्तते। णिचि सत्येव तत्प्रकृतिधात्वर्थस्य फलत्वमादाय तदाश्रयस्य कर्मसंज्ञा। णिच् तु हेतुसंज्ञां सा कर्तृसंज्ञामिति परम्परया कर्मसंज्ञोपजीव्यत्वं कर्तृसंज्ञायाः। एवमन्तरङ्गत्वमपि कर्तृसंज्ञायामस्ति।

कर्तृसंज्ञासापेक्षणिच्प्रत्ययसापेक्षत्वं कर्मसंज्ञायाः इत्यधिकसापेक्षत्वात् बहिरङ्गता। कर्तृसंज्ञायास्तु तदपेक्षया अल्पसापेक्षत्वादन्तरङ्गता। ततश्च कर्तृसंज्ञाबाधकतया गत्यादिसूत्रं कर्मसंज्ञाविधायकम्। तदुक्तमभियुक्तैः —

परत्वादन्तरङ्गत्वादुपजीव्यतया तथा।
प्रयोज्यस्यास्तु कर्तृत्वं गत्यादेर्विधितोचिता।।

इति। इति व्याकुर्वते।

ननु कर्तृसंज्ञापवादेन णिच्प्रकृतिधात्वर्थव्यपाराश्रयस्य गत्यादिसूत्रेण कर्मसंज्ञाविरहेण दिगन्तस्य कर्तुरीप्सिततमत्वं नास्तीति कर्मसंज्ञा न स्यादिति चेत् — उच्यते।

संज्ञान्तरासमाविष्टे स्वातन्त्र्ये परिभाषितः।
कर्तृशब्दः स्वतन्त्र्येऽर्थे गौणो वाचक एव वा।।

यद्यपि कर्तृशब्दः संज्ञान्तरानवरुद्धे स्वतन्त्रे धातूपात्तव्यापारवति पाणिनिना परिभाषितः। तथापि "कर्तुरीप्सिततमं कर्म" इत्यत्र कर्तृपदं न कर्तृसंज्ञापरम्, किंतु लक्षणया धातूपात्तव्यापाराश्रयात्मकस्वतन्त्रपरम्। उक्तोदाहरणे अरीणां कर्तृ-

---

[1] सू. १.४.४९
[2] सू. १.४.५५
[3] सू. ३.१.२६

संज्ञाविरहेऽपि धातूपात्तव्यापाराश्रयत्वरूपस्वातन्त्र्यस्याक्षततया तदीप्सितस्य दिगन्तस्य कर्मसंज्ञा उपपद्यते। अत एव —

प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्।
अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः।।

इति भाष्ये कर्मसंज्ञावरुद्धेऽपि कर्तृशब्दप्रयोग उपपद्यते।

पदवाक्यरत्नाकरे[1] गत्यादिभिन्नधातुयोगे द्वितीयार्थविचारः

गत्यादिभिन्नानामपि वक्ष्यमाणधातूनां केषांचित् कर्तरि निरुक्तसूत्रेणाप्राप्तायाः कर्मसंज्ञायाः विधानम्, केषांचित् प्राप्तायाः निषेधः, केषांचिच्च विकल्पः इति तानप्यत्रैव प्रसङ्गात् दर्शयितुमाह —

यथानुशासनं ण्यन्तधातुयोगेन कर्तरि।
कर्मसंज्ञाविधिक्षेपविकल्पानां व्यवस्थितिः।।

जल्प-श्रु-ग्रह-दशां ण्यन्तधात्वर्थकर्तरि कर्मसंज्ञाविधिः — "पुत्रमक्षराणि जल्पयति श्रावयति ग्राहयति दर्शयति वा" इति प्रयोगात्।

यत्तु शृणोतेः श्रोत्रजन्यशब्दविषयकप्रत्यक्षार्थकस्य शब्दकर्मकतया कर्तरि कर्मसंज्ञासिद्धेः "जल्पतिप्रभृतीनामुपसंख्यानम्"[2] इति पुनर्विधानमनुचितमिति। तन्न। श्रु धातोः श्रावणप्रत्यक्ष इव शाब्दबोधार्थे श्रुधातोः प्रयोगात् तथा च धर्मं श्रावयति सुतम् इत्यादिप्रयोगोपपत्तये विध्यन्तरस्यावश्यकत्वात्। अन्यथा शाब्दत्वावच्छिन्नवाचकस्य श्रुधातोरुक्तस्थले गत्याद्यर्थकत्वविरहेण शब्दकर्मकत्वाभावेन तद्योगे सुतस्य कर्मसंज्ञानापत्तेः।

न च शाब्दबोधवाचकस्यापि श्रुधातोः बुद्ध्यर्थकतया "गतिबुद्धि०"[3] इत्यादिसूत्रेण ग्रहणमिति वाच्यम्। बुद्धिसामान्यवाचिनामेव हि सूत्रे बुद्ध्यर्थकत्वेन ग्रहणम्, न तु बुद्धिविशेषार्थानाम्। "दृशेश्च"[4] इति पृथगनुशासनात्। अन्यथा दर्शनस्य बुद्धिरूपतया बुद्ध्यर्थकत्वेनैव ग्रहणात् तद्वैयर्थ्यापत्तेः।

न च सूत्रे बुद्धिपदस्य ज्ञानसामान्यार्थकत्वे "स्मारयत्येनं गुल्मः स्वयमेव" इत्यादौ स्मरणरूपज्ञानविशेषकर्तुः कथं कर्मसंज्ञेति वाच्यम्। "णेरणौ०"[5] इति

---

[1] पृ. ६०२-६०६
[2] वा. ११०७
[3] सू. १.४.५२
[4] वा. ११०८
[5] सू. १.३.६७

सूत्रस्थभाष्ये "स्मरयत्येनं वनगुल्मः स्वयमेव" इति प्रयोगवशात् स्मृधातुयोगे स्मरणकर्तरि कर्मत्वविधेरुन्नयनात्। परे तु "शब्दकर्म" इत्यत्र कर्मपदं कारकवाचि। तथा च यद्रूपावच्छेदेन शब्दः कारकं तद्रूपविशिष्टवाचकधातुरेव शब्दकर्म इत्युच्यते। श्रावणत्वावच्छेदेन शब्दः कर्म शाब्दबोधत्वावच्छेदेन करणमिति उभयार्थकस्य शृणोतेः उपग्रह इति शृणोतौ न पृथग्विधिः।

एवं जल्पतिप्रभृतीनामुपसंख्यानम् इति वार्तिके प्रभृतिपदेन न ग्रहधातोः ग्रहणम्। "पुत्रमक्षराणि ग्राहयति" इत्यत्र च ग्रहधातोः ज्ञानार्थकतया गत्यादिसूत्रेणैव तदाश्रयस्य पुत्रस्य कर्मसंज्ञासिद्धेः।

यत्र च ग्रहेर्न ज्ञानार्थकत्वम्, किं तु संयोगाद्यात्मक सम्बन्धानुकूलव्यापारार्थकत्वं तत्र तत्कर्तुः कर्मसंज्ञा नेष्यत एव। यथा —

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम्।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच।।

इत्यत्र जायाप्रतिग्राहितगन्धमाल्यामिति समासस्य ग्राहेः द्विकर्मकत्वे अनुपपत्तिः। तत्र हि जायया प्रतिग्राहिते गन्धमाल्ये यया सा इति बहुव्रीहिसमास इष्यते। जायाकर्तृकव्यापारजन्ययत्कर्तृकग्रहणकर्मणी गन्धमाल्ये इति विग्रहवाक्यात् बोधः। जायाकर्तृकव्यापारजन्यगन्धमाल्यकर्मकग्रहणकर्त्री इति समासात् बोधः। ग्रहेः अण्यन्तावस्थायां कर्त्र्याः धेन्वाः ण्यन्तावस्थायां कर्मसंज्ञायां तु तादृशस्य कर्तृरूपस्य कर्मणः क्तप्रत्ययेनोक्ततया जायया गन्धमाल्ये प्रतिग्राहितामिति विग्रहः वाच्यः। तत्र धेन्वाः समस्यमानपदभिन्नपदार्थत्वाभावेन समस्यमानपदयोः भिन्नविभक्तिकत्वेन सामानाधिकरण्याभावेन च बहुव्रीहिर्न स्यात्। तत्पुरुषे तु गन्धमाल्यशब्दस्य प्रतिग्राहितशब्दात् पूर्वनिपातापत्तिः। कथंचिदुत्तरनिपातेऽपि "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः"[१] इति सूत्रेण नपुंसकलिङ्गतापत्तिः।

ग्राहेर्द्विकर्मत्वाभावे तु क्तप्रत्ययेन कर्तृरूपकर्मणः अनुक्ततया तस्यान्यपदार्थत्वात् बहुव्रीह्युपपत्तिः। एकार्थीभावमहिम्ना च जायाकर्तृकव्यापारजन्यगन्धमाल्यकर्मकप्रतिग्रहकर्त्रीमित्यर्थलाभः लक्षणया वा।

न च जायया प्रतिग्राहिते गन्धमाल्ये यामिति कर्मणि बहुव्रीहिरस्तु इति वाच्यम्। "ण्यन्ते कर्तुश्च कर्मणः" इत्यनुशासनात् प्रयोज्यकर्मण्येव क्तप्रत्ययस्य साधुत्वात् गौणे कर्मणि गन्धमाल्यरूपे तदसंभवात् — इत्याहुः।

---

[१] सू. २.४.२६

इदं मतं भट्टोजिनोऽत्र प्रतिपादितम् गोकुलनाथोपाध्यायैः। तथा हि प्रौढमनोरमायामुक्तम्[1] — ग्रहेस्तु द्विकर्मकत्वं यद्यपि सुधाकरादीनां संमतम्, तथापि बहूनामसंमतम्। अत एव "अजिग्रहत्तं जनको धनुस्तत्" इति भट्टिप्रयोगम् अजिग्रहत् — बोधितवानिति व्याचख्युः। तथा — "अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक" इत्यत्र ग्राहयितुम् — उद्वाह्यत्वेन बोधयितुम् इति। युक्तं चैतत् — ग्राहेर्द्विकर्मकत्वे हि "जायाप्रतिग्राहितगन्धमाल्याम्" इत्यत्र क्तेन प्रयोज्यायाः धेनोः अभिधानं स्यात्, ण्यन्ते कर्तुश्च कर्मणः इत्युक्तेः। ततश्च जायया गन्धमाल्ये प्रतिग्राहितामिति स्यात्। (एवं च व्यधिकरणत्वात् अन्यपदार्थाभावाच्च बहुव्रीहिर्न स्यात्।) सिद्धान्ते तु "जायया प्रतिग्राहिते गन्धमाल्ये ययेति विग्रहः। जायानिष्ठप्रेरणविषयीभूतं गन्धमाल्यकर्मकं यत् प्रतिग्रहणं तत्कर्त्रीमित्यर्थः। अन्यपदार्थान्तर्भावेणैव विशेषणविशेष्यभाववैपरीत्येनैव एकार्थीभावकल्पनात्" इति।

गत्यादिसूत्रेण प्राप्ते कर्मवद्भावे क्षेपः — निषेधः यथा — "नीवह्योर्न" "आदिखाद्योर्न" "भक्षेरहिंसार्थस्य न" "शब्दाययतेर्न" इति वार्तिकानि। गतिविशिष्टव्यापारवाचकतया गत्यर्थयोः नीवह्योः, आदिखाद्योः, अहिंसार्थस्य भक्षेः, अकर्मकस्य शब्दायतेश्च अणौ कर्तुः णौ कर्मसंज्ञा न। तेन नाययति वाहयति भारं भृत्येन, आदयति खादयति वा अन्नं वटुना, शब्दाययति सैनिकैः इत्यादयः प्रयोगाः सूपपादाः।

"भक्षयति बलीवर्दान् सस्यम्" इत्यादौ भक्षिर्हिंसार्थः। क्षेत्रवृत्तिसस्यानां प्राणित्वात्। एतदुक्तं भवति — अच्छिन्नवृक्षादीनामपि चेष्टाश्रयत्वेन शरीरवत्त्वस्य, जीवात्मसंबन्धेन चेष्टायाः प्राणवायुसंबन्धात् प्राणित्वम्। हिंसा च चरमप्राणशरीरध्वंसानुकूला क्रियैवेति क्षेत्रवृत्तिसस्यानां भक्षणं हिंसारूपमेवेति तत्र कर्तुर्न कर्मत्वमिति।

विभक्त्यर्थनिर्णये[2] गतिबुद्धिसूत्रव्याख्यानम्

"गमयति दिगन्तमरातीन्" इत्यादौ अरात्यादेः कर्मत्वोपपत्तये "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ"[3] इत्यनुशासनम्। गत्यर्था गमिव्रज्यादयः। बुद्ध्यर्थाः बुध्यतिजानात्यादयः। प्रत्यवसानं भोजनं तदर्था अशिभुज्यादयः। शब्दकर्माणः शब्दाभिन्नकर्मकारकोपलक्षितक्रियावाचिनः वदत्यध्ये-

---

[1] पृ. ८६६

[2] पृ. १५५

[3] सू. १.४.५२

त्यादयः। अकर्मकाः देशकालभावगन्तव्याध्वभिन्नकर्मान्वयायोग्यार्थकाः आसिरम्यादयः। अत्र "सनाद्यन्ता धातवः"[१] इत्यनेन णिजन्तस्य धातुत्वे णिच्प्रकृतिधात्वर्थस्य फलतया तद्वतोऽरात्यादेः कर्मत्वं स्पष्टमिति कर्तुरीप्सिततमानीप्सिताभ्यां कर्मसंज्ञासिद्धौ गत्यादिसूत्रं नियमार्थम्। तेन गमयति दिगन्तमरातीन् इत्यादावरात्यादीनामिव "पाचयत्यन्नं यज्ञदत्तेन देवदत्त" इत्यादौ यज्ञदत्तादीनां कर्मत्वं नेष्टमिति पाचयत्यादियोगे न कर्मसंज्ञा भवतीति नियमार्थमिदं सूत्रम्। एवं च "पाचयत्यन्नं यज्ञदत्तेन देवदत्त" इत्येव प्रमाणं, न तु "पाचयत्यन्नं यज्ञदत्तं देवदत्त" इति। तदाहुः —

गुणक्रियायां स्वातन्त्र्यात् प्रेरणे कर्मतां गतः।
नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते।। इति।

गुणक्रियायां णिच्प्रकृतिधात्वर्थेऽप्रधाने स्वातन्त्र्यात् साक्षादाश्रयत्वात् स्वधर्मेण — स्वधर्मस्वातन्त्र्यस्याभिधायकेन तृतीययेति यावत्, प्रेरणे — णिजर्थे कर्मतां गतः, अपीति शेषः। नियमात् गत्यादिकर्मण्येव कर्मसंज्ञाज्ञापनादिति प्राचीनाः।

विभक्त्यर्थनिर्णये नवीनास्तु

गत्यादिसूत्रं विधायकमेव। अन्यथा परया कर्तृसंज्ञया बाधात् गत्याद्यणिजन्तकर्तुः णिजन्तेऽपि कर्मत्वप्रसङ्गात् प्रयोज्ये कर्तृसंज्ञां विना णिच एवानुत्पत्तेः। हेतुमति हि णिच् विधीयते। कर्तुः प्रयोजको हेतुरिति कर्तृसंज्ञासापेक्षतया कर्मसंज्ञायामुपजीव्यत्वात् कर्तृसंज्ञा बलवती। एवं स्वकारकविशिष्टा क्रिया णिजर्थेऽन्वेतीति गुणक्रियाकारकसंज्ञा अन्तरङ्गतया बलवती। तदुक्तमभियुक्तैः —

परत्वादन्तरङ्गत्वादुपजीव्यतया तथा।
प्रयोज्यस्यास्तु कर्तृत्वं गत्यादेर्विधितोचिता।।

कर्तृत्वमस्तु, तथापि गत्यादेः गत्यादिसूत्रस्य विधिता विधायकतेत्यर्थः। तथा च गत्यादिसूत्रेण कर्तृसंज्ञापवादेन कर्मसंज्ञाविधानमिति।

नन्वेवमरात्यादेः कर्तुः कर्मसंज्ञया कर्तृसंज्ञाबाधे दिगन्तस्य कर्मेप्सिततया कर्त्रीप्सिततमत्वाभावात् कर्मसंज्ञाविरहात् गमयति दिगन्तमरातीनित्यादौ दिगन्तमिति द्वितीयानुपपत्तिरिति चेत् —

न। "कर्तुरीप्सिततमं कर्म"[२] इति सूत्रे कर्तृशब्दस्य कर्मसंज्ञाविशिष्टार्थकत्वाभावात्, धातूपात्तव्यापाराश्रयस्वतन्त्रमात्रार्थकत्वात्। एवं च दर्शितस्वा-

---

[१] सू. ३.१.३२
[२] सू. १.४.४९

तन्त्र्यस्य अरात्यादावनपायात् कर्तुरीप्सिततमत्वात् दिगन्तमिति द्वितीयाया नानुपपत्तिरिति वदन्ति।

वस्तुतस्तु प्राचीनमतेऽपि परया कर्तृसंज्ञया न कर्मसंज्ञायाः बाधः "गमयति दिगन्तमरातीन्" इत्यादौ अरात्यादेः, "गां पयो दोग्धि" इत्यादौ पयस इव। न च दुहादेः प्रधानव्यापारस्य गोपाले सत्त्वात् दुग्धे असत्त्वात् पयसो न कर्तृसंज्ञाप्रसक्तिरिति वाच्यम्। तथा सति णिजन्तस्य धातुत्ववादिनां प्राचामपि मते प्रधानव्यापारस्य अरात्यादावसत्त्वात् णिजर्थस्यैव प्राधान्यात्।

एवं गत्यादिसूत्रे कर्तृशब्दो न कर्तृसंज्ञाविशिष्टार्थकः, किं तु दर्शितस्वतन्त्रार्थक इति कर्मसंज्ञा न कर्तृसंज्ञामुपजीवति।

एवं "हेतुमति णिच्" इति सूत्रस्य कर्तृप्रयोजको हेतुरिति व्याख्यानेऽपि कर्तृशब्दः स्वतन्त्रार्थक एवेति णिजुत्पत्तावपि न कर्तृसंज्ञापेक्षेति न कर्मसंज्ञा कर्तृसंज्ञामुपजीवति।

एवं गुणक्रियाकारकं न प्रधानक्रियाकारकं भवतीति नान्तरङ्गतयापि कर्तृसंज्ञा बलवती।

न चैवमरात्यादेः प्रधानव्यापारानाश्रयत्वे दिगन्तस्य कर्तुरीप्सिततमत्वाभावात् कर्मसंज्ञानुपपत्तिरिति वाच्यम्। णिजन्तस्य धातुत्ववादिनां गुणफलवतो दिगन्तस्य "गां पयो दोग्धि" इत्यादौ पयस इव अकथितमित्यनेन कर्मसंज्ञासंभवात्। अत एव अकथितसूत्राव्यवधानेन गत्यादिसूत्रमुक्तम्।

नन्वेवं "पाचयति चैत्रेण मैत्र" इत्यादौ तृतीयानुपपत्तिः। चैत्रस्य प्रधानव्यापारानाश्रयतया कर्तृत्वाप्रसक्तेरिति चेत् — न। "जलेनाभिषिञ्चति" इत्यादौ कर्मणः करणतया "चैत्रेण पाचयति" इत्यत्रापि करणार्थकतृतीयोपपत्तेः। चैत्रव्यापारजन्यत्वरूपस्तृतीयान्तार्थः पच्यर्थेऽन्वेति। तत्र फले व्यापारे चान्वय इत्यन्यदेतत्।

भवतु वा प्रधानीभूतस्य धात्वर्थस्य तदन्विततिङर्थस्य वा आश्रयः कर्ता। स च धातुः भूवादिः अणिजन्तः णिजाद्यन्तश्च। एवमणिजन्तधात्वर्थकर्तृतया प्रयोज्यस्य "चैत्रेण पाचयति" इत्यत्र तदर्थकतृतीयोपपत्तिः। णिजन्तार्थकर्तृतया प्रयोजकस्य "मैत्रेण पाच्यत" इत्यत्र तदर्थकतृतीयोपपत्तिः। एवं "कर्तृकरणयोस्तृतीया"[१] इति सूत्रे कर्तृशब्दो दर्शितार्थक एव, न तु कर्तृसंज्ञाविशिष्टार्थकः।

---

[१] सू. २.३.१८

नन्वेवं गमयति दिगन्तमरातीनित्यादौ अरात्यादौ दर्शितकर्तृत्वस्यानपायात् अरातिपदात् तृतीयाप्रसङ्गः। न च गत्यादिकर्तुः कर्मत्वात् कथं तृतीयाप्रसङ्ग इति वाच्यम्। गत्यादिसूत्रस्य नियमार्थत्वात् कर्मसंज्ञाविधायकत्वाभावात्। णिजन्तार्थ-कर्मत्वस्य अणिजन्तार्थकर्तृत्वस्य च उभयस्यारात्यादौ सत्त्वात् द्वितीयातृतीय-योरेकशेषस्य कर्तुमशक्यत्वात् उभयविधप्रयोगस्य साधुत्वप्रसङ्गादिति चेत् —

मैवम्। गत्यादिसूत्रस्य द्विविधनियमार्थकत्वात्। नियमस्तु गत्यादीनामेव कर्ता कर्मेति, गत्यादीनां कर्ता कर्मैवेति। कर्मैवेत्येवकारेण कर्मकार्यातिरिक्तं तृतीयादिकं व्यवच्छिद्यते। एवम् "आकडारादेका संज्ञा या परानवकाशा च" इत्यत्रापि परकार्यातिरिक्तस्य अनवकाशकार्यातिरिक्तस्य च कार्यस्य व्यवच्छेदः प्रतीयत इति न काप्यनुपपत्तिः।

"गमयति दिगन्तमरातीन्" इत्यादौ अरातिपदोत्तरद्वितीयायाः कर्तृत्वमर्थः। गत्यादिसूत्रे कर्तेति भावप्रधानो निर्देशः। कर्तृत्वं तु "गमयत्यरातीन्" इत्यादौ कृतिः।

"बोधयति धर्मं माणवकम्" इत्यादौ माणवकपदोत्तरद्वितीयायाः समवेतत्व-लक्षणं कर्तृत्वमर्थः।

"भोजयति मिष्टमतिथीन्" इत्यादौ अतिथिपदोत्तरद्वितीयायाः कृतिलक्षणं तदर्थः। गत्यादिसूत्रे भोजनग्रहणं पानमप्युपलक्षयति। तेन 'पाययन्त्यः शिशून् पयः' इत्यादिप्रयोगोऽप्युपपद्यते। अत्रापि शिशुपदोत्तरद्वितीयायाः कृतिरेवार्थः।

ब्रह्मैनं व्याहारयति इत्यत्र एतत्पदोत्तरद्वितीयायाः कृतिलक्षणं तदर्थः। द्वितीयार्थो नानाविधकर्तृत्वं णिच्प्रकृतिधात्वर्थे प्रधानेन तत्संसर्गेणान्वेति।

विभक्त्यर्थनिर्णये[१] व्युत्पत्तिवादानुवादः

केचित्तु — णिजन्तसमुदायस्य धातुतया णिजर्थविशेषणधात्वर्थस्य फलतया तद्वतः कर्तुः कर्मत्वं स्पष्टमेव। "हेतुमति च"[२] इत्यनुशासनात् णिचो हेतुकर्तृत्वं कर्तृप्रयोजकत्वमर्थः। कर्तृत्वं च णिच्-प्रकृतिधात्वर्थवत्त्वं तदन्विततिङर्थवत्त्वं वा। तदपि क्वचित् प्रयत्नः, क्वचिदाश्रयत्वादिकम्। यादृशधातूत्तराख्यातेन यादृशं कर्तृत्वं बोध्यते, णिच्प्रत्ययेन तादृशकर्तृत्वनिर्वाहकव्यापारो बोध्यते। स च "पाचयति" इत्यादौ पाककृतिनिर्वाहकः, "ज्ञापयति" इत्यादौ ज्ञानाश्रयत्वनिर्वाहकः, "नाश-

---

[१] पृ. १५९
[२] सू. ३.१.२६

यति'' इत्यादौ नाशप्रतियोगित्वनिर्वाहकः व्यापारः प्रतीयते। निर्वाहकत्वं च स्वरूपसंबन्धविशेषः न तु जनकत्वम्। अतो 'ज्ञापयति' इत्यादौ नानुपपत्तिः।

एवं च णिच्-प्रकृतिधात्वर्थकर्तृत्वस्य फलतया तद्वतः स्वतन्त्रस्य कर्तुः कर्मत्वात् तादृशफलविशेषणतया स्वतन्त्रकर्तृवृत्तित्वविवक्षायां 'पाचयत्योदनं सहायम्' इत्यादयः प्रयोगाः। यदा तु पाकादिविशेषणतया सहायादिकर्तृत्वं विवक्षितम् तदा 'पाचयत्योदनं सहायेन' इत्यादयः।

अथ यत्र चैत्रमैत्रोभयकर्तृकः एकः पाकः तत्र चैत्रमात्रं प्रयोजयति 'यज्ञदत्ते मैत्रेणायं पाचयति' इति प्रयोगापत्तिः, मैत्रकर्तृकपाकप्रयोजकव्यापारस्य दर्शितस्थले यज्ञदत्ते सत्त्वात्। तादृशप्रयोगवारणाय णिजर्थव्यापारविशेषणधात्वर्थकर्तृत्वे प्रातिपदिकार्थान्विताधेयत्वस्य तृतीयान्तार्थस्यान्वयो वाच्यः। एवं च 'मैत्रं पाचयति' इत्यादिवाक्यजन्यबोधावैलक्षण्यात् द्वितीयातृतीययोरन्वयतात्पर्यभेदेन व्यवस्था न युक्तेति चेत् —

न। अगत्या पाकादिविशेषणतयान्वितायास्तृतीयार्थकृतेः पारतन्त्र्येण णिजर्थविशेषणकर्तृत्वे अभेदान्वयोपगमेन दर्शितप्रयोगवारणसंभवात्। धात्वर्थकर्तृत्वं निर्वाहकव्यापारश्च खण्डशो णिजर्थ इति नैकदेशान्वयशङ्केति।

विभक्त्यर्थनिर्णये तत्खण्डनम्

तच्चिन्त्यम्। 'चैत्रं पाचयति' इत्यादिप्रयोगोपगमे गत्यादिसूत्रप्रणयनवैयर्थ्यप्रसङ्गात्। नियमार्थतापक्षे सूत्रेण गत्यादिकानामेव कर्तुः कर्मत्वज्ञापनात्।

न च गत्यादिकर्ता कर्मैवेति नियमस्य सूत्रेण ज्ञापनात् 'देवदत्तेन ग्रामं गमयति' इत्यादिको न प्रयोगः, प्रयोगश्च ''अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक'' इत्यादिक उपपद्यत इति वाच्यम्। गत्यादिकानामेव कर्ता कर्मेति, गत्यादिकानां कर्ता कर्मैवेति द्विविधनियमस्य सूत्रेण ज्ञापनात् देवदत्तेन गमयतीत्यादिप्रयोगानुपपत्तेः। अयाचितारमित्यादेरन्यथोपपत्तेश्च।

तथा हि — सुतां ग्राहयितुं देवमयाचितारं न शशाक न कृतवानित्यर्थे देवदत्तस्य ग्राह्यर्थेन ह्यन्वयः। अत एव ''जायाप्रतिग्राहितगन्धमाल्याम्'' इत्यत्र कर्मप्रत्ययस्य क्तस्य गौणकर्मणि साधुत्वमवसीयते। अन्यथा ''ण्यन्ते कर्तुश्च कर्मणः'' इत्यनुशासनेन धात्वर्थकर्तरि कर्मण्येव तस्य साधुतया गौणकर्मण्यसाधुत्वप्रसङ्ग इति।

सविषयकधातुसमभिव्याहारस्थले द्वितीयार्थनिरूपणम्

वैयाकरणभूषणसारे[१]

धात्वर्थक्रियाजन्यफलशालित्वं कर्मणः लक्षणम् इत्युक्त्वा "घटं जानाति" इत्यादिसविषयकज्ञानार्थकधातुसमभिव्याहारस्थले कर्मत्वमित्थं निरूपितम् — "जानातीत्यत्र आवरणभङ्गरूपज्ञाधात्वर्थफलाश्रयत्वात् कर्मत्वम्" इति। ज्ञा धातोः आवरणभङ्गरूपं फलं ज्ञानं चार्थः। आवरणं चाज्ञानम्। घटविषयकज्ञानेन हि घटविषयकाज्ञानस्य भङ्गो नाशो भवति। तथा च धात्वर्थज्ञानजन्यावरणभङ्ग-रूपफलाश्रयतया घटस्य कर्मत्वमिति तदाशयः। वस्तुतस्तु ज्ञानानुकूलव्यापार एव ज्ञाधात्वर्थः। ज्ञानं फलम्। विषयता फलतावच्छेदकसंबन्धः। तथा च विषयता-संबन्धेन ज्ञानरूपफलाश्रयतया घटस्य कर्मत्वमिति भूषणसारव्याख्यायाम्।

बृहन्मञ्जूषायाम्[२]

"घटं करोति" इत्यत्रोत्पत्तिरूपधात्वर्थफलाश्रयत्वात् कर्मत्वम्। "घटं जानाति" इत्यादौ ज्ञानजन्यविषयावच्छिन्नाज्ञानभङ्गरूपफलशालित्वात् कर्मत्वम्। न चैवमपि नष्टे भाविनि च तं जानातीत्यनुपपत्तिः इति वाच्यम्। तत्रापि सूक्ष्मरूपेण स्थित्युपगमात्। न्यायनये विषयतायाः अतीते वृत्तिस्वीकारवत् आवरणतद्भङ्ग-योरपि वृत्तिस्वीकारे क्षत्यभावाच्च।

यद्वा "जानाति, इच्छति" इत्यादौ ज्ञानेच्छाद्यनुकूलो व्यापारो धात्वर्थः। स च ज्ञानजनको मनश्चक्षुस्संयोगादिरेव। अत एव 'मनो जानाति' इत्यादयः प्रयोगाः संगच्छन्ते। इच्छानुकूलश्च व्यापारः ज्ञानादिः। फलतावच्छेदकसंबन्धो विषयता।

यद्वा विषयतानिरूपकज्ञानेच्छादिरेव व्यापारः धात्वर्थः। न च विषयताया ज्ञानाजन्यत्वेन कथं फलत्वमिति वाच्यम्। कर्तृप्रत्ययसमभिव्याहारस्थले तद्धा-त्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयतद्धात्वर्थत्वं फलत्वमिति निर्वचनेन अदो-षात्। — इति।

व्युत्पत्तिवादे[३]

ज्ञानादिरूपसविषयकवस्त्वभिधायकधातुसमभिव्याहृतद्वितीयायाः प्रचीनामते निरूपकतासंबन्नधेन धात्वर्थान्वयि विषयत्वमर्थः। तत्र प्रकृत्यर्थस्याधेयता-

---

[१] पृ. १५१
[२] पृ. १४९
[३] पृ. १५५

संबन्धेनान्वयः। तथा च 'घटं जानाति' इत्यतः घटनिष्ठविषयतानिरूपकज्ञानाश्रय इति बोधः। परं तु घटं न जानातीत्यतः घटनिष्ठविषयतानिष्ठनिरूपकत्व-संबन्धावच्छिन्नप्रतियोगिताकाभावः धात्वर्थे ज्ञाने बोधनीयः। स चाप्रसिद्धः। निरूपकत्वस्य वृत्त्यनियामकतया अभावप्रतियोगितानवच्छेदकत्वेन तदवच्छिन्ना-भावाप्रसिद्धेः इत्यालोच्य नवीनाः विषयित्वं द्वितीयार्थः। तत्र निरूपितत्वसंबन्धेन प्रकृत्यर्थस्यान्वयः। विषयित्वस्य आश्रयतासंबन्धेन ज्ञानेऽन्वयः। घटनिरूपित-विषयित्वाश्रयज्ञानवान् इति 'घटं जानाति' इत्यतो बोधः। 'घटं न जानाति' इत्यतः घटनिरूपितविषयित्वनिष्ठाश्रयतासंबन्धावच्छिन्नप्रतियोगिताकाभावाश्रयज्ञानवानिति बोधः इति वर्णयन्ति। घटादिनिष्ठं ज्ञानादिकर्मत्वं च ज्ञानादिनिरूपितविषयत्वमेव। विषयत्वादौ च द्वितीयायाः लक्षणैव, न तु शक्तिः। शक्तिस्तु संयोगादिफले आधेयत्वे वा इति सांप्रदायिकाः।

वस्तुतस्तु विषयितात्वस्य संयोगत्वाद्यपेक्षया आधेयतात्वाद्यपेक्षया चागुरुतया किंधर्मावच्छिन्ने शक्तिः कल्प्यत इत्यत्र विनिगमकं दुर्लभम्। एकस्मिन् प्रयोगभूय-स्त्वमपि अशक्यनिर्णयमिति विषयित्वेऽपि शक्तिः सिध्यतीत्यवधेयम् — इति प्रत्यपादि।

शब्दशक्तिप्रकाशिकायाम्[१]

"घटं जानाति" इत्यत्र विषयत्वं विषयिता वा द्वितीयार्थः। दिवाकरस्तु "संस्कारावच्छिन्नमेव ज्ञानं जानात्यर्थ इति उक्तस्थले मुख्यमेव कर्मत्वं घटादेरित्याह"। तन्मन्दम्। ज्ञानमित्यादितः संस्काराप्रतीतेः लाघवेन ज्ञानत्वस्यैव ज्ञाधात्वर्थतावच्छेदकत्वात्। घटस्योपेक्षात्मकज्ञाने निर्विकल्पके वा 'घटं जानाति' इति प्रयोगस्याभावप्रसङ्गात्। उपेक्षाया निर्विकल्पकस्य च संस्काराजनकत्वात्।

प्राकट्यावच्छिन्नज्ञानं ज्ञाधात्वर्थः। ज्ञाधात्वर्थतावच्छेदकज्ञाततारूपफलाश्रयत्वात् घटादेर्ज्ञानकर्मतेति भाट्टमतमप्ययुक्तम्। ज्ञानविषयतातिरिक्तायां ज्ञाततायां प्रमाणा-भावात्। अन्यथा ज्ञातताया इव कृततादेरप्यतिरिक्तायाः कल्पनापत्तेः।

"वह्निमनुमिनोमि, आपादयामि" इत्यादौ विधेयतानामको विषयताप्रभेद एव द्वितीयार्थः। "पर्वतो वह्निमान्" इत्याद्यनुमितौ आपत्तौ वा सत्यां "पर्वतमनु-मिनोमि" इत्याद्यप्रयोगात्। विषयतावच्छेदकत्वभिन्नप्रकारत्वमेव तत्र द्वितीयार्थ इत्यपि वदन्ति।

---

[१] पृ. ३३४

"घटं पश्यति, शब्दं शृणोति अनुभवति" इत्यादौ दर्शनाद्यर्थकधातुयोगे साक्षात्कारनिरूपितमेव विषयत्वं कर्मत्वम्। घटादिविषयकोपनीतचाक्षुषादौ सति तादृशप्रयोगविरहात्। "तण्डुलपाकं करोति" इत्यत्र चिकीर्षाजन्यतावच्छेदकः क्रियानिरूपितोद्देश्यताख्यो विषयताविशेष एव द्वितीयार्थः कृतौ भासते। तण्डुलपाकोद्देश्यककृतिमानित्यर्थः। तेन 'तण्डुलं करोति' इत्यादिको न प्रयोगः। पाकदशायाम् "ओदनं करोति" इत्यादौ च द्वितीयायाः अनुकूलत्वे लक्षणा। ओदनानुकूलकृतिमानित्यर्थः। तण्डुलादिक्रयणादिकृतिस्तु न ओदनजनिका, प्रमाणाभावात्। अतः तण्डुलक्रयणदशायाम् 'ओदनं करोति' इति न प्रयोगः।

वर्धमानस्तु — उक्तस्थले 'ओदनं करोति' इत्यादौ धातुना उत्पत्त्यनुकूला कृतिरुच्यते इति तत्र कृतिजन्योत्पत्तिरूपफलाश्रयतया ओदनस्य मुख्यमेव कर्मत्वम्। अत एव यत्र कृतिमात्रं धात्वर्थः तत्र न द्वितीया, यथा "घटाय यतत" इत्यादौ इत्याह। तन्न। कृत्यादिपदात् यत्नमात्रप्रतीत्या यत्नत्वावच्छिन्नस्यैव करोत्यर्थत्वात्।

मीमांसामहार्णवे तु पाककृतौ तण्डुलादेः यथा उपादानविधया विषयता, तथा फलविधया ओदनादेरपि विषयता। यदाह वत्सेश्वरः —

सिद्धं साध्यं फलं चेति प्रवृत्तेर्विषयस्त्रिधा।
तत्र सिद्धमुपादानं, क्रिया साध्यं, फलं सुखम्।।

इति। तथा च तन्मते तण्डुलपक्तृत्वदशायाम् 'ओदनं करोति' इति प्रयोगे फलत्वेन विषयतैव द्वितीयार्थ इति तर्कालंकारेण निरूपितम्।

पदवाक्यरत्नाकरे[१]

जानातेरावरणभङ्गः प्राकट्यं वा फलम्। आवरणं तु अविद्या अज्ञानमिति व्यपदिश्यमानः भावविशेषः औपनिषदानां प्रसिद्धः। अतीतानागतानामपि सूक्ष्मरूपेणावस्थितानामिदानींतनेन ज्ञानेन फलं जन्यते। तेन 'अतीतमनागतं वा जानाति' इति नानुपपन्नम्। "जानाति, इच्छति, द्वेष्टि, करोति, पश्यति" इत्यादौ ज्ञानेच्छाद्वेषप्रयत्नदर्शनादीनि फलानि तदनुकूला मनोयोगादयो व्यापारा एव क्रियाः। अत एव "चक्षुः पश्यति" इति क्वाचित्कः प्रयोगः। तत्र च विषयत्वोद्देश्यत्वबाध्यत्वसाध्यत्वसाक्षात्कारित्वैः संबन्धैः द्वितीयार्थाधिकरणस्य ज्ञानादौ फलेऽन्वय इत्यपि केचित्।

---

[१] पृ. ५०३

वस्तुतस्तु धातुना प्राधान्येन बोध्यमानो धात्वर्थः क्रिया। धातुजन्यबोधीयमुख्य-विशेष्यताश्रयः क्रियेति यावत्। विशेषणतया भासमानः फलम्। धातुजन्यबोधीय-विशेष्यतानिरूपितप्रकारताश्रयः फलमिति यावत्। क्रियायाः साक्षादधिकरणं कर्ता। फलस्याधिकरणं कर्म।

तथा च जानातेः विषयता ज्ञप्तिश्च, इच्छतेः उद्देश्यता कामश्च, करोतेः साध्यता यत्नश्च, द्विषेः द्विष्टता द्वेषश्च, दृशेः लौकिकविषयता साक्षात्कारश्च, अनुमिनोतेः विधेयता अनुमितिश्चेत्येवं फलव्यापारौ क्रमात् प्रतिपाद्यौ। तत्र फले विषयतादौ आधाराधेयभावसंबन्धेन द्वितीयार्थाधिकरणस्यान्वय इति प्रतिपादितम्।

स्वमतस्य प्रतिपादनावसरे च — ज्ञाधातोः बुद्धिः फलम्, तदनुकूलो व्यापारः क्रिया। बुद्ध्यन्वयिनि विषयत्वे द्वितीया लाक्षणिकी न कर्मसंज्ञामपेक्षते इत्युक्तम्।

भाट्टरहस्ये[१]

सविषयकधातुप्रयोगे द्वितीयार्थनिरूपणप्रकारः इत्थम् — एवंविधकर्मत्वस्य (क्रियाजन्यफलशालित्वरूपस्य कर्मत्वस्य) बाधे तु सविषयकधातुसमभिव्या-हारस्थले तार्किकरीत्यैव विषयत्वादिकं द्वितीयादिना लक्षयित्वा, आख्यातेन च आश्रयत्वं लक्षयित्वा घटविषयकज्ञानाश्रयत्वं चैत्रीयमिति "चैत्रो जानाति घटम्" इत्यत्र शाब्दबोधः। न त्विह परसमवेतत्वस्य आवश्यकता। अत एव स्वात्मानं जानामीत्यादिप्रयोगः। न ह्यत्र मुख्यं कर्मत्वमस्ति। क्रियाजन्यफलाभावात्। अपि तु विषयित्वे लक्षणा। सापि नानुशासनिकी, येन तदर्थमपि कर्मसंज्ञा प्रसज्यते। अपि तु "गङ्गायां घोषः" इतिवत् सांप्रतिकी। अनेकेष्वर्थेषु कर्मसंज्ञायाः अनुशासनेन विधाने अनेकत्र शक्तिकल्पनायां गौरवात् एकत्र शक्तिः अन्यत्र लक्षणेति स्वीक्रियते। सा च अनुशासनसंमतत्वात् आनुशासनिकी लक्षणेत्युच्यते। अनु-शासनरहिता शक्यसंबन्धामूला लक्षणा सांप्रतिकी लक्षणेति कथ्यते। प्रकृते तु अनुशासनविरहात् द्वितीयायाः विषयित्वे सांप्रतिकी लक्षणा।

ननु विभक्तौ लोके लक्षणा न संभवति।

> सुपां कर्मादयोऽप्यर्थाः संख्याश्चैव तथा तिङाम्।
> प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा।।

इति "बहुषु बहुवचनम्"[२] इति सूत्रस्थकात्यायनवार्तिकविरोधात्। अत्र हि अर्थ-नियमः प्रत्ययनियम इति नियमद्वयमुच्यते। कारिकाया अयमर्थः — सुपां तिङां

---

[१] पृ. ९१-९४
[२] सू. १.४.२१

च कर्मत्वादि एकत्वादिका संख्याश्च येन शास्त्रेण अर्थ इति प्रतिपाद्यते तत्रार्थनियमः प्रसिद्धः। स च एकत्वे एकवचनमेव, कर्मणि द्वितीयैवेत्याकारकः। प्रकृतार्थापेक्षया प्रत्ययनियमः, स च कर्मण्येव द्वितीया, एकत्वे एव एकवचनमित्याकारकः। नियमद्वयेऽपि कर्माद्यतिरिक्तेऽर्थे विभक्तेः वारणात् न विभक्तौ लक्षणा।

अत एव छन्दसि सुपां सुपो भवन्तीति लक्षणाप्रतिप्रसवरूपं व्यत्ययानुशासनं छन्दस्युपपद्यते। तथा हि — "सुपां सुलुक्पूर्वसवर्ण०"[1] इत्यादिसूत्रेण विभक्त्यन्तरस्य स्थाने विभक्त्यन्तरमनुशिष्यते। यदि विभक्तौ लक्षणा स्यात् तदा विभक्त्यन्तरार्थे अथवा प्रत्ययान्तरार्थे विभक्त्यन्तरस्य अथवा प्रत्ययान्तरस्य लक्षणयैव प्रयोगोपपत्तेः प्रत्ययान्तरे प्रत्ययान्तरानुशासनरूपं व्यत्ययानुशासनं व्यर्थं स्यात्। एवं "कर्मणि षष्ठी" इत्यादिरूपं यत् द्वितीयार्थकर्मणि षष्ठ्याः लक्षणानुशासनं तदपि व्यर्थं स्यात्। शक्यसंबन्धरूपायाः लक्षणायाः अन्वयानुपपत्त्यादिरूपप्रमाणान्तरेणैव सिद्धेः। अतो न लोके विभक्तौ अनुशासनं विना क्वापि लक्षणेति चेत् न। यथा प्रातिपदिकादिषु अनुशासनं विना अर्थविशेषे लक्षणा अङ्गीक्रियते, तथा विभक्तावपि लक्षणायां बाधकाभावात्। उक्तवार्तिकस्य लक्षणाङ्गीकारविरोधित्वाभावाच्च। तथा हि — अर्थनियमपक्षे तावत् कर्मणि द्वितीयैव न तु तृतीयादिविभक्त्यन्तरमित्यनेन नियमेन कर्मणि द्वितीयासजातीयशब्दान्तरस्य वारणेऽपि अर्थान्तरे द्वितीयायाः अवारणात्। अन्यथा निःसंख्येभ्योऽव्ययेभ्यः सुपामनापत्तेः। नं चेष्टापत्तिः, "उत्पद्यन्ते अव्ययेभ्यः स्वादयः यदयम् 'अव्ययादाप्सुपः'[2] इत्यव्ययाल्लुकं शास्ति" इति भाष्यविरोधापत्तेः। एवं करणत्वादौ तृतीयैवेत्यनेनापि विभक्त्यन्तरार्थे विभक्त्यन्तरस्य लोके न लक्षणा इत्येव लभ्यते, न तु विभक्त्यर्थभिन्ने विषयित्वादावपि न लक्षणेति।

प्रत्ययनियमपक्षेऽपि कर्मण्येव द्वितीया इत्यादिना नियमेन प्रकृताः ये कर्मत्वैकत्वादिरूपाः सुप्तिङर्थाः तदपेक्षयैव नियमकरणात् कर्मत्वातिरिक्तप्रकृतकरणत्वादिरूपार्थेषु द्वितीयायाः वारणेऽपि अप्रकृतविषयत्वादौ तस्या अवारणात् अप्रकृतविषयत्वादौ विभक्तेर्लक्षणायां न किंचित् बाधकम्। अत एव 'जानाति' इत्यादौ तिङः आश्रयत्वादौ लक्षणा स्वीक्रियते।

---

[1] सू. ७.१.३९
[2] सू. २.४.८२

एवं च छन्दसि व्यत्ययानुशासनमपि उक्तनियमद्वयात् विभक्त्यन्तरार्थे विभक्त्यन्तरप्रयोगस्य प्रतिषेधेऽवगते तत्प्रतिप्रसवरूपतया संगतं भवति। कर्मणि षष्ठीत्यादिकमपि लोकवेदसाधारण्येन प्रतिप्रसवरूपम्।

न चैवम् ''अक्षीणि मे प्रदर्शनीयानि, पादा मे सुकुमाराः'' इत्यादिमहाभाष्योदाहृतप्रयोगेषु प्रतिप्रसवरूपसूत्राभावात् प्रकृतद्वित्वे बहुवचनप्रयोगानुपपत्तिः इति वाच्यम्। तत्र अक्षित्वादिजातिविवक्षायां जातेरेकत्वेन द्विवचननिषेधेन एकवचने प्राप्ते ''जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्''[१] इति सूत्रेण बहुवचनविधानात्। अतः सिद्धं विभक्त्यन्तरार्थभिन्ने विषयत्वादौ लक्षणा युक्तैवेति।

यदा तु प्रकृताप्रकृतार्थसामान्यापेक्ष एव प्रत्ययनियमः इति महाभाष्यकारीयं व्याख्यानान्तरमभ्युपगम्यते तदा कात्यायनीयं नियमद्वयमपीदं शक्तिनियामकं, निरूढलक्षणानियामकं च। तथा च प्रकृतेऽप्रकृते वार्थे अनुशासनं विना न शक्तिः निरूढलक्षणा वा। सांप्रतिकलक्षणायास्तु न क्वापि प्रकृतेऽप्रकृते वार्थे निषेधः।

न चैवमव्ययेभ्योऽपि संख्याभिन्नेऽर्थे सांप्रतिकलक्षणया सुबुत्पत्तेरुपपत्तेः ''अव्ययादाप्सुपः''[२] इति ज्ञापकबलात् अव्ययेषु सुबुत्पत्तिपक्षो महाभाष्योक्तः न संगच्छत इति वाच्यम्। तस्य लाक्षणिकार्थाविवक्षायामपि शब्दसाधुत्वार्थमपि सुबुत्पत्तिः इत्येवं ज्ञापनपरत्वात्।

न चैवं सामान्यापेक्षप्रत्ययनियमपक्षे व्यत्ययानुशासनं व्यर्थम्, सांप्रतिकलक्षणयैव विभक्त्यन्तरार्थे विभक्त्यन्तरस्य साधुत्वोपपत्तेरिति वाच्यम्। तस्य निरूढलक्षणात्वज्ञापनार्थत्वात्। निषिद्धलक्षणार्थत्वप्रतिप्रसवफलकत्वाच्च।

तथा च सांप्रतिकी लक्षणा क्वचिन्न भवति। अत एव भट्टवार्तिके यत्र आर्षे प्रयोगे लाक्षणिकेऽर्थे प्रयोगानुपपत्तिस्फुरणं विनापि अर्थस्मरणं तत्र निरूढलक्षणा। यत्र तत्स्फुरणपूर्वकं काव्याद्याधुनिकप्रयोगः तत्र सांप्रतिकी लक्षणेति लक्षणाभेदमुपपाद्य ''काश्चिन्नैवाप्रयोगतः'' इति प्रयोगाभावे न लक्षणेत्युक्तम्। समग्रा कारिका तावत् अरुणाधिकरणे —

> निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्।
> क्रियन्ते सांप्रतं काश्चित् काश्चिन्नैवाप्रयोगतः।।

इति। उदाहृतं च रूपं वस्त्रम् इति। इतरथा मत्वर्थलक्षणया प्रयोगः केन वार्येत। अत एव एनां निषिद्धलक्षणेत्याचक्षते। तस्याश्च वेदेऽपि प्रसक्तौ प्रतिप्रसवार्थं

---

[१] सू. १.२.५८
[२] सू. २.४.८२

व्यत्ययानुशासनमिति। 'सर्वथा सिद्धं घटं जानामि' इत्यादौ द्वितीयायाः विषयत्वे लक्षणेति।

वस्तुतस्तु नात्र लक्षणा। मुख्यकर्मत्वस्यैवोपपत्तेः। तथा हि "ज्ञातो घटः" इत्यादिप्रतीत्या ज्ञानजन्या ज्ञेयनिष्ठा ज्ञाततापरनाम्नी विषयता फलम्। तदाश्रयत्वात् घटस्य मुख्यकर्मत्वोपपत्तिः।

न च भावकार्यस्य समवायिकारणजन्यत्वमिति नियमः। ध्वंसस्य कार्यस्यापि समवायिकारणजन्यत्वविरहात् भावकार्यस्येत्युक्तम्। तथा च भूतभाविस्थले समवायिकारणस्य घटादेरभावात् तत्र ज्ञातताऱूपफलाभाव इति वाच्यम्। ध्वंसवारणाय व्याप्यशरीरे भावत्वनिवेशवत् ज्ञातताऱूपविषयताया वारणाय उभयसाधारण्येन समवेतत्वं निवेश्यते। तथा च यत्र समवेतत्वविशिष्टकार्यत्वं तत्र समवायिकारणजन्यत्वमिति व्याप्तिः। विषयता तु न समवेतेति ध्वंसवत् तस्याः निमित्तकारणमात्रजन्यत्वस्वीकारात् अतीतानागतयोरपि ज्ञातताऱूपफलोत्पत्त्या तदाश्रयतया मुख्यकर्मत्वनिर्वाहः।

अथ वा परसमवेतक्रियाजन्यफलशालित्वसमनियताखण्डोपाधिरूपकर्मत्वे द्वितीयायाः शक्तिः। तद्बाधात्तु 'स्वं जानाति' इत्यादौ धात्वर्थतावच्छेदकफलशालित्वमात्रे विषयित्वमात्रे वा लक्षणेति न विरोधः। "चैत्रं स्वं गच्छति" इत्यादिस्तु न लक्षणयापि प्रयोगः। अप्रयोगेण निषिद्धलक्षणात्वात् इति भाट्टरहस्ये निरूपणप्रकारः।

अर्थे नियमः अर्थनियमः। कर्माद्यर्थे द्वितीयादिविभक्तिनियमः कर्मणि द्वितीयैवेत्येवमादिरूपः। प्रत्यये नियमः प्रत्ययनियमः। द्वितीयादिप्रत्यये कर्माद्यर्थनियमः कर्मण्येव द्वितीयेत्येवमादिरूपः। एतन्नियमद्वयविस्तरः अव्ययप्रकरणे लघुशब्देन्दुशेखरे द्रष्टव्यः।

पदवाक्यरत्नाकरेऽपि[1] नियमद्वयाबाधेन विभक्तौ विषयत्वादिलक्षणा भाट्टरहस्यरीत्यैव प्रत्यपादि।

हृक्रोरन्यतरस्याम् इति सूत्रार्थः

हृ, कृ अनयोः अण्यन्तावस्थायां यः कर्ता स ण्यन्तावस्थायां कर्मसंज्ञको वा स्यात् इत्यर्थः। "हारयति कारयति वा भृत्यं भृत्येन वा कटम्"। हरति करोति वा कटं भृत्यः, तं प्रेरयतीत्यर्थः। अत्र प्रयोज्यकर्तुः भृत्यस्य कर्मत्वविकल्पः।

---

[1] पृ. ४११

हृक्रोः गत्यर्थादिष्वनन्तर्भावात् अप्राप्ते विभाषेयम्। हृक्रोरर्थान्तरे तु प्राप्तविभाषा। अभ्यवहारयति सैन्धवान् सैन्धवैर्वा। अत्र अभ्यवहरतेः भक्षणार्थत्वात् विकारयतेरकर्मकत्वाच्च प्राप्तिः।

"अभिवादिदृशोरात्मनेपदे वेति वाच्यम्"[१] हेतुमण्ण्यन्तस्य अभिपूर्वकवदधातोः दृशिप्रकृतिण्यन्तस्य च आत्मनेपदिनोऽणौ कर्ता णौ कर्म वा भवतीत्यर्थः। "अभिवादयते दर्शयते देवं भक्तं भक्तेन वा"। अभिवदति नमस्करोति देवं भक्तः, तं गुरुः प्रेरयतीत्यर्थः। कर्तृगामिनि फले "णिचश्च"[२] इत्यात्मनेपदम्। अत्र भक्तस्य प्रयोज्यकर्तुः कर्मत्वविकल्पः। अप्राप्तविभाषेयम्। परस्मैपदे तु "अभिवादयति देवं भक्तेन" इत्येव। पश्यति देवं भक्तः तं गुरुः प्रेरयति दर्शयते देवं भक्तं भक्तेन वा "गतिबुद्धि"[३] इत्यत्र बुद्धिशब्देन ज्ञानसामान्यवाचिन एव ग्रहणमित्युक्तम्। तथा च "दृशेश्च"[४] इति वार्तिकेन नित्यं प्राप्ते विकल्पः।

पदवाक्यरत्नाकरे[५]

क्वचित् प्रयोज्ये कर्तृकर्मसंज्ञयोर्विकल्पः। यथा "हारयति कारयति दर्शयतेऽभिवादयते पिता पुत्रेण पुत्रं वा" इत्यादिप्रयोगात् कारिहार्योस्तिङन्तयोश्चाभिवादिदृश्योः।

शब्दशक्तिप्रकाशिकायाम्[६]

> हृक्रोस्तु कर्तुः कर्मत्वं ण्यन्तत्वे स्याद्विभाषया।
> अभिवादिदृशोरेवमात्मनेपद इष्यते।।

"हारयति कारयति वा पटं कुविन्देन" इत्यत्रेव 'कुविन्दम्' इत्यतोऽपि कुविन्दस्य गौणकर्मत्वावगमः।

तथा "अभ्यवहारयति ओदनं तनयं तनयेन वा जननी, विकारयति चित्तं चित्तेन वा वसन्तः" इत्यपि प्रमाणम्। परं तु पूर्वयोरप्राप्तौ एतयोस्तु प्राप्तावेव कर्मत्वस्य वैकल्पिको विधिः।

"गुरुमभिवादयते सुतं सुतेन वा गृहस्थः" "ध्रुवं दर्शयते भार्यां भार्यया वा पतिः" इत्यादौ तु दृशः प्राप्तौ अभिवादयतेस्त्वप्राप्तौ विकल्पः। अनात्मनेपदस्थले

---

[१] वा. ११६४
[२] सू. १.३.७४
[३] सू. १.४.५२
[४] वा. ११०८
[५] पृ. ६०७
[६] पृ. ३३३

तु "पन्थानं पथिकं दर्शयति, पुत्रेण मित्रमभिवादयति" इत्यादौ यथाप्राप्तमेव कर्मत्वादिकम्। "छात्रेणार्थं निर्णाययति, चैत्रेण ओदनं खादयति, शङ्खेन शब्दाययति, दारैः क्रन्दयति, पुत्रेण मित्रमाह्वाययति" इत्यादौ तु नीप्रभृतेः बुद्ध्याद्यर्थकत्वेन तत्कर्तुः कर्मत्वं प्रसक्तमपि —

"न नीखाद्यादिशब्दायक्रन्द्रिह्वयतिषु क्वचित्।
हेतुण्यन्तेषु कर्तृत्वं कर्मता स्यात्तिङादिषु।।"

इति भर्तृहरिवचनात् निषिध्यते। अत्र च क्वचित् तिङादिषु इति कथनात् — "चैत्रेणार्थं निर्णाय्यमाणः तिष्ठति, मैत्रेण पूगं खाद्यमानो ब्रूते" इत्यादौ कर्मविहितस्य शानजादेर्नानुपपत्तिरिति वदन्ति।

अधिशीङ्स्थासां कर्म इति सूत्रार्थः

बालमनोरमायाम्

"अधिशीङ्स्थासां कर्म"[१] अधिपूर्वकाणां शीङ्स्था आस् एषामाधारः कर्मसंज्ञकः स्यात्। अधिकरणसंज्ञायाः अपवादोऽयम्। "अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः"। अधिःसप्तम्यर्थस्य आधारस्य द्योतकः। वैकुण्ठे शेते तिष्ठति आस्ते वा इत्यर्थः।

शब्दशक्तिप्रकाशिकायाम्[२]

शय्यामधिशेते, अध्यास्ते, अधितिष्ठति इत्यादौ अधिकरणत्वमेव कर्मत्वं द्वितीयार्थः। तथैव "शय्या अधिशय्यते, अधिशयिता" इत्यादौ कर्मतार्थकयोः आख्यातकृतोः संभवात्।

"ध्रौव्याणामधिशीङासस्थानां कर्मत्वमेव तत्" इति स्मरणात्। तत् आधारत्वं कर्मत्वरूपमित्यर्थः।

विभक्त्यर्थनिर्णये[३]

"वैकुण्ठमधिशेते हरिः" इत्यादौ वैकुण्ठादेः कर्मत्वोपपत्तये "अधिशीङ्स्थासां कर्म"[४] इत्यनुशासनम्, अधिपूर्वकाणां शीङ्स्थासां कर्तृकर्माधारः कर्मसंज्ञ

---

[१] सू. १.४.४६
[२] पृ. ३३६
[३] पृ. १७४
[४] सू. १.४.४६

इत्यर्थकम्। यद्यप्यधिशयत्यादेरकर्मकस्य कर्मत्वं वैकुण्ठादिदेशस्य मासादिकालस्य च वार्तिकेनैवोपपादितम्, देशकालयोरेवाधारत्वादनुशासनवैयर्थ्यम्। तथापि वार्तिके देशः कुरुत्वपाञ्चालत्वादिना, कालोऽपि तदवान्तरधर्मेण ज्ञापितः। न तु देशत्वेन कालत्वेन। प्रकृतसूत्रेण देशत्वेन कालत्वेनापि देशान्योऽपि गृहशय्यादिस्तथोक्त इति न वैयर्थ्यम्।

एवं "वैकुण्ठमधिशेतेऽध्यास्तेऽधितिष्ठति वा हरिः" इत्यादौ कर्तृघटितपरंपरा-संबन्धावच्छिन्नमाधेयत्वं द्वितीयार्थः धात्वर्थव्यापारे शयनादावन्वेति। शीङ्स्था-सामर्थाः पूर्वमेवोक्ताः। अधिस्तु कर्मप्रत्ययाकाङ्क्षायामुपयुक्तः निरर्थक एव।

अभिनिविशश्चेति सूत्रार्थः

बालमनोरमायाम्

"अभिनिविशश्च"[१] अभिनीत्येतत्संघातपूर्वस्य विशतेराधारः कर्म स्यात्। "अभिनिविशते सन्मार्गम्"। अभिनिविशते सन्मार्गे आग्रहवानित्यर्थः। अप्रतिहत-प्रवृत्तिमानिति यावत्। "परिक्रयणे संप्रदानम्"[२] इति सूत्रादिह मण्डूकप्लुत्या अन्यतरस्यांग्रहणमनुवर्त्य व्यवस्थितविभाषाश्रयणात् क्वचिन्न। पापेऽभिनिवेशः। "एकार्थेऽभिनिविष्टानाम्" इति समर्थसूत्रे भाष्यप्रयोगोऽत्र मानम्।

विभक्त्यर्थनिर्णये[३]

"अभिनिविशश्च"[४] अभिनिविशतेराधारे कर्मत्वं ज्ञापयति "अभिनिविशश्च"[५] इत्यनुशासनम् अभिनिपूर्वकस्य विशतेराधारः कर्मसंज्ञक इत्यर्थकम्। "अभिनि-विशते सन्मार्गम्" इत्यत्र अभिनिपूर्वकविशधातोः धारापन्नज्ञानं तज्जन्मा दृढतर-संस्कारो वा अर्थः। यतधातुवत् फलावाचकत्वात् अकर्मकत्वम्। सन्मार्गादि-विशेषितं विषयतासंबन्धावच्छिन्नमाधेयत्वं द्वितीयार्थः। तादृशे ज्ञाने संस्कारे वा धात्वर्थेऽन्वेति। यदि च साक्षात्संबन्धावच्छिन्नाधेयत्वस्य सप्तम्यर्थस्येव सप्तम्यर्थानु-शिष्टद्वितीयार्थस्यापि धात्वर्थेऽन्वयो नाङ्गीक्रियते तदा व्यापारानुबन्धिविषयता (ज्ञान-द्वारकविषयता) स्वकर्तृसंबन्धघटितपरम्परासंबन्धावच्छिन्नमाधेयत्वं द्वितीयार्थ इति।

---

[१] सू. १.४.४७
[२] सू. १.४.४४
[३] पृ. १७५
[४] सू. १.४.४७
[५] सू. १.४.४७

विशतेस्तु अन्तरवयवावच्छिन्नसंयोगानुकूलो व्यापारोऽर्थः। अत एवायं सकर्मकः। अन्तरवयवास्तु विजातीयारम्भकसंयोगवदवयवा आरब्धैकावयविभिन्नावयव्यारम्भकसंयोगानधिकरणावयवा वा। गृहादेर्बहिरवयवानामलिन्दादीनां गृहान्याङ्गनाद्यवयव्यारम्भकसंयोगवत्त्वान्नान्तरवयवत्वमिति।

अन्तर्विशतीत्यादावन्तरिति लुप्तसप्तमीकमव्ययम्। न तु लुप्तद्वितीयान्तम्। 'अधः पतति' इत्यत्राधःपदवत्। अतो नानुपपत्तिरिति मन्तव्यम्। निविशतेस्तु तथाविधः संयोग एवार्थः। अत एवायमकर्मक इति।

यत्र तु "कारणतायां प्रविशति निविशते वा" इति प्रयोगः, तत्र प्रपूर्वस्य विशतेः घटकत्वलक्षणसंबन्धोऽर्थः तत्र कारणताविशेषितस्य सप्तम्यर्थस्य निरूपकत्वेन निरूपकनिरूपकत्वेन वा संबन्धेनावच्छिन्नस्याधेयत्वस्यान्वयः।

"एष्वर्थेष्वभिनिविष्टानाम्" इति फणिभाष्यप्रयोगात् सूत्रे चकारः अधिकतया क्वचित् कर्मसंज्ञानिषेधं सूचयति यथा 'पापेऽभिनिविशत' इति।

उपान्वध्याङ्वसः इति सूत्रार्थः

"उपान्वध्याङ्वसः"[१] उप, अनु, अधि, आङ् इत्येतत्पूर्वकवसधातोराधारः कर्मसंज्ञकः स्यात्। "उपवसति अनुवसति अधिवसति आवसति वा वैकुण्ठं हरिः"। वैकुण्ठे वसतीत्यर्थः। उपसर्गाः आधारत्वद्योतकाः। अभुक्त्यर्थस्य न, वने उपवसति।

विभक्त्यर्थनिर्णये[२]

"उपान्वध्याङ्वसः"[३] "उपवसति वैकुण्ठम्" इत्यादौ वैकुण्ठादेः कर्मत्वोपपत्तये "उपान्वध्याङ्वसः" इति सूत्रं उपादिपूर्वस्य वसतेः आधारः कर्मसंज्ञ इत्यर्थकम्। "उपवसति अनुवसति अधिवसति आवसति वा वैकुण्ठं हरिः" इत्यत्र भूयः कालावच्छिन्नसत्त्वं वसतेरर्थः। तत्र कर्तृघटितपरम्परासंसर्गावच्छिन्नमाधेयत्वं द्वितीयार्थो धात्वर्थेऽन्वेति। वैकुण्ठनिरूपितस्वाश्रयकर्तृनिष्ठत्वसंबन्धावच्छिन्नाधेयत्वाश्रयभूयः कालावच्छिन्नसत्त्वाश्रयो हरिः इति बोधः।

यत्र अभोजनमुपवसतेरर्थः तत्र कर्मसंज्ञानिषेधकम् "अभुक्त्यर्थस्य तु न" इति वार्तिकम्। तेन "वने उपवसति" इत्येव प्रमाणम्।

---

[१] सू. १.४.४८

[२] पृ. १७६

[३] सू. १.४.४८

"एकादशीमुपवसेद्द्वादशीमथवा पुनः" इत्यादावुपवसेरभोजनं नार्थः। किं तु दोषादुपावृत्तस्य गुणैः सह वासः।

"उपावृत्तस्य दोषेभ्यो यस्तु वासो गुणैःसह।
उपवासः स विज्ञेयः सर्वभोगविवर्जितः।।"

इत्यार्षपरिभाषणात्। अतो न द्वितीयानुपपत्तिरिति वदन्ति।

वस्तुतस्तु उपवसेरभोजनार्थकत्वेऽपि अकर्मकत्वमक्षतमेवेति देशकालादीनामकर्मककर्मत्वं वार्तिकेन ज्ञापितमिति न द्वितीयानुपपत्तिः। कालिकाधेयत्वस्य द्वितीयार्थत्वं न तु कर्तृसंबन्धघटितपरम्परावच्छिन्नाधेयत्वस्येति। शीङादीनां वस्वन्तानां अनुपसृष्टानामाधारस्य अधिकरणसंज्ञा, उपसृष्टानां तु कर्मसंज्ञेत्यन्वयपूर्वकं कर्म विज्ञेयम्।

"क्रुधद्रुहोरुपसृष्टयोः कर्म"[१] इत्यनुशासनं क्रुधद्रुहोरुपसर्गयुतयोः यं प्रति कोपः तत्कारकं कर्मसंज्ञकमित्यर्थकं "क्रूरमभिक्रुध्यति" इत्यत्र क्रूरे कर्मत्वं ज्ञापयति। क्रुधेर्द्वेषोऽर्थः। क्रूरविशेषितं द्विष्टतास्वरूपं विषयत्वं द्वितीयार्थः। "क्रूरमभिद्रुह्यति" इत्यत्र द्रुहेर्द्विष्टाचरणमर्थः। तत्र द्वेषो व्यापारश्च द्वयमर्थः। तत्र क्रूरादिविशेषितं समवेतत्वं द्वेषेऽन्वेति।

यदि च व्यापारमात्रम् अनिष्टानुकूलव्यापारो द्रुहेरर्थः। तदा द्वेषो द्वितीयार्थः क्रूरादिविशेषितो विषयताविशेषेण व्यापारमात्रेऽनिष्टे वान्वेति। तत्रापि क्रुधद्रुहोरुपसर्गविनाकृतयोः द्वेषस्य विषये समवायिनि च संप्रदानसंज्ञा। सोपसर्गयोस्तु कर्मसंज्ञेत्यन्यपूर्वकं कर्मेति। भोजननिवृत्तिवाचकस्य वसेराधारस्य कर्मता न। वने उपवसति।

शब्दशक्तिप्रकाशिकायाम्[२]

"काशीमनुवसति, काश्यनूष्यते" इत्यादावप्यधिकरणत्वमेव द्वितीयादिभिः प्रत्याय्यते, अनूपाध्याङो वसतेराधारस्य कर्मतातिदेशात्। "गृहेऽनुवस्ते" इत्यादौ तु वस्तिः न वसतिः। "शय्यामुपवसति" इत्यादौ तूपवसतेर्निवासार्थकत्व एव तदाधारस्य कर्मत्वं, तत्रैव तदनुशासनात्। अनशनार्थकत्वेऽधिकरणत्वमेव। अत एव "गृहेऽप्युपवसेद्रङ्कः प्रान्तरेऽपि नृपः सुखी" इत्यादिकः प्रयोगः।

---

[१] सू. १.४.३८
[२] पृ. ३३७

अधिशीङादिसूत्रार्थविचारः

पदवाक्यरत्नाकरे[१]

आधारोऽधिशयत्यादेः कर्म तत्र द्वितीयया।
कर्तृसान्तरआधाराधेयभावोऽनुभाव्यते।।

"अधिशेते, अधितिष्ठति, अध्यास्ते, अभिनिविशते, उपवसति अनुवसति वा जनपदम्" इत्यादौ द्वितीया सप्तमीवत् दैशिकविशेषणतासंबन्धावच्छिन्नं वा कर्तृद्वारकं वा (स्वाश्रयसंयुक्तत्वसंबन्धावच्छिन्नं) अधिकरणत्वमाधेयत्वं वा अभिधत्ते। तत्र आनुशासनिकमाधारस्य कर्मत्वम्। यत्र पुनरभोजनार्थ उपवसिः तत्र वनेषूपवसतीत्येव प्रमाणम्।

"एकादशीमुपवसेद् द्वादशीमथवा पुनः" इत्यादौ नाभोजनमुपवसेरर्थः, किं तु दोषादुपावृत्तस्य गुणैः सह वासः।

उपावृत्तस्य दोषेभ्यो यस्तु वासो गुणैः सह।
उपवासः स विज्ञेयःसर्वभोगविवर्जितः।।

इत्यार्षपरिभाषणात्।

व्युत्पत्तिवादे[२]

"अधिशीङ्स्थासां कर्म"[३] इत्यादिना यत्र आधारस्य कर्मसंज्ञा, तत्र आधारत्वमाधेयत्वं वा द्वितीयार्थः। ("शय्यां नाधिशेत" इत्यादौ शय्यानिष्ठाधिकरणतायाः निरूपकत्वसंबन्धावच्छिन्नप्रतियोगिताक एवाभावः शयनादौ बोधनीयः। स च वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितानवच्छेदकत्वे नोपपद्यत इत्यतः आधेयत्वं वेत्युक्तम्।) "स्थलीमधिशेते" इत्यादौ तादृशार्थे द्वितीयायाः, "स्थल्याः अधिशयिता" इत्यादौ कृद्योगे षष्ठ्याश्च साधुत्वार्थमेवाधारस्य कर्मसंज्ञाविधानात्।

ननु "अधिशेते" इत्यस्य शयनं करोतीत्यर्थो वक्तव्यः। ततश्च "स्थलीमधिशेते" इत्यतः स्थलीवृत्तिविलक्षणाङ्गसंयोगरूपशयनानुकूलव्यापारस्यैव बोधनीयतया कृञर्थव्यापारपर्यन्तस्य धात्वर्थत्वं वाच्यम्। एवं च शयनस्य धात्वर्थतावच्छेदकफलरूपतया तदाश्रयस्य स्थल्यादेः "कर्तुरीप्सिततमं कर्म"[४] इत्यनेनैव

---

[१] पृ. ६०७
[२] पृ. १८६
[३] सू. १.४.४६
[४] सू. १.४.४९

कर्मसंज्ञा सिध्यतीति "अधिशीङ्स्थासां कर्म"[१] इत्यादिसूत्राणां वैयर्थ्यम्। अध्याद्युपसर्गविशिष्टशीङ्प्रभृतीनामेव च शयनाद्यवच्छिन्नव्यापारे निरूढलक्षणेति 'न स्थलीं शेत' इत्यादयः उपसर्गरहितप्रयोगाः साधवःइति चेत् — न।

व्यापारमनन्तर्भाव्य विलक्षणाङ्गसंयोगरूपमुख्यार्थपरत्वेऽपि 'स्थलीमधिशेते' इत्यादिप्रयोगनिर्वाहाय भगवता पाणिनिमुनिना तादृशसूत्रप्रणयनात्। तदप्रणीतवतां शर्ववर्मप्रभृतीनां मते मुख्यार्थपराणां 'स्थल्यामधिशेत' इत्यादिप्रयोगाणां साधुतायाः दुर्वारत्वाच्च।

कालाध्वभावदेशानामकर्मकक्रियायोगे कैश्चित् जगदीशादिभिः कर्मप्रत्ययार्थं विभाषया कर्मत्वमनुशिष्यते।

अन्ये तु क्रियान्तरान्तर्भावेणोक्तरीत्या तत्र पाक्षिकं कर्मप्रत्ययमुपपादयन्तः तन्नानुशासति। तथा हि "क्रोशमास्ते" इत्यादौ क्रोशनिष्ठाधिकरणतानिरूपकोपवेशनादिः प्रतीयते। तत्र आधारताविशिष्टोपवेशने आस्-प्रभृतिधातोर्निरूढलक्षणा। तथा चाधारतायाः धात्वर्थतावच्छेदकफलरूपतया तदाश्रयस्य क्रोशादेः निरुक्तफलशालित्वेन "कर्तुरीप्सिततमं कर्म"[२] इत्यनेन कर्मसंज्ञायां द्वितीया। यदा तु उपवेशनमात्रमर्थो विवक्ष्यते तदा सप्तम्येवेति। उक्तं चैतत् —

> कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।
> सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते।।

इति। अकर्मकैः अकर्मकक्रियायाः शक्त्या अभिधायकधातुप्रतिपाद्यैः अन्तर्भूतक्रियान्तरैः आधारत्वपर्यवसायिधारणरूपधात्वन्तरार्थघटितैः प्रकृतिधातुतो निरूढलक्षणया बोध्यैः उपवेशनादिरूपैः योगे कालभावाध्वदेशानां कर्मत्वं विधीयत इति तदर्थः इत्याहुः।

तन्मते "मासमधीते, मासमास्ते, योजनं धावति" इत्यादौ अभिव्याप्त्यर्थे "कालाध्वनोरत्यन्तसंयोगे"[३] इत्यनेन द्वितीयाविधानं यद्यप्यनर्थकं धात्वर्थेऽध्ययनस्थित्यादिविशेषणतया अभिव्यापनक्रियाया अन्तर्भावेण तत्कर्मतया तत्र तत्र द्वितीयोपपत्तेः। तथा च व्यापनविशिष्टाध्ययनादिकं धात्वर्थः। धात्वर्थतावच्छेदकव्यापनरूपफलशालितया कर्तुरीप्सितमिति कर्मसंज्ञायां "कर्मणि द्वितीया"[४] इति

---

[१] सू. १.४.४६
[२] सू. १.४.४९
[३] सू. २.३.५
[४] सू. २.३.२

द्वितीया। तादृशधात्वर्थे व्यापनस्यानन्तर्भावे "मासमास्त" इत्यादौ मासादौ स्थित्यादिव्याप्यत्वलाभानिर्वाहात्।

तथापि "मासं रमणीया, क्रोशं कुटिला नदी" इत्यादौ भवतीत्यस्यानध्याहारेऽपि द्वितीयायाः साधुतानिर्वाहकत्वेन भाष्यकृतस्तत्सूत्रं सार्थकयन्ति। तत्र हि रमणीयत्वाभिव्याप्यत्वं मासादौ प्रतीयते। न च तत्र क्रियासमभिव्याहारोऽस्ति, यत्राभिव्याप्तिरन्तर्भविष्यति, तत्कर्मतया द्वितीया च स्यात्।

एवं "मासमासिता" इत्यादावभिव्याप्त्यन्तर्भावेण मासस्य कर्मत्वोपपादनेऽपि कृद्योगात् षष्ठ्येव स्यात् परत्वात् न तु द्वितीयेत्यतोऽपि तत्सूत्रं सार्थकम्।

भाट्टरहस्ये[१]

एवम् "अधिशीङ्स्थासां कर्म"[२] "अभिनिविशश्च"[३] "उपान्वध्याङ्वसः"[४] इत्यनुशासनात् "अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः" इति द्वितीया। अत्र द्वितीयायाःआधेयत्वमर्थः। "अभिनिविशते सन्मार्गम्" इत्यत्र च आधेयत्वमर्थः। क्वचिन्न। पापेऽभिनिवेशः। "उपवसति अनुवसति अधिवसति आवसति वा वैकुण्ठं हरिः" इत्यत्र च आधेयत्वं द्वितीयार्थः। अभुक्त्यर्थस्य न। वने उपवसति। सर्वत्र आधेयत्वस्य स्वाश्रयकर्तृकत्वसंबन्धेन भावनायामन्वयः।

उभसर्वतसोरिति वार्तिकार्थः

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।[५]

वार्तिकमिदम्। उभशब्दसर्वशब्दप्रकृतिकतसन्तयोः प्रयोगे सति द्वितीया कार्येत्यर्थः। धिक्शब्दप्रयोगे सति द्वितीया कार्या। कृतद्विर्वचनेषु उपरि अधि अधः एतेषु त्रिषु प्रयुज्यमानेषु द्वितीया दृश्यत इति वाक्यार्थः। क्रमशः उदाहरणानि — "उभयतः कृष्णं गोपाः" कृष्णस्य पार्श्वद्वयेऽपि गोपाः इत्यर्थः। आद्यादित्वात् तसिः। "उभयोऽन्यत्र"[६] इत्ययच्। षष्ठ्यर्थे द्वितीया। कृष्णसंबन्धिपार्श्वद्वयवर्तिनो गोपाः इति बोधः।

---

[१] पृ. १९४
[२] सू. १.४.४६
[३] सू. १.४.४७
[४] सू. १.४.४८
[५] वा. १४४४
[६] वा. २३२

"सर्वतः कृष्णं गोपाः" कृष्णस्य सर्वेषु पार्श्वेषु गोपा इत्यर्थः।

"धिक् कृष्णाभक्तम्" धिक् निन्दायाम्। कृष्णाभक्तस्य निन्देत्यर्थः। केचित्तु कृष्णाभक्तो निन्द्यः इत्यर्थः, प्रथमार्थे द्वितीयेत्याहुः। "धिङ्मूर्ख" इत्यत्र तु निषिद्धाचरणमित्यध्याहार्यम्।

"उपर्युपरि लोकं हरिः" लोकस्य समीपे उपरि हरिरस्तीत्यर्थः।

"उपर्यध्यधसः सामीप्ये"[१] इति द्विर्वचनम्। द्विरुक्तोपर्यादेः समीपोर्ध्वभागवृत्तित्वसमीपाधस्तनभागवृत्तित्वसमीपदेशवृत्तित्वानि क्रमेण द्विरुक्तोपर्यादीनामर्थः। सामीप्ये द्वित्वविधानात् प्रतियोगित्वरूपः संबन्धो द्वितीयार्थः। लोकप्रतियोगिकसामीप्यवदूर्ध्वभागवृत्तिः, लोकप्रतियोगिकसामीप्यवदधोभागवृत्तिः, लोकप्रतियोगिकसामीप्यवद्देशवृत्तिः इति क्रमेण बोधः।

"अध्यधि लोकं हरिः" लोकस्य समीपदेशे हरिरस्तीत्यर्थः।

"अधोऽधो लोकं हरिः" लोकस्य समीपे अधो हरिरस्तीत्यर्थः।

अभितःपरितःसमया[२] इत्यादि वार्तिकार्थः

ततोन्यत्रापि दृश्यत इत्यस्य प्रपञ्चोऽयम्। योगेऽपि इत्यनन्तरं द्वितीयेति शेषः।

"अभितः कृष्णं गोपाः"कृष्णस्य पार्श्वद्वयेऽपि गोपा इत्यर्थः।

"परितः कृष्णं गोपाः" कृष्णस्य सर्वेषु पार्श्वेषु गोपाः।

अनयोः खण्डशः शक्त्या सर्वावयवावच्छेदेनेत्यर्थः। तदेकदेशे सर्वस्मिन् द्वितीयार्थसंबन्धान्वयः। कृष्णसंबन्धिसर्वावयवावच्छेदेन गोपाः इति बोधः।

"ग्रामं समया, निकषा लङ्काम्" ग्रामस्य समीपे, लङ्कायाः समीपे। सामीप्यमव्ययार्थः। द्वितीयार्थो निरूपितत्वम्। ग्रामनिरूपितसामीप्यवदिति बोधः।

"हा कृष्णाभक्तम्" कृष्णाभक्तस्य शोच्यतेत्यर्थः। कृष्णाभक्तः शोच्य इत्यर्थ इत्यन्ये। हाशब्दः शोके। कृष्णाभक्तसंबन्धी शोकः।

"बुभुक्षितं न प्रतिभाति किंचित्" क्षुधार्तस्य न किंचिदपि स्फुरतीत्यर्थः। बुभुक्षितसंबन्धिकिंचिद्विषयकप्रतिभानाभावः। प्रतिभा झटिति स्फूर्तिः।

---

[१] सू. ८.१.७

[२] वा. १४४२-१४४३

शब्दशक्तिप्रकाशिकायाम्[१]

समया निकषा चाव्ययं सामीप्यार्थकम्, तेन तद्योगे "समया ग्रामम्" इत्यादौ द्वितीया। ग्रामस्य सामीप्यमित्यन्वये ग्रामावधिकत्वं तत्प्रतियोगिकत्वं वा द्वितीयया बोध्यते। "हा पुत्रम्" इत्यत्र हाव्ययस्यार्थे कष्टे द्वितीयान्तेन पुत्रसमवेतत्वं बोध्यते।

"धिक् पुत्रम्" इत्यत्र धिगर्थगर्हायां पुत्रविषयित्वम् "हा पितः क्वासि हे सुभ्रु बह्वेवं विललाप सः"[२] इत्यादौ स्वगतमेव कष्टं हाशब्देन बोध्यते, न तु पित्रादिगतम्। अतो न द्वितीया। वस्तुतस्तु नात्र 'हा पित' इति पदद्वयम्। 'हापित' इत्येकं पदम्। त्याजित इति तदर्थः। हे सीते! अहं त्याजितः विधिना त्वया त्वं क्वासीत्यर्थः।

उपर्युपरि गृहं पताकेत्यत्र द्विरुक्तस्योपरिनिपातस्य संनिकृष्टार्धभागार्थकत्वेन गृहस्य संनिकृष्टोर्ध्वभागे पताकेत्यर्थः। "अधोऽधो मेघमम्भः, अध्यधि शिखरं घनः" इत्यत्राप्युक्तदिशैव अन्वयः। जलधरस्य संनिकृष्टाधोभागे अम्भः, शिखरस्य संनिकृष्टाधोभागे घन इत्यर्थः। धिगुपर्यधोधीनां सामीप्यवाचितायां तद्योगे द्वितीयानुशिष्टेः।

"गृहमभितः पुरतरुणा" इत्यत्र अभितः शब्दस्य खण्डशो वृत्त्या सर्वावयवावच्छेदेनेत्यर्थः। तदेकदेशे च सर्वस्मिन् गृहावयवत्वं द्वितीययानुभाव्यते। तथा च गृहसंबन्धिसर्वावयवावच्छेदेन पुरतरुणा इत्यर्थः।

"गृहं परितः सर्वत्र उभयतो वा" इत्यत्रापि उक्तरीत्यैवान्वयः। गृहस्य सर्वावयवावच्छेदेनेत्यर्थः।

पदवाक्यरत्नाकरे[३]

"उभयतः सुभद्रां संकर्षणवासुदेवौ" इत्यत्र उभयशब्दस्य पार्श्वद्वयमर्थः। तसिलो वृत्तित्वमर्थः। द्वितीयायाः पार्श्वान्वयि संबन्धित्वमर्थः। तथा च सुभद्रासंबन्धिपार्श्वद्वयनिरूपितवृत्तित्वाश्रयौ संकर्षणवासुदेवाविति बोधः।

नाम्नो द्विधैव संबन्धः सर्ववाक्ये व्यवस्थितः।
सामानाधिकरण्येन षष्ठ्या वापि क्वचिद्भवेत्।।

इत्यत्र षष्ठीपदं षष्ठ्यपवादकद्वितीयादिविभक्तीनामप्युपलक्षणम्। पार्श्वपदेनात्र पार्श्वानां पञ्जरास्थां समूहो नाभिधीयते, किं तु तत्संनिहितो देशः। एकपार्श्वा-

---

१ पृ. ३५७
२ भट्टि ६-११
३ पृ. ६२३

वधिकद्वितीयपार्श्वनिरूपितपरत्वाधिकरणं देश इति यावत्। तेनाग्रपृष्ठयोः पार्श्वद्वय-तुल्यान्तरयोर्व्युदासः। दक्षिणपार्श्वदेशस्तु वामपार्श्वावधिकदक्षिणपार्श्वसमवेतापरत्व-निरूपकदैशिकपरत्ववान् वामपार्श्वात् दक्षिपार्श्वमपेक्ष्य अपरोऽयं देश इति प्रतीतेः।

विभक्त्यर्थनिर्णये[१]

नामार्थान्वयिनो द्वितीयार्था अकारकतया संज्ञायन्ते। यथा "उभयतः सुभद्रां संकर्षणवासुदेवौ" इत्यत्र उभयशब्दस्य पार्श्वद्वयमर्थः। प्रकृते पञ्जरास्थ्नां समूहो न पार्श्वः, किं तु तत्संनिहितो देशः दिग्वा। तसिलो वृत्तित्वमर्थः। द्वितीयायाः पार्श्वान्वयि संबन्धित्वमर्थः। तथा च सुभद्रासंबन्धिपार्श्वद्वयवृत्ती संकर्षणवासुदेवौ इत्यन्वयबोधः। तदुक्तम् —

नाम्नो द्विधैव संबन्धः सर्ववाक्ये व्यवस्थितः।
सामानाधिकरण्येन षष्ठ्या वापि क्वचित् भवेत्।। इति।

षष्ठीपदमसमानविभक्तीनामुपलक्षणम्। पार्श्वपदेन पार्श्वसंनिहितदिशो विवक्षणात् अग्रपृष्ठयोस्तुल्यान्तरयोरुभयशब्दप्रयोगे न द्वितीया।

"सर्वतः कृष्णं गोपाः" सर्वपदं सर्वदिक्परम्। तसेः द्वितीयायाश्च पूर्वोक्त एवार्थः। तथा च कृष्णसंबन्धिसर्वदिग्वृत्तयो गोपाः इत्यन्वयबोधः।

"धिक् शाक्यान्" निन्दिताचारो जुगुप्सा वा धिक्शब्दार्थः। जुगुप्सा तु द्वेषविशेषः। द्वितीयाया आधेयत्वं निन्दिताचारान्वयि, जुगुप्सान्वयि विषयत्वं वा अर्थः। तथा च शाक्यवृत्तिनिन्दाचारः। शाक्यविषयिणी जुगुप्सेति वा शाब्दबोधः।

"धिगस्तु तृष्णातरलं भवन्मनः" अत्र मन इति द्वितीयान्तम्। धिगिति अस्तिक्रियायां कर्तृतयान्वेति। अथ वा धिगिति अस्तिक्रियायामेवान्वेति। तथा च जुगुप्सितसत्तावन्मनः इत्यन्वयबोधः।

"धिङ् मूर्ख" अत्र जुगुप्सायां मूर्खसंबोध्यत्वस्यान्वयः। व्युत्पत्तिवैचित्र्येण विषयितासंसर्गेण मूर्खस्यापि जुगुप्सायामन्वयः। तेनान्यविषयकजुगुप्सायां मूर्ख-संबोध्यत्वान्वयविवक्षायां न तथा प्रयोगः।

आक्षिप्तभवसिपदार्थे संबोध्यत्वस्यान्वयो धिगिति क्रियायां भवनेऽन्वेतीति कश्चित्।

यदि च स्वविषयकद्वेषो न भवतीति "धिङ् माम्" इत्यादौ नैषा गतिरिति विभाव्यते तदा गुणाभावदोषान्यतरस्वरूपोऽपकर्षो धिक्शब्दार्थः। द्वितीयायाः

---

[१] पृ. १७७-१७९

संबन्धोऽर्थः। "मां धिक्" इत्यत्र अपकर्षो मत्संबन्धी इत्यन्वयबोधः। गुणः पाण्डित्यकारुण्यादिः। दोषः क्रोधलोभादिः।

एवं "धिङ् मूर्ख" इत्यत्र शास्त्रानभिज्ञस्य मूर्खपदार्थस्य संबोध्यत्वं वस्तु-विवेकराहित्यस्वरूपापकर्षेऽन्वेति। दर्शितापकर्षे मूर्खस्यान्वयेऽपि न क्षतिः। अस्य मूर्खसाधारणत्वात्।

यत्र तु स्वसंबोध्यसाधारणो नापकर्षः तत्र द्वितीयान्तपदापेक्षा आवश्यकी। यथा — "कृष्ण त्वत्सेवका धन्याः धिगन्यान् प्राकृतान् जनान्" इत्यादौ। एतेन धिगर्थे प्रातिपदिकार्थस्य साक्षादन्वयोपगमे "धिक् चैत्रः चैत्रेण वा" इत्यादिकः प्रयोगः स्यादिति समाहितम्। साक्षादन्वयानुपगमात्।

एवं "धिगध्ययनहीनं जनम्" इत्यत्र पाण्डित्याभावः, 'धिग्व्याधम्' इत्यत्र कारुण्याभावः, 'अक्षान्तं धिक्' इत्यत्र क्रोधः, 'धिक् स्वस्तिवाचनिकान्' इत्यत्र लोभः, धिक्पदार्थः। तत्र द्वितीयार्थसंबन्धस्यान्वयः।

'अकरुणं धिक्' इत्यत्र परकीयस्य सुखस्य दुःखहानेर्वा द्वेषः, 'धिक् क्रुद्धम्' इत्यत्र हन्तृत्वम्, 'धिक् लुब्धम्' इत्यत्र परस्वापहारित्वं धिक्पदार्थः।

'धिक् कृष्णाभक्तम्' इत्यत्र भक्तिप्रयोज्यगतेर्विरहः अभक्तिप्रयोज्याधोगतिर्वा धिक्पदार्थः। सर्वनाम्नामिव बुद्धिविशेषप्रकारत्वोपलक्षितधर्मवति धिक्पदस्य शक्ति-रिति नाननुगमः।

'उपर्युपरि लोकं रविः' इत्यत्र ध्रुवावधिकपरत्वनिरूपितापरत्वाधिकरणदेशः उपरिपदार्थः। तस्य चाधेयतया प्रातिपदिकार्थेऽन्वयः। परत्वान्वयि समवेतत्वं द्वितीयार्थः। तथा च लोकसमवेतध्रुवावधिकपरत्वनिरूपितापरत्वाधिकरणदेशवृत्ती रविरित्यन्वयबोधः।

'अधोऽधश्चन्द्रमसं रविः' इत्यत्र शेषावधिकपरत्वनिरूपितापरत्वाधिकरणदेशो-ऽधःपदार्थः। तस्य चाधेयतया प्रातिपदिकार्थेऽन्वयः। परत्वान्वयि समवेतत्वं द्वितीयार्थः। तथा च शेषावधिकचन्द्रमस्समवेतपरत्वनिरूपितापरत्वाधिकरणदेश-वृत्ती रविरित्यन्वयबोधः।

'अध्यधि गगनं रविः' इत्यत्र मध्यभागोऽधिशब्दार्थः। तस्याधेयतया रवा-वन्वयः। द्वितीयार्थः संबन्धः। गगनशब्दो वायुमण्डलार्थकः। तथा च वायु-मण्डलसंबन्धिमध्यभागवृत्ती रविरिति बोधः। वायुमण्डलमध्यभागस्तु उदयास्ता-चलान्तराभूतदेशावधिकपरत्वनिरूपितापरत्वाश्रयः। सामान्यतस्तु अवयवावधिका-वयवसमवेतपरत्वनिरूपितापरत्वाश्रयो मध्यभागो बोध्यः।

द्विर्वचनं सामीप्यमभिधत्ते द्योतयति वा। "उपर्यध्यधसः सामीप्ये"[१] इत्यनुशासनात्। अत्रोपरिदेशसामीप्यमुपरिदेशे बुध्यते। एवमधोऽधिदेशयोरपि। सामीप्यं तु संयुक्तसंयोगादिपरंपराघटकसंयोगानामल्पत्वं बोध्यम्।

यदि च द्वितीयाप्रकृत्यर्थनिरूपितसामीप्यं प्रतीयते तदा उपरि पद्मान् भ्रमराश्चपलाः, पद्मानधोधो नीराणि कासारमध्यधि पद्माः इत्युदाहरणम्। कासारनिरूपितं मध्यभागे सामीप्यं तु स्वसंयुक्तसंयोगादिपरम्पराघटकसंयोगानां चतुर्दिगवच्छिन्नानां तुल्यत्वं बोध्यम्।

अत एव —

नवानधोधो बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम्।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शम्भुना।।

इत्यत्र नवमेघसमीपाधरस्थितनारदे उत्क्षिप्तगजकृत्तिशम्भूपमा प्रतीयते। दूरस्थितौ तु न विशिष्टोपमा संभवतीति।

तदेतदुक्तं वाक्यपदीये —

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।

धिगिति लुप्तसप्तमीकमव्ययम्। आम्रेडितमिह सामीप्यबोधकं विवक्षितम्। वीप्साद्विर्वचने तु न द्वितीयानियमः। अत एव "उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः" इत्यत्र षष्ठीति वदन्ति। उपरिबुद्धीनामुत्तानबुद्धीनामुपरीति अन्वयोपगमात् उपरिशब्दस्य नाम्रेडितत्वमिति न द्वितीयेति कश्चित्।

वस्तुतस्तु शेषे षष्ठ्याः न क्वाप्यपवादः इति द्वितीयाषष्ठ्योः समभिव्याहारः प्रामाणिकः।

अन्यत्रापि दृश्यते द्वितीया — यथा — "चैत्रं यावत् शीतम्" इत्यादौ यावद्योगे। यावदिति निपातस्य उत्तरावधिकपरत्वमर्थः। तदन्वयि निरूपकत्वं द्वितीयार्थः। अथ वा उत्तरावधिकपरत्वं खण्डशोऽर्थः। अवध्यन्वयि तादात्म्यं द्वितीयार्थः।

यथा वा — "क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते" इत्यादौ ऋतेयोगे। अत एव "ऋते द्वितीया च" इति चान्द्रं सूत्रम्। ऋतेशब्दार्थो वक्ष्यते।

---

[१] सू. ८.१.७

लघुमञ्जूषायाम्[1]

उपपदविभक्तीनां संबन्धोऽर्थः। विशिष्यानुक्तेः, षष्ठ्यपवादकत्वाच्च। "उभयतः कृष्णं गोपाः" कृष्णसंबन्धिपार्श्वद्वयवर्तिन इति बोधः।

"धिक् कृष्णाभक्तम्" कृष्णाभक्तसंबन्धिनी निन्देत्यर्थः। धिगर्थो निन्दा।

उपर्युपरि, अधोऽधः, अध्यधि वा लोकं हरिः। द्विरुक्तोपर्यादेः समीपोर्ध्वभागसमीपाधस्तनभागसमीपदेशवृत्तित्वानि क्रमेणार्थः। सामीप्यरूपः संबन्धो द्वितीयार्थः। सामीप्यं न षष्ठ्यर्थ इति तु अन्वयिपदावाच्यं सामीप्यं न षष्ठ्यर्थ इत्येवं परम्। अत एव समीपमित्यादौ तत्र संबन्धे षष्ठी। लोकसमीपोर्ध्वभागवृत्तिः लोकसमीपाधोभागवृत्तिः लोकसमीपदेशवृत्तिः हरिः इति क्रमेण बोधः।

'अभितः परितो वा कृष्णं गोपाः'। अनयोः समीपसर्वदेशावच्छेदेनेत्यर्थः। सामीप्यरूपः संबन्धो द्वितीयार्थः। 'अभित' इति आभिमुख्येऽपि। कृष्णसंमुखे इत्यर्थः।

'समया निकषा वा ग्रामम्' इत्यत्राव्यये समीप इत्यर्थके अधिकरणशक्तिप्रधाने। द्वितीयार्थः सामीप्यरूपः संबन्धः। ग्रामसमीपदेश इति बोधः।

"हा कृष्णाभक्तम्" इत्यत्र हाशब्दः शोके। कृष्णाभक्तसंबन्धी शोक इत्यर्थः।

"बुभुक्षितं न प्रतिभाति" इत्यादौ बुभुक्षितसंबन्धी यत्किंचिद्विषयकप्रतिभाभाव इत्यर्थः। प्रतिभा झटिति स्फूर्तिः।

"सर्वतः कृष्णं गोपा" इत्यत्र सर्वपदं सर्वदिक्परम्। वृत्तित्वं तसः, दिगन्वयिसंबन्धवत्त्वं द्वितीयाया अर्थः। कृष्णसंबन्धिसर्वदिग्वृत्तयो गोपा इति बोधः।

"धिक् शाक्यान्" इत्यत्र धिक्शब्दस्य गर्हा अर्थः। गर्हा नाम नरकानुबन्ध्याचारः जुगुप्सानामको द्वेषविशेषो वा। द्वितीयायाः वृत्तिः विषयत्वं वा अर्थः। शाक्यवृत्तिः नरकानुबन्ध्याचारः शाक्यविषयिणी जुगुप्सा वा वाक्यार्थः।

"धिगस्तु तृष्णातरलं भवन्मनः" इत्यत्र मन इति द्वितीयान्तमस्ति क्रियाकर्तृ। धिगिति च मनसा न साक्षात् संबध्यते, किं तु क्रियया। तथापि परम्परया धिक्पदयोगित्वात् द्वितीया। तथा च जुगुप्सितसत्तावत् भवन्मनः इत्यन्वयबोधः।

"धिङ्मूर्ख" इत्यत्र मूर्खसंबोध्यका जुगुप्सा इत्यन्वयबोधः। संबोध्यत्वस्य आक्षिप्तभवसिपदार्थेनान्वयः, भवन एव धिगिति संबध्यत इति केचित् (वैयाकरणाः)।

---

[1] पृ. १२३२

धिङ्मामित्यत्र दोषगुणाभावान्यतरस्वरूपोऽपकर्षः धिगर्थः। तत्र गुणः पाण्डित्यादिः। दोषः क्रोधलोभादिः। द्वितीया संबन्धार्थिका। मत्संबन्धी अपकर्ष इत्यन्वयबोधः।

"उपर्युपरि भूलोकम्, अधोऽधश्चन्द्रमसम्, अध्यधि गगनं रविः" इत्यत्र उपरिपदस्य ध्रुवावधिकं वा नक्षत्राधिकरणवायुगोलावधिकं वा परत्वं तदधिकरणदेशो वा अर्थः। तदन्वयि स्वनिष्ठपरत्वनिरूपकत्वं द्वितीयाया अर्थः। एवमधः पदस्य भूगर्भावधिकपरत्वनिरूपितापरत्वं तदधिकरणदेशो वा अर्थः। तदन्वयि स्वनिष्ठपरत्वनिरूपकत्वं द्वितीयायाः अर्थः। एवमधिशब्दस्य आधेयत्वं वायुगोलार्थकगगनपदसमभिव्याहृतद्वितीयायाः निरूपकत्वमर्थः। तथा च ध्रुवाद्यवधिकस्य भूगोलसमवेतपरत्वनिरूपितस्यापरत्वस्याधिकरणं तदधिकरणदेशवृत्तिर्वा, भूगर्भावधिकस्य चन्द्रनिष्ठपरत्वनिरूपकापरत्वस्याधिकरणं तदधिकरणदेशवृत्तिर्वा गगननिरूपिताधेयतावान् रविः इत्यन्वयबोधः।

"उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः" इत्यत्र उपरिबुद्धीनामुपरीत्यन्वयात् उपरिशब्दस्यानाम्रेडितत्वान्न द्वितीया।

"उपर्यध्यधसः सामीप्ये"[१] इत्यनेन विहिते सामीप्याभिव्यञ्जके द्विर्वचने द्वितीया, वीप्साद्विर्वचने तु षष्ठ्येवेति पुनः अभियुक्ताः।

एतासामुपपदद्वितीयानामर्थः नामार्थेन संगतः। अनुशासनबलात्। तथा हि स्मर्यते —

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।

धिगिति लुप्तसप्तमीकम्। तथा च तस्य भिन्नपदत्वेन आम्रेडितान्तेषु इत्यनेन तस्य संबन्धविरहात् 'धिक् शाक्यान्' इत्युदाहरणं संगच्छते। अन्यत्र — 'स्तोकं पचति' इत्यादौ। आदिशब्देन 'चैत्रं यावच्छीतम्' इत्यादौ यावद्योगे "क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते" इत्यादौ ऋतेयोगे च द्वितीयेति पदवाक्यरत्नाकरटिप्पण्याम्[२]।

एवं सर्वतः पर्याययोः अभितः परितः पदयोः, सामीप्यार्थकयोः समयानिकषाशब्दयोर्योगे द्वितीया।

---

[१] सू. ८.१.७
[२] पृ. ६२७

शोकार्थकहाशब्दयोगे शोच्यात् द्वितीया। शोकः विषयगोचरो द्वेषविशेषः। तत्रालम्बनत्वेन (आधारत्वेन) विषयत्वं द्वितीयार्थः। "हा साधून्" इत्यत्र साधुविषयको द्वेष इत्यन्वयबोधः।

"किमाह सीता दशकण्ठनीता हा राम हा देवर तात मातः।।" इत्यादौ हापदार्थे शोके न रामदेवरादेः विषयत्वेनान्वयः। किं तु सीतायाः, स्वविषयकद्वेषे हापदार्थे रामसंबोध्यकत्वस्य अन्वयः।

एवं प्रति इत्युपसर्गपूर्वकस्य धातोर्योगे द्वितीया। "माणवकं प्रतिभान्ति वेदा" इत्यत्र ज्ञानविषयत्वं धात्वर्थः। विशिष्टशक्तस्य ज्ञाननिरूपितत्वविशिष्टविषयताशक्तस्य धातोः खण्डशः फलावाचकत्वात् अकर्मकत्वम्। ज्ञाधातोः विषयता ज्ञानं च प्रत्येकमुभयमर्थः। ज्ञाने विषयतायाः निरूपकतया विशेषणत्वेन तस्याः फलत्वात् तदाश्रयेण कर्मणा जानात्यादीनां सकर्मकत्वम्। प्रकृते तु भाधातोः ज्ञाननिरूपितत्वविशिष्टविषयतायां शक्तिः इति विषयतायाः विशेष्यत्वमेव न विशेषणत्वमिति तस्य फलधिया धातुवाच्यत्वाभावेन न धातोः सकर्मकत्वम्। ततश्च भाधात्वर्थैकदेशे ज्ञाने द्वितीयान्तार्थमाणवकसमवेतत्वान्वयात् माणवकसमवेतज्ञानविषयाः वेदा इत्यन्वयबोधः।

अन्ये तु प्रतिपूर्वकभाधातोः ज्ञानमात्रमर्थः। फलावाचकत्वादयमकर्मकः। विषयत्वमाख्यातार्थ इति वदन्ति।

भाट्टरहस्ये उपपदद्वितीयाविभक्तीनां विवरणम्[1]

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।

एवम् "अभितः परितः समयानिकषाहाप्रतियोगेऽपि"[2] "अन्तराऽन्तरेण युक्ते"[3] इत्यनुशासनात् उपपदयोगे तत्तलाक्षणिकार्थेषु द्वितीया। तत्र "उभयतः कृष्णं गोपाः" "सर्वतः कृष्णं गोपाः" इत्यत्र सन्तीत्यध्याहृतभावनायां प्रतियोगित्वरूपद्वितीयार्थस्य स्वनिरूपकोभयसर्वपार्श्वस्थितगोपवृत्तित्वसंबन्धेन अन्वयः। उपपदार्थस्य संसर्गघटकत्वात् उपपदविभक्तित्वम्। कृष्णनिष्ठप्रतियोगितानिरूपकोभयपार्श्ववृत्ति सत्ताश्रयत्वमिति बोधः। एवम् "अभितः कृष्णम्" "परितः कृष्णम्" इत्यत्रापि द्रष्टव्यम्।

---

[1] पृ. ९७
[2] वा. १४४२
[3] सू. २.३.४

"धिक् कृष्णाभक्तम्" इत्यत्र आधारत्वं द्वितीयार्थः। तस्य स्वनिरूपकधिक्का-राश्रयत्वसंबन्धेनअध्याहृतभावनायामन्वयः। कृष्णाभक्तनिष्ठाधारतानिरूपकधिक्का-राश्रयः सत्ताश्रयत्वम् इत्यन्वयबोधः।

"उपर्युपरि लोकं हरिः" इत्यत्र निरूपितत्वं द्वितीयार्थः। तस्य स्वनिरूपितो-परितनत्वविशिष्टदेशनिरूपितोपरितनत्वविशिष्टतत्तद्देशस्य हरिकर्तृकत्वसंबन्धेन भाव-नायामन्वयः। लोकनिरूपितोपरितनत्वविशिष्टदेशनिरूपितोपरितनत्वविशिष्टतत्त-द्देशस्थितहरिकर्तृकं सत्ताश्रयत्वमित्यन्वयबोधः।

"उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः" इत्यादौ उत्तानबुद्धीनामुपरि ईश्वरबुद्ध-यश्चरन्तीत्यर्थकरणेनाम्रेडित्वाभावान्न द्वितीया। ईश्वरबुद्धिकर्तृका उत्तानबुद्ध्यगोचर-पदार्थविषयकप्रवृत्तिभावना इति बोधः।

"ग्रामं समया, ग्रामं निकषा" इत्यत्रापि निरूपितत्वं द्वितीयार्थः। तस्य स्वनि-रूपितसामीप्याश्रयनिष्ठत्वसंबन्धेन हननादिभावनायामन्वयः।

"हा कृष्णाभक्तम्" इत्यत्र विषयत्वं द्वितीयार्थः। हा शब्दार्थः खेदः। विष-यत्वस्य स्वनिरूपकखेदनिष्ठत्वसंबन्धेन सत्ताश्रयत्वरूपभावनायामन्वयः। कृष्णा-भक्तविषयकखेदनिष्ठं सत्ताश्रयत्वमिति बोधः।

"बुभुक्षितं न प्रतिभाति किंचित्" इत्यत्र आधेयत्वं द्वितीयार्थः। विषयत्व-माख्यातार्थः। तत्र धात्वर्थप्रतिभायाः स्वनिष्ठविषयितानिरूपितत्वेन किंचित्पदार्थ-स्याधेयतासंबन्धेन चान्वयः। आधेयत्वस्य स्वाश्रयवृत्त्यभावप्रतियोगिप्रतिभानिष्ठ-विषयितानिरूपितत्वसंबन्धेन विषयत्वे अन्वयः। किंचिन्निष्ठं प्रतिभाविषयत्वं बुभुक्षितवृत्त्यभावप्रतियोगिप्रतिभानिष्ठविषयितानिरूपितम् इति बोधः। यत् किंचित् प्रतिभाति तन्न बुभुक्षितम् इत्यन्वयाङ्गीकारे एवं बोधः।

यद्वा किंचिन्निष्ठाभावप्रतियोगि प्रतिभाविषयत्वं बुभुक्षितवृत्त्यभावप्रतियोगि-प्रतिभानिष्ठविषयितानिरूपितम् इति शाब्दबोधः। यद् बुभुक्षितं प्रतिभाति तन्न किंचित् इत्यन्वयात्।

विभक्त्यर्थनिर्णये[१] उपपदद्वितीयाविभक्तीनां विवरणम्

"अभितः परितः समया निकषा हा प्रति योगेऽपि"[२] अभितः परितः शब्दौ सर्वतः पर्यायौ। समयानिकषाशब्दौ सामीप्यार्थकौ। एतेषां शब्दानां योगे द्वितीया

---

[१] पृ. १८३

[२] वा. १४४२-१४४३

संबन्धार्थिका। "अभितः परितो वा कृष्णं गोपाः, लङ्कां निकषा समया वा हनिष्यति" इत्यादौ शाब्दप्रकारः कृष्णसंबन्धिसर्वपार्श्ववर्तिनो गोपाः, लङ्काप्रतियोगिकसामीप्यवद्देशावच्छिन्नहननकर्ता इत्यादिरूपः।

"हा साधून्" इत्यत्र हाशब्दार्थः शोकः। स च विपद्गोचरो द्वेषविशेषः। तत्रालम्बनत्वेन विषयित्वं द्वितीयार्थः। तथा च साधुविषयिताको विपद्द्वेषः इत्यन्वयबोधः।

"हा राम हा देवर तात मातः" इत्यत्र सीतायाः स्वविपद्द्वेषे रामादेः विषयितया नान्वयः किं तु तत्संबोध्यत्वस्येति वदन्ति।

विपद्द्वेषो न शोकः। तथा सति "कपयो रामं शोचन्ति" इति प्रयोगापत्तेः। किं तु अनिर्वचनीयः तत्त्वेन ज्ञातो वा खेदः शोकः। तत्र द्वितीयार्थः समवेतत्वमन्वेतीत्यपरे।

प्रतियोगे द्वितीया "माणवकं प्रति भान्ति वेदाः" इत्यत्र। ज्ञानविषयत्वं धात्वर्थः। विशिष्टशक्तस्य धातोः खण्डशः फलवाचकत्वात्सकर्मत्वम्। तत्र ज्ञाने पदार्थैकदेशे द्वितीयार्थसमवेतत्वान्वयार्थं प्रतेरिहोपादानम्। तथा च माणवकसमवेतज्ञानविषया वेदा इत्यन्वयबोध इति वदन्ति।

प्रतिभातेः ज्ञानमात्रमर्थः। विषयत्वमाख्यातार्थः। फलावाचकत्वादयमकर्मक इति प्रधानधात्वर्थे द्वितीयार्थान्वयार्थमुपसर्गप्रतेरिहोपादानमित्यन्ये।

क्रियाविशेषणानां कर्मत्वम्

विभक्त्यर्थनिर्णये[१]

"क्रियाविशेषणानां कर्मत्वं नपुंसकत्वं च" इति परिभाषणात् "स्तोकं पचति" इत्यादौ द्वितीया। नपुंसकत्वमजहल्लिङ्गेतराणां बोध्यम्। तेन "सुखहेतुं पचति" इत्यत्र न नपुंसकत्वम्।

न च क्रियाविशेषणस्य कर्मत्वे कर्मलकारापत्त्या 'स्तोकः पच्यत' इति प्रयोगः स्यादिति वाच्यम्। यतोऽनुशासनेन क्रियाविशेषणवाचिप्रातिपदिकानां कर्मत्ववाचिद्वितीयाप्रकृतित्वं प्रत्याय्यते अत एव शाब्दधर्मक्लीबत्वस्याप्यन्वय इति।

तत्र यदि विशेषणविभक्तेस्तादात्म्यमर्थः तदा द्वितीयाया अपि। यदि च तादात्म्यं संसर्गः विशेषणविभक्तिः साधुत्वार्थिका तदा द्वितीयापि साधुत्वार्थिका।

---

[१] पृ. १८१

तत्राद्ये तादात्म्यस्य फलान्वयेऽपि न कर्मत्वम्। फलान्वयिनः आधेयत्वस्यैव तथात्वात्। अन्यथा 'जलं न पचति' इत्यत्र जलाधेयत्वाभावस्य विक्लित्त्यन्वये 'जलाधेयत्वाभावः पच्यत' इति प्रयोगप्रसङ्गात्। द्वितीयपक्षेऽपि तादात्म्येन फलान्वयिनो न कर्मत्वम्। न हि संबन्धमात्रेण फलान्वयि कर्म भवति। कालोपाधेः सकर्मकमात्रकर्मत्वापत्तेः। किं तु तत्तत्संसर्गविशेषेण फलान्वय्येव। तत्र संसर्गविशेषे तादात्म्यं नान्तर्भवति, येन क्रियाविशेषणस्तोकादौ कर्मलकारः प्रसज्येत।

शाब्दिकमतखण्डनम्

अत एव — क्रियाविशेषणस्य फलान्वये कर्मत्वमिति तत्र द्वितीया। व्यापारान्वये कर्तृत्वमिति तत्र प्रथमा। अथ वा "ज्योतिष्ठोमेन यजेत" इत्यत्रेव करणानुवादिका तृतीया इव। एवम् "अग्निहोत्रं जुहोति" इत्यत्रेव "स्तोकं पचति" इत्यत्र भावनाकर्मपाकविशेषणस्तोकादिपदात् कर्मानुवादिका द्वितीया।

न च क्रियाविशेषणस्य कर्मत्वपक्षे तत्र कर्मलकारः स्यादिति वाच्यम्। अस्तीति उत्पन्नस्य आत्मधारणमुच्यत इति निरुक्तस्मृत्या आत्मधारणानुकूलव्यापारार्थकस्यास्तेरपि आत्मनि कर्मणि कर्मलकारप्रसक्त्या व्युत्पत्तिवैचित्र्याभ्युपगमात्। तथा हि — येन कर्मणा सकर्मको धातुः तत्रैव कर्मणि कर्मप्रत्ययस्य साधुता। आत्मनः कर्मणो धात्वर्थान्तर्भूतत्वात् धातुनाभिधानात् न तेन कर्मणास्तेः सकर्मकत्वमिति न तत्र कर्मलकारप्रसङ्गः। तथा फलात्मकस्तोकस्य धातुनाभिधानात् न तेन कर्मणा सकर्मकत्वमिति नात्र कर्मलकारप्रसक्तिः। द्वितीया तु न तेन कर्मणा सकर्मकत्वमपेक्षते। यतस्तारं शब्दायति दीर्घमस्तीत्यादौ धात्वर्थान्तर्भूतकर्मणः शब्दात्मादेः विशेषणे कर्मानुवादिका दृश्यते। इत्थमेव क्रियाविशेषणपदोत्तरद्वितीयायाः कर्मानुवादकत्वपक्षोऽभ्युपगम्यते। एवं फलान्वयिक्रियाविशेषणानां कर्मानुवादिका द्वितीया फलव्यापारयोः संसर्गीभूतकर्मत्वस्य प्रापिका। यथा धात्वर्थान्तर्भूतकर्मफलयोः संसर्गीभूतकर्मत्वस्य तादृशकर्मविशेषणानां कर्मानुवादिकेति — शाब्दिकमतमपि परास्तम्।

"स्तोकं स्यन्दते" इत्यादौ व्यापारविशेषणपदोत्तरद्वितीयायाः कर्मानुवादकत्वस्याप्यसंभवात्।

न चात्र व्यापारविशेषणे नपुंसकप्रथमेति वाच्यम्। प्रथमाया अननुशिष्टतया असाधुत्वात्। व्यापारविशेषणस्य कर्तृत्वपक्षे तिङा तद्गतकर्तृत्वानभिधानात् तृतीयापत्तेर्दुवारत्वात्।

"सुखहेतुं चेष्टते चेतते यतते वा" इत्यत्र प्रथमाप्रसक्तेरसंभवेन द्वितीयोपपत्तेः कथमप्यसंभवाच्च।

तस्मात् दर्शितपरिभाषणात् फलव्यापारोभयविशेषणवाचिपदात् द्वितीयैव साधुरिति।

पदवाक्यरत्नाकरे, भाट्टरहस्ये च क्रियाविशेषणानां कर्मत्वविचारः

"स्तोकं पचति" इत्यादौ क्रियाविशेषणस्थले "ततोऽन्यत्रापि दृश्यते" इति वार्तिकानुसारेण द्वितीयेत्युक्तम्। एतत्तत्त्वमिदानीं विचार्य निर्धार्यते।

"स्तोकं पचति, मृदु पचति" इत्यादौ स्तोकाभिन्नः पाकः मृद्वभिन्नः पाक इत्यन्वयबोधो जायते। स्तोकमृद्वादिपदार्थाः अभेदसंबन्धेन पाकादिक्रियाविशेषणानि भवन्ति। क्रियाविशेषणभूतस्तोकमृद्वादिवाचकपदोत्तरं द्वितीयाविभक्तिः तादृशपदानां नपुंसकलिङ्गकत्वं च भवतीत्यविवादम्।

तत्र विचार्यते केन सूत्रेणात्र द्वितीया भवतीति। न तावत् "कर्मणि द्वितीया"[१] इति सूत्रेणात्र द्वितीया भवितुमर्हति। स्तोकमृद्वादेः पाककर्मत्वाभावात्। पाकक्रियाजन्यफलशालितया पाककर्तुरभिप्रेतं हि पाककर्म। न हि स्तोकादिकं पाकक्रियाजन्यफलशालि, पाकक्रियाजन्यफलस्य विक्लित्तेः स्तोकादावभावात्। न च नात्र कर्मण्यर्थे द्वितीया, अपि तु 'न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः' इति न्यायेन केवलप्रकृतिप्रयोगस्यासाधुत्वात् प्रयोगसाधुत्वाय कश्चन प्रत्ययः संयोजनीय इति स्तोकादिपदोत्तरं द्वितीया प्रयुक्तेति वाच्यम्। प्रयोगसाधुत्वार्थं चेत् स्तोकादिपदोत्तरं द्वितीया विभक्तिरिष्यते तर्हि प्रथमातिक्रमे कारणाभावात् प्रथमाविभक्तिरेव प्रयुज्यताम्, किमिति क्रियाविशेषणोत्तरं नियमेन द्वितीयाविभक्तिः प्रयुज्यत इति शङ्कायाः जागरूकत्वात्।

किं च क्रियाविशेषणस्थले विशेषणानां केन संबन्धेन क्रियायामन्वयः। न तावत् अभेदसंबन्धेन, "स्तोकं पचति" इत्यादौ स्तोकाभिन्नः पाकः इत्यन्वयबोधस्य संभवेऽपि "सुखं स्वपिति" "सुखमास्ते" इत्यादौ स्वापादिक्रियायां सुखाभेदस्य बाधितत्वेन सुखाभिन्नः स्वापादिः इत्याद्यन्वयबोधानुपपत्तेः। अतः क्रिया विशेषणस्थले द्वितीयायाः साधुत्वं कथमुपपादनीयम्, क्रियायां केन संबन्धेन क्रियाविशेषणस्यान्वयः। इति च विम्रष्टव्यं भवति।

---

[१] सू. २.३.२

अत्राह नागेशः लघुशब्देन्दुशेखरे "फलस्यापि व्यपदेशिवद्भावेन फलसंबन्धित्वात् कर्मत्वम्। अत एव तत्समानाधिकरणे 'स्तोकं पचति' इत्यादौ कर्मत्वसिद्धिः" इति। लघुमञ्जूषादावप्येवमेवाह।

अस्यायमभिप्रायः — 'स्तोकं पचति' इत्यादौ पचधातोः विक्लित्त्यनुकूलव्यापारोऽर्थः। अत्र धातूपात्तव्यापारप्रयोज्यं फलं विक्लित्तिः। तदाश्रयत्वात् यथा ओदनस्य कर्मत्वम्, एवं विक्लित्तिरूपफलस्यापि व्यपदेशिवद्भावेन तादृशफलाश्रयत्वात् कर्मत्वम्। तत्र च कर्मभूते फले अभेदसंबन्धेन स्तोकस्य विशेषणत्वात् कर्मता, यथा 'स्तोकमोदनं पचति' इत्यत्र कर्मभूतौदनविशेषणत्वात् स्तोकस्य कर्मता तद्वदिति।

परं तु 'स्तोकं पचति' इत्यादिसकर्मकधातुस्थले फलस्य धात्वर्थे प्रवेशात् कथंचित् भवतु कर्मत्वम्। "सुखं स्वपिति" इत्याद्यकर्मकधातुस्थले कथम्? तत्र फलस्य धात्वर्थेऽप्रवेशात् इति चेत्, अत्रोच्यते। स्वपितीत्यस्य स्वापं करोतीत्यर्थः। तत्र स्वापः धात्वर्थकृतिरूपव्यापारजन्यतया प्रतीयमानः फलं भवति। व्यपदेशिवद्भावेन तस्य फलाश्रयत्वात् कर्मसंज्ञायाः तद्विशेषणस्य सुखस्यापि कर्मता। सुखशब्दस्य च सुखसाधनमित्यर्थः। तथा च 'सुखं स्वपिति' इति वाक्यात् सुखसाधनाभिन्नः यः स्वापः तदनुकूला कृतिः इति शाब्दबोधो भवति।

अकर्मकधातुस्थले क्रियाविशेषणोत्तरमुक्तरीत्यैव द्वितीया उपपादनीयेत्ययमंशः पाणिनेरपि संमत इति ज्ञायते। तथा हि — "तत्प्रत्यनुपूर्वमीपलोमकूलम्"[1] इति तद्धितप्रकरणे सूत्रम्। तस्य चायमर्थः — तदिति द्वितीयान्तानुकरणम्।

प्रत्यनुपूर्वेभ्यः द्वितीयान्तेभ्यः ईपलोमकूलशब्देभ्यः वर्तत इत्यर्थे ठक् स्यादिति। प्रतीपं वर्तते प्रातीपिकमित्युदाहरणम्। प्रतीपादेः द्वितीयान्तत्वं कथमिति शङ्कायां प्रतीपादेः वृतिक्रियाविशेषणत्वादिति वक्तव्यम्। वृतुधातोरकर्मकत्वात् कथमत्र कर्मत्वमिति शङ्का जायते। अत्राह काशिकाकारः —

"तदिति द्वितीयासमर्थविभक्तिः। ननु च वृतिरकर्मकः, तस्य कथं कर्मणा संबन्धः। क्रियाविशेषणमकर्मकाणामपि कर्म भवति।" इति।

न्यासकारश्च — "वर्तत इति। वर्तनं करोतीत्यर्थः। स हि वृत्यर्थ कर्तव्यतया संबध्यमानः कर्म संपद्यते। तत्सामानाधिकरण्याच्च तद्विशेषणमपि कर्तव्यतया युज्यते। तदपि कर्म।"

---

[1] सू. ४.४.२८

इति प्रतिपादयांबभूव। अतश्चाकर्मकधातुस्थलेऽपि क्रियाविशेषणतया कर्मत्वं वक्तव्यम्। तच्च कर्मत्वं "कर्तुरीप्सिततमं कर्म"[1] इति सूत्रबोधितं कर्तृनिष्ठ-व्यापारप्रयोज्यफलाश्रयतया कर्तुरिष्टत्वमेव। तदपि व्यपदेशिवद्भावेनैवोपपादनीयम्। अतः क्रियाविशेषणस्थले "कर्मणि द्वितीया"[2] इति सूत्रेणैव द्वितीयेति नागेश-प्रभृतीनामाशयः प्रतीयते।

अन्ये तु व्यपदेशिवद्भावमन्तरेणैव कर्मत्वं निर्वहन्ति। तथा हि — 'स्तोकं पचति' इत्यादौ न विक्लित्त्यनुकूलव्यापारः पचधात्वर्थः। अपि तु विक्लित्त्युत्पत्त्यनु-कूलव्यापारः। तादृशव्यापारजन्यं फलं विक्लित्त्युत्पत्तिः। तदाश्रयत्वात् विक्लित्तिः पाककर्म। तादृशविक्लत्तौ अभेदसंबन्धेन स्तोकादिर्विशेषणम्। स्तोकभिन्ना या विक्लित्तिः तदुत्पत्त्यनुकूलो व्यापार इति शाब्दबोधः। तथा च पाककर्मभूत-विक्लित्तिविशेषणत्वात् स्तोकादिः पाककर्म। यथा 'स्तोकमोदनं पचति' इत्यादौ पाककर्मभूतौदनविशेषणत्वात् स्तोकादिः पाककर्म। अत एव च स्तोकादिपदोत्तरं कर्मणि द्वितीया। तथैव 'स्तोकं पचति' इत्यत्रापि स्तोकपदोत्तरं कर्मण्येव द्वितीया। न चोक्तरीत्या विक्लित्तेरपि पाककर्मत्वे "विक्लित्तिं पचति" इति प्रयोगापत्तिरिति वाच्यम्। यतः विक्लित्त्युत्पत्त्यनुकूलव्यापारः पचेरर्थः इति धातुनैव विक्लित्तेरुक्ततया "उक्तार्थानामप्रयोगः" इति न्यायेन पुनः विक्लित्तिपदप्रयोगस्यासाधुतया 'विक्लित्तिं पचति' इति प्रयोगो नापादयितुं शक्यत इति।

ननु सकर्मकधातुस्थले "स्तोकं पचति" इत्यादौ उत्पत्तिमपि धात्वर्थेऽन्तर्भाव्य फलोत्पत्त्यनुकूलव्यापारस्य धात्वर्थत्वं स्वीकृत्य तादृशधात्वर्थजन्योत्पत्तिरूप-फलाश्रयतया फलस्य कर्मत्वात् तद्विशेषणस्य स्तोकादेः कर्मत्वस्योपपादन-संभवेऽपि "सुखं स्वपिति" इत्याद्यकर्मकधातुस्थले कर्मत्वं कथम्? तत्र फलान-वच्छिन्नव्यापारस्यैव धात्वर्थतया फलस्यैव कर्मत्वासंभवात् दूरे तद्विशेषणस्य कर्मतेति चेत् —

अत्र ब्रूमः। 'सुखं स्वपिति' इत्यादौ सुखपदस्य सुखजनके लक्षणा। स्वपधातोः शरीरलाघवोत्पत्त्यनुकूलव्यापारः अर्थः। सुखजनकस्याभेदसंबन्धेन शरीरलाघवे-ऽन्वयः। सुखजनकं यत् शरीरलाघवं तदुत्पत्त्यनुकूलो व्यापार इति शाब्दबोधः। तथा च धात्वर्थतावच्छेदकोत्पत्तिरूपफलाश्रयत्वात् शरीरलाघवस्य कर्मता। तद्विशेषणतया सुखजनकस्य कर्मतेत्येवं 'सुखं स्वपिति' इत्यत्रापि कर्मण्येव द्वितीया।

---

[1] सू. १.४.४९
[2] सू. २.३.२

तर्हि स्वपधातोरपि सकर्मकत्वमेव स्यात् फलावच्छिन्नव्यापारवाचकत्वादिति कथमकर्मत्वमिति चेत् — न। फलसमानाधिकरणव्यापारवाचकत्वं हि अकर्मकत्वम्। शरीरलाघवरूपफलसमानाधिकरणव्यापारवाचित्वात् स्वपधातोः अकर्मकत्वे न कापि क्षतिरिति। अत उत्पत्तिं धात्वर्थेऽन्तर्भाव्य 'स्तोकं पचति' इत्यादौ स्तोकादेः व्यपदेशिवद्भावमन्तरेणैव कर्मत्वमुपपाद्य कर्मणि द्वितीयैवात्रापीत्याहुः।

खण्डदेवभट्टाचार्यास्तु नैतन्मतं साधु मन्यन्ते। तथा हि — धातूपात्तफलसामानाधिकरणव्यापारवाचकत्वमकर्मकत्वमिति स्वीकारे "चैत्रेण आस्यते ग्रामः" "सुप्यते रात्रिः" इत्यादौ कर्मणि लकारस्य कथमुपपत्तिः? तत्र धातूपात्तफलस्याप्रसिद्धेः। अत एव धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमित्यपि न साधीयः। "चैत्रो मासमास्ते" इत्यादौ मासादेः कर्मत्वानुपपत्तेः। तत्र धातोः केवलव्यापारवाचकतया धात्वर्थतावच्छेदकफलाप्रसिद्धेः।

अतः किमित्याकांङ्क्षापूरकत्वमेव कर्मत्वम्। 'ओदनं पचति' इत्यादौ किमित्याकांक्षायाः जननात् तादृशाकाङ्क्षानिवर्तकत्वमोदनादेरस्तीति तस्य कर्मत्वम्। 'स्तोकं पचति' इत्यादौ पचतीत्युक्ते कीदृशं पचतीत्याकाङ्क्षामेव स्तोकमिति द्वितीयान्तपदार्थः निवर्तयति। 'सुखं स्वपिति' इत्यादौ स्वपितीत्युक्ते कथं स्वपितीत्याकाङ्क्षाया एव सुखमिति पदं निवर्तकम्। अतः क्रियाविशेषणस्थले कीदृशमिति वा कथमिति वा या आकाङ्क्षा तत्पूरकत्वमेव क्रियाविशेषणस्य वर्तते न तु किमित्याकाङ्क्षापूरकत्वमिति कर्मत्वस्योपपादयितुमशक्यतया न कर्मणि द्वितीया। अपि तु

उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते[१]।।

इति वार्तिके "ततोऽन्यत्रापि दृश्यते" इत्यनेन क्रियाविशेषणस्थलेऽपि द्वितीया भवतीत्यभिप्रेतमिति वार्तिकबलादेव क्रियाविशेषणस्थले द्वितीया समर्थनीयेत्याहुः। पदवाक्यरत्नाकरेऽप्येवम्।

वस्तुतस्तु "ततोऽन्यत्रापि" इति प्रतीकमुपादाय "अभितः परितस्समयानिकषाहाप्रतियोगेऽपि" इति परिगणनस्य पूर्वव्याख्यातृभिः कृतत्वात्, "उभसर्वतसोः" इत्यादिना उपपदनिमित्तिकां द्वितीयामभिधाय "ततोऽन्यत्रापि" इति वदतो वार्तिककारस्य नञिवयुक्तन्यायेन अन्यपदेन उपपदान्तरमेवाभिमतमिति प्रतीतेश्च आहत्य वार्तिकेन उपपदनिमित्तिकद्वितीयायाः साधुत्वबोधनेऽपि क्रियाविशेषणस्थले द्वितीया नोक्तवार्तिकानुमतेति हेतोः खण्डदेवोक्तं चिन्त्यम्।

---

[१] वा. १४४४

व्युत्पत्तिवादे क्रियाविशेषणानां कर्मत्वविचारः

"क्रियाविशेषणस्थले च न द्वितीयातिरिक्तविभक्तिरुत्पद्यते। क्रियाविशेषणानां कर्मत्वमित्यनुशासनेन तत्र कर्मत्वातिदेशात्" इत्यवोचन्।

अस्य ग्रन्थस्य वास्तवाशयमजानानाः व्याख्यातारः प्रकाशकारादयः "ततोन्यत्रापि दृश्यते" इति वार्तिकस्य 'अन्यत्र क्रियाविशेषणस्थले दृश्यते' इत्यभिप्रायकस्यानुवादकमेव 'क्रियाविशेषणानां कर्मत्वमिति' इति प्रत्यपादयन्। एतच्च न युज्यते। तथा हि सति भट्टाचार्यैः क्रियाविशेषणानां कर्मत्वमित्यनुशासनेनेति अनुशासनपदं यत् प्रयुक्तं तत् नातीव स्वरसं भवतीति।

परमार्थतस्तु — "क्रियाविशेषणानां कर्मत्वम्" इति वाक्यं परिभाषारूपम्। यद्यपीयं परिभाषा नागेशविरचिते परिभाषेन्दुशेखरे न दृश्यते, अथापि सीरदेवकृतपरिभाषावृत्तौ इयं परिभाषा पठ्यते। तत्र हि अस्याः परिभाषायाः ज्ञापकमेवमुपन्यस्तम् —

"अयं चार्थो न्यायसिद्ध इत्याहुः। तथा हि 'मृदु पचति' इत्यत्र पाकक्रियायाः प्रार्थनाध्यवसानादिक्रियया व्याप्यत्वात् कर्मत्वम्। तथा हि कश्चित् फलमीप्सुः फलं पश्यति एतस्या एतत्फलमिति, दृष्ट्वा प्रार्थयते, ततस्तां कर्तुमध्यवस्यति। गम्यमाना च क्रिया कारकाणां निमित्तमिति गम्यमानायाः प्रार्थनादिक्रियायाः पाकक्रिया कर्म भवति। अतस्तद्विशेषणं कर्मैव। क्रियायाश्चासत्वभूतत्वात् तद्विशेषणं सामान्येन लिङ्गेन नपुंसकेनैव निर्देष्टुं युज्यत इति। ननु क्रियानिमित्तस्य कर्मत्वमुक्तम्। निमित्तं च सिद्धस्वभावम्। क्रिया च साध्यस्वभावा। तत्कथं कर्मत्वं स्यात्? तर्हि "तत्प्रत्यनुपूर्वमीपलोमकूलम्"[१] इति क्रियाविशेषणकर्मद्वितीयान्तात् ठग्विधानं ज्ञापयति साध्यस्वभावापि क्रिया प्रार्थनाध्यवसानादिक्रियां प्रति साधनत्वेनाश्रीयते" इति।

तदेतत् सर्वं मनसिकृत्यैव गिरिधरोपाध्यायाः विभक्त्यर्थनिर्णये — "क्रियाविशेषणानां कर्मत्वं नपुंसकत्वं चेति परिभाषणात् स्तोकं पचतीत्यादौ द्वितीया" इत्यभ्यधुः।

अतः ज्ञापकसिद्धया क्रियाविशेषणानां कर्मत्वमिति परिभाषयात्र द्वितीयेत्यभिप्रायेण गदाधरभट्टाचार्यैरुक्तम् इत्यनुशासनेन कर्मत्वातिदेशात् इति। तच्च कर्मत्वं न "कर्तुरीप्सिततमं कर्म"[२] इति सूत्रोक्तम्। अपि तु आतिदेशिकम्। कर्मत्वे सति

---

[१] सू. ४.४.२८

[२] सू. १.४.४९

यत् कार्यं भवति द्वितीयादिकं, तत् क्रियाविशेषणवाचकपदोत्तरं भवतीत्येव परिभाषायाः अर्थः। एतत्सूचनायैव भट्टाचार्यैः कर्मत्वातिदेशादित्युक्तम्। अतः क्रियाविशेषणस्थले कर्मत्वकार्यमेव भवति न वस्तुतः कर्मत्वम्। तत्र च परिभाषारूपमनुशासनं प्रमाणमिति यत् भट्टाचार्यैरुक्तं तदेव युक्तमिति मन्यामहे।

यद्यपि सीरदेवेन कर्मत्वमुपपादितमिव प्रतीयते तथापि प्रकृतधात्वनुपात्तां गम्यमानां प्रार्थनादिक्रियामादाय प्रकृतधात्वर्थस्य कर्मत्वोपपादनं तद्विशेषणत्वात् स्तोकादेः कर्मत्वोपपादनं च क्लिष्टम्। "तत्प्रत्यनुपूर्वमीपलोमकूलम्" इति क्रियाविशेषणवाचकपदात् द्वितीयामनुमन्यमानं पाणिनिसूत्रं ततो द्वितीया भवतीत्येतदंशे ज्ञापकम्, न तु कर्मत्वांशेऽपि। वास्तवकर्मत्वे सति "कर्मणि द्वितीया" इत्यनेनैव द्वितीयायाः सिद्ध्या ज्ञापकानुसरणप्रयासवैफल्यं च स्यात् इत्यभिप्रेत्य भट्टाचार्यैः कर्मत्वातिदेशादित्युक्तमिति युक्तमुत्पश्यामः।

अन्तरान्तरेणयुक्ते इति सूत्रार्थः

बालमनोरमायाम्

"अन्तरान्तरेणयुक्ते"[१] अन्तरा इत्याकारान्तमव्ययम्, न तु टाबन्तम्। अन्तरेण इत्यप्यव्ययमेव, न तु तृतीयान्तमिति भाष्ये स्पष्टम्। आभ्यां योगे द्वितीया स्यात्।

"अन्तरा त्वां मां हरिः"। तव मम च मध्ये हरिरित्यर्थः।

"अन्तरेण हरिं न सुखम्"। हरेर्वर्जने सुखं नास्तीत्यर्थः। "अन्तरा मध्ये" "पृथग्विनान्तरेणर्ते हिरुङ् नाना च वर्जने" इत्यमरः।

किमनयोरन्तरेण गतेन इत्यत्र तु अन्तरशब्दो विशेषवाची। अनयोर्विशेषेण ज्ञातेनेत्यर्थः। अत्र अन्तरेणेत्यस्य तृतीयान्तत्वादव्ययत्वाभावान्न तद्योगे द्वितीया।

नन्वेवं सति "हलोऽनन्तराः संयोगः"[२] इति सूत्रे "द्वयोश्चैवान्तरा कश्चित्" इति भाष्यप्रयोगः कथम् इति शङ्क्यम्। मध्यत्वनिमित्तमवधित्वं हि ययोर्निर्णीतं तत्र द्वितीया। ययोस्तु न तन्निर्णयः, तत्र संबन्धसामान्ये षष्ठ्येव भवति, युक्तग्रहणादिति कैयटः।

---

[१] सू. २.३.४
[२] सू. १.१.७

लघुमञ्जूषायाम्[१]

"अन्तरा त्वां मां च हरिः" इत्यत्र अन्तरेति मध्ये इत्यर्थकम्। अवधित्वसंबन्धो द्वितीयार्थः। त्वन्मदवधिकमध्यवृत्तिर्हरिरिति बोधः। "अन्तरा हरिं न सुखम्" इत्यत्र अभाववांस्तदर्थः। हरिशब्दस्तद्भक्तिलाक्षणिकः। द्वितीयार्थःप्रतियोगित्वम्। तस्य निरूपकतासंबन्धेनाभावेऽन्वयः। हरिभक्तिप्रतियोगिकाभाववृत्तिः सुखसत्ताभाव इति बोधः। एवमन्तरेणशब्दोऽप्युभयार्थः। तद्योगेपि द्वितीया।

"तव मम चान्तरा कमण्डलुः" इत्यत्र त्वन्मत्संबन्धी कमण्डलुर्मध्ये इत्यर्थात् अन्तराशब्दयोगाभावेन न द्वितीया।

किं च यासामुपपदविभक्तीनां तत्तद्विशेषसंबन्धे विधानं तत्र तेषां संबन्धानां विशेषरूपेणाविवक्षायां संबन्धत्वेन विवक्षायां षष्ठ्येव। स्पष्टं चेदं "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः"[२] इति सूत्रे भाष्ये। तत्र हि तादर्थ्यस्य संबन्धत्वेन विवक्षायां षष्ठ्युक्ता गुरोरिदं गुर्वर्थमिति। विशेषसंबन्धे विधानं च क्वचित् विशेषोक्त्यैव। यथा "अनुर्लक्षणे"[३] इत्यादौ। क्वचित्तु तत्तदर्थस्य तत्तत्संबन्धेन संबन्धिनि नियताकाङ्क्षया, यथा प्रकृते अवधित्वप्रतियोगित्वयोः। एवं च त्वन्मत्संबन्धिमध्ये कमण्डलुः इत्यर्थे न द्वितीया। ईदृशस्थले केवलौ तावेव मध्यस्यावधिभूताविति न निर्णयः। किं तु अन्यसहितयोरपि तत्त्वप्रतीतिरिति नात्र द्वितीयेति "हलोऽनन्तरा॰"[४] इत्यत्र कैयटे स्पष्टम्।

शब्दशक्तिप्रकाशिकायाम्

विद्यामृते "अन्तरेणान्तरा विना वा नरः शोच्यः" इत्यादौ ऋते प्रभृत्यव्ययानामत्यन्ताभावस्तद्वैशिष्ट्यं वा अर्थ इति विद्यात्यन्ताभाववान्नरः शोच्यः इति बोधः। अत्यन्ताभावेऽन्वितं प्रतियोगित्वं द्वितीयार्थः।

पदवाक्यरत्नाकरे[५]

परत्वद्वयनिरूपितं परत्वद्वयं तदधिकरणदेशो वा भवति अन्तरापदार्थः। द्वितीययोश्च परत्वान्वयि समवेतत्वं अवधिमत्त्वं चार्थः। "मगधान् विदेहानन्तरा

---

[१] पृ. १२३३
[२] सू. २.१.३६
[३] सू. १.४.८४
[४] सू. १.१.७
[५] पृ. ६२८

गङ्गा'' इत्यत्र मगधावधिकेन विदेहसमवेतेन, विदेहावधिकेन मगधसमवेतेन परत्वेन प्रत्येकं निरूपितं यत् परत्वद्वयं तद्वती तद्देशवृत्तिर्वा गङ्गेत्यन्वयबोधः।

क्वचिदप्राप्तिः अन्तरापदार्थः। तद्योगेऽपि द्वितीयैव। प्राप्तिरपि ज्ञापनं गमनं चेति द्वेधा।

"अनुरागमयेन भूयसा मधुरेणापि रसेन को गुणः।
प्रियसंगमभूमिमन्तरा यदि विच्छिन्नपदा सरस्वती।।"

इत्यत्र भारत्या अनुरागप्रकृतिकेनापि भूयसा शृङ्गाररसेन को गुणो यदि प्रिययोः सङ्गमपर्यन्तमज्ञापयित्वा मध्ये विच्छिन्नप्रबन्धा चित्राङ्गदकथा सरस्वतीति प्रकृतम्। अत्र सरस्वत्या नदीविशेषस्य लौहित्यबाहुल्येन भूयसा मिष्टेन जलेन को गुणो यदि प्रियस्य समुद्रस्य संगममप्राप्यैव विलीनगतिरसाविति अप्राकरणिकम् इत्यनयोरुपमाध्वनये प्रतीयते।

एवमन्तरेणपदस्याभावोऽर्थः। तदन्वयिप्रतियोग्यनुयोगिभावो द्वितीयायाः। "धनमन्तरेण न सुखम्" इत्यादौ धनसामान्याभावप्रयुक्तः सुखाभाव इत्यन्वयबोधः। द्वितीयार्थप्रतियोगितायां धनस्याधेयतया, धनत्वस्यावच्छिन्नत्वेनान्वयात् धनसामान्याभावलाभः। अभावयोः प्रयोज्यप्रयोजकभावस्तु योगक्षेमसाधारणः संसर्गः।

विभक्त्यर्थनिर्णये[१]

अन्तराशब्दयोगे द्वितीयां ज्ञापयति "अन्तरान्तरेणयुक्ते"[२] इत्यनुशासनम् आभ्यां योगे द्वितीया स्यादित्यर्थकम्। "मगधान् विदेहानन्तरा गङ्गा" इत्यत्र परत्वद्वयनिरूपितापरत्वद्वयं तदधिकरणदेशो वा अन्तरशब्दार्थः। द्वितीययोश्च परत्वान्वयि समवेतत्वमवधिश्च द्वयं प्रत्येकमर्थः। तथा च मगधसमवेतेन विदेहावधिकेन विदेहसमवेतेन मगधावधिकेन परत्वेन प्रत्येकं निरूपितं यत् अपरत्वद्वयं तद्वती तद्वद्देशवृत्तिर्वा गङ्गेत्यन्वयबोधः।

क्वचिदप्राप्तिरन्तराशब्दार्थः। तद्योगेऽपि द्वितीयैव प्रमाणम्। प्राप्तिः ज्ञापनं गमनं चेति द्विधा। तथा हि —

अनुरागमयेन भूयसा मधुरेणापि रसेन को गुणः।
प्रियसङ्गमभूमिमन्तरा यदि विच्छिन्नपदा सरस्वती।।

---

[१] पृ. १८४
[२] सू. २.३.४

इत्यत्र भारत्या अनुरागप्रकृतिकेनापि भूयसा शृङ्गाररसेन को गुणः यदि प्रिययोः संगमपर्यन्तमज्ञापयित्वा मध्ये विच्छिन्नप्रबन्धा चित्राङ्गदकथासरस्वती इति प्रकृतम्। अत्र सरस्वत्या नदीविशेषस्य लौहित्यबहुलेन भूयसा मिष्टेन जलेन को गुणः यदि प्रियस्य समुद्रस्य संगममहीमप्राप्यैव विलीनगतिरसौ इत्यप्राकरणिकमनयोरुपमाध्वनये प्रतीयत इति पदवाक्यरत्नाकरे गुरुचरणाः।

अन्तरेणशब्दस्याभावोऽर्थः। प्रतियोग्यनुयोगिभावस्तु द्वितीयार्थः। "धनमन्तरेण न सुखम्" इत्यत्र द्वितीयार्थप्रतियोगित्वे धनस्य स्ववृत्तिधनत्वावच्छिन्नत्वाधेयत्वाभ्यां संबन्धाभ्यां व्युत्पत्तिवैचित्र्येणान्वयोपगमात् धनसामान्याभावलाभः। अभावयोः प्रयोज्यप्रयोजकभावः योगक्षेमसाधारणः संसर्गः। तथा च धनसामान्याभावप्रयुक्तः सुखसामान्याभाव इत्यन्वयबोधः।

गीतश्रवणजन्मनः ऐहिकस्य जपादिप्रयोज्यस्य आमुष्मिकस्य च सुखस्य धनं विनापि संभव इति कथं सुखसामान्याभावः धनसामान्याभावप्रयुक्त इति यदि, तदा धनमन्तरेण न दानं यागो वेत्युदाहरणं बोध्यम्। क्वचिदन्तराशब्दस्याप्यभावोऽर्थः यथा अध्ययनमन्तरा न पाण्डित्यमिति।

भाट्टरहस्ये[१]

अन्तराशब्दस्य मध्यवाचित्वात् "त्वां माम्" इत्यत्र संबन्धित्वं द्वितीयार्थः। तस्य स्वाश्रयमध्यप्रदेशवृत्तित्वसंबन्धेन भावनायामन्वयः। त्वत्संबन्धिमध्यदेशवृत्तिः हरिकर्तृकसत्ताश्रयत्वमिति बोधः।

"अन्तरेण हरिं न सुखम्" इत्यत्र द्वितीयार्थः प्रतियोगित्वम्। तस्य स्वनिरूपकाभावप्रयुक्ताभावप्रतियोगिसुखकर्तृकत्वसंबन्धेन भावनायामन्वयः। हरिनिष्ठप्रतियोगितानिरूपकाभावप्रयुक्ताभावप्रतियोगिसुखकर्तृकं सत्ताश्रयत्वमिति बोधः।

भाट्टचिन्तामणौ[२]

"त्वां मां चान्तरा अन्तरेण वा हरिरस्ति"। अत्र संबन्धे द्वितीयायाः लक्षणा। उभयसंबन्ध्यन्तरालवर्ती हरिरिति बोधः। एवम् ऋते विना, यावत् इति शब्दयोगे द्वितीया "ततोऽन्यत्रापि दृश्यते" इति वार्तिकेनाभिप्रेतेति गोकुलनाथादयः। तथा हि शब्दशक्तिप्रकाशिकायाम्[३] — विद्यामृते विना वा नरः शोच्यः इत्यत्र ऋते

---

[१] पृ. ९९
[२] पृ. ९७
[३] पृ. ३५७

इत्यादिशब्दस्यात्यन्ताभाव: तद्वैशिष्ट्यं वा अर्थ:। अत्यन्ताभावेऽन्वितं प्रतियोगित्वं द्वितीयार्थ:। विद्याप्रतियोगिकात्यन्ताभाववान्नर: शोच्य: इत्यन्वयबोध:। "गगनमृते द्रव्यं न शब्दवत्" इत्यादौ तु उक्ताव्ययानां भेदोऽर्थ:। गगनभिन्नं द्रव्यं न शब्दवत् इत्याकारकस्तत्र बोध:।

"नदीं यावन्मम पुरम्, गृहं यावत् वनं तव" इत्यत्र यावदित्यव्ययस्य मर्यादा अभिविधिश्च क्रमेणार्थ:। तेन नदीपर्यन्तं मत्पुरं, गृहाभिव्याप्तं त्वद्वनमित्याकारस्तत्र बोध:। तत्पर्यन्तत्वं च तदवधिकविप्रकर्षशून्यत्वे सति तत्संनिकृष्टत्वम्। तदभिव्याप्तत्वमपि प्रकृते तदारम्भकयावदवयवावच्छेदेन तत्संयुक्तत्वम् — इति।

पदवाक्यरत्नाकरे

"अन्यत्र स्तोकं पचतीत्यादौ क्रियाविशेषणे" इत्युक्तम्। तत्र टिप्पण्याम् — आदिपदेन "चैत्रं यावच्छीतम्" इत्यादौ यावद्योगे, "क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते" इत्यादौ ऋतेयोगे च द्वितीया बोध्या। अत एव "ऋते द्वितीया च" इति चान्द्रं सूत्रम्। ऋतेशब्दार्थो वक्ष्यते। यावन्निपातस्योत्तरावधिकपरत्वमर्थ:। तदन्वयि निरूपकत्वं द्वितीयार्थ: इत्युक्तम्।

विनादिशब्दयोगे द्वितीयार्थविचार:

गदाधरभट्टाचार्यै: व्युत्पत्तिवादे[१] द्वितीयाकारके विनायावदादिशब्दयोगे द्वितीयार्थविचार: कृतोऽस्ति। सोऽत्र प्रस्तूयते।

"दण्डं विना न घट उत्पद्यते" "रासभं विनापि घट उत्पद्यते" इत्यादौ विनापदार्थोऽभाववान्। तत्पदसमभिव्याहृतद्वितीयाया: अभावान्वयि प्रतियोगित्वमनुयोगित्वं वार्थ:। अभाववतश्चोत्पत्तौ आधेयत्वेनान्वय:। तथा च दण्डनिष्ठप्रतियोगितानिरूपकाभाववद्वृत्त्युत्पत्तिकत्वाभाववान् घट:, रासभनिष्ठप्रतियोगितानिरूपकाभाववद्वृत्त्युत्पत्तिको घट इत्याकारको बोध:। यद्यपि निपातार्थे विनापदार्थे नामार्थस्य दण्डस्य स्वप्रतियोगिकत्वरूपभेदसंबन्धेन साक्षादन्वयो भवितुमर्हति, तथापि संभवति सार्थकत्वे विभक्तेर्निरर्थकत्वमनुचितमिति द्वितीयाया: सार्थकत्वम् उपेयते।

"दण्डं विना न घटोत्पत्ति:" इत्यादौ च विनान्तार्थे दण्डाभाववति घटोत्पत्त्याद्यभावान्वये अनुयोगिविशेषणदण्डाभावे घटोत्पत्त्यभावनिरूपितानुयोगितावच्छेदकत्वं भासते। अन्यथा 'द्रव्ये न गन्ध' इति प्रयोगापत्ति:। द्रव्यत्वोपलक्षितजलादौ

[१] पृ. १९९

गन्धाभावसत्त्वात्। अनुयोगितावच्छेदकत्वभाने तु गन्धाभावानुयोगितावच्छेदकत्वं द्रव्यत्वे नास्ति, अतिप्रसक्तत्वात् इति न तादृशप्रयोगापत्तिः। एवं च 'रासभं विना न घटोत्पत्तिः' इति न प्रयोगः। रासभाभावे घटोत्पत्त्यभावानुयोगितावच्छेदकत्वविरहात्, घटोत्पत्तिमत्यपि रासभाभावस्य सत्त्वेन अतिप्रसक्तत्वात्।

अथ वा अभाव एव विनापदार्थः। "दण्डं विना न घटः" इत्यादौ विनान्तार्थस्य दण्डाभावस्य नञर्थे घटाद्यभावे प्रयोज्यत्वसंबन्धेनान्वयः। दण्डाभावप्रयोज्यः घटाभाव इति बोधः। अत एव "रासभं विना न घट" इत्यादयो न प्रयोगाः। घटाभावस्य रासभाभावप्रयुक्तत्वविरहात्।

"रासभं विना घट" इत्यादौ च विनान्तार्थस्य रासभाभावस्य सामानाधिकरण्यसंबन्धेन घटादावन्वयः। रासभाभाववद्वृत्तिः घट इति बोधः।

ननु व्याप्तिवादचिन्तामणौ पूर्वपक्षे "नाप्यविनाभावः" इत्युक्तम्। तद्व्याख्यायां दीधितौ साध्यपदमध्याहृत्य साध्यं विना साध्याभाववति यो भावो वृत्तिः तद्विरह इत्युक्तम्। तत्राधिकरणपर्यन्तस्य विनार्थत्वोक्तिर्विरुध्यत इति चेत् — न। उक्तदीधितावपि संसर्गविधया भासमानं तदधिकरणवृत्तित्वरूपं सामानाधिकरण्यमेव सप्तम्यन्तेनोपात्तं, न तु विनार्थत्वेनाधिकरणम्। अभावाधिकरणपर्यन्तस्य विनापदार्थत्वेऽपि सप्तम्या अपदार्थरूपाधेयत्वविवरणरूपताया आवश्यकत्वात्। न च विनापदोत्तरलुप्तसप्तम्यर्थ एव अभाववति इति सप्तम्या विवृत इति वाच्यम्। निपातोत्तरविभक्तेर्निरर्थकत्वात्। अत एव सर्वत्र निपातोत्तरं साधुत्वार्थं प्रथमैवेति शाब्दिकाः।

"पृथिव्यामेव गन्ध" इत्यादौ सप्तम्यर्थः प्रतियोगित्वम्। अन्योऽभावश्चैवकारार्थः। एवकारोत्तरलुप्तसप्तम्याः वृत्तित्वमर्थः। तस्य प्रतियोगितासंबन्धेनाभावेऽन्वयः। तथा च पृथिव्यन्यवृत्तित्वाभाववान् गन्ध इति बोधः दीधितिकृत्संमतः।

अस्तु वा तत्र पृथिव्यन्यवृत्तित्वस्य प्रतियोगितासंबन्धेनाभावे भानानुरोधेन तत्राधेयत्ववाचकत्वेन लुप्तायाः सप्तम्याः कल्पनम्। न च एवकारस्यैवान्यवृत्तित्वार्थकत्वमस्तु इति वाच्यम्। गौरवात्। प्रकृते च साध्यं विना अभाव इत्यत्र आधेयत्वस्य संसर्गतयैवोपपत्तौ विनापदोत्तरमाधेयत्वार्थसप्तमीकल्पनं न युक्तम्। [अत्र पूर्वत्र च आधेयत्वं निरूपकतासंबन्धावच्छिन्नाधेयत्वरूपम्। भावपदार्थे आधेयत्वे साध्याभाववन्निरूपितनिरूपकतासंबन्धावच्छिन्नाधेयताया एव सत्त्वादित्यवधेयम्।]

न च "पृथिव्यामेव गन्ध" इत्यत्रापि एवकारस्य अन्यः अभावश्चार्थः। पृथिवी-पदोत्तरसप्तम्याः प्रतियोगित्वमर्थः। तत्र पृथिव्याः आधेयतासंबन्धेनान्वयः। प्रति-योगित्वस्य निरूपकत्वसंबन्धेनान्यत्वेऽन्वयः। अन्यस्य चाधेयतासंबन्धेन अभावेऽन्वयः। तस्य गन्धेऽन्वयः। तथा च पृथिवीनिष्ठप्रतियोगितानिरूपकभेदवदा-धेयत्वाभाववान् गन्ध इति बोधः इति वाच्यम्। एवकारार्थस्य अन्यस्य अभावे आधेयत्वं संबन्ध इति वक्तुमशक्यत्वात्। आधेयत्वं हि आधेयत्ववदनुयोगिकः संबन्धः। आधेयतावत्येव आधेयत्वसंबन्ध इति यावत्। एवकारार्थः अभावः न एवकारार्थान्तरभूतान्यनिरूपिताधेयतावान् इति कथं स संबन्धः स्यात्।

न च तत्राधेयत्वाभावो न प्रतीयते, अपि तु आधेयत्वसंबन्धावच्छिन्नप्रतियोगि-ताकपृथिव्यन्याभावः प्रतीयते। तादृशप्रतियोगिताकत्वमेवाभावेऽन्यस्य संबन्धोऽस्तु इति वाच्यम्। आधेयत्वस्य वृत्त्यनियामकतया अभावप्रतियोगितावच्छेदकत्वायोगात्।

किं च "चैत्रः पचति" इत्यादौ कृत्यादिप्रतियोगिकसंबन्धस्य अपदार्थत्वेऽपि 'पाककृतिमान्' इत्यादौ मतुबादिपदेन तस्य विवरणवत् अविनाभावो व्याप्तिरित्यत्र सामानाधिकरण्यस्य अपदार्थस्य साध्याभाववति यो भाव इति पदेन विवरणमपि न विरुध्यते। विवरणीयस्यार्थस्यान्यलभ्यत्वेनापदार्थत्वोपपत्तेः।

"विना वातं वृक्षः पतितः" इत्यादौ विनापदार्थस्य अभावस्य आश्रयता-संबन्धेन वृक्षेऽन्वयात् वाताभावविशिष्टो वृक्षः पतित इति शब्दतो लभ्यते। पतनेऽनुभवसिद्धः वातजन्यत्वाभावलाभस्तु आर्थः। जन्यतायाः पदानुपस्थाप्यत्वात् तदभावस्य, तस्याः वृत्त्यनियामकसंबन्धत्वात् तदवच्छिन्नवाताभावस्य च शब्देन बोधयितुमशक्यत्वात्।

"पुत्रं विना गत" इत्यादौ पुत्रादिपदं लक्षणया पुत्रगमनादिपरम्। विनापदस्या-भावोऽर्थः। तत्र द्वितीयान्तार्थस्य पुत्रगमनप्रतियोगिकत्वस्यान्वयः। विनापदार्थः अभावः समानकालीनत्वसंबन्धेन गतपदार्थैकदेशे गमनेऽन्वेति। तथा च पुत्र-कर्तृकगमनाभावकालीनगमनाश्रयः इति बोधः।

केचित्तु उक्तस्थले असाहित्यमेव विनापदार्थः। तस्य च गमनादिकर्तर्यन्वयः। असाहित्यं च स्वकर्तृकसमभिव्याहृतगमनादिक्रियासमानकालीनतादृशक्रियाकर्तृत्व-रूपसाहित्याभावः। क्रियान्वयी स्वकर्तृकतादृशक्रियाकालीनत्वाभाव एव वा विनापदार्थः। कर्तृत्वे पुत्रादेराधेयतासंबन्धेनान्वयः। विभक्तिः साधुत्वार्थैव। अस्तु वा आधेयत्वं द्वितीयार्थः। सप्तम्या आधेयत्वार्थकत्वेऽपि नात्र सप्तमीप्रसक्तिः। तस्याः कारकविभक्तित्वात् क्रियान्वयिस्वार्थबोधकत्वात् विनापदार्थान्वयिस्वार्थ-

बोधकत्वायोगात्। अतः शेषषष्ठीप्रसक्त्या तामेवोपपदविभक्तिर्द्वितीया बाधत इति उपपदविभक्तयः सर्वाः षष्ठ्यपवादिकाः इति सिद्धान्तः न विरुध्यते।

विनासमानार्थकाभ्यां ऋते अन्तरेणेति निपाताभ्यां योगेऽपि दर्शितेनैव रीतिः। एवं विनायुक्ततृतीयापञ्चमीस्थलेऽपि।

यावच्छब्दयोगे द्वितीयार्थविचारः

शब्दशक्तिप्रकाशिकायाम्[१]

"नदीं यावन्मम पुरम्, गृहं यावत् धनं तव" इत्यत्र यावदित्यव्ययस्य मर्यादा अभिविधिश्च क्रमेणार्थः। तेन 'नदीपर्यन्तं मम पुरं, गृहाभिव्याप्तं त्वद्धनम' इत्याकारस्तत्र बोधः। तत्पर्यन्तत्वं च तदवधिकविप्रकर्षशून्यत्वे सति तत्संनिकृष्टत्वम्। तदभिव्याप्तत्वमपि प्रकृते तदारम्भकयावदवयवावच्छेदेन तत्संयुक्तत्वम्।

व्युत्पत्तिवादे[२]

मर्यादाभिवृद्ध्यर्थकयावच्छब्दयोगेऽपि द्वितीया दृश्यते। तत्र मर्यादार्थको यावच्छब्दः -- "आरम्भ तस्यां दशमीं तु यावत् प्रपूजयेत् पर्वतराजपुत्रीम्" इत्यादौ। मर्यादा सीमा कालरूपा देशरूपा च । तेन विना सीमा, तत्सहितोऽभिविधिः। तत्र कालनिष्ठं सीमात्वं च तत्कालसमभिव्याहृतकालप्रागभावानधिकरणस्वप्रागभावाधिकरणस्वसजातीययावत्कालवृत्तिसमभिव्याहृतक्रियानधिकरणत्वम्।

तथा च कृष्णनवमीप्रागभावानधिकरणरूपः शुक्लदशमीप्रागभावाधिकरणरूपः तिथित्वेन रूपेण शुक्लदशमीसजातीयो यावान् कालः स कृष्णनवमीमारभ्य शुक्लदशमीतः प्राक्काल एव, नवमीतः प्रक्कालस्य नवमी प्रागभावानधिकरणत्वात् शुक्लदशम्यादिरूपकालस्य च शुक्लदशमीप्रागभावाधिकरणत्वाभावात्। एवं चोक्ततत्तित्थ्यात्मककालवृत्तिर्या समभिव्याहृतपूजारूपा क्रिया तदनधिकरणत्वं दशम्यामस्तीति तस्याः सीमात्वोपपत्तिः।

एवं चोक्तस्थले यावच्छब्देन पूजारूपक्रियायां शुक्लदशमीनिष्ठतादृशसीमात्वनिरूपकत्वं प्रत्याय्यते। तावतैव अर्थतः शुक्लदशम्यां मर्यादात्वं लभ्यते। दशमीनिष्ठसीमात्वनिरूपकत्वं च दशम्यवृत्तित्वे सति कृष्णनवमीप्रागभावानधिकरणशुक्लदशमीप्रागभावाधिकरणतिथिकूटव्यापकत्वम्। तावता षोडशतिथ्यधिकरणक-

---

[१] पृ. ३५८

[२] पृ. २०२

षोडशपूजारूपस्यैककर्मणो विधेयतया लाभः। व्याप्यकालसमुदाये स्वसजातीयत्व-विशेषणात् पूजायामुक्तविशेषणद्वयाक्रान्तदण्डादिसमुदायव्यापकत्वेऽपि न बाधः। अन्वयितावच्छेदकरूपेण साजात्यस्य विवक्षणात् उक्तस्थले च तिथिमित्यस्याध्या-हारेण दशमीपदार्थतावच्छेदकस्य तिथित्वघटितत्वेन वा यावत्पदार्थान्वयिता-वच्छेदकतया तिथित्वभानात् तेन रूपेण दण्डादेर्दशमीसजातीयत्वाभावात्।

अत्र च प्रागभाव एव यावत्पदार्थः। द्वितीयार्थः प्रतियोगित्वमनुयोगित्वं वा। तत्र तत्प्रकृत्यर्थदशम्या अन्वयः। तावता दशमीप्रतियोगिकप्रागभावलाभः। तस्य स्व-प्रतियोग्यवृत्तित्वविशिष्टव्यापकतासंबन्धेन पूजारूपसमभिव्याहृतक्रियायामन्वयः। व्यापकत्वं च स्वाधिकरणतिथिनिष्ठाभावप्रतियोगितानवच्छेदकपूजाविशेषत्ववत्त्वम्। स्वपदं दशमीप्रागभावपरम्, एवमग्रेऽपि। स्वाधिकरणत्वं च स्वाधिकरणकृष्ण-नवमीप्रागभावावच्छिन्नभेदविशिष्टकालिकविशेषणतासंबन्धेन।

न चैवमपि व्यवहितपूर्वकृष्णनवमीप्रागभावावच्छिन्नभेदघटितसंबन्धेन अव्यव-हितपूर्वकृष्णनवमीपूर्वतिथीनामपि तत्तद्दशमीप्रागभाववत्वात् तदधिकरणतिथिव्याप-कत्वं पूजायां न संभवतीति वाच्यम्। स्वावच्छिन्न कृष्णनवमीप्रागभावाधि-करणत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदस्यैव प्रागभावसंबन्धे निवेशनीयत्वात्। उक्तव्यवहिततिथिषु एतत्संबन्धेन स्वस्यैव सत्त्वान्नानुपपत्तिः।

स्वाधिकरणनिष्ठाभावप्रतियोगितानवच्छेदकत्वमपि तादृशावच्छेदकत्वसंबन्धेन स्वावच्छिन्नस्य भेदः। तादृशावच्छेदकत्वसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रति-योगिताकभेद इति यावत्।

अथ निरुक्तभेदविशिष्टकालिकविशेषणतया शुक्लदशमीप्रागभावाधिकरणत्व-मुक्तपूजानधिकरणेष्वपि तिथिष्वस्तीत्यतः न पूजायाः शुक्लदशमीप्रागभावव्याप-कत्वं संगच्छते।

यदि च यद्यद्दशमीपूर्ववर्तिनीं नवमीमारभ्योक्तपूजनं विहितं तत्तद्दशमीप्राग-भावव्यापकत्वं विवक्ष्यते तदाननुगम इति चेत् — न। शुक्लदशमीप्रागभावा-वच्छिन्नप्रतियोगिताकभेद एव देवीपूजायां विवक्षितः। भेदश्च स्वाधिकरणत्ववन्निष्ठा-भावप्रतियोगितावच्छेदकत्वसंबन्धावच्छिन्नावच्छेदकताकप्रतियोगिताकः। स्वाधिक-करणत्वं च स्वाधिकरणकृष्णनवमीप्रागभावावच्छिन्नप्रतियोगिताकभेदविशिष्टकालि-कसंबन्धेन। एवं च दशमीप्रागभावत्वेन तत्तत्प्रागभावानामुपस्थितत्वेऽपि उक्त-संबन्धघटकस्वपदेन एकैकव्यक्तिरेव ग्राह्येत्यतो न दोषः। न च संसर्गघटकतयापि स्वत्वप्रवेशेऽननुगम एवेति वाच्यम्। स्वत्वस्यात्र परिचायकतयैव प्रवेशात्। तन्निरूपिताधिकरणत्वघटितसंबन्धे तदन्याप्रतियोगिकत्वादिति।

निष्कृष्टोऽनुगमस्तु — दशमीप्रागभावविशिष्टपूजाविशेषत्ववत्त्वं दशमीप्रागभावव्यापकत्वम्। वैशिष्ट्यं च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्वसंबन्धेन। स्वनिष्ठावच्छेदकता स्वाधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वसंबन्धावच्छिन्ना स्वाधिकरणता च स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वकालिकविशेषणत्वोभयसंबन्धेन। स्वनिष्ठावच्छेदकता स्वाधिकरणकृष्णनवमीप्रागभावाधिकरणत्वसंबन्धावच्छिन्ना।

देशरूपा सीमा च काशीतः कौशिकीं यावत् यातीत्यादौ। तत्र कौशिक्याः गमनसीमात्वं प्रतीयते। तच्च काशीपूर्वकौशिकीपश्चिमदेशव्यापकगमनाधिकरणत्वम्। यावत्पदेन च कौशिक्यनधिकरणकत्वे सति काशीपूर्वकौशिकीपश्चिमदेशव्यापकत्वं गमने प्रत्याय्यते। तत्रावधित्वमवधिमत्त्वं वा प्रतीचीत्वाद्यन्वयि। अत्र कौशिकीतोऽधिकगमनेऽपि काशीतः कौशिकीं यावत् यातीति प्रयोगवारणाय कौशिक्यनधिकरणकत्वे सतीत्युक्तम्। कौशिकीसमीपगमनशून्येऽपि चैत्रादौ कौशिकीं यावत् यातीति प्रयोगवारणाय विशेष्यम्।

तथा च यावच्छब्दार्थे द्वितीयाद्यन्तार्थस्य कौशिकीनिरूपितावधिमत्त्वस्यान्वयः। यावच्छब्दार्थप्रतीचीत्वस्य च स्वावध्यवृत्तित्वस्वव्यापकत्वोभयसंबन्धेन गमनादिक्रियायामन्वयः। व्यापकत्वं तु स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वम्। अवच्छेदकता च स्वाधिकरणनिष्ठभेदप्रतियोगितावच्छेदकत्वसंबन्धावच्छिन्ना। स्वाधिकरणता च काशीनिरूपितपूर्वत्वविशिष्टस्वरूपसंबन्धेन। तत्र स्वावध्यवृत्तित्वविशेषणात् अभिविधिस्थलव्यावृत्तिः। केवलस्वरूपसंबन्धेन प्रतीचीत्वाधिकरणे प्रयागादौ गमनस्यासत्त्वात् व्यापकत्वानुपपत्तिः, अतः काशीनिरूपितपूर्वत्वविशिष्टेत्युक्तम्।

अभिविध्यर्थो यावच्छब्दः "कार्तिकमारभ्य चैत्रं यावच्छीतं भवति" इत्यादौ, "काशीतः पाटलिपुत्रं यावत् वृष्टो देवः" इत्यादौ च। अभिविधिः तत्पर्यन्ताभिव्याप्तिः। एवं च प्रथमे कार्तिकपूर्वकालोत्तरचैत्रोत्तरकालपूर्वकालव्यापकत्वम्, आश्विनोत्तरत्वविशिष्टो यो वैशाखपूर्वत्वविशिष्टः कालः तद्व्यापकत्वं चैत्रोत्तरकालावृत्तित्वसहितं शीतभवने प्रतीयते। द्वितीये च काशीपश्चिमदेशपूर्वपाटलिपुत्रपूर्वदेशपश्चिमदेशव्यापकत्वं काशीपश्चिमदेशात् पूर्वदेशो यः काश्यादिः यश्च पाटलिपुत्रपूर्वदेशात् पश्चिमदेशः पाटलिपुत्रादिः तद्व्यापकत्वम् पाटलिपुत्रपूर्वदेशावृत्तित्वसहितं वृष्टौ यावच्छब्देन प्रत्याय्यते।

तथा च "कार्तिकमारभ्य चैत्रं यावत् शीतं भवति" इत्यत्र यावच्छब्दस्य अव्यवहितोत्तरक्षणपूर्वत्वमर्थः। द्वितीयान्तार्थस्य चैत्रनिरूपितत्वस्याव्यवहितोत्तरत्वे-

ऽन्वयः। उक्तपूर्वत्वरूपयावच्छब्दार्थस्य स्वानधिकरणकालावृत्तित्वस्वनिष्ठावच्छेदकताकप्रतियोगिताकत्वोभयसंबन्धेन समभिव्याहृतशीतादिपदार्थेन्वयः। स्वनिष्ठावच्छेदकता च कार्तिकाव्यवहितपूर्वक्षणप्रतियोगिकध्वंसाश्रयत्वविशिष्टस्वाश्रयवृत्तिभेदप्रतियोगितावच्छेदकत्वसंबन्धेन। तत्र विशिष्टान्तेन कार्तिकपूर्वकालव्यावृत्तिः। स्वानधिकरणेत्यादिद्वितीयसंबन्धनिवेशात् चैत्रोत्तरकालव्यावृत्तिः।

एवं "काशीतः पाटलिपुत्रं यावत् वृष्टो देवः" इत्यत्र काशीपश्चिमदेशपूर्वपाटलिपुत्रपूर्वदेशपश्चिमदेशव्यापकत्वं पाटलिपुत्रपूर्वदेशावृत्तित्वसहितं वृष्टौ यावच्छब्देन प्रत्याय्यते इत्यस्यायं भावः — पूर्वत्वविशिष्टदेशनिरूपितपश्चिमत्वं यावच्छब्दार्थः। पूर्वत्वे च पाटलीपुत्रनिरूपितत्वस्यान्वयः। पश्चिमत्वस्य च स्वानधिकरणदेशावृत्तित्वस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वोभयसंबन्धेन वृष्टावन्वयः। स्वनिष्ठावच्छेदकता च काशीपश्चिमत्वानधिकरणत्वविशिष्टस्वाश्रयवृत्तिभेदप्रतियोगितावच्छेदकत्वसंबन्धेन। विशिष्टान्तेन काशीपश्चिमदेशव्यावृत्तिः। स्वानधिकरणेत्यादिद्वितीयासंबन्धनिवेशाच्च पाटलीपुत्रपूर्वदेशमादाय दोषस्य निरासः।

कर्मप्रवचनीयाः[१]

अनुर्लक्षणे[२] इत्यादिसूत्रार्थः

लक्षणे द्योत्ये अनुः कर्मप्रवचनीयसंज्ञकः स्यात्। लक्षणपदेन हेतुभूतं ज्ञापकं विवक्षितम्। चिह्नमात्रस्य विवक्षायां लक्षणेत्थंभूताख्यान इत्यनेनैव अनोः कर्मप्रवचनीयसंज्ञासिद्धेः एतत्सूत्रवैयर्थ्यं स्यात्।

"कर्मप्रवचनीययुक्ते द्वितीया"[३] एतेन योगे द्वितीया स्यात्। पर्जन्यो जपमनु प्रावर्षत्। कदा पर्जन्योऽवर्षत् इति प्रश्ने उत्तरमिदम्। अत्र वृष्टिकाल उपदेष्टव्यः। स च दुर्ज्ञानत्वात् "शाखाग्रं प्रति द्विकलश्चन्द्रः" इतिवत् प्रज्ञानं किंचित् अवलम्ब्यैव ज्ञापनीयः। जपोऽत्र प्रज्ञानम्। तत्र जपकाले पर्जन्यः प्रावर्षदिति संभवति। हेतुभूतजपो ह्यत्र लक्षणम्। हेतुत्वं नियतपूर्वकालवृत्तित्वम्। एवं च वर्षहेतुभूतवरुणजपोत्तरकाले पर्जन्यः प्रावर्षत् इत्युत्तरं पर्यवस्यति। तत्र लक्षणत्वं हेतुत्वं चेति द्वयं द्वितीयार्थः। तदुभयमनुना द्योत्यते। लक्षणत्वं च ज्ञानजनकज्ञानविषयत्वम्। जपज्ञानेन तदुत्तरकालविशिष्टा वृष्टिः ज्ञाप्यते। ततश्च जपात्मकहेतुज्ञानजन्यज्ञानविषयो वर्षणमिति बोधः। इति शेखरलघुमञ्जूषादौ।

---

[१] सू. १.४.८३
[२] सू. १.४.८४
[३] सू. २.३.८

बृहन्मञ्जूषायाम्[१]

जपमनुप्रावर्षत् इत्यत्र द्वितीयार्थो लक्ष्यलक्षणभावः संबन्धो हेतुश्च। अनुश्च संबन्धविशेषद्योतकः। लक्ष्यत्वं च ज्ञानजन्यज्ञानविषयत्वम्। जपज्ञानेन हि जपकालज्ञानद्वारा कालिकविशेषविशिष्टा वृत्तिः ज्ञाप्यते। अत एव कदा वृष्टो देव इति प्रश्ने इदमुत्तरम्। तत्र प्रकृत्यर्थो हेतावभेदेनान्वेति। स च लक्ष्यत्वैकदेशज्ञाने। एकपदार्थयोरप्येवकारादौ परस्परान्वयदर्शनात्। तथा च जपाभिन्नहेतुज्ञानजन्यज्ञानविषयो वर्षणमिति बोधः।

शब्दशक्तिप्रकाशिकायाम्[२]

"कारीरीमनुवृष्टिः" इत्यत्र अनुशब्दस्य हेतुतावाचित्वात् कारीरीनिष्ठहेतुताका वृष्टिरित्यर्थः। कारीरी यज्ञविशेषः।

व्युत्पत्तिवादे[३]

"यज्ञमनु प्रावर्षत्" इत्यादौ अनुशब्दार्थः कारकत्वरूपं हेतुत्वम्। "अनुर्लक्षणे"[४] इत्यत्र कर्मप्रवचनीयसंज्ञाविधायकसूत्रे लक्षणपदस्य कारकहेतुपरत्वात्। तत्र च यज्ञान्वितस्य आधेयत्वरूपद्वितीयार्थस्य अन्वयः। हेतुतायाश्च निरूपकत्वसंबन्धेन वृष्टावन्वयः। जन्यत्वं वा अनुशब्दार्थः। तत्र निरूपितत्वरूपद्वितीयार्थस्य यज्ञान्वितस्यान्वयः। जन्यतायाश्चाश्रयतासंबन्धेन वृष्टावन्वयः। तथा च यज्ञनिरूपिताधेयत्वाश्रयहेतुतानिरूपकवृष्टिजनककृतिमान् इति वा यज्ञनिरूपितजन्यत्वाश्रयवृष्टिजनककृतिमान् इति वा बोधः।

पदवाक्यरत्नाकरे[५]

"जपमनु प्रावर्षत्" इत्यत्र जपपदात् द्वितीया जपनिष्ठा हेतुता इत्यन्वयबोधौपयिकीं जपानुपदयोराकाङ्क्षामभिव्यनक्ति। विशेषणविभक्तिवन्निरर्थिकैव। जपहेतुकं वर्षणं वाक्यार्थः।

यद्वा कर्मप्रवचनीया एव द्योतकाः। द्वितीयाया एव हेतुत्वे जन्यत्वे वा शक्तिः। अत एव जपेन प्रावर्षदिति तृतीयाबाधकं "अनुर्लक्षणे कर्मप्रवचनीयस्तद्योगे

---

[१] पृ. १६२
[२] पृ. ३५६
[३] पृ. २०५
[४] सू. १.४.८४
[५] पृ. ६३०

द्वितीया'' इत्यनुशासनमित्यभियुक्ताः। द्वितीयाया निरर्थकत्वे हेतुत्वार्थकतृतीयया समानविषयकत्वाभावेन बाध्यबाधकभावो न स्यात्।

विभक्त्यर्थनिर्णये[१]

''अनुर्लक्षणे''[२] इति सूत्रं लक्षणे द्योत्ये अनुः कर्मप्रवचनीयसंज्ञः स्यात् इत्यर्थकम्। ''कर्मप्रवचनीययुक्ते द्वितीया''[३] इत्यनुशासनं कर्मप्रवचनीययोगे द्वितीया भवतीत्यर्थकम्। लक्षणं हेतुत्वम्। तथा च —

''जपमनु प्रावर्षत्'' इत्यत्र द्वितीयायाः हेतुत्वं जन्यत्वमर्थः प्रवर्षणेऽन्वेति। अनुशब्दस्तु समभिव्याहारस्वरूपाकाङ्क्षाप्रयोजको निरर्थक एव। न चानुशब्दस्यैव हेतुत्वमर्थः, द्वितीया निरर्थिका तथास्त्विति वाच्यम्। द्वितीयायाः निरर्थकत्वस्य क्वाप्यदृष्टत्वात्। दर्शितानुशासनद्वयस्य जपेन प्रावर्षदिति हेतुतृतीयाबाधकत्वाच्च।

''तृतीयार्थे''[४] इत्यनुशासनं तृतीयार्थे साहित्ये द्योत्ये अनुः कर्मप्रवचनीयसंज्ञः स्यादित्यर्थकम्। तथा च नदीमन्ववसिता सेनेत्यत्र द्वितीयार्थः साहित्यमन्ववसितार्थेऽन्वेति। एवं च नद्या सह संबद्धेति बोधः।

''हीने''[५] इति सूत्रं हीने द्योत्ये अनुः कर्मप्रवचनीयसंज्ञ इत्यर्थकम्। तथा च ''अनु हरिं सुराः'' इत्यत्र हीनत्वं द्वितीयार्थः सुरेष्वन्वेति। हीनत्वमपकर्षोऽवन्ध्येच्छत्वादिविरहस्वरूपः।

भाट्टरहस्ये[६]

''जपमनु प्रावर्षत्'' इत्यत्र हेतुत्वसमानाधिकरणं लक्षणमनोरर्थः। जपरूपहेतूपलक्षितं वर्षणम् इति बोधः। अत्र द्वितीयायाः आधेयत्वमर्थः। तस्य च हेतुत्वे लक्षणत्वे चान्वयः। तयोश्च निरूपकतासंबन्धेन वर्षणे, तस्यानुकूलतासंबन्धेन कृतावन्वयः। तथा च जपनिष्ठहेतुत्वलक्षणत्वोभयनिरूपकवर्षणानुकूला कृतिरित्यन्वयबोधः।

---

[१] पृ. १८५
[२] सू. १.४.८४
[३] सू. २.३.८
[४] सू. १.४.८५
[५] सू. १.४.८६
[६] पृ. ९९

बालमनोरमायाम्

"तृतीयार्थे"[१] "सहयुक्तेऽप्रधाने"[२] इति सूत्रविहिततृतीयार्थे साहित्ये द्योत्ये अनुः कर्मप्रवचनीयसंज्ञः स्यात्। नदीमन्ववसिता सेना। नद्या सह संबद्धेत्यर्थः। साहित्यं द्वितीयार्थः। अनुस्तद्द्योतकः।

लघुशब्देन्दुशेखरे[३]

तृतीयाशब्देन तन्निमित्तभूतः शब्दः "सहयुक्तेऽप्रधाने"[४] इत्यत्रोपात्तः अनन्तरत्वात् सहशब्दो लक्ष्यते। तथा च तृतीयायाः सहशब्दस्य अर्थे साहित्ये द्योत्ये इत्यर्थः। साहित्यरूपः संबन्धः अनुद्योत्यः द्वितीयार्थः।

शब्दशक्तिप्रकाशिकायाम्[५]

"शूरमनुयुध्यते, दरिद्रमनुयाचते" इत्यादौ च तस्य सहायार्थत्वात् शूरेण सह युध्यते दरिद्रेण सह याचते इत्यर्थः।

साहित्यं च प्रकृतेऽनुयोगित्वरूपः। एवं च "नदीमन्ववसिता सेना" इत्यत्र नद्यनुयोगिकसंबन्धप्रतियोगिकसंबन्धप्रतियोगित्ववती सेनेति बोधः। न चैवं बोधे नद्याः कर्मप्रवचनीयद्योत्यसंबन्धप्रतियोगित्वाभावात् द्वितीया न स्यादिति वाच्यम्। तद्योत्यानुयोगित्वे स्वनिष्ठाधारतानिरूपिताधेयतासंबन्धेन नद्या अन्वयात् तद्द्योत्यसंबन्धप्रतियोगित्वाक्षतेः — इति गुरुप्रसादशेषे।[६]

भाट्टरहस्ये[७]

तृतीयार्थश्चानोरर्थः। नदीमन्ववसिता सेना। अत्र साहित्यरूपः तृतीयार्थः अनोरर्थः। स्थितिः धात्वर्थः। निरूपितत्वं द्वितीयार्थः। नद्या सह संबध्य स्थितेत्यर्थः।

---

[१] सू. १.४.८५
[२] सू. २.३.१९
[३] पृ. ६४९
[४] सू. २.३.१९
[५] पृ. ३५६
[६] पृ. १३०५
[७] पृ. ९९

हीने इति सूत्रार्थः

बालमनोरमायाम्

"हीने"[१] हीने द्योत्येऽनुः कर्मप्रवचनीयसंज्ञकः स्यात्। अनुहरिं सुराः। हरेर्हीना इत्यर्थः। हीन इति ओ हाक् त्यागे इति धातोः भावे क्तः। निकर्ष इत्यर्थः। अनुद्योत्यो निकर्षो द्वितीयार्थः। तत्र प्रतियोगितासंबन्धेन प्रकृत्यर्थस्य हरेः अन्वयः। हरिप्रतियोगिकनिकर्षवन्तः सुराः इति बोधः।

लघुमञ्जूषायाम्[२]

स्वावधिकापकर्षरूपहीनत्वसंबन्धोऽनुद्योत्यो द्वितीयार्थः। हर्यवधिकापकर्षवन्त इत्यर्थः।

शब्दशक्तिप्रकाशिकायाम्[३]

अनुदेवं दानवाः इत्यादावनुना हीनबलस्याभिधानात् दानवाः देवेभ्यः हीनबला इत्याकारको बोधः।

पदवाक्यरत्नाकरे[४]

"अनु हरिं सुराः" इत्यत्र अनोः हीनत्वमर्थः। हर्यवधिकहीनत्ववन्तः सुराः इत्यन्वयबोधः।

उपोऽधिके च इति सूत्रार्थः

चन्द्रकलायाम्[५]

उपोऽधिके च।[६] आधिक्ये अपकर्षे च द्योत्ये उपेत्यव्ययं कर्मप्रवचनीयसंज्ञकं स्यात् । अधिके सप्तमी वक्ष्यते। "उप परार्धे हरेः गुणाः"। परार्धादधिका इत्यर्थः। हीने, "उप हरिं सुराः"। हरेः हीनाः इत्यर्थः। उपद्योत्योऽपकर्षो द्वितीयार्थः। हर्यवधिकापकर्षवन्तः सुरा इति बोधः।

---

[१] सू. १.४.८६
[२] पृ. १२३६
[३] पृ. ३५६
[४] पृ. ६३१
[५] पृ. ६५०
[६] सू. १.४.८७

"उपखार्यां द्रोणः"। खार्यपेक्षयाधिकत्ववान् द्रोण इत्यर्थः। अधिकत्वमुपद्योत्यम्। अधिकत्वं च अधिकरणाधिकरणकस्थितिकर्तृत्वरूपं पारिभाषिकम्। तदेकदेशाधिकरणत्वे निरूपितत्वसंबन्धेन खार्या अन्वयः। न तु स्वनिष्ठपरिमाणाधिकपरिमाणत्वम्। द्रोणपरिमाणस्य खारीनिष्ठपरिमाणापेक्षया न्यूनत्वात्। स्वनिष्ठपरिमाणाधिकपरिमाणाख्यायां तु उपद्रोणे खारीत्युदाहरणं बोध्यम्।

"उप सुरेषु हरिः" इति आधिक्ये उदाहरणं लघुमञ्जूषायाम्।[१]

"उपार्जुनं क्षत्रियाः" इत्यत्र उपशब्देन हीलबलोऽभिधीयते। क्षत्रियाः अर्जुनाद्धीनबला इत्याकारको बोधः।[२]

विभक्त्यर्थनिर्णये[३]

"उपोऽधिके च"[४] इति सूत्रम् अधिके हीने च द्योत्ये उपेति प्राक्संज्ञं स्यादित्यर्थकम्। तथा च उप हरिं सुराः इत्यत्रापि द्वितीयाया हीनत्वमर्थः शेषं पूर्ववत्। अधिकेऽर्थे कर्मप्रवचनीययोगे षष्ठी वक्ष्यते।

भाट्टरहस्ये[५]

हीनत्वं च अनोरर्थः। "अनु हरिं सुराः"। हरेर्हीना इत्यर्थः। अत्र प्रतियोगित्वं द्वितीयार्थः। हीनत्वमधिकत्वं च उपार्थः। "उपहरिं सुराः"। हरेर्हीना इत्यर्थः। आधिक्ये सप्तमी वक्ष्यते।

लक्षणेत्थंभूतेत्यादिसूत्रार्थः

"लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः"।[६] एष्वर्थेषु विषयभूतेषु प्रत्यादयः कर्मप्रवचनीयसंज्ञकाः स्युः।

लक्षणे — वृक्षं प्रति परि अनु वा विद्योतते विद्युत्। लक्ष्यलक्षणभावसंबन्धो द्वितीयार्थः। स च प्रत्यादिद्योत्यः। वृक्षेण लक्ष्यमाणा विद्युत् विद्योतत इत्यर्थः। उत्पन्नविनष्ट एव। तथा च वृक्षप्रकाशोत्तरं विद्युतोऽसत्त्वेन प्रत्यक्षाभावात् अनुमेया सा। ततश्च प्रकाशितेन वृक्षेण विद्युतः ज्ञानात् वृक्षो लक्षणम्।[७]

---

[१] पृ. १२३६
[२] श.श.प्र.पृ. ३५६
[३] पृ. १८५
[४] सू. १.४.८७
[५] पृ. ९९
[६] सू. १.४.९०
[७] बा.म.पृ. ४१६

वृक्षसंबन्धि द्योतनमर्थः। संबन्धश्च लक्ष्यलक्षणभाव इति प्रत्यादयो द्योतयन्ति।[१]

लक्ष्यलक्षणेति। वृक्षप्रकाशेन विद्युद्विद्योतज्ञानात् वृक्षो लक्षणम्। विद्युद्विद्योतनं लक्षणम्।[२]

अत्र लक्षणत्वं ज्ञानजनकज्ञानविषयत्वम्। ज्ञानजन्यज्ञानविषयत्वं लक्ष्यत्वम्। वृक्षदर्शनजन्यज्ञानविषयो विद्युद्विद्योतनमिति बोधः। वृक्षे दृष्टे सति तत्समीपदेशावच्छिन्नविद्युद्विद्योतनं ज्ञायते।[३]

वृक्षप्रकाशेन विद्युद्विद्योतदेशज्ञानात् वृक्षो लक्षणम्।[४]

लक्ष्यलक्षणभावः प्रत्यादिद्योत्यः। वृक्षप्रकाशेन हि तत्समीपदेशावच्छिन्ना विद्युत् ज्ञाप्यते।[५]

बृहन्मञ्जूषायाम्[६]

''वृक्षं प्रति पर्यनु वा विद्यते विद्युत्''। लक्ष्यत्वसंबन्धो द्वितीयार्थः। प्रत्यादिद्योत्यः। वृक्षप्रकाशेन विद्युत्ज्ञानात् तस्य लक्षणत्वम्। तेन हि दिग्विशेषावच्छिन्ना विद्युत् ज्ञाप्यते। वृक्षज्ञानजन्यज्ञानविषयो विद्युत् विद्योतत इति बोधः।

''भक्तो विष्णुं प्रति''। विषयत्वं द्वितीयार्थः। तस्य चैकदेशभक्तावन्वयः। विष्णुविषयकभक्त्याश्रय इति बोधः।

लक्ष्मीर्हरिं प्रति। स्वत्वं प्रतिद्योत्यं द्वितीयार्थः। हरिप्रतियोगिकस्वत्ववती लक्ष्मीः।

''वृक्षं वृक्षं प्रति सिञ्चति'' इत्यत्र वीप्सा द्विर्वचनद्योत्या। वीप्सापदेन बोधयितुमिच्छाविषयत्वव्याप्यत्वं बुद्धिस्थयावत्प्रकृत्यर्थनिष्ठमुच्यते। व्याप्यत्वविशिष्टवृक्षादीनां च स्ववृत्तिव्याप्तिनिरूपकत्वेन सेचनाद्यन्वय इत्यत्र प्रत्यादयस्तात्पर्यग्राहकाः। कर्मप्रवचनीयतया संबन्धावच्छेदकत्वस्य युक्तत्वात्। वृक्षादीनां सेचनकर्मत्वेऽपि प्रथमतः प्रतिद्योत्यसंबन्धेनान्तरङ्गत्वात् तन्निमित्तोपपदविभक्तिभूतद्वितीयैव।

अत एव प्रत्यर्थं शब्दनिवेशः इत्यादावर्थस्य निवेशनक्रियानिरूपिताधिकरणत्वेऽपि अर्थमर्थं प्रति इत्येव विग्रहो भाष्यादौ दर्शितः।

---

[१] प्रौ.म.पृ. ८७४
[२] ल.श.र.पृ. ८७४
[३] भावप्रकाशे पृ. ८७४
[४] ल.श.शे.पृ. ६५१
[५] ल.म.पृ. १२३६
[६] पृ. १६३

एतेन "उपपदविभक्तेः कारकविभक्तिर्बलीयसी"[१] इति न्यायात् कर्मण्येवात्र द्वितीयेत्यपास्तम्। युगपदुभयान्वयस्य बुद्ध्यारूढत्व एव तत्प्रवृत्तेः। प्रतिपद्योत्यसंबन्धेनान्वयेपि आश्रयत्वेनान्वयाच्च।

किं च कर्मणि द्वितीयायां प्रतिना सामर्थ्याभावात् प्रतिवृक्षं सिञ्चतीति प्रयोगानापत्तिः।

एतेनात्र कर्मण्येव द्वितीया। पर्यादयस्तु क्रियाविशेषका एवेति हरदत्ताद्युक्तमपास्तम्। क्रियाविशेषकत्वेऽन्वर्थतया कर्मप्रवचनीयसंज्ञाया एवानापत्तेः। अत एव भाष्येऽपि किमर्थं पुनरिदमुच्यते, न चोपसर्गसंज्ञादिबाधनार्थम्, क्रियायोगाभावात् इत्युक्त्वा, द्वितीयार्थमिति सिद्धान्तितम्। "वृक्षं प्रति सिञ्चति" इत्युदाहरणे क्वचित् क्रियान्वये कर्मत्वादेव द्वितीया सिद्धेति प्रश्नः। प्रत्याद्यवच्छेद्यसंबन्धान्वयेनान्तरङ्गत्वात् प्राप्तषष्ठीबाधनार्थमकर्मकार्थं चावश्यकमित्युत्तरमिति प्रतिभाति।

"वृक्षमभि परि प्रति अनु वा द्योतते विद्युत्" इत्यादौ अभ्यादेः कर्मप्रवचनीयस्य लक्ष्यीकृत्येत्यर्थः। तेन वृक्षं लक्ष्यीकृत्य आश्रित्य प्रकाशते विद्युत् इत्येव वाक्यार्थः। आश्रितत्वान्वयि निरूपितत्वमेव तत्र द्वितीयया बोध्यते। तथा च वृक्षनिरूपिताश्रितत्ववती विद्युत् प्रकाशत इत्यन्वयबोधः।[२]

व्युत्पत्तिवादे[३]

"वृक्षं प्रति विद्योतते विद्युत्" इत्यत्र परिचायकत्वरूपं लक्षणत्वं परिचेयत्वरूपं लक्ष्यत्वं वा कर्मप्रवचनीयार्थः। वृक्षप्रकाशेन विद्युद्विद्योतनज्ञानात् वृक्षस्य परिचायकता। द्वितीयार्थश्च आधेयत्वं निरूपितत्वं वा। परिचायकतायाः निरूपितत्वसंबन्धेन, परिचेयतायाः आश्रयत्वसंबन्धेन विद्युति अन्वयः। वृक्षनिष्ठपरिचायकतानिरूपिका वृक्षनिरूपितपरिचेयत्ववती वा विद्युत् प्रकाशाश्रय इत्यन्वयबोधः। परिचायकत्वं च ज्ञानजनकज्ञानविषयत्वम्। परिचेयत्वं ज्ञानजन्यज्ञानविषयत्वम्।

पदवाक्यरत्नाकरे[४]

"वृक्षं प्रति अभि परि अनु वा द्योतते विद्युत्" इत्यत्र चतुर्णां प्रत्यादीनां लक्षणं वाच्यं द्योत्यं वा। लक्षणं तु द्योत्यद्योत्यकभावादि। वृक्षवृत्तिद्योतकता-

---

[१] परि. १०३ सू. ५८३/-२.३.१६

[२] श.श.पृ. ३५५

[३] पृ. २०६

[४] पृ. ६३१

निरूपितद्योतनाश्रयः विद्युत् इत्यन्वयबोधः। आलोकान्तरसंयोगानपेक्षद्रव्यचाक्षुषविषयत्वं द्युतेरर्थः। तत्र संनिकर्षस्वरूपाणां चक्षुर्व्यापाराणामाभिमुख्यादिद्वारा कथंचित् वृक्षादेः द्योतकत्वम्। द्योतकत्वं च ज्ञानजनकज्ञानविषयत्वम्।

अन्ये तु —

निदाघधामानमिवाधिदीधितिं मुदा विकासं मुनिमभ्युपेयुषी
विलोचने बिभ्रदधिश्रितश्रिणी स पुण्डरीकाक्ष इति स्फुटोऽभवत्।।

इति शिशुपालवधप्रथमसर्गश्लोके "मुनिमभि विकासमुपेयुषी विलोचने" इत्यत्र विकासः पुटविभागः। तत्र मुनेः विकासकत्वं द्वितीयार्थः। एवं तत्तत्क्रियासमभिव्याहारेण नानार्थकल्पने गौरवात् जनकतैव लक्षणम्। वृक्षवृत्तिजनकताकं द्योतनं, मुनिवृत्तिजनकताकश्च विकासः वाक्यार्थ इत्याहुः।

तच्चिन्त्यम्। तथा सति "अनुर्लक्षणे"[१] इति सूत्रप्रणयनवैयर्थ्यात्। तत्रापि हेतुतारूपस्यैव लक्षणस्य विवक्षितत्वात्।

लक्षणेत्थंभूतेति सूत्रे धात्वर्थनिरूपिता हेतुता विवक्षिता, अनुर्लक्षणे इति सूत्रे तु हेतुतासामान्यम्। अत एव "दण्डमनु घट" इत्यादौ द्वितीया। अतो नोक्तसूत्रस्य वैयर्थ्यमित्यपरे।

भाट्टरहस्ये[२]

प्रतिपर्यनूनां च सामान्यतो लक्षणमर्थः। "वृक्षं प्रति परि अनु वा विद्योतते चन्द्रमाः" इत्यत्र द्योतकत्वं प्रत्यादेरर्थः। आधेयत्वं द्वितीयार्थः। तस्य स्वाश्रयद्योतकतानिरूपकद्योतनानुकूलत्वसंबन्धेन कृतावन्वयः। वृक्षनिष्ठद्योतकतानिरूपकद्योतनानुकूला विद्युत्कर्तृका भावना इति बोधः।

इत्थंभूताख्याने उदाहरणं शाब्दबोधश्च

इत्थंभूताख्याने — "भक्तो विष्णुं प्रति परि अनु वा"। अयं प्रकारः इत्थम्। तं प्राप्तः इत्थंभूतः। "भू प्राप्तौ" इति धातोः कर्तरि क्तः। तस्य आख्यातम् उपपादकम् इत्थंभूताख्यानम्। भज सेवायाम्। भक्तिरस्त्यस्येति भक्तः। मत्वर्थीयोऽर्शआद्यच्। विषयतासंबन्धः प्रत्यादिद्योत्यः द्वितीयार्थः। तस्य भक्तावन्वयः। विष्णुविषयकभक्तिमान् इत्यर्थः। अत्र भक्तः भक्तिरूपं प्रकारविशेषं प्राप्तत्वात् इत्थंभूतः। तस्य

[१] सू. १.४.८४
[२] पृ. १००

विष्णुविषयकतया उपपाद्यत्वात् विषयतासंबन्धः तदुपपादकः प्रतिद्योत्य इति बालमनोरमायाम्।[1]

इत्थंभूतः कंचित् प्रकारं प्राप्तः। स आख्यायतेऽनेनेति इत्थंभूताख्यानं प्रकारविशेषनिरूपकम् इति शेखरे।[2]

आख्यायते निरूप्यते। "भक्तो विष्णुं प्रति परि अनु" इत्यत्र भक्तिं प्राप्तः आख्यायते। भक्तिश्चाराध्यत्वप्रकारकं ज्ञानम्। द्वितीयार्थश्च विषयित्वं, प्रत्यादिद्योत्यम्। तस्य भक्तपदार्थैकदेशभक्तावन्वयः। विष्णुविशेष्यकाराध्यत्वप्रकारकज्ञानवान् चैत्र इत्यन्वयबोध इति चन्द्रकलायाम्।[3]

अत्र भक्तत्वादिप्रकारविशेषरूपः संबन्धः प्रत्यादिद्योत्यः। भक्तपदार्थे विशेषणस्यापि तस्य संबन्धत्वम्। इति लघुमञ्जूषायाम्।[4]

शब्दशक्तिप्रकाशिकायाम्[5]

"पितरमभि परि प्रति अनु वा चैत्रः" इत्यत्र इत्थंभूतार्थकैः अभ्यादिभिः (योगे द्वितीया)। पितरीत्थंभूतश्चैत्र इति बोधः इत्युक्तम्। इत्थंभूतत्वं साधर्म्यमिति तद्व्याख्यायाम्। पितृसधर्मा चैत्र इति वाक्यार्थ इति मन्यते।

व्युत्पत्तिवादे[6]

इत्थंभूताख्यान इत्यस्य "मातरं प्रति साधुः" इत्युदाहरणम्। साधुत्वं प्रियकारित्वम्। साधुत्वघटकप्रियान्वयी संबन्धः कर्मप्रवचनीयार्थः। संबन्धान्वयि प्रतियोगित्वमनुयोगित्वं वा द्वितीयार्थः। मातृसंबन्धिप्रियकारीत्याकारको बोधः।

पदवाक्यरत्नाकरे[7]

इत्थंभावाख्यानेऽपि चत्वारः प्रतिपर्यभ्यनवः कर्मप्रवचनीयसंज्ञका भवन्ति। तद्युक्ते द्वितीयायाः क्वचित् विषयीभावोऽर्थः। भक्तो विष्णुं प्रतीत्यत्र विष्णुविषयकभक्तिमानित्यन्वयबोधः। क्वचिदुद्देश्यत्वमर्थः। तच्च क्रियाजनकेच्छाविष-

---

[1] पृ. ४१६
[2] पृ. ६५०
[3] पृ. ६५०
[4] पृ. १२३६
[5] पृ. ३५६
[6] पृ. २०६
[7] पृ. ६३२

यत्वम्। "शत्रून् प्रति धावति" इत्यत्र शत्रुगोचरनाशादीच्छाप्रयोज्या धावनक्रियेत्यन्वयबोधः।

भाट्टरहस्ये[१]

एवमित्थंभूताख्यानेऽप्येते त्रयः कर्मप्रवचनीयाः। "भक्तोऽयं विष्णुं प्रति परि अनु वा"। इत्थंभूत इत्यर्थः। विषयित्वं प्रत्याद्यर्थः। निरूपितत्वं द्वितीयार्थः। विष्णुनिरूपितविषयित्वाश्रयभक्त्याश्रय इति बोधः।

भागे उदाहरणं शाब्दबोधश्च

भागे — "लक्ष्मीं हरिं प्रति परि अनु वा"। हरेर्भाग इत्यर्थः। स्वामित्वं द्वितीयार्थः प्रत्यादिद्योत्यः। हरेः स्वभूतेति यावत्।, हरिनिष्ठस्वामित्वनिरूपिका लक्ष्मीः।

लक्ष्मीरूपस्य भागस्य हरिणा सह स्वस्वामिभावः इति प्रौढमनोरमायाम्।[२]

भागशब्देन अर्शआद्यजन्तेन तत्स्वामी उच्यते इति शेखरे।[३]

भागः स्वत्ववान् पदार्थः। तद्वाचकात् अर्शआद्यचि तादृशपदार्थस्वामिलाभः। एवं स्वामिनि विषयभूत इति लब्धम्। लक्ष्मीर्हरिं प्रतीत्यत्र स्वामित्वनिरूपितस्वत्वं द्वितीयार्थः। तस्य लक्ष्मीपदार्थे आश्रयत्वेनान्वयः। स्वामित्वे हरेः आधेयत्वसंबन्धेन अन्वयः। हरिनिष्ठस्वामित्वनिरूपितस्वत्वाश्रयः लक्ष्मीः इत्यन्वयबोध इति तदाशयः।

शब्दशक्तिप्रकाशिकायाम्[४]

"यन्मां प्रति परि वा तद्देहि" इत्यादौ प्रतिपरिभ्यामुपस्थिते भागे मत्संबन्धो द्वितीयया बोध्यते। तेन यो मदीयो भागः तं देहीत्येवं तत्र बोधः।

भागे वाच्ये द्योत्ये वा प्रतिपर्यनवः कर्मप्रवचनीयाः, न त्वभिः। "अभिरभागे"[५] इति निषेधात्। "लक्ष्मीर्हरिं प्रति" इत्यत्र हरिनिष्ठस्वामित्वनिरूपिका लक्ष्मीः इति बोधः।[६]

---

[१] पृ. १००
[२] पृ. ८७४
[३] पृ. ६५१
[४] पृ. ३५६
[५] सू. १.४.९१
[६] प.वा.र.पृ. ६३३

व्युत्पत्तिवादे[१]

'यो मां प्रति स्यात्' इत्यत्र भागः — स्वत्वाश्रयः प्रत्याद्यर्थः। तदन्वयी संबन्धो द्वितीयार्थः। इत्थं चास्मत्संबन्धी यो भागः स्यात् इति बोधः इत्युक्तम्।

भाट्टरहस्ये[२]

भागेऽप्येते प्रतिपर्यनवः कर्मप्रवचनीयाः। "लक्ष्मीः हरिं प्रति परि अनु वा" — हरेर्भाग इत्यर्थः। भागः स्वत्वं प्रत्याद्यर्थः। निरूपितत्वं द्वितीयार्थः। हरिनिरूपित-स्वत्वाश्रयः लक्ष्मीः इत्यर्थः।

वीप्सार्थकप्रतियोगे वाक्यार्थः

वीप्सायां — "वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति"। अत्रोपसर्गत्वाभावान्न षत्वम् इति कौमुदी। तत्र बालमनोरमा — नित्यवीप्सयोः इति द्विर्वचनम्। अत्र सन्वाच्या इच्छा स्वरूपसती व्याप्तिरेव तु विवक्षिता। सा च कार्त्स्न्येन संबन्धा-त्मिका। तथा च प्रकृत्यर्थगतकार्त्स्न्यमेव व्याप्तिः। सा यद्यपि द्विर्वचनद्योत्या, तथापि प्रतिपर्यनुभिर्योगे तद्द्योत्यत्वमपि। तथा च कृत्स्नं वृक्षं सिञ्चतीत्यर्थः। व्यक्तिकार्त्स्न्यमिह विवक्षितं, न तु अवयवकार्त्स्न्यमिति "नित्यवीप्सयोः"[३] इत्यत्र भाष्ये स्पष्टम्। ननु सेचने वृक्षस्य कर्मत्वादेव द्वितीयासिद्धेः किमिह कर्मप्रवचनीयसंज्ञयेत्यत आह — अत्रेति। गत्युपसर्गसंज्ञापवादः कर्मप्रवचनीय-संज्ञेत्युक्तम्। अतोऽत्र प्रतेः कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञायाः बाधात् "उपसर्गा-त्सुनोति"[४] इति षत्वं न भवति। कर्मप्रवचनीयत्वाभावे तु प्रतेरुपसर्गत्वात् ततः परस्य सस्य षत्वं स्यात् इत्यर्थः।

भाष्ये तु — किमर्थमिदमुच्यते। कर्मत्वादेव द्वितीया सिध्यति। उपसर्ग-संज्ञानिवृत्तिस्तु न प्रयोजनम्। क्रियायोगाभावेन तदप्रसक्तेः इत्याक्षिप्य, द्वितीयार्थ-मेवैतत् कर्मप्रवचनीयसंज्ञाविधानम् — इत्युक्तम्।

वृक्षस्य सेचने कर्मत्वेऽपि तदविवक्षायां संबन्धविवक्षायां षष्ठी बाधितुमिदं कर्मप्रवचनीयसंज्ञाविधानम्। किं च वृक्षस्य सेचने कर्मत्वेऽपि प्रथमतः प्रतिद्योत्य-संबन्धेऽन्वयेन अन्तरङ्गत्वात् तन्निमित्तषष्ठीबाधनार्थमिदम्। "वृक्षं वृक्षं प्रति

---

[१] पृ. २०६
[२] पृ. १००
[३] सू. ८.१.४
[४] सू. ८.३.६५

पक्षिणः आसत" इत्यादौ अकर्मकधातुयोगे अधिकरणादिसंज्ञानिरासार्थं चेदमिति भाष्याशयः इति शब्देन्दुशेखरे मञ्जूषायां च स्पष्टम्।

मञ्जूषायाम्[1]

"वृक्षं वृक्षं प्रति सिञ्चति"। अत्र वीप्साविषये व्याप्यत्वं द्विर्वचनद्योत्यम्। व्याप्यत्वविशिष्टवृक्षादीनां व्यापकत्वसंबन्धेन सेचनेऽन्वयः प्रत्यादिद्योत्यः। सेचने वृक्षादीनां कर्मत्वेऽपि तत्त्वेनाविवक्षायां कर्मप्रवनीययुक्तत्वात् द्वितीया। अत एव प्रत्यर्थं शब्दनिवेशः इत्यादावर्थस्य निवेशनक्रियानिरूपिताधिकरणत्वेऽपि अर्थमर्थं प्रतीत्येव विग्रहो भाष्यादौ दर्शितः। इति।

शब्दशक्तिप्रकाशिकायाम्[2]

"वृक्षं वृक्षमभि परि प्रति अनु वा वायसाः" इति वीप्सास्थलेऽपि प्रतिवृक्षवृत्तयो वायसा इत्यर्थ इत्येतावन्मात्रमुक्तं नाधिकं किंचित्।

व्युत्पत्तिवादे

व्युत्पत्तिवादे तु अत्र विस्तरः दृश्यते।[3] तथा हि — "वृक्षं वृक्षं प्रति सिञ्चति" इत्यादौ कर्मण्येव द्वितीया। षत्वबाध एव संज्ञायाः फलम्। प्रतिश्च निरर्थकः। "गृहे गृहे अश्वः" इत्यादाविव व्यापकतायाः द्विरुक्तिबललभ्यत्वात् प्रतिशब्दस्य व्यापकतार्थकत्वे उक्तार्थकत्वेन गृहं व्याप्नुवतेऽश्वा इत्यादाविव द्विरुक्तिरेव न स्यात्। उक्तार्थानामप्रयोग इति शाब्दिकसिद्धान्तात्।

न च प्रतिशब्दस्य व्यापकतार्थकत्वं "प्रतिदिनमधीत" इत्यादौ क्लृप्तम्। द्विरुक्तेः व्यापकतार्थकत्वं "वृक्षं वृक्षं सिञ्चति" इत्यादौ क्लृप्तम्। प्रकृते 'वृक्षं वृक्षं प्रति सिञ्चति' इत्यत्र "एकार्थबोधकपदयोरेकवाक्ये समावेशे अन्यतरस्य वैयर्थ्यं न भवति, किं तूभयोरेव तदर्थकत्वं, विनिगमकाभावात्" इत्यर्थकात् "संभेदे नान्यतरवैयर्थ्यम्" इति न्यायात् द्वयोरेव व्यापकताबोधकत्वमवर्जनीयमिति वाच्यम्। प्रतिमासमधीते इत्यादावव्ययीभावसमासे प्रथमातिरिक्तविभक्तेरसाधुत्वेन प्रतिशब्देनैव मासनिरूपितव्यापकत्वमध्ययनक्रियायां बोध्यते। प्रथमाविभक्तिस्तु न केवला प्रकृतिः प्रयोक्तव्या नापि प्रत्ययः इत्यनुशासनात् निरर्थिकापि प्रयोगसाधुत्वार्था।

---

[1] पृ. १२३७
[2] पृ. ३५६
[3] पृ. २०६-२०९

अव्ययीभावसमासे उक्तयुक्त्या प्रतिशब्दस्य व्यापकत्वार्थकत्वम्। "वृक्षं वृक्षं प्रति सिञ्चति" इत्यत्र तु न प्रतिशब्दस्य व्यापकतार्थकत्वम्। तथा हि — तत्र प्रतिशब्दस्य व्यापकतार्थकत्वे व्यापकतायां वृक्षप्रातिपदिकार्थस्य निरूपितत्व-संबन्धेनान्वयो वक्तव्यः। स च न संभवति, वृक्षस्य द्वितीयार्थकर्मत्वे आधे-यतासंबन्धेन, अथ वा द्वितीयार्थे अधेयत्वे निरूपितत्वसंबन्धेन विशेषण-तयान्वितत्वेन पुनः प्रतिशब्दार्थव्यापकत्वे विशेषणतया अन्वयस्यासंभवात्। एकत्र विशेषणतयोपस्थितस्यान्यत्र विशेषणतया नान्वयः इति व्युत्पत्तेः।

न चास्तु कर्मत्वसंबन्धावच्छिन्नं व्यापकत्वं प्रतिशब्दार्थः। तादृशार्थतात्पर्यग्राहिका द्वितीया। तथा च द्वितीयार्थाविशेषणस्य प्रकृत्यर्थस्य व्यापकत्वेऽन्वय संभव इति वाच्यम्। कर्मत्वरूपस्य संबन्धस्य वृत्त्यनियामकतया व्यापकतानवच्छेदकतया कर्मत्वसंबन्धावच्छिन्नव्यापकताया अप्रसिद्ध्या तस्याः प्रत्यर्थत्वायोगात्।

ननु "वृक्षं वृक्षं प्रतिसिञ्चति" इत्यादौ प्रतिशब्दस्य आश्रयतासंबन्धावच्छिन्न-व्यापकत्वमर्थः। तत्र वृक्षप्रातिपदिकार्थस्य निरूपितत्वसंबन्धेनान्वयः। प्रत्यर्थ-व्यापकतायाः वृक्षपदोत्तरद्वितीयार्थकर्मत्वे आश्रयतासंबन्धेनान्वयः। तथा च वृक्ष-निष्ठतादात्म्यसंबन्धावच्छिन्नव्याप्यतानिरूपिताश्रयतासंबन्धावच्छिन्नव्यापकतावत्कर्म-तानिरूपकं सेचनमिति बोधो जायते। अतो न कोऽपि दोष इति चेत् —

न। प्रकृत्यर्थसुबर्थयोर्मध्ये नञर्थातिरिक्तभानस्य व्युत्पत्तिविरुद्धत्वात्। प्रत्य-यानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति हि व्युत्पत्तिः प्रकृत्यर्थान्वितेतरपदार्था-न्वितस्वार्थबोधकत्वं विरुणद्धि। प्रकृतिप्रत्ययार्थयोर्मध्ये नञर्थभानं तु भवितुमर्हति। "नामूढस्येतरोत्पत्तेः"[१] "नानुपमृद्य प्रादुर्भावात्"[२] इत्यादौ तथा भानस्य दर्शनात्। तथा हि — "तेषां मोहः पापीयान् नामूढस्येतरोत्पत्तेः"[३] इति न्यायसूत्रम्। तेषां दोषाणां मध्ये मोहः मिथ्याज्ञानं पापीयान्। यतः अमूढस्य मोहरहितस्य इतरयो रागद्वेषयोः उत्पत्तिर्न भवतीत्यर्थः। न इतरोत्पत्तेः इत्यस्य इतरोत्पत्त्यभावात् इत्यर्थः। तत्र इतरोत्पत्तिपदार्थस्य नञर्थेऽभावे तस्य च पञ्चम्यर्थे हेतुत्वेऽन्वये सत्येव सोऽर्थो लभ्यते। ततश्च प्रकृत्यर्थप्रत्ययार्थयोर्मध्ये नञर्थस्य भानमा-वश्यकम्। एवं "अभावाद्भावोत्पत्तिर्नानुपमृद्य प्रादुर्भावात्"[४]। बीजादिकमनुपमृद्य अविनाश्य अङ्कुरादेः प्रादुर्भावाभावात् अभावरूपात् उपादानकारणात् भाव-रूपकार्यस्य उत्पत्तिः इति सूत्रार्थः। अत्रापि प्रादुर्भावपदार्थस्य नञर्थेऽभावे तस्य च

[१] न्या.सू. ४.१.६
[२] न्या.सू. ४.१.१४
[३] न्या.सू. ४.१.६
[४] न्या.सू. ४.१.१४

पञ्चम्यर्थेऽन्वये सत्येव प्रादुर्भावाभावादित्यर्थो लभ्येत। ततश्च प्रकृत्यर्थसुबर्थयोर्मध्ये नञर्थभानमावश्यकम् इति नञर्थातिरिक्तस्य तयोर्मध्ये न भानमित्युक्तम्। प्रकृते च प्रत्यर्थस्य व्यापकत्वस्य तथा भानं न संभवतीति प्रतिर्निरर्थक एव। द्वितीयार्थे कर्मत्वे प्रकृत्यर्थस्य वृक्षस्य व्यापकत्वसंबन्धेनान्वयः। वृक्षव्यापककर्मताकं सेचनमिति बोधः। प्रतिशब्दस्य कर्मप्रवचनीयसंज्ञायाः प्रयोजनं तु उपसर्गसंज्ञाबाधनद्वारा सिञ्चतीत्यत्र षत्वाभावः इति सिद्धम्।

भाट्टरहस्ये[१]

वीप्सायां चैते प्रतिपर्यनवः कर्मप्रवचनीयाः। "वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति"। अत्र मुख्यकर्मत्वं यदा जलादेः तदा जलं सिञ्चतीति प्रयोगः। यदा तु वृक्षनिरूपितसंयोगाश्रयत्वं (जले) विवक्षितम्, जलनिरूपितसंयोगाश्रयत्वमेव वृक्षेऽपि विवक्षितम्, तदा "वृक्षं जलेन सिञ्चति" इति प्रयोगः। तदा तस्य मुख्यमेव कर्मत्वम्। यदा तु जले मुख्यकर्मत्वं विवक्षित्वा प्रत्यादेश्च लक्षणार्थत्वमङ्गीक्रियते, तदा "वृक्षं प्रति जलं सिञ्चति" इत्यपि प्रयोगः।

न चैवं वीप्साभावेऽपि प्रत्यादेः कर्मप्रवचनीयसंज्ञात्वे वीप्सासु प्रतिपर्यनवः इत्यनुशासनवैयर्थ्यम् इति वाच्यम्। प्रत्यादेः लक्षणार्थकत्वाभावेऽपि आभिमुख्यादिरूपार्थान्तरकत्वे वीप्सायां सत्यामेव कर्मप्रवचनीयसंज्ञेत्येवंपरत्वात्। अत एव न वीप्सायाः प्रत्याद्यर्थत्वम्, द्विर्वचनेनैव लाभात्। ततश्च तत्राभिमुख्यादिकं प्रत्याद्यर्थः। निरूपितत्वं द्वितीयार्थः।

"अभिरभागे"।[२] भागवर्जे लक्षणादावभिः कर्मप्रवचनीयसंज्ञः स्यात्। लक्षणे – हरिमभिवर्तते। जयः क्वेति प्रश्ने उत्तरमिदम्। लक्ष्यभावोऽभिद्योत्यो द्वितीयार्थः। हरिलक्ष्यो जय इत्यर्थः। इत्थंभूताख्याने — भक्तो हरिमभि। विषयतासंबन्धोऽभिद्योत्यो द्वितीयार्थः। हरिविषयकभक्तिमानित्यर्थः। वीप्सायां — वृक्षं वृक्षमभिसिञ्चति। पूर्ववत्।

"अधिपरी अनर्थकौ"।[३] अनर्थकौ अधिपरी कर्मप्रवचनीयसंज्ञकौ भवतः। "कुतोऽध्यागच्छति। कुतः पर्यागच्छति"। कस्मात् प्रदेशादागच्छतीत्यर्थः। गतिसंज्ञाबाधात् गतिर्गतौ इति निघातो न।

---

[१] पृ. १००

[२] सू. १.४.९१

[३] सू. १.४.९३

"सुः पूजायाम्"।[१] सु सिक्तम्, सु स्तुतम्। अनुपसर्गत्वान्न षः। पूजायां किम्। सुषिक्तं किं स्यात् तवात्र। क्षेपोऽयम्।

सुसिक्तमिति। सेकगतपूज्यत्वद्योतकः सुः। क्रियापूज्यत्वकृते तत्तक्रियाकर्तुः पूज्यत्वे गम्ये एव एषा संज्ञा। अत एव सुषिक्तं किं तवेत्यत्र न। त्वया सम्यक् सिक्तम्। किं तु अत्रास्मिन् सुसेके कृते सति सेक्तुस्तव किम्? इति क्षेपोऽयम्। सेकक्रियाकर्तुः पूज्यत्वे गम्ये एव कर्मप्रवचनीयत्वम्। तदभावात् "उपसर्गात् सुनोति" इत्यादिना षत्वम्।

विभक्त्यर्थनिर्णये[२] लक्षणेत्थंभूतेत्यादिसूत्रार्थः

"लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः"[३] इति सूत्रं भागान्तेष्वर्थेषु द्योत्येषु वीप्साप्रयोगे च प्रत्यादयः कर्मप्रवचनीयसंज्ञकाः स्युः इत्यर्थकम्। तथा च "वृक्षं प्रति परि अनु वा द्योतते विद्युत्" इत्यत्र लक्षणं द्वितीयार्थः। तच्च धात्वर्थेन निरूपितं जनकत्वं तन्निष्ठजन्यत्वं वा। द्योतनं च तेजोविषयकं चाक्षुषं तादृशः साक्षात्कारो वा। तत्र वृक्षहेतुकत्वमन्वेति। तत्र वृक्षादेर्हेतुत्वं चक्षुरादिसंनिकर्षाणां सांनिध्येन विद्युदाद्याभिमुख्यद्वारा कथंचित् प्रयोजकत्वस्वरूपं बोध्यम्। तिङर्थो विषयत्वम्। तथा च वृक्षप्रयोज्यस्य तेजोविषयकस्य चाक्षुषस्य साक्षात्कारस्य वा विषयः विद्युत् इत्यन्वयबोधः।

धात्वर्थनिरूपितहेतुताविशेषस्य प्रकृते प्रतिपादनात् हेतुतासामान्यप्रतिपादकस्य "अनुर्लक्षणे"[४] इत्यनुशासनस्य न वैयर्थ्यम्। अतो "दण्डमनु घट" इत्यादौ दण्डादिहेतुकत्वं घटादौ प्रतीयते।

अत एव "परिपन्थं च तिष्ठति"[५] इति निर्देशः। तत्र परिपन्थशब्दस्य निपात्यमानत्वेऽपि परियोगावैकल्यात् द्वितीया। तदर्थो हेतुत्वविशेषः धात्वर्थस्थितावन्वेति।

इत्थंभावो वास्तवसंबन्धो द्वितीयार्थः। स च क्वचित् विषयविषयिभावः। यथा "विष्णुं प्रति पर्यनु वा भक्त" इत्यत्र। इष्टत्वेन इष्टसाधनत्वेन पूज्यत्वेन वा ज्ञानं

---

[१] सू. १.४.९४
[२] पृ. १८६-१९१
[३] सू. १.४.९०
[४] सू. १.४.८४
[५] सू. ४.४.३६

भक्तिः। इष्टमामुष्मिकम्। तत्र द्वितीयार्थो विषयित्वम् अन्वेति। तथा च विष्णुविषयकेष्टसाधनत्वादिप्रकारकज्ञानवानिति बोधः।

क्वचित् उद्देश्योद्देश्यिभावः यथा — "अयं शत्रून् प्रति धावति" इत्यत्र द्वितीयार्थ उद्देश्यत्वम्। तच्च क्रियाप्रयोजकफलेच्छाविषयत्वम्। तथा च शत्रुपदोत्तरद्वितीयायाः शत्रुनाशादिस्वरूपफलेच्छा अर्थः। तत्र शत्रोः विषयत्वेन संबन्धेनान्वयः। सा चेच्छा प्रयोज्यत्वेन क्रियायामन्वेति। एवं च शत्रुविषयकनाशादीच्छाप्रयोज्यधावनानुकूलकृतिमानयमिति बोधः।

क्वचित् समवायिसमवेतभावः यथा — दण्डमनुजातिरित्यत्र समवेतत्वं द्वितीयार्थो जातावन्वेति। दण्डसमवेता जातिरिति बोधः।

क्वचित् संयोगिसंयुक्तभावः यथा — "पुरुषमनुदण्ड" इत्यत्र संयुक्तत्वं द्वितीयार्थः दण्डेऽन्वेति। पुरुषसंयुक्तो दण्ड इति बोधः।

भागः असाधारणस्वत्वाश्रयः तस्मिन् द्योत्ये द्वितीया यथा — "लक्ष्मीः हरिं प्रति परि अनु वा" इत्यादौ। द्वितीयाया असाधारणस्वत्वमर्थः लक्ष्म्यामन्वेति। तथा च लक्ष्मीः हरेः असाधारणं स्वमित्यन्वयबोधः।

वीप्साप्रयोगे यथा — "वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति" इत्यादौ। 'वृक्षं वृक्षं सिञ्चति' इत्यत्रेव बोधः।

"अभिरभागे"[१] भागातिरिक्तार्थे पूर्वोक्ते अभिरुक्तसंज्ञकः स्यादित्यर्थः। तथा च 'हरिमभि वर्तत' इत्यत्र लक्षणम्, भक्तो हरिमभीत्यत्र इत्थंभावः। भागे तु यदत्र ममाभिष्यात् तदर्पयेत्यत्र षष्ठ्येव प्रमाणम्। न तु द्वितीया। वीप्साप्रयोगे तु देवदेवमभिस्तौतीत्यत्र द्विर्वचनेन वीप्सायाः द्वितीयया कर्मत्वस्याभिधानात्। प्रतिपर्यन्वभीनां कर्मप्रवचनीयसंज्ञा गत्युपसर्गसंज्ञापवादाय। तेनोपसर्गपरत्वप्रयुक्तषत्वाद्यभावः फलं पर्यवस्यति।

"अधिपरी अनर्थकौ"[२] इति सूत्रं निरर्थकावेतौ प्राक्संज्ञकावित्यर्थकम्। तथा चात्रापि विशेषणविभक्तिभिन्ननिरर्थकद्वितीयायामनुशासनविरहात् न द्वितीया। संज्ञाफलं तु कुतोऽध्यागच्छति, कुतः पर्यागच्छतीत्यत्र "गतिर्गतौ"[३] इति विहितस्य गतावाङ्गादौ परतो गतेरध्यादेर्निघातस्वरस्याभावः गतिसंज्ञायाः बाधादिति।

---

[१] सू. १.४.९१
[२] सू. १.४.९३
[३] सू. ८.१.७०

"सुः पूजायाम्"[१] इति सूत्रं अतिक्रमणे पूजायां चार्थे द्योत्येऽतिरुक्तसंज्ञः स्यात् इत्यर्थकम्। तत्संयोगासमानाधिकरणतत्संयोगध्वंसः अतिक्रमणम्। सामानाधिकरण्यमेककालावच्छिन्नं बोध्यम्। पूजा प्रीणनम्। तच्च प्रीतीच्छा। तथा च अतिपर्वतं सार्थः, 'अति देवान् कृष्ण' इत्यत्र अतिक्रमणं प्रीणनं च द्वितीयार्थः। तत्र तत्तत्संसर्गावच्छिन्नाधेयत्वेन संबन्धेन प्रकृत्यर्थस्यान्वयः। अतिक्रमणं सार्थे प्रीणनं कृष्णेऽन्वेति। तथा च पर्वतवृत्तिर्यः पर्वतसंयोगासमानाधिकरणः पर्वतसंयोगध्वंसः तद्वान् सार्थ इति, देवसमवेता या प्रीतीच्छा तद्विषयः कृष्ण इति चान्वयबोधः।

काशिकायां तु निष्पन्नेऽपि वस्तुनि क्रियाप्रवृत्तिः अतिक्रमणम्। अतिसिक्तमेव भवता, अतिस्तुतं भवता, शोभनं कृतं भवतेत्युक्तम्। तत्रेदृशमप्यतिक्रमणं तद्द्योतकस्य पूजाद्योतकस्य चातेः कर्मप्रवचनीयतया तद्योगे द्वितीयाविनाकृतदर्शितप्रयोगे षत्वाभाव इत्येव हृदयम्, न तु पूर्वप्रदर्शितोदाहरणे द्वितीयायामसाधुत्वपरत्वम् इति।

अपिः पदार्थेत्यादिसूत्रार्थः

"अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु"[२] इति सूत्रं पदार्थादिषु द्योत्येषु अपिरुक्तसंज्ञः स्यात् इत्यर्थकम्। पदार्थे यथा — सर्पिषोऽपि स्यात् इत्यत्र तिङर्थसंभावनाविषयत्वस्य धात्वर्थभवने उपपादकं दुर्लभे कर्तृत्वं द्योतयन्नपिशब्दः स्यादित्यनेन साकाङ्क्षः। षष्ठ्या एवअवयवावयविभावसंबन्धवान् बिन्दुरूपोऽर्थः। स च बिन्दुत्वादेव दुर्बलः। अल्पस्य दध्यादेर्विलोडने बिन्दूत्पत्तेरपि संधिग्धत्वात्। तत्र बिन्दुस्तत्त्वेन संबन्धत्वेन वा षष्ठ्यर्थः। षष्ठ्यर्थबिन्दुं द्योतयन् पदार्थद्योतकोऽपिशब्दः सर्पिशब्देन साकाङ्क्षः। धातुसमभिव्याहृतस्यैवापिशब्दस्य पदार्थद्योतकत्वात् इति अपियोगाभावात् सर्पिः शब्दान्न द्वितीया। अत एवोक्तं सर्पिषो बिन्दुना योगो न त्वपिनेति। वस्तुतस्तु पदासत्त्वे न पदार्थद्योतकत्वं, पदसत्त्वे तु निरर्थकत्वमेवेति न द्वितीया। षष्ठ्यर्थबिन्दोः तिङर्थकर्तृतायां विशेषणतयान्वयः। तथा च संभावनाविषयभवनकर्तृता सर्पिबिन्दुनिष्ठा इत्यन्वयबोधः।

संभावने यथा — "अपि स्तुयाद्विष्णुम्" इत्यत्र संभावनं लिङर्थः। तच्च संदेह आपत्तिर्वा धात्वर्थे स्तवेऽन्वेति। धातुसमभिव्याहृतोऽपिशब्दः लिङर्थसंभावनस्य द्योतकः।

---

[१] सू. १.४.९४

[२] सू. १.४.९६

अन्ववसर्गे यथा — "अपि स्तुहि" इत्यत्र धातुसमभिव्याहृतोऽपिशब्दः लोडर्थान्ववसर्गं द्योतयति। स च कामचारानुज्ञा। कामचारः प्रकाराविवक्षणम्, अनुज्ञा इच्छा। तथा च येन केनचन प्रकारेणेच्छा चान्ववसर्गः। प्रकारो भेदकधर्मः। अन्ववसर्गो विषयतया धात्वर्थेऽन्वेति।

गर्हायां यथा — "स्तौति शाक्यान् धिक्" इत्यत्र तादृशोऽपिशब्दः धिगर्थं गर्हां द्योतयति। सा धात्वर्थेऽन्वेति। द्योतकत्वं तु नानार्थशब्दस्य एकत्रार्थे तात्पर्यज्ञापकत्वम्। धिक्शब्दोऽप्यपकर्षस्य गर्हायाश्च वाचकत्वान्नार्थः।

समुच्चये यथा — "सखे अपि सिञ्च, अपि स्तुहि शम्भुम्" इत्यत्र तथाभूतोऽपिशब्दः समुच्चयमेककर्तृकत्वादिकं वाक्यार्थीभूतं द्योतयति। एकस्य संबोध्यस्य द्वयोः क्रिययोः कर्तृत्वान्वये एककर्तृकत्वं शम्भोरेकस्य कर्मत्वान्वय एककर्मकत्वं वाक्यार्थतयावगम्यते।

संभावनान्ववसर्गार्थकप्रत्ययस्य प्रकृतिधातोश्च प्रातिपदिकत्वविरहात् गर्हाविषयधातोः समुच्चयार्थकवाक्यस्य च पर्युदासेन वृत्त्या अर्थवत्त्वाभावेन च प्रातिपदिकत्वविरहान्न ततो द्वितीया। वस्तुतस्तु निरर्थकत्वादेव न द्वितीया। संभावनाद्यर्थस्य पदान्तरेण लाभे निरर्थकत्वसंभवात्।

यदि च समुच्चय एककालिकत्वम्। तच्च न वाक्यार्थः। दर्शितस्थले कालवाचकशब्दाभावात्। अत एव विभिन्नकालिकौ गमनत्यागावादाय काशीं व्रज त्यजापीति न प्रयोग इति समुच्चये कुतो न द्वितीया, निरर्थकत्वप्रसक्तेरसंभवादिति विभाव्यते — तदापि समुच्चयान्वयिक्रिययोर्वाचकधातोः अप्रातिपदिकत्वान्न ततो द्वितीया।

वस्तुतस्तु एककालिकत्वस्य समुच्चयस्य न द्योतकोऽपिशब्दः, तस्य पदान्तरेणालाभे द्योतनासंभवात्। किं तु वाचक एव। तथा च अपिशब्देन समुच्चयस्याभिधानात् निरर्थकत्वादेव न द्वितीया। अत एव "रसो गन्धोऽपि मनोहरः मनसे" इत्यत्र रसादिशब्दान्न द्वितीया। अपिशब्देन समुच्चयबोधने निरर्थकत्वसंभवात्।

अत एव कर्मप्रवचनीया द्योतका द्वितीया वाचिका। न च वैपरीत्यमेवास्त्विति वाच्यम्। तथा सति निरर्थकद्वितीयाभ्युपगमे सुसिक्तं शम्भोः इत्यत्र द्वितीयापत्तेः।

कालाध्वनोरिति सूत्रार्थः

"कालाध्वनोरत्यन्तसंयोगे"।[१] कालाध्वनोरत्यन्तसंयोगे द्वितीया स्यात्। निरन्तर-संयोगः अत्यन्तसंयोगः। अन्तः विच्छेदः, तमतिक्रान्तः अत्यन्तः, स चासौ संयोगश्चेति विग्रहः। गुणक्रियाद्रव्यैः इत्यौचित्यात् गम्यते। गुणक्रियाद्रव्यैः कालाध्वनोरविच्छिन्नसंयोगे गम्ये द्वितीया स्यादित्यर्थः। सा च कालाध्वभ्यामेव भवति, श्रुतत्वात्। तत्र गुणात्यन्तसंयोगे उदाहरणम् —

"मासं कल्याणी"। भवतीति शेषः। त्रिंशद्दिनात्मको मासः। तस्मिन्नविच्छिन्न-मङ्गलवानित्यर्थः।

क्रियात्यन्तसंयोगे उदाहरणम् — "मासमधीते"। त्रिंशद्दिनात्मके प्रतिदिन-मुचितकाले निरन्तरमधीत इत्यर्थः।

द्रव्यान्तरसंयोगे उदाहरणम् — "मासं गुडधानाः"। मासे प्रतिदिनं निरन्तरं गुडधानाः सन्तीत्यर्थः।

अध्वनः गुणाद्यत्यन्तसंयोगे उदाहरणानि — "क्रोशं कुटिला नदी"। क्रोश-मधीते। क्रोशं गिरिः।

विभक्त्यर्थनिर्णये[२]

"कालाध्वनोरत्यन्तसंयोगे"[३] इति सूत्रं कालावयवाध्वावयववाचिशब्दाभ्या-मत्यन्तयोगेऽर्थे द्वितीया स्यादित्यर्थकम्। अत्यन्तसंयोगः अवच्छिन्नत्वम्। तत्राव-च्छेदको देशविधया कालविधया द्विविधः। द्विविधमपि तत् व्यापकत्वपर्यवसितम्। व्यापकत्वमभावाप्रतियोगित्वम्। तत्राभावः प्रतियोगित्वं च खण्डशो द्वितीयार्थः। यदि चावच्छेदकत्वं विना व्यापकत्वमतिप्रसक्तमिति मन्यते तदावच्छेदकत्वमपि द्वितीयार्थे निविशते। एकपदार्थानामपि व्युत्पत्तिवैचित्र्येण परस्परमन्वयोऽभ्युपेयते। व्यापकतावच्छेदकः संबन्धः दैशिकः संयोगादिः कालिकस्तु विशेषणताविशेषः।

तथा चायं "मासमधीत" इत्यत्र मासस्याधेयत्वेन संबन्धेनाभावे, तस्य प्रति-योगितायां, तस्याः कालिकसंबन्धावच्छिन्नप्रतियोगित्वीयनिरूपितत्वसंबन्धेन अव-च्छेदकत्वे, तस्यान्वयितावच्छेदकतावच्छेदकसंसर्गावच्छिन्नावच्छेदकत्वीयस्वरूप-

---

[१] सू. २.३.५
[२] पृ. १९१
[३] सू. २.३.५

संसर्गावच्छिन्नप्रतियोगितया संबन्धेनाभावे तस्य धर्मे, तस्यान्वयितावच्छेदकीये-नाध्ययनत्वसंबन्धेनाध्ययनेऽन्वयः। एवं च मासव्यापकाध्ययनकर्तृत्ववानय-मित्यन्वयबोधः।

प्रतियोगितायाः निरूपितत्वसंसर्गे कालिकसंबन्धानुप्रवेशात् संयोगेन मासवृत्त्य-भावप्रतियोगित्वस्याध्ययने सत्त्वेऽपि नान्वयबोधानुपपत्तिः।

अवच्छेदकत्वस्य प्रतियोगितासंसर्गेऽन्वयितावच्छेदकतावच्छेदकसंसर्गस्यानु-प्रवेशात् संयोगेन ज्योत्स्नावतः प्रासादादेः मासवृत्त्यभावप्रतियोगितायाः संयोग-संसर्गावच्छेदकत्वस्य ज्योत्स्नानिष्ठस्याध्ययनत्वे विरहेऽपि द्वित्रदिनाध्ययनस्थले न दर्शितप्रयोगः।

एवं ''क्रोशं कुटिला नदी'' इत्यत्र क्रोशवृत्त्यभावप्रतियोगित्वस्य संयोगा-वच्छिन्नप्रतियोगित्वीयनिरूपितत्वसंबन्धेनावच्छेदकत्वेऽन्वयः। अवच्छेदकत्वादेस्तु प्रदर्शितरीत्यान्वयो बोध्यः। कुटिलत्वं तु तिर्यग्गमनजन्यावयवसंयोगसामानाधि-करण्यम्। तदभावः सरलत्वं तत्। तथा सति कुटिलदण्डादौ कौटिल्यानुपपत्तेः। तदवयवे तदा तिर्यग्गमनस्याभावात्।

सामानाधिकरण्यमेककालावच्छिन्नं बोध्यम्। तेन पूर्वं कुटिलेऽनन्तरं सरले दण्डे न कौटिल्यप्रतीतिव्यवहारौ।

वस्तुतस्तु ''मासमधीत'' इत्यत्र मासात्मककालिकविशेषणतावच्छिन्नमाधेयत्वं द्वितीयार्थः। तत् मासनिरूपितमध्ययनेऽन्वेति। द्वित्रदिनाध्ययने न निरुक्तमाधे-यत्वमिति न तत्र दर्शितप्रयोगः।

एवं ''क्रोशं कुटिला नदी'' इत्यत्र क्रोशत्वमध्वपरिमाणविशेषः। तद्वान् क्रोशः क्रोशत्वव्यापकसंयोगावच्छिन्नमाधेयत्वं द्वितीयार्थः। तत् क्रोशनिरूपितं कुटिले-ऽन्वेति। कुटिलस्य तादात्म्येन नद्यामन्वयः।

''मासं कल्याणी'' इत्यत्र कल्याणजनकः कल्याणशब्दार्थः। कल्याण-जनकत्वविशिष्टे मासीयस्य व्यापकत्वस्य निरुक्ताधेयत्वस्य वान्वयोपगमात् विशेषणेऽप्यन्वयः। व्यापकत्वस्य निरुक्ताधेयत्वस्य वा विवक्षायां न द्वितीया। किं तु संबन्धमात्रे षष्ठी। यथा ''मासस्य द्विरधीते, क्रोशस्यैकदेशे पर्वत'' इति।

लघुशब्देन्दुशेखरे[१]

अत्यन्तसंयोगो निरन्तरसंबन्धः। स च गुणक्रियाद्रव्यैः अभावेन च। तेन मासं भोजनाभाव इत्यादेः संग्रहः। गुणादिभिः कालाध्वनोरत्यन्तसंयोगे प्रत्यासत्त्या कालाध्ववृत्तिभ्यां द्वितीयेत्यर्थः। मासमधीत इति। बुद्धिस्थयावदवयवसंबन्धरूपा व्याप्तिः द्वितीयार्थः। "एकादश्यां रात्रौ जागृयात्" इत्यादौ अधिकरणत्वविवक्षणान्न द्वितीया — इति।

शेखरव्याख्यायां चन्द्रकलायाम्

ननु यत्रैकमासव्यापकं गणेशस्तोत्राध्ययनं तत्र मासमधीते गणेशस्तोत्रमिति न स्यात्। मासान्तरे तत्स्तोत्राध्यनाभावस्य सत्त्वात् मासत्ववन्निष्ठात्यन्ताभावाप्रतियोगित्वरूपस्य मासव्यापकत्वस्य अध्ययनेऽभावादित्यत आह — बुद्धिस्थयावदिति। अवयवः दिनादिरूपः। एवं च "मासमधीते" इत्यत्र मासपदं बुद्धिस्थतत्तन्मासपरम्। तदवयवयावद्दिननिष्ठव्याप्यतानिरूपितव्यापकता यत्र तत्रैव तादृशः प्रयोगः। मासपदं च त्रिंशद्दिनसमुदायपरम्। दिनपदं चैकसूर्योदयावधिकापरसूर्योदयपर्यन्तस्थिताखण्डजन्यद्रव्यपरम्। न तु षष्टिघटीसमुदायो दिनपदार्थः। यत्र प्रत्यहमेकघट्यां गणेशस्तोत्राध्ययनं तत्रापि घट्यन्तरे अध्ययनाभावसत्त्वेन मासमधीत इति प्रयोगानुपपत्तेः। मासनिष्ठा व्याप्यता च तादात्म्यसंबन्धावच्छिन्ना। व्यापकता तु कालिकसंबन्धावच्छिन्ना। व्यापकताघटकाभावश्च प्रतियोगिव्यधिकरणो विवक्षितः। अत एव तन्मासावयवदिनेऽपि यद्धट्यवच्छेदेन नाध्ययनं तदवच्छेदेन कालिकसंबन्धावच्छिन्नप्रतियोगिताकाध्ययनाभावस्य सत्त्वेऽपि न मासमधीत इति प्रयोगानुपपत्तिः।

लघुमञ्जूषायाम्[२]

"मासमधीते"। अत्यन्तसंयोगे व्याप्तिरूपे द्वितीया। मासपदेन अवयवानतिरिक्तत्रिंशद्दिनसमूह उच्यते। व्यापकत्वं द्वितीयार्थः। तत्त्वं च त्रिंशत्त्ववन्निष्ठप्रतियोगिव्यधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकावच्छिन्नत्वम्। प्रतियोगिव्यधिकरणेत्युक्तेः दिनावान्तरदण्डादावध्ययनाभावेपि न दोषः। एकदिनाध्ययने च न तथा प्रयोगः। एतदुक्तं भवति — त्रिंशत्त्वाधिकरणं त्रिंशद्दिनात्मको मासः एकैकदिनम्। तन्निष्ठोऽभावः न अध्ययनाभावः, एकैकस्मिन्नपि दिनेऽध्ययनस्य सत्त्वात् अपि तु घटाद्यभावः तत्प्रतियोगितावच्छेदकं घटत्वादि, अनवच्छेदकमध्ययनत्वं, तद्वत्त्वं

---

[१] पृ. ६५६

[२] पृ. १२३९

अध्ययने। दिनावान्तरदण्डाद्यवच्छेदेन तत्तद्दिनेऽध्ययनाभावस्य सत्त्वेऽपि तस्य अध्ययनरूपप्रतियोगिसमानाधिकरणत्वात् प्रतियोगिव्यधिकरण: घटाद्यभाव एव इति व्यापकताया: अध्ययनत्वे संभव इति।

ननु तुल्यरीत्या मासघटकदिनपदेनापि अवयवानतिरिक्तषष्टिघटिकासमूहस्य ग्रहणापत्तौ सर्वास्वपि घटिकासु अध्ययनसत्तायामेव मासमधीत इति प्रयोग: स्यात्, न तु कतिपयघटिकासु अध्ययने कतिपयघटिकास्वध्ययनाभावे च। तासामपि मासत्वाधिकरणतया तत्र प्रतियोगिव्यधिकरणस्य अध्ययनाभावस्य सत्त्वात् व्यापकताया: असंभवात् इति चेत् — न। दिनपदेन अवयवातिरिक्तस्य सूर्योदयावधि सूर्योदयान्तरपर्यन्तक्षणसमूह उच्यते। तथा च मासत्वाधिकरणे एतादृशक्षणसमूहे किंचिद्घटिकावच्छेदेन विद्यमानस्य अध्ययनाभावस्य घटिकान्तरावच्छेदेन विद्यमानाध्ययनरूपप्रतियोगिसमानाधिकरणतया प्रतियोगिव्यधिकरण: घटाद्यभाव एव तत्प्रतियोगितानवच्छेदकं अध्ययनत्वं तद्वत्त्वमध्ययनेऽस्तीति न व्यापकताया अनुपपत्ति:। त्रिंशत्त्वादिकं च तात्पर्यवशात् तत्तत्त्रिंशत्वादिकमेव भासते। तेन एकमासव्यापकाध्ययनस्थलेऽपि मासान्तरेऽध्ययनाभावसत्त्वेन मासव्यापकताया: अध्ययनेऽनुपपत्तिरिति शङ्काया: नावकाश:।

"दिनं स्वपिति" इत्यादौ दिनपदमवयवानतिरेकेण त्रिंशद्दण्डकूटपरम्। अतो नैकदण्डस्वप्ने तथा प्रयोग:। अवयवानतिरेकेऽपि एकवचनान्तत्वमेव। शब्दशक्तिस्वभावेन अवयवगतसंख्याया: समूहेऽनारोपात्।

एवं "क्रोशं कुटिला नदी" इत्यादौ यत्किंचित्क्रोशत्ववन्निष्ठप्रतियोगिव्यधिकरणात्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्। तच्च कुटिलत्वादौ भासते। क्रोशत्वादिकं च तत्तसंख्यावद्दण्डादिपरिच्छिन्नदेशत्वम्। इति मञ्जूषायां निरूपणप्रकार:।

परं तु अयं सर्वोऽपि निरूपणप्रकार: व्युत्पत्तिवादे स्थित एवात्र दृश्यत इति व्युत्पत्तिवादप्रतिपादनप्रकार: न लिख्यते।

भाट्टरहस्ये[१]

एवं कालाध्वनोरत्यन्तसंयोगेऽपि द्वितीया। मासमधीते। क्रोशमास्ते। अत्र निरन्तरसंनिकर्षो द्वितीयार्थ:। स च साक्षात्संबन्धेनैव भावनान्वयी। मासनिरूपितनिरन्तरसंनिकर्षवती अध्ययनानुकूला भावना इति बोध: इत्युक्तम्।

---

[१] पृ. १०१

भाट्टचिन्तामणौ[१]

कालाध्वनोरत्यन्तसंयोगे। कालाध्ववाचिपदसमभिव्याहृतद्वितीयायाः अत्यन्तसंयोगः व्याप्तिरर्थः। मासमधीते, क्रोशं पर्वतस्तिष्ठति। मासाभिव्याप्तिविशिष्टमध्ययनं, क्रोशाभिव्याप्तिविशिष्टा पर्वतस्थितिः इति बोधः। अभिव्याप्तेः पर्वतसंबन्धित्वादुपपदविभक्तित्वम्।

दृश्यादिसमभिव्याहृतद्वितीयार्थः व्युत्पत्तिवादे

व्युत्पत्तिवादे[२] चाक्षुषत्वाद्यवच्छिन्नवाचकदृश्यादिसमभिव्याहृतद्वितीयायाः लौकिकविषयित्वं, तादृशकर्माख्यातस्य लौकिकविषयत्वं चार्थः। विषयित्वे लौकिकेतिविशेषणात् उपनीतसौरभविषयकसुरभिचन्दनमित्याकारकचाक्षुषदशायां सौरभं पश्यतीति सौरभं दृश्यत इति च न प्रयोगः। तथा च घटं पश्यतीति वाक्यात् घटनिरूपितलौकिकविषयिताश्रयचाक्षुषाश्रय इति, घटो दृश्यत इति वाक्यात् चाक्षुषनिरूपितलौकिकविषयताश्रयो घट इति च बोधः।

अत्र आक्षेपः

अथैवं पुष्पं जिघ्रतीति प्रयोगानुपपत्तिः। घ्राधात्वर्थस्य घ्राणजन्यप्रत्यक्षस्य पुष्पांशे लौकिकत्वविरहात् पुष्पनिरूपितलौकिकविषयित्वाश्रयस्य घ्राणजन्यप्रत्यक्षस्याप्रसिद्धेः। तथा हि — पुष्पस्य चाक्षुषं गन्धस्य घ्राणजं त्वेकं प्रत्यक्षं न संभवति। चाक्षुषत्वघ्राणजत्वयोः साङ्कर्यप्रसङ्गात्। किं तु पुष्पस्य चाक्षुषप्रत्यक्षात्मकज्ञानलक्षणाप्रत्यासत्तिकाले गन्धस्य घ्राणेन्द्रियसंनिकर्षे पुष्पांशेऽलौकिकं गन्धांशे लौकिकं प्रत्यक्षमुत्पद्यत इति घ्राणजप्रत्यक्षे पुष्पनिरूपितमलौकिकविषयित्वमस्ति न लौकिकविषयित्वमिति।

न च तादृशधातुयोगे विषयित्वसामान्यमर्थः, न तु लौकिकत्वविशेषितं विषयित्वमिति वाच्यम्। तथा सति गन्धसाक्षात्कारे उपनयमर्यादया आकाशादिभाने आकाशं जिघ्रतीति प्रयोगप्रसङ्गवारणाय तत्रापि लौकिकविषयिताया एव कर्मप्रत्ययार्थतया उपगन्तव्यत्वात्।

समाधानम्

अत्रोच्यते। घ्राधातोः गन्धनिष्ठलौकिकविषयतानिरूपकप्रत्यक्षत्वं शक्यतावच्छेदकम्। घ्रा गन्धोपादाने इत्यनुशासनात्। तत्समभिव्याहृतद्वितीयायाः आधेयत्व-

---

[१] पृ. ९७

[२] पृ. १५६

मेवार्थः। तस्य च धात्वर्थैकदेशे गन्धेऽन्वयः। एकदेशानन्वयनियमे घ्राधातुजन्योपस्थितिविषयीभूतगन्धातिरिक्तत्वनिवेशरूपव्युत्पत्तिवैचित्र्यात्। एवं च पुष्पं जिघ्रति इति वाक्यात् पुष्पवृत्तिगन्धनिष्ठलौकिकविषयतानिरूपकप्रत्यक्षनिरूपिताश्रयतावानित्याकारकः शाब्दबोधो भवति। न तु पुष्पनिरूपितलोकिकविषयिताशालिप्रत्यक्षाश्रय इत्याकारक इति नानुपपत्तिः।

न चैवं सविषयार्थबोधकधातुसमभिव्याहृतकर्मप्रत्ययस्य विषयितार्थकत्वनियमभङ्ग इति वाच्यम्। विषयानवच्छिन्नसविषयकवस्त्वभिधायक धातुसमभिव्याहृतकर्मप्रत्ययस्यैव विषयित्वार्थकत्वनियमात्। अस्य घ्राधातोश्च गन्धात्मकविषयावच्छिन्नप्रत्यक्षवाचकतया तादृशनियमस्याबाधितत्वात्।

न च घ्राधातुसमभिव्याहृतद्वितीयायाः गन्धान्विताधेयत्वार्थकत्वे आमोदमुपजिघ्रतीतिप्रयोगानुपपत्तिः। गन्धविशेषरूपामोदनिरूपिताधेयत्वस्य धात्वर्थैकदेशे गन्धे बाधादिति वाच्यम्। विषयावच्छिन्नप्रत्यक्षार्थकधातुसमभिव्याहृतद्वितीयाया एव आधेयत्वार्थकत्वनियमात्। आमोदमुपजिघ्रतीत्यत्र तु न धातोः गन्धरूपविषयविशेषितं घ्राणजप्रत्यक्षमर्थः। अपि तु तदविशेषितमिति विषयित्वमेव द्वितीयार्थ इति नानुपपत्तिः। तथा च तत्र आमोदनिरूपितलौकिकविषयित्वाश्रयघ्राणजप्रत्यक्षाश्रय इति शाब्दबोधः।

वस्तुतस्तु — पुष्पं जिघ्रतीत्यादौ समवायसंबन्धावच्छिन्नाधेयत्वरूपसंबन्धावच्छन्नप्रकारतैव द्वितीयाविभक्त्यर्थः। तस्याश्च गन्धनिष्ठलौकिकविषयिताशालिप्रत्यक्षात्मकधात्वर्थैकदेशे विषयतायां (विशेष्यतायां) निरूपितत्वसम्बन्धेनान्वयः। प्रकारतायां प्रकृत्यर्थस्य पुष्पस्य आधेयतासंबन्धेनान्वयः। तथा च पुष्पनिष्ठा या समवायसंबन्धावच्छिन्नाधेयत्वसंबन्धावच्छिन्ना प्रकारता तन्निरूपिता या गन्धनिष्ठलौकिकविषयता तन्निरूपकप्रत्यक्षाश्रय इत्यन्वयबोधः। पुष्पे गन्ध इति प्रत्यक्षस्याकारः। आधेयत्वे समवायसंबन्धावच्छिन्नत्वनिवेशात् इदानीं पुष्पे गन्ध इति प्रत्यक्षस्य आधेयत्वसंबन्धेन कालप्रकारकत्वेन तद्दशायां कालं जिघ्रतीति प्रयोगापत्तिर्न भवति। तादृशप्रत्यक्षनिरूपितगन्धनिष्ठविषयतायां कालिकसंबन्धावच्छिन्नाधेयत्वसंबन्धावच्छिन्नप्रकारतानिरूपितत्वसत्त्वेऽपि समवायसंबन्धावच्छिन्नांधेयत्वसंबन्धावच्छिन्नप्रकारतानिरूपितत्वविरहात्। अपि च द्वितीयायाः आधेयत्वार्थकत्वे घ्राधातोः गन्धविषयकलौकिकप्रत्यक्षार्थकत्वे च — तदाननं मृत्सुरभि क्षितीश्वरो रहः समाघ्राय न तृप्तिमाययौ, आघ्रातवान् गन्धवहं सुगन्धम् इति प्रयोगयोः अनुपपत्तिः। मृत्समवेतस्य गन्धस्य आननवृत्तित्वविरहात् आननवृत्तिर्यो गन्धः तद्विषयकप्रत्यक्षाश्रयत्वरूपवाक्यार्थस्य बाधात्। गन्धवहवायुवृत्तिगन्धस्य

अप्रसिद्ध्या तद्विषयकप्रत्यक्षाश्रयतायाः बाधितत्वाच्च। समवायसंबन्धावच्छिन्नाधेयत्वसंबन्धावच्छिन्नप्रकारतायाः द्वितीयार्थत्वे च आननेऽयं गन्धः, वायौ गन्धः इत्यौपाधिकगन्धविषयकभ्रमात्मकप्रत्यक्षस्य जायमानत्वेन आननवाय्वादिनिष्ठा या समवायसंबन्धावच्छिन्नाधेयत्वसंबन्धावच्छिन्नप्रकारता तन्निरूपितत्वं गन्धनिष्ठविषयतायामस्त्येवेति न तादृशप्रयोगयोरनुपपत्तिः। तदाननवृत्तिः या समवायावच्छिन्नाधेयत्वसंबन्धावच्छिन्नप्रकारता तन्निरूपिता या गन्धनिष्ठलौकिकविषयता तन्निरूपकं यत् प्रत्यक्षं आननेऽयं गन्ध इत्याकारकं भ्रमात्मकं तद्विषयकबोधस्याबाधितविषयकस्य तादृशवाक्यात् जायमानतया न तस्य प्रयोगस्याप्रामाण्यम्। एवमाघ्रातवान् गन्धवहमित्यत्रापि।

नन्वेवमपि वाय्वानीतचम्पकावयवसमवेतगन्धस्थले वायौ गन्ध इति भ्रमात्मकप्रत्यक्षं यत्र जातं तत्र पूर्वोक्तपक्षे चम्पकं जिघ्रतीति प्रयोगस्य चम्पकसमवेतगन्धप्रत्यक्षवानिति भ्रमात्मकशाब्दबोधोत्पादकत्वेन प्रामाण्यमुपपद्यते। वस्तुतस्त्वित्याद्युक्तपक्षे तु वायौ गन्ध इति प्रत्यक्षनिरूपितायाः समवायसंबन्धावच्छिन्नाधेयत्वसंबन्धावच्छिन्नप्रकारतायाश्चम्पकेऽसत्त्वात् चम्पकवृत्तितथाविधप्रकारतानिरूपितगन्धनिष्ठविषयताशालिप्रत्यक्षवानित्यन्वयबोधजनकस्योक्तवाक्यस्य न प्रामाण्यं संभवतीति चेत् — न। तत्र चम्पकं जिघ्रतीति प्रयोगस्यानिष्टत्वात् वायुं जिघ्रतीति प्रयोगस्यैवेष्टत्वात्।

यत्तु आधेयतामात्रं द्वितीयार्थः, न तु समवायावच्छिन्नत्वविशेषितमाधेयत्वम्। तथा च मुखादिसंसृष्टमृत्तिकादिगन्धे स्वाश्रयसंयुक्तत्वरूपपरंपरासंबन्धेन मुखादिवृत्तित्वस्य सत्त्वात् न आननं समाघ्रायेति प्रयोगानुपपत्तिरिति।

तन्न। तथा सति जिघ्रतीति प्रयोगस्य दुर्वारत्वात्। कालनिरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वस्य गन्धे सत्त्वात्।

पुष्पमाघ्रायते इत्यत्र बोधः — पुष्पमाघ्रायते इत्यत्र समवायसंबन्धावच्छिन्नाधेयत्वसंबन्धावच्छिन्नप्रकारत्वमाख्यातार्थः। तत्र धात्वर्थस्य गन्धनिष्ठलौकिकविषयताशालिप्रत्यक्षस्य निरूपितत्वसंबन्धेनान्वयः। तथा धात्वर्थैकदेशलौकिकविषयताया अपि निरूपितत्वसंबन्धेन तत्रान्वयः। आख्यातार्थस्य आश्रयत्वसंबन्धेन पुष्पेऽन्वयः। तथा च घ्राणजप्रत्यक्षनिरूपिता गन्धनिष्ठलौकिकविषयतानिरूपिता च या समवायसंबन्धावच्छिन्नाधेयत्वसंबन्धावच्छिन्नप्रकारता तदाश्रयः पुष्पमिति बोधः।

न चैकत्र विशेषणतयोपस्थितस्यान्यत्र विशेषणतया अन्वयस्याव्युत्पन्नतया कथं प्रत्यक्षविशेषणीभूतविषयतायाः प्रकारतायां विशेषणतयान्वय इति वाच्यम्।

एकधर्मिविशेषणतयोपस्थितस्य स्वातन्त्र्येणान्यविशेषणतयान्वयबुद्धेरेवाव्युत्पन्नत्वात्। अत्र च प्रत्यक्षरूपधर्मिपारतन्त्र्येणैव गन्धविषयतायाः आख्यातार्थे विशेषणत्वेन व्युत्पत्तिविरोधविरहात्।

अस्तु वा गन्धो लौकिकविषयत्वं प्रत्यक्षं च विशकलितमेव धातोरर्थः। कर्त्राख्यातसमभिव्याहारे गन्धविषयतायाः प्रत्यक्षविशेषणतया कर्माख्यातस्थले च प्रत्यक्षविशेषणतयान्वयः इति न कश्चिद्दोषः।

तथा च पुष्पमाघ्रायत इत्यत्र प्रत्यक्षविषयगन्धनिष्ठविषयतानिरूपितोक्ताधेयत्वसंबन्धावच्छिन्नप्रकारतावत् पुष्पमित्यन्वयबोधः। जिघ्रत्यर्थगन्धविषयतानिरूपितनिरुक्तप्रकारताश्रयत्वमेव पुष्पादिनिष्ठं जिघ्रतिकर्मत्वम्।

अनुमित्यर्थकधातुसमभिव्याहृतद्वितीयार्थः व्युत्पत्तिवादे

अनुमित्यर्थकधातुयोगे विधेयत्वं विधेयित्वं वा द्वितीयार्थः। न तु प्रकारत्वं प्रकारित्वं वा अर्थः। वह्निव्याप्यधूमः पर्वते इति परामर्शोत्तरं जायमानयां पर्वते वह्निः इत्यनुमितौ विशेष्यभूतस्यापि वह्नेरेव विधेयत्वात् उक्तानुमितिपरस्य वह्निमनुमिनोतीति वाक्यस्याप्रामाण्यापत्तेः। विधेयत्वस्य द्वितीयार्थत्वे वह्निं नानुमिनोतीत्यादौ निरूपकत्वसंबन्धावच्छिन्नप्रतियोगिताकवह्निनिष्ठविधेयत्वाभाववदनुमितिविषयक एव शाब्दबोधः स्यात्। स च वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितानवच्छेदकत्वपक्षे नोपपद्यते इत्याशयेन विधेयित्वं वेत्युक्तम्। तथा च वह्निमनुमिनोति वाक्यात् वह्निनिष्ठविधेयतानिरूपकानुमित्याश्रय इति वा वह्निनिरूपितविधेयित्वाश्रयानुमितिमान् इति वा शाब्दबोधः।

यदि च वह्निसाध्यकपर्वतपक्षकानुमितिपरस्य वह्निमत्त्वेन पर्वतमनुमिनोतीत्यादिवाक्यस्यापि प्रामाण्यं मन्यते, तदा वह्न्यादिविधेयकत्वबोधकतृतीयान्तसमभिव्याहृतानुपूर्वकमाधातुयोगे उद्देश्यत्वमुद्देश्यित्वं वा द्वितीयार्थः। तस्य च तृतीयान्तोपस्थाप्यसाध्यविधेयकत्वविशिष्टेऽन्वयः। तथा च पर्वतनिरूपितोद्देश्यितावती या वह्निविधेयकानुमितिस्तद्वानिति बोधः। अतो वह्निमत्त्वेनेति तृतीयान्तसमभिव्याहारं विना तत्र पर्वतमनुमिनोमीत्यादयो न प्रयोगाः।

न च तृतीयान्तेन वह्न्यादिविधेयकत्वं कथम् उपस्थापनीयमिति शङ्कनीयम्। वैशिष्ट्यरूपार्थे तृतीयानुशासनसत्त्वात् विधेयतादेरपि वैशिष्ट्यरूपत्वात्। अत एव रजतत्वेन शुक्तिं जानातीत्यादौ ज्ञाने रजतत्वादिप्रकारकत्वस्य घटत्वेन वह्निर्नास्तीत्यादौ सौन्दडमते अभावे घटत्वावच्छिन्नप्रतियोगिताकत्वस्य तृतीयान्तात् बोधः।

न चैवं रजते रजतत्वं शुक्तौ शुक्तित्वमवगाहमानस्य यथार्थज्ञानस्यानन्तरमपि रजतत्वेन शुक्तिं जानातीति प्रयोगापत्तिः रजतत्वप्रकारकत्वविशिष्टस्य शुक्ति-विशेष्यकत्वस्य तज्ज्ञाने सत्त्वादिति वाच्यम्।

तत्र द्वितीयान्तार्थशुक्तिविशेष्यकत्वविशिष्टे तृतीयान्तार्थरजतत्वप्रकारकत्वस्य तृतीयान्तार्थरजतत्वप्रकारकत्वविशिष्टे द्वितीयान्तार्थशुक्तिविशेष्यकत्वस्य वा अन्वयस्वीकारेण रजतत्वप्रकारकत्वशुक्तिविशेष्यकत्वयोः विशिष्टवैशिष्ट्यमर्यादया अवच्छेद्यावच्छेदकभावभानं नियतमिति व्युत्पत्तेः न तस्य वाक्यस्य प्रामाण्यम्। रजतत्वप्रकारकत्वावच्छिन्नशुक्तिविशेष्यकत्वस्य रजतत्वेन शुक्त्यवगाहिभ्रम एव सत्त्वात् तस्य वाक्यस्य भ्रमजनकत्वमेव स्यात् न प्रमाजनकत्वमिति।

नन्वेवमपि घटत्वेन वह्न्यभावस्य वह्नित्वेन घटाभावस्य च समनियता-भावानामैक्यपक्षे ऐक्यात् घटत्वेन वह्न्यभावे घटाभावत्वस्य घटत्वावच्छिन्न-प्रतियोगिताकत्वस्य च सत्त्वेन घटत्वेन वह्न्यभावाभिप्रायेण घटत्वेन घटो नास्तीति वाक्यस्य प्रामाण्यापत्तिरिति चेत् — न।

घटत्वेन वह्निर्नास्तीत्यत्र घटत्वावच्छिन्नवह्न्यभावनिष्ठं यत् वह्निनिरूपितानु-योगिताविशेषरूपं वह्न्यभावत्वं घटत्वावच्छिन्नप्रतियोगिताकत्वं च तयोरवच्छेद्या-वच्छेदकभावः भासते। तथा च घटत्वावच्छिन्नप्रतियोगिताकत्वावच्छिन्नं यत् वह्नि-निरूपितानुयोगित्वं तदाश्रयोऽभावः घटत्वेन वह्निर्नास्तीत्यादिवाक्यादेव प्रतीयते, न तु घटत्वेन घटो नास्तीति वाक्यात्। तादृशवाक्यात्तु घटत्वावच्छिन्नप्रतियोगिता-कत्वावच्छिन्नं यत् घटनिरूपितानुयोगित्वं तदाश्रय एवाभावः प्रतीयते इति।

विभक्त्यर्थे विभक्त्यर्थानन्वयः

केचित्तु रजतत्वेन शुक्तिं जानातीत्यादौ तृतीयान्तार्थस्य रजतत्वप्रकारकत्वस्य द्वितीयान्तार्थे शुक्तिविशेष्यकत्वेऽवच्छेद्यावच्छेदकभावसंबन्धेनान्वयः। तथा च रजतत्वप्रकारकत्वावच्छिन्नं यत् शुक्तिविशेष्यकत्वं तदाश्रयज्ञानवानिति बोध इति वदन्ति।

तन्न। विभक्त्यर्थे विभक्त्यर्थान्वयस्य अव्युत्पन्नत्वात्। न च रजतत्वेनेदं ज्ञायत इति वाक्यात् रजतत्वनिष्ठप्रकारतानिरूपिता या ज्ञाननिरूपिता विषयता तदाश्रय इदमित्यन्वयबोधात् तदनुरोधेन आख्यातार्थविषयतायां तृतीयार्थप्रकारतायाः निरूपितत्वसंबन्धेनान्वयस्य स्वीकरणीयतया नोक्तव्युत्पत्तिकल्पनमिति वाच्यम्। तत्रापि रजतत्वप्रकारकत्वविशिष्टज्ञानस्य निरूपितत्वसंबन्धेन आख्यातार्थे भान-

स्वीकारेणैव इमे शुक्तिरजते इति समूहालम्बनप्रमाकाले रजतत्वेन शुक्तिं जानातीति प्रयोगप्रसङ्गस्य वारणात् तृतीयार्थप्रकारतायाः धात्वर्थज्ञाने एवान्वयः न तु आख्यातार्थविषयतायामिति।

न च तस्मात् पचति तस्माच्चैत्रस्येत्यादौ तिङ्विभक्त्यर्थे कृतौ षष्ठीविभक्त्यर्थे संबन्धे च पञ्चम्यर्थस्य हेतुत्वस्यान्वयेन तद्धेतुका पाकानुकूलकृतिः तद्धेतुकः चैत्रसंबन्ध इति च बोधात् विभक्त्यर्थे विभक्त्यर्थस्यानन्वय इति व्युत्पत्तिर्न संभवतीति वाच्यम्। हेतुविभक्त्यर्थातिरिक्तविभक्त्यर्थस्यानन्वय इति नियमात्।

न च रजतत्वेनेदं जानाति इत्यादौ तृतीयायाः कारकविभक्तित्वाभावान्न तदर्थस्य क्रियायामन्वयसंभवः इत्यगत्या द्वितीयार्थ एव तदन्वयः स्वीकर्तव्य इति वाच्यम्। मणिकारमते तस्माज्जानातीत्यादौ ज्ञानादिरूपे धात्वर्थे हेतुविभक्त्यर्थस्य हेतुत्वस्यान्वयेन तद्धेतुकज्ञानाश्रय इति बोधस्वीकारात्, तस्मात् स्थीयत इत्यादौ सर्वमत एव धात्वर्थस्थित्यादौ तदन्वयस्वीकारात्, षष्ठ्यर्थसंबन्धस्यापि—

"गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक् स्वभेषजैः" इत्यादौ धात्वर्थेऽन्वयात्, कर्मासमभिव्याहृते रजतत्वेन जानातीत्यादौ धात्वर्थे तृतीयार्थान्वयस्यावश्यकत्वाच्च कारकविभक्तिभिन्नविभक्त्यर्थस्य क्रियायामनन्वय इति नियमासंभवात्।

रङ्गेऽभेदेन रजतारोपस्थले रङ्गं रजतेन जानाति इति प्रयोगाभावात् तादात्म्यभिन्नसम्बन्धावच्छिन्नप्रकारतैव तृतीयाया अर्थः। तादृशस्थले च रङ्गं रजतं जानातीति प्रयोगात् तादात्म्यसंबन्धावच्छिन्नप्रकारता रजतपदोत्तरद्वितीयायाः अर्थः। रङ्गपदोत्तरद्वितीयायाः विशेष्यत्वमर्थः। तस्य निरूपकतासंबन्धेन धात्वर्थज्ञानेऽन्वयः। निरूपकतासंबन्धेन रङ्गनिष्ठविशेष्यताविशिष्टज्ञाने रजतनिष्ठप्रकारतायाः निरूपकतासंबन्धेनान्वयः। तथा च रङ्गनिष्ठविशेष्यताविशिष्टं यत् रजतनिष्ठप्रकारताविशिष्टं ज्ञानं तदाश्रय इति बोधः। उक्तस्थले रङ्गरजतयोः समानविभक्तिकपदोपस्थाप्ययोरभेदान्वयसाकाङ्क्षत्वेऽपि रजताभिन्नं यद्रङ्गं तद्विशेष्यकान्वयबोधो न भवति। अयोग्यत्वात्।

नन्वेवं सति रङ्गरजतादिपदयोः सामानाधिकरण्यानुपपत्तिः, परस्परमभेदेनान्वयाभावादिति चेत् — का क्षतिः। न चैवं रजतगतैकत्वबहुत्वाविवक्षायां रङ्गानि रजतं जानातीति प्रयोगस्य स्त्रियं पण्डितं (पांसुलाः) जानातीति प्रयोगस्य च प्रसङ्गः, सामानाधिकरण्यस्यैव समानवचनलिङ्गकत्वनियतत्वादिति वाच्यम्। समानाधिकरणयोरिव यत्पदार्थविशेष्यकत्वविशिष्टेऽभेदसंबन्धावच्छिन्नयत्पदार्थनिष्ठप्रकारताकत्वस्यान्वयः तयोरपि समानलिङ्गवचनकत्वनियमात्। प्रकृते रङ्गविशेष्य-

कत्वविशिष्टेऽभेदसंबन्धावच्छिन्नरजतप्रकारकत्वस्य अन्वयात् समानलिङ्गवचनकत्वस्यावश्यकतया न भिन्नलिङ्गवचनकप्रयोगप्रसङ्ग इति।

आरोपस्थले यज्ञपतिमतानुसारेण बोधप्रकार:

यज्ञपतिमतानुयायिनस्तु रङ्गं रजतं जानातीत्यादौ सामानाधिकरण्यानुरोधात् रजतादिपदस्य रजताभेदज्ञानविषये लक्षणा। तथा चोक्तवाक्यात् रङ्गाभिन्नो यो रजताभेदज्ञानविषय: तद्विषयकज्ञानाश्रय इति बोध:। अत एव भ्रान्तिज्ञेन विशेषदर्शिना (इदं रजतमिति ज्ञानं भ्रान्ति: इति जानता इदं न रजतमिति ज्ञानवता च) प्रयुक्तस्य लोहितवह्निं जानातीति वाक्यस्य प्रामाण्यं निर्वहति। वह्नौ लौहित्यस्य औपाधिकतया लोहितपदार्थस्याभेदेन वह्नावन्वये प्रामाण्यं न निर्वहति। लोहितपदस्य लोहिताभेदविषये लक्षणायां तु लोहिताभेदज्ञानविषयाभिन्नत्वस्य वह्नावबाधात् प्रामाण्यं निर्वहति।

न च यथा रङ्गं रजतं जानातीत्यादौ नाभेदान्वय:, किं तु रङ्गविशेष्यकत्वविशिष्टे ज्ञाने रजतप्रकारकत्वस्यान्वय: तथा अग्निविशेष्यकत्वविशिष्टे ज्ञाने लोहितप्रकारकत्वस्यान्वयोऽस्तु इति वाच्यम्।

असमासस्थले अभेदाविवक्षया तथान्वयसंभवेऽपि समासस्थले अभेदाविवक्षायां कर्मधारयसमासस्य असंभवात्, लोहितपदोत्तरं प्रकारताबोधकपदाभावेन ज्ञाने लोहितप्रकारकत्वस्यान्वयासंभवाच्च।

न च लोहितपदार्थस्य स्वनिष्ठाभेदसंबन्धावच्छिन्नप्रकारताकत्वसंबन्धेन ज्ञानेऽन्वयोऽस्तु इति वाच्यम्। धात्वर्थे साक्षान्नामार्थस्य भेदसंबन्धेनान्वयस्य अव्युत्पन्नत्वात्।

न च वह्निपदोत्तरद्वितीययैव लोहितान्विता प्रकारता बोध्यतामिति वाच्यम्। कर्मधारयसमासोत्तरविभक्ते: पूर्वपदप्रकृतिकत्वाभावेन पूर्वपदार्थान्वितप्रकारताबोधकत्वासंभवात्।

इत्थं चोक्तसमासस्थले लोहितपदस्य लोहिताभेदज्ञानविषये लक्षणाया आवश्यकत्वे लोहितं वह्निं जानातीत्यादावसमासस्थलेऽपि तत्तदभेदज्ञानविषये लक्षणया अभेदान्वयबोधो निराबाध:।

नन्वेतन्मते शुक्लो वह्निरित्याकारकप्रमायां लोहिताभेदभ्रमविषयस्य वह्ने: विषयत्वात् तादृशप्रमादशायां लोहितवह्निं जानातीति प्रयोगप्रसङ्ग:।

न च लोहितपदार्थघटकस्य ज्ञानस्य धर्मिपारतन्त्र्येण धात्वर्थज्ञानेऽभेदेनान्वयोऽभ्युपेयते। तथा च शुक्लो वह्निरिति प्रमाया: लोहिताभेदभ्रमस्य च

भिन्नत्वात् न तादृशज्ञानपरस्योक्तवाक्यस्य प्रामाण्यमिति वाच्यम्। एवमपि शुक्लो वह्निः लोहिता जपेति समूहालम्बनरूपायाः एकस्या एव प्रमायाः लोहिताभेदविषयकत्वेन वह्निविषयकत्वेन च तस्याः लोहिताभेदविषयकज्ञानाभिन्नत्वात् लोहिताभेदविषयकस्वविषयवह्निविषयकत्वान्न तादृशसमूहालम्बनप्रमादशायां लोहितवह्निं जानाति, लोहितं वह्निं जानाति इति वा प्रयोगप्रसङ्ग इति चेत्—न।

लोहितपदोपस्थाप्यो यो लोहिताभेदज्ञानविषयताश्रयः तद्धटकविषयतायाः द्वितीयार्थविषयतायामभेदसंबन्धेन धर्मिपारतन्त्र्येण विशेषणत्वमिति नियम उपगम्यते। अतो नोक्तदोषः। लोहिताभेदज्ञानविषयतायाः जपानिष्ठतया तदभिन्नत्वस्य वह्निनिष्ठविषयतायामभावात्।

अथ वा लोहिताभेदविषयतानिरूपितविषयताश्रयस्य वह्न्यादेः ज्ञानान्वयिविषयितानिरूपकत्वं भासते। समूहालम्बने च तादृशविषयतानापन्नस्यैव विषयितानिरूपकत्वमिति नातिप्रसङ्गः।

न च लोहिताभेदविषयतानिरूपितविषयताश्रयो यो लोहितो वह्निरित्याकारकज्ञानविषयो वह्निः तन्निष्ठनिरूपकतानिरूपितविषयित्वस्य निरुक्तसमूहालम्बने अक्षतत्वान्नोक्तप्रामाण्यवारणं संभवतीति वाच्यम्।

लोहिताभेदविषयतानिरूपितविषयताश्रयस्य विषयितानिरूपकत्वमित्यस्य हि विषयत्वावच्छिन्नं निरूपकत्वमित्यर्थः। तथा च लोहिताभेदविषयतानिरूपितविषयत्वावच्छिन्नवह्निनिष्ठनिरूपकताकविषयिताश्रयज्ञानवानिति लोहितवह्निं जानातीति वाक्याच्छाब्दबोधः। उक्तसमूहालम्बनज्ञानीयवह्निनिष्ठनिरूपकतायाश्च लोहिताभेदविषयतानिरूपितविषयत्वावच्छिन्नत्वं नास्तीति न तद्दशायां लोहितवह्निं जानातीति प्रयोगप्रसङ्गः।

न च विषयविधया भासमानो धर्म एव ज्ञाननिष्ठविषयितानिरूपकतावच्छेदको भवति। न हि घटवत् भूतलमित्याकारकज्ञाननिष्ठविषयितानिरूपकतावच्छेदकं द्रव्यत्वादिकम्, किं तु घटत्वं भूतलत्वं चेति सार्वजनीनम्। तथा च कथं लोहितो वह्निः इत्यादिज्ञाने लोहिताभेदविषयतानिरूपितविषयतायाः विषयितानिरूपकतावच्छेदकत्वं, तस्याः विषयविधया अभानादिति वाच्यम्।

अविषयस्यापि विषयितानिरूपकतावच्छेदकत्वस्य क्वचिदङ्गीकारात्। यथा-रक्तदण्डवानिति ज्ञाने दण्डरूपप्रकारांशेऽविशेषणेनापि रक्तत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वेन अवच्छिन्नत्वं दण्डनिष्ठप्रकारतायां स्वीक्रियते तद्वत्। रक्तत्वनिष्ठप्रकारतानिरूपितविशेष्यत्वावच्छिन्नदण्डनिष्ठप्रकारतानिरूपितविशेष्यताशालिबोधस्य रक्तदण्डवान् इत्यतो जायमानत्वात्।

तत्र शोभनम्। उक्तरीत्या रङ्गं रजतं जानाति इत्यादौ रङ्गपदोत्तरद्वितीयायाः प्रकारत्वमर्थः। रजतपदोत्तरद्वितीयायाः विशेष्यत्वमर्थ इति पूर्वोक्तरीत्या लक्षणां विनैवोपपत्तौ तस्याः अन्याय्यत्वात्।

आक्षेपः

अथोक्तस्थले रङ्गं रजतं जानातीत्यादौ आरोप्यारोपविषयवाचकपदयोः ज्ञानार्थकत्वे कर्माख्यातस्थले लोहितो वह्निर्ज्ञायते इत्यादौ ज्ञाननिरूपितप्रकारताश्रयो लोहितः ज्ञाननिरूपितविशेष्यताश्रयो वह्निः इत्याकारकबोधस्यैवोक्तवाक्याज्जायमानतया विशेष्यभेदाद्वाक्यभेदापत्तिः।

न चोक्तवाक्यात् लोहिताभेदज्ञानविषयः लोहितनिष्ठाभेदसंबन्धावच्छिन्नप्रकारतानिरूपकज्ञाननिरूपितविशेष्यताश्रयो वह्निरित्याकारकः शाब्दबोधः अङ्गीक्रियते, न तु ज्ञाने प्रकारो लोहितः, विशेष्यश्च वह्निरिति समूहालम्बनात्मको बोधः। तथा सति शुक्लो वह्निः लोहिता जपा इत्याकारकज्ञानकालेऽपि लोहितो वह्निर्ज्ञायत इति प्रयोगप्रसङ्गात्। लोहिताभेदज्ञानविषयो वह्निरित्याकारकबोधस्वीकारे च लोहितप्रकारकत्वविशिष्टज्ञाननिरूपितविशेष्यतायाः शुक्लवह्न्यादौ बाधितत्वेन तादृशप्रयोगापत्तिविरहात् इति वाच्यम्।

लोहितो वह्निः ज्ञायते इत्यत्र लोहितपदोत्तरं प्रकारतार्थकद्वितीयादिविभक्त्यभावेन लोहितप्रकारकत्वेन ज्ञानभानासंभवात्। प्रथमायाः सत्त्वेऽपि तस्याः संख्यातिरिक्तार्थाभावात्।

न च लोहितपदार्थस्य स्वनिष्ठप्रकारतानिरूपकत्वात्मकप्रकारित्वसंबन्धेन ज्ञानेऽन्वयात् तथा ज्ञानभानं संभवतीति वाच्यम्।

नामार्थधात्वर्थयोः साक्षात् भेदसंबन्धेन अन्वयस्याव्युत्पन्नतया प्रकारितायाः संसर्गतया भानासंभवात् इति चेत्—

समाधानम्

उच्यते। यथा हि घटो नीलो भवति, वृक्षो नौका भवति, काष्ठं भस्म भवति इत्यादौ भूधात्वर्थे असाधारणधर्मरूपे भावे व्युत्पत्तिवैचित्र्येण नीलनौकाभस्मादेः आधेयत्वरूपभेदसंबन्धेनान्वयः। नीलवृत्तिनीलत्वरूपासाधारणधर्मवान् घटः, नौकावृत्तिनौकात्वरूपासाधारणधर्माश्रयो वृक्षः, भस्मवृत्तिभस्मत्वरूपासाधारणधर्माश्रयः काष्ठमित्याकारकः शाब्दबोधः। यथा ग्रामं गच्छतीत्यादौ नामार्थ-

धात्वर्थयोर्मध्ये द्वितीयार्थः कर्मत्वं भासते इति द्वितीयादेरन्तरा भासमानार्थकत्वं न तथा प्रथमाया अन्तराभासमानार्थकत्वमिति न प्रथमाया आधेयत्वमर्थः, अपि तु आधेयत्वं संसर्ग एव।

तथा प्रकृते लोहितो वह्निर्ज्ञायते इत्यत्रापि धात्वर्थे ज्ञाने प्रकारितासंबन्धेन लोहितस्य साक्षादेवान्वयः स्वीक्रियते। अतो नानुपपत्तिः कापि।

न च वृक्षो नौका भवतीत्यत्र नौकावृत्त्यसाधारणधर्माश्रयो वृक्ष इति बोधो न संभवति। वृक्षस्य नौकाजनकत्वेन तद्भिन्नतया नौकावृत्त्यसाधारणधर्मस्य वृक्षेऽसत्त्वादिति वाच्यम्।

तत्र नौकापदस्य स्वारम्भकावयवारभ्यार्थकतया स्वारम्भकावयवारभ्यत्वरूपधर्मस्य वृक्षनौकोभयसाधारणत्वेन नौकावृत्तितादृशधर्माश्रयत्वस्य वृक्षे सत्त्वे नानुपपत्त्यभावात्।

इच्छार्थकधातुयोगे द्वितीयार्थः

इच्छार्थकधातुसमभिव्याहृतद्वितीयायाः मुख्यविशेष्यत्वरूपं कर्मत्वमर्थः। सुखमिच्छतीति वाक्यात् सुखनिष्ठविशेष्यतानिरूपकेच्छाश्रय इति बोधः। मुख्यविशेष्यत्वमित्युक्त्या वृष्टिसाध्यं सुखं भवतु इति इच्छास्थले सुखमिच्छतीतिवत् वृष्टिमिच्छति इति प्रयोगस्य नापत्तिः। तादृशेच्छायाः वृष्टिविषयकत्वेऽपि वृष्टिविशेष्यकत्वाभावात्।

न च अहं सुखी स्यामितीच्छायाः सुखविशेषणकत्वेन सुखविशेष्यकत्वाभावात् तादृशेच्छाकाले सुखमिच्छति इति प्रयोगानुपपत्तिरिति वाच्यम्।

मम सुखं भवतु इति सुखविशेष्यकेच्छाया एव अहं सुखी स्यामिति शब्देनाभिलापात्।

अथ वा इच्छार्थकधातुसमभिव्याहृतद्वितीयायाः उद्देश्यत्वमर्थः। उद्देश्यता च इदमुद्देश्यमिति व्यवहारनियामकः क्वाचित्कविशेषणसाधारणो विषयताविशेषः। यथा विधेयं विशेषणतयैव भासत इति न नियमः पर्वते वह्निरिति वह्निविशेष्यकानुमितावपि वह्नेरेव विधेयत्वात्, तथा उद्देश्यमपि विशेष्यतयैव भासत इत्यपि न नियमः। पर्वते वह्निरित्यनुमितौ आधेयत्वसंबन्धेन प्रकारस्यापि पर्वतस्योद्देश्यत्वात्। अत उद्देश्यत्वविधेयत्वे विशेष्यत्वप्रकारत्वाभ्यां भिन्ने। तथा च सुखमिच्छतीति वाक्यात् सुखनिष्ठोद्देश्यतानिरूपकेच्छाश्रय इति बोधः। सा च मम सुखं भवतु इति सुखविशेष्यिका वा भवतु, अहं सुखी स्यामिति सुखविशेषणिका

वा भवतु। उभयथापि तस्याः सुखोद्देश्यकत्वेन तादृशेच्छाकाले सुखमिच्छतीति प्रयोगे न काप्यनुपपत्तिः।

न चोद्देश्यत्वस्य इच्छार्थकधातुसमभिव्याहृतद्वितीयार्थत्वे ग्राममिच्छतीति प्रयोगानुपपत्तिः। ग्रामस्य सिद्धत्वेन तदुद्देश्यकेच्छाया असंभवात् इति वाच्यम्। तत्र ग्रामपदस्य लक्षणया ग्रामस्वत्वमर्थः। तथा च ग्राममिच्छतीति वाक्यात् ग्रामस्वत्वोद्देश्यकेच्छावानिति शाब्दबोधो जायते। ग्रामस्वत्वस्य असिद्धत्वेन तदुद्देश्यकेच्छायाः संभवात्।

अन्ये तु ग्रामस्य स्वरूपतः सिद्धत्वेन इच्छाविषयत्वासंभवेऽपि असिद्ध-स्वत्वविशिष्टत्वेन रूपेणेच्छाविषयत्वं संभवति। तथा च स्वत्वविशिष्टग्राम-निष्ठोद्देश्यतानिरूपकेच्छाश्रय इति ग्रामं गच्छतीति वाक्याद् बोधः। अतो नानुप-पत्तिरित्याहुः।

इति द्वितीयार्थविचारः

तृतीयार्थविचारः

कर्तृत्वविचारः वैयाकरणग्रन्थस्थः

"कर्तृकरणयोस्तृतीया"[१] इति सूत्रेण कर्तरि करणे च तृतीया अनुशिष्टा। तत्र कर्तृत्वं करणत्वं च किंरूपमिति विचार्यते।

"स्वतन्त्रः कर्ता"[२] इति पाणिनीयं सूत्रम्। कारकाधिकारात् क्रियाजनने स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्। स्वातन्त्र्यं प्राधान्यमिति भाष्ये स्पष्टम्। ननु "स्थाली पचति" इत्यादौ कथं स्थल्यादीनां कर्तृत्वम्, स्वातन्त्र्याभावात् इत्यत उक्तं विवक्षितोऽर्थ इति। विवक्षातः कारकाणि भवन्तीति भाष्यात्। स्वातन्त्र्यं च धात्वर्थव्यापाराश्रयत्वम्। फलानुकूलो व्यापारो धात्वर्थः। तत्र 'पचति' इत्यत्र विक्लित्तिरूपफलाश्रये तण्डुलेऽतिव्याप्तिवारणाय व्यापारेति। उक्तं च हरिणा — "धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते" इति। धातूपात्तव्यापारवतः कारकस्य कर्तृत्वमिति तदर्थः।[३]

"प्रधानीभूतधात्वर्थं प्रति आश्रयत्वं स्वातन्त्र्यम्" इति प्रौढमनोरमायाम्।[४]

तत्र शब्दरत्ने — प्रधानीभूतेति। प्राधान्यं च कर्तृप्रत्ययसमभिव्याहारे धात्वर्थ-निष्ठविशेष्यता-निरूपितप्रकारतानाश्रयधात्वर्थत्वम् — इत्युक्तम्। तत्र भैरवी-व्याख्याने —

ननु प्राधान्यं मुख्यविशेष्यत्वरूपं चेत् — "चैत्रः मैत्रेण पाचयति" इत्यादौ प्रयोज्यव्यापारे तदभावात् णिच्समभिव्याहारे प्रयोज्यस्य कर्तृत्वं न स्यात् अपि च कर्मणि यत्र प्रत्ययः तत्र "चैत्रेण पक्व" इत्यादौ धात्वर्थफलव्यापारयोर्विशेषण-विशेष्यभावव्यत्यासात् धात्वर्थव्यापारस्य मुख्यविशेष्यत्वाभावात् तदाश्रयस्य कर्तृत्वं न स्यात् इत्यतः प्रधान्यं परिष्करोति — प्राधान्यं चेति। "देवदत्तेन पच्यते तण्डुल" इत्यादौ देवदत्तस्य कर्तृत्वसिद्धये कर्तृप्रत्ययसमभिव्याहार इति। धात्वर्थ-निष्ठप्रकारतानिरूपितविशेष्यताश्रयत्वमित्येतावन्मात्रोक्तौ विभागावच्छिन्नक्षरणानु-कूलव्यापारस्य "गोः पयो दोग्धि चैत्र" इत्यत्र दुहधात्वर्थत्वात् विभागनिष्ठ-

---

[१] सू. २.३.१८

[२] सू. १.४.५४

[३] बालमनोरमा पृ. ४२१

[४] पृ. ८७९

प्रकारतानिरूपितविशेष्यताश्रयक्षरणाश्रयस्य पयसः कर्तृत्वापत्तिः। तद्वारणाय धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वनिवेशः। क्षरणस्य व्यापारनिष्ठ-विशेष्यतानिरूपितप्रकारताश्रयत्वान्न दोषः।

अत्र धातौ तत्त्वं निवेश्य तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रय-तद्धात्वर्थव्यापाराश्रयत्वं स्वातन्त्र्यमिति च वक्तव्यम्। अन्यथा णिजन्ताख्य-धातुजन्यशाब्दबोधे प्रयोज्यव्यापारस्य प्रयोजकव्यापारविशेषणत्वात् तत्र णिच् प्रकृतिधात्वर्थस्य प्राधान्यं तदाश्रयस्य कर्तृत्वं च न स्यात् "चैत्रेण पाचयति तण्डुलं मैत्र" इत्यादौ। धातौ तत्त्वनिवेशे तु णिजन्ततत्प्रकृतिधात्वोर्भिन्नतया तदुभयार्थव्यापारयोः स्वस्वार्थं प्रति प्राधान्यस्य सत्त्वेन प्रयोज्यस्य कर्तृत्वसिद्धिः।

"कारके"[१] इति सूत्रस्थभाष्यात्तु तत्तद्धात्वर्थकारकचक्रप्रवर्तकत्वं कर्तृत्वमिति लभ्यते। तच्चारोपितमानारोपितं वेत्यन्यदेतत्। "स्थाली पचति" इत्यादावाद्यम्। "चैत्रः पचति" इत्यादावन्त्यम्। यद्व्यापारस्यान्यव्यापारप्रवर्तकत्वविवक्षा तदा तद्व्यापार एव धात्वर्थः। मूलोक्तार्थस्तु न युक्तः। तस्मिन्नर्थे भाष्यकृता स्वतन्त्र-पदस्यापरिभाषणात्।

कर्तृसंज्ञाबोधितकर्तृत्वशक्तिमत्वं तु कर्तृत्वम्। सा चोक्तस्वतन्त्रे तिष्ठति। तस्याः विभक्तिद्योत्यत्वात् प्रकृत्यर्थविशेषणता। कर्तृक्रियाभावसंबन्धस्तु तृतीयार्थः। प्रकृत्यर्थस्य तद्घटककर्तर्यभेदेन विशेषणता। एवं च 'चैत्रः पचति' इत्यादितः कर्तृचैत्राभिन्नकर्तृकः पाक इति रीत्या बोधः इति प्रतिपादितम्। सर्वमिदं शेखरे स्थितमेव।

कारके इति सूत्रस्थो भाष्यग्रन्थः अयम् — प्रधानसमवाये स्थाली परतन्त्रा व्यवाये स्वतन्त्रा। किं पुनः प्रधानम्। कर्ता। कथं ज्ञायते कर्ता प्रधानमिति। यत् सर्वेषु कारकेषु संनिहितेषु कर्ता प्रवर्तयिता भवति — इति। स्वतन्त्रः कर्तेति सूत्रे भाष्यं च —

तन्त्रशब्दस्य प्रधानवाचकत्वमस्ति प्राधान्ये वर्तते तद्यथा स्वतन्त्रोऽसौ ब्राह्मण इत्युच्यते। स्वप्रधान इति गम्यते। तद्यः प्राधान्ये वर्तते तन्त्रशब्दस्तस्येदं ग्रहणम् —

इति। लघुमञ्जूषास्थ एवायं विषयः। स ग्रन्थः संगृह्योच्यते — तृतीयायाः कर्तृ-करणे अर्थः। "कर्तृकरणयोस्तृतीया"[२] इति सूत्रात्। कर्तृत्वं च कर्तृसंज्ञाबोधित-कर्तृत्वशक्तिमत्त्वम्। सा शक्तिश्च कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यता-

[१] सू. १.४.२३
[२] सू. २.३.१८

निरूपितप्रकारतानाश्रयतद्धात्वर्थाश्रये वर्तते। प्रकारतानाश्रयेति धात्वर्थविशेषणम्। "चैत्रस्तण्डुलं पचति" इत्यादौ विक्लित्त्यनुकूलव्यापारः पच्यर्थः। तन्निष्ठा या विशेष्यता तन्निरूपिता प्रकारता विक्लित्तिनिष्ठा प्रकारता तदाश्रयः विक्लित्तिः, तदनाश्रयः व्यापारः, तदाश्रयत्वात् चैत्रस्य कर्तृत्वम्। उक्तधात्वर्थाश्रयत्वमेव स्वातन्त्र्यम्। स्थालीस्थे यत्ने पचिना कथ्यमाने स्थाली स्वतन्त्रेति "कारके"[१] इति सूत्रे भाष्योक्तेः।

तत्र सति सम्भवे तद्धात्वर्थकृतिव्यापारोभयाश्रयत्वसमानाधिकरणैव कर्तृता-शक्तिः। अतो गुरुतरोत्तोलनादिविषयकयत्नसत्त्वेऽपि तत्क्रियाया अनिष्पत्तौ न तत्र कर्तृत्वव्यवहारः। अन्ये तु तत्र कृतिसत्त्वे न मानमित्याहुः।

कालिकादिसंबन्धेन व्यापाराश्रये काष्ठादौ कर्तृत्ववारणाय व्यापारतावच्छेदक-संबन्धेन व्यापाराश्रयत्वं वक्तव्यम्।

एतेन सामग्रीसाध्यायां क्रियायां सर्वेषां स्वव्यापारे स्वातन्त्र्यात् सूत्रे स्वतन्त्र इत्यव्यावर्तकमित्यपास्तम्। धात्वर्थघटितप्रागुक्तस्वातन्त्र्यस्य युगपत् सर्वेष्वभावात्। यन्निष्ठो व्यापारो धातुनाभिधीयते स स्वतन्त्र इत्यर्थलाभात् न सर्वकारकेषु युगपत् स्वातन्त्र्यम्। किं तु विवक्षावशेन इति ज्ञापनार्थं स्वतन्त्रग्रहणम्।

"रूपवन्तं गच्छति" इत्यत्र धात्वर्थसंयोगरूपफलाश्रयत्वात् कर्मणः रूपवतः कर्तृत्वं प्रसजति। तद्वारणाय तद्धात्वर्थे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकार-तानाश्रयेति विशेषणम्। एवं तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयः रूपं तदाश्रयस्य कर्मणः कर्तृत्ववारणाय तद्धात्वर्थेति। रूपस्य धात्वर्थत्वविरहान्न दोषः। कर्तृप्रत्ययसमभिव्याहारे इत्यनेन "पक्वस्तण्डुलो देवदत्तेन" इत्यादौ कर्मप्रत्यय-समभिव्याहारे देवदत्तकर्तृकव्यापारजन्यविक्लित्त्याश्रयः तण्डुल इत्यन्वयबोधात् कर्तृगतव्यापारस्य तद्धात्वर्थविक्लित्तिनिष्ठविशेष्यतानिरूपितप्रकारताश्रयतया तदना-श्रयत्वविरहात् कर्तृत्वानुपपत्तिः इति शङ्काया नावकाशः। कर्तृप्रत्ययसमभि-व्याहारे व्यापारस्य विशेष्यतया प्रकारतानाश्रयत्वाक्षतेः।

नैयायिकमतदूषणम्

यत्तु तत्तत्क्रियानुकूलकृत्याश्रयः कर्ता। कृञः कृत्यर्थकत्वेन कृप्रकृतिकतृचा तथैव लाभात्। तत्र आश्रयस्य प्रकृतितः लाभात् कृतिस्तृतीयार्थ इति। तन्न। कृतेरपि धातुलभ्यत्वात्। 'रथेन गम्यत' इत्यादौ अचेतने कृत्याश्रयत्वासंभवाच्च। न

---

[१] सू. १.४.२३

च तत्र तृतीयायाः आश्रयत्वे लक्षणा। रथनिष्ठाश्रयतानिरूपकं गमनं वाक्यार्थ इति वाच्यम्। विभक्तौ लक्षणाया अयुक्तत्वस्य तिङर्थवादे उक्तत्वात्। कृञः कृतिमात्रवाचकत्वाभावाच्च।

यो धात्वर्थः रोदनोत्क्रमणादिः चेतनमात्रवर्ती, तत्र धात्वर्थे अचेतनस्य कर्तृत्वं ग्रावा रोदिति, उत्क्रान्तं दाम अस्याः इत्यादौ अचेतने चेतनत्वारोपेण चेतननिष्ठक्रियारोपेण वा निर्वाह्यमिति "दामहायनान्ताच्च"[1] इति सूत्रे भाष्ये स्पष्टम्। तत्र हि — "उद्दामा वडवा" इत्यत्र उत्क्रान्तं दाम अस्या इति बहुव्रीह्याश्रयणे एवं शङ्का कृता — ननु च चेतनावत एतद्भवति उत्क्रमणं वा अपक्रमणं वा दाम चाचेतनम् इति। ततः समाहितम् — अचेतनेष्वपि चेतनवदुपचारो दृश्यते तद्यथा स्रस्तान्यस्या बन्धनानि स्रस्यन्तेऽस्या बन्धनानीति इति। कृत्याद्यारोपेण प्रयोगः। एवमेव रथो गच्छतीत्याद्युपपत्तिः। एवं च नैयायिकानां लक्षणाश्रयणं "विभक्तौ न लक्षणेति वृद्धव्यवहारेण विरुध्यते।

लघुमञ्जूषायाम् नागेशस्य मंतान्तरम्

परे तु तद्धत्वर्थीयकारकचक्रप्रयोक्तृत्वं सूत्रविवक्षितं स्वातन्त्र्यम्। तदुक्तं कारके इति सूत्रे भाष्ये — प्रधानेन समवाये स्थाली परतन्त्रा, व्यवाये स्वतन्त्रा। किं पुनः प्रधानं कर्ता। कथं ज्ञायते कर्ता प्रधानमिति। यत् सर्वेषु कारकेषु संनिहितेषु कर्ता प्रवर्तयिता भवतीति।

एवं स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमपि स्वातन्त्र्यम्। तच्च प्रयोजकसंनिधानेऽपि प्रयोज्यस्यास्त्येव तत्संनिधानेऽपि स्वार्थसत्त्वे प्रवृत्तेः, तदभावेऽप्रवृत्तेश्च। एतच्च "स्वतन्त्रः कर्ता"[2] इति सूत्रे भाष्ये व्यक्तम्। तत्र हि — प्रयोजकसंनिधाने प्रयोज्यस्य अस्वातन्त्र्यमाशङ्क्य एवं परिहृतम् —

यदि च प्रेषितोऽसौ न करोति स्वतन्त्रोऽसौ भवतीति। स्वार्थादर्शनादिच्छायामसत्यामित्यर्थ इति कैयटः। एवं च यद्ययं परतन्त्रः स्यात् सर्वथा कुर्यादेव। न चैवम्। तस्मात् प्रयोज्यः स्वतन्त्र एवेति भाष्याशयः। एवं च सूत्रे स्वशब्दः आत्मवाची। स्वः आत्मा तन्त्रं प्रधानं यस्य स स्वतन्त्र इति शब्दमर्यादया कारकचक्रप्रयोक्तृत्वं स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वं च स्वातन्त्र्यम्।

एतच्च स्वातन्त्र्यमारोपितमनारोपितं च कर्तृसंज्ञायाः निमित्तम्। आद्यं स्थाल्यादौ। द्वितीयं पुरुषे। यस्य च स्वातन्त्र्यविवक्षा तद्व्यापार एव धातुना

---

[1] सू. ४.१.२७

[2] सू. १.४.५४

प्राधान्येन प्रतिपाद्यते। शब्दशक्तिस्वाभाव्यात्। स्थाली स्वतन्त्रेति भाष्ये आरोपित-स्वातन्त्र्यवतीत्यर्थः। आरोपं विना स्थालीनिष्ठव्यापारे धातोः वृत्त्यसंभवात्।

प्रधानधात्वर्थव्यापाराश्रयत्वं स्वतन्त्रत्वमिति तु न। स्वतन्त्रपदस्य तत्रापरिभाषणात्। लोके उक्तार्थयोरेव स्वतन्त्रपदप्रवृत्तेः। अत एव प्रयोज्यस्यास्वतन्त्रत्वात् कर्तृसंज्ञा न प्राप्नोतीत्याशङ्क्य तस्यापि स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वरूपं स्वातन्त्र्यं साधितं कर्तृसंज्ञासूत्रे भाष्ये — यदि प्रेषितोऽसौ न करोति स्वतन्त्रोऽसौ भवतीति।

हरिरप्याह —

प्रागन्यतः शक्तिलाभात् न्यग्भावापादनादपि।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात्।।
अदृष्टत्वात् प्रतिनिधेः अविवेके च दर्शनात्।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरुच्यते।।

करणादिव्यापारात् पूर्वमेव करणादिसंपादकतया शक्तिमत्वेन करणादीनामात्माधीनत्वसम्पादनेन च तेषां तदायत्तव्यापारवत्त्वेन अतिप्रवृत्तानां तेषां निवर्तनेन च कर्तुः फलप्राप्तौ स्वत एव निवृत्त्या कर्तुः प्रतिनिध्यभावेन च कारकान्तराभावेऽपि अस्त्यादौ कर्तुर्दर्शनेन दूरादुपकारित्वेऽपि कर्तुः स्वातन्त्र्यमिति तदर्थः। वस्तुस्थित्या एषां धर्माणामभावेऽपि शब्देन यस्यैते प्रत्याय्यन्ते स कर्ता।

"घटो भवति" इत्यादौ बुद्धिपरिकल्पितस्य घटादेः कर्तृता। यद्वा घटपदेनोपादानकारणं मृदेव कार्यात्मना भवतीत्यर्थः। कार्यकारणयोरभेदस्य स्वीकारात्।

"पाचयति चैत्रेण मैत्र" इत्यादौ प्रयोज्यस्य प्रयोजकव्यापाराधीनत्वेऽपि साधनान्तरविषये उक्तस्वातन्त्र्यसत्त्वात् कर्तृत्वमव्याहतम्। प्रेरणापारतन्त्र्ये उक्तस्य स्वातन्त्र्यस्य उपायत्वात्। क्रियासिद्धये खलु प्रेरणा। एवं हि क्रिया सिध्यति यदि साधनान्तरविनियोगलक्षणं स्वातन्त्र्यं प्रयोज्यः प्रतिपद्यते, नान्यथा। अतः न प्रेरणा स्वातन्त्र्यस्य विरोधिनी। उपाय एव खलु स्वव्यापारे स्वातन्त्र्यं पारतन्त्र्यस्य । किं च करणादीनां कर्त्रधीनत्ववत् न प्रयोज्यस्य प्रयोजकाधीनत्वम्। प्रयोज्यस्य स्वार्थसिद्ध्यर्थं प्रवृत्तेः। न हि करणादीनां तादृशी प्रवृत्तिः। तदुक्तम् —

निमित्तेभ्यः प्रवर्तन्ते सर्व एव स्वभूतये।
अभिप्रायानुरोधोऽपि स्वार्थस्यैव प्रसिद्धये।।

इति। भृतिप्रभृतिनिमित्तवशात् प्रवृत्तावपि स्वार्थसाधनफलिकैव सा प्रवृत्तिः। स्वाम्याशयानुवर्तनमात्रेण तु प्रयोज्यत्वमित्याहुः।

भूषणसारे[1] कर्तृतृतीयार्थनिरूपणम्

कर्तृतृतीयायाः आश्रयोऽर्थः। तथा हि — स्वतन्त्रः कर्ता। स्वातन्त्र्यं च धात्वर्थव्यापाराश्रयत्वम्। "धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यते" इति वाक्यपदीयात्। अत एव यदा यदीयो व्यापारो धातुनाभिधीयते तदा स कर्तेति "स्थाली पचति, अग्निः पचति, एधांसि पचन्ति, तण्डुलः पच्यते स्वयमेव" इत्यादि संगच्छते। एवं च व्यापारांशस्य धातुलभ्यत्वात् आश्रयमात्रं तृतीयार्थः।

कारकचक्रप्रयोक्तृत्वं कृत्याश्रयत्वं वा दण्डः करोतीत्यत्राव्याप्तम्। अचेतने दण्डे तदभावात्।

अयं कर्ता त्रिविधः शुद्धः, प्रयोजको हेतुः, कर्मकर्ता च। मया हरिः सेव्यते, कार्यते हरिणा, गमयति कृष्णं गोकुलम् इति क्रमेणोदाहरणानि। मदभिन्नाश्रयको हरिकर्मकसेवनानुकूलो व्यापारः, हर्यभिन्नाश्रयक उत्पादनानुकूलो व्यापारः, गोकुलकर्मकगमनानुकूलकृष्णाश्रयकतादृशव्यापारानुकूलो व्यापारः इति शाब्दबोधः।

कारकचक्रे तृतीयार्थकर्तृत्वनिर्वचनम्

कारकचक्रे भवानन्दसिद्धान्तवागीशेन कर्तृत्वनिर्वचनमेवं कृतम्[2] — तत्र क्रियाश्रयत्वं कर्तृत्वमिति वैयाकरणाः। तेषामयमाशयः — यद्धातूत्तराख्यातेन यद्धात्वर्थान्वितयादृशधर्मवत्वं बोध्यते, तादृशधर्मवत्त्वमेव तत्क्रियाकर्तृत्वम्। एवं च "पचति" इत्यादौ पाकानुकूलव्यापारवत्त्वम्, "जानाति" इत्यादौ ज्ञाननिरूपितमाश्रयत्वम्, "नश्यति" इत्यादौ नाशनिरूपितं प्रतियोगित्वं — तत्तक्रियानिरूपितं तत्तत्क्रियाकर्तृत्वम्।

"काष्ठैः स्थाल्यामोदनं पचति" इत्यादौ करणाधिकरणकर्मणां क्रियान्वितकरणत्वादिधर्मवत्वेऽपि स धर्मो नाख्यातप्रतिपाद्यः। यदा तु तत्तात्पर्येण प्रयुज्यते तदा "काष्ठं पचति" इत्यादौ तेषां कर्तृत्वमिष्टमेव।

तथा "पच्यते ओदनः स्वयमेव" इत्यादौ कर्मकर्तरि ओदनादेः कर्मणोऽपि कर्तृत्वम्। तत्र हि स्ववृत्तिव्यापारजन्यफलशाली ओदनः इति शाब्दबोधः। ओदनपदोत्तरप्रथमायाः लक्षणया व्यापारोऽर्थः। यद्वा आख्यातस्य व्यापारोऽर्थः। व्युत्पत्तिवैचित्र्याच्च यगादिसमभिव्याहृताख्यातार्थव्यापारे प्रथमान्तार्थस्य विशेषणतया आधेयतासंबन्धेनान्वयः। तत्र अख्यातस्य व्यापारवाचित्वात् ओदनान्विततादृश-

---

[1] पृ. १६६
[2] पृ. ८-१७

व्यापारस्य यगाद्यसमभिव्याहृताख्याताप्रतिपाद्यत्वात् यगाद्यसमभिव्याहृताख्याता-प्रतिपाद्यधात्वर्थन्वितव्यापारवत्त्वरूपकर्तृत्वं निराबाधमेव।

'पाचयति' इत्यादौ तु पाकानुकूलव्यापारो णिजन्तार्थः। तदनुकूलव्यापार-श्चाख्यातार्थः, तदाश्रय एव कर्तेति। "स्वतन्त्रः कर्ता"[१] इति पाणिनिसूत्रमपि एतत्परतयैव व्याख्येयम् इति वदन्ति। तन्न। अचेतनेऽभियुक्तानां स्वरसतः कर्तृपदाप्रयोगात्।

यत्तु — कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वं कर्तृत्वम्। सत्यन्ताच्च छेद्यवृक्षादिसंयोगादिरूपव्यापारजनके कुठारादौ नातिव्याप्तिः। तस्य स्वभिन्नं यत् कर्तृकारकं तत्प्रयोज्यत्वेन सत्यन्तविरहात् इति।

तदपि न। ईश्वरप्रयोज्यानां संसारिणां तत्तत्क्रियास्वकर्तृत्वापत्तेः। अपि च अप्रयोज्यत्वं यदि फलानुकूलतज्जन्यव्यापारानाश्रयत्वं, तदा दण्डादिजन्यसंयोगादि-रूपव्यापाराश्रयत्वात् कुलालादावव्याप्तिः। अन्यच्च दुर्वचमिति।

अत्राहुः। अनुकूलकृतिमत्त्वं कर्तृत्वम्। न तु अनुकूलव्यापारवत्त्वम्। पाकानु-कूलव्यापारवत्त्वप्रतिसन्धाने सत्यपि काष्ठादौ स्वरसतः कर्तृपदाप्रयोगात्। अपि च कृताकृतविभागादिना कृधातोर्यत्नार्थकत्वं निश्चीयते। तथा हि ओदनसाधककृति-जन्ये कलायपाके मत्तो भूतं न तु मया कृतमिति व्यपदेशात् ओदनपाकः कृतः न तु कलायपाक इति विभागः कृताकृतविभागः। आदिना 'पचति' इत्यादौ 'पाकं करोति' इत्यादिविवरणपरिग्रहः। एवं च कृधातोर्यत्नार्थकत्वात् तृजन्तकर्तृपदस्य यत्नाश्रय एव स्वारसिकोऽर्थः। अचेतने कर्तृपदप्रयोगस्तु लाक्षणिकः।

यदि चान्यविषयककृतिजन्ये नान्तरीयके मत्तो भूतं न तु मया कृतमिति व्यप-देशान्न मुख्यं कर्तृत्वं तदा तत्तद्विषयकत्वेनापि कृतिर्विशेषणीया। तथा च स्वविषय-कत्वस्वजनकत्वोभयसंबन्धेन तत्तत्क्रियाविशिष्टकृतिमत्त्वं कर्तृत्वमिति फलितम्।

न चैवं तत्तत्क्रियाविषयककृतिमत्त्वमेव तत्तत्क्रियाकर्तृत्वमस्तु, किं तत्तत्क्रिया-जनकत्वनिवेशेनेति वाच्यम्। गुरुतरभारोत्तोलनादौ तद्विषयककृतिसत्त्वेऽपि उत्तो-लनादिक्रियाया अनिष्पत्तौ तत्र कर्तृपदप्रयोगवारणाय जनकत्वस्यापि निवेश-नीयत्वात्।

तद्विषयकत्वं च तन्निष्ठसाध्यताख्यविषयतानिरूपकत्वं विवक्षितम्। तेन भोजन-साध्यककृतेः सुखोद्देश्यकत्वेन सुखनिष्ठोद्देश्यताख्यविषयतानिरूपकत्वात् भोजन-

---

[१] सू. १.४.४

कर्तुः सुखकर्तृत्वापत्तिर्न। न चास्मदादिकर्तृकपाकस्य ईश्वरकृतिजन्यतया तद्विषयतया च ईश्वरकर्तृकत्वापत्तिः। इष्टापत्तेः। न चैवम् 'ईश्वरः पचति' इति प्रयोगापत्तिः। तथाविवक्षयामिष्टापत्तेः। एवं च "चैत्रेण पच्यते तण्डुल" इत्यादौ तृतीयायाः कृतिरर्थः। चैत्रवृत्तिकृतिजन्यतद्विषयपाकनिरूपितकर्मतावांस्तण्डुल इति बोधः।

जगदीशेन कर्तृत्वनिर्वचनम्[१]

जगदीशतर्कवागीशः शब्दशक्तिप्रकाशिकायां कर्तृत्वमेवं निर्वक्ति —

तिङा विकरणाक्तस्य धातोरर्थस्तु यादृशः।
स्वार्थे यादृशि बोध्यस्तत्कर्तृत्वं तदिहोच्यते।।

इति। विकरणाक्तस्य = विकरणसहितस्य यस्य धातोर्यादृशोर्थः = यद्धातूपस्थाप्यो योऽर्थः तदुत्तरतिङा स्वोपस्थाप्ये यादृशेऽर्थे बोध्यः = अनुभावयितुं शक्यः तादृशार्थ एव तद्धात्वर्थकर्तृत्वम् इति श्लोकार्थः। 'पचति' इत्यत्र पचधातूत्तरतिङा स्वोपस्थाप्यः कृतिरूपोऽर्थः धात्वर्थेन पाकेनान्विततया अनुभावयितुं शक्य इति पचधात्वर्थपाकनिरूपिता कृतिरेव पचधात्वर्थकर्तृत्वम्। 'जानाति' इत्यत्र ज्ञाननिरूपितकृतेरप्रसिद्ध्या तिङा ज्ञाधात्वर्थज्ञानान्विताश्रयत्वमेव बोधयितुं शक्यमिति ज्ञानाश्रयत्वमेव तत्र कर्तृत्वम्। 'नश्यति' इत्यादौ नाशप्रतियोगित्वं नाशकर्तृत्वम्। 'प्रतिबिम्बत' इत्यत्र भ्रमात्मकप्रतिबिम्बनिरूपितं प्रकारत्वं कर्तृत्वम्। एवं च विकरणसहितधातूपस्थाप्यार्थान्वययोग्यतादृशधातूपस्थाप्यार्थः तद्धात्वर्थकर्तृत्वमिति फलितम्। कर्तृशब्दः अवयववृत्तिलभ्ये कृत्याश्रये यौगिक एव, न तु शक्तः। प्रकारान्तरालभ्यस्यैव शक्यत्वात्। तृचा च निरूढलक्षणया शक्त्या वा आश्रयः प्रत्याय्यते।

'घटस्य कर्ता' इत्यत्र अनुकूलत्वं षष्ठ्यर्थः। तस्य कृधात्वर्थकृतावन्वयः। घटानुकूलकृत्याश्रय इति बोधः। घटाद्युपयोगानुकूलकृतिश्च न घटानुकूला, प्रमाणाभावात्। अतो न घटादिभोक्तुः घटादिकर्तृत्वप्रसङ्गः।

क्रियाश्रये कर्तृशब्दो रूढः। तेन रथादेः गमनाश्रयतया गमनादिकर्तृत्वं मुख्यमेवेति केचित्। तन्न। क्रियाशब्देन स्पन्दविवक्षायां चेतनस्य पाककर्तृत्वानुपपत्तेः, तण्डुलस्य पाककर्तृत्वापत्तेश्च। धात्वर्थमात्रविवक्षायामपि स एव दोषः। स्पन्दानुकूलव्यापारविवक्षायां चलनानुकूलव्यापारवतः कारकसामान्यस्य चलनकर्तृत्वापत्तेः।

---

[१] पृ. ३३७

'अत्ति' 'जुहोति' इत्यादौ लुप्तविकरणे अदादिधातूत्तरं लुप्तस्यैव विकरणस्य प्रतिसन्धाने भोजनकर्तृत्वादेरवगम इति मतेनेदम्।

तदप्रतिसन्धानेऽपि तदवगम इति मते तु आह —

यगन्तभिन्नधात्वर्थवत्तया योऽनुभाव्यते।
लटा स्वार्थः स धात्वर्थः कर्तृता वा निगद्यते।।

यगन्तभिन्नधातूपस्थाप्ययादृशार्थप्रकारकयदर्थधर्मिकान्वयबोधं प्रति लटः सामर्थ्यं स एवार्थः धातूपस्थाप्यतदर्थनिरूपितं कर्तृत्वमिति श्लोकार्थः। 'पचति' इत्यत्र पाकप्रकारककृतिधर्मिकबोधं प्रति लटः सामर्थ्यात् पाकानुकूला कृतिरेव पाककर्तृत्वम्। एवं 'जानाति' इत्यादावूह्यम्।

व्युत्पत्तिवादे कर्तृत्वनिर्वचनम्

व्युत्पत्तिवादे कर्तृत्वमेवं निरुक्तम् — गतिज्ञानोत्पत्त्यादिनिरूपितं कर्तृत्वं चाश्रयत्वमेव। गलाधस्संयोगानुकूलक्रियानुकूलव्यापाररूपभोजननिरूपितं कण्ठताल्वाद्यभिघातरूपपाठनिरूपितं च तदनुकूलकृतिमत्त्वं नाशनिरूपितं च प्रतियोगित्वम्। तस्य च निरूपकतासंबन्धेन धात्वर्थेऽन्वयः — इति द्वितीयाकारके[१]। तृतीयाकारकारम्भे च[२] —

कारकविभक्तितृतीयायाः क्रियान्वयि कर्तृत्वं करणत्वं चार्थः, "कर्तृकरणयोस्तृतीया"[३] इत्यनुशासनात्। कर्तृत्वं च मुख्यं क्रियानुकूला कृतिरेव। सा च कर्त्राख्यातस्थले "चैत्रः पचति" इत्यादौ क्रियाविशेष्यतया आख्यातेन प्रतिपाद्यते, चैत्रः पाकानुकूलकृतिमान् इति बोधः। कर्मभावाख्यातस्थले च "चैत्रेण पच्यते, शय्यते" इत्यादौ क्रियायां विशेषणतया तृतीयया कृतिः प्रत्याय्यते। चैत्रवृत्तिकृतिजन्यपाककर्म ओदन इति चैत्रवृत्तिकृतिजन्यं शयनम् इति च बोधः।

एतावता वैयाकरणमते 'चैत्रेण पच्यते ओदनः' इत्यत्र तृतीयायाः आश्रयोऽर्थः, तत्राभेदेन प्रकृत्यर्थस्य अन्वयः। आश्रयस्य धात्वर्थव्यापारेऽन्वयः चैत्राभिन्नाश्रयकः विक्लित्त्यनुकूलो व्यापार इति बोधः। नागेशमते तु तृतीयायाः कर्तृत्वशक्तिमान् अर्थः। अन्यत् पूर्ववत्। नैयायिकमते तत्र तृतीयायाः कृतिरर्थः। तत्राधेयतासंबन्धेन प्रकृत्यर्थस्य अन्वयः। कृतेः जन्यतासंबन्धेन धात्वर्थव्यापारेऽन्वयः। अख्यातस्य कर्मत्वमर्थः। तत्र निरूपितत्वसंबन्धेन धात्वर्थस्य कर्मत्वस्य चाश्रयतासंबन्धेन

---

[१] पृ. १४८
[२] पृ. २१०
[३] सू. २.३.१८

प्रथमान्तार्थे ओदनेऽन्वयः। तथा च चैत्रवृत्तिकृतिजन्यव्यापारनिरूपितकर्मतावान् ओदन इति बोधः।

यद्वा कृतिजन्यत्वं तृतीयार्थः। कृतौ प्रकृत्यर्थस्य आधेयतासंबन्धेनान्वयः। जन्यत्वस्य व्यापारेऽन्वयः। शेषं पूर्ववत्। अचेतनकाष्ठस्थल्यादेरपि कर्तृत्व-विवक्षया 'काष्ठं पचति' इत्यादिवत् काष्ठेन पच्यते इति प्रयोगात् तत्र व्यापाररूपे कर्तृत्वे तज्जन्यत्वरूपे तत्कर्तृकत्वे वा तृतीयायाः लक्षणा। काष्ठवृत्तिव्यापार-जन्यपाककर्म ओदन इति बोधः। एवं "चैत्रेण ज्ञायते इष्यते गम्यत" इत्यादा-वाश्रयत्वरूपे कर्तृत्वे आधेयत्वरूपे कर्तृमत्त्वे वा लक्षणा। चैत्रवृत्ति-आश्रय-तानिरूपकज्ञानविषयः, चैत्रनिरूपिताधेयताश्रयज्ञानविषय इति वा बोधः। 'नश्यते घटेन' इत्यादौ प्रतियोगित्वरूपे कर्तृत्वे, अनुयोगित्वरूपे कर्तृमत्त्वे वा लक्षणा। घटनिष्ठप्रतियोगितानिरूपको नाशः, घटनिरूपितानुयोगितावान् वा नाशः इति बोधः। व्यापारादिमति अचेतने कर्तृपदं भाक्तमेव। अचेतने स्वरसतः कर्तृपदा-प्रयोगात् अत एव कृञो यत्नवाचकत्वम्।

न च यत्नवत एव कर्तृपदार्थत्वे "कर्तृकरणयोस्तृतीया"[१] इत्यादौ कर्तृपदस्य मुख्यार्थत्यागे युक्तिविरहात् अचेतनकाष्ठादिवाचकपदप्रयोगे कर्त्रर्थकतृतीयादेरनुप-पत्तिरिति वाच्यम्। सूत्रस्थकर्तृपदानां "स्वतन्त्रः कर्ता"[२] इति सूत्रकृत्परिभाषित-कर्तृपरत्वात्। अन्यथा सूत्रप्रणयनवैयर्थ्यात्। संज्ञासूत्राणां विध्येकवाक्यतयान्वय-बोधकत्वात्।

स्वतन्त्रत्वं च कारकान्तरव्यापारानाधीनव्यापारवत्त्वे सति कारकत्वम्। वस्तुतः काष्ठादीनां पुरुषान्तरव्यापाराधीनव्यापारवत्त्वेऽपि अन्यव्यापारानधीनक्रियानुकूल-व्यापारवत्त्वरूपस्वातन्त्र्यस्य विवक्षया 'काष्ठं पचति' 'काष्ठेन पच्यत' इत्यादौ तृतीयादिः।

न च स्वातन्त्र्यस्याभावात् तद्बोधकविभक्तीनामप्रमाण्यं दुर्वारमिति वाच्यम्। समभिव्याहृततत्क्रियाकारकान्तरव्यापारानधीनतत्क्रियानुकूलव्यापारस्यैव तत्क्रिया-वाचकपदसमभिव्याहृतप्रत्यार्थत्वोपगमात्। तथा च 'काष्ठं पचति' इत्यादौ समभि-व्याहृतपाकक्रियाकारकान्तरं न चैत्रादिकम्। चैत्रादेस्तत्क्रियाजनकत्वेऽपि तद्बोधक-पदस्योक्तवाक्याघटकत्वात्। अतो न दोषः। व्यापारवत्त्वे सति कारकत्वमात्रोक्तौ अधिकरणस्य स्थाल्याः करणस्य काष्ठस्य च पाकानुकूलव्यापारवत्त्वे सति

---

[१] सू. २.३.१८
[२] सू. १.४.५४

कारकत्वस्य सत्त्वात् तयोरपि कर्तृत्वापत्तौ चैत्रः स्थाली काष्ठानि पचन्तीति प्रयोगापत्तिः। तद्वारणाय कारकान्तरव्यापारान्तरानधीनेति व्यापारविशेषणम्।

यत्र च "चैत्रः पचति, काष्ठं पचति" इत्यादौ समभिव्याहृतकारकान्तराप्रसिद्धिः तत्र अनधीनान्तविशेषणं न प्रतीयते। अतस्तदनुसारेण लकारादेः क्रियानुकूलव्यापारे स्वतन्त्रशक्त्यन्तरं कल्पनीयम्।

न च "मैत्रः चैत्रेण पाचयति" इत्यादौ प्रयोजककर्तृसमभिव्याहारस्थले कर्तरि तृतीयानुपपत्तिः कर्तृव्यापारस्य समभिव्याहृतहेतुकर्तृव्यापाराधीनत्वादिति वाच्यम्। तत्र ण्यन्तप्रतिपाद्यपाचनादिक्रियायामेव प्रयोजकस्य मैत्रस्य कारकतया चैत्रव्यापारस्य पचिक्रियाकारकान्तरव्यापारानधीनत्वात्। तत्र पाकक्रियायां कर्ता चैत्रः, न मैत्रः। तथा च पाकक्रियां प्रति यत् कारकान्तरं स्थाल्यादिकं तद्व्यापारानधीनपाकानुकूलव्यापारवत्त्वं चैत्रस्याक्षतमिति तस्य कर्तृत्वात् तृतीयायाः उपपत्तिः। पाकक्रियायां स्वतन्त्रकर्तुः चैत्रस्य प्रेरको यो मैत्रः स पाकानुकूलव्यापारानुकूलव्यापारवान् न पाकानुकूलव्यापारवान् इति स न पाकक्रियायां कारकः न वा कर्ता। प्रयोजकव्यापारस्य प्रयोज्यकर्तृव्यापारजन्यक्रियां प्रति अन्यथासिद्धत्वेन कारणत्वाभावात्।

अत एव णिच्प्रकृतिधातुप्रतिपाद्यक्रियायां णिजन्तप्रतिपाद्यक्रियाकर्तुः कारणत्वविरहादेव "चैत्रो मैत्रेण पाचयति" इत्यादौ 'चैत्रः पचति' इति न प्रयोगः।

न च "पञ्चभिः हलैः कर्षति गृही" इत्यादौ भूमिलेखनरूपकृष्यादिक्रियायां स्वतन्त्रकर्तॄन् हलवाहकान् प्रेरयितुः गृहिणो यो व्यापारः तस्य पूर्वोक्तान्यथासिद्धत्वयुक्त्या कर्तृकारकत्वरूपता नास्तीति लकारेणाभिधानासंभवात् कर्षतीति च स्यात् न स्यात् कर्षयतीति वाच्यम्। तत्र कृषधातोः प्रतिविधानार्थकत्वात्। प्रतिविधानं नाम भूमिलेखननिर्वाहकवेतनप्रदानादिरूपो व्यापारः। उक्तं च — "याजका यजन्तीति यजिः हविःप्रक्षेपार्थः। हलैः कृषतीति कृषिः प्रतिविधानार्थः" इति। देवतोद्देश्यकद्रव्यत्यागेच्छाविशेषरूपार्थे यजेः मुख्यरूपतया तत्र च यजमानस्यैव कर्तृतया हविःप्रक्षेपरूपलक्ष्यार्थपरत्वं दर्शितम्। हविःप्रक्षेपे च ऋत्विजामेव कर्तृत्वम्।

इदं त्ववदेयम्। यद्यपि स्वतन्त्रव्यापारे एव तृतीयादेरनुशासनम्। तथापि लाघवात् कृतिरूपे एव कर्तृत्वे तृतीयादेः शक्तिः। अचेतनव्यापारे निरूढलक्षणैव। अनुशासनस्यानादितात्पर्यमात्रग्राहकत्वात्। लाघवसहकृतस्यैव तादृशतात्पर्यस्य शक्तिकल्पकत्वात् व्यापारे तात्पर्यसत्त्वेऽपि गौरवेण शक्त्यसिद्धेः। तथा चानादि-

तात्पर्यं प्रकृते निरूढलक्षणायामुपयुज्यते। गौरवं च कृतित्वजातेः शक्यतावच्छेदकत्वापेक्षया जन्यत्वघटितव्यापारत्वस्य शरीरकृतमित्यनुसन्धेयम्।

न च कृत्यादिसाधारणस्य व्यापारत्वस्य जातित्वोपगमेन तस्य तृतीयाशक्यतावच्छेदकत्वोपगमे गौरवाभाव इति वाच्यम्। गुणत्वाभावाधिकरणे क्रियायां व्यापारत्वस्य व्यापारत्वाभावाधिकरणे रूपादौ गुणत्वस्य च सत्त्वेन यत्ने चोभयोः सत्त्वात् गुणत्वेन सांकर्यात् व्यापारत्वस्य जातित्वासंभवात्।

नन्वेवमचेतनकर्तृस्थले व्यापार एव कर्तृप्रत्ययार्थो वक्तव्यः। तस्य च काष्ठादावबाधितत्वात् 'चैत्रकाष्ठस्थाल्यः पचन्ति' इति प्रयोगापत्तिरिति चेत् — न। तादृशस्थले न केवलव्यापारे लक्षणा, किं तु समभिव्याहृतक्रियाकारकान्तरव्यापारानधीनतत्क्रियानुकूलव्यापारे लक्षणेति स्वीकारेणोक्तप्रयोगवारणात्। अन्यथा कृतौ शक्तिस्वीकारेऽपि लक्षणायाम् 'चैत्रकाष्ठस्थाल्यः पचन्ति' इति प्रयोगप्रसङ्गात् निरुक्ते विशिष्टव्यापारे एव लक्षणायाः स्वीकार्यत्वात्।

"घटो जायते, ओदनः सिध्यति" इत्यादौ सत्कार्यवादविद्वेषिणां नैयायिकानां मते घटादेः कारकत्वं कर्तृत्वं च यथाश्रुतसूत्रानुसारेण दुरुपपादम् इति भट्टाचार्याः। अयं तेषामाशयः — सत्कार्यवादिनां सांख्यानां मते दण्डचक्रादिना घटादेरभिव्यक्तिरेव, न तु आद्यक्षणसंबन्धरूपा उत्पत्तिः। तथा च तन्मतेऽभिव्यक्तिरूपो यो धात्वर्थः तदनुकूलस्थितिरूपव्यापारस्य पूर्वसिद्धानाविर्भूतघटादौ सत्त्वात् न घटो भवति जायत इत्यादेरनुपपत्तिः। आरम्भवादिनां नैयायिकानां मते घटादेः उत्पत्तेः पूर्वमसत्त्वेन उत्पत्तिक्रियां प्रति जनकत्वाभावात् कारकत्वासंभवः, स्वतन्त्रः कर्तेति यथाश्रुतसूत्रनुसारेण कर्तृत्वासंभवश्च। एतत्सूत्रेण समभिव्याहृतक्रियाकारकान्तरव्यापारानधीनव्यापाराश्रयत्वस्यैव कर्तृत्वरूपताबोधनेन घटस्यैवासत्त्वे तस्मिन् व्यापाराश्रयत्वासंभवादिति।

मुख्यं च क्रियाकर्तृत्वं न क्रियानुकूलकृतिमात्रम्। एकक्रियाविषयककृतितो यत्र नान्तरीयकक्रियान्तरनिष्पत्तिः तत्र तत्कृतिमतः एकक्रियाविषयककृतिमतः नान्तरीयकक्रियाकर्तृत्वाभावात्। अत एव तत्र मत्तो भूतं न तु मया कृतमिति व्यपदेशः इति। किं तु तत्क्रियानुकूलत्वे सति तत्क्रियाविषयिका या कृतिः सैव तत्कर्तृत्वम्।

एवं च "चैत्रः पचति" इत्यादौ विषयिताघटितकर्तृत्वबोधाय यथा कृतौ पाकादेः उपधायकत्वविषयित्वोभयसंबन्धेनान्वयः। पाकोपधायकपाकविषयककृतिमांश्चैत्र इति बोधः।

विषयितायाः संबन्धत्वेऽपि उपधायकत्वनिवेश आवश्यकः। अन्यथा पाकाद्य-निष्पत्तिस्थले 'पचति' 'पश्यति' इत्यादिप्रयोगस्य प्रामाण्यापत्तेः। तथा 'चैत्रेण पच्यत' इत्यादावपि जन्यत्वविषयत्वोभयसंबन्धेन तृतीयार्थकृतेः पाकादौ धात्वर्थेऽन्वयः। चैत्रवृत्तिकृतिजन्यः तादृशकृतिविषयश्च पाक इति बोधः। कृतिजन्यत्वस्य तृतीयार्थत्वे तु तस्य स्वाश्रयत्वस्वनिरूपक(कृति)विषयत्वोभयसंबन्धेन धात्वर्थे अन्वयः। चैत्रवृत्तिकृतिजन्यः तादृशकृतिविषयश्च पाक इति बोधः। यद्वा कृति-विषयत्वं तृतीयार्थः। तस्य स्वाश्रयत्वस्वनिरूपकजन्यत्वोभयसंबन्धेन धात्वर्थेऽन्वयः।

कृतेः तृतीयार्थत्वे "चैत्रेण पच्यते न मैत्रेण" इत्यादौ तृतीयान्तार्थमैत्रवृत्ति-कृतेरभावः पाकेऽन्वेतीत्यभ्युपेयम्। तस्याश्च समवायसंबन्धावच्छिन्नाभावः मैत्र-कर्तृकपाकेऽपि इति मैत्रेण न पच्यत इति प्रयोगप्रसङ्गः। जन्यतायाश्च वृत्त्य-नियामकतया तत्संबन्धावच्छिन्नाभावाप्रसिद्ध्या सोऽपि पाके बोधयितुमशक्यः। मैत्रवृत्तिकृतिजन्यपाककर्मत्वाभावस्य कर्मणि तण्डुलादौ बोधश्च कर्मवाचक-पदासमभिव्याहारस्थले दुर्घटः। न च तत्र कर्मवाचकपदाध्याहारेण तद्बोधनिर्वाह इति वाच्यम्। एवमपि यत्कर्तृकपाकक्रियायाः अप्रसिद्धिः तृतीयान्ततद्बोधक-पदसमभिव्याहृतनञ्पदस्थले तत्कर्तृकपाककर्मत्वाभावान्वयबुद्धेर्दुर्घटत्वात्।

अतः कृतिजन्यत्वस्य तृतीयार्थत्वमुपगम्य नञ्स्थले स्वरूपसंबन्धावच्छिन्न-तदभाव एव बोधनीय इति नञोऽसत्त्वेऽपि तृतीयायाः कृतिजन्यत्वमर्थः तस्य स्वरूपसंबन्धेन धात्वर्थेऽन्वय इत्येव युक्तमिति भट्टाचार्याणां निर्णयः।

तृतीयार्थविषये मतान्तरम्, तस्य दूषणं च

केचित् नैयायिकैकदेशिनः क्रियानुकूलकृतिमत्वं मुख्यं कर्तृत्वमित्युप-गच्छन्तोऽपि तृतीयायाः न कृतिः कृतिजन्यत्वं वा अर्थः, अपि तु आधेयत्वमिति वदन्ति तन्मतमनूद्य भट्टाचार्यैः दूषितम्। तथा हि —

"चैत्रेण पच्यते ओदनः" इत्यादौ अख्यातार्थ एव कृतिः। तदन्वयि आधेयत्वं तृतीयाविभक्त्यर्थः। कृतेश्च जन्यतासंबन्धेन धात्वर्थेऽन्वयः। धात्वर्थस्य पाकस्य अपरस्मिन्नाख्यातार्थे कर्मत्वे निरूपितत्वसंबन्धेनान्वयः। कर्मत्वस्य प्रथमान्तार्थे ओदने अन्वयः। चैत्रनिरूपिताधेयत्वाश्रयकृतिजन्यपाकनिरूपितकर्मतावान् ओदनः इत्यन्वयबोधः। क्रियाविशेषणतया कृतिबोधने आत्मनेपदरूपाख्यातस्य यगादि-समभिव्याहारज्ञानमपेक्षितम्। अतः 'पचति' 'पचते' इत्यादौ धात्वर्थविशेषणतया

न कृतेः बोधः। 'चैत्रेण ज्ञायते गम्यते' इत्यादौ तृतीयाया आधेयतार्थकत्वं क्लृप्तमेवेति न तत्कल्पनमधिकम् इति केचिदाहुः।

तन्न। 'चैत्रेण पक्कम्' इत्यादौ तृतीयायाः कृत्यर्थकताया आवश्यकत्वात्। तत्र कृत्यर्थकाख्यातविरहेण कृत्प्रत्ययस्य कर्तृकर्मवाचकत्वेन कृत्यर्थकत्वाभावात्।

यदि च कर्तृकृतः कृतावेव शक्तिः न तु कृतिविशिष्टे। ज्ञातेत्यादौ आश्रयार्थकतायाः क्लृप्तत्वेन आश्रये कृत्यन्वयादेव चैत्रः पक्तेत्यादौ कर्तृलाभसंभवात् इत्युच्यते, तथापि कर्मकृतः कृत्यर्थकत्वमप्रसक्तमेव। कृत्प्रत्ययस्य "पक्ता" इत्यादौ क्वचित् कर्तृबोधकत्वेऽपि "चैत्रेण ओदनः पाच्यः, दुष्पचश्चैत्रेणौदनः, चैत्रेण ओदनस्य पाकः" इत्यादौ कृतां न कृतिबोधकत्वमिति तत्र चैत्रवृत्तिकृतिजन्यपाककर्म ओदनः इत्यादिरूपेण कृतिविषयकबोधानुसारेण तृतीयायाः कृतिवाचकत्वमावश्यकमेव। एवं च "चैत्रेण पच्यत" इत्यादावपि तृतीययैव कृतिर्बोध्यते। तत्र प्रकृत्यर्थस्य चैत्रादेः संबन्ध एवाधेयत्वम् इत्यत एव निर्वाहे कृतौ विशेषणतया आधेयताभानोपगमस्यानुचितत्वात्। तथा सति आधेयत्वस्य यः संबन्धः तस्यापि शाब्दबोधविषयत्वं कल्पनीयमिति गौरवम्। तथा तादृशवाक्यज्ञानघटितशाब्दसामग्र्यां तृतीयाजन्यायाः आधेयत्वोपस्थितेः अधिकायाः कारणत्वं कल्पनीयमिति च गौरवम्।

पदवाक्यरत्नाकरे[1] तृतीयार्थकर्तृत्वनिरूपणम्

"चैत्रेण सूपः पच्यत" इत्यत्र विक्लित्त्यनुकूलः प्रयत्नः पचेरर्थः। आश्रयस्तृतीयायाः आश्रये तादात्म्येन चैत्रः अन्वेति। आश्रयः समवेतत्वेन प्रयत्नेऽन्वेति। प्रयत्न एव च प्रधानम् (मुख्यविशेष्यः)। तत्रैव सूपाभिन्नाश्रयकं विक्लित्तिरूपं फलं जनकत्वसंबन्धेनान्वेति। "स्वतन्त्रः कर्ता"[2] "कर्तृकरणयोस्तृतीया"[3] इति सूत्राभ्यां तृतीयाया आश्रयवाचकत्वानुशासनात्। स्वतन्त्रो हि धातूपात्तव्यापाराश्रयः। तथा च तद्धातूपात्तव्यापाराश्रयबोधिका तद्धातुसाकाङ्क्षा तृतीयेति सूत्रयोरेकवाक्यतया अर्थः। तत्र धातूपात्तत्वस्य शाब्दबोधाविषयत्वात् व्यापारस्य च धातुनैव लाभात् अनन्यलभ्ये आश्रये तृतीयायाः शक्तिः पर्यवस्यतीति वैयाकरणाः।

आश्रयांशस्यापि तृतीयाप्रकृतिलभ्यत्वात् अनन्यलभ्यतरमाश्रयत्वमाधेयत्वं वा, प्रयत्नस्य च धात्वर्थत्वाभावे प्रयत्न एव वा तृतीयार्थः। "पचति, पाकं करोति"

---

[1] पृ. ६३८

[2] सू. १.४.५४

[3] सू. २.३.१८

इत्यादौ धात्वर्थबहिर्भावेन कृतेर्निवेशः। आश्रयस्य आश्रयत्वेन अनन्यलभ्यत्वेऽपि चैत्रत्वादिना अन्यलभ्यत्वात् आश्रयत्वाधेयत्वयोश्च न केनापि रूपेणान्यलभ्यत्वमिति सूचनाय तरप्रत्ययोपादानमिति तार्किकाः।

तत्र तार्किमतानुसारेण तृतीया विव्रियते —

प्रयत्नवृत्तिविषयिप्रकारिप्रतियोगिताः।
तत्तद्धातुव्यपेक्षिण्या प्रतीयन्ते तृतीयया।।

"चैत्रेण गम्यते उच्यते" इत्यादौ प्रयत्नस्तृतीयार्थः। स च समवायसंबन्धेन चैत्रविशेषितः साध्यत्वाख्यविषयतया गमने वचने च विशेषणम्। चैत्रसमवेतप्रयत्नसाध्यगमनकर्म ग्रामः, चैत्रसमवेतप्रयत्नसाध्यवचनकर्म वाक्यम् इति बोधः। "रथेन गम्यते" इत्यादौ वृत्तिः = आधेयत्वं तृतीयार्थः। रथनिरूपिताधेयत्वाश्रयगमनकर्म इति बोधः। "मोदकेन स्वद्यते रुच्यते सौन्दर्येण प्रतिभायते प्रकाश्यत" इत्यादौ विषयित्वं विषयत्वं वा तृतीयार्थः। इमे भावलकाराः। तत्र स्वदरुचधात्वोः इच्छा अर्थः। प्रतिभातिप्रकाशत्योः ज्ञानमर्थः। मोदकनिरूपितविषयित्वाश्रयः इच्छा, मोदकनिष्ठविषयतानिरूपिकेच्छा इति वा आद्ययोः बोधः। सौन्दर्यनिरूपितविषयिताश्रयः ज्ञानं, सौन्दर्यनिष्ठविषयतानिरूपकं ज्ञानमिति वा द्वितीययोः बोधः। मुखेन प्रतिबिम्ब्यते इत्यत्र प्रकारित्वं प्रकारत्वं वा तृतीयार्थः। प्रतिपूर्वकबिम्बधातोः प्रतिहतचक्षुर्जनितभ्रमोऽर्थः। मुखप्रकारकः प्रतिहतचक्षुर्जनितो भ्रम इति बोधः। "प्रतिघाताख्यसंयोगविशिष्टं यत् चक्षुः तत्संयोगप्रयोज्यभ्रमः धात्वर्थ इति यावत्। प्रतिघातश्च देशान्तरसंयोगजनकक्रियाजनकः, मार्गसंयोगत्वेन गन्तव्यसंयोगप्रयोजकश्च संयोगः। आद्यो यथा मुखचक्षुस्संयोगजनिकायाः चक्षुर्निष्ठपरावर्तनरूपायाः क्रियायाः जनको दर्पणमुखसंयोगः। द्वितीयो यथा — स्फटिकाधः स्थितेन पद्मरागेण चक्षुस्संयोगप्रयोजकः स्फटिकचक्षुस्संयोगः। अत्र तन्तुचक्षुस्संयोगाधीनपटचक्षुस्संयोगजन्यपटचाक्षुषस्य प्रतिबिम्बत्ववारणाय भ्रमपदम्। तादृशो भ्रमश्च मुखवानादर्श इत्याकारकः। तत्र मुखस्य प्रकारतया प्रकारप्रकारिभावस्य तृतीयार्थता" इति व्याख्याने। तत्र विषयविषयिभावस्य तृतीयार्थत्वे मुखेन प्रतिबिम्ब्यते इतिवत् आदर्शेन प्रतिबिम्ब्यत इत्यपि प्रयोगः प्रामाणिकः स्यात्। उक्तभ्रमे आदर्शस्य विशेष्यतया विषयत्वात्। "घटेन नश्यते" इत्यत्र प्रतियोगित्वमनुयोगित्वं वा तृतीयार्थः। घटप्रतियोगिको नाश इति बोधः।

अत्र प्रयत्नत्वं जातिः तृतीयाशक्यतावच्छेदकं लाघवात्। अन्यत्र व्यापारादौ लक्षणा। यदि चाधेयतात्वादिकमखण्डं तदा तद्विशिष्टेऽपि शक्तिरेवेति।

विभक्त्यर्थनिर्णये[१] तृतीयार्थकर्तृत्वनिरूपणम्

"कर्तृकरणयोस्तृतीया".[२] इति सूत्रानुसारेण तृतीयार्थविचारः। टा भ्यां भिस् इति त्रयः प्रत्ययाः तृतीया। "सुमनसा स्तूयते" इत्यादौ श्रूयमाणस्य आकारस्य आत्वेन भ्यामित्यस्य भ्यांत्वेन भिसो भिस्त्वेन वाचकत्वम्। टकारोऽनुबन्धः क्वचिदप्यश्रूयमाणत्वान्न वाचकताकुक्षिप्रविष्टः।

अनुशासनसिद्धः तृतीयार्थः। अनुशासनं च "कर्तृकरणयोस्तृतीया"[३] इति। तत्र कर्ता करणं च, अथ वा कर्तृत्वं करणत्वं च तृतीयार्थ इति वक्ष्यते। अत्रापि अनभिहिते इत्यधिकारः। तेन "पचति" इत्यत्र तिङा कर्तृत्वस्य "पक्ता" इत्यत्र कृता, "पक्वपूर्वी" इत्यत्र तद्धितेन, "पक्वौदन" इत्यत्र समासेन कर्तुरभिधानेन न तृतीया। एवम् "अक्षा दीव्यन्त" इत्यत्र कर्माख्यातेन फलतः करणत्वस्याभिधानेन, "पचनं काष्ठम्" इत्यत्र कृता, "स्नानीयं चूर्णम्" इत्यत्र तद्धितेन, "पक्वौदनं काष्ठम्" इत्यत्र समासेन करणस्याभिधानेन न तृतीया।

कर्तृत्वनिर्वचनम्

कर्तृपदसंकेतग्राहकमनुशासनं "स्वतन्त्रः कर्ता"[४] इति। स्वातन्त्र्यं च कारकान्तरानपेक्षया क्रियासंबन्धवत्त्वम्। कारकान्तराणां कर्तृसापेक्षतयैव क्रियासंबन्धित्वम्, कर्तृघटितमूर्तिकत्वात्। अत एव "समस्तकारकोपहितं रूपं कर्तुः" इत्यात्मतत्त्वविवेके उक्तम्। उपहितं व्यापकम् इति तत्रैव विवरणम्। अपादानादीनां लक्षणं कर्तृघटितं विवृतं दीधितिकृद्भिः। क्रिया क्वापि न कर्तृविनाकृतेति कारकान्तराणां कर्तृसापेक्षत्वनियमः। कर्तुश्चापादानादिविनाकृताया अपि क्रियायाः संबन्ध इति न कारकान्तरापेक्षानियमः।

यद्यपि "जानाति" इत्यादावपादानं विना "स्पन्दत" इत्यादौ कर्म विना दर्शितोभयस्थले संप्रदानं विनापि क्रियाया दर्शनात् नापादानसंप्रदानकर्मभिः सापेक्षत्वनियमः। करणाधिकरणयोस्तु सकलक्रियानियतत्वात् कथं न तत्सापेक्षत्वम्;

तथापि करणस्य कर्तृव्यापार्यतया कर्तृसापेक्षत्वेनैव क्रियायां संबन्धः, न तु कर्तुः करणसापेक्षतया तत्र संबन्धः, करणाव्यापार्यत्वात्। अधिकरणस्य कर्तृकर्मान्यतरद्वारकक्रियाधारत्वेनैव कारकान्तरसापेक्षतया क्रियायां संबन्धः, न तु कर्तुस्तथा; साक्षात् संबन्धात्।

---

[१] पृ. १९४

[२] सू. २.३.१८

[३] सू. २.३.१८

[४] सू. १.४.५४

यद्वा यः प्रधानीभूतो धात्वर्थः तदन्विततिङर्थो वा व्यापारः तद्वत्त्वं स्वातन्त्र्यमिति टीकाकृदभिमतमिति प्रागेवोक्तम्। सर्वमेतत् बालोपलालनम्, न तु तृतीयार्थोपवर्णनम्, दर्शितस्वातन्त्र्यस्य तृतीयया कुत्रापि अप्रत्यायनात्।

शाब्दिकमतम्

अत्र शाब्दिकाः — "चैत्रेण पच्यते तण्डुल" इत्यत्र विक्लित्तिः प्रयत्नस्वरूपो व्यापारश्च पचेरर्थः। आश्रयः तृतीयार्थः। आश्रये तादात्म्येन चैत्रः, आश्रयः समवेतत्वेन प्रयत्ने व्यापारेऽन्वेति। व्यापारे प्रधाने तण्डुलाभिन्नाश्रयिका विक्लित्तिरन्वेति। तत्र धातूपात्तव्यापाराश्रयः स्वतन्त्रः। धातूपात्तत्वं न शाब्दबोधविषयः। व्यापारो धातुलभ्य एव। अनन्यलभ्यतया आश्रयमात्रं तृतीयार्थ इति वदन्ति। एतन्मते चैत्राभिन्नाश्रयकः तण्डुलाभिन्नाश्रयकविक्लित्त्यनुकूलो व्यापार इति चैत्रेण पच्यते तण्डुल इति वाक्यात् बोधः।

तार्किकमतम्

तदत्राप्याश्रयत्वस्याखण्डस्याभावेन आश्रयस्य गौरवान्न शक्यत्वमिति द्वितीयार्थनिरूपणावसरे आवेदितम्। किं तु आश्रयत्वमाधेयत्वं वा लाघवात् तृतीयार्थः। यदि च "चैत्रेण पच्यत" इत्यादौ पचिना फूत्कारादिव्यापार एव प्रत्याय्यते, तदा आख्यातस्येव लाघवात् प्रयत्न एव तृतीयायाः शक्य इति तार्किकाः।

"चैत्रेण पच्यत" इत्यादौ पचिना फूत्कारादिव्यापार एव प्रत्याय्यते। प्रयत्नस्तृतीयार्थः। स च समवेतत्त्वेन चैत्रविशेषितः जन्यतया धात्वर्थव्यापारेऽन्वेति। चैत्रसमवेतप्रयत्नजन्यव्यापारजन्यविक्लित्याश्रयः तण्डुल इति बोधः।

"चैत्रेण गम्यते स्पन्द्यत" इत्यादौ प्रयत्नः तृतीयार्थः। स च समवेतत्वेन चैत्रविशेषितः साध्यतया गमनादौ विशेषणीभूयान्वेति।

"रथेन गम्यते, चैत्रेण ज्ञायते" इत्यादौ तृतीयायाः आधेयत्वमर्थः। तच्च निरूपितत्वेन संबन्धेन प्रकृत्यर्थविशेषितं स्वरूपसंबन्धेन धात्वर्थविशेषणतयान्वेति। रथवृत्तिगमनकर्म, चैत्रवृत्तिज्ञानविषयः इति बोधः।

"शोभया प्रतिभायते प्रकाश्यते वा, मोदकेन स्वद्यते रुच्यते वा" इत्यादौ विषयत्वं तृतीयार्थः। तच्चाधेयत्वसंबन्धेन प्रकृत्यर्थविशेषितं प्रतियोगितासंसर्गेण (निरूपकतासंसर्गेण) धात्वर्थे ज्ञाने इच्छायां च विशेषणतयान्वेति। ज्ञानमात्रार्थकयोः प्रतिभातिप्रकाशत्योः इच्छामात्रार्थकयोः स्वदतिरोचत्योः विषयत्वार्थककर्तृ-

प्रत्ययेनैव सह साकाङ्क्षत्वात्। शोभानिष्ठविषयतानिरूपकं ज्ञानम्, मोदकनिष्ठविषयतानिरूपिका इच्छेति च बोधः।

"प्रतिबिम्ब्यत" इत्यादौ प्रतिबिम्बो धात्वर्थः। स च स्वविषयासंबद्धवृत्तिचक्षुस्संयोगप्रयोज्यचक्षुस्संयोगजन्यचाक्षुषप्रत्यक्षम्। तादृशचक्षुस्संयोगः क्वचित् प्रतीघाततया प्रयोजकः। प्रतिघातस्तु देशान्तरसंयोगजनिकायाः क्रियायाः जनकः संयोगः। यथा मुखचक्षुस्संयोगजनकक्रियाजनकः दर्पणचक्षुस्संयोगः। क्वचिन्मार्गसंयोगतया गन्तव्यसंयोगप्रयोजकः। यथा स्फटिकाधः स्थितपद्मरागचक्षुस्संयोगप्रयोजकः स्फटिकचक्षुस्संयोगः।

एतेन प्रतिहतचक्षुस्संयोगजन्यत्वमात्रं न चाक्षुषविशेषणमिति तत्र तन्तुचक्षुस्संयोगाधीनपटचक्षुस्संयोगजन्यपटचाक्षुषव्युदासाय स्वविषयासंबद्धवृत्तित्वं प्रथमचक्षुस्संयोगे विशेषणम्। स्वविषयासंबद्धस्तु स्वविषयसंबन्धित्वावच्छिन्नप्रतियोगिताकान्योन्याभाववान् बोध्यः। तेन तन्तुषु तत्तत्तन्तुभेदसत्त्वेऽपि न क्षतिः। ईदृशं चाक्षुषं आदर्शाद्यविषयकमिदं मुखमित्याकारकमपि प्रतिबिम्ब एव। ईदृशमेव मुखावगाहिज्ञानं प्रथमतो जायते। तत एव 'आदर्शे मुखम्' इति 'मुखवानादर्श' इति विशिष्टवैशिष्ट्यावगाहिज्ञानसंभवात्। प्राथमिकज्ञानं प्रतिबिम्बः। तद्विषयत्वम् आख्यातार्थः मुखे एव न त्वादर्शे। अत एव 'मुखं प्रतिबिम्बते न तु दर्पण' इति प्रयोगोपपत्तिः।

यदि चादर्शज्ञानं विनापि दर्शितविशिष्टवैशिष्ट्यबोधयोरसम्भव एवेति प्राथमिकज्ञानेऽप्यादर्शो विषय एवेति 'इदं मुखम् अयमादर्शश्च' इति समूहालम्बनचाक्षुषमेव प्रथमतो जायते। तत्कथमुक्तप्रयोगोपपत्तिरिति विभाव्यते,

तदा स्वविषयेत्यत्र स्वविषययत्किंचिद्व्यक्त्यसंबन्धित्वं वक्तव्यम्। तेनादर्शस्य स्वविषयत्वेऽपि तद्वृत्तिचक्षुस्संयोगस्य प्रयोजकत्वे मुखप्रतिबिम्बस्य न तथात्वहानिः।

एवं 'प्रतिबिम्बत' इत्यत्र प्रयोजकचक्षुस्संयोगसंबन्धिवृत्तिभिन्नविषयत्वमाख्यातार्थो वाच्यः। तत एव दर्शितप्रयोगोपपत्तिः। आदर्शादर्शत्वादिविषयतानां तादृशभिन्नत्वाभावात्।

एवं "मुखं प्रतिबिम्बते" इत्यत्र तिङर्थविषयत्वं तादृशभेदेन विशिष्टमुपलक्षितं वेत्यन्यदेतत्। एवं धात्वर्थचाक्षुषमपि तादृशचक्षुस्संयोगजन्यत्वेन विशिष्टमुपलक्षितं वेत्यन्यदेतत्। उपलक्षणतापक्षेऽपि विषयत्वत्वेन चाक्षुषत्वेन तादृशी व्यक्तिः प्रतीयत इति नातिप्रसङ्गः।

"बुद्धौ चैतन्यं प्रतिबिम्बते" इत्यत्र प्रतिबिम्बो भ्रमो धात्वर्थः। प्रकारत्वं तु तिङर्थः। बुद्धिपदोत्तरसप्तमी तु बुद्धिगतं प्रयोजकव्यापारं स्वच्छत्वमभिधत्ते। तस्य प्रयोजकतासंबन्धेन धात्वर्थभ्रमेऽन्वयः। एवं च बुद्धिस्वच्छत्वप्रयोज्यभ्रमप्रकारश्चैतन्यमिति शाब्दबोधः। यथा च व्यापारः सप्तम्यर्थः तथा सप्तमीविवरणे वक्ष्यते।

एवं "मुखेन प्रतिबिम्ब्यते" इत्यत्र प्रयोजकचक्षुस्संयोगसंबन्धे वृत्तिभिन्नविषयत्वं तिङ इव तृतीयाया अर्थः। तस्य प्रतिबिम्बे तथाविधचाक्षुषे धात्वर्थे विशेषणतया प्रतियोगितासंसर्गेणान्वयः। एवं च मुखविषयताप्रतियोगितथाविधचाक्षुषमित्यन्वयबोधः।

"चैतन्येन प्रतिबिम्ब्यते" इत्यत्र प्रकारत्वं तृतीयार्थः। तस्य प्रतियोगितासंसर्गेण धात्वर्थभ्रमे विशेषणतयान्वयः। एवं च चैतन्यनिष्ठप्रकारताप्रतियोगी भ्रम इति बोधः।

"घटेन नश्यत" इत्यत्र "घटो नश्यति" इत्यादौ तिङ इव तृतीयायाः प्रतियोगित्वमर्थः। तस्य निरूपितानुयोगितासंबन्धेन धात्वर्थे नाशेऽन्वयः। एवं च घटनिष्ठप्रतियोगितानिरूपितानुयोगितावान् नाश इत्यन्वयबोधः।

"वह्निना दीप्यत" इत्यत्र भास्वररूपं भास्वररूपवत्तेजस्संयोगनियतावयवसंयोगो वा दीप्यतेरर्थः। "मणिना दीप्यत" इत्यत्र भास्वररूपवत्तेजस्संयोगनियतावयवसंयोगो दीप्यतेरर्थः। तदन्वयि समवायावच्छिन्नं समवायघटितसामानाधिकरण्यावच्छिन्नमाधेयत्वं वा तृतीयार्थः।

"चैत्रेण शय्यत" इत्यत्र अधः स्वावयवावच्छिन्नसंयोगानुकूलव्यापारः शयतेरर्थः। तदनुकूलप्रयत्नः तृतीयार्थः। यदि च तादृशसंयोग एव शयतेरर्थः न तु व्यापारोऽपि। अत एव व्यापारे नष्टेऽपि तादृशसंयोगे विद्यमाने 'शय्यत' इति लट्प्रयोगः तदा तथाविधमाधेयत्वं तृतीयार्थः। आधेयत्वेनाधेयत्वस्य शक्यत्वेऽपि संसर्गविशेषावच्छिन्नाधेयत्वीयस्वरूपसंसर्गेण धात्वर्थेऽन्वयोपगमान्नानुपपत्तिः।

अत्र प्रयत्नत्वस्य जातितया तद्विशिष्टे तृतीयायाः शक्तिः। आधेयत्वादौ लक्षणा। यदि च आधेयत्वत्वविषयत्वत्वप्रकारत्वत्वप्रतियोगित्वत्वान्यखण्डोपाधयः तदा तत्तद्विशिष्टेऽपि तृतीयायाः शक्तिरेव।

"नृपेण गम्यते गमितो वा दिगन्तं शत्रुः" इत्यत्र तृतीयार्थः प्रयाणादिव्यापारः नृपविशेषितः प्रयोज्यतासंसर्गेण शत्रुकर्तृकगमनेऽन्वेति। (नृपवृत्तिव्यापारप्रयोज्यदिगन्तकर्मकगमनानुकूलकृतिमान् शत्रुः इति बोधः।)

"आचार्येण बोध्यते बोधितो वा धर्मं माणवकः" इत्यत्र तृतीयार्थोऽध्यापनादिव्यापारः आचार्यादिविशेषितः माणवककर्तृकबोधे प्रयोज्यतयान्वेति। (आचार्यवृत्तिव्यापारप्रयोज्यधर्मविषयबोधाश्रयो माणवक इत्यन्वयबोधः)

"यजमानेन भोज्यते भोजितो वा पायसं ब्राह्मणः" इत्यत्र तृतीयार्थः निमन्त्रणादिव्यापारः यजमानविशेषितः ब्राह्मणकर्तृकभोजने प्रयोज्यतयान्वेति। यजमानवृत्तिव्यापारप्रयोज्यपायसकर्मकभोजनकर्ता ब्राह्मणः।

"गुरुणा व्याहार्यते व्याहारितो वा ब्रह्मैष" इत्यत्र तृतीयार्थः शिक्षणादिव्यापारः गुरुविशेषितः एतत्कर्तृकव्याहारे प्रयोज्यतयान्वेति। गुरुवृत्तिव्यापारप्रयोज्यब्रह्मकर्मकव्याहारकर्ता एषः।

"गुरुणा श्राव्यते श्रावितो वा धर्मं शिष्यः" इत्यत्र तृतीयार्थो वाक्यादिव्यापारः गुरुविशेषितः शिष्यकर्तृकशाब्दबोधे प्रयोज्यतयान्वेति। गुरुवृत्तिव्यापारप्रयोज्यधर्मविषयकशाब्दबोधाश्रयः शिष्यः।

"गृहस्थेन मासमास्यते आसितो वा अतिथिः" इत्यत्र शयनासनभोजनादिदानव्यापारः गृहस्थविशेषितः अतिथिकर्तृकासने प्रयोज्यतयान्वेति। गृहस्थवृत्तिव्यापारप्रयोज्यासनकर्ता अतिथिः।

"मुद्गरेण नाश्यते घट" इत्यत्र तृतीयार्थोभिघातव्यापारः मुद्गरविशेषितः घटप्रतियोगिनाशे प्रयोज्यतयान्वेति। मुद्गरवृत्तिव्यापारप्रयोज्यनाशप्रतियोगी घटः।

यदि च प्रयाणादिव्यापारो णिजर्थ एव, स कथं तृतीयार्थः, अन्यलभ्यत्वादिति विभाव्यते तदा प्रयत्नः आधेयत्वादिकं च तृतीयार्थः। णिजर्थप्रयाणादिव्यापारे यथायोग्यं तत्तत्संबन्धेनान्वेति।

न च प्रयाणादिव्यापारः प्रयत्नादिर्वा कथं तृतीयार्थः, ज्ञापकस्यानुशासनस्य विरहात्। "स्वतन्त्रः कर्ता"[१] इत्यत्र धात्वर्थस्य तिङर्थस्य वा प्रधानव्यापारस्याश्रयतायाः कर्तृतात्वेन ज्ञापनात्, न तु णिजर्थव्यापारस्येति वाच्यम्।

"गतिबुद्धिप्रत्यवसानार्थशब्दकर्मकाकर्मकाणाम् अणि कर्ता स णौ"[२] इत्यत्र अणीत्यस्य ज्ञापकस्य सत्त्वात्। यदि च स्वतन्त्रः एव कर्तृशब्दार्थः तदा सूत्रे अणीत्यस्य वैयर्थ्यं स्यात्। णिजर्थव्यापाराश्रयस्य अस्वतन्त्रत्वादेव तत्कर्तृत्वाप्रसक्तेः। तथा च प्रयोजकोऽपि कर्ता भवति। तत्र कर्मत्वनिषेधकतया अणीत्यस्य सार्थक्यम्। तेन "गमयति देवदत्तेन यज्ञदत्तं विष्णुम्" इत्यत्र देवदत्तपदान्न द्वितीया।

---

[१] सू. १.४.५४
[२] सू. १.४.५२

एवं प्रयोजकस्य णिजर्थव्यापाराश्रयस्य कर्तृत्वेऽवगते "कर्तृकरणयो:०"[१] इत्यनेनैव प्रयोजकवाचिपदात् तृतीयेति।

अत एव तत्र पञ्चविध: कर्तेत्यत्र प्रयोजकस्वतन्त्रकर्मकर्तॄणामेव ग्रहणमिति त्रिविध एव कर्ता अभिहितत्वानभिहितत्वे स्वतन्त्रप्रयोजकयोरवान्तरधर्मौ न विभाजकोपाधी इति कौण्डभट्टैरुक्तम्।

भाट्टचिन्तामणौ[२] कर्तृत्वनिर्वचनम्

कर्तृत्वं करणत्वं च तृतीयार्थ:। "कर्तृकरणयोस्तृतीया"[३] इति सूत्रात्। कर्तृत्वं च स्वातन्त्र्यम्। "स्वतन्त्र: कर्ता"[४] इति सूत्रात्। स स्वतन्त्रस्त्रिविध:, शुद्ध: प्रयोजक: कर्मकर्ता चेति। तदनुकूलव्यापारफलाश्रय: शुद्ध:। व्यापारानाश्रयत्वे सति फलाश्रयो द्वितीय:। फलानाश्रयत्वे सति अनुकूलव्यापाराश्रय: तृतीय:।

कर्तृत्वं न तावत् यत्नाश्रयत्वं तदुपादानविषयकापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं वा। 'कूलं पिपतिषति, रथो गच्छति' इत्यादावभावात्। नापि कारकान्तरा-प्रयोज्यत्वे सति कारकान्तरप्रयोजकत्वम्। उक्तदूषणापरिहारात्।

किं तु धात्वर्थव्यापाराश्रयत्वं तत्। यद्धातूत्तराख्यातेन यगाद्यसमभिव्याहृतेन यद्धात्वर्थान्वितधर्मवत्त्वं बोध्यते तद्वत्त्वं तत्क्रियाकर्तृत्वम्। "चैत्र: पचति जानाति नश्यति" इत्यादौ पाकानुकूलव्यापारवत्त्व-ज्ञानाश्रयत्व-नाशप्रतियोगित्वादिकमेव तत्तत्क्रियाकर्तृत्वम्। "पच्यते तण्डुल" इत्यादौ कर्मण्यतिप्रसङ्गवारणाय यगाद्य-समभिव्याहृतेति। तेन "स्थाली पचति काष्ठानि पचन्ति" इत्यत्र स्थलीकाष्ठादावपि कर्तृत्वमविरुद्धम्। तृतीयार्थस्य कर्तृत्वस्य साक्षात् भावनायामन्वयात् कर्तृत्वार्थ-कतृतीया कारकविभक्ति:।

भाट्टरहस्यरीत्या कर्तृतृतीयार्थ: कर्तृत्वनिर्वचनं च[५]

"कर्तृकरणयोस्तृतीया"[६] इति सूत्रात् कर्तृत्वं करणत्वं च सूत्रार्थ:। सोऽपि तथैव? भावनान्वयी। तत्र "स्वतन्त्र: कर्ता"[७] इति सूत्रेण कर्तृत्वनिर्वचनम्।

---

[१] सू. २.३.१८
[२] पृ. ९८
[३] सू. २.३.१८
[४] सू. १.४.५४
[५] पृ. १०६-११०
[६] सू. २.३.१८
[७] सू. १.४.५४

भाट्टरहस्ये प्राचीनमतम्

तथाहि — इतरकारकाप्रेर्यत्वे सति इतरकारकप्रेरकत्वं कर्तृत्वम्। इतरकारकनिष्ठव्यापारजनकत्वं विशेष्यदलार्थः। अस्ति चेदं "कुविन्दः तन्तुभिः पटं करोति" इत्यादौ कुविन्दादेः, तन्त्वादिनिष्ठपटजनकसंयोगरूपव्यापारजनकत्वात्। कुठारेऽपि काष्ठनिष्ठसंयोगजनकत्वेन कर्तृत्वापत्तिवारणाय सत्यन्तम्। तस्य पुरुषजन्यसंयोगाश्रयत्वेन इतरकारकप्रयोज्यत्वान्नातिव्याप्तिः इति सर्वदर्शनानुयायिनः प्राञ्चः। तन्न। ईश्वरप्रेर्यजीवेऽव्याप्तेः। दण्डजन्यसंयोगाश्रयत्वेन कुलालेऽव्याप्तेश्च।

नव्यवैयाकरणमतम्

अतो धातूपात्तव्यापाराश्रयत्वं कर्तृत्वमिति वैयाकरणनव्याः। "चैत्रः पचति, घटो भवति" इत्यादौ चैत्रघटादौ पाकभवनादिव्यापाराश्रयत्वाल्लक्षणसमन्वयः। व्यापारपदोपादानात् न धातूपात्तफलाश्रये कर्मण्योदनादावतिव्याप्तिः। "पाचयति चैत्रो मैत्रेण" इत्यादौ पाकस्य णिजर्थस्य चोभयोः धातूपात्तव्यापारत्वात् तदाश्रययोरुभयोरपि कर्तृत्वोपपत्तिः। परं तु चैत्रवृत्त्येव कर्तृत्वं तिङुपात्तमिति तत्रैव तिङुपात्तसंख्याया अन्वयः, न तु मैत्रे। न चैवं "चैत्रो मैत्रं गमयति" इत्यत्र कर्मणि मैत्रे कर्तृत्वापत्तिः, तस्य गमधात्वर्थव्यापाराश्रयत्वादिति वाच्यम्। तस्मिन्नपि तद्व्यवहारस्य सत्त्वेन कर्तृत्वस्येष्टत्वात्। न च तर्हि मैत्रपदोत्तरं कर्तरि तृतीयापत्तिरिति वाच्यम्। गतिबुद्धीत्याद्यनुशासनेन णिच्प्रकृतिधात्वर्थकर्तुः कर्मसंज्ञाविधानेन कर्मसंज्ञाप्रयुक्तद्वितीयाया एव प्रवृत्तेः। एवं "स्थाली पचति" इत्यादौ स्थालीनिष्ठव्यापारस्यैव धातुनोक्तत्वात् स्थाल्याः कर्तृत्वाविरोधः — इत्याहुः।

तत्खण्डनम्

तन्न। "चैत्रो न पचति, घटो नास्ति" इत्यादौ धातूपात्तव्यापाराभावाश्रये चैत्रादौ व्यापाराश्रयत्वाभावेन कर्तृलक्षणाव्याप्तेः। न च तत्र चैत्रवृत्तिः पाकः अभावप्रतियोगी, भूतलवृत्तिघटनिष्ठा सत्ता अभावप्रतियोगिनी इत्येवंरूपशाब्दबोधाङ्गीकारान्नातिव्याप्तिः इति वाच्यम्। "ह्रदे वह्निर्नास्ति" इत्यादौ ह्रदवृत्तिवह्निनिष्ठा सत्ता अभावप्रतियोगिनीति बोधस्यासंभवात्। ह्रदवृत्तिवह्नेः अप्रसिद्धत्वात्। तथा च वह्नौ कर्तृलक्षणाव्याप्तिः।

न च तत्र विशेषणविशेष्ययोरुभयोरपि भवनाश्रयत्वेन कर्तृत्वमिति वाच्यम्। तदा "चक्रे घटो भवति" इत्यादौ चक्रस्यापि घटभवनाश्रयत्वेन कर्तृत्वापत्तेः।

अथ यद्धात्वर्थाश्रयत्वेन यो विवक्षितः स तत्कर्तेत्युच्यते। चक्रे च धात्वर्थभवनाश्रयत्वविवक्षाविरहान्नातिप्रसङ्ग इति चेत् — तदा "पटो घटो न" इत्यादावन्योन्याभावप्रतियोगिनि घटादौ धात्वर्थाश्रयत्वाभावादव्याप्तिः।

न च तत्र भवतिपदाध्याहारेण घटपटोभयवृत्तितादात्म्यभवनं धातुना लक्षयित्वा तत्र नञर्थाभावान्वयेन घटपटोभयवृत्ति तादात्म्यभवनमभावप्रतियोगीति शाब्दबोधाङ्गीकारात्, अर्थाच्चान्योन्याभावबोधोपपत्तेः तादात्म्येन भवनरूपस्य धात्वर्थस्य उभयवृत्तित्वात् उभयकर्तृकत्वोपपत्तिरिति वाच्यम्। तथा सति उभयत्रापि तिङुपात्तसंख्याकत्वेन "घटो न पटौ" इति विभिन्नसंख्याकप्रयोगानुपपत्तेः।

एतेन "घटो न पट" इत्यत्र घटपदस्य घटप्रतियोगिकभेदवति लक्षणा, नञ्पदं तात्पर्यग्राहकम्। उभयोरपि पार्ष्णिकाभेदसंबन्धमादायान्वयः घटप्रतियोगिकभेदवदभिन्नः पट इति। यथा "शुक्लो घटः, अघटः पट" इत्यत्र। अथ वा अध्याहृतक्रियायां तयोः विशेषणविशेष्यभावेनान्वयः इत्यपास्तम्। "घटो न पटौ" इति प्रयोगानापत्तेः।

स्वमतेन कर्तृत्वनिर्वचनम्

अतो यद्धात्वर्थावच्छिन्नलिङ्गानन्वयिपदोपस्थाप्यार्थाश्रयत्वं यस्य, तस्य तत्कर्तृत्वम्। यद्धात्वर्थावच्छिन्नः लिङ्गानन्वयिना पदेनोपस्थाप्यो योऽर्थः तदाश्रयस्य तद्धात्वर्थकर्तृत्वमित्यर्थः। अस्ति चेदं "पचति चैत्रः, चैत्रेण पच्यते" इत्यादौ। लिङ्गानन्वयि पदं पचतिपदं तिङ्पदं वा। तदुपस्थाप्या कृतिः पचधात्वर्थपाकावच्छिन्ना, तदाश्रयस्य चैत्रस्य पाककर्तृत्वम्। कर्मलकारेणापि कृतेरुक्तेः। "घटो भवति" इत्यादौ आख्यातेनाश्रयत्वस्य "घटो नश्यति" इत्यादौ प्रतियोगित्वस्य च लक्षणात् भवनावच्छिन्नाश्रयत्वाश्रयतया नाशावच्छिन्नप्रतियोगित्वाश्रयतया च घटस्य भवनकर्तृत्वं नाशकर्तृत्वं च। अवच्छिन्नत्वं च स्वरूपसंबन्धविशेषः, न तु जनकत्वाद्येव। तेन प्रतियोगित्वादेर्नाशाजनकत्वेऽपि, न क्षतिः।

"चैत्रः पाचकः चैत्रः पक्ता" इत्यादौ कृत्प्रत्ययेन लिङ्गानन्वयिन्याः पाकानुकूलकृतेः उक्तत्वात् तदाश्रयस्य कर्तृत्वोपपत्तिः। "चैत्रस्य पाक" इत्यादिघञन्ते घञर्थे लिङ्गान्वयेऽपि पचधातुनोक्तस्य लक्षणया पाकावच्छिन्नव्यापारस्य लिङ्गान्वयाभावात् तदाश्रये चैत्रे कर्तृत्वोपपत्तिः। अथ वा घञा लक्षणया कृतिः शक्त्या भावाख्यः पाकश्चोच्यते। पाकस्यावच्छिन्नत्वसंबन्धेन कृतौ कृतेः प्रकृत्यर्थपाके साध्यत्वेनान्वयः। पाकावच्छिन्नचैत्रवृत्तिकृतिसाध्यः पाक इति बोधः। कृतौ चैत्रस्यान्वयात् कर्तृत्वोपपत्तिः। शेषषष्ठीत्वाद्वा कर्तृत्वाभावेऽपि न क्षतिः।

चैत्रेण कृत इत्यादिकर्मार्थककृत्प्रत्ययस्थलेऽपि धातुना पाकानुकूलव्यापारस्यैव वस्तुत उक्तेः तदाश्रयत्वेन चैत्रस्य कर्तृत्वोपपत्तिः।

एवं ''पाचयति चैत्रो मैत्रेण'' इत्यादावपि मैत्रस्य धातूक्तपाकानुकूलकृत्याश्रयत्वात् कर्तृत्वम्। चैत्रस्य तु आख्यातोपात्तकृत्याश्रयत्वात् कर्तृत्वम्। अत्र 'पाकं कारयति' इति विवरणात् कृत्यनुकूलव्यापारो णिजर्थः। आख्यातार्थः कृतिः। मैत्रकर्तृको यः पाकः तदनुकूलकृत्यनुकूलव्यापारानुकूलकृतिः चैत्रवृत्तिः इत्यन्वयबोधः।

कर्माख्यातस्थले ''चैत्रेण पच्यते ओदनः'' इत्यादौ यद्यपि धात्वर्थपाकावच्छिन्नफलाश्रयत्वस्य ओदने सत्त्वात् तस्य कर्तृत्वापत्तिरिति शङ्का भवति, तथापि तत्र फलं नाख्यातार्थः। अपि तु संसर्गतया भासते। आख्यातार्थस्तु कृतिरेव। तत्र ओदनस्य स्ववृत्तिविक्लित्त्यनुकूलव्यापारानुकूलत्वसंबन्धेनान्वयः। चैत्रकर्तृकपाकानुकूला ओदनवृत्तिविक्लित्त्यनुकूलव्यापारानुकूला च कृतिः इति बोधः। तथा च धात्वर्थावच्छिन्नाख्यातार्थाश्रयत्वाभावात् न ओदनस्य कर्तृत्वापत्तिः।

''विक्लिद्यन्ति तण्डुलाः'' इत्यादावाख्यातेन धात्वर्थनिरूपितमाश्रयत्वं लक्ष्यते। तण्डुलस्य तत्रान्वयात् कर्तृत्वम्। तण्डुलनिष्ठं विक्लित्त्याश्रयत्वमिति बोधः।

''स्थाली पचति'' इत्यत्रापि धातुना स्थालीनिष्ठस्यैव व्यापारस्योक्तेः तदाश्रयतया स्थाल्याः कर्तृत्वम्। आश्रयत्वमाख्यातार्थः। स्थालीनिष्ठं विक्लित्त्यनुकूलव्यापाराश्रयत्वमिति बोधः।

''चैत्रो वस्तु'' इत्यत्र धात्वर्थावच्छिन्नभावनातात्पर्यकवस्तुपदाभिधेयभावनायां चैत्रस्यान्वयं कर्तृत्वं च वारयितुं लिङ्गानन्वयि इति पदस्य विशेषणम्।

''चैत्रो न पचति, भूतले घटो नास्ति'' इत्यादौ चैत्रस्य आधेयतासंबन्धेन पाकानुकूलभावनायामन्वयः, नञर्थाभावस्य प्रतियोगितासंबन्धेन भावनायामन्वयः चैत्रवृत्तिः पाकानुकूलभावना अभावप्रतियोगिनी इति आद्यवाक्यात् बोधः। असधातोः सत्ता अर्थः। आश्रयत्वं तिबर्थः। तत्र निरूपितत्वसंबन्धेन धात्वर्थसत्ताया अन्वयः। सप्तम्यर्थस्याधिकरणत्वस्य निरूपकतासंबन्धेन घटेऽन्वयः। घटस्य आधेयतासंबन्धेन आश्रयत्वेऽन्वयः। नञर्थस्याभावस्य प्रतियोगित्वसंबन्धेन तत्रैवान्वयः। भूतलनिष्ठाधिकरणतानिरूपकघटवृत्ति सत्ताश्रयत्वमभावप्रतियोगीति द्वितीयवाक्यात् बोधः। एवं च भावनाश्रयचैत्रादेः कर्तृत्वनिर्वाहः।

न चैवं ''वायौ रूपं नास्ति, जातौ समवायेन सत्ता नास्ति, ह्रदे वह्निर्नास्ति'' इत्यादौ रूपादेः कथं कर्तृत्वं वाय्वधिकरणकरूपस्य जात्यधिकरणकसमवायसंबन्धावच्छिन्नसत्तायाः ह्रदाधिकरणकवह्नेश्चाप्रसिद्ध्या वाय्वधिकरणकरूपनिष्ठं

सत्ताश्रयत्वमभावप्रतियोगि, समवायेन जात्यधिकरणकसत्तानिष्ठं सत्ताश्रयत्वमभावप्रतियोगि इति बोधानामसंभवात् इति वाच्यम्। अगत्या तादृशस्थलेषु रूपादिवृत्तितत्तत्संबन्धावच्छिन्नविद्यमानत्वाश्रयत्वम् वाय्वधिकरणकाभावप्रतियोगीत्यादिबोधस्वीकारेण रूपादेः कर्तृत्वनिर्वाहात्।

तथा च वायौ समवायेन 'रूपं नास्ति' इत्यत्र सप्तम्याः अधिकरणत्वमर्थः। तत्र वायोराधेयतासंबन्धेनान्वयः। अधिकरणतायाः निरूपकतासंबन्धेन नञर्थाभावेऽन्वयः। असधात्वर्थः विद्यमानत्वम्। तत्र तृतीयान्तार्थसमवायावच्छिन्नत्वस्यान्वयः। आख्यातार्थः आश्रयत्वं तत्र नञर्थाभावस्य प्रतियोगित्वसंबन्धेनान्वयः। रूपस्याधेयतासंबन्धेन आख्यातार्थे आश्रयत्वेऽन्वयः। तथा च रूपनिष्ठं समवायावच्छिन्नविद्यमानत्वाश्रयत्वं वाय्वधिकरणकाभावप्रतियोगि इति बोधः। प्रतियोगितावच्छेदकसंबन्धः निरूपकत्वम्। रूपनिष्ठसमवायसंबन्धावच्छिन्नविद्यमानतायाः वायुनिरूपितत्वं नास्तीति फलितोऽर्थः।

"जातौ समवायेन सत्ता नास्ति" इत्यतः सत्तानिष्ठसमवायसंबन्धावच्छिन्नविद्यमानत्वाश्रयत्वं जात्याधिकरणकाभावप्रतियोगीति बोधः।

"ह्रदे वह्निर्नास्ति" इत्यतः वह्निनिष्ठविद्यमानत्वाश्रयत्वं ह्रदनिष्ठाभावप्रतियोगीति बोधः।

"घटः पटो न" इत्यादौ भवतिक्रियाध्याहारात् घटपदेन च घटभेदवतो लक्षणात् नञ्पदस्य तात्पर्यग्राहकत्वात् प्रथमत उभयोः क्रियायामन्वयं स्वीकृत्य घटभेदवन्निष्ठं भवनाश्रयत्वं पटनिष्ठं भवनाश्रयत्वमिति स्वीकृत्य पश्चात् घटभेदवदभिन्नः पट इति मानसबोधस्वीकारात् उभयोरपि घटपटपदार्थयोः प्राथमिकबोधमादाय धात्वर्थकर्तृत्वं निर्वोढव्यम्।

"घटो न पटौ" इत्यत्र घटो भवति पटौ न भवतः इति क्रियाद्वयाध्याहारेण एकघटवृत्तिभवनाश्रयत्वं घटद्वयवृत्तिभवनाश्रयत्वप्रतियोगिकान्योन्याभाववत् इत्येवं बोधः। नञ्पदस्य तात्पर्यग्राहकत्वमङ्गीकृत्य द्वयोराख्यातयोः "पश्य मृगो धावति" इतिवत् स्वप्रतियोगिकान्योन्याभाववत्त्वसंसर्गेणान्वयः। मानसश्च पश्चात् भवनाश्रययोर्भेदबोधः। एवं च स्वस्वसंख्यान्वयः, कर्तृत्वं चोभयोरुपपन्नमिति।

एवं सत्ता न समवायेन जातिवृत्तिः इत्यादिप्रयोगा अपि लक्षणाध्याहारादिना व्याख्येयाः, अयोग्या वा। एतदुक्तं भवति — अत्र च आश्रयत्वमेव तृतीयार्थः प्रथमातिबादीनामर्थः अन्यत्तु सर्वं प्रमाणान्तरेण लभ्यम्।

कर्तृत्वं कृत्याश्रयत्वमथ वा अखण्डमिति पक्षः

अथ वा कृत्याश्रयत्वमेव मुख्यकर्तृत्वम्। यत्नवाचिकृञ्धातुघटितत्वात् कर्तृशब्दस्य। अन्यत्र कर्तृत्वव्यवहारो भाक्त एव द्रष्टव्यः।

वस्तुतस्तु — "धर्मे चार्थे च कामे नातिचरितव्या त्वयेयम्"[१] "पत्युर्नो यज्ञसंयोगे"[२] "जायापती अग्नीनादधीयाताम्" इत्यादिप्रमाणानुसारात् पत्न्या अपि यजमानवदेव कर्तृत्वेऽवगते, "वसन्ते ब्राह्मणोऽग्नीनादधीत, यजेत स्वर्गकामः" इत्यादावेकत्वश्रवणं लक्षणायां प्रमाणाभावात् उभयोः व्यासज्यवृत्ति एकं कर्तृत्वमवगमयति। तच्च न सखण्डोपाधिरूपं, बाधात्। अपि तु पूर्वोक्तसखण्डोपाधिव्यापकमखण्डोपाधिरूपम्, तद्गतमेव चैकत्वादिकम्।

तथा च "चैत्रेण पाकः क्रियते" इतिवाक्यात् चैत्रकर्तृककृतिसाध्यः पाकः इति वा, चैत्रकर्तृककृतिसाध्यत्वं पाकवृत्ति इति वा बोधः। अस्मिंश्च पक्षे कर्मकृत् स्थलेऽपि न लक्षणा। अपि तु आख्यातलक्ष्यस्य अखण्डोपाधिरूपस्य कर्तृत्वस्यैव आख्यातवाच्यकृतावेव स्वसमानाधिकरणफलप्रयोजकसंबन्धेनान्वय इत्युक्तं कौस्तुभे।

इदमेव च कर्तृत्वं तृतीयार्थः। तस्य च "चैत्रेण पच्यते" इत्यत्र स्वनिरूपकपाकानुकूलत्वसंबन्धेन निरूपकत्वसंबन्धेन वा लिङ्गानन्वयिभावनायामन्वयः। ओदनकर्मकचैत्रकर्तृकपाकानुकूला कृतिः इति वा ओदनकर्मकपाकानुकूला चैत्रकर्तृककृतिः इति वा बोधः। इदमेव च कात्यायनमते प्रथमार्थः। कर्त्राख्यातलक्ष्यम्, कृत्प्रत्ययशक्यतावच्छेदकम्, कृद्योगनिमित्तकषष्ठीबोध्यं च।

करणत्वपरिष्कारः

"कर्तृकरणयोस्तृतीया"[३] इति सूत्रेण करणत्वेऽपि तृतीया। तच्च करणत्वं किंरूपमितीदानीं विचार्यते।

"साधकतमं करणम्"[४] इत्याह स्म भगवान् पाणिनिः। क्रियासिद्धौ प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्। तमप्ग्रहणं किम्? "गङ्गायां घोषः" इति कौमुदी।

---

[१] आपस्तम्ब-गृह्यसूत्र २-२१

[२] सू. ४.१.३३

[३] सू. २.३.१८

[४] सू. १.४.४२

कारकाधिकारात् क्रियासिद्धाविति लभ्यते। क्रियोत्पत्ताविति तदर्थः। प्रकृष्टोपकारकमिति। कर्त्रा क्रियायां जनयितव्यायां यत् सहायभूतं तत् उपकारकमित्युच्यते। साधकतममित्यस्य व्याख्यानमेतत्। साधकशब्दात् "अतिशायने तमबिष्ठनौ"[1] इति तमप्। अतिशयितं साधकं साधकतमम्। यद्व्यापारानन्तरं क्रियानिष्पत्तिः तत् प्रकृष्टम्। कर्तृव्यापाराधीनयद्व्यापाराव्यवहिता क्रियानिष्पत्तिः तत् तस्यां करणमिति यावत्। तमप्ग्रहणं किमिति। साधकमित्येवोच्यताम्। कारकाधिकारादेव सिद्धे पुनः साधकग्रहणादेव प्रकृष्टं साधकमिति विज्ञायत इति प्रश्नः। "गङ्गायां घोष" इति। अयमाशयः कारकप्रकरणे गौणमुख्यन्यायः एतत्सूत्रादन्यत्र न प्रवर्तत इति ज्ञापनार्थं तमप्ग्रहणम्। अन्यथा "आधारोऽधिकरणम्"[2] इत्यत्र अन्वर्थमहासंज्ञाबलादेवाधारलाभे पुनस्तद्ग्रहणसामर्थ्यात् सर्वावयवव्याप्त्या य आधारः सोऽधिकरणमित्यर्थः स्यात्। ततश्च तिलेषु तैलम्, दध्नि सर्पिरित्यादावेव स्यात्। "गङ्गायां घोषः, कूपे गर्गकुलम्" इत्यादौ न स्यात्। अतस्तमब्ग्रहणमिति भाष्ये स्पष्टमिति बालमनोरमा।

एतत्सर्वं लघुशब्देन्दुशेखरे स्थितमेव। प्रकृतसूत्रभाष्यग्रन्थस्त्वयम् — तमब्ग्रहणं किमर्थम्, सर्वेषां कारकाणां करणसंज्ञा प्रसज्येत इति विचारे — पूर्वसंज्ञानामपवादत्वात् परसंज्ञानां च तथैव बाधकत्वं भविष्यति — इत्यभिधाय — धनुषा विध्यतीत्यत्रापि उक्तत्वात् अपादानसंज्ञासाधकत्वाच्च करणसंज्ञा प्राप्नोति। एवं तर्हि लोके अभिरूपाय कन्या देयेति। न चानभिरूपे प्रवृत्तिरस्ति। तत्राभिरूपतमायेति गम्यते। एवमिहापि साधकं करणमित्युच्यते। सर्वाणि च कारकाणि साधकानि। न चासाधके प्रवृत्तिरिति साधकतममिति विज्ञास्यते। एवं तर्हि सिद्धे सति यत् तमग्रहणं करोति तत् ज्ञापयत्याचार्यः कारकसंज्ञायां तरतमयोगो न भवतीति। आधारमाचार्यः किं न्याय्यं मन्यते यत्र कृत्स्न आधारात्मा व्याप्नोति तेनेहैव स्यात् 'तिलेषु तैलं' 'दध्नि सर्पिः'। 'गङ्गायां गावः' 'कूपे गर्गकुलम्' इत्यत्र न स्यात्। कारकसंज्ञायां तरतमयोगो नास्तीत्यत्रापि सिद्धं भवति इति।

यदि च महासंज्ञया तदाक्षेपं कर्तुं योऽसमर्थः तं प्रति आधारादिपदं चरितार्थम्। साधकशब्दस्य यद्व्यापारानन्तरम् अव्यवधानेन फलोत्पादः तत्र शक्तिः। आधारशब्दस्य च आध्रियते यस्मिन्निति व्युत्पत्त्या कर्तृकरणयोर्धारणक्रियां प्रति सर्वावयवव्याप्त्या य आधारः तत्र शक्तिः इत्युच्यते तदा 'गङ्गायां गावः' इत्यादिप्रयोगसाधनाय कारकप्रकरणे उद्देश्यवाचके पदे स्वरितत्वप्रतिज्ञया गौणाधारादेः ग्रहणं

---

[1] सू. ५.३.५५

[2] सू. १.४.४५

वाच्यम्। स्वरितेनाधिकं कार्यमित्यर्थात्। तमपा तु प्रकृते उद्देश्यवाचके साधकपदे स्वरितत्वाभावः बोध्यते। तमपा प्रकर्षो बोध्यत इत्यव्यवधानलाभः। एवं च व्यवधाने फलोत्पादके करणत्वोपचारेण तृतीयान्तप्रयोगस्य असाधुत्वबोधनं तमपः फलम्। यथा नटस्य शृणोतीति।

प्रौढमनोरमायाम्[१] करणत्वनिरूपणम्

साधकतमं करणम्। प्रकृष्टोपकारकमिति। यद्व्यापारात् अनन्तरं क्रियानिष्पत्तिः तत् प्रकृष्टम्। उक्तं च वाक्यपदीये —

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत् तदा स्मृतम्।।

इति। यत्र = येषां कारकाणां मध्ये । विवक्ष्यते इत्यनेन स्थाल्यादीनामपि वैवक्षिककरणत्वमस्तीति ध्वनयति। आह च —

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा व्यवस्था दृश्यते यतः।।

इति। वस्तुतः = वस्तुनीत्यर्थः। सार्वविभक्तिकस्तसिः। तत् = कर्तृत्वादिकम्। अनिर्देश्यम् = इदं वस्तु कर्तैव इत्यादिक्रमेण न निर्देश्यम्। हि = यतः, वस्तु तत्तद्रूपेण न व्यवस्थितम्। तामेवाव्यवस्थां दर्शयति — स्थाल्येत्यादिना।

अयं भावः — कारकत्वं तद्व्याप्यं कर्तृत्वादिषट्कं च यथा वस्तुविशेषे विशेषणविशेष्यभावो न व्यवस्थितः तथा न व्यवस्थितम्। न हि गौः सर्वं प्रति गौरेव न तु किंचित् प्रत्यगौः इतिवत् विशेषणं विशेषणमेवेति सुवचम्। खञ्ज-कुब्जादावव्यवस्थायाः दर्शनात्। "तण्डुलानोदनं पचति" इत्यत्र करणत्वविवक्षया अकथितकर्मकारकस्यापि तण्डुलस्य "तण्डुलानामोदनं पचति" इत्यादौ ओदन-पदार्थान्वयेन षष्ठ्यन्तदर्शनात् कारकत्वस्य व्यभिचारो द्रष्टव्यः।

तथा च कयाचित् धातुव्यक्त्या उपस्थापितेऽर्थे किं कर्त्रादिकमिति प्रश्ने प्रकृत-धातुव्यक्त्युपस्थापितव्यापाराश्रयतया विवक्षितः कर्ता, तादृशव्यापारव्यधिकरण-फलाश्रयः कर्म, कर्तृकर्मद्वारकसंबन्धेन तादृशव्यापाराश्रयोऽधिकरणम्। पच्यर्थो व्यापारश्चानेकविधः। एवं च पचेः अधिश्रयणतण्डुलावपनैधोपकर्षणादितात्पर्यकत्वे तदाश्रयो देवदत्तः कर्ता। ज्वलनतात्पर्यकत्वे एधाः कर्तारः, तण्डुलधारणादिपरत्वे स्थाली कर्त्री। अवयवविभागादिपरत्वे तण्डुलाः कर्तारः। "स्थाल्या पचति" इत्यत्र

---

[१] पृ. ८८०

तृतीयोपात्तव्यापाराश्रयापि स्थाली करणमेव, न तु कर्त्री। देवदत्तादिव्यापारस्यैव तद्धातूपात्तत्वात्। तथा आदिखादिभ्यामुपात्तेऽर्थे प्रयोज्यः कर्ता। तस्मिन्नेवार्थे भक्षयतिनोपात्ते कर्म। अधिपूर्वैः शीङादिभिरुपात्तेऽर्थे आधारः कर्म केवलैरुपात्ते अधिकरणमित्यादि। संप्रदानापादानयोस्तु न कर्तृत्वविवक्षा शब्दशक्तिस्वाभाव्यात् तद्व्यापारे धातोरवृत्तेः।

कर्तरि करणे च तृतीयायाः उदाहरणं "रामेण बाणेन हतो वाली" इति। इह यद्यपि विभक्त्युपस्थापितानां कारकाणां क्रियां प्रति विशेषणतैव। तथैव कृदुपस्थापितानां तेषां विशेष्यतैव। "सत्त्वप्रधानानि नामानि" इति यास्कोक्तेः। धातूपस्थाप्ययोः फलव्यापारयोरपि कर्मकृत्समभिव्याहारे विशेषणविशेष्यभावव्यत्यासेनैव धातोस्तयोरुपस्थितिः। तत्र व्यापारजन्यफलमेव धात्वर्थः। तथा च रामनिष्ठो यो व्यापारः तद्विषयो यो बाणाश्रयकव्यापारसाध्यप्राणवियोगस्तदाश्रयो वालीति वाक्यार्थबोधः।

यत्तु वाजपेयाधिकरणे मीमांसकैरुक्तं "काष्ठैः पाक" इत्यपि स्यादिति, तदिष्टापत्तिग्रस्तम्। कृत्प्रकृत्यर्थक्रियायामपि कारकाणामन्वयात्।

कृदन्तेन पाकक्रियायाः सिद्धावस्थापन्नाया एवाभिधानात् कारकान्वययोग्यतावच्छेदकसाध्यत्वेनानभिधानेन नात्र कारकान्वय इति मीमांसकानामाशयः।

वस्तुतस्तु पाकादिशब्दघटकधातुना तत्रापि साध्यत्वेनैव क्रियाया अभिधानेन तस्यां कारकान्वये बाधकाभाव इति वैयाकरणाः। अपि च "कर्तृकरणे कृता बहुलम्"[१] "कर्तृकर्मणोः कृति"[२] इत्यादिसूत्राणां कृत्प्रकृत्यर्थे कारकान्वयं विना नोक्तिसंभव इति सुधीभिराकलनीयम्।

यत्तु "काष्ठैः पाक" इत्यत्र अध्याहृतायां भवति क्रियायां प्राथमिकान्वयेन तत्तद्विभक्तौ जातायां कृदन्तेन पार्ष्णिकान्वयात् तेषां सूत्राणां चारितार्थ्यमिति। तन्न। भवतिक्रियायां कर्तृत्वेनान्वये कर्तुरुक्तत्वात् तृतीयानापत्त्या हरिणा त्रात इत्यसिद्ध्यापत्तेः। करणत्वेनान्वये पार्ष्णिकस्यापि हरिकर्तृकत्राणकर्मणः बोधानापत्तेः। कर्तृतृतीयान्तेन समासविधायकसूत्रासंगतेश्चेति।

---

[१] सू. २.१.३२
[२] सू. २.३.६५

लघुमञ्जूषायां करणत्वविवेचनम्[१]

करणत्वं च करणत्वशक्तिमत्त्वम्। सा च शक्तिः यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिर्विवक्ष्यते तन्निष्ठा। अधिकरणादिव्यापाराव्यवधानेन यदा क्रियानिष्पत्तिर्विवक्ष्यते, तदा तेषामपि करणत्वमिष्टमेव। तदाह हरिः —

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत् तदा स्मृतम्।।
वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा व्यवस्था दृश्यते यतः।।

इति। विवक्ष्यत इत्यनेन विवक्षैव व्याकरणेऽङ्गं न बाह्यवस्तुसत्तेत्युक्तम्। अत एव दात्राद्यनादरेण बलस्य करणत्वविवक्षायां 'बलेन लुनाति' इत्यादि भवति। तदाह वस्तुत इति। इदमेव वस्तु करणमिति न नियमः। अधिकरणत्वेन निश्चितापि स्थाली तनुतरकपालवत्त्वात् शीघ्रतरपाकसाधनत्वेन हेतुना करणत्वेन विवक्ष्यते। कर्तृपराधीनस्यापि कारकान्तरापेक्षया प्रकर्षः भवति। कारकसामान्यवाचिनः साधकशब्दात् उत्पद्यमानेन तमपा तस्मादेव प्रकर्षस्य बोधनात्। अत एव युगपत् बहूनां करणत्वविवक्षया "अश्वेन पथा दीपिकया व्रजति" इति प्रयोग उपपद्यते।

करणं तृतीयार्थः प्रकृत्यर्थस्य तत्राभेदेनान्वयः। तस्य च स्वनिष्ठव्यापाराव्यवहितोत्तरोत्पत्तिकत्वसंबन्धेन धात्वर्थेऽन्वय इत्येके। करणबाणनिष्ठो वधः इति बाणाभिन्नकरणको वध इति वा बोधः इति तत्त्वम्।

अत्र बहवः — करणस्य व्यापारे एवान्वयः, न फलांशे। शब्दशक्तिस्वभावात्। अत एव "उद्भिदा यजेत पशुकामः" इत्यत्र उद्भिच्छब्दः कर्मनामधेयं वा गुणविधिर्वा इत्याशङ्क्य गुणविधित्वपक्षे मत्वर्थलक्षणा स्यादिति भिया नामधेयत्वं सिद्धान्तितम्। उद्भिद्यते भूमिरनेनेति व्युत्पत्त्या उद्भिच्छब्दस्य खनित्रवाचकत्वं स्वीकृत्य यागे खनित्ररूपः गुणः साधनत्वेन विधीयत इति पक्षे पशुकर्मकभावनायां करणत्वेनान्विते यागे उद्भिदः खनित्रस्य करणत्वेनान्वये "उद्भिदा यागं भावयेत्, यागेन पशुं भावयेत्" इति वाक्यार्थद्वयविवक्षायां वाक्यभेदो भवेत्। तत्परिहाराय "उद्भिद्वता यागेन पशुं भावयेत्" इति वाक्यार्थः इति मीमांसकसिद्धान्तः। व्यापारे इव फलेऽपि करणत्वेन कस्यचित् अन्वयस्वीकारे भावनारूपस्य व्यापारस्य साध्यतया यागः फलमिति तत्र करणत्वेन उद्भिदः, पशुभाव-

---

[१] पृ. १२५१-१२५३

नायां यागस्य च करणत्वेनान्वयसंभवात् मत्वर्थलक्षणायाः आवश्यकता न स्यात्। एवं 'सोमेन यजेत' इत्यत्रापि द्रष्टव्यम्।

न च भावनायामेव उद्भिदोऽपि करणत्वेनान्वयोऽस्तु, किं भावनाफले यागे करणत्वेनान्वयेनेति वाच्यम्। भावनायाः करणाकाङ्क्षायां समानपदोपात्तयागस्य करणत्वेनान्वयेन आकाङ्क्षायाः शान्तत्वात् पुनः भिन्नपदोपात्तस्योद्भिदस्तत्र करणत्वेनान्वयो न संभवतीति तात्पर्यात्।

अपि च फलेऽप्यन्वये भावनाफलस्य धात्वर्थस्य यागस्य उद्भिन्निरूपितं साध्यत्वं भावनानिरूपितं करणत्वं चेति वैरूप्यं स्यात्। अतः मत्वर्थलक्षणा आवश्यकीति मीमांसकानामाशयः।

करणत्वनिर्वचनविषये नैयायिकमतोपन्यासः

न्यायवार्तिके[१] — न्यायदर्शनप्रथमसूत्रस्थकरणार्थकल्युडन्तप्रमाणशब्दार्थविचारावसरे उपलब्धिहेतुत्वं यदि प्रमाणशब्दप्रवृत्तिनिमित्तं तदा प्रमातृप्रमेययोरपि उपलब्धिहेतुत्वात् प्रमाणत्वापत्तिः इत्याशङ्क्य एवमुक्तम् —

ननु प्रमातृप्रमेययोरप्युपलब्धिहेतुत्वात् प्रमाणत्वं प्रसज्येत, विशेषो वा वक्तव्य इति। अयं विशेषः, प्रमाणे प्रमातृप्रमेययोः चरितार्थत्वात्। प्रमाणे प्रमाता प्रमेयं च चरितार्थम्। अचरितार्थं तु प्रमाणम्। अतस्तदेवोपलब्धिसाधनमिति। अनेन कारकान्तरेऽचरितार्थत्वे सति हेतुत्वं करणत्वमित्युक्तं भवति।

तत्र तात्पर्यटीका

अयं विशेष इति। सर्वः कर्ता करणगोचरव्यापारो न साक्षात् फले व्याप्रियते। करणं च द्विधा सिद्धमसिद्धं च। तत्र सिद्धं परश्वादि दारुद्वैधीभावायोद्यम्योद्यम्य दारुणि निपातयन्न् दारु च्छिनत्तीत्युच्यते। न तु साक्षात् कर्तृव्यापारगोचरो दारुद्वैधीभावः। किं तु स्पर्शवद्वेगवतः करणीभूतस्य परशोः संयोगस्य उद्यमननिपातनलक्षणस्तु कर्तृव्यापारः परशुगोचर एव। एवं स्वर्गकामोऽपि कर्ता न साक्षात् स्वर्गे व्याप्रियते। किं तु तत्करणं यागमसिद्धं साधयति। स्वर्गस्तु यागव्यापारादेवापूर्वाभिधानात् चेतनाश्रयात् देशकालावस्थाभेदासादितपरिणतिविशेषात् साक्षात् उत्पद्यते। तद्वदिहापि प्रमाता सिद्धमिन्द्रियादि असिद्धं च तत्संनिकर्षादि व्यापारयन् उत्पादयन् वा करण एव चरितार्थः। करणं तु इन्द्रियादि

---

[१] पृ. ९-१०

तत्संनिकर्षादि वा नान्यत्र चरितार्थमिति साक्षादुपलब्धावेव फले व्याप्रियते। प्रमेयस्य तु प्रत्यक्षादन्यत्रोपलब्धिहेतुभाव एव नास्ति। केवलं प्रमाणविषयभावमात्रेणोपयुज्यते। यत्राप्यस्य हेतुभावः प्रत्यक्षे अभिप्रेयते तत्रापीन्द्रियसंबन्धमात्रे उपयुज्यते प्रमेयम्। इन्द्रियमेव तु तत्संनिकर्षादिना साक्षात् प्रमाहेतुः। अयमत्र प्रयोगः — न प्रमाता साक्षात् प्रमाहेतुः कर्तृत्वात् व्रश्चनयजमानादिवत्। तथा प्रत्यक्षं प्रमेयं न साक्षात् प्रमाहेतुः प्रमेयत्वात् अनुमेयादिवत्। तदिदं प्रमातृप्रमेययोः प्रमाणे चरितार्थत्वम्, अचरितार्थत्वं च प्रमाणस्य। तस्मात् तदेव फलहेतुः।

न्यायवार्तिके पक्षान्तरम्

१. ततः पक्षान्तरं वार्तिके — साधकतमत्वाद्वा न प्रसङ्गः। न चायं प्रसङ्गोऽस्ति प्रमाता प्रमेयं चोपलब्धिनिमित्तत्वात् प्रमाणं प्रसज्यत इति। कस्मात्। साधकतमत्वात्। साधकतमं प्रमाणं, नतु प्रमातृप्रमेये। कः खलु साधकतमार्थः। साधकतमं प्रमाणमिति केवलं वाक्यमभिधीयते नार्थ इति। भावाभावयोस्तद्वत्ता। यस्य भावे प्रमायाः भावः यस्याभावे च प्रमाया अभावः तत् प्रमाणम्। प्रमातरि प्रमेये वा असति प्रमा न भवतीति तु सत्यम्। परं तु प्रमातरि प्रमेये वा सति भवत्येव प्रमेति तु नास्ति। प्रमाणे सति तु भवत्येव प्रमा। स चायमतिशयः साधकतत्वमुच्यते — इत्युपपादितम्।

तत्र तात्पर्यटीका[१]

प्रमाणस्य भावाभावयोः प्रमायाः कार्यस्य तद्वत्ता भावाभाववत्ता साधकतामार्थः। एतावता यदन्वयव्यतिरेकानुविधायित्वं कार्यस्य वर्तते तत् करणमित्युक्तं भवति। ननु प्रमातृप्रमेयान्वयव्यतिरेकानुविधानमप्यस्ति प्रमाया अन्वयव्यतिरेकयोः इत्यत आह — न प्रमातरीति। प्रमातृप्रमेयाभ्यां सह प्रमोत्पत्तेः अन्ययोगव्यवच्छेदेन संबन्धः। (प्रमातृप्रमेयाभ्यां प्रमान्यत्र जायत इत्येवंरूपोऽन्ययोगव्यवच्छेदः) प्रमाणेन तु संबन्धः प्रमोत्पादस्य अयोगअन्ययोगव्यवच्छेदाभ्याम्। (प्रमाणे सति प्रमायाः अयोगः न, न वा प्रमान्यस्य योगः) अयमेव प्रमाणस्य अतिशयः। प्रमातृप्रमेये तु प्रमाणोपक्षीणव्यापारे न प्रमायां व्याप्रियेते। तेन अन्तरा अन्तरायसंभवान्नावश्यं प्रमातृप्रमेयव्यापारे सति प्रमा भवति। प्रमाणस्य व्यापारे तु प्रमा भवत्येवेति। एतदेवाभिसन्धाय नव्याः कार्यायोगव्यवच्छिन्नं कारणं करणमिति वदन्ति।

---

[१] पृ. ३७

न्यायवार्तिके पुनः पक्षान्तरम्

२. न्यायवार्तिके कल्पान्तरमुक्तम्[१] — यद्वान् वा प्रमिमीते सोऽतिशयः। किंवान् प्रमिमीते, प्रमाणवान्। सोऽयं प्रमाता प्रमाणे सति प्रमिमीते नासतीति।

तत्र तात्पर्यटीका[२]

कल्पान्तरमाह — यद्वान् वा प्रमिमीते सोऽतिशयः। प्रमिमीत इति स्वतन्त्रं कर्तारं दर्शयति प्रतिपाद्यात् करणात् व्यवच्छेत्तुम्। यद्वानेवेति सावधारणम्। तत्र यद्वानिति कर्त्रन्तरं व्यवच्छिनत्ति। न हि कर्ता कर्तृमान्, किं तु प्रमाणवान्। स्वतन्त्रो ह्याश्रयः परतन्त्रेणाश्रीयते। कर्त्रधीनं हि करणम्। प्रमाता प्रमेयवानपि क्वचित् भवेत्, प्रमात्रधीनत्वात् प्रमेयस्य। न तु प्रमेयवानेव। अनु-मानादिषु प्रमेयस्यातीतत्वादिना तद्वत्ताविरहात्। न तु लिङ्गादिज्ञानरूपकरणरहितः कदाचित् इत्यवधारणफलम्। सोऽयं विशेषः प्रमातृप्रमेयाभ्यां प्रमाणस्य अस्यैव विशेषस्यातिशयत्वमन्वयव्यतिरेकाभ्यां दर्शयति — प्रमाणे सतीति।

न्यायवार्तिके पक्षान्तरम्

३. न्यायवार्तिके करणत्वविषये तृतीयकल्प एवमुक्तः — सतोर्वा अकर्तृत्वं यदभावात्। यस्य चाभावात् प्रमातृप्रमेये न प्रमां कुरुतः सोऽतिशयः[३] — इति। तत्र तात्पर्यटीकायां विवरणम्[४] — पूर्वेण भावप्रधानोऽतिशयो यादृशस्य दर्शितः तादृशस्यैवेह व्यतिरेकप्रधानोऽतिशय इति विशेषः। अकर्तृत्वमहेतुत्वम्।

न्यायवार्तिके कल्पान्तरम्

४. न्यायवार्तिके चतुर्थः कल्प उक्तः[५] — संयोगवच्चरमभाविता वा। यथा वा संयोगः पश्चाद्भावी द्रव्यशक्तिर्भवति, तथा प्रमाणं चरमभावि प्रमातृप्रमेययोः प्रमाशक्तिः भवतीति पश्चद्भावोऽतिशयः इति। तात्पर्यटीकायाम्[६] — सेतिकर्तव्यताकं हि व्यप्रियमाणं करणम्, न तु चक्षुरादिस्वरूपम्। करणादिशब्दप्रवृत्ति-निमित्तमात्रं तु स्वरूपं स्यादिति पूर्वमावेदितम्। तच्च (करणस्वरूपं) सिद्धमसिद्धं

---

[१] पृ. १०
[२] पृ. ३८
[३] न्या.वा.पृ. १०
[४] पृ. ३८
[५] पृ. १०
[६] पृ. ३८

वा प्रमातृप्रमेयव्यापारस्य पश्चादेव तथात्वेन (व्याप्रियमाणत्वेन) संपद्यत इति चरमभावीत्युच्यते। सोऽयमस्य चरमभावितातिशयः। यथा तन्तूनां पटे जनयितव्येऽन्त्याः संयोगभेदाः यदनन्तरं पट उत्पद्यत एवेति। एतेन कारकान्तरव्यापारापेक्षया चरमभाविव्यापारविशिष्टं कारकं करणमित्युक्तं भवति।

तदुक्तं परिशुद्धौ[१] — अत्रापि कारकान्तरेभ्यः चरमव्यापारं करणमिति लक्षणम् — इति।

न्यायवार्तिके कल्पान्तरम्

५. वार्तिके एव — प्रतिपत्तेरानन्तर्यं वा। यद्वा प्रमाणान्तरं प्रतिपत्तेर्जन्म स चायमतिशय इत्युक्तम्।

तात्पर्यटीकायाम्

यत एव प्रमाणं चरमभावि अत एव तदनन्तरं प्रतिपत्तेः प्रमायाः भावात् प्रतिपत्तेरानन्तर्यमेव प्रमाणस्यातियः। अनेन यद्व्यापाराव्यवहितोत्तरं कार्यमुत्पद्यते तत्करणमिति फलति। तदुक्तं परिशुद्धौ[२] — "अत्राप्यनन्तरं फलमिति कारणलक्षणम्" इति।

न्यायवार्तिके कल्पान्तरम्

६. वार्तिके षष्ठः कल्प उक्तः — असाधारणकारणता वा। प्रमाता तावत् साधारणं कारणं प्रत्यक्षादिज्ञानानाम्। सर्वप्रतिपत्तीनां प्रमेयमपि अशेषपुरुषसाधारणत्वात्तथाभूतम्। प्रमाणं त्वसाधारणकारणत्वात् प्रधानम्। प्राधान्याच्च साधकतमत्वेनाभिधीयत इति।

तात्पर्यटीकायाम्

चतस्रः खल्विमाः प्रत्यक्षादिप्रमितयो भिन्नबुद्धिव्यपदेशभाजोऽनुभूयन्ते। न च प्रमाता तद्भेदहेतुः। न च प्रमेयम्। एकस्यापि प्रमेयस्य संप्लवे सर्वप्रतिपत्तिसाधारण्यात्। प्रमाणानि तु यथायथं चतसृष्वपि प्रमितिषु असाधारणानीति भिन्नबुद्धिव्यपदेशनिबन्धनानि। तददिमसाधारणमतिशयः। अशेषः पुरुषः प्रमातात्र विवक्षितः इति।

---

[१] पृ. ११६

[२] पृ. ११६

परिशुद्ध्युक्तं करणलक्षणम्

परिशुद्धौ[1] — प्रमाविवक्षितजातिभेदव्यपदेशकं प्रमाणमिति लक्षणम् — इत्युक्तम्। अनेन प्रमायां विवक्षिताः ये जातिभेदाः प्रत्यक्षत्वानुमितित्वादयः तेन रूपेण व्यपदेशं प्रति हेतुः प्रमाणम्। अर्थात् प्रमात्वव्याप्यधर्मावच्छिन्नकार्यता-निरूपितकारणत्वं प्रमाणस्य लक्षणमित्युक्तं भवति। तेन कार्यत्वव्याप्यधर्मा-वच्छिन्नकार्यतानिरूपितकारणत्वं करणस्य लक्षणमिति लभ्यते।

वार्तिके कल्पान्तरम्

७. वार्तिके कल्पान्तरमभिहितम् — प्रमाकारणसंयोगविशेषकत्वं वा। यो वा प्रमाकारणं संयोगः तस्य प्रमाणमनुग्रहे वर्तमानमतिशयशब्दवाच्यम् — इति।

तात्पर्यटीकायाम्

प्रमाया असमवायिकारणं खल्वात्ममनः संयोगः। स च सर्वप्रमासाधारणः। नासौ प्रमात्रा प्रमेयेन वा शक्यो विशेष्टुम्। तयोरपि तद्वत्त्वेन साधारण्यात्। असाधारणं तु प्रमाणम् यथायथमात्ममनस्संयोगमवच्छिन्नति। तादृशं चावच्छेदकमिन्द्रियादि प्रमाणम्। सुखादिप्रमेयाणामपि मन एवासाधारणं व्यवच्छे-दकं द्रष्टव्यम्। सोऽयमस्यातिशयः इत्युक्तम्।

परिशुद्धौ[2] प्रोक्तं करणलक्षणम्

अत्रापि विवक्षितप्रमाजातिभेदौपाधिकत्वेन प्रमित्यसमवायिकारणविशेषकं प्रमाणमिति लक्षणम् — इत्युक्तम्। कार्यगतजातिविशेषौपाधिककार्यासमवायि-कारणविशेषकं करणमिति लक्षणं पर्यवस्यति।

न्यायमञ्जर्यां करणत्वनिर्वचनम्[3]

न्यायमञ्जरीकाराः जयन्तभट्टाः करणल्युडन्तप्रमाणशब्देन प्रमायाः करणं प्रमा-णमिति लभ्यते। तत्र किं तत् प्रमायाः करणमिति शङ्कां मनसिकृत्य — अव्यभिचारिणीमसंदिग्धामर्थोपलब्धिं विदधती बोधाबोधस्वभावा सामग्री प्रमाणम् — इत्युक्तवन्तः। एतेन कारणसामग्री करणमिति तेषां पक्षः सूचितः।

---

[1] पृ. ११६

[2] पृ. ११६

[3] न्या.म.पृ. ३१-३७

तदनन्तरं सामग्र्याः करणत्वाक्षेपपूर्वकं समाधानं विस्तरेणोक्तम्। प्रकृतोपयोगी तदंशः संगृह्यते।

तत्र आक्षेपः

ननु च प्रमीयते येन तत् प्रमाणमिति करणसाधनोऽयं प्रमाणशब्दः। करणं च साधकतमम्। तमबर्थश्चातिशयः। स च आपेक्षिकः। साधकान्तरसंभवे हि तदपेक्षया अतिशययोगात् किंचित् साधकतममुच्यते। सामग्र्याश्चैकत्वात् तदतिरिक्तसाधकान्तरानुपलम्भात् किमपेक्षया अस्याः अतिशयं ब्रूमः।

अपि च कर्मकारकस्यापि सामग्र्यन्तर्भूतत्वात् सामग्र्याः करणत्वे कर्मणोपि करणत्वं प्राप्नोति। अपि च लोकेऽपि सामग्र्याः करणभावं नानुमन्यते तस्यां करणविभक्तिमप्रयुञ्जानः। न ह्येवं वक्तारो भवन्ति लौकिकाः सामग्र्या पश्याम इति। किं तु दीपेन पश्यामः, चक्षुषा निरीक्षामह इत्याचक्षते। तस्मान्न सामग्री कारणम्। अकारणत्वाच्च न प्रमाणमिति नेदं साधु प्रमाणस्वरूपम्।

तत्र समाधानम्

अत्रोच्यते। यत एव साधकतमं करणम्, करणसाधनश्च प्रमाणशब्दः, तत एव सामग्र्याः प्रमाणत्वं युक्तम्। अनेककारकसंनिधाने कार्यं घटमानम्, अन्यतरव्यपगमे च विघटमानं कस्मा अतिशयं प्रयच्छेत्। न चातिशयः कार्यजन्मनि कस्यचित् अवधार्यते, सर्वेषां तत्र व्याप्रियमाणत्वात्। एतदुक्तं भवति — यस्मिन् सति कार्यं निष्पद्यते, यस्मिन्नसति न, तदेव साधकतमं भवति। प्रत्येकं कारकाणां सत्त्वेऽपि कार्यं न हि निष्पद्यते। कारकाणां समग्रतायां च कार्यं निष्पद्यते। अतः कारकसाकल्यापरपर्यायसामग्र्येव करणमिति युक्तम्। प्रत्येकं कारकाणि कारणानि, तत्समुदायश्च करणमिति सारमिति।

संनिपत्यजनकत्वमतिशय इति चेन्न। आरादुपकारकाणामपि कारकत्वानपायात्। ज्ञाने च जन्ये किमसंनिपत्यजनकम्। सर्वेषामिन्द्रियमनोऽर्थादीनामितरेतरसंसर्गे सति ज्ञाननिष्पत्तेः। व्यापारद्वारा कारकं संनिपत्योपकारकम्। अद्वारककारणमारादुपकारकम्। अवान्तरापूर्वद्वारा परमापूर्वफलकं प्रोक्षणादि संनिपत्योपकारकम्। साक्षात् परमापूर्वफलकं प्रयाजादि आरादुपकारकम्। एतदुक्तं भवति — व्यापारवत्कारणस्यैव करणत्वात् व्यापाररूपातिशय एव तमबर्थ इति न युक्तम्। कारकत्वं हि क्रियावेशमन्तरा न संभवतीति सर्वेषु कारकेषु समानमिदम्। चक्रभ्रमणादीनां व्यापाराणां साक्षात् घटादिजनकानामपि कारकत्वमविशिष्टमिति व्या-

पारावेशमादाय वैलक्षण्यं दुर्वचम्। ज्ञाने तु सुतरां तद्दुर्वचम्। संयोगरूपस्य व्यापारस्य द्विनिष्ठत्वेन इन्द्रियमेव करणं घटादि च कर्म इति नियमसंभव इति।

तस्मात् फलोत्पादाविनाभाविस्वभावत्वरूपमवश्यतया कार्यजनकत्वमेवातिशयः। स च सामग्र्यन्तर्गतस्य कस्यचिदेकस्य कारकस्य न कथयितुं पार्यते। सामग्र्यास्तु सोऽतिशयः सुवचः। संनिहिता चेत् सामग्री संपन्नमेव फलमिति। तथा च सामग्र्या एव फलोत्पादाविनाभाविस्वभावत्वात् सैवातिशयवती करणम्।

आक्षेपः समाधानं च

ननु किमपेक्षं सामग्र्यां साधकतमत्वरूपं करणत्वम्। अन्तर्गतकारकापेक्षमिति ब्रूमः।

ननु अन्वयव्यतिरेकवशात् सामग्र्याः कारणत्वावधारणेऽपि प्रत्येककारकसत्त्वे कार्यानुत्पादेनान्वयव्यभिचारात् प्रत्येकं कारकाणां कारणत्वासंभवेन न तदपेक्षः अतिशयः सामग्र्याः वक्तुं शक्य इति चेत् — न। कारकाणां समुदायविशेषः सामग्री। समुदायश्च समुदाय्यनतिरिक्तः। ततश्च समुदाये विद्यमानः कारणत्वरूपो धर्मः न समुदायिनां कारणत्वं विहन्ति। तथा सति प्रत्येकं कारणत्वाभावेन समुदितस्यापि कारणत्वं न स्यात्। ननु प्रत्येकं कारकाणां कार्यव्यभिचारात् कथं कारणत्वावधारणमिति चेत्, लोक एव प्रष्टव्यः। पामरोऽपि हि तन्तूनां प्रत्येकं सतामपि पटकारणत्वं प्रत्येति। अतश्च यत्सत्त्वे यत्सत्त्वं, यदभावे यदभाव इति सहचारग्रहः सर्वानुभवसिद्धः। न हि यन्मात्रसत्त्वे यत्सत्त्वमित्यन्वयसहचारः। अतः प्रत्येकमपि कारणत्वं वर्तत एवेति।

ननु समुदायिभ्यः समुदायरूपा सामग्री भिन्ना चेत् कथं पृथङ्नोपलभ्यते। अभिन्ना चेत् सर्वाण्यपि कारकाणि करणीभूतान्येवेति कर्तृकर्मव्यवहारोच्छेदप्रसङ्गः।

मैवम्। समग्रकारकसंनिधानाख्यस्य समुदायस्य प्रत्यक्षमुपलम्भात्। पृथगवस्थितेषु हि स्थालीजलज्वलनतण्डुलादिषु न समग्रताप्रत्ययः, समुदितेषु तु भवतीत्यतः तन्तुपटलपरिघटितपटाद्यवयविवत् कारककलापनिष्पाद्यावयव्यन्तराभावेऽपि समुदायात्मिका सामग्री विद्यत एवेति समुदाय्यपेक्षया अतिशयं तत्प्रयुक्तं करणत्वं च भजते।

यत्तु अभ्यधायि सामग्र्याः करणविभक्तिनिर्देशो न दृश्यत इति। तत्रोच्यते। सामग्री हि संहतिः। सा हि संहन्यमानव्यतिरेकेण न व्यवहारपदवीमवतरति। तेन सामग्र्या पश्यामीति न व्यपदेशः।

यस्तु दीपेन्द्रियाणां तृतीयानिर्देशः दीपेन पश्यामः, चक्षुषा निरीक्षामह इति सफलोपजननाविनाभावित्वाख्यः यः सामग्रीधर्मः तदारोपनिमित्तकः। अन्यत्रापि तद्रूपसमारोपेण 'स्थाली पचति' इति व्यपदेशो दृश्यत एव। तस्मादन्तर्गतकारकापेक्षया लब्धकरणभावा सामग्री करणम्।

तस्मात् फलोत्पादाविनाभावित्वरूपमवश्यतया कार्यजनकत्वमतिशयः। तद्वत् कारकं करणम्। तच्च सामग्र्येव। सामग्र्यन्तर्गतस्य तु सामग्रीगतकरणत्वारोपेण करणत्वव्यवहार इति न्यायमञ्जर्यां जयन्तभट्टकृतो निर्णयः।

जयन्तभट्टप्रदर्शितं मतान्तरम्

न्यायमञ्जर्यां[१] — अपरे पुनराचक्षत इत्यादिना करणस्वरूपं प्रकारान्तरेण प्रतिपादितम्। तथा हि — सामग्री नाम समुदितानि कारकाणि। तेषां द्वैरूप्यं न हृदयंगमम्। तान्येव पृथगवस्थितानि कर्मादिभावं भजन्ते, अथ च तान्येव समुदितानि करणीभवन्तीति कोऽयं नयः?

तस्मात् कर्तृकर्मव्यतिरिक्तं अव्यभिचारादिविशेषणकार्थप्रमाजनकं कारकं करणमुच्यते। तदेव तृतीयया व्यपदिशन्ति दीपेन पश्यामि, चक्षुषा निरीक्षे, लिङ्गेन बुध्ये, शब्देन जानामि, मनसा निश्चिनोमीति।

ननु त्रीण्येव कर्तृकर्मकरणानि कारकाण्यस्मिन् पक्षे भवेयुः। ज्ञानक्रियायां तावदेवमैवेतत् यथा भवानाह। पाकादिक्रियासु क्रियाश्रयतण्डुलधारणाद्युपकारभेदपर्यालोचनया भवतु अधिकरणादिकारकान्तरव्यवहारः। प्रमितौ तु मनोदीपचक्षुरादेः न विशेषो लक्ष्यत इति तत् सर्वं करणत्वेन संमतम्।

कस्तेषु तमबर्थोऽतिशय इति चेत् — अस्ति कश्चित् यदयं लोकः "अहं मया जानामि" "घटं घटेन जानामि" इति कर्तृकर्मणी न विस्मृत्यापि करणत्वेन व्यपदिशति। नयनमनोदीपशब्दलिङ्गानि तु तथा व्यपदिशति। सोऽयमेषां पश्यति कर्तृकर्मवैलक्षण्यं चक्षुरादीनाम्। तद्वैलक्षण्यमेव च तेषामतिशयः इति।

कारकचक्रानुसारेण करणत्वनिर्वचनम्[२]

भवानन्दतर्कवागीशेन न्यायवार्तिकोक्तरीतिमवलम्ब्य करणत्वमेवं निरुक्तम्। करणत्वं च कारकान्तरेऽचरितार्थत्वे सति हेतुत्वम्। तत्र चरितार्थत्वं च तद्व्यापारमुत्पाद्यैव फलहेतुत्वम्। कर्ता हि सिद्धं कुठारादिकं व्यापारयन् छिदालक्षणं

---

[१] पृ. ३७

[२] पृ. ४०-४६

फलमुत्पादयतीति करणे चरितार्थो न तु फले। कर्मापि करणे चरितार्थं कर्मासिद्धौ करणव्यापारासिद्धेः। न हि छेद्यासिद्धौ कुठारादिकरणानां छिदानुकूलव्यापारः संभवति। अत एव करणव्यापारविषयत्वं कर्मत्वमिति प्राञ्चः।

अधिकरणमपि कर्तृकर्मान्यतरव्यापारकक्रियानिष्पादकम्। यथा "गृहे चैत्रः स्थाल्यां तण्डुलं पचति" इत्यत्र चैत्रव्यापारसंपादनेन गृहस्य, तण्डुलव्यापार-संपादनेन स्थाल्याश्च कारकत्वम्। चैत्रव्यापारः चैत्रस्थितिरूपश्चैत्रसंयोगः। तण्डुल-व्यापारः तण्डुलसंयोगः।

संप्रदानापादानयोश्च न क्रियासामान्यहेतुत्वम्। दानेऽनुमतिप्रकाशनेन कर्तु-रिच्छामुत्पाद्य संप्रदानस्य, पर्णादौ पतनप्रतिबन्धकसंयोगनाशकविभागमुत्पाद्य अपादानस्य चरितार्थत्वमेवेति।

एवं च तदनुकूलव्यापारमद्वारीकृत्य तज्जनकत्वं फलायोगव्यवच्छिन्नकारण-त्वपर्यवसितं करणत्वमिति लब्धम्। एवं चैतन्मते चरमकारणत्वमेव करणत्वमिति कुठारादौ करणपदं गौणमिति।

करणस्य लक्षणान्तरम्

वस्तुतस्तु व्यापारवत् कारणं करणम्। तेन कुठारादौ नाव्याप्तिः। न चैवमदृष्टद्वारा कार्यमात्रे, विशेषतो ज्ञानेच्छादौ मनोयोगद्वारा आत्मनः करणत्वा-पत्तिः इति वाच्यम्। इष्टापत्तेः। उपधेयसंकरेऽप्युपाधेरसंकरात्। धर्मभेदेऽपि धर्मिण ऐक्यादित्यर्थः। एकस्मिन् धर्मिण कर्तृत्वकरणत्वयोः सत्त्वेऽपि न विरोध इति तात्पर्यम्। अन्ये तु करणलक्षणे कर्तृभिन्नत्वे सतीति विशेषणं दत्त्वा कर्तरि करणत्वप्रसङ्गं वारयन्ति।

इत्थं चानुमितौ व्याप्तिस्मृतिः करणम्, परामर्शो व्यापारः। चक्षुषा चाक्षुषे जननीये चक्षुस्संयोगो व्यापारः। श्रोत्रेण श्रावणज्ञाने जननीये श्रोत्रमनस्संयोगो व्यापारः।

कारकचक्रे मतान्तरेण करणत्वनिर्वचनम्

अन्ये तु — कुठारादौ करणे कर्तृव्यापारविषयत्वं करणत्वम्। कर्तृव्यापार-विषयत्वं च फलानुकूलकर्तृव्यापारवत्त्वम्। कुठारादौ छिदानुकूलकर्तृसंयोगः नमनोन्नमनादिमत्त्वमविकलम्। न चैवं स्थाल्यादेरधिकरणस्यापि कर्तृजन्यतण्डुल-संयोगादिरूपव्यापारवत्त्वात् तत्रातिव्याप्तिरिति वाच्यम्। उपधेयसंकरस्येष्टत्वात्।

ननु चेष्टायां कृतिरूपव्यापारस्य विषयतासंबन्धेन सत्त्वात्, हस्तादौ चेष्टारूप-कर्तृव्यापारस्य समवायसंबन्धेन सत्त्वात् तयोरपि छिदादौ करणत्वापत्तिरिति चेन्न। इष्टापत्तेः। चेष्टया हस्तादिना च छिनत्तीति प्रयोगस्य सर्वसंमतत्वात्। कर्मादावपि विवक्षावशात् करणत्वं भवत्येव। "तण्डुलेन स्थाल्यामोदनं साधयति, गवा दानं साधयति, ब्राह्मणेन दानं साधयति" इति प्रयोगात्।

ननु कर्तुरपि करणत्वापत्तिः। आत्मनि कर्तरि कृतिरूपकर्तृव्यापारस्य, कर्तृ-शरीरे च चेष्टारूपकर्तृव्यापारस्य सत्त्वात्। तथा च "चैत्र आत्मना चैत्रेण वा पचति" इति प्रयोगापत्तिरिति चेत् — न। तद्वारणाय द्रव्यासमवायिक्रियानुकूल-कृतिमद्भिन्नत्वरूपविशेषणस्य उक्तकरणलक्षणे दातव्यत्वात्। द्रव्यसमवाय्यन्यत्व-विशिष्टकृतिमद्भिन्नत्वमिति तदर्थः। वैशिष्ट्यं च कृतौ सामानाधिकरण्यसंबन्धेन। कृतिमत्त्वं च समवायावच्छेदकत्वान्यतरसंबन्धेन। कृतिमदन्यत्वमात्रोक्तौ हस्ता-दाववच्छेदकत्वसंबन्धेन कृतिमत्त्वसत्त्वात् तेषाम् असंग्रहः स्यात्। अतः कृतौ द्रव्यसमवाय्यन्यत्ववैशिष्ट्यमुक्तम्। हस्तादेः शरीररूपद्रव्यसमवायित्वात् तदन्यत्व-रूपविशेषणाभावप्रयुक्तविशिष्टकृतिमद्भिन्नत्वसत्त्वात् करणत्वोपपत्तिः। द्रव्यसम-वायित्वं च समवायसंबन्धेन द्रव्यवत्त्वं, द्रव्यप्रतियोगिकसमवायानुयोगित्वमिति यावत्। आत्मनि समवायेन न किमपि द्रव्यमस्ति। आत्मशरीरस्यान्त्यावयवित्वात् तत्रापि समवायसंबन्धेन किमपि द्रव्यं नास्ति इति तयोः द्रव्यसमवाय्यन्यत्वरूप-विशेषणमप्यस्ति। समवायावच्छेदकत्वान्यतरसंबन्धेन कृतिमत्त्वं चास्तीति विशिष्टकृतिमत्वात्तद्भिन्नत्वविरहान्न तयोः करणत्वम्।

परं तु कर्तृव्यापारविषयत्वरूपमिदं करणत्वं व्याप्तिस्मृत्यादौ नास्ति। अतस्तत्र व्यापारवत्कारणत्वरूपमेव करणत्वम्। इत्थं च करणपदं नानार्थकमित्याहुः।

"परशुना च्छिनत्ति" इत्यादौ निरुक्तकरणत्वं तृतीयार्थः। प्रकृत्यर्थस्य तत्रा-धेयतासंबन्धेनान्वयः। करणत्वस्य निरूपकतासंबन्धेन धात्वर्थच्छेदनेऽन्वयः। इत्थं च परशुनिष्ठकरणत्वनिरूपकछेदनानुकूलकृतिमांश्चैत्र इति बोधः।

"परशुना च्छिनत्ति न दात्रेण" इत्यादौ निरूपकत्वस्य वृत्त्यनियामकतया अभावप्रतियोगितानवच्छेदकत्वेन तत्संबन्धावच्छिन्नप्रतियोगिताकाभावस्य नञा बोधयितुमशक्यत्वात् निरुक्तकरणतानिरूपितजन्यत्वमेव तृतीयार्थः। जन्यतायां निरूपितत्वसंबन्धेन करणतायामाधेयतासंबन्धेन च प्रकृत्यर्थस्य परश्वादेरन्वयः। तथा च परशुनिष्ठकरणतानिरूपितपरशुनिरूपितजन्यत्वाश्रयच्छेदनानुकूलकृति-मांश्चैत्र इत्यन्वयबोधः इति नव्याः। वस्तुतस्तु प्रकृत्यर्थस्य परशोः द्विधाभानमत्र पक्षे वक्तव्यमिति जन्यत्वं तृतीयार्थः। तत्र निरूपितत्वसंबन्धेन परशोः,

जन्यत्वस्याश्रयत्वसंबन्धेन छेदनेऽन्वयः। परशुनिरूपितजन्यत्वाश्रयच्छेदनानुकूलकृतिमानिति परशुना छिनत्तीत्यतो बोधः। न दात्रेणेत्यत्र तु दात्रनिरूपितजन्यत्वाभाववच्छेदनानुकूलकृतिमानिति बोध इति युक्तं प्रतिभाति।

जगदीशप्रदर्शितं करणत्वविवेचनम्

शब्दशक्तिप्रकाशिकायां जगदीशतर्कवागीशेन करणत्वमेवं निरुक्तम्[१] —

योऽर्थो विकरणाक्तस्य धातोरर्थे तृतीयया।
बोध्यते करणं नाम कारकं तदिहोच्यते।।

अविकरणस्य यद्धातूपस्थाप्ययादृशार्थे तृतीयया यादृशः स्वार्थोऽनुभाव्यते स तद्धातूपस्थाप्यतादृशक्रियायाः करणसंज्ञकं कारकमुच्यते। विकरणविशिष्टयद्धातूपस्थाप्ययादृशार्थधर्मिकान्वयबोधनिरूपिततृतीयाज्ञानप्रयोज्यप्रकारताश्रयः यादृशोर्थः, तादृशार्थः तद्धातूपस्थाप्यतादृशार्थे करणत्वमिति पर्यवसितम्। "दात्रेण छिनत्ति" इत्यत्र व्यापारद्वारा जन्यत्वं तृतीयार्थः। तत्र निरूपितत्वसंबन्धेन दात्रस्यान्वयः। जन्यत्वस्याश्रयत्वसंबन्धेन धात्वर्थे छेदनेऽन्वयः। दात्रनिरूपितसव्यापारकजन्यत्वाश्रयछेदनानुकूलकृतिमानिति बोधः। अत्र सव्यापारकजनकत्वमेव करणत्वम्।

"घटत्वेन जानाति" इत्यत्र प्रकारित्वं तृतीयार्थः, घटत्वनिरूपितप्रकारिताश्रयज्ञाननिरूपिताश्रयतावान् इति बोधः। अत्र प्रकारित्वं करणत्वम्। "चैत्रेण पक्वम्" इत्यत्र तृतीयार्थस्य कर्तृत्वस्य करणत्वरूपतानिरासाय विकरणाक्तस्येति धातुविशेषणम्। "हस्तेन रुणद्धि" इत्यादौ विकरणान्तभिन्नोऽपि रुधादिधातुर्विकरणाक्त-एव। अतस्तत्र तृतीयार्थस्य करणत्वरूपता। अत एव विकरणान्तस्येत्यनुक्त्वा विकरणाक्तस्येत्युक्तम्।

"घृतेनात्ति जुहोति" इत्यादावपि लुप्तमेव प्रतिसन्धीयमानं विकरणमस्तीति मतेनेदम्। नातस्तत्र घृतादेः करणत्वानुपपत्तिः।

करणशब्दः व्यापारसंबन्धेन जनकस्य वाचकः। ननु व्यापारत्वस्यानुगतस्याभावात् संबन्धभेदेन जनकताया भिन्नत्वात् व्यापारसंबन्धावच्छिन्नजनकताश्रये करणशब्दस्य शक्तिकल्पनमसंभवीति चेत् — न। स्वजन्यत्वस्वजन्यजनकत्वोभयसंबन्धेन किंचिद्विशिष्टत्वं व्यापारत्वमनुगतं निरूप्य तादृशव्यापारत्वोपलक्षितधर्मावच्छिन्नसंसर्गताकजनकत्वविशिष्टस्य करणशब्दशक्यत्वस्वीकारात्।

---

[१] श.श.प्र.पृ.३११

चाक्षुषादौ चक्षुरादिः संयोगेन, अनुमित्यादौ व्याप्तिज्ञानादिः परामर्शादिना, स्मृत्यादावनुभवादिः संस्कारादिना स्वव्यापारेणैव संबन्धेन हेतुः।

शरीरात्मप्रभृतयस्तु ज्ञानादौ तादात्म्येनैव हेतुर्न तु व्यापारसंबन्धेन। अतो न तेषां ज्ञानादौ करणत्वम्।

श्रावणप्रत्यक्षे कर्णावच्छिन्नशब्दात्मना व्यापारेणैव संबन्धेन श्रोत्रं करणम्। स्वव्यवस्थापकगुणं पुरस्कृत्यैव बहिरिन्द्रियाणां प्रवृत्तेः। न चैवं शब्दसामान्याभावस्य प्रत्यक्षं न स्यात्, तत्र व्यापारीभूतशब्दस्य तादात्म्यसंबन्धेनासत्त्वात् इति वाच्यम्। इष्टापत्तेः। यद्वा श्रोत्रमनस्संयोग एव श्रावणप्रत्यक्षे व्यापारः। तेन शब्दाभावस्यापि श्रावणप्रत्यक्षोपपत्तिः।

धारावाहिकज्ञानस्थले तृतीयादिज्ञानं प्रति द्वितीयादिज्ञानं न प्रथमादिज्ञानस्य संबन्धः। तत्संबन्धेन हेतुत्वे मानाभावात्। अतः तृतीयादौ प्रथमादेः न करणत्वम्।

अथ वा फलायोगव्यवच्छिन्नं फलोपधायकं वा कारणं करणम्। फलायोगव्यवच्छिन्नमित्यस्य अव्यवहितपूर्वत्वसंबन्धावच्छिन्नप्रतियोगिताकप्रतियोगिव्यधिकरणफलाभावविशिष्टान्यदित्यर्थः। फलोपधायकमित्यस्य अव्यवहितपूर्वत्वसंबन्धेन फलविशिष्टमित्यर्थः।

ज्ञानादावात्मादेः करणत्वमिष्टमेव। उपधेयसंकरेऽपि कर्तृत्वकरणत्वाद्युपाधेयासांकर्यात् उपाधिभेदमादाय कारकस्य षड्विधत्वम्। अत एव — "आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना" इत्यादयः प्रयोगाः संगच्छन्ते। अत एव च "विवक्षातः कारकाणि भवन्ति" इति प्रवादोऽपि संगच्छते। कर्तृत्वकरणत्वयोरेकत्र सत्त्वं विना कथमयं प्रवादः संगतः स्यात्।

परं तु पक्षेऽस्मिन् अकरणत्वेन सर्वजनसिद्धानां साधारणकारणानां करणत्वमनुभवविरुद्धम् इति केचित्। "दण्डेन घट" इत्यत्रापि करणत्वं तृतीयार्थः। परं तु तन्न कारकम्, क्रियानन्वयित्वात्। इति जगदीशकृतो निष्कर्षः।

गदाधरभट्टाचार्यकृतं करणत्वविवेचनम्

व्युत्पत्तिवादे[1] — भट्टाचार्यैः तृतीयार्थस्य करणत्वस्य विवेचनं यत् कृतं तत् संगृह्यते। "काष्ठेन पचति" इत्यादौ करणत्वं तृतीयार्थः। तच्च व्यापारवत्कारणत्वम्। व्यापारे कर्तृव्यापाराधीनत्वं निवेशनीयम्। अन्यथा कर्तुरपि

[1] पृ. २२४-२२६

चेष्टादिरूपव्यापारवत्कारणत्वेन करणतापत्त्या "चैत्रश्चैत्रेण पचति, काष्ठं चैत्रेण पचति" इत्यादिप्रयोगापत्तेः।

न च कर्तुश्चेष्टादिरूपव्यापारस्य तदीयकृत्यादिव्यापाराधीनतया तद्विशेषणदानेऽपि करणत्वं दुर्वारमेवेति वाच्यम्। स्वभिन्नत्वेन कर्तुर्विशेषणीयत्वात्। तथा च स्वभिन्नकर्तृव्यापाराधीनव्यापारवत्त्वे सति कारणत्वं करणत्वम्। स्वपदेन यस्य करणत्वमुपपादनीयम् तद्ग्राह्यम्।

न चैवं यत्रैकैव पाकादिक्रिया चैत्रेण काष्ठादिना मैत्रेण तुषादिप्रक्षेपेण निष्पाद्यते, तत्र 'चैत्रस्तुषैः मैत्रः काष्ठैः पचति' इति प्रयोगप्रसङ्गः, चैत्रकर्तृकत्वतुषकरणकत्वमैत्रकर्तृकत्वकाष्ठकरणकत्वानामेकस्यां पाकक्रियायां सत्त्वात् इति वाच्यम्। समभिव्याहृतकर्तृव्यापाराधीनत्वस्य तत्तत्करणव्यापारे विशेषणत्वमुपगम्य तथा प्रयोगस्य वारणीयत्वात्। तथा च स्वव्यापारप्रयोज्यत्वस्वावृत्तित्वोभयसंबन्धेन समभिव्याहृतकर्तृविशिष्टव्यापारवत्कारणत्वं करणत्वमिति पर्यवसितम्। तथा च तुषनिष्ठव्यापारे समभिव्याहृतचैत्रव्यापाराधीनत्वस्य काष्ठनिष्ठव्यापारे मैत्रव्यापाराधीनत्वस्य बाधितत्वान्नोक्तप्रयोगः।

न च समभिव्याहृतकर्त्रन्तर्भावेण तृतीयार्थत्वे कर्त्रसमभिव्याहारस्थले करणे तृतीयाया अप्रयोगापत्तिरिति वाच्यम्। तत्रापि "हेतौ"[१] इति सूत्रेण हेतुतामात्रार्थकतृतीयायाः संभवात्। धनेन कुलं, विद्यया यश इत्यादिवत्। न हि तत्र करणे तृतीया, क्रियायोगाभावात्।

ननु उक्तस्थले "चैत्रस्तुषैः पचति" इति प्रयोगस्य हेताविति सूत्रबलादापत्तिः। नचेष्टापत्तिः। समभिव्याहृतकर्त्रन्तर्भावस्य वा करणे स्वतन्त्रतृतीयानुशासनस्य वा वैयर्थ्यप्रसङ्गादिति चेत् — उच्यते। उक्तस्थले पाके तुषहेतुकत्वाभावबाधेऽपि चैत्रस्तुषैर्न पचति, किं तु दारुणैवेति प्रयोगोपपत्तये करणत्वे समभिव्याहृतकर्त्रन्तर्भावेण तृतीयायाः शक्तिकल्पनाया आवश्यकत्वात्। तादृशशक्तिग्राहकतयैव करणे तृतीयानुशासनस्यावश्यकत्वात्।

किं च 'शरैः शातितपत्रोऽयम्' इत्यत्र तृतीयार्थस्य समासैकदेशार्थे शातनेऽन्वय इष्टः। स च शरपदोत्तरतृतीयायाः कारकविभक्तित्व एव निर्वहति। हेतुतृतीयायाः कारकविभक्तित्वाभावात् तदर्थस्य हेतुत्वस्य शातनेऽन्वये समासाघटकपदार्थेन सह समासघटकपदार्थस्यान्वये सामर्थ्याभावेन समासानुपपत्तिः। शरैरिति करणे तृतीयेति स्वीकारे तु तदर्थस्य शातनेऽन्वयः,

---

[१] सू. २.३.२३

प्रतियोगिपदादन्यत् यदन्यत् कारकादपि।
वृत्तिशब्दैकदेशार्थे न तस्यान्वय इष्यते।।

इत्यनुशासनसंमत इति समास उपपन्नो भवति। अतस्तदनुरोधेन करणे तृतीयानुशासनस्य सार्थक्यम्।

न च तृतीयायाः समभिव्याहृतकर्त्रन्तर्भावेण करणत्वार्थकत्वे शरैः शातितपत्र इत्यत्र समभिव्याहृतकर्त्रभावात् अकारकविभक्तित्वं करणे तृतीयानुशासनेऽपि दुर्वारमेवेति वाच्यम्। एतदनुरोधेन तत्र कर्तुः अध्याहरणीयत्वात्।

वस्तुतः समभिव्याहृतकर्तृव्यापाराधीनत्वे व्यापारवत्कारणत्वे च तृतीयायाः शक्तिद्वयम्। कर्त्रसमभिव्याहारस्थले व्यापारवत्कारणत्वमात्रं प्रतीयते, कर्तृसमभिव्याहारस्थले व्यापारे कर्तृव्यापाराधीनत्वमपि भासत इति सामञ्जस्यम्।

एवं हेतुतृतीयायाः "अकर्तर्यृणे पञ्चमी"[१] इति सूत्रेण (कर्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमी स्यात् इत्यर्थकेन) बाधनात् करणत्वविवक्षायां "धनवता ऋणेन बद्धोऽयम्" इत्यत्र तृतीयाया उपपत्तये करणे तृतीयानुशासनस्यावश्यकता बोध्या।

कारणत्वं च फलोपधानरूपमेव करणताघटकम्। अन्यथा कुठारादिकरणकच्छिदादौ दात्रादेरपि स्वरूपयोग्यतया करणत्वापत्तेः।

अत्राहुः प्रकाशकाराः — ननु छिदात्वावच्छिन्नं प्रति दात्रत्वेन करणत्वं न संभवति, दात्रस्याभावेऽपि कुठारेण छिदोत्पत्तेः। नापि कुठारत्वेन, तदभावेपि दात्रेण छिदोत्पत्तेः। अतोऽव्यवहितोत्तरत्वघटित एव कार्यकारणभावो वाच्यः। तथा च कुठारकरणकच्छिदायां कथं दात्रस्य स्वरूपयोग्यत्वम्? कारणतावच्छेदकधर्मस्यैव स्वरूपयोग्यत्वरूपत्वादिति चेत् — न। सर्वेषां छिदाकरणानां कुठारादीनामन्यतमत्वेनैव कारणत्वात्। यत्रान्यतमत्वेन कारणत्वे सहकारिनियमानुपपत्तिः तत्रैव तृणारणिमणिन्यायेन प्रत्येकधर्मपुरस्कारेण कारणत्वमित्यभिप्रायकोऽयं ग्रन्थ इति प्रतिभाति — इत्याहुः।

एवं च व्यापारवत्कारणत्वं करणत्वमिति पक्षमेव गदाधरभट्टाचार्या आद्रियन्तेति सिद्धम्।

पदवाक्यरत्नाकररीत्या करणत्वविवेचनम्

पदवाक्यरत्नाकरे गोकुलनाथोपाध्यायाः करणत्वमित्थं निष्कर्षन्ति[२] —

---

[१] सू. २.३.२४
[२] प.वा.र.पृ. ६४२

व्यापारसान्तरो हेतुः फलेनोपहितोऽथवा।
करणं तत्र सुब्वाच्यो व्यापार उपधेयता।।

व्यापारसान्तरः = स्वजन्यव्यापारमन्तराकृत्य फलजनकः साक्षात् फलाजनकः हेतुः करणम्। तेन विक्लित्त्या 'ओदनं पचति' इति न प्रयोगः। तत्र विक्लित्तेः ओदनं प्रति साक्षादेव जनकत्वम्। अथवेति पक्षान्तरे। फलेनोपहितः = फलोपधायकः हेतुः करणम्। फलोपधायकस्य करणरूपत्वे व्यापारः उपधेयतास्वरूपः सुब्वाच्यः इति श्लोकस्यार्थः।

तथा च सव्यापारकं कारणं करणम्। ततश्च यदा अधिश्रयणादिस्वरूपो व्यापारो धातुनोपस्थाप्यते, तदा अधिश्रितस्य कर्तृत्वं 'स्थाली पचति' इति। यदि च धातुना नाभिधीयते, विवक्ष्यते च धात्वर्थजनकतया तदा स्थाल्यादिः सर्वोऽपि कारकगणः करणमेव। यदाहुः —

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत् तदा स्मृतम्।।
वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा व्यवस्था दृश्यते यतः।।

इति। [वाक्यपदीये]

तथा च "काष्ठेन पच्यत" इत्यत्र काष्ठनिष्ठव्यापारजन्यः एकाधिकरणक-विक्लित्तिजनकः पाकः इत्यन्वयबोधः। आश्रयव्यापारोभयं व्यापारमात्रं वा तृतीयार्थः। काष्ठस्याधेयतासंबन्धेन तृतीयार्थे व्यापारे व्यापारस्य जन्यतासंबन्धेन धात्वर्थे पाके अन्वयः।

वस्तुतस्तु क्वचित् तृतीयार्थे व्यापारे प्रकृत्यर्थस्य जन्यतासंबन्धेनान्वयः। यथा अनुभवेन स्मरतीत्यत्र तृतीयार्थे संस्कारे अनुभवस्य, "यागेन स्वर्गं गच्छति" इत्यत्र तृतीयार्थेऽपूर्वे यागस्य, "चक्षुषा पश्यति" इत्यत्र तृतीयार्थसंनिकर्षे चक्षुषः, "श्रोत्रेण शृणोति" इत्यत्र तृतीयार्थे शब्दे श्रोत्रस्य च जन्यत्वेनान्वयः। अनुभव-जन्यसंस्कारजन्यं स्मरणम्, यागजन्यापूर्वजन्यं स्वर्गगमनम्, चक्षुर्जन्यसंनिकर्षजन्यं दर्शनम्, श्रोत्रजन्यशब्दजन्यं श्रवणमिति बोधात्।

क्वचिच्च आधेयत्वं संबन्धः। यथा "चिकीर्षया प्रवर्तते, परामर्शेनानुमीयते, शब्देन शृणोति" इत्यादौ प्रत्यासत्तिभूतचिकीर्षापरामर्शशब्दानां समवायः तृतीयो-पात्तः आधेयतासंबन्धेन प्रकृत्यर्थविशेषितः प्रवृत्त्यनुमितिश्रवणेषु जन्यत्वसंबन्धेन

अन्वेति। चिकीर्षाप्रतियोगिकसमवायजन्या प्रवृत्तिः परामर्शसमवायजन्या अनुमितिः, शब्दसमवायजन्यं श्रावणम् इति बोधाः।

सर्वत्र वा करणतृतीयार्थे प्रकृत्यर्थस्य जन्यजनकभावः संबन्धः। चिकीर्षया प्रवर्तत इत्यादौ हेतौ तृतीया, न तु करणे, "दण्डेन घट" इतिवत् इति वैयाकरणाः।

अनुमानीयः परामर्श इत्यत्र करणे छप्रत्ययात् परामर्शेनानुमीयत इत्यत्र करण एव तृतीया। करणत्वं फलोपधायकत्वं स एव तृतीयार्थः। उपहितत्वं वा। हेतुतृतीयास्तु स्वरूपयोग्यत्वमर्थ इत्यन्ये।

विभक्त्यर्थनिर्णयानुसारेण करणत्वनिर्वचनम्

करणे तृतीयाया अर्थश्च।[१] करणपदसंकेतग्राहकमनुशासनं "साधकतमं करणम्"[२] इति। साधकतमत्वं च फलायोगव्यवच्छिन्नव्यापारवत्त्वम्। व्यापारस्य साधकं करणमिति ज्ञापयन् तमप्प्रत्ययः फलायोगव्यवच्छित्तिं व्यापारे ज्ञापयति। तथा च फलोपहितव्यापारद्वारा क्रियाया जनकं करणम्। तत्र फलोपहितव्यापारस्तृतीयार्थः। फलोपधानं विशेषणमुपलक्षणं वेत्यन्यदेतत्।

तत्र साक्षाज्जनकं न करणमिति तण्डुलविक्लित्त्या "ओदनं पचति" इति न प्रयोगः। तण्डुलविक्लित्तेः ओदनं प्रति साक्षाज्जनकत्वात्। फलानुपहितव्यापारकमपि न करणम् इति 'शूर्पेण तण्डुलं पचति' इति न प्रयोगः। शूर्पव्यापारस्य तण्डुलविक्लित्त्यनुपधायकत्वात्। व्यापारस्तु क्रियाजनकतावच्छेदकत्वेन धर्मेणोपलक्षणेनानुगतीकृततत्तद्धर्मवान् तृतीयाप्रत्ययेनोपस्थाप्यः।

एतेन सकलव्यापारसाधारणैकरूपाभावेन न शक्त्यैक्यम्। तत्तद्रूपेण शक्तिस्वीकारे नानार्थता, युगसहस्रेणाप्यग्रहश्चेति निरस्तम्।

यदि आधारादिव्यापारो धातुनानभिधीयमानः क्रियाजनकतया विवक्षितः तदा आधारादिकारकगणः करणमेव। तदाहुः —

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।
विवक्ष्यते यदा यत्र करणं तत् तदा मतम्।।

वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः।।

---

[१] वि.नि.पृ. २००

[२] सू. १.४.४२

वस्तुव्यवस्थितिविरहेणानिर्देश्यत्वादेव विवक्षाधीनत्वं करणस्येति। कारकान्तरेऽपीयमेव गतिरिति विवक्षाधीनत्वमपादानादीनाम्। अत एव विवक्षातः कारकाणि भवन्तीति प्रवादः।

अत्र व्यापाराश्रयः करणतृतीयार्थ इति शाब्दिकाः। तन्न विचारसहम्। व्यापारस्य शक्यत्वे लाघवात्, तदाश्रयस्य तथात्वे गौरवात्। किं च व्यापारस्य धात्वर्थे जन्यत्वेन संसर्गेणान्वयः साक्षात्। तदाश्रयस्य तु स्वनिष्ठव्यापारजन्यत्वसंसर्गेण परम्परयान्वयः इति।

"वह्निना पचति" इत्यत्र तृतीयार्थः ऊर्ध्वज्वलनरूपो व्यापारः जन्यत्वसंसर्गेण पाकेऽन्वेति। वह्निनिष्ठोर्ध्वज्वलनजन्यपाककृतिरित्यन्वयबोधः।

"अनुभवेन स्मरति, योगेन स्वर्गं गच्छति, चक्षुषा पश्यति" इत्यादौ तृतीयार्थेषु संस्कारापूर्वसंनिकर्षेषु प्रकृत्यर्थानामनुभवादीनां जन्यत्वसंसर्गेण अन्वयः, अनुभवजन्यसंस्कारजन्या स्मृतिः, योगजन्यापूर्वजन्यं स्वर्गगमनम्, चक्षुर्जन्यसंनिकर्षजन्यं दर्शनमित्यन्वयबोधः।

"श्रोत्रेण शृणोति" इत्यत्र तृतीयार्थे शब्दावच्छिन्नसमवाये सविशेषणे हीति न्यायेन श्रोत्रस्य जन्यतासंसर्गेण शब्देऽन्वयः पर्यवस्यति। श्रोत्रजन्यशब्दावच्छिन्नसमवायजन्यं श्रवणमिति बोधः। यथा "चक्षुषा रूपं पश्यति" इत्यत्र चक्षुर्जन्यसंयोगाश्रयसमवायजन्यं रूपविषयकं चाक्षुषमिति। संयुक्तसमवायैकदेशे संयोगे चक्षुषः जन्यतासंबन्धेनान्वयः पर्यवस्यति।

क्वचिज्जन्यत्वातिरिक्तसंसर्गेणापि तृतीयार्थे प्रकृत्यर्थस्यान्वयः यथा — "चिकीर्षया प्रवर्तते, परामर्शेन अनुमिमीते" इत्यादौ तृतीयार्थे समवाये चिकीर्षापरामर्शयोः स्वप्रतियोगिकत्वसंबन्धेनान्वयः। चिकीर्षाप्रतियोगिकसमवायजन्या प्रवृत्तिः, परामर्शप्रतियोगिकसमवायजन्या अनुमितिरित्यन्वयबोधः।

यदि च शृणोतेः प्रत्यक्षार्थकत्वेऽपि "शब्देन शृणोति" इति प्रयोगः तदा शब्दस्यापूर्ववत् समवायेऽन्वय इति वदन्ति।

अन्ये तु सर्वत्र करणतृतीयार्थे प्रकृत्यर्थस्य जन्यजनकभावसंसर्गेणान्वयः। परामर्शेनानुमिमीत इत्यादौ दण्डेन घट इत्यत्रेव हेतौ तृतीया न तु करणे इत्याहुः।

अत्र वदन्ति — "अनुमानीयः परामर्शः" इत्यत्र करणे छप्रत्ययस्य दर्शनात् "परामर्शेनानुमिमीते" इत्यत्र करणे तृतीया। करणत्वं तु फलोपधायकत्वम्। तत्रोपहितत्वं करणतृतीयार्थः। हेतुतृतीयायास्तु स्वरूपयोग्यत्वमर्थ इति।

तच्चिन्त्यम्। "पटीयास्तन्तवः ओदनीयः पाकः" इत्यादाविव हेत्वर्थकेन संबन्धार्थकेन वा छप्रत्ययेन दर्शितप्रयोगोपपादनसंभवात्। उपहितत्वस्य कार्याव्यवहितपूर्ववृत्तिस्वरूपस्य कार्यविशेषाणामन्यलभ्यानामज्ञाने दुर्ग्रहस्य कार्यविशेषाणामननुगमेन तत्तत्कार्यव्यक्तीनामननुगततया अव्यवहितपूर्वक्षणस्य अननुगमेन च अननुगतत्वात् तृतीयार्थत्वासंभवाच्च। व्यापारस्य तृतीयार्थत्वे तु प्रकृत्यर्थस्य व्यापारे तस्य च धात्वर्थे जन्यत्वसंसर्गेणान्वयसंभवान्नाननुगमशङ्कापीति।

अत एव सव्यापारकं कारकं करणमिति करणस्य, स्वजन्यः सन् स्वजन्यजनको व्यापार इति व्यापारस्य च लक्षणं संगच्छते।

ननु घटादौ दण्डादेः व्यापारद्वाराहेतुत्वम्। अत एव शब्दालोके मिश्रैः — "दण्डकाष्ठादेश्च चक्रभ्रमिविक्लित्त्यादिजनकत्वं स्वनिष्ठस्पन्दज्वलनद्वारा" इत्युक्तम्। तथा च "दण्डेन घट" इत्यत्र सव्यापारकहेतुत्वस्य तृतीयार्थतया तस्य च नामार्थान्वयेन करणत्वस्य कारकत्वहानिः इति चेत् — न।

व्यापारस्य करणतृतीयार्थतया तस्य च जन्यत्वसंसर्गेण धात्वर्थ एवान्वयेन कारकत्वानपायात् हेतुत्वमर्थः तच्च साक्षात्परंपरासाधारणम् इत्यादिकं वक्ष्यते।

मीमांसकमतं करणत्वम्।

भाट्टचिन्तामणौ गागाभट्ट एवं करणत्वं निरब्रवीत्[१] — करणत्वं तु साधकतमत्वम्। "साधकतमं करणम्"[२] इति सूत्रात्! साधकतमत्वं चाव्यवधानेन फलजनकव्यापारवत्कारणत्वम्। फलायोगव्यवच्छिन्नं वा। तेन "आत्मना जानाति" इत्यादौ आत्मनोऽपि करणत्वमविरुद्धम्।

अथ वा फलोद्देशप्रवृत्तकर्तृव्यापारोपकार्यत्वं करणत्वम्। अस्ति चेदं कुठारादौ। एवं च कुठारेण च्छिनत्ति, दर्शपूर्णमासाभ्यां स्वर्गम् इत्यादीनामुपपत्तिः। अत्र कर्तृत्वकरणत्वयोः साक्षात् भावनायां संबन्धात् तदर्थकतृतीया कारकविभक्तिः।

भाट्टरहस्ये[३] निरूपितं करणत्वम्

भाट्टरहस्ये खण्डदेवेन करणत्वनिष्कर्ष इत्थं कृतः — करणत्वं च "साधकतमं करणम्"[४] इति सूत्रेण निरुक्तम्। तच्च कारकान्तरनिष्ठव्यापारद्वारा क्रिया-

---

[१] भा.चि. ९८

[२] सू. १.४.४२

[३] पृ. ११०

[४] सू. १.४.४२

हेतुत्वाभावे सति क्रियाहेतुत्वम्। कर्त्रादिषु कारकेषु अतिव्याप्तिवारणाय सत्यन्तम्। कर्तृकर्मणोः करणनिष्ठव्यापारद्वारा क्रियाहेतुत्वात्, अधिकरणकारकस्य "गृहे स्थाल्यामोदनं पचति" इत्यादौ कर्तृकर्मान्यतरनिष्ठव्यापारद्वारा क्रियाहेतुत्वात्, संप्रदानस्य च स्वानुमतिद्वारा या कर्तुरिच्छा तद्द्वारा क्रियाहेतुत्वात्, अपादानस्यापि पतनप्रतिबन्धको यः संयोगः तन्नाशको यो विभागः तद्द्वारा पतनहेतुत्वात् तेषु अतिव्याप्तेर्वारणम्। चरमकारणस्यैव लक्ष्यत्वेन कुठारादेः कर्त्रादिनिष्ठव्यापारद्वारा क्रियाहेतोरलक्ष्यत्वेन नाव्याप्तिरिति सर्वदर्शनानुयायिनः प्राञ्चः।

तन्न। कुठारेण च्छिनत्ति इत्यादिप्रयोगाणां भाक्तत्वे प्रमाणाभावात्। अतो यद्व्यापाराव्यवहितोत्तरं यत्क्रियानिष्पत्तिः विवक्ष्यते तत् तत्क्रियाकरणम्। अधिकरणादिव्यापारानन्तरमेव यदा पाकादिक्रियानिष्पत्तिः विवक्षिता तदा तेषामपि करणत्वमिष्टमेव। पचिधातोश्च तदा तत्क्रियैव विवक्षिता। अत एव "गवा दानं संपादयति, ब्राह्मणेन दानं साधयति, स्थाल्या पचति" इत्यादयः प्रयोगाः अपि संगच्छन्ते इति वैयाकरणनव्याः। तदपि न। "औषधभोजनेन परंपरया क्रमेण पुष्टिं संपादयेत्" इत्यादिप्रयोगाणां भाक्तत्वे प्रमाणाभावात्।

अतो व्यापारवदसाधारणकारणत्वं करणत्वम्। कर्त्रादीनां च करणत्वेऽपि न क्षतिः उपाधिसांकर्यस्यादोषत्वात्। विवक्षातश्च कारकविभक्तय इति नैयायिकाः। तदपि न। "भ्रम्या घटं करोति, पुण्येन स्वर्गं भुङ्क्ते" इत्यादिप्रयोगाणां भाक्तत्वे प्रमाणाभावात्।

तस्मात् करणं करणम् इत्याद्यनुगतप्रतीत्या अखण्डोपाधिरूपमेव करणत्वम्, कारणत्वादिवत्। तदेव च तृतीयार्थः। तस्य च कर्त्रादावतिव्याप्तिनिरासः पूर्ववत्।

तस्य करणत्वस्य स्वनिरूपकधात्वर्थानुकूलत्वसंबन्धेन भावनायामन्वयः। तथा च कुठारनिष्ठकरणतानिरूपकछेदनानुकूला भावना इति कुठारेण च्छिनत्ति इति वाक्यात् बोधः।

नवीनतार्किकास्तु — प्रकृत्यर्थनिरूपितं जन्यत्वमेव तृतीयार्थः। तस्य चाश्रयतासंबन्धेन धात्वर्थेऽन्वयः इत्याहुः। तन्न। अनुशासनबाधे प्रमाणाभावात्। करणत्वे तृतीयेति हि अनुशासनेन बोध्यते न तु जन्यत्वे तृतीयेति।

न च "परशुना छिनत्ति, न दात्रेण" इत्यादौ परशुजन्यत्वस्य दात्रजन्यत्वाभावस्य च क्रियायां बोधमनुसृत्य तृतीयायाः जन्यत्वार्थकत्वमावश्यकमिति वाच्यम्। निरूपकतासंबन्धेन परशुनिष्ठकरणत्वस्य निरूपकतासंबन्धावच्छिन्नप्रतियोगिताकदात्रनिष्ठकरणत्वाभावस्य च क्रियायां बोधनेन अर्थात् तज्जन्यत्वतद-

भावयोः बोधसंभवात्। अतः प्रचुरप्रयोगाविशेषात् कर्तृत्वकरणत्वयोरुभयोरपि तृतीयायाः शक्तिः। योग्यतादिरूपतात्पर्यग्राहकानुसारेण च विशेषनिर्णयः — इति।

प्रकृत्यादिभ्य उपसंख्यानम्[१] इति वार्तिकव्याख्यानम्

वार्तिकमिदम्। तृतीयाया इति शेषः। उपपदविभक्तिरियम्। यथायोगं सर्वविभक्त्यपवादः।

प्रकृत्या चारुः — संबन्धस्तृतीयार्थः। प्रकृतिः स्वभावः, तत्संबन्धिचारुत्ववान् इत्यर्थः। यदा तु स्वभावेनैवायमभिरूपः न तु अलंकारादिनेति करणान्तरव्युदासाय प्रकृतेः करणत्वं विवक्ष्यते तदा कर्तृकरणयोः इत्येव सिद्धम्।[२]

लघुमञ्जूषायाम्

प्रकृत्या चारुः। प्रकृतिः यावदाश्रयभावी धर्मः। तेन यावदाश्रयभाविधर्मसंबन्धिचारुत्ववानिति बोधः।

"प्रायेण याज्ञिक" इत्यत्र प्रायशब्दो बह्वर्थः। बहुश्च आचारादिः। बह्वाचारज्ञाप्ययाज्ञिकत्ववानिति बोधः। यद्वा प्रायशब्दः संभावनार्थकः। संभावनाविषययाज्ञिकत्ववानिति बोधः। "प्रायेणात्र याज्ञिका" इत्यादौ बहवो याज्ञिका इति बोधः।

"नाम्ना सुतीक्ष्ण" इत्यत्र नामज्ञाप्यसुतीक्ष्णत्ववानिति बोधः। एवं "चरितेन दान्तः"[३] इत्यादौ। "सुरथो नाम राजा" इत्यादौ नामेति प्रसिद्धौ। "सुरथ" इति प्रसिद्धो राजेत्यर्थः। यद्वा नामभूतसुरथशब्दभिन्नो राजेति बोधः। "नाम्ना चन्द्रकल" इत्यादौ नामभूतचन्द्रकलशब्दभिन्नो राजेति बोधः।

एवमवच्छेद्यत्वादीनां संबन्धत्वविवक्षायां घटत्वेन जन्यत्वं, घटत्वेन प्रकारत्वं, घटत्वेन अभावः इत्यादि प्रकृत्यादित्वात् साधु। अत्र सर्वत्र कथंचित् करणत्वहेतुत्वान्यतरारोपेण तृतीयेति भाष्यसंमतम्।

प्रायेण याज्ञिकः — प्रायशब्दो बहुलवाची। बहुलाचारसंबन्धियाज्ञिकत्ववान् इत्यर्थः। संबन्धश्च ज्ञाप्यज्ञापकभावः। बहुलेन आचारेण हेतुना ज्ञाप्ययाज्ञिकत्ववानित्यर्थे तु "इत्थंभूतलक्षणे"[४] इत्येव सिद्धम्। बहुलेन आचारेण संपन्नयाज्ञिकत्ववान् इत्यर्थे तु करणत्वादेव सिद्धम्।

---

[१] वा. १४६६

[२] सि.कौ. (vol. I) पृ. ६३६

[३] रघुवंशः १३-४१

[४] सू. २.३.२१

गोत्रेण गार्ग्यः — गोत्रमस्य गार्ग्य इत्यर्थः। अत्र प्रथमा प्राप्ता। गोत्रेण हेतुना ज्ञाप्यगार्ग्यत्ववानित्यर्थे तु "इत्थं भूतलक्षणे"[१] इत्येव सिद्धम्।

समेनैति, विषमेणैति — क्रियाविशेषणमेतत्। समं विषमं च गमनं करोतीत्यर्थः। कर्मणि द्वितीया प्राप्ता। समेन विषमेण वा पथा एतीत्यर्थे तु करणत्वादेव सिद्धम्।

द्विद्रोणेन धान्यं क्रीणाति — द्वयोर्द्रोणयोः समाहारः द्विद्रोणम्। पात्रादित्वान्न स्त्रीत्वम्। द्विद्रोणसंबन्धि धान्यमित्यर्थः। षष्ठी प्राप्ता। यदा तु द्विद्रोणपरिमितधान्यमूल्यं हिरण्यं द्विद्रोणं तेन क्रीणातीत्यर्थे तु करणत्वादेव सिद्धम्।

सुखेन दुःखेन वा याति — सुखजनकं दुःखजनकं वा यानं करोतीत्यर्थः। कर्मणि द्वितीया प्राप्ता।

नाम्ना सुतीक्ष्णः — नामसंबन्धिसुतीक्ष्णत्ववानित्यर्थः। नामज्ञाप्यसुतीक्ष्णत्ववानित्यर्थे तु इत्थंभूतलक्षण इत्येव सिद्धम्।

धान्येन धनवान् — अभेदस्तृतीयार्थः। धान्याभिन्नधनवानित्यर्थः।

वह्नित्वेन वह्निं जानामि — प्रकारत्वं तृतीयार्थः। विशेष्यत्वं द्वितीयार्थः। तयोः निरूपकतासंबन्धेन ज्ञानेऽन्वयः। वह्नित्वप्रकारकवह्निविशेष्यकज्ञानवान् इत्यर्थः। इति बालमनोरमायाम्।

शब्दशक्तिप्रकाशिकायाम्[२]

"प्रकृत्या कृपणः, स्वभावेन सरल" इत्यादौ प्रकृत्यादिपदं यावदाश्रयवृत्तिधर्मपरम्। तृतीयार्थश्चाभेदस्तादात्म्यं वा। "प्रकृत्यादिभ्य उपसंख्यानम्"[३] इति वार्तिकेन तत्रैव तद्विधानात्। एवं च स्वाश्रयाधिकरणयावत्कालवृत्ति कार्पण्यवानित्याकारकस्तत्र बोधः।

सुरथो नाम राजा — इत्यत्र सुरथः सुरथशब्दवाच्यः। तदेकदेशे शब्दे लुप्ततृतीयकेन नामेत्यव्ययेन प्राप्तस्य संज्ञातादात्म्यस्यान्वयः। तेन संज्ञा तादात्म्यवत्सुरथशब्दवाच्यो राजेत्यर्थः। नामेत्यव्ययार्थः संभाव्यत्वम्। तत्र सुरथेऽन्वेति। संभाव्यत्वं ज्ञानार्हत्वम्। तथा च ज्ञानार्हः सुरथो राजेत्यन्वयबोधः। इति कश्चित्।

---

[१] सू. २.३.२१
[२] पृ. ३७१
[३] वा. १४६६

नाम्ना चन्द्रमुखी — नामेत्यनव्ययम्। तस्य संज्ञा अर्थः। चन्द्रमुखी चन्द्रमुखीशब्दवाच्या। तृतीयार्थस्तादात्म्यम्। तथा च संज्ञातादात्म्यवच्चन्द्रमुखी-शब्दवाच्येत्यर्थः।

धान्येन धनं, घटत्वेन साजात्यम्, वाजपेयेन यजनम् — इत्यादावपि धनाद्यन्वयी धान्यादेरभेद एव तृतीयार्थः। तथा च धान्याभिन्नं धनम्, घटत्वाभिन्नं साजात्यं, वाजपेयाभिन्नं यजनम् इत्यादयोऽन्वयबोधाः।

जात्या ब्राह्मणः — इत्यादौ ब्राह्मणपदस्यादृष्टविशेषप्रयोज्यधर्मवत्परतया तादृशधर्म एव जात्यभेदस्यान्वयः। न तु ब्राह्मणत्वजातौ। स्वरूपत उपस्थिते ब्राह्मणत्वे जातित्वविशिष्टब्राह्मणत्वान्वयायोगात्। निर्धर्मितावच्छेदकशाब्दबोधा-नङ्गीकारात्।

घटत्वेन जन्यत्वं, प्रकारत्वम् — इत्यादौ अवच्छेदकत्वमवच्छिन्नत्वं वा तृती-यार्थः। घटत्वनिष्ठावच्छेदकतानिरूपकं घटत्वावच्छिन्नं वा जन्यत्वमित्यन्वयबोधः।

पदवाक्यरत्नाकरे

"प्रकृत्यादिभ्य उपसंख्यानम्" इति वार्तिकं मनसि निधाय बहून्युदाहरणानि प्रदर्श्य तत्र तृतीयार्थं तदन्वयप्रकारं च प्राचीकशत्।[१] तथाहि —

प्रकृत्यादिगणाज्जाता तृतीया तु तदात्मताम्।
अवच्छेदकता-वृत्ति-प्रकारत्वादि शंसति।।

प्रकृत्यादिभ्यो विहिता तृतीया क्वचित् तादात्म्यमभिधत्ते। यथा "प्रकृत्या चारुः" इत्यत्र सुखजनकसाक्षात्कारविषयधर्मवांश्चारुशब्दार्थः। चारूशब्दपर्याया एव अभि-रामहृद्यसुन्दरमञ्जुलादयः। "मनोऽभिरामः नयनाभिराम" इत्यादौ मनोनयनपदयोः मनोजन्य इति नयनजन्य इति चार्थः। तयोः अभेदसंबन्धेन अभिरामपदार्थैकदेशे सुखजनकसाक्षात्कारेऽन्वयः। मनोनयनजन्याभिन्नसुखजनकसाक्षात्कारविषयधर्मवा-निति शाब्दबोधः। यावदाश्रयभावी धर्मः प्रकृतिः इत्युच्यते। यावदाश्रयभावीत्यस्य स्वाधिकरणनिष्ठात्यन्तभावाप्रतियोगी, स्थूलकालावच्छेदेन स्वाश्रये वर्तमानस्या-त्यन्ताभावस्याप्रतियोगी वा धर्मः इत्यर्थः। सतो जातिः, ईश्वरस्य सार्वज्ञ्यम्, जलस्य शैत्यम्, पृथिव्या गन्धः, गुणस्य द्रव्यसमवेतत्वं प्रकृतिरिति प्रयोगात्। उत्पत्तिक्षणे शैत्याभावो जले, पाकक्षणे गन्धाभावः पृथिव्यां, समवायिनाशक्षणे द्रव्यसमवेतत्वाभावो गुणे विद्यमानोऽपि न स्थूलकालावच्छेदेन। "विद्या

[१] प.वा.र.पृ. ६४८-६६२

ब्राह्मणस्य, मत्सरः खलस्य, संयोगो द्रव्यस्य, कर्म मूर्तस्य प्रकृतिः'' इत्यादौ जात्यादिप्रकृतिसादृश्यात् अभीक्ष्णानुवृत्तेः (अनेकवृत्तित्वात्) प्रकृतिपदं गौणम्।

प्रकृत्या चारुः — तथा च "प्रकृत्या चारुः" इत्यत्र चारुपदार्थैकदेश-धर्मान्वयितादात्म्यं प्रकृतिपदप्रकृतिकतृतीयार्थः। प्रकृत्यभिन्नचारुत्ववान् इत्यर्थः। यावदाश्रयभाविधर्माभिन्नसुखजनकसाक्षात्कारविषयधर्मवानिति यावत्।

नाम्ना सुतीक्ष्णश्चरितेन दान्तः — इत्यत्र सुतीक्ष्णपदं सुतीक्ष्णपदबोध्ये लाक्षणिकम्। नामवाचकम्। तृतीयार्थोऽभेदः तस्य सुतीक्ष्णपदेऽन्वयः। चरित-पदस्य प्रयत्नविषय इत्यर्थः। तृतीयार्थोऽभेदः। तस्य दमेऽन्वयः। तथा च वाचकाभिन्नसुतीक्ष्णपदबोध्यः प्रयत्नविषयाभिन्नदमवान् इत्यन्वयबोधः। सुतीक्ष्णपद-योगार्थेन दमस्य विरोधस्तु ध्वननीयो न श्रौतः।

सुरथो नाम राजा भूत — इत्यत्र नामेत्यव्ययम्। ततो लुप्ता तृतीया। नामाभिन्न-सुरथपदबोध्यो राजाभूत् इत्यन्वयबोधः। नामेति संभावनार्थकमव्ययं वा।

गोत्रेण गार्ग्यः — इत्यत्र वंशप्रवर्तकपुरुषारम्भकशुक्रावयवारभ्यत्वं गोत्र पदार्थः। गार्ग्यपदस्य गर्गापत्यमित्यर्थः। तदेकदेशे गर्गापत्यत्वे गर्गारम्भकशुक्रा-वयवपरमाण्वारभ्यत्वे गोत्रपदार्थाभेदान्वयः। तथा च वंशप्रवर्तकपुरूषारम्भक-शुक्रावयवारब्धत्वाभिन्नं यत् गर्गारम्भकशुक्रावयवारभ्यत्वं तद्वानिति वाक्यार्थः।

धान्येन धनी — इत्यत्र धान्याभिन्नधनवान् इत्यन्वयबोधः।

जात्या ब्राह्मणः — इत्यादौ स्वरूपेणोपस्थितेऽपि ब्राह्मणत्वे जातित्वविशिष्ट-तादात्म्यान्वयो नानुपपन्नः। "जातिमान् घट" इतिवत्। अथ वा ब्राह्मणपदं पुण्यप्रयोज्यजातिपरम्। जात्यभिन्नपुण्यप्रयोज्यजातिः इति बोधः। पुण्यप्रयोज्यत्व-विशिष्टायां जातौ शुद्धाया जातेः तादात्म्येनान्वयो नानुपपन्नः। दण्डवान् रक्त-दण्डवान् इतिवत्।

ननु तृतीयार्थभेदस्य पदार्थैकदेश एवान्वयो व्युत्पत्तिसिद्ध इति कथं पदार्थ-भूतायां तादृशजातौ जातितादात्म्यान्वय इति चेत् — न। पृथिवीजलयोः द्रव्यत्वेन साधर्म्यमित्यत्र प्राधान्येनोपस्थिते पदार्थेऽपि पदार्थान्तरतादात्म्यं बोधयन्ती तृतीया दृश्यते न परं पदार्थैकदेश एव। समानधर्मरूपे साधर्म्यपदार्थे द्रव्यत्वाभेदान्वयात् पृथिवीजलयोः द्रव्यत्वाभिन्नः समानो धर्म इति तत्र बोधः।

अर्घ्यादिकया सपर्यया पर्यपूपुजत्, वाजपेयेन यजेत इत्यादौ धात्वर्थक्रियायां सपर्या — वाजपेयरूपप्रातिपदिकार्थतादात्म्यमपि तृतीया बोधयति, सपर्याभिन्ना पूजा, वाजपेयाभिन्नो यागः इति।

ननु द्वितीयोदाहरणे वाजपेयपदयजधातुभ्यां वाजपेयत्वेन यागत्वेन चोपस्थितयोः तादात्म्यान्वयसंभवेऽपि प्रथमोदाहरणे सपर्यापदपूजधातुभ्यां पूजात्वेन एकरूपेणोपस्थितयोः कथं तादात्म्यान्वयः, 'घटो घट' इत्यादितुल्यत्वादिति चेत् — न। विधेयांशेऽधिकावगाहिनः शाब्दबोधस्य 'दण्डवान् रक्तदण्डवान्' इत्यादौ नवीनैः स्वीकारात् अर्घ्यादितादात्म्यरूपविशेषणान्तरविशिष्टपूजायाः पूजायां तादात्म्येनान्वये निराकाङ्क्षत्वाभावात्। प्रमा अनुभव इति सहप्रयोगदर्शनात्। अनुभवः यथार्थानुभवाभिन्न इति हि तदर्थः।

अत एव "जगाद वाचं मधुरां विशदाक्षरशालिनीम्" इत्यत्र वाचमिति क्रियाविशेषणमुपादेयम्। मधुरत्वादिविशेषणावच्छिन्नस्य वाचस्तादात्म्यस्य गदधात्वर्थफलेऽन्वयेऽपि साकाङ्क्षत्वम्। वाक्शब्दस्य नियतस्त्रीलिङ्गतया क्रियाविशेषणत्वेऽपि क्लीबत्वासंभवात् इति वामनः।

काव्यप्रकाशकारोऽपि तत्र = विशेषणान्तरविशिष्टतद्धर्मावच्छिन्नतादात्म्यस्य तद्धर्मावच्छिन्नेऽन्वयबोधजनके काव्ये अपुष्टार्थत्वमेवोदाजहार, न तु अभवन्मतयोगम्। तथाहि —

अतिविततगहनसरणिप्रसरणपरियुक्तविश्रामानन्दः।
मरुदुल्लसितसौरभकमलाकरहासकृद्रविर्जयति।।

इत्यादावपुष्टार्थत्वम्। यदनुपादानेऽपि विवक्षितार्थस्य बाधो न भवेत् तादृशं विशेषणवाचकमित्यर्थः। उक्तपद्ये अतिवितते निरवलम्बे व्योम्नि अविश्रान्तं गमनागमनं कुर्वतो रवेरुत्कर्षो विवक्षितः। तत्र गगनस्यातिविततत्वम् अग्रेरौष्ण्यमिव अर्थादेव लभ्यते। सरणित्वं मरुदुल्लसितसौरभत्वं च तादृशोत्कर्षाप्रयोजकमेवेति तेषामपुष्टार्थत्वम्। तथा च तत्तद्विशेषणविशिष्टगगनान्वयबोधस्य निराकाङ्क्षत्वविरहेऽपि विशेषणवैयर्थ्यमेव तत्काव्यस्य दुष्टताप्रयोजकमित्याशयः प्रकाशकारस्य।

अभवन् अविद्यमानो मतोऽभिमतः योगः संबन्धः यत्र वाक्य इति व्युत्पत्त्या पदार्थयोरन्वयस्यासंभवो यत्र तद्वाक्यघटितकाव्यस्याभवन्मतदोषवत्त्वम्। एवं च प्रकृते मधुरं जगादेत्येतावतैव वाचि वागनुकूलव्यापारार्थकधात्वर्थफले मधुरतादात्म्यान्वये मधुरवाक्तादात्म्यस्यार्थात् प्राप्तौ आक्षेपलभ्यस्य पदेनाभिधानाद-

पुष्टोऽयमर्थः। आकाङ्क्षाविरहे तु अभवन्मतयोग एव स्यात्। एवमर्घ्यादिना पर्यपूजत् इत्येतावतैव सामञ्जस्ये सपर्ययेत्यपुष्टार्थः स्यात् न तु निराकाङ्क्षत्वम्।

क्वचित् तृतीयायाः अवच्छेदकत्वमवच्छिन्नत्वं वार्थः। 'वह्नित्वेन वह्नेः कारणत्वम्, कार्यत्वम्, प्रतियोगित्वम्, प्रकारत्वम्, विशेष्यत्वम्' इत्यादौ। वह्नित्ववृत्त्यवच्छेदकत्वनिरूपकं कारणत्वम्, वह्नित्वनिरूपितावच्छिन्नत्ववत् कारणत्वमिति बोधः। "समवायेन रूपवान्" इत्यत्र मत्वर्थैकदेशाधिकरणतायां समवायावच्छिन्नत्वं प्रकारः।

"समवायेन ध्वंसो नास्ति" इत्यत्र नञर्थेऽभावे तृतीयान्तार्थे समवायावच्छिन्नत्वं स्वाश्रयप्रतियोगिताकत्वसंसर्गेण प्रकारः। व्युत्पत्तिवैचित्र्याच्च ययैव प्रतियोगितया ध्वंसो नञर्थे विशेषणम्, तद्घटितसंसर्गेणैव तृतीयार्थोऽपि इत्यर्थात् समवायावच्छिन्नध्वंसनिष्ठप्रतियोगितानिरूपकसंसर्गाभावो लभ्यते। संसर्गीभूतप्रतियोगितायामपदार्थोऽपि व्युत्पत्तिवैचित्र्यात् समवायावच्छिन्नत्वं प्रकार इति स्वतन्त्राः।

एतेन "पटत्वेन घटो नास्ति, शशीयत्वेन शृङ्गो नास्ति" इत्यादिप्रयोगाणां प्रामाणिकत्वे तेऽपि व्याख्याताः। तृतीयार्थस्य पटत्वाद्यवच्छिन्नत्वस्य स्वाश्रयप्रतियोगिताकत्वसंसर्गेणाभावेऽन्वयात्।

तच्चेदमवच्छेदकत्वं क्वचित् घटकतास्वरूपमपि। यथा "धूमत्वेन वह्निव्याप्तिः, वह्नावयःपिण्डेन धूमव्यभिचारः, वह्निधूमयोः पर्वतेन सहभाव" इत्यादौ। धूमव्यापकवह्निमद्वृत्तिवह्निरूपे व्यभिचारे धूमाभावादयः पिण्डस्य, वह्निधूमसामानाधिकरण्यरूपे सहभावे पर्वतस्य च घटकत्वात्।

समेन एति विषमेण गच्छति — इत्यादौ कर्तृद्वारकमधिकरणत्वं दैशिकविशेषणतासंबन्धावच्छिन्ना वृत्तिर्वा (आधेयत्वं वा) तृतीयार्थः। भूगर्भावधिकतुल्यान्तरा यस्य सर्वेऽवयवाः स देशः सम इत्युच्यते। तदितरो विषमः। अत्र सप्तम्यर्थे तृतीया, न तु गमनस्य समविषयदेशवृत्तिव्यापारजन्यत्वविवक्षया करणे तृतीया। तथा सति समस्तृतीयायुक्तात् इत्यत्र सकरणकात् इत्येव मुनिरवक्ष्यत्, न तु तृतीयायुक्तात् इति।

"रजतत्वेन पुरोवर्तिनं जानाति इच्छति करोति द्वेष्टि" इत्यादौ तृतीयायाः प्रकारत्वमर्थः। विशेष्यत्वं फलविधया धातोः, द्वितीयाया वा अर्थः। तत्र प्रकारत्वस्य निरूपितत्वसंबन्धेनान्वयः। तथा च रजतत्वनिष्ठप्रकारतानिरूपितपुरोवर्तिनिष्ठविशेष्यताकज्ञानं वाक्यार्थः।

"लक्षणस्वरूपप्रामाण्यादिभिरनुमाने निरूपणीय" इत्यत्र निपूर्वकरूपधातोः शाब्दबोधानुकूलव्यापारोऽर्थः। तत्समभिव्याहृतकर्मकृत्यप्रत्ययस्य निरूपणजन्यशाब्दबोधविषयतावत् अर्थः। विषयता च विशेष्यता। तस्यां तृतीयार्थस्य प्रकारतायाः निरूपितत्वसंबन्धेनान्वयः। तेन लक्षणस्वरूपप्रामाण्यादिनिष्ठा या प्रकारता तन्निरूपिता या निरूपणजन्यशाब्दबोधविशेष्यता तद्वत्यनुमाने इति वाक्यार्थबोधः।

विशेष्यतामात्रं कृत्यप्रत्ययार्थः। शाब्दबोधस्य धातुनैव लाभात्। कर्मप्रत्ययोपसन्दाने धातुना व्यापारविशेषितस्य फलस्याभिधानादिति व्यापारफलयोः पृथक्शक्तिवादिनः।

अन्ये तु धातुना फलविधयोपात्तः शाब्दबोधः कर्मप्रत्ययेनाभिधीयते। तस्य विशेष्यतासंबन्धेन अनुमानपदार्थेऽन्वय इत्याहुः।

द्विद्रोणेन धान्यं क्रीणाति — अत्र तृतीयायाः परिच्छिन्नत्वमर्थः। द्रोणो गुरुत्वविशेषः। परिच्छिन्नत्वस्य आश्रयतासंबन्धेन धान्यपदोत्तरद्वितीयार्थे क्रयनिरूपितकर्मत्वेऽन्वयः। परिच्छिन्नत्वं च द्विद्रोणसमवायिद्रव्यद्वयारम्भकपरमाणुत्वसमनियता या संख्या तत्सजातीयसंख्याव्यापकत्वम्। द्विद्रोणत्वं द्रोणत्वावान्तरजातिविशेषो द्रोणद्वित्वं वा। तत्र द्वितीयपक्षानुसारेण द्रव्यद्वयेत्युक्तम्। प्रथमपक्षे एकद्रव्येति द्रव्यद्वयस्थाने योज्यम्। अत्र तुलायाः एकभागे स्थितेन द्विद्रोणपरिमितधान्यादिना परिच्छिन्नस्य धान्यान्तरादेः क्रयणे निरुक्तप्रयोगात् परिच्छेदकद्विद्रोणपरिमितद्रव्यारम्भकपरमाणुत्वसमनियता कोटित्वादिसंख्या तत्सजातीया परिच्छिन्नधान्यपरमाणुगुणता तादृशी संख्या तद्व्यापकत्वं क्रयनिरूपितकर्मत्वस्येति बोध्यम्। व्यापकत्वं तु आधारतासंबन्धेन वा स्वाधारद्रव्यारम्भकत्वसंबन्धेन वा अवच्छिन्नं ग्राह्यम्। क्रयकर्मत्वं नाम क्रयजनितं स्वत्वम्। तच्चैकमेव सकलेषु धान्यतदारम्भकेषु धान्येष्वेव वा। भवति च परमाणुष्वपि स्वत्वस्वीकारे साक्षादेव (आधारतासंबन्धेन) तादृशसंख्यायाः कोटित्वादिव्यापकत्वम्। तादृशस्वत्वस्य धान्यमात्रवृत्तित्वे तु स्वाधिकरणद्रव्यारम्भकत्वरूपपरम्परासंबन्धेन व्यापकत्वम्। तेन संबन्धेन परमाणुगतसंख्यायाः धान्यवृत्तितया तत्र समवायेन स्वत्वस्य सत्त्वात्। तथा च द्विद्रोणसमवायिद्रव्यारम्भकपरमाणुसमनियता या संख्या तज्जातीयसंख्याव्यक्तिं प्रति साक्षात् परम्परया वा व्यापकस्य धान्यवृत्तेः स्वत्वस्य जनिका क्रयणक्रियेत्यन्वयबोधः।

एकदेशिनस्तु द्वाभ्यां द्रोणाभ्यामारब्धं गुरुत्वान्तरं द्विद्रोणम्। तत्समवायित्वं धान्यान्वयि तृतीयार्थः। एको धान्यराशिः इति प्रतीत्या अतिरिक्तस्य राशेस्तत्र धान्यत्वस्य च स्वीकारात्। अन्यथा अवयविमात्रसिद्धिप्रसङ्गात् इत्याहुः।

तच्चिन्त्यम्। राशौ धान्यत्वादीनां स्वीकारे धान्ययवाद्युभयादिघटितराशौ तुल्ययुक्त्या धान्यत्वयवत्वाद्यभ्युपगमेन यवत्वादिना सांकर्यप्रसङ्गात्। पृथग् धान्ययवत्वयोः स्वस्वाभावसमानाधिकरणयोः यवधान्योभयराशिवृत्तित्वात्।

यत्तु एकजातीयमवनमनं प्रति द्विद्रोणस्वरूपस्य अवयविगुरुत्वस्य तदाश्रयारम्भकपरमाणुसमसंख्याकानां च गुरुत्वानां वैकल्पिकी कारणता। द्विद्रोणप्रयोज्यजातीयावनमनप्रयोजकानि यावन्ति गुरुत्वानि तावद्भिराश्रयघटितपरम्परया संसृष्टत्वं धान्येषु, तद्वृत्तिस्वत्वे वा प्रतीयते। तथा च द्विद्रोणप्रयोज्यावनमनप्रयोजकतावद्गुरुत्वं द्विद्रोणपदार्थः। तृतीयार्थो वैशिष्ट्यम्। तच्च स्वाश्रयद्रव्यारभ्यत्वस्वरूपं स्वत्वे प्रतीयत इति पक्षे सामानाधिकरण्यं तृतीयार्थः। तच्च स्वत्वस्य धान्यमात्रवृत्तित्वे स्वाधिकरणनिरूपितस्वाश्रयारम्भकत्वसंबन्धावच्छिन्नवृत्तित्वरूपं बोध्यम् — इति।

तन्न। अवयविगुरुत्वस्य साक्षात् पतनं प्रत्येव असमवायिकारणत्वम्। अवनमने तु परमाणुगुरुत्वानामेव तथात्वम्। अन्यथा अवयविगुरुत्वस्याप्यवनमने कारणत्वोपगमे सर्षपराशिजनितावनमनापेक्षया लोहपिण्डजनितावनमनस्य प्रकर्षप्रसङ्गात्। कारणोत्कर्षेण कार्योत्कर्षावश्यंभावात् इति न्यायद्वितीयाध्याये विवृतत्वात्। लोहपिण्डजनितावनमनस्य लोहपिण्डसमवेतगुरुत्वजन्यत्वे तद्गुरुत्वस्य सर्षपराशिगुरुत्वावधिकोत्कर्षवत्त्वेन कार्ययोरप्युत्कर्षापकर्षयोः प्रसङ्गात्। परमाणुगुरुत्वमात्रस्य तथात्वे तु सर्षपपरमाणुगुरुत्वानां लोहपिण्डपरमाणुगुरुत्वानां चोत्कर्षापकर्षभावाभावेन न तत्प्रसङ्ग इत्याशयः।

विभक्त्यर्थनिर्णये[1]

नामार्थान्वयिनः तृतीयार्थाः अकारकतया संज्ञायन्ते। तत्र नानार्थिकां तृतीयां ज्ञापयति "प्रकृत्यादिभ्य उपसंख्यानम्"[2] इति वार्तिकम्। "प्रकृत्या चारु" इत्यत्र सुखजनकस्य साक्षात्कारस्य ज्ञानसामान्यस्य विषयेण धर्मेण विशिष्टः चारुपदार्थः। चारुपर्यायाः अभिरामहृद्यसुन्दरमञ्जुलादयः। "मनसोऽभिराम" इत्यत्र षष्ठ्यर्थो जन्यत्वं तथाविधे साक्षात्कारे ज्ञानसामान्ये वा अन्वेति। "मनोऽभिराम" इत्यत्र अभिरामशब्दस्य सुखजनकमानसविषयधर्मविशिष्टे लक्षणा। मनःपदं तात्पर्यग्राहकम्। प्रकृतिपदार्थस्तु स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवान् असाधारणो धर्मः। भवति च सतो जातिः प्रकृतिः इत्यादौ जात्यादिः तथा। धर्मे

---

[1] पृ. २०७

[2] वा. १४६६

असाधारण्यविशेषणात् घटस्य गुणो जातिर्वा प्रकृतिः इति न प्रयोगः। प्रयोगस्तु कम्बुग्रीवादिमत्त्वं प्रकृतिरिति।

"जलस्य शैत्यं, पृथीव्या गन्धः, तेजस औष्ण्यं प्रकृतिः" इत्यादौ शैत्यगन्धौष्ण्यानां संग्रहाय स्थूलकालावच्छिन्नत्वं स्वाश्रयनिष्ठात्यन्ताभावे विशेषणं देयम्।

यदि च "संयोगो द्रव्यस्य, मत्सरः खलस्य, चैतन्यमात्मनः प्रकृतिः" इत्यादिप्रयोगः तदा देशानवच्छिन्नविशेषणतया स्वाश्रये स्थूलकालावच्छेदेन वर्तमानस्यात्यन्ताभावस्य प्रतियोगितानवच्छेदकधर्मवान् असाधारणो धर्मः प्रकृतिरिति द्रव्ये वृक्षादौ मूलाद्यवच्छेदेन संयोगस्य, खले मत्सरस्य, आत्मनि ज्ञानस्य घटाद्यवच्छेदेन स्थूलकालावच्छेदेन वर्तमानोऽप्यत्यन्ताभावो न देशानवच्छिन्नविशेषणतयास्तीति नासंग्रहः।

वस्तुतस्तु भूयःकालिकस्वाश्रयनिरूप्यसत्तावान् तादृशो धर्मः प्रकृतिः। तावतैव सर्वसामञ्जस्यात्।

यदि च पृथिव्या गन्धप्रागभावः रक्तप्रागभावो वा गन्धनाशो रक्तनाशो वा प्रकृतिः इति न प्रयोगः, तदा तादृशप्रयोगवारणाय स्वसम्बन्धिनि प्रतियोगिजातीयासमानकालिकस्य विद्यमानस्य नाशस्य प्रागभावस्य चाप्रतियोगी तादृशो धर्मः प्रकृतिरिति वक्तव्यम्। तथाविधनाशप्रागभावप्रतियोगिनौ प्रागभावनाशौ न तथा, संयोगमत्सरज्ञानानां नाशप्रागभावौ स्वसंबन्धिनि विद्यमानौ न प्रतियोगिजातीयासमानकालिकाविति न तेषामसंग्रहः।

यद्वा स्वसंबन्धितावच्छेदकसमनियतो धर्मः प्रकृतिः। समनियमघटकव्यापकत्वद्वये प्रतियोगिवैयधिकरण्यं निवेशनीयम्। तच्च प्रतियोगिकालावच्छेदेन प्रतियोग्यधिकरणे वर्तमानेभ्यः अन्यत्वम्। तेन द्रव्यस्य संयोगः, संयोगवतो द्रव्यत्वं प्रकृतिः इत्युपपद्यते। प्रतियोगिकालावच्छिन्नत्वस्य निवेशात् प्रागभावनाशयोर्न प्रकृतित्वम्। प्रागभावनाशयोरत्यन्ताभावः तत्कालावच्छेदेन तदाधिकरणे न वर्तमान इति तयोर्न संबन्धितावच्छेदकव्यापकत्वम्। चित्ररूपाद्यनभ्युपगमात् दैशिकाव्याप्यवृत्तेर्गन्धादेः अत्यन्ताभावस्य प्रतियोगिकालेऽपि सत्त्वात् न व्यापकत्वहानिः। चित्ररूपाद्यभ्युपगमे तु वस्तुतःकल्पोऽनुसरणीयः।

प्रकृतिपदोत्तरतृतीयायाः तादात्म्यमर्थः। तच्चापरपदार्थतावच्छेदकेऽन्वयितावच्छेदके वान्वेति। इत्थं च प्रकृत्यभिन्नचारुत्ववानिति वाक्यार्थबोधः।

एवं "नाम्ना सुतीक्ष्णश्चरितेन दान्तः" इत्यत्रापि तृतीयास्तादात्म्यमर्थः। सुतीक्ष्णपदस्य सुतीक्ष्णपदप्रतिपाद्ये लक्षणा। नाम वाचकम्। चरितम् आचारस्य प्रयत्नस्य विषयः। दमः इन्द्रियनिग्रहादिः। तथा च नामाभिन्नसुतीक्ष्णपदप्रतिपाद्यः चरिताभिन्नदमशील इत्यन्वयबोधः।

"सुरथो नाम राजाभूत्" इत्यादौ नामेति तादात्म्यार्थकलुप्ततृतीयान्तम्, संभावनार्थकं वा अव्ययम्।

"गोत्रेण गार्ग्य" इत्यादौ तृतीयायास्तादात्म्यमर्थः। गोत्रशब्दार्थस्तु वंशप्रवर्तकपुरुषो ब्रह्मर्षिः। वंशपदार्थस्तु प्रवर्तकस्याप्रवर्तकस्य वा पुरुषस्योत्तरकालिकः स्वारम्भकशुक्लपरमाणुभिः परंपरया आरभ्यमाणः। उत्तरकालिकत्वनिवेशात् पराशरस्य वंशो वसिष्ठ इति न प्रयोगः, किं तु वसिष्ठस्य पराशर इति। प्रवर्तकशब्दार्थस्तु दर्शितवंशत्वस्वरूपशक्यसंबन्धेन स्वसंज्ञाशब्दस्य निरूढोपचारकः। यथा गौतमा गर्गाः शाण्डिल्या इत्यादौ गौतमादयः पुरुषाः स्ववंशे स्वसंज्ञोपचारकाः। ब्रह्मर्षिशब्दार्थस्तु ऋषिस्वरूपो ब्राह्मणः। एवं वंशमात्रार्थकत्वे तु चैत्रमैत्रगोत्रा एते इति प्रयोगः। तद्वारणार्थमुपात्तेऽपि प्रवर्तकत्वे विशेषणे एते रघवो यदवः कुरवो रघुयदुकुरुगोत्रा एते इति प्रयोगवारणाय ब्रह्मर्षित्वं विशेषणम्।

न च दर्शितप्रयोगवारणाय ब्राह्मणत्वमेव विशेषणमस्तु, किमृषित्वनिवेशेनेति वाच्यम्। दर्शितोपचारकत्वेऽपि न ब्राह्मणत्वमात्रं तन्त्रम्। तथा सति प्रभाकराः कुमारिला उदयना एते इति प्रयोगप्रसङ्गः। किं तु ऋषित्वम्। तदर्थमेवात्र तत्प्रदर्शनम्, वस्तुतो गोत्रलक्षणे न तन्निवेशः। पत्न्यां पतिसागोत्र्यव्यपदेशो गौणः धर्मशास्त्रातिदेशात्, पितृसागोत्र्यव्यपदेशनिवृत्तिरपि तत एव। अत एव कन्यादानवाक्यं पितृगोत्रघटितमेव।

"गार्ग्य" इत्यत्र तद्धितार्थोऽपत्यम्। तच्च वंश एव। एवं च तृतीयार्थाभेदस्य गर्गपदार्थेऽन्वयः। तथा च गोत्राभिन्नगर्गापत्यमिति शाब्दबोधः।

"धान्येन धनी" इत्यादौ धनपदार्थे तृतीयार्थाभेदान्वयः। धान्याभिन्नधनवानिति बोधः।

"जात्या ब्राह्मण" इत्यत्र जात्यभेदो ब्राह्मणेऽन्वीयमानः "सविशेषणे हि विधिनिषेधौ सति विशेष्ये बाधे विशेषणमुपसंक्रामतः" इति न्यायेन ब्राह्मणत्वमादाय पर्यवस्यति। न च तृतीयार्थोऽभेदः परपदार्थैकदेश एवान्वेतीति नियम इति वाच्यम्। ईदृशनियमे मानाभावात्। यत्र पदार्थे सविशेषणे हीति न्यायेनापि प्रथमतृतीयार्थोऽभेदो नान्वेतुमर्हति तत्रैव पदार्थस्यान्वयिनः अन्वयितावच्छेदकस्य

वा एकदेशेऽन्वेति। यत्र तु पदार्थेऽन्वेतुमर्हति तत्र पदार्थ एवान्वेति। यथा "पृथिव्यादीनां नवानां द्रव्यत्वेन गुणवत्त्वेन वा साधर्म्यम्" इत्यत्र द्रव्यत्वाद्यभेदः तृतीयान्तार्थः साधर्म्यशदार्थे समानधर्मेऽन्वेति। यथा वा "वाजपेयेन यजेत" इत्यादौ वाजपेयाद्यभेदः तृतीयान्तार्थः धात्वर्थयागादावन्वेति।

एवम् "अर्घादिकया सपर्यया पर्यपूपुजत्" विशेषणान्तरविशेषितसपर्यादि-तादात्म्यं धात्वर्थे शुद्धसपर्यादौ तृतीया बोधयति। अविशेषितस्य एकधर्माव-च्छिन्नस्य तादात्म्यसंसर्गेणान्वयो निराकाङ्क्षत्वबाधितो न तु तादात्म्यविशेषणको नितरां विशेषणान्तरविशेषितस्येति।

ननु धात्वर्थविशेषणे तृतीयापि द्वितीयेव साधुत्वार्था। तृतीयान्तार्थस्य द्विती-यान्तार्थस्येव तादात्म्यसंसर्गेणैव धात्वर्थेऽन्वयः, न तु तादात्म्यविशेषेणेति चेत् —

तर्हि कथं सपर्यया पर्यपूपुजत् इत्यत्रान्वयोपपत्तिः। न च विशेषणान्तर-विशेषितस्य एकधर्मावच्छिन्नस्यापि तादात्म्येनान्वयो भवत्येव, यथा प्रमा अनुभव इत्यत्र प्रमाशब्दार्थस्य यथार्थानुभवस्य अनुभवेऽन्वयः। यथा वा "भूरुर्वरा, देशो राजन्वान्" इत्यत्र सर्वसस्यवद्भूमेः भुवि, सुराजदेशस्य देशे तादात्म्यान्वयः तथा प्रकृतेऽपि "अर्घ्यदानादिसपर्यायाः सपर्यायां, वाजपेयेन यजेत" इत्यादौ वाजपेया-देर्धात्वर्थयागादौ तादात्म्यान्वय इति वाच्यम्। धात्वर्थविशेषणे द्वितीयाया एव साधुत्वज्ञापकानुशासनस्य सत्त्वेन तृतीयायास्तथानुशासनविरहात्। प्रकृतानुशास-नस्य तथात्वोपगमे प्रकृत्या चारु इत्यादेः अनन्वयापत्तेः। नामार्थयोः तादात्म्य-संसर्गेणान्वये समानविभक्तिकत्वस्य तन्त्रत्वात्। तृतीयायास्तादात्म्यार्थकत्वे तु प्रकृते तादात्म्यप्रकारकान्वयबोधसंभवात्। तथान्वयबोधे समानविभक्तिकत्व-स्यातन्त्रत्वात्।

अत एव "द्रव्यत्वेन साधर्म्यम्" इत्यत्र द्रव्यत्वस्य समानधर्मे, "द्रोणैः षोड-शभिः खारी" इत्यत्र षोडशानां द्रोणानां खारीपदवाच्ये तादात्म्यप्रकारकोऽन्वय-बोधः।

नन्वेवं "कुटिलेन दण्डः" इति कुतो न प्रयोग इति चेत् — कुटिलादिशब्दानां प्रकृत्यादिगणपठितशब्दापर्यायत्वादेवाप्रयोग इति। एवम् अर्घ्यादिना पर्यपूपुजत् इत्येतावतैव सामञ्जस्ये सपर्ययेत्यादिकमपुष्टार्थं न तु निराकाङ्क्षम् इति।

"समवायेन लौहित्यवत् जपाकुसुमम्, समवायिसंयोगेन लौहित्यवत् स्फटि-कशकलम्" इत्यत्र तृतीयार्थः तादात्म्यं मतुबर्थतावच्छेदके संबन्धेऽन्वेति।

"तेजसा सूर्यः, दानेन कल्पतरुरयम्" इत्यादौ सूर्यादिपदस्य सूर्यादिसदृशे लक्षणा। सूर्यसादृश्ये तेजसः कल्पतरुसादृश्ये दानस्य तादात्म्यं तृतीयार्थोऽन्वेति। अथ वा "समवायेन नीलः पटः, कालिकेन नीलः स्पन्दः" इत्यादौ तृतीयान्त-समभिव्याहारः समवायकालिकादिसंसर्गकनीलविशिष्टशाब्दधियं जनयति यथा, तथा प्रकृतेऽपि तेजसेत्यादितृतीयान्तसमभिव्याहारः तेजोदानादिस्वरूपतादात्म्यसं-सर्गकसूर्यकल्पतर्वादिविशिष्टशाब्दं जनयति। अतः संसर्गानुवादिका तृतीयेति।

अवच्छेदकत्वमपि क्वचित् तृतीयार्थः। यथा वह्नित्वेन वह्नेर्जनकत्वम्, जन्य-त्वम्, प्रतियोगित्वम्, प्रकारत्वम्, विशेष्यत्वम् इत्यादौ तृतीयाया अवच्छेद-कत्वमर्थः। तच्च आधेयतासंबन्धेन प्रातिपदिकार्थान्वितं निरूपकत्वसंबन्धेन जन-कत्वादावन्वेति। वह्नित्वनिष्ठावच्छेदकतानिरूपकं वह्निनिष्ठं जनकत्वम् इत्याद्या-कारको बोधः।

"समवायेन ध्वंसो नास्ति" इत्यादौ अवच्छेदकतानिरूपकत्वस्वरूपमव-च्छिन्नत्वं तृतीयार्थः। तच्च नञर्थे अत्यन्ताभावे स्वाश्रयप्रतियोगिताकत्वसंबन्धे-नान्वेति। व्युत्पत्तिवैचित्र्येण तृतीयार्थस्य संसर्गीभूता प्रतियोगितैव प्रतियोगिनो ध्वंसपदार्थस्य नञर्थे संसर्गीभवति। अथवा अवच्छिन्नप्रतियोगिताकत्वं तृतीयार्थः। तच्च स्वरूपेण संबन्धेन नञर्थेऽन्वेति, व्युत्पत्तिवैचित्र्येण प्रतियोगिनोऽपि संसर्गी-भवतीति वदन्ति। तृतीयार्थोऽवच्छिन्नत्वं संसर्गीभूतप्रतियोगिताविशेषणतया भासत इति स्वतन्त्राः।

वस्तुतस्तु — समवायेनेत्यादितृतीयान्तसमभिव्याहारः समवायावच्छिन्नप्रति-योगिताकत्वसंसर्गेण प्रतियोगिनो ध्वंसादिशब्दार्थस्य नञर्थान्वयबोधे हेतुः इत्येव रमणीयम्। इयमेव गतिः "पटत्वेन घटो नास्ति, शशीयत्वेन शृङ्गं नास्ति" इत्यादावपि बोध्या।

क्वचित् निरूपकत्वमपि तृतीयार्थः। यथा "धूमस्य धूमत्वेन वह्निव्याप्तिः" इत्यत्र निरूपकत्वं तृतीयार्थः। तच्च आधेयतासंबन्धेन प्रकृत्यर्थविशेषितं वह्निव्याप्ता-वन्वेति। निरूपकत्वं तु व्यापकत्वरूपं घटकत्वमिति संप्रदायः। अतिरिक्त-मित्यन्ये।

एवं "अङ्कुरेणानेकान्तः" इत्यत्र "वह्न्यावयःपिण्डेन धूमव्यभिचारः" इत्यत्र च घटितत्वं व्याप्यत्वरूपमतिरिक्तं वा निरूपकत्वं तृतीयार्थः। तच्चानेकान्तपदार्थे व्यभिचारे धूमव्यभिचारे च प्रकृत्यर्थविशेषितमन्वेति।

क्वचित् दैशिकसंसर्गावच्छिन्नमाधेयत्वं तृतीयार्थः यथा "समेनैति विषमेनैति" इत्यादौ। यदीयसकलावयवानां प्रत्येकं स्वसंयुक्तसंयोगादिपरम्पराणामूर्ध्वदिगवच्छिन्नानां तुल्यत्वं स भूभागः समो देशः। तदितरो विषमः। तथा च कर्तृघटितदैशिकपरम्परासंसर्गावच्छिन्नमाधेयत्वं तृतीयार्थः। तच्च प्रकृत्यर्थेन समेन विषमेण च देशेन विशेषितं धात्वर्थगमनेऽन्वेति।

न चात्र समादिदेशव्यापारस्य जन्यत्वेन संसर्गेण धात्वर्थगमनेऽन्वयात् करणे तृतीयेति वाच्यम्। करणत्वविवक्षायामिष्टत्वात्। अविवक्षणे तु आधारस्याधिकरणसंज्ञया तत्कार्येण वा करणसंज्ञायाः तत्कार्यस्य वा बाधात् करणाधारकर्मणामिति भाष्यात्।

न चैवं तृतीयार्थाधिकरणत्वस्य धात्वर्थेऽन्वयोपगमात् कारकत्वापत्तिरिति वाच्यम्। सर्वत्र धात्वर्थान्वयविरहात् नामार्थेनाप्यन्वयात्।

अत एव "शाखया कपिसंयोगी वृक्षः" इत्यत्र श्वेतः खरविषाणाभ्यामित्यत्र च तृतीयार्थाधेयत्वस्य शाखाविशेषितस्य कपिसंयोगे, खरविषाणविशेषितस्य श्वेतरूपे सविशेषणे हीति न्यायेनान्वयात्।

"रजतत्वेन पुरोवर्तिनं जानाति इच्छति करोति द्वेष्टि वा" इत्यादौ प्रकारत्वं तृतीयार्थः। तच्च धात्वर्थफले द्वितीयार्थे वा विशेष्यत्वे निरूपकतासंसर्गेण अन्वेतीति वदन्ति। तृतीयार्थप्रकारत्वं रजतत्वादिप्रकृत्यर्थविशेषितं धात्वर्थे फले विषयत्वे व्यापारे ज्ञानादौ वा निरूपकत्वेन प्रतियोगित्वेन वा संसर्गेण अन्वेति। रजतत्वनिष्ठप्रकारतानिरूपितपुरोवर्तिनिष्ठविशेष्यताकत्वम् आक्षेपेण परिशेषेण मनसा वा मानान्तरेणावगम्यते। विशेष्यत्वस्य द्वितीयार्थतापक्षेऽपि तत्र तृतीयार्थप्रकारत्वस्य निरूपकतासंसर्गेणान्वयो न संभवति। सुबर्थयोः परस्परमन्वयस्याव्युत्पन्नत्वात्। तृतीयार्थप्रकारत्वस्य धात्वर्थे ज्ञानादावेवान्वयात् प्रकारतानिरूपितविशेष्यताकत्वस्य मानान्तरादेव लाभ इति।

एवं "लक्षणस्वरूपप्रामाण्यादिभिरनुमाने निरूपणीये" इत्यादौ शाब्दबोधः तदनुकूलव्यापारश्च निपूर्वकरूपधातोरर्थः। कर्मकृतस्तु विशेष्यो विषयो वा अर्थः। कर्मप्रत्ययस्थले व्यापारस्य विशेषणतया कर्मप्रत्ययार्थेऽन्वयः। प्रकृते कर्मकृदर्थैकदेशेऽपि विशेष्यत्वे विषयत्वे वा शाब्दबोधस्य फलस्य विशेषणतयान्वयो व्युत्पत्तिवैचित्र्यात्। तथा चात्र तृतीयार्थप्रकारत्वस्य लक्षणादिविशेषितस्य शाब्दबोधेऽन्वयः। लक्षणादिप्रकारताकव्यापारजन्यशाब्दबोधनिरूपितविशेष्यताश्रयेऽनुमाने इति बोधः। प्रकारतानिरूपितविशेष्यताकत्वलाभः पूर्ववदेव। अथ वा कृदर्थैकदेशे विशेष्यत्वे विषयत्वे वा तृतीयार्थप्रकारत्वस्य निरूपकत्वेनान्वयः।

लक्षणादिनिष्ठप्रकारतानिरूपिका या व्यापारजन्यशाब्दबोधनिरूपिता विशेष्यता तदाश्रयेऽनुमाने इति बोध इति वदन्ति। तत्र कृदर्थैकदेशे धात्वर्थातिरिक्तस्यान्वयो न व्युत्पत्तिसिद्ध इत्यादिकं चिन्तनीयम्।

केचित्तु फलविशिष्टं कर्म कृदर्थः। फलस्य द्वेधा शाब्दबोधविषयत्वम्। तृतीयार्थप्रकारत्वस्य कर्मकृदर्थैकदेशे फलेऽन्वयः। तथा चात्र शाब्दबोधानुकूलव्यापारप्रयोज्यस्य लक्षणादिप्रकारकशाब्दबोधस्य विशेष्येऽनुमाने इति शाब्दबोध इति वदन्ति।

तदपि चिन्त्यम्। फलस्य द्वेधा शाब्दबोधविषयत्वस्याप्रामाणिकत्वात्। व्युत्पत्तिवैचित्र्येणैव व्यापारविशेषणकफलविशेष्यकशाब्दबोधसंभवेन अन्वयोपपत्तिसंभवात् फलादेः कर्मप्रत्ययार्थत्वासंभवात्, कृदर्थैकदेशे धात्वतिरिक्तार्थान्वयस्य अव्युत्पन्नत्वाच्च।

परिच्छिन्नत्वमपि क्वचित् तृतीयार्थः। यथा "द्विद्रोणेन धान्यं क्रीणाति" इत्यादौ। द्रोणो गुरुत्वत्वावान्तरजातिमान् परिमाणविशेषः। द्विद्रोण इति पात्रादित्वान्न स्त्रीत्वम्। द्विद्रोणत्वमपि द्रोणत्वावान्तरजातिविशेषो द्रोणद्वित्वं वा। परिच्छिन्नत्वं तृतीयार्थः। क्रयकर्मत्वे धात्वर्थफलेऽन्वेति। परिच्छिन्नत्वं तु द्विद्रोणस्य स्वसमवायिनः एकद्रव्यस्योभयद्रव्यस्य वा आरम्भकपरमाणुत्वसमनियतसंख्यासजातीयसंख्याव्यापकत्वम्। क्रयजनितस्वत्वस्य सकलेषु धान्यतदारम्भकेष्वेकस्याभ्युपगमात् परमाणुवृत्तित्वसंभवेन स्वरूपेण समवायेन वा संबन्धेन तादृशसंख्यां प्रति साक्षादेव व्यापकत्वम्।

यदि च स्वत्वस्य धान्यवृत्तित्वमुपेयते न तु तदारम्भकवृत्तित्वं, तदा स्वाश्रयारम्भजननपरंपरासंबन्धेन तावत्परमाणुविश्रान्तेन व्यापकत्वं बोध्यम्। एवं च द्विद्रोणसमवायिद्रव्यारम्भकपरमाणुसमनियतसंख्यासजातीसंख्याव्यापकस्य स्वत्वस्यानुकूला क्रयक्रियेत्यन्वयबोध इति गुरुचरणाः (पदवाक्यरत्नाकरकाराः)

द्विद्रोणो गुरुत्वान्तरम्। समवायित्वं तृतीयार्थः धान्यपदार्थे धान्यराशावन्वेति। धान्यराशेरतिरिक्तत्वात्। एको महान् धान्यराशिः इति प्रतीतेः। अन्यथा अवयविमात्रासिद्धिप्रसङ्गात् इत्येकदेशिनः।

तच्चिन्त्यम्। यवधान्योभयघटितराशौ यवत्धान्योभयत्वजातिरतिरिक्तैव स्वीक्रियते न तु धान्यत्वं यवत्वं वेति न सांकर्यमिति वाच्यम्। यवाद्यर्थिनामप्रवृत्तिप्रसङ्गात्।

न च रुधिरास्थिमांसादीनां शरीरावयवत्ववत् यवादीनामपि तदवयवत्वात् भवति प्रवृत्त्युपपत्तिरिति वाच्यम्। तथाप्यनन्तानां यवधान्योभयत्वादीनां जातीनां राशितत्प्रागभावध्वंसानां च कल्पनापत्तेः। अनतिरिक्तत्वाभ्युपगमेन प्रवृत्त्याद्युपपत्तेः एको महानिति प्रतीतिरौपाधिकीत्यन्यत्र विस्तरः।

वस्तुतस्तु —

कालान्तरगते भानौ सूक्ष्मं यद् दृश्यते रजः।
प्रथमं तत् प्रमाणानां त्रसरेणुं प्रचक्षते।।

इत्यादिना त्रसरेण्वादिघटितं माषसुवर्णनिष्कादिमानं मनुना उक्तम्। निष्कादिघटितं च द्रोणादिमानम्। एवमाढकमितद्रव्यचतुष्टयस्यारम्भकपरमाणुसमसंख्याकपरमाणुगुरुत्वानि द्रोणः। तद्द्विगुणगुरुत्वानि द्विद्रोणः। तेषां गुरुत्वानां स्वाश्रयपरमाणुभिः परम्परया आरभ्यमाणत्वं संबन्धः धान्यादौ।

न च तावत्संख्यकाः परमाणवः परमाणुवृत्तिः तादृशी संख्या वा द्रोणपदार्थोऽस्तु, धान्यादावुभयस्य परम्परासंबन्धो भवतीति वाच्यम्। तावत्परमाणूनां परमाणुसंख्यायाश्च परम्परासंबन्धस्य तैजसावयविन्यपि सत्त्वात् तत्र द्विद्रोणादिव्यवहारप्रसङ्गात्। तस्मात् तथाविधगुरुत्वानि द्रोणपदार्थः यद्वशात् द्रोणो व्रीहिः द्रोणः पाषाण इत्युभयप्रतीतेरेकविषयत्वं तैर्गुरुत्वैः दर्शितपरंपरया विशिष्टो निरूढलक्षणः यद्वशात् 'द्रोणमाषं भुङ्क्ते भीम' इति प्रयोगः।

न च तैः गुरुत्वैः संसृष्टेषु धान्येषु विशकलितेष्वपि द्रोणादिव्यवहारप्रसङ्ग इति वाच्यम्। व्यञ्जकाभावादप्रसङ्गात्। व्यञ्जकसत्त्वे तु इष्टत्वात्। अत एव द्रोणः काश्यां द्विद्रोणः प्रयागेऽयोध्यायां चेति पञ्चद्रोणो मम व्रीहिरिति प्रतीतिव्यवहारौ।

एवं तृतीयार्थोऽन्यव्यवच्छेदः। अन्यस्य द्विद्रोणव्याप्यगुरुत्वत्वावच्छिन्नप्रतियोगितासंसर्गेण व्यवच्छेदेऽत्यन्ताभावेऽन्वयः। व्यवच्छेदस्य धान्येऽन्वयः। एवकारस्थल इव व्यवच्छेदान्वयिनि धान्ये द्विद्रोणस्याप्यन्वयः। तत्रान्यव्यवच्छेद इव संबन्धोऽपि तृतीयार्थः। द्विद्रोणविशेषितस्य संबन्धस्य धान्येऽन्वयात् द्विद्रोणस्यान्वयो बोध्यः। अतः पञ्चद्रोणेन क्रीयमाणे धान्ये 'द्विद्रोणेन धान्यं क्रीणाति' इति न प्रयोगः, न वा द्रोणेन क्रीयमाणे "द्विद्रोणेन क्रीणाति" इति प्रयोगः।

क्रीणातेस्तु फलतया प्रतिग्रहः व्यापारतया धान्यं चार्थः। विक्रीणातेरपि फलव्यापारयोर्वैपरीत्येन तदुभयमर्थः। प्रतिग्रहः स्वत्वेच्छा। दानं स्वत्वस्वत्वनाशोभयेच्छा। फलस्य स्वत्वेच्छायाः प्रयोज्यतया दाने फलस्य दानस्य प्रयोजकतया संबन्धेन स्वत्वेच्छायामन्वयः। अत एव भाविधान्यादिग्रहणार्थं धनं प्रयुञ्जाने

"द्विद्रोणेन त्रिद्रोणेन वा धान्यं क्रीणात्ययम्" इति प्रयोगः, भाविनि स्वत्वानुपगमेऽपि स्वत्वेच्छायाः संभवात्। एवं मूल्यस्याग्रिमकाललभ्यत्वव्यवस्थायां "निष्कशतेनाश्वं क्रीणाति" इति प्रयोगः। क्रये धान्यादेः कर्मणः स्वत्वप्रकारतानिरूपितविशेष्यतया स्वत्वविषयतानिरूपिताधारत्वसंसर्गावच्छिन्नविषयतया वा संबन्धेनावच्छिन्नाधेयत्वे द्वितीयार्थेऽन्वयः। विक्रये तु स्वत्वनाशीयविषयताघटितान्यतरसंबन्धावच्छिन्नमाधेयत्वं द्वितीयार्थः।

"शतेन क्रीणाति" इत्यत्र स्वत्वं व्यापारः करणतृतीयार्थः। स्वत्वस्य जन्यत्वेन संबन्धेन स्वत्वनाशेच्छायां दानेऽन्वयः। स्वत्वे सत्येव त्यागो भवति, न हि परकीये त्यागः। स्वत्वजन्यत्वं दाने स्फुटम्।

"शतेन विक्रीणीते" इत्यत्र स्वत्वनाशस्तृतीयार्थः। तस्य जन्यतया स्वत्वेच्छायामन्वयः। स्वत्वोपहितेच्छायां स्वत्वनाशस्य हेतुत्वात्, परकीयधने तादृशेच्छाविरहात्। स्वत्वनाशः स्वत्वेच्छाजनकः।

एवं च "द्विद्रोणेन धान्यं, स्वर्णं माषेण क्रीणाति" इत्यत्र द्विद्रोणान्यद्विद्रोणव्याप्यगुरुत्वाभाववद्द्विद्रोणधान्यवृत्तिस्वत्वेच्छाप्रयोज्यायाः सुवर्णमाषस्वत्वजन्यायाः स्वत्वस्वत्वनाशोभयविषयकेच्छायाः आश्रयोऽयमिति शाब्दबोधः।

अकर्तुर्यस्य स्वत्वनाशः ततः पञ्चमी "ध्रुवमपाये०"[१] इति सूत्रेणेति वक्ष्यते।

"वैपणिकात् मौक्तिकं क्रीणाति" इत्यत्र स्वत्वनाशः पञ्चम्यर्थः। तस्य जनकतया फले स्वत्वेच्छायामन्वयः। फलेऽप्यपादानत्वान्वय इत्यादिकं वक्ष्यते।

एवं विक्रयकर्मणः स्वामित्वं यत्र तत्र सप्तमी "मौक्तिकं विक्रीणीते राज्ञि नागरिके वा" इत्यादौ "सप्तम्यधिकरणे च"[२] इति सूत्रेण इत्यादिकं वक्ष्यते।

द्रोणपरिच्छित्तिमुक्त्वा संख्यापरिच्छित्तिः काशिकादावुदाहृता पञ्चकेन पशून् क्रीणाति, साहस्रेण पशून् क्रीणाति इत्यादि। पञ्चकं पञ्चत्वसंख्या, साहस्रं सहस्रत्वसंख्या। अत्रापि अन्यव्यवच्छेदः संबन्धश्च तृतीयार्थः। पञ्चत्वस्य सहस्रत्वस्य वा व्याप्यसंख्यात्वेन अवच्छिन्नया प्रतियोगितया व्यवच्छेदेनास्यान्वयः। व्यवच्छेदस्य पञ्चत्वादिसंबन्धस्य च पशुष्वन्वयः। तेन षट्केन त्रिकेन वा क्रीयमाणेषु पशुषु 'पञ्चकेन पशून् क्रीणाति' इति न प्रयोगः।

---

[१] सू. १.४.२४

[२] सू. २.३.३६

क्वचित् क्रयकरणं तृतीयार्थः। यथा "त्रिभिः पारावताः पञ्च" इत्यादि। अत्र व्यापारः क्रयः तृतीयार्थः। व्यापारस्य जन्यत्वेन क्रयस्य कर्मत्वेन संबन्धेन पारावतेष्वन्वयः।

भाट्टरहस्यानुसारेण प्रकृत्यादिशब्दोत्तरतृतीयार्थविवरणम्[1]

तृतीयायाः अनुशासनानुरोधेन लाक्षणिकार्थाः अनुसन्धीयन्ते — "प्रकृत्यादिभ्य उपसंख्यानम्"[2] इति वार्तिकात् "प्रकृत्या चारुः, प्रायेण याज्ञिकः, गोत्रेण गार्ग्यः, समेनैति, द्विद्रोणेन धान्यं क्रीणाति, सुखेन याति" इत्यादौ करणत्वातिरिक्तेऽर्थान्तरे लक्षणा।

प्रकृत्या चारुः — प्रकृतिपदेन स्वाभाविकी सामग्री उच्यते। तृतीयायाः जन्यत्वमर्थः। स्वाभाविकसामग्रीजन्यचारुत्ववानित्यर्थः। न चैवमत्र करणत्वस्यैव तृतीयार्थत्वसंभवेन पृथगनुशासनं व्यर्थमिति वाच्यम्। जन्यत्वस्य जन्यत्वत्वेन तृतीयार्थत्वमङ्गीकृत्य तत्सार्थक्यसंपादनात्। अत एव तृतीयार्थस्य जन्यत्वस्य स्वाश्रयचारुत्वाश्रयवृत्तित्वसंबन्धेन अध्याहृतक्रियायामन्वयः।

प्रायेण याज्ञिकः — प्रायशब्दस्यावच्छेदकावच्छिन्नत्वराहित्यविशिष्टबाहुल्यमर्थः। तृतीयाया अवच्छिन्नत्वमर्थः। तथा च किंचिन्न्यूनबाहुल्यावच्छिन्नयज्ञविद्यासंबन्धवानित्यर्थः।

गोत्रेण गार्ग्यः — गोत्रशब्दस्य संबन्धविशेषवाचित्वेऽपि गोत्रत्वपरत्वमङ्गीकृत्य गोत्रत्वावच्छिन्नगर्गसंबन्धवान् इत्यर्थः वक्तव्यः। अथ वा तृतीयायाः अभेदार्थकत्वमङ्गीकृत्य गोत्राभिन्नसंबन्धवानित्यर्थः। अस्मिंश्च पक्षे गोत्रत्वं तृतीयार्थः, अवच्छिन्नत्वं संसर्गः। गोत्रवृत्तिगोत्रत्वावच्छिन्नसंबन्धवानित्यर्थः।

समवायेन रूपवान् — अनयैव च रीत्या समवायेन रूपवानित्यादिप्रयोगा उपपादनीयाः। समवाय-वृत्तिसमवायत्वावच्छिन्नरूपसंबन्धाश्रय इति बोधः।

धान्येन धनवान् — अत्र तृतीयार्थः अभेदः। तद्द्वारा धान्यस्य धनेऽन्वयः। धान्याभिन्नधनवानित्यर्थः। अथ वा धनसंबन्धं प्रति धान्यस्य करणत्वात् करणे तृतीया। धान्यकरणकधनसंबन्धवानिति बोध इति कौस्तुभे स्पष्टम्।

समेनैति — अवच्छिन्नत्वं तृतीयार्थः। समदेशावच्छिन्ना गमनभावनेत्यर्थः।

---

[1] भा.र.पृ. १११-११२

[2] वा. १४६६

द्विद्रोणेन धान्यं क्रीणाति — द्वयोः द्रोणयोः समाहारो द्विद्रोणम्। पात्रादित्वात् स्त्रीत्वाभावः। परिमितत्वं तृतीयार्थः। द्रोणद्वयपरिमितं धान्यं क्रीणातीत्यर्थः। करणत्वेनाप्यन्वयसंभवेऽपि परिमितत्वेन बोधार्थं पृथगनुशासनम्।

सुखेन याति — सुखपदं दुःखाभावपरम्। तृतीयार्थश्च प्रयोजकत्वम्। तच्च प्रतियोगिदुःखानुत्पादकत्वरूपम्। तथा च दुःखाजनकं यानम् इति बोधः।

कारकचक्रानुसारेण प्रकृत्यादितृतीयार्थः

कारकचक्रे भवानन्दतर्कवागीशेन प्रकृत्यादिभ्यस्तृतीयास्थले बोधवर्णनमित्थं कृतम्।[१] — "धान्येन धनी" गोत्रेण गार्ग्यः "प्रकृत्याभिरूपः" इत्यादौ तृतीयाया अभेदोऽर्थः। धान्याभिन्नधनवान् इत्यन्वयधीः। गार्ग्यो गर्गकुलोत्पन्नः इत्यन्वयधीः। प्रकृतिपदस्य साहजिक इत्यर्थः। अभिरूपपदस्य रमणीयतावान् इत्यर्थः। तथा च साहजिकाभिन्नरमणीयतावानित्यन्वयधीः इति।

दिवः कर्म च[२] इति सूत्रार्थविचारः

दिव्धात्वर्थं प्रति साधकतमं कारकं कर्मसंज्ञं स्यात्। चकारात् करणसंज्ञाक-मित्यपि लभ्यते। अक्षैरक्षान्वा दीव्यति[३]। अक्षकरणकं क्रीडनम् इति बोधः।

प्रौढमनोरमायाम्[४]

चादिति। करणशब्दानुवृत्त्या "परिक्रयणे संप्रदानमन्यतरस्याम्"[५] इत्युत्तरसूत्र-स्थान्यतरस्यांग्रहणापकर्षणेन वा संज्ञयोः पर्याये लब्धे समावेशार्थश्चकारः। तेन मनसा देव इत्यत्र कर्मण्यण्, करणे तृतीया चेत्युभयं सिध्यति। "मनसः संज्ञायाम्"[६] इत्यलुक्।

किं च "अक्षैर्देवयते यज्ञदत्तेन" इत्यत्र सकर्मकत्वात् अण्यन्तावस्थायां कर्तुः ण्यन्तावस्थायां कर्मत्वं न। "अणावकर्मकात्॰"[७] इत्यात्मनेपदं च नेति सिद्धान्तः। "दीव्यतेऽक्षैर्देवदत्तेन" इत्यत्र भावे लकाराभावः फलमित्यपि बोध्यम्।

यत्तु प्राचा कर्मसंज्ञं वा स्यात् इति व्याख्यातम्, तत् आकरविरोधात् उपेक्ष्यम्।

---

[१] पृ. ५४
[२] सू. १.४.४३
[३] सि.कौ. (vol. I) पृ. ६३७
[४] पृ. ८९०
[५] सू. १.४.४४
[६] सू. ६.३.४
[७] सू. १.३.८८

स्यादेतत् — करणसंज्ञाया अवकाशः देवना अक्षाः। करणे ल्युट्। कर्मसंज्ञायास्तु दीव्यन्ते अक्षाः कर्मणि लट्। अक्षैर्दीव्यति इत्यत्र तु संज्ञाद्वयप्रयुक्तकार्यद्वयप्रसङ्गे परत्वात् तृतीयैव स्यात् न तु द्वितीयेति चेत् —

अत्राहुः — कार्यकालपक्षे "कर्मणि द्वितीया"[१] इत्यत्र यदस्योपस्थापनं तस्यानवकाशत्वात् द्वितीयेति।

ननु 'दीव्यन्तेऽक्षा' इत्यत्र कर्मण्यभिहितेऽपि करणत्वस्यानभिधानात् तृतीया स्यात्। 'देवना अक्षा' इत्यत्र ल्युटा करणस्याभिधानेऽपि कर्मणोऽनभिधानात् द्वितीया स्यात्।

मैवम्। एकैव ह्यत्र शक्तिः संज्ञाद्वययोगिनी। तथा च उभयत्राप्यभिधानमेव। न त्वनभिहितत्वम्। अत्र शक्तिः दिव्धात्वर्थनिरूपितसाधकतमत्वरूपो धर्मः।

लघुशब्देन्दुशेखरे[२]

दिवः कर्म च। चेन संज्ञयोः समावेशः। तेन दिवः साधकतमस्य कर्मत्वकरणत्वात्मकशक्तिद्वययोगो बोध्यते। तेन अक्षैर्देवयते इत्यत्र परत्वात् तृतीया। कर्मत्वाच्च "अणावकर्मकात्०"[३] इतिसूत्रप्राप्ताकर्मकत्वप्रयुक्तपरस्मैपदाभावः। अत्र विप्रतिषेधशास्त्रबलात् तृतीयैव शक्तिद्वयबोधिका। कार्यकालपक्षे कर्मत्वसामानाधिकरण्यविशिष्टमपि करणत्वं प्रकृतसूत्रोपदेशोपस्थितकर्तृकरणयोरितिसूत्रघटककरणपदेन गृह्यत इति तृतीयैवोभयबोधिकेति यावत्।

यदा अक्षाणां फलाश्रयत्वसमानाधिकरणकर्मत्वविवक्षा तदा 'अक्षान् दीव्यति' इत्यादि साधु। "अक्षाणां देविता" इत्यादौ तृतीयातः परत्वात् कृद्योगलक्षणा षष्ठी।

न च मनसादेव इत्यत्र मनसः दिव्धात्वर्थनिरूपितसाधकतमत्वसमानाधिकरणकर्मत्वशक्तिमत्त्वात् कथं तृतीयेति वाच्यम्। तत्र हेतुतृतीयान्तेन पचाद्यजन्तदेवशब्दस्य समास इति स्वीकारात्।

न च शक्तिद्वयस्वीकारे "दिवः कर्म च"[४] इतिसूत्रबोधितकर्मत्वशक्तिमति 'दीव्यतेऽक्षा' इत्यादौ लकारेण करणत्वशक्तेरनुक्तत्वेन तृतीयापत्तिः। एवं 'देवना अक्षा' इत्यत्र ल्युटा करणत्वस्याभिधानेऽपि कर्मत्वस्यानभिहितत्वात् षष्ठ्यापत्ति-

---

[१] सू. २.३.२

[२] पृ. ६६१-६६३

[३] सू. १.३.८८

[४] सू. १.४.४३

रिति वाच्यम्। "अपादानमुत्तराणि कारकाणि बाधन्ते" इत्यस्योदाहरणं "गां दोग्धि पयः" इत्यादि। तत्र कर्मणि लकारे पञ्चम्यापत्तिवारणाय एकद्रव्यगतानेकशक्तिमध्ये एकस्या अभिहितत्वे अपरस्या अपि अभिहितशक्तिवत् प्रकाशेनाक्षतेः। एकैव शक्तिः संज्ञाद्वयोपयोगिनीति तु चिन्त्यम्। कर्मादिपदानां कर्मत्वादितत्तच्छक्तिरूपेण बोधकतया तयोर्भेदस्यैवौचित्यात्।

पदवाक्यरत्नाकरे[१]

> दिवोऽर्थकरणे कर्मप्रत्यया अपि साधवः।
> अक्षादौ कर्मकरणोभयसंज्ञासमुच्चयः।।

स्मरति तावत् पाणिनिः — "दिवः कर्म च" इति सूत्रम्। दिव्धात्वर्थं प्रति साधकतमं करणसंज्ञकं कर्मसंज्ञकं च भवतीति तदर्थः। संज्ञाद्वयसमावेशार्थः चकारः। अत एव 'मनसा देव' इत्यत्र मनसः करणसंज्ञाप्रयुक्ता तृतीया, कर्मसंज्ञया च कर्मण्युपपदे विहितः अण्प्रत्ययः, "मनसः संज्ञायाम्"[२] इति तृतीयायाः अलुक्। एवं स्थिते दिव्धात्वर्थनिरूपितकरणत्वमभिदधती द्वितीया तृतीया च साधुः।

अक्षैः अक्षान् वा दीव्यति — अत्र दिव्धातोः क्रीडारूपः सुखसाधनात्मको व्यापारोऽर्थः। तत्र चाक्षाः करणत्वेनानुयन्ति। तेन अक्षकरणकसुखसाधनक्रीडाव्यापारः वाक्यार्थः।

यत्तु दिवः साधकतमे करणसंज्ञाप्रयुक्तं कार्यं "देवना अक्षा" इत्यत्र ल्युट्। कर्मसंज्ञाप्रयुक्तं तु कार्यं "अक्षा दीव्यन्ते" इत्यत्र लः। "अक्षैर्दीव्यति" इत्यत्रोभयसंज्ञाप्रयुक्तकार्यप्रसक्तौ करणसंज्ञया कर्मसंज्ञा तत्प्रयुक्तं कार्यं वा बाध्यते। तस्मात् "अक्षान् दीव्यति" इति प्रयोगो न प्रमाणमिति।

तन्न। तथा सति "दिवः कर्म च"[३] इति सूत्रे चशब्दवैयर्थ्यप्रसङ्गात्। ऐच्छिकविकल्पेन कार्यद्वयोपपादकतयैव चकारसार्थक्यात्।

ननु "देवना अक्षा" इत्यत्र करणसंज्ञैव, "अक्षा दीव्यन्त" इत्यत्र कर्मसंज्ञैवेति व्यवस्थितविकल्पार्थकत्वादेव चकारस्य सार्थक्यमिति चेत् — न। व्यवस्थितविकल्पस्य संज्ञाद्वयविधानबलादेव सिद्धेः। एतदुक्तं भवति — एकत्र संज्ञाद्वयस्य

[१] पृ. ६४४
[२] सू. ६.३.४
[३] सू. १.४.४३

"आकडारादेकासंज्ञा"[१] इति नियमात् असंभवेन सूत्रोक्तस्य संज्ञाद्वयसमावेशस्य निरवकाशत्वं स्यादिति क्वचित् करणसंज्ञैव, क्वचिच्च कर्मसंज्ञैवेति ज्ञापनादेव सिद्धेः इति।

न च एकस्यैवाक्षपदस्योभयसंज्ञावत्त्वे "अक्षा दीव्यन्ते, देवना अक्षाः" इत्यत्र कुतो न द्वितीयातृतीये इति वाच्यम्। "अक्षा दीव्यन्त" इत्यत्र कर्मत्वमाख्यातेनाभिहितमिति न कर्मणि द्वितीया। "देवना अक्षा" इत्यत्र ल्युटा करणत्वमभिहितमिति न करणे तृतीया प्रसज्यते।

विभक्त्यर्थनिर्णये[२]

द्वितीयार्थोऽपि व्यापारो दिवोऽर्थेऽन्वेतीति ज्ञापनार्थं "दिवः कर्म च"[३] इति सूत्रम्। दिवः साधकतमं कर्म करणं च भवतीत्येतदर्थकम्। चकारः संज्ञाद्वयार्थकः। अत एव "मनसा देव" इत्यत्र करणसंज्ञाप्रयुक्ता तृतीया। कर्मसंज्ञाबलात् कर्मोपपदप्रयुक्तोऽण् प्रत्ययः। "मनसः संज्ञायाम्"[४] इत्यनुशासनेन तृतीयाया अलुक्। एवं च अक्षैरक्षान् वा दीव्यतीत्युभयविधः प्रयोगः साधुः।

केचित्तु — दिवः साधकतमे करणसंज्ञाप्रयुक्तं कार्यं "देवना अक्षा" इत्यत्र ल्युट्। कर्मसंज्ञाप्रयुक्तं तु "अक्षा दीव्यन्त" इत्यत्र लः, "देवनीया" इत्यादावनीयरादिः प्रत्ययः। "अक्षैः दीव्यन्ति" इत्यत्र च संज्ञाद्वयप्रसक्तौ परया तृतीयया द्वितीयाया बाधः इति 'अक्षान् दीव्यति' इति न प्रमाणमिति वदन्ति।

तन्न विचारसहम्। तृतीयाया द्वितीयाबाधकत्वे बीजीभूतानुशासनविरहात्। प्रत्युत परया कर्मसंज्ञया तत्प्रयुक्तद्वितीयादिकार्येण वा करणसंज्ञायाः तत्प्रयुक्ततृतीयादिकार्यस्य वा बाधापत्तेः।

न चैवमेवास्तु, 'अक्षान् दीव्यति' इत्येव प्रमाणं न च 'अक्षैर्दीव्यति' इति, दीव्यतियोगे तृतीयाद्वितीयोभयप्रयोगोऽसाधुरेवेति वाच्यम्।

तथा सति "दिवः कर्म च"[५] इति सूत्रे चकारवैयर्थ्यप्रसङ्गात्। न च क्वाचित्कसंज्ञाद्वयप्रयुक्तस्य ल्युट्कर्माख्यातादिकार्यस्य उपपादकतया चकारः सार्थक इति वाच्यम्। क्वाचित्ककार्योपपादकत्वे बीजविरहेण विशेषेण कार्यद्वयोपपादकतयैव ऐच्छिकविकल्पार्थकस्य चशब्दस्य सार्थकत्वसंभवात्।

---

[१] सू. १.४.१
[२] पृ. २०३
[३] सू. १.४.४३
[४] सू. ६.३.४
[५] सू. १.४.४३

एवम् "अक्षैरक्षान्वा दीव्यति मत्स्य" इत्यत्र दीव्यतेः क्रीडा अर्थः। सा तु सुखव्यापारोभयं सुखमेव वा अर्थः। तृतीयाद्वितीययोः पातस्वरूपो व्यापारोऽर्थः। तथा च अक्षजन्यपातजन्यस्य सुखानुकूलव्यापारस्य सुखस्य वा अनुकूलकृतिमान् मत्स्य इति बोधः। न चात्र धात्वर्थफले सुखे आधेयत्वस्वरूपं कर्मत्वं द्वितीया बोधयितुमीष्टे सुखादावाधेयत्वस्य बाधात् इति द्वितीयाया अपि व्यापारोऽर्थः। अत एव देवना अक्षा इत्यत्र व्यापाराश्रयस्य करणस्य ल्युटा अभिधानात् न व्यापारार्थिका द्वितीया।

एवम् "अक्षा दीव्यन्ते देवनीया वा" इत्यत्र तिङा व्यापारस्य, तदाश्रयस्य अनीयरा अभिधानान्न व्यापारार्थिका करणतृतीया। अनभिहित इति निषेधात् इति।

भाट्टरहस्यरीत्या दिवः कर्म च इति सूत्रार्थविचारः

"दिवः कर्म च"[१] इति सूत्रेण दिव्धात्वर्थस्य साधकतमं कर्मसंज्ञं स्यात्, लक्ष्यानुरोधेन स्वरितत्वानुगतेः पूर्वसूत्रस्थकरणशब्दानुवृत्त्या करणसंज्ञकं चेत्यर्थकेन साधकतमस्यैव संज्ञाद्वयानुशासनम्। अतः "अक्षैः अक्षान् वा दीव्यति" इति प्रयोगद्वयं साधु। अत्र पणपूर्वकाक्षसाध्यक्रिया धात्वर्थः। तत्राक्षाणां मुख्यमेव करणत्वम्। तत्रार्थे द्वितीया लाक्षणिकी। न च करणसंज्ञायाः "देवना अक्षा" इत्यत्र ल्युटि सावकाशत्वात् "दीव्यति" इत्यत्र कर्त्राख्याते संज्ञाद्वयप्रयुक्तकार्यप्रसङ्गे संज्ञागतपरत्वात् द्वितीयाया एव साधुत्वं तृतीयान्तस्य प्रयोगस्य कथं साधुत्वम्। विभक्तिगतपरत्वाद्वा वैपरीत्यं तृतीयाया एव साधुत्वं द्वितीयाया असाधुत्वं च स्यादिति वाच्यम्।

संज्ञाद्वयविधानबलादेव व्यवस्थितकार्यसिद्धौ चशब्देनैकत्र संज्ञाद्वयप्रयुक्तकार्यद्वयविधानप्रतीत्या उभयोः साधुत्वसिद्धेः। अत एव चशब्दाभावेऽपि "मनसा देव" इत्यादौ करणसंज्ञया तृतीयायाः कर्मसंज्ञया च कर्मोपपादकत्वलाभेन 'देव' इत्यत्र "कर्मण्यण्"[२] इति सूत्रेणाण्प्रत्ययस्य च सिद्धिः अविकला। तस्मात् चशब्दस्य द्वितीयासिद्धिरेव प्रयोजनम्।

न च तथापि "दीव्यन्तेऽक्षा" इत्यत्र लकारेण कर्मत्वाभिधानेऽपि करणत्वानभिधानेन 'अक्षैः' इति तृतीयापत्तिः। "देवना अक्षा" इत्यत्र ल्युटा करणत्वस्याभिधानेऽपि कर्मत्वस्यानभिधानात् 'अक्षान्' इति द्वितीयापत्तिरिति वाच्यम्। एकस्यैव साधकतमत्वस्योभयसंज्ञकत्वेन उभयत्राप्युभयाभिधानोपपत्तेः — इति।

---

[१] सू. १.४.४३

[२] सू. ३.२.१

अपवर्गे तृतीया[१] इति सूत्रार्थविचारः

अपवर्गः फलप्राप्तिः। तस्यां द्योत्यायां कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्। 'अह्ना क्रोशेन वा अनुवाकोधीतः'। अह्नि क्रोशे वा निरन्तरमध्ययनेनानुवाको गृहीत इत्यर्थः। अपवर्गे किम्। 'मासमधीतो नायातः'। न गृहीत इत्यर्थः।[२]

फलप्राप्तिरिति। फलप्राप्तौ सत्यां, प्रयोजनाभावादेव न क्रियायाः प्रवृत्तिरिति फलप्राप्तिशब्देन तत्पूर्वकस्त्याग उच्यते। त्यागस्य च फलप्राप्तिः व्यङ्ग्येति अन्यत्र विस्तरः। नायातः इति। अनेन फलाप्राप्तिरेव स्फुटमुच्यते। एवं च "अह्ना क्रोशेन वानुवाकोऽधीत" इत्यत्र त्यागस्तृतीयार्थः। अहर्व्यापकत्यागप्रतियोग्यध्ययनकर्म अनुवाक इति शाब्दबोधः।

न चात्र भूतार्थकक्तप्रत्ययेन त्यागस्य लाभेन तत्र तृतीयायाः शक्तिकल्पनं व्यर्थमिति वाच्यम्। तया अतीत्वलाभेऽपि निवृत्तिरूपस्य त्यगस्याप्रतीतेः। अतीतत्वं हि वर्तमानध्वंसप्रतियोगिसमयवृत्तित्वम्। निवृत्तिस्तु अनुत्पाद इति लघुशब्देन्दुशेखरचन्द्रकलयोः[३]

लघुमञ्जूषायाम्[४]

"अह्ना क्रोशेन वानुवाकोऽधीत" इत्यत्र तृतीयार्थः संबन्धः। क्तप्रत्ययार्थातीतत्वव्यङ्ग्ये क्रियात्यागे फलप्राप्तिपूर्वकत्वं तृतीयाद्योत्यम्। एवं चानुवाकविषयकम् अहस्संबन्धि अतीतमध्ययनमिति बोधः। तेन फलप्राप्तिपूर्वकः तत्त्यागो व्यज्यते इत्युक्तम्।

बृहन्मञ्जूषायाम्[५]

"अह्ना क्रोशेन वानुवाकोऽधीत" इत्यत्र तृतीयार्थः संबन्धः। क्तप्रत्ययार्थः अतीतत्वम्। तच्च नाशप्रतियोगित्वम्। तस्य फलप्राप्तिपूर्वकत्वं द्योत्यम्। एवं चाहस्संबन्धि फलप्राप्तिपूर्वकनाशप्रतियोगि अनुवाकविषयकमध्ययनमिति बोधः इति।

---

[१] सू. २.३.६
[२] सि.कौ. (vol. I) पृ. ६३७
[३] पृ. ६६३
[४] पृ. १२५५
[५] पृ. १७०

भाट्टचिन्तामणौ[१]

क्रियासंबन्धोऽपवर्गः। "मासेनानुवाकोऽधीत" इति द्वितीयापवादः इत्युक्तम्। "कालाध्वनोरत्यन्तसंयोगे"[२] इति सूत्रं क्रियासंबन्धाभावस्थले सावकाशमिति तेषामाशयः।

भाट्टरहस्ये[३]

एवम् "अपवर्गे तृतीया"[४] इति सूत्रेण फलप्राप्तिरूपापवर्गे द्योत्ये कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात् अन्यथा द्वितीयेत्यर्थकेन "मासेनानुवाकोऽधीतः" इत्यत्र तृतीयया फलप्राप्तिर्द्योत्या। अन्यथा 'मासमधीतो नायात' इतिवत् बोधः इत्युक्तम्।

विभक्त्यर्थनिर्णये[५] संज्ञोऽन्यतरस्यामित्यादिसूत्राणां व्याख्यानम्

द्वितीयायाः करणत्वमिव तृतीयाया अपि कर्मत्वमर्थ इत्यावेदयितुं "संज्ञोऽन्यतरस्यां कर्मणि"[६] इति सूत्रम्। सम्पूर्वस्य जानातेः कर्मणि तृतीया द्वितीया वा स्यादिति तदर्थः। "पित्रा पितरं वा संजानीते" इत्यत्र संजानातेः संज्ञानम् इत्यस्य असाधारणधर्मेण ज्ञानमर्थः। तृतीयाद्वितीययोः विषयतास्वरूपं कर्मत्वमर्थः। अथ वा आधेयत्वस्वरूपमेव कर्मत्वमिहाप्यर्थः। विषयतायाः पूर्वोक्तरीत्या धात्वर्थफलत्वावश्यकत्वात्। तथा च पितृनिष्ठविषयतानिरूपकं ज्ञानं वाक्यार्थः। संजानीत इत्यत्र "संप्रतिभ्यामनाध्याने"[७] इत्यनुशासनेन संपूर्वकात् प्रतिपूर्वकाच्च ज्ञाधातोः आत्मनेपदं भवति, यद्याध्यानं स्मरणं नार्थ इत्यर्थकेन सिद्धमात्मनेपदम्। आध्याने तु 'मात्रा मातरं वा संजानीत' इत्येव प्रमाणम्।

केचित्तु आध्याने मातरं मातुर्वा संजानाति इत्येव साधु। "अधीगर्थ०"[८] इति सूत्रेण विहितया षष्ठ्या तृतीयाया बाधात्। अत्र एव कृद्योगषष्ठ्या-तृतीयाया बाधः पितुः संज्ञानम् इत्यादावित्याहुः। तन्न विचारसहम्। षष्ठ्या तृतीयाया बाधे द्वितीयाया अपि बाधापत्तेः, युक्तेस्तौल्यात्। 'पितुः संज्ञानं संज्ञा वा' इत्यत्र

---

[१] पृ. ९७
[२] सू. २.३.५
[३] पृ. ११३
[४] सू. २.३.६
[५] पृ. २०४-२०६
[६] सू. २.३.२२
[७] सू. १.३.४६
[८] सू. २.३.५२

वृत्तिकारमते कृद्योगे कर्मार्थकषष्ठ्या कर्मप्रत्ययस्य द्वितीया-तृतीयादेर्बाध इति नात्र तृतीयायाः प्रसक्तिरिति।

हुविकर्मण्यपि तृतीयां ज्ञापयति "तृतीया च होश्छन्दसि"[१] इति सूत्रम्। छन्दसि होः हुवेः कर्मणि तृतीया स्यात् चकारात् द्वितीयापीति तदर्थः। "यवाग्वा जुहोति, यवागूं जुहोति" इत्यादौ जुहोतेः वह्निसंयोगान्वयि आधेयत्वस्वरूपं कर्मत्वं तृतीयाद्वितीययोरर्थः। तथा च यवागूवृत्तिवह्निसंयोगफलकस्वाहाकरणकप्रक्षेपकर्तृत्वं वाक्यार्थः। लोके तु "घृतं जुहोति" इत्यादौ न तृतीया।

"अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया स्यात्" इति "दास्या संयच्छते कामुक" इत्यत्र तृतीया। अशिष्टो वेदनिषिद्धव्यवहारप्रयोजकश्चेत् दाणोऽर्थः तदा चतुर्थ्यर्थे तृतीया भवति। अत एव "दाणश्च सा चेच्चतुर्थ्यर्थे"[२] इत्यनुशासनेन सम्पूर्वकात् दाणः आत्मनेपदं भवति यदि चतुर्थ्यर्थार्थिकया तृतीयया योगो भवतीत्यर्थकेन आत्मनेपदं साधयता संप्रदानत्वार्थिका तृतीयापि साध्यते। अत्र वेदनिषिद्धव्यवहारप्रयोजकत्वं वेदनिषिद्धत्वं वा पापानुगुणत्वं न धातोः न वा तृतीयाया अर्थ इति न शाब्दबुद्धिविषयः। किं तु शाब्दबोधानन्तरं मानान्तरगम्यम्। दाणस्तु दानमर्थः। तत् स्वरूपसत् पापानुगुणम् इहापेक्षितम्। अत्रैवात्मनेपदं साधु। तृतीयायाः संप्रदानत्वमर्थः। दानसंप्रदानत्वयोः स्वरूपं चतुर्थीविवरणे वक्ष्यते। एवं च दासीसंप्रदानकदानकर्ता कामुक इति शाब्दबोधः। पापाननुगुणदाने तु भार्यायै संयच्छतीति चतुर्थीपरस्मैपदयोरेव साधुत्वम्।

फलोपहितार्थकधातुयोगे कालाध्वशब्दात् तृतीयेति ज्ञापयितुं "अपवर्गे तृतीया"[३] इत्यनुशासनम्। अपवर्गे फलप्राप्तौ सत्यां कालाध्वशब्दाभ्यामत्यन्त-संयोगेऽर्थे तृतीया भवतीत्यर्थकम्। अपवर्गः फलम्। यद्विषयकेच्छाप्रयोज्याचार-विषयः क्रिया तत् फलम्। प्राप्तिस्तदुपधानम्। तथा च यत्र फलोपहितो धात्वर्थः तत्रात्यन्तसंयोगार्थिका तृतीया। अत्यन्तसंयोगः कालिकं दैशिकं वा व्यापकत्वम्। द्वितीयाप्रकरणोक्तमेतदत्र स्मर्तव्यम्।

एवं च "अह्ना क्रोशेन वा अनुवाकोऽधीतः" इत्यत्र अध्ययनमुच्चारणमनु-सन्धानं वा धात्वर्थः। दृढसंस्कारोपहितमध्ययनमिह धातुना उपस्थाप्यते। तत्र धात्वर्थे तृतीयार्थोऽत्यन्तसंयोगोऽन्वेति। तथा च अहर्व्यापकस्य क्रोशव्यापकस्य वा दृढसंस्कारोपहिताध्ययनस्य कर्मानुवाक इति शाब्दबोधः। दैशिकव्यापकत्वमिह

---

[१] सू. २.३.३

[२] सू. १.३.५५

[३] सू. २.३.६

कर्तृघटितपरम्परासंसर्गावच्छिन्नं बोध्यम्। परंपरासंबन्धः स्वकर्त्राश्रयत्वरूपः। स्वम् अध्ययनम्। यत्र फलोपहिता न क्रिया तत्र मासमधीतोऽपि नाभ्यस्तोऽनुवाक इति द्वितीयैव प्रमाणम्।

अत्र फलानुपहितमेव अध्ययनादिकं धात्वर्थः। अत्यन्तसंयोगमात्रं तृतीयार्थः। अपवर्गस्तु व्यञ्जनागम्यः। दिवसेन भवानयुद्धेत्यत्र दिवसाभिव्यापकं भवत्कर्तृकमतीतयुद्धमिति प्रथमबोधः। विजयफलकं तथाविधयुद्धमिति वैयञ्जनिको बोध इत्यालंकारिकाः।

तन्न सुन्दरम्। तव शत्रुर्दिवसमयुद्ध न तु दिवसेनेत्यत्रान्वयबोधानुपपत्तेः। फलानुपहितक्रियामात्रस्य धात्वर्थत्वे युद्धे दिवसादिव्यापकत्वशत्रुकर्तृकत्वयोः अवगमेन तदेकतरस्यापि निषेधप्रतीतेरसंभवात्।

तस्मात् कालादिशब्दोत्तरतृतीयायाः समभिव्याहारे फलोपहितक्रियायां धातुर्लाक्षणिक इति न तु दिवसेनेत्यत्र विजयफलकयुद्धं धात्वर्थः। तथा च विजयफलकदिवसाभिव्यापकयुद्धे शत्रुकर्तृकत्वाभावस्य, शत्रौ तथाविधयुद्धकर्तृत्वाभावस्य वा प्रतीतिसंभवात् निषेधप्रतीत्युपपत्तिः। दिवसाभिव्यापकयुद्धे शत्रुकर्तृकत्वप्रतीतेः, शत्रौ तथाविधयुद्धकर्तृत्वप्रतीतेर्वा विरोधाभावात्, घटवान् नीलघटाभाववानितिवत् इति पदवाक्यरत्नाकरे गुरुचरणाः। इति कारकतृतीयार्थनिर्णयः

सहयुक्तेऽप्रधाने[१] इति सूत्रार्थविचारः

सहार्थेन युक्तेऽप्रधाने तृतीया स्यात्। पुत्रेण सह आगतः पिता। "पृथग्विनानानाभिस्तृतीयान्यतरस्याम्"[२] इतिवत् सहेनेत्येव सिद्धे युक्तग्रहणं सहार्थकशब्दानां साकमित्यादीनामपि ग्रहणार्थम्। तेन साकंसार्धंसंयोगेऽपि तृतीया भवति। क्वचित् सहादियोगं विनापि तृतीया। "वृद्धो यूना तल्लक्षणश्चेदेव विशेषः"[३] इति सूत्रे सहादिशब्दाभावेऽपि तदर्थावगमेऽपि तृतीयानिर्देशदर्शनात्। तेन 'पुत्रेणागतः पिता' इत्यपि साधुः प्रयोगः। पितुः आगमनक्रियासंबन्धः शाब्दः। पुत्रस्य तत्साहित्यावगम आर्थिक इति तस्याप्राधान्यम्।

---

[१] सू. २.३.१९
[२] सू. २.३.३२
[३] सू. १.२.६५

प्रौढमनोरमायाम्[१]

पुत्रेणेति। पितुरत्र क्रियासंबन्धः शाब्दः, पुत्रस्य तु आर्थ इति तस्याप्राधान्यम्। अप्रधानग्रहणं शक्यमकर्तुम्। न चैवं पितुरपि तृतीयापत्तिः। तत्र प्रातिपदिकार्थमात्रेऽन्तरङ्गत्वात् प्रथमोत्पत्तेः। 'पितुरागमनम्' इत्यादौ कारकविभक्तेः प्राबल्याच्च। इति प्रत्यपादि।

लघुशब्दरत्ने

अत्राप्राधान्यं नाम शाब्दगुणाद्यन्वयित्वाभावः इत्याह पितुरिति। आर्थ इति। 'पुत्रसाहित्यवान् पिता आगत' इति बोधे साहित्यस्य पुत्रेण आगमनसंबन्धे एव संभव इति पश्चात् तस्यापि मानसस्तत्संबन्धबोध इति भावः। शाब्दत्वं च विवक्षानिबन्धनम्। एवं चैषु शाब्दत्वरूपविशेषणाभावकृतो विशिष्टाभावः। सकर्मक इत्यादाविव विद्यमानतावाचिसहशब्दयोगे "सहैव पुत्रैर्दशभिर्भारं वहति गर्दभी" इत्यादौ क्रियान्वयित्वरूपविशेष्याभावकृतो विशिष्टाभावः। दशानां पुत्राणां विद्यमानत्वेऽपि गर्दभी भारं वहतीत्यर्थ इत्यन्यत्र विस्तरः। "एकेनैव सुपुत्रेण सिंही स्वपिति निर्भया" इति पूर्वार्धानुसारेणात्र सहशब्दः विद्यमानत्वार्थकः। अन्तरङ्गत्वादिति। प्राचीनैः अन्तरङ्गत्वमूलकतया उक्तात् "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति न्यायात् इत्यर्थः।

वस्तुतस्तु उपपदविभक्तेरिति वाक्यं वाचनिकमेवेति अन्तरङ्गत्वं तन्न्यायोपलक्षणं बोध्यम्। न च प्रथमायाः कारकाधिकारे पाठाभावेनाकारकविभक्तित्वात् कथं तेन प्रथमायाः साधनमिति वाच्यम्। "अभिहितकारकवाचिनी प्रथमा" इति वार्तिककारोक्तेः प्रथमायाः अपि कारकविभक्तित्वात्। तेन कारकविभक्तित्वं न कारकाधिकारविहितविभक्तित्वं, किं तु क्रियाजनकार्थकविभक्तित्वम्। तच्च प्रथमाया अप्यस्तीति। — इति निरूपितम्।

तत्र भैरवीव्याख्याने विशेषाः[२]

"सहयुक्ते०" इति सूत्रे लौकिकं यत् प्राधान्यं मुख्यत्वरूपं तदभाववत्त्वरूपमप्राधान्यं न विवक्षितम्। "राज्ञा सह सेना आगच्छति" इत्यत्र राज्ञः लौकिकप्राधान्यवत्त्वात् तृतीयानापत्तेः। अतः अत्र सूत्रे उक्तमप्राधान्यं पारिभाषिकमित्याशयेनाह — अत्राप्राधान्यमिति। गुणाद्यन्वयित्वाभाव इति। अत्र आदिपदेन

---

[१] पृ. ८९४-८९६

[२] पृ. ८९४-८९६

द्रव्यक्रिययोः संग्रहः। न च द्रव्याद्यन्वयित्वाभाव इत्येव द्रव्यपदार्थस्य प्राधान्यं तन्त्रान्तरे प्रतिपादनादुचितमिति वाच्यम्। गुणसमुदायो द्रव्यम् इति पतञ्जल्युक्तानुसारेणैवमभिधानात्। गुणोदाहरणं "पुत्रेण सह स्थूलः" इति। द्रव्योदाहरणं "पुत्रेण सह आगतः पिता" इत्यादि प्रसिद्धमेव। एषु शाब्दं गुणाद्यन्वयित्वं पितर्येवेति पुत्रस्याप्राधान्यम्। आर्थिकं गुणाद्यन्वयित्वं तु पुत्रेऽपि । अत एव "पुत्रेण सह आगमनं पितुः" इत्यत्र पितरि शाब्दस्य कृत्प्रकृत्यर्थक्रियाकर्तृत्वस्य सत्त्वेन "कतृकर्मणोः कृति"[१] इति षष्ठी भवति। शाब्दत्वं तु इतरसंबन्धं विनापि वाक्यजन्यशाब्दबोधे भासमानत्वमेव।

सहशब्दार्थः साहित्यम्। तच्च स्वसमभिव्याहृतशब्दजन्योपस्थितिविषयगुणादिसमानाधिकरणगुणाद्यन्वयित्वमेव। सामानाधिकरण्यं क्वचित् कालिकप्रत्यासत्त्या। यथा पूर्वोक्तोदाहरणेषु। क्वचित् दैशिकमपि यथा — यत्र क्षेत्रे तिलवापोत्तरं माषवापः तत्र "तिलैः सह माषान् वपति" इति प्रयोगः तत्र। तृतीयार्थस्तु सर्वत्र क्रियावाचकशब्दसत्त्वे प्रतीयामानतादृशक्रियान्वयित्वमेव। यत्र तु गुणद्रव्ययोरूपस्थितिः तत्र सहशब्दस्य प्रयोगबलात् प्रतीयमानतत्तत्पदार्थसंबन्धित्वमेव। एवं च पुत्रेण सह पितुर्धनम् इति वाक्यात् पुत्रस्वामित्वसमानकालिकपितृस्वामित्ववत् धनमिति बोधः। "पुत्रेण सह स्थूल" इति वाक्यात् पुत्रवृत्तिस्थौल्यसमानकालिकस्थौल्यवान् पितेति बोधः। "पुत्रेण सह आगतः पिता" इति वाक्यात् पुत्रकर्तृकागमनसमानकालिकागमनवान् पितेति बोधः। पुत्रादेः सहार्थयोगश्च आगमनादिद्वारक एव बोध्यः — इति उपपादितम्। मञ्जूषायाम् इमे एव विशेषाः स्थिताः भैरव्यां स्पष्टीकृताः।

लघुमञ्जूषायां[२]

"पुत्रेण सहागत" इत्यादौ "सहयुक्तेऽप्रधाने"[३] इति तृतीया। सहशब्दार्थश्च समभिव्याहृतपदार्थसमकालिकत्वरूपं साहित्यं, तत्समनियताखण्डोपाधिरूपं वा। तृतीयार्थश्च क्रियासमभिव्याहारे सहार्थबलात् प्रतीयमानतत्तत्क्रियाकर्तृत्वादिकमेव। द्रव्यगुणसमभिव्याहारे सहार्थबलात् प्रतीयमानः तत्तत्पदार्थसंबन्ध एव।

एवं च "पुत्रेण सह आगतः पिता, पुत्रेण सह पितुः गौः, पुत्रेण सह स्थूल" इत्यादौ पुत्रकर्तृकागमनसमानकालिकागमनवान् पिता, पुत्रस्वामिकत्वसमानकालिकपितृस्वामिकत्ववती गौः, पुत्रवृत्तिस्थौल्यसमानकालिकस्थौल्यवान् इत्यादिः

---

१ सू. २.३.६५
२ पृ. १२५५
३ सू. २.३.१९

बोधः। तदुक्तं काव्यप्रकाशे — "सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्" इति। शब्दशक्त्या एकार्थाभिधायकं पदं यत् सहान्वयबलात् अनेकार्थाभिधायकं यथाकथंचित् बोधकं सा सहोक्तिरिति तदर्थः। तत्रैकस्यार्थस्य वाचकमन्यस्याक्षेपकमिति बोध्यम्। उदाहरणे आगत इत्येतदुभयवृत्त्यागमनबोधकमिति तद्व्याख्यातारः। पुत्रकर्तृकागमनसहितागमनवानिति बोधः। पुत्रादेः सहार्थयोगश्च आगमनादिद्वारक एव बोध्यः।

क्वचित् समानदेशत्वरूपं तत्समनियतत्वं वा सहार्थः। यथा 'माषवापोत्तरं तत्रैव क्षेत्रे तिलवापे तिलैः सह वापान् वपन्ति स्म' इति भवति। स्पष्टं चेदं भाष्ये।

यद्यपि सहागतः पुत्रेणेत्यादौ सहार्थसामर्थ्यात् प्रतीयमानक्रियाकर्तृत्वेन पुत्रशब्दात् तृतीया सिद्धा। न च क्तप्रत्ययेनाभिधानमिति शङ्क्यम्। इतरसमिव्याहारं विनापि प्रतीयमानस्वप्रकृत्यर्थक्रियाकर्तुरेव तेनाभिधानात्। एवं "पुत्रेण सहागमनं देवदत्तस्य" इत्यादौ उक्तरीत्या प्रतीयमानकृत्प्रकृत्यर्थान्वयिनोः कर्तृकर्मणोरेव षष्ठी, न त्वप्रतीयमानतदन्वयिनोः इति न दोषः। यद्वा सहार्थगमनाश्रयत्वेऽपि प्रकृतधातूपात्तव्यापाराश्रयत्वाभावेनाकर्तृत्वान्न कर्तरि तृतीया।

तथापि "पुत्रेण सह स्थूल" इत्याद्यर्थं सूत्रम्। स्वान्वयिगुणद्वारा सहयोगस्य पितापुत्रयोरविशेषेऽपि न पितुस्तृतीया। प्रधानत्वात्। अप्रधानग्रहणप्रत्याख्यानेऽपि पितुर्न सा। "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति सर्वं भाष्ये स्पष्टम्।

गुणद्रव्यक्रियाभिः गुणप्रधानभावेन द्वयोः संबन्धे सहशब्दप्रयोगो भवति। तत्र अप्राधान्यं नाम शाब्दस्य गुणाद्यन्वयित्वस्याभावः।

उक्तेषूदाहरणेषु आगमनादिभिः पितुः शाब्दः, पुत्रस्य सहार्थबलात् प्रतीयमानैः तैः संबन्धात् आर्थः। इतरसंबन्धं विना प्रतीयमानत्वं चार्थस्य शाब्दत्वम्। तत्र उक्तसाहित्यवाचिसहशब्दप्रयोगस्थले शाब्दत्वरूपविशेषणाभावकृतो विशिष्टाभावः। विद्यमानतावाचिसहशब्दयोगे तु गुणाद्यन्वयित्वरूपविशेष्याभावकृतः विशिष्टाभावः। यथा "सहैव दशभिः पुत्रैः भारं वहति गर्दभी" इत्यादौ। दशसंख्याकपुत्राणां विद्यमानत्वेऽपीत्यर्थः। दशभिः पुत्रैः विद्यमानैरपि — दशसु पुत्रेषु विद्यमानेष्वपीति यावत्।

"पुत्रेण सह यः स आगत" इत्यादौ वैशिष्ट्यादिरूपं साहित्यं सहशब्दार्थः। पुत्रसाहित्यवान् यः स आगत इति बोधः।

एवं तृतीयान्तार्थस्य शाब्दप्राधान्येऽपि प्रथमाद्यन्तार्थस्य अन्याधीनत्वरूपमार्थ-प्राधान्यं प्रतीयते। अत एव समकक्षयोर्मध्ये भवांस्तेन सह आगच्छतु इत्युक्ते दुःखं दृश्यते प्रथमान्तनिर्दिष्टस्य।

यत्तु प्रधानत्वं मुख्यत्वम्, अत्र नगरेऽयं प्रधानम् इत्यादिवत्। तदभावरूपं चाप्रधानत्वं तृतीयार्थ इति। तन्न। "राज्ञा सह सेना आगच्छति" इत्यादौ तृतीया-नापत्तेः। राज्ञां अमुख्यत्वाभावात् — इति निरूपितम्। सहार्थप्रतियोगिनः शाब्दा-प्राधान्येऽपि आर्थप्राधान्यमेव। अत एव समकक्षयोः द्वयोर्मध्येऽन्यतरस्यापरेण सहागन्तव्यमित्यक्ते दुःखं दृश्यत इति मञ्जूषायाम्।[१]

लघुशब्देन्दुशेखरे[२]

सहार्थः साहित्यम्। तच्च स्वसमभिव्याहृतक्रियादिसमानकालिकतत्क्रियादि-मत्त्वम्। क्वचित् समानदेशक्रियावत्त्वम्। अत एव माषवापोत्तरं तत्रैव क्षेत्रे तिल-वापे "तिलैः सह माषान् वपति" इति भवति। यद्यपि "पुत्रेण सह आगतः" इत्यादौ आगमनक्रियाकर्तृत्वादेव पुत्रात् तृतीया सिद्धा, तथापि "पुत्रेण सह स्थूल" इत्यादि अस्य मुख्यमुदाहरणमिति भाष्ये स्पष्टम्।

भाष्ये हि — किमुदाहरणम्, तिलैः सह माषान् वपतीति। तिलैर्मिश्रीकृता माषा उप्यन्ते। तत्र करणे इत्येव सिद्धम्। इदं तर्हि "पुत्रेण सहागतो देवदत्त" इति अप्रधाने कर्तरि तृतीया यथा स्यात्। एतदपि नास्ति प्रयोजनम्, प्रधाने कर्तरि लादयो भवन्तीति प्रधानकर्ता क्तेनाभिधीयते। यश्चाप्रधानम्, सिद्धा तत्र कर्तरीत्येव तृतीया। इदं तर्हि "पुत्रेण सहागमनं देवदत्तस्य" इति। षष्ठ्यत्र बाधिका भविष्यति। इदं तर्हि "पुत्रेण सह स्थूलः, पुत्रेण सह पिङ्गल" इति। सहयुक्तेऽप्रधान-वचनमनर्थकम्, उपपदविभक्तेः कारकविभक्तिर्बलीयस्त्वात्, अन्यत्रापि। क्वान्यत्र गोः स्वामी व्रजति — इति।

अत्र कैयटः — व्रजिक्रियायां गवां कर्मत्वात् तन्निबन्धना द्वितीया स्वामीश्वरेति प्राप्ते उपपदविभक्ती षष्ठीपञ्चम्यौ बाधित्वा प्रवर्तते — इति।

---

[१] पृ. १७१
[२] पृ. ६६४

शब्दशक्तिप्रकाशिकानुसारेण सहशब्दार्थनिरूपणम्[१]

"पुत्रेण सह आगतः, सूपेन साकं भुक्तः, चक्रेण सार्धं दण्डेन जनितः, पुत्रेण समं मित्राय दानम्" इत्यादौ स्वान्वयितत्तत्कर्तृत्वादिकारकावच्छिन्नसमभिव्याहृत-क्रियायाः समानकालीनत्वरूपं साहित्यं सहाद्यव्ययस्यार्थः। स्वं समभिव्याहृत-क्रिया। तथा च यादृशक्रियान्वयि यत्र यत् कारकं तत्र तत्कारकावच्छिन्न-तादृशक्रियाकालीनत्वं सहार्थः। तदेकदेशे च कर्तृत्वादिकारके स्वप्रकृत्यर्थस्याधे-यत्वं तृतीयया बोध्यते। सहशब्दार्थस्य समानकालीनत्वस्य समभिव्याहृतक्रिया-यामाश्रयत्वसंबन्धेनान्वयः। तथा च पुत्रवृत्तिकर्तृतानिरूपकागतिसमानकालीनागति-कर्तृतावान्, सूपनिष्ठकर्मतानिरूपकभोजनसमानकालिकभोजनकर्मतावान्, चक्र-निष्ठकरणताकोत्पत्तिकालीनदण्डनिष्ठकरणताकोत्पत्तिमान्, पुत्रनिष्ठसंप्रदानताकदान-कालीनं मित्रनिष्ठसंप्रदानताकं दानम् इत्याकारकस्तत्र बोधः। "तुल्यवदेक-क्रियान्वयित्वं साहित्यम्" इति प्रवादस्यापि एककारकान्वयित्वेन तुल्ययोरेक-जातीयक्रिययोरन्वयित्वं = समानकालीनत्वम् इत्यत्र तात्पर्यम्।

कर्तृत्वादौ समभिव्याहृतक्रियान्वयित्वविशेषणानुपादाने पुत्रकर्मकगतिकाली-नगमनकर्तेति बोधतात्पर्येण पुत्रेण 'सह गत' इति प्रयोगापत्तिः। तदुपादने च समभिव्याहृतक्रियान्वयित्वं न कर्मत्वस्य, अपि तु निष्ठार्थकर्तृत्वस्यैवेति तदव-च्छिन्नक्रियासमानकालीनत्वतात्पर्येणैव तादृशप्रयोगस्य साधुत्वम्।

"पुत्रेण सह गतं चैत्रेण" इत्यादावपि तृतीयार्थे एव कर्तृत्वे गतिक्रियान्विता। अतः स्वान्वयित्वं स्वस्मिन् समभिव्याहृतक्रियायां विशेषणतया विशेष्यतया वा अन्वयित्वम्, न तु विशेष्यतयैवेति नियमः।

यत्तु — "पुत्रेण सह आगतः" इत्यत्र समभिव्याहृतागत्यादिक्रियाकालीनत्वं सहशब्दार्थः। तृतीयार्थः कर्तृत्वम्। तत्र पुत्रस्य आधेयतयान्वयः। कर्तृत्वस्य निरूपकतासंबन्धेन सहशब्दार्थप्रविष्टायामागतौ अन्वयः। सहशब्दर्थस्याश्रयत्व-संबन्धेन आगतशब्दोपात्तगमनेऽन्वयः। तथा च पुत्रनिष्ठकर्तृतानिरूपकागमन-समानकालीनागमनवानिति बोधः — इति।

तन्न। तृतीयार्थकर्तृत्वस्य धात्वर्थ एव साकाङ्क्षत्वेन सहशब्दार्थे तदन्वयस्या-व्युत्पन्नत्वात्।

"पुत्रेण समं मित्रं प्राप्तश्चैत्रः" इत्यादौ तु तात्पर्यवशात् पुत्रकर्तृकमित्रकर्मक-प्राप्तिसमानकालीनमित्रकर्मकप्राप्तिकर्तृत्वं, कदाचिच्च पुत्रकर्मकप्राप्तिसमानकालीन-

---

[१] श.श.प्र.पृ. ३६३-३६६

मित्रकर्मकप्राप्तिकर्तृत्वं चैत्रस्य बुध्यते। समभिव्याहृतायाः प्राप्त्यादिक्रियायाः कर्तृत्वे इव कर्मत्वेऽप्यन्वयितया तत्प्रत्येकावच्छिन्नप्राप्त्यादिकालीनत्वबोधने सहाद्यव्ययस्य सामर्थ्याप्रच्यवात्।

न चान्यकर्तृकधनप्राप्तिदशायां ग्रामकर्मकप्राप्तिमत्यपि मैत्रे ''धनेन सहायं ग्रामं प्राप्तः'' इति प्रयोगापत्तिः तस्य धनकर्मकप्राप्तिकालीनग्रामकर्मकप्राप्तिकर्तृत्वानपायात् इति वाच्यम्।

''घटत्वेन सह घटमवगाहते बुद्धिः'' इत्यादौ क्वचित् कर्तृत्वावच्छिन्नायाः समानकर्तृकत्वस्येव, सर्वत्र कर्मत्वावच्छिन्नायाः समभिव्याहृतक्रियायाः समानकालीनत्वस्येव समानकर्तृकत्वस्यापि सहार्थे निवेश्यत्वात्।

यत्तु — स्वान्वयिकर्मत्वाद्यवच्छिन्ना समभिव्याहृतक्रियैव सर्वत्र कर्मसमभिव्याहारस्थले सहाद्यव्ययस्यार्थः, तस्याश्च समानकालीनत्व-एककर्तृकत्वोभयसंबन्धेनैव समभिव्याहृतक्रियायामन्वयात् नोक्तदोषः। अन्यकर्तृकधनप्राप्तिदशायां ग्रामकर्मकप्राप्तिमत्यपि 'मैत्रे धनेन सहायं ग्रामं प्राप्त' इति प्रयोगो न — इति।

तत् न। ''शाकस्य भोजनं न सुधया सह'' इत्यादिवाक्यानां समानकर्तृकत्वादिसंबन्धेन सुधाकर्मकभोजनाद्यभावस्य बोधकतायामप्रामाण्यापत्तेः। वृत्त्यनियामकसंबन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धेः।

''पटः पटत्वेन सह भासत'' इत्यादौ विभिन्नज्ञानीयविषयतामादाय प्रयोगसाधुत्ववारणाय भासधात्वर्थपटत्वनिष्ठविषयतायाः समानकालीनत्वमिव समानप्रतियोगिकत्वमप्यर्थः। प्रतियोगिशब्देन निरूपकं ज्ञानं ग्राह्यम्।

कर्तृबोधकपदासमभिव्याहारस्थले ''पुत्रेण सह गतिः'' इत्यादौ कर्तृत्वाद्यन्वयिक्रियासमभिव्याहारविरहेण शक्त्या पुत्रकर्तृकगतिक्रियासमानकलीनत्वादेः बोधयितुमशक्यत्वेन अनन्यगत्या सहादेस्तादृशार्थे निरूढलक्षणा।

''पुत्रेण सह स्थूल'' इत्यादावपि समभिव्याहृतनामार्थतावच्छेदकीभूतस्थौल्यादिसमानकालीनत्वे निरूढलक्षणा। तथा च पुत्रवृत्तिस्थौल्यकालीनस्थौल्यवानित्याकारकस्तत्र बोधः।

''पत्न्या सहाग्निमादधीत'' इत्यादौ पत्नीकर्तृकस्याधानस्यालीकत्वेन तत्समानकालीनत्वस्य प्रमापयितुमशक्यत्वात् सामानाधिकरण्यपर्यवसितसहभावमात्रं तत्र सहशब्दार्थः। यथा ''घटेन सह पटवत् गृहम्'' इत्यादौ।

एतेन "यत् कर्तव्यं तदनया सह" इति विधिरपि व्याख्यातः। "पुत्रेण आगत" इत्यादौ विनापि सहादिप्रयोगं तदर्थस्य प्रतीतेः तृतीयाया एव तत्र कर्तृत्वाद्यवच्छिन्नागतिसमानकालीनत्वादिकमर्थः। तदेकदेशकर्तृत्वादौ प्रकृत्यर्थस्य पुत्रादेः आधेयत्वेनान्वयः — इति।

कारकचक्रानुसारेण सहयुक्ततृतीयार्थः[१]

कारकचक्रे भवानन्दतर्कवागीशेनैवं प्रत्यपादि — "पुत्रेण सहागतः पिता" इत्यादौ सहशब्दस्य समभिव्याहृतागमनादिक्रिया अर्थः। तृतीयार्थः कर्तृत्वं सहशब्दार्थक्रियायामन्वेति। सहशब्दार्थस्य आगमनस्य वर्त्मादिरूपैकदेशावच्छिन्नैककालीनत्वसंबन्धेन समभिव्याहृतागमनक्रियायामन्वयः। एवं च पुत्रकर्तृकागमनसमानकालीनागमनकर्तेत्यन्वयबोधः।

वस्तुतस्तु — सहशब्दस्यापेक्षाबुद्धिविशेषविषयत्वादिरूपं साहित्यमर्थः। तृतीयायाः आधेयत्वमर्थः। प्रकृत्यर्थविशिष्टस्य तस्य सहशब्दार्थे साहित्येऽन्वयः। साहित्यस्य आश्रयतासंबन्धेन प्रथमान्तार्थे चैत्रेऽन्वयः। एवं च "पुत्रेण सह आगतश्चैत्र" इत्यत्र पुत्रवृत्तिसाहित्याश्रयः चैत्रः आगमनकर्ता इति बोधः। अपेक्षाबुद्धिश्च प्रकृते पितापुत्रौ इत्याकारकबुद्धिः।

यद्वा तृतीयायाः संख्यामात्रमर्थः। तस्याः प्रकृत्यर्थे पुत्रेऽन्वयः। पुत्रस्य चाधेयतासंबन्धेन सहशब्दार्थे साहित्येऽन्वयः। अन्यत् पूर्ववत्। न च नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात् कथमाधेयतासंबन्धेनान्वय इति वाच्यम्। निपातातिरिक्तनामार्थयोर्भेदेनान्वयस्य व्युत्पत्तिविरुद्धत्वेऽपि निपातार्थेन सह नामार्थस्यान्वये व्युत्पत्तिविरोधविरहात्। बोधः पूर्ववत्। साहित्यविशिष्टे विधेयस्यान्वयः।

तेन "शिष्येण सह उपाध्यायो ब्राह्मणः" "शिष्येण सह उपाध्यायः सुन्दरः" इत्यादौ द्रव्यगुणादिविधेयकस्थलेऽपि अन्वयः। तत्र समभिव्याहृतक्रियाया अभावात् पूर्वमतेऽनुपपत्तिः।

"सहैव दशभिः पुत्रैः भारं वहति गर्दभी" इत्यत्र पुत्रेषु भारमवहत्स्वपि तादृशप्रयोगात् "एकदेशे विद्यमाना" इत्यध्याहारेण एकदेशविद्यमानतायामुक्तसाहित्यस्य अवच्छेदकतया अन्वयः। "दशपुत्रवृत्तिसाहित्यावच्छिन्नैकदेशविद्यमानत्ववती गर्दभी भारवाहनानुकूलकृतिमती" इति बोधः।

---

[१] पृ. ५२

व्युत्पत्तिवादोक्तरीत्या सहयुक्ततृतीयार्थविचारः[१]

सहार्थकशब्दयोगेऽपि साहित्यप्रतियोगिवाचकपदात् तृतीया, "पुत्रेण सह आगतः पिता" इत्यादौ। सहशब्दार्थः साहित्यम्।

अथ यदि सहशब्दार्थः समभिव्याहृतपदोपस्थाप्यक्रियासमानकालीनक्रियान्वयित्वम्। तदन्वयित्वं च समभिव्याहृतक्रियाबोधकपदेन क्रियया यादृशः संबन्धः साहित्यान्वयिनि प्रत्याय्यते तादृशसंबन्ध एव। स च "पुत्रेण सह आगतः पिता" इत्यादौ कर्तृत्वम्, आगतपदेन साहित्यान्वयिनि पितरि आगमनकर्तृत्वप्रत्यायनात्। "दध्ना सह ओदनो भुज्यत" इत्यादौ कर्मत्वादिः। भुज्यत इति पदेन साहित्यान्वयिनि ओदने भोजनकर्मत्वप्रतिपादनात्। तृतीयार्थोऽपि कर्तृत्वकर्मत्वादिरूपः स एव संबन्धः। तथा च पुत्रकर्तृकागमनसमानकालीनागमनकर्ता पिता, आगमनकर्ता, दधिकर्मकभोजनसमानकालीनभोजनकर्म ओदनः भोजनकर्म इति बोधः इत्युच्यते, तदा सहशब्देनैव तत्तत्क्रियाकर्तृत्वबोधने क्रियापदवैयर्थ्यम्। द्विधा क्रियाभानस्यानुपयुक्तत्वात्। अपि च "पुत्रेण सह आगतः पिता" इत्यादौ क्रियान्वयिनि = उक्तागमनकर्तृत्वविशिष्टे आगत इति पदबोध्यस्य आगमनकर्तृत्वविशिष्टस्य अन्वये आकाङ्क्षाविरहः। उद्देश्यतावच्छेदकविधेययोः ऐक्यात्।

न च तत्तत्क्रियासमानकालीनत्वमात्रं सहशब्दार्थः। तस्य च क्रियापदोपस्थापितक्रियायामेवान्वयः इति क्रियापदसहितसहशब्दादेवोक्तविशिष्टार्थलाभः। अतो न कस्यपि वैयर्थ्यमिति वाच्यम्।

एवं सति "पुत्रेण सह आगत" इत्यादौ सहशब्दार्थस्य क्रियापदार्थान्वयित्वेन 'सपुत्र आगत' इत्यादिसमासस्थलेऽपि पुत्रागमनकालीनत्वरूपसमासार्थस्य क्रियायामेवान्वयस्य उपगन्तव्यतया सपुत्रपदस्य चैत्रपदसामानाधिकरण्येन प्रयोगानुपपत्तिरिति चेत् —

न। समभिव्याहृतपदोपस्थाप्यक्रियाकाल एव सहशब्दार्थः। तस्य क्रियान्वयिनि नामार्थे आधेयतासंबन्धेनान्वयः। पुत्रकर्तृकागमनकालविशिष्टः पिता आगमनकर्तेति बोधः। तादृशकालविशिष्टे नामार्थे क्रियान्वये च क्रियायामपि तादृशकालावच्छिन्नत्वं भासते। उद्देश्यतावच्छेदकावच्छेदेन विधेयान्वयस्य व्युत्पत्तिसिद्धत्वात्। अतः क्रियाद्वयस्य समानकालिकत्वलाभः।

अथ वा आगमनसमानकालिकागमनादिकं सहशब्दार्थः। तृतीयायाः कर्तृत्वादिकमर्थः। तस्यागमनेऽन्वयः। सहशब्दार्थस्य च कर्तृत्वादिसंबन्धेन पुरुषादा-

---

[१] व्यु.वा.पृ. २३१-२३३

वन्वयः। तथा च "पुत्रेण सह आगच्छति पिता" इति वाक्यात् पुत्रकर्तृकागमनसमानकालिकागमनकर्ता पिता आगमनकर्तेति बोधः। उद्देश्यतावच्छेदकेऽधिकावगाहितया न व्युत्पत्तिविरोधः। विधेयांशेऽधिकावगाहिनः 'दण्डवान् रक्तदण्डवान्' इत्यस्येव उद्देश्यतावच्छेदकांशेऽधिकावगाहिनः शाब्दबोधस्य रक्तदण्डवान् दण्डवानित्यत्रेव स्वीकारे बाधकाभावात्।

न च सहशब्दार्थान्वयबलादेव तत्तत्क्रियाकर्तृत्वस्य पुरुषादौ लाभे क्रियापदेन पुनः प्रकारतया तद्बोधनमफलमिति तत्प्रयोगो व्यर्थ इति वाच्यम्। समभिव्याहृतपदेन तत्तत्क्रियाया अनुपस्थापने सहशब्देनापि तत्तत्क्रियाघटितसाहित्यस्याशक्यस्य बोधनं न संभवतीति क्रियापदप्रयोगस्यावश्यकत्वात्। निपातातिरिक्तप्रातिपदिकार्थस्य धात्वर्थस्य च भेदसंबन्धेन नामार्थेऽन्वयः व्युत्पत्तिविरुद्धः। सहशब्दस्य चाधातुत्वात् प्रातिपदिकत्वेऽपि निपातत्वाच्च तदर्थस्य कर्तृत्वादिसंबन्धेन नामार्थेऽन्वये न किंचित् बाधकम्।

न च "प्रासोष्ट शत्रुघ्नमुदारचेष्टमेका सुमित्रा सह लक्ष्मणेन।" इत्यत्र शत्रुघ्नप्रसवलक्ष्मणप्रसवयोः समानकालिकत्वाभावात् क्रियाद्वयसमानकालिकत्वस्य सहशब्दार्थत्वासंभव इति वाच्यम्। तत्रापि स्थूलकालघटितसमानकालिकत्वसत्त्वात्।

न च कालत्त्वेन कालस्य सहशब्दार्थेऽन्तर्भावे पुत्रागमनात् पूर्वमागन्तरि पितरि "आगतोऽयं न पुत्रेण सह" इति प्रयोगानुपपत्तिः, पुत्रामनाधिकरणस्थूलकालवृत्त्यागमनकर्तृत्वस्य सत्त्वेन तदभावरूपस्य साहित्याभावस्य बाधात् इति वाच्यम्। तत्र क्षणत्वेनैव कालस्य सहशब्दार्थेऽन्तर्भावनीयत्वात्। तथा च पुत्रागमनाधिकरणक्षणवृत्त्यागमनकर्तृत्वाभाववान् इति तत्र बोधः।

एवं यत्र एककालेऽपि विभिन्नस्थले भुञ्जानमधिकृत्य "चैत्रः मैत्रेण सह न भुङ्क्ते" इति प्रयुज्यते, तत्र एकशालारूपभोजनाधारोऽपि सहशब्दार्थेऽन्तर्भावनीयः। मैत्रकर्तृकभोजनाधिकरणदेशकालवृत्तिभोजनकर्तृत्वाभाववांश्चैत्र इति च बोधः।

अत एव — "आलापात् गात्रसंस्पर्शान्निःश्वासात्सहभोजनात्" इत्यादिना पतितकर्तृकभोजनसमानकालीनभोजनमात्रस्य पापजनकत्वं न बोध्यते, एकपङ्क्तेरपि विवक्षणात्। तथा च पतितकर्तृकभोजनसमानकालीनपतितैकपङ्क्तिभोजनात् पापं भवतीत्यर्थः।

एवम् —

याजनं योनिसंबन्धं स्वाध्यायं सहभोजनम्।
सद्यः पतति कुर्वाणः पतितेन न संशयः।।

इत्यादौ एकदा एकपात्रभोजनस्यैव सद्यः पातहेतुत्वं प्रत्याय्यते। तत्र तादृशार्थस्यैव सहशब्देन विवक्षणात्।

अथ नामार्थस्यैव सहशब्दार्थविशेष्यतयान्वयोपगमे "पुत्रेण सह नागच्छत्ययम्" इत्यादौ सहशब्दार्थस्य पुत्रसाहित्यस्य अभाव एव पुरूषे नञा बोध्य इत्युपगन्तव्यम्। प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमाविति न्यायात्। तथा च आगमनानुकूलकृतिमानयं पुत्रसाहित्याभाववान् इत्याकारकस्य आख्यातार्थोद्देश्यतावच्छेदककस्य नञर्थविधेयकस्य बोधस्यैव उपगन्तव्यतया, प्रसज्यप्रतिषेधस्थले नञर्थस्य निषेधस्य आख्यातार्थं प्रति विशेष्यतया भानमिति नियमस्य भङ्गप्रसङ्गः।

एवमनागच्छन्तमपि पुरुषमधिकृत्य "पुत्रेण सह नागच्छत्ययम्" इति प्रयुज्यते। सोऽनुपपन्नः स्यात्। आगमनकर्तारमुद्दिश्य पुत्रसाहित्याभावविधाने उद्देश्याप्रसिद्धेः अयोग्यताप्रसङ्गात्।

एतेन "घटो न पट" इत्यादौ पर्युदासनञर्थस्य नामार्थे एवान्वयो भवति, न क्रियायाम्। तथा प्रकृतेऽप्यङ्गीकार्यम्। तथा चानुपदोक्तः प्राधान्येन भाननियमोऽप्रामाणिक इति निरस्तम्। उक्तायोग्यत्वप्रसङ्गादेव।

न च "पुत्रेण सह नागच्छत्ययम्" इत्यत्र आगमनाभावकाल एव पुरुषान्वयी सहशब्दार्थः। तथा चागमनाभावकालावच्छिन्नपुरुषे वर्तमानकालावच्छिन्नागमनाभावः प्रतीयत इति न काचित् अनुपपत्तिः इति वाच्यम्।

यत्र अस्य पुरूषस्य पुत्र आयाति न त्वयं, तत्रापि पुत्रेण सह नागच्छत्ययम् इति प्रयोगात्। तत्र च पुत्रागमनकालावच्छिन्नस्यागमनकर्तृत्वाभावस्य सत्त्वेऽपि पुत्रागमनाभावकालावच्छिन्नपुरुषे वर्तमानकालावच्छिन्नागमनकर्तृत्वाभावस्य असत्त्वेन अयोग्यतापातात् — इति चेत् —

अत्रोच्यते। सहशब्दार्थः तत्तत्क्रियाकालः क्वचित् तत्तत्क्रियान्वयिप्रथमान्तार्थपदार्थेऽन्वेति, क्वचिच्च समभिव्याहृतक्रियायाम्। "सपुत्र आगच्छति" इत्यादौ पुत्रेण सहागच्छति यः इति विग्रहात् प्रथमान्तान्यपदार्थे एव पुत्रागमनकालान्वयो न तु क्रियायामिति न पूर्वोक्तानुपपत्तिः। समस्यमानपदार्थेनैव सहशब्दार्थान्वयात्। न वान्यपदार्थपुरुषालाभः।

न चैवं समासलभ्यस्य पुत्रागमनकालावच्छिन्नस्य पुंसः विग्रहवाक्येनापि प्रतिपादनात् बहुव्रीहिसामान्यस्य नित्यसमासत्वमिति नियमो भज्येत। विग्रहवाक्याप्रतिपाद्यस्वार्थकसमासत्वं हि नित्यसमासत्वमिति वाच्यम्। बहुव्रीहि-

सामान्यस्य नित्यसमासत्वानियमात्। प्रथमान्तानुपस्थाप्यान्यपदार्थबोधकबहुव्रीहेरेव नित्यसमासत्वाभ्युपगमात्। अत्र चान्यपदार्थस्य प्रथमान्तोपस्थाप्यत्वात्।

न च "वृष्टे देवे गत" इतिवत् प्रथमार्थे बहुव्रीहेः असाधुत्वमिति वाच्यम्। "अनेकमन्यपदार्थे"[1] इत्यादिसूत्रानुशिष्टबहुव्रीहावेव तन्नियमात्। सुपुत्र इत्यत्र तु "तेन सहेति तुल्ययोगे"[2] इति सूत्रेण बहुव्रीहिसमासविधानात्। अत एव तदारम्भोऽपि। "अनेकमन्यपदार्थे" इति सूत्रस्य प्रथमान्तार्थान्यान्यपदार्थविषयकत्वादेव "तेन सहे"ति सूत्रारम्भः संगच्छते। अन्यथा तद्वैयर्थ्यात्।

"पुत्रेण सह नागच्छति" इत्यादौ तु क्रियायामेव तादृशसहशब्दार्थान्वय इति पुत्रागमनकालीनागमनकर्तृत्वाभावः प्रथमान्तार्थे प्रतीयत इति न काचिदनुपपत्तिः।

यदा पुत्राः भारं वहन्ति गर्दभी च, यदा च गर्दभी भारं पुत्रं च वहति तदा "सहैव दशभिः पुत्रैर्भारं वहति गर्दभी" इति प्रयोगः साधुः। गर्दभ्यां पुत्रकर्तृकभारवहनसमानकालीनभारवहनकर्तृत्वस्य पुत्रकर्मकवहनसमकालीनभारकर्मकवहनकर्तृत्वस्य च सत्त्वात्।

यदा तु भारमनुद्वहन्तं पुत्रमनुद्वहन्त्यामपि गर्दभ्यां "सहैव दशभिः पुत्रैः भारं वहति गर्दभी" इति प्रयुज्यते, "एकेनैव सुपुत्रेण सिंही स्वपिति निर्भया" इति पूर्वार्धानुसारात् तत्र "वर्तमाना" इति अध्याहारात् वर्तमानत्वक्रियामादाय साहित्यबोधः इति वदन्ति। दशपुत्रकर्तृकवर्तनसमानकालीनवर्तनकर्त्री गर्दभी भारकर्मकवहनकर्त्री इति बोधस्य आकारः।

भाट्टचिन्तामणौ[3] सहयुक्ततृतीयार्थः

साहित्ययुक्ताप्रधानवाचकशब्दसमभिव्याहृततृतीयायाः निरूपितत्वमर्थः। "शिष्येण सह आगतो गुरुः"। शिष्यनिरूपितसाहित्यविशिष्टगुरुकर्तृकमागमनमिति बोधः। एवं च तृतीयार्थस्य भावनायामन्वयाभावात् तृतीयायाः उपपदविभक्तित्वम्।

भाट्टरहस्ये[4] सहयुक्ततृतीयार्थः

एवं सहयुक्तेऽप्रधाने, एवं साकंसार्धंसमं योगेऽपि इत्यनुशासनेन "पुत्रेणसहागतः पिता" इत्यत्र तृतीया। अत्र च पुत्रस्याप्राधान्यं न क्रियानन्वयित्वेनैव,

---

[1] सू. २.२.२४
[2] सू. २.२.२८
[3] पृ. ९९
[4] पृ. ११३

"सहैव दशभिः पुत्रैर्भारं वहति गर्दभी" इत्यादिवत्। अपि तु यस्य क्रियासंबन्धः शाब्दः तत् प्रधानम्। यस्य तु आर्थः तस्याप्राधान्यम्। अत एव न सहशब्दयोग एव विवक्षितः। "वृद्धो यूना०"[१] इति तदभावेऽपि तृतीयादर्शनात्। अत एव सहत्वमत्र तृतीयार्थः। सहशब्दः क्वाचित्कस्तात्पर्यग्राहकः। तदन्वयस्तु स्वनिरूपकपित्राश्रयकत्वसंबन्धेन क्रियायामेव। साहित्यं च "सहैव दशभिः पुत्रैः" इत्यादौ तत्काले विद्यमानत्वम्। "पुत्रेण सहागत" इत्यादौ तु एकक्रियान्वयित्वमित्यादि योग्यतानुसारेण बोध्यम्।

पदवाक्यरत्नाकरानुसारेण सहशब्दार्थतृतीयार्थयोः निष्कर्षः[२]

सामानाधिकरण्यादिः सहार्थः स्यादनेकधा।
तृतीयार्थस्तदीयत्वमभेदः कारकं तथा।।

संयोगिसंयुक्तत्वम्, समवायिसमवेतत्वम् देशदैशिकत्वम्, कालकालिकत्वम् इत्यादिः अनेकविधः सहशब्दार्थः। स्वप्रतियोगिकदैशिकसंसर्गवान् यो देशः तन्निरूपितदैशिकसंबन्धावच्छिन्नवृत्तित्वं देशदैशिकत्वम्। स्वप्रतियोगिककालिकसंसर्गवान् यः कालः तन्निरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वं कालकालिकत्वम्। तृतीयार्थः तदीयत्वं तत्प्रतियोगित्वम्, अभेदः कारकं च सहार्थः यत्र नामार्थविशेषितो नामार्थेनान्वेति तत्र प्रतियोगित्वं तृतीयार्थः। क्रमशः उदाहरणानि —

"संकर्षणेन सह वासुदेवः" — इत्यत्र संयोगिसंयुक्तत्वं = संयोगवदधिकरणसंयुक्तत्वं सहशब्दार्थः। संयोगान्वयि प्रतियोगित्वं तृतीयार्थः। संकर्षणनिष्ठप्रतियोगितानिरूपकसंयोगाधिकरणसंयुक्तत्वाश्रयो वासुदेव इति बोधः।

"सह रूपेण रसः" — इत्यत्र समवायिसमवेतत्वं समवायवदधिकरणसमवेतत्वं सहशब्दार्थः। समवायान्वयि प्रतियोगित्वं तृतीयार्थः। रूपनिष्ठप्रतियोगितानिरूपकसमवायवदधिकरणसमवेतत्ववान् रसः इति बोधः।

"सहैव दशभिः पुत्रैर्भारं वहति गर्दभी" — इत्यत्र दैशिकसंसर्गवद्देशनिरूपितदैशिकसंबन्धावच्छिन्नवृत्तित्वं सहशब्दार्थः। दैशिकसंसर्गान्वयि प्रतियोगित्वं तृतीयार्थः। दशपुत्रप्रतियोगिकदैशिकसंसर्गवद्देशनिरूपितदैशिकसंबन्धावच्छिन्नवृत्तित्ववती गर्दभी भारकर्मकवहनकर्त्री इति बोधः।

---

[१] सू. १.२.६५
[२] प.वा.र.पृ. ६६२-६७५

"सह पत्न्या पतिः" — इत्यत्र कालिकसंबन्धवत्कालनिरूपितकालिकसंबन्धावच्छिन्नवृत्तित्वं सहशब्दार्थः। कालिकसंबन्धान्वयि प्रतियोगित्वं तृतीयार्थः। पत्नीप्रतियोगिककालिकसंसर्गवत्कालनिरूपितकालिकसंबन्धावच्छिन्नवृत्तित्ववान् पतिः इत्यन्वयबोधः।

तृतीयार्थस्याभेदस्योदाहरणानि

"सह दिवसैः दीर्घाश्वासदण्डाः" — इत्यत्र दीर्घपदस्य चिरस्थिरः आयतश्चार्थः। तृतीयायाः अभेदः अर्थः। स च दीर्घपदार्थे चिरस्थिरेऽन्वेति। चिरस्थिरश्च सहशब्दार्थे समानकालीनत्वेऽन्वेति। तच्च दीर्घपदार्थे आयतेऽन्वेति। व्युत्पत्तिवैचित्र्यात्। एवं च दिवसाभिन्नचिरस्थिरसमानकालीनदीर्घाभिन्नाः (आयताभिन्नाः) श्वासदण्डाः इति बोधः। तृतीयार्थाभेदान्वये च समानलिङ्गवचनादि न तन्त्रम्। सीतया दारवान् इत्यादिप्रयोगात्। तेन 'कन्यया सह रमणीयो वर' इत्यादि नानुपपन्नम्। तत्रापि कन्याभिन्नरमणीयसमानकालीन-रमणीयाभिन्नो वर इति बोधस्य संभवात्। एवमेव —

"पुत्रेण सह आगतः पिता" — इत्यादौ पुत्राभिन्नो य आगतः तत्समानकालीनागताभिन्नः पितेति बोधः। गमनविशिष्टयोः समानकालीनत्वे भासमाने गमनयोरपि तद् भासते। विशिष्टान्वयबोधसामग्रीस्वभावात्।

तृतीयार्थस्य कारकस्योदाहरणानि

"पुत्रेण सह आगच्छति, पुत्रेण सहागत्य तिष्ठति" इत्यादौ कर्तृत्वे तृतीया। तत्राधेयतासंबन्धेन पुत्रस्यान्वयः। कर्तृत्वस्य निरूपकतासंबन्धेन आगमनेऽन्वयः। सहार्थः समानकालीनत्वम्। तत्र पुत्रकर्तृकागमनस्यान्वयः। समानकालीनत्वस्य आगमनेऽन्वयः। तस्य आख्यातार्थकर्तृत्वेऽन्वयः। तथा च पुत्रकर्तृकागमनसमानकालीनागमननिरूपितं स्थितिनिरूपितं च यत् कर्तृत्वं तदाश्रयश्चैत्र इति बोधः। व्युत्पत्तिवैचित्र्येण आगमनस्य द्विधा भानम्।

यद्वा "अव्ययकृतो भावे" इत्यनुशासनेन क्त्वः आगमनमर्थः। तत्र समानकालीनत्वस्य सहशब्दार्थस्यान्वयः। क्त्वाप्रत्ययार्थस्यागमनस्य उत्तरकालिकत्वसंबन्धेन स्थाधात्वर्थस्थितावन्वयः। पुत्रकर्तृकागमनसमानकालीनागमनोत्तरकालीनस्थितिकर्ता चैत्र इति बोधः।

न केवलं कर्तृत्वमेव सहशब्दसमभिव्याहततृतीयायाः अर्थः। अपि तु कर्मत्वादिकमपि। तथा च प्रधानक्रियाकारकसजातीयं कारकं तृतीयार्थः। यथा —

"धनेन सह गां लभते" — इत्यत्र तृतीयार्थः कर्मत्वम्। आधेयतासंबन्धेन धनान्वितस्य तस्य निरूपकतासंबन्धेन धात्वर्थलाभेऽन्वयः। तस्य सहशब्दार्थे समानकालीनत्वेऽन्वयः। तस्य गोकर्मकलाभेऽन्वयः। लाभस्य आख्यातार्थकर्तृत्वेऽन्वयः। तस्य प्रथमान्तार्थेऽन्वयः। तथा च धनकर्मकलाभसमानकालीनगोकर्मकलाभकर्ता चैत्र इति बोधः।

"दण्डेन सह चक्रेणोत्पद्यते घट" — इत्यत्र तृतीयार्थः करणत्वम्। अन्यत् पूर्ववत्। दण्डकरणकोत्पादनसमानकालीनचक्रकरणकोत्पादनकर्म घट इति बोधः।

"अध्वर्युणा सह सदस्याय ददाति" — इत्यत्र अध्वर्युसंप्रदानकदानसमानकालीनसदस्यसंप्रदानकदानकर्तेति बोधः। अत्र तृतीयार्थः संप्रदानत्वम्।

"शक्रपदेन सह स्वर्गात् पतति" — इत्यत्रापादानत्वं तृतीयार्थः। शक्रस्थानापादानकपतनसमानकालीनस्वर्गापादानकपतनकर्तेति बोधः।

"पित्रा सह मातुः स्मरति" — इत्यत्र विषयत्वं तृतीयार्थः। पितृविषयकस्मरणसमानकालीनमातृविषयकस्मरणाश्रय इति बोधः।

"नावा सह नद्यां तिष्ठन्ति" — इत्यत्र अधिकरणत्वं तृतीयार्थः। नौकाधिकरणकस्थितिसमानकालिकनद्यधिकरणकस्थितिकर्तार इति बोधः।

सहयुक्तधातुनाभिहितयोः सहार्थं प्रति विशेष्यविशेषणभूतयोः क्रिययोः पदान्तरनिर्दिष्टः सर्वोऽपि कारकगणः यौगपद्येनान्वेति अन्यत्र तृतीयानिर्दिष्टात्। पूर्वोक्तस्थले पुत्रादीनामेकगमनक्रियाकर्तृत्वात् द्वितीये गमने तस्यान्वयासंभवात्।

तेन ग्रामं गच्छति पुत्रे, "पितरि च नगरं गच्छति पुत्रेण सह नगरं गच्छति पिता" इति न प्रयोगः। द्वयोरपि क्रिययोः नगरकर्मकत्वान्वयध्रौव्ये नगरकर्मकपुत्रकर्तृकगमनस्य बाधात्।

ननु यत्र तृतीयार्थकर्मत्वादिकारकस्य गुणीभूतक्रियायामन्वयो न कर्तृत्वस्य, तत्र प्रधानक्रियाकर्तुरेव गुणक्रियाकर्तृत्वमनुभवसिद्धम्। तस्य च दर्शितस्थलेषु कथं लाभ इति चेत् —

उच्यते। "गवा सह धनं लभते" इत्यत्र गोकर्मकलाभे धनकर्मकलाभे चाख्यातोपात्तं कर्तृत्वं गुणविधया, प्रथमानिर्दिष्टो वा प्रधानविधया चैत्रादिः कर्तृत्वेन भासते। तेन गोः चैत्रेण लाभे, धनस्य च मैत्रेण लाभे, 'गवा सह धनं लभते मैत्र' इति न प्रमाणम्। तत्र क्रिययोरेककर्तृकत्वविरहात्।

"पत्न्या सह यजते" — इत्यत्र एकदेशाधिकरणकत्वरूपसाहित्यद्वारकं गौणं कर्तृत्वं तृतीयया निर्दिश्यते, यदि दम्पत्योर्न व्यासक्तं किमप्यखण्डं कर्तृत्वम्।

सहयुक्ते द्वे क्रिये, एका सहार्थं प्रति विशेषणम्, अपरा प्रधानम्। यस्य च कारकस्य प्रधानक्रियायां नान्वयः तज्जातीयं गुणक्रियायामन्वयि तृतीयया न प्रतिपाद्यते।

"सहयुक्तेऽप्रधाने"[१] इति सूत्रस्यायमर्थः — सहयुक्तक्रियान्वयिनोः तुल्यजातीययोः कारकयोर्मध्ये यदप्रधानं क्रियाकारकं, तस्मिन्नभिधेये तृतीयेति। तुल्यजातीययोरिति निवेशात् 'ग्रामेण सह चैत्रो गच्छति' इति वाक्यं न प्रमाणम्, कारकयोर्ग्रामचैत्रयोः कर्मकर्तृकारकयोरेकजातीयत्वाभावात्। प्रमाणं च 'ग्रामेण सह गृहं गच्छति चैत्रः' इति। ग्रामगृहयोरुभयोरपि कर्मकारकत्वेन एकजातीयत्वात्।

ननूभयोः क्रिययोः विशेषणविशेष्यरूपेण सहर्थान्वये एकक्रियाकारकत्वं साहित्यमिति प्रवाहे क्रियाया एकत्वोक्तिः असंगतेति चेत् — न। एकपदोपात्तत्वेन क्रिययोरैक्यव्यपदेशात्।

यत्तु एकैव क्रिया सहार्थान्वयिनी। तथा हि — "पुत्रेण सह आगच्छति" इत्यादौ यत्कारकान्वयिनी या क्रिया तत्कारकविशिष्टतत्क्रियासमानकालीनत्वं सहशब्दार्थः। तदेकदेशकारकान्वयि आधेयत्वं तृतीयार्थः। उक्तस्थले गमनक्रियायाः कर्तृकारकपित्रन्वयित्वात् कर्तृत्वविशिष्टागमनसमानकालीनत्वं सहार्थः। तदेकदेशे कर्तृत्वे तृतीयान्तार्थपुत्रवृत्तित्वान्वयः। तादृशसहार्थस्य धात्वर्थे आगमने तस्याख्यातार्थे कर्तृत्वे तस्य च पितर्यन्वयः। तथा च पुत्रवृत्तिकर्तृतानिरूपकागमनसमानकालीनागमनकर्तेत्यन्वयबोधः। अत एव = तत्तत्कारकविशिष्टक्रियायाः सहार्थघटकत्वादेव तत्र पुत्रकर्मकागमनसमानकालीनागमनं वा पुत्रकर्तृकपाकसमानकालीनमागमनं वा न प्रतीयते इति।

तन्न। तथ सति "यशसा सह मूर्छति शत्रुः" इत्यत्र (मूर्छा मोहसमुच्छ्राययोः) इति श्लेषभित्तिकसहोक्त्यलंकारे यशःकर्तृकवृद्धिसमानकालीनमोहकर्ता शत्रुः इत्यन्वयबोधानुपपत्तेः। मूर्छतीत्यनेन कर्तृत्वान्विताया: मोहक्रियाया एवाभिधानात् सहशब्देन यशःकर्तृकवृद्धिसमानकालीनत्वाभिधानासंभवात्। तत्तद्धात्वनुपस्थापितााया अपि क्रियायाः सहार्थघटकत्वोपगमेन तत्र तादृशवृद्धिसमानकालीनत्वाभिधानोपगमे "यशसा सह मुह्यति तव शत्रुः" इत्यत्रापि तथा प्रतीयेत। वृद्धिक्रियायाः कर्तृत्वादिकारकविशिष्टायाः धात्वनुपस्थितत्वस्योभयत्र तुल्यत्वात्।

---

[१] सू. २.३.१९

तस्मात् मूर्छतिना श्लिष्टार्थेन वृद्धिर्मोहश्चोपस्थितः। तत्र वृद्धौ तृतीयार्थयशः-कर्तृकत्वस्य, वृद्धेः सहार्थसमानकालीनत्वे तस्य च मोहेऽन्वयः। समानकालीनत्वे विशेषणतया विशेष्यतया चान्वये तद्धातुजन्यक्रियोपस्थितिः कारणमिति मुह्यतिना वृद्धेरनुपस्थापनात् यशसा सह मूर्छति शत्रुरिति न प्रयोगः।

दर्शितमते सहार्थस्य तत्तत्क्रियाकारकघटितत्वात् अनन्तत्वम्। सिद्धान्ते तु समानकालीनत्वमात्रं सहार्थ इति लाघवं च।

अपि च तृतीयायाः करणत्वे कर्तृत्वे च शक्तेः क्लृप्ततया सजातीयकारकचतुष्टये शक्तिचतुष्टयकल्पनेनातिलाघवम्।

ननु गां पुत्रे, धनं पितरि लभमाने "पुत्रेण सह धनं लभते पिता" इत्यपि प्रसज्येत। लाभे गोकर्मकत्वधनकर्मकत्वयोः पुत्रकर्तृकत्वपितृकर्तृकत्वयोश्च सत्त्वात्।

न च तृतीयानिर्दिष्टभिन्नकारकस्य एकरूपावच्छिन्नत्वेन गुणप्रधानक्रिययो-रप्यन्वयबोधसामग्री अपेक्षणीया। अत्र च न धनकर्मतायाः गुणक्रियायामन्वय-संभवः। तस्याः गोकर्मकताकत्वेन धनकर्मताकत्वबाधान्न गुणक्रिययोः एकरूपा-वच्छिन्नकर्मत्वकारकस्यान्वय इति नोक्तप्रयोगप्रसङ्गः इति वाच्यम्।

एवं सति "शिशुः पयो धास्यति सागरैः सह" इत्यत्र श्लेषमूलकसहोक्तौ धास्यतीत्यनेन धारणपानक्रिये उपस्थिते। धारणार्थकस्य धाधातोः पानार्थकस्य धेट्धातोश्च भविष्यति धास्यतीत्येकानुपूर्वीकस्यैव प्रयोगस्य साधुत्वात् तयोः धारणे सागरकर्तृत्वस्य, सहार्थे समानकालीनत्वे धारणस्य, पाने सहार्थस्य समान-कालीनत्वस्य पयःपदार्थक्षीरकर्मकत्वस्य चान्वयः। गुणक्रियायां सागरकर्तृक-धारणे न तस्य क्षीरकर्मकत्वस्यान्वयः। बाधात्। किं तु पयःपदार्थसलिलकर्म-कत्वस्येति नैकरूपावच्छिन्नस्य कारकस्य द्वयोः अन्वयसंभव इत्यनुपपत्तिता-दवस्थ्यात्। तथा चोक्तस्थले सागरकर्तृकसलिलकर्मकधारणसमानकालीनक्षीर-कर्मकपानकर्ता शिशुः इत्यन्वयबोधः।

एतेन एककर्मत्वाद्यपि कर्तृत्वार्थकतृतीयासमभिव्याहृतस्य सहपदस्यार्थ इत्यपि निरस्तम्। "शिशुः पयो धास्यति सागरैः सह" इत्याद्यनुपपत्तेरिति चेत् — न। गुणप्रधानक्रिययोरेकपदार्थकर्मकत्वाद्यन्वयस्यैव व्युत्पत्तेः।

इदमत्राकूतम् — "शिशुः सागरैः सह पयो धास्यति" इत्यत्र शिशुपदेन शिशोः, सागरपदेन समुद्रस्य सहपदेन समानकालीनत्वस्य, धास्यतिपदेन भाविधारण-कर्तृत्वपानकर्तृत्वयोश्च, पयःपदेन नीरक्षीरयोः द्वितीयया कर्मत्वस्योपस्थितिः। सागरकर्तृकधारणे नीरकर्मकतायाः शिशुकर्तृकपाने क्षीरकर्मकत्वस्य योग्यताज्ञानं

परस्परं पदानामाकाङ्क्षाज्ञानं चेति शाब्दसामग्री। तया सागरकर्तृकनीरकर्मक-धारणसमानकालीना शिशुकर्तृका क्षीरकर्मिका भाविपानक्रियेत्यन्वयबोधः।

यत्र पयःशब्देन क्षीरमात्रस्योपस्थितिः, समानफलोपधायकपयःपदजनितनीर-स्मृतितद्योग्यताज्ञानादिविरहात् प्रधानक्रियायां न नीरकर्मकत्वाद्यन्वयः, तत्र तद-घटिता पानादिविशेष्यकनीरकर्मकत्वप्रकारकयोग्यताज्ञानाद्यघटिता भिन्नैव सामग्री। तत्र बोधप्रकारस्तु —

श्लेषस्थले एकपदोपात्तयोरभेदो व्यञ्जनया प्रतीयते। वैयञ्जनिकबोधे बाधो न विरोधी। श्लेषमूलकाभेदाध्यवसायाच्च क्रिययोरेककर्मकत्वं सहपदेन ध्वननवृत्त्या प्रत्याय्यते।

एवमेव "सकलकलं पुरं चन्द्रमण्डलमिव" इत्यत्र कलकलसहितस्य सकल-कलायुक्तस्य च श्लेषभित्तिकाभेदात् स एव साधारणधर्मतया स्फुरति इति रस-विद्याविदः।

तथा चालंकारिकमते दर्शितस्थले क्षीरकर्मकधारणकर्तृत्वस्य बोधेऽपि व्यञ्जन-यैव धारणपानक्रिययोरेककर्मकत्वं क्षीरनीरयोरभेदस्य तत्रैव प्रतीयमानत्वादिति न तत्रानुपपत्तिः।

उक्तश्लेषस्थले पयःपदस्य पयःपदवाच्यत्वावच्छिन्ने लक्षणा। तत्कर्मकत्वं च धारणपानयोरप्यबाधितमेव। एवं पुरचन्द्रयोः सकलकलप्रतिपाद्यत्वमेव साधारणो धर्म इति व्यञ्जनाविद्वेषिणः। लक्षणया पयःपदस्य स्ववाच्यत्वावच्छिन्नबोधकत्वे एकरूपावच्छिन्नकर्मकत्वं क्रिययोर्नानुपपन्नमिति तेषामाशयः।

नन्वेवं "पुमान् स्त्रिया"[१] इति सूत्रे "स्त्रिया सहोक्तौ पुमान् शिष्यते" इत्यादिव्याख्यानमनुपपन्नम्। मुख्यक्रियाकर्मण्यनभिहिते गौणक्रियाकर्मणि सहयुक्त-तृतीयाया असाधुत्वात्। मुख्यक्रिया शिषधातूपात्ता। तदुत्तराख्यातस्य कर्त्रर्थकतया तेन तत्कर्मानभिहितम्। गौणक्रिया वचधातूपात्ता उक्तिक्रिया, तत्कर्मणि स्त्रियां कथं तृतीया? अन्यथा तत्रापि तृतीयायाः साधुत्वे "ग्रामेण सह गच्छति" इत्यपि प्रसज्येत। तथा च प्रकृते स्त्रीकर्मकोक्तिसमानकालीनोक्तौ पुमान् शिष्यत इति कथमवगन्यत इति चेत् —

तत्र पुंस इति कृद्योगलक्षणषष्ठ्यन्तपदमनुषज्यते। स्त्रिया सह पुंसः उक्तौ पुमान् शिष्यत इति पूर्णं वाक्यम्। तथा च सहार्थसमानकालीनत्वान्वयि वचधातूपात्तं क्रियाद्वयमिति न तत्र प्रधानक्रियाकर्मणोऽनभिधानम्।

---

[१] सू. १.२.६७

"एवमेव यत् कर्तव्यं तदनया सह" इत्यत्रापि पत्येति पदमध्याहरणीयम्। अन्यथा पतिकर्तृकक्रियायाः प्राधान्येन तत्कारकस्य कर्तृत्वस्य तव्यतानभिधानात् तत्राप्युक्तस्थलवत् अनुपपत्तिरेव स्यात्।

वस्तुतो यत्र एकद्रव्ये क्रियाद्वयनिरूपितं कारकमभिधातव्यं, तत्र प्रधानीभूतक्रियाकारकप्रतिपादिका विभक्तिरेव प्रयोक्तव्या। गुणक्रियाकारकं तत्समभिव्याहृतप्रथमादिविभक्त्यैव प्रतिपाद्यते। अथ वा तत् संसर्गमर्यादया भासते। "पक्वौदनो भुज्यत" इत्यादौ तथा दर्शनात् । ओदनकर्मकपाकोत्तरकालीनभोजनकर्म ओदन इति हि तत्र बोधः। उक्तं च हरिणा —

> प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
> शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते।।
>
> प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
> यदा तदा गुणे तद्वदनुक्तापि प्रतीयते।।

इति। स्त्रिया सहोक्तौ "पुमान् शिष्यत" इत्यत्र प्रधानक्रियायाः शिषधातुनोपात्तायाः कर्मकारके आख्यातेनोपात्ते गुणक्रियायाः वचनस्य कर्मत्वं, विनापि कृद्योगषष्ठ्या, प्रथमया प्रतिपाद्यते, संसर्गमर्यादया वा भासत इति न पुंस इति पदम् अध्याहर्तव्यम्। एवमेव "शाकेन सह पक्वौदनो भुज्यते, पत्न्या सह पक्त्वा भुङ्क्ते ओदनं पतिः" इत्यादयोऽपि प्रयोगाः उपपादनीयाः।

शाब्दिकास्तु सहपदं व्यञ्जकमेव, न तु वाचकम्। क्रियायाः समानकालीनत्वादिसंसर्गेणान्वयः। अत एव सहपदप्रयोगं विनापि 'पुत्रेणागच्छति पिता' इति वाक्यप्रामाण्यं "वृद्धो यूना०"[१] इत्यादिनिर्देशेन ज्ञाप्यत इति प्राहुः।

वस्तुतस्तु तन्मते सूत्रे सहपदवैयर्थ्यम्। निरर्थकेन सहशब्देनान्वयरूपो योगोऽप्यसंभवी। समभिव्याहारमात्रस्य योगरूपत्वे सहार्थैः योग इत्यर्थस्यासंभवेन साकमादियोगे तृतीयानुपपत्तिः। वृद्धो यूनेत्यत्र तु न सहयोगे तृतीया, किं तु प्रकृत्यादित्वात्। तदर्थश्च समभिव्याहारः। तथा च युवशब्दसमभिव्याहारवान् वृद्धशब्द एकविभक्तौ शिष्यत इति तदर्थ इति।

समानकालीनत्ववत् तादात्म्यमपि क्वचित् सहशब्दार्थः

"व्यक्तिर्जात्या सह भासत" इत्यत्र क्रिययोः भासधात्वर्थज्ञानरूपयोः तादात्म्यमपि सहशब्दार्थः। तत्र ज्ञानस्यैक्येन समानकालीनत्वबोधस्य निष्प्रयोजनत्वात्।

---

[१] सू. १.२.६५

तत्र भासधातोः ज्ञानमर्थः। आख्यातस्य तृतीयायाश्च विषयतालक्षणं गौणं कर्तृत्वमर्थः। तथा च जातिकर्तृक (विषयक) ज्ञानाभिन्नं व्यक्तिकर्तृकं (विषयकं) ज्ञानमित्यन्वयबोधः।

जात्या सह व्यक्तिमवगाहते बुद्धिः इत्यत्र तृतीयाद्वितीययोः विषयतारूपं कर्मत्वमर्थः। अवपूर्वकगाहधातोः निरूपकत्वफलको विषयित्वरूपो व्यापारोऽर्थः। आख्यातस्याश्रयत्वरूपं कर्तृत्वमर्थः। तच्च वैयाकरणमते धात्वर्थव्यापारविशेषणम्। नैयायिकमते प्रथमान्तार्थविशेषणम्। नैयायिकमते गुणक्रियायाः द्वेधान्वयः। अन्यथा जातिकर्मकावगाहनसमानकालीनावगाहनकर्त्री बुद्धिः इति बोधोपगमेऽन्यस्या बुद्धेः जातिविषयिण्याः सत्त्वेऽपि तादृशप्रयोगस्य प्रामाण्यप्रसङ्गात्। तथा च व्यापारमुख्यविशेष्यकबोधपक्षे जातिकर्मकावगाहनकालीनं बुद्धिकर्तृकं व्यक्तिकर्मकमवगाहनमिति शाब्दबोधः। जातिनिष्ठविषयतानिरूपकविषयित्वसमानकालीनं बुद्धिनिष्ठं व्यक्तिनिष्ठविषयतानिरूपकं विषयित्वमिति यावत्। प्रथमान्तार्थविशेष्यकबोधपक्षे जातिकर्मकावगाहनकर्त्री बुद्धिः जातिकर्मकावगाहनसमानकालीनव्यक्तिकर्मकावगाहनकर्त्री इति बोधः। जातिनिष्ठविषयतानिरूपकविषयित्वाश्रया बुद्धिः जातिनिष्ठविषयतानिरूपकविषयित्वसमानकालिकव्यक्तिनिष्ठविषयतानिरूपकविषयित्वाश्रय इति यावत्।

विभक्त्यर्थनिर्णये[1] सहयुक्तेऽप्रधाने[2] इति सूत्रार्थविचारः

सहशब्दयोगेऽपि नानार्थिकां तृतीयां ज्ञापयति ''सहयुक्तेऽप्रधाने'' इति सूत्रम्। सहार्थेन युक्ते तृतीया भवति सहयोगेऽप्रधानेऽप्रधानक्रियाकारके प्रधानकारकसजातीये भवतीति तदर्थः।

सहशब्दार्थः सामानाधिकरण्यम्। तच्च दैशिकेन कालिकेन दैशिककालिकोभयेन च संबन्धेन घटितत्वात् त्रिविधम्।

दैशिकस्योदाहरणम्

''वह्निना सह धूमो भस्म वा'' इत्यत्र संयोगिसंयुक्तत्वं सहार्थः। तृतीयायाः प्रतियोगित्वमर्थः आद्यसंयोगेऽन्वेति। एवं च वह्निप्रतियोगिकसंयोगवत्संयुक्तो धूम इत्यन्वयबोधः।

---

[1] पृ. २२०

[2] सू. २.३.१९

"रूपेण सह रस" इत्यत्र समवायिसमवेतत्वं सहार्थः। तृतीयार्थस्य प्रतियोगित्वस्याद्यसमवायेऽन्वयः। रूपप्रतियोगिकसमवायवत्समवेतो रस इति बोधः।

"द्रव्यत्वेन सह धूम" इत्यत्र समवायिसंयुक्तत्वं सहार्थः। तृतीयार्थस्य प्रतियोगित्वस्य समवायेऽन्वयः। द्रव्यत्वप्रतियोगिकसमवायवत्संयुक्तो धूम इति बोधः।

"वह्निना सह धूमसंयोग" इत्यत्र संयोगिसमवेतत्वं सहार्थः। तृतीयार्थप्रतियोगित्वं संयोगेऽन्वेति। वह्निप्रतियोगिकसंयोगवत्समवेतो धूमसंयोग इति बोधः।

कालिकस्योदाहरणम्

कालिकेन यथा "जातीपुष्पेण सह नीपपुष्पम्" इत्यत्र कालस्वरूपेण कालिकविशेषणतासंबन्धेनाधिकरणे तेन संबन्धेनाधेयत्वं सहार्थः। कालिकविशेषणत्वान्वयि प्रतियोगित्वं तृतीयार्थः। जातीपुष्पप्रतियोगिककालिकविशेषणतानुयोगिनिरूपितकालिकसंबन्धावच्छिन्नाधेयत्ववत् नीपपुष्पमित्यन्वयबोधः।

अथ वा काल एव सहार्थः। कालिकाधिकरणत्वं तृतीयार्थः। तस्य कालेऽन्वयः। कालिकाधेयतासंबन्धेन नीपपुष्पेऽन्वयः। जातीपुष्पनिरूपितकालिकसंबन्धावच्छिन्नाधिकरणत्वाश्रयकालनिरूपितकालिकसंबन्धावच्छिन्नाधेयत्ववत् नीपपुष्पम् इत्यन्वयबोधः।

दैशिककालिकोभयस्योदाहरणम्

दैशिककालिकोभयेन यथा पत्न्या सह यजमान इत्यत्र संयोगिसंयुक्तत्वं कालश्चोभयं सहशब्दार्थः। प्रतियोगित्वं कालिकाधिकरणत्वं चोभयं तृतीयार्थः। प्रतियोगित्वस्य आद्यसंयोगेऽन्वयः। कालिकाधिकरणत्वस्य काले कालस्य कालिकाधेयतया यजमानेऽन्वयः। एवं च पत्नीप्रतियोगिकसंयोगवत्संयुक्तः पत्नीनिरूपितकालिकाधिकरणताश्रयकालनिरूपितकालिकाधेयतावान् यजमान इति बोधः। एवं भारमनुद्वहत्सु सह गच्छत्सु पुत्रेषु "सहैव दशभिः पुत्रैर्भारं वहति गर्दभी" इत्यत्रापि दर्शितोभयं सहशब्दार्थः। तृतीयार्थोऽपि प्रतियोगित्वकालिकाधिकरणत्वोभयमेव। पुत्रप्रतियोगिकसंयोगवत्संयुक्ता पुत्रनिरूपितकालिकाधिकरणताश्रयकालनिरूपितकालिकाधेयत्ववती गर्दभी भारं वहतीत्यन्वयबोधः।

सहयोगे काशिकायामुदाहरणानि

"पुत्रेण सह स्थूल" इत्यत्र स्थूलत्वं तृतीयार्थः। तत्र पुत्रस्याधेयतयान्वयः। तृतीयार्थस्य स्थूलत्वस्य कालिकाधिकरणतया सहार्थे काले, कालस्याधेयतया

स्थूलपदार्थैकदेशस्थूलत्वेऽन्वयः। एवं च पुत्रस्थूलत्वसमानकालिकस्थूलत्ववान् पितेत्यन्वयबोधः।

"पुत्रेण सह गोमान् पिता" इत्यत्र स्वामित्वं तृतीयार्थः। तस्य निरूपकता-संबन्धावच्छिन्नसामानाधिकरण्ये सहार्थे प्रतियोगितयान्वयः। सहार्थस्य मतुबर्थैक-देशे गोविशेषिते स्वामित्वेऽन्वयः। एवं पुत्रस्वामित्वसमानाधिकरणगोस्वामित्ववान् पितेत्यन्वयबोधः।

अप्रधानशब्दार्थविचारः

अप्रधानेऽश्रेष्ठे वस्तुभूते प्रकृत्यर्थे सतीत्यर्थः। तेन आचार्येण सहेति न प्रमाणम्, प्रमाणं च शिष्येण सह आचार्यस्य गौः इति। अत्र तृतीयार्थः स्वत्वम्। सहार्थः सामानाधिकरण्यम्। षष्ठ्यर्थः स्वत्वम्। तृतीयार्थस्य सहार्थे तस्य च षष्ठ्यर्थे तस्य गव्यन्वयः। एवं च शिष्यस्वत्वसमानाधिकरणाचार्यस्वत्ववती गौः इत्यन्वयबोधः।

क्वचित् संबन्धमात्रं तृतीयार्थः। यथा "वज्रेण सह इन्द्रः" इत्यत्र संयोगः सहार्थः। प्रतियोगित्वं तृतीयार्थः। एवं च वज्रप्रतियोगिताकसंयोगवान् इन्द्रः इत्यन्वयबोधः।

"गन्धेन सह पृथिवी" इत्यत्र सहार्थः समवायः। प्रतियोगित्वं तृतीयार्थः। गन्धनिष्ठप्रतियोगितानिरूपकसमवायवती पृथिवीति बोधः।

संबन्धस्य सहार्थत्वम्

एवं "दक्षिणाभिः सहेत्यहम्" इत्यत्र सहार्थः संबन्ध इतिना परामृष्टे यज्ञे दक्षिणाप्रतियोगिताकोऽन्वेति। यज्ञस्याहंपदार्थे प्रयोक्तरि भगवति तादात्म्यान्वयः। दक्षिणाया यज्ञे संबन्धस्तु विहितकालिकस्वविषयकत्यागप्रयोज्यप्रतिष्ठावत्त्वम्। प्रतिष्ठा तु फलजनकत्वम्। दक्षिणाप्रतियोगिताकसंबन्धवद्यज्ञाभिन्नोऽहम् इति अन्वयबोधः।

समानकालिकत्वस्य सहार्थत्वम्

एवं "मुद्रया सह कुण्डली देवदत्त" इत्यत्र तृतीयार्थः संबन्धः। स चात्र संयोगः। सहार्थः समानकालिकत्वम्। तच्च काल एव। तस्य इन्प्रत्ययार्थैकदेशे संबन्धेऽन्वयः। इत्थं च मुद्रासंयोगसमानकालिककुण्डलसंयोगवान् देवदत्त इति बोधः।

यदि च तिङर्थविशेषणधात्वर्थस्येव तद्धितार्थविशेषणतदर्थतावच्छेदकस्य विशेषणस्य स्थूलत्वादेः सहार्थे विशेष्यतया विशेषणतया वा अन्वय उपेयते तदा तृतीयायाः संबन्धान्वयि स्थूलत्वान्वयि च आधेयत्वमर्थः। तृतीयान्तार्थविशेषितयोः संबन्धस्थूलत्वयोः सहार्थे विशेषणत्वम्।

ननु सहपदस्य तृतीयायाश्चार्थस्य पदार्थैकदेशेऽन्वयो न युज्यते, अव्युत्पत्तेः। किं तु "पुत्रेण सह स्थूलः पिता, कन्यया सह रमणीयो वरः" इत्यत्र पदार्थयोः स्थूलरमणीययोः तादात्म्येन पितृवरान्वयिनोः सहार्थे विशेषणतया विशेष्यतया वान्वयः। विशेषणत्वापन्नयोस्तयोः तृतीयार्थोऽभेदोऽन्वेति। एवं च पुत्राभिन्नस्थूलसमानकालिकस्थूलः पितेति, कन्याभिन्नरमणीयसमानकालिकरमणीयो वर इति चान्वयबोधो भवति। स्थूलत्वयो रमणीयत्वयोश्च समानकालिकत्वं भासते विशिष्टान्वयबोधसामग्रीबलादिति चेत् —

एवमन्वयोपगमेऽपि नाभिमतनिर्वाहः। सहार्थविशेषणतावच्छेदकयोः स्थूलत्वरमणीयत्वयोः समानकालिकत्वभानायोगात्। विशिष्टान्वयस्थले हि यद्धर्मविशिष्टे विशेषणस्यान्वयः तत्र विशेष्ये बाधेऽबाधेऽपि वा सति तद्धर्मे विशेषणस्यान्वयो भवति यथा "शिखी विनष्ट" इत्यत्र विनष्टतादात्म्यं शिखायाम्, यथा वा भूवादिर्धातुरित्यत्र धातुतादात्म्यं भुव्यप्यन्वेति। न तु विशेषणतावच्छेदके विशेष्यस्य क्वाप्यन्वयः, व्युत्पत्तिविरहात्।

न च मास्तु विशेषणतावच्छेदके स्थूलत्वे समानकालिकत्वान्वय इति वाच्यम्। तथा सति कालान्तरेण स्थूलेऽपि पुत्रे तथाविधप्रयोगप्रसङ्गात्।

यदपि सहार्थतृतीयार्थयोरेकदेशान्वयो न व्युत्पन्न इति। तदपि न सुन्दरम्। एकदेशान्वयस्य आवश्यकत्वात्। तथाहि — "पुत्रेण सह गोमान् पिता" इत्यत्र पुत्राभिन्नगोमतः समानकालिकत्वं गोमति भासते चेत् तर्हि पुत्रस्य गवान्तरस्वामित्वेऽपि तथा प्रयोगप्रसङ्गः। दर्शितान्वयस्य तावतापि संभवात्।

तस्मात् सहार्थविशेषणतापन्ने मतुबर्थतावच्छेतके स्वामित्वेऽन्वयितावच्छेदके गोस्वामित्वे च एकदेशे तृतीयार्थाधेयत्वस्यान्वयः। सहार्थः निरूपकतासंबन्धघटितसामानाधिकरण्यम्। प्रतियोगित्वसंबन्धेन स्वामित्वस्य सामानाधिकरण्ये तस्य स्वरूपेण गोस्वामित्वेऽन्वयितावच्छेदके, तद्विशिष्टस्य तादात्म्येन पितर्यन्वयः।

न चात्र भवत्वेकदेशान्वयः, तावता सर्वत्र न तत्संभवः, "पुत्रेण सह स्थूल" इत्यत्र पुत्राभिन्नस्य स्थूलत्वविशिष्टस्य समानकालिकत्वे विशेषणतयान्वयात् स्थूल-

त्वस्याप्यन्वयः, विशेषणान्वये सत्येव विशिष्टान्वयस्य भावात् इत्येतावता सामञ्जस्यात् नात्रैकदेशान्वय इति वाच्यम्।

यत्र हि स्थूलत्वोपलक्षितः स्थूलपदेन प्रतिपादितः तत्र विशिष्टान्वयबलादपि न स्थूलत्वसमानकालिकत्वलाभ इत्येकदेशान्वय आवश्यक इति।

एवं "शिष्यैः सह जटावन्तो मुनयः, यज्ञदत्तगृहैः सह काकवन्तो देवदत्तगृहा" इत्यत्र एकदेशान्वयं विना नाभिमतनिर्वाहः।

एवं "सह दिवसनिशाभ्यां दीर्घाः श्वासदण्डाः" इत्यत्र दीर्घत्वं कालिकं दैशिकं च। बहुतरकालसंबन्धः कालिकम्, यद्वशात् दीर्घमायुरिति प्रयोगः। बहुतरदेशसंबन्धो दैशिकम्, यद्वशात् दीर्घः पन्था इति प्रयोगः। दीर्घत्वं स्वजातीयापेक्षया बोध्यम्। दिवसो ग्रीष्मे दीर्घः, निशा हेमन्ते दीर्घा, विरहिश्वासो बहुतरवायुमण्डलगामितया दीर्घः। एवं दीर्घपदोपस्थापितयोः दीर्घत्वयोः कालिके तृतीयार्थाधेयत्वस्य दैशिके विशेष्यतया श्वासस्यान्वयो योग्यताबलात्। सहार्थः समानकालिकत्वं सहार्थे कालिकविशेषणतया दैशिकविशेषणतया दीर्घत्वमन्वेति। श्वासदण्डा इत्यस्य दण्डसदृशाः श्वासा इत्यर्थः।

एवं च दिवसवृत्तेः निशावृत्तेर्वा बहुतरकालसंबन्धस्य समानकालिको यो बहुतरदेशसंबन्धः तद्वन्तः श्वासदण्डा इत्यन्वयबोधः।

अत्र दण्डस्य घटिकायाः दिवसदीर्घत्वसमानकालिकं दीर्घत्वं विरुद्धमिति दण्डस्य चतुर्हस्तदेशसंबन्धवतः दिवसघटकक्षणसमसंख्यकपरमाणुसंबन्धरूपं दीर्घत्वं विरुद्धमिति विरोधालंकारः।

एकानुपूर्वीकशब्दप्रतिपाद्ययोः भिन्नयोरर्थयोरपि सहार्थे विशेषणतया विशेष्यतया चान्वयः। यथा —

दोषायोगमहःस्थितिस्फुटरसश्रीकायहृद्यः समं
चन्द्रेणैष नृपो बुधोदयगुरुप्रीतः कविः प्रीतिमान्।
पुत्रोऽस्यापि समं बुधेन सततं मित्रान्तिकासादनः
प्रीतः प्राप्तकराद्भुतगुणोऽत्युच्चः श्रितः सौम्यताम्॥

अत्र रात्रियोगेन या तेजःस्थितिः तत्र स्फुटरसा या श्रीः तद्वता कायेन हृद्यत्वमेकम्, दोषराहित्येनोत्सवस्थित्या च स्फुटा रसा पृथिवी यत्रेदृशलक्ष्मीको योऽयःशुभावहो विधिः तेन हृद्यत्वमपरम्। एवं दलान्तरेऽप्यर्थद्वयं बोध्यम्। दर्शितयोः हृद्यत्वयोः सहार्थे समानकालिकत्वे विशेषणविशेष्यभावेनान्वयः। तत्र

विशेषणे हृद्यत्वे तृतीयान्तार्थस्य चन्द्राधेयत्वस्यान्वयः। विशेष्यहृद्यत्वस्य विशेषणतया नृपेऽन्वयः। चन्द्रवृत्तिहृद्यत्वसमानकलिकहृद्यत्ववान् नृपः इति बोधः।

"पुत्रेण सह आगत आगच्छति वा" इत्यादौ कर्तृत्वं कारकं क्तप्रत्ययार्थतावच्छेदकम् आख्यातस्य वा शक्यं तृतीया अभिधत्ते। धात्वर्थ आगमनं कालिकत्वे विशेषणतया विशेष्यतया चान्वेति। विशेषणे धात्वर्थे तृतीयार्थकारकस्यान्वयः। विशेष्यधात्वर्थस्य कृदर्थैकदेशे तिङर्थे वा कर्तृत्वे विशेषणतयान्वयः। एवं च पुत्रकर्तृकागमनसमानकालिकातीतागमनकृतिमदभिन्नः पुत्रकर्तृकागमनसमानकालिकविद्यमानागमनकृतिमान् वा पितेत्यन्वयबोधः। प्रधानेऽतीतत्वान्विते अतीतायाः, विद्यमानत्वान्विते विद्यमानायाः गुणक्रियायाः समानकालिकत्वं भासत इति न काप्यनुपपत्तिः।

प्रधानक्रियाकारकसजातीयं कारकं तृतीयार्थः कर्तृत्वादिकम्। तत्र कर्तृत्वमुदाहृतम्। अन्यदुदाहियते।

कर्मत्वं यथा

"हिरण्येन सह गां लभते" इत्यत्र। लभतेः स्वत्वम् व्यापारश्चार्थः। द्वितीयातृतीययोराधेयत्वं कर्मत्वमर्थः। सहार्थः समानकालिकत्वम्। एवं च हिरण्यवृत्तिस्वत्वानुकूलव्यापारसमानकालिकगोवृत्तिस्वत्वानुकूलव्यापाराश्रय इति बोधः।

करणत्वं यथा

"तृणेन सह काष्ठेन पचति" इत्यत्र तृतीययोः करणत्वमर्थः। तृणकरणताकपाकसमानकालिककाष्ठकरणताकपाककृतिमानिति बोधः।

सपत्नीभिः सह कान्तस्य त्रस्यतीत्यत्र सपत्नीसबन्धित्राससमानकालिककान्तसंबन्धित्रासाश्रय इत्यन्वयबोधः।

"पीठेन सह गृहे आस्ते" इत्यत्र पीठाधिकरणताकासनसमकालिकगृहाधिकरणताकासनाश्रयत्वं वाक्यार्थः।

सहार्थविशेषणविशेष्ययोः धात्वर्थयोरुभयोः तृतीयाभिन्नविभक्त्यन्तार्थः सर्वोऽन्वेति। तृतीयान्तार्थो विशेषणे। तेन पुत्रस्य ग्रामगमने पितुर्नगरगमने 'पुत्रेण सह नगरं गच्छति पिता' इति न प्रयोगः।

यत्र कर्मत्वादिकारकस्य तृतीयार्थस्य गुणक्रियायामन्वयः न कर्तृत्वस्य तत्र प्रधानक्रियाकर्तुरेव कर्तृत्वमवसीयते। गुणक्रियाकारकानभिधाने प्रधानकारकस्य प्रत्ययाभिहितस्य गुणक्रियायामन्वयात्। तदुक्तम् —

प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।
शक्तिर्गुणाश्रया तत्र प्रधानमनुवर्तते।।
प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
गुणे यदा तदा तद्वदनुक्तापि प्रतीयते।।

इति। "हिरण्येन सह गां लभत" इत्यादौ गोलब्धृकर्तृकत्वं हिरण्यलाभे प्रतीयते। अतो न चैत्रेण हिरण्ये मैत्रेण गवि लभ्यमानायां हिरण्येन सह गां लभते चैत्रः इति प्रयोगः। अत एव समानकर्तृकत्वादिकं सहार्थ इति निरस्तम्। दर्शितरीत्या अतिप्रसङ्गनिरासात् समानकर्तृकत्वादौ शक्त्यन्तरकल्पनाया अन्याय्यत्वाच्च।

"पन्त्या सह यजत" इत्यत्र पतिपदस्याध्याहारे पत्नीसाहित्यं पत्युर्विशेषणम्। यदि च नाध्याहारस्तदापि साहित्यद्वारकं कर्तृत्वं पन्त्या मन्तव्यम्। पत्नीसाहित्यस्य शौचवत् अधिकारत्वात्। "यत्कर्तव्यं तदनया सह" इत्यभिधानात्। अत्रापि पत्न्येत्यध्याहारः। यदि च नाध्याहारस्तदापि कर्तव्यत्वे कृतिविषयत्वे धात्वर्थकृतौ साहित्यद्वारकं कर्तृत्वं पन्त्या इति। एवमन्वयबोधोपपादनेऽपि पत्न्येत्यध्याहारं विना मुख्यकर्तव्यताकाङ्क्षाया न निवृत्तिः। भाट्टानां मते कर्तृत्वादिकमखण्डमतिरिक्तम् इति पन्त्या अपि कर्तृत्वं निराबाधम्।

मतान्तरखण्डनम्

केचित्तु — "पुत्रेण सह आगतः आगच्छति च" इत्यादौ आगमनसमानकालिकागमनेन कर्तृतासंबन्धेन विशिष्टः तथाविधागमनं च सहशब्दार्थः। विशिष्टस्य तादात्म्येन तथाविधागमनस्य कर्तृतया संबन्धेन प्रथमान्तार्थे पितर्यन्वयः। तत्रैव आगतशब्दार्थस्य आगमनकर्तुः अभेदेन आगच्छतीति तिङन्तार्थस्य आगमनकर्तृत्वस्य आश्रयतयान्वयः।

न चैवं सहशब्दार्थान्वयादेव आगमनलाभे "आगतः आगच्छति" इति शब्दप्रयोगो व्यर्थ इति वाच्यम्। तत्तत्प्रत्ययान्तधातुसमभिव्याहारेणैव सहशब्दस्य क्रियातद्विशिष्टोपस्थापकत्वात्।

एवं तृतीयार्थः कर्तृत्वं समानकालिकत्वविशेषणीभूतधात्वर्थे सहार्थैकदेशेऽन्वेति। सहशब्दस्य निपातत्वात् तदर्थस्य भेदेनान्वयः नामार्थेऽपि न विरुद्धः।

न च "यशसा सह मूर्छतीह शत्रुः" इत्यत्र तिङन्तेन मोहकर्तृत्वस्योपस्थापनात् सहशब्देन मोहसमानकालिकमोहाभिधाने मोहे यशःकर्तृकत्वबाधात् अन्वयानुपपत्तिरिति वाच्यम्। तिङर्थान्वितमोहोपस्थितावपि मूर्छतियोगे सहशब्दो हि "पुत्रैः सह मूर्छति शत्रुः" इत्यत्र मोहसमानकालिकमोहः, "यशसा सह मूर्छति श्रीः"

इत्यत्र वृद्धिसमानकालिकवृद्धिः, "रिपुणा सह मूर्छति यश" इत्यत्र मोहसमानकालिकवृद्धिः, प्रकृते वृद्धिसमानकालिकमोहः एते सहार्थाः। तथा च सहार्थैकदेशे वृद्धौ यशःकर्तृकत्वस्य अबाधान्नान्वयानुपपत्तिरिति वदन्ति।

तत्र विचारसहम्। सहशब्दस्य समानकालिकत्वशक्त्यैव निर्वाहे धातुभेदेन तदर्थभेदेन तत्तत्प्रत्ययभेदेनानन्तशक्तिकल्पनाया अन्याय्यत्वात्। यत्र धातोर्नानार्थस्तत्र समानकालिकत्वे विशेषणतया विशेष्यतया चान्वये योग्यता तन्त्रमिति वक्ष्यते। यत्र च न नानार्थः शब्दः तृतीयाभिन्नप्रकृतिः तत्र तृतीयार्थभिन्नकारकान्विता नामार्थव्यक्तिरेकैव कारकद्वारा क्रियान्वयिनी। तेन 'पितरि नन्दिग्रामं गच्छति ग्रामान्तरं च पुत्रे, पुत्रेण सह ग्रामं गच्छति' इति न प्रयोगः। अत एव "पुत्रेण सह गां लभते" इत्यत्र एकस्यामेव गवि पितुः पुत्रस्य च स्वत्वं प्रतीयते।

एवं "हिरण्येन सह गां पुत्रेण सह लभते पिता" इत्यत्र सहार्थद्वयस्यार्थबोधः। तत्र हिरण्यकर्मकलाभसमानकालिकगोकर्मकलाभः द्वितीयसहार्थे विशेषणतया विशेष्यतया वान्वेति। तत्र पुत्रकर्तृकत्वं हिरण्यलाभे प्रथमसहार्थस्य विशेषणे विशेष्ये गोलाभे चान्वेति। द्वितीयसहार्थस्य विशेष्ये गोलाभे विशेष्यतावच्छेदकांशे हिरण्यलाभे च पितृकर्तृताकत्वमन्वेति। व्युत्पत्तिवैचित्र्यात्। तथा च पुत्रकर्तृकहिरण्यकर्मकलाभसमानकालिकगोकर्मकलाभसमानकालिकहिरण्यकर्मकलाभसमान कालिकगोकर्मकलाभकर्ता पितेत्यन्वयबोधः।

ननु "हिरण्येन सह" इत्यत्र सहार्थः कर्मत्वं तदन्वयिनिरूपितत्वं तृतीयार्थः। "पुत्रेण सह" इत्यत्र सहार्थः कर्तृत्वम्। तच्चाधेयत्वम्। तदन्वयि निरूपितत्वमेव तृतीयार्थः। सूत्रेणापि कर्मत्वकर्तृत्वादियोगे तृतीयानुशिष्यते। अप्रधान इति प्रकृत्यर्थस्य तथात्वं सूचयति। एवं लाभे हिरण्यकर्मकत्वगोकर्मकत्वपुत्रकर्तृकत्वानामन्वयः। तथा च पुत्रकर्तृताकहिरण्यकर्मताकगोकर्मताकलाभकर्ता पितेति शाब्दबोधः। एतावता सर्वसामञ्जस्ये सहशब्दस्य समानकालिकत्वादौ शक्तिर्न कल्प्यते, मानाभावात्। न वा धात्वर्थस्य सहार्थे विशेषणतया विशेष्यतया चान्वयः, व्युत्पत्त्यन्तरकल्पनागौरवादिति चेत् — न।

सहशब्दस्य कर्मत्वादौ शक्तिकल्पनायां "छत्रेण सह उपानहौ दधाति" इत्यत्र एकस्यां धारणक्रियायां उपानच्छत्रयोः कर्मत्वासंभवेनानन्वयापत्तेः। "पुत्रेण सह आगच्छति" इत्यत्र पितापुत्रकर्तृत्वयोरेकत्वासंभवेन अनन्वयापत्तेश्च। तस्मात् सहशब्दस्य समानकालिकत्वशक्तेः क्लृप्ततया व्युत्पत्त्यन्तरकल्पनं न न्याय्यम्। न च क्व समानकालिकत्वे शक्तिः क्लृप्तेति वाच्यम्। "गर्जितेन सह वृष्टिः" "श्यामा-

कमञ्जरीभिः सह कङ्गुमञ्जरी'' इत्यत्र सहस्य समानकालिकत्वार्थकत्वं विनान्वयस्य दुरुपपादत्वात्।

एवं यत्र भिन्नकर्तृकयोः क्रिययोरेकव्यक्तिकर्मकत्वं न संभवति योग्यताविरहात् तत्रैकरूपेण नानाव्यक्तीनां कर्मत्वम्। यथा ''पुत्रेण सह ओदनं भुङ्क्ते'' इत्यत्र पुत्रकर्तृकपितृकर्तृकयोर्भोजनयोः एकौदनव्यक्तिकर्मकत्वं न संभवति। ओदनत्वेन नानौदनानामेव तत्र कर्मत्वमिति। भिन्नरूपेण नानारूपकर्मत्वसंभवेऽपि पृथुकं पुत्रे ओदनं पितरि भुञ्जाने ''पुत्रेण सह पृथुकमोदनं तदुभयं वा भुङ्क्ते'' इति न प्रयोगः इत्येकरूपेणेत्युक्तम्।

एवं ''पुत्रेण सह भुङ्क्ते'' इत्यत्र सहार्थः समानकालिकत्वं सामानाधिकरण्यरूपं समानदेशत्वं च। उभयस्मिन्नेव सहार्थे भोजनस्य विशेषणतया विशेष्यतया चान्वयः। विशेषणे भोजने पुत्रकर्तृकत्वान्वयः। तेन विभिन्ने काले देशे च कालान्तरेण एकगृहे एककाले गृहान्तरे च भोक्तरि पुत्रे पितरि वा न तथा प्रयोगः।

एवं ''पतितैः सह न भुञ्जीत'' इत्यत्र यदि एककालावच्छेदेन एकगृहे पतितापतितयोर्भोजने पतितभोजनमपतितं न दूषयति तदा एकपात्रैकपङ्क्त्यधिकरणकत्वस्वरूपं समानदेशत्वं प्रकृते बोध्यम्। पङ्क्तिस्तु परत्वविशेषापरत्वविशेषनिरूपकसजातीयाधिकरणं देशः। संयोगघटितः परम्परया घटकेन स्वल्पेन स्वल्पतमेन संयोगेनाभिव्यङ्ग्यपरत्वविशेषोऽपरत्वविशेषः।

एवं ''पुत्रेण सह पचति'' इत्यत्रापि समानदेशत्वं समानकालिकत्वं च सहार्थः। तेन देशकालयोः वैषम्ये न तथा प्रयोगः।

''सूपेन सह ओदनं पुत्रेण सह पचति पिता'' इत्यत्र द्वेधा सहार्थान्वयः। तेन पुत्रकर्तृकसूपकर्मताकपाकसमानदेशकालिकौदनकर्मताकपाकसमानदेशकालिकसूपकर्मताकपाकसमानदेशकालिकौदनकर्मताकपाककृतिमान् पितेत्यन्वयबोधः।

ननु ''प्रासोष्ट शत्रुघ्नमुदारचेष्टमेका सुमित्रा सह लक्ष्मणेन'' इत्यत्र लक्ष्मणप्रसवसमानकालिकत्वं शत्रुघ्नप्रसवे बाधितमिति कथं सहार्थान्वयः। न चात्र स्थूलकालप्रथमजातो लक्ष्मणादिरेव ग्राह्य इति न समानकालिक्त्वान्वयानुपपत्तिरिति वाच्यम्। तथा सति — प्रकारान्तरेणात्र समानकालिकत्वसंभवः। तथा हि — सूतिमारुतोऽत्र कालो बोध्यः। एक एव सूतिमारुतः यमजप्रसवहेतुः। सूतिमारुतस्य प्रसवप्रयोजकत्वमुक्तं याज्ञवल्क्येन —

नवमे दशमे मासि प्रबलैः सूतिमारुतैः।
निस्सार्यते बाण इव यन्त्रच्छिद्रेण स ज्वरः।।

इति। न च बहुवचनेन भूयसां सूतिमारुतानां प्रसवप्रयोजकत्वमुक्तम्। कथमेकसूतिमारुतः कालत्वेनोपादीयत इति वाच्यम्। एककालवर्तितया हि मारुतानाम् एकत्वमिष्यते। य एव सूतिमारुता लक्ष्मणप्रसवे, त एव शत्रुघ्नप्रसवे प्रयोजका न तु भिन्नाः, कल्पनागौरवात्। लक्ष्मणनिर्गमकाले लक्ष्मणस्य प्रतिबन्धकतया न शत्रुघ्ननिर्गमः। यथा एकेन पुरुषव्यापारेण कमलपत्राणां सूचिभेदने प्रथमपत्रभेदनकाले न द्वितीयपत्रभेदनं प्रथमपत्रस्य प्रतिबन्धकत्वादिति।

जरायुजशरीरस्य शरीरान्तरेऽन्तरवयवावच्छेदेन यः संयोगः तत्प्रतिद्वन्द्वी विभागः व्यापारश्च षूङोऽर्थः। प्रतिद्वन्द्वित्वं तु नाशकतावच्छेदकवैजात्यम्। तच्च सूतिमारुतसंयोगजन्यक्रियाविशेषजन्यतावच्छेदकतया सिद्धम्। तद्वैजात्यवान् विभागः फलविधयार्थः। तेन जरायुजशरीरस्य धातुनानभिधानात् षूङो न सकर्मकत्वहानिः। वैजात्यपरिचयार्थं जरायुजशरीरादिकथनम्। तेन व्याधिवशात् भेकादिप्रसवे प्रसूत इति प्रयोगवारणाय जरायुजशरीरोपादानम्। बालस्य क्रोडात् क्रोडान्तरगमने प्रसूत इति प्रयोगवारणाय शरीरेऽन्तरवयवावच्छेनेत्युक्तम्। "तरुः फलानि सूते, वसुधा भटान् सूते, सहस्रपात् शनिं प्रासूत" इत्यादौ षूङ उत्पत्तिस्तदनुकूलव्यापारश्चार्थ इति तदुपपत्तिः। एवं च प्रकृते लक्ष्मणवृत्तिविजातीयविभागानुकूलव्यापाराधिकरणसूतिमारुतकालिक(स्वातीतस्य) शत्रुघ्नवृत्तिविजातीयविभागानुकूलव्यापारस्य आश्रयः सुमित्रेत्यन्वयबोधः।

समानगुरुकत्वस्य सहार्थत्वम्

"वैशम्पायनेन सह वेदं जैमिनिरधीते" इत्यत्र अधीङोऽर्थद्वयम्। उच्चारणं तदनुकूलश्रावणं चेत्येकोऽर्थः। उच्चारणं तु वर्णोत्पत्त्यनुकूलतयोपलक्षितः विवृतादिः प्रयत्नः। स तु विवृतत्वादिनैव धात्वर्थे निविशते। अतो न सकर्मकत्वहानिः। लिप्यादिना वर्णज्ञानादुच्चारणे "अधीत" इति प्रयोगवारणाय श्रावणमुक्तम्। श्रावणस्य फलज्ञानविधया विवृतादिप्रयोजकत्वम्, वर्णस्य फलस्य साधनतया कण्ठताल्वादिसंयोगे तत्साधनतया कण्ठादिक्रियायामिच्छा विवृतादिप्रयत्नश्चेतीयं रीतिः वर्णोत्पादे बोध्या।

अधीङो धातोः ईदृशार्थवशात् प्रयोगो यथा "पञ्चाब्दिको ब्रह्मवटुः वेदमधीत" इत्यत्र आनुपूर्वीविशेषविशिष्टो वर्णकलापो वेदः। द्वितीयार्थः साध्यत्वाख्यं विषयत्वम्। साध्यत्वविषयत्वसंबन्धावच्छिन्नमाधेयत्वं वा विवृतावन्वेति। एवं च वेद-

विषयताकस्य वेदाधेयस्य वा विवृतादेरनुकूलश्रावणाश्रयः पञ्चाब्दिको ब्रह्मवटुः इत्यन्वयबोधः। एवम् उपाध्यायप्रतिवेशी बालो वा शुको वाधीत इति प्रयोगः सूपपादः।

अर्थप्रतिपादकत्वेन ज्ञानं प्रतिपादकतासंबन्धेनार्थवत्तया ज्ञानं वा फलं तदनुकूलश्रावणं चेत्यपरोऽधीङोऽर्थः। भवति हि विवरणवाक्यश्रवणानन्तरं विव्रियमाणवाक्ये विवरणार्थकत्वबुद्धिः। सा शाब्दबोधः ज्ञानसामान्यं वा। शाब्दबोधपक्षे इतिशून्यवाक्ये "पचति पाकं करोति" इत्यादौ। 'पचति' इत्यत्र तिङः पचतिपदमर्थः। धातुप्रयोगः साधुत्वार्थः प्रणयेदितिवत्। विवरणवाक्यस्य पाककृतिरर्थः। प्रतिपादकतासंसर्गेण पचतिपदेऽन्वेति। यत्र च इतिसहितं वाक्यं "पचतीति पाकं करोति इत्यर्थः" इत्यादौ इत्युपस्थापितस्य पचतिपदस्य पाककृतेरित्युपस्थापितायाः तादात्म्येनान्वितेऽर्थपदार्थे प्रतिपाद्यतासंसर्गेणान्वयः। एवमर्थे शब्दप्रतिपाद्यताग्रहकाले शब्देऽप्यर्थप्रतिपादकत्वं गृह्यते। ज्ञानसामान्यपक्षे तु शाब्दानन्तरं प्रतिपादकत्वमानससंभवान्नानुपपत्तिः। अर्थवत्तायाः शाब्दबोधस्यानुकूलत्वं च पदार्थस्मृतिद्वारा। ज्ञानसामान्यस्यानुकूलत्वं स्मृतिशाब्दादिद्वारा श्रावणस्येति।

एवं "शास्त्रमधीते" इत्यत्र द्वितीयायाः विशेष्यत्वं तत्संबन्धावच्छिन्नमाधेयत्वं वा अर्थः। शास्त्रवृत्त्यर्थवत्त्वप्रकारकज्ञानानुकूलशाब्दाश्रयः इति बोधः।

"वेदमधीते जैमिनिः" इत्यत्र द्विविधाध्ययनं धात्वर्थः। वेदकर्मकाध्ययनाश्रयो जैमिनिरिति वाक्यार्थबोधः। एवं द्विविधाध्ययने श्रावणान्वयि आख्यानमुपयोगः पञ्चम्यर्थ इति ज्ञापयति "आख्यातोपयोगे"[१] इति सूत्रमित्यादिकं स्वयमूह्यम्।

"सहाधीत" इत्यत्र समानगुरुकत्वमपि सहार्थः। तच्च सजातीयविषयकत्वम्। साजात्यं च पुरुषप्रयोज्यतावच्छेदिकया कत्वादिव्याप्यजात्या बोध्यम्। तेन गुरुभेदेन एककाले एकवेदाध्ययने सहाधीत इति न प्रयोगः।

एवं च प्रदर्शितस्थले = "वैशम्पायनेन सह जैमिनिः वेदमधीते" इत्यत्र वैशम्पायनकर्तृताकस्य वेदविषयकविवृताद्यनुकूलस्य वेदविषयकार्थवत्त्वप्रकारकज्ञानानुकूलस्य वा श्रावणस्य समानकालिकं विषयसजातीयवाक्यविषयकं च यद् वेदविषयकविवृताद्यनुकूलं वेदविषयकार्थवत्त्वप्रकारकज्ञानानुकूलं वा श्रावणं तदाश्रयो जैमिनिः इत्यन्वयबोधः।

---

[१] सू. १.४.२९

सामानाधिकरण्यस्य सहार्थत्वम्

"आहारो हि मनुष्याणां जन्मना सह जायते" इत्यत्र कर्तृघटितं सामानाधिकरण्यं सहार्थः क्रिययोरन्वेति। गर्भाशयविभागः तदनुकूलव्यापारो वा जन्मशब्दार्थः। पार्थिवद्रव्यप्रतियोगिककण्ठसंयोगः तदनुकूलव्यापारो वा आहारशब्दार्थः। जन्माहारयोः कर्त्रोरेकशरीरवर्तित्वात् भवतिक्रिययोः सामानाधिकरण्यम्। तथा च जन्मकर्तृताकोत्पत्तिसमानाधिकरणोत्पत्त्याश्रय आहार इत्यन्वयबोधः। जनिधातोरुत्पत्तिरर्थः।

न चात्र समानकालिकत्वं सहार्थ इति वाच्यम्। अनन्वयापत्तेः। जन्मोत्पत्तेरनन्तरमेवाहारोत्पत्तेः संभवात्।

न चोत्तरकालिकत्वं सहार्थोऽस्तु इति वाच्यम्। तथा सति पुत्रागमनोत्तरमागते पितरि पुत्रेण सहागतः इति प्रयोगापत्तेः।

सामानाधिकरण्यस्य सहार्थत्वे तु यत्र क्रिययोः सामानाधिकरण्यं तत्र सहप्रयोग इष्ट एव।

एवं सहार्थे एकानुपूर्वीकतिङन्तप्रतिपाद्यः नानाविधो धात्वर्थः विशेषणतया विशेष्यतया चान्वेति। विशेषणे तृतीयान्तार्थश्च यथा "यशसा सह मूर्छतीह शत्रुः" इत्यत्र मोहः उच्छ्रायश्च धातोरर्थः। यशःकर्तृताकत्वमुच्छ्राये, तत् समानकालिकत्वे, तत् मोहे, स तिङर्थ आश्रयत्वे तत् शत्रौ विशेषणतयान्वेति। योग्यताबलात् व्युत्पत्तिवैचित्र्याच्च। यशःकर्तृकसमुच्छ्रायसमानकालिकमोहाश्रयः शत्रुः इत्यन्वयबोधः।

नानाविधेऽपि धात्वर्थे एकानुपूर्वीकशब्दप्रतिपाद्यो नानाविधोऽर्थः तृतीयाभिन्नविभक्त्यर्थेऽन्वेति। तत्र योग्यतावशात् एकविधार्थान्वितो विभक्त्यर्थः विशेषणे, अपरविधार्थान्वितो विशेष्ये धात्वर्थेऽन्वेति, व्युत्पत्तिवैचित्र्यात्। यथा — "कैरवं हतवान् राजा भृङ्गेण सह सत्वरम्" इत्यत्र धात्वर्थो हननं गमनं च। कैरवशब्दार्थः कुमुदं शत्रुश्च। कुमुदकर्मकत्वं गमने, शत्रुकर्मकत्वं हनने अन्वेति। एवं च भृङ्गकर्तृताककुमुदकर्मताकगमनसमानकालिकशत्रुकर्मताकहननकर्ता राजेति बोधः।

तथाविधनानाविधार्थान्वितः तृतीयाभिन्नविभक्त्यर्थः एकविधार्थान्वितः सहार्थस्य विशेषणे अपरविधार्थान्वितः विशेष्ये एकविधेऽपि धात्वर्थेऽन्वेति। यथा — "देवाधिनाथेन सह क्षितीशो भृशं धराप्रीतिमसौ विधत्ते।" इत्यत्र धराप्रीतिशब्दार्थः पर्वताप्रीतिः पृथिवीरतिश्च। तदुभयकर्मकत्वमेकविधे धात्वर्थे विधानेऽन्वेति। तथा

च देवाधिनाथकर्तृताकपर्वताप्रीतिकर्मताकविधानसमानकालिकपृथिवीरतिकर्मताक-विधानानुकूलकृतिमान् क्षितीश इत्यन्वयबोधः।

तथाविधनानार्थान्विततथाविधविभक्त्यर्थस्य एकैकं सहार्थस्य विशेषणे विशेष्ये समानानुपूर्वीकतिङन्तनानाविधधातुप्रतिपाद्येऽप्यन्वयः। यथा — "शिशुः पयो धास्यति सागरैः सह" इत्यत्र धास्यतिपदेन धयत्यर्थस्य पानस्य दधात्यर्थस्य धारणस्य भावित्वस्य कृतेश्च स्मृतिर्जन्यते। पयःपदेन क्षीरनीरयोः द्वितीयया कर्मत्वस्य तृतीयया कर्तृत्वस्येति। सागरकर्तृत्वं नीरकर्मत्वं च धारणे क्षीरकर्मत्वं पाने योग्यताबलात् व्युत्पत्तिवैचित्र्याच्चान्वेति। एवं च सागरकर्तृताकनीरकर्मताक-धारणसमानकालिकक्षीरकर्मताकभाविपानानुकूलकृतिमान् शिशुः इत्यन्वयबोधः।

सहार्थान्विते विशेषणे विशेष्ये वा धात्वर्थे एकत्र कर्मत्वाद्यन्वययोग्योप-स्थापकपदस्य न तिङन्तेन सह आकाङ्क्षा। अत एव पयःपदेन क्षीरमात्रोपस्थितौ न तथा शाब्दबोधः, न वा "क्षीरं शिशुर्धास्यति सागरैः सह" इति प्रयोगः।

ननु "शिशुः क्षीरं धास्यति पयो वा" इत्यत्र धास्यतिपदेन सह द्वितीयान्तस्य क्षीरपदस्य क्षीरमात्रोपस्थापकपयःपदस्य वा आकाङ्क्षाया दृष्टत्वात् प्रकृते कुतो नाकाङ्क्षा। न च प्रकृते तिङन्तेन धारणस्याप्युपस्थापनेन धारणे क्षीरकर्म-त्वान्वययोग्यताविरहात् पानेऽपि न क्षीरकर्मत्वान्वयाकाङ्क्षेति वाच्यम्। ताव-ताप्यर्थभेदेऽपि अभिन्नायाः शब्दधर्मस्वरूपाकाङ्क्षाया अवैकल्यात्। योग्यता-विरहस्य वक्तुमुचितत्वात्। नानार्थस्यैकत्र योग्यताविरहेऽप्यपरत्रान्वयस्य दर्शनाच्च यथा 'सैन्धवो नील' इत्यादौ। तत् कुतो न दर्शितप्रयोगः, पाने क्षीरकर्मत्वान्वय-संभवादिति चेत् —

मैवम्। नानार्थशब्दस्यापि नानाविधार्थतात्पर्यविषयार्थान्वययोग्यार्थकेनैव पदेन सह अकाङ्क्षा। अत एव लवणाश्वतात्पर्ये सति सैन्धवौ नीलौ इति न प्रयोगः। नीलान्वयासंभवात्। न च लवणेऽयोग्यत्वान्न नीलान्वयः। आकाङ्क्षा तु वर्तत एवेति वाच्यम्। तथा सत्यश्वे नीलान्वयबुद्धिप्रसङ्गात्।

तस्मात् तात्पर्यविषयीभूतधास्यतिपदार्थे स्वार्थान्वयबुद्ध्यभावप्रयोजकाभावप्रति-योगित्वस्वरूपाकाङ्क्षा द्वितीयान्तक्षीरपदे नास्ति। क्षीरमिति पदे सत्यप्यन्वय-बुद्धेरभावात्।

यत्र क्षीरमिति पदस्य क्षीरनीरयोरुभयोरुपस्थापकत्वं तत्रोभयार्थकस्य पय इति पदस्येव आकाङ्क्षाया अवैकल्यात् क्षीरकर्मत्वस्य पाने नीरकर्मत्वस्य धारणे अन्वयबोधो भवत्येव।

यत्र तु पय इति द्वितीयान्तपदं विनैव "सागरैः सह शिशुर्धास्यति" इति प्रयोगः तत्र कर्मत्वान्वयबोधं विनैव शाब्दबोधः। पानधारणोभयकर्मत्वान्वययोग्यार्थकस्य पय इत्यादिद्वितीयान्तपदस्य तद्घटिताकाङ्क्षायाश्च विरहान्न कर्मत्वान्वयबोध इति गुरुचरणदर्शिता रीतिः।

दर्शितेषु श्लेषस्थलीयसहोक्त्यलंकारेषु एकानुपूर्वीकशब्दप्रतिपाद्ययोरर्थयोः सर्वत्र तादात्म्यं व्यञ्जनया प्रतीयते। वैयञ्जनिकबोधे बाधो न विरोधः। अत एव — "सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव।" इत्यत्र कलकलसाहित्यकला-साकल्ययोरभेदाध्यवसाये साधारणधर्मोपपत्त्या उपमाप्रतीतिः। तथा च पान-धारणयोः तादात्म्याध्यवसायेन ऐक्ये सहार्थविशेषणविशेष्ययोः एकजातीयक्रिययोः क्षीरनीरयोः तादात्म्याध्यवसायात् एकजातीयककर्मत्वान्वयः। सागरकर्तृत्वस्य विशेषणे विशेष्ये तिङर्थकर्तुः तत्र शिशोरन्वय इति रसविद्याविदः। पयःपदवाच्ये लक्षणा। पयःपदवाच्यं कर्मत्वम् पानधारणयोरन्वेतीति व्यञ्जनाविद्वेषिणः।

"पुमान् स्त्रिया"[१] इति सूत्रस्य "स्त्रिया सहोक्तौ पुमान् शिष्यत" इति व्याख्याने उक्तौ कर्मणोऽनभिधानात् कृद्योगप्रयुक्तकर्मत्वार्थकषष्ठ्यन्तं पुंस इति पदमध्या-हार्यम्। अथ वा प्रधाने शिष्धात्वर्थे शक्तिमतः पुंसः गुणे वच्धात्वर्थे उक्तौ शक्तिरनुक्तापि प्रतीयते, यथा — "आहूय ब्रह्मणाय ददाति" इत्यत्रानुक्तमपि ब्रह्मणकर्मत्वमाह्वाने प्रतीयते। तदुक्तम् —

प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
गुणे यदा तदा तद्वदनुक्तापि प्रतीयते।। इति।

तथा चानुक्तमपि कर्मत्वं पदाध्याहारे प्रकारतया अपरथा पुंसोऽन्वये संसर्गतयोक्तौ भासत इति न काप्यनुपपत्तिः।

शाब्दिकमतपरिशीलनम्

शाब्दिकास्तु — सहपदं व्यञ्जकमेव। क्रिययोः समानकालिकत्वादिः संसर्ग-मर्यादयैव भासते। "वृद्धो यूना तल्लक्षणश्चेदेव विशेषः"[२] इति निर्देशात्। अतः पुत्रेणागच्छति इति वाक्यं प्रमाणमिति वदन्ति।

तत्र सुन्दरम्। "सहयुक्तेऽप्रधाने"[३] इति सूत्रे सहयुक्तपदस्य वैयर्थ्यापत्तेः। सहशब्दस्य निरर्थकत्वे योगासंभवात्। न चात्र सहशब्दसमभिव्याहार एव योग

---

[१] सू. १.२.६७
[२] सू. १.२.६५
[३] सू. २.३.१९

इति वाच्यम्। सहार्थेन योगे इति काशिकावृत्तेरनुपपत्तेः। साकंसार्धंसमंशब्दैर्योगे तृतीयानुपपत्तेः। "वृद्धो यूना०" इत्यत्र "प्रकृत्यादिभ्य०"[१] इति वार्तिकेन सिद्धा तृतीया। तस्याः समभिव्याहारोऽर्थः। तथा च युवशब्दसमभिव्याहारवान् वृद्धशब्द एकविभक्तौ शिष्यत इति सूत्रवाक्यार्थ इति निर्देशस्य निरर्थकसहशब्द-निष्ठव्यञ्जकत्वाज्ञापकत्वाच्च।

अन्ये सहशब्दार्थाः

दर्शितातिरिक्तोऽपि क्वचित् सहशब्दार्थः। यथा "समवायेन सह घटत्वं प्रति-योगितामवच्छिनत्ति" इत्यत्र निरूप्यत्वमवच्छेदकता च अवच्छिदो धातोः अर्थः। निरूप्यत्वं च ज्ञानजन्यज्ञानविषयत्वम्। तत्र ज्ञानमात्रं फलविधया अर्थः। द्वितीयान्तार्थस्य प्रतियोगित्वाधेयत्वस्य विषयतासंबन्धावच्छिन्नस्य फले ज्ञाने तस्य स्वजन्यज्ञानविषयत्वसंबन्धेनावच्छेदकत्वे अन्वयः। सहार्थः समाननिरूपकत्वम्। तत्रापि निरूपकमात्रं सहार्थः। निरूपकं य ज्ञानजनकज्ञानविषयः। तत्रापि ज्ञानं विषयश्च सहार्थः। ज्ञानविषययोरेकपदार्थयोरपि परस्परमन्वयः। आधेयत्वलक्षण-कर्तृत्वार्थकतृतीयान्तार्थस्य समवायेनाधेयत्वस्य प्रतियागिताकर्मके धात्वर्थे तस्य स्वविषयकज्ञानजनकत्वेन संबन्धेन ज्ञानस्य विषयतया विषये तस्य स्वविषयक-ज्ञानजन्यज्ञानविषयत्वेन तथाविधे धात्वर्थे तस्य तिङर्थाश्रयत्वे तस्य घटत्वे-ऽन्वयः। एवं च समवायवृत्तेः प्रतियोगितावृत्तिज्ञानज्ञाप्यावच्छेदकत्वस्य ज्ञापक-ज्ञानविषयो यः तद्विषयकज्ञानज्ञाप्यायाः प्रतियोगितावृत्तिज्ञानज्ञाप्यावच्छेदकताया आश्रयो घटत्वमिति शाब्दबोधः। अभावनिरूपकः प्रतियोगितावच्छेदकविशिष्टः प्रतियोग्येव प्रतियोगित्वतदवच्छेदकत्वनिरूपकः। स तु निरूपकत्वेन सहार्थे निविशते न तु तत्त्वेनेति।

न चात्रापि समानकालिकत्वं सहार्थः। तत्रैव प्रतियोगिताकर्मकावच्छेदकस्य विशेषणतया विशेष्यतया चान्वय इति वाच्यम्। तथा सति पटत्वेन सह घटत्वमवच्छिनत्तीति प्रयोगप्रसङ्गात्। पटघटाभावप्रतियोगितावच्छेदकतयोः समान-कालिकत्वबाधात्।

ननु यथा "पुत्रेण सह ग्रामं गच्छति" इत्यत्र तद्व्यक्तिकर्मकस्यैव धात्वर्थस्य विशेष्यत्वे सहशब्दप्रयोगः साधुः, तथात्रापि समवायेन सहेत्यत्र प्रतियोगिता-व्यक्तेरेकस्या, उभयकर्मत्वात् भवत्युपपत्तिः। 'पटत्वेन सह घटत्वम्' इत्यत्र एकप्रतियोगित्वव्यक्तेरुभयकर्मत्वासंभवान्नोपपत्तिरिति चेत् —

---

[१] वा. ५६१

न। महानसीयत्वेन सह वह्नित्वमवच्छिनत्ति इत्यत्रैकप्रतियोगित्वव्यक्तेरुभयकर्मत्वासंभवात् असाधुत्वप्रसङ्गात्। अवच्छेदकधर्मभेदेन प्रतियोगिताभेदात्।

समाननिरूपकत्वस्य सहार्थत्वम्

एवं चक्षुःप्रतियोगिकत्वेन संयोगे चाक्षुषकारणतामवच्छिनत्तीत्यत्रापि समाननिरूपकत्वं सहार्थः न तु समानकालिकत्वम्। तथा सति उद्भूतरूपत्वेन सह संयोगत्वमवच्छिनत्ति इति प्रयोगप्रसङ्गात्।

न चात्रैकव्यक्तिकर्मकत्वसंभवः। कर्मणः कारणतायाः अवच्छेदकधर्मभेदेन भेदात्। अवच्छेदकतायाः व्यासज्यवृत्तित्वस्यान्यत्र दूषितत्वात्। कारणतायाः निरूपकावन्वयव्यतिरेकौ तदवच्छेदकत्वनिरूपकाविति बोध्यम्।

अभेदस्य सहार्थत्वम्

क्वचित् अभेतोऽपि सहार्थः। यथा "पटेन सह घटं साक्षात्करोति" इत्यत्र तृतीयाद्वितीययोः कर्मत्वमर्थः। तच्चाधेयत्वं सहार्थस्याभेदस्य विशेषणे तृतीयार्थविशेष्ये धात्वर्थे द्वितीयार्थोऽन्वेति। एवं च पटवृत्तिलौकिकविषयताकसाक्षात्काराभिन्नघटवृत्तिलौकिकविषयताकसाक्षात्काराश्रयः इति बोधः।

न चात्र समानकालिकत्वं सहार्थः। तथा सति अव्यवहितज्ञानभेदेन तथा प्रयोगप्रसङ्गात्।

न चेष्टापत्तिः। तथा सति "रूपेण सह गन्धं साक्षात्करोति" इति प्रयोगप्रसङ्गादिति।

सामग्रीघटकसामग्रीकत्वस्य सहार्थत्वम्

"जात्या सह व्यक्तिं घटत्वेन सह घटं वा जानाति" इत्यत्र सामग्रीघटकसामग्रीकत्वं सहार्थः। जातिवृत्तिविषयताकज्ञानसामग्रीघटकव्यक्तिवृत्तिविषयताकज्ञानाश्रयत्वं च वाक्यार्थः।

न चात्र समानकालिकत्वमभेदो वा सहार्थः। तथा सति जात्या सहाभावं घटत्वेन सह पटं वा जानातीति प्रयोगप्रसङ्गात्। जात्यभावयोः घटपटयोश्च समूहालम्बनसंभवात्।

प्रत्यक्षे व्यक्तीन्द्रियसंनिकर्षः जातीन्द्रियसंनिकर्षघटकः। अनुमितौ व्यापकतायाः ज्ञानं तदवच्छेदकत्वज्ञानघटकम्। शाब्दबोधे पदार्थस्य उपस्थितिः तदवच्छेदकोपस्थितिघटिका प्रयोजिका। घटकत्वं व्यापकत्वम्। प्रमायामीदृशसामग्री संभ-

वति, न तु भ्रमे। अत एव भ्रमस्थले ''घटत्वेन सह पटं जानाति'' इति सहपद-घटितो न प्रयोगः। किं तु सहपदशून्य एवेति।

''जात्या सह व्यक्तिः भासते'' इत्यत्र भासतेः विषयत्वमर्थः। तिङः आश्रयत्वमर्थः। इच्छायां ''भासते सुखम्'' इत्यत्र सप्तम्यर्थस्य यथान्वयः तथा सप्तमीविवरणे वक्ष्यते।

एवं चात्र सहार्थः प्रतियोगिसामग्रीघटकसामग्रीकप्रतियोगित्वं न तु समान-कालिकत्वम्। तथा सति ज्ञानभेदेन इच्छाज्ञानाभ्यां वा जातिव्यक्त्योः अवभासे जात्या सह व्यक्तिः भासत इति प्रयोगप्रसङ्गात्।

तृतीयायाः कर्तृत्वलक्षणमाधेयत्वमर्थः। तथा च जातिवृत्तिविषयत्वप्रतियोगि-सामग्रीकप्रतियोगिकविषयत्वाश्रयो व्यक्तिरित्यन्वयबोधः।

जातिव्यक्तिविषयत्वयोः प्रतियोगि ज्ञानमिच्छा वा। तत्र जातिविषयत्व-प्रतियोगिकज्ञानसामग्रीघटकत्वं व्यक्तिविषयत्वप्रतियोगिकज्ञानसामग्र्याः दर्शितमेव। इच्छाविषयतायाः ज्ञानविषयत्वाधीनत्वात् जातिविषयकेच्छासामग्र्याः व्यक्तिविषय-केच्छासामग्रीघटितत्वमप्युपपन्नमेव।

न चात्राभिन्नप्रतियोगिकत्वं सहार्थः लाघवादिति वाच्यम्। तथा सति जाति-व्यक्त्योः समूहालम्बनप्रसङ्गात्।

''जात्या सह व्यक्तिमवगाहते बुद्धिः'' इत्यत्र अवगाहतेः विषयताफलकप्रति-योगित्वव्यापारोऽर्थः। तृतीयाद्वितीययोः कर्मत्वलक्षणमाधेयत्वमर्थः। तिङः आश्रय-त्वमर्थः। प्रयोजकसामग्रीघटकसामग्रीप्रयोज्यत्वं सहार्थः। प्रधानक्रियाकर्त्र्याः बुद्धेः गुणक्रियायामपि कर्तृत्वेनान्वयः। एवं च बुद्धिकर्तृकजातिवृत्तिविषयताप्रतियोगित्व-प्रयोजकसामग्रीघटकसामग्रीप्रयोज्यस्य व्यक्तिवृत्तिविषयताप्रतियोगित्वस्याश्रयो बुद्धिः इत्यन्वयबोधः। जातिविषयकज्ञानसामग्र्येव जातिविषयत्वप्रतियोगित्वप्रयोजिका। एवं व्यक्तिविषयकज्ञानसामग्र्येव व्यक्तिविषयत्वप्रतियोगित्वप्रयोजिकेति तयोश्च घटितघटकभावो दर्शित एव।

''शैवालेन सह जलेन संयुज्यते बकः, वामतटेन सह दक्षिणतटेन संयुज्यते नदी'' इत्यादौ तृतीययोः जन्यत्वलक्षणं हेतुत्वमर्थः, न तु प्रतियोगित्वमर्थः बाधात्, न वा आधेयत्वम्, साक्षात्संसर्गावच्छिन्नाधेयत्वस्य धात्वर्थान्वयाव्युत्पत्तेः। एक-क्रियाप्रयोज्यत्वं सहार्थः। एवं शैवालजन्यसंयोगप्रयोजकक्रियाप्रयोज्यजलजन्य-संयोगाश्रयो बक इति शाब्दबोधः।

न चात्र समानकालिकत्वं सहार्थः। तथा सति वायुना सह शैवालेन सह संयुज्यते बक इति प्रयोगप्रसङ्गात्। सहार्थे प्रयोज्यत्वप्रवेशात् शाखया सह वृक्षेण संयुज्यते कपिः इत्यत्राप्युपपत्तिः।

एवमन्यादृशोऽपि सहार्थः सुधीभिरूह्यः। इत्थं च "सहयुक्तेऽप्रधाने"[१] इति सूत्रस्य सहार्थयोगे प्रधानक्रियान्वयिविभक्त्यर्थसजातीये गुणक्रियान्वयिन्यर्थे तृतीया भवतीत्यर्थः। सहशब्दतुल्यार्थाः साकंसार्धंसमंशब्दा बोध्याः।

येनाङ्गविकारः[२] इति सूत्रव्याख्यानम्

अङ्गान्यस्य सन्तीत्यङ्गं शरीरम्। अर्शआद्यच्। तस्य विकार इति विग्रहः। येनेत्यनेन प्रकृत्यर्थभूतमङ्गं परामृश्यते। न ह्यविकृतेनाङ्गेन अङ्गिनो विकारः संभवति। तथा च येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यादिति सूत्रार्थः। 'अक्ष्णा काण' इत्युदाहरणम्। काणशब्दस्य काणत्ववानर्थः। तदेकदेशकाणत्वान्वयी संबन्धः तृतीयाया अर्थः। अक्षिसंबन्धिकाणत्वविशिष्ट इति बोधः। संबन्धश्च विकारप्रयुक्तत्वरूपः। अक्षिविकारप्रयुक्तकाणत्वविशिष्ट इति फलितोऽर्थः। यद्यप्येकमक्षि विकलं काणमित्युच्यते। तथापि अवयवधर्मस्य अवयविनि आरोपात् शरीरे तदवच्छिन्नात्मनि च व्यवहारो निरूढः। यद्यपि काणशब्दः अक्षिगतविकारवाचक इति अक्ष्णोऽपि काणशब्दार्थेऽन्तर्भावात् अयं काण इत्येतावता विवक्षितार्थलाभेन अक्ष्णेति प्रयोगो नापेक्षितः, तथापि 'द्वौ विप्रौ' इत्यत्र विप्राविति द्विवचनेनैव द्वित्वलाभेऽपि द्विशब्दप्रयोगो यथा संभेदे नान्यतरवैयर्थ्यमिति न्यायेन समर्थ्यते, तथा प्रकृतेऽपि। ईदृशरीत्या ईदृशानां साधुत्वे च अक्ष्णा काण इतीदृशप्रयोग एव मानम्। इति शेखरे बालमनोरमायां च।

लघुमञ्जूषायाम्[३]

"पादेन खञ्ज" इत्यादौ विकारप्रयुक्तत्वरूपः संबन्धः तृतीयाविभक्तेरर्थः। विकारे पादस्याधेयतासंबन्धेनान्वयः। खञ्जशब्दस्य संस्थानवैधुर्यवच्चरणवानित्यर्थः। संस्थानवैधुर्ये तृतीयार्थस्याश्रयतासंबन्धेनान्वयः। पादविकारप्रयुक्तसंस्थानवैधुर्यवच्चरणवानिति बोधः। "कायेन दशवक्त्रः, मुखेन त्रिलोचन" इत्यादौ प्रकृत्यादिवत् तृतीया।

---

[१] सू. २.३.१९
[२] सू. २.३.२०
[३] पृ. १२५९

"अक्ष्णा काण" इत्यत्र चक्षुर्नाशवान् सचक्षुष्कः काणपदार्थः। अक्षिपदार्थो गोलकम्। विकारप्रयुक्तत्वं तृतीयार्थः। गोलकविकारप्रयुक्तचक्षुर्नाशवान् सचक्षुष्क इति बोधः। जात्यन्धवारणार्थं सचक्षुष्क इत्युक्तम्।

"अतिशायने तमबिष्ठनौ"[१] इति सूत्रे भाष्ये तु "अन्धानां काणतम" इति। कणिरयं सौक्ष्ये वर्तते। सर्वे इमे किंचित् पश्यन्ति, अयमेषां काणतम इत्युक्तम्। अन्धानामपि वास्तवं काणत्वं वर्तते। तत्रादर्शनप्रकर्षाश्रयः प्रत्ययः। तथा च प्रसिद्धिः 'अन्धानां काणो राजा' इति कैयटः।

शब्दशक्तिप्रकाशिकायाम्[२]

"अक्ष्णा काण" इत्यत्र चक्षुःशून्यगोलकवत्त्वे सति सचक्षुर्गोलकवान् काणः प्रसवान्धस्य काणत्वाभावात् तत्रातिव्यापिवारणाय विशेषणम्। अक्षिपदार्थो गोलकम्। तृतीयायाः विकृतत्वं वृत्तिमत्त्वं चार्थः। तत्राद्यं संबोध्यत्वमिव प्रकृत्यर्थे विशेषणविधयान्वितम्। काणत्वैकदेशे चक्षुःशून्यत्वे प्रकृत्यर्थनिरूपितस्य वृत्तिमत्त्वस्य अन्वयः। तथा च विकृतगोलकवृत्तित्वविशिष्टं यत् चक्षुःशून्यत्वं तद्वद्गोलकवान् सचक्षुष्कगोलकवान् इत्याकारकस्तत्र बोधः। "येनाङ्गविकारः"[३] इति पाणिनिसूत्रस्याप्युक्तार्थ एव तात्पर्यम्। "कुत्सितेऽङ्गे" इति कालापसूत्रस्याप्ययमेवार्थः।

यद्वा स्वाधिष्ठानवृत्तित्वसंबन्धेन चक्षुःशून्यः = स्वाधिकरणवृत्तित्वसंबन्धावच्छिन्नप्रतियोगिताकचक्षुरत्यन्ताभावविशिष्टो यश्चक्षुर्नाशः तद्वान् सचक्षुष्कः काणपदस्यार्थः। तथा च महाचक्षुर्नाशेऽपि तादृशनाशस्य निरुक्तसंबन्धेन चक्षुरत्यन्ताभाववत्त्वाभावात् न काणत्वापत्तिः। तादृशे विनाशे अक्षिपदार्थस्य गोलकस्य विकारप्रयुक्तत्वं तृतीयया बोध्यते। तथा च गोलविकारप्रयुक्तस्य निरुक्तसंबन्धेन चक्षुरत्यन्ताभववतः चक्षुर्नाशस्याश्रयः सचक्षुष्क इत्याकारस्तत्र बोधः। विकारश्च कनीनिकाद्यपगमरूपो ग्राह्यः।

"पादेन खञ्ज" इत्यत्र सहजसंस्थानशून्यचरणवान् खञ्जः। तृतीयायाः विकृततत्वम् आधेयत्वं चार्थः। विकृततत्वस्य प्रकृत्यर्थे पादेऽन्वयः। विकृतत्वविशिष्टपादस्य आधेयत्वे निरूपितत्वसंबन्धेनान्वयः। आधेयत्वस्य खञ्जपदार्थैकदेशे सहजसंस्थानशून्यत्वेऽन्वयः। तथा च विकृतपादवृत्तित्वविशिष्टं यत् सहजसंस्थानशून्यत्वं तद्वच्चरणवान् इति बोधः।

---

[१] सू. ५.३.५५

[२] पृ. ३६०

[३] २.३.२०

अथ वा विकारप्रयुक्तत्वं तृतीयार्थः। तच्च खञ्जपदार्थैकदेशे सहजसंस्थानशून्यत्वेऽन्वेति। तथा च पादविकारप्रयुक्तं यत् यथोचितसंस्थानवैधुर्यं तदाश्रयीभूतचरणवान् इति बोधः।

श्रोत्रेण बधिरः, कायेन वामन इत्यादावप्युक्तैव रीतिः। तथा हि — सहजसंस्थानशून्यकर्णवान् बधिरः। सहजसंस्थानशून्यदेहवान् वामनः। विकृतकर्णवृत्तित्वविशिष्टं यत् सहजसंस्थानशून्यत्वं तद्वत्कर्णवान् इति वा कर्णविकारप्रयुक्तयथोचितसंस्थानवैधुर्याश्रयीभूतकर्णवान् इति वा बोधः। विकृतकायवृत्तित्वविशिष्टं यत् सहजसंस्थानशून्यत्वं तद्वच्छरीरवान् इति वा, कायविकारप्रयुक्तयथोचितसंस्थानवैधुर्याश्रयीभूतकायवानिति वा बोधः।

"मुखेन त्रिलोचनः, कायेन दशवक्त्रः" इत्यादौ तु यदि लोचनत्रयादिमत्तया मुखादिवैकृत्यमवबुध्यते, तदा विकार एव तृतीया। नो चेद्वैशिष्ट्यमात्रे।

तथा च विकृतमुखवृत्ति यत् सहजसंस्थानशून्यत्वं तद्वन्मुखवांस्त्रिलोचनः इति, विकृतकायवृत्ति यत् सहजसंस्थानशून्यत्वं तद्वत्कायवान् दशवक्त्र इति बोधः। वैशिष्ट्यार्थकत्वे तु मुखवृत्तित्रिलोचनवान् कायवृत्तिदशवक्त्रवान् इति बोधः।

पदवाक्यरत्नाकरे[१]

महाशरीरे वैजात्यविशेषो या समग्रता।
तदभावो यद्विकारात् तृतीया तत इष्यते।।

इति कारिकया "येनाङ्गविकारः"[२] इति सूत्रं व्याख्यातम्। महाशरीरे समग्रत्वरूपो वैजात्यविशेषोऽस्ति। तदभावः यन्निष्ठविकारप्रयोज्यः ततस्तृतीयेत्यर्थः।

सन्ति तावत् शरीरेषु समग्रलक्षणा मनुष्यत्वव्याप्याः ब्राह्मणत्वव्याप्या वा जातयः, यदवच्छिन्नं प्रति विजातीयानां त्वगसृगस्थिपादादीनां समवायिकारणत्वम्। अस्थिवृत्तिसमवायेन महाशरीरोत्पत्तौ तादात्म्यसंबन्धेन अस्थि कारणम्। अतः समवायसंबन्धेन महाशरीरस्य मांसेऽपि सत्त्वात् तत्र तादात्म्येनास्थ्नः अभावात् व्यतिरेकव्यभिचार इति शङ्कायाः नावसरः। काणखञ्जशरीरादौ च न सा जातिः। तादृशजात्यवच्छिन्नसमवायिकारणस्य अविकृतचक्षुर्गोलकपादादेस्तत्राभावात्। एवम् अधिकावयवके त्रिलोचनादौ न सा जातिः। अधिकस्य तृतीयलोचनस्य तादृशजात्यवच्छिन्नशरीरोत्पादकसामग्र्यामनुप्रवेशात्।

---

[१] पृ. ६७५-६७९
[२] सू. २.३.२०

तथा च "येनाङ्गविकारः" इति सूत्रे येनाङ्गेन अङ्गिनो विकारस्तत्र तृतीयेति वृत्तिग्रन्थस्यायमर्थः — खण्डशरीरे यादृशावयवसमवेतत्वप्रयुक्तः महाशरीरत्वजातेरभावः ततः प्राणिप्रतीकात् (प्राण्यवयवात्) तृतीयेति। अवयवस्य विकारस्तु फलतः सिध्यति, विकृतावयवसमवेतत्वस्य महाशरीरत्वाभावप्रयोजकत्वात्।

"अक्ष्णा काण" इत्यत्राक्षिपदं गोलकपरम्। समवेतत्वप्रयुक्तसमग्रत्वाभावः तृतीयार्थः। काणपदस्य चक्षुरधिष्ठितगोलकारब्धत्वे सति चक्षुरनधिष्ठितगोलकसमवेतशरीरमर्थः। तथा च गोलकसमवेतत्वप्रयुक्तसमग्रत्वाभाववान् चक्षुरधिष्ठितानधिष्ठितगोलकसमवेतः पुरुष इत्यन्वयबोधः। गोलकस्य विकारः कनीनिकोपघातादिप्रयुक्तवैजात्यविशेषाभावः आक्षेपलभ्यः। अविकृतचक्षुरारब्धत्वस्य महाशरीरत्वाभावप्रयोजकत्वाभावात्। प्रयोज्यप्रयोजकभावस्तु व्याप्यव्यापकभावः स्वरूपसंबन्धविशेषो वा।

"पादेन खञ्ज" इत्यत्र पादवृत्तेस्तत्संस्थानवृत्तेर्वा जातिविशेषस्याभाववति पादे समवेतः खञ्जपदार्थः। तथा च पादसमवेतत्वप्रयुक्तसमग्रत्वाभाववान् यथावस्थितपादसमवेत इत्यन्वयबोधः।

यदि च आमूलमुत्खातैकगोलको लूनपादको वा काणः खञ्जश्च भवति, तदा चक्षुरधिष्ठितगोलकद्वयासमवेतत्वे सति चक्षुष्मद्गोलकसमवेतः काणः, समग्रपादद्वयासमवेतः पादसमवेतः खञ्जः। तादृशे काणपदार्थे खञ्जपदार्थे च तृतीयान्तार्थः अक्ष्यादिसमवेतत्वप्रयुक्तसमग्रत्वाभावः स्वरूपसंबन्धेनान्वेति।

लाघवात् पक्षान्तरम्

वस्तुतस्तु तृतीयाया विकारोऽर्थः। स च क्वचिन्नाशः, क्वचिदुपघातः, शापादिः। तथा च "अक्ष्णा काण" इत्यत्र अक्षिविकारप्रयुक्तचक्षुष्मद्गोलकद्वयासमवेतत्ववान् चक्षुष्मद्गोलकसमवेतत्ववान् वेत्याकारको बोधः। काकगोलकस्य तु शाप एव विकारः। "एनमक्ष्णा काणीचकार चरमो रघुराजपुत्रः" इति मुरारिः। (अनर्घराघवे)

"मुखेन त्रिलोचन" इत्यत्र मुखे लोचनत्रयवत्ताप्रयुक्तो विकारः समग्रत्वरूपजातिविशेषाभावः तत्प्रयुक्तो महाशरीरत्वाभावः। गोलकाभ्यां मुखं, मुखेन शरीरं प्रारभ्यते। तथा च गोलकद्वयसमवेतमुखसमवेतैव सा जातिः न तु गोलकत्रयसमवेतेति तात्पर्यम्। "वपुषा चतुर्भुज" इत्यत्र वपुःपदं शरीरपूर्वार्धपरम्।

स बाल आसीद्वपुषा चतुर्भुजः मुखेन पूर्णेन्दुमुखस्त्रिलोचनः।
युवाकराक्रान्तमहीभृदुच्चकैः असंशयं संप्रति तेजसा रविः।।

इति माघे प्रथमसर्गे सप्तमश्लोकः।

विभक्त्यर्थनिर्णये[१]

अङ्गविकारार्थिकां तृतीयां ज्ञापयति "येनाङ्गविकारः"[२] इति सूत्रम्। अस्यार्थः काशिकावृत्तौ — अङ्गशब्दः अङ्गसमुदायिनि शरीरे वर्तते। येनेति तदवयवो हेतुत्वेन निर्दिश्यते। येनाङ्गेन विकृतेन अङ्गिनो विकारो लक्ष्यते ततस्तृतीयाविभक्तिर्भवति इति। लक्ष्यत्वं प्रयोज्यत्वम्। विकृतस्य प्रयोजकत्वं विशेष्ये बाधे विकारे विशेषणे पर्यवस्यति। तथा चावयवस्य प्रकृत्या लाभात्। तृतीयायाः विकारोऽर्थः। यथा "अक्ष्णा काण" इत्यत्र चाक्षुषप्रयोजकगोलकद्वयाभाववान् तथाविधगोलकवान् काणपदार्थः। गोलकस्य स्वच्छिद्रद्वारा चक्षुषो निर्गमेन संनिकर्षसंपादनेन चाक्षुषप्रयोजकत्वं चक्षुषो गोलकान्तर्वर्तित्वात्, न तु तस्य कृष्णतारकावर्तित्वम्, कृष्णतारकाचाक्षुषापत्तेः। आलोकविरहान्न गोलकान्तः चाक्षुषम्। एवं सति काणपादैकदेशे तथाविधगोलकद्वयाभावे तृतीयार्थविकारस्य प्रयोज्यत्वेनान्वयः। अक्षिपदं गोलकपरम्। तथा च गोलकविकारप्रयोज्यचाक्षुषप्रयोजकगोलकद्वायाभाववान् तथाविधगोलकवानित्यन्वयबोधः। अङ्गविकार इति शब्दस्य प्रयोजनं तृतीयार्थविकारस्यावयविशरीरभिन्ने अन्वयो नेति। तेन अक्षि काणमस्येत्यत्र न तृतीया। तदर्थान्वययोग्यस्य शरीरस्य शब्देनालाभात्।

ननु तथापि "अक्ष्णा चैत्र" इति प्रयोगः स्यात्। चैत्रपदेन शरीरोपस्थापनात्। न च चैत्रे तत्त्वे वा तृतीयार्थविकारस्य प्रयोज्यत्वान्वयसंभवात् न तथा प्रयोग इति वाच्यम्। तथा सति काणमित्यत्र काणपदस्य विकारवदर्थकतया अक्षिपदार्थे गोलकेऽभेदान्वययोग्यतया तृतीयार्थविकारप्रयोज्यत्वान्वयायोग्यत्वादेव तृतीयाप्रसक्तिविरहात् अभेदेन प्रयोज्यप्रयोजकभावासंभवात् इत्यङ्गविकारशब्दो निष्प्रयोजन एवेति चेत् —

न। काणमित्यत्र काणपदस्य चाक्षुषाप्रयोजकार्थकतया तदर्थावच्छेदके तृतीयार्थविकारप्रयोज्यत्वान्वयसंभवात् तृतीयाप्रसक्तेः तन्निषेधफलकत्वेनाङ्गविकारस्य सप्रयोजनकत्वसंभवात्।

ननु तथा सति चाक्षुषाप्रयोजकं गोलकं काणपदस्यार्थः। तद्वत्यवयविनि शरीरे निरूढलक्षणास्तु। किं काणपदस्य नानार्थत्वाभ्युपगमः। किं तु तथाविधगोलकमेव शक्यं, लक्ष्योऽवयवी, लक्ष्यतावच्छेदकं तु न तथाविधगोलकवत्त्वम्। उत्खातैकगोलके काणपदाप्रयोगप्रसङ्गात्। किं तु पूर्वोक्तोभयधर्मवत्त्वमिति।

---

[१] पृ. २४३

[२] सू. २.३.२०

ननु चाक्षुषप्रयोजकत्वं यदि चाक्षुषोपधानप्रयोजकत्वं तदा निमीलितैकलोचने काणपदप्रयोगापत्तिः। यदि चाक्षुषत्वयोग्यप्रयोजकत्वं तत्रापि प्रयोजकत्वमुपधायकत्वं तदापि पूर्वोक्तो दोषः। निमीलने सति संनिकर्षादेर्योग्यस्यानुपधानात्। यदि योग्ययोग्यत्वं तदा पुष्पकादिना गोलकच्छिद्रमुद्रणे काणपदाप्रयोगप्रसङ्गः। तत्र गोलके निर्गमद्वारकसंनिकर्षयोग्यतायाः सत्त्वात् पुष्पकाद्यपनये चाक्षुषसन्निकर्षयोः संभवादिति। निरूढलक्ष्यतावच्छेदकमप्येकं न संभवतीति चेत् —

न। अविकृतगोलकत्वस्यैव योग्यतात्वात्। सपुष्पकगोलके तद्विरहादेव काणपदप्रयोगसंभवात्। विकारास्तु गोलकनिष्ठप्रत्यासत्त्या चाक्षुषप्रतिबन्धकतावच्छेदकतयानुगमनीयाः।

अथ वा गोलकद्वयप्रयोज्यचाक्षुषाभावचाक्षुषोभयवत्त्वमवच्छेदकतासंबन्धेन काणपदस्य लक्ष्यतावच्छेदकम्। निमीलितैकलोचनेऽतिप्रसङ्गवारणाय अदृष्टाद्वारकप्रयत्नावरुद्धगोलकवदन्यत्वेन तद्विशेषणीयम्। गोलकविकारादेः दुरदृष्टजनकप्रयत्नसाध्यत्वात् काणे अप्रसङ्गवारणाय अदृष्टाद्वारकत्वं प्रयत्ने विशेषणम्। पूर्वं निमीलितैकलोचनस्य कालान्तरेण गोलकविकारे सति तथाविधगोलकवदन्यत्वस्य विकृतगोलके शरीरे सत्त्वात् आहारपरिणामादिना शरीरभेदादिति न काणपदाप्रसङ्गः।

यदि च काणस्याविकृताक्षिनिमीलने तथाविधगोलकवदन्यत्वविरहात् काणपदाप्रसङ्ग इति विभाव्यते, तदा तथाविधगोलकवदन्यत्वविशेषणमुभय-घटकत्वं च चाक्षुषप्रागभावस्य बोध्यम्।

यद्वा तथाविधप्रयत्नाप्रयोज्यत्वं चाक्षुषाभावे विशेषणम्। तत एव निमीलितैकलोचने नातिप्रसङ्गः।

यदि च रोगविशेषे कुपत्यभोजनादिना पुष्पकाद्युत्पत्तिः तदा गोलकविकाराप्रयोज्यत्वं प्रयत्ने विशेषणम्। अतो नाप्रसङ्गः। उभयघटकत्वं च चाक्षुषप्रागभावस्य चाक्षुषयोग्यत्वस्य वा। योग्यत्वं च चक्षुर्निर्गमावरोधकशून्यच्छिद्रत्वे सति चक्षुस्संयोगिगोलकत्वं गोलके, तथाविधगोलकसमवेतत्वं शरीरे बोध्यम्। अवच्छेदकतासंबन्धेन शरीरे ज्ञानादेरुत्पादात् न चाक्षुषप्रागभावहानिः। अतः सुप्ते काणे न काणपदप्रयोगः। योग्यत्वस्य घटकत्वे तु मृतेऽपि काणे शरीरस्य यावन्न सोफः शोषो वा तावत् काणपदप्रयोगो निष्प्रत्यूह एव। तद्गोलकव्यक्तेः सत्त्वात्। सोफशोषयोरनन्तरं तत्र काणशब्दप्रयोगो गौणः।

एवं च गोलकविकाराप्रयोजकयत्नाप्रयोज्यगोलकद्वयप्रयोज्यचाक्षुषाभाववत्त्वे सति चक्षुर्निर्गमावरोधकशून्यच्छिद्रवच्चक्षुस्संयोगिगोलकसमवेतः काणपदार्थः। तृतीयार्थो विकारः क्वचित् गोलकनाशः यद्बलात् उत्खातैकगोलके, क्वचित् चक्षुर्नाशः यद्बलात् प्रसन्नैकचाक्षुषाप्रयोजकगोलके मांसवृद्धियुतैकगोलके च, क्वचित् पुष्पकादिः यद्बलात् पुष्पकादिमदेकगोलके काणपदस्य प्रयोगः।

न च पुष्पकादिना चक्षुर्नाश एवेति वाच्यम्। पुष्पकाद्यपनये चाक्षुषानुत्पत्तिप्रसङ्गात्।

न च पुष्पकाद्यपनायकेन चक्षुरन्तरोत्पाद इति वाच्यम्। चक्षुर्नाशचक्षुरन्तरतदुत्पत्तिप्रागभावनाशानां कल्पनापेक्षया पुष्पकादेश्चक्षुर्निर्गमप्रतिबन्धकत्वकल्पनाया एव लघुत्वात्।

यत्र तु पुष्पकाद्यपनयेऽपि न चाक्षुषं, तत्र चक्षुरन्तरोत्पादकल्पनापि न संभवति। किं तु पुष्पकादिप्रयोजकव्यक्तिविशेषस्य चक्षुर्नाशकत्वकल्पनैव। अन्यथानुपपत्तेः। विकारास्तु चाक्षुषप्रतिबन्धकतावच्छेदकत्वोपलक्षितधर्मवत्तयानुगतीकृताः। अतो नाननुगमः।

एवं काकस्य शापेन गोलकद्वयप्रयोज्यचाक्षुषाभावेन शप्तृप्रयोज्येन न काणत्वम्। अत एवाविकृतगोलके काके न काणव्यवहारः।

न च शापस्यातीततया आधुनिककाकानां कथमेकनेत्रत्वमिति वाच्यम्। काकत्वसामान्यलक्षणया सकलकाकोपस्थितौ शापस्य सकलकाकविषयत्वात् शापविषयता स्वसंबन्धमात्रेण एकनेत्रत्वं प्रयोजयति।

अथ वा शापकालिकैकनेत्रकाकजातीयप्रयोज्यत्वेन आधुनिककाकानामेकनेत्रत्वम्, यथा द्विनेत्रजातीयमनुष्यादिप्रयोज्यत्वेन मनुष्यादीनां द्विनेत्रत्वम्। न च "ऐषीकमस्त्रमुदपास्यदथैनमक्ष्णा काणीचकार चरमो रघुराजपुत्रः" इति कथं प्रयोग इति वाच्यम्।

ऐषीकास्त्रप्रयोज्यगोलकोपघातस्यापि तथाविधचाक्षुषाभावप्रयोजकत्वात्। विकारस्य स्वसंबन्धगोलकप्रयोज्यचाक्षुषं प्रति प्रतिबन्धकत्वात्। तादृशचाक्षुषाभावोऽपि चाक्षुषस्यैकदा गोलकद्वयप्रयोज्यत्वाभाव इव गोलकद्वयप्रयोज्यचाक्षुषाभावं प्रयोजयति। तथा चात्र तृतीयार्थः ऐषीकास्त्रप्रयुक्तोपघातः। तत्प्रयोज्यत्वं गोलकद्वयप्रयोज्यचाक्षुषाभावे काकनिष्ठेऽबाधितमिति।

अत एव काणमैषीकेणाहनत् इति नोक्तम्, उक्तं च काणीचकारेति। अत एव गोलकविकाराप्रयोजकत्वं प्रयत्नविशेषणमर्थवत्। अन्यथात्र काणत्वानुपपत्तेः। शापस्तु न गोलकविकारप्रयोजकः। गोलकचक्षुस्संयोगस्यानुत्पादो न विकारः। विकारगणापठितत्वात्। नाशस्तु गणितत्वात् भवति विकारः।

यदि चानुत्पादोऽपि विकारः तदा विकारप्रयोजकत्वात् शापोऽपि विकारः तृतीयार्थः प्रयोज्यत्वेन तथाविधचाक्षुषाभावेऽन्वेति। सर्वे काकाः काणा इति प्रयोगोऽपीष्यत एवेति।

विभक्त्यर्थनिर्णये[१]

पादेन खञ्ज इत्यत्र पादद्वयप्रयोज्यप्लुतान्यगत्यभाववत्त्वे सति प्लुतान्यगतियोग्यपादवान् खञ्जपदार्थः। खञ्जस्यापि प्लुतगतिमत्त्वात् अप्रसङ्गवारणाय सत्यन्तमुपात्तम्। विकृतोभयपादवत्यतिप्रसङ्गवारणाय विशेष्यदलम्। पादस्य प्लुतान्यगतियोग्यत्वं च विजातीयसंयोगवदवयवारभ्यत्वम्। प्लुतान्यप्रयोजकमारम्भकसंयोगगतं वैजात्यमेव आवश्यकत्वात् यद्विरहात् जातमात्रबालस्यापि विसदृशपादाद्यवयववत्त्वमालक्ष्यते। एवं तृतीयार्थो विकारः। स चात्र क्वचित् आमवातसंयोगः, क्वचित् आरम्भकसंयोगनाशकखण्डादिप्रहारः, क्वचित् रुधिरास्थिमांसाद्यवयवनाशप्रयोजको रोगविशेषः ईदृश आहाराभावश्च क्वचिदारम्भकसंयोगनाशकवायुप्रयोजकः खल्याद्याहारः। तृतीयार्थः प्रयोज्यत्वेन तथाविधगत्यभावेऽन्वेति।

एवं च पादविकारप्रयुक्तपादद्वयप्रयोज्यप्लुतान्यगत्यभाववान् प्लुतान्यगतिप्रयोज्यपादवानित्यन्वयबोधः। विकारास्तु तथाविधगतिप्रतिबन्धकतावच्छेदकत्वोपलक्षितधर्मवत्तयानुगमनीयाः। क्वचित् शापोऽपि विकारः। अत एव 'सौरिः पादेन खञ्ज' इति व्यवहारः।

एवं "पाणिना कुणिः" इत्यत्र कुणिपदार्थः कुकरत्वम्। तच्च करद्वयप्रयोज्यकार्याभाववत्त्वे सति तथाविधकार्ययोग्यपाणिमत्त्वम्। तथाविधकार्यं तु धनुःप्रहरणादितान्त्रिकमुद्रादियोग्यत्वं च पाणेः पादवत् बोध्यम्।

तृतीयार्थो विकारः। स चाङ्गुलीगलनादिः। एवं च प्राणिविकारप्रयोज्यकरद्वयप्रयोज्यकार्याभाववान् तथाविधकार्ययोग्यपाणिमानित्यन्वयबोधः।

यदि च 'पाणिभ्यां कुणिः' इति प्रयोगस्तदा करद्वयप्रयोज्यकार्याभाववत्त्वमेव कुणित्वं बोध्यम्।

---

[१] पृ. २४८

एवं कार्याभावस्याङ्गिविकारत्वोपगमे "तान्यक्ष्णा बधिराणि पन्नगकुलान्यष्टौ" इति प्रयोगः। तत्र बधिरत्वं श्रावणप्रत्यक्षाभावः। पन्नगस्याक्षिगोलकं श्रवणेन्द्रियाधिष्ठानम्। तत्र गोलकावच्छिन्ने श्रोत्रे शब्दानुत्पादो गोलकस्य विकारस्तृतीयार्थः। तस्य प्रयोज्यत्वेन श्रावणाभावेऽन्वयः।

एवं 'नेत्राभ्यामन्ध' इति प्रयोगोऽपीष्ट एव। चाक्षुषाभावेऽन्धत्वे नेत्रद्वयविकारस्य प्रयोज्यतयान्वयः।

एवं नासिकयाऽघ्रातेत्यत्र नासिकाया विकारः घ्राणसन्निकर्षप्रयोजकनिर्गमप्रतिबन्धकः कफादिः क्वचित् घ्राणनाशश्च। तस्य प्रयोज्यत्वेन घ्राणजाभावे अघ्रातृत्वेऽन्वयः।

एवं जिह्वाया अरसयितेत्यत्र रसननिर्गमप्रतिबन्धको रोगादिः, क्वचित् रासननाशः क्वचित् स्वनाशश्च जिह्वाया विकारः। स च रासनाभावे अरसयितृत्वेऽन्वेति।

एवं "त्वचा अस्पृशक" इत्यत्र त्वचश्चर्मणो विकारः स्पर्शनेन्द्रियनिर्गमप्रतिबन्धको गजचर्मादिरोगः, क्वचित् स्पर्शननाशश्च। स च प्रयोज्यत्वेन स्पार्शनाभावेऽस्पृशकत्वेऽन्वेति।

एवं "श्रोत्रेण बधिर" इत्यत्र श्रोत्रं कर्णशष्कुली। तस्याः स्वावच्छिन्ने नभसि शब्दानुत्पादः पूर्वोक्त एव। स च रोगविशेषणादृष्टविशेषविरहेण वा यथायोग्यं प्रयुज्यत इति।

अवयवस्य नाशस्वरूपापचय इवोपचयोऽपि विकिरः। अत एव — "स बाल आसीद्वपुषा चतुर्भुजो मुखेन पूर्णेन्दुमुखस्त्रिलोचनः" इत्यत्र तृतीययोरुपचयोऽर्थः। स च प्रयोज्यत्वेन भुजचतुष्टयसंबन्धेऽन्वेति वपुःपदं पूर्वकायपरमिति वदन्ति।

तत्र जानुभ्यामूर्ध्वज्ञुः संज्ञुर्वेति उदरेण पिचण्डिल इति च प्रयोगेऽभ्युपगमवादः। तृतीयार्थोपचयस्यान्वयसंभवात्। यदि चोपचयोऽर्थो नाभ्युपेयते तदा चतुर्भुजशब्दस्य चतुःसंख्यकभुजसमवेतोऽर्थः। तत्र तृतीयार्थोऽभेदो वपुर्विशेषितोऽन्वेति। वर्णेन लोहित इतिवत्।

मुखविशेषितमाधेयत्वं तृतीयार्थो लोचनत्रयेऽन्वेति। अवयवस्याप्यवयविवृत्तित्वं वृक्षे शाखेति प्रतीतेः। 'वपुषा मुखेन' इत्युभयत्र तृतीया "प्रकृत्यादिभ्यः उपसंख्यानम्"[१] इति वार्तिकेन सिध्यति।

---

[१] वा. १४६६

भाट्टचिन्तामणौ[१]

"येनाङ्गविकारः"[२]। विकारयुक्ताङ्गवाचकपदसमभिव्याहृततृतीयायाः संबन्धोऽर्थः। यथा "अक्ष्णा काण" इत्यत्र अक्षिसबन्धिकाणत्वविशिष्ट इत्यर्थः। अत्र च अक्षिनिष्ठकाणत्वस्य परंपरासंबन्धेन चैत्रे प्रकारता इत्युक्तम्।

भाट्टरहस्ये[३]

एवं "येनाङ्गविकारः" इत्यनुशासनात् येनाङ्गेन विकृतेन अङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यादित्यर्थकात् "अक्ष्णा काण" इत्यादौ तृतीया। अत्र चाक्षिपदं चक्षुर्गोलकपरम्। वृत्तित्वं तृतीयार्थः। काणपदं चक्षुरुपघातवद्गोलकपरम्। चक्षुर्गोलकवृत्ति चक्षुरुपघातवद्गोलकवान् इति बोधः। तृतीयार्थवृत्तित्वस्य तेन संबन्धेन (स्वाश्रयचक्षुरुपघातवद्गोलकवत्कर्तृकत्वसंबन्धेन) भावनायामन्वय इति प्रत्यपादि।

इत्थंभूतलक्षणे[४] इति सूत्रार्थविचारः

अयं प्रकारः इत्थं, तं भूतः प्राप्तः इत्थंभूतः। "भू प्राप्तौ" इति चौरादिकात् "आधृषाद्वा" इति णिजभावे "गत्यर्थाकर्मक०"[५] इत्यादिना कर्तरि क्तः। लक्षणं ज्ञापकम्। प्रकारविशेषं प्राप्तस्य ज्ञापके संबन्धे द्योत्ये तृतीया स्यादित्यर्थः। जटाभिस्तापसः। तपः अस्यास्तीति तापसः। "तपस्सहस्राभ्यां विनीनी"[६] "अण् च"[७] इति मत्वर्थीयः अण्प्रत्ययः। तृतीयार्थः ज्ञापकत्वम्। तस्य तापसत्वे निरूपकतया अन्वयः। जटानिष्ठज्ञापकतानिरूपकतापसत्ववानित्यर्थः। जटाज्ञाप्यतापसत्ववानिति यावत्। न च ज्ञापने जटानां करणत्वादेव तृतीया सिद्धेति वाच्यम्। करणत्वाविवक्षायां लक्ष्यलक्षणभावस्य संबन्धत्वेन विवक्षायां तृतीयार्थं सूत्रारम्भात्। यद्वा ज्ञाप्यत्वं तृतीयार्थः। जटानिरूपितज्ञाप्यतावत्तापसत्ववानिति बोधः।

---

[१] पृ. ९९
[२] सू. २.३.२०
[३] पृ. ११३
[४] सू. २.३.२१
[५] सू. ३.४.७२
[६] सू. ५.२.१०२
[७] सू. ५.२.१०३

शब्दशक्तिप्रकाशिकायाम्[१]

जटाभिस्तापस इत्यादितः जटाविशिष्टस्तापस इत्याद्यनुभवेन विशेषणेऽनुशिष्ट-तृतीयायाः वैशिष्ट्यवाचकतायां पर्यवसानम्। वैशिष्ट्यं च नाधिकरणत्वं संबन्धिता-मात्रं वा। मेयत्वेन घटः इति प्रयोगापत्तेः। मेयत्वाधिकरणत्वस्य मेयत्वसंबन्ध-त्वस्य च घटे सत्त्वात्। किं तु अतद्व्यावृत्तत्वम्। तथा चाजटव्यावृत्तिमांस्तापस इति बोधः। अतद्व्यावृत्तत्वं तदभावाभाववत्त्वम्। जटाभावाभावांस्तापस इति वाक्यार्थः पर्यवसितः। प्रमेयत्वाभावस्याप्रसिद्ध्या न प्रमेयत्वेन घट इति प्रयोगा-पत्तिः।

इदं तु बोध्यम् — प्रकृत्यर्थस्य निरुक्तवैशिष्ट्यं यदि वर्तमानतया तृतीयया प्रत्याय्यते तददं जटादिकं विशेषणमिति व्यपदिश्यते। यदि चावर्तमानत्वेन प्रत्याय्यते तदोपलक्षणमिति कथ्यते। यथा "शिखया परिव्राजको वर्तते, गुरुणा टीका, कुरुणा क्षेत्रम्" इत्यादौ इति प्रतिपादितम्।

व्युत्पत्तिवादोक्तरीत्या इत्थंभूतलक्षणतृतीयार्थविचारः[२]

"इत्थंभूतलक्षणे"[३] इत्यनेन लक्षणवाचिपदात् तृतीयानुशिष्यते। लक्षणत्वं च व्यावर्तकत्वम्। विशेष्यवृत्तित्वे सति विशेष्यतावच्छेदकसमानाधिकरणाभाव-प्रतियोगित्वम्। "जटाभिस्तापस" इत्यादौ कस्मिंश्चित् तापसे जटाया अभावेन तापसत्वसमानाधिकरणाभावप्रदतियोगित्वं जटायामस्तीति तस्याः लक्षणत्वम्। लक्षणत्वस्य उक्तरूपत्वादेव प्रमेयत्वेन 'घट' इत्यादयो न प्रयोगाः। उक्तप्रति-योगित्वं वैशिष्ट्यं च तृतीयार्थः। उक्तप्रतियोगित्वस्य प्रकृत्यर्थे जटायामन्वयः। जटायाः वैशिष्ट्ये, वैशिष्ट्यस्य च तापसेऽन्वयः। एवं च तापसत्वसमानाधिकरणा-भावप्रतियोगिजटाविशिष्टस्तापस इति बोधः। एवं "दण्डेन पुरुष" इत्यादावपि बोध्यम्।

न चैवं "द्रव्यत्वेन गुणवान्" इत्यादौ गुणादिसमानाधिकरणाभावप्रतियोगि-त्वस्य द्रव्यत्वादावभावात् तृतीयाया अनुपपत्तिरिति वाच्यम्। तत्रोक्तसूत्रेण तृती-यायाः असंभवेऽपि ज्ञापकहेतौ तस्याः संभवात्।

उक्तलक्षणत्वाश्रयो धर्मो द्विविधः विशेषणमुपलक्षणं च। प्रतीतिकाले विद्यमानं सत् व्यावर्तकं विशेषणम्। यथा पुरूषादौ वर्तमानकालावच्छेदेन विद्यमानो

---

[१] पृ. ३६२

[२] व्यु.वा.पृ. २३३

[३] सू. २.३.२१

दण्डादिः। अविद्यमानं सत् व्यावर्तकमुपलक्षणम्, तापसादेः कालान्तरीयजटादिकम्। विशेषणस्य संबन्धो मतुबादिभिः प्रत्यय्यते, अस्मिन्नस्यास्तीत्यर्थे विहितानां तेषां वतमानसंबन्धार्थकत्वात्। अतो "जटाभिस्तापस" इत्यादौ अविद्यमानजटादेः संबन्धविवक्षया मतुबाद्यनवकाशात् तृतीयैव। तृतीयया विद्यमानत्वस्येवाविद्यमानत्वस्याप्यबोधनात्। तथा च संबन्धमात्रं तृतीयया प्रत्याय्यते, न तु तस्य विद्यमानत्वमविद्यमानत्वं वा। जटासंबन्धवांस्तापस इति बोधः। विशेषणवाचिपदादपि तृतीया यथा, ज्ञायमानत्वेन लिङ्गं करणमित्यादौ।

अथ तत्र ज्ञायमानत्ववैशिष्ट्यं तृतीयया लिङ्गादौ न प्रत्याय्यते। तथा सति करणत्वादौ ज्ञायमानत्वावच्छिन्नत्वालाभात्। अपि तु करणपदार्थैकदेशे करणत्वे ज्ञायमानत्ववैशिष्ट्यं भासते। ज्ञायमानत्वावच्छिन्नकरणत्ववत् लिङ्गमिति बोधः इति चेत् —

तथापि सा विशेषणतृतीयैव, अनुशासनान्तराभावात् इति भट्टाचार्याः। तत्र व्याख्याकारो लिखति — इदं तु न मनोरमम्। "प्रकृत्यादिभ्य उपसंख्यानम्"[१] इत्यस्य अवच्छिन्नत्वार्थे तृतीयाविधायकस्य वार्तिकस्य सत्त्वात्। कथमन्यथा घटत्वसमानाधिकरणाभावाप्रतियोगिद्रव्यत्ववाचकपदात् तृतीयोपपद्येत। अतः उक्तवार्तिकेन विधीयमानायाः तृतीयायाः प्रकृतेऽवच्छिन्नत्वमर्थः। तस्य विषयत्वेऽन्वयः। तथा च 'द्रव्यत्वावच्छिन्नविषयतावान् घट' इत्यन्वयबोधः। उक्तं च पदवाक्यरत्नाकरे —

> प्रकृत्यादिगणाज्ञाता तृतीया तु तदात्मताम्।
> अवच्छेदकतावृत्तिप्रकारत्वादि शंसति।। इति।

वस्तुतस्तु — ज्ञायमानत्वेन लिङ्गं करणमित्यादौ तृतीयार्थस्यावच्छिन्नत्वस्य करणशब्दार्थैकदेशकरणत्वेऽन्वयस्वीकारे एकदेशान्वयरूपः व्युत्पत्तिविरोधो भवति। अतः तृतीयार्थस्य वैशिष्ट्यस्य लिङ्गेऽन्वयः। करणपदार्थस्याभेदसम्बन्धेन तत्रैव अन्वयः। अभेदश्च प्रकृते करणत्वरूपः। प्रकारतावच्छेदकधर्मस्यैव प्रकारवृत्तित्वविशिष्टस्याभेदरूपत्वात्। तस्मिंश्चाभेदे ज्ञायमानत्वमवच्छिन्नत्वसंबन्धेन भासते। ज्ञायमानत्वस्य उद्देश्यतावच्छेदकत्वात् विधेयसंसर्गे उद्देश्यतावच्छेदकावच्छिन्नत्वभानस्यौत्सर्गिकत्वात्। तथा च ज्ञायमानत्वं संसर्गतावच्छेदकम्। ज्ञायमानत्वविशिष्टं लिङ्गं ज्ञायमानत्वावच्छिन्नकरणत्वसंबन्धेन करणविशिष्टमिति बोधः।

---

[१] वा. १४६६

पदवाक्यरत्नाकरीया रीतिः[१] प्रकृत्यादिभ्य उपसंख्यानमिति वार्तिकव्याख्यानावसरे प्रतिपादिता तत्रैव द्रष्टव्या।

विभक्त्यर्थनिर्णये[२] इत्थंभूतलक्षणतृतीयार्थविचारः

उपलक्षणे तृतीयां ज्ञापयति "इत्थंभूतलक्षणे"[३] इति सूत्रम्। अस्यार्थः — कंचित् प्रकारं प्राप्तः इत्थंभूतः। तस्य लक्षणम् इत्थंभूतलक्षणम्। तत्र तृतीयाविभक्तिर्भवतीति काशिका। प्रकारो द्विविधः विशेषणमुपलक्षणं च। स्वसमानकालिकबुद्धिप्रकारः विशेषणम्। स्वासमानकालिकबुद्धिप्रकारः उपलक्षणम्। यथा 'गुरुणा टीका, कुरुणा क्षेत्रम्' इत्यत्र कुरुर्गुरुः स्वं विशेष्यम्। स्वसमानकालिकत्वं प्रकारे अन्वेति। विशेष्यं यस्मिन् काले बुध्यते तस्मिन् काले विशेष्ये विद्यमानं विशेषणम्, तस्मिन् काले तत्राविद्यमानम् उपलक्षणम्। तथा चात्र विद्यमानकालनिष्ठस्य ध्वंसस्य कादाचित्काभावस्य वा प्रतियोगित्वं संबन्धश्च तृतीयार्थः। प्रतियोगित्वं प्रकृत्यर्थे विशेषणतया, संबन्धो विशेष्यतया अन्वेति। एवं च अविद्यमानस्य गुरोः टीका कुरोः क्षेत्रम् इत्यन्वयबोध इति केचित्।

अत एव इत्थंभूतेत्यत्र अतीतार्थको निष्ठाप्रत्ययोऽतीतस्य लक्षणे संबन्धे तृतीया भवतीति सूत्रार्थाभिप्रायेण प्रत्यक्षालोके — "अतीतार्थान्यप्रत्ययेन? असत्त्वबोधनात्" इति मिश्रैः एतन्मतोत्तम्भकतयोक्तम्।

अन्ये तु विद्यमानस्य उपरि भ्राम्यतः काकादेः उपलक्षणत्वम् इति अन्यथा विशेषणोपलक्षणलक्षणम्। तथा हि — यस्यां बुद्धौ यो यत्र प्रकारः स तत्र विशेषणम्। विशेषणोपस्थापकमविशेषणमुपलक्षणम्। यथा काकेनोपस्थापितः संस्थानविशेषः देवदत्तगृहे विशेषणीभूय भासते। तत्प्रतीतावुपलक्षणं काकः। एवं जटयोपस्थापितः विषयभोगाभावः तापसविशेषणम्। एवं च "काकेन देवदत्तगृहा" इत्यत्र काक-ज्ञानजन्यज्ञानविषयाः देवदत्तगृहा इति, "जटाभिस्तापस" इत्यत्र जटाज्ञानजन्य-ज्ञानविषयस्तापस इति चान्वयबोध इति वदन्ति।

तदत्र मते ज्ञानजन्यज्ञानं तृतीयार्थ इति। तत्र "प्रतियोगिना घटेनाभाव" इत्यत्र तृतीयानुपपत्तिः। प्रतियोगिनः अभावविशेषणानुपस्थापकत्वात्। तदुक्तं प्रत्यक्षमणौ — "प्रतियोगिना अभावे धर्मान्तरानुपनयनाच्च" इति।

---

[१] प.वा.र.पृ. ६८०

[२] पृ. २५०

[३] सू. २.३.२१

शिवादित्यमिश्रास्तु — साक्षात्संबद्धं विशेषणम्, परस्परासंबद्धमुपलक्षणम्। तदुक्तम् —

> व्यावर्तनीयमधितिष्ठति यद्धि साक्षात् एतद्विशेषणमतो विपरीतमन्यतत्।
> दण्डी पुमानिति विशेषणमत्र दण्डः पुंसो न जातिरनुदण्डमसौ च तस्य।।

इति। अनुदण्डं = दण्डमनुगता जातिः न पुंसो विशेषणम्। किं तु असौ जातिः तस्य दण्डस्य विशेषणमित्यर्थः। उपरिभ्रमत् काकादिकं परंपरासंबद्धमुपलक्षणमित्याहुः। तत्र "जटाभिस्तापसः, दण्डेन पुरुषः" इत्यत्र जटादण्डयोः साक्षात् संबद्धयोरुपलक्षणत्वानुपपत्तिः। अत एव मणौ "साक्षात्संबन्धेऽप्युपलक्षणत्वात्" इत्युक्तम्।

मणिकृदनुयायिनस्तु — विशेषणमुपलक्षणं चान्यादृशमेव। तथा हि — यत्रैकस्या व्यावृत्तेरनुयोगिता प्रतियोगिता च एकधर्मावच्छिन्ना तत्र व्यावृत्तेरनुयोगितावच्छेदकत्वेन प्रतियोगितावच्छेदकीभूताभावप्रतियोगित्वेन प्रतीयमानत्वं विशेषणपदप्रवृत्तिनिमित्तम्। यथा "दण्डी पुरुष" इति निश्चयानन्तरमदण्डपुरुषव्यावृत्तो "दण्डी पुरुष" इति निश्चयो जायते तत्र पुरुषत्वेनैकेन अवच्छिन्ना प्रतियोगिता अनुयोगिता च एकस्याः व्यावृत्तेः तदनुयोगिता दण्डेनाप्यवच्छिद्यते। तत्प्रतियोगितावच्छेदकीभूतदण्डाभावप्रतियोगित्वं च दण्डे प्रतीयते। अतः "दण्डी पुरुष" इत्यत्र दण्डः पुरुषविशेषणम्। यत्र तु प्रतियोगित्वानुयोगित्वयोर्नैकधर्मावच्छिन्नत्वं तत्र पद्मत्वावच्छेदेन कुसुमान्यपत्रादिव्यावृत्तेः प्रत्ययेऽपि कुसुमत्वं न विशेषणं पद्मस्येति।

इदं तु विशेषणत्वमेकधर्मविशिष्टेऽपरविशेषणस्य बोध्यम्। सामान्यतो विशेषणत्वं तु व्यावृत्यधिकरणतावच्छेदकतया व्यावृत्तिप्रतियोगितावच्छेदकीभूताभावप्रतियोगितया च प्रतीयमानत्वम्। यथा "दण्डी" इत्यत्र एकस्या एव व्यावृत्तेः प्रतियोगितावच्छेदकाभावप्रतियोगितया अधिकरणतावच्छेदकतया च दण्डो व्यावृत्तिबुद्धौ प्रतीयते। सामान्यतो विशेषणत्वमपि दण्डस्य "दण्डी पुरुष" इत्यत्र संभवति।

अत एव मणौ — " 'दण्डी पुरुष' इति ज्ञानानन्तरं दण्डवत्यदण्डव्यावृत्तिरवगम्यत इति प्रत्याय्यव्यावृत्त्यधिकरणता पुरुषस्य दण्डेनावच्छिद्यते, न पुरुषत्वेन, अतिव्याप्तेः" इत्युक्तम्।

सामान्यतो विशेषणत्वं व्यतिरेकिधर्ममात्रस्य संभवति। केवलान्वयिनि धर्मे व्यावृत्तेरप्रसिद्ध्या विशेषणत्वसामान्याभाव इति।

प्रतीयमानत्वगर्भं विशेषणत्वं व्यावृत्तेर्बुद्धौ न विषयः, किं तु तदनुव्यवसायादौ। "काकवन्तो देवदत्तगृहा" इत्यत्र देवदत्तस्वत्वशून्यगृहव्यावृत्तिः संस्थानविशेषवत्त्वावच्छेदेन प्रतीयते न तु काकवत्त्वं तदवच्छेदकम्। तदसत्त्वकालेऽपि दर्शितव्यावृत्तेः प्रतीतेश्च सत्त्वात् न्यूनवृत्तित्वादिति काको न विशेषणम्, अपि तु व्यावृत्तिबुद्धिप्रकारतया व्यावृत्त्यवच्छेदकोपस्थापकतया वा व्यावर्तकतया उपलक्षणम्। तथा च व्यावृत्त्यधिकरणतावच्छेदकत्वे सति व्यावर्तकमुपलक्षणम्। अत एव मणौ — "प्रत्याय्यव्यावृत्यधिकरणतावच्छेदकत्वे सति व्यावर्तकं विशेषणम्। तदन्यत् व्यावर्तकमुपलक्षणम्" इत्युक्तम्।

व्यावृत्त्यधिकरणताया अवच्छेदकत्वं स्वरूपसंबन्धविशेषः। अत एव "तदवच्छेदकत्वं संयोगादाविव तेन समं स्वरूपसंबन्धविशेषः" इति मिश्रैरुक्तम्। व्यावर्तकत्वं व्यावृत्तिबुद्धिप्रयोजकबुद्धिविषयत्वं, व्यावृत्त्यबोधकालेऽपि विशेषणत्वबुद्धिप्रसङ्गवारणार्थमुपात्तम्। अत एव मणौ — "व्यावृत्त्युल्लेखानन्तरमेव विशेषणत्वबुद्धिः" इत्युक्तम्।

न च व्यावृत्तेरबोधकाले तदवच्छेदकत्वाग्रहसंभवेनैव विशेषणत्वबुद्धेर्न प्रसङ्ग इति वाच्यम्। शब्दादिना तदवच्छेदकत्वग्रहसंभवात्। अत एव — "अदण्डव्यावृत्यधिकरणतावच्छेदको दण्ड इति शब्दादवगमेऽपि तद्वत्यदण्डव्यावृत्त्यप्रतीतेः सर्वसिद्धत्वात् इन्द्रियासंनिकर्षादिना प्रत्यक्षादिसामग्र्यभावात्" इति मिश्रैरुक्तम्।

एवमीदृशविशेषणत्वाभाववत् व्यावर्तकमुपलक्षणम् वस्तुसत्युपलक्षणे प्रातिपदिकेन उपस्थापिते संबन्धमात्रं तृतीयार्थः। "काकेन देवदत्तगृहा" इत्यत्र काकसंबन्धिनो देवदत्तगृहा इत्यन्वयबोधः। प्रमेयत्वादेरव्यावर्तकत्वात् उपलक्षणत्वमपि न संभवतीति प्रमेयत्वेन घट इति न प्रयोगः। अत एव प्रकारो द्विविध इत्यत्र प्रकारपदं व्यावर्तकपरतया मिश्रैर्व्याख्यातम्।

यत्तु — "पशुना रुद्रं यजेत" इत्यत्र पशुगतमेकत्वं विशेषणम्। ग्रहं संमर्ष्टीत्यत्र ग्रहगतमेकत्वमुपलक्षणमिति छान्दसानां व्यवहारः। स च विशिष्टान्वयनिबन्धनः। "पशुना यजेत" इत्यादौ तृतीयार्थकर्मत्वे पशोरेकत्वविशिष्टस्यान्वयः। यथा चैकत्ववैशिष्ठ्यं पशौ तथोपपादितं वचनार्थविवरणे। 'ग्रहम्' इत्यादौ एकत्वविशिष्टस्य ग्रहस्य संमार्गकर्मत्वेनान्वय इति विशिष्टान्वये पशोः एकत्वावच्छिन्नप्रतियोगताकः संसर्गो भासत इत्येकः पक्षः। एकत्वे पशौ च प्रकारता पर्याप्तेति द्वितीयः। एकत्वावच्छिन्ना पशुप्रकारता अथ वा पशुविशेष्यतया कर्मतादिविशेष्यतया च साक्षात्परंपरासंबन्धद्वयावच्छिन्नमेकमेवैकत्वप्रकारत्वं निरूप्यत इति तृतीयः। तथा चेदृशविशिष्टविषयतामापन्नः विशेषणमनापन्नः उपलक्षणम्।

अत एव मणौ — "उद्देश्यान्वयप्रतियोगी धर्मो विशेषणं, तदन्यदुपलक्षणम्" इति सिद्धान्तपर्यवसानम्।

"काकवन्तो देवदत्तगृहाः" इत्यत्र उद्देश्यायाः देवदत्तस्वत्वशून्यगृहव्यावृत्तेरन्वयितावच्छेदकत्वं काकस्य न संभवतीति काको न विशेषणम्।

यदि चाकाकव्यावृत्तिरुद्देश्या तदा विशेषणमेव। एवं 'ग्रहम्' इत्यादौ एकत्वविशिष्टग्रहकर्मत्वस्य संसर्गे अन्वयो नोद्देश्यः। किं तु प्रस्तुतसकलग्रहकर्मत्वस्येति एकत्वं न विशेषणम्।

एवमुक्तविशेषणत्वं क्वचित् प्रमेयत्वस्यापि। प्रमेय इति 'प्रमेयं जानाति' इत्यत्र प्रमेयत्वविशिष्टकर्मत्वस्य ज्ञानेऽन्वयात्। अन्यथा प्रमेय इति ज्ञानाभेदान्वयानुपपत्तेः। अत एव — "न हि प्रमेयत्वविशिष्टं प्रमेयपदशक्यमित्यत्र प्रमेयत्वं न विशेषणम्। प्रमेयत्वस्याशक्यत्वापत्तेः" इति मिश्रैरुक्तम्।

यदा दण्डविशिष्टपुरुषस्यान्वयो न विवक्षितः तदा दण्डो न विशेषणं, किं तूपलक्षणम्। अत एव "दण्डेन पुरुषमानय" इत्यादिः प्रयोग इतीदृशोपलक्षणे वस्तुभूते प्रकृत्यर्थे सति संबन्धमात्रार्थिका तृतीया भवतीत्याहुः।

ननु तृतीयायाः संबन्धमात्रार्थकत्वे प्रमेयत्वेन द्रव्यत्वेन वा पुरुषमानयेत्यादिकः कुतो न प्रयोग इति चेत् —

न। स एव हि संबन्धस्तृतीयार्थः य उद्देश्यान्वयप्रतियोगी भवति। अन्यथा उपलक्षणतृतीयान्तप्रयोगस्य वैयर्थ्यापत्तेः। प्रमेयत्वादेस्तु न तादृशः संबन्धः पुरुषादाविति तत्र प्रमेयत्वादिकं नोपलक्षणम्।

"काकेन देवदत्तगृहा" इत्यत्र काकस्य स्वप्रयोज्यसंस्थानविशेषः उत्तृणत्वं संबन्धस्तृतीयार्थः। तस्य देवदत्तस्वत्वशून्यगृहव्यावृत्तेरुद्देश्यायाः अन्वयितावच्छेदकत्वात्। अत एव — "काकपदेन उपस्थाप्यः काक एव। तत्संबन्धस्तु मतुपा बोधितः काककारितसंस्थापनविशेषः" इति मिश्रैः उक्तम्।

"जटाभिस्तापस" इत्यत्र जटानां स्वप्रयोजककेशासंयमप्रयोजकव्रतवत्त्वं संबन्धस्तृतीयार्थः। केशासंयमप्रयोजकत्वं तु केशसंयमस्य निषिद्धतया केशसंयमेन कर्तव्यजपादिकर्मणः कालातिपातशङ्कया। यदि च संयतकेशोऽपि तापसः, तदा केशसंयमादिः तस्य न कर्तव्यजपादिविरोधीति तदा स्वप्रयोजकीभूताभावप्रतियोगिकेशसंयमाप्रयोजितावैगुण्यव्रतं संबन्धस्तृतीयार्थः। अवैगुण्यम् अनिषिद्धत्वं, कर्तव्यजपादिलोपविरहो वा। केशसंयमप्रयुक्तजपादिलोपस्य विषयासक्ते केशिनि

संभवान्नाप्रसिद्धिः। केशसंयमप्रयुक्तजपादिलोपविरहस्य संयतासंयतकेशयोर्व्रते समानत्वादिति दर्शितव्रतत्वमेव तापसव्यावृत्तेरुद्देश्यायाः अन्वयितावच्छेदकम्। तस्य जटायाः सत्त्वासत्त्वदशायामप्यविकलत्वात्। अत एव संस्थानविशेषवत्त्वादिनेति मूले व्रतविशेषत्वादिरादिपदार्थ इति दर्पणे ठक्कुराः। व्रते विशेषः जटासंबन्धतावच्छेदको दर्शित एव।

"गुरुणा टीका" इत्यत्र विवरणवाक्यं टीकाशब्दार्थः। गुरुप्रयोजिता तत्सजातीया वा आनुपूर्वी संबन्धः तृतीयार्थः। स च टीकान्तरव्यावृत्तेः उद्देश्यायाः अन्वयितावच्छेदकः भवत्येवेति।

"कुरुणा क्षेत्रम्" इत्यत्र कुरोः स्वकृष्टक्षेत्रपरमाणुभिरारभ्यत्वं संबन्धः तृतीयार्थः। स च क्षेत्रान्तरव्यावृत्तेः उद्देश्यायाः अन्वयितावच्छेदको भवत्येव।

"दण्डेन पुरुषमानय" इत्यत्र दण्डस्य स्वसंयोगप्रागभावनाशः संबन्धस्तृतीयार्थः। स च दण्डसत्त्वासत्त्वदशायामप्यविकल इति गृहीतदण्डपुरुषव्यावृत्तेरुद्देश्यायाः अन्वयितावच्छेदको भवत्येव।

न चात्रोपलक्षणतृतीयाया अत्यन्ताभावः संबन्धश्चार्थः। तथा च पुरुषेऽदण्डात्यन्ताभावः दण्डसंबन्धश्च प्रतीयत इति वाच्यम्। दर्शितवाक्यानन्तरं दण्डसहितपुरुषानयने दर्शितवाक्यस्याप्रामाण्यप्रसङ्गात्। पुरुषे दण्डादण्डात्यन्ताभावसत्त्वात्। "जटाभिस्तापस" इत्यत्र जटाया विद्यमानतया तदत्यन्ताभावस्य तापसे बोधयितुमशक्यत्वाच्च। एवं काशिकायामुदाहृतमपि भवान् कमण्डलुना छात्रमद्राक्षीत्, छात्रेणोपाध्यायं, भिक्षया परिव्राजकम् इति। तत्राध्ययनशीलः छात्रपदार्थः। कमण्डलोः स्वप्रयोज्याचमनसजातीयमध्ययनपूर्वाङ्गाचमनं संबन्धस्तृतीयार्थः। "पीत्वापोऽध्येष्यमाणश्च" इति स्मृतेराचमनमध्ययनपूर्वाङ्गं भवति। तथाविधाचमनम् अच्छात्रव्यावृत्तेरन्वयितावच्छेदकं भवत्येव। न हि संबन्धस्य तृतीयार्थावच्छेदकरूपेणैवान्वयितावच्छेदकत्वम्। किं तु यदेव लघुभूतमनतिप्रसक्तं तेन रूपेण। अत एव काकप्रयोज्योत्तृणत्वत्वेन उत्तृणत्वस्य तृतीयार्थत्वेऽप्युत्तृणत्वत्वेनैवान्वयितावच्छेदकत्वम्। छात्रस्य स्वाध्ययनप्रयोजकमध्यापनं संबन्धस्तृतीयार्थः। अध्यापनं वाक्यविशेषः। उपाध्यायोऽध्यापनयोग्यः। योग्यत्वं तु अध्यापनवाक्यतदर्थगोचरदृढसंस्कारवत्त्वे सति वक्तृत्वम्। वक्तृत्वोपादानात् अवगतशास्त्रार्थस्य मूकस्य व्युदासः। एवमध्यापनमुपाध्यायान्यव्यावृत्तेरन्वयितावच्छेदकं भवत्येव।

शिखायास्तत्संयोगस्य वा विहितो ध्वंसः संबन्धस्तृतीयार्थः। विहितशिखाध्वंसः परिव्राजकात् चतुर्थाश्रमिणोऽन्यस्य व्यावृत्तेरन्वयितावच्छेदको भवति। विहितत्वो-पादानात् यवने शिखाध्वंसस्य सत्त्वेऽपि नावच्छेदकत्वहानिः।

यदि च सौगतपरिव्राजको लक्ष्यः तदा विहितभिक्षाशीलः परिव्राजकशब्दार्थः। विहितत्वं तु कालान्तरभाविफलसाधनताबोधकविधिवाक्यविषयत्वम्। तादृशविधि-वाक्यं वेदः सौगतागमश्च। तथा सति विहितशिखाध्वंसः सशिखस्य विहितभिक्षा-शीलस्य ब्रह्मचर्यादेर्व्यावृत्तेरन्वयितावच्छेदको भवतीति प्राचीनमतानुसारी पन्थाः।

नवीनमतम्

वस्तुतस्तु गुरुणा कुरुणा शिखयेत्यत्र दर्शित एवार्थः। "काकेन देवदत्तगृहा" इत्यत्र समासेन गृहे देवदत्तस्वत्वस्य बोधने तच्छून्यगृहव्यावृत्तिप्रतीतेः तत एव संभवात् तृतीयान्तस्य वैयर्थ्यमेव। "काकेन गृहा देवदत्तस्य" इत्यत्र काकस्य गृहे अन्तःप्रवेशप्रागभावनाशः संबन्धः तृतीयार्थः। स च काके प्रविष्टेऽन्यत्र गते चा-विकल इति अन्तरप्रविष्टकाकस्य गृहस्य व्यावृत्तेरन्वयितावच्छेदको भवति। सा व्यावृत्तिः समनियताभावानामैक्ये स्वरूपभेदेऽपि लिङ्गतया देवदत्तस्वत्वशून्य-गृहव्यावृत्तिं गमयति।

"कमण्डलुना जटाभिः" इत्यत्र स्वसंयोगप्रागभावनाशः संबन्धः तृतीयार्थः। स च तयोः सत्त्वासत्त्वदशायामविकल इति अधृतकमण्डलोश्छात्रस्य अधृतजटस्य तापसस्य व्यावृत्तेर्यथायोग्यमन्वयितावच्छेदको भवति। अत एव "इह न भवति कमण्डलुपाणिश्छात्र इति लक्षणस्य समासान्तर्भूतत्वात्" इति काशिका समासे तृतीयानिषेधिका संगच्छते। लक्षणं संबन्धः। स च नाचमनरूपः पाणौ कमण्डलोः संभवतीति न समासेन बोधयितुं शक्य इति तृतीयानिषेधानुपपत्तिः। दर्शितसंबन्धस्तु कमण्डलोः पाणौ संभवतीति समासेन बोधित इति तृतीया-निषेधोपपत्तिः, उक्तार्थानामप्रयोग इति न्यायादिति।

"छात्रेण" इत्यत्र छात्रस्य स्वाध्ययने छात्रप्रयोज्यनिवासप्रागभावनाशाधि-करणदेशाधिष्ठातृत्वमुपाध्याये संबन्धस्तृतीयार्थः। स च छात्रनिवाससत्त्वासत्त्व-दशायामविकल इति अच्छात्रस्य छात्रकृतनिवासदेशाधिष्ठातुरुपाध्यायस्य व्यावृत्ते-रन्वयितावच्छेदको भवति। एवमनया रीत्या अन्यत्रापि सुधीभिरूह्यः संबन्ध इति।

वैशिष्ट्यस्य तृतीयार्थत्वखण्डनम्

यत्तु वैशिष्ट्यं तृतीयार्थः। यस्य वैशिष्ट्यं विद्यमानतया प्रतीयते तद्विशेषणम्, यस्य अविद्यमानतया तत्तूपलक्षणमिति।

तन्न। अविद्यमानस्य वैशिष्ट्यस्य तृतीयासहस्रेणापि बोधयितुमशक्यत्वात्, योग्यताविरहात्। "श्यामेन घट" इत्यत्र वैशिष्ट्यस्य समवायस्य रक्ततादशायामपि विद्यमानत्वात् श्यामस्योपलक्षणत्वानुपपत्तेः। "जटाभिस्तापस" इत्यत्र तत्संबन्धस्य विद्यमानत्वात् उपलक्षणत्वानुपपत्तेः।

संबन्धमात्रस्य तृतीयार्थत्वखण्डनम्

यदपि संबन्धमात्रं तृतीयार्थः। संबन्धो यस्य विद्यमानस्य प्रतीयते तद्विशेषणम्। यस्याविद्यमानस्य तत्र मतुबादेः बाधात् तृतीयैवेति तदुपलक्षणमिति।

तदपि न सुन्दरम्। घटो विनाशीत्यत्र अविद्यमानस्य नाशस्य इन्प्रत्ययेन संबन्धबोधनात्। न चात्र प्रत्ययः साधुत्वार्थः, धात्वर्थो नाशः जानातीत्यादाविव प्रथमान्तार्थे साक्षादेवान्वेतीति वाच्यम्। तथा सति विनाशी न स्थास्यति इत्यत्रान्वयबोधानुपपत्तेः। भाविस्थितिकर्तृत्वाभावस्य विनाशे बोधयितुमशक्यत्वात्।

किं च "उत्पत्तिकालिको घटो गन्धवान्" इत्यत्र अविद्यमानस्य गन्धस्य संबन्धो मतुपा बोध्यते, तदनुपपत्तिः। "जटाभिस्तापस" इत्यत्र विद्यमानाया जटायाः तृतीयया संबन्धबोधने उपलक्षणत्वानुपपत्तिश्च।

"श्यामेन घट" इत्यत्र श्यामस्य स्वप्रागभावनाशः संबन्धः। स चाजातश्यामघटव्यावृत्तेरन्वयितावच्छेदको भवति।

"घटेनाभाव" इत्यत्र घटस्य स्वप्रतियोगितानिरूपितानुयोगित्वं संबन्धः तृतीयार्थः। स च घटप्रतियोगिकाभावव्यावृत्तेरन्वयितावच्छेदको भवति। न चात्र दर्शितसंबन्धेन घट एवान्वयितावच्छेदकोऽस्त्विति वाच्यम्। घटस्यातीतत्वेऽपि व्यावृत्तिबुद्धेः उदयादिति।

कलक्कणितगर्भेण कण्ठेनाघूर्णितेक्षणः।
पारावतः परिक्रम्य रिरंसुश्चुम्बति प्रियाम्।।

इत्यत्र तृतीयार्थ आधेयत्वम्। तथाविधकण्ठे समवेते पारावते परिभ्रमणोत्तरप्रियाचुम्बनकर्तृत्वान्वय इति आधेयत्वे तृतीया "प्रकृत्यादिभ्यः" इति वार्तिकसिद्धेति।

भाट्टचिन्तामणौ[१] इत्थंभूतलक्षणतृतीयार्थविचारः

इत्थंभूतलक्षणं ज्ञापकत्वम्। "जटाभिस्तापस" इत्यत्र जटाज्ञाप्यतपोवानित्यर्थः। अत्र ज्ञाप्यत्वस्य तपोविशेष्टेऽन्वयः। अन्यथा एकदेशान्वयापत्तेः इत्युक्तम्।

---

[१] पृ. ९९

भाट्टरहस्ये च[१]

"इत्थंभूतलक्षणे"[२] इत्यनुशासनात् "जटाभिस्तापस" इत्यादौ तृतीया। अत्र लक्षणवत्त्वापरपर्यायं ज्ञाप्यत्वं तृतीयार्थः। जटाज्ञाप्यतापसत्ववानित्यर्थः। लक्षणत्वं च विशेषणोपलक्षणसाधारणम्। तेन शमेन तापस इत्यपि साधुः — इत्युक्तम्।

संज्ञोऽन्यतरस्यां कर्मणि[३] इति सूत्रार्थः

संपूर्वस्य जानातेः कर्मणि तृतीया वा स्यात्। पित्रा पितरं वा संजानीते। पितृविषयकसमीचीनज्ञानवानित्यर्थः। द्वितीयापवादोऽयं तृतीयाविकल्पः। "संप्रतिभ्यामनाध्याने"[४] इत्यात्मनेपदम्। कृद्योगे तु परत्वात् "कर्तृकर्मणोः कृति"[५] इति षष्ठी। पितुः संज्ञाता। कर्मत्वशक्तिः तृतीयार्थ इति नागेशः।

भाट्टचिन्तामणौ[६]

संपूर्वस्य ज्ञाधातोः कर्मणि तृतीया द्वितीया वा स्तः। मात्रा मातरं वा संजानीते। मातृविषयकपूज्यत्वादिप्रकारकज्ञानवानित्यर्थः। तत्र मातृपदार्थस्य पूज्यत्वप्रकारकज्ञानक्रियायामन्वयात् पूज्यत्वरूपक्रियान्वय आर्थिकः। फलजनकज्ञानान्वयो वा तेनात्रोपपदविभक्तित्वम्। भाट्टरहस्ये कौमुदीस्था वृत्तिरेव दृश्यते।

हेतौ[७] इति सूत्रव्याख्यानम्

हेतुरूपेऽर्थे तृतीया स्यात्। हेतुरिह कारणपर्यायो लौकिक एव विवक्षितः, न तु "तत्प्रयोजको हेतुश्च" इति कृत्रिमः। तस्य चकारेण कर्तृसंज्ञाया अपि सत्त्वेन कर्तृतृतीययैव सिद्धेः। न च हेतोरपि करणत्वादेव तृतीया सिद्धेति वाच्यम्। हेतुत्वकरणत्वयोर्भेदात्। तथा हि — द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वम्। आदिना गुणक्रिययोः संग्रहः। द्रव्यं गुणं क्रियां च प्रति यज्जनकं तत्र सर्वत्र विद्यमानं हेतुत्वम्। तथा निर्व्यापारसाधारणं द्वारीभूतव्यापारवति तद्रहिते च विद्यमानमित्यर्थः। एवं च द्रव्यगुणक्रियान्यतमनिरूपितं निर्व्यापारसव्यापारवृत्ति च जनकत्वं हेतुत्वमिति फलितम्। "दण्डेन घटः। पुण्येन दृष्टो हरिः। पुण्येन

---

[१] पृ. ११३
[२] सू. २.३.२१
[३] सू. २.३.२२
[४] सू. १.३.४३
[५] सू. २.३.६५
[६] पृ. ९९
[७] सू. २.३.२३

ब्रह्मवर्चसम्'' इति क्रमेणोदाहरणानि। ''दण्डेन घट'' इत्यस्य दण्डहेतुको घट इत्यर्थः। दण्डे व्यापारसत्त्वेऽपि क्रियाजनकत्वाभावान्न करणत्वम्। पुण्येन दृष्टो हरिः। पुण्यहेतुकं हरिकर्मकं दर्शनमित्यर्थः। यागादिना स्वर्गादिफले जननीये यत् अवान्तरव्यापारभूतमपूर्वं तत् पुण्यमित्युच्यते। तस्य हरिदर्शनजनकत्वेऽपि निर्व्यापारत्वान्न करणत्वम्। एवं ''पुण्येन ब्रह्मवर्चसम्'' इत्यत्रापि बोध्यम्।

करणत्वं तु क्रियाजनकमात्रवृत्ति सव्यापारमात्रवृत्ति च यत् जनकत्वं तद्रूपम्। उदाहरणं तु ''कर्तृकरणयोस्तृतीया'' इति सूत्रव्याख्यानावसरे प्रदर्शितम्। तदुक्तम् —

द्रव्यादिविषयो हेतुः करणं नियतक्रियम्।
अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते।।

फलमप्यत्र हेतुशब्देन गृह्यते। अध्ययनेन वसति। अध्ययनं यद्यपि वासफलम्। तथापि तत् स्वज्ञानद्वारा स्वहेतुं वासं प्रयोजयतीति तस्य हेतुत्वम्। एवं च तदर्थत्वेन विवक्षायां चतुर्थी हेतुत्वेन विवक्षायां तृतीया।

गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका। अलं श्रमेण। श्रमेण साध्यं नास्तीत्यर्थः। इह साधनक्रियां प्रति श्रमः करणम्। साधनमुत्पादनम्। ''शतेन शतेन वत्सान् पाययति पयः''। शतेन परिच्छिद्येत्यर्थः।

अशिष्टव्यवहार इति वार्तिकार्थः

अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया। ''दास्या संयच्छते कामुकः'' दास्यै कामुकः प्रयच्छतीत्यर्थः। धर्म्ये तु व्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया न। भार्यायै संयच्छति। 'दास्या संयच्छत' इत्यत्र ''दाणश्च सा चेच्चतुर्थ्यर्थे''[१] इत्यात्मनेपदम्।

अत्र शेखरकाराः[२]

अशिष्टानां संकीर्णाचाराणां यो व्यवहारः क्रिया तद्बोधकपदप्रयोगे, प्रत्यासत्त्या यत्संबन्धेन व्यवहारस्य संकीर्णाचारत्वं तद्वाचकात् चतुर्थ्यर्थे तृतीयेत्यर्थः। दास्या संयच्छत इति। दासीसंप्रदानकं रतिफलकं दानम् इति बोधः इति प्राहुः।

तद्व्याख्यायां चन्द्रकलायां — अशिष्टव्यवहारेत्यत्र कर्मधारयभ्रमनिवारणायाह — अशिष्टानामिति। अशिष्टपदमत्र शिष्टभिन्नपरम्। श्रुतिस्मृत्यादिप्रामाण्याभ्युपगन्तॄणामपि रागौत्कट्यात् तादृशव्यवहारस्थले ''दास्या संयच्छत'' इति

---

[१] सू. १.३.५५
[२] ल.श.शे.पृ. ६६९

प्रयोगदर्शनात्। अत आह — संकीर्णाचाराणामिति। कालभेदेन धर्माधर्मफलकाचारवतामित्यर्थः। या तु भार्या शास्त्रोक्तरीत्या विवाहिता तस्यै दानानन्तरं यत्र तत्प्रतीत्यनन्तरं तस्या उपयोगस्तत्र न चतुर्थ्यर्थे तृतीया। अशिष्टव्यवहाराभावादिति न तत्रात्मनेपदम्।

मनोरमाशब्दरत्नयोः — फलं फलत्वेन तृतीयार्थ इत्येके। हेतुत्वेनैवेत्यन्ये। आद्यमते तृतीयार्थः फलत्वेन फलम्। तत्र प्रकृत्यर्थस्याभेदेनान्वयः। फलस्य जनकतासंबन्धेन वासेऽन्वयः। अध्ययनाभिन्नफलजनको वास इति बोधः। अन्यमते तु फलस्य स्वज्ञानद्वारा वासादिहेतुत्वविवक्षा यत्र तत्र अध्ययनेन वसतीति प्रयोगात् अध्ययनस्य हेतुरूपतृतीयार्थेऽभेदेनान्वयः। तृतीयार्थस्य जन्यतासंबन्धेन वासेऽन्वयः। अध्ययनाभिन्नहेतुजन्यो वासः इति बोधः।

.तादर्थ्ये चतुर्थ्यामपि पक्षद्वयम्। उपकारकत्वं चतुर्थ्यर्थः। तत्र प्रकृत्यर्थस्य स्वनिष्ठोपकार्यतानिरूपकत्वसंबन्धेनान्वयः। प्रत्ययार्थस्य तु आश्रयतया वासेऽन्वयः। अध्ययननिष्ठोपकार्यतानिरूपितोपकारकताश्रयो वासः इति बोध इति कश्चित् पक्षः। उपकार्यश्चतुर्थ्यर्थः। तत्र प्रकृत्यर्थस्याभेदेनान्वयः। उपकार्यस्य च स्वनिष्ठोपकार्यतानिरूपितोपकारकत्वेन वासेऽन्वयः। अध्ययनाभिन्नोपकार्यनिष्ठोपकार्यतानिरूपितोपकारकतावान् वास इति बोध इत्यन्यः पक्षः।

ननु "अलं श्रमेण" इत्यत्र क्रियावाचकपदाप्रयोगात् कथं कारकविभक्तिः। यदि तु तद्विनापि कारकविभक्तिः तदर्थस्य यत्र कुत्रचिदन्वयः तदा कारकाणां क्रियामात्रान्वयित्वमिति नियमभङ्ग इत्याशङ्क्य गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका न तु श्रूयमाणैवेत्याग्रहः। अतः गम्यमानां साधनक्रियां प्रति हेतुत्वात् श्रमस्य तद्वाचिपदोत्तरं तृतीयेत्युक्तम्।

अत्र प्राञ्चः — अलंशब्दो निषेधार्थकः। "अलं भोजनेन" इत्यादौ तथा दर्शनात्। निषेधस्य प्रतियोगिसाकाङ्क्षत्वात् प्रतियोगिवाचकं पदं स्मर्यते। तच्च योग्यत्वात् इह साध्यमिति। तदर्थान्वयित्वेन श्रमेणेति तृतीया। न चाध्याह्रियमाणं यत् साध्यमिति तस्य नामत्वात् तदर्थो न क्रियेति कथं तत्र तृतीयान्तार्थान्वय इति वाच्यम्। विशिष्टार्थस्याक्रियत्वेऽपि तद्घटककृत्प्रकृत्यर्थस्य साध्यत्वेन प्रतीयमानस्य क्रियात्वात् तस्यां करणकारकान्वये बाधकाभावात्। गम्यमानेत्यस्य स्मर्यमाणपदजन्यबोधविषयेत्यर्थ इति।

वस्तुत इदं न युक्तम्। साध्यमिति पदं स्मृतिविषयो वा मानसज्ञानविषयो वा, भवतूभयथापि तस्यानुच्चारितत्वात् नास्ति प्रत्यायकता। "उच्चारितः शब्दः प्रत्यायको नानुच्चारित" इति भाष्योक्तेः। तस्मात् यथा पदार्थे पदशक्तिग्रहकाले पदैक-

देशस्यापि शक्तिग्रह इति पदैकदेशादपि तस्यार्थस्योपस्थितिः सत्या, भामा, भीमादिभ्यो यथा, तथा वाक्यार्थे वाक्यैकदेशपदस्यापि शक्तिग्रह इति तस्मात् वाक्यार्थस्योपस्थितिः। एवं च श्रमेण साध्यमिति वाक्यार्थे श्रमेणेत्यस्य शक्तिरिति श्रमेणेत्येतत्पदजन्यबोधविषयक्रियायां करणत्वात् तृतीयेत्याहुः भैरवमिश्राः।[१]

एवं सति क्रियायाः श्रूयमाणपदजन्यबोधविषयत्वमेवायातम् इति "न तु श्रूयमाण" इत्येतन्न युक्तमिति शङ्कायां न तु श्रूयमाणेत्यस्य न तु श्रूयमाणस्वमात्रवाचकपदजन्यबोधविषयेत्यर्थ इति शब्दरत्ने व्याख्यातम्। शेखरेऽपि स्पष्टमेतत्।

"इग्यणः संप्रसारणम्"[२] इति सूत्रभाष्येऽपि स्पष्टमेतत्। तत्र हि — वाक्यस्य संप्रसारणसंज्ञायां "संप्रसारणाच्च"[३] इत्यादावनुवादप्रदेशे वाक्यात् परत्वस्यानुपपत्तिप्रसक्त्या संप्रसारणात् जातं संप्रसारणपदेन गृह्यत इत्युक्तम्।

बृहन्मञ्जूषायाम्[४] हेताविति सूत्रव्याख्यानम्

हेताविति सूत्रव्याख्यानावसरे "दण्डेन घट" इत्यादौ हेतुस्तृतीयार्थः। हेतुत्वं चानन्यथासिद्धनियतपूर्ववर्तित्वादिरूपं कारणत्वमेव, तत्समानाधिकरणोऽखण्डोपाधिर्वा। प्रकृत्यर्थस्य प्रत्ययार्थे हेतावभेदसंबन्धेनान्वयः। प्रत्ययार्थस्य जन्यतासंबन्धेन घटेऽन्वयः। एवं च दण्डाभिन्नहेतुजन्यो घट इत्यन्वय बोध इत्युक्तम्।

शब्दशक्तिप्रकाशिकानुसारेण हेतुतृतीयार्थविचारः[५]

"धनेन कुलम्" "दण्डेन घट" इत्यादौ व्यापारगर्भस्य करणत्वस्याप्रतीतावपि हेतुत्वप्रतीतेः, "अभिघातेन क्रिया" इत्यादौ व्यापाराभावेन करणत्वस्य बाधाच्च तत्र जनकत्वरूपं हेतुत्वमेव तृतीयार्थः। तस्य निरूपकतासंबन्धेन कुलादावन्वयः। धननिष्ठहेतुतानिरूपकं कुलम्, दण्डनिष्ठहेतुतानिरूपको घट इत्याकारको बोधः।

निरूपकत्वस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वेन तत्संबन्धावच्छिन्नप्रतियोगिताकाभावः नञ्समभिव्याहारस्थले "दण्डेन घटः, न तन्तुना" इत्यादौ बोधयितुं न शक्य इति यद्यालोच्यते तदा जन्यत्वं तृतीयार्थोऽस्तु। दण्डनिरूपितजन्यतावान् तन्तुनिरूपितजन्यत्वाभाववांश्च घट इति बोधः।

---

[१] प्रौ. म.श.व्या.पृ. ९०२
[२] सू. १.१.४५
[३] सू. ६.१.१०८
[४] पृ. १७१
[५] श.श.प्र.पृ. ३६७-३७०

परं तु "धूमेन वह्निः, अणुत्वेन द्रव्यत्वम्" इत्यादौ वह्नेः धूमाजन्यत्वेन, द्रव्यत्वस्याणुत्वाजन्यत्वेन च तत्र जनकत्वं जन्यत्वं वा न तृतीयार्थः अपि तु अगत्या तत्र ज्ञापकत्वलक्षणं हेतुत्वमेव तृतीयार्थः। तेन धूमनिष्ठं यत् ज्ञापकत्वं तद्वान् वह्निरित्याकारकस्तत्र बोधः। तद्वत्त्वं च स्वनिरूपकानुमितिविषयत्व-संबन्धेन। न च धूमादेः वह्न्यादिज्ञानजनकत्वं बाधितम्, लिङ्गस्यानुमिता-वहेतुत्वादिति वाच्यम्। तत्र धूमादिपदस्य धूमादिविषयकज्ञानलाक्षणिकत्वात्, तृतीयया च तादृशज्ञाननिष्ठज्ञापकत्वस्य प्रत्यायनात्।

न च वह्नेरपि धूमनिरूपितव्याप्तिमत्त्वभ्रमेण धूमज्ञापकत्वमस्तीति "वह्निना धूमः" इति वाक्यस्य प्रामाण्यापत्तिः इति वाच्यम्। तृतीयायाः स्वप्रकृत्यर्थ-व्यापकनिष्ठं यत् स्वनिरूपकानुमितिविषयत्वं तत्संसर्गकः यः स्वप्रकृत्यर्थनिष्ठ-ज्ञापकत्वप्रकारको बोधः तं प्रत्येव हेतुत्वात्। "धूमेन वह्निः" इत्यत्र धूमव्यापक-वह्निनिष्ठं धूमनिष्ठज्ञापकतानिरूपकानुमितितिविषयत्वं भवतीति तत्संसर्गकः धूम-निष्ठज्ञापकत्वप्रकारको बोधो जायते। "वह्निना धूम" इति तु न भवति, धूमस्य वह्न्यव्यापकत्वात् वह्निनिष्ठस्यानुमितिविषयत्वस्य धूमव्यापकनिष्ठत्वाभावात्।

नन्वेवमपि धूमस्यापि द्रव्यत्वेन रूपेण वह्निव्यापकत्वात् उक्तदोषतादवस्थ्यम् (वह्निना धूम इति प्रयोगापत्तितादवस्थ्यम्)। न च तृतीयार्थस्य ज्ञापकत्वस्य स्वान्वयितावच्छेदकावच्छिन्नव्यापकत्वविशिष्टस्वनिरूपकानुमितिविषयत्वसंबन्धेन समभिव्याहृतपदार्थेऽन्वयः स्वीक्रियते। वैशिष्ट्यं च सामानाधिकरण्यसंबन्धेन। तथा च धूमे वह्निनिरूपितस्य द्रव्यत्वावच्छिन्नव्यापकत्वस्य सत्त्वेऽपि अन्वयिता-वच्छेदकधूमत्वावच्छिन्नव्यापकत्वविरहान्नोक्तदोष इति वाच्यम्। एवमपि धूमो न वह्निनेत्यादेरप्रामाण्यापत्तिः। धूमत्वावच्छिन्नव्यापकत्वविशिष्टस्य स्वनिरूपकानु-मितिविषयत्वस्याप्रसिद्ध्या तत्संबन्धावच्छिन्नप्रतियोगिताकस्य वह्निनिष्ठज्ञापकत्वा-भावस्य नञा बोधयितुमशक्यत्वादिति चेत् —

अत्रोच्यते। धूमत्वादिविशिष्टे तृतीयार्थस्य वह्न्यादिनिष्ठज्ञापकत्वस्य प्रकारतया बोधने धूमत्वविशिष्टप्रतियोग्यनधिकरणवह्न्यधिकरणनिष्ठाभावीयधूमत्वान्यधूमवृत्ति-धर्मानवच्छिन्नप्रतियोगित्वधूमत्वावच्छिन्नप्रतियोगित्वोभयाभावरूपा वह्न्यादिव्याप-कता संबन्धः। स च संबन्धो घटादौ प्रसिद्धः। धूमे तु नास्ति। धूमत्वविशिष्टा-नधिकरणायोगोलकवृत्तिः यः धूमाभावः तन्निरूपितधूमत्वान्यधूमवृत्तिधर्मानवच्छिन्न-प्रतियोगित्वधूमत्वावच्छिन्नप्रतियोगित्वोभयस्य तत्र सत्त्वेन उभयाभावस्यासत्त्वात्। तथा च तादृशव्यापकत्वसंबन्धावच्छिन्नप्रतियोगिताकस्य वह्निनिष्ठज्ञापकत्वाभावस्य

धूमे सत्त्वात् 'धूमो न वह्निना' इति प्रयोगस्य उपपत्तिः। तादृशसंसर्गबाधात् 'धूमो वह्निना' इति प्रयोगस्य प्रामाण्यं च न।

"धूमेन वह्निः" इत्यत्र प्रतियोगितावच्छेदकविशिष्टानधिकरणधूमवन्निष्ठाभावीय-प्रतियोगित्वाभावरूपं व्यापकत्वं संसर्गः। स च वह्नावबाधित इति नानुपपत्तिः।

"घटेन शून्यः विधुरो रहित" इत्यादौ घटत्वावच्छिन्नप्रतियोगित्वं तृतीयार्थः। तस्य निरूपकत्वसंबन्धेन शून्यपदार्थैकदेशे शून्यत्वे-अभावेऽन्वयः। घटस्याधेयता-संबन्धेन प्रतियोगित्वे अन्वयः। घटनिष्ठघटत्वावच्छिन्नप्रतियोगितानिरूपकाभाववान् इति बोधः।

व्युत्पत्तिवादोक्तरीत्या हेतुतृतीयार्थविचारः[१]

पूर्वोक्तजगदीशप्रदर्शितरीतितो विलक्षणां रीतिं प्रदर्शयन्ति गदाधरभट्टाचार्याः व्युत्पत्तिवादे। तथा हि — यत्र कर्तृव्यापाराधीनव्यापारवत्कारणत्वं तत्र करणे तृतीया। यत्र तु व्यापारं विना कारणत्वं तत्र हेतौ तृतीया। लिङ्गज्ञानस्या-नुमितिकरणतामते धूमेन वह्निमनुमिनोतीत्यदौ धूमादिपदं तज्ज्ञानपरम्। धूम-ज्ञानमित्यनेन व्याप्तिविशिष्टधूमज्ञानं 'वह्निव्याप्यो धूम' इत्याकारकं विवक्षितम्। तस्य व्यापारः वह्निव्याप्तिविशिष्टधूमवैशिष्ट्यावगाही परामर्शः 'वह्निव्याप्यधूमवान् पर्वत' इत्याकारकः। स चात्ममनोयोगादिरूपानुमातृपुरुषव्यापाराधीन इति तस्य निरुक्तकरणत्वमबाधितम्। न च धूमादिलिङ्गकवह्न्यनुमितौ यत्र लिङ्गान्तरात् घटादिभानम्, तत्र धूमेन घटमनुमिनोति इति प्रयोगापत्तिः। तत्र समूहालम्ब-नानुमितेरेव स्वीकरणीयतया तस्यां घटविधेयकत्वस्य धूमज्ञाननिष्ठकरणता-निरूपकत्वस्य च सत्त्वात् इति वाच्यम्। धूमज्ञाननिष्ठकरणतानिरुपकत्वस्य वह्निज्ञानविधेयकत्वावच्छेदेनैवानुमितिनिष्ठत्वात् तदवच्छेदेनैव तृतीयार्थान्वयः। घट-विधेयकत्वावच्छेदेन तु धूमज्ञानत्वावच्छिन्नकरणतानिरूपकत्वं नास्तीत्यदोषात्।

एतदुक्तं भवति — धूमेन वह्निमनुमिनोतीतिवाक्यस्थले तृतीयान्तार्थः धूम-ज्ञानत्वावच्छिन्नधूमज्ञाननिष्ठकरणतानिरूपकत्वम्। तत्र वह्नित्वावच्छिन्नविधेयतानु-मितित्वावच्छिन्नत्वं भासते। तत्र चावच्छेदकत्वं नानतिरिक्तवृत्तित्वम्। धूम-ज्ञानत्वावच्छिन्नकरणतानिरूपकत्वाभाववत्यामालोकलिङ्गकानुमितावपि वह्निविधेय-कानुमितित्वस्य सत्त्वात्। किं तु स्वरूपसंबन्धरूपमेव। एवं च धूमलिङ्गक-वह्न्यनुमितौ घटादेः भानेऽपि धूमज्ञानत्वावच्छिन्नकरणतानिरूपकतायां वह्निविधेय-कानुमितित्वावच्छिन्नत्वाभावान्न धूमेन घटमनुमिनोतीति प्रयोगापत्तिरिति। प्राचां मते

---

[१] व्यु.वा.पृ. २२६

करणत्वं तृतीयार्थः। निरूपकत्वं संसर्गः। नव्यमते करणतानिरूपकत्वं तृतीयार्थः, आश्रयत्वं संसर्ग इत्यन्यदेतत्।

परे तु लिङ्गज्ञानस्य करणत्वेऽपि 'धूमेन वह्निमनुमिनोति' इत्यादौ धूमादिपदं मुख्यार्थधूमादिपरमेव। हेताविति सूत्रेणैव तत्र तृतीया। हेतुत्वस्य कारणतावच्छेदकसाधारणप्रयोजकत्वरूपस्य तत्र विवक्षितत्वात्। जनकज्ञानविषयधूमादेश्च अनुमितिकारणतावच्छेदकतया प्रयोजकत्वमक्षतमेव। उक्तसमूहालम्बनस्थले च (यत्र धूमादिलिङ्गकवह्न्यनुमितौ लिङ्गान्तरात् घटादिभानं तत्र) घटविधेयकानुमितित्वावच्छेदेन धूमनिष्ठप्रयोजकतानिरूपकत्वबाधात् न धूमेन घटमनुमिनोतीति प्रयोगापत्तिः।

वस्तुतस्तु जनकतावच्छेदकनिष्ठप्रयोजकतानिरूपकत्वं कार्यस्येव कार्यतावच्छेदकस्याप्यक्षतं प्रतीतिसाक्षिकं च। ततश्चानुमितिविशेषणीभूते तत्तद्विधेयकत्वरूपे सुबन्तार्थे एव तृतीयार्थान्वयः उपगम्यते। धूमेन वह्निमनुमिनोतीत्यत्र प्रयोजकतानिरूपकत्वं तृतीयार्थः। प्रयोजकतायां धूमस्य आधेयतयान्वयः। विधेयतानिरूपकत्वं द्वितीयार्थः। विधेयतायामाधेयतया वह्नेरन्वयः। विधेयतानिरूपकत्वे प्रयोजकतानिरूपकत्वस्याश्रयतासंबन्धेनान्वयः। विधेयतानिरूपकत्वस्य अनुमितावाश्रयतासंबन्धेनान्वयः। धूमनिष्ठप्रयोजकतानिरूपकवह्निनिष्ठविधेयतानिरूपकानुमितिमानिति बोधः। 'पर्वतो वह्निमान् घटवांश्च' इति समूहालम्बनानुमितिनिष्ठविधेयकत्वे धूमनिष्ठप्रयोजकतानिरूपकत्वबाधात् न धूमेन घटमनुमिनोतीति प्रयोगापत्तिः।

''धूमेन वह्निमनुमिनोति न घटेन'' इत्यत्र नञा वह्निविधेयकत्वरूपद्वितीयान्तार्थे घटनिष्ठप्रयोजकतानिरूपकत्वस्याभावः प्रत्याय्यते। तथा च घटप्रयोज्यत्वाभाववद्वह्निविधेयकत्ववदनुमितिमानिति बोधः।

एतेन करणे तृतीयेति पूर्वमतं निरस्तम्। 'धूमेन वह्निमनुमिनोति न घटेन' इति प्रयोगस्य समूहालम्बनानुमितिस्थले प्रामाण्यानुपपत्तेः। समूहालम्बनानुमितौ घटज्ञानकरणत्वस्य सत्त्वेन तदभावस्य बाधात्।

न च तन्मतेऽपि तत्र द्वितीयान्तार्थवह्निविधेयकत्वे धूमज्ञानरूपकरणजन्यतावच्छेदकत्वं घटज्ञानरूपकरणजन्यतावच्छेदकत्वाभावश्च भासते, अतो नानुपपत्तिरिति वाच्यम्। कारकविभक्त्यर्थस्य क्रियातिरिक्तेन्वयासंभवात्। हेतुतृतीया तु न कारकविभक्तिः।

न चोक्तस्थले वह्न्यादिविधेयकत्वावच्छेदेन घटादिरूपलिङ्गज्ञानजन्यतावदनुमित्याश्रयत्वाभावः पुरुषनिष्ठः नञा प्रत्याय्यते। तादृशानुमितिः घटादौ वह्न्यादिलिङ्गत्वभ्रमदशायां प्रसिद्धेति वाच्यम्। "धूमेन वह्नेरनुमानमिदं न घटेन" इत्यादौ अनुमित्याश्रयत्वाभावबोधानुपपत्तेः, अनुमित्याश्रयबोधकपदाभावादिति प्राहुः।

"पर्वतो धूमेन वह्निमान्" इत्यादौ क्रियायोगाभावात् न करणे तृतीया। अपि तु हेतौ तृतीया। तत्र ज्ञानजनकज्ञानविषयत्वरूपं हेतुत्वं, ज्ञानजन्यज्ञानविषयत्वरूपं हेतुमत्त्वं वा तृतीयार्थः।

हेतुशब्दो यद्यपि कारणपर्यायः, न तु ज्ञापकपर्यायः। तथापि हेताविति सूत्रस्थं हेतुपदं न समभिव्याहृतनिरूपितहेतुतामात्रपरम्, अपि तु समभिव्याहृततज्ज्ञानान्यतरनिरूपितहेतुतापरमेवेति समभिव्याहृतवह्न्यादिज्ञानहेतुज्ञानविषयधूमादिवाचकपदादपि तृतीया तत्सूत्रेणानुशिष्यते। इयं भट्टाचार्यपरिशीलिता रीतिः।

व्युत्पत्तिवादव्याख्याप्रकाशकारास्तु मणिकृन्मतमनूदितवन्तः — मणिकृतस्तु "धूमेन वह्निः" इत्यत्र धूमपदं धूमज्ञाने वह्निपदं वह्निज्ञाने ज्ञायमानवह्नौ वा लाक्षणिकम्। हेतुता च तृतीयार्थः। तथा च धूमज्ञानवृत्तिहेतुतानिरूपकज्ञानविषयो वह्निरित्यन्वयबोध इत्याहुः इति।

पदवाक्यरत्नाकरोक्तरीत्या हेतुतृतीयार्थविचारः[१]

हेतौ तृतीया हेतुस्तु कारको ज्ञापको द्विधा।
जन्यत्वं ज्ञाप्यता तस्या अर्थ इत्येकदेशिनः।।

"हेतौ"[२] तृतीया इत्यनुशासनेन हेतोः प्रकृतिलभ्यतया हेतुत्वे तृतीयावाच्यत्वमनुशिष्यते। हेतुश्च जनको ज्ञापकश्च। "दण्डेन घटो, धूमेन वह्निः" इत्यादौ दण्डजनकत्वयोः धूमज्ञापकत्वयोश्च आधाराधेयभावेनान्वयः, निरूपकतासंबन्धेन जनकताघटयोः ज्ञापकतावह्न्योश्चान्वयः। दण्डनिष्ठजनकतानिरूपको घटः, धूमनिष्ठज्ञापकतानिरूपको वह्निः इत्यन्वयबोधः।

मणिकृतस्तु न ज्ञापकत्वं तृतीयार्थः, चक्षुषा रूपमिति प्रयोगप्रसङ्गात्। चक्षुषि रूपज्ञापकत्वस्याबाधितत्वात्। धूमज्ञानस्यैव वह्निज्ञापकतया धूमस्याज्ञापकत्वेन धूमेन वह्निः इत्यप्रयोगप्रसङ्गात्। अननुशासनाच्च। हेतुशब्दस्य ज्ञापकतार्थकतया अदृष्टचरत्वात्। किं तु "धूमेन वह्निः" इत्यत्र धूमपदं धूमज्ञाने वह्निपदं वह्निज्ञाने

---

[१] प.वा.र.पृ. ६८२
[२] सू. २.३.२३

ज्ञायमानवह्नौ वा लाक्षणिकम्। तृतीयार्थः जनकत्वम्। तस्य निरूपकतया ज्ञानेऽन्वयः। धूमज्ञाननिष्ठजनकतानिरूपकज्ञानविषयो वह्निः इति बोधः। पदार्थैकदेशे पदार्थान्तरस्य विशेषणतयान्वयस्तु बहुशो दृष्ट इति नानुपपत्तिः।

"चेष्टया पचति" इत्यादौ चेष्टापदं चेष्टाज्ञाने लाक्षणिकम्। तिपदं ज्ञायमानकृतौ लाक्षणिकम्। तदेकदेशज्ञाने तृतीयार्थहेतुत्वस्य निरूपकतासंबन्धेनान्वयः। तथा च चेष्टाज्ञाननिष्ठहेतुतानिरूपकज्ञानविषयः कृतिः इत्याख्यातार्थविशेष्यको बोधः। विभक्त्यर्थयोर्न परस्परमन्वय इति तु अप्रामाणिकम्।

प्रत्यक्षोपजीवकत्वेनानुमानं निरूप्यते इत्यत्र त्वप्रत्ययः प्रत्यक्षोपजीवकत्वज्ञाने लाक्षणिकः। तन्निष्ठजनकतानिरूपकत्वं निरूपणे भासते। प्रत्यक्षोपजीवकत्वरूपसंगतिज्ञानं च तज्जिज्ञासया जिज्ञापयिषाया वा प्रयोजकत्वेन निरूपणजनकम्। प्रत्यक्षोपजीवकत्वज्ञाननिष्ठजनकतानिरूपकनिरूपणविषयोऽनुमानमिति बोधः। निरूपणजनकत्वप्रकार इत्थम् — अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयस्य संगतित्वात् प्रत्यक्षनिरूपणानन्तरमनुमाननिरूपणे प्रत्यक्षोपजीवकं किमित्याकारकजिज्ञासाजनकत्वस्य प्रत्यक्षोपजीवकत्वज्ञाने सत्त्वात् तद्विषयस्य प्रत्यक्षोपजीवकत्वस्य संगतित्वम्। तावतैव निरूपणजनकत्वं निरूपणप्रयोजकजिज्ञासाप्रयोजकत्वात् परंपरया तत्र निराबाधम्। तादृशजिज्ञासायाः शिष्यादिनिष्ठायाः गुरुकर्तृकनिरूपणप्रयोजकत्वं व्यधिकरणयोस्तयोः कल्पितपरंपरासंबन्धेन कल्पनीयम्। अतो लाघवात् गुरुनिष्ठा शिष्यवृत्तिज्ञानानुकूलव्यापारेच्छैव समवायेन तादृशनिरूपणप्रयोजिकेत्याशयेन जिज्ञापयिषायाः वा इत्युक्तम्।

"यजेतेति वेदेन याग इष्टसाधनम्" इत्यादावपि वेदपदं वेदज्ञाने लाक्षणिकम्। तृतीयार्थो हेतुत्वम्। इष्टसाधनपदं ज्ञानविषयेष्टसाधनत्ववति लाक्षणिकम्। हेतुत्वस्य निरूपकतया ज्ञानेऽन्वयः। वेदज्ञानस्याधेयतया हेतुत्वेऽन्वयः। वेदज्ञाननिष्ठहेतुतानिरूपकज्ञानविषयेष्टसाधनतावान् याग इति बोधः। वेदज्ञानजन्यज्ञानविषयेष्टसाधनतावान् याग इति फलितोऽर्थः इत्याहुः।

एकदेशमतोपन्यासः

एकदेशिनस्तु — जनकत्वं ज्ञापकत्वं वा हेतुत्वं न तृतीयार्थः। तथा सति "घटो न रासभेन" इतिवत् "घटो न दण्डेन" इति प्रयोगप्रसङ्गात्। दण्डनिष्ठहेतुतायाः स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावस्य घटे सत्त्वात्। न च दण्डनिष्ठहेतुतायाः निरूपकतासंबन्धावच्छिन्नप्रतियोगिताकाभावः नञा प्रत्याय्यते, स च बाधितः घटे इति वाच्यम्। निरूपकतायाः वृत्त्यनियामकत्वेन प्रति-

योगितानवच्छेदकत्वात्। अतः जन्यत्वं ज्ञाप्यत्वं च तृतीयार्थः। निरूपितत्व-संबन्धेन प्रकृत्यर्थान्वितस्य तस्य स्वरूपसंबन्धेन समभिव्याहृतयोग्यपदार्थेऽन्वयः। नञ्समभिव्याहारे च स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकतदभावः प्रत्याय्यते। घटे च दण्डनिरूपितजन्यत्वस्य स्वरूपसंबन्धावच्छिन्नाभावः बाधित इति न "घटो न दण्डेन" इति प्रयोगप्रसङ्गः इत्याहुः।

तच्चिन्त्यम् — वृत्त्यनियामकसंबन्धस्य प्रतियोगितानवच्छेदकत्वे जन्यत्वस्य तृतीयार्थत्वे च "घटो न पारिमाण्डल्येन" इति वाक्यस्याप्रामाण्यापत्तिः। अणुपरि-माणाख्यस्य पारिमाण्डल्यस्य अकारणत्वेन पारिमाण्डल्यनिरूपितजन्यत्वाप्रसिद्ध्या तदभावस्य अप्रसिद्धत्वेन बोधयितुमशक्यत्वात्। न च तृतीयार्थजन्यत्वे पारि-माण्डल्यनिष्ठनिरूपितत्वसंबन्धावच्छिन्नप्रतियोगिताकाभावो नञा बोध्यते इति वाच्यम्। निरूपितत्वस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वात्।

"हेतौ"[१] इति सूत्रे फलमपि हेतुः। "अध्ययनेन वसति" इत्यत्र अध्ययनफलको वासो वाक्यार्थः। तत्फलकत्वं च तदिच्छाप्रयोज्याचारविषयत्वम्, न तु तज्जनकत्वम्। "निर्वाणेन सुगतमुपास्ते जाल्मः" इत्यादौ सुगतोपासनायां निर्वाण-जनकत्वस्य बाधात्। — इति पदवाक्यरत्नाकररीतिः।

विभक्त्यर्थनिर्णये[२] हेतुतृतीयार्थनिरूपणम्

हेतुत्वार्थिकां तृतीयां ज्ञापयति "हेतौ"[३] इति सूत्रम्। हेतावर्थे तृतीया स्यादित्यर्थकम्। हेताविति भावप्रधानो निर्देशः। तथा च हेतुत्वं तृतीयार्थः। तच्च द्विविधं कारणत्वं ज्ञापकत्वं च। कारणत्वं च साक्षात्परंपरासंबन्धावच्छिन्नं द्विविधम्। तत्र साक्षात् यथा — तन्तुभिः तन्तूनां मिलनेन वा पटः, पाकेन सौरभं माधुर्यं रक्तिमा वा क्षीरस्येति। परम्परया यथा — "दण्डेन घटः, वह्निना घर्मः, ओदनेन तृप्तिः, यागेन स्वर्गः, अनुभवेन स्मरणं" चेति। अत्र प्रकृत्यर्थस्याधेयतया तृतीयार्थे हेतुत्वे, तस्य निरूपकतया कार्ये पटादावन्वयः। तथा च तन्तुवृत्ति-कारणतानिरूपकः पट इत्याकारकोऽन्वयबोधः।

यदत्र निर्व्यापारसाधनं हेतुस्तृतीयार्थः तस्योदाहरणं "दण्डेन घट" इति शाब्दिकमतम्। तत् लौकिकपदार्थानामप्यनभिज्ञानं सूचयति। चक्रभ्रमिद्वारैव दण्डो घटोत्पादक इति सकललोकावधारणविरोधादिति।

---

[१] सू. २.३.२३
[२] पृ. २६०
[३] सू. २.३.२३

ज्ञापकत्वं यथा — धूमेन वह्निः इत्यादि। अत्रापि प्रकृत्यर्थस्य आधेयत्वेन तृतीयार्थे ज्ञापकत्वे तस्य निरूपकतया ज्ञाप्ये वह्न्यादावन्वयः। तथा च धूमवृत्ति-ज्ञापकतानिरूपको वह्निः इत्यन्वयबोधः।

मणिकृन्मतम्

मणिकृतस्तु — ज्ञापकत्वं न तृतीयार्थः। तथा सति चक्षुषा रूपमिति प्रयोगप्रसङ्गात्। किं तु "धूमेन वह्निः" इत्यत्र धूमपदं धूमज्ञाने वह्निपदं वह्निज्ञाने ज्ञायमानवह्नौ वा लाक्षणिकम्। तृतीयार्थो हेतुत्वम्। तस्य निरूपकतया लक्ष्यैकदेशे ज्ञायमानविशेषणे ज्ञानेऽन्वयः। तथा च धूमज्ञानवृत्तिहेतुतानिरूपकज्ञानविषयो वह्निः इत्यन्वयबोधः।

"चेष्टाविशेषेण पचति" इत्यत्र विशेषशब्दस्य चेष्टाविशेषज्ञाने तिङः ज्ञायमानकृतौ लक्षणा। तथा च चेष्टाविशेषज्ञानवृत्तिहेतुतानिरूपकज्ञानविषयः पाककृतिः इत्यन्वयबोधः।

विभक्त्यर्थयोः परस्परं नान्वयः इत्यप्रामाणिकमेव। प्रामाणिकं चेत् सुबर्थयोरेव तथात्वम्। एवमन्यत्रापि ज्ञाने लक्षणा। यथा — प्रत्यक्षोपजीवकत्वेन निरूप्यते इत्यादौ त्वप्रत्ययस्य प्रत्यक्षोपजीविकत्वज्ञाने लक्षणा। लक्ष्यम् आधेयत्वेन तृतीयार्थहेतुत्वे तच्च निरूपकतया निरूपणे अन्वेति। प्रत्यक्षोपजीवकत्वज्ञान-वृत्तिहेतुतानिरूपकनिरूपणविषय इत्यन्वयबोधः। प्रत्यक्षोपजीवकत्वरूपसंगति-विषयकं ज्ञानं तज्जिज्ञासायाः जिज्ञापयिषाया वा प्रयोजकतया निरूपणजनकम्।

एवं "वेदेन प्रवर्तत" इत्यत्र वेदपदस्य वेदज्ञाने लक्षणा। वेदज्ञानस्य वेदार्थे इष्टसाधनत्वगोचरज्ञानप्रयोजकतया प्रवृत्तिजनकत्वमित्याहुः।

एकदेशिमतखण्डनम्

एकदेशिनस्तु न जनकत्वं न वा ज्ञापकत्वं तृतीयार्थः। तथा सति 'घटो न रासभेण' इतिवत् घटो न दण्डेनेति प्रयोगप्रसङ्गात्। स्वरूपसंबन्धावच्छिन्नप्रति-योगिताकस्य दण्डहेतुत्वाभावस्य घटेऽपि सत्त्वात्। निरूपकतासंबन्धस्य वृत्त्य-नियामकतया प्रतियोगितानवच्छेदकत्वादिति जन्यत्वं ज्ञाप्यत्वं च तृतीयार्थ इत्याहुः।

तच्चिन्त्यम्। वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वे युक्तेः द्वितीया-विवरणे दर्शितत्वात्। अन्यथा प्रकृतेऽपि "घटो न पारिमाण्डल्येन" इत्यत्र अन्वयबोधानुपपत्तेः। पारिमाण्डल्यजन्यत्वस्याप्रसिद्धतया तदभावबोधासंभवात्।

वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वे तु तृतीयार्थे हेतुत्वे आधेयता-संबन्धावच्छिन्नप्रकृत्यर्थप्रतियोगिताकाभावस्य, जन्यत्वे निरूपकतासंबन्धवच्छिन्न-प्रकृत्यर्थप्रतियोगिताकाभावस्य च नञा बोधनसंभवात् अन्वयबोधोपपत्तिः।

गगनं न पारिमाण्डल्येन इत्यादिवाक्यमयोग्यमेव। योग्यं चेत् तदा नञा द्वेधा अभावो बोध्यते। अतः प्रकृत्यर्थाभावविशिष्टजन्यत्वस्याभावो गगने प्रतीयते, "गगनमन्धो न पश्यति" इत्यत्र द्वेधा नञर्थबोधवत्।

वास्तविकसूत्रार्थः

वस्तुतस्तु "हेतौ"[१] इति सूत्रे हेतुपदेन हेतुत्वस्य प्रतिपादनात् हेतुत्वं तृतीयार्थः। न हि हेतुपदस्य ज्ञाप्यं ज्ञापकं वा शक्यं येन तत्त्वं प्रतीयेत। सूत्रे लक्षणाकल्पने प्रयोजनविरहः। कोशादिज्ञापकाभावेन रूढिविरहश्च परिपन्थी। धूमेन वह्निः इत्यादिप्रयोगो न वृत्तिग्रन्थादौ दृष्टचरः। काशिकायाम् — "धनेन कुलम्, कन्यया शोकः, विद्यया यश" इत्युदाहृतम्। तत्र कुलस्य सन्तानस्य हेतुत्वं धनस्य दारपरिग्रहादिप्रयोजकतया। कन्यायाः शोकहेतुत्वं विश्लेषप्रयोजकदानप्रयोजक-तया। विद्यायाः यशोहेतुत्वम् अध्यापनादिप्रयोजकतया बोध्यम्।

फलमपीह हेतुः

फलं कार्यम्। तथा च तृतीयार्थे हेतुत्वे यथाधेयतया तथा निरूपकतयापि प्रकृत्यर्थस्यान्वयः। कार्यस्य हेतुतानिरूपकत्वात्। अथ वा तृतीयार्थे जन्यत्वे यथा निरूपकतया तथाधेयतयापि प्रकृत्यर्थस्यान्वयः। कार्यस्याधिकरणत्वात्। फलं हेतुर्यथा — "अध्ययनेन वसति" इत्यत्र अध्ययननिरूपितहेतुताकः अध्ययननिष्ठ-जन्यतानिरूपको वा वासो वाक्यार्थः।

"अलं महीपाल तव श्रमेण" इत्यत्र फलोद्देश्यककृतिविषयः फलाजनको-ऽलंपदार्थः। निष्फलस्य कृतिविषयस्य श्रमजनकत्वं निराबाधम्। श्रमजन्यता-निरूपकत्वमलंपदार्थे अन्वेति। अतः फलहेतुताया नामार्थान्वयान्न कारकत्वम्।

एवं "दुःखेनाधीतं, दुःखेनार्जितं, दुःखेन विद्या, दुःखेन धनम्, श्रमेण यदुपार्जितम्" इत्यत्र फलहेतुत्वान्वयोऽनया रीत्या बोध्यः।

"निर्वाणेन सुगतमुपास्ते जाल्म" इत्यत्र निर्वाणपदस्य ल्युट्प्रत्ययस्य वा निर्वाणज्ञाने लक्षणा। तस्य फलेच्छाचिकीर्षाप्रवृत्तिप्रयोजकतया सुगतोपासनजन-कत्वम्, प्रत्यक्षोपजीवकत्वज्ञानस्य निरूपणजनकत्ववदिति नात्र फलहेतुत्वम्।

---

[१] सू. २.३.२३

विभक्त्यर्थनिर्णये[१] षष्ठी हेतुप्रयोगे इति सूत्रार्थः

फलवाचकस्य हेतुपदसामानाधिकरण्ये षष्ठीं बोधयति "षष्ठी हेतुप्रयोगे"[२] इति सूत्रं हेतुपदप्रयोगे षष्ठीविभक्तिर्भवतीत्यर्थकम्। तृतीयापवादः। हेतुपदस्य हेतुतानिरूपको जन्यताश्रयो वार्थः। षष्ठ्या हेतुत्वं जन्यत्वं वा अर्थः। हेतुशब्दप्रयोगे षष्ठी यथा — अध्ययनस्य हेतोर्वसति। अत्र हेतोस्तादात्म्येनाध्ययने तस्य षष्ठ्यर्थे तस्य वासेऽन्वयः। तथा च हेतुतानिरूपकाभिन्नाध्ययननिरूपितहेतुताश्रयः हेतुतानिरूपकाध्ययननिष्ठजन्यतानिरूपको वा वासो वाक्यार्थः।

एवम् अन्नस्य हेतोः द्यूतस्य हेतोर्वा वसति इत्यादावप्यन्वयो बोध्यः। हेतुपदसामानाधिकरण्यं कर्मधारयेऽपि भवति। प्रयोगशब्दस्य सामानाधिकरण्यार्थकत्वात्। तथा च "अध्ययनहेतोर्वसति" इत्यपि प्रमाणम्। अत्राध्ययनस्य तादात्म्येन हेतुपदार्थे हेतुतानिरूपके, तस्य निरूप्यतया षष्ठ्यर्थे हेतुत्वे विशेष्यविशेषणभाववैचित्र्येणान्वयः "ज्ञानवतां ज्ञानम्" इत्यत्रेव निष्प्रत्यूहः।

विभक्त्यर्थनिर्णये[३] सर्वनाम्नस्तृतीया चेति सूत्रार्थः

हेतुशब्दसमानाधिकरणसर्वनाम्नः तृतीयां प्रतिप्रसूते "सर्वनाम्नस्तृतीया च"[४] इति सूत्रम्। हेतुशब्दप्रयोगे सर्वनाम्नः तृतीया भवति चकारात् षष्ठ्यपीत्यर्थकम्। तृतीयाषष्ठ्योः हेतुत्वमेवार्थः। द्वयी विभक्तिर्यथा — केन हेतुना वसति, कस्य हेतोर्वसति। अत्र किमः जिज्ञासाप्रकारत्वोपलक्षितधर्मवानर्थः। जिज्ञासा तु अवगतधर्मावान्तरधर्मप्रकारकज्ञानेच्छा। जिज्ञासाप्रकारत्वोपलक्षितधर्मवदभिन्नहेतुनिष्ठहेतुतानिरूपको वास इत्यन्वयबोधः।

येन हेतुना यस्य हेतोर्वा वसति तदस्यातिरमणीयमध्ययनम्। अत्र यच्छब्दस्य समभिव्याहृतधर्मावान्तरधर्मवानर्थः। समभिव्याहृतो धर्मः हेतुत्वम्। तदवान्तरो धर्मः अध्ययनत्वम्। अत एव तच्छब्दस्याध्ययनसामानाधिकरण्यम्। "येन वसति" इत्यादौ समभिव्याहृतो धातुरेव। समभिव्याहारः सुबन्ततिङन्तपदे बोध्यः। धात्वर्थे तृतीयार्थो हेतुत्वं विशेषणतया धर्म एवेति नानुपपत्तिः। "यदधीते तेन हेतुना तस्य हेतोर्वा वसति" इत्यादौ तच्छब्दस्य यच्छब्दार्थान्वितपदान्तरार्थतावच्छेदकत्वोपलक्षितधर्मवानर्थः। पूर्वबुद्धिप्रकारत्वोपलक्षितधर्मवान् वा अर्थः।

---

[१] पृ. २६३
[२] सू. २.३.२६
[३] पृ. २६३
[४] सू. २.३.२७

एवं हेतुशब्दस्यार्थस्य सर्वनामार्थे तस्य तृतीयार्थे षष्ठ्यर्थे हेतुत्वे तस्य धात्वर्थेऽन्वयः पूर्वोक्तरीत्या बोध्यः।

विभक्त्यर्थनिर्णये[१] निमित्तकारणेत्यादिवार्तिकव्याख्यानम्

"निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्" इति वार्तिकम्। निमित्तादिशब्दप्रयोगे सर्वनाम्नः सर्वा विभक्तयो भवन्तीत्यर्थकम्। "किं निमित्तम्, केन निमित्तेन, कस्मै निमित्ताय, कस्य निमित्तस्य, कस्मिन्निमित्ते वा वसति" इत्यत्र विभक्तीनां हेतुत्वमर्थः। अन्वयः पूर्ववत्। एवं कारणादिशब्दप्रयोगे बोध्यम्। कारणाद्युपादानं पर्यायग्रहणार्थम्। तेन "किं प्रयोजनं केन प्रयोजनेन वा वसति" इत्यादिकं बोध्यम्।

विभक्त्यर्थनिर्णये[२] प्रसितेत्यादिसूत्रव्याख्यानम्

"प्रसितोत्सुकाभ्यां तृतीया च"[३] इति सूत्रम्। प्रसितोत्सुकाभ्यां योगे तृतीया भवति चकारात् सप्तम्यपि इत्यर्थकम्। "प्रसित उत्सुको वा हरिणा, प्रसित उत्सुको वा हरौ"। प्रसितः प्रसक्तः आसक्तः लयवानिति यावत्। लयः धारापन्नं ज्ञानं तादृगिच्छा वा। उत्सुक उत्कण्ठावान्। उत्कण्ठा उत्कटेच्छा। तृतीयासप्तम्योर्विषयत्वमर्थः। तस्य प्रतियोगितया लये उत्कण्ठायां चान्वयः। तथा च हरिविषयताप्रतियोगिलयवान्, हरिविषयताप्रतियोग्युत्कण्ठवान् इति चान्वयबोधः। प्रतियोगित्वं निरूपकत्वम्। एवं "केशैः केशेषु वा प्रसितः, केशैः केशेषु वा उत्सुकः" इति काशिकोदाहरणे अनया रीत्या अन्वयो बोध्यः।

विभक्त्यर्थनिर्णये[४] नक्षत्रे च लुपीति सूत्रार्थः

लुप्ततद्धितान्तार्थे वर्तमानात् नक्षत्रविशेषार्थकशब्दात् तृतीयासप्तम्यौ भवतः। विशेषार्थकात् अश्विन्यादिशब्दात् तद्धिताणो युक्तः कालोऽर्थः। तद्धितस्य लोपेऽनुसन्धानेन अश्विन्यादिशब्दस्य निरूढलक्षणया वा अश्विन्यादियुक्तः कालः प्रतीयते। एवं "पुष्येण पुष्ये वा पायसमश्नीयात्" "पुष्येण पुष्ये वा क्षौरमस्य" इत्यत्र पुष्यपदस्य पुष्ययुक्तः कालोऽर्थः। तृतीयासप्तम्योः उत्पत्तिरर्थः। पुष्ययुक्तकालोत्पत्तिकत्वं पायसभोजने क्षौरे चान्वेति।

---

[१] पृ. २६४
[२] पृ. २६४
[३] सू. २.३.४४
[४] पृ. २६५

एवं "मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्" इत्यत्र आवाहनमधिष्ठानफलको व्यापारः। अधिष्ठानं संबन्धः। स च संयोगादिः तद्बुद्धिर्वा। संबन्धाभावः तद्बुद्धिर्वा अनधिष्ठानम्। तत्फलको व्यापारो विसर्जनम्। मूलयुक्तकालोत्पत्तिकत्वमावाहने श्रवणयुक्तकालोत्पत्तिकत्वं विसर्जनेऽन्वेति।

अत्र "साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः"[१] इति सूत्रात् अनुवर्तमानतया सप्तम्याः अधिकरणार्थकत्वं निर्युक्तिकम्। न च तथा सति साधुनिपुणसूत्र-प्रतिपादिता अर्चा सप्तमीतृतीययोरर्थोऽस्तु इति वाच्यम्। तथा सति केशैः केशेषु वा पुष्येण पुष्ये वेति दर्शितोदाहरणे अर्चायाः बाधात् सप्तम्याद्यर्थानन्वयप्रसङ्गात्। तस्मात् "अन्तरान्तरेण युक्ते"[२] इति सूत्रमिव प्रकृतसूत्रद्वयमपि विभक्तेर्विधायकं न तु तदर्थप्रतिपादकमिति। न वा अधिकरणार्थकत्वं सप्तम्याः संभवति। तथा सति कृत्तिकादिकृते क्षौरेऽपि पुष्येण पुष्ये वा क्षौरमस्येति प्रयोगप्रसङ्गात्। क्षौरस्य क्षुरजन्यकेशनाशस्य कृत्तिकाकृतस्य पुष्येऽपि प्रवृत्तेरिति।

विभक्त्यर्थनिर्णये[३] तुल्यार्थैरित्यादिसूत्रव्याख्यानम्

"तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्"[४] इति सूत्रम्। तुल्यार्थैः शब्दैर्योगे तृतीया षष्ठी च भवतीत्यर्थकम्। "चन्द्रेण चन्द्रस्य वा तुल्यं मुखम्" इत्यादौ सादृश्याश्रयः तुल्यशब्दार्थः। सादृश्यान्वयि प्रतियोगित्वं तृतीयाषष्ठ्योरर्थः। तत्र यदि सादृश्यमतिरिक्तः पदार्थः तदा तत्प्रतियोगित्वमपि तथा। चन्द्रनिष्ठप्रतियोगि-तानिरूपकसादृश्याश्रयो मुखमित्यन्वयबोधः। यदि च वृत्तिमद्धर्मो भेदश्च द्वयं सादृश्यं तदा वृत्त्यन्वयि निरूपकत्वस्वरूपं प्रतियोगित्वं प्रतियोगितानिरूपि-तानुयोगिता च द्वयं तृतीयाषष्ठ्योरर्थः। तथा च चन्द्रप्रतियोगितानिरूपितानु-योगिताकभेदाश्रयः चन्द्रनिरूपकवृत्तिमद्धर्माश्रयश्च मुखमित्यन्वयबोधः।

प्रतियोग्यनुयोगिभावे तृतीया प्रकृत्यादिवार्तिकसिद्धा अन्यत्रापि दृश्यते घटेन हीनं शून्यं रहितं वा भूतलमित्यादौ हीनार्थकपदार्थैकदेशेऽभावे तृतीयार्थः प्रति-योग्यनुयोगिभावोऽन्वेति। घटनिष्ठप्रतियोगितानिरूपकाभाववत् भूतलमिति बोधः।

यत्र भेदाघटितसादृश्याश्रयः तुल्यादिपदार्थः "मुखेन तुल्यं मुखं तस्या" इत्यादौ तत्रापि वृत्त्यन्वयिनिरूपकत्वार्थिका तृतीया। मुखनिरूपकवृत्तिमद्धर्माश्रयो मुख-

[१] सू. २.३.४३
[२] सू. २.३.४
[३] पृ. २६६
[४] सू. २.३.७२

मित्यन्वयः। तुल्यपदस्य भेदांशपरिहारेण सधर्ममात्रे लक्षणायाः प्रयोजनं मुखं निरूपितमिति बोधः। स मानसिको वैयञ्जनिकः शाब्दो वेत्यन्यदेतत्।

सूत्रे अतुलोपमाभ्यामिति तुलोपमाशब्दाभ्यां योगे तृतीया न भवतीत्यर्थकम्। तेन चन्द्रेण तुलोपमा वेति न प्रयोगः।

ननु "तुलां पदारोहति दन्तवाससा" इति, "स्फुटोपमं भूतिसितेन शम्भुना" इति च कथं तर्हि प्रयोग इति चेत् —

दन्तवाससेति करणे तृतीया। तुलायामारोहणं तुलाप्रकारकज्ञानमेव। तत्र दन्त-वाससो ज्ञानं व्यापारः जन्यतयान्वेति। प्रतियोगिज्ञानं विना सादृश्यबुद्धेरभावात्। दन्तवासोज्ञानजन्यतुलाप्रकारकज्ञानं वाक्यार्थः। शम्भुनेति हेतुतृतीया।

स्फुटशब्दाऽर्थोऽभिव्यक्तः। तत्राभिव्यक्तौ शम्भुहेतुकत्वमन्वेति। तथा च शम्भु-हेतुकाभिव्यक्तिमदभिन्नोपमाश्रयभिन्नं नारदमिति बोधः। शम्भोः प्रतियोगिनः ज्ञान-द्वारा उपमाभिन्नव्यक्तिहेतुत्वम्। सूत्रे अतुलेत्यादिना प्रतियोगित्वार्थकतृतीयाया एव निषेधः। तुल्यशब्दपर्यायाः सदृशसंनिभेवसमानादयः शब्दाः। एषां योगे तृतीयां ज्ञापयितुं सूत्रेऽर्थग्रहणम्।

केचित्तु "चन्द्रेण सहोपमीयते तुल्यते" इत्यादौ सहार्थस्तदीयत्वादिः, समान-कालिकत्वादेरसम्भवात्। अत एव —

"तदुत्तमाङ्गजैः समं चमर्येव तुलाभिलाषिणः" इति श्रीहर्षः। एवं "चैत्रेण संयुज्यते समवैति वा" इत्यत्र निरूपकत्वं सहार्थः।

"निर्वैरेण सह वैरायते, निर्मत्सरेण सह स्पर्धते" इत्यादौ विषयविषयिभावः सहार्थः। सहयुक्ते तृतीया साधुत्वार्थिकेत्याहुः।

तन्न विचारसहम्। सहयुक्ततृतीयायाः निरर्थकत्वे "पुत्रेण सह आगच्छति" इत्यत्र पुत्रकर्तृकत्वानवगमप्रसङ्गात्। न च दर्शितस्थले तृतीया निरर्थिकेति वाच्यम्। तत्रापि सार्थकत्वात्। तथा हि — "चन्द्रेण सह" इत्यत्र तृतीयार्थः आधेयत्वम्। सहार्थोऽभेदः। चैत्रेणेत्यत्रापि तथैव। निर्वैरेणेत्यत्र तृतीयार्थ एव विषयविषयिभावः। सहार्थोऽभेद एव। सहपदं विना क्रियायां यत्कारकार्थक-विभक्तिः यत्पदादासज्यते सहयोगे तत्कारकार्थिका वा तृतीया तत्पदात् भवति। सहार्थविशेषणक्रिया साकाङ्क्षेति सहयुक्तसूत्रस्यार्थः। 'निर्वैराय वैरायत' इति सहशून्ययोगे चतुर्थ्या विषयविषयिभावोऽर्थ इति सहयुक्ततृतीयायाः स एवार्थः।

"ग्रामेण सह गृहं गच्छति" इत्यत्र सहपदं विना ग्रामपदात् द्वितीयैवेत्यतः सहयुक्ते कर्मत्वार्थिका तृतीयेति। चन्द्रेणेत्यत्राधेयत्वं कर्मत्वं, प्रधाने कर्मतिङ्-योगात्। चैत्रेणेत्यत्र कर्तृत्वं, कर्तृतिङ्योगात् विषयत्वं संप्रदानत्वमिति दर्शित-स्थलेऽन्वयः स्वयमूहनीयः।

"मासेन यजते, दर्शेन पौर्णमासेन वा" इत्यादौ मासपदस्य मासनाशोऽर्थः। तस्य कालविधयाङ्गत्वेन प्रयोजकतया यागहेतुत्वम् इति मासेनेति हेतुतृतीया। अथ वा प्रकृत्यादिवार्तिकेन आधेयत्वार्थिका तृतीयेति। इति तृतीयाविवरणम्

भाट्टचिन्तामणौ[१] हेताविति सूत्रार्थः

"हेतौ" हेत्वर्थे तृतीया। पुण्येन दृष्टो हरिः। अत्र तृतीयार्थस्य सहकारित्वस्य दर्शनेऽन्वयः। दृशधातोः इन्द्रियजन्यज्ञानमर्थः। तत्र सहकारित्वस्य निरूपकता-संबन्धेनान्वयः। पुण्यनिष्ठसहकारितानिरूपकं हरिकर्मकम् इन्द्रियजन्यं दर्शनमिति बोधः। पुण्यसहकृतेन्द्रियजन्यं हरिकर्मकं दर्शनमिति यावत्।

भाट्टरहस्ये[२] हेताविति सूत्रार्थः

"हेतौ"[३] इति सूत्रेण हेतुत्वं तृतीयार्थः। तच्च यद्यपि कारणत्वरूपमेव, तथापि द्रव्यादिनिरूपितत्वघटितत्वसंसर्गेण क्रियान्वयि हेतुत्वं, यथा "दण्डेन घट" इत्यादौ। धात्वर्थनिरूपितत्वेन संसर्गेण क्रियान्वयि तु कारणत्वमिति विशेषः इत्युक्तम्। अयमाशयः — सर्वेषामपि सुबर्थानां भावनायामन्वय इति व्युत्पत्तेः "दण्डेन घट" इत्यत्र जायते इत्यध्याह्रियते। तत्र तृतीयार्थः कारणत्वम्। तत्र आधेयतासंबन्धेन दण्डस्यान्वयः। कारणत्वस्य स्वनिरूपकघटवृत्त्युत्पत्त्यनुकूल-त्वसंबन्धेन आख्यातार्थभावनायामन्वयः। अत्र संबन्धमध्ये कारणतानिरूपकत्वं घटरूपद्रव्यनिष्ठं घटकम्। तुल्यवित्तिवेद्यतया कारणत्वनिष्ठं घटरूपद्रव्य-निरूपितत्वं च घटकम्। अतः द्रव्यादिनिरूपितत्वघटितेन संसर्गेणेति व्यवहृतम्। यदा तु दण्डनिष्ठस्य कारणत्वस्य स्वनिरूपकधात्वर्थोत्पत्त्यनुकूलत्वसंबन्धेन आख्यातार्थभावनायामन्वय इष्यते तदा तत् कारणत्वं करणत्वरूपमिति करणे तृतीया। अत्रापि धात्वर्थनिष्ठं कारणतानिरूपकत्वं संसर्गघटकम्, तुल्यवित्ति-वेद्यतया कारणतानिष्ठं धात्वर्थनिरूपितत्वं च संसर्गघटकमिति धात्वर्थनिरूपि-तत्वघटितेन संसर्गेणेति व्यवहृतम्। अत एव हेतुत्वे तृतीयायाः लक्षणा। क्रिया-

---

[१] पृ. ९९

[२] पृ. ११४

[३] सू. २.३.२३

द्वारकसंबन्धेन भावनान्वयिनि अर्थे शक्तिः। अन्यद्वारकसंबन्धेनान्वयिन्यर्थे लक्षणेति व्यवस्थापनात् इति।

अथ वा अखण्डोपाधिरूपकारणत्वे शक्तिः। तत्परिचायके सखण्डोपाधौ लक्षणेति पृथगनुशासनम्।

फलादिसाधारणं च तत्। अध्ययनेन वसति। तादर्थ्यमात्रं तृतीयार्थः। एवम् "अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया"[१] इति वार्तिकात् 'दास्या संयच्छत' इत्यत्र तृतीया। दास्यै ददातीत्यर्थः। शिष्टव्यवहारे तु "भार्यायै संयच्छते"। अयं च सर्वोऽपि शक्यलक्ष्यसाधारणस्तृतीयार्थः लिङ्गानन्वयिपदोपात्तायां भावनायां श्रुतायां गम्यमानायां वा अन्वेति। यथा "शतेन वत्सान् पाययति पयः" शतेन परिच्छिन्नानित्यर्थः। परिच्छेदं प्रति शतस्य करणत्वात्। अत्र गम्यमानत्वमध्याहृतपदेनेति बोध्यम्। 'अलं श्रमेण' इत्यत्र तु न गम्यमाना। अलमिति निपातेनैव साध्यं नास्तीत्यर्थकेन साधनक्रियाया उपात्तत्वात्।

इति तृतीयार्थविचारः।

---

[१] वा. ५०४०

चतुर्थ्यर्थविचारः

चतुर्थी संप्रदाने इति सूत्रार्थविचारः

"चतुर्थी संप्रदाने "[१] इति सूत्रेण संप्रदाने चतुर्थी विहिता। "कर्मणा यमभिप्रैति स संप्रदानम्"[२] इति सूत्रेण संप्रदानसंज्ञा विवृता। दानक्रियायाः कर्मकारकेण यमभिप्रैति शेषित्वेनाध्यवस्यति स संप्रदानमित्यर्थः। शेषित्वं भोक्तृत्वम्। संप्रदीयते यस्मै तत् संप्रदानमित्यन्वर्थसंज्ञैषा। देयद्रव्योद्देश्यं संप्रदानमिति फलितम्। "विप्राय गां ददाति" इत्युदाहरणम्। विप्रमुद्दिश्य गां ददातीत्यर्थः। अनभिहिते इत्यनुवर्तते। तेन "दानीयो विप्रः" इत्यत्र विप्रशब्दान्न चतुर्थी। तत्र हि "कृत्यल्युटो बहुलम्"[३] इति बहुलग्रहणात् संप्रदाने अनीयर्। दानोद्देश्य इत्यर्थः। तेन कृत्प्रत्ययेन संप्रदानस्य विप्रस्याभिहितत्वान्न चतुर्थी।

ननु दानक्रियाकर्मोद्देश्यस्यैव संप्रदानत्वे "पत्ये शेते" इत्यत्र अकर्मकशयनक्रियोद्देश्यस्य पत्युः कथं संप्रदानत्वम् इति चेत् — न। "क्रियाग्रहणमपि कर्तव्यम्"[४] इति वार्तिकेन क्रियया यमभिप्रैति सोऽपि संप्रदानमिति बोधनात्। दानातिरिक्तक्रियोद्देश्यमपि संप्रदानमिति तदर्थः। "पत्ये शेते" इत्यस्य पतिमुद्दिश्य शेत इत्यर्थः।

नन्वेवमपि "ओदनं पचति" इत्यादावोदनादेः कर्मणोऽपि पाकक्रियोद्देश्यत्वात् संप्रदानत्वप्रसङ्गः। न च कर्मसंज्ञाविधिवैयर्थ्यं शङ्कनीयम्। अत एव तत्र कर्मत्वसंप्रदानत्वयोर्विकल्पोपपत्तेरिति संप्रदानसंज्ञायाः सकर्मकस्थले कर्मसंज्ञया बाधात्। तथा चाकर्मकक्रियोद्देश्यमपि संप्रदानमिति फलति।

"कर्मणः करणसंज्ञा संप्रदानस्य च कर्मसंज्ञा"[५] इति वार्तिकम्। एकस्मिन् वाक्ये कर्मणः संप्रदानस्य च समवाये सति इति शेषः। यजधातुमात्रविषयमिदम्। "पशुना रुद्रं यजते"। पशुं रुद्राय ददातीत्यर्थः। इदं वार्तिकं छन्दस्येवेति कैयटः।

---

१ सू. २.३.१३
२ सू. १.४.३२
३ सू. ३.३.११३
४ वा. १०८५
५ वा. १०८६

प्रौढमनोरमायां विशेषाः[१]

अन्वर्थसंज्ञाबलेनाह — दानस्येति। तेन "अजां ग्रामं नयति, हस्तं निदधाति वृक्षे" इत्यादौ ग्रामादेर्न संप्रदानत्वम्। दानं च स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वोत्पादनम्। अत एव 'रजकस्य वस्त्रं ददाति' इत्यत्र न भवति। स्वस्वत्वनिवृत्त्यभावात्। तत्र ददातिः अधीनीकरणरूपेऽर्थे भाक्तः। एतच्च वृत्तिकृन्मतम्। भाष्यमते तु नान्वर्थतायामाग्रहः। "खण्डिकोपाध्यायस्तस्मै चपेटां ददाति" इति प्रयोगात्। "रजकस्य वस्त्रं ददाति" इति तु शेषत्वविवक्षायां बोध्यम्।

["खण्डिकोपाध्यायः चपेटां ददाति" इत्यत्र चपेटशब्दार्थः प्रसृतकरतलम्। दाधातोः कपोलप्रसृतकरतलोभयसंयोगानुकूलव्यापारोऽर्थः। शेषित्वं प्रधानत्वम् उद्देश्यत्वम्। शेषत्वमप्रधानत्वम्।] न चैवम् "अजां नयति ग्रामम्" इत्यत्रापि प्रसङ्ग इति वाच्यम्। "यमभिप्रैति" इत्युक्त्या हि यमिति निर्दिष्टस्य शेषित्वम्, कर्मणश्च शेषत्वं लभ्यते। ग्रामस्य अजां प्रति शेषित्वं नास्ति। यद्यपि ग्रामसंस्कारार्थमजाया नयने ग्रामस्योद्देश्यत्वमस्ति। ग्रामसंस्कारश्च अजीयपुरीषसंबन्धेनाधिकसस्यसंपत्त्या ग्रामस्य विलक्षणा सुषमा। अथापि "कर्तुरीप्सिततमं कर्म"[२] इति कर्मसंज्ञायाः संप्रदानसंज्ञापेक्षया परत्वात् तया संप्रदानसंज्ञया बाधात् न ग्रामपदोत्तरं चतुर्थी इति शब्दरत्ने।

लघुशब्देन्दुशेखरे विशेषाः

भाष्यानुसारेण कथिताः। यथा — दानस्येति। दाधात्वर्थस्येत्यर्थः। इदमुपलक्षणं क्रियासमान्यस्य । अत एव भाष्ये — क्रियाग्रहणं कर्तव्यम्, इहापि यथा स्यात् "श्राद्धाय निगर्हते, युद्धाय संनह्यते, पत्ये शेते" इति। तर्हि वक्तव्यम्। न वक्तव्यम्। कथम्। क्रियां हि नाम लोके कर्मेत्युपचरन्ति "कां क्रियां करिष्यसि किं कर्म करिष्यसि" इत्युक्तम्। श्राद्धायेति। श्राद्धं निन्दति नास्तिकत्वात्। युद्धायेति। युद्धविषयकं संनहनपूर्वकं निश्चयं करोतीत्यर्थः। 'पत्ये शेत' इति। पतिमुपसृत्य शेत इत्यर्थः। कर्मणेति। संबन्धुमिति शेषः। अभिप्रैति इच्छति। एवं च उच्चरितवाक्यघटकधात्वर्थक्रियाकर्मसंबन्धवत्त्वेनेच्छाविषयो यः स संप्रदानं स्यात्। संबन्धश्च स्वत्वादिरूपः। संप्रदानत्वशक्तिमान् चतुर्थ्यर्थः। विप्रसंप्रदानकं दानमिति बोधः।

---

[१] पृ. ९०४

[२] सू. १.४.४९

कर्मणेति किम्। तदभावे हि यमभिप्रैति स संप्रदानम् इत्युक्ते उद्देश्यं संप्रदानसंज्ञमित्यर्थः स्यात्। तथा सति कर्मणोप्युद्देश्यतया अन्तरङ्गत्वात् तस्यैव संप्रदानसंज्ञा स्यात्। अन्तरङ्गत्वं च प्रथमतोऽस्य धात्वर्थफलाश्रयत्वप्रकारकेच्छा, ततो विप्रादेस्तत्संबन्धित्वप्रकारकेच्छेति। न च कर्मसंज्ञाविधानवैयर्थ्यम्। विकल्पेन तस्या अपि संभवात्।

यंसग्रहणं किमर्थम्। तदभावे क्रियाकर्मणा योऽभिप्रैति ब्राह्मणादिः तस्य कर्तुः संप्रदानसंज्ञा स्यात्। कर्तुसंज्ञा तु अकर्मकविषये सावकाशा। न च कर्तुः कर्तृत्वाभावे कथं गोः कर्मत्वम्, कर्तुरीप्सिततमं हि कर्म इति वाच्यम्। कर्मसंज्ञाविधायकसूत्रस्थकर्तृपदस्य स्वतन्त्रार्थकत्वात्। स्वतन्त्रत्वं च धात्वर्थप्रधानीभूतव्यापाराश्रयत्वम्। तच्च प्रकृते कर्तृसंज्ञाविरहेऽप्यक्षतम्।

ननु कर्मणेत्युक्तावकर्मकक्रियोद्देश्यस्य संप्रदानत्वं न स्यादत आह — क्रियया यमभिप्रैति सोऽपि संप्रदानमिति। क्रिययेत्यस्य कर्मरहितक्रिययेत्यर्थः। अतः "पत्ये शेते" इत्यादौ चतुर्थ्युपपत्तिः। एवं च क्रियाकर्मसंबन्धितया इष्यमाणं क्रियोद्देश्यं च संप्रदानसंज्ञं स्यादित्युक्तं भवति। सकर्मकेषु कर्मणः कर्मसंज्ञा अस्या बाधिका।

भूषणसाररीत्या संप्रदानचतुर्थ्यर्थः

उद्देश्यः चतुर्थ्यर्थः। तथा हि संप्रदाने चतुर्थी। तच्च संप्रदानं "कर्मणा यमभिप्रैति स संप्रदानम्"[1] इति सूत्रात् कर्मणा संबन्धुं यमभिप्रैति इच्छति तत् कारकं संप्रदानमित्यर्थकात् उद्देश्यमेव। उद्देश्यत्वमेव शेषित्वम्। तदुद्देश्यकेच्छाविषयत्वं शेषत्वम्। उद्देश्यत्वं च क्रियाकर्मसंबन्धितयेच्छाविषयत्वम्। शेषित्वस्य संप्रदानत्वरूपत्वादेव "क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति" इत्यत्र चतुर्थ्या मैत्रावरुणस्य शेषित्वप्रतिपादनात् दण्डदानस्यार्थकर्मत्वं मीमांसकोक्तं संगच्छते। तथा हि "प्रासनवन्मैत्रावरुणाय दण्डप्रदानम्" इत्यधिकरणे प्रासनवत् दण्डप्रदानं प्रतिपत्तिकर्मेति पूर्वपक्षं कृत्वा अर्थकर्मेति सिद्धान्तितम्। प्रासनदृष्टान्तश्चायं ज्योतिष्टोमे श्रूयते — "नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यति" इति। यदा यजमानेन दत्ता दक्षिणा ऋत्विग्भिर्नीताः तदा यजमानः स्वहस्ते धृतं कृष्णमृगशृङ्गं चात्वालनामकगर्ते प्रक्षिपेदिति तदर्थः। तत्र संदेहः किमिदं प्रासनमर्थकर्म, अथ वा प्रतिपत्तिकर्मेति। अर्थकर्मैव भवितुमर्हति, सप्रयोजनत्वात्। प्रतिपत्तिकर्मतायां तु अपूर्वाभावेन निरर्थकमेव स्यादिति पूर्वपक्षे — "कृष्णविषाणया कण्डूयति" इति कण्डूयने उपयुक्तत्वेन कृतार्थतया प्रतिपत्त्यपेक्षत्वात् प्रतिपत्तिकर्मतैव युक्ता। न

---

[1] सू. १.४.३२

चानर्थक्यम्। प्रासनक्रियाप्रयुक्तापूर्वाभावेऽपि चात्वाले एव प्रास्यति इति नियमापूर्वसद्भावादिति सिद्धान्तितम्। तद्वत् दण्डदानं प्रतिपत्तिकर्मेति न मन्तव्यम्। अपि तु अर्थकर्मैवेति प्रकृतम्। तथा हि — ज्योतिष्टोमं प्रकृत्य श्रूयते "क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति" इति। इदं दण्डदानं अर्थकर्म वा प्रतिपत्तिकर्म वेति संदेहे अध्वर्युणा दीक्षासिद्धये दत्तस्य दण्डस्य आसोमक्रयात् यजमानकर्तृकधारणेन कृतार्थत्वात् उपयुक्तस्य तस्य दानं प्रतिपत्तिकर्मैवेति पूर्वपक्षे — "दण्डी प्रैषानन्वाह" इति श्रवणात् मैत्रावरुणस्य प्रैषानुवादेऽवलम्बनाय दण्डोऽपेक्षितः। एवं च भविष्यदुपयोगसद्भावात्, उपयुक्तसंस्काररूपात् प्रतिपत्तिकर्मणः दण्डदानस्य उपयोक्ष्यमाणसंस्काररूपत्वेन प्राशस्त्याच्चार्थकर्मतैवोचिता। अर्थकर्मत्वे च शेषित्वं प्रयोजकम्। तच्च चतुर्थीश्रुत्या मैत्रावरूणस्य बोध्यते।

"रजकाय वस्त्रं ददाति" इत्यपि, "खण्डिकोपाध्यायः शिष्याय चपेटां ददाति" इति भाष्योदाहरणात् इष्टमेव।

वृत्तिकारास्तु — सम्यक् प्रदीयते यस्मै तत् संप्रदानमिति अन्वर्थसंज्ञया स्वस्वत्वनिवृत्तिपर्यन्तमर्थं दाधातोः वर्णयन्तः स्वस्वत्वनिवृत्त्यभावात् "रजकस्य वस्त्रं ददाति" इत्येव साधुरिति वदन्ति।

इदं च संप्रदानम् —

अनिराकरणात् कर्तुस्त्यागाङ्गं कर्मणेप्सितम्।
प्रेरणानुमतिभ्यां च लभते संप्रदानताम्।।

इति वाक्यपदीयात् त्रिविधम्। त्यागाङ्गं कर्मणा ईप्सितं कर्तुः अनिराकरणात्, कर्तुः प्रेरणात्, कर्तुरनुमतेश्चेति त्रिभिः हेतुभिः संप्रदानव्यपदेशं लभते इत्यर्थः। स्वनिष्ठोद्देश्यतानिरूपकत्वसंबन्धेन समभिव्याहृतधात्वर्थे त्यागे विशेषणतया प्रतीयमानत्वं त्यागाङ्गत्वम्। स्वं — संप्रदानम्।

"सूर्याय अर्घ्यं ददाति" इति आद्यम्। नात्र सूर्यः प्रार्थयते, नानुमन्यते, न निराकरोति। "विप्राय गां ददाति" इति द्वितीयम्। विप्रोत्र दातुः प्रेरकः। "उपाध्यायाय गां ददाति" इति तृतीयम्। उपाध्यायः अनुमन्ता। अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोः अभेदः संसर्गः। विप्राभिन्नोद्देश्यकं दानमिति बोधः।

अथ वा संप्रदानत्वशक्तिः चतुर्थ्यर्थः। उद्देश्यत्वरूपा सा। आधेयत्वं प्रकृत्यर्थसंसर्गः। चतुर्थ्यर्थस्य निरूपकतया धात्वर्थेऽन्वयः इति पक्षान्तरमप्युपन्यस्तम्।

लघुमञ्जूषोक्तप्रकारेण संप्रदानचतुर्थ्यर्थः[१]

कारकचतुर्थ्याः संप्रदानत्वशक्तिमानर्थः। सा शक्तिश्च तद्धात्वर्थकर्मनिष्ठफल-निरूपकत्वेनेच्छाविषयो यस्तन्निष्ठा। यथा "विप्राय गां ददाति" इत्यत्र दानकर्म गौः तन्निष्ठं फलं स्वत्वं तन्निरूपकत्वेन दातुः इच्छाविषयः विप्रः। विप्रः गोनिष्ठ-दानजन्यस्वत्वनिरूपको भवतु इति दातुरिच्छा। "कर्मणा यमभिप्रैति स संप्र-दानम्"[२] इति सूत्रादयमर्थो लभ्यते। कर्मणा संबन्धुं यमिच्छति — कर्मनिष्ठफल-निरूपकत्वेन यमिच्छति स संप्रदानमिति सूत्रार्थात्।

यत्तु तद्धात्वर्थकर्मसंबन्धजन्यफलं गोलाभजन्यसुखादि तद्भागित्वेन य इच्छा-विषयः स संप्रदानमिति। तन्न। सूत्राक्षरैर्वाच्यवृत्त्या उक्तार्थालाभात्, तथा शाब्द-बोधाभावाच्च।

यदपीच्छाविषयत्वमेवोद्देश्यत्वमिति भूषणादावुक्तं, तदपि न। देवो रूपवानि-त्यादौ उद्देश्यविधेयभावेनान्वयात् देवे उद्देश्यत्वप्रतीतावपि इच्छाविषयत्वाप्रतीतेः। तस्मात् उद्देश्यत्वम् उद्देश्यपदशक्यतावच्छेदकतया सिद्धं पदार्थान्तरमेव। क्वचित् तत् इच्छाविषयत्वसमानाधिकरणकं भवतीति तु अन्यत्।

"विप्राय गां ददाति" इत्यत्र संप्रदानं चतुर्थ्यर्थः। तत्राभेदेन विप्रस्यान्वयः। संप्रदानस्य स्वनिष्ठोद्देश्यतानिरूपकत्वसंबन्धेन धात्वर्थदानेऽन्वयः। विप्राभिन्नसंप्र-दाननिष्ठोद्देश्यतानिरूपकं दानमित्यन्वयबोधः।

वस्तुतस्तु संप्रदानविप्रीयमिति विप्राभिन्नसंप्रदानकं दानमिति वा बोधः। क्रिया-कारकभावः संबन्धः इति द्वितीयोक्तदिशा बोध्यम्।

"पितृभ्यः श्राद्धं दद्यात्" इत्यत्र श्राद्धे पितृनिरूपितस्वत्वं न जायते। पितृभिः प्रतिग्रहाभावात्। अतः स्वस्वत्वनिवृत्तिपूर्वकपरमात्रस्वत्वापत्त्यनुकूलव्यापाररूपो दाधात्वर्थः तत्र बाधितः। उद्देश्यत्वस्य चतुर्थ्यर्थत्वे तु तत्र ब्राह्मणनिरूपित-स्वत्वोत्पत्तावपि पितॄणां तादृशधात्वर्थं प्रति उद्देश्यत्वसत्त्वात् पित्रभिन्नसंप्रदान-निष्ठोद्देश्यतानिरूपकः स्वस्वत्वनिवृत्त्यनुकूलो व्यापारः इति बोधस्वीकारात् नानुप-पत्तिः।

क्वचित् प्रतिग्रहः परस्वत्वहेतुः। क्वचित् स्वस्वत्वनिवर्तकस्त्यागोऽपि परस्व-त्वहेतुः। यथा काशीं गतः कश्चित् तत्र स्वग्रामस्थितं कंचित् सत्पात्रविशेषमुद्दिश्य

---

[१] ल.म.पृ. १२६१

[२] सू. १.४.३२

धनं "तस्मा इदं न मम" इति त्यक्तवान्। स च पात्रभूतपुरुषः त्यक्तधनस्वीकारात् प्रागेव मृतः। तथापि तत्पुत्रादयः पितृदायत्वेन काश्यां त्यक्तं धनं गृह्णन्ति नान्ये इति लोकव्यवहारः। अतस्तत्र पात्रविशेषोद्देश्यकत्वं दानेऽक्षतमिति पात्रविशेषाय ददाति इति प्रयोगस्योपपत्तिः। न च तर्हि प्रतिग्रहो व्यर्थ इति वाच्यम्। तस्य फलातिशयजनकत्वात्। फलातिशयश्च दातुः "लब्धावष्टगुणं पुण्यम्" इत्युक्तेः। दात्रा दत्तं धनं उद्दिष्टः पुरुषः प्रतिगृह्णाति चेत् दातुरष्टगुणं पुण्यं भवतीति तदर्थः। अदृष्टार्थं दत्तस्य स्वीकार एव प्रतिग्रह इत्युच्यते। तेन परितोषेण दत्तस्य वस्तुनः तिलतुरगादेः स्वीकारः न प्रतिग्रह इति तत्स्वीकारे न प्रतिग्रहप्रयुक्तः प्रत्यवायः।

एवं च स्वस्वत्वनिवृत्तिपूर्वकपरमात्रस्वत्वोत्पत्त्यनुकूलव्यापाररूपस्त्यागो दाधात्वर्थः। तत्र मात्रपदस्य प्रयोजनं कथ्यते। पित्रादिभिः धर्मशास्त्रानुसारेण पुत्रेभ्यो धनं विभज्यते। पुनरपि प्रेमातिशयेन मिश्रीकृतं तद्धनं संसृष्टमित्युच्यते। संसृष्टमस्यास्तीति संसृष्टः। स च न यः कश्चित्। किं तु—

विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः।
पितृव्येणाथ वा प्रीत्या स तत्संसृष्ट उच्यते।।

इति बृहस्पत्युक्तेः। स्पष्टं चेदं "संसृष्टिनस्तु संसृष्टि"[१] इत्यत्र मिताक्षरायाम्। एवं चात्रापि संसृष्टिनोऽनुजादेः स्वत्वोत्पत्त्या ददातीति प्रयोगापत्तिः। अतो दाधात्वर्थे परमात्रेति मात्रपदम्। अत्र च परस्यैव स्वत्वमुत्पद्यत इति न, किं तु स्वस्यापि। अतो न तत्र ददातीति प्रयोगः। तत्रासाधारणस्वत्वनाशोत्तरं साधारणं स्वत्वमुत्पद्यते। स्वत्ववति स्वत्वान्तरोत्पत्त्यसंभवात् पूर्वतनस्य स्वत्वस्य नाशोऽङ्गीक्रियते। स्वत्वान्तरेच्छाविरहविशिष्टं स्वत्वं स्वत्वान्तरप्रतिबन्धकमिति अङ्गीकारे च गौरवम्। उपेक्षा तु न नियमतः परस्वत्वोत्पादिकेति न तत्र ददातीति प्रयोगः।

यत्तु मूल्यग्रहणपूर्वकं दानमेव च विक्रयः इति तत्रापि मुख्यमेव संप्रदानत्वं चतुर्थ्या बोध्यत इति शब्दशक्तिप्रकाशिकायां तर्कालंकारैरुक्तम्। तन्न। विक्रयस्य स्वत्वाजनकत्वात्। मूल्यदानपूर्वकस्वीकाररूपक्रयस्यैव स्वत्वजनत्वात्। एवं च विक्रयस्थले ददातीति प्रयोगो न साधुः।

स्वत्वं च दानादिनाश्यं प्रतिग्रहादिजन्यमतिरिक्तपदार्थरूपम्। तच्च बहिरिन्द्रियवेद्यम्। स्वं पश्यामीत्यादिव्यवहारात्। तत्साक्षात्कारे च तदीयस्वत्वव्याप्यतदीययथेष्टविनियोज्यत्ववदिदम् इति ज्ञानं हेतुः।

१ याज्ञ.स्मृति. २-१३८

अनिराकरणात्कर्तुरित्यादिना संप्रदानत्रैविध्यं भूषणोक्तवदेव लघुमञ्जूषायामप्युक्तम्। तच्चोपपादितं प्राक्। "पत्ये शेते" इत्याद्यकर्मकस्थले प्रकृतधात्वर्थकर्मण एवाप्रसिध्या कर्मणा यमभिप्रैतीति निरुक्तसंप्रदानत्वनिर्वाहः कथमिति शङ्कायां शेखरादौ प्रदर्शितान्निर्वाहादन्य एव निर्वाहः लघुमञ्जूषायां प्रदर्शितः। शेख-रोक्तनिर्वाहस्तु पूर्वमनूदितः। लघुमञ्जूषोक्तनिर्वाहः इदानीमनूद्यते। सूत्रे "कर्मणा" इत्येवोक्तम्। कस्याः क्रियायाः कर्मणेति क्रियाविशेषो न निर्दिष्टः। यथासंभवं क्रिया उन्नेयेति तदाशयः। निर्दिष्टाया अनिर्दिष्टाया वा क्रियायाः कर्मणेति सूत्रतात्पर्यम्। "पत्ये शेते" इत्यत्र कर्मपदेन शयनं ग्राह्यम्। तदपि हि संदर्शनप्रार्थनव्यवसायैः जन्या या आरम्भरूपा क्रिया तस्याः कर्मकारकं भवति। फलविषयकः संकल्पः संदर्शनम्। तज्जन्यः फलोपायविषयकोऽभिलाषः प्रार्थना। तज्जन्यः क्रियाविशेषस्य फलसाधनत्वनिश्चयः अध्यवसायः। तज्जन्या मानसी प्रवृत्तिः आरम्भः। तेन आप्यमानत्वात् शयनक्रिया कर्म। शयनेन संबन्धुं पतिमिच्छति भार्येति पत्युः संप्रदानता। पतिसंप्रदानकं पत्नीकर्तृकम् आरम्भणकर्मभूतं शयनमिति बोधः। तदुक्तं हरिणा —

संदर्शनं प्रार्थनायां व्यवसाये त्वनन्तरा।
व्यवसायस्तथारम्भे साधनत्वाय कल्पते।।
पूर्वस्मिन् या क्रिया सैव परस्मिन् साधनं मता। इति।

संदर्शनं प्रार्थनायां साधनम्। व्यवसाये प्रर्थना साधनम्। व्यवसायः आरम्भे साधनम्। पूर्वस्मिन् काले या क्रिया सा परस्मिन् उत्तरकालभाविनि साधनमिति तदर्थः। संदर्शनं तु न क्रियासाध्यम्। अनवस्थाप्रसङ्गात्। किं तु फलाभिलाषयोग्यताविशिष्टं चैतन्यमेव संदर्शने साधनम्। "कर्मणा यमभिप्रैति०"[१] इति सूत्रे भाष्येऽपि सर्वमिदं स्पष्टमुक्तम्। तत्रत्यं भाष्यं तावत् — "क्रियाग्रहणमपि कर्तव्यम् इहापि यथा स्यात् श्राद्धाय निगर्हते, युद्धाय संनह्यते, पत्ये शेते इति। तर्त्तहि वक्तव्यम्। न वक्तव्यम्। क्रियापि कृत्रिमं कर्म। क्रियापि क्रियया ईप्सिततमा भवति। कया क्रियया। संदर्शनक्रियया प्रार्थयतिक्रियया, अध्यवस्यतिक्रियया। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुद्ध्या तावत् कंचिदर्थं पश्यति। संदृष्टे प्रार्थना। प्रार्थनायाम् अध्यवसायः। अध्यवसाये आरम्भः। आरम्भे निर्वृतिः। निर्वृत्तौ फलावाप्तिः। एवं क्रियापि कृत्रिमं कर्म" इति।

न चैवं "कटं करोति. तण्डुलं पचति" इत्यादावपि निरुक्तरीत्या धात्वर्थक्रियायाः कृत्रिमकर्मत्वे तेनाभिप्रेयमाणस्य कटतण्डुलादेरपि संप्रदानत्वापत्तिरिति

---

[१] सू. १.४.३२

वाच्यम्। अनभिधानात्। तथा प्रयोगविरहात्। अरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोपः। "कर्तरि कर्मव्यतिहारे"[१] इति सूत्रे भाष्येऽपि पूर्वोक्ताः पङ्क्तयो द्रष्टव्याः।

"क्रियया यमभिप्रैति स संप्रदानम्"[२] इति वार्तिकमते तु पतिसंप्रदानकं शयनमिति बोधः। तत्तत्संज्ञासूत्रैः तत्तदर्थे तत्तत्कारकशक्तिमत्त्वबोधनात्।

"पशुना रुद्रं यजते" इत्यत्र फलाश्रयस्य पशोः करणत्वशक्तिमत्त्वं, संप्रदानस्य च रुद्रस्य कर्मत्वशक्तिमत्त्वं "कर्मणः करणसंज्ञा संप्रदानस्य च कर्मसंज्ञा"[३] इति वार्तिकेन बोध्यते। पशुकरणको रुद्रकर्मको यागः इति बोधः। "अग्नौ किल पशुः प्रक्षिप्यते, तद्रुद्रायोपह्रियते" इति भाष्यम्। रुद्रं देवतामुद्दिश्य पशुमग्नौ त्यजतीत्यर्थः।

कारकचक्रानुसारेण संप्रदानत्वनिर्वचनम् [४]

"कर्मणा यमभिप्रैति स संप्रदानदम्"[५] इति सूत्रम्। तत्क्रियाकारणीभूतेन तत्क्रियाकर्मणा यं संबन्धीकर्तुमभिप्रैति कर्ता स सम्प्रदानमिति सूत्रार्थः। एवं च तत्क्रियाकारणीभूतकर्मजन्यफलभागित्वेनोद्देश्यत्वं संप्रदानत्वमिति पर्यवसितम्। "चैत्रो ग्रामं गच्छति" इत्यत्र गमनकर्मग्रामजन्यफलभागित्वेनोद्देश्यत्वस्य चैत्रे सत्त्वात् तस्य संप्रदानत्ववारणाय कारणीभूतेति कर्मविशेषणम्। तत्र गमने कर्मणः ग्रामस्याकारणत्वान्न दोषः। दानादौ च गवादिदेयद्रव्यं कारणमिति तज्जन्यफलाश्रयस्य विप्रादेः संप्रदानत्वम्। "काष्ठैः स्थाल्यामोदनं पचति" इत्यादौ पाकक्रियाकारणजन्यविक्लित्त्यादिफलभागित्वेन ओदनस्योद्देश्यत्वात् तस्य संप्रदानत्ववारणाय कर्मेति।

तथा च "विप्राय गां ददाति" इत्यत्र जन्यफलप्रकारकेच्छापूर्वकत्वं चतुर्थ्यर्थः। तदेकदेशजन्यत्वे व्युत्पत्तिवैचित्र्यात् अप्रकृत्यर्थस्यापि कर्मणो गोः निरूपितत्वसंबन्धेनान्वयः। स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यवच्छिन्नत्यागः दाधातोरर्थः। तत्र चतुर्थ्यर्थस्य स्वरूपसंबन्धेनान्वयः। आख्यातार्थः कृतिः। इच्छायां प्रकृत्यर्थस्य विषयतया = उद्देश्यतासंबन्धेनान्वयः। एवं च विप्रविषयकगोजन्यफलप्रकारकेच्छा-

---

[१] सू. १.३.१४
[२] वा. १०८५
[३] वा. १०८६
[४] का.च.पृ. ५५
[५] सू. १.४.३२

पूर्वकगोवृत्तिस्वनिरूपितस्वत्वध्वंसपूर्वकपरस्वत्वावच्छिन्नत्यागानुकूलकृतिमानित्य-न्वयबोधः। स्वं = दाता। परः = विप्रः।

पितृस्वर्गमुद्दिश्य कृते गोदाने दानजन्यफलभागित्वेन पिता उद्देश्यः, न तु गोजन्यफलभाक्त्वेनेति पित्रादेर्न संप्रदानत्वम्। अतो न तदानीं 'पितृभ्यो गां ददाति' इति प्रयोगः, अपि तु "विप्राय गां ददाति" इत्येव। यदि च गोदातुः "मया दत्ता गौः पितुः स्वर्गमुत्पादयिष्यति" इतीच्छा, तदा अदृष्टाद्वारककर्मजन्यत्वं संप्र-दानशरीरे प्रवेशनीयम्। प्रकृते तु स्वजन्यदानजन्यादृष्टद्वारकमेव दानकर्मगवादि-जन्यत्वं स्वर्गे इति पित्रादेः संप्रदानत्ववारणम्। एवं चतुर्थ्यर्थघटकं जन्यत्वमपि अदृष्टाद्वारकं ग्राह्यम्। तेन तत्र 'पित्रे गां ददाति' इति प्रयोगस्य नापत्तिः।

केचित्तु संप्रदानत्वलक्षणघटकं फलं धात्वर्थतावच्छेदकत्वेन विशेषणीयम्। तथा च तद्धात्वर्थकारणीभूतकर्मजन्यतद्धात्वर्थतावच्छेदकफलभागित्वेनोद्देश्यत्वं संप्रदानत्वम्। निरूपितत्वेनेच्छाविषयत्वं चतुर्थ्यर्थः। स च धात्वर्थतावच्छेदके फलेऽन्वेति। निरूपितत्वे प्रकृत्यर्थस्य विप्रस्यान्वयः। इत्थं च विप्रनिरूपितत्वे-नेच्छाविषयो यत् गोवृत्तिस्वत्वध्वंसपूर्वकपरस्वत्वं तदुत्पत्त्यवच्छिन्नत्यागानुकूल-कृतिमानित्यन्वयबोधः। जन्यत्वस्य गोवृत्तित्वे लब्धे अर्थात् गोजन्यत्वमपि लभ्यत एवेति तादृशगोजन्यस्वत्वनिरूपकत्वेनोद्देश्यत्वं विप्रस्याक्षतम्।

"वृक्षायोदकमासिञ्चति" इत्यादौ संयोगावच्छिन्नद्रवद्रव्यक्रियावच्छिन्नव्यापारो धात्वर्थः। वृत्तित्वेनेच्छाविषयत्वं चतुर्थ्यर्थः। स च धात्वर्थतावच्छेदकतावच्छेदके संयोगेऽन्वेति। द्वितीयायाः वृत्तित्वमर्थः। तस्य धात्वर्थतावच्छेदकक्रियायामन्वयः। एवं च वृक्षवृत्तित्वेनेच्छाविषयसंयोगावच्छिन्नजलवृत्तिद्रवद्रव्यक्रियावच्छिन्नव्यापारा-नुकूलकृतिमान् चैत्रः इत्यन्वयबोधः।

न चैवं सिचधात्वर्थतावच्छेदकद्रवद्रव्यक्रियायां द्वितीयार्थस्य वृत्तित्वस्यान्वये "पयसा वृक्षमासिञ्चति" इति प्रयोगो न स्यात्, तादृशक्रियायाः वृक्षवृत्तित्वा-भावादिति वाच्यम्। तत्र संयोगावच्छिन्नद्रवद्रव्यक्रियाया एव धात्वर्थतया तदव-च्छेदकीभूतसंयोग एव वृक्षवृत्तित्वान्वयात्। तथा च तत्र वृक्षवृत्तिसंयोगावच्छिन्न-पयःकरणकद्रवद्रव्यक्रियानुकूलकृतिमानिति बोधः। द्रवद्रव्यसंयोग एव धात्वर्थ इति तु न युक्तम्। तथा सति फलावच्छिन्नव्यापाराबोधकत्वेन धातोरकर्मकत्वे-धात्वर्थतावच्छेदकफलशालित्वाभावेन वृक्षादेः कर्मता न स्यात्। एवं च क्वचित् सिचधातोः संयोगावच्छिन्नद्रवद्रव्यक्रिया अर्थः "पयसा वृक्षमासिञ्चति" इत्यादौ। क्वचित्तु संयोगावच्छिन्नद्रवद्रव्यक्रियानुकूलव्यापारोऽर्थः 'वृक्षायोदकमासिञ्चति' इत्यादौ। अत एव 'अजां ग्रामं नयति' इतिवत् द्विकर्मकत्वं सिचधातोः नाशङ्क-

नीयम्। प्रथमपक्षे धात्वर्थतावच्छेदकफलद्वयाभावात्। द्वितीयपक्षे तु क्रियायामेव द्वितीयार्थवृत्तित्वान्वयः। संयोगे तु चतुर्थ्यर्थस्योद्देश्यत्वस्यैवान्वयात्। फलबलेन तथैव व्युत्पत्तिकल्पनात्।

न चैवम् "अजां ग्रामं नयति" इत्यत्र ग्रामस्य संप्रदानत्वापत्तिः, ग्रामस्य अजाजन्यसंयोगरूपफलभागित्वेनोद्देश्यत्वात् इति वाच्यम्। तत्र हि ग्रामस्य संयोगाश्रयत्वमेव प्रतीयते न तु संयोगाश्रयत्वेनोद्देश्यत्वम्। तथा हि — संयोगजनकगमनानुकूलव्यापारो धात्वर्थः। द्वितीयाद्वयस्यापि वृत्तित्वमर्थः। संयोगे ग्रामवृत्तित्वस्य, गमनेऽजावृत्तित्वस्यान्वयः। एवं च ग्रामवृत्तिसंयोगजनकाजावृत्तिगमनानुकूलव्यापारानुकूलकृतिमान् इत्यन्वयधीः। तथा चाजाजन्यफलभागितया उद्देश्यत्वेन ग्रामस्याप्रत्ययात् न संप्रदानता। यदा तु तथा उद्देश्यत्वं ग्रामस्य विवक्ष्यते, तदा ग्रामायाजां नयतीति प्रयोगो भवत्येवेत्याहुः।

वस्तुतस्तु त्यक्तुः त्यज्यमानद्रव्यगतस्वत्वभागित्वेन य उद्देश्यः स संप्रदानम्। दानरूपस्त्यागविशेषः विवक्षितः। तेन विक्रयादौ क्रेत्रादेर्न संप्रदानता। श्राद्धादौ पित्रादेर्न स्वत्वभागित्वेनोद्देश्यत्वमिति न संप्रदानता। अत एव संप्रदानचतुर्थ्यसंभवात् "इदं पित्रे नमः" "पितृभ्यः स्वधा" इत्यादौ "नमः स्वस्ति०"[1] इत्यादिसूत्रान्तरेण चतुर्थीविधानम्। "रुद्राय गां ददाति" इत्यादौ तु रुद्रादेः स्वत्वभागित्वेनोद्देश्यत्वात् संप्रदानता। "कर्मणा यमभिप्रैति०"[2] इति सूत्रमप्येवम्परतया व्याख्येयम्। कर्मणा = दानकर्मणा, यमभिप्रैति = स्वत्वभागित्वेनोद्देश्यीकरोति स संप्रदानमिति। एवं च संप्रदीयतेऽस्मै इति व्युत्पत्त्या संप्रदानसंज्ञाप्यन्वर्थैव। "वृक्षायोदकमासिञ्चति" इत्यादौ वृक्षादौ संप्रदानप्रयोगो गौणः = क्रियाकर्मजन्यफलशालित्वेनोद्देश्ये लाक्षणिकः।

अत एव "शत्रवेऽस्त्रं मुञ्चति, मित्राय दूतं प्रेरयति" इत्यादौ धात्वर्थतावच्छेदकफलोद्देश्यत्वाभावेऽपि चतुर्थीप्रयोग उपपद्यते। विभागानुकूलव्यापारो मोचनम्, गमनानुकूलव्यापारः प्रेरणम्। तदवच्छेदकविभागगमनादिशालित्वेन शत्रुमित्रयोरनुद्देश्यत्वात्। फले धात्वर्थतावच्छेदकत्वस्य निवेशे चतुर्थीप्रयोगः उक्तस्थलेषु नोपपद्यते।

तथा च "वृक्षायोदकमासिञ्चति" इत्यत्र आसेचनक्रियायाः कर्म उदकं, तज्जन्यं फलं पल्लवादि तच्छालित्वेनोद्देश्यत्वं वृक्षस्य। "शत्रवेऽस्त्रं मुञ्चति" इत्यत्र मोचनक्रियायाः कर्म अस्त्रम्, तज्जन्यं फलं दुःखादि तच्छालित्वेनोद्देश्यत्वं शत्रोः। "मित्राय

---

[1] सू. २.३.१६

[2] सू. १.४.३२

दूतं प्रेरयति'' इत्यत्र प्रेरणस्य कर्म दूतः तज्जन्यं फलं वार्ताज्ञानादि, तदाश्रयत्वेनोद्देश्यत्वं मित्रस्य। चतुर्थ्यर्थश्च उक्तोद्देश्यत्वान्येव। इमान्युद्देश्यत्वानि गौणसंप्रदानत्वरूपाणि। दानकर्मजन्यफलशालित्वेनोद्देश्यत्वस्यैव मुख्यसंप्रदानत्वरूपत्वात्।

न चैवं गुरुप्रीतिमुद्दिश्य गुरुपुत्राय दानं यत्र, तत्र ''गुरवे गां ददाति'' इति प्रयोगापत्तिः, दानकर्मगोजन्यस्वत्वभागित्वेनोद्देश्यत्वात् गुरोः इति वाच्यम्। तथा विवक्षायां — दाने गुरुप्रीत्युद्देश्यकत्वविवक्षायां तथा प्रयोगस्येष्टत्वात्।

अत एव यत्र रजतसंबन्धित्वमात्रं तात्पर्यविषयः तत्र ''रजकस्य वस्त्रं ददाति'' इति प्रयोगः। यत्र तु वस्त्रजन्यस्वत्वरूपफलभागित्वेनोद्देश्यत्वं तत्र ''रजकाय वस्त्रं ददाति'' इति प्रयोगो भवत्येव।

न चैवं श्राद्धादावपि पित्रादेः प्रीतिभागितया उद्देश्यत्वात् गौणसंप्रदानत्वेन संप्रदानचतुर्थ्यैवोपपत्तेः ''नमः स्वस्ति०''[१] इत्यादिसूत्रान्तरं व्यर्थ-मिति वाच्यम्। यत्किंचित्क्रियाकर्मजन्यफलशालित्वेनोद्देश्यत्वस्यैव गौणसंप्रदानत्वेन नमःपदादेः क्रियावचित्वाभावेन तद्योगे चतुर्थीसिद्ध्यर्थं पृथक्सूत्रप्रणयनादित्याहुः।

जागदीशं संप्रदानत्वनिर्वचनम्[२]

गत्यादिभिन्ने धात्वर्थे चतुर्थ्या विग्रहस्थया।
यः स्वार्थो बोधनीयस्तत् संप्रदानत्वमीरितम्।।

गत्यादिभिन्ने यद्धातूपस्थाप्ये यादृशेऽर्थे विग्रहस्थचतुर्थ्या यः स्वार्थो बोधयितुं शक्यते स तद्धातूपस्थाप्यतादृशक्रियायां संप्रदानत्वमुच्यते। तथा च कारकत्वे सति यद्धातूपस्थाप्यगत्यादिभिन्नयादृशार्थधर्मिकबोधप्रकारो यश्चतुर्थ्यर्थः, स तद्धातूपस्थाप्यतादृशार्थे संप्रदानत्वमिति निष्कर्षः।

''ब्राह्मणाय दानं धनस्य'' इत्यत्र ददातेः स्वत्वजनकत्यागोऽर्थः। तन्निविष्टे च स्वत्वे ब्राह्मणादेः प्रतियोगित्वं निरूपकत्वं वा चतुर्थ्या बोध्यते इति तदेव संप्रदानत्वम्। गत्यादिभिन्नधात्वर्थतावच्छेदकस्वत्वनिरूपकत्वं संप्रदानत्वमिति फलितम्। ब्राह्मणप्रतियोगिकं ब्राह्मणनिरूपितं वा यत् धनवृत्ति स्वत्वं तज्जनकत्याग इति बोधः। स्वत्वाख्यफलवत्तया धनादेर्दानकर्मत्वम्।

न चैवं पशुकामनया यागकरणदशायां ''चैत्रः स्वात्मने पशुं ददाति'' इति प्रयोगापत्तिः, तादृशयागस्य चैत्रीयं यत् पशुनिष्ठं स्वत्वं तज्जनकत्यागत्वात् इति

---

[१] सू. २.३.१६
[२] श.श.प्र.पृ. ३०६-३०९

वाच्यम्। स्वत्वध्वंसजनकक्रियापर्यवसन्नस्य त्यागस्यैकदेशे स्वत्वध्वंसेऽपि द्वितीयार्थस्याधेयत्वस्यान्वयेन पशुफलकयागे पशुनिष्ठस्वत्वध्वंसजनकत्वविरहात् तादृशवाक्यस्याप्रामाण्यात्।

गत्यादिभिन्ने इत्यनुक्तौ धात्वर्थे प्रकारीभूतोऽर्थः संप्रदानत्वमित्युक्ते "ग्रामाय गत" इत्यत्र चतुर्थ्यर्थस्य कर्मत्वस्य संप्रदानत्वरूपता स्यात्। कर्मत्वस्य तत्र गम्धात्वर्थे गमने प्रकारत्वात्। अतः गत्यादिभिन्ने इति धात्वर्थविशेषणम्।

"वृक्षाय सेचकः" इत्यादौ गत्यादिभिन्ने चतुर्थ्या बोधनीयोऽपि संवर्धयितुमित्यादितुमर्थो न विग्रहस्थया चतुर्थ्या बोधनीय इति न तस्य संप्रदानत्वरूपता।

संप्रदानशब्दस्तु स्वाश्रयगोचरत्यागजन्यस्वत्वस्य प्रतियोगिन्येव शक्त इति "स्वत्वप्रतियोगित्वं संप्रदानम्" इत्यादिको न प्रयोगः। स्वं = स्वप्रतियोगित्वं, तदाश्रयो ब्राह्मणादिः, तद्गोचरः त्यागः "इदममुकस्य स्वत्ववत् भवतु" इत्याकरकेच्छा, तज्जन्यस्य स्वत्वस्य प्रतियोगिनि ब्राह्मणादौ संप्रदानशब्दः शक्तः।

न च दानस्य स्वत्वहेतुत्वे प्रमाणाभावः,

"सप्त वित्तगमा धर्म्या दायो लाभः क्रयो जयः।
प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च।।"[१]

इत्यादिमन्वादिवचनैः दानस्य स्वत्वहेतुत्वप्रतिपादनात्। (वित्तागमाः स्वत्वप्रयोजकाः एते सप्त धर्म्याः इति तदर्थः) इति वाच्यम्। ब्राह्मणाय गवि त्यक्तायां सत्यां, "गौरियं ब्राह्मणस्य न तु मम" इत्यादिसर्वजनीनप्रतीतेरेव दानस्य स्वत्वजनकत्वे प्रमाणत्वात्। "प्रदानं स्वाम्यकरणम्" इति वचनाच्च।

अत एव = दानस्य स्वत्वजनकत्वादेव विदेशस्थपात्रमुद्दिश्य त्यक्तधने स्वीकारमन्तरेणैव पात्रस्य मरणस्थले पितृदायत्वेन तद्धनं पुत्रादिभिर्विभज्य गृह्यते। अन्यथा तैरिव उदासीनैरपि तद्धनस्य आरण्यककुशादेरिवोपादाने, यथेष्टविनियोगे च प्रत्यवायो न स्यात्।

नन्वेवं दानादेव स्वत्वसिद्धेः दत्तवस्तुनि स्वीकारो व्यर्थ इति चेत् — न। "लब्ध्वा चाष्टगुणं फलम्" इत्यादिस्मृतेः प्रतिगृहीतद्रव्यदानस्य फलविशेषहेतुत्वेन तादृशदानसंपत्त्यर्थमेव प्रतिग्रहस्योपयोगात्। "याजनाध्यापनप्रतिग्रहैर्द्विजो धनमर्जयेत्" इत्यादिश्रुत्या "सप्त वित्तागमा धर्म्याः" इत्यादिप्रागुक्तस्मृत्या च प्रतिग्रहस्यापि स्वत्वहेतुत्वबोधनाच्च। स्वत्वजनकव्यापारस्यैवार्जनपदार्थत्वात्।

---

[१] मनुस्मृ. १०-११५

"दासाय भक्ष्यं ददाति, भृतकाय वेतनं ददाति" इत्यादावपि दाधातुः स्वत्वजनकं त्यागं प्रतिपादयतीति ददातिर्मुख्य एव। तादृशं दानं न पुण्यजनकम् अवैधत्वात्। अदृष्टजनकस्त्याग एव ददातेर्मुख्योऽर्थ इति प्राचां मतं न श्रद्धेयम्। तथा हि —

अत्र मैथिलानां मतस्य खण्डनम्

स्वीकारजन्यस्य स्वत्वस्य जनकः त्यागः दानम्। अदृष्टार्थत्यक्तद्रव्यग्रहणं स्वीकारः। अदृष्टजनकीभूतत्यागविषयधर्मिकस्वस्वत्वप्रकारकज्ञानमिति यावत्। तथा च स्वीकारजन्यस्वत्वजनकत्वे सति स्वत्वध्वंसजनकेच्छा दानमित्यर्थः। "दासाय भक्ष्यं ददाति" इत्यादौ ददातिर्न मुख्यः। तत्र भक्ष्यादेः अदृष्टाप्रयोजकत्यागविषयत्वात्।

न च मनसा पात्रमुद्दिश्य धनत्यागस्थले त्यागस्य दानत्वव्यवहारो न स्यात्। तस्य प्रतिग्रहाधीनस्वत्वाजनकत्वात् इति वाच्यम्। इष्टापत्तेः। प्रतिग्रहजन्यस्वत्वं प्रति हेतुभूतस्य वैधस्य त्यागस्यैव दानव्यवहारहेतुत्वात्। उपेक्षा तु स्वत्वध्वंसजनकस्त्यागः, न तु तत्र स्वत्वजनकत्वस्यान्तर्भावः — इत्याहुः।

तन्न युक्तम्। लाघवेन स्वत्वजनकत्यागस्यैव ददात्यर्थत्वात्। स्वत्वे स्वीकारजन्यत्वनिवेशे गौरवात्।

"तिलानस्मै प्रतियच्छति" "तुरगमस्मै विक्रीणीते" इत्यादौ द्रव्यान्तरग्रहणपूर्वकं दानमेव प्रतिदानम्, मूल्यग्रहणपूर्वकं दानमेव च विक्रय इति तत्रापि मुख्यमेव संप्रदानत्वं चतुर्थ्या बोध्यते। न चैवं प्रतिदानस्यापि दानत्वेन स्वीकर्तुः प्रत्यवायः स्यादिति वाच्यम्। यतः अदृष्टार्थं दत्तस्यैव स्वीकारः प्रतिग्रह इति परेण प्रतिदत्तस्य विक्रीतस्य वा तिलतुरगादेः स्वीकारो न दोषमावहतीति।

ब्राह्मणः प्रतिगृह्णीयात् वृत्त्यर्थं साधुतस्तथा।
अव्यश्वमपि मातङ्गतिलतैलांश्च वर्जयेत्।। इति स्मृतेः।

व्युत्पत्तिवादोक्तरीत्या संप्रदानत्वनिर्वचनम्[१]

"ब्राह्मणाय गां ददाति" इत्यादौ संप्रदानार्थकचतुर्थ्या ब्राह्मणादिसंप्रदानकत्वं दानादौ बोध्यते। संप्रदानत्वं च मुख्यभाक्तसाधारणं क्रियाकर्मसंबन्धितया कर्त्रभिप्रेतत्वं — कर्तृगतेच्छाविषयत्वम्। क्रियाकर्मत्वं च क्रियाजन्यफलशालित्वम्।

[१] व्यु.वा.पृ. २३६-२४०

तद्वता कर्मत्ववता संबन्धः तन्निष्ठफलशालित्वम् — कर्मत्ववन्निष्ठफलशालित्वम्। तथा च क्रियाजन्यफलशालितया कर्तुरिच्छाविषयत्वं संप्रदानत्वमिति फलितम्। कर्मणा यमभिप्रैतीत्यस्य कर्मणा यमभिसंबन्धुमिच्छति इति शाब्दिकैः विवरणात्। उक्तस्थले त्यागरूपक्रियाजन्यगोनिष्ठस्वत्वभागितया दातुः इच्छाविषयो ब्राह्मण इति तस्य संप्रदानत्वम्।

न च दानस्य त्यागविशेषतया स्वस्वत्वध्वंसं प्रत्येव जनकत्वमुचितं, न तु परस्वत्वं प्रत्यपि। तत्प्रति प्रतिग्रहीतृस्वीकारस्यैव जनकत्वौचित्यात् इति वाच्यम्। ब्राह्मणाय त्यक्तायां गवि "गौरियं ब्राह्मणस्य न मम" इति सर्वजनप्रतीतेरेव तत्साधकत्वात्। अत एव विदेशस्थं पात्रमुद्दिश्य त्यक्तस्य धनस्य स्वीकारमन्तरेण पात्रस्य मरणे पितृदायत्वेन तद्धनं पुत्रादिभिर्गृह्यते। अन्यथा पुत्रादिरिव उदासीनोऽपि तद्धनस्य आरण्यकुशादेरिव उपादाता यथेष्टविनियोक्ता च न प्रत्यवेयात्।

अथ निरुक्तसंप्रदानत्वस्य कर्मत्वापेक्षया न विशेषः। "कर्तुरीप्सिततमं कर्म"[1] इति सूत्रेण कर्तुः क्रियया व्याप्तुमिष्टस्य कर्मसंज्ञाविधानात्। क्रियया व्याप्तुमिष्टत्वमपि हि क्रियाजन्यफलभागितया इच्छाविषयत्वमेव।

न च "तथायुक्तम्०"[2] इति सूत्रेण क्रियाजन्यफलभागितया अनभिप्रेतस्यापि क्रियाजन्यफलाश्रयस्य कर्मसंज्ञाविधानात् उभयसाधारणं कर्मत्वं क्रियाजन्यफलशालित्वमेव, न तु इच्छागर्भम्। संप्रदानत्वं तु इच्छागर्भम्। अतोऽनयोर्भेद इति वाच्यम्। कर्मत्वं यदीच्छाघटितं न, तदा सूत्रद्वयवैयर्थ्यापत्तेः।

न च क्रियाजन्यफलशालितयेष्टस्यापि क्रियाजन्यफलशालित्वमस्तीति कर्मत्वोपपत्त्या इच्छाघटितस्य कर्मताविधायकसूत्रस्य वैयर्थ्यमिष्टमेवेति वाच्यम्।

क्रियाजन्यफलशालितया इच्छाविषयत्वरूपस्य इच्छाघटितस्य कर्मत्वस्य यत्र बाधः, तत्र तादृशरूपमपि कर्मप्रत्ययेन प्रतिपाद्यत इत्येतत्प्रतिपादनाय सूत्रद्वयप्रणयनात्। तथा हि — यत्र ओदनस्य गलाधस्संयोगेच्छया यो व्यापारः, ततो विषादेरपि गलाधस्संयोगः, तत्र "विषमनेन न भुज्यते" इति प्रयोगस्योपपत्तिः कार्या। यदि इच्छया अघटितं क्रियाजन्यफलशालित्वमेव कर्मत्वं, तदा भुजिक्रियाजन्यगलाधस्संयोगरूपकर्मत्वस्य विषे सत्त्वेन तदभावस्य बाधितत्वेन तद्वाक्यस्य प्रामाण्यं न स्यात्। कर्मत्वस्य इच्छाघटितत्वे तु विषे भुजिक्रियाजन्यफलशालित्वेनेच्छाविषयत्वं नास्तीति तादृशकर्मत्वाभावस्य अबाधितत्वेन तद्वाक्यस्य प्रामाण्योपपत्तिः।

---

[1] सू. १.४.४९
[2] सू. १.४.५०

न च तर्हि इच्छया अघटितस्य कर्मत्वस्य विधायकं सूत्रं मास्तु इति वाच्यम्। उक्तस्थले एव "दैवाद्विषं भुज्यते" इति प्रयोगोपपत्तये तदावश्यकत्वात्। भोजनजन्यगलाधःसंयोगाश्रयत्वेनेच्छाविषयत्वस्य विषे बाधात् भोजनजन्यगलाधःसंयोगाश्रयत्वं हि तत्र कर्मलकारेण बोधनीयम्। एवं च इच्छाघटितकर्मत्वस्य संप्रदानत्वस्य च को भेद इति शङ्का तदवस्था।

न च धात्वर्थतावच्छेदकफलशालित्वेनोद्देश्यत्वं कर्मत्वम्, तदनवच्छेदकफलशालित्वेनोद्देश्यत्वं — संप्रदानत्वमिति विशेषः, जनकतया स्वस्वत्वध्वंसविशिष्टः त्यागः ददात्यर्थः, न तु परस्वत्वविशिष्टोऽपि। अतः धात्वर्थतानवच्छेदकं फलं परस्वत्वम्। तच्छालितया उद्देश्यत्वात् ब्राह्मणादेः संप्रदानत्वम् इति वाच्यम्। यत्र उपेक्षया गां त्यजति, तत्रापि स्वस्वत्वध्वंसजनकस्य त्यागस्य सत्त्वात् गां ददातीति प्रयोगापत्तेः इति चेत् —

अत्रोच्यते। धात्वर्थतावच्छेदकफलाश्रयतयेच्छाविषयत्वं कर्मत्वम्, धात्वर्थतावच्छेदकफलसंबन्धितयेच्छाविषयत्वं संप्रदानत्वम्। ब्राह्मणादिश्च न त्यागजन्यस्वत्वाश्रयतया दातुरिच्छाविषयः, अपि तु तादृशस्वत्वनिरूपकतया। अतो न तस्य कर्मता।

ननु आश्रयत्वमपि संबन्धविशेष इति गवादेरपि सम्प्रदानत्वं दुर्वारम्। न चाश्रयत्वेनेच्छास्थले कर्मसंज्ञया बाधात् आश्रयत्वातिरिक्तसंबन्धवत्तयेच्छाविषयत्वमेव संप्रदानत्वमिति नोक्तदोष इति वाच्यम्। तदा "वृक्षायोदकमासिञ्चति, पत्ये शेते" इत्यादौ सेकजन्यजलसंयोगशयनजन्यप्रीत्याद्याश्रयतया अभिप्रेतस्य वृक्षपत्यादेः संप्रदानत्वानुपपत्तिः इति चेत् —

मैवम्। धात्वर्थतावच्छेदकफलाश्रयत्वभिन्नो यः फलसंबन्धः तस्य संप्रदानत्वशरीरे प्रवेशेन दोषाभावात्। "वृक्षाय उदकमासिञ्चति" इत्यादौ द्रवद्रव्यक्रियानुकूलव्यापारो धात्वर्थः। संप्रदानतानिर्वाहको वृक्षनिष्ठः संयोगश्च न धात्वर्थतावच्छेदक इति संयोगाश्रयत्वं धात्वर्थतावच्छेदकफलाश्रयत्वभिन्नमिति संयोगाश्रयत्वप्रकार-केच्छाविषयस्य वृक्षस्य संप्रदानतानिर्वाहः।

न च "पत्ये शेते" इत्यादौ अकर्मकत्वात् धातोः धात्वर्थतावच्छेदकफलाप्रसिद्ध्या तद्घटितसंप्रदानत्वानुपपत्तिरिति वाच्यम्। धात्वर्थतावच्छेदके फलत्वानिवेशेन प्रसिद्धिसंभवात्। एतदुक्तं भवति — फलपदं संप्रदानशरीरे न निवेश्यते। धात्वर्थतावच्छेदकनिरूपिताश्रयताभिन्नः यः संबन्धः तत्प्रकारकेच्छाविषयत्वं संप्रदानत्वम्। "पत्ये शेते" इत्यत्र धात्वर्थतावच्छेदकं शयनत्वं तदाश्रयत्वभिन्नः यः संबन्धः शयनजन्यप्रीत्यादिसंबन्धः तद्वत्तयेष्टत्वात् पत्युः

संप्रदानता। "वृक्षायोदकमासिञ्चति" इत्यत्र धात्वर्थतावच्छेदकं द्रवद्रव्यक्रिया तदाश्रयत्वभिन्नः संबन्धः सेचनजन्यजलसंयोगसंबन्धः तत्प्रकारकेच्छाविषयत्वात् वृक्षस्य संप्रदानता। "ब्राह्मणाय गां ददाति" इत्यादौ धात्वर्थतावच्छेदकं स्वत्वं, तदाश्रयत्वभिन्नः संबन्धः स्वत्वनिरूपकत्वं तत्प्रकारकेच्छाविषयत्वात् ब्राह्मणस्य संप्रदानता। ब्राह्मणः दानजन्यगोनिष्ठस्वत्वनिरूपको भवतु इति इच्छायाः आकारः।

एवं च "ब्राह्मणाय गां ददाति" इत्यत्र स्वत्वजनकत्यागः दाधात्वर्थः। द्वितीयान्तार्थगोवृत्तित्वस्य स्वत्वेऽन्वयः। निरूपितत्वप्रकारकेच्छाविषयत्वं चतुर्थ्यर्थः। निरूपितत्वे प्रकृत्यर्थस्य ब्राह्मणस्यान्वयः। ब्राह्मणनिरूपितत्वप्रकारकस्वेच्छाविषयगोनिष्ठस्वत्वजनकत्यागानुकूलकृतिमान् देवदत्त इति बोधः। ब्राह्मणनिरूपितं गोनिष्ठं स्वत्वं भवतु इति इच्छाया अकारः।

व्युत्पत्तिवादे मतान्तरानुवादः

अत्र केचित् — ददातियोगे धात्वर्थतावच्छेदकस्वत्वनिरूपकत्वमेव संप्रदानत्वम्। तदेव मुख्यं = लाघवात् संप्रदानपदशक्यतावच्छेदकम्। तथा च तत्र निरूपितत्वमात्रं चतुर्थ्यर्थः। अनन्यलभ्यत्वात्। निरूपितत्वस्य च धात्वर्थतावच्छेदकस्वत्वेऽन्वयः। अत एव श्राद्धस्य पित्रपेक्षया यागत्वमेव, दानत्वं तु ब्राह्मणापेक्षयेति शूलपाणिः। तत्र त्यज्यमानेऽर्थे पितॄणां स्वत्वानुत्पत्त्या संप्रदानत्वासंभवात्। यदि स्वत्वभागित्वेनोद्देश्यत्वं संप्रदानत्वं स्यात् तदा पितॄणामपि उद्देश्यत्वाक्षतेः पित्रपेक्षयापि दानत्वं स्यात् श्राद्धस्य। न हि श्राद्धे पितॄणां स्वत्वभागित्वेनोद्देश्यत्वं नास्तीति वक्तुं शक्यते। "पितरेतत्ते अन्नं स्वधा" इत्यादिश्राद्धरूपत्यागाभिलापस्य स्वधार्थत्यागे चतुर्थ्याः स्वत्वभागित्वेन पित्रादेरुद्देश्यत्वबोधकत्वात्। स्वत्वभागित्वेनोद्देश्यस्यापि पित्रादेः स्वीकाराभावात् न स्वत्वम्। ब्राह्मणानां तत्रानुद्देश्यत्वेऽपि स्वत्वं स्वीकारात् भवति। अनुद्देश्यत्वेऽपि स्वत्वनिरूपकत्वात् संप्रदानत्वमुपपन्नम्।

अथ वा अस्तु तत्रोभयोरेवोद्देश्यत्वम्। तथापि प्रतिपत्त्या ब्राह्मणनिरूपितमेव स्वत्वमुत्पद्यत इति तस्यैव संप्रदानत्वं, न पितॄणाम्। "पितरेतत् ते अन्नं स्वधा" इत्यादिवाक्येन पित्रुद्देशेन त्यक्तस्यान्नस्य तत्त्यागानुद्देश्येऽपि पुरोहिते प्रतिपत्तिरस्तु इति वाक्येन तदन्नस्वाम्यं भवति। एवं च एकस्यामेव श्राद्धात्मकत्यागक्रियायां यागत्वं दानत्वं च भवति।

"वृक्षायोदकमासिञ्चति, पत्ये शेते" इत्यादौ धात्वर्थतानवच्छेदकफलशालितया संप्रदानत्वस्थले उद्देश्यत्वांशनिवेश आवश्यकः।

अन्यथा यत्र अन्योद्देशेन क्षिप्तस्य जलस्य दैवात् वृक्षसंयोगः अन्योद्देश्येन शयनादितश्च पत्यादेः फलसंबन्धः तत्रापि "वृक्षाय उदकमासिञ्चति" इति "पत्ये शेते" इति च प्रयोगापत्तेः। तथा च तत्र चतुर्थ्यर्थः स्वनिष्ठतया कर्त्रभिप्रेततत्तत्फलं प्रति जनकत्वम्। तच्च सेकक्रियायामन्वेति। भाक्तं च तत्र संप्रदानत्वम्। उद्देश्यत्वागर्भे पूर्वोक्ते संप्रदानत्वे एव लाघवाच्छक्तिः, इतरत्र च लक्षणेति स्वीकारात्। वृक्षनिष्ठत्वप्रकारककर्त्रि(स्वे)च्छाविशेष्यभूतजलसंयोगजनकसेकक्रियानुकूलकृतिमान् देवदत्त इति वृक्षायोदकमासिञ्चतीत्यतो बोधः। स्वं = देवदत्तः। पतिनिष्ठत्वप्रकारकस्वेच्छाविशेष्यप्रीतिजनकशयनानुकूलकृतिमती भार्येति "पत्ये शेते" इत्यतो बोधः। स्वं = भार्या।

इदं च संप्रदानम् — कर्तुः अनिराकरणात्, कर्तुः प्रेरणात्, कर्तुः अनुमतेश्चेति त्रेधा वाक्यपदीये विभक्तमिति वैयाकरणमतनिरूपणावसरे उक्तम्। कर्त्रा दीयमानं संप्रदानत्वेनाभिमतः न निराकरोति चेत् अनिराकर्तृसंप्रदानमिति कथ्यते। "पितृभ्यो दद्यात्" इत्यत्र पितॄणामनिराकर्तृसंप्रदानत्वात् चतुर्थी। अनिराकर्तृसंप्रदानत्वं चतुर्थ्यर्थः। तच्च त्यागजन्यस्वत्वभागितयोद्देश्यत्वम्।

अथ यत्र जनान्तरस्य वृक्षादिनिष्ठजलसंयोगादिः इच्छाविषयः अन्येन च जनेन अन्योद्देश्येन क्षिप्तजलादेः वृक्षादिना संयोगः तत्रापि "वृक्षायोदकमासिञ्चति जनः" इति प्रयोगापत्तिः। तत्तद्व्यक्तित्वस्य जनपदेनानुपस्थापनात् तद्व्यक्तिगतेच्छाविषयत्वस्य वृक्षजलसंयेगे भानासंभवात्। उपस्थितजनत्वावच्छिन्नजनान्तरीयेच्छाविषयत्वस्य वृक्षजलसंयोगेऽबाधात्। एवमासेक्तृव्यक्तिगतकालान्तरीयेच्छामादाय यदा नेच्छति तत्काले उक्तस्थले उक्तप्रयोगापत्तिः इति चेत् — न।

वृक्षनिष्ठत्वप्रकारकेच्छा वृक्षायेति चतुर्थ्यन्तार्थः। तस्याश्च स्वविषयसंयोगजनकत्वस्वजन्यत्वोभयसंबन्धेन सेकक्रियायामन्वयः। उक्तस्थले यत्क्रियाव्यक्त्या जलसंयोगो वृक्षे जायते तत्र क्रियायां कालान्तरीयायाः पुरुषान्तरीयायाश्च इच्छायाः स्वविषयसंयोगजनकत्वरूपसंबन्धसत्त्वेऽपि स्वजन्यत्वरूपसंबन्धाभावात् नोभयसंबन्धेनेच्छाविशिष्टत्वमिति योग्यताविरहात् न शाब्दबोध इति वदन्ति।

तत्खण्डनम्

उद्देश्यत्वागर्भत्यागजन्यस्वत्वनिरूपकत्वस्य ददातिसंप्रदानतारूपत्वे चैत्रमात्रोद्देशेन यत् दत्तं तत्र तादृशदानेन "दम्पत्योर्मध्यगं धनम्" इति वचनात् चैत्रपत्न्या

अपि स्वत्वस्य प्रामाणिकतया पत्न्या अपि संप्रदानत्वेन "चैत्रपत्न्यै दत्तम्" इति व्यवहारापत्तिः। न च पत्युः स्वत्वमेव पत्नीस्वत्वं जनयति, न तु पतिस्वत्वजनकं दानादिकमिति नोक्तदोषः दाने पत्नीनिरूपितस्वत्वजनकत्वबाधात् इति वाच्यम्। स्वत्वस्य स्वत्वान्तरं प्रति प्रतिबन्धकतया पतिनिरूपितस्वत्ववति पत्नीनिरूपित-स्वत्वोत्पत्त्यसंभवात्। तथा च सर्वत्रोद्देश्यत्वान्तर्भाव आवश्यकः। तदन्तर्भावे च स्वत्वभागितयोद्देश्यत्वं चैत्रपत्न्या नास्तीति न दोषः। न चैवं "पितृभ्यो दद्यात्" इत्यत्र मुख्यमेव संप्रदानत्वं स्यात्, स्वत्वभागितयोद्देश्यत्वात् पितॄणामिति वाच्यम्। इष्टापत्तेः।

अस्तु वा संप्रदाननिरूपितस्वत्वविषयकेच्छाधीनं यत् स्वत्वं तन्निरूपकत्वमेव मुख्यं दानरूपक्रियासंप्रदानत्वम्। विप्रादिनिरूपितं स्वत्वं भवतु इत्याकारिका दातृनिष्ठा इच्छात्र विवक्षिता। स्वीकारविरहेण पितृनिरूपितस्वत्वाप्रसिद्ध्या मुख्यं न पितॄणां संप्रदानत्वम्।

"विप्राय गां ददाति" इत्यत्र निरूपितत्वं चतुर्थ्यर्थः। तस्य धात्वर्थतावच्छेदके-स्वत्वेऽन्वयः। स्वत्वविशिष्टा स्वत्वध्वंसेच्छा दाधात्वर्थः। वैशिष्ट्यं च स्वजन-कत्वस्वेच्छाधीनत्वोभयसंबन्धेन। तल्लाभश्च विशिष्टस्य धातुशक्यतामते शक्तिलभ्य एव, तदन्तर्भावेणैव शक्त्युपगमात्। फलव्यापारयोः पृथग्धात्वर्थतामते आकाङ्क्षा-बलादेव तादृशसंबन्धलाभः। स्वेच्छाधीनत्वरूपसंबन्धबाधात् न पूर्वोक्तस्थले 'चैत्र-पत्न्यै ददाति' इति प्रयोगापत्तिः।

"पितृभ्यो दद्यात्" इत्यत्र धात्वर्थान्तर्गतस्वत्वे पितृनिरूपितत्वरूपः मुख्योऽर्थः बाधितत्वात् चतुर्थ्या न बोध्यते। निरूपितत्वेनेच्छाविषयत्वरूपः चतुर्थीलक्ष्यार्थः बोध्यते। ददातिस्तु तत्र मुख्य एव।

श्राद्धस्यापि ब्राह्मणापेक्षया दानत्वात् श्राद्धे ब्राह्मणस्य संप्रदानतानिर्वाहः। "अस्ति चोद्देश्यतापि ब्राह्मणस्य" इत्यादिकम् अभिदधतः शूलपाणेरपि संप्रदानत्व-शरीरे उद्देश्यत्वांशपरित्यागे अनिर्भरः अवगम्यते। "कर्मणा यमभिप्रैति०"[१] इति सूत्रं प्रणयतो महर्षेः पाणिनेरपि संमतोयमर्थः।

"शत्रवे भयं ददाति" इत्यत्र ददतीत्यस्य जनयतीति भाक्तोऽर्थः। जननमुत्पाद-कव्यापारः दाधातुलक्ष्यार्थः। तस्य भयं कर्म, तत्संबन्धितया उद्देश्यत्वात् शत्रोः संप्रदानत्वम्।

---

[१] सू. ४.१.३२

"युद्धाय संनह्यत" इत्यादौ संनहनादिक्रियाजन्यफलसंबन्धो युद्धस्य नास्ति इति न संप्रदानता। अत एव नेयं संप्रदाने चतुर्थी। अपि तु एधानाहर्तुं व्रजतीत्यर्थे "एधेभ्यो व्रजति" इत्यत्रेव युद्धं कर्तुं सोढुं वा संनह्यते इत्यर्थविवक्षया "क्रियार्थोपपदस्य च कर्मणि स्थानिनः"[१] इति सूत्रान्तरेण चतुर्थी। तस्य च स्थानिनः = अप्रयुज्यमानस्य क्रियाफलकक्रियावाचकधातूपपदकस्य तुमुन्नन्तधातोः कर्मणि स्वार्थनिष्ठकर्मत्वे विवक्षिते स्वोत्तरं चतुर्थीत्यर्थः। तथा च आहरणकरण-सहनाद्युद्देश्यकत्वं तादृशचतुर्थ्यर्थः। युद्धकर्मककरणोद्देश्यकसंनहनानुकूलकृतिमान् इत्यन्वयबोधः।

ननु "पशुना रुद्रं यजते" इत्यत्र त्यागविशेषरूपक्रियायां रुद्रस्यानिराकर्तृ-संप्रदानतया[२] चतुर्थी स्यादिति चेत् — न। गौरवितप्रीतिहेतुक्रिया यज्यर्थः। तदर्थ-तावच्छेदकं फलं प्रीतिःतदाश्रयतया रुद्रस्य विवक्षितत्वात् कर्मसंज्ञकत्वेन द्वितीयैव न चतुर्थी। यदि च स्वस्वत्वध्वंसानुकूलव्यापाररूपत्याग एव धात्वर्थः, तज्जन्य-फलमत्र प्रीतिः, न तस्या धात्वर्थकोटौ प्रवेशः। तथा च धात्वर्थतानवच्छेदकप्रीति-रूपफलभागित्वेनोद्देश्यत्वात् न कर्मत्वं, अपि तु संप्रदानत्वमेवेत्युच्यते, तदा रुद्राय यजत इत्यपि प्रयोगः। उभयविवक्षायां परत्वेन कर्मसंज्ञया बाधात् द्वितीयैव।

"रजकस्य वस्त्रं ददाति" इत्यत्र ददातिर्न त्यागार्थकः, अपि तु परायत्ती-कारणार्थको गौणः। तदायत्तीकरणं च प्रकृते तत्कर्तृकनिर्णेजनेच्छाप्रकाशको व्यापारः। रजककर्तृकं यत् निर्णेजनं शोधनं तद्विषयकेच्छा दातृनिष्ठा तत्प्रकाशको व्यापार इति यावत्। तदेकदेशे कर्तृत्वे रजकस्य संबन्धविवक्षायां शैषिकी षष्ठी। रजतकर्तृकं वस्त्रकर्मकं यन्निर्णेजनं तदिच्छाप्रकाशकव्यापारवानिति बोधः।

"हन्तुः पृष्ठं ददाति" इत्यत्र तत्कर्तृकताडनानुमतिप्रकाशकव्यापारः ददात्यर्थः। तदेकदेशे कर्तृत्वे हन्तुः संबन्धविवक्षायां षष्ठी। हन्तृकर्तृकपृष्ठताडनानुमतिप्रकाश-कव्यापारवानिति बोधः।

"संवाहकस्य चरणं ददाति" इत्यत्र संवाहककर्तृकचरणकर्मकसंवहनानुमति-प्रकाशकव्यापारवानिति बोधः।

---

[१] सू. २.३.१४

[२] यस्मै प्रयच्छति स यदि स्वीकरोति तदा स प्रतिग्रहीतृरूपं संप्रदानमुच्यते। यस्तु फलभागितयेच्छाविषयोऽपि दीयमानं वस्तु न स्वीकरोति, नापि प्रतिषेधति, स उदासीनोऽनिराकर्तृसंप्रदानमुच्यते।

पदवाक्यरत्नाकरोक्तरीत्या संप्रदानचतुर्थ्यर्थः[1]

संप्रदानत्वं चतुर्थ्यर्थः। दानस्य वा क्रियासामान्यस्य वा यत् फलं तदाश्रयत्वं संप्रदानत्वम्। दाधातोः स्वत्वानुकूलः त्यागः अर्थः। स्वत्वध्वंसानुकूलव्यापारस्य दाधात्वर्थत्वे उपेक्षायामपि ददातीति व्यवहारः स्यात्। त्यागस्तु "न मम किं त्वस्य" इत्याकारकः इच्छाविशेषः। न ममेत्यंशेन उपेक्षासाधारणेन स्वत्वध्वंसं प्रति जनकः। स्वरूपसंबन्धेन तत्पुरुषीयस्वत्वध्वंसं प्रति स्वत्वध्वंसनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन तत्पुरुषीयत्यागः कारणम्। किं त्वस्येत्यनेनांशेन परस्वत्वं प्रति जनकता, स्वत्वध्वंसो व्यापारः। अत एव = परस्वत्वे जननीये स्वस्वत्वध्वंसस्य व्यापारत्वादेव चिरान्तरितेऽपि त्यागे संप्रदानस्यानुमत्या तदीयं स्वत्वं जन्यते। अन्यथा त्यागस्य तत्र तदानीमभावात् स्वत्वोत्पत्तिर्न स्यात्। स्वत्वध्वंसस्य व्यापारत्वे तु पूर्वकालीनत्यागजन्यस्वस्वत्वध्वंसस्येदानीमपि सत्त्वात् स्वत्वोत्पत्त्युपपत्तिः। परानुमतिमात्रस्य तत्स्वत्वजनकत्वे तु चौरादिकर्तृकत्यागादपि चैत्रादीनामनुमतिमात्रेण स्वत्वोत्पत्त्यापत्तिः। अतः पूर्वस्वत्वध्वंसः अवश्यं स्वत्वोत्पत्तौ कारणत्वेनाभ्युपगन्तव्यः।

"ब्राह्मणाय गां ददाति" इत्यत्र निरूपकत्वं चतुर्थ्यर्थः। निरूपकत्वे आधेयतासंबन्धेन ब्राह्मणस्यान्वयः। निरूपकत्वस्य स्वनिरूपितनिरूप्यतासंबन्धेन धात्वर्थस्वत्वेऽन्वयः। यद्वा स्वत्वं चतुर्थ्यर्थः। तत्र ब्राह्मणस्य स्वसमवेतस्वामित्वनिरूपितत्वसंबन्धेनान्वयः। स्वत्वस्य जनकतासंबन्धेन त्यागेऽन्वयः। तथा च ब्राह्मणनिरूपितस्य ब्राह्मणसमवेतस्वामित्वनिरूपितस्य स्वत्वस्य स्वत्वध्वंसद्वारा जनकः त्यागः इति बोधः।

भवतु वा स्वत्वस्योद्देश्यत्वाख्यविषयतासंसर्गेण त्यागेऽन्वयात् स्वत्वोद्देश्यकस्त्याग एव ददात्यर्थः। अत एवासंनिहितेऽपि ब्राह्मणे ब्राह्मणायाहं ददे इति वाक्यप्रयोगः उपपद्यते।

इत्थं च संप्रदानमित्यन्वर्थसंज्ञाबलात् दानफलस्वत्वनिरूपकत्वमेव चतुर्थ्या मुख्योऽर्थ इति दार्शनिकाः।

शाब्दिकमतम्

ददातेः स्वत्वध्वंसः स्वत्वं च फलविधया अर्थः। एतत् फलद्वयमपि एकेनैव गवादिनान्वितम्। द्वितीयाविभक्त्यर्थभूतमधिकरणं स्वत्वे स्वत्वध्वंसे च यौगपद्ये-

---

[1] प.वा.र.पृ. ६९९

नान्वेति। 'गां ददाति' इत्यतः गोवृत्तेः स्वत्वस्य स्वत्वध्वंसस्य चानुकूलः त्याग इति प्रतीयते। तेन ग्रामलाभकामनया दीयमानायां गवि "गां ग्रामं ददाति" इति न प्रयोगः। तादृशव्यापारे गोवृत्तिस्वत्वध्वंसजनकत्वस्य ग्रामवृत्तिस्वत्वजनकत्वस्य चान्वयेन एकत्र तयोः अन्वयाभावात्। चतुर्थी तु धात्वर्थफलान्वयिप्रीत्यादिफलान्तरमभिधत्ते। तेन "गां ददाति ब्राह्मणाय" इत्यत्र ब्राह्मणप्रीतिजनकगोवृत्तिस्वत्वस्य गोवृत्तिस्वत्वध्वंसस्य चानुकूलः त्यागो वाक्यार्थः। प्रीतिमजनयत्यपि स्वत्वे यदि ददातिप्रयोगः, तदा तत्रेष्यमाणं [इच्छाविषयीभूतं] प्रीतिजनकत्वमेव चतुर्थ्यर्थः। इच्छायां चतुर्थीप्रकृत्यर्थस्य विषयतयान्वयः। ब्राह्मणविषयतानिरूपितप्रीतिविषयतानिरूपितजनकत्वविषयतानिरूपितविषयतया अभिप्रायः स्वत्वेऽन्वेति। अत एव "कर्मणा यमभिप्रैति स संप्रदानम्"[१] इति सूत्रे फलगोचराभिप्रायविषयमेव चतुर्थ्यर्थतया पाणिनिरुदाजहार।

तत्र संप्रदानपदं नान्वर्थसंज्ञकम्, येन दानजन्यफलभागेव संप्रदानं स्यात्। किंतु क्रियान्तरजन्यफलभागपि संप्रदानमिति संज्ञायते। "क्रियाग्रहणं कर्तव्यम्"[२] इति वार्तिकात्। चतुर्थ्युपात्तं च फलं क्वचित् अनुकूलतासंबन्धेन धात्वर्थफलेऽन्वेति। यथा — (१) "ब्राह्मणाय ददाति" इत्यत्र दानफलस्वत्वे प्रीतिः, (२) "वृक्षायोदकं सिञ्चति" इत्यत्र क्रियाफले जलसंयोगे वृक्षपुष्टिः, (३) "यदग्नये च प्रजापतये च जुहोति" इत्यत्र च वह्निसंयोगफलप्रक्षेपात्मकहोमफले वह्निसंयोगेऽग्निप्रजापतिस्वाम्यं तत्प्रीतिर्वा, (४) "विप्रायान्नं निर्वपति" इत्यत्र निर्वापफले विक्लित्तौ विप्रभोजनम्, (५) "खण्डिकोपाध्यायः शिष्याय चपेटां ददाति" इत्यत्र अभिघातफलकक्रियाफलेऽभिघाते शिष्यव्यथा, (६) "अजां ग्रामाय नयति"इत्यत्र कर्मानुकूलव्यापारात्मकनयनफले कर्मणि ग्रामसंयोगः। क्रमशः (१) ब्राह्मणसमवेतप्रीतिजनकस्वत्वजनकव्यापारः (२) वृक्षपुष्ट्युद्देश्यकः जलवृत्तिसंयोगानुकूलो व्यापारः (३) अग्निसमुञ्चितप्रजापतिस्वामिकवह्निसंयोगफलकप्रक्षेपानुकूलव्यापारः, अग्निप्रजापतिसमवेतप्रीतिजनकतादृशव्यापारः, (४) विप्रभोजनोद्देश्यकविक्लित्तिफलकनिर्वापः, (५) शिष्यव्यथाजनकाभिघातफलकव्यापारः, (६) ग्रामसंयोगजनककर्मानुकूलव्यापारः इति बोधाः भवन्ति।

यत्र च नयतिना संयोगोऽप्युपात्तः तत्र परया कर्मसंज्ञया संप्रदानबाधात् 'अजां ग्रामं गयति' इत्येव प्रमाणम्।

---

[१] सू. १.४.३२
[२] वा. १०८५

एवं गमनजन्यफलस्य चैत्रेऽपि संभवेन 'चैत्रश्चैत्राय गच्छति' इति प्रयोगापत्तिरित्यपि नाशङ्कनीयम्। परया कर्तृसंज्ञया संप्रदानसंज्ञायाः बाधात्।

क्वचित् चतुर्थ्यर्थः प्रधानक्रियायामन्वेति। यथा "आत्मने वै पुत्रः प्रियो भवति" इत्यत्र चतुर्थ्यर्थप्रीतिः पुत्रकर्तृकप्रियभवने जनकतासंबन्धेनान्वेति आत्मप्रीतिजनकं पुत्रप्रियभवनमिति बोधः। "पत्ये शेते प्रौढा वधूः" इत्यत्र पतिप्रीतिः जनकतया शयनेऽन्वेति। प्रतिप्रीतिजनकं प्रौढवधूकर्तृकं शयनमिति बोधः। "ग्रामाय गच्छति" इत्यत्र स्पन्दमात्रं धात्वर्थः। चतुर्थ्याः संयोगोऽर्थः। ग्रामसंयोगजनको व्यापार इति बोधः। अत एव गत्यर्थकर्मणि विभाषा चतुर्थीविधिः प्रत्याख्येयः। तत्कार्यस्य "ग्रामाय ग्रामं वा गच्छति" इत्यादिप्रयोगस्य उक्तरीत्या व्यापारमात्रस्य संयोगावच्छिन्नव्यापारस्य च धात्वर्थत्वविवक्षायां ग्रामस्य संप्रदानकर्मसंज्ञयोः संभवादेव उपपत्तेः तत्सूत्रस्य व्यर्थत्वात्। पाकमात्रस्य धातुना उपादाने "ओदनाय तण्डुलाय वा पचति" इत्यादिप्रयोगोऽपि इष्ट एवेत्याहुः वैयाकरणाः।

अस्य मतस्य खण्डनं किंचित् व्याख्यात्रा कृतम्। तन्नातीव स्वरसं प्रतिभातीत्युपेक्ष्यते।

विभक्त्यर्थनिर्णये[१] चतुर्थीविवरणम्

ङे भ्यां भ्यस् इति त्रयः चतुर्थीविभक्तिप्रत्ययाः। तत्र 'सुमनसे ददाति' इत्यादौ श्रूयमाणत्वात् एकारस्य तत्त्वेन = एकारत्वेन भ्यामित्यस्य भ्याम्त्वेन भ्यसो भ्यस्त्वेन वाचकत्वम्। ङकारोऽनुबन्धः क्वचिदप्यश्रूयमाणत्वान्न वाचकताकुक्षिप्रविष्टः।

अनुशासनसिद्धाश्चतुर्थ्या अर्थाः। अनुशासनं च "चतुर्थी संप्रदाने"[२] इति। तत्र संप्रदानं संप्रदानत्वं वा अर्थः। अत्राप्यनभिहिते इत्यधिकारः तेन "दानीयो ब्राह्मणः" इत्यादौ न चतुर्थी। संप्रदानपदसंकेतग्राहकं सूत्रं "कर्मणा यमभिप्रैति स संप्रदानम्"[३] इति। कर्मणा करणभूतेन कर्ता यमभिप्रैति तत्कारकं संप्रदानसंज्ञकं भवतीत्यर्थकम्। कर्मणा धात्वर्थफलवता गवादिना स्वामित्वेनोपाध्यायादेरभिप्रायविषयीकरणात् उपाध्यायादेः संप्रदानत्वम्। अतः "उपाध्यायाय गां ददाति" इत्युपपद्यते।

---

[१] पृ. २६९
[२] सू. २.३.१३
[३] सू. १.४.३२

"क्रियाग्रहणमपि कर्तव्यम्"[१] इति वार्तिकम्। क्रिययापि यमभिप्रैति स संप्रदानमित्यर्थकम्। क्रियापदं चात्र क्रियाप्रयोज्यफलपरम्। फलं च धात्वर्थभिन्नं बोध्यम्। अत एव 'श्राद्धाय निगर्हते, युद्धाय संनह्यत' इत्युपपद्यते। अत्र निगर्हतेः गर्हामात्रमर्थः। प्रयोज्यफलं विषयत्वम्। संनह्यतेः संनाहः सज्जीभाव एवार्थः। प्रयोज्यफलं युद्धे प्रवृत्तिः। गर्हाविषयत्वं श्राद्धे, संनहनान्तरप्रवृत्तिर्युद्धे इति श्राद्धयुद्धयोः संप्रदानत्वम्। सूत्रे धात्वर्थफलवतः कर्मणः संबन्धितया संप्रदानत्वम्, वार्तिके धात्वर्थान्यफलसंबन्धितया संप्रदानत्वमिति सूत्रवार्तिकयोर्नैकतरवैयर्थ्यम्।

वस्तुतस्तु सूत्रे कर्मपदं क्रियापरम्। क्रिया च फलव्यापारोभयरूपा च बोध्या। तत्र धात्वर्थफलसंबन्धितया धात्वर्थान्येन फलेन संबन्धितया व्यापारसंबन्धितया चाभिप्रायविषयत्वं संप्रदानत्वम्।

अत एव "पत्ये शेते प्रौढवधूः" इत्यत्र पतिप्रीतिः शयनफलम्। प्रीत्या संबन्धेन शयनसंबन्धितया च अभिप्रायविषयत्वं पत्युः संप्रदानत्वम्। तत्र ईदृशं संप्रदानत्वं न चतुर्थ्यर्थः। व्यापारादीनामन्यलभ्यत्वात्। किं तु अन्यादृशमेव। तथा हि —

"विप्राय गां ददाति" इत्यत्र ददातेः स्वत्वध्वंसानुकूलो व्यापारोऽर्थः। उत्सर्गेऽपि ददातिर्मुख्य एव। अत एव "गोमिथुनमादाय कन्यां ददाति पिता" इति "दीनारमादाय मौक्तिकं ददाति वणिक्" इति विक्रयेऽपि ददातिप्रयोगः। व्यापारस्त्यागः। स च न ममेत्याकारः उपेक्षासाधारणेन रूपेण स्वत्वनाशं प्रति जनकः, न स्वत्वं प्रति। प्रमाणाभावात्।

"सप्त वित्तगमा धर्म्याः लाभो दायः क्रयो जयः। प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च। इत्यत्र "याजनाध्यापनप्रतिग्रहैर्ब्राह्मणो धनमार्जयेत्" इत्यत्र च प्रतिग्रहस्यैव स्वत्वोपायत्वेनाभिधानात्। प्रतिग्रहोऽपीदं ममेत्याकारोऽनुमतिस्वरूपः समित्कुशाद्युपादानसाधारणेन रूपेण स्वत्वं प्रति जनकः। तत्पुरुषीयस्वत्वं प्रति तत्पुरुषीयस्वीकारस्य विशेष्यतया हेतुत्वात्। तथा च स्वत्वमात्रं चतुर्थ्यर्थः। तत्र प्रकृत्यर्थस्य निरूपकतया स्वत्वस्य जनकतया स्वत्वध्वंसेऽन्वयात् "विप्राय गां ददाति राजा" इत्यत्र विप्रनिरूपितस्वत्वजनकगोनिष्ठस्वत्वध्वंसजनकत्यागाश्रयो राजेत्यन्वयबोधः। व्यधिकरणस्वत्वं प्रति गोनिष्ठस्वत्वध्वंसस्याजनकत्वात् स्वत्वे गोवृत्तित्वमर्थाल्लभ्यते। तेन पुत्रस्य राज्यकामनया दीयमानायां गवि "पुत्राय गां ददाति" इति न प्रयोगः इति वदन्ति।

---

[१] वा. १०८५

तन्न विचारसहम्। स्वत्वध्वंसानुकूलव्यापारस्य ददात्यर्थत्वे उपेक्षायामपि ददातिप्रयोगापत्तेः। प्रतिग्रहस्य समित्कुशाद्युपादानसाधारणेन रूपेण स्वत्वजनकत्वे अन्योद्देशेन त्यक्तेऽन्यस्योपादाने स्वत्वोत्पत्तिप्रसङ्गात्। उपादानमात्रस्य स्वत्वजनकत्वे नास्तिकहिरण्यादावप्युपादानमात्रे स्वत्वोत्पत्तिप्रसङ्गात्। तस्माद्दानमेव स्वत्वकारणम्। अत एवान्योद्देशेन त्यक्तेऽन्यस्य उपादाने न स्वत्वप्रसङ्गः। वचने प्रतिग्रहस्य गणनं दानोपलक्षकमेव। उपादानेन स्वत्वे जननीये समित्कुशादीनां तादात्म्यमिव दानमपि विशेषसहकारि। तथा च तत्पुरुषीयस्वत्वप्रकारतानिरूपितविशेष्यतासंबन्धेन त्यागः तत्पुरुषस्वत्वं प्रति कारणम्। स्वत्वध्वंसो व्यापारः। स्वत्वजनकत्यागो ददात्यर्थः।

तत्र "ब्राह्मणाय गां ददाति" इत्यत्र निरूपकत्वं स्वामित्वं वा चतुर्थ्यर्थः। ब्राह्मणनिरूपितस्य ब्राह्मणनिष्ठस्वामित्वनिरूपितस्य वा स्वत्वस्य स्वत्वध्वंसव्यापारेण जनकः त्यागः वाक्यार्थः। अथ वा स्वत्वोद्देश्यकस्त्यागो ददात्यर्थः। चतुर्थ्याः पूर्वोक्त एवार्थः। अत एव संप्रदानेन अस्वीकृतस्याप्युत्सर्गे (त्यागे) स्वत्वानुपहिते (स्वत्वाजनके) च ददातिप्रयोगोऽप्युपपद्यते।

यत्तु उत्सर्गेण समनन्तरमेव संप्रदानस्वत्वं जन्यते। न चैवमस्वीकृतेऽपि संप्रदाने स्वत्वापत्तिरिति वाच्यम्। दानेन स्वत्वजनने वैमत्यस्य प्रतिबन्धकत्वात्। अस्वीकृते तत्सत्त्वात्। अत एव तदुद्देशेनोत्सृष्टे तस्मिन् प्रतिगृह्यैव मृते तत्पुत्रादीनां स्वत्वोत्पत्तिरुपपद्यते। तद्व्यक्तिमरणजन्यस्वत्वध्वंसद्वारेण तद्व्यक्तिमरणस्य वा तत्पुत्रस्वत्वं प्रति जनकत्वात्।

एवमपुत्रव्यक्तिमरणजन्यस्वत्वध्वंसस्य तत्पत्नीस्वत्वं प्रति जनकत्वम्, "अपुत्रस्य धनं पत्न्यभिगामि" इति विष्णुस्मरणात्।

ऋतुमवेक्ष्य मृते पितरि जातमपि स्त्रीस्वत्वं पुत्रोत्पत्त्या नाश्यते। स्वजन्मजनितमातृस्वत्वनाशः, मातृस्वत्वनाशद्वारेण स्वजन्म वा स्वस्वत्वं प्रति कारणम्। पुत्रोत्पत्तिपूर्वं मात्रा विक्रीते न पुत्रस्वत्वं जन्मजनितमातृस्वत्वनाशविरहात् इत्यवश्यमुत्सर्गेणाव्यवधानेन पुंसो व्यवहितस्यापि स्वत्वं जन्यत इति मतम्।

तन्न। एवमपि मृतं प्रोषितं वा उद्दिश्य त्यक्ते तत्पुत्रस्य स्वत्वानुत्पादप्रसङ्गात्, उत्सर्गे व्यवस्थान्तरस्यावश्यमाश्रयणीयत्वात्।

अन्यथा ब्राह्मणमात्रमुद्दिश्य त्यक्ते तुलापुरुषादौ ब्राह्मणसामान्यस्वत्वप्रसङ्गात्। परस्वे दातुर्विभज्य वितरणेऽनधिकारप्रसङ्गाच्च। तस्मादुत्सर्गेण स्वत्वे जननीये प्रतिपादनं सहकारीति नाव्यवहितमेव स्वत्वोत्पत्तिरिति।

इत्थं च स्वत्वनिरूपकत्वं संप्रदानत्वम्। तत्र स्वत्वं ददात्यर्थान्तर्गतं, निरूपकत्वं चतुर्थ्यर्थ इत्येवं संप्रदानमित्यन्वर्थसंज्ञा। अत एव ''संप्रदानमित्यन्वर्थसंज्ञाबलात् दानस्य कर्मणेति विज्ञायते'' इति काशिकावृत्तिरिति प्राञ्चः।

वस्तुतस्तु स्वत्वध्वंसजनकः स्वत्वोद्देश्यकः त्यगो ददात्यर्थः। स च त्यागः नेदं मम, किं तु अस्य स्यात् इत्याकारकः। तादृशत्यागरूपेच्छाविषयत्वं संप्रदानत्वम्। अतः सूत्रे अभिप्रैति इत्यत्र दानस्य कर्मणेति शेषपूरणम्। विषयत्वम् उद्देश्यतावच्छेदकत्वम्। तदेव चतुर्थ्यर्थः इच्छान्वयि। ''ब्राह्मणस्य स्यात्'' इत्यत्र षष्ठ्यर्थस्वत्वनिष्ठोद्देश्यतायाः अवच्छेदकत्वस्य ब्राह्मणे सत्त्वात्। तत्र उद्देश्यतावच्छेदकतायाः स्वनिरूपितस्वत्वनिष्ठोद्देश्यताप्रतियोगित्वेन संबन्धेन त्यागरूपेच्छायामन्वयः। तत्र लाघवात् अवच्छेदकत्वमात्रं चतुर्थ्यर्थः। तच्च दर्शितसंबन्धेन त्यागेऽन्वेति। एवं च ''ब्राह्मणाय गां ददाति राजा'' इत्यत्र ब्राह्मणनिष्ठावच्छेदकताकगोवृत्तिस्वत्वनिष्ठोद्देश्यताकस्वत्वध्वंसजनकत्यागाश्रयो राजेत्यन्वयबोधः।

वार्तिकेन तु धात्वर्थान्यफलसंबन्धितया अभिप्रेतत्वं संप्रदानत्वं ज्ञापितम्। तत्र ''वृक्षायोदकं सिञ्चति'' इत्यत्र पुष्टीच्छाप्रयोज्योऽपि वृक्षे सेकः। तत्र धात्वर्थे पुष्टिविषयत्वमन्वेति, न त्विच्छायामित्यभिप्रायः न चतुर्थ्यर्थः। अभिप्रैतीति स्वरूपकीर्तनमात्रम्।

यदि च ज्ञानेच्छे व्यापारतया न धात्वर्थः। किं तु तत्प्रयोज्यः प्रयत्नः, तदा 'वृक्षाय' इत्यत्र चतुर्थ्यर्थपुष्टिरुद्देश्यतया धात्वर्थे द्रवद्रव्यप्रतियोगिकसंयोगानुकूलव्यापारे प्रयत्नेऽन्वेति। पुष्टिरुपचयः। स च बृहदवयवनिष्ठारम्भकसंयोगसामानाधिकरण्यम्। तथा च वृक्षसंबन्धिपुष्ट्युद्देश्यकः जलवृत्तिद्रवद्रव्यप्रतियोगिकसंयोगानुकूलः प्रयत्नो वाक्यार्थः।

एवं ''यदग्नये च प्रजापतये च सायं जुहोति'' इत्यत्र वह्निसंयोगानुकूलप्रक्षेपस्य समानकालिके त्यागेऽनुकूलप्रयत्ने वा चतुर्थ्यर्थस्यान्वयः। तथा अवच्छेदकत्वस्य चतुर्थ्यर्थस्य यत्पदार्थनिष्ठस्वत्वोद्देश्यताद्वारा त्यागेऽन्वयः। प्रीतेर्वा चतुर्थ्यर्थस्य उद्देश्यतया प्रयत्नेऽन्वयः(प्रयत्नत्यागैकतरान्वयः)। अग्निनिष्ठावच्छेदकताकयत्पदार्थनिष्ठस्वत्ववृत्त्युद्देश्यताकः वह्निसंयोगानुकूलप्रक्षेपसमानकालिकः त्यागः, अग्निवृत्तिप्रीत्युद्देश्यकः यत्पदार्थवृत्तिवह्निसंयोगानुकूलप्रक्षेपानुकूलः प्रयत्नः वा वाक्यार्थः।

''विप्रायान्नं निर्वपति'' इत्यत्र धात्वर्थेऽधिश्रितपात्रप्रक्षेपानुकूले प्रयत्ने विप्रविशेषितस्य चतुर्थ्यर्थस्य भोजनस्य उद्देश्यतयान्वयः। विप्रकतृकभोजनोद्देश्यकः अन्ननिर्वापः वाक्यार्थः।

"शिष्याय चपेटां ददाति" इत्यत्र आहन्यमानः करः चपेटार्थः अभिघातफलक-प्रयत्नो ददात्यर्थः। तत्र प्रयत्ने चतुर्थ्यर्थस्य व्यथायाः शिष्यविशेषितायाः अन्वयः। शिष्यवृत्तिव्यथाजनकः आहन्यमानकराभिघातफलकप्रयत्नः वाक्यार्थः।

इत्थं दर्शितानां चतुर्थ्यर्थानां संदर्शितेन संसर्गेण धात्वर्थ एवान्वय इति कारकत्वं निष्प्रत्यूहमिति।

विभक्त्यर्थनिर्णये[१] शाब्दिकमतम्

शाब्दिकास्तु — ददातेः स्वत्वध्वंसः स्वत्वं च फलविधया अर्थः। त्यागो व्यापारविधया। फलद्वयमेकेन कर्मणा साकाङ्क्षमिति गवादेः कर्मणस्तत्रान्वयः। तेन 'पुत्रराज्यकामनया दीयमानायां गवि राज्यं ददाति' इति न प्रयोगः। चतुर्थी तु धात्वर्थफलान्वयि प्रीत्यादिफलान्तरमभिधत्ते। तेन "ब्राह्मणाय गां ददाति" इत्यत्र गोवृत्तेः ब्राह्मणप्रीतिजनकस्वत्वस्य स्वस्वत्वध्वंसस्य चानुकूलः त्यगो वाक्यार्थः। प्रीतिमजनयत्यपि स्वत्वे यदि ददातीति प्रयोगः तदा प्रीतीच्छा चतुर्थ्यर्थः। सा स्वोद्देश्यप्रीतिजनकत्वेन संबन्धेन धात्वर्थफले स्वत्वे अन्वेति। प्रीतीच्छायां प्रकृत्यर्थस्य ब्राह्मणादेः प्रीतिनिष्ठविशेष्यतानिरूपितसमवेतत्वनिष्ठप्रकारतावच्छेद-कतया प्रीतिनिष्ठोद्देश्यतावच्छेदकतया संबन्धेनान्वयः। अत एव "कर्मणा यम-भिप्रैति०"[२] इति सूत्रेण कर्मफलगोचराभिप्राय एव चतुर्थ्यर्थतया सूचितः। चतुर्थ्यर्थस्य प्रीत्यादेः जनकत्वेन, तदिच्छाया वा स्वोद्देश्यजनकत्वेन संबन्धेन क्वचिद्धात्वर्थे फलेऽन्वयः, यथा "ब्राह्मणाय गां ददाति" इत्यत्र, यथा वा "यदग्नये जुहोति" इत्यत्र अग्निप्रीतेः तदिच्छाया वा होमफले वह्निसंयोगे, "वृक्षायोदकं सिञ्चति" इत्यत्र वृक्षपुष्टेः तदिच्छाया वा जलस्य संयोगे, "विप्रायान्नं निर्वपति" इत्यत्र विप्रभोजनस्य तदिच्छाया वा अन्नविक्लित्तौ, "खण्डिकोपाध्यायः शिष्याय चपेटां ददाति" इत्यत्र शिष्यव्यथायास्तदिच्छाया वा अभिघाते, नयतिना फलतया संयोगाविवक्षायां कर्मानुकूलव्यापारेऽभिहिते "अजां ग्रामाय नयति" इत्यत्र ग्राम-संयोगस्य तदिच्छाया वा कर्मणि, यत्र तु संयोगोऽपि फलतया विवक्षितः तत्र परया कर्मसंज्ञया संप्रदानसंज्ञायाः बाधात् "अजां ग्रामं नयति" इत्येव प्रमाणम्। एवं गमनजन्यसंयोगस्य गमिकर्तरि सत्त्वेऽपि परया कर्तृसंज्ञया संप्रदानसंज्ञाबाधान्न कर्तरि चतुर्थीति।

---

[१] पृ. २७४

[२] सू. १.४.३२

क्वचिच्चतुर्थ्यर्थः प्रधानक्रियायामन्वेति। यथा "आत्मने वै पुत्रः प्रियो भवति" इत्यत्र चतुर्थ्यर्थस्य आत्मप्रीतेः तदिच्छाया वा पुत्रप्रियभावे, "पत्ये शेते प्रौढवधूः" इत्यत्र पतिप्रीतेः तदिच्छाया वा शयने, गमेः स्पन्दरूपव्यापारमात्रार्थकत्वे "ग्रामाय गच्छति" इत्यत्र ग्रामसंयोगस्य तदिच्छाया वा जनकत्वेन स्वोद्देश्यजनकत्वेन वा अन्वयः। आत्मप्रीतिजनकं आत्मप्रीतीच्छोद्देश्यजनकं वा पुत्रकर्तृकं भवनमित्यादि-रीत्या बोधः। तस्मात् गत्यर्थकर्मणि विभाषा चतुर्थीविधिः प्रत्याख्येयः। शुद्ध-स्पन्दार्थकगमेर्योगे संयोगस्य चतुर्थ्यर्थतया "ग्रामाय गच्छति" इति प्रयोगस्याप्युप-पन्नत्वात्। यत्रापि धातोर्व्यापारमात्रमर्थः, फलाविवक्षा वा तत्र संप्रदानतासंभवेन 'ग्रामाय गच्छति स्पन्दते वा, तण्डुलाय ओदनाय वा पचति' इति प्रयोगोऽपीष्ट एव। संयोगस्य विक्लित्त्यादेः फलस्य चतुर्थ्या प्रतिपादनादिति वदन्ति।

विभक्त्यर्थनिर्णये[१] उक्तशाब्दिकमतखण्डनम्

तन्न विचारसहम्। तथा हि — ददातियोगे प्रीतिर्न चतुर्थ्यर्थः। प्रीत्यजनकेऽपि दाने चतुर्थीप्रयोगात्। नापि प्रीतीच्छा, गौरवात्। दर्शितसंबन्धेन तस्याप्यनन्वयात्। न च प्रीतिजनकत्वेनेच्छा चतुर्थ्यर्थः। तस्याः प्रीतिविषयतानिरूपितविषयतया ददातिफले स्वत्वेऽन्वय इति वाच्यम्। अतिगौरवात्। पत्नीप्रीतिजनके श्वशुराय दाने 'पत्न्यै ददाति' इति प्रयोगापत्तेश्च।

एवं जुहोतियोगे कृत्तिकादेवताकहोमे वह्निप्रीतिजनके 'वह्नये जुहोति' इति प्रयोगापत्तेः।

विष्णुप्रीत्यर्थं क्रियमाणे दाने होमे च 'विष्णवे ददाति, जुहोति' इति प्रयोगा-पत्तेश्च।

न च तवापि जुहोत्यर्थे प्रयत्ने विष्णुप्रीतेः उद्देश्यत्वात् जुहोतियोगे 'विष्णवे जुहोति' इति प्रयोगापत्तिरिति वाच्यम्। यतो यद्देवताको होमः तत्प्रीतिरेव जुहो-त्यर्थप्रयत्नस्योद्देश्येति। विष्णुप्रीतिस्तु होमदेवताप्रीतेः फलम्। विष्णुप्रीतीच्छायाः दर्शितविषयतासंबन्धेन ददातिफले गोनिष्ठविप्रस्वत्वे, जुहोतिफले हविर्निष्ठवह्नि-संयोगे सत्त्वात् दर्शितप्रयोगो दुर्वारः।

न च संबन्धघटकविषयताधिकरणं जनकत्वं साक्षाज्जनकत्वं विवक्षितमिति न दर्शितप्रयोग इति वाच्यम्। तथा सति गोनिष्ठविप्रस्वत्वमपि विप्रीयस्य प्रीति-पदार्थस्य सुखस्य न साक्षाज्जनकमिति 'विप्राय गां ददाति' इति प्रयोगानापत्तेः। गोनिष्ठस्वत्वस्य दुग्धादानादिद्वारा विप्रसुखजनकत्वात्।

[१] पृ. २७५

एवं "वृक्षायोदकं सिञ्चति" इत्यत्रापि पुष्टीच्छा न चतुर्थ्यर्थः, गौरवात्। वृक्षपुष्टीच्छया क्रियमाणे कूपखनने जलोत्पादनेन वा "वृक्षाय कूपं खनति, जलमुत्पादयति वा" इति प्रयोगापत्तेश्च।

"आत्मने पुत्रः प्रियो भवति" इत्यत्र आत्मप्रीतीच्छा न चतुर्थ्यर्थः। पुत्रप्रियभावस्य आत्मप्रीतीच्छाऽप्रयोज्यत्वात्। नाप्यात्मप्रीतिः, भवत्यर्थानन्वयात्। तस्मात् यथा "आत्मने वै पुत्रः प्रियः" इत्यत्र क्रियाशून्यवाक्ये तादर्थ्यचतुर्थ्या उपकारकत्वमर्थः प्रियपुत्रेऽन्वेति, तथा दर्शितवाक्येऽपि।

"पत्ये शेते" इत्यत्र पतिप्रीतीच्छा न चतुर्थ्यर्थः, गौरवात्। पतिप्रीतीच्छया क्रियमाणे शयनानुकूलपर्यङ्कस्थापने पत्ये पर्यङ्कं स्थापयतीति प्रयोगापत्तेः। तस्मात् यथा वृक्षपुष्टिः सेचनप्रयत्ने तथा पतिप्रीतिरपि शयनप्रयत्ने उद्देश्यित्वेनान्वेति। अतः पुष्टिप्रीत्योरजनकयोः सेचनप्रयत्नयोर्न दर्शितप्रयोगानुपपत्तिः।

"अजां ग्रामाय नयति" इत्यत्र ग्रामसंयोगो न चतुर्थ्यर्थः। ग्रामसंयोगाजनके नयत्यर्थे दर्शितप्रयोगानुपपत्तेः। नापि तदिच्छा, ग्रामसंयोगेच्छया अजाग्रहणे 'अजां ग्रामाय गृह्णाति' इति प्रयोगापत्तेः, गौरवाच्च। गमेः शुद्धस्पन्दार्थकत्वे संयोगस्तदिच्छा वा चतुर्थ्यर्थः। तत एव 'ग्रामाय गच्छति' इति प्रयोगोपपत्तिः।

गत्यर्थकर्मणि चतुर्थीविधिः प्रत्याख्येयः इत्यपि न युक्तम्। फलस्य संयोगस्य धातुलभ्यस्य चतुर्थ्या प्रतिपादनासंभवात्। न च फलाविवक्षायां प्रतिपादनसंभव इति वाच्यम्। तथा सति धारणसंयोगाविवक्षायां 'दण्डाय दधाति' इति प्रयोगापत्तेः। "ग्रामाय चलति स्पन्दते च" इत्यत्र चलतिस्पन्दत्योः स्पन्दमात्रार्थकतया संयोगरूपफलावाचकत्वात् चतुर्थ्या संयोगरूपफलप्रतिपादनसंभव इति ग्रामस्य धात्वर्थान्यफलसंबन्धितया अभिप्रेततया संभवत्येव संप्रदानत्वम्।

'तण्डुलाय ओदनाय वा पचति' इत्यपप्रयोग एव। यदि च प्रयोगः तदा तण्डुलोपकारकत्वस्य ओदनजनकत्वस्य चतुर्थ्या प्रतिपादनेनेयं तादर्थ्यचतुर्थीति मन्यते, तदापि गत्यर्थकर्मणि चतुर्थीविधेर्न प्रत्याख्यानम्, यतश्चतुर्थी द्वितीयया सह वैकल्पिकी ग्रामादिप्रकृत्यर्थविशेषितमाधेयत्वं संयोगस्वरूपफलान्वयि अभिधत्ते। संप्रदानचतुर्थी तु फलमेवाभिधत्ते, न फलान्वय्याधेयत्वमिति "गत्यर्थकर्मणि०"[१] इति सूत्रव्याख्याने वक्ष्यते।

नापि संयोगेच्छा चतुर्थ्यर्थः। तथा सति ग्रामसंयोगेच्छया यानारोहणे "ग्रामाय गच्छति" इति प्रयोगापत्तेः।

---

[१] सू. ३.२.१२

किं च संयोगार्थकत्वेऽपि चतुर्थ्याः न कर्मत्वार्थकत्वम्, येन प्रत्याख्यानं स्यात्। अत एव "गत्यर्थकर्मणि०"[1] इति सूत्रे कर्मणीत्युक्तमिति अग्रे व्यक्तीभविष्यति।

भाट्टचिन्तामणिकारमतम्[2]

संप्रदानं चतुर्थ्यर्थः। "चतुर्थी संप्रदाने"[3] इति सूत्रात्। संप्रदानत्वं च धात्वर्थ-कर्मणा व्याप्यमानत्वम्। व्याप्यमानत्वमभिप्रेयमाणत्वम्। धात्वर्थकर्मजन्यव्यापारो-द्देश्यत्वमिति यावत्। यथा "विप्राय गां ददाति" इत्यत्र दानकर्मभूतगोजन्य-पयोदोहनादिव्यापारोद्देश्यत्वात् विप्रस्य संप्रदानत्वम्।

"रजकाय वस्त्रं ददाति" इत्यत्र तु ददातेर्लाक्षणिकत्वात् चतुर्थ्यपि संबन्धमात्रे लाक्षणिकी। एवं च दानकर्मीभूतगवादिप्रतिग्रहीतृत्वं संप्रदानत्वम्। "कर्मणा यम-भिप्रैति स संप्रदानम्"[4] इति सूत्रस्याप्ययमेवार्थः — दानकर्मणा गवादिना यमभिप्रैति अभिव्याप्नोतीति जीर्णाः।

अभिनवास्तु

दृष्टद्वारकधात्वर्थोद्देश्यत्वं संप्रदानत्वम्। धात्वर्थजन्यदृष्टफलशालित्वमिति यावत्। तत् फलं सकर्मकेषु धात्वर्थान्तर्गतं, धात्वर्थतावच्छेदकम्। अकर्मकेषु धात्वर्था-नन्तर्गतं धात्वर्थजन्यम्। सूत्रे कर्मणेत्यस्य धात्वर्थेनेत्यर्थः। तेन "विप्राय गां ददाति, पत्ये शेते, कृष्णाय रोचते भक्तिः" इत्यादयो मुख्याः प्रयोगाः। अत्र विप्रनिष्ठस्वत्वोत्पत्त्याद्युद्देश्यको दानानुकूलो व्यापारः, पतिनिष्ठसुखोद्देश्यकशयना-नुकूलो व्यापारः, (कृष्णनिष्ठप्रीतिजनकः व्यापारः) इत्यादिबोधः।

एवं च कर्मकारकापेक्षया संप्रदानस्य प्राधान्यम्। अत एव "मैत्रावरुणाय दण्डं प्रयच्छति" इत्यत्र न दानमुपयुक्तदण्डसंस्कारः, अपि तु उपयोक्ष्यमाणसंस्कार इति सिद्धान्तितम्। "आत्रेयाय हिरण्यं ददाति" इत्यत्र तु आत्रेयस्य संप्रदानत्वेऽपि न भावनां प्रति उद्देश्यत्वम्। भूतभाव्युपयोगाभावेन तस्येष्टत्वाभावात् इति।

---

[1] सू. ३.२.१२
[2] भा.चि. ९९
[3] सू. २.३.१३
[4] सू. १.४.३२

खण्डदेवग्रन्थानुसारेण संप्रदानत्वनिरूपणम्[१]

भाट्टरहस्योक्तरीत्या विचार्यते। "चतुर्थी संप्रदाने"[२] इति सूत्रम्। संप्रदानत्वं च "कर्मणा यमभिप्रैति स संप्रदानम्"[३] इति सूत्रेण निरुक्तम्। दानक्रियाकर्मकारकेण यम् अभिप्रैति = संबध्नाति स संप्रदानमिति सूत्रार्थः। संप्रदीयतेऽस्मै इत्यन्वर्थसंज्ञाबलात् दानक्रियालाभः। तथा च त्यज्यमानद्रव्योद्देश्यत्वे सति स्वीकारवत्वं संप्रदानत्वमिति न्यायसुधाकरादयः।

तेषामयमाशयः — स्वीकारो नाम यथेष्टविनियोगयोग्यतापादकः प्रतिग्रहः। "विप्राय गां ददाति" इत्यत्र त्यज्यमानगोद्रव्योद्देश्यत्वं स्वीकारवत्वं च विप्रस्यास्तीति विप्रः संप्रदानम्। उद्देश्यत्वं स्वीकारश्च गवा विप्रस्य संबन्धः। तत्रोद्देश्यत्वं नाम त्यागकालीनचतुर्थ्यन्तपदोच्चारणजन्यज्ञानविषयत्वम् (आश्रयत्वम्)। न च तत्र प्रमाणाभावः, शिष्टाचारस्यैव प्रमाणत्वात्। विप्राय दानकाले "विप्रायेदं न मम" इति उच्चारयन्ति। तेन च विप्रस्य अहमस्य स्वामी इति ज्ञानं जायते। अपि च —

नामगोत्रे समुच्चार्य सम्यक् श्रद्धान्वितो वदेत्।
संकीर्त्य देशकालादि तुभ्यं संप्रददे इति।।

न ममेति स्वस्वताया निवृत्तिमपि कीर्तयेत्।
दानहोमादिकं कुर्यादेवं श्रद्धासमन्वितः।।

इति हेमाद्रिधृतवृद्धवसिष्ठवचनं च तत्र प्रमाणम्। इन्द्रादिदेवतायामतिव्याप्तिवारणाय संप्रदानलक्षणे स्वीकारनिवेशः। अत एव देवतातद्धितस्य इन्द्रादिरूपार्थगतं त्यज्यमानद्रव्योद्देश्यत्वरूपं वा इन्द्रादिशब्दगतं त्यागकालीनचतुर्थ्यन्तपदोच्चारणकर्मत्वरूपं वा देवतात्वं वाच्यम्। न चोक्तविधदेवतात्वस्य ब्राह्मणादावतिव्याप्तिः, तत्रापि उद्देश्यत्वसत्त्वादिति वाच्यम्। देवतात्वलक्षणे स्वीकाराभावस्यापि निवेशनीयत्वात्।

"प्रजापतये जुहोति" इत्यादौ तादृशदेवतात्वे लक्षणा। अत एव चतुर्थ्याः तद्धितापेक्षया दौर्बल्यमुक्तमाकरे —

तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
देवताया विधिस्तत्र दुर्बलं तु परं परम्।।[४]

---

[१] भा.र.पृ. ११५

[२] सू. २.३.१३

[३] सू. १.४.३२

[४] त.२-२-९; पृ. ३४७

क्रेत्रादौ स्वीकारसत्त्वेन संप्रदानलक्षणातिव्याप्तिः। तद्वारणाय पूर्वदलम्। तत्र उद्देश्यत्वस्याभावान्नातिव्याप्तिः।

तत्र उक्तसंप्रदानत्वघटकानां त्यागादीनामन्यलभ्यत्वात् उद्देश्यत्वं स्वीकारश्च चतुर्थ्यर्थः। तत्रोद्देश्यत्वस्य स्वनिरूपकद्रव्यविषयकत्यागानुकूलत्वसंबन्धेन, स्वीकारस्य स्वविषयविषयकत्यागानुकूलत्वसंबन्धेन भावनायामन्वयः। एवं चोक्तलक्षणानाक्रान्ते यत्र यत्र चतुर्थीप्रयोगस्तत्र सर्वत्र लक्षणा।

वैयाकरणमतम्

वैयाकरणनव्यास्तु — यत्क्रियाकर्मसंबन्धजन्यफलभागित्वेन उद्देश्यं यत् तत् तत्क्रियासंप्रदानम्। "विप्राय गां ददाति" इत्यत्र दानक्रियाकर्मकारकेण गोद्रव्येण यः स्वत्वरूपः विप्रस्य संबन्धः तज्जन्यं फलं सुखादिः, तद्भागित्वेनोद्देश्यत्वं विप्रेऽस्तीति, स दानक्रियासम्प्रदानमिति लक्षणसमन्वयः।

पितृस्वर्गोद्देशेन ब्राह्मणसंप्रदानकधनदाने तेन पितुः स्वर्गादिरूपफलभागित्वेऽपि न संप्रदानत्वम्। तस्य फलस्य पितरि दानकर्मसंबन्धजन्यत्वाभावात्। तत्र हि दानक्रियया दानकर्मणः धनस्य ब्राह्मणस्य च स्वत्वरूपः संबन्धो जायते, न तु पितॄणाम्।

अत्र "कर्मणा यम्०" इति द्वितीयानिर्देशात् कर्मकारकं प्रति संप्रदानस्येप्सितत्वं लभ्यते। तेन फलभागित्वेनेप्सितत्वं संप्रदानत्वमित्यर्थः।

"अजां ग्रामं नयति" इत्यत्र अजासंबन्धजन्यफलवत्त्वेन ग्रामस्येप्सितत्वाभावान्न ग्रामस्य संप्रदानत्वप्रसङ्गः। तादृशफलवत्तया ग्रामस्येप्सितत्वे तु "अजां ग्रामाय नयति" इति प्रयोग इष्ट एव।

एवमेव च "रजकाय वस्त्रं ददाति" "रजकस्य वस्त्रं ददाति" इत्यादयः प्रयोगाः अप्युपपादनीयाः। एवम् "उपाध्यायः तस्मै चपेटिकां ददाति" इति महाभाष्यप्रयोगोऽपि संगच्छते। इतरथा ईदृशस्थलेषु स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वापादनरूपदानघटित संप्रदानत्वाभावेन ईदृशप्रयोगाणां भाक्तत्वापत्तेः। अतो बहुतरप्रयोगसाधारणमिदं संप्रदानत्वम्।

तत्र शाब्दबोधप्रकारः

तथा च "विप्राय गां ददाति" इत्यत्र फलजनकत्वरूपमुद्देश्यत्वं निरूपितत्वं च चतुर्थ्यर्थः। प्रकृत्यर्थः चतुर्थ्यर्थे फले निरूपितत्वे च साक्षात्संबन्धेनान्वेति। परस्वत्वापादकस्वस्वत्वनिवृत्त्यनुकूलक्रिया दाधात्वर्थः। चतुर्थ्यर्थयोः परस्वत्वेऽन्वयः।

द्वितीयार्थस्य वृत्तित्वस्यापि धात्वर्थतावच्छेदके परस्वत्वे स्वस्वत्वे चान्वयः। एवं च विप्रवृत्तिसुखजनकविप्रनिरूपितगोवृत्तिस्वत्वजनकस्वस्वत्वनिवृत्तिजनकक्रिया चैत्रनिष्ठेति बोधः इत्याहुः।

वैयाकरणमतनिराकरणम्

तन्न। संप्रदानशब्दस्यावयवार्थं परित्यज्य शक्त्यन्तरकल्पने प्रमाणाभावात्। "ग्रामं गच्छति चैत्रः" इत्यत्र चैत्रस्य गमनक्रियाकर्मकारकग्रामसंबन्धजन्यसुखभागित्वेन संप्रदानत्वापत्तेश्च। न चेष्टापत्तिः। "ग्रामं गच्छति चैत्राय" इति प्रयोगापत्तेः।

न च "आकडारादेका संज्ञा"[१] इत्यनुशासनात् संज्ञाद्वयप्रयुक्तकार्यानुपपत्तेः "विप्रतिषेधे परं कार्यम्"[२] इति सूत्रात् गच्छतीत्यत्र कर्त्राख्याते कर्तृसंज्ञाया आवश्यकत्वे पूर्वायाः संप्रदानसंज्ञायाः बाधोपपत्तिरिति वाच्यम्। तथात्वे "चैत्रेण ग्रामो गम्यते" इतिवत् "चैत्राय ग्रामो गम्यते" इति प्रयोगापत्तेः। कर्तृत्वविवक्षायां तृतीयाप्रयोगवत् संप्रदानत्वविवक्षायां चतुर्थीप्रयोगस्य निवारयितुमशक्यत्वात्। इतरथा विवक्षाभेदेन "ग्रामं गच्छति, ग्रामे गच्छति" इति प्रयोगद्वयानापत्तेः।

न च "चैत्रः स्वस्मै गच्छति" इतिवत् तादृशप्रयोग इति वाच्यम्। "स्वस्मै गम्यते" इत्यस्य स्वार्थं गम्यते इति विवरणानुरोधेन तादर्थ्यचतुर्थीत्वेन संप्रदानविभक्तित्वानुपपत्तेः।

न चैतद्दोषवारणाय क्रियाकरणत्वमिति कर्मविशेषणम्। क्रियाकरणं यत् क्रियाकर्म तत्संबन्धजन्यफलभागित्वेनोद्देश्यत्वं संप्रदानत्वम्; ग्रामश्च न गमनकरणम्, देयं तु दानक्रियाकरणम्। अतो न दोष इति वाच्यम्। देयस्य यथा स्वत्वरूपफलांश एव करणत्वं न तु तदनुकूलक्रियांशे, तथा गमनेऽपि तदविशिष्टम्, गमनफलस्य संयोगस्य ग्रामजन्यत्वाविशेषात्। संयोगं प्रति ग्रामस्य समवायिकारणत्वात्।

अपि च विप्रे कस्यचित् फलस्याजननेऽपि "विप्राय मया गौर्दत्ता, न तु तस्य कश्चित् भोगो जातः" इत्यादिव्यवहारः संप्रदानत्वस्य फलघटितत्वे नोपपद्यते।

यस्तु प्रतिग्रहाभावेऽपि "मनसा पात्रमुद्दिश्य जलमध्ये जलं क्षिपेत्"[३] इति वचनात् पात्रोद्देश्यकत्यागमात्रेण "अस्मै मया दत्ता, न त्वनेन गृहीता" इति

---

[१] सू. १.४.१

[२] सू. १.४.२

[३] ना.स्मृ. १-२

व्यवहारः स भाक्त एव। तत्र परस्वत्वोत्पत्त्यभावेन दानस्यैवाजातत्वात् अतः पूर्वमते तादृशस्थलेऽव्याप्तिरिति शङ्काया नावसरः।

संप्रदानत्वस्याखण्डोपाधिरूपता

वस्तुतस्तु न्यायसुधाकृन्मते चतुर्थ्याः उद्देश्यत्वस्वीकाररूपार्थद्वये शक्तिद्वयकल्पनम्, नव्यवैयाकरणमते उद्देश्यत्वनिरूतित्वरूपार्थद्वये शक्तिद्वयकल्पनम् इति गौरवात् वैयाकरणमते धात्वर्थैकदेशे चतुर्थ्यर्थान्वयस्वीकारेण "पदार्थः पदार्थेनान्वेति न तु तदेकदेशेन" इति व्युत्पत्तिविरोधात्, उभयनिरुक्तसंप्रदानत्वस्याज्ञानेऽपि "विप्राय गां ददाति" इति वाक्यात् विप्रसंप्रदानकं गोकर्मकं दानमिति बोधोदयाच्च देयद्रव्यनिष्ठस्वत्वनिरूपकत्वरूपं तत्समनियतमखण्डोपाधिरूपमेव वा संप्रदानत्वनमिति युक्तमाश्रयितुम्। तदेव च चतुर्थीशक्यार्थः। तत्र प्रकृत्यर्थो विप्रः साक्षात् आधेयत्वसंबन्धेनान्वेति। तस्य च संप्रदानत्वस्य धर्मिग्राहकप्रमाणेन ससंबन्धिकत्वकल्पनात् निरूपकापेक्षायां "कर्मणा यमभिप्रैति०"[1] इति सूत्रात् कर्मकारकस्य निरूपकत्वावगतेः स्वनिरूपकदेयद्रव्यकर्मकदानानुकूलत्वसंबन्धेन भावनायामन्वयः। द्वितीयार्थोऽप्यखण्डोपाधिरूपं कर्मत्वम्। तस्य स्वनिरूपकदानानुकूलत्वसंबन्धेन भावनायामन्वयः। विप्रनिष्ठसंप्रदानत्वविशिष्टा गोनिष्ठकर्मत्वविशिष्टा भावनेति बोधः। मुख्यदानातिरिक्ते सर्वत्र भाक्तः संप्रदानव्यवहारः।

भाक्तसंप्रदानस्थले बोधप्रकारः

तथाहि — "प्रजापतये जुहोति" इत्यादौ चतुर्थ्या लक्षणया देवतात्वं प्रतिपाद्यते। अत एव चतुर्थ्याः तद्धितापेक्षया दौर्बल्यम्। अत एव दानातिरिक्तयत्किंचित्क्रियाजन्यफलभागित्वरूपभाक्तसंप्रदानत्वेऽपि चतुर्थीविधानार्थं "क्रियाग्रहणमपि कर्तव्यम्"[2] इति वार्तिकम्। क्रियया यमभिप्रैति सोऽपि संप्रदानसंज्ञो भवति इति तदर्थः।

न चैवं "घटं करोति" इत्यादौ चतुर्थ्यापत्तिरिति वाच्यम्। परत्वेन द्वितीयया चतुर्थ्या बाधात्। यत्किंचित्क्रियाजन्यफलशालित्वात्मकस्य भाक्तसंप्रदानत्वस्य सकर्मकाकर्मकसाधारणस्य सकर्मकमात्रविषयिण्या द्वितीयया बाधोपपत्तेश्च। अत एव "पत्ये शेते" इत्यत्र शयनक्रियाजन्यप्रीतिरूपफलभाक्त्वेनामुख्यं संप्रदानत्वम्। दानक्रियाजन्यफलशालित्वरूपस्य मुख्यसंप्रदानत्वस्य तत्र बाधात्।

---

[1] सू. १.४.३२
[2] वा. १०८५

अत एव मुख्यदानातिरिक्तक्रियावाचकसकर्मकधातुस्थलेऽपि यत्र "वृक्षायोदकं सिञ्चति" इत्यादौ कर्मकारकान्तरं लब्धं, तत्रापि निरुक्तक्रियाजन्यफलशालित्व-रूपभाक्तसंप्रदानत्वविवक्षायां चतुर्थी भवत्येव। कर्मान्तराभावे तु "वृक्षं सिञ्चति" इति द्वितीयैव। [अत्र द्रवद्रव्यजलगतक्रियानुकूलव्यापारः धात्वर्थः। धात्वर्थ-तावच्छेदकक्रियारूपफलशालितया उदकस्य कर्मता। तादृशक्रियाजन्यधात्वर्थतान-वच्छेदकजलसंयोगरूपफलशालितया संप्रदानत्वमिति ग्रन्थकारो मन्यत इति प्रति-भाति]

तत्रापि गत्यादिसकर्मकधातुविशेषस्थले परया द्वितीयया बाधितायाः चतुर्थ्याः पुनः प्रतिप्रसवरूपेण प्राप्त्यर्थं "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि"[१] इत्यनुशासनं प्रवृत्तम्। चेष्टारूपकर्मणि अध्वभिन्ने द्वितीयाचतुर्थ्यौ स्याताम् इति तदर्थः। "ग्रामं गच्छति, ग्रामाय गच्छति" अचेष्टायां तु "मनसा हरिं व्रजति"। अध्वनि तु "पन्थानं गच्छति"। गन्त्रा अधिष्ठते एव पथि अयं चतुर्थीपर्युदासः। यदा तु उत्पथात् पन्था एव क्रमितुमिष्यते, तदा "उत्पथेन पथे गच्छति" इति भवत्येव चतुर्थी। अत्र सर्वत्र आश्रयत्वं लक्षणया चतुर्थ्यर्थः। तच्च स्वनिरूपक-फलजनकक्रियानुकूलत्वसंबन्धेन कृतावन्वेति। ग्रामनिष्ठाश्रयतानिरूपकसंयोगानु-कूलक्रियानुकूला कृतिरिति बोधः।

क्रियाग्रहणमपि कर्तव्यमिति वार्तिकस्य आवश्यकता

यत्तु "कर्मणा यमभिप्रैति०"[२] इति सूत्रस्थयथाश्रुतभाष्यस्वरसात् वाक्यपदीय-कैयटादौ "क्रियाग्रहणमपि कर्तव्यम्"[३] इति वार्तिकप्रत्याख्यानं कृतम्। तथा हि — सर्वा हि पाकादिक्रिया ज्ञानेच्छादिक्रियाकर्म। तद्यत्र "पत्ये शेते" इत्यादौ चतुर्थ्यन्तप्रयोगः तत्रानुमेयां ज्ञानादिक्रियां विवक्षित्वा तत्कर्मत्वेन शयनं विवक्ष्यते। तत्र ज्ञानादिक्रियाकर्मकारकभूतं शयनं प्रति ईप्सिततत्वेन पत्युः संप्रदानत्वोपपत्तेः नार्थो वार्तिकेन। यत्र तु "घटं करोति, ओदनं पचति, हरिं मनसा व्रजति, पन्थानं गच्छति" इत्यादौ द्वितीयाप्रयोगः तत्र ज्ञानादिक्रियया पाकादिक्रियाया अभेदं विवक्षित्वा तां प्रतीप्सिततमस्यौदनादेः कर्मत्वं भवति। "ग्रामं गच्छति" इत्यादौ तु द्विविधप्रयोगसत्त्वात् भेदाभेदोभयविवक्षया उभयम्। संप्रदानत्वस्य दानक्रियामात्र-निरूपितत्वानङ्गीकारात् "पत्ये शेते" इत्यादावपि मुख्यसंप्रदानत्वाविरोधः — इति।

---

[१] सू. २.३.१२
[२] सू. १.४.३२
[३] वा. १०८५

तन्न। पच्यादिधातुश्रवणानन्तरं ज्ञानेच्छाद्यनुभवाभावात् ज्ञानेच्छादिकर्मतया पाकादिक्रियाया अप्रतीतेः। बलात् प्रतीतिकल्पने प्रमाणाभावात्। न च "पत्ये शेते" इति प्रयोगसाधुत्वज्ञानार्थं तथा कल्पनमिति वाच्यम्। विध्यभावेन (संप्रदानसंज्ञाविध्यभावेन) तत्र प्रयोगसाधुत्वज्ञानस्यैवाभावात्। अपि च क्वचित् भेदविवक्षा क्वचित् अभेदविवक्षेति व्यवस्थानुपपत्तेश्च।

तस्मात् "क्रियाग्रहणमपि कर्तव्यम्"[१] इति वार्तिकं न प्रत्याख्येयम्। अत एव भाष्यकारेणापि "कर्मणा यमभिप्रैति०"[२] इति सूत्रे प्रत्याख्यातमपि क्रियाग्रहणम्, "गत्यर्थकर्मणि०"[३] इति सूत्रे "क्रियाग्रहणमपि तत्र चोद्यते" इति ग्रन्थेन तस्य विधित्वमाश्रितमेव।

न चैवं "गत्यर्थकर्मणि०" इति सूत्रप्रत्याख्यानानुपपत्तिः इति वाच्यम्। धात्वर्थतावच्छेदकफलशालित्वरूपे तत्समनियताखण्डोपाधौ वा विवक्षिते द्वितीया, धात्वर्थतानवच्छेदकक्रियाजन्यफलभागित्वे विवक्षिते चतुर्थी इत्येवमुभयोपपत्तेः सूत्रवैयर्थ्यमित्याशयात्। गमनजन्यस्वास्थ्याद्याश्रयत्वेन "ग्रामाय गच्छति" इति प्रयोगोपपत्तेः।

न चैवमध्वादिरूपापवादविषयेऽपि प्रयोगद्वयापत्तिः इति वाच्यम्। तदंशेऽप्रत्याख्यानस्य भाष्यसिद्धत्वात्। भाष्यकारो हि अध्वादीनां न स्वरूपेणापवादविषयता, "स्त्रियं गच्छति" इत्यत्र द्वितीयैवेति नियमानापत्तेः। अपि तु (संप्राप्तत्वेन) प्राप्त एव पन्थाः स्त्री च तत्र पन्थानं गच्छति, "स्त्रियं गच्छति" इति द्वितीयानियमः इति प्रतिपादयन् "असंप्राप्ते कर्मणि द्वितीयाचतुर्थ्यौ भवत इति वक्तव्यम्" इत्याह। वृत्तिकारोऽप्यमुमेवार्थमनुमन्यते।

अतः सिद्धं धात्वर्थतानवच्छेदकं यत् क्रियाफलं तदाश्रयत्वमेव एवमादिस्थले भाक्तं संप्रदानत्वमिति।

रुच्यर्थानां प्रीयमाणः[४] इति सूत्रार्थः

रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः संप्रदानं स्यात्। प्रीयमाण इत्यस्य समवायेन प्रीत्याश्रय इत्यर्थः। "हरये रोचते भक्तिः"। भक्तिः स्वविषयकप्रीतिं हरौ जनयतीत्यर्थः। भक्तिगतव्यापारप्रयोज्यप्रीत्याश्रयत्वात् हरेः कर्मत्वं प्राप्तम्। तदपवादेन अनेन संप्रदानसंज्ञा विधीयते।

---

[१] वा. १०८५
[२] सू. १.४.३२
[३] सू. २.३.१२
[४] सू. १.४.३३

न चैवं सति "हरिर्भक्तिमभिलषति" इत्यत्रापि भक्तिविषयकप्रीत्याश्रयत्वात् हरेः संप्रदानत्वापत्तिरिति वाच्यम्। अभिलषते रुच्यर्थकत्वाभावात्। अन्यकर्तृकः = प्रीत्याश्रयापेक्षया यत् अन्यत् तत्कर्तृकोऽभिलाषो रुचिः। हरिनिष्ठप्रीतेः भक्तिः कर्त्री। प्रीत्याश्रयकर्तृकः किंचिद्विषयक इच्छाविशेषः अभिलाषः। प्रीयमाणः किम्। "देवदत्ताय रोचते मोदकः पथि"। अत्र पथः प्रीयमाणत्वाभावान्न संप्रदानत्वम्।

शेखरे[1]

अन्यकर्तृकः अभिलष्यतिकर्त्रपेक्षया अन्यत् अभिलष्यतिकर्म तत्कर्तृकः इत्यर्थः। यत्किंचिद्विषयकप्रीत्यनुकूलव्यापाराश्रयः अभिलष्यतिकर्ता। हरिर्भक्तिमभिलष्यतीति प्रत्ययात्। यत्किंचिन्निष्ठप्रीत्यनुकूलः प्रीतिव्यधिकरणो यो व्यापारः तदाश्रयो रोचतेः कर्तेति अभिलषते रुच्यर्थत्वाभावान्न तद्योगे संप्रदानत्वमिति भावः।

मञ्जूषायाम्[2]

"हरये रोचते भक्तिः" इत्यत्र विषयतासंबन्धावच्छिन्नप्रीत्यनुकूलः तत्समानाधिकरणो व्यापारो रुचेरर्थः। आश्रयरूपः संबन्धश्चतुर्थ्यर्थः। "रुच्यर्थानां प्रीयमाणः" इति सूत्रस्वरसात्। शेषषष्ठ्यपवादोऽयम्। रुच्यर्थफलसंबन्धित्वमेवात्र संप्रदानत्वम्। एवं च हरिनिष्ठा भक्तिविषया या प्रीतिः तदनुकूलो भक्तिनिष्ठो व्यापारः इति बोधः। अभिलषतेस्तु विषयतासंबन्धावच्छिन्नप्रीतिव्यधिकरणो व्यापारोऽर्थ इति न स रुच्यर्थः इति हरिः भक्तिमभिलष्यतीत्यादौ न हरेः संप्रदानता।

लघुमञ्जूषायाम्[3]

"हरये रोचते भक्तिः"। विषयतासंबन्धावच्छिन्नप्रीत्यनुकूलः तत्समानाधिकरणो व्यापारः रुचेरर्थः। तत्फलभूतप्रीतेः समवायेनाश्रयो हरिः संप्रदानत्वशक्तिमान्। प्रीयमाणपदस्वारस्यात्। समवायसंबन्धावच्छिन्नप्रीत्यनुकूलो व्यापारः प्रीधातोरर्थः। अत एव 'हरिं प्रीणयति' इत्यादिसिद्धिः। एतत्सूत्राभावे हि शेषे षष्ठी प्राप्तेति शेषषष्ठ्यपवादो भवत्यत्र चतुर्थी। हरिसंप्रदानिका भक्तिकर्तृका रुचिरिति बोधः। हरिनिष्ठा या भक्तिविषया प्रीतिः तदनुकूलो भक्तिनिष्ठो व्यापार इति यावत्।

अभिलषतेश्च विषयतासंबन्धावच्छिन्नप्रीत्यनुकूलः प्रीतिव्यधिकरणो व्यापारोऽर्थ इति न तस्य रुच्यर्थत्वमिति हरिः भक्तिमभिलष्यतीत्यादौ न हरेः संप्रदानत्वम्।

---

[1] पृ. ६७२
[2] बृ.म.पृ. १७४
[3] पृ. १२६८

कारकचक्रे[१]

"नारदाय रोचते कलहः" इत्यत्र नारदस्य न संप्रदानता। किं तु "रुच्यर्थानां प्रीयमाणः"[२] इति सूत्रेण संबन्धमात्रे चतुर्थी विधीयते। अत्र चतुर्थ्याः संबन्धोऽर्थः। धातोः प्रीतिरर्थः। तिङः विषयत्वमर्थः। नारदसंबन्धिप्रीतिविषयः कलह इति बोधः।

शब्दशक्तिप्रकाशिकायाम्[३]

"मैत्राय रोचते मोदकः" इत्यत्र भक्ष्यत्वप्रकारकेच्छा धात्वर्थः। तदन्वयि आधेयत्वं चतुर्थ्यर्थः। तिङः प्रकाशत इत्यादाविव विषयत्वलक्षणं कर्तृत्वमर्थः। मैत्रनिष्ठभक्ष्यत्वप्रकारकेच्छानिरूपितविषयत्ववान् मोदक इत्यन्वयबोधः। विषयत्वं च प्रकृते विशेष्यत्वम्।

व्युत्पत्तिवादे[४]

"नारदाय रोचते कलहः" इत्यादौ रुचधात्वर्थः प्रीतिजनकत्वम्। तद्घटकप्रीत्याश्रयस्य नारदादेः "रुच्यर्थानां०"[५] इत्यनुशासनेन संप्रदानसंज्ञा विहिता। तत्र चतुर्थ्यर्थः आश्रितत्वम् (आधेयत्वम्) प्रीतावन्वेति। तादृशधात्वर्थाश्रयतया कलहादेः कर्तृता। नारदनिष्ठप्रीतिजनकत्वाश्रयः कलह इति बोधः।

पदवाक्यरत्नाकरे[६]

"चैत्राय मोदते, रोचते, स्वदते मोदकः" इत्यत्र रुच्यादेः धातोः अभिलाषोऽर्थः। चतुर्थ्याः समवेतत्वमर्थः। आख्यातस्य विषयत्वमर्थः। चैत्रसमवेताभिलाषविषयो मोदक इत्यन्वयबोधः।

विभक्त्यर्थनिर्णये[७]

"देवदत्ताय रोचते मोदकः" इत्यादौ देवदत्तादेः संप्रदानत्वं ज्ञापयति "रुच्यर्थानां प्रीयमाणः"[८] इति सूत्रं रुच्यर्थानां योगे प्रीयमाणो योऽर्थः तत् कारकं

---

[१] पृ. ६१
[२] सू. १.४.३३
[३] पृ. ३०९
[४] पृ. २४२
[५] सू. १.४.३३
[६] पृ. ७१०
[७] पृ. २७८
[८] सू. १.४.३३

संप्रदानसंज्ञकं भवतीत्यर्थकम्। विषयकर्तृकोऽभिलाषो रुचिः। तदर्था रुच्यर्थाः। अत एव "अन्यकर्तृकोऽभिलाषो रुचिः" इति काशिका। प्रीयमाणः रुचिकर्तृविषयकप्रीतिमान्। भवति हि "रोचते मोदकः" इत्यत्र रुचिकर्ता विषयो मोदकः तत्प्रीतिमान् देवदत्त इति तस्य संप्रदानत्वम्। प्रीतिश्चात्र सुखत्वेन सुखजनकत्वेन वा अभिलाषः। तद्वान् तत्समवायी। तथा चायमेवाभिलाषो रुचिः, तत्समवायित्वं वा चतुर्थ्यर्थः। "देवदत्ताय रोचते मोदकः" इत्यत्र देवदत्तसमवेताभिलाषविषयो मोदक इत्यन्वयबोधः इति संप्रदायः।

वस्तुतस्तु रुचिः उत्कटेच्छा। उत्कटत्वं च द्वेषप्रतिबन्धकतावच्छेदको जातिविशेषः। रुच्यर्थाः रोचत्यादयः। तदर्थकर्तृत्वं विषयस्येति रोचते इत्यादौ आख्यातस्य विषयत्वमर्थः। प्रीयमाणशब्दार्थः प्रीतिमान्। प्रीतिः सुखम्। तथा च चतुर्थ्यर्थः सुखम्। तस्य सामानाधिकरण्योद्देश्यत्वाभ्यां संबन्धाभ्यां रुचावन्वयः। सामानाधिकरण्यनिवेशात् देवदत्तस्यान्यदीयसुखेच्छाविषये मोदके न तथा प्रयोगः। एवं च "देवदत्ताय रोचते मोदकः" इत्यत्र देवदत्तसुखस्य समानाधिकरणतया उद्देश्यिनी या उत्कटेच्छा तद्विषयो मोदक इत्यन्वयबोधः। अत एव सूत्रे प्रीयमाणशब्दोपादानमर्थवत्। अन्यथा रुच्यर्थानां रुचिमान् इत्येव मुनिः सूत्रयेत्। तावतैव समवायित्वस्य समवेतत्वस्य वा चतुर्थ्यर्थतासंभवात्। प्रीयमाणग्रहणं तु "देवदत्ताय रोचते मोदकः पथि" इत्यत्र पथः संप्रदानतानिषेधार्थम्।

भाट्टचिन्तामणौ[१]

रुच्यादिधातुसमभिव्याहारे तु प्रीयमाणस्यैव (समवायेन प्रीत्याश्रयस्यैव) संप्रदानत्वम्। "देवदत्ताय वने रोचन्ते फलानि" इत्यत्र अवच्छेदकतासंबन्धेन वने प्रीतिसत्त्वेऽपि समवायसंबन्धेन तदभावान्न संप्रदानता।

भाट्टरहस्ये[२]

एवं "रुच्यर्थानां प्रीयमाणः"[३] इत्यनुशासनात् रुच्यर्थधातूनां योगे प्रीयमाणः — रुचिविषयीभूतद्रव्य (वस्तु) जन्यप्रीतिमानर्थोऽपि संप्रदानसंज्ञः स्यात् इत्यर्थकात् "चैत्राय रोचते मोदकः" इत्यादौ चतुर्थी। अत्र मोदकेऽपि धातुयोगस्य सत्त्वात् तद्वारणाय प्रीयमाण इति विशेषणम्। अत्र वृत्तित्वं लक्षणया चतुर्थ्यर्थः। तस्य स्वनिरूपकरुचिनिरूपकत्वेन संबन्धेन आख्यातार्थे अन्वयः। आख्यातस्य

---

[१] पृ. १००

[२] पृ. १२०

[३] सू. १.४.३३

लक्षणया विषयत्वमर्थः। अभिलाषो धात्वर्थः। चैत्रवृत्तित्ववद्रुचिविषयत्वं मोदकवृत्तिः इति शाब्दबोधः।

श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः[१] इति सूत्रार्थः

एषां धातूनां प्रयोगे बोधयितुमिष्टः संप्रदानं स्यात्। श्लाघृ कत्थने, ह्नुङ् अपनयने, ष्ठा गतिनिवृत्तौ, शप उपालम्भे इति धातवः। स्तुत्यादिना बोधनं धात्वर्थः। ज्ञीप्स्यमान इति लिङ्गात्।

"गोपी स्मरात् कृष्णाय श्लाघते" — मन्मथपीडावशात् गोपी आत्मस्तुत्या विरहवेदनां कृष्णं बोधयतीत्यर्थः। कृष्णस्यैव स्तुत्यत्वे तु द्वितीयैवेत्याहुः।

"गोपी स्मरात् कृष्णाय ह्नुते" — सपत्न्यपनयनेन स्वाशयं कृष्णं बोधयतीत्यर्थः।

"गोपी स्मरात् कृष्णाय तिष्ठते" — गन्तव्यमित्युक्तेऽपि स्थित्या स्वाशयं कृष्णं बोधयतीत्यर्थः।

"गोपी स्मरात् कृष्णाय शपते" — उपालम्भेन स्वाशयं कृष्णं बोधयतीत्यर्थः। इति कौमुद्याम्।

लघुमञ्जूषायां[२]

"गोपी स्मरात् कृष्णाय श्लाघते" इत्यत्र श्लाघधातोः बोधविषया स्तुतिरित्यर्थः। बोधः फलम्। फलतावच्छेदकः संबन्धः आधेयता। स्तुतिश्च गुणवत्त्वप्रतिपादकशब्दप्रयोगादिः। स्मरात् इति हेतौ पञ्चमी। बोधाश्रयस्य कृष्णस्य "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः"[३] इति सूत्रेण संप्रदानत्वम्। ज्ञीप्स्यमानपदेन प्रधानभूतस्य ण्यर्थकर्मणो ग्रहणम्। सन्स्वारस्यात् यद्विषयकज्ञानानुकूलव्यापारः तस्य प्रकृत्यर्थकर्मणोऽपि तेन तेन पदेन ग्रहणम्। अन्यथा ज्ञाप्यमान इत्येव वदेत्। तत्राद्ये गोपीकर्तृका स्मरहेतुका कृष्णसंप्रदानिका अर्थात् कृष्णवृत्तिबोधविषयिका स्तुतिरिति बोधः। स्तुतिश्चात्मनः परस्य वेति प्रकरणादिगम्यम्। अत एव कृष्णाय गोपी आत्मानं परं वा श्लाघ्यं कथयतीत्यर्थ इति प्राञ्चः। कर्मसंज्ञापवादोऽयम्। कृष्णस्यैव स्तुत्यत्वे तु परत्वात् कर्मत्वमेव।

---

[१] सू. १.४.३४

[२] पृ. १२६९

[३] सू. १.४.३४

यद्वा गुणोत्कर्षेण श्लाघ्यमानः कृष्णः गुणवत्तया तत्समर्थाचरणेन अध्यारोपितप्रेरणत्वात् हेतुरिति हेतुत्वापवाद इयं संप्रदानसंज्ञा।

ह्नुते इत्यत्र बोधविषयकमितरादर्शनयोग्यदेशस्थापनं धात्वर्थः। आत्मनामित्यादेः अध्याहारः। सपत्नीभिया चात्मादेः तथा स्थापनं बोध्यम्। एवं च गोपीकर्तृका कृष्णसंप्रदानिका = अर्थात् कृष्णवृत्तिबोधविषयकं यत् आत्मकर्मकमितरादर्शनयोग्यदेशस्थापनं तदनुकूला क्रियेति बोधः।

तिष्ठतेः स्वाभिप्रायबोधानुकूलस्थितिरर्थः। गोपीकर्तृका कृष्णसंप्रदानिका अर्थात् कृष्णवृत्तिस्वाभिप्रायविषयकबोधानुकूला स्थितिरिति बोधः।

शपेः स्वाभिप्रायबोधानुकूलशपथकरणमर्थः। कृष्णसंप्रदानकं अर्थात् कृष्णवृत्तिस्वाभिप्रायबोधानुकूलं शपथकरणमिति बोधः।

यद्वा श्लाघ्यादेः स्तुत्यादिपूर्विका बोधना अर्थः। स्तुत्या कृष्णमात्मानुरागं बोधयति, ह्नुत्या तमनुरागं कृष्णं बोधयति, स्थित्या शपथेन तं कृष्णं बोधयति इत्यर्थः। प्रकृत्यर्थकर्मणो ग्रहणे तु स्तुत्या ह्नुत्या स्थित्या शपथेन कृष्णः स्वसखीजनं ज्ञापयतीत्यर्थः। शब्दशक्तिप्रकाशिकायाम् — एतत्सूत्रं न गृहीतम्।

पदवाक्यरत्नाकरे[१]

श्लाघह्नुङ्स्थाशपां कर्म भजते संप्रदानताम्। इत्युक्तम्। तथा उत्कर्षप्रकारकप्रतिपत्त्यनुकूलो व्यापारः शब्दो वा श्लाघेरर्थः। अदर्शनानुकूलो व्यापारो ह्नुतेरर्थः। प्रकाशनानुकूलः संमुखावस्थानादिरूपो व्यापारः स्थाधातोरर्थः। अपकर्षप्रकारकप्रतिपत्त्यनुकूलो व्यापारः शपेरर्थः। "नरपतये श्लाघते" इत्यत्र उत्कर्षप्रकारकप्रतिपत्तिरूपफलाश्रयस्य नरपतेः "नरपतिं स्तौति" इत्यत्रेव कर्मसंज्ञाप्रसक्तौ तदपवादतया चतुर्थीप्रापकसंप्रदानसंज्ञा विधीयते।

"जाराय ह्नुते बन्धकी" इत्यत्र जारं प्रच्छादयति इत्यादाविव अदर्शनस्वरूपाप्रकाशसमवायितया जारादेः," शिशवे शपते" इत्यत्र शिशुं निन्दति इत्यादाविव अपकृष्टज्ञानविशेष्यतया शिशोः कर्मत्वप्राप्तौ तदपवादेन संप्रदानसंज्ञा विधीयते। "कृष्णाय तिष्ठते गोपी" इत्यत्र तङन्ततिष्ठतेर्योगे उक्तार्थ एव चतुर्थी।

यत्र तु स्थेयत्वेन = निर्णायकत्वेनाश्रयणं निवेदनं तङन्ततिष्ठतेरर्थः तत्र न संप्रदानता। अत एव — "संशय्य कर्णादिषु तिष्ठतेः यः" इति भारविः। संशयानन्तरितस्य कर्णादौ निर्णायकत्वेनाश्रयणस्य कर्ता य इति तदर्थः। समानदेशत्व-

---

[१] पृ. ७१४

संबन्धावच्छिन्नाधेयत्वं सप्तम्यर्थो धात्वर्थेऽन्वेति। तथा च संशयोत्तरकालीनकर्णाद्यधिकरणकविनिवेदनकर्ता इति तद्वाक्यजन्यो बोधः।

यत्र च नोपालम्भः शपेरर्थः, किं तु शपथः शुद्ध्यशुद्धिविवेचकः पुत्रदारशिरःस्पर्शादिरर्थः, तत्र पुत्रेण शपतीत्येव प्रमाणं, न तु पुत्रायेति। (शुद्ध्यशुद्धी = सत्यासत्यप्रतिज्ञे)

अत एव —

> आचम्य चाम्बु तृषितः करकौ शपेयं भावानुरक्तललनासुरतैः शपेयम्।
> जीयेय येन कविना यमकैः परेण तस्मै वहेयमुदकं घटकर्परेण।।

इति घटकर्परः।

विभक्त्यर्थनिर्णये[१]

कतिपयधातुयोगे ज्ञीप्स्यमानस्य संप्रदानतां ज्ञापयति — "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः"[२] इति सूत्रम्। श्लाघिः ह्नुविः तिष्ठतिः शपिश्चामीषां धातूनां योगे ज्ञीप्स्यमानो योऽर्थः तत् कारकं संप्रदानसंज्ञं भवतीत्यर्थकम्। ज्ञीप्स्यमानः ज्ञापयितुमभिप्रेतः इति काशिका। ज्ञीप्स्यमानग्रहणं "देवदत्ताय श्लाघते पथि" इत्यत्र पथः संप्रदानतानिषेधार्थम्।

अत्र श्लाघेः उत्कर्षप्रकारकप्रतिपत्त्यनुकूलो व्यापारः शब्दो वा अर्थः। ह्नुतेः अदर्शनानुकूलो व्यापारः अर्थः। तिष्ठतेस्तङन्तस्य प्रकाशानुकूलो व्यापारः संमुखावस्थानादिरर्थः। शपेः अपकर्षप्रतिपत्त्यनुकूलो व्यापारः शब्दो वा अर्थः।

"नरपतये श्लाघते" इत्यत्र उत्कर्षप्रकारकप्रतिपत्तिस्वरूपे फले विशेष्यत्वस्वरूपं विशेष्यतासंबन्धावच्छिन्नाधेयत्वस्वरूपं वा कर्मत्वं चतुर्थ्यर्थोऽन्वेति। नरपतिविशेष्यकोत्कर्षप्रकारकप्रतिपत्त्यनुकूलो व्यापार इति बोधः।

"जाराय निह्नुते" इत्यत्र अदर्शने विषयतासंबन्धावच्छिन्नप्रतियोगिताके चाक्षुषप्रतियोगिताके ज्ञानसामान्यप्रतियोगिके वा अभावे चाक्षुषविषयत्वाभावे ज्ञानसामान्यविषयत्वाभावे वा फले विशेषणतासंबन्धावच्छिन्नाधेयत्वस्वरूपं कर्मत्वमन्वेति। जारनिरूपितविशेषणतासंबन्धावच्छिन्नाधेयतावान् यः चाक्षुषविषयत्वाभावः ज्ञानसामान्यविषयत्वाभावो वा तदनुकूलो व्यापर इति बोधः।

---

[१] पृ. २७९
[२] सू. १.४.३४

"जम्भारये कस्तिष्ठते" इत्यत्र प्रकाशे ज्ञानस्वरूपे फले समवेतत्वस्वरूपं कर्मत्वमन्वेति। जम्भारिसमवेतप्रकाशानुकूलो व्यापार इति बोधः।

"शक्राय शपते" इत्यत्र अपकर्षप्रकारकप्रतिपत्तिरूपे फले विशेष्यत्वं विशेष्यतासंबन्धावच्छिन्नाधेयत्वं वा कर्मत्वमन्वेति। शक्रविशेष्यकापकर्षप्रकारकप्रतिपत्त्यनुकूलः, शक्रे विशेष्यतासंबन्धेन वृत्तिः या प्रतिपत्तिः तदनुकूलो वा व्यापारः वाक्यार्थः। तथा च कर्मसंज्ञापवादार्थं सूत्रमिति वदन्ति।

वस्तुतस्तु सूत्रे ज्ञीप्स्यमानग्रहणात् ज्ञानेच्छा चतुर्थ्यर्थ इति ज्ञायते। तत्र ज्ञानस्य धातुना लाभे सति इच्छामात्रं चतुर्थ्यर्थः। अन्यथा "चतुर्थी संप्रदाने"[१] इति सूत्रानन्तरं "श्लाघह्नुस्थाशपां कर्मणि"[२] इत्येव मुनिः सूत्रयेत्। ज्ञीप्स्यमानशब्दवैयर्थ्यं च स्यात्।

किं च कर्मसंज्ञापवादाभ्युपगमे — "अपह्नुवानस्य जनाय यन्निजामधीरतामस्य कृतं स्मरेण यत्" इत्यादौ कर्मप्रत्ययद्वितीयादेरनुपपत्तिप्रसङ्गः। "देवदत्ताय श्लाघते" इत्यादौ देवदत्तादेः श्लाघतिकर्मत्वेऽपि निरवकाशया संप्रदानसंज्ञया कर्मसंज्ञाबाधात् ज्ञीप्स्यमानभेदस्य द्वितीयार्थस्यान्वयात्(द्वा) श्लाघतियोगे न द्वितीयादिकर्मप्रत्ययः। किं तु ज्ञीप्स्यमानार्थिका चतुर्थी। तत्रेच्छा चतुर्थ्यर्थः। अत एव "देवदत्ताय श्लाघते देवदत्तं श्लाघमानः तां श्लाघां तमेव ज्ञापयितुमिच्छतीत्यर्थः" इति काशिका। तत्रेच्छायां चतुर्थ्यर्थे उत्कर्षप्रकारकज्ञानस्वरूपस्य फलस्योद्देश्यतया देवदत्तादेः प्रकृत्यर्थस्य समवेतत्वसंसर्गावच्छिन्नायाः तादृशज्ञानस्वरूपफलनिष्ठोद्देश्यतावच्छेदकतायाः प्रतियोगित्वेन संबन्धेन तादृशज्ञाननिष्ठविशेष्यितानिष्ठोद्देश्यतावच्छेदकतानिरूपितावच्छेदकतायाः प्रतियोगित्वेन संबन्धेन चान्वयः। देवदत्तस्य देवदत्तविशेष्यताकोत्कर्षप्रकारकज्ञानं भवतु इतीच्छायां ज्ञाननिष्ठोद्देश्यतानिरूपितसमवेतत्वसंबन्धावच्छिन्नदेवदत्तनिष्ठावच्छेदकताप्रतियोगित्वं तथाविधोद्देश्यतानिरूपितविशेष्यतानिष्ठावच्छेदकतानिरूपितदेवदत्तनिष्ठावच्छेदकताप्रतियोगित्वं चेति संबन्धद्वयं निराबाधमिति।

[इच्छायाः स्वनिरूपितोद्देश्यतासंबन्धेन धात्वर्थफले ज्ञानेऽन्वयः। तथा च देवदत्तनिष्ठावच्छेदकताकोद्देश्यताका देवदत्तनिष्ठावच्छेदकताकविशेष्यत्वनिष्ठावच्छेदकताकोद्देश्यताका वा या इच्छा तन्निरूपितोद्देश्यताश्रयज्ञानानुकूलव्यापारवानिति बोधः]

---

[१] सू. २.३.१३

[२] सू. १.४.३४

अन्यविशेष्यकोत्कर्षप्रकारकदेवदत्तज्ञानस्य देवदत्तविशेष्यकोत्कर्षप्रकारकान्यदीयज्ञानस्य च इच्छायां न तथा प्रयोगः। संबन्धद्वयेनेच्छायाम् अन्वयाभावात्।

यत्र च श्लाघादिः सकर्मकः तेन 'पण्डिताय नरपतिः श्लाघत' इति प्रयोगः तत्र समवेतत्वसंसर्गावच्छिन्नतादृशज्ञानोद्देश्यतावच्छेदकताप्रतियोगित्वेन संबन्धेन चतुर्थ्यर्थेच्छायां प्रकृत्यर्थस्य तादृशज्ञानफले प्रकृत्यर्थविशेषितस्य द्वितीयार्थस्य विशेष्यत्वस्य विशेष्यत्वसंबन्धावच्छिन्नाधेयत्वस्य वा अन्वय इति।

एवं "देवदत्ताय निह्नुते" इत्यादौ ह्नुतिफलेऽदर्शने चतुर्थ्यर्थस्येच्छायाः, इच्छायां तु विशेषणतासंबन्धावच्छिन्नाधेयत्वसंसर्गावच्छिन्नाया अदर्शननिष्ठोद्देश्यतावच्छेदकतायाः प्रतियोगित्वेन संबन्धेन प्रकृत्यर्थस्य अन्वयः। "अधीरतां जनाय निह्नुते" इत्यत्रादर्शनप्रतियोगिनि दर्शने फलैकदेशे निह्नवे दर्शनमभावश्चेत्युभयार्थकत्वे फले दर्शने द्वितीयार्थस्य विशेष्यत्वस्य तत्संबन्धावच्छिन्नाधेयत्वस्य वा अन्वयः।

वस्तुतः सतोऽसत्त्वेन प्रतिपादनं निह्नुतिः। अतो 'गगनं निह्नुते' इति न प्रयोगः। तथा चासत्त्वप्रकारकप्रतिपत्त्यनुकूलो व्यापारः ह्नुतेरर्थः। अत एव ज्ञीप्स्यमानता चतुर्थीप्रकृत्यर्थस्य संपद्यते। एवमसत्त्वप्रकारकप्रतिपत्तौ पूर्ववत् चतुर्थ्यर्थस्य द्वितीयार्थस्य चान्वयः। देवदत्तविशेष्यकासत्वप्रकारकप्रतिपत्त्यनुकूलो व्यापारः वाक्यार्थः।

अनिष्टवत्ताप्रतिपत्त्यनुकूलो व्यापारः शपेरर्थः। तत्रानिष्टवतः प्रतिपाद्यस्य प्रतिपत्तीच्छायां संप्रदानसंज्ञया कर्मसंज्ञाबाधात् ज्ञीप्स्यमानभेदस्य द्वितीयार्थस्यानन्वयाद्वा न द्वितीया। यथा "शक्राय शपते दुर्वासाः" इत्यत्र चतुर्थ्यर्थस्येच्छायाः अनिष्टप्रतिपत्तौ इच्छायां प्रकृत्यर्थस्य च पूर्ववदन्वयः।

यत्र च शापकर्तुः शापकर्मणि न ज्ञीप्सा तत्र द्वितीया यथा — "मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा" इति कर्मणः ज्ञीप्स्यमानतायां चतुर्थीप्रयोगोऽपीष्ट एव। यथा — "पित्रे पुत्रं शपते, गुरवे शिष्यं शपते" इति। यत्र च शुद्ध्यशुद्धिज्ञानं शपेरर्थः तत्र न चतुर्थी न वा द्वितीया। शुद्ध्यशुद्धिकर्मावरोधो द्वितीयाबाधकः। अनिष्टप्रतिपत्त्यर्थकस्यैव ज्ञीप्स्यमानतायामेव चतुर्थ्याः साधुत्वमिति। किं तु हेतुत्वार्थिका तृतीया। यथा "पुत्रेण दारैर्वा शपति" इति। अत एव —

आचम्य चाम्बु तृषितः करके शपेयं भावानुरक्तललनासुरतैः शपेयम्।
जीयेय येन कविना यमकैः परेण तस्मै वहेयमुदकं घटखर्परेण।।

इति घटखर्परः। शुद्ध्यशुद्धी सत्यासत्यप्रतिज्ञे बोध्ये।

तङन्तस्य तिष्ठतेः स्वप्रकाशानुकूलोऽव्यवहितावस्थानादिरर्थः। प्रकाशश्चाक्षुषं ज्ञानसामान्यं वा। तत्र ज्ञीप्स्यमानस्य चतुर्थीप्रकृतिता। यथा "कृष्णाय तिष्ठते गोपी" इत्यादौ। अत्र चतुर्थ्यर्थे इच्छायां समवेतत्वसंसर्गावच्छिन्नायां प्रतियोगित्वेन संबन्धेनान्वयः। इच्छायाः उद्देश्यतया प्रकाशे तस्यानुकूलतया अव्यवहितावस्थानादौ तस्य तिङर्थे आश्रयत्वेऽन्वयः।

यत्र तङन्तस्यापि तिष्ठतेः स्थेयविनिवेदनमर्थः, स्थेयः मध्यस्थः निर्णायक इति यावत्, तत्र ज्ञीप्स्यमानेऽपि न चतुर्थी। अत एव — "संशय्य कर्णादिषु तिष्ठते यः" इति भारविः। अत्र समानदेशावच्छिन्नाधेयत्वं यत्पदार्थे कर्तरि विद्यमानत्वं कतृघटितपरम्परासंबन्धावच्छिन्नं सप्तम्यर्थः विनिवेदने व्यापारेऽन्वेति। तथा च संशयानन्तरितस्य कर्णाद्यधिकरणस्य निर्णायकविनिवेदनस्य कर्ता य इत्यन्वयबोधः। कर्णादेः निर्णायकत्वं विनिवेद्यत्वं च मानान्तरवेद्यम्।

भाट्टचिन्तामणौ[१]

"श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः"[२] इति ज्ञीप्स्यमास्य संप्रदानत्वम्। "गोपी स्मरात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा"। स्मरहेतुकगोपीकर्तृकश्लाघनादिज्ञापनवत्त्वात् कृष्णस्य संप्रदानत्वम्। "इतीव पान्थं शपतः पिकान् द्विजान्" इत्यत्र पान्थस्य शापज्ञापनाभावान्न संप्रदानत्वम् श्लाघनं स्तवनम्, निह्नवोऽपनयः।

भाट्टरहस्ये[३]

एवं "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः" इत्यनुशासनात् एषां धातूनां प्रयोगे बोधयितुमिष्टं संप्रदानसंज्ञः स्यात् इत्यर्थकात् "कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा" इत्यादौ चतुर्थी। श्लाघा स्तुतिः। ह्नुवनं संगोपनम्। अत्र वास्तवे ज्ञापयितुमिष्यमाणे सति चतुर्थी। अत्र आद्यधातुद्वये सकर्मकत्वात् कर्मत्वं चतुर्थ्यर्थः। द्वितीयां बाधित्वा चतुर्थी। तृतीयचतुर्थयोस्तु अकर्मकत्वात् षष्ठीबाधेन संबन्धः चतुर्थ्यर्थः।

अथ वा सर्वत्र श्लाघादिज्ञापनं लक्षणया धात्वर्थः। तं प्रति कृष्णस्य कर्मत्वेन द्वितीयाप्राप्तौ चतुर्थी।

---

[१] पृ. १००

[२] सू. १.४.३४

[३] पृ. १२०

धारेरुत्तमर्णः[१] इति सूत्रार्थविचारः

धारयतेः प्रयोगे उत्तमर्णः संप्रदानसंज्ञको भवति। अन्यस्वामिकं द्रव्यं नियतकाले पुनरर्पणबुद्ध्या गृहीतम् ऋणमित्युच्यते। तत्र ऋणस्य ग्रहीता अधमर्णः। ऋणस्यार्पयिता धनस्वामी उत्तमर्णः। प्रतिमासमशीतिभागादिवृद्ध्या उत्तममधिकतां प्राप्तमृणं यस्येति विग्रहः। उदाहरणम् — "भक्ताय धारयति मोक्षं हरिः"। धृङ् अवस्थाने इति धातोः हेतुमण्ण्यन्तस्य धारेः इति सूत्रे निर्देशः। धारयति अवस्थापयति। पूजयन् हि भक्तः तुलसीदलादिद्रव्यं प्रयच्छति, तच्च गृह्णन् तुष्टो हरिः तत्प्रदत्तं द्रव्यं मोक्षदानेन निष्क्रीणाति। तदाहुः पौराणिकाः —

> तोयं वा पत्रं वा यद्वा किंचित् समर्पितं भक्त्या।
> तदृणं मत्वा देवो निःश्रेयसमेव निष्क्रयं मनुते।।

तथा चात्र भक्तस्य ऋणदातृत्वेन संप्रदानत्वं, षष्ठ्यपवादः।

लघुशब्देन्दुशेखरे[२]

भक्तायेति। ध्रियमाणं स्वरूपेणावतिष्ठमानं मोक्षं हरिः प्रयुङ्क्ते इत्यर्थः। प्रेरणायाः भक्तासत्त्वेऽभावात् तस्यापि प्रेरणजनकत्वे कारकत्वम्। अवश्यदेयत्वेन मोक्षस्य ऋणत्वम्।

लघुमञ्जूषायाम्[३]

"भक्ताय धारयति मोक्षं हरिः"। धृङ् अवस्थाने इति धातोः णिजन्तस्य अवस्थानानुकूलो व्यापारोऽर्थः। अवस्थानाश्रयमोक्षसंबन्धी भक्तः संप्रदानम्। "धारेरुत्तमर्णः"[४] इति सूत्रात्। हरिकर्तृकः भक्तसंप्रदानकः मोक्षकर्मकावस्थित्यनुकूलो व्यापारः इति बोधः। शेषषष्ठ्या अपवादोऽयम्। अत्रोत्तमर्णः दानक्रियाद्वारा धारणस्य निमित्तम्, यतोऽसौ तदृणं ददाति। ददातिश्च न श्रूयत इति अश्रूयमाणक्रियात्वात् शेषे षष्ठी प्राप्ता। सर्वत्र, न केवलमेतत्सूत्रोदाहरणे अपि तु "रुच्यर्थानां प्रीयमाणः"[५] इत्यादिनवसूत्रीविषयोदाहरणेष्वपि विशेषविवक्षाया अभावे क्रियानिमित्तत्वमात्राश्रयणेन शेषत्वं प्राप्तम्। तदपवादतया संप्रदानसंज्ञोच्यते। तदुक्तं हरिणा साधनसमुद्देशे —

---

[१] सू. १.४.३५
[२] पृ. ६७४
[३] पृ. १२७२
[४] सू. १.४.३५
[५] सू. १.४.३३

हेतुत्वे कर्मसंज्ञायां शेषत्वे वापि कारकम्।
रुच्यर्थादिषु शास्त्रेण संप्रदानाख्यमुच्यते।।

इति। रुच्यर्थादिषु "रुच्यर्थानाम्०" इत्यादिनवसूत्र्या उदाहरणेषु हेतुत्वे प्राप्ते, कर्मसंज्ञायां प्राप्तायां, अपि च शेषत्वे वा प्राप्ते तदपवादतया संप्रदानाख्यं कारकम् उच्यते — विधीयते। शेषत्वस्य सर्वेषूदाहरणेषु प्राप्तिः इतरयोस्तु हेतुत्वकर्मत्वयोः यथासंभवम्।

ननु ऋणं नाम सजातीयद्रव्यान्तरदानमङ्गीकृत्य परदत्तपरकीयद्रव्यादानम्, तज्जन्यः अधमर्णनिष्ठः परिशोधननाशकः अदृष्टविशेषो वा। उभयथापि नेह प्राप्तिः। मोक्षस्योक्तरूपऋणत्वाभावेन भक्तस्योत्तमर्णत्वाभावादिति चेत् — न। अवश्यदेयत्वेन तत्रापि ऋणत्वव्यवहारात्। सूत्रे ऋणग्रहणमवश्यकर्तव्यस्योपलक्षणम्। यथा दत्तस्य धनस्य ग्रहणे पुनरपि तद्दानमनुल्लङ्घनीयतया अवश्यं परिशोधनीयं, तथा शास्त्रोक्तरीत्या हरेराराधने मोक्षोऽप्यवश्यंभावी। ततो मोक्षस्याप्यवश्यदेयत्वेन हरिः अधमर्णः, भक्तश्चोत्तमर्णः इति मञ्जूषायां निरूपणम्।

कारकचक्रे[1]

"वैश्याय शतं धारयति" इत्यत्र "धारेरुत्तमर्णः"[2] इति सूत्रेण संबन्धसामान्ये चतुर्थी विधीयते। पुनर्दानमङ्गीकृत्य द्रव्यग्रहणं धारणम्। संबन्धः चतुर्थ्यर्थः द्रव्यान्वयी। वैश्यसंबन्धि यत् शतसंख्याकद्रव्यं तत्कर्मकपुनर्दानाङ्गीकारोत्तरकालिकग्रहणाश्रय इत्यन्वयबोधः कथितः।

शब्दशक्तिप्रकाशिकायाम्[3]

"गुरवे गां धारयते" इत्यत्र धृङ्धातोः गृहावस्थितिरर्थः। तदन्वितं कर्तृत्वं द्वितीयाया अर्थः। तन्निविष्टगृहान्वितं संबन्धित्वं चतुर्थ्या अर्थः। णिचः व्यापारोऽर्थः। तत्रानुकूलतासंबन्धेन गृहावस्थितेरन्वयः। तथा च गोकर्तृकगुरुसंबन्धिगृहावस्त्यिनुकूलव्यापारवानित्याकारकस्तत्र बोधः इति कालापाः। पाणिनीयास्तु "धारेरुत्तमर्णः"[4] इति सूत्रानुसारेण "चैत्राय शतं धारयते" इत्यादावपि। ऋणग्रहणं धारणं दत्तत्वं च चतुर्थ्यर्थः। तथा च गुरुदत्तां गामृणत्वेन गृह्णातीत्याकारकस्तत्र वाक्यार्थः। पश्चात् शोध्यत्वेनाङ्गीकृत्य गृहीतं द्रव्यम् ऋणमित्याहुः।

---

[1] पृ. ६१
[2] सू. १.४.३५
[3] पृ. ३०९
[4] सू. १.४.३५

व्युत्पत्तिवादे

"विप्राय शतं धारयति" इत्यादौ "धारेरुत्तमर्णः" इत्यनेन धनिकविप्रादेः संप्रदानता।

अथ कोऽयं धार्यर्थः। न तावत् द्रव्यान्तरदानमङ्गीकृत्य परदत्तद्रव्यस्य आदानम्। तथा सति आदानात् पश्चात् तथा प्रयोगस्यानुपपत्तेः। आदानस्यावर्तमानत्वात्। न चेष्टापत्तिः। द्रव्यान्तरदानरूपपरिशोधनपर्यन्तं तथा प्रयोगात्। नापि तादृशादानध्वंसः धार्यर्थः। अधमर्णस्य तदकर्तृत्वात्। आदानध्वंसस्य स्वसामग्रीजन्यत्वात्।

न च आदानमिच्छाविशेषः तद्वतः पुंसः तदाश्रयत्वेन तत्कर्तृत्ववत् तद्ध्वंसाश्रयतया तद्ध्वंसकर्तृत्वमप्यक्षतम्। ध्वंसस्य स्वप्रतियोगिसमानाश्रयकत्वात् इति वाच्यम्। एवमप्यादानध्वंसस्य परिशोधनोत्तरकालेऽपि सत्त्वेन तदानीमपि धारयति इति प्रयोगापत्तेः।

न च परिशोधनप्रागभावविशिष्टः द्रव्यान्तरदानमङ्गीकृत्य परदत्तद्रव्यादानस्य ध्वंसः धार्यर्थः, परिशोधनोत्तरं परिशोधनप्रागभावविरहान्नोक्तदोष इति वाच्यम्। यत्र येन एकमृणं परिशोधितम्, ऋणान्तरं च परिशोधनीयं, तत्र ऋणान्तरपरिशोधनप्रागभावदशायां परिशुद्धमृणमादाय धारयतीति प्रयोगापत्तेः।

न च स्वप्रतियोगिनिर्वाहकाङ्गीकारविषयद्रव्यदानप्रागभावविशिष्टादानध्वंसः धार्यर्थः। स्वम् आदानध्वंसः तत्प्रतियोगि यत् द्रव्यादानं तन्निर्वाहकोऽङ्गीकारः एतावद् द्रव्यं मया देयमित्याकारकः तद्विषयभूतं यद् द्रव्यादानं तत्प्रागभावविशिष्टः आदानध्वंस इति यावत्। अतो न पूर्वोक्तदोष इति वाच्यम्। यत् ऋणं परिशोधितं, तावद्द्रव्यं च पुनर्गृहीत्वा पुनः परिशोधनीयं च तत्र परिशोधितमृणं विषयीकृत्य अपरद्रव्यग्रहणात् पूर्वं धारयति इति प्रयोगापत्तेः। उदीच्यपरिशोधनस्यापि स्वकर्तव्यतया पूर्वाभ्युपगमविषयत्वात् तत्प्रागभावस्य पूर्वगृहीतपरिशोधनोत्तरमपि सत्त्वात् इति चेत् —

अत्राहुः — ऋणग्रहणेन अधमर्णनिष्ठः परिशोधननाश्योऽदृष्टविशेषो जायते। तेनैवादृष्टेन ऋणमपरिशोध्य मृतस्य नरकादिकमुत्पद्यते। तथा च द्रव्यान्तरादानाङ्गीकारपूर्वकपरदत्तद्रव्यादानजन्यादृष्टविशेषवत्त्वमेव धारयतेरर्थः। तद्घटकदानान्वयि कर्तृत्वं तत्र चतुर्थ्यर्थः। तथा च "देवदत्ताय शतं धारयति मैत्र" इति वाक्यात् द्रव्यान्तरदानाभ्युपगमपूर्वकदेवदत्तकर्तृकदानकर्मीभूतशतकर्मकादानजन्यादृष्टविशेषवान् मैत्र इति बोधः।

न च ऋणाशोधनमेव दुरदृष्टजनकम्, उपपातकमध्ये तस्यैव परिगणनात्, न तु ऋणादानम्, तस्य तथात्वे मानाभावादिति वाच्यम्। ऋणादानस्य दुरदृष्टविशेष-जनकत्वेऽपि परिशोधनेन तस्य नाश इति बोधनाय अपरिशोधनस्य नरकरूप-फलोपधानप्रयोजकत्वाभिप्रायेण तस्योपपातकमध्ये परिगणनोपपत्तेः। ऋणमादाय अपरिशोधकस्य नरकभागितया ऋणादानस्यैव दुरदृष्टजनकतायाः कल्पनीयत्वात्। गृहीतर्णापरिशोधनापेक्षया ऋणादानस्य लघुत्वात्।

पदवाक्यरत्नाकरे[१]

"गर्गाय शतं धारयति" इत्यत्र ऋणत्वनिरूपितमधमर्णत्वं धारयतेरर्थः। फली-भूतर्णत्वाश्रयतया शतस्य कर्मत्वम्। उत्तमर्णत्वं चतुर्थ्यर्थः। तथा च गर्गवृत्त्यु-मर्णत्वनिरूपितशतवृत्त्यृणत्वप्रतियोगिकाधमर्णत्वाश्रयः इत्यन्वयबोधः। उत्तमर्णत्वं स्वामित्वविशेषः। ऋणत्वाधमर्णत्वे स्वत्वस्वामित्ववत् अतिरिक्तावेव पदार्थौ। अनुगतप्रतीतिव्यवहारयोरविशेषात्। स्वत्वाभाव ऋणत्वमिति चेत् ऋणत्वाभाव एव स्वत्वमित्यपि स्यात्।

यदि चोद्धारनाश्यपापविशेषस्य साधनं विनियोग एव ऋणत्वम्। तदा पापा-साधनविनियोग एव स्वत्वमिति स्यात्। अविनियोगकालेऽपि स्वव्यवहार ऋणव्य-वहारेण तुल्यः। शास्त्रमपि ऋणत्वे स्वत्वे च तुल्यम्। शास्त्रेऽननुगतप्रवृत्ति-निमित्तकऋणपदघटितत्वमिव तादृशस्वपदघटितत्वमपि सिद्धान्ततत्त्वे विस्तरतो व्यवस्थापितम्।

वस्तुतस्तु — उद्धारनाश्यपापजनकग्रहणाहितः व्यापारः धारयतेरर्थः। फली-भूतग्रहणविषयतया शतादीनां कर्मत्वम्। उत्तमर्णः प्रयोक्ता पुरुषः। प्रयोगश्च कला-जिधृक्षा तज्जनकज्ञानजन्यसंस्कारः उपकारकता कीर्तिजनकः पुण्यविशेषो वा चतुर्थ्यर्थः। तथाविधपापवान् अधमर्णः। एवं च गर्गनिष्ठकलाजिधृक्षादेः प्रयोज्यं यत् तथाविधं शतकर्मकग्रहणं तत्प्रयोज्यव्यापारो भोजनादिः तदाश्रयत्वं वाक्यार्थः। ऋणमपि तथाविधग्रहणकर्मेति "ऋणं धारयति" इत्यत्र ग्राह्यं गृह्णातीत्यत्रेवान्वयो बोध्यः।

एवमर्थान्तरेऽपि धारयतेः प्रयोगो दृश्यते, यथा —

सेवनवेतनमृणमिह मह्यं दीनाय धारयसि।
अतिचण्डि चण्डखण्डिनि वदाम्यपर्णेति भीतितो भवतीम्।।

---

[१] पृ. ७१८

इत्यादौ। तत्र धारयतेः अभीष्टफलदानानुकूलो व्यापारोऽर्थः। ऋणपदलक्ष्यमवश्यदेयम्। वेतनपदलक्ष्यं साध्यम्। तथा च सेवनसाध्यावश्यदेयकर्मकः यः अभीष्टप्रयोजकदानानुकूलो व्यापारः तदाश्रयः त्वमिति बोधः। मह्यमिति चतुर्थ्यर्थः पुण्यविशेषः। स प्रयोज्यत्वेन व्यापारेऽन्वेति। इत्याहुः।

विभक्त्यर्थनिर्णये[1]

धारतेर्योगे उत्तमर्णस्य संप्रदानतां ज्ञापयति "धारेरुत्तमर्णः"[2] इति सूत्रम्। धारयतेर्योगे उत्तमर्णो योऽर्थः तत् कारकं संप्रदानसंज्ञकं भवतीत्यर्थकम्। उत्तममृणं यस्य स उत्तमर्णः। यदीयं धनं स स्वामी प्रयोक्ता उत्तमर्ण इति काशिका।

"देवदत्ताय शतं धारयति" इत्यत्र ऋणत्वनिरूपिताधमर्णत्वं धारयतेरर्थः। उत्तमर्णत्वं स्वामित्वविशेषः चतुर्थ्यर्थः। फलीभूतऋणत्वाश्रयता शतस्य कर्मत्वम्। एवं च देवदत्तनिष्ठोत्तमर्णत्वनिरूपितशतवृत्तिऋणत्वप्रतियोगिकाधमर्णत्वाश्रय इति वाक्यार्थबोधः। ऋणत्वाधमर्णत्वे स्वत्वस्वामित्ववत् अतिरिक्तपदार्थौ। अनुगतप्रतीतिव्यवहारयोः अविशेषात्।

स्वत्वाभाव एव ऋणत्वमिति चेत् ऋणत्वाभाव एव स्वत्वमित्यपि किं न स्यात्। यदि चोद्धारनाश्यपापविशेषस्य साधनं विनियोगः ऋणत्वं, तदा पापासाधनविनियोग एव स्वत्वमिति स्यात्।

अविनियोगकाले स्वव्यवहारः ऋणव्यवहारेण तुल्ययोगक्षेमः। शास्त्रमपि ऋणत्वे स्वत्वे च तुल्यम्। शास्त्रस्याननुगतप्रवृत्तिनिमित्तकऋणपदघटितत्वमिव तादृशस्वपदघटितत्वमपि। तदेतदन्यत्र विस्तृतमिति वदन्ति।

वस्तुतस्तु उद्धारनाश्यपापजनकग्रहणाहितव्यापारो धारयतेरर्थः। फलीभूतग्रहणविषयतया शतादीनां कर्मत्वम्। उत्तमर्णः प्रयोक्ता। प्रयोगः कलाजिघृक्षा तज्जनकज्ञानजन्यसंस्कारः उपकारकता कीर्तिजनकः पुण्यविशेषो वा। स च चतुर्थ्यर्थः। तथाविधपापवानधर्मणः। एवं च देवदत्तनिष्ठकलाजिघृक्षादेः प्रयोज्यं यत् तथाविधं शतकर्मकग्रहणं तत्प्रयोज्यव्यापारो भोजनादिः तदाश्रय इति शाब्दबोधः। ऋणमपि तथाविधग्रहणकर्म बोध्यम्। "ऋणं धारयति" इत्यत्र ग्राह्यं गृह्णातीत्येवान्वयबोधो बोध्यः।

---

[1] पृ. २८३

[2] सू. १.४.३५

एवमर्थान्तरेऽपि धारयतेः प्रयोगे चतुर्थी दृश्यते, यथा —

सेवनवेतनमृणमिह मह्यं दीनाय धारयसि।
अतिचण्डि चण्डखण्डिनि वदाम्यपर्णेऽतिभीतितो भवतीम्।।

इत्यत्र धारयतेः अभीष्टफलदानानुकूलव्यापारोऽर्थः। ऋणपदलक्ष्यमवश्यदेयम्। वेतनपदलक्ष्यं साध्यम्। एवं च सेवनसाध्यावश्यदेयकर्मको योऽभीष्टप्रयोजकदानानुकूलो व्यापारः तदाश्रयस्त्वम् इत्यन्वयबोधः। मह्यमित्यत्र चतुर्थ्यर्थः पुण्यविशेषः। स प्रयोज्यत्वेन व्यापारेऽन्वेति। एवं "ग्राह्यं गृह्णाति" इतिवत् उत्तमर्णाय धारयति, "अधमर्णो धारयति" इत्यादौ विशेषणविशेष्यभावव्यत्यासेनान्वयो बोध्यः। सूत्रे उत्तमर्णग्रहणं "देवदत्ताय शतं धारयति ग्रामे" इत्यत्र ग्रामस्य संप्रदानतानिषेधार्थम्।

भाट्टचिन्तामणौ[१]

"धारेरुत्तमर्णः"[२]। धारयतिसमभिव्याहारे उत्तमर्णस्य संप्रदानत्वम्। मह्यं सुवर्णशतं धारयति देवदत्तः। देवदत्तकर्तृकधारणकर्मीभूतसुवर्णशतव्याप्यमानत्वात् सुवर्णशतधारणजन्यदुःखवत्त्वाद्वा। अत एव "वने धारयति" इत्यत्र वनस्य न संप्रदानत्वम्। उत्तमर्णत्वं च गृहीतधनवृद्धिभागित्वम्, वृद्धिजन्यसुखभागित्वं वा। एतेन "भक्ताय धारयति मोक्षं कृष्णः" इत्युदाहरणं सूत्रविरुद्धम्।

भाट्टरहस्ये[३]

"धारेरुत्तमर्ण" इति सूत्रेण धारयतेः योगे उत्तमर्णः संप्रदानसंज्ञः स्यात् इत्यर्थकेन "चैत्राय शतं धारयति" इत्यत्र चतुर्थी। अत्र चतुर्थ्यर्थः उत्तमर्णत्वापरपर्यायप्रत्यर्पणीयत्वाख्यः संबन्धः। तस्य च स्वनिरूपकद्रव्यकर्मकधारणानुकूलत्वसंबन्धेन कृतावन्वयः। तथा च चैत्रप्रत्यर्पणीयं शतं धारयतीत्यर्थः।

यदा तु स्वत्वाख्यसंबन्धविवक्षा, तदा "चैत्रस्य शतं धारयति" इति प्रयोगः। न चास्य मुख्यसंप्रदानत्वविवक्षयैव चतुर्थ्युपपत्तेः सूत्रान्तरवैयर्थ्यमिति वाच्यम्। दानक्रियाया अभावेन मुख्यसंप्रदानत्वस्याप्राप्तेः। प्रत्यर्पणीयत्वविवक्षया सूत्रान्तरसार्थक्याच्च। अत एव "क्रियाग्रहणमपि कर्तव्यम्"[४] इति वार्तिकेनापि न गतार्थता।

---

१ पृ. १००
२ सू. १.४.३५
३ पृ. १२०
४ वा. १०८५

स्पृहेरीप्सितः[१] इति सूत्रार्थः

स्पृहयतेः प्रयोगे इष्टः संप्रदानसंज्ञो भवति। "पुष्पेभ्यः स्पृहयति"। ईप्सितः किम्। "पुष्पेभ्यो वने स्पृहयति"। अत्र वनस्य न संप्रदानसंज्ञा। इष्टत्वाभावात्। ईप्सितमात्रे इयं संज्ञा। प्रकर्षविवक्षायां तु परत्वात् "कर्तुरीप्सिततमं०"[२] इति कर्मसंज्ञा। "पुष्पाणि स्पृहयति"। यदा तु ईप्सितत्वस्यापि न विवक्षा, किं तु विषयतामात्रविवक्षा, तदा "पुष्पाणां स्पृहयति" इति साधु।

"कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" इत्यादिदर्शनात्। वाक्यपदीये तु स्पृहयतियोगे कर्मसंज्ञायाः शेषषष्ठ्याश्चायमपवाद इति स्थितम्। तन्मते "पुष्पाणि स्पृहयति, पुष्पाणां स्पृहयति" इत्यादि असाध्वेव इति बालमनोरमा।

प्रौढमनोरमायाम्[३]

परत्वादिति। तेन "परस्परेण स्पृहणीयशोभाम्" "स्पृहणीयगुणैर्महात्मभिः" इत्यादिषु कर्मण्यनीयर् प्रत्ययः सिध्यति। यदा तु शेषत्वविवक्षा तदा षष्ठी। तेन — "कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" इति सिद्धम्। एतच्च सर्वं हरदत्तादिरीत्योक्तम्। वाक्यपदीयहेलाराजग्रन्थयोस्तु "स्पृहयतियोगे कर्मसंज्ञायाः शेषषष्ठ्याश्च बाधिकेयं संप्रदानसंज्ञा" इत्युक्तम्। तन्मते "स्पृहणीयम्" इत्यत्र 'दानीय' इत्यत्रेव बाहुलकात् संप्रदाने अनीयर्। कुमार्य इवेत्यत्र तु विभक्तिविपरिणामेन 'कान्ताय स्पृहयन्ति' इति व्याख्येयम्।

वस्तुतस्तु यथा मातुः कर्मत्वेऽपि संबन्धित्वेन विवक्षायां "मातुः स्मरति" इत्यत्र षष्ठी भवति तथा अस्य सूत्रस्य षष्ठ्यपवादत्वेऽपि संप्रदानत्वविवक्षायां शेषत्वविवक्षया तादृशप्रयोगनिर्वाहे सति विभक्तिविपरिणामकल्पनमन्याय्यम्।

लघुशब्देन्दुशेखरे[४]

प्रकर्षविवक्षायामिति। फलाश्रयत्वेन विवक्षायामित्यर्थः। परत्वादिति। इदं सूत्रं विषयतया क्रियाजनकत्वमात्रविवक्षायां चरितार्थमिति भावः। पुष्पसंप्रदानकेच्छेति चतुर्थीसमभिव्याहारे बोधः। "कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" इत्यत्र क्रियासंबन्धित्वमात्रविवक्षायां षष्ठी।

---

[१] सू. १.४.३६
[२] सू. १.४.४९
[३] पृ. ९१०
[४] पृ. ६७४

अन्ये तु "भोगाय" इत्यध्याह्रियते। कुमार्यः कान्तस्य भोगाय स्पृहयन्ति इत्यन्वयः। यद्वा कान्ताय इति विभक्तिविपरिणामः कार्य इत्याहुः।

अत्रास्वारस्यं तु अस्य सूत्रस्य कारकाधिकारीयत्वात् क्रियासंबन्धित्वमात्रविवक्षायामित्यसंगतम्। किं च भोगायेति शब्दाध्याहारे कान्तायेति विभक्तिविपरिणामे वा गौरवम्।

स्पृहधातुः इच्छामात्रवाची विषयत्वरूपफलावच्छिन्नेच्छावाची च। आद्ये संप्रदानत्वम्। अन्त्ये कर्मत्वम्। ईप्सितत्वं धात्वर्थजन्यफलाश्रयत्वम्, न तु फलस्य धात्वर्थत्वम्। कर्मसंज्ञायां तु फलस्य धात्वर्थत्वमिति भेदः तथा च "पुष्पेभ्यः स्पृहयति" इत्यत्र धातोः इच्छा अर्थः। चतुर्थ्यर्थः इच्छान्वयि विषयित्वम्। पुष्पविषयिणी इच्छेति बोधः। लघुमञ्जूषायामप्येतदेवोक्तम्। शब्दशक्तिप्रकाशिकायाम् — नोद्धृतमेतत् सूत्रम्।

व्युत्पत्तिवादे[१]

"पुष्पेभ्यः स्पृहयति" इत्यत्र स्पृहाविषयपुष्पस्य "स्पृहेरीप्सितः"[२] इत्यनेन संप्रदानत्वात् चतुर्थी। तदर्थो विषयित्वम्। पुष्पविषयकेच्छाश्रय इति बोधः वर्णितः।

पदवाक्यरत्नाकरे

"पुष्पेभ्यः स्पृहयति" इत्यत्र पुष्पाणां सिद्धतया सिद्धे विषये इच्छाया असंभवात् उद्देश्यत्वं न चतुर्थ्यर्थः। किं तु सूत्रे ईप्सितपदोपादानात् ईप्साविषयः प्रतीयते। ईप्सा च आप्तीच्छा। आप्तिः संबन्धः। तथा च संबन्धः चतुर्थ्यर्थः। स च स्वत्वं संयोगो वा। "रेणुकायै स्पृहयति गिरिजा" इत्यत्र तादात्म्यम्। चतुर्थ्यर्थस्य विषयतासंबन्धेन धात्वर्थस्पृहायामन्वयः। तथा च पुष्पनिष्ठस्वत्वादिविषयकस्पृहाश्रयः, रेणुकातादात्म्यविषयकस्पृहाश्रय इत्यन्वयबोधः इति व्याख्याता ग्रन्थकारहृदयं प्रकाशयति। अन्यत्तु मनोरमायामिव।

---

[१] पृ. २४९

[२] सू. १.४.३६

विभक्त्यर्थनिर्णये[1]

स्पृहेर्योगे चतुर्थीं ज्ञापयति — "स्पृहेरीप्सितः"[2] इति सूत्रम्। स्पृहेर्योगे ईप्सितो योऽर्थः तत् कारकं संप्रदानसंज्ञं भवतीत्यर्थकम्। "ईप्सित इत्यत्र अभिप्रेत उच्यते" इति काशिका।

"पुष्पेभ्यः स्पृहयति रसिकः" इत्यत्र स्पहेरभिलाषः अर्थः। चतुर्थ्याः विषयत्वमर्थः। एवं च पुष्पविषयताकाभिलाषाश्रयः इत्यन्वयबोधः।

> स्त्रीषु प्रवीरजननी जननी तवैव देवी स्वयं भगवती गिरिजापि यस्यै।
> त्वद्दोर्वशीकृतविशाखसुखावलोकक्रीडाविदीर्णहृदया स्पृहयांबभूव।।

इत्यत्र रेणुकासदृशी भवेयम् इत्यभिलाषः। तत्र रेणुकाविषयकत्वस्यानपायान्न चतुर्थ्या अनुपपत्तिः। यदि च विषयत्वमात्रं न चतुर्थ्यर्थः। तथा सति 'पुष्पत्वं स्पृहयति' इति प्रयोगापत्तेः। किं तु उद्देश्यत्वम्। तच्च दर्शिताभिलाषे न रेणुकायाः। किं तु तत्सदृश्या इति "यस्यै भगवती स्पृहयति" इत्यत्र चतुर्थी नोपपद्यत इति विभाव्यते, तदा स्वीक्रियतां तादात्म्येनोद्देश्यप्रकारकोऽभिलाषः। "ब्राह्मणोऽहं स्याम्" इतीच्छाकारदर्शनात्। तथा च रेणुका भवेयमित्यभिलाष एव स्पृहा। तत्र रेणुकाया उद्देश्यत्वं निराबाधमिति चतुर्थ्या नानुपपत्तिरिति संप्रदायः।

वस्तुतस्तु "पुष्पेभ्यः स्पृहयति" इत्यत्र पुष्पादीनां सिद्धत्वात् उद्देश्यत्वं न संभवतीति नोद्देश्यत्वं चतुर्थ्यर्थः। किं तु सूत्रे ईप्सितशब्दोपादानात् ईप्साविषयः प्रतीयते। ईप्सा च आप्तीच्छा। आप्तिः संबन्धः। तथा चाप्तिश्चतुर्थ्यर्थः। स च संबन्धः पुष्पेभ्यः इत्यत्र स्वत्वं संयोगश्च। "रेणुकायै" इत्यत्र तादात्म्यं संबन्धः उद्देश्यितया स्पृहायामन्वेति। तथा च पुष्पसंयोगस्पृहाश्रयः, रेणुकातादात्म्यस्पृहाश्रयः इत्यन्वयबोधः।

कान्तस्य स्पृहेत्यत्र शेषषष्ठ्या विषयत्वमर्थः स्पृहायामन्वेति। यथा घटज्ञानं घटत्वस्य, यथा वा घटेच्छा घटत्वस्येत्यादौ।

ननु स्पृह ईप्सायामित्यनेन स्पृहेरिच्छार्थकत्वम्। तत्रेच्छामात्रार्थकत्वे फलावाचकत्वादकर्मकत्वम्। विषयतारूपफलवाचकत्वेऽपि विषये निरवकाशया संप्रदानसंज्ञया कर्मसंज्ञाबाधात् ईप्सितभेदस्य कर्मप्रत्ययार्थस्यानन्वयाद्वा कर्मप्रत्ययानुपपत्तेः स्पृहणीयगुणैरित्यादिप्रयोगोऽनुपपन्न इति चेत् —

---

[1] पृ. २८०
[2] सू. १.४.३६

दानीयो ब्राह्मण इत्यादिप्रयोगदर्शनात् संप्रदानेऽप्यनीयर्प्रत्ययस्य प्रवृत्तेः 'स्पृहणीय' इत्यत्र कृत्यप्रत्ययस्य संप्रदानार्थकत्वं, न तु कर्मार्थकत्वम्। एतेन — "परस्परेण स्पृहणीयशोभं न चेदिदं द्वंद्वमयोजयिष्यत्" इत्यपि समाहितम्।

हरदत्तस्तु — यत्रेच्छामात्रार्थकत्वात् फलवाचकः स्पृहिः तत्रोद्देश्यत्वं विषयत्वं वा चतुर्थी अभिधत्ते। यत्र च विषयतास्वरूपफलवाचकः तत्र कर्मप्रत्ययो निरपवाद एव। अत एव — "स्पृहयन्ति गुणान् मनीषिणः परिवादं तु परस्य दुर्जनाः" इति। एवं स्पृहणीय इति कर्मण्येव कृत्यप्रत्ययः। यत्र च विषयता शेषत्वेन विवक्षिता तत्र शेषषष्ठ्येव। यथा — "कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" इति इत्याह।

वस्तुतस्तु यत्र स्पृहेरुत्कटेच्छा अर्थस्तत्रैव आप्तिश्चतुर्थ्यर्थः। यत्र चेच्छासामान्यमर्थः तत्र चतुर्थ्या अप्रसक्तेः न कर्मप्रत्ययानुपपत्तिः। उत्कटेच्छार्थकतया रुच्यर्थकत्वेऽपि स्पृहेर्योगे ईप्सिते चतुर्थीविधानं प्रीयमाणे निषेधमपि सूचयति। अतः 'चैत्राय पुष्पेभ्यः स्पृहयति' इति न प्रयोगः। ईप्सितग्रहणं तु प्रीयमाणेऽधिकरणे च संप्रदानतानिषेधार्थम्। अतः "पुष्पेभ्यो वने स्पृहयति" इत्यत्र वनस्य न संप्रदानता।

भाट्टचिन्तामणौ[१]

स्पृहेरीप्सितः। स्पृहयतिसमभिव्याहारे इच्छासामान्यविषयस्य संप्रदानत्वम्। प्रकृष्टेच्छाविषयस्य कर्मत्वम्। "पुष्पेभ्यः स्पृहयति", "पुष्पाणि स्पृहयति"। "वने स्पृहयति" इति वने तदभावः — इत्युक्तम्।

भाट्टरहस्ये[२]

स्पृहेरीप्सित इत्यनुशासनात् स्पृहयतियोगे इष्टः संप्रदानसंज्ञः स्यादित्यर्थकात् "पुष्पेभ्यः स्पृहयति" इत्यत्र चतुर्थी। अत्र चतुर्थ्यर्थः कर्मत्वं, संबन्धत्वेन विषयत्वरूपसंबन्धश्च। तयोश्च तात्पर्यानुरोधेन एकैकशः समुदितयोर्वा बोधः। तेन निरवकाशत्वात् संप्रदानसंज्ञा कर्मसंज्ञाशेषषष्ठ्योः बाधिकेति वाक्यपदीयप्रभृतयः।

वस्तुतस्तु ईप्सितग्रहणात् ईप्सिततमत्वप्रयुक्तकर्मसंज्ञायाः संबन्धसामान्यप्रयुक्तशेषषष्ठ्या वा बाधे प्रमाणाभावः। तेन विषयित्वमेव विषयित्वत्वेन चतुर्थ्यर्थः। तस्य स्वाश्रयस्पृहानिरूपितत्वसंबन्धेन आख्यातार्थे आश्रयत्वेऽन्वयः। तथा च

---

[१] पृ. १००

[२] पृ. १२१

पुष्पविषयकेच्छाश्रयत्वमिति बोधः। कर्मत्वविवक्षायां "पुष्पाणि स्पृहयति" इति प्रयोगः। शेषत्वविवक्षायां च 'पुष्पाणां स्पृहयति' इति। अत एव "परस्परेण स्पृहणीयशोभाम्" इति कर्मत्वार्थकः अनीयर् प्रत्ययः। संप्रदाने कृत्यप्रत्ययविधायकानुशासनविरहात्। "कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च" इति षष्ठीप्रयोगोऽपि संगच्छते।

क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः[१] इति सूत्रार्थः

क्रुधादिधात्वर्थार्थकानां धातूनां प्रयोगे यं प्रति कोपः स संप्रदानसंज्ञकः स्यात्। "हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति वा"। 'रावणादिः' इति शेषः। क्रुध्यति = हरिविषयं कोपं करोतीत्यर्थः। घातेच्छासमनियतश्चित्तवृत्तिविशेषः कोपः। अकर्मकत्वात् षष्ठी प्राप्ता। द्रुह्यति = कोपात् हरिविषयकमपकारं करोतीत्यर्थः। अपकारो दुःखजनिका क्रिया। धात्वर्थोपसंग्रहात् अकर्मकः। अकर्मकत्वात् षष्ठी प्राप्ता। ईर्ष्यति = ईर्ष्या असहनम्। कोपात् हरिं न सहत इत्यर्थः। कर्मणि द्वितीया प्राप्ता। असूयति = असूया गुणेषु दोषाविष्कारः। कोपात् हरिं दुर्गुणं मन्यत इत्यर्थः। यं प्रति कोपः किम्। "भार्यामीर्ष्यति"। मैनामन्यो द्राक्षीदिति तां न सहत इत्यर्थः। नात्र भार्यां प्रति कोपः। किं तु परेण दृश्यमानां तां न सहत इत्यर्थः। द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते। अतः सामान्येन विशेषणं यं प्रति कोप इति।

एवं च क्रोधद्रोहेर्ष्यासूयानां कोपमूलकत्व एवेदं सूत्रं प्रवर्तते। तथा च कुप्यति कस्मैचित् इत्याद्यसाध्वेव। कोपस्य कोपमूलकत्वाभावात् क्रुधाद्यर्थकत्वाभावाच्च। प्ररूढकोप एव हि क्रोधः। न ह्यकुपितः क्रुध्यतीति भाष्यात्। समग्रभाष्यं तावत् — किमेत एकार्था आहोस्विन्नानार्थाः। किं चातः। यद्येकार्थाः किमर्थं पृथङ्निर्दिश्यन्ते। अथ नानार्थाः, कथं कुपिना शक्यन्ते विशेषयितुम्। एवं तर्हि नानार्थाः। कुपौ त्वेषां सामान्यमस्ति। न ह्यकुपितः क्रुध्यति, न वा अकुपितो द्रुह्यति, न वा अकुपित ईर्ष्यति, न वा अकुपितोऽसूयति। इति।

लघुशब्देन्दुशेखरे विशेषाः[२]

"भार्यामीर्ष्यति" इति। नात्र भार्यां प्रति कोपः, किं तु परैर्दृश्यमानां तां न सहत इत्येव। एवं चात्र न कोपजन्या ईर्ष्या, किं तु अन्यपुरुषदर्शनजन्या। हरेः क्रोधद्रोहाभ्यामिच्छाविषयत्वाभावात् "क्रियया यमभिप्रैति०"[३] इत्यनेन न सिद्धिः। न

---

[१] सू. १.४.३७
[२] पृ. ६७५
[३] वा. १०८५

ह्यकुपितः क्रुध्यति इति भाष्येण प्ररूढकोप एव क्रोध इति कुपेः क्रोधार्थकत्वाभावेन कुपियोगे इदं सूत्रं न प्रवर्तते। कुप्यति कस्मैचित् इत्याद्यसाध्वेव।

भैरवमिश्रैस्तु

शनिरशनिश्च तमुच्चैर्निहन्ति कुप्यसि नरेन्द्र यस्मै त्वम्।
यस्मै प्रसीदसि पुनः स भात्युदारोऽनुदारश्च।।

इति काव्यप्रकाशप्रयोगः कुपेरपि प्ररूढकोपार्थकत्वकल्पनया समर्थनीयः। कोपसामान्यार्थककुप्धातुयोगे तु संप्रदानत्वं नेति नागेशाशयः स्पष्टीकृतः।

लघुमञ्जूषायां विशेषाः[१]

"हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति"। वधाद्यनुकूलव्यापारजनकश्चित्तवृत्तिविशेषः क्रोधः क्रुधेरर्थः। दुःखजनकक्रियारूपापकारजनकश्चित्तवृत्तिविशेषो द्रुहेः। धात्वर्थोपसंगृहीतत्वादेतावकर्मकौ। विषयतया एतद्धात्वर्थमूलभूतकोपसंबन्धिनो हरेः संप्रदानत्वम्। हरिसंप्रदानको द्रोहः क्रोध इति बोधः। अत्र शेषषष्ठ्यपवादत्वम्। [हरिसंबन्धि — (हरिविषयक) कोपमूलकवधाद्यनुकूलव्यापारजनकश्चित्तवृत्तिविशेषः, हरिसंबन्धिकोपमूलकदुःखजनकक्रियारूपापकारजनकश्चित्तवृत्तिविशेष इति बोधः पर्यवसितः।]

उत्कर्षविरोधिधर्मारोपानुकूलव्यापारजनकश्चित्तवृत्तिविशेष ईर्ष्या। शौचाचारादिगुणविषये दम्भादिकृतत्वरूपदोषारोपानुकूलश्चित्तवृत्तिविशेषोऽसूया। एते सर्वेऽपि चित्तवृत्तिविशेषरूपकोपमूलकाः। प्ररूढस्य वाक्चक्षुरादिविकारानुमेयस्य कोपस्यैव क्रोधपदार्थत्वेन तस्यापि कोपमूलकत्वम्। कुप क्रोधे इति तु तद्वृत्तिकोपत्वसामान्यमादाय। ईर्ष्यासूययोः सकर्मकत्वात् तद्योगे कर्मसंज्ञापवादतया संप्रदानसंज्ञा विधीयते। हरिसंप्रदानकोत्कर्षविरोधिधर्मारोपानुकूलव्यापारजनकश्चित्तवृत्तिविशेषः, हरिसंप्रदानकः गुणविशेष्यकदोषत्वप्रकारकारोपानुकूलश्चित्तवृत्तिविशेषः इति क्रमेण बोधः।

तद्धात्वर्थमूलभूतकोपविषयत्वे सति तद्धात्वर्थफलाश्रयस्य ईर्ष्यासूयास्थले संप्रदानत्वम्। अत्र फलं पूर्वोक्त आरोपः तदाश्रयत्वं विषयतासंबन्धेन। सत्यन्तेन "भार्यामीर्ष्यति मा एनामन्यो द्राक्षीत्" इत्यादिव्युदासः। भार्यायाः कोपविषयत्वाभावात्। "मित्राय द्रुह्यति प्रताप" इत्यत्र प्रतापे चेतनत्वारोपः। अचेतने प्रतापे चित्तवृत्तिविशेषरूपद्रोहाश्रयत्वासंभवात्।

---

[१] पृ. ११७३

द्विषस्तु क्रोधाद्यर्थकत्वाभावात् न तद्योगे संप्रदानता, अपि तु कर्मत्वमेव। तथा हि — "औषधं द्वेष्टि" इत्यत्र बलवद्दुःखसाधनताज्ञानजन्यः अप्रीतिजनकश्चित्तवृत्तिविशेषः द्विषधातोरर्थः। एतदेवानभिनन्दनम्।

शब्दशक्तिप्रकाशिकायाम्[1]

"चैत्राय कुप्यति क्रुध्यति" इत्यादौ धात्वर्थ उत्कटद्वेषः। तत्र विषयित्वलक्षणं संप्रदानत्वं चतुर्थ्या बोध्यते। तेन चैत्रविषयकोत्कटद्वेषवान् इत्याकारकस्तत्र बोधः। "पुत्रे कोपो न युज्यते" इत्यादौ कृदन्तस्य कोपपदस्यैवार्थे पुत्र इत्यस्यान्वयः, न तु धात्वर्थे।

"मित्राय द्रुह्यति" इत्यत्र द्विष्टाचरणं द्रोहः। मित्रस्य द्विष्टमाचरतीत्यर्थः। द्विष्टान्वयि संबन्धित्वं चतुर्थ्यर्थः?। "शिष्याय ईर्ष्यति" इत्यत्र अनिष्टानुपेक्षणमीर्ष्या। शिष्यानिष्टं नोपेक्षत इत्यर्थः। "पुत्रायासूयति" इत्यत्र असूया गुणद्वेषः। पुत्रस्य गुणं द्वेष्टि इत्याकारकस्तत्र बोधः। "मित्रं द्रुह्यति, शिष्यमीर्ष्यति, पुत्रमसूयति" इत्यपि प्रयोगात् द्रुहादिकर्मणः संप्रदानत्वं वैकल्पिकमित्युन्नीयते।

कोपपूर्वकस्य द्रोहादेः द्रुहादिधातुवाच्यत्वे तत्कर्मणः संप्रदानत्वं द्रोहादिमात्रस्य तथात्वे तु कर्मत्वमेवेति तु कौमाराः।

सोपसर्गयोस्तु क्रुधद्रुहोः कर्मतैव, न तु संप्रदानता। अत एव "शिष्यस्याभिक्रोद्धा, मित्रस्याभिद्रोढा" इत्यादौ कृद्योगे कर्मणि षष्ठ्येव प्रमाणम्।

व्युत्पत्तिवादे[2]

"पुत्राय क्रुध्यति" इत्यत्र "क्रुधद्रुह०" इत्यादिसूत्रेण कर्मणः संप्रदानसंज्ञा। चतुर्थ्याः विषयित्वमर्थः। धात्वर्थे कोपेऽन्वेति। क्रोधस्य द्वेषविशेषात्मकतया भक्तिश्रद्धादिवत् ज्ञानविशेषात्मकतया वा सविषयकत्वात्। पुत्रविषयकक्रोधाश्रय इति बोधः। एवं "शत्रवे द्रुह्यति" इत्यादावपि तेनैव संप्रदानत्वम्। द्रोहः अपचिकीर्षा अहितेच्छेति यावत्। चतुर्थ्याः अहितभागित्वावच्छिन्ना या विषयता तन्निरूपकत्वमर्थः। विषयतायाम् आधेयतासंबन्धेन प्रकृत्यर्थस्य शत्रोरन्वयः। निरूपकत्वस्याश्रयतासंबन्धेनेच्छायामन्वयः। शत्रुनिष्ठा या अहितभागित्वावच्छिन्ना विषयता तन्निरूपकेच्छावान् इति बोधः। शत्रुः अहितभागी भवतु इतीच्छायाः आकारः। यद्वा आधेयत्वं चतुर्थ्यर्थः। तस्य धात्वर्थैकदेशेऽहितेऽन्वयः। शत्रुनिष्ठं

---

[1] पृ. ३१०

[2] पृ. २४२

यत् अहितं तद्विषयकेच्छाश्रय इति बोधः। धातोरिच्छाद्वेषार्थकत्वात् "कर्मणा यमभिप्रैति०"[१] इति सूत्रं न प्रवर्तते।

ईर्ष्या अक्षान्तिः परोत्कर्षासहिष्णुता परोत्कर्षविषयको द्वेष इति यावत्, तद्विषयस्य परस्य क्रुधद्रुहेत्यादिना संप्रदानता। असूया गुणिनि दोषाविष्करणम्। तद्विषयस्यापि तेनैव सूत्रेण संप्रदानता। उभयत्रापि विषयताविशेषश्चतुर्थ्यर्थः। तद्विषयकेर्ष्यावान् तद्विषयकासूयावान् इति बोधः।

पदवाक्यरत्नाकरे[२]

क्रुधि कुपिरुषादयो धातवः केवलद्वेषगुणवाचका अकर्मकाः। "शत्रवे क्रुध्यति" इत्यादौ द्विष्टतालक्षणविषयताविशेषश्चतुर्थ्यर्थः। शत्रुनिष्ठद्विष्टतात्मकविषयताविशेषनिरूपकक्रोधाश्रय इति बोधः। द्विषिस्तु द्विष्टताविशिष्टं द्वेषमभिधत्त इति न स क्रुधिपर्यायः। अतः "शत्रुं द्वेष्टि" इत्येव प्रयोगः। द्विष्टतारूपफलाश्रयतया शत्रोः कर्मत्वात् द्वितीया।

द्रुहेः द्विष्टाचरणमर्थः। "शत्रवे द्रुह्यति" इत्यत्र चतुर्थ्याः द्वेषान्वयी समवायोऽर्थः। शत्रुसमवेतद्वेषविषयविषयकाचारवान् इत्यन्वयबोधः।

परक्रियागोचरो द्वेष ईर्ष्या। "सपत्नीभ्य ईर्ष्यति" इत्यत्र धात्वर्थतावच्छेदकक्रियान्वयि समवेतत्वं चतुर्थ्यर्थः। सपत्नीसमवेतक्रियाविषयकद्वेषवान् इति बोधः। सपत्नीसमवेतक्रियां न सहत इति यावत्। परसमवेतक्रियायामीर्ष्यतिना फलविधया निर्दिष्टायां तद्विषये कर्मणि द्वितीयैव। "भार्यामीर्ष्यति मैनामन्योऽद्राक्षीत्" इत्यत्र भार्याविषयकमन्यसमवेतदर्शनं न सहत इति बोधः।

परगुणेषु दोषत्वारोपणमसूया। "वादिनेऽसूयति" इत्यादौ वादिसमवेतं (प्रमात्मकं) ज्ञानं भ्रमत्वेनाख्यापयतीत्यर्थः।

यत्तु काव्यप्रकाशकारचरणैः —

जाने कोपपराङ्मुखी प्रियतमा स्वप्नेद्य दृष्टा मया
मा मा संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः।
नो यावत् परिरभ्य चाटुशतकैराश्वासयामि प्रियां
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः।।

---

१ सू. १.४.३२

२ पृ. ७१९

इत्यत्र विधिं प्रत्यसूया व्यज्यत इत्युक्तम्। तत्रेदमाकूतम् — विधेः नैसर्गिको गुणः निद्रादरिद्रीकरणम्। तच्च स्वप्नसमागमविच्छेदविह्वलेन कामिना शाठ्यहेतुकत्व-रूपदोषत्वेन समारोपितमिति गुणे दोषारोपासूयाभावोऽभिव्यज्यत इति।

विभक्त्यर्थनिर्णये[१]

क्रुधाद्यर्थकानां योगे चतुर्थीं ज्ञापयति "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः"[२] इति सूत्रम्। क्रोधाद्यर्थकानां योगे यं प्रति कोपः तत् कारकं संप्रदानसंज्ञकं भवतीत्यर्थकम्। यत्र येन वेत्यपहाय सूत्रे यं प्रति इत्युक्त्या चतुर्थ्या नानाविधोऽर्थो ज्ञाप्यते। अत एव क्रोधस्तावत् कोप एव। द्रोहादयोऽपि कोपप्रभवा एव गृह्यन्ते। तस्मात् सामान्येन विशेषणं यं प्रति कोप इति काशिका। कोपप्रभवानां द्रोहादीनां ग्रहणात् लोभादिप्रभवद्रोहाद्यर्थकधातुयोगे न चतुर्थीति ज्ञाप्यते। क्रोधमात्रार्थकाः फलावाचकत्वात् अकर्मकाः क्रुधिकुप्यादयः। क्रोधोऽमर्षः द्वेष इति यावत्।

"देवदत्ताय क्रुध्यति कुप्यति वा" इत्यादौ चतुर्थ्याः द्विष्टतालक्षणं विषयत्वमर्थः। तथा च देवदत्तनिष्ठविषयतानिरूपकद्वेषाश्रय इति बोधः। द्विषिस्तु द्विष्टतालक्षणफलं द्वेषं चाभिधत्त इति न क्रुधिपर्यायः। तद्योगे न चतुर्थी। किं तु द्वितीया। अत एव शत्रुं द्वेष्टि इत्येव प्रमाणम्।

द्रुहेः द्विष्टाचरणमर्थः। "देवदत्ताय द्रुह्यति" इत्यत्र चतुर्थ्याः द्वेषान्वयि सम-वेतत्वमर्थः। तथा च देवदत्तसमवेतद्वेषविषयाचाराश्रय इति बोधः।

ईर्ष्यतेः पराक्रियागोचरो द्वेषोऽर्थः। चतुर्थ्याः क्रियान्वयि समवेतत्वमर्थः। 'देव-दत्ताय ईर्ष्यत' इत्यत्र देवदत्तसमवेतक्रियागोचरद्वेषाश्रयः इति बोधः। यत्र तु क्रिया फलविधया ईर्ष्यतिना उच्यते तत्र क्रियाविषये कर्मणि द्वितीयैव प्रमाणम्। यथा भार्यामीर्ष्यति मैनामन्यो द्राक्षीदिति भार्याविषयकमन्यकर्तृदर्शनं न सहत इति तदर्थः।

असूयतेरसूया अर्थः। सा च परगुणे दोषारोपः। "देवदत्ताय असूयति" इत्यत्र चतुर्थ्याः संबन्धित्वं समवेतत्वं वा अर्थः। तथा च देवदत्तसंबन्धिगुणं दोषत्वेन आरोपयतीत्यर्थः। "वादिने असूयति" इत्यत्र वादिसमवेतज्ञानं भ्रमत्वेन ख्यापय-तीत्यर्थ इति संप्रदायः।

---

[१] पृ. २८७

[२] सू. १.४.३७

वस्तुतस्तु क्रुध्यत्यादेः क्रोधोऽर्थः। स चामर्षः। तच्चासहिष्णुत्वम्। अत एव क्रोधोऽमर्ष इति काशिका। "कोपक्रोधामर्षरोष" इत्याद्यमरोऽपि। असहिष्णुत्वं च स्वानिष्टानुकूलपरक्रियागोचरो द्वेषः। चतुर्थ्यास्तु क्रियान्वयि आधेयत्वमर्थः। "देवदत्ताय क्रुध्यति यज्ञदत्त" इत्यत्र स्वानिष्टानुकूलदेवदत्तवृत्तिक्रियागोचरद्वेषाश्रयो यज्ञदत्त इत्यन्वयबोधः।

अनिष्टानुकूलायाः शिष्यगतायाः पुत्रगतायाश्च क्रियायाः द्वेषसंभवात् अनिष्टानुकूलव्यापारो द्रुहेरर्थः। अत एव द्रोहोऽपकार इति काशिका। चतुर्थ्यास्तु अनिष्टान्वय्याधेयत्वमर्थः। अनिष्टं च दुःखं सुखाभावश्च "देवदत्ताय द्रुह्यति यज्ञदत्त" इत्यत्र देवदत्तवृत्तिदुःखानुकूलव्यापारानुकूलकृतिमान् यज्ञदत्त इति बोधः।

"सपत्न्यै द्रुह्यति स्त्री" इत्यत्र सपत्नीवृत्तिसुखाभावानुकूलव्यापारानुकूलकृतिमती स्त्री इत्यन्वयबोधः।

उत्कर्षगोचरो द्वेष ईर्ष्यतेरर्थः। उत्कर्षान्वयि आधेयत्वं चतुर्थ्यर्थः। "कर्णाय ईर्ष्यति फाल्गुन" इत्यत्र कर्णवृत्त्युत्कर्षगोचरद्वेषाश्रयः फाल्गुन इति बोधः। यत्र तु फलतया क्रिया तद्गोचरो वा द्वेषो व्यापारतया ईर्ष्यतिना प्रत्याय्यते फलीभूतक्रियान्वयिनि भार्यादौ न कोपः, स्वानिष्टानुकूलव्यापारविरहात्, तत्र फलान्वयिनि द्वितीयैव प्रमाणम्। यथा भार्यामीर्ष्यति इत्यत्रान्यकर्तृकदर्शनं फलं द्वेषो व्यापार ईर्ष्यतेरर्थः। दर्शने द्वितीयार्थो विषयत्वं तत्संबन्धावच्छिन्नाधेयत्वं वा भार्याविशेषितमन्वेति। भार्याकर्मकान्यकर्तृकदर्शनगोचरद्वेषाश्रय इति वाक्यार्थः। एतदर्थमेव यं प्रति कोप इत्युक्तम्। अत एव "यं प्रति कोप इति किम्। भार्यामीर्ष्यति मैनामन्यो द्राक्षीत्" इति काशिका।

एवं यत्र क्रियान्तरद्वेषोऽपीर्ष्यतिना प्रत्याय्यते तत्रापि द्वितीयैव। यथा शिष्यमीर्ष्यति मैनमन्योऽध्यापयेदिति। अन्यकर्तृकक्रियाद्वेषस्य धात्वर्थत्वे तु उक्तार्थानामप्रयोगात् अन्यस्मै द्रष्ट्रेऽध्यापकाय वा ईर्ष्यतीति न प्रयोगः। फलीभूतक्रियान्वयिनि कर्मणि स्वानिष्टानुकूलक्रियाविरहायोगात् न कोपविषयत्वमिति न तत्र चतुर्थी।

एवं गुणे दोषारोपोऽसूया असूयतेरर्थः। चतुर्थ्या गुणान्वय्याधेयत्वमर्थः। "देवदत्तायासूयति यज्ञदत्त" इत्यत्र देवदत्तवृत्तिधैर्यादिगुणधर्मिकचौर्यत्वारोपकर्ता यज्ञदत्त इत्यन्वयबोधः।

एवं "सपत्न्यै असूयति" इत्यत्र सपत्नीवृत्तिपतिसेवनादिकं कार्मणत्वेनारोपयतीत्यर्थः।

"वादिनेऽसूयति" इत्यत्र वादिवृत्तिप्रमाणवाक्यम् अप्रमाणत्वेनारोपयतीत्यर्थः। गुणा दोषाश्च प्रातिस्विकरूपेण प्रकरणादिवशात् असूयतिना उपस्थाप्यन्ते। गुणास्तु निन्दाप्रयोजकान्ये पदार्थाः। ते च वैशेषिकसिद्धा द्रव्यगुणक्रियासामान्यादयः प्रत्येतव्याः।

यच्च काव्यप्रकाशे — "भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः" इत्यत्र विधिं प्रत्यसूयया व्यज्यत इत्युक्तं, तत्र विधेः नैसर्गिके निद्रादरिद्रीकरणे गुणे शाठ्यहेतुकत्वस्वरूपदोषत्वं स्वप्नसमागमविच्छेदेन विहस्तेन कामिना समारोपितमिति गुणे दोषारोपरूपोऽसूयाभावोऽभिव्यज्यत इति संप्रदायः।

वस्तुतस्तु अनिन्द्ये विधौ विधित्वे वा शठतादात्म्यस्य शठत्वतादात्म्यस्य वा आरोपः तादृशेन कामिना कृत इत्यनिन्द्ये दोषारोपरूपासूया व्यज्यते। दोषास्तु निन्दाप्रयोजका बोध्याः।

एतेन "दुःखाय नरकाय वा कुप्यति" इति प्रयोगोपपत्तिः। दुःखविषयक द्वेषस्य सत्त्वात्। 'बृहस्पतिरध्यापयन् दैवेभ्यो द्रुह्यति' इति प्रयोगानापत्तिः। अध्ययनस्य दैत्यसमवेतद्वेषाविषयत्वात्। 'कूपे पततेऽन्धायेर्ष्यति' इति प्रयोगापत्तिः। अन्धकर्तृककूपपतनगोचरद्वेषस्य निवारके सत्त्वादिति परास्तम्।

कुप्यादिधातूनां चतुर्थ्याश्च दर्शितार्थकतया अतिप्रसङ्गाप्रसङ्गयोरभावात्। कुप्यादीनां दर्शितार्थकत्वे कर्मणि द्वितीया प्रसक्ता निरवकाशया संप्रदानसंज्ञया असाधुत्वज्ञापिकया बाध्यते।

सूत्रे यं प्रति कोप इत्यत्र कोपोपादानं न चतुर्थ्यतासूचनाय। तथा सति कुप्यादिप्रयोगे चतुर्थीप्रयोगानुपपत्तेः। धात्वर्थे कोपे चतुर्थ्यर्थकोपानन्वयात्। किं तु स्वरूपकथनम्। भवतु वा प्रति इत्युपादानात् कोपस्य विषयत्वं चतुर्थ्या अर्थः। "देवदत्ताय क्रुध्यति" इत्यत्र कोपार्थकधातुयोगे विषयित्वं चतुर्थ्यर्थः। अनिष्टानुकूलव्यापारगोचरद्वेषः कोपेऽन्वेति। देवदत्तादेः यज्ञदत्तानिष्टानुकूलव्यापारकर्तृत्वमर्थादवगम्यते। स्वविषयकयज्ञदत्तीयद्वेषप्रयोजकत्वात् "देवदत्ताय द्रुह्यति" इत्यत्र द्वेषमात्रं कोपोऽर्थः। तत्र विषयितया प्रकृत्यर्थस्यान्वयः। अनिष्टानुकूलव्यापारे द्रोहे कोपः प्रयोज्यतयान्वेति। देवदत्तादेरनिष्टं पूर्ववदवगम्यते।

"देवदत्तायेर्ष्यति" इत्यत्र पूर्ववत् कोपश्चतुर्थ्यर्थः। उत्कर्षगोचरद्वेषे धात्वर्थे प्रयोज्यतयान्वेति। देवदत्तादेरुत्कर्षः पूर्ववदेवावगम्यते।

"देवदत्ताय असूयति" इत्यत्र पूर्ववत् कोपश्चतुर्थ्यर्थः। गुणे दोषारोपस्वरूपे धात्वर्थे पूर्ववदन्वेति। गुणः पूर्ववत् अवगम्यते।

अस्मिन् कल्पे न दर्शितातिप्रसङ्गाप्रसङ्गौ। न वा धनिनिष्ठानिष्टानुकूलव्यापार-कर्तृत्वेऽपि चौरस्य धनिने "द्रुह्यति चौरः" इति प्रयोगः। धनिनः कोपाविषयत्वात् संप्रदानत्वाप्रसक्तेः। यदि कोपमूलकमपि चौर्यं तदा तादृशप्रयोगोपीष्ट एव।

सोपसर्गयोः क्रुधद्रुहोर्योगे कोपविषयस्य न संप्रदानसंज्ञा। निरवकाशया कर्म-संज्ञया बाधात्। "क्रुधद्रुहोरुपसृष्टयोः कर्म"[1] इत्यनुशासनेन कर्मसंज्ञाविधानात् द्वितीयैव प्रमाणम्। "क्रूरमभिक्रुध्यति अभिद्रुह्यति वा" इत्यत्र विषयत्वं कोपस्य यथायोग्यं द्वितीयार्थः। "देवदत्ताय क्रुध्यति द्रुह्यति वा" इतिवत् अन्वयबोध इति प्रागेवोक्तम्।

भाट्टचिन्तामणौ[2]

उपसर्गरहितक्रोधाद्यर्थकधातुयोगे कोपकर्मणः संप्रदानत्वम् 'अरये क्रुध्यति' इत्यादौ। "शिष्यमभिक्रुध्यति" इत्यादौ सोपसर्गयोगे न। क्रोधोऽमर्षः। द्रोहो-ऽपकारः। ईर्ष्या अक्षमा। असूया गुणेषु दोषाविष्करणम्। एते क्रोधविशेषा एव इत्युक्तम्।

भाट्टरहस्ये[3]

क्रुधद्रुहाद्यर्थानां धातूनां योगे यं प्रति कोपः स संप्रदानसंज्ञः स्यात् इत्यर्थकात् "शत्रवे क्रुध्यति, द्रुह्यति, ईर्ष्यति, असूयति" इत्येवं चतुर्थी। अत्र क्रोधः अमर्षः। द्रोहः अपकारः। ईर्ष्या असहनम्। असूया गुणेषु दोषारोपः। अत्र आद्ययोरकर्म-कत्वात् तद्योगे षष्ठीप्राप्तौ अन्त्ययोश्च सकर्मकत्वात् द्वितीयाप्राप्तौ तद्बाधेन चतुर्थी विधीयते। यं प्रति कोप इत्यनेन यत्संबन्धित्वयत्कर्मकत्वयोः उपादानात्। यत्सं-बन्धी यत्कर्मको वा कोप इति तदर्थात्। अत एव नात्र षष्ठीद्वितीयान्तप्रयोगोऽपि। चतुर्थ्या अपि संबन्धः कर्मत्वं वा।

कोपपदोपादानात् "भार्यामीर्ष्यति मैनामन्यो द्राक्षीत्" इत्यत्र न चतुर्थी। कर्म-संज्ञाबाधकत्वादेव आद्ययोः धात्वर्थयोरुपसर्गयोगे प्रतिप्रसवरूपेण "क्रुधद्रुहो-रुपसृष्टयोः कर्म" इति कर्मसंज्ञाविधिः 'शत्रुमभिक्रुध्यति' इत्यादौ। 'क्रुध्यति' इत्यादौ शत्रुसंबन्धिक्रोधानुकूला कृतिः, शत्रुकर्मकेर्ष्यानुकूला कृतिः इति बोधः।

---

[1] सू. १.४.३८
[2] पृ. १०१
[3] पृ. १२२

क्रुधद्रुहोरुपसृष्टयोः कर्म[१] इति सूत्रार्थः

सोपसर्गयोः क्रुधद्रुहोर्योगे यं प्रति कोपस्तत्कारकं कर्मसंज्ञं स्यात्। क्रूरमभिक्रुध्यति, अभिद्रुह्यति। पूर्वसूत्रापवादोऽयम्। ग्रन्थेषु एतत्सूत्रविषये नास्ति अधिकविचारः।

राधीक्ष्योर्यस्य विप्रश्नः[२] इति सूत्रार्थः

राध संसिद्धौ, ईक्ष दर्शने। एतयोः कारकं संप्रदानं स्यात् यद्विषयको विविधः प्रश्नः क्रियते। यत्पदेन कारकं गृह्यते। एतयोः धात्वोर्योगे यद्विषयको विविधः प्रश्नः क्रियते तत् कारकं संप्रदानसंज्ञकं भवति। "कृष्णाय राध्यति ईक्षते वा"। पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः। गर्गो नाम ज्योतिःशास्त्रज्ञः ऋषिः। स कृष्णस्य शुभाशुभविषये पृष्टः सन् कृष्णविषयकं शुभाशुभं पर्यालोचयतीत्यर्थः। कृष्णस्य संप्रदानत्वं षष्ठ्यपवादरूपेण विधीयते।

शेखरे[३]

राधीक्ष्योः प्रश्नविषयार्थपर्यालोचनमर्थः। कर्मणः प्रश्नविषयस्य धात्वर्थेनोपसंग्रहात् अकर्मकावेतौ। राधधातोः अकर्मकत्वादेवात्र राध्यतीति श्यन्, "राधोऽकर्मकादेव" इत्युक्तेः। कृष्णसंप्रदानकं शुभाशुभपर्यालोचनमिति बोधः। न च प्रश्नविषयशुभाशुभाश्रयत्वेन कर्मत्वं कृष्णस्येति सकर्मकोऽयं धातुरिति वाच्यम्। तस्य फलस्य प्रकृतधात्वर्थप्रधानीभूतव्यापारजन्यत्वाभावात् इति भैरवमिश्राः।

लघुमञ्जूषायाम्[४]

"कृष्णाय राध्यति ईक्षते वा"। प्रश्नविषयशुभाशुभपर्यालोचनं धतोरर्थः। तदर्थः यः प्रश्नविषयः शुभमशुभं च तत्संबन्धिनः कृष्णस्य संप्रदानत्वम्। तस्य चतुर्थ्यर्थस्य प्रश्नविषयेऽन्वयः। कृष्णसंप्रदानकम् अर्थात् कृष्णसंबन्धिशुभाशुभविषयकं पर्यालोचनमिति बोधः।

---

[१] सू. १.४.३८
[२] सू. १.४.३९
[३] पृ. ६७६
[४] पृ. १२७४-१२७५

शब्दशक्तिप्रकाशिकायाम्[१]

"पुत्राय राध्यति, पुत्राय ईक्षते" इत्यादौ दैवनिरूपणं धात्वर्थ:। तन्निविष्टे दैवे चतुर्थ्यर्थस्य संबन्धस्यान्वय:। तेन पुत्रसंबन्धि दैवं निरूपयतीत्येव तत्र बोध:।

पदवाक्यरत्नाकरे[२]

"वासुदेवाय राध्यति गर्ग:" इत्यत्र दैवपर्यालोचनं राधेरर्थ:। चतुर्थ्या: समवेतत्वमर्थ:। तथा च वासुदेवसमवेतं दैवं गर्ग: पर्यालोचयतीत्यर्थ:। मम पुत्रस्य कीदृशं शुभमशुभं वेति विविच्य प्रश्नगोचरता तु वासुदेवपदेन न प्रतिपाद्यते, किं तु व्यञ्जनयैव। प्रश्नानन्तरितशुभाशुभपर्यालोचनं वा राधेरर्थ:। इत्युक्तम्।

विभक्त्यर्थनिर्णये[३]

राधीक्ष्योर्योगे चतुर्थी ज्ञापयति "राधीक्ष्योर्यस्य विप्रश्न:"[४] इति सूत्रम्। राधेरीक्षेश्च योगे यस्य विप्रश्न: तत् कारकं संप्रदानसंज्ञं स्यादित्यर्थकम्। विप्रश्न: विविध: प्रश्न:। विविध: विविधविषयक इत्यर्थक:। अत एव — "यस्य विप्रश्नो विविध: प्रश्न: स यस्य भवति यत्संबन्धि शुभाशुभं पृच्छ्यते" इति काशिका। राधेरीक्षेश्च दैवपर्यालोचनमर्थ:। दैवं शुभाशुभम्। चतुर्थ्या: समवेतत्वमर्थ:। "कृष्णाय राध्यति ईक्षते वा गर्ग" इत्यत्र कृष्णसमवेतशुभाशुभपर्यालोचनाश्रयो गर्ग: इत्यन्वयबोध:। कृष्णस्य कीदृशं शुभमशुभं वेति प्रश्नस्य गोचरता तु कृष्णपदेन न प्रतिपाद्यते, किं तु व्यञ्जनया अर्थ इति विप्रश्नानन्तरितशुभाशुभपर्यालोचनं राधीक्ष्योरर्थ इति धातुनैव विप्रश्नगोचरता प्रत्याय्यत इति संप्रदाय:।

वस्तुतस्तु विप्रश्न: शुभाशुभप्रश्न: शुभाशुभजिज्ञासाप्रयोज्यकिमादिशब्दघटितवाक्यमिति यावत्। तत्र विप्रश्नस्तत्प्रयोजिका जिज्ञासा वा चतुर्थ्यर्थ: दैवपर्यालोचने राधीक्ष्योरर्थे प्रयोज्यतयान्वेति। चतुर्थ्यर्थे जिज्ञासायां विषयितया प्रकृत्यर्थस्यान्वय:। यत्संबन्धित्वेन शुभाशुभजिज्ञासा तस्यैव शुभाशुभविषयतानिरूपितविषयतया जिज्ञासायामन्वय:। ईदृशविषयितयैव प्रकृत्यर्थस्यान्वय:। तेन मैत्रपुत्रस्य किं शुभाशुभं वेति प्रश्ने 'मैत्राय राध्यति' इति न प्रयोग:। एवं च कृष्णाय राध्यति ईक्षते वा गर्ग इत्यत्र कृष्णविषयकशुभाशुभजिज्ञासाप्रयोज्यशुभाशुभपर्यालोचनाश्रयो गर्ग इत्यन्वयबोध:। धात्वर्थघटकशुभाशुभे गर्गसमवेतत्वमर्थात् प्रतीयते धात्वर्थे

[१] पृ. ३१०
[२] पृ. ७१६
[३] पृ. २९१
[४] सू. १.४.३९

तादृशजिज्ञासाप्रयोज्यत्वान्वयबलात्। अत एव "देवदत्ताय राध्यति ईक्षते वा इति नैमित्तिकः पृष्टः सन् देवदत्तस्य दैवं पर्यालोचयतीत्यर्थ" इति काशिका। विप्रश्न-वाक्यं न धात्वर्थे घटते न वा चतुर्थ्यर्थः किं तु शुभाशुभजिज्ञासैव। यत्र न प्रश्न-वाक्यं स्वस्यैव शुभाशुभजिज्ञासा तत्रापि वराय कन्यायै वा राध्यति नैमित्तिक इति प्रामाणिकः प्रयोग इति।

भाट्टचिन्तमणौ[१]

राधीक्ष्योः समभिव्याहारे विविधप्रश्नविषयशुभाधिकरणस्य संप्रदानत्वम्। कृष्णाय राध्यति ईक्षते वा। गर्गकर्तृकगोपीकृतविविधप्रश्नविषयशुभाशुभपर्यालोचनाधि-करणकृष्णसंप्रदानकं राधनमीक्षणं वेति बोधः।

भाट्टरहस्ये[२]

"राधीक्ष्योर्यस्य विप्रश्नः" इति सूत्रेण राधीक्ष्योर्योगे विविधप्रश्नसंबन्धी संप्र-दानसंज्ञः स्यादित्यर्थकेन "कृष्णाय राध्यति ईक्षते वा" इत्यत्र चतुर्थी। विविधं पृष्टो गर्गः कृष्णसंबन्धि शुभाशुभं पर्यालोचयतीत्यर्थः। संबन्धित्वं चतुर्थ्यर्थः।

प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता[३] इति सूत्रार्थः

प्रत्याङ्भ्यां परस्य श्रुधातोर्योगे पूर्वस्य — पूर्वतनरूपव्यापारस्य कर्ता संप्रदानं स्यात्। प्रत्याङ्भ्यामित्यनेन समुदिताभ्यां परस्येति नार्थो विवक्षितः। किं तु प्रत्येकमेव तयोर्निमित्तत्वम्। अन्यथा "अभिनिविशश्च"[४] इतिवत् "प्रत्याङ्श्रुवः" इत्येव ब्रूयात्। "विप्राय गां प्रतिश्रृणोति आशृणोति वा"। "विप्रेण मह्यं देहि" इति पृष्टः सन् देवदत्तः तत् प्रतिजानीत इत्यर्थः। अत्र प्रतिपूर्वक आङ्पूर्वकश्च श्रुधातुः प्रेरणापूर्वकाभ्युपगमे वर्तते। तत्र प्रेरणे कर्तृत्वात् विप्रस्य संप्रदानत्वम्। कर्तृत्वं चतुर्थ्यर्थः। विप्रकर्तृकप्रेरणपूर्वकः गोकर्मकदानाभ्युपगम इति बोधः। अत्र विप्रस्य कर्तृप्रयोजकत्वेन हेतुत्वे प्राप्ते वचनम्। हेतुतृतीयानेन बाध्यत इति यावत्।

---

[१] पृ. १०१

[२] पृ. १२३

[३] सू. १.४.४०

[४] सू. १.४.४७

लघुमञ्जूषायाम्[1]

विप्राय गां प्रतिशृणोति आशृणोति वा — अत्र प्रवर्तनजन्योऽभ्युपगमः धात्वर्थः। स्वार्थप्रवर्तनाश्रयस्य "प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता" इत्यनेन संप्रदानत्वम्। विप्रकर्तृकप्रवर्तनजन्यः गोकर्मकाभ्युपगमः इति बोधः।

शब्दशक्तिप्रकाशिकायाम्[2]

"गुरवे गां प्रतिश्रृणोति, आशृणोति" इत्यादौ देयत्वेनाभ्युपगमः शृणोतेरर्थः। तत्र गोर्विशेष्यत्वेन तदेकदेशे च दाने गुरोरुद्देश्यत्वेनान्वयः। गुरूद्देश्यकदान-कर्मत्वप्रकारकगोविशेष्यकाभ्युपगमाश्रय इति बोधः।

पदवाक्यरत्नाकरे[3]

प्रतिशृणोतेराशृणोतेश्च याचनापूर्वको देयत्वेनाभ्युपगमोऽर्थः।

यत्तु —

संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः।।

इति नामलिङ्गानुशासने आश्रवप्रतिश्रवावपि संश्रवपर्यायत्वेन पपाठ, तत् अर्थैकदेशाभिप्रायेण।

"द्विजाय गां प्रतिशृणोति" इत्यादौ चतुर्थ्याः कर्तृत्वमर्थः। स च याचनान्वयी। द्वितीयार्थः कर्मत्वम्। तच्च याचनाङ्गीकारयोः उभयोः अन्वेति। तथा च द्विजकर्तृकगोकर्मकयाचनपूर्वकः देयत्वेनाभ्युपगमो वाक्यार्थः।

विभक्त्यर्थनिर्णये[4]

प्रत्याङ्पूर्वस्य श्रुवो योगे चतुर्थी ज्ञापयति "प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता"[5] इति सूत्रम्। प्रतिपूर्वकस्य आङ्पूर्वकस्य शृणोतेः पूर्वस्य कर्ता तदर्थप्रयोजक-क्रियाकर्ता अस्य धातोर्योगे संप्रदानसंज्ञो भवतीत्यर्थकम्। प्रतिशृणोतेः आशृणोतेश्च याञ्चापूर्वकः स्वीकारो देयत्वेनाभ्युपगमोऽर्थः। याच्ञान्वयि कर्तृत्वं चतुर्थ्यर्थः। "द्विजाय गां प्रतिशृणोति आशृणोति वा" इत्यत्र गोकर्मकत्वं याचनस्वीकारयोरुभ-

---

[1] पृ. १२७५
[2] पृ. ३१०
[3] पृ. ७२१
[4] पृ. २९२
[5] सू. १.४.४०

योरन्वेति। तथा च द्विजकर्तृकगोकर्मकयाचनपूर्वकः गोकर्मकः देयत्वेनाभ्युपगमः वाक्यार्थः। यत्तु —

संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवाः।
अङ्गीकारोऽभ्युपगमप्रतिश्रवसमाधयः।।

इति नामलिङ्गानुशासनमभ्युपगममात्रार्थकसंश्रवपर्यायत्वेन प्रतिश्रवाश्रवौ पपाठ, तत् विशेष्यस्वरूपैकदेशपर्यायतां ज्ञापयतीति संप्रदायः।

वस्तुतस्तु प्रतिशृणोतेः आशृणोतेश्चाभ्युपमोऽर्थः। स च क्रियागोचरकर्तव्यत्वाध्यवसायः। क्रिया च क्वचित् दानरूपा क्वचिदन्यादृशी। अत एव नामलिङ्गानुशासनसंमता संश्रवप्रतिज्ञानपर्यायता प्रतिश्रवाश्रवयोरुपपद्यते। चतुर्थ्याः प्रयोजकतयोपलक्षितो व्यापारोऽर्थः। स च क्वचित् याच्ञास्वरूपः यत्र प्रतिशृणोतेः दानगोचरकर्तव्यत्वाध्यवसायोऽर्थः। क्वचिदन्यादृशः यत्र दर्शितधातोरन्यादृशोऽर्थः।

अत एव — ''प्रतिपूर्व आङ्पूर्वश्च शृणोतिरभ्युपगमे प्रतिज्ञाने वर्तते। स चाभ्युपगमः परेण प्रयुक्तस्य सतो भवति। तत्र प्रयोक्ता पूर्वस्याः क्रियायाः कर्ता संप्रदानसंज्ञो भवति'' इति काशिका।

एवं च ''विप्राय गां प्रतिशृणोति आशृणोति वा राजा'' इत्यत्र प्रतिशृणोतेः दानकर्तव्यत्वाध्यवसायोऽर्थः। चतुर्थ्याः याच्ञारूपो व्यापारोऽर्थः। दानं परस्वत्वानुकूलः स्वत्वध्वंसः। याच्ञा लिप्सा प्रतिग्रह इति यावत्। प्रकृत्यर्थस्य याच्ञायां कर्तृतयान्वयः। याच्ञायाः प्रयोज्यतया दाने तद्गोचरकर्तव्यत्वज्ञाने वान्वयः। दानं कर्तव्यत्वप्रकारकं ज्ञानं च खण्डशो धात्वर्थः। दानं विशेष्यितया कर्तव्यताज्ञानेऽन्वेति। प्रतिग्रहः स्वत्वमिच्छा चेति खण्डशश्चतुर्थ्यर्थः। स्वत्वमुद्देश्यितया इच्छायामन्वेति। कर्तृत्वमाधेयत्वं संसर्ग इच्छान्वयघटको बोध्यः। गोकर्मकत्वं दानेऽन्वेति।

तथा च विप्रसमवेतस्वत्वोद्देश्यताकेच्छाप्रयोज्यगोवृत्तिस्वत्वानुकूलस्वत्वध्वंसविशेष्यताककर्तव्यत्वप्रकारकज्ञानाश्रयो राजेत्यन्वयबोधः। प्रतिग्रहस्य याच्ञायाः गोविषयकत्वमर्थादवगम्यते। न ह्यन्यविषयकयाच्ञाप्रयोज्यं गोदानं भवति। कर्तव्यत्वप्रकारतानिरूपितविशेष्यता स्वत्वध्वंसे अर्थात् अवगम्यते। तत एव कर्तव्यत्वं स्वत्वध्वंसेऽवसीयते। प्रतिज्ञानं तथाध्यवसाय एव। अत एव ''देवदत्ताय गां प्रतिशृणोति प्रतिजानीत इत्यर्थ'' इति काशिका।

अन्यादृशक्रियागोचरकर्तव्यत्वाध्यवसायः प्रतिश्रवः। चतुर्थ्यास्तु अन्यादृशो व्यापारोऽर्थः। यथा ब्रह्मचारिणे शतपथब्राह्मणं प्रतिशृणोत्युपाध्यायः इत्यत्र आनु-

पूर्वीविशेषप्रकारकज्ञानस्य प्रतिपादकतासंसर्गेणार्थवत्त्वप्रकारकज्ञानस्य वानुकूलो व्यापारोऽध्यापनम्। तद्गोचरकर्तव्यत्वाध्यवसायः [च] प्रतिशृणोतेरर्थः। चतुर्थ्याः आनुपूर्वीविशेषार्थवत्त्वेन वा जिज्ञासा अर्थः। शतपथब्राह्मणविशेषितं विशेष्यित्वं तत्संबन्धावच्छिन्नाधेयत्वं वा द्वितीयार्थः फलीभूते ज्ञानेऽन्वेति। ज्ञानस्याध्यापन-फलस्याभ्युपगमफलत्वानपायात् जिज्ञासायाः प्रयोज्यतयाभ्युपगमेऽन्वयः। तथा च शतपथब्राह्मणविशेष्यताकस्य आनुपूर्वीविशेषप्रकारकस्य अर्थवत्त्वप्रकारकस्य वा ज्ञानस्यानुकूलो यो व्यापारः तद्गोचरो यो ब्रह्मचारिसमवेतजिज्ञासाप्रयोज्यः कर्तव्य-त्वाध्यवसायः तदाश्रय उपाध्याय इत्यन्वयबोधः। अभ्युपगमे फले ज्ञाने ब्रह्म-चारिसमवेतत्वमर्थात् प्रतीयते। यथाभ्युपगमे फले स्वत्वे विप्रनिरूपितत्त्वमिति। न ह्यन्यदीयजिज्ञासाप्रयोज्योऽभ्युपगमः अन्यदीयज्ञानफलकः, यथा विप्रयाच्ञा-प्रयोज्योऽभ्युपगमो न क्षत्रियादिस्वत्वफलक इति।

क्वचित् कर्तव्यत्वाध्यवसाय एव प्रतिश्रवः, प्रतिशृणोतेरर्थः, यत्र तद्विषयो धातुना पदान्तरेण वा प्रत्याय्यते। यथा अनुमाननिरूपणं शिष्याय प्रतिशृणोति इत्यत्र निरूपणं ल्युडन्तधात्वर्थः, तत्र प्रयोज्यतया शिष्यजिज्ञासाया अन्वय इति।

शतमागांसि सोढाहे सूनोस्त इति यत्त्वया।
प्रतीक्ष्यं तत्प्रतीक्ष्यायै पितृष्वस्रे प्रतिश्रुतम्।।

इत्यत्र त्वत्सूनुप्रयोज्यागःशतकर्मकभाविसहनकर्तृत्वमितिशब्दार्थः यच्छब्दार्थ-भिन्नप्रतिश्रवकर्मण्यभेदेनान्वेति। प्रतिश्रवोऽत्र कर्तव्यत्वाध्यवसायः तद्विशेष्य-स्तत्कर्म सहनकर्तृत्वे कर्तव्यत्वाध्यवसायः सहनमादाय पर्यवस्यति। आगोऽनिष्टा-चरणं सहनं तज्जन्यफलोपभोगः तद्विषयकद्वेषाभावो वा। द्वेषाभावे कर्तव्यत्वं क्षेमसाधारणं बोध्यम्। यथा मीमांसकानां कलञ्जभक्षणाभाव इति। चतुर्थ्यास्तु पुत्रगतानिष्टस्याचरणे द्वेषः, तथाविधाचरणाभावे इच्छा वा अर्थः पितृष्वसृविशेषितः कर्तव्यत्वाध्यवसाये प्रयोज्यतयान्वेतीति। एवमन्यत्राप्यूह्यम्।

भाट्टचिन्तामणौ[१]

प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता। आङ्प्रतिपूर्वकश्रुधातुसमभिव्याहारे धात्वर्थ-प्रतिज्ञाजनकयाचनकर्तुः संप्रदानत्वम्। "देवदत्ताय गामाश्रृणोति प्रतिश्रृणोति वा"। प्रतिश्रवणादिधात्वर्थेन व्याप्यमानत्वात् याचकस्य।

---

[१] पृ. १०१

भाट्टरहस्ये[१]

प्रत्यङ्भ्यां श्रुवः पूर्वस्य कर्ता इत्यनुशासनात् आभ्यामुपसर्गाभ्यां परस्य शृणोतेर्योगे पूर्वस्य प्रवर्तनरूपव्यापारस्य कर्ता संप्रदानसंज्ञः स्यात् इत्यर्थकात् "विप्राय गां प्रतिशृणोति" इत्यत्र चतुर्थी। प्रवर्तनापूर्वकोभ्युपगमो धात्वर्थः। वृत्तित्वं चतुर्थ्यर्थः। स च स्वाश्रयप्रवर्तनजन्याभ्युपगमानुकूलत्वसंसर्गेण भावनायामन्वेति। चैत्रनिष्ठप्रवर्तनप्रवर्तितः प्रतिजानीत इत्यर्थः।

अनुप्रतिगृणश्च[२] इति सूत्रार्थः

अनुप्रतिभ्यां परस्य गॄ शब्दे इति धातोः योगे पूर्वव्यापारस्य कर्तृभूतं कारकं संप्रदानसंज्ञं स्यात्। होत्रेऽनुगृणाति प्रतिगृणाति वा। होता प्रथमं शंसति, तमध्वर्युः प्रोत्साहयतीत्यर्थः। प्रोत्साहनं प्रति होतुः कर्मत्वं प्राप्तम्। पूर्वव्यापारं शंसनं प्रति कर्तृत्वात् होतुः संप्रदानत्वम्।

शब्दरत्ने[३]

शंसितुः शंसनविषयहर्षानुकूलव्यापारलक्षणं प्रोत्साहनं अनुगृणातिप्रतिगृणात्योरर्थः। शंसिता होता तत्कर्तृकं यत् शंसनं शस्त्राख्यसूक्तादिना इन्द्रादिनिष्ठगुणाभिधानं तद्विषयो यो हर्षः तदनुकूलो योऽध्वर्युनिष्ठो व्यापारः तद्रूपं प्रोत्साहनमित्यर्थः। अत्र शंसितुः प्रोत्साहनकर्मत्वात् द्वितीया प्राप्ता। तदपवादेन चतुर्थी विधीयते। अथ वा कर्मत्वापवादेन संप्रदानत्वं विधीयते।

"ओऽथ मोदै व" इति प्रतिगरमन्त्रः। ओ इति संबोधने। मोदै इति लोडुत्तमपुरुषैकवचनम्। व इत्येवकारार्थे। हे होतः। अथ त्वदीयशंसनानन्तरं तुष्याम्येवेति तदर्थः।

शब्दशक्तिप्रकाशिकायाम्[४]

"होत्रे प्रतिगृणाति" इत्यादौ हर्षानुकूलव्यापाररूपं प्रोत्साहनं गृणातेरर्थः। तदेकदेशे च हर्षे होत्रादेरन्वयः। तेन होतृनिष्ठहर्षानुकूलव्यापारवान् इत्याकारकस्तत्र बोधः।

---

[१] पृ. १२३
[२] सू. १.४.४१
[३] पृ. ९१३
[४] पृ. ३१०

पदवाक्यरत्नाकरे[१]

अनुगृणातेः प्रतिगृणातेश्च शंसनपूर्वकं प्रोत्साहनमर्थः। शंसनं कथनम्। प्रोत्साहनं हर्षानुकूलो व्यापारः। "होत्रेऽनुगृणात्यध्वर्युः प्रतिगृणाति वा" इत्यत्र चतुर्थ्याः वृत्तित्वमर्थः। तस्य शंसने हर्षे चान्वयः। तथा च होतृवृत्तिशंसनपूर्वकस्य होतृवृत्तिहर्षानुकूलस्य व्यापारस्य कर्ता अध्वर्युः इत्यन्वयबोधः।

विभक्त्यर्थनिर्णये[२]

अनुप्रतिपूर्वस्य गृणातेर्योगे चतुर्थीं ज्ञापयति "अनुप्रतिगृणश्च"[३] इति सूत्रम्। अनुपूर्वकस्य प्रतिपूर्वकस्य च गृणातेर्योगे तदर्थपूर्ववर्तिन्याः क्रियायाः कर्तृभूतं कारकं संप्रदानसंज्ञकं भवतीत्यर्थकम्। अनुगृणातेः प्रतिगृणातेश्च शंसनपूर्वकं प्रोत्साहनमर्थः। शंसनं कथनम्। प्रोत्साहनं हर्षानुकूलो व्यापारः। "होत्रे प्रतिगृणात्यनुगृणाति वा अध्वर्युः" इत्यत्र चतुर्थ्याः शंसने हर्षे चान्विता वृत्तिः (आधेयत्वम्) अर्थः। तथा च होतृवृत्तिशंसनपूर्वकस्य होतृवृत्तिहर्षानुकूलस्य व्यापारस्य कर्ता अध्वर्युरित्यन्वयबोध इति संप्रदायः।

वस्तुतस्तु शंसनपूर्वकतयोपलक्षितं प्रोत्साहनमनुगृणातेरर्थः। शंसनपूर्वकत्वं तु शंसनज्ञानसापेक्षज्ञानविषयत्वम्, तदुपलक्षितं स्वरूपसत्तत्संबन्धीत्यर्थः। यच्च काशिकायां — होत्रेऽनुगृणाति होता प्रथमं शंसति तमन्यः प्रोत्साहयतीत्युक्तम्। तत्र शंसने प्रथमत्वं न पूर्ववृत्तित्वं, किं तु पूर्वज्ञानविषयत्वम्। अत एवाग्रे काशिकायां — 'अनुगृण' इति 'प्रतिगृण' इति हि शंसितुः प्रोत्साहने वर्तत इत्युक्तम्, न तु प्राक्शंसितुरिति। प्रोत्साहनयुक्तमेव हर्षणम् अथ वा प्रोत्साहनानुकूलो व्यापारः उत्साहः अध्यवसायः, तत्र प्रकर्षः कर्तव्यत्वगोचरत्वम्। तेन कर्तव्यताध्यवसायानुकूलो व्यापार इति निष्कर्षः। प्रतिशृणोतेः तथाध्यवसायः व्यापारतया अस्य फलतया अर्थ इति पूर्वसूत्रार्थस्यैव तत्सूत्रार्थे प्रसङ्गसङ्गतिरप्यायाति। चतुर्थ्याः शंसनमर्थः। तस्य स्वज्ञानादिद्वारकप्रयोज्यतया हर्षणे विशेष्यितया कर्तव्यत्वाध्यवसाये वान्वयः। शंसने प्रकृत्यर्थस्य आधेयत्वलक्षणकर्तृतयान्वयः।

एवं च होत्रेऽनुगृह्णाति प्रतिगृह्णाति वा अध्वर्युः इत्यत्र होतृवृत्तिशंसनप्रयोज्यहर्षणाश्रयोऽध्वर्युः इत्यन्वयबोधः। अथ वा कर्तव्यत्वाध्यवसाये शंसनस्य सामानाधिकरण्येनाप्यन्वयः। सामानाधिकरण्यमेककालावच्छेदेनैकत्र वर्तमानत्वम्। तथा

---

[१] पृ. ७२३

[२] पृ. २९५

[३] सू. १.४.४१

च होतृवृत्तिशंसनस्य समानाधिकरणः तद्विशेष्यताकश्च यः कर्तव्यत्वप्रकारकाध्यवसायः तदनुकूलव्यापाराश्रयोऽध्वर्युरित्यन्वयबोधः। परंपरया शंसनफलकस्य हर्षणस्यापेक्षया साक्षात् शंसनफलकस्य कर्तव्यत्वाध्यवसायस्य धात्वर्थत्वमुचितम्।

न च हर्षणं न शंसनफलकमिति वाच्यम्। तथा सति हर्षकस्य व्यर्थव्यापारतया प्रमत्तत्वापत्तेः। एवं होत्रेऽनुगृणाति होतारं शंसन्तं प्रोत्साहयतीत्यर्थ इति काशिका लट्द्वयप्रयोगं दर्शयन्ती कालघटितसामानाधिकरण्येनान्वयं सूचयति। एवं निन्दकाय अनुगृणाति खल इत्यादावन्यत्रापीयं रीतिः बोध्या।

भाट्टचिन्तामणौ[१]

अनुप्रतिगृणश्च। प्रत्यनुपूर्वकगृणातेः समभिव्याहारे पूर्वशंसनादिकर्तुः होतुः संप्रदानत्वम्। अध्वर्युः होत्रेऽनुगृणाति प्रतिगृणातीति धातुलक्ष्यप्रोत्साहनव्याप्यमानत्वात् एवं च मुख्यैव चतुर्थी — इत्युक्तम्। अस्याभिप्रायो न स्पष्टः।

भाट्टरहस्ये[२]

"अनुप्रतिगृणश्च" इत्यनेन आभ्यां परस्य गृणातेर्योगे पूर्वव्यापारस्य कर्तृभूतं संप्रदानसंज्ञं स्यात् इत्यर्थकेन होत्रेऽनुगृणाति प्रतिगृणाति इत्यत्र चतुर्थी। शंसनपूर्वप्रोत्साहनं धात्वर्थः। वृत्तित्वरूपः संबन्धः कर्मत्वं च चतुर्थ्यर्थः। तयोश्च क्रमेण स्वाश्रयशंसनपूर्वकप्रोत्साहनानुकूलत्वसंबन्धेन, स्वकर्मकप्रोत्साहनानुकूलत्वसंबन्धेन च कृतावन्वयः। होतुवृत्ति यत् शंसनं तत्पूर्वकं यत् होतृकर्मकं प्रोत्साहनं तदनुकूला अध्वर्युनिष्ठा कृतिः इति बोधः। होता प्रथमं शंसति, तमध्वर्युः प्रोत्साहयतीत्यर्थः।

परिक्रयणे संप्रदानमन्यतरस्याम्[३] इति सूत्रार्थः

नियतकालं भृत्या स्वीकरणं परिक्रयणम्। तुभ्यमेतावत् वेतनं दीयते, तद्गृह्णन् एतावन्तं कालं त्वं मम कर्मकरो भव इत्येवं परिमितकालं भृत्या वेतनादिना स्वीकरणं परिक्रयणमिति यावत्। तस्मिन् परिक्रयणे साधकतमं कारकं संप्रदानसंज्ञं वा स्यात् इति सूत्रार्थः। "शतेन शताय वा क्रीत" इत्युदाहरणम्। सुवर्णादियत्किंचिद्द्रव्यशतकरणकं परिक्रयणमित्यर्थः। दानरूपव्यापारद्वारा कारणत्वात् शतस्य करणत्वम्। शब्दशक्तिप्रकाशिकायाम् — नास्त्येतत्सूत्रविचारः।

---

[१] पृ. १०१
[२] पृ. १२३
[३] सू. १.४.४४

पदवाक्यरत्नाकरे[1]

परिक्रयस्य करणे संप्रदानत्वमिष्यते।
नियम्य काले भृत्या यः स्वीकारः स परिक्रयः।।

भृतिः वेतनादि। तद्दानपूर्वको यः स्वत्वानुकूलो व्यापारः स क्रयः। स मासादिनियतकालावच्छेदेन एकत्र विद्यमानस्य स्वत्वस्य जनको यदि तदा परिक्रय इत्युच्यते। परिक्रयजन्यं स्वत्वं तत्रैव वस्तुनि मासमात्रमवस्थाय नश्यति, मासानन्तरं तु स्वत्वान्तरमुत्पद्यते। प्रतिमासं यत्र भृतिर्दीयते तदभिप्रायेणेदम्। यत्र तु वर्षादिकालावच्छिन्नत्वघटिता व्यवस्था तत्र प्रतिमासं भृतेरदानेऽपि व्यवस्थाबलादेव वर्षावच्छिन्नं स्वत्वमेकमेव। एवं च परिक्रये करणस्य भृतेः संप्रदानसंज्ञा विभाषया भवति। "शतेन शताय वा परिक्रीतो वृषः" इत्यत्र तृतीयाचतुर्थ्योः करणत्वमर्थः। स च स्वत्वेऽन्वेति। शतस्य स्वत्वजनकव्यापारवत्तया स्वत्वकरणत्वस्य अबाधात्। तथा च शतकरणकस्वत्वजनकः परिक्रय इति बोधः।

परे तु — भृतिदानजनितनियतकालकस्वत्वजनकपरिग्रहः परिक्रय इत्युच्यते। तत्र भृतौ तादात्म्येन शतस्यान्वयः। संसर्गतया लब्धस्य करणत्वस्य अनुवादिका तृतीया चतुर्थी वा, "ज्योतिष्टोमेन यजेत" इत्यादिवत् इत्याहुः।

विभक्त्यर्थनिर्णये[2]

परिक्रयार्थकधातुयोगे चतुर्थीं ज्ञापयति — "परिक्रयणे संप्रदानमन्य-तरस्याम्"[3] इति सूत्रम्। परिक्रयणे साधकतमं संप्रदानसंज्ञं भवतीत्यर्थकम्। अन्यतरस्यामित्यनेन करणसंज्ञकमपि तत् बोध्यते। वेतनदानादिपूर्वकः नियतकालावच्छेद्यस्वत्वानुकूलो व्यापारः परिक्रय इत्युच्यते। तत्र करणत्वार्थिका तृतीया चतुर्थी च भवति। "शताय शतेन वा परिक्रीतो वृषभ" इत्यत्र चतुर्थीतृतीययोः करणत्वं व्यापारोऽर्थः। स च व्यापारो दानं जन्यतया परिक्रयफले स्वत्वेऽन्वेति। तथा च शतदानजन्यस्य परिक्रयप्रयोज्यस्य स्वत्वस्य आश्रयाभिन्नो वृषभ इत्यन्वयबोधः। परिक्रयजन्यं च स्वत्वं तत्रैव वस्तुनि व्यवस्थितकालमवस्थाय नश्यति। व्यवस्थितकालानन्तरं तु स्वत्वान्तरमुत्पद्यते। अथ वा व्यवस्थावशादेकमेव स्वत्वं कालान्तरव्यापकं भवतीति संप्रदायः।

---

[1] पृ. ७२२
[2] पृ. २९७
[3] सू. १.४.४४

स्वतन्त्रास्तु — भृतिदानजन्यनियतकालकस्वत्वजनकः परिग्रहः परिक्रय इत्युच्यते। तत्र भृतौ तादात्म्येन शतस्यान्वयः। संसर्गतया लब्धकरणत्वस्यानुवादिका तृतीया चतुर्थी च "ज्योतिष्टोमेन यजेत" इत्यत्र तृतीयावत् इत्याहुः।

वस्तुतस्तु — भोगजनकनियतकालकस्वत्वफलको व्यापारः परिक्रयः। स च व्यापार इच्छैव। भृतिः शतादिका मासादिभोगव्यवस्थया गृहीता मासादिव्यापकं परकीयस्वत्वं जनयति। भृतिदानजनितस्वत्वं भोगं जनयति। न तु विक्रयदानादिकम्। परिक्रेतृकृतविक्रयदानादेरसिद्धेः। भोगस्य विक्रयो दानं च परिक्रेतुरपि संभवति।

एवं च "शतेन शताय वा परिक्रीतो वृषभ" इत्यत्र चतुर्थीतृतीययोः करणत्वं व्यापारोऽर्थः। स च व्यापारः परस्वत्वोपहितं दानं शतवृत्तिस्वत्वं प्रति तादात्म्येन शतस्य जनकत्वात् स्वत्वोपहिते दाने स्वत्वद्वारकं शतस्य जन्यत्वमिति शतव्यापारत्वमक्षतम्।

यदि च भाविदानेन परिक्रयव्यवहारो न गौणः तदा शतस्य स्वज्ञानद्वारकं दाने जन्यत्वमिति तद्व्यापारत्वं बोध्यम्। शतस्य जन्यतया कर्मतया च व्यापारे दाने, तस्य परिक्रयफले तथाविधस्वत्वेऽन्वयः। तत्रैव स्वत्वे परिक्रयव्यापारस्येच्छाया उद्देश्यत्वेनान्वयः। तस्य स्वत्वस्य कर्मक्तप्रत्ययार्थे आश्रयेऽन्वयः। यदि च परिक्रयकर्मणो विद्यमानतायामपि परिक्रयव्यवहारः तदा क्तप्रत्ययार्थो निरूपकम्। तत्रैव तस्य स्वत्वस्यान्वयः। तथा च शतजन्यतत्कर्मकदानजन्यस्येच्छोद्देश्यस्य भोगजनकनियतकालकस्वत्वस्याश्रयो निरूपको वा वृषभ इत्यन्वयबोधः।

यत्र व्यवस्थितकालकं न स्वत्वं भृतिशेषस्य प्रत्यर्पणेन परिक्रेयस्यापचारेण वा तत्र परिक्रयव्यवहारार्थं तथाविधस्वत्वोद्देश्यिकेच्छा परिक्रीणातेरभिधेयत्वेनोक्ता। नियतकालिकस्वत्वं प्रति तु भृतिदानं कारणम्। अत एव परिक्रयणं नियतकालं वेतनादिना स्वीकरणम्, नात्यन्तिकः क्रय एवेति काशिका। न चात्र वेतनादिजन्यनियतकालकस्वत्वानुकूलव्यापारः परिक्रीणातेरर्थः परिक्रय इति वाच्यम्। तथा सति नियतकालमित्युपादानवैयर्थ्यापत्तेः। वेतनदानादिजन्यस्वत्वस्यावश्यं नियतकालकत्वात्। "वेतनाय शताय वेतनेन शतेन वा परिक्रीत" इत्यादावनन्वयप्रसङ्गाच्च। भृतेः तच्छेषस्य वा प्रत्यर्पणं व्यवस्थितकालनाशो वा वेतनदानजन्यस्वत्वनाशं प्रति हेतुरित्यन्यत्र विस्तरः।

विभक्त्यर्थनिर्णये[1] कर्मणः करणसंज्ञेति वार्तिकव्याख्यानम्

यजतियोगे संप्रदानस्य कर्मत्वं बोधयति "कर्मणः करणसंज्ञा वक्तव्या संप्रदानस्य कर्मसंज्ञा" इति वार्तिकम्। कर्मणि द्वितीयायाः संप्रदाने चतुर्थ्याश्चापवादः। यजतियोगे करणसंज्ञाकर्मसंज्ञाविधानात्। "पशुना रुद्रं यजते" इत्यत्र यजतेः मन्त्रकरणकः स्वत्वध्वंसजनकस्त्यागोऽर्थः। यच्च काशिकायां — "पशुना रुद्रं यजते" पशुं रुद्राय ददातीत्यर्थ इति स्वत्वफलकत्यागार्थकददातिना यजतिविवरणं तत् त्यागरूपैकदेशार्थाभिप्रायेण। यथा उपेक्षावारणाय दादात्यर्थे स्वत्वफलकत्वं तथा यजत्यर्थे मन्त्रकरणकत्वं विशेषणम्। प्रकृते ददातिर्यजतिपर्याय एव। दैवानां विनियोगाभावात् स्वत्वाप्रसक्तेः। "देवस्वम्" इत्यादौ देवप्रीत्युद्देश्यकत्यागकर्मकत्वं देवस्वत्वं प्रतीयत इत्यन्यत्र विस्तरः।

तृतीयायाः कर्मत्वमाधेयत्वं स्वत्वध्वंसान्वय्यर्थः। चतुर्थ्याः प्रीतिरर्थः। तस्याः उद्देश्यितया त्यागेऽन्वयः। प्रीतौ प्रकृत्यर्थस्य समवेतत्वेन तदवच्छिन्नावच्छेदकतानिरूपकतया वा अन्वयः। तथा च शिवसमवेतप्रीत्युद्देश्यकः पशुनिष्ठस्वत्वध्वंसफलकः मन्त्रकरणकः त्यागः वाक्यार्थः।

यदि च शिवसमवेता प्रीतिरप्रसिद्धा तदा समवेतत्वसंसर्गावच्छिन्नस्वनिष्ठावच्छेदकतानिरूपकज्ञानविषयत्वसंबन्धेन प्रीतावन्वयः। शिवप्रीतिरिष्टसाधनमिति ज्ञानस्य प्रीतिनिष्ठविषयतायाः शिवनिष्ठावच्छेदकतानिरूपितत्वादिति। एवं च शिवनिष्ठावच्छेदकतानिरूपकज्ञानविषयप्रीत्युद्देश्यकः पशुनिष्ठस्वत्वध्वंसफलकः मन्त्रकरणकः त्यागो वाक्यार्थः।

भाट्टरहस्ये[2]

"परिक्रयणे संप्रदानमन्यतरस्याम्"[3] इत्यनेन यत् नियतकालं भृत्या स्वीकरणं परिक्रयणं, तस्मिन् साधकतमं कारकं विकल्पेन संप्रदानसंज्ञं स्यात् इत्यर्थकेन "शतेन शताय वा परिक्रीतः" इत्यत्र विकल्पेन चतुर्थी। करणत्वं चतुर्थ्यर्थः इत्युक्तम्।

[1] पृ. २९९
[2] पृ. १२३
[3] सू. १.४.४४

तादर्थ्ये चतुर्थी वाच्या[१] इति वार्तिकार्थः

"चतुर्थी संप्रदाने"[२] इति सूत्रे भाष्ये पठितमेतत्। तस्मै इदं तदर्थम्। अर्थेन नित्यसमासः। तदर्थस्य भावः तादर्थ्यम्। ब्राह्मणादित्वात् ष्यञ्। तेन चोपकार्योपकारकभावरूपसंबन्धो विवक्षितः। तत्र उपकार्यादेव चतुर्थी। भाष्ये यूपाय दारु कुण्डलाय हिरण्यम् इत्युदाहृतत्वात्। मुक्तये हरिं भजति। मुक्त्यर्थमित्यर्थः।

तस्मै कार्यायेदं तदर्थं कारणं, तस्य भावस्तादर्थ्यम्। ष्यञा उपकारकत्वरूपः संबन्धोऽभिधीयते। "कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेन" इति सिद्धान्तात्। उपकारकत्वं चानेकधा। तेन ब्राह्मणाय दधीत्यादावपि भवति इति प्रौढमनोरमा।

अनेकधेति। साक्षात् परंपरा चेत्यर्थः। "ब्रह्मणाय दधि" इत्यत्र ब्राह्मणभोजनोपकारकत्वेन ब्राह्मणोपकारकत्वं दध्नः इति शब्दरत्नम्।

ब्राह्मणायेति। एतेन यत्र प्रकृतिविकृतिभावः तत्रैवानेन वार्तिकेन चतुर्थीति वदन्तः परास्ताः इति भैरवी।

तादर्थ्यमुपकार्योपकारकभावरूपः संबन्धः। यदा तादर्थ्यस्य संबन्धत्वेन भानं तदा षष्ठी, "गुरोरिदं गुर्वर्थम्" इत्यत्र भाष्ये स्पष्टम्।

शब्दशक्तिप्रकाशिकायाम्[३]

"यूपाय दारु, रन्धनाय स्थाली" इत्यादौ यूपाद्यनुकूलत्वरूपं तादर्थ्यं दार्वादौ प्रत्याय्यते।

लघुमञ्जूषायाम्[४]

"विप्राय ओदनः" इत्यादौ तादर्थ्ये चतुर्थी। तादर्थ्यमुपकार्योपकारकभावः संबन्धः। विप्रोपकारक ओदनः। "विप्राय दधि" इत्यादौ विप्रकर्तृकभोजनोपकारके विप्रोपकारकत्वारोपात् विप्रोपकार्योपकारकं दधीति बोधः।

"मुक्तये हरिं भजति"। मुक्तिरूपोपकार्योपकारकं हरिकर्मकं भजनमिति बोधः। एवम् "अध्ययनाय वसति" इत्यादिष्वपि।

---

[१] वा. १४५८

[२] सू. २.३.१३

[३] पृ. ३७६

[४] पृ. १२७८

तादर्थ्यस्यापि संबन्धत्वेन विवक्षायां षष्ठ्येव, यथा गुरोरिदं गुर्वर्थमिति स्पष्टं भाष्ये। तादर्थ्यस्य हेतुत्वानुगतत्वेऽपि कारणवाचकान्न तृतीया। "कुण्डलाय हिरण्यम्" इत्यादौ कार्यवाचकात् उत्पद्यमानया चतुर्थ्यैव कारणगतसंबन्धस्य बोधनात्।

तस्मै इदं तदर्थम्। तच्छब्द उपकार्यवाची। इदमर्थउपकारकम्। तत्रोत्तरपदार्थस्य कारणरूपस्य ज्ञापनीयत्वेन प्राधान्यात् तच्छब्दवाच्ये गुणे संबन्ध उद्भूत इत्याहुः।

"सुखाय पुण्यम्, नरकाय पापम्" इत्यादि साध्वेव। (असाधु इति गदाधरभट्टाचार्याः)

तुमर्थघञन्ते "पाकाय याति" इत्यादौ घञा तादर्थ्यस्य उक्तत्वात् एतदप्राप्त्या "तुमर्थाच्च भाववचनात्"[1] इत्यारब्धम्।

व्युत्पत्तिवादे[2]

"यूपाय दारु" इत्यादौ न संप्रदाने चतुर्थी, अपि तु तादर्थ्ये सूत्रान्तरेण[3]। तादर्थ्यं च स एवार्थः प्रयोजनमस्य तत्त्वम्। तत्प्रयोजनकत्वमिति यावत्। समभिव्याहृतपदार्थे तादर्थ्यविवक्षायां तद्वाचकपदात् प्रयोजनवाचकपदात् चतुर्थी। प्रयोजनत्वं चात्र न जन्यत्वम्। दुःखादेः पापादिजन्यतया दुःखजनकत्वविवक्षया "दुःखाय पापम्" इति प्रयोगापत्तेः। नापि जन्यतयेच्छाविषयत्वम्, स्वर्गादेः पुण्यादिजन्यतयेच्छाविषयत्वात् "स्वर्गाय पुण्यम्" इत्यादिप्रयोगापत्तेः। न चेष्टापत्तिः। तथा सति 'पक्तुं व्रजति' इत्यर्थे "पाकाय व्रजति" इति प्रयोगनिर्वाहाय "तुमर्थाच्च भाववचनात्"[4] इति सूत्रप्रणयनवैयर्थ्यापत्तेः। पाकादेः निरुक्तव्रजनाद्यर्थतयैव तद्वाचकपदात् चतुर्थ्युपपत्तेः।

अपि तु समभिव्यहृतपदार्थनिष्ठव्यापारेच्छानुकूलेच्छाविषयत्वं तत्प्रयोजनकत्वम्। तत्प्रयोजनकत्वरूपतादर्थ्यं च तदिच्छाधीनेच्छाविषयव्यापाराश्रयत्वम्। "यूपाय दारु" इत्यत्र दारुणः यूपेच्छाधीनेच्छाविषयतक्षणादिरूपव्यापाराश्रयतया यूपार्थत्वमिति तद्विवक्षया यूपपदात् चतुर्थी। अधीनत्वं जन्यत्वम्। इच्छाधीनेच्छा-

---

[1] सू. २.३.१५
[2] पृ. २४४
[3] "तादर्थ्ये०" वा.१४५८
[4] सू. २.३.१५

विषयव्यापाराश्रयत्वं चतुर्थ्यर्थः। प्रथमेच्छायां यूपादेः प्रकृत्यर्थस्य विषयता-संबन्धेनान्वयः। यूपविषयकेच्छाजन्येच्छाविषयव्यापाराश्रयः दारु इत्यन्वयबोधः।

एवं "रन्धनाय स्थाली" इत्यादावूह्यम्। रन्धनं पाकः। तत्र व्यापारः तण्डुल-धारणादिः। रन्धनविषयकेच्छाधीनेच्छाविषयतण्डुलधारणादिव्यापाराश्रयः स्थाली इत्यन्वयबोधः।

पुण्यादेः स्वर्गेच्छाधीनेच्छाविषयव्यापारानाश्रयतया न स्वर्गाय पुण्यमित्यादि-प्रयोगः।

व्रजनादेः पाकानुकूलत्वेऽपि पाकानुकूलव्यापारानाश्रयतया "पाकाय व्रजति" इत्यादौ न तादर्थ्ये चतुर्थी। अतस्तत्र चतुर्थीसिद्ध्यर्थं तुमर्थाच्च भाववचनात् इति सूत्रम्।

"अश्वाय घासः" इत्यादौ अश्वपदस्य अश्वभोजनार्थो घास इति बोधात् तादर्थ्ये एव चतुर्थी।

पदवाक्यरत्नाकरे[१]

उपकारकता नाम तादर्थ्यं तस्य भूयसी।
विधा तादर्थ्यविहितचतुर्थ्या प्रतिपाद्यते।।

तादर्थ्ये चतुर्थी विहिता। तादर्थ्यं चोपकारकत्वम्। सोऽर्थो यस्येति बहुव्रीहेः तदर्थशब्दोत्तरः भावार्थकष्यञ्प्रत्ययः अर्थार्थवतोः संबन्धमभिधत्ते। "कृत्तद्धित-समासेभ्यः संबन्धाभिधानं भावप्रत्ययेन" इति हरेरनुशासनात्। अर्थार्थवतोश्चोप-कार्योपकारकभाव एव संबन्धः। उपकारकता च बहुविधा। क्वचित् कार्यकारण-भावः, "पटाय तन्तवः, घटाय दण्डः" इत्यादौ। क्वचित् तन्निष्ठोपकारजनकत्वम्। यथा "अश्वाय घासः, ब्राह्मणाय दधि" इत्यादौ। अत्र उपचायकरूपमुप-कारकत्वम्। क्वचित् तदपकारकत्वम्, यथा "मशकेभ्यो धूमः, हरिणाय वागुरा" इत्यादौ। तादर्थ्यप्रकाराः सर्वे कारणत्वोपकारकत्वानि यथायथं चतुर्थ्यर्थाः।

अपकारकत्वमपि चतुर्विधम्। नाशकत्वम्, अपचायकत्वम्, अनुत्पादकत्वं, दुःखजनकत्वं च। तत्राद्यं "तापायोशीरं, विषाय सुधा" इत्यादौ। द्वितीयं "दन्तिने नवबन्धः, जलाशयेभ्यः उष्णोपगमः" इत्यादौ। तृतीयं "दाहाय मणिः, नरकाय दीपदानम्" इत्यादौ। चतुर्थं "मशकेभ्यो धूमः, हरिणाय वागुरा" इत्यादाविति पदवाक्यरत्नाकरव्याख्यायाम्।

---

[१] पृ. ७३८

विभक्त्यर्थनिर्णये[१]

नामार्थान्वयिनः चतुर्थ्यर्थाः अकारकतया संज्ञायन्ते। तत्र "चतुर्थीविधाने तादर्थ्य उपसंख्यानम्"[२] इति वार्तिकं, चतुर्थ्याः तादर्थ्यमर्थं ज्ञापयति। तादर्थ्यं च नानाविधम्, सोऽर्थः यस्येति च विग्रहेण प्रतीयते। तत्र सोऽर्थ इत्यनेन जनकत्वं तस्यार्थ इत्यनेनोपकारकत्वमपकारकत्वं च। यथा "यूपाय दारु, कुण्डलाय हिरण्यम्" इत्यादौ चतुर्थ्या जनकत्वमर्थः। यूपस्य खण्डदारुणः नाशद्वारा महादारुजन्यत्वात् भुग्नसंयोगवतः कुण्डलपदार्थस्य हिरण्यजन्यत्वं सविशेषणे हीति न्यायेन भुग्नसंयोगमादाय पर्यवस्यति। यूपजनकं दारु, कुण्डलजनकं हिरण्यम् इत्यन्वयबोधः।

एवं "पटाय तन्तवः, घटाय दण्डः, रन्धनाय स्थाली" इत्यादावपि जनकत्वं चतुर्थ्यर्थः।

उपकारकत्वं द्विविधम् उपचायकत्वं, सुखजनकत्वं च। आद्यं यथा "अश्वाय यवघासः, काननाय वृष्टिः" इत्यादौ उपचायकत्वं चतुर्थ्यर्थः। द्वितीयं यथा "ब्राह्मणाय दधि, कामिने युवतिः" इत्यादौ सुखजनकत्वं चतुर्थ्यर्थः।

अपकारकत्वं चतुर्विधम् — अपचायकत्वम्, अनुत्पादकत्वं, नाशकत्वं, दुःखजनकत्वं चेति। तत्राद्यं यथा — "दन्तिने नवबन्धः, जलाशयेभ्यः उष्णोपगमः" इत्यादावपचायकत्वं चतुर्थ्यर्थः। द्वितीयं यथा — "दाहाय मणिः, नरकाय दीपदानम्" इत्यादावनुत्पादकत्वं चतुर्थ्यर्थः। तृतीयं यथा — "तापायोशीरं, विषाय सुधा, मोहाय तत्त्वज्ञानम्" इत्यादौ नाशकत्वं चतुर्थ्यर्थः। चतुर्थं यथा — "मशकेभ्यो धूमः, हरिणेभ्यो वागुरा" इत्यादौ दुःखजनकत्वं चतुर्थ्यर्थः।

भाट्टरहस्ये[३]

"तादर्थ्ये चतुर्थी वाच्या"[४] इति वार्तिकात् उपकारकापकारकसाधारणं तदुद्देश्यकत्वं लक्षणया चतुर्थ्यर्थः। "मुक्तये हरिं भजति, मशकाय धूमः" इत्यादौ। तदुद्देश्यकत्वं च जनकत्वादिना अनेकप्रकारेण। मुक्त्युद्देश्यकहरिकर्मकभजनानुकूला कृतिः। मुक्त्युद्देश्यकत्वं च मुक्तिजनकत्वम्। मशकोद्देश्यकधूमसत्ता। मशकोद्देश्यकत्वं च मशकनिवर्तकत्वम्। "ब्राह्मणाय दधि तिष्ठति" इत्यादावपि

---

[१] पृ. ३०७
[२] वा. १४५८
[३] पृ. १२३
[४] वा. १४५८

द्रव्यद्वारकक्रियासंबन्धेऽपि चतुर्थी। ब्राह्मणोद्देश्यकं यद्दधि तत्कर्तृका सत्ता इत्यादिरीत्या बोधः।

क्लृपि संपद्यमाने च[१] इति वार्तिकव्याख्यानम्

क्लृपीति सप्तमी। सम्पत्तिः विकारात्मना उत्पत्तिः। परिणाम इति यावत्। क्लृपि धातौ प्रयुज्यमाने सति सम्पद्यमानेऽर्थे वर्तमानात् चतुर्थी वाच्येत्यर्थः। "भक्तिः ज्ञानाय कल्पते"। ज्ञानात्मना परिणमते इत्यर्थः। क्लृपीत्यर्थग्रहणम्। तेन "भक्तिः ज्ञानाय जायते" इत्यपि उदाहरणम्।

प्रकृतिविकृत्योः भेदविवक्षायां विकृतिवाचकाच्चतुर्थी। अभेदविवक्षायां तु प्रथमैव 'भक्तिः ज्ञानं कल्पत' इति। यदा तु "जनिकर्तुः प्रकृतिः"[२] इति भक्तेः अपादानत्वं विवक्ष्यते तदा ज्ञानस्याभिहितकर्तृत्वात् प्रथमैव 'भक्तेः ज्ञानं कल्पत' इति।[३]

क्लृपीति सप्तमी। अर्थग्रहणं चात्र। संपत्तिः उत्पत्तिः। क्लृप्यर्थकधातुयोगे उत्पद्यमानेऽर्थे वर्तमानात् चतुर्थीत्यर्थः।[४]

लघुमञ्जूषायाम्[५]

"भक्तिर्ज्ञानाय कल्पते"। कृपेरुत्पत्तिरत्रार्थः। प्रथमाया अपवादोऽत्र। "क्लृपि संपद्यमाने च"[६] इत्यनेन विकारवाचकाच्चतुर्थी। विकारे च प्रकृतिरूपस्यारोपः। भक्तिरूपज्ञानकर्तृका उत्पत्तिः इति बोधः। भक्तिरत्र निदिध्यासनरूपा। प्रकृतिविकृत्योर्भेदविवक्षायां तु प्रकृतिविकृतिभावाप्रतीतेः "जनिकर्तुः०"[७] इत्यपादानत्वेन भक्तिपदात् पञ्चमी "भक्तेः ज्ञानं कल्पते" इति। ज्ञानस्य कर्तृत्वेन कारकविभक्तेर्बलवत्वेन च ततः प्रथमेति कैयटे स्पष्टम्।

"भक्तिः ज्ञानात्मना परिणमते" इत्यादावात्मशब्दः तद्वृत्तिधर्मपरः। ज्ञानत्वविशिष्टरूपान्तरप्राप्तिः भक्तिकर्तृकेत्यर्थः। अत्र प्रकृतिविकृतिभावाप्रतीतेर्न चतुर्थी, किं तु प्रकृत्यादित्वात् तृतीया।

---

[१] वा. १४५९
[२] सू. १.४.३०
[३] प्रौढमनोरमा.पृ. ९१५
[४] ल.श.शेखर.पृ. ६७८
[५] पृ. १२७९
[६] वा. १४५९
[७] सू. १.४.३०

विभक्त्यर्थनिर्णये[1]

"क्लृपि संपद्यमाने च चतुर्थी वक्तव्या"[2] इति वार्तिकं क्लृपियोगे संपद्यमानेऽर्थे चतुर्थी भवतीत्यर्थकम्। संपद्यमान इति भावे शानच्। "भक्तिः ज्ञानाय कल्पते" इत्यत्र चतुर्थ्याः संपत्तिरर्थः। सा चाधिक्यस्वरूपा प्रयोज्यतया भक्तिविषयके [कल्पने] तदर्थकत्वाध्यवसायस्वरूपेऽन्वेति। भक्त्यनन्तरं ज्ञानाधिक्यदर्शनेन भक्तेर्ज्ञानार्थकत्वाध्यवसायो भवतीति। यदि च कल्पनं कृतकसत्त्वम्, संपत्तिरधिकसत्त्वम्, तदा ज्ञानविशेषितस्याधिकसत्त्वस्य चतुर्थ्यर्थस्य प्रयोजकतया भक्तिवृत्तिकसत्त्वेऽन्वयः। अत एव सत्त्वरूपैकदेशार्थकतया संपदेः असतः सत्वार्थकजनेश्च क्लृपिपर्यायता। तथा च "भक्तिर्ज्ञानाय संपद्यते" इत्यत्र भक्तिसंपत्तौ "भक्तिर्ज्ञानाय जायते" इत्यत्र भक्त्युत्पत्तौ ज्ञानाधिकसत्त्वस्य तथान्वयः। अत एव क्लृपीत्यर्थनिर्देशः 'मूत्राय कल्पते संपद्यते जायते वा यवागूः' इति काशिका। कल्पनादौ धात्वर्थे चतुर्थ्यर्थस्य न कारकत्वम्। "मूत्रेभ्यो यवागूः" इत्यत्र मूत्राधिकसत्त्वप्रयोजकत्वं यवाग्वां धातुं विनापि प्रतीयते। क्लृपीति वार्तिकं तु बहुवचनं विनापि तथार्थः प्रतीयत इति ज्ञापनार्थमेव।

वस्तुतस्तु क्लृपीति वार्तिकं व्यर्थमेव। तादर्थ्यचतुर्थ्यैव दर्शितप्रयोगोपपत्तेः। "मूत्राय यवागूः" इत्यत्र विषयस्वभावादेव मूत्राधिक्यप्रयोजकत्वं यवाग्वां प्रतीयते, यतो मूत्रायौदनमिति न प्रयोगः।

उत्पातेन ज्ञापिते च[3] इत्यादिवार्तिकार्थः

अशुभसूचकः आकस्मिकः भूतविकारः उत्पातः। तेन सूचितेऽर्थे विद्यमानात् शब्दात् चतुर्थी वाच्येत्यर्थः। "वाताय कपिला विद्युत्" महावातस्य सूचिकेत्यर्थः।

"हितयोगे च"[4] चतुर्थी वाच्येति शेषः। "ब्राह्मणाय हितम्"। ब्राह्मणस्य सुखकृत् इत्यर्थः। याजनादिरिति शेषः।

प्राणिनां शुभाशुभसूचको भूतविकारः उत्पातः। तेन सूचिते अर्थे विद्यमानात् चतुर्थी वाच्येत्यर्थः। ज्ञाप्यज्ञापकभावश्चतुर्थ्यर्थः। वातरूपज्ञाप्यज्ञापिका कपिला विद्युत् इति बोधः।

---

[1] पृ. ३०८
[2] वा. १४५९
[3] वा. १४६०
[4] वा. १४६१

"विप्राय हितम्"। इष्टसाधनं हितपदार्थः। संबन्धश्चतुर्थ्यर्थः। विप्रसंबन्धि हितमिति बोधः। एवं सुखयोगेऽपि "विप्राय सुखम्" इत्यादौ — इति लघुमञ्जूषायाम्।[१]

शब्दशक्तिप्रकाशिकायाम्[२]

"चैत्रस्य सुखम्, मैत्राय हितम्" इत्यादित इव "चैत्राय सुखम्, मैत्राय हितम्" इत्यादितोऽपि चैत्रादिनिष्ठत्वेन सुखादेः बोधात् तत्राप्याधेयत्वं चतुर्थ्यर्थः इत्युक्तम्।

पदवाक्यरत्नाकरे[३]

चतुर्थ्यर्थो ज्ञापितत्वमुत्पातत्वोपलक्षिते।
गुणीभूतं भाति यथा वाताय कपिला तडित्।।

"वाताय कपिला तडित्" इत्यत्र वस्तुत उत्पातभूतायां तडिति वातविशेषितं ज्ञापकत्वं चतुर्थ्या प्रतिपाद्यते। वातविषयकज्ञानजनिका कपिला विद्युत् इति बोधः। उत्पातस्तु ज्योतिस्संहितायामुपलक्षिता दिव्यभौमान्तरिक्षा बहुविधाः। उत्पातत्वमपि वाक्यार्थबुद्धौ विषय इति पुनरप्रामाणिकम्।

धातुयोगे कारकविभक्तीनामिव उत्पातवाचिपदयोगे ज्ञापकत्वार्था चतुर्थी साधुः इति सूचयितुम् "उत्पातेन ज्ञापिते च"[४] इत्यनुशासने उत्पातग्रहणम्।

विभक्त्यर्थनिर्णये[५]

"उत्पातेन ज्ञाप्यमाने [ज्ञापिते च[६]]" इति वार्तिकम् उत्पातवाचिपदेन योगे ज्ञाप्यमानेऽर्थे चतुर्थी भवतीत्यर्थकम्। ज्ञाप्यमाने इति भावे लट्। उत्पातास्तु मयूरचित्रकादौ विद्युद्वैकृतादयो दर्शिताः। "वाताय कपिला विद्युत्" इत्यत्र ज्ञापनं ज्ञानजननं चतुर्थ्यर्थः। तच्च प्रयोजकतया कपिलविद्युत्यन्वेति।

वाताय कपिला विद्युदातपायातिलोहिनी।
पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्।।

अत्र पीता अधिकपीता बोध्या, अन्यथा नोत्पातत्वमिति। उत्पातत्वं तु नात्र शब्दविषयः न वा अनुगतमेकम्। अत उत्पातवृत्तिज्ञापकत्वं चतुर्थ्यर्थ इति नाशङ्कनीयम्। अत उत्पातो वातायेत्यपि न प्रयोगः। उत्पातपरिभाषाविषयतावच्छेदको

---

[१] पृ. १२८०
[२] पृ. ३७६
[३] पृ. ७४०
[४] वा. १४६०
[५] पृ. ३०९
[६] वा. १४६०

यो यो धर्मस्तत्तद्विशिष्टप्रतिपादकशब्दयोगे चतुर्थी ज्ञापनार्थिकेत्येव वार्तिकार्थः। एवं "रक्तोपरागो युद्धाय, महोल्कासंभवो राष्ट्रभङ्गाय" इत्यादावपि ज्ञापनार्थिका चतुर्थी बोध्या।

विभक्त्यर्थनिर्णये[१] हितयोगे चेति वार्तिकव्याख्या

"हितयोगे च"[२] इति वार्तिकं हितशब्दयोगे चतुर्थी भवतीत्यर्थकम्। कालान्तरभावीष्टस्य सुखदुःखाभावादेः साधनं हितम्। "युधिष्ठिराय हितः कृष्णः" इत्यत्र चतुर्थ्याः संबन्धोऽर्थः। स च संबन्धः सुखादावाधेयत्वं साधने स्वाधेयसुखादिनिरूप्यत्वम्। एवं च युधिष्ठिरवृत्तिसुखादिनिरूप्यं कालान्तरभाविसुखादिसाधनं कृष्ण इत्यन्वयबोधः। युधिष्ठिरवृत्तिसुखादिनिरूपितत्वस्य सुखादिसाधनेऽवगमे युधिष्ठिरवृत्तिसुखादिसाधनत्वमर्थत एवावसीयते।

एवम् "आमयाविने हितं भेषजम्" इत्यत्र दुःखाभावसाधनं हितशब्दार्थः। स्ववृत्तिदुःखाभावनिरूप्यत्वं साधनान्वय्यामयाविनः संबन्धश्चतुर्थ्यर्थः। आमयाविवृत्तिदुःखाभावनिरूप्यं दुःखाभावसाधनं भेषजमित्यन्वयबोधः। आमयाविवृत्तिदुःखाभावसाधनत्वस्य हितेऽवगमश्च आर्थः।

"चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः"[३] इति सूत्रेण आशंसाविषयहितयोगे षष्ठ्या सह वैकल्पिक्याश्चतुर्थ्या विधानेऽपि आसंशाविरहेऽपि चतुर्थीविधायकतया हितयोगे चेति वार्तिकस्य न वैयर्थ्यमिति।

भाट्टरहस्ये[४] क्लृपि संपद्यमाने चेत्यादिवार्तिकव्याख्या

"क्लृपि संपद्यमाने च"[५] इत्यनेन प्रकृतिरूपं कारणं कार्यात्मना यदा संपद्यते तदा कार्यवाचकात् चतुर्थी स्यात् क्लृप्त्यर्थधातुयोगे "मृत् घटाय कल्पते संपद्यते जायते वा" इत्यादौ मृत् घटाकारेण परिणमत इत्यर्थः। इदं च कार्यकारणयोः भेदविवक्षायाम्।

पार्ष्ठिकाभेदविवक्षायां "मृद् घटः कल्पते" इति प्रथमैव। "जनिकर्तुः प्रकृतिः"[६] इत्यनेन मृदोऽपादानत्वविवक्षायां तु "मृदो घटः कल्पते" इत्यत्र

---

[१] पृ. ३०९
[२] वा. १४६१
[३] सू. २.३.७३
[४] पृ. १२४
[५] वा. १४५९
[६] सू. १.४.३०

कारणे पञ्चमी। कार्ये तु अभिहितत्वात् प्रथमैव। न च "तादर्थ्ये चतुर्थी" इत्यनेन गतार्थत्वम्। परिणामत्वेन बोधस्य विवक्षितत्वात्। एवमग्रेऽपि।

तथा "उत्पातेन ज्ञापिते च"[१] इत्यनेन उत्पातेन ज्ञापनविषये चतुर्थी इत्यर्थकेन "वाताय कपिला विद्युत् विद्योतते" इत्यत्र चतुर्थी। तत्त्वेन ज्ञापकत्वं चतुर्थ्यर्थः। एवं हितसुखादियोगेऽपि चतुर्थी, "ब्राह्मणाय हितम्, सुखं वा" इत्यादौ। इदं च तद्योगे चतुर्थीसमासविधानरूपज्ञापकबलात् लभ्यते। संबन्धित्वं चतुर्थ्यर्थः।

क्रियार्थोपपदस्य कर्मणि स्थानिनः[२] इति सूत्रव्याख्यानम्

क्रिया अर्थः प्रयोजनं यस्याः सा क्रियार्था। क्रियेति विशेष्यम् अध्याहार्यम्। क्रियार्था क्रिया = क्रियाफलकक्रियावाचकं पदम्, उपपदं यस्य तस्य क्रियार्थोपपदस्य। तुमुनो विशेषणमेतत्। उपोच्चारितं पदमुपपदं तस्य। स्थानिन इत्यपि तुमुनो विशेषणम्। स्थानं प्रसक्तिरस्यास्तीति स्थानी तस्य। अप्रयुज्यमानस्येत्यर्थः। तथा च क्रियाफलकक्रियावचकधातूपपदस्य अप्रयुज्यमानस्य तुमुन्नन्तस्य कर्मणि चतुर्थी स्यादिति सूत्रार्थः। "फलेभ्यो याति" इत्युदाहरणम्। फलान्याहर्तुं यातीत्यर्थः। इह फलाहरणक्रियार्था यानक्रिया। तद्वाचके उपपदे आहर्तुमित्यध्याहारलभ्यतुमुन्नन्तार्थाहरणक्रियां प्रति फलानां कर्मत्वात् ततश्चतुर्थी। न च तादर्थ्यचतुर्थ्या गतार्थता शङ्कनीया। न हि यानक्रिया फलार्था, किं तु फलकर्मकाहरणक्रियार्था। अतो न फलेभ्यः तादर्थ्यचतुर्थीप्रसक्तिः। एवं च फलकर्मकाहरणक्रियार्था यानक्रियेति बोधः। कर्मणि द्वितीयायाः अपवादभूतेयं चतुर्थी। "नमस्कुर्मो नृसिंहाय"। नृसिंहमनुकूलयितुम् इत्यर्थः।

लघुशब्देन्दुशेखरे[३]

क्रिया अर्थः फलं यस्य तत् क्रियार्थम्। तेन स्ववाचकं लक्ष्यते। क्रियाफलकार्थवाचकमुपपदं यस्येत्यर्थः। सोऽर्थश्च प्रत्यासत्या क्रियारूप एव। स्थानिशब्दश्च अप्रयुज्यमानवाची वैयाकरणानां निकाये प्रसिद्धः। क्रियाफलकक्रियोपपदत्वं च तुमुनादेरेव। "फलेभ्यो याति" इत्यादौ फलकर्मकाहरणफलकं यानमिति बोधः। यथा वाक्यार्थे वाक्यैकदेशप्रयोगस्थले "प्रविश पिण्डीम्" इत्यादौ।

---

[१] वा. १४६०

[२] सू. २.३.१४

[३] पृ. ६७८

तस्यैव पदस्य सम्पूर्णवाक्यार्थशक्तता तथास्य समुदायस्य आहरणघटितोक्तार्थे शक्तिः एतच्छास्त्रबलात्। स्थानिन इत्युक्तेः तुमुन्नन्तप्रयोगे नेति बोध्यम्। अयमेवार्थाध्याहारः।

"नमस्कुर्मो नृसिंहाय" इति। "नमः स्वस्ति०"[१] इत्यनेन तु न सिद्धिः। "उपपदविभक्तेः कारकविभक्तिर्बलीयसी" इति न्यायेन द्वितीयाविभक्त्यापत्तेः। मञ्जूषायामेतत्सूत्रव्याख्यानं न कृतम्।

शब्दशक्तिप्रकाशिकायाम्[२]

"फलेभ्यो व्रजति" इत्यादेः फलान्याहर्तुं व्रजति इत्यादिसमानार्थकत्वानुरोधात् तत्र फलकर्मकाहरणेच्छाद्यधीनत्वं फलाद्युत्तरचतुर्थ्या व्रजनादौ बोध्यते इत्युक्तम्।

व्युत्पत्तिवादे[३]

एधानाहर्तुं व्रजतीत्यर्थे "एधेभ्यो व्रजति" इत्यत्र एधस्य न व्रजनप्रयोजनत्वम्। सिद्धत्वेन व्रजनानुकूलेच्छाया अविषयत्वात्, व्रजनस्य तदनुकूलव्यापारानाश्रयत्वाच्चेति न "तादर्थ्ये०"[४] इति वार्तिकस्य प्रवृत्तिः, नापि "तुमर्थात्०"[५] इत्यादेः। एधपदस्य क्रियारूपभाववचनत्वाभावात्। अतस्तत्र "क्रियार्थोपपदस्य०"[६] इति चतुर्थी। तदर्थश्च क्रियार्थोपपदः तुमुन्नन्तो यो धातुः अप्रयुक्तः तस्य यत् कर्म = तत्प्रयोगं विना तदर्थकर्मतया यद्विवक्षितं तद्वाचकात् चतुर्थीति। तत्र च आहर्तुमिति तुमुन्नन्तार्थः समभिव्याहृतक्रियान्वयिद्वितीयार्थकर्मत्वान्वयि आहरणम्। तादृशार्थकर्मतया एधस्य विवक्षितत्वात् तत्र चतुर्थी। चतुर्थ्याः तत्कर्मकाहरणप्रयोजनकत्वमर्थः। एधकर्मकाहरणप्रयोजनकव्रजनानुकूलकृतिमान् इति बोधः।

पदवाक्यरत्नाकरे[७]

अध्याहृततुमन्तस्य धातोः कर्मानुशंसति।
फलेभ्यो गच्छतीत्यादौ चतुर्थी व्याक्रियोदिता।।

---

[१] सू. २.३.१६
[२] पृ. ३७८
[३] पृ. २४५
[४] वा. १४५८
[५] सू. २.३.१५
[६] सू. २.३.१४
[७] पृ. ७३७

व्याक्रिया व्याकरणम्। विद्यते तावत् "क्रियार्थोपपदस्य च कर्मणि स्थानिनः"[1] इति क्रियान्तरगुणीभूतक्रियावाचकधातुप्रकृतिकस्य तुमुनः स्थानिनः नित्यमप्रयुज्यमानस्य कर्मणि चतुर्थी स्यादित्यर्थिका व्याक्रिया। "फलेभ्यो गच्छति" इत्यत्र आहर्तुमित्यध्याहृतम्, तत्कर्माभिधायिनी चतुर्थी। तथा च फलकर्मकाहरणप्रयोजनकं गमनं वाक्यार्थः।

एवं "स्वयंभुवे नमस्कृत्य" इत्यत्रापि प्रीणयितुमित्यध्याह्रियते। स्वयंभुवं प्रीणयितुं नमस्कृत्येत्यन्वयबोधः।

विभक्त्यर्थनिर्णये[2]

"क्रियार्थोपपदस्य च कर्मणि स्थानिनः"[3] इति सूत्रम्। क्रिया क्रियार्था उपपदं यस्य स क्रियार्थोपपदः तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थीविभक्तिर्भवतीत्यर्थकम्। "तुमुण्वुलौ क्रियायां क्रियार्थायाम्"[4] इति सूत्रेण क्रियायाः क्रियार्थत्वे तुमुनो विधानात् तदुपपदत्वं व्यक्तम्। क्रियायाः क्रियार्थत्वं फलविधया क्रियाप्रयोजकत्वम्, यथा "अन्नं भोक्तुं व्रजति" इत्यत्र अन्नभोजनफलस्य गमनप्रयोजकत्वम्। तुमुनः फलज्ञानद्वारकप्रयोज्यत्वमर्थः। तथा चान्नकर्मकभोजनप्रयोज्यं गमनमिति वाक्यार्थः। तुमुन ईदृशार्थकत्वे गमने भोजनासंपत्तावपि न दर्शितप्रयोगस्याप्रामाण्यम्। एवं "भोक्तुम्" इति तुमुन्नन्तस्याप्रयोगे भोजनकर्मान्नवाचकशब्दात् चतुर्थी भवति। तथा च "अन्नाय ओदनाय वा व्रजति" इत्यत्र चतुर्थ्याः भोजनं ज्ञानद्वारकमिच्छाद्वारकं वा प्रयोज्यत्वं चार्थः। प्रकृत्यर्थस्यान्नस्य कर्मतासंसर्गेण भोजने तस्य निरूपकतया प्रयोज्यत्वे तस्य स्वरूपेण गमनेऽन्वय इत्यन्नकर्मकभोजनप्रयोज्यगमनं वाक्यार्थः।

एवं "फलान्याहर्तुं वनं याति" इत्यत्र 'फलेभ्यो वनं याति' इति प्रयोगः। तत्र फलाहरणप्रयोज्यं वनकर्मकगमनं वाक्यार्थः। 'नृसिंहं प्रीणयितुं नमस्कुर्मः' इत्यत्र "नमस्कुर्मो नृसिंहाय"इति प्रयोगः। तत्र नृसिंहप्रीणनप्रयोज्यो नमस्कारो वाक्यार्थः। 'पटमुत्पादयितुं यतत' इत्यत्र "पटाय यतते" इति प्रयोगः। तत्र पटोत्पादप्रयोज्यो यत्नो वाक्यार्थः। न चात्र विषयत्वं चतुर्थ्यर्थः। पटविषयताको यत्नो वाक्यार्थ इति वाच्यम्। चतुर्थ्या विषयत्वार्थकत्वे अनुशासनविरहात्। विषयत्वसामान्यस्य

---

[1] सू. २.३.१४
[2] पृ. ३०१
[3] सू. २.३.१४
[4] सू. ३.३.१०

तदर्थत्वे 'पटत्वाय यतत' इति प्रयोगापत्तेः। साध्यत्वस्य तथात्वे पटार्थतन्तुसाधने 'पटाय यतत' इति प्रयोगानुपपत्तेः। उद्देश्यत्वस्य तथात्वे 'स्वर्गकामो गङ्गास्नानाय यतते' इति प्रयोगानुपपत्तेः। न चात्र तादर्थ्यविधानात् चतुर्थ्या जनकत्वमर्थः। पटजनको यत्नो वाक्यार्थ इति वाच्यम्। तथा सति तन्तुसाधने पटानुत्पादे 'पटाय यतते' इति प्रयोगस्याप्रामाण्यापत्तेः।

क्रियार्थोपपदस्येत्युक्त्या "प्रविश पिण्डीम्" इत्यत्र न चतुर्थी। भक्षेरत्र स्थानित्वात्। कर्मणीत्युक्त्या "फलेभ्यो गच्छति शकटेन" इत्यत्र करणे न चतुर्थी।

"फलेभ्यो गच्छति" इत्यत्र आहर्तुमित्यध्याहृतम्। तत्र आहरणान्वयि कर्मत्वं चतुर्थ्यर्थः। फलकर्मकाहरणार्थकं गमनं वाक्यार्थ इत्यपि वदन्ति।

भाट्टरहस्ये[१]

"क्रियार्थोपपदस्य च कर्मणि स्थानिनः"[२] इत्यनेन क्रियावाचि उपपदं यस्य तस्य स्थानिनः तुमुन्ण्वुलूपस्याप्रयुज्यमानस्य कर्मणि चतुर्थी स्यात् इत्यर्थकेन "फलेभ्यो याति" "नमस्कुर्मो नृसिंहाय" इत्यादौ चतुर्थी। फलान्याहर्तुं याति, नृसिंहमनुकूलयितुं नमस्कुर्म इत्यर्थः। इदं च तुमुन्नन्तस्याप्रयोगे। ण्वुलन्तस्य अप्रयोगे तु फलान्याहारक इत्यर्थः। द्वितीयापवादार्थं कर्मग्रहणम्। प्रयुज्यमाने तु तुमुन्नन्ते द्वितीयैव। अत्राप्रयुज्यमानाहरणनिरूपितं कर्मत्वं चतुर्थ्यर्थः। तस्य च स्वनिरूपकाहरणक्रियोद्देश्यकयानानुकूलत्वसंबन्धेन कृतावन्वयः। उक्तसंबन्धेन फलनिष्ठकर्मत्वविशिष्टा कृतिः इति बोधः। अशाब्दस्य आहरणस्य संसर्गघटकतया भानम् इत्युपपादितम्।

तुमर्थाच्च भाववचनात्[३] इति सूत्रव्याख्यानम्

"भाववचनाश्च"[४] इति सूत्रेण यो विहितस्तदन्ताच्चतुर्थी स्यात्। "यागाय याति"। अस्य विवरणम् — "तुमुल्ण्वुलौ क्रियायां क्रियार्थायाम्"[५] इति सूत्रेण क्रियार्थायां क्रियायामुपपदभूतायां भविष्यति काले तुमुन्ण्वुलौ विधीयेते। "भोक्तुं व्रजति, भोजको व्रजति" इत्युदाहरणे। भविष्यद्भुजिक्रियार्थो व्रजतिः अत्रोपपदम्। एतत्सूत्रविहितस्य तुमुनः अर्थ इवार्थो यस्य स तुमर्थः, तस्मात् इति विग्रहः। भावः

---

[१] पृ. १२८
[२] सू. २.३.१४
[३] सू. २.३.१५
[४] सू. ३.३.११
[५] सू. ३.३.१०

क्रिया, उच्यतेऽनेनेति वचनः। भावस्य वचनः भाववचनः तस्मादिति विग्रहः। क्रियावाचिनः इति यावत्। प्रत्ययादिति शेषः। तत्र "अव्ययकृतो भावे" (इति वचनाद्भावे तुमुन् इति बा.म.[१]) इति तुमुनः भाव एव विहितत्वेन तुमर्थकस्य प्रत्ययस्य भाववचनत्वे सिद्धे पुनः भाववचनग्रहणं सूत्रविशेषपरिग्रहार्थमित्याह — भाववचनाश्चेति। "भावे"[२] इत्यधिकृत्य ये घञादिप्रत्यया विहिताः ते क्रियार्थ-क्रियायामुपपदभूतायां भविष्यति स्युरिति तदर्थः। "यागाय याति" इत्युदाहरणम्। यागफलकं यानमिति बोधः। एवं च क्रियार्थत्वलाभार्थं तुमर्थादिति विशेषणम्।

अत्र तादर्थ्यस्य तुमुनेव घञा द्योतितत्वात् "उक्तार्थानामप्रयोग" इति न्यायेन तादर्थ्यचतुर्थ्या अप्राप्तौ प्रथमायाः प्राप्तौ इदं वचनम्।

तुमर्थादिति किम्। 'पाकः त्यागः' इत्यादौ घञो "भावे" इत्यधिकारस्थत्वेऽपि न चतुर्थी। क्रियाफलकक्रियोपपदकत्वाभावेन तुमर्थकत्वाभावात्।

भाववचनादिति किम्। "पाचको व्रजति"। पक्तुं व्रजतीत्यर्थः। "तुमुन्ण्वुलौ०"[३] इति ण्वुल्। तस्य तुमर्थकत्वेऽपि भावे इत्यधिकारे विध्यभावान्न चतुर्थी। तादर्थ्यस्य ण्वुलैवोक्तत्वात् न तादर्थ्यचतुर्थी, किं तु प्रथमैव।

शब्दशक्तिप्रकाशिकायाम्[४]

"पाकाय व्रजति" इत्यादौ पाकाद्युद्देश्यकत्वं पाकादीच्छाधीनत्वरूपं व्रजनादौ भासते। भावकृदन्तात् तुमर्थे चतुर्थ्यनुशासनात्। अत एव परपाकार्थं गच्छत्यपि पुरुषे "पक्तुं व्रजति" इत्यादिक इव 'पाकाय व्रजति' इत्यादिको न प्रयोगः। समानकर्तृकत्वस्यापि तुमर्थेऽन्तर्भावात्।

व्युत्पत्तिवादे[५]

तुमुन्नन्तधातुना यादृशोऽर्थः प्रत्याय्यते, समभिव्याहृतक्रियान्विततदर्थपरात् तद्धातुघटितभावकृदन्तात् चतुर्थीति "तुमर्थाच्च भाववचनात्"[६] इति सूत्रार्थः। "पक्तुं व्रजति" इत्यत्र तुमुन्नन्तेन व्रजने पाकविषयकेच्छाधीनेच्छाविषयत्वं बोध्यते।

---

[१] सू. ३.३.१०
[२] सू. ३. ३.१८
[३] सू. ३.३.१०
[४] पृ. ३७६
[५] पृ. २४४
[६] सू. २.३.१५

"तुमुल्ण्वुलौ०"[1] इति सूत्रेण समभिव्याहृतक्रियायां प्रकृतक्रियासमानकर्तृकत्व-सहिततदिच्छाधीनेच्छाविषयत्वरूपतदर्थकत्वेन विवक्षितायां तुमुल्ण्वुलोर्विधानात्। तथा च "पाकाय व्रजति" इति वाक्यात् पाकसमानकर्तृकपाकेच्छाधीनेच्छाविषय-व्रजनानुकूलकृतिमानिति बोधः।

पदवाक्यरत्नाकरे[2]

तुमर्थाद्भाववचनादिति सूत्रेण साधिता।
चतुर्थी तुल्यकर्तृत्वमुद्देश्यत्वं च शंसति।।

"तुमर्थाच्च भाववचनात्"[3] इति सूत्रेण विहिता चतुर्थी तुमर्थावभिधत्ते। तुमर्थस्तु तुल्यकर्तृकत्वं तदुद्देश्यत्वं च। "पक्तुं गच्छति" इत्यत्र पाकतुल्यकर्तृका पाको-द्देश्यका गमनक्रिया वाक्यार्थः।

शाब्दिकास्तु

"भाववचनाश्च"[4] इति सूत्रेण भावे विहिता घञादयः क्रियार्थायां क्रियायां विधीयन्ते। ततश्च तादर्थ्यस्य घञा प्राप्तत्वात् प्रातिपदिकार्थमात्रे प्रथमा प्रसक्ता। तदपवादाय "तुमर्थाच्च भाववचनात्"[5] इति चतुर्थी अनुशिष्यते।

एतेन भावघञन्तात् पाकादिशब्दात् तादर्थ्यचतुर्थ्या 'पाकाय गच्छति' इत्यादि-प्रयोगोपपत्तेः "तुमर्थात्०" इत्यनुशासनमनर्थकमित्यपास्तम्।

नन्वेवमपि भाववचनानां तादर्थ्यार्थकत्वविधायकमनुशासनमेव व्यर्थम्। भाव-घञन्तात् तादर्थ्यचतुर्थ्यैव पाकाय व्रजतीत्यादिप्रयोगोपपत्तेरिति चेत् — न।

क्रियायाः क्रियान्तरतादर्थ्यविवक्षायां विशेषविहितेन तुमुना घञोऽपवादात् पाकायेत्यस्यानुपपत्त्या घञो विशेषविध्यन्तरावश्यकत्वादित्याहुः।

विभक्त्यर्थनिर्णये[6]

भावकृदन्तात् प्रातिपदिकात् चतुर्थी ज्ञापयति "तुमर्थाच्च भाववचनात्"[1] इति सूत्रम्। तुमर्थाः क्रियार्थक्रियार्थकाः ये भाववचनाः भावप्रत्यया घञादयः तदन्तात्

---

[1] सू. ३.३.१०
[2] पृ. ७३९
[3] सू. २.३.१५
[4] सू. ३.३.११
[5] सू. २.३.१५
[6] पृ. ३०२

प्रातिपदिकात् चतुर्थी भवतीत्यर्थकम्। "पाकाय गच्छति" इत्यत्र चतुर्थ्याः तुमर्थोऽर्थः। तुमर्थस्तु "पक्तुं व्रजति" इत्यत्र समानकर्तृकत्वमुद्देश्यत्वं च। तथा च समानकर्तृकं पाकोद्देश्यकं गमनं वाक्यार्थ इति वदन्ति।

शाब्दिकास्तु — "भाववचनाश्च"[2] इति सूत्रेण घञादीनां भावप्रत्ययानां क्रियार्थत्वं प्रत्याय्यते। तच्च पूर्ववत् फलस्य ज्ञानेनेच्छया वा द्वारा प्रयोजकत्वम्। तथा च घञः प्रयोज्यत्वमर्थः। तच्च गमनेऽन्वेति। तत्र पाकादिशब्दात् द्वितीयादि-प्रसक्तिविरहेण प्रथमप्राप्ततया प्रथमा प्राप्ता। तदपवादाय साधुत्वार्था चतुर्थी अनुशिष्यते। "पाकाय गच्छति" इत्यत्र पाकप्रयोज्यं गमनं वाक्यार्थः।

एतेन भावघञन्तात् तादर्थ्यचतुर्थ्यैव "पाकाय व्रजति" इति प्रयोगोपपत्त्या तुमर्थादिति भाववचनाच्चेति च अनुशासनद्वयं व्यर्थमिति निरस्तम्।

क्रियायाः क्रियान्तरार्थत्वे विशेषतस्तुमुनो विधानेन घञोऽप्रवृत्तेः भाववचना-श्चेत्यस्यात एव क्रियायाः क्रियान्तरार्थत्वस्य तादर्थ्यविरहेण तादर्थ्यचतुर्थ्यप्रसक्त्या प्रथमापवादकचतुर्थीविधायकस्य तुमर्थादित्यस्य च सार्थक्यसंभवादित्याहुः।

वस्तुतस्तु भाववचनाश्चेति सूत्रं तुमर्थादित्यत्र भाववचनादिग्रहणं चेच्छादिस्वरूपे तुमर्थे चतुर्थीप्रसक्तिवारणार्थमेव। 'पाकाय' इत्यत्र सुब्विभक्तेः प्रातिपदिकप्रकृति-कतया घञादिविरहे चतुर्थ्यानुपपत्तेः इति भावः। एवं घञादिप्रयोज्यत्वं च फलज्ञानादिद्वारकं पूर्ववत् बोध्यम्। एवं "पाकाय व्रजति, भोजनाय प्रविशति, मुक्तयेऽधीते" इत्यत्र पाकप्रयोज्यं गमनं भोजनप्रयोज्यः प्रवेशः मुक्तिप्रयोज्य-मध्ययनं च वाक्यार्थः। भावे विहिता घञ्ल्युट्क्तिन्प्रभृतिप्रत्ययाः तदन्तेभ्यः चतुर्थी-विधायकं भाववचनादिति ग्रहणम्। "पाचको व्रजति" इत्यत्र क्रियार्थण्वुल्प्रयोगे चतुर्थीं निषेधति। चतुर्थ्याः क्रियार्थत्वसूचनार्थं तुमर्थादितिग्रहणं चतुर्थ्यास्तथार्थ-कत्वार्थकमेव। घञादीनां तथार्थकत्वज्ञापकं भाववचनाच्च इति सूत्रम्, न घञादीनां भाववचनानां क्रियार्थत्वसंकेतग्राहकम्। क्रियार्थोपपदस्येति सूत्रेण चतुर्थ्याः क्रिया-र्थत्वसंकेतकल्पनायाः आवश्यकत्वे तत एवात्र उपपत्तौ घञादिभाववचनानां तथा संकेतकल्पनायाः व्यर्थत्वादिति।

"अह्ना क्रोशेन वा अनुवाकोऽधीत" इत्यत्राधिकरणस्य तृतीयार्थात्यन्त-संयोगस्येव क्रियामात्रान्वयितया चतुर्थ्यर्थे क्रियार्थत्वस्य करणस्य कारकत्वमिति।

---

[1] सू. २.३.१५
[2] सू. ३.३.११

भाट्टरहस्ये[१]

"तुमर्थाच्च भाववचनात्"[२] इति सूत्रेण "भाववचनाश्च"[३] इति सूत्रविहितो यस्तुमुना समानार्थकः प्रत्ययः तदन्ताच्चतुर्थी स्यादित्यर्थकेन "यागाय याति" इत्यादौ चतुर्थी। यष्टुं यातीति तदर्थः। स च प्रकृते घञ्। न च "तादर्थ्ये चतुर्थी" इत्यनेन गतार्थत्वम्। तुमुनेव तादर्थ्यस्यापि घञा उक्ततया साधुत्वार्थं प्रथमातिक्रमे कारणाभावेन प्रथमाप्राप्तौ चतुर्थीविधानासार्थक्यात्।

न च शुद्धे भावे एव घञं व्युत्पाद्य ततस्तादर्थ्यचतुर्थ्युपपत्तेः भाववचनाश्चेति सूत्रवैयर्थ्यमिति वाच्यम्। क्रियार्थायां क्रियायां विशेषविहितेन तुमुना घञो बाधापत्तेः तदन्तोपरि तादर्थ्यचतुर्थ्यप्रसक्तेः। अतस्तदबाधार्थं चतुर्थीविधिसार्थक्यात्।

नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च[४] इति सूत्रार्थः

एभिर्योगे चतुर्थी स्यात्। युज्यत इति योगः। कर्मणि घञ्। नमः स्वस्त्यादिभिर्युक्तात् चतुर्थी स्यादित्यर्थः। "हरये नमः"। न च तादर्थ्यचतुर्थ्या गतार्थत्वम् इति वाच्यम्। तादर्थ्यस्य शेषत्वविवक्षायां षष्ठीनिवारणार्थत्वादस्य सूत्रस्य। तादर्थ्यं हि उपकार्योपकारकभावः। तस्य यदा संबन्धत्वेन भानं तदा षष्ठी, यथा गुरोरिदं गुर्वर्थमिति भाष्ये स्पष्टम्। एवं च नमःस्वस्त्यादियोगे तादर्थ्यस्य शेषत्वविवक्षायामपि चतुर्थ्येवेत्येतदर्थमिदं सूत्रम्।

उपपदविभक्तेः कारकविभक्तिर्बलीयसी

"नमस्करोति देवान्"। पदान्तरयोगनिमित्तिका विभक्तिः उपपदविभक्तिः। तदपेक्षया कारकविभक्तिः बलीयसीत्यर्थः।

"अन्तरान्तरेण युक्ते"[५] इति सूत्रे भाष्ये पठितमिदं वचनम्। न्यायसिद्धमेतत्। क्रियाकारकयोर्हि संबन्धः अन्तरङ्गः। उपपदार्थेन तु यत्किंचित्क्रियाकारकभावमूलकः संबन्ध इति तन्निमित्ता विभक्तिर्बहिरङ्गेति कैयटः।

---

[१] पृ. १२४
[२] सू. २.३.१५
[३] सू. ३.३.११
[४] सू. २.३.१६
[५] सू. २.३.४

अन्ये तु उपपदविभक्त्या संबन्धसामान्यमवगम्यते, विशेषावगमस्तु प्रकरणादि-पर्यालोचनया लभ्यः। कारकविभक्त्या तु कर्मत्वादिसंबन्धविशेषः झटित्येवावगम्यत इति सा बलीयसीत्याहुः।

"नमस्करोति देवान्"। करशिरस्संयोगादिना तोषयति इत्यर्थः। करशिरस्संयोगादिमात्रार्थकत्वे अकर्मकत्वापातात्।

"प्रजाभ्यः स्वस्ति" — प्रजासंबन्धि कुशलमित्यर्थः।

"अग्नये स्वाहा" — अग्न्युद्देश्यकं द्रव्यदानमित्यर्थः

"पितृभ्यः स्वधा" — पित्रुद्देश्यकं द्रव्यदानमित्यर्थः।

अलमिति पर्यायग्रहणम्। तेन "दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त" इत्यादि। प्रभ्वादियोगे षष्ठ्यपि साधुः, "तस्मै प्रभवति संतापादिभ्यः"[1] "स एषां ग्रामणीः"[2] इति निर्देशात्। तेन "प्रभुर्बुभूषुर्भुवनत्रयस्य" इति सिद्धम्।

"वषडिन्द्राय" — इन्द्रोद्देश्यकं द्रव्यदानमित्यर्थः।

चकारः पुनर्विधानार्थः। तेन आशीर्विवक्षायां परामपि "चतुर्थी चाशिषि०"[3] इति षष्ठीं बाधित्वा चतुर्थ्यैव भवति। "स्वस्ति गोभ्यो भूयात्"।

लघुमञ्जूषायाम्[4]

"हरये नमः" — अपकृष्टत्वज्ञानबोधनानुकूलो व्यापारः स्वरादिपठितनमः पदार्थः। तत्रापकर्षः प्रयोक्तृपुरुषनिष्ठः नमस्कार्यावधिक एव प्रतीयते। व्यापारश्च प्रयोक्तृनिष्ठः प्रतीयते, शब्दशक्तिस्वभावात्। अन्योच्चरितेन नमःशब्देनान्यदीयनतेरबोधनात्। स च व्यापारः करशिरस्संयोगादिः ईदृशशब्दप्रयोगश्च। चतुर्थ्या उद्देश्यत्वमर्थः। एवं च हर्युद्देश्यकः अपकृष्टत्वज्ञानबोधनानुकूलो व्यापार इति बोधः।

"एषोऽर्घ्यः शिवाय नमः" इत्यादौ त्यागो नमःशब्दार्थः। त्यागश्च स्वस्वत्वनिवृत्त्यनुकूलो व्यापारः। उद्देश्यत्वं चतुर्थ्यर्थः। शिवोद्देश्यकत्यागविषयोऽर्घ्य इति बोधः। उद्देश्यत्वं विषयताविशेषरूपम्। त्यागश्च वेदबोधितोद्देश्यकत्वस्वप्रयोग (नमः शब्दप्रयोग) कर्तृकर्तृकत्वोपरक्त एव प्रतीयते, शब्दशक्तिस्वभावात्। अन्योच्चरितनमःशब्देनान्यदीयद्रव्यत्यागस्याप्रतीतेः।

---

[1] सू. ५.१.१०१
[2] सू. ५.२.७८
[3] सू. २.३.७३
[4] पृ. १२८०-१२८४

ऋत्विग्भिश्च यजमानीयतत्तद्द्रव्ये स्वीयत्वमारोप्यैव नमःशब्दः प्रयुज्यते। वेद-बोधितेत्युक्तेः न नीचोद्देश्यके त्यागे नमःशब्दप्रयोगः। अहंममेत्यभिमानरहितानां शिवादीनां द्रव्ये स्वत्वाभावेऽपि "शिवस्वं न प्रतिगृह्णीयात्" इत्यादेः शिवोद्देशेन त्यक्तमित्यर्थो बोध्यः। संप्रदानचतुर्थी तु अत्र न। नमःशब्दार्थस्य क्रिया-त्वाभावात्। उद्देश्यत्वसंबन्धेन विवक्षायां षष्ठ्यपि।

नमस्करोति देवान् — अत्र "उपपदविभक्तेः कारकविभक्तिर्बलीयसी"[१] इति न्यायात् कर्मणि द्वितीया। अत्रायं नमश्शब्दो निपातः द्योतकः। अपकृष्टत्वज्ञान-बोधानुकूलो व्यापारः कृधातोरेवार्थ। स्वविषयविषयावधित्वसमानाधिकरणसम-वायरूपेण फलतावच्छेदकसंबन्धेन स्वनिष्ठापकृष्टत्वज्ञानबोधरूपफलाश्रयत्वात् देवानां कर्मत्वम्। [स्वम्-अपकृष्टत्वज्ञानबोधः तद्विषयः अपकृष्टत्वज्ञानं तद्विषयः अपकृष्टत्वं तदवधित्वं देवेषु, एवं तादृशबोधसमवायश्च देवेषु इति अवधित्व-समवाययोः एकाधिकरणवृत्तित्वरूपं सामानाधिकरण्यम्। तथा च स्वविषयविष-यावधित्वसमानाधिकरणसमवायसंबन्धेन अपकृष्टत्वज्ञानबोधरूपफलाश्रयत्वं देवा-नाम्। द्वितीयस्वपदं नमस्कर्तृपरम्।] तटस्थस्य प्रेक्षितुः स्वविषयावधित्वविरहात् न कर्मता। न चात्र नमःशाब्दार्थान्वयाभावेनोपपदविभक्तेः कथं प्राप्तिरिति वाच्यम्। नमःशब्दद्योत्यार्थान्वयमात्रेण तत्प्राप्तेः।

यदा तु अत्रापि नमःशब्दस्य वाचकत्वं तदा चतुर्थ्येव। तेन "नमस्कुर्मो नृसिंहाय" इति सिद्धम्।

"प्रजाभ्यः स्वस्ति" इत्यादौ स्वस्तिशब्दस्य मङ्गलमर्थः। चतुर्थ्याः संबन्धोऽर्थः। प्रजासंबन्धि मङ्गलमिति बोधः।

मङ्गलाशंसास्थले "स्वस्त्यस्तु गोभ्यः" इत्यादौ स्वस्तिशब्दार्थे एवान्वयेन चतुर्थ्येव। गोसंबन्धिमङ्गलकर्तृकम् आशंसाविषयो भवनमिति बोधः।

यत्तु स्वस्तिशब्दस्य आशीः इत्यर्थः। आशीर्नाम परहितेच्छा। हितान्वयी संबन्धश्चतुर्थ्यः। प्रजासंबन्धिहितविषयिणी इच्छा इति बोध इति। तन्न। "स्वस्ति ब्राह्मणेभ्यो भूयात्" इत्यादौ स्वस्तिशब्देनैव आशिषोऽभिधानात् "उक्तार्था-नामप्रयोगः" इति न्यायेन भूयात् इत्याशीर्लिङः प्रयोगानुपपत्तेः।

न च "द्वौ ब्राह्मणौ" इत्यादौ उक्तार्थत्वेऽपि शब्दद्वयसमुच्चयस्य दृष्टत्वादत्रापि तथास्तु इति वाच्यम्। एवमपि शूद्रे आशिषोऽभावेन स्वस्ति वृषलायेत्यादौ चतुर्थ्यनापत्तेश्च। शूद्रे आशीर्वचनरूपप्रत्यभिवादाभावेन अशूद्र इति प्रतिषेधो न

[१] परि. १०३, सू. २.३.१६

विधेय इति "प्रत्यभिवादेऽशूद्रे"[1] इति सूत्रे भाष्यकारैरुक्तत्वात्। तत्र स्वस्तिशब्दो मङ्गलार्थः। मङ्गलमङ्गीकार इति उभयार्थकत्वस्यैव तत्र प्रामाणिकैरुक्तत्वात्। स्वाहास्वधावषट्शब्दाः त्यागार्थकनमःशब्देन व्याख्याताः।

दैत्येभ्यो हरिरलं, प्रभुः समर्थः। अलमाद्यर्थः सामर्थ्यवान्। मारणादिसंबन्धित्व-रूपः संबन्धश्चतुर्थ्यर्थः। दैत्यमारणादिसम्बन्धिसामर्थ्यवानिति बोधः।

शब्दशक्तिप्रकाशिकायाम्[2]

"पुष्पमिदं विष्णवे नम" इत्यस्य विष्णुप्रीत्युद्देश्यकमन्त्रकरणकत्यागस्य कर्मेदं पुष्पमित्यर्थः। तत्र चतुर्थ्याः प्रीत्युद्देश्यकत्वमर्थः। प्रीत्युद्देश्यकत्वं नाम प्रीतीच्छाधी-नत्वम्। तस्याश्रयतासंबन्धेन नमःपदार्थे मन्त्रकरणकत्यागेऽन्वयः। चतुर्थीप्रकृत्यर्थस्य विष्णोः प्रीतौ आधेयतासंबन्धेनान्वयः। विष्णुनिष्ठप्रीतिच्छाधीनमन्त्रकरणकत्याग-कर्म पुष्पमिति बोधः। 'विष्णोः प्रीतिर्भवतु' इतीच्छया यः मन्त्रकरणकः त्यागः तत्कर्म पुष्पमिति यावत्। त्यागे मन्त्रकरणकेति विशेषणात् "गौः इयं ब्राह्मणाय नमः" इति न प्रयोगः। ब्राह्मणप्रीत्युद्देश्यकस्य गवादित्यागस्य मन्त्रकरणकत्वे प्रमाणाभावात्।

"ब्राह्मणेभ्यो नमो नित्यम्" इत्यादौ तु नमःपदार्थो नतिः। नतिर्नाम स्वावधि-कोत्कर्षप्रकारकज्ञानानुकूलव्यापारः। तदेकदेशे ज्ञाने चतुर्थ्यर्थस्य विषयस्यान्वयः। ब्राह्मणविशेष्यकं यत् स्वावधिकोत्कर्षप्रकारकं ज्ञानं तदनुकूलो व्यापार इति बोधः।

"पुष्पमिदं परमात्मने नमः" इत्यादौ परमात्मनः प्रीत्यसत्त्वेऽपि तत्प्रीतित्व-प्रकारकेच्छायाः संभवान्न परमात्मप्रीत्युद्देश्यकत्वाप्रसिद्धिः।

स्वस्वकरणको हविस्त्यागः स्वधास्वाहाशब्दयोः अर्थः। स्वं स्वं = स्वधाशब्दः स्वाहाशब्दश्च। "पित्रे स्वधा, अग्नये स्वाहा" इत्यादौ पित्रुद्देश्यकस्य स्वधापदकरण-कस्य हविस्त्यागस्य कर्म, अग्न्युद्देश्यकस्य स्वाहापदकरणकस्य हविस्त्यागस्य कर्म इति बोधः।

पैतृके त्यागे स्वाहादेः, दैविके च स्वधादेः न करणत्वं तद्ग्राहकप्रमाणाभावात्। अतः 'पित्रे स्वाहा, अग्नये स्वधा' इति न प्रयोगः।

"वषडिन्द्राय" इत्यत्र इन्द्रोद्देश्यकमन्त्रकरणकहविस्त्यागस्य कर्म इदमिति बोधः।

---

[1] सू. ८.२.८३
[2] पृ. ३७५

"स्वस्ति प्रजाभ्यः" इत्यादेः प्रजानिष्ठं कुशलमित्यर्थः। स्वस्तिशब्दस्य कुशलवाचित्वात्। कुशलस्य आशंसास्थले तु "स्वस्त्यस्तु प्रजाभ्यः" इतिवत् स्वस्त्यस्तु प्रजानामित्यपि प्रमाणम्। "आशंस्यैर्धनकुशलायुष्यार्थैर्योगे चतुर्थी वा" इति भागुरिस्मृतेः इत्यपि वदन्ति।

"सुखायालं समर्थो योग्यं वा भोजनम्" इत्यादौ अलमादिपदार्थैकदेशे सामर्थ्ये सुखादिनिरूपितत्वं चतुर्थ्या बोध्यते। सुखनिरूपितसामर्थ्यवत् भोजनमिति बोधः। "अलमनेन" इत्यादौ वैफल्यमेवालंपदस्यार्थो न तु सामर्थ्यम्।

व्युत्पत्तिवादोक्तरीत्या नमः आदिशब्दयोगे चतुर्थीविचारः[१]

नमःस्वस्त्यादिशब्दयोगेऽपि तदर्थविशेषणवाचकपदात् "नमः स्वस्ति" इत्यनेन चतुर्थी अनुशिष्यते। नमःशब्दस्यार्थः त्यागो नमस्कारश्च। "एषोऽर्घ्यः शिवाय नमः" इत्यादौ नमःशब्दस्य त्यागोऽर्थः। चतुर्थ्याः त्यागनिरूपितमुद्देश्यत्वमर्थः। त्यागश्च यदि शिवस्यायं भवतु इत्यादिफलेच्छाधीनस्वस्वत्वाभावेच्छारूपः तदा उद्देश्यत्वं त्यागजनकेच्छायाः स्वत्वभागितया विषयत्वरूपम्। स्वस्वत्वाभावविषयकेच्छाजनकेच्छानिरूपितस्वत्वभागित्वावच्छिन्नविषयतारूपमिति यावत्। यदि च त्यागरूपा इच्छैव स्वस्वत्वाभावमिव अन्यदीयत्वेन त्यज्यमानगतं स्वत्वमपि तत्र विषयीकरोति, "शिवस्येदं न मम" इति इच्छायाः आकारः। शिवनिरूपितस्वत्ववत् मन्निरूपितस्वत्वाभाववच्चेदमिति तदर्थः इत्युच्यते, तदा स्वत्वभागितया त्यागविषयत्वमेव त्यागोद्देश्यत्वं न तु त्यागजनकेच्छाविषयत्वम्। शिवादेः विग्रहवत्तामतेऽपि स्वीकाराभावात्, तदाकारतया ध्यातमन्त्रस्य त्यागोद्देश्यतामते सुतरां

तदभावाच्च त्यज्यमानोपचारादौ (पूजाद्रव्यनैवेद्यादौ) शिवनिरूपितस्वत्वाभावेऽपि शिवनिरूपितत्वेन द्रव्यनिष्ठं स्वत्वमवगाहमाना इच्छा विसंवादिरूपैव। तदभाववति तत्प्रकारकत्वं विसंवादित्वम्। सा चेच्छा द्रव्यनिष्ठेऽन्यनिरूपितस्वत्वे बाधितं शिवनिरूपितत्वं, शिवनिरूपितप्रसिद्धस्वत्वान्तरे वा बाधितं तत्तद्रव्यसंबन्धमवगाहते।

तत्र प्रथमकल्पे — स्वत्वप्रकारकेच्छाजन्यत्वं, जन्यतासंबन्धेन तादृशेच्छावत्त्वं वा चतुर्थ्यर्थः। तत्र प्रकृत्यर्थस्य शिवादेः विषयताविशेषसंबन्धेनान्वयः (विषयताविशेषः विशेष्यता)। नमःपदार्थस्य त्यागस्य विषयताविशेषसंबन्धेन द्रव्ये अन्वयः। अर्घ्यः पूजाद्रव्यादि। तथा च शिवविशेष्यकस्वत्वप्रकारकेच्छाजन्यस्वस्वत्वाभावप्रकारकेच्छाविषयः पूजाद्रव्यम् इति बोधः। अथ वा त्यागरूपेच्छायां

---

[१] पृ. २४५-२४८

द्रव्यस्य विषयिताविशेष(विशेष्यित्व) संबन्धेनान्वयः। द्रव्यविशेष्यक उक्तविधत्याग इति बोधः।

द्वितीयकल्पे — विषयिताविशेषश्चतुर्थ्यर्थः। तत्र निरूपितत्वसंबन्धेन शिवस्यान्वयः। विषयित्वस्याश्रयत्वसंबन्धेन त्यागेऽन्वयः। शिवविशेष्यकः यः स्वस्वत्वाभावविशिष्टपरस्वत्वप्रकारकेच्छारूपः त्यागः तद्विषयः द्रव्यमिति वा द्रव्यविषयकः उक्तस्त्याग इति वा बोधः।

न च नमःशब्दार्थत्यागविशेष्यकबोधाङ्गीकारे शाब्दबोधस्य प्रथमान्तार्थमुख्यविशेष्यकत्वनियमभङ्ग इति वाच्यम्। "भूतले न घटः" इत्यादौ भूतलनिरूपिताधेयतावान् घटाभाव इत्याकारकस्य निपातार्थमुख्यविशेष्यकबोधस्य स्वीकारेण प्रथमान्तार्थस्यैव शाब्दबोधे मुख्यविशेष्यतया भानमिति नियमाभावात्।

नमःपदेन स्वप्रयोक्तृपुरुषकर्तृकत्वोपरक्तः त्यागः अभिधीयते। अन्योच्चरितनमःपदेनान्यदीयत्यागाबोधनात्। तेन पुरुषेणोच्चरितात् नमःपदात् त्यागबोधे सति, त्यागे त्यज्यमानद्रव्ये वा अन्यदीयत्वसंशयानुदयाच्च। अत एव त्यागे तत्पुरुषीयत्वबोधनाय "अहं ददे" इत्यादिवत् 'अहं नम' इति न प्रयुज्यते, न वा परकीयत्वबोधनाय नम इत्यादि। ऋत्विजा च यजमानरूपपुरुषान्तरीयतत्तद्द्रव्यत्यागे स्वीयत्वमारोप्यैव पूजायां नमःपदं प्रयुज्यते। स चारोपस्तस्य विशेषदर्शनदशायामपि (एतद्द्रव्यत्यागः न मदीय इति ज्ञानदशायामपि) आहार्यत्वेन उपपद्यते। प्रतिनिधिना प्रयुक्तस्य दानवाक्यस्य यथा बाधितार्थकत्वेऽपि अदृष्टजनकत्वं, तथा ऋत्विक्प्रयुक्तस्य नमः पदघटितवाक्यस्य बाधितार्थकत्वेऽपि अदृष्टजनकत्वं न विरुद्धम्। अस्मच्छब्दादिवत् स्वोच्चारणकर्तृत्वोपलक्षितपुरुषविशेषवाचकात् नमःपदात् विशेषरूपेण पुरुषस्य भानम्। अशक्यस्य चैत्रत्वादेर्भानासंभवे तस्यापि वाच्येऽन्तर्भावः स्वीकरणीयः। तदनुगमकं चोपलक्षणीभूतम् एककालीनोभयावृत्ति - उच्चारयितृशरीरवृत्तिजातित्वम्। चैत्रत्वादिजातिर्हि बाल्यावस्थामारभ्य वृद्धावस्थापर्यन्तम् उपचयापचयाभ्यां भिन्नेषु तत्तच्छरीरेषु युगपदनवस्थितेषु अवतिष्ठते।

शक्त्यैक्यं कथंचिदुपपादनीयम्, सर्वनामशक्त्यैक्यवत्। तथा हि नमःपदं नमःपदविशिष्टं भवतु इतीच्छारूपा नमःपदशक्तिः। वैशिष्ट्यं च स्वतादात्म्यस्वोच्चारयितृवृत्त्येककालिकशरीरद्वयावृत्तिजातित्वसमानाधिकरणावच्छेदकतानिरूपितावच्छिन्नत्वसंबन्धावच्छिन्नशरीरनिष्ठावच्छेदकतानिरूपितात्मनिष्ठाधेयत्वसंबन्धावच्छिन्नप्रकारतानिरूपितत्यगनिष्ठविशेष्यताकबोधजनकत्वोभयसंबन्धेन। एवं च स्वत्वस्य संबन्धघटकत्वान्नाननुगमः। चैत्रादौ नमःपदोच्चारयितृत्वग्रहे नमःपदशक्यत्वस्य

शरीरवृत्तिचैत्रत्वादिजातिविशेषविशिष्टावच्छिन्नात्मवृत्तित्यागादौ सुग्रहतया ततस्तेन रूपेण बोधस्यापि संभवादिति बच्चाझाशर्माणः प्राहुरिति प्रकाशकाराः प्राहुः।

उपलक्षणशरीरप्रविष्टमुच्चारणं वेदबोधिततत्वेन विशेषणीयम्। अतः पूजाभिन्न-यादृच्छिकान्नत्यागबोधनाय "अन्नं दीयते" इतिवत् 'अन्नं नमः' इति न प्रयोगः। एवं च वेदबोधितस्वोच्चारणकर्तृपुरुषकर्तृकत्यागः नमःशब्दार्थः। अन्नादौ नमः पदोच्चारणस्य वेदाबोधिततत्वात् वेदबोधितोच्चारणकर्तृत्वरूपोपलक्षणाभावात् अन्नादौ न नमःपदप्रयोग इति।

"इन्द्राय स्वाहा, पितृभ्यः स्वधा" इत्यादौ अग्निप्रक्षेपोपहितदेवोद्देश्यकत्याग-बोधकस्वाहापदपित्रुद्देश्यकत्यागबोधकस्वधापदयोरपि नमःपदवत् विधिबोधितो-च्चारणकर्तृत्वोपलक्षितपुरुषीयत्यागवाचकता। अन्यथा यादृच्छिकान्नत्यागबोधनाय "अन्नं दीयते" इतिवत् 'अन्नं स्वाहा, अन्नं स्वधा' इति च न प्रयोगः प्रसज्येत।

नतिरूपो नमःपदार्थश्च स्वापकर्षबोधानुकूलः स्वीयव्यापारः। चतुर्थ्याः अप-कर्षान्वयि अवधित्वम् अवधिमत्त्वं वा अर्थः। स्वं नमःपदोच्चारयिता। तथा च चैत्रोच्चारितात् "नमो हरये" इत्यादिवाक्यात् हर्यवधिकचैत्रगतापकर्षविषयक-बोधानुकूलः चैत्रीयो व्यापारः इत्याकारको बोधो भवति।

"नारायणं नमस्कृत्य" इत्यादौ नमःशब्दयोगेऽपि न चतुर्थी। कारक-विभक्तित्वेन बलीयस्या द्वितीयया बाधात्।

अथात्र नारायणादेः नमस्कारघटको योऽपकर्षः तदवधित्वमेव न कर्मत्वम्। कर्मत्वं च क्रियाजन्यफलशालित्वादिरूपमेव। तच्च न नारायणादेः इति द्वितीया-विभक्तेः नात्र योग्यता।

न चापकर्षबोधरूपफलाश्रयत्वात्मकं कर्मत्वं नारायणस्याबाधितमिति तद्विव-वक्षया द्वितीयोपपत्तिरिति वाच्यम्। एवं सति नारायणावधिकापकर्षबोधजनक-प्रणिपातादिना नारायणस्येव तत्र स्थितस्य पुरुषान्तरस्यापि अपकर्षबोधरूप-फलजननात् तादृशबोधरूपफलाश्रयस्य पुरुषस्यापि कर्मत्वापत्त्या "पुरुषं नमस्क-रोति" इति प्रयोगापत्तेः।

यदि च अपकर्षावधित्वप्रकारकबोधानुकूलो व्यापारः नमस्कारः, तद्धटक-बोधविशेष्यतया नारायणस्य कर्मत्वम्। क्रियाजन्यफलशालित्वरूपे कर्मत्वे च व्यापारांशेऽनुकूलतासंबन्धेन विशेषणीभूतं फलमेव विवक्षणीयम्। अत्र चानु-कूलत्वमेव व्यापारांशे विशेषणमिति अपकर्षावधित्वबोद्धुः पुरुषान्तरस्य न कर्मता। न चोक्तबोधरूपफलस्य समवायेन पुरुषान्तरेऽपि सत्त्वात् तस्य कुतो न

कर्मतेति वाच्यम्। फलतावच्छेदकसंबन्धेन फलाश्रयत्वस्य विवक्षिततया समवायस्य अत्र फलतानवच्छेदकत्वात् विशेष्यताया एव फलतावच्छेदकत्वात् इत्युच्यते।

तदापि 'नारायणं प्रणम्य' इत्यादावेव कर्मत्वमुपपद्यते, न तु 'नारायणं नमस्कृत्य' इत्यादौ। नमःपदार्थघटकज्ञानस्य धात्वर्थताविरहेण तद्विशेष्यतायाः कर्मतानात्मकत्वात्। न च "घटं करोति" इत्यादौ घटादेः कृञर्थकृतिकर्मत्वमिव अत्रापि नारायणस्य नमःपदोत्तरकृञर्थकृतिकर्मत्वं भविष्यतीति वाच्यम्। कृतिविषयतायाः नमःपदार्थव्यापार एव सत्त्वेन नारायणे विरहात्।

अत्रोच्यते। 'नमस्करोति' इत्यादौ कृधातुनैव व्यापारबोधात् स्वापकर्षावधित्वप्रकारकबोधविषयतामात्रं नम इति निपातस्यार्थः। स्वं समभिव्याहृतः कर्ता। द्वितीयायाः आधेयत्वमर्थः। तस्य बोधविषयतायां नमःशब्दार्थेऽन्वयः। बोधविषयतायाः अनुकूलत्वरूपप्रयोजकतासंबन्धेन कृधात्वर्थव्यापारेऽन्वयः। तथा च नारायणनिष्ठा या स्वापकर्षावधित्वप्रकारकबोधविषयता (विशेष्यता) तत्प्रयोजकव्यापारानुकूलकृतिमान् इत्यन्वयबोधः। तादृशविषयताश्रयतया नारायणस्य कर्मत्वम्।

न च तादृशबोधविषयतायाः धात्वर्थतानवच्छेदकत्वात् कथं तदाश्रयस्य कर्मत्वम्? धात्वर्थतावच्छेदकफलाश्रयत्वस्यैव कर्मत्वरूपत्वादिति वाच्यम्। कर्मत्वशरीरप्रविष्टं हि धात्वर्थतावच्छेदकत्वं न धातुशक्यतावच्छेदकत्वम्, अपि तु व्यापाररूपे धात्वर्थेऽनुकूलतासंबन्धेन विशेषणतया धातुजन्यबोधविषयत्वम्। तच्च बोधविषयतायामक्षतमिति तदाश्रयस्य कर्मत्वोपपत्तेः।

एवं च नारायणादेः करोतिकर्मत्वेऽपि नमःपदादिकं विना न कृधातुयोगे नारायणपदोत्तरं द्वितीया। तदर्थाधेयत्वान्वयिफलोपस्थापकपदाभावेन तदर्थानन्वयात्।

नापि 'नारायणं फलं करोति' इति प्रयोगापत्तिः। फलस्यात्र द्वितीयार्थविशेषणत्वेन धात्वर्थव्यापारे साक्षात् विशेषणत्वाभावात्। धात्वर्थव्यापारे साक्षाद्विशेषणीभवत्येव फले द्वितीयार्थाधेयत्वान्वय इति व्युत्पत्तेः।

"पुरस्कृत्य शिखण्डिनम्" इत्यत्र पुरःपदस्य अग्रदेशावस्थानमर्थः। तस्यानुकूलतासंबन्धेन कृञर्थव्यापारेऽन्वयः। अग्रदेशावस्थानरूपफलाश्रयतया शिखण्डिनः कर्मत्वम्। शिखण्डिनिष्ठं यत् अग्रदेशावस्थानं तदनुकूलो व्यापार इति बोधः।

"नारायणो नमस्क्रियते, ज्यायान् पुरस्क्रियते" इत्यादौ निपातार्थफलं धात्वर्थव्यापारं प्रति विशेष्यतया भासते। फलान्वितमाश्रयत्वं कर्माख्यातेन प्रतिपाद्यते।

देवदत्तनिष्ठकृतिजन्यव्यापारप्रयोज्यस्वापकर्षावधित्वप्रकारकबोधविशेष्यताश्रयः नारायणः, देवदत्तनिष्ठकृतिजन्यव्यापारप्रयोज्याग्रदेशावस्थानाश्रयः ज्यायान् इति बोधः।

अथ "नारायणं नमस्कृत्य" इत्यादौ द्वितीयार्थस्य नमःपदार्थे अन्वयेन धात्वर्थेऽन्वयाभावात् कारकविभक्त्यर्थस्य साक्षाद्धात्वार्थान्वयित्वमिति नियमस्य भङ्ग इति चेत् — न। नियमप्रविष्टस्य साक्षाच्छब्दस्य निपातातिरिक्तार्थमन्तरा अकृत्वा इत्यर्थस्वीकारेण नियमभङ्गाभावात्। निपातार्थद्वारा धात्वर्थान्वयेऽपि यदि कारकविभक्तित्वभङ्गः तदा "घटो दण्डाज्जायते न पारिमाण्डल्यात्" इत्यत्र पञ्चम्याः कारकविभक्तित्वभङ्गापत्तिः। तदर्थस्य प्रयोज्यत्वस्य नञर्थेऽन्वयद्वारैव क्रियान्वयात् साक्षात् तदन्वयाभावात्। तथा हि — तत्र "जनी प्रादुर्भावे" इत्यनुशासनात् धात्वर्थः उत्पत्तिः। दण्डादिति पञ्चम्याः प्रयोज्यत्वमर्थः। तत्र निरूपितत्वसंबन्धेन प्रकृत्यर्थस्य दण्ड-स्यान्वयः। प्रयोज्यत्वस्याश्रयतासंबन्धेन धात्वर्थे उत्पत्तावन्वयः। पारिमाण्डल्यादिति पञ्चम्यन्तार्थस्य पारिमाण्डल्यनिरूपितप्रयोज्यत्वस्य स्वनिष्ठप्रतियोगितानिरूपकत्वसंबन्धेन नञर्थेऽभावेऽन्वयः। नञर्थस्याभावस्य स्वरूपसंबन्धेन धात्वर्थे उत्पत्तावन्वयः। उत्पत्तेर्निरूपितत्वसंबन्धेन आख्यातार्थे आश्रयत्वे तस्य स्वरूपसंबन्धेन घटेऽन्वयः। तथा च दण्डनिरूपितप्रयोज्यतावती पारिमाण्डल्यनिरूपितप्रयोज्यत्वाभाववती च या उत्पत्तिः तदाश्रयो घट इति बोधः।

पारिमाण्डल्यनिरूपितं प्रयोज्यत्वं विषयितया तदवच्छिन्नजनकताकज्ञानादौ प्रसिद्धम्। पारिमाण्डल्यविशिष्टवैशिष्ट्यावगाहिज्ञाने पारिमाण्डल्यविशिष्टविषयकज्ञानस्य कारणत्वमवश्यं वाच्यम्। तच्च विषयित्वसंबन्धावच्छिन्नपारिमाण्डल्यनिष्ठावच्छेदकताकम्। कार्ये च कारणतावच्छेदकप्रयोज्यत्वं सर्वजनीनम्। अत उक्तविशिष्टवैशिष्ट्यावगाहिज्ञानस्य पारिमाण्डल्यप्रयोज्यत्वं निराबाधम्। तदभावश्च घटोत्पत्तौ निराबाधः।

उक्तरीत्या क्रियायोगे नमस्कार्यस्य कर्मत्वेऽपि "स्वयंभुवे नमस्कृत्य" इत्यादौ चतुर्थी अपकर्षावधित्वमात्रे प्रकृत्यर्थवृत्तित्वान्वयविवक्षया उपपद्यते। स्वयंभूनिष्ठं यत् अपकर्षावधित्वं तत्प्रकारकबोधानुकूलव्यापार इति बोधः।

व्युत्पत्तिवादे एव[१]

"स्वस्ति भवते" इत्यादौ आशीः स्वस्तिशब्दार्थः। सा च परहितविषयकस्वेच्छा। स्वमुच्चारयिता। हितान्वयी संबन्धः चतुर्थ्यर्थः। भवत्संबन्धिहितविषय-

---

[१] पृ. २५२

कमदीयेच्छेति बोधः। कल्याणाद्यर्थकोऽपि स्वस्तिशब्दः "स्वस्त्यस्तु मह्यम्" इत्यादौ। तत्रापि चतुर्थ्यर्थः संबन्धः स्वस्त्यर्थान्वयी।

पदवाक्यरत्नाकरे[१] नमःस्वस्त्यादिसूत्रव्याख्यानम्

नमःस्वस्तिस्वधास्वाहालंवषड्भिर्व्यपेक्षिता।
चतुर्थी संप्रदानत्वविषयत्वादि शंसति।।

"पुष्पं शिवाय नमः" इत्यत्र दानकर्म नमःपदार्थः। चतुर्थी संप्रदानत्वार्था। तथा च शिवसंप्रदानकदानकर्म पुष्पमित्यन्वयबोधः। "ब्राह्मणाय गौर्नमः" इति वाक्यमपि प्रमाणमेव। परं तु नेदं त्यागवाक्यं धर्म्यम्।

नामगोत्रे समुच्चार्य सम्यक् श्रद्धान्वितो वदेत्।
संकीर्त्य देशकालादि तुभ्यं संप्रददे इति।।

इति दानवाक्यस्य प्रतिनियमात्।

भवतु वा मन्त्रकरणकत्यागकर्म नमःपदार्थः। मन्त्रस्य करणत्वं तु त्यागजन्यं पारमापूर्वं प्रधानापूर्वं वा प्रति करणत्वं अङ्गापूर्वद्वारा जनकत्वम्। श्रूयते हि मन्त्राणां करणत्वार्थिका तृतीया "जुहुयाद्वारुणैर्मन्त्रैः" इत्यादौ। ततश्च मन्त्रकरण-कोपकारजनकत्यागकर्म नमःपदार्थः। तदेकदेशत्यागान्वयि उद्देश्यतानिरूपकत्वं चतुर्थ्यर्थः। तथा च "पुष्पं शिवाय नमः" इति वाक्यात् शिवनिष्ठोद्देश्यकता-निरूपकस्य मन्त्रकरणकस्य त्यागस्य कर्म पुष्पमिति बोधः। भवति च "शिवाय नमः" इति वाक्यं मन्त्रः। चतुर्थ्यन्तघटितनमोऽन्तवाक्यस्य मन्त्रत्वपरिभाषणात्। तादृशमन्त्रस्तु देवतोद्देश्यकत्यागस्यैवोपकारकः, न तु ब्राह्मणसंप्रदानकस्य त्याग-स्येति "ब्राह्मणाय गौर्नमः" इति वाक्यं न प्रमाणम्।

ब्राह्मणस्य देवतात्वविवक्षायां तु "ब्राह्मणाय नमः" इति वाक्यं दानाङ्गब्राह्मण-पूजादौ दृश्यते। मन्त्रवाक्ये शिवादीनां देवतात्वं पुनरर्थगम्यं, न श्रौतम्। श्रौतं तु "ऐन्द्रं दधि" इत्यादौ। तत्र हि तद्धितेन इन्द्रशब्दस्य स्वरूपपरतायां चतुर्थ्यन्त-करणकयागकर्माभिधीयते। तदेकदेशे चतुर्थ्यन्ते इन्द्रस्य तादात्म्येनान्वयः। इन्द्रा-भिन्नं यत् चतुर्थ्यन्तं तत्करणकयागकर्माभिन्नं दधीति बोधः। शब्द एव देवतेति मीमांसकमते एवम्।

यदि पुनरिन्द्रो नाम सचेतनो देवता प्रामाणिकी, तदा इन्द्रपदार्थ इन्द्रः प्रतिपाद-कत्वसंबन्धेन चतुर्थ्यन्ते पदेऽन्वेति। इन्द्रप्रतिपादकचतुर्थ्यन्तपदकरणकयागकर्म दधि इति बोधः।

---

[१] पृ. ७२८

वस्तुतस्तु चेतनस्य देवतात्वमतेऽपि प्रतिपाद्यतासंबन्धेन "इन्द्राय स्वाहा" इत्यादिमन्त्रविशिष्टस्यैव देवतात्वमङ्गीकार्यम्। इन्द्रादिपदपर्यायशक्रादिपदैरपि तादृशस्थले द्रव्यत्यागप्रसङ्गात्। तथा च विनिगमनाविरहेण प्रतिपाद्यतासंबन्धेन मन्त्रविशिष्टोऽर्थः, प्रतिपादकतासंबन्धेन अर्थविशिष्टो मन्त्रो वेत्युभयमेव देवता। केवलयोरर्थशब्दयोर्देवतात्वे दोषाणां दर्शितत्वात्। तत्राद्ये वेदबोधिता या चतुर्थ्यन्तता तद्विशिष्टपदप्रतिपाद्यत्वमेव देवतात्वम्। द्वितीये च वेदबोधितचतुर्थ्यन्तत्वविशिष्टत्वं देवतात्वम्। अत एव "शक्राय स्वाहा" इत्यादि प्रक्षेपवाक्यमश्रौतम्। "यदग्नये च प्रजापतये च जुहोति" इत्यादौ अग्निवृत्त्युद्देश्यताक एव होमः श्रौतः। तत्र होमे चतुर्थ्यन्ताग्निपदकरणकत्वं न्यायगम्यम्। उद्देश्यताया अग्निवृत्तित्वे ज्ञाते होमस्य करणाकाङ्क्षायाम् उपस्थितत्वात् चतुर्थ्यन्ताग्निपदस्यैव तन्निरूपकत्वनिश्चयान्न तस्य शाब्दबोधविषयत्वम्। किं तु उपस्थितं परित्यज्य इत्यादिन्यायानुसन्धानजन्यबोधविषयत्वमेवेत्यर्थः।

अत एव तद्धितापेक्षया चतुर्थी दुर्बला, साक्षात् देवताश्रुत्यभावात्। यदाहुः —

तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
देवतात्वश्रुतिस्तत्र दुर्बलं तु परं परम्।।

इति यथा, तथा "शिवाय नमः" इति वाक्येऽपि 'नमः' पदार्थैकदेशत्यागान्वितम् उद्देश्यत्वाभिधं संप्रदानत्वमेव चतुर्थी प्रतिपादयति। उद्देश्यत्वं तु प्रीतिरेव। तेन शिवप्रीतिजनकत्यागकर्म वाक्यार्थः। परमात्मनि शिवे प्रीतेस्तज्जनकत्वस्य चानङ्गीकारे प्रीत्युद्देश्यतैव चतुर्थ्यर्थः। इच्छायां विषयत्वेन शिवस्यान्वयः। शिवः प्रीयताम् इति बाधितविषयकेच्छायाः संभवात्। तादृशेच्छाप्रयोज्यत्वं त्यागे प्रतीयते। शिवविशेष्यकप्रीतिप्रकारकेच्छाप्रयोज्यस्त्याग इति 'शिवाय नमः' इति वाक्यात् बोधः।

एवं "शिवाय नमः" इत्यत्र नतिरपि नमसोऽर्थः। तदन्वयिविषयत्वं चतुर्थ्यर्थः। शिवविषयिणी नतिरित्यन्वयबोधः। नतिर्नाम उत्कर्षप्रकारकप्रतिपत्त्यनुकूलो व्यापारः।

"प्रजाभ्यः स्वस्ति" इत्यत्र संबन्धश्चतुर्थ्यर्थः। प्रजासंबन्धिकुशलमित्यन्वयबोधः।

"हविरग्नये स्वाहा" इत्यत्र स्वाहापदस्य होमकर्मार्थः। तत्र होमान्वयि उद्देश्यत्वं चतुर्थ्यर्थः। अग्न्युद्देश्यकहोमकर्म हविः इत्यन्वयबोधः। वह्निसंयोगजनकप्रक्षेपोत्तराङ्गकस्त्यागः मुख्यः हुधातोरर्थः। ब्राह्मणपाण्याद्यधिकरणकप्रक्षेपाङ्गकत्यागरूपे होमे तु हुधातुर्गौणः।

"पितृभ्यः स्वधा" इत्यत्र पित्रुद्देश्यकस्त्यागः स्वधापदार्थः।

अलमिति पर्याप्त्यर्थकानां ग्रहणम्। पर्याप्तिरपि स्वामित्वं निग्राहकत्वं च। "अलं जगते प्रभुः समर्थः शक्तो भगवान्" इत्यादौ जगन्निरूपितस्य स्वामित्वस्य निग्राहकत्वस्य वा अधिकरणं भगवानिति बोधः। प्रभ्वादियोगे षष्ठ्यपि साधुः। "प्रभुर्बुभूषुर्भुवनत्रयस्य" इति माघः।

देवतासंप्रदानककर्म वषट्-पदार्थः। "वषडिन्द्राय" इत्यादौ इन्द्रोद्देश्यकस्य देवतासंप्रदानकस्य कर्मेत्यन्वयः। उपलक्षणमिदम्, "सनकादिमनुष्येभ्यो हन्त" इत्यत्र हन्तयोगे चतुर्थीदर्शनात्। दानं तत्कर्म वा हन्तपदार्थः।

ननु "नमस्करोति नमस्यति वा देवान्" इत्यत्र नमःपदस्य नतिः अर्थः, कृधातोः क्यचश्च करणरूपो व्यापारोऽर्थः। नतेः व्यापारस्य चानुकूलत्वं संसर्गः। "नमोवरिवश्चित्रङः क्यच्"[१] इति सूत्रेण करणेऽर्थे क्यच् विधीयते। "शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे"[२] इति सूत्रात् करणे इत्यस्यानुवृत्तेः। ततश्च शब्दायतिवत् नमस्यतिरकर्मकः, धात्वर्थान्तर्भूतकर्मकत्वात्। यथा हि शब्दाय इति क्यजन्तधातोः शब्दकर्मककरणमर्थ इति तदन्तर्गतशब्दकर्मकत्वात् अकर्मकत्वं, तथा नमस्य इति क्यजन्तधातोः नतिकर्मककरणमर्थः इति तदन्तर्गतनतिकर्मकत्वादकर्मकत्वम्। एवं नमस्करोतिरपि अकर्मकः। एवं च कथं तद्योगे कर्मणि द्वितीया स्यात्।

यदि च नमस्यतिनमस्करोतिधातू नतावेव रूढौ, न तु यौगिकौ। व्याकरणव्युत्पादनं तु उणादिव्युत्पादनवत् बालोपलालनम्। तथा च देवान्नमतीतिवत् देवान्नमस्करोतीत्यपि विषयत्वरूपगौणकर्मार्थकद्वितीयायोगादुपपद्यते, यदि वा द्वितीयासाकाङ्क्षधातुत्वं सकर्मकत्वमिति स्वीकृत्य मुण्डयतेरिव नमस्यतेरपि सकर्मकत्वमित्यभिधीयते, तदा "स्वयंभुवे नमस्कृत्य" इत्यादौ चतुर्थ्यनुपपत्तिः[३] "उपपदविभक्तेः कारकविभक्तिर्बलीयसी"[४] इति न्यायात् इति चेत् —

अत्रोच्यते। "स्वयंभुवे नमस्कृत्य" इत्यादौ प्रीणयितुम् इत्यप्रयुज्यमानतुमुन्नन्तकर्मत्वमादाय "क्रियार्थोपपदस्य च कर्मणि स्थानिनः"[५] इति सूत्रेण चतुर्थ्याः उपपत्तेः। स्वयंभूकर्मकप्रीणनफलको नमस्कार इति बोधः। एतत्तत्वं पूर्वमेवाविष्कृतम्।

---

[१] सू. ३.१.१९

[२] सू. ३.१.१७

[३] द्र. ४१७

[४] परि. १०३, सू. २.३.१६

[५] सू. २.३.१४

विभक्त्यर्थनिर्णये[1] नमःस्वस्त्यादिसूत्रव्याख्यानम्

"नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च"[2] इति सूत्रं नमआदिभिः शब्दैर्योगे चतुर्थी भवतीत्यर्थकम्। "पुष्पं शिवाय नमः" इत्यत्र दानकर्म नमःपदार्थः। चतुर्थ्याः संप्रदानत्वमर्थः। संप्रदानत्वं तु प्रीतिरेव। प्रीतिस्तु जनकतया दानेऽन्वेति। शिवसमवेतप्रीतिजनकदानकर्म पुष्पमित्यन्वयबोधः।

"ब्राह्मणाय गौर्नमः" इति वाक्यं प्रमाणमपि विहितवाक्यत्वाभावेन न प्रयुज्यते।

नामगोत्रे समुच्चार्य सम्यक् श्रद्धान्वितो वदेत्।
संकीर्त्य देशकालादि तुभ्यं संप्रददे इति।।

इत्यार्षवचनेन संप्रदद इत्यन्तस्यैव वाक्यस्य दानवाक्यत्वेन विधानात्।

ननु ब्राह्मणादिसंप्रदानके दाने नम इत्यन्तवाक्यस्य विहितत्वाभावेन अप्रयोगेऽपि प्रीत्यादिना दाने "मित्राय गौर्नमः" इत्यादिवाक्यप्रयोगः स्यादिति चेत् — न। मन्त्रकरणकत्यागकर्मणः नमःपदार्थत्वात् प्रीत्यादिना दाने मन्त्रकरणकत्वाभावात्। वैधे हि कर्मणि मन्त्राणां करणत्वम्। तच्च त्यागादिवैधकर्मजन्यं परमापूर्वं प्रधानापूर्वं वा प्रति अङ्गापूर्वद्वारा जनकत्वम्। अत एव "जुहुयाद्वारुणैर्मन्त्रैः" इत्यादौ मन्त्राणां करणत्वार्थिका तृतीया। तथा च नमःपदार्थैकदेशे मन्त्रकरणकत्यागे उद्देश्यत्वं संप्रदानत्वं प्रीतिरिति यावत्। चतुर्थ्यर्थो जनकतयान्वेति। शिवप्रीतिजनकमन्त्रकरणकत्यागकर्म पुष्पमित्यन्वयबोधः। भवति च "शिवाय नमः" इति वाक्यं मन्त्रः। चतुर्थ्यन्तपदघटितनमोऽन्तवाक्यस्य मन्त्रत्वपरिभाषणात्। ईदृशवाक्यरूपमन्त्रस्य देवतोद्देश्यकत्याग एव दर्शितकरणत्वं, न तु ब्राह्मणाद्युद्देश्यकत्याग इति "ब्राह्मणाय गौर्नमः" इति वाक्यमप्रमाणमेव। यत्र तु ब्राह्मणस्य दैवतत्वविवक्षा तत्र दानाङ्गब्राह्मणपूजनादौ "पुष्पं ब्राह्मणाय नमः" इति वाक्यं प्रमाणमेव प्रयुज्यते। मन्त्रवाक्ये शिवादीनां देवतात्वं पुनरर्थगम्यं न तु श्रौतम्। श्रौतं तु "ऐन्द्रं दधि" इत्यादौ। तद्धितेन हि चतुर्थ्यन्तकरणकत्यागकर्माभिधीयते। तद्ध्वनि तादात्म्येनान्वेति। तदेकदेशे चतुर्थ्यन्तपदे प्रकृत्यर्थस्य स्वरूपपरेन्द्रपदार्थेन्द्रशब्दस्य तादात्म्येनान्वयः। यदि पुनरिन्द्रश्चेतनो देवता तदेन्द्रपदार्थ इन्द्रः प्रतिपाद्यप्रतिपादकभावसंसर्गेण चतुर्थ्यन्तेऽन्वेति। भवतु वेन्द्रप्रतिपादकमिन्द्रपदमेव इन्द्रपदार्थतादात्म्यमेव चतुर्थ्यन्ते पदे भासते।

अत एव "शक्राय स्वाहा" इत्यादिप्रक्षेपवाक्यमश्रौतम्। "यदग्नये च प्रजापतये जुहोति" इत्यादावग्निवृत्त्युद्देश्यताको होमश्च श्रौतः। तत्र चतुर्थ्यन्ताग्निपदकरणकत्वं

---

[1] पृ. ३१०

[2] सू. २.३.१६

न्यायावगतम्। अत एव तद्धितापेक्षया चतुर्थी दुर्बला। साक्षाद्देवतात्वाभावात्। यदाहुः —

> तद्धितेन चतुर्थ्या वा मन्त्रलिङ्गेन वा पुनः।
> देवतात्वश्रुतिस्तत्र दुर्बलं तु परं परम्।।

इति यथा तथा प्रकृते "शिवाय नमः" इति मन्त्रवाक्येऽपि। अत्रापि शिववृत्युद्देश्यताकत्यागकर्म पुष्पमिति चतुर्थ्यन्तशिवपदकरणकत्वं त्यागे न्यायावगम्यमिति। नमःपदार्थैकदेशे त्यागेऽन्वितमुद्देश्यत्वं चतुर्थी प्रतिपादयति। उद्देश्यत्वं तन्निष्ठा प्रीतिरेव। तेन शिवप्रीतिजनकत्यागकर्म वाक्यार्थः। परमात्मनि शिवे प्रीतेस्तज्जनकत्वस्य च बाधितत्वे तु प्रीत्युद्देश्यिका इच्छैव चतुर्थ्यर्थः। तत्र आलम्बनत्वेन शिवस्यान्वयः। 'शिवः प्रीयताम्' इति बाधितविषयकेच्छासंभवात्। तादृशेच्छा तु प्रयोज्यतया त्यागेऽन्वेति। फलेच्छाया उपायेच्छाप्रयोजकत्वादिति पदवाक्यरत्नाकरे गुरुचरणाः।

वस्तुतस्तु "पुष्पं शिवाय नमः" इत्यादौ मन्त्रकरणकत्यागो नमःशब्दार्थः। त्यागस्तु स्वत्वनाशप्रकारिकेच्छा। तस्यास्तु स्वत्वनाशप्रकारतानिरूपितविशेष्यतास्वरूपेण विषयत्वेन पुष्पेऽन्वयः। चतुर्थ्याः संबन्धोऽर्थः। संबन्धस्तु प्रीतीच्छाप्रयोज्यत्वम्। तच्च स्वरूपेण स्वत्वनाशेऽन्वेति। परंपरासंबन्धघटकतदेकदेशे प्रीतीच्छायां प्रकृत्यर्थस्य प्रीतिप्रकारतानिरूपितविशेष्यतास्वरूपेण विषयित्वेनान्वयः। यथा "जलस्य कर्पूरगन्धः, स्फटिकस्य जपालौहित्यम्" इत्यादौ षष्ठ्यर्थस्य परंपरासंबन्धस्य संयोगसमवायस्वरूपस्य घटके तदेकदेशे संयोगे प्रकृत्यर्थस्य जलादेरन्वयः। परम्परासंबन्धस्य विभक्त्यर्थत्वे तदेकदेशे प्रकृत्यर्थान्वयस्य सर्वसंमतत्वात्। भवतु वा प्रीतीच्छा प्रयोज्यत्वं च खण्डशश्चतुर्थ्यर्थः। अन्वयस्तु पूर्ववदेव। तथा च प्रीतिप्रकारतानिरूपितशिवविशेष्यताकप्रीतीच्छाप्रयोज्यमन्त्रकरणकस्वत्वनाशप्रकारकेच्छायाः स्वत्वनाशप्रकारतानिरूपितविशेष्यतावत् पुण्यमित्यन्वयबोधः। विषयतायाः इच्छादिसमानकालिकत्वात् त्यक्ते पुष्पादौ न नमःपदप्रयोगः।

नमः स्वाहादिपदानां प्रयोक्तृपुरुषीयत्यागार्थकत्वादन्यदीयत्यागेऽन्यस्य न नमःस्वाहादिप्रयोगः। प्रीतीच्छाप्रयोज्यत्वं स्वत्वनाशान्वय्येवोपपद्यते। यतः प्रीतीच्छाप्रयोज्यस्वत्वनाश एव देवतानां स्वत्वं संबन्धः शिवस्य पुष्पमित्यादौ षष्ठ्यर्थतया प्रतीयते। तत्र हि प्रीतीच्छाप्रयोज्यत्वस्य त्यागविशेषणत्वे विशिष्टत्यागस्य प्रयोज्यतया स्वत्वनाशघटकत्वे परंपरासंबन्धगौरवं स्यात्। तस्य स्वत्वनाशविशेषणतया परंपरासंबन्धघटकत्वे दर्शितसंबन्धस्य लाघवमेव। न वा प्रीतीच्छायाः तत्प्रयो-

ज्यत्वस्य वा चतुर्थ्यर्थस्य नमःपदार्थे त्यागेऽन्वयो युज्यते। तथा सति प्रीतेरुद्देश्यतया त्यागेऽन्वयेनैव तादृशप्रयोगसंभवात् शिवादेः प्रीतिबाधेऽपि बाधितोद्देश्यताकेच्छासंभवात्।

"शिवाय नमः" इति मन्त्रवाक्ये शिवादीनां देवतात्वं मन्त्रलिङ्गेनावगम्यते। यथा "त्रातारमिन्द्रमवितारमिन्द्रम्" इति मन्त्रेण प्रकाश्यमानस्येन्द्रस्य देवतात्वम्। तच्च त्यागार्थकनमःस्वाहादिपदसमभिव्याहृतचतुर्थ्यन्तपदप्रतिपाद्यत्वम्। अथ वा नमःस्वाहादिपदप्रतिपाद्यस्य त्यागप्रकारस्वत्वनाशस्य प्रयोजिकायाः प्रीतीच्छायाः विषयत्वं प्रागुक्तविशेष्यत्वरूपं बोध्यम्।

यत्र पदेन वृत्त्या उपस्थापितेऽर्थे पदान्तरार्थस्य अन्वयेन वाक्यार्थतया देवतात्वं प्रतीयते तत्र श्रौतं तदुच्यते। यथा "ऐन्द्रं दधि भवत्यमावास्यायाम्" इत्यादौ तद्धितेनाण्प्रत्ययेन प्रीतीच्छाप्रयोज्यस्य मन्त्रकरणकत्यागः प्रकारस्य स्वत्वनाशस्याश्रयोऽभिधीयते। तत्र प्रागुक्तविशेष्यितया प्रीतीच्छायामिन्द्रपदार्थस्येन्द्रस्यान्वयः। तथा च विशेष्यितया तादृशप्रीतीच्छायामन्वये तादृशप्रीतीच्छाया अपि प्रागुक्तविशेष्यतया इन्द्रेऽन्वय इति इन्द्रस्य देवतात्वं वाक्यार्थतया प्रतीयते।

"यदग्नये च प्रजापतये च जुहोति" इत्यादौ चतुर्थ्यर्थप्रीतेरुद्देश्यितया होमान्वये होमजन्यस्वत्वनाशप्रयोजकप्रीतीच्छाविषयत्वं वह्नौ न्यायगम्यम्। यत्प्रीत्युद्देश्यकत्यागजन्यः स्वत्वनाशः स स्वत्वनाशप्रयोजकप्रीतीच्छाविषय इत्येव न्यायः। वाक्यार्थविधयाप्यत्र प्रीतीच्छाविषयत्वं न प्रतीयत इति न श्रौतं देवतात्वम्। अचेतनदेवतापक्षे गुरुचरणदर्शिता रीतिः अनुसन्धेया।

"तस्मै पुरभिदे नमः" इत्यत्र नमःपदस्य नमस्कारोऽर्थः। स चोत्कर्षप्रतिपत्त्यनुकूलो व्यापारः। तत्रोत्कर्षप्रकारकप्रतिपत्त्यन्वयि विशेष्यित्वं समवेतत्वं च द्वयं संबन्धश्चतुर्थ्यर्थः। तथा च शिवसमवेतशिवविशेष्यताकोत्कर्षप्रकारकप्रतिपत्त्यनुकूलो व्यापारो वाक्यार्थः। व्यापारस्तु नमःपदप्रयोक्तुरेव बोध्यः। यदि चाभिवाद्यस्य नोत्कर्षप्रतीतिः तदा उत्कर्षप्रतीतीच्छैव नमस्कारो बोध्यः।

अतः शिवसमवेतप्रतिपत्तेर्नित्यतया व्यापारस्य तदनुकूलत्वविरहेऽपि न क्षतिः। शिवस्य जन्यप्रतिपत्तिविरहेऽपि तदुद्देश्यकेच्छासंभवात्। उत्कर्षप्रतिपत्तेरुद्देश्यतया इच्छायामन्वयात्। इच्छापि व्यापारवत् प्रयोक्तुरेव बोध्या।

"स्वस्ति प्रजाभ्यः" इत्यत्र संबन्धश्चतुर्थ्यर्थः। स चाधेयत्वमेव। स्वस्तिपदार्थः कुशलम्। तच्चानिष्टसाधनाभावः। तथा च प्रजावृत्तिरनिष्टसाधनाभाव इत्यन्वय-

बोधः। "चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः"[1] इति सूत्रे कुशलग्रहणेन तत्पर्यायस्य स्वस्तेर्ग्रहणेन आशंसायां चतुर्थीसंभवेऽपि आशंसाविरहेऽपि चतुर्थीविधानार्थं प्रकृते "नमःस्वस्ति०"[2] इति सूत्रे स्वस्तिग्रहणम्।

"अग्नये कृत्तिकाभ्यो वा हविः स्वाहा" इत्यत्र वह्निसंयोगजनकप्रक्षेपोत्तराङ्गक-विहितत्यागः स्वाहापदार्थः। विहितत्वविशेषणात् वह्निप्रक्षेपफलकयादृच्छिकत्यागो न स्वाहापदार्थः। त्यागस्तु स्वत्वनाशप्रकारिकेच्छैव। चतुर्थ्यर्थः संबन्धः प्रीतीच्छा-प्रयोज्यत्वम्। तस्य स्वत्वनाशेऽन्वयः। प्रीतीच्छायां तु प्रीतिप्रकारतानिरूपित-विशेष्यताकत्वेन प्रकृत्यर्थस्यान्वयः। त्यागस्य स्वत्वनाशप्रकारतानिरूपितविशेष्य-तया हविष्यन्वयः। तथा च प्रीतिप्रकारतानिरूपिताग्न्यादिविशेष्यताकप्रीतीच्छा-प्रयोज्यवह्निसंयोगजनकप्रक्षेपोत्तराङ्गकविहितत्यागविषयः हविः इत्यन्वयबोधः।

"इदमन्नं पितृभ्यः स्वधा" इत्यत्र पित्रुद्देश्यकत्यागः स्वधापदार्थः। पितृत्वं तु त्रैवर्णिकसपिण्डितत्वम्। पारशवस्य पिता न त्रैवर्णिकेन सपिण्डितः, किं तु दैवतमात्रमिति न तत्र स्वधाशब्दप्रयोगः। त्रैवर्णिकेन सपिण्डितस्य पारशवेन क्रियमाणे पुनराब्दिकादौ न स्वधाशब्दप्रयोगः। तस्य स्वधाशब्दप्रयोगनिषेधात् प्रत्यवायसहेन पारशवेन प्रयुक्तः स्वधाशब्दः शाब्दबुद्धिं जनयत्येव। बाधका-भावात्। भवतु वा स्वधाकरणकस्त्यागः स्वधाशब्दार्थः। शूद्रकर्तृकस्त्यागो न स्वधाकरणक इति न तत्र स्वधाप्रयोगः।

वस्तुतस्तु विहितस्त्यागः स्वधाशब्दार्थः। चतुर्थ्यर्थः पूर्वोक्त एव संबन्धः, तस्य स्वत्वनाशे त्यागस्यान्ने स्वत्वनाशप्रकारतानिरूपितविशेष्यतया अन्नेऽन्वयः। तथा च प्रीतिप्रकारतानिरूपितपितृविशेष्यताकप्रीतीच्छाप्रयोज्यस्वत्वनाशजनकत्यागविष-योऽन्नमिति बोधः।

"अलं जगते" इत्यत्र अलमिति पर्याप्त्यर्थकानां ग्रहणम्। पर्याप्तिरपि स्वाम्यं निग्राहकत्वं च। अत एव "अलमिति पर्याप्त्यर्थग्रहणम्" इति काशिका। चतुर्थ्या निरूपितत्वमर्थः पर्याप्तावन्वेति। तथा च जगन्निरूपितस्वाम्यवान् जगन्निरूपित-निग्राहकत्ववान् वेत्यन्वयबोधः।

"जगते प्रभुः भगवान्" इत्यत्र प्रभुत्वमपि स्वाम्यं निग्राहकत्वं च। पूर्वव-दन्वयः। "जगते समर्थः शक्तो वा भगवान्" इत्यत्र सामर्थ्यं शक्तत्वं च निग्राह-कत्वमेव। पूर्ववदन्वयः। "मल्लाय प्रभुः समर्थः शक्तो वा मल्लः" इत्यत्र प्रभुत्वादिकं निग्राहकत्वमेव। पूर्ववदन्वयः। "घटायालं समर्थः शक्तो वा कुलालः" इत्यत्र

[1] सू. २.३.७३
[2] सू. २.३.१६

स्वरूपयोग्यत्वमुपहितत्वं वा सामर्थ्यादिकं, पूर्ववदन्वयः। प्रभ्वादिशब्दयोगे षष्ठ्यपि साधुः। "स एषां ग्रामणीः" इति निर्देशात्। अत एव "प्रभुर्बुभूषुर्भुवनत्रयस्य यः" इति माघोऽप्युपपद्यते।

"वषडिन्द्राय, वषडग्नये" इत्यत्रापि विहितः त्यागः वषट्पदार्थः। चतुर्थ्याः प्रीतीच्छाप्रयोज्यत्वमर्थः। नमः स्वाहायोगवदन्वयः। विशेषविधानात् वषट्पद-प्रयोगः।

नमःस्वाहादिशब्दानां पर्यायाणां ग्रहणेन पर्यायस्य हन्तादिशब्दस्य योगेऽपि चतुर्थी ज्ञाप्यते। यथा "इदमन्नं सनकादिमनुष्येभ्यो हन्त" इत्यत्र विहितस्त्यागो हन्तशब्दार्थः। चतुर्थ्याः प्रीतीच्छाप्रयोज्यत्वमर्थः। नमः स्वाहादियोगवदन्वयः। विशेषविधानात् हन्तशब्दप्रयोगः।

वषट्ग्रहणं फड्वौषडादिशब्दानामपि उपलक्षकम्। तेन "नेत्रत्रयाय वौषट्, अस्त्राय फट्" इत्यत्र चतुर्थ्युपपद्यते। एतदर्थमेव सूत्रे चकारः।

काशिकाकृतस्तु

चकारः पुनरस्यैव समुच्चयार्थः। तेन आशीर्विवक्षायामपि षष्ठीं बाधित्वा चतुर्थ्येव भवति। "स्वस्ति गोभ्यो भूयात्, स्वस्ति ब्राह्मणेभ्यो भूयात्" इत्याहुः।

"हृदयाय नमः" इत्यादौ नमःस्वाहावषड्वौषट्फट्शब्दाः कुशलार्थकाः। चतुर्थ्या आधेयत्वं संबन्धः अर्थः कुशलेऽन्वेति। हुंशब्दोऽपि वषट्शब्दस्य तदुपलक्षकतया आशीर्विवक्षया वा चतुर्थी।

ननु "देवान् नमस्यति" इत्यत्र नमोयोगे चतुर्थी स्यात्। "नमोवरिवश्चित्रङः क्यच्"[१] इति सूत्रेण नमः शब्दात् करणे क्यच्विधानेन नमस्यतीति सिद्धेः नमस्यतेः नमस्करोतेश्च नमस्कारानुकूलप्रयत्नार्थकतया फलसमानाधिकरणव्यापार-वाचितया अकर्मकत्वात् तद्योगे द्वितीयानुपपत्तिश्च।

यदि च नमस्यतिनमस्करोती धातू नमस्कारे रूढौ। व्याकरणव्युत्पादनम् उणादिवत् बालोपलालनम्। तदा फलस्योत्कर्षप्रकारकप्रतिपत्तेः व्यधिकरणव्या-पारवाचित्वात् सकर्मकतया द्वितीयोपपत्तावपि नमोयोगे चतुर्थीविधानेन द्वितीया-चतुर्थ्योर्विकल्पः स्यात् इति चेत्—

---

[१] सू. ३.१.१९

न। "उपपदविभक्तेः कारकविभक्तिः बलीयसी"[१] इति न्यायात् "देवान् नमस्यति नमस्करोति वा" इत्यत्र द्वितीयाया एव साधुत्वादिति।

"स्वयंभुवे नमस्कृत्य" इत्यत्र नमोयोगे न चतुर्थी किं तु "क्रियार्थोपपदस्य" इति सूत्रेण क्रियार्थक्रियायाम्। तथा च स्वयंभुवं प्रीणयितुं नमस्कृत्येत्यर्थः।

भाट्टरहस्यरीत्या नमःस्वस्त्यादिसूत्रव्याख्यानम्

"नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च"[२] इति सूत्रेण एभिः शब्दैर्योगे चतुर्थी स्यात् इत्यर्थकेन "हरये नमः" इत्यादौ चतुर्थी। उद्देश्यत्वं चतुर्थ्यर्थः। तस्य स्वनिरूपकनमनास्तित्ववैशिष्ट्यसंबन्धेन अस्तीत्यध्याहृताख्यातोर्थेऽन्वयः। उपपदस्य संसर्गघटकार्थतात्पर्यकत्वात् उपपदविभक्तित्वं चतुर्थ्याः। हरिनिष्ठोद्देश्यतानिरूपक-नमनास्तित्वविशिष्टमाश्रयत्वमिति बोधः। न चात्र "ब्राह्मणस्य दधि" इत्यादाविव तादर्थ्यचतुर्थ्यैव गतार्थत्वात् नमःस्वस्त्यादिसूत्रं व्यर्थमिति वाच्यम्। नमः पदयोगे षष्ठीव्यावृत्त्यर्थत्वेन नमनार्थकनत्यादिपदान्तरयोगे चतुर्थीव्यावर्तकत्वेन च सार्थक्यात्।

यदा तु नमनस्य धात्वर्थत्वं तदा धात्वर्थस्य संसर्गघटकत्वतात्पर्यग्राहकत्वात् कारकविभक्तित्वेन "देवान्नमस्करोति" इत्यादौ कर्मत्वार्थिका द्वितीयापि नानुपपन्ना। एवं 'प्रजाभ्यः स्वस्ति' इत्यादावूह्यम्।

अलं शब्दः पर्याप्त्यर्थकः प्रभुसमर्थशक्तादिशब्दानामुपलक्षणम्। तस्मै प्रभवतीति प्रयोगः। न त्वत्र षष्ठीव्यावृत्तिः। तेन 'प्रभुर्बुभूर्षुभुवनत्रयस्य' इति षष्ठ्या उपपत्तिः।

'वषट् इन्द्राय'। सूत्रे चकारः षष्ठीनिषेधार्थकः।

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु[३] इति सूत्रार्थः

प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात् तिरस्कारे। "न त्वां तृणं मन्ये तृणाय वा"। श्यना निर्देशात् तानादिकयोगे न। "न त्वां तृणं मन्वे"। "अप्राणिषु इत्यपनीय नौकाकान्नशुकशृगालवर्जेष्विति वाच्यम्"।[४] तेन "न त्वां नावं मन्ये" इत्यत्राप्राणित्वेऽपि चतुर्थी न। "न त्वां शुने मन्ये" इत्यत्र प्राणित्वेऽपि चतुर्थी भवत्येव।[५]

---

[१] परि. १०३, सू. २.३.१६

[२] सू. २.३.१६

[३] सू. २.३.१७

[४] वा. १४६४

[५] सि.कौ. (vol. I) पृ. ६५५

तत्रानादर इति मन्यकर्मविशेषणम्। तिरस्कारद्योतकं यत् मन्यतेः कर्म ततश्चतुर्थी स्यात् इत्यर्थः। तेन युष्मच्छब्दात् चतुर्थी न। तिरस्कारश्च व्याख्यानात् अपकृष्टनिरूपितोपमेयत्वस्याप्यभावरूपः उपमेयेऽत्र गृह्यते। न तु अपकृष्टसादृश्यरूपः। तत्प्रीतिश्च नञ्समभिव्याहारे एव। तृणतुल्यमपि न मन्ये इत्यर्थः। "तृणाय मत्वा रघुनन्दनोऽपि" इत्यादौ नञोऽध्याहारः। कर्मात्र चतुर्थ्यर्थः।

बृहन्मञ्जूषायाम्[1]

"न त्वां तृणाय तृणं वा मन्ये" इत्यत्र कर्म द्वितीयाचतुर्थ्योरर्थः। प्रकृतेश्च स्वार्थसदृशे लक्षणा। तथा च त्वदभिन्नतृणसदृशकर्मकमद्वृत्तिज्ञानाभाव इति बोधः। त्वद्विशेष्यकतृणसदृशत्वप्रकारकज्ञानाभाव इति फलति। स चात्यन्तापकर्षप्रयुक्त एव। मन्यतेः चतुर्थीसमभिव्याहारे बुध्यत इत्यर्थः। शब्दशक्तिस्वभावात्।

शब्दशक्तिप्रकाशिकायाम्[2]

मन्यतेः कर्मणो यस्मादयुक्तैवापकृष्टता।
नञ्बोध्यास्मात् द्वितीयावच्चतुर्थी प्राणिवर्जितात्।।

इति भाष्यस्मृतेः[3]। मन्यतेः अनुक्तकर्मणि यदवधिकापकृष्टत्वं नञा बोध्यं तत्र द्वितीयावत् चतुर्थ्यपि प्रमाणम्। तेन न त्वां तृणं मन्ये इत्यादाविव "न त्वां तृणाय मन्ये" इत्यादावपि त्वां तृणादपकृष्टं मन्ये इत्यर्थः। "द्रौणिर्मर्यादया हीनो ब्राह्मणो नैष दुर्मतिः" इत्यादौ असमस्तस्यापि नञोऽपकर्षप्रत्यायकत्वात्। एष दुर्मतिः

अश्वत्थामा न ब्राह्मणः ब्राह्मणादपकृष्ट इत्यर्थः। कर्मणि अनुक्तत्वनिवेशात् "न त्वं कीटो मतो मम" इत्यादौ मन्यतेः कर्मणः त्वदादेः व्यावृत्तिः। अपकृष्टत्वे बाधितत्वरूपस्यायुक्तत्वस्य निवेशात् "जारजं न द्विजं मन्ये" जारजादेः व्यावृत्तिः। जारजादेः द्विजाद्यपकृष्टत्वस्य अबाधितत्वात्।

न नावं मन्यते योऽश्वं न काकं मन्यते शुकम्।
नान्नं स मन्यते सर्पिर्न शृगालं स मानुषः।।

इत्यादौ नावादयः प्राणिन एव। नौकाकान्नशृगालानां प्राणित्वं शाब्दिकस्मृतेः। अतोऽप्राणिष्विति कथनात् अत्र चतुर्थी न।

---

[1] पृ. १७८

[2] पृ. ३७३

[3] महाभाष्ये श्लोकोऽयं न दृश्यते।

"न तृणाय युवां मन्ये, न त्वा तृणाभ्यां मन्ये" इत्यादिकस्तु न प्रयोगः, भेदस्येवापकर्षस्यापि असमस्तनञा बोधने प्रतियोग्यनुयोगिवाचकपदयोः समानवचनान्तत्वस्य तन्त्रत्वात्।

सदृशत्वं तृणादीनां मन्यकर्मण्यनुक्तके।
द्वितीयावच्चतुर्थ्यापि बोध्यते बाधितं यदि।।

इत्यापिशलेर्मतम्। तेन "तृणाय त्वां मन्यते" इत्यादेः तृणसदृशं त्वां मन्यते इत्यर्थः। एतन्मतानुसारेणैव —

"तृणाय मत्वा रघुनन्दनोऽथ बाणेन रक्षः प्रधनान्निरास्थत्" इति भट्टिकाव्य-प्रयोगः उपपन्नो भवति। प्रधनात् — युद्धात्।

पदवाक्यरत्नाकरोक्तरीत्या न त्वां तृणं मन्य इति वाक्यार्थः[१]

साद‍ृश्यमपकर्षो वा यतो मन्यतिकर्मणि।
अनादृते नञा बोध्यश्चतुर्थी तत इष्यते।।

मन्यतेः कर्मणि अनादरविषये यदपेक्षया सादृश्यमपकर्षो वा नञा बोध्यते ततश्चतुर्थी इष्यते। "न त्वां तृणाय तृणं वा मन्ये" इत्यत्र मन्यतेः कर्मणि युष्मदर्थे तृणसादृश्यं तृणादपकर्षश्च नञा बोध्यत इति तृणवाचकात् चतुर्थी भवति। एवं च तत्र सादृश्यमपकर्षो वा नञर्थः।

न च सादृश्यादीनां नञ्पदात् बोधः समासे एव अनिक्षुः शरः इत्यादौ, न तु व्यासे; तत्र भेदात्यन्ताभावयोरेव प्रतीतेरिति वाच्यम्। "द्रौणिर्मर्यादया हीनो ब्राह्मणो नैव दुर्मतिः" इत्यादौ व्यस्तनञापि निकर्षबोधनात्। एष दुर्मतिः द्रौणिः अश्वत्थामा न ब्राह्मणः ब्राह्मणादपकृष्ट इति हि तदर्थः। तृणपदसमभिव्याहृतया द्वितीयया चतुर्थ्या वा नञर्थान्वयि प्रतियोगित्वमुच्यते। अथ वा साधुत्वार्था। तथा च तृणप्रतियोगिकेन सादृश्येनापकर्षेण वा त्वां जानामीति बोधः। तेन अनादृत-स्त्वमिति मन्यतेः कर्मणि युष्मदर्थे वैयञ्जनिकोऽनादरबोधः, न तु शाब्दः।

यत्र तु अनादरो न व्यञ्जनया प्रतीयते, तत्र "वृषलं न द्विजं मन्ये" इत्यादौ वृषलपदान्न चतुर्थी साधुः। दृश्यते च वैयञ्जनिकबोधापेक्षया पदानां साधुता।

अत एव रूपं वस्त्रम् इत्यादौ वैयञ्जनिकप्रयोजनप्रतिपत्त्यभावे रूपपदस्य तद्वति असाधुतया नेयार्थता नाम दोषः।

---

१ प.वा.र.पृ. ७२४-७२७

व्यञ्जनानङ्गीकारे तु तृणसदृशतदपकृष्टादौ तृणपदस्य लक्षणा। तस्य त्वत्पदार्थे तादात्म्येनान्वयः। नञ्पदम् अनादृतवाचि। तृणवदनादृतं त्वां मन्ये इत्यन्वयबोधः।

अत्र मन्यतेरिति श्यन्विकरणकधातुनिर्देशात् तनादेर्व्युदासः। 'तेन त्वां तृणं मनुत' इत्येव प्रमाणम्, न तु तृणायेति। अनुक्तस्य कर्मण इति तु "न त्वं कीटो मतो मम" इत्यत्र कीटायेति प्रयोगनिराकरणाय। तत्र कर्मणः कृत्प्रत्ययाभिहितत्वात्।

अपरे तु (जगदीशादयः?) "अयुक्तैवापकृष्टता" इति पठित्वा "वृषलं न द्विजं मन्ये" इत्यादौ युक्तापकर्षवाचिनञः अनेन व्युदास इति व्याकुर्वते। नञ्पदोपादानात् "तृणादपकृष्टं त्वां मन्ये" इत्यादिव्युदासः। अत्र केचित् चतुर्थी सादृश्यवाचिका नञ्पदविनिर्मुक्तापि प्रमाणम्,

सदृशत्वं तृणादीनामनुक्ते मन्यकर्मणि।
द्वितीयावच्चतुर्थ्यापि बोध्यते बाधितं यदि।।

इत्यापिशालिस्मरणात्। अत एव —

"तृणाय मत्वा रघुनन्दनस्तद्रक्षः प्रधानं प्रधनान्निरास्थत्" इति भट्टिः, "तृणाभ्यां मन्यते कामक्रोधौ यः पञ्च कारयन्" इति श्रीहर्षः। तत्र भेदबोधने इव निकर्षसादृश्यादिबोधनेऽपि प्रतियोग्यनुयोगिवाचकपदयोः समानवचनकत्वं तन्त्रम्। तेन 'तृणाय युवां मन्य' इत्यादयो न प्रयोगाः।

"न त्वामन्नं काकं शृगालं वा मन्ये" इत्यत्र चतुर्थीनिषेधाय प्राणिवर्जितादिति। प्रणिनस्तु "नौकाकान्नशृगालानां प्राणित्वं पारिभाषिकम्" इति स्मृत्या परिभाषिताः। तेन "त्वां शुने कीटाय वा मन्ये" इत्याद्युपपन्नमनुपपन्नं च "न त्वामन्नाय मन्ये" इति।

अन्ये तु "न त्वां तृणाय मन्ये" इत्यादौ तृणपदस्य तृणसदृशोऽर्थः। तस्य च त्वापदार्थेऽभेदान्वयोपपादकतया कर्मानुवादिका द्वितीया प्रसक्ता 'दण्डिनं पुरुषं जानाति' इतिवत्। तत्र मन्युकर्मविशेषणे सदृशलाक्षणिके पदे द्वितीयावत् चतुर्थी अनुशिष्यते। मन्यतेर्मुख्यकर्मणि तु न चतुर्थी। "मन्यकर्मण्यनादरे विभाषाऽप्राणिषु" इत्यनुशासने अनादर इत्यस्य अनादरनिमित्तकसादृश्यप्रतियोगिवाचकपदार्थे इत्यर्थकस्य कर्मविशेषणत्वात्। नञ्पदस्य च अनादरोऽर्थः। आदरो नामेष्टानिष्टसाधनत्वेन प्रतिसन्धानम्। तदभेदश्च त्वत्कर्मकमननत्वावच्छेदेनान्वेति। अतस्तस्यापि हिताहितान्यतरसाधनत्वं पर्यवस्यति। तृणसदृशत्वत्कर्मकानादराभिन्नमननवानहमिति बोधः इत्याहुः।

विभक्त्यर्थनिर्णये[१] मन्यकर्मण्यनादर इति सूत्रव्याख्यानम्

मन्यतियोगे कर्मसाकाङ्क्षपदात् चतुर्थीं ज्ञापयति "मन्यकर्मण्यनादरे विभाषाऽप्राणिषु"[२] इति सूत्रम्। मन्यतिकर्मान्वयिनि प्राणिवर्जिते तद्वाचकपदात् द्वितीया चतुर्थी च भवत्यनादरे गम्यमान इत्यर्थकम्। श्यन्विकरणस्य मन्यतेर्निर्देशात् तनादेर्मनेर्व्युदासः। तेन "न त्वां तृणं मन्महे" इत्यत्र न चतुर्थी। अनादरग्रहणात्

"अश्मानं दृषदं मन्ये मन्ये काष्ठमुलूखलम्।
अन्धायास्तं सुतं मन्ये यस्य माता न पश्यति।।"

इत्यत्र न चतुर्थी। एवं "न त्वां तृणं तृणाय वा मन्ये" इत्यत्र नञः सादृश्यमप्राशस्त्यरूपोऽपकर्षो वार्थः। तृणपदोत्तरा द्वितीया चतुर्थी च प्रतियोगित्वार्था। अथ वा नानुयाजेष्वित्यत्र सप्तमीवत् साधुत्वार्था। तथा च तृणप्रतियोगिकेन सादृश्येनापकर्षेण वा त्वां जानामीति शाब्दोऽन्वयबोधः। ततोऽनादृतस्त्वमिति वैयञ्जनिको बोधः। यत्र तु नानादरो व्यञ्जनया प्रतीयते तत्र "वृषलं न द्विजं मन्ये" इत्यादौ न चतुर्थी साधुः। दृश्यते च वैयञ्जनिकबोधसापेक्षा पदानां साधुता, यथा — "वद वद जितः स शत्रुर्न हतो जल्पंस्तव तवास्मि" इत्यादौ हर्षभयादौ द्योत्ये द्विर्वचनं साधु नेतरथा। न चात्र हर्षादिः शाब्दप्रतीतिविषयः, तद्वाचकपदाभावात्। भवतु वा तृणसदृशतदपकृष्टादौ लक्षणा। लक्ष्यार्थस्य तादात्म्येन त्वत्पदार्थेऽन्वयः। नञ्पदमनादृतवाचि। तृणवदनादृतं त्वां मन्ये इत्यन्वयबोधः। यदि च

"मन्यतेः कर्मणो यस्मादनुक्तस्यापकृष्टता।
नञ्बोध्या स्यात् द्वितीयावच्चतुर्थी प्राणिवर्जितात्।।"

इति शाब्दिकस्मृतेः न भयमनुक्तस्य कर्मणि इति तु "न त्वं कीरो मम मतः" इत्यत्र चतुर्थीवारणाय, अत्र कर्मणः क्तप्रत्ययेनाभिहितत्वादिति संप्रदायः।

परे तु "अयुक्तैवापकृष्टता" इति पठित्वा "वृषलं न द्विजं मन्ये" इत्यादौ युक्तापकर्षवाचिनोऽनेन व्युदासः नञ्पदोपादानात् तृणादपकृष्टं त्वां मन्ये इत्यन्वयबोध इति वदन्ति।

अन्ये तु "न त्वां तृणाय मन्ये" इत्यादौ तृणपदस्य तृणसदृशोऽर्थः। तस्य त्वत्पदार्थे भेदान्वयोपपादिका कर्मानुवादिका द्वितीयावत् चतुर्थी अनुशिष्यते कर्मविशेषणे न तु मुख्यकर्मणि। सूत्रेऽनादर इत्यनेन कर्मणीत्यनेन चानादरनिमित्तसादृश्यप्रतियोगिनः कर्मविशेषणस्य वाचकात् पदात् चतुर्थी विधीयते। नञोऽनादरोऽर्थः। अनादरो नामेष्टनिष्टासाधनत्वेन प्रतिसन्धानं तद्भेदश्च। भेदो हि

---

[१] पृ. ३०४
[२] सू. २.३.१७

त्वत्कर्मकमननत्वावच्छेदेनान्वेति। ततस्त्वत्पदार्थस्य हिताहितान्यतरसाधनत्वमर्थतः प्रतीयत इत्याहुः।

अत्र चतुर्थ्याः सादृश्यमर्थः। नञ्पदं तात्पर्यग्राहकम्। क्वचित् नञ्पदं विनापि प्रयोगः। यथा — "तृणाय मत्वा रघुनन्दनस्तत् रक्षःप्रधानं प्रधनान्निरास्थत्" इति भट्टिः। यथा वा — "तृणाभ्यां मन्यते कामक्रोधौ यः पञ्च कारयन्" इति श्रीहर्ष इति वदन्ति। युज्यते चैतत् —

"सदृशत्वं तृणादीनामनुक्ते मन्यकर्मणि।
द्वितीयावच्चतुर्थ्यापि बोध्यते बाधितं यदि।।"

इत्यापिशलिस्मरणात्। बाधितमिति अयुक्तसादृश्यबोधकम्। तेन "मुखं पद्मं मन्ये" इत्यत्र युक्तसादृश्ये न चतुर्थी। एवं "न त्वां तृणाय मन्ये" इत्यादौ नञा सहिते शून्ये वा प्रयोगे चतुर्थ्याः सादृश्यमर्थः। तच्च मन्यकर्मणि त्वत्पदार्थेऽन्वेति। तथा च तृणसदृशत्वत्कर्मताकमननाश्रयोऽहमित्यन्वयबोधः। ततोऽनादृतस्त्वमिति बोधः। स शाब्द आनुमानिको मानसो वेत्यन्यदेतत्। प्राथमिकेऽन्वयबोधेऽनादरो न भासते। अत एव काशिकायाम् "अनादरे गम्यमाने" इत्युक्तम्, न तु अनादरेऽर्थेऽनादरबोधकनञादिसत्त्वे वेत्युक्तम्। मन्यकर्मणि सादृश्यान्वयबोधने चतुर्थ्या द्वितीयासमानवचनत्वं तन्त्रम्। अतः 'तृणाभ्याम्' इति दर्शितप्रयोग उपपद्यते, नोपपद्यते च 'तृणाभ्यां न त्वां, तृणाय न युवां वा मन्य' इति प्रयोगः।

सूत्रे "अप्राणिष्वित्यपनीय नौकाकान्नशुकसृगालवर्जेष्विति वक्तव्यम्"[1] इति वार्तिकेन प्राणिनः परिभाषिताः। तेन "न त्वां नावं काकमन्नं शृगालं वा मन्ये" इत्यत्र न चतुर्थी। प्राणित्वेऽपि "न त्वां शुने कीटाय वा मन्ये" इत्यादौ चतुर्थी चोपपद्यते। अत्र परंपरया मननकर्मणः चतुर्थ्यर्थसादृस्यस्य नामार्थान्वयेऽपि 'जलं न पचति' इत्यत्र नञर्थान्वयिद्वितीयार्थकर्मत्वस्येव धातुसमभिव्याहारेणैव स्वविशेषणकशाब्दबोधविषयत्वात् प्रागुक्तकारकलक्षणवत्त्वात् कारकत्वम् इति।

भाट्टरहस्ये[2] मन्यकर्मणीति सूत्रव्याख्यानम्

"मन्यकर्मण्यनादरे विभाषाप्राणिषु"[3] इत्यनेन प्राणिवर्जिते मन्यतेः कर्मणि तिरस्काररूपानादरे विवक्षिते चतुर्थी वा स्यात् इत्यर्थकेन "न त्वां तृणं तृणाय वा मन्ये" इत्यत्र वैकल्पिकी चतुर्थी। अत्र कर्मत्वं चतुर्थ्यर्थः। तृणपदं तृणसदृशपरम्।

---

[1] वा. १४६४

[2] पृ. १२५

[3] सू. २.३.१७

तृणसदृशकर्मकाभिन्नं त्वत्कर्मकं ज्ञानमिति बोधः। त्वत्कर्मकज्ञाने तृणसदृशकर्मकाभेदश्च त्वयि तृणसदृशाभेदे पर्यवस्यति। तत्र चानादरविवक्षायां त्वां तृणसदृशमपि न मन्ये इत्यर्थः फलितः। अतो नोत्कृष्टत्वविवक्षायां चतुर्थीप्रयोगः।

अत्र 'मन्ये' इत्युपादानात् 'मन्व' इत्यत्र प्रयोगे न चतुर्थी। 'तेन त्वां तृणं मन्व' इत्येव प्रयोगः।

अत्र "अप्राणिष्वित्यपनीय नौकाकान्नशुकसृगालवर्जेष्विति वाच्यम्"[१] तेनाप्राणित्वेऽपि "न त्वां नावमन्नं वा मन्ये" इत्यादौ न चतुर्थी। प्राणित्वेऽपि च "न त्वां शुने मन्ये" इत्यादौ भवत्येव चतुर्थी। न चैवं मन्यतिकर्मत्वाविशेषात् युष्मच्छब्दादपि चतुर्थ्यापत्तिरिति वाच्यम्। अनादरे इत्यस्य कर्मविशेषणत्वेन अनादरव्यञ्जके कर्मणि चतुर्थीविधिप्रतीतेः युष्मच्छब्दार्थस्यानादरव्यञ्जकत्वाभावेन चतुर्थीप्रसङ्गाभावात् इत्यभिहितम्।

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि[२] इति सूत्रार्थः

अध्वभिन्ने गत्यर्थानां कर्मणि द्वितीयाचतुर्थ्यौ स्तश्चेष्टायाम्। शारीरपरिस्पन्दश्चेष्टा। "ग्रामं ग्रामाय वा गच्छति"। चेष्टायां किम्? "मनसा हरिं व्रजति"। अत्र शारीरचेष्टाया अभावान्न चतुर्थी। अनध्वनि किम्? "पन्थानं गच्छति"। गन्त्रा आक्रान्तेऽध्वन्येव अयमनध्वनीति निषेधः। अत्र पथः प्राप्त्याश्रयत्वेन गन्त्रा अधिष्ठितत्वात् निषेधः। यदा तु उत्पथात् पन्था एवाक्रमितुमिष्यते तदा चतुर्थी भवत्येव। उत्पथात् अमार्गात्। ल्यब्लोपे पञ्चमी। अमार्गं परित्यज्येत्यर्थः। उत्पथेन पथे गच्छति। उज्ञयिनीं प्रस्थितः कश्चित् मोहात् तन्मार्गात् प्रच्युतः मार्गान्तरं प्रविष्टः। तं परित्यज्य पुनः उज्ञयिनीमार्गं प्रवेष्टुं तदीयं मार्गमनुसरतीत्यर्थः। अत्र उज्ञयिनीमार्गस्य गन्त्राधिष्ठितत्वाभावात् अनध्वनीति निषेधो न भवति। अतश्चतुर्थी भवति पक्षे द्वितीया च।

अत्र चतुर्थ्याः कर्म अर्थः। "ग्रामं ग्रामाय वा गच्छति"। ग्रामकर्मकं गमनमिति बोधः। गत्यर्थेति किम्? "ओदनं पचति"। गत्यतिरिक्तक्रियाकर्मणि चतुर्थी न। कर्मणीति किम्? गत्यर्थकरणे चतुर्थी न, "अश्वेन गच्छति"। अधिष्ठित इति शब्दप्रयोगसमानकालिकगन्तृव्यापारजन्यफलाश्रये इत्यर्थः। अध्वपदेन न मार्ग उच्यते, अपि तु गन्तृव्याप्तोऽर्थ उच्यते। अत एव "स्त्रियं गच्छति" इत्यादौ अनध्वनीति निषेधात् चतुर्थी न। मार्गपरत्वे तु स्त्रियाः मार्गत्वाभावात् निषेधो न स्यात्।

---

[१] वा. १४६४
[२] सू. २.३.१२

विभक्त्यर्थनिर्णये[१]

गत्यर्थकर्मणि वैकल्पिकीं चतुर्थीं ज्ञापयति "गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि"[२] इति सूत्रं गत्यर्थधातुयोगे तदर्थकर्मणि चेष्टायां तदर्थे सति अध्ववर्जिते द्वितीयाचतुर्थ्यौ भवत इत्यर्थकम्। "ओदनं पचति" इत्यत्र कर्मणि चतुर्थीवारणाय गत्यर्थग्रहणम्। "अश्वेन गच्छति" इत्यत्र करणे चतुर्थीवारणाय गत्यर्थग्रहणम्। "अश्वेन गच्छति" इत्यत्र करणे चतुर्थीवारणाय कर्मणीत्युक्तम्। "मनसा हरिं व्रजति" इत्यत्र कर्मणि चतुर्थीवारणाय चेष्टायामित्युक्तम्। चेष्टा चात्र परिस्पन्दरूपा।

तेन "ग्रामाय रथो गच्छति" इत्यत्र न चतुर्थ्यनुपपत्तिः। अत एव काशिकायां— चेष्टाक्रियाणां परिस्पन्दनक्रियाणां कर्मणीत्युक्तम्। "अध्वानं गच्छति" इत्यत्र कर्मण्यध्वनि चतुर्थीवारणाय अनध्वनीत्युक्तम्।

"आस्थितप्रतिषेधश्चायं विज्ञेयः। आस्थितः संप्राप्त आक्रान्त उच्यत" इति काशिका। अत आक्रान्तेऽध्वनि चतुर्थी निषिध्यते। यदा तु पन्थानमाक्रान्तुमिच्छति तदा चतुर्थी भवत्येव। यथा अयमुत्पथात् पथे अध्वने वा गच्छतीति। एवं "ग्रामं ग्रामाय वा गच्छति" इत्यत्र द्वितीयाचतुर्थ्योराधेयत्वरूपं कर्मत्वमर्थः। तच्च गत्यर्थफलसंयोगेऽन्वेति। तथा च ग्रामवृत्तिसंयोगानुकूलः स्पन्दो वाक्यार्थः। अत एव संप्रदानचतुर्थ्या गत्यर्थकर्मणि चतुर्थीविधेर्न प्रत्याख्यानमिति प्रागेवोक्तम्।

इति चतुर्थ्यर्थविचारः

---

[१] पृ. ३००

[२] सू. २.३.१२

पञ्चम्यर्थविचारः

ध्रुवमपायेऽपादानम्, अपादाने पञ्चमी इति सूत्रयोः व्याख्यानम्

अपादानेऽर्थे "अपादाने पञ्चमी"[१] "ध्रुवमपायेऽपादानम्"[२] इति सूत्रेणापादान-संज्ञा विवृता। अपायो नाम विश्लेषः, वियोग इति यावत्। द्वयोः संयुक्तयोः अन्यतरस्य चलनाद्विश्लेषः। तादृशचलनानाश्रयभूतं ध्रुवम्। तच्चेहार्थादवधिभूतं विवक्षितम्। विश्लेषे साध्ये तदवधिभूतं कारकमपादानं स्यात् इति सूत्रार्थः। "ग्रामादायाति" इत्युदाहरणम्। कस्मादागच्छतीत्याकाङ्क्षाविषयत्वात् ग्रामोऽवधिरिति अपादानत्वम्। ग्रामावधिकमागमनमिति बोधः। "माथुराः पाटलीपुत्रेभ्यः आढ्यतराः" इत्यादौ बुद्धिकल्पितविश्लेषावधित्वमादाय अपादानत्वमिति भाष्ये स्पष्टम्। ध्रुवशब्दस्य चलनानाश्रय इति यथाश्रुतार्थं परित्यज्य अवधिभूतमिति व्याख्यानात् "धावतोऽश्वात् पतति" इत्यत्र अश्वस्यापादानत्वोपपत्तिः। अश्वस्य चलनाश्रयत्वेऽपि पतनक्रियां प्रति कस्मात् इत्याकाङ्क्षाविषयत्वलक्षणमवधित्वं वर्तत इति अपादानसंज्ञा।

प्रौढमनोरमायाम्[३]

ध्रुवमिति। "ध्रु गतिस्थैर्ययोः", अस्मात् कुटादेः पचाद्यच्। "ध्रुव स्थैर्ये" इति पाठे तु इगुपधलक्षणः कः। ध्रुवम् - स्थिरम्। प्रकृतधातूपात्तव्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयः। तच्चार्थादवधेरेवेत्याह — अवधिभूतमिति। कर्तर्यतिव्याप्तिवारणाय सत्यन्तम्। अन्यथा कर्तृसंज्ञाया अपादानसंज्ञा अपवादः स्यात्। कर्तृसंज्ञा तु पचत्यादियोगे चरितार्था। कर्मणि ग्रामेऽतिव्याप्तिवारणाय विशेष्यम्। "धावतोऽश्वात् पतति" इत्यत्र धावनक्रियाश्रयस्याप्यश्वस्य प्रकृतपतधातूपात्तव्यापारानाश्रयत्वात् अवधित्वोपपत्तिः। "परस्परस्मात् मेषावपसरतः" इत्यत्र सृधातुना गतिद्वयस्याप्युपादानात् एकमेषनिष्ठां गतिं प्रति इतरमेषस्य तदनाश्रयत्वात् अपादानत्वं न विरुध्यते। तदुक्तं भर्तृहरिणा —

> अपाये यदुदासीनं चलं वा यदि वाचलम्।
> ध्रुवमेवातदावेशात् तदपादानमुच्यते।।

---

[१] सू. २.३.२८
[२] सू. १.४.२४
[३] पृ. ९१८

पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते।।
उभावप्यध्रुवौमेषौ यद्यप्युभयकर्मणे।
विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते।।
मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक्।। इति।।

अतदावेशादिति। तद्धातूपात्तव्यापारानाश्रयत्वादित्यर्थः।

"पर्वतात् पततोऽश्वात् पतति" इत्यत्र पर्वतावधिकपतनाश्रयोऽश्वः, तदवधिकं देवदत्तादिनिष्ठं पतनमिति बोधः। पञ्चम्यर्थेऽवधौ प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्। प्रत्ययार्थस्तु क्रियायाम्। स च धर्मी न तु धर्ममात्रम्। विभक्त्यर्थे विहितस्य बहुव्रीहेः धर्मिपरतायाः निर्विवादत्वात्। "उद्धृतौदना स्थाली" इत्यत्र हि ओदनकर्मकोद्धरणावधिभूता स्थालीत्यर्थः।

भूषणसारे[1]

अवधिः पञ्चम्यर्थः। "अपादाने पञ्चमी"[2] तच्च "ध्रुवमपायेऽपादानम्"[3] इति सूत्रात् अपायो विश्लेषः तज्जनकक्रिया, तत्रावधिभूतमपादानम् इत्यर्थकात् अवधिभूतमिति भावः। उक्तं च वाक्यपदीये —

"अपाये यदुदासीनं — कर्तृत्वं च पृथक् पृथक्" अस्यार्थः — अपाये विश्लेषहेतुक्रियायाम्, उदासीनम् — अनाश्रयः। अतदावेशात् — तत्क्रियानाश्रयत्वात्। एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वमपादानत्वमिति फलितम्। "वृक्षात् पर्णं पतति" इत्यत्र पर्णस्यापादानत्ववारणाय सत्यन्तम्। "धावतोऽश्वात् पतति" इत्यत्र अश्वस्य अपादानत्वोपपत्तये क्रियायां विश्लेषहेत्विति विशेषणम्। "कुड्यात् पततोऽश्वात् पतति" इत्यत्र अश्वस्य विश्लेषहेतुक्रियाश्रयत्वेऽपि तन्न विरुद्धमित्याह — यस्मादश्वादिति। तद्विश्लेषहेतुक्रियानाश्रयत्वे सतीति विश्लेषस्तद्व्यक्तित्वेन निवेशनीयमिति भावः। एवमश्वनिष्ठक्रियानाश्रयत्वात् कुड्यादेरपि ध्रुवत्वमित्याह — तस्यापीति।

उभयकर्मजविभागस्थले विभागस्यैक्यात् तद्विश्लेषजनकक्रियानाश्रयत्वाभावात् परस्परस्मान्मेषावपसरत इति न स्यादित्याशङ्क्य समाधत्ते — उभावपीति।

---

[1] पृ. १७८
[2] सू. २.३.२९
[3] सू. २.४.२४

मेषान्तरेति। यथा निश्चलमेषादपसरद्द्वितीयमेषस्थले निश्चलमेषस्य अपसरन्मेष-क्रियामादाय ध्रुवत्वम्, तथात्रापि विभागैक्येपि क्रियाभेदात् एकक्रियामादाय परस्य ध्रुवत्वमिति। तथा च विभागानाश्रयत्वे सति विभागजनकतत्क्रियानाश्रयत्वं तत्क्रियायामपादानत्वं वाच्यम्। क्रिया चात्र धात्वर्थो न तु स्पन्दः तेन वृक्षकर्म-जनितविभागवति वस्त्रे "वृक्षात् वस्त्रं पतति" इति संगच्छते। तादृशवृक्षविष्ठ-क्रियायाः प्रकृतपतधात्वर्थत्वाभावेन प्रकृतधात्वर्थानाश्रयत्वस्य वृक्षेऽबाधितत्वात्।

वस्तुतः नैतावत् पञ्चम्यर्थः, गौरवात्। किं तु अवधिमात्रं = विभागाश्रयमात्रं पञ्चम्यर्थः। प्रयोगातिप्रसङ्गस्य द्वितीयार्थविचारदर्शितदिशा वारयितुं शक्यत्वात्। फलाश्रयव्यापाराश्रयादौ परया कर्त्रादिसंज्ञया बाधात् नापादानसंज्ञेति यावत्।

न च विभागाश्रयत्वमात्रस्यापादानसंज्ञानियामकत्वे स्यन्द्यर्थप्रस्रवणजन्यविभा-गाश्रयत्वस्य वृक्षे सत्त्वात् 'वृक्षात् स्यन्दते जलम्' इति प्रयोगापत्तिरिति वाच्यम्। आसनाच्चलितः राज्याच्चलितः इतिवत् इष्टत्वात्। चलत्यर्थक्रियाजन्यविभागाश्र-यत्वस्य पञ्चमीनियामकत्ववत् स्यन्द्यर्थक्रियाजन्यविभागाश्रयत्वस्यापि पञ्चमी-नियामकत्वे क्षत्यभावात्।

एतेन पञ्चमीजन्यापादानत्वबोधे सकर्मकधातुजन्योपस्थितेर्हेतुत्वमिति समाधाना-भासोऽप्यपास्तः। स्यन्द्याद्यकर्मकधातुजन्योपस्थित्यापि पञ्चमीजन्यापादानत्वबोधस्य "वृक्षात् स्पन्दत" इत्यादौ दर्शनेन उक्तकार्यकारणभावायोगात्।

न चैवमपि 'वृक्षात् त्यजति' इति प्रयोगो दुर्वारः, धात्वर्थक्रियाजन्यविभा-गाश्रयत्वात् वृक्षस्येति वाच्यम्। कर्मसंज्ञया अपादानसंज्ञायाः बाधेन पञ्चम्य-संभवात्। पूर्वं कर्तृसंज्ञामादायातिप्रसङ्गः प्राप्तो निवारितः। इदानीं तु कर्मसंज्ञा-मादाय प्राप्तोऽतिप्रसङ्गः वारित इति विशेषः।

यद्वा पञ्चमीजन्यापादानत्वबोधं प्रति त्यज्यादिभिन्नधातुजन्योपिस्थितेर्हेतुत्वमुप-गम्य उक्तप्रयोगो वारणीयः।

न च "वलाहकात् विद्योतते विद्युत्" इत्यत्र कथम् अपादानता? विभागजन-कव्यापारबोधकधातुप्रयोगाभावेन विभागाश्रयत्वरूपापादानत्वासंभवादिति वाच्यम्। तत्र "निःसृत्य" इत्यध्याहृत्य अपादानत्वस्योपपादनीयत्वात्। एतदुक्तं भवति — तत्र निस्सरणपूर्वकं विद्योतनं द्युतधातोरर्थः। धूममरुज्ज्योतिस्समूहो वलाहकः। ततोऽवयवभूतज्योतिषामेव विभागविवक्षया सोऽवधिः। वलाहकावधिकनिस्सर-णोत्तरकालिकं विद्युत्कर्तृकं विद्योतनमिति बोधः।

एवं "रसात् पृथक्" इत्यत्र बुद्धिकल्पितं विभागावधित्वमाश्रित्यापादानत्वं द्रष्टव्यम्। "पृथग्विना०"[1] इति सूत्रेण वा पञ्चमी। इदं चापादानत्वं —

निर्दिष्टविषयं किंचित् उपात्तविषयं तथा।
अपेक्षितक्रियं चेति त्रिधापादानमुच्यते।।

इति वाक्यपदीयात् त्रिविधम्। यत्र साक्षात् धातुना विभागजनकक्रिया निर्दिश्यते तन्निर्दिष्टविषयम् — यथा अश्वात् पतति। यत्र धात्वन्तरार्थाङ्गकं स्वार्थं धातुराह तदुपात्तविषयम्। यथा वलाहकात् विद्योतते विद्युत्। अत्र निस्सरणाङ्गके विद्योतने द्युतिर्वर्तते। अनुपात्तधात्वर्थक्रियासाकाङ्क्षमपेक्षितक्रियमित्युच्यते। यथा "कुतो भवान्, पाटलिपुत्रात्" अत्र आगमनरूपमर्थमध्याहृत्यान्वयः कार्यः। इति प्रत्यपादि।

लघुशब्देन्दुशेखररीत्या अपादानत्वविचारः[2]

लघुशब्देन्दुशेखरे "ध्रुवमपायेऽपादानम्"[3] इति सूत्रं यथा विवृतं तथात्र प्रतिपाद्यते। ध्रुवं = स्थिरम्, अपायः = विभागजनको व्यापारः, तदनाश्रयमिति यावत्। विभागश्च न वास्तवसंबन्धपूर्वकः वास्तव एवात्र विवक्षितः, अपि तु बुद्धिपरिकल्पितसंबन्धपूर्वकः बुद्धिकल्पितोऽपि। "माथुराः पाटलिपुत्रकेभ्य आढ्यतराः" इत्यादौ बुद्धिकल्पितापायाश्रयेणैव भाष्ये पञ्चमीसाधनात्। ध्रुवपदानुपादाने अपायविषये यत् कारकं अपायरूपक्रियाजनकं तदपादानमित्यर्थसंभवात् कर्तुस्तादृशस्य कर्तृसंज्ञां बाधित्वा अपादानसंज्ञा स्यात्। कर्तृसंज्ञा तु पचत्यादियोगे चरितार्था। अतः कर्तृवारणाय ध्रुवमिति। हरिरप्याह —

अपाये यदुदासीनं चलं वा यदि वाचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते।।

इति। स्पष्टं चेदं कैयटादौ।

भाष्यानुसारिणस्तु

एवं हि "त्रस्तादश्वात् पतितः, धावतोऽश्वात् पतति" इत्यादौ अश्वस्य त्रासादिक्रियाश्रयत्वेन तदनाश्रयत्वरूपध्रुवत्वाभावात् अपादानत्वं न स्यात् इत्याशङ्क्य "अध्रौव्यस्याविवक्षितत्वमत्र, यतः सतोऽप्यविवक्षा भवति" इति समाहितं भाष्ये, तत् असंगतं स्यात्। त्वदुक्तस्य पतधात्वर्थविभागाश्रयत्वरूपस्य अध्रुवत्वस्यात्र

[1] सू. २.३.३२
[2] पृ. ६८५-६८८
[3] सू. १.४.२४

असत्त्वेन सतोऽध्रुवत्वस्याविवक्षेत्यस्यासंगतेः। सिद्धान्तेऽपि त्वदुक्तध्रुवपदार्थकथनमेवोचितमिति तदनुक्त्या भाष्यासंगतिश्च। अपि च लोकप्रसिद्धनिश्चलत्वरूपार्थातिरिक्ते अर्थे ध्रुवपदस्य शक्तिकल्पने गौरवम्। हरिकारिकायाम् अतदावेशात् इत्यस्य क्रियाश्रयत्वाविवक्षणादित्यर्थः।

तस्मात् अपाये गतिविशेषे सति यत् ध्रुवम् = अवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्य अनाश्रयत्वं तदपादानम् इति सूत्रार्थः। "त्रस्तादश्वात् पतति" इत्यादौ त्रासादेः अवधित्वोपयोगित्वाश्रयणेन शङ्का, "वृक्षात् पर्णं पतति" इत्यादौ वृक्षे व्यापारस्यासत्त्वात् न अवधित्वोपयोगित्वं तस्य, "त्रस्तादश्वात्" इत्यत्र अश्वे विद्यमानस्यापि व्यापारस्याविवक्षिततत्वात् न तदुपयोगित्वं तस्य इत्युत्तरम्।

ध्रुवमपाये इति तु "वृक्षस्य पर्णं पतति" इत्यादौ वस्तुतस्तस्य (वृक्षस्य) पर्णद्वारा पातजनकत्वात् प्राप्तस्य अपादानत्वस्य वारणाय। एवं च अपाये इत्येतत् कारके इत्यस्य क्रियाजनकत्वेन विवक्षिते इत्यर्थे तात्पर्यग्राहकमिति बोध्यम्। ध्रुवग्रहणं तु कारकान्तराणामिव अपादानस्य अवधिभावोपगमातिरिक्तव्यापाराभावबोधनाय — इत्याहुः।

अपादानत्वशक्तिश्च प्रकृतधात्वर्थविभागाश्रयवर्तिनी इति अपादानसमभिव्याहारे विभागोऽपि धात्वर्थः। एवं च "वृक्षात् पर्णं पतति" इति वाक्यात् वृक्षापादानकविभागपूर्वकः संयोगः पर्णवृत्तिरिति बोधः। विभागजन्यः संयोगः धात्वर्थः।

"वृक्षात् भूमिं पतति" इति वाक्यात् वृक्षापादानकविभागपूर्वकः भूसंयोगानुकूलो व्यापारः पर्णवृत्तिरिति बोधः। अत्र विभागजन्यः संयोगानुकूलो व्यापारः पतधातोरर्थः।

"परस्परस्मात् मेषावपसरतः" इत्यत्र परस्परापादानकविभागपूर्वकं पृष्ठतो गमनं मेषद्वयवृत्ति इति बोधः। विभागपूर्वकं पृष्ठतो गमनमपसरणम्। अत्र मेषपदोपात्तयोरेव क्रियाश्रयत्वात् कर्तृत्वम्। परस्परपदोपात्तयोरेव विभागाश्रयत्वाद् अपादानत्वम्। मेषपदोपात्तेऽपादानत्वाविवक्षणात्। शब्दप्रयोगानुसारित्वात् विवक्षायाः। "आत्मानमात्मना वेत्सि" इत्यादौ एकस्यैव अन्तःकरणाद्युपाधिकृतं भेदमादाय कर्तृत्वकर्मत्वकरणत्ववत् मेषयोः वाचकशब्दरूपोपाधिकृतं भेदमादाय कर्तृत्वापादानत्वयोः उपपत्तेः।

यत्तु अपसरतः इति सृधातुना व्यापारद्वयस्यापि उपादानात् एकमेषनिष्ठं व्यापारं प्रति मेषान्तरस्य तदनाश्रयस्य अपादानत्वमविरुद्धमिति। तन्न। वस्तुतः मेषद्वय-

निष्ठयोः व्यापारयोः भेदेऽपि सृधातुना निवृत्तभेदस्यैव व्यापारस्य उपादानात् उभयोरपि धातूपात्तव्यापाराश्रयत्वेन परत्वात् अपादानत्वं बाधित्वा कर्तृत्वापत्तेः।

अत एव एकशेषसूत्रे भाष्ये उक्तम् — "न वै तिङन्तान्येकशेषारम्भं प्रयोजयन्ति क्रियाया एकत्वात्" इति।

"धनुषा विध्यति" इत्यत्र व्यधधातोः निरस्सरच्छरजन्यवेधोर्थः। तत्र धनुषः अपादानत्वकरणत्वयोरुभयोः प्राप्तौ परत्वात् करणत्वम्।

"ग्रामादायाति" इत्यत्र आङ्पूर्वयाधातोः विभागपूर्वकोत्तरदेशसंयोगानुकूलो व्यापारोऽर्थः। ग्रामापादनकविभागपूर्वकोत्तरदेशसंयोगानुकूलव्यापारश्चैत्रवृत्तिः इति बोधः।

"वृक्षं त्यजति" इत्यत्र व्यापारव्यधिकरणविभागस्यैव धात्वर्थत्वेन तादृशविभागाश्रयस्य वृक्षस्य कर्मसंज्ञा भवति। परया तया अपादानसंज्ञाया बाधः।

स्पन्देस्तु न विभागोऽर्थ इति 'वृक्षे स्पन्दते पर्णम' इत्येव साधु न तु 'वृक्षात् स्पन्दत' इति। चलतेस्तु 'आसनाच्चलति' इति प्रयोगानुसारेण विभागार्थकत्वम्।

"सार्थात् हीयते" इत्यत्र सार्थस्य धात्वर्थप्रधानव्यापाराश्रयत्वेऽपि "अपादाने चाहीयरुहोः"[१] इति ज्ञापकात् कर्मप्रत्ययान्तहीधातुयोगेऽपादानत्वम्। तद्धितप्रकरणस्थमेतत् सूत्रम्। 'हीयत' इत्यादौ कर्मणि लकारे यगन्तस्य एकदेशस्य हीयेत्यनुकरणम्। हीयरुहोः संबन्धि यन्न भवति तस्मिन्नपादाने या पञ्चमी तदन्तात्तसिः स्यादिति सूत्रार्थः। "ग्रामतः आगच्छति'। अहीयरुहोः किम्। "स्वर्गाद्धीयते, पर्वतादवरोहति"। अत्र तसिर्न। अत्र हीययोगेऽपादानत्वाभावे तसेरप्रसक्त्या तद्वारणफलकस्य अहीयेति पर्युदासानुपपत्तिः। तया ज्ञाप्यते हीययोगेऽपादानसंज्ञा भवतीति। न चोक्तस्थले सार्थस्य ज्ञापकेनापादानत्वेऽपि कर्मसंज्ञा कथम्? कर्तुरीप्सितत्वाभावात् अपादानसंज्ञया कर्तृसंज्ञाया अपहारादिति वाच्यम्। तत्र कर्तृपदं न कर्तृसंज्ञकपरम्, अपि तु स्वतन्त्रपरमित्यदोषात्। तथा च सार्थेन त्यज्यते देवदत्त इत्यर्थः। "धावतोऽश्वात् पतति" इत्यत्र धावनक्रियाश्रयस्यापि अश्वस्य प्रकृतपतधातूपात्तव्यापारानाश्रयत्वात्, धावनक्रियाया अविवक्षणाद्वा ध्रुवत्वम्। — इति लघुशब्देन्दुशेखरस्था रीतिः।

---

[१] सू. ५.४.४५

शेखरेऽविद्यमानाः लघुमञ्जूषायां विशेषाः[१]

"परस्परस्मात् मेषावपसरतः" इत्यत्रापादानत्वं हरिणा इत्थमुपपादितम् —

उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे।
विभागे प्रविभक्ते तु क्रिये तत्र व्यवस्थिते।।

इति। तत्तद्व्यक्तित्वेन विभागस्य बुद्ध्या प्रविभागे तत्तद्विभागानुकूलक्रियावत्त्वस्यापरत्राभावादुभयोरपि ध्रुवत्वमित्यर्थः।

तदेवोक्तम् —

मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक्।।

इति। एतन्मतं शेखरे खण्डितवान्। तथैवात्रापि खण्डयत्येवम् — वस्तुतः मेषनिष्ठयोः क्रिययोर्भेदेऽपि सृधातुना निवृत्तभेदाया एव क्रियाया उपादानात् उभयोरपि तत्क्रियाश्रयत्वेन परत्वात् कर्तृत्वापत्तेः। अत एव एकशेषसूत्रे भाष्ये उक्तम् —

"न वै तिङन्तान्येकशेषारम्भं प्रयोजयन्ति, क्रियाया एकत्वात्" इति इति। अपादानत्वशक्त्याश्रय एवावधिरित्युच्यते।

नैयायिकमतखण्डनम्

यत्तु — "वृक्षात् पर्णं पतति" इत्यत्र विभागः पञ्चम्यर्थः। आश्रयत्वं प्रकृतिप्रत्ययार्थयोः संसर्गः। विभागस्य जनकतासंबन्धेन धात्वर्थेऽन्वयः। वृक्षाश्रयकविभागजनकपतनाश्रयः पर्णमिति बोध इति। तन्न। वृक्षापादानकविभागेत्येवं बोधानुभवात् अपादानत्वशक्तिमत एव पञ्चम्यर्थत्वौचित्यात्। "वृक्षाद्विभजत" इत्यादौ विभागस्य पञ्चम्यर्थतया धात्वर्थतया द्विधा भानापत्तेश्च। तत्रापादानस्यैव पञ्चम्यर्थत्वे किमर्धजरतीयेन। एतेन विभाग आश्रयश्च पञ्चम्यर्थ इति भूषणोक्तमप्यपास्तम्। अपि च नैयायिकमते प्रकृत्यर्थप्रत्ययार्थयोः क्लृप्तस्याभेदस्यान्वयस्य त्यागापत्तिः।

तस्मात् "वृक्षात् पर्णं पतति" इत्यत्र पतधातोः विभागजन्यः संयोगोऽर्थः। पञ्चम्यर्थः अपादानम्। तत्राभेदेन प्रकृत्यर्थस्यान्वयः। अपादानस्य विभागे (स्वनिष्ठापादानतानिरूपकत्वसंबन्धेन) अन्वयः। वृक्षाभिन्नापादानकविभागजन्यसंयोगः पर्णनिष्ठ इति बोधः। यद्वा अपादानादिवृक्षीयपर्णकर्तृकं पतनमिति बोधः।

---

[१] ल.म.पृ. १२८७

"वृक्षात् भूमिं पर्णं पतति" इत्यत्र विभागजन्यसंयोगानुकूलव्यापारो धात्वर्थः। विभागश्च फलतावच्छेदकः। वृक्षापादानकविभागजन्यभूम्याश्रयकसंयोगानुकूलः पर्णकर्तृको व्यापार इति बोधः।

"वृक्षं त्यजति" इत्यादौ विभागानुकूलो व्यापारो धात्वर्थः। विभागरूपफलाश्रयतया वृक्षस्य कर्मत्वमेव।

"वृक्षात् फलं त्यजति" इत्यादौ विभागजन्यसंयोगानुकूलव्यापारो धात्वर्थः। वृक्षापादानकविभागजन्यसंयोगानुकूलः फलकर्तृको व्यापार इति बोधः।

स्पन्देर्न विभागोऽर्थ इति वृक्षे स्पन्दत इत्येव।

चलतेस्तु "आसनाच्चलितः" इति प्रयोगात् अस्त्येव विभागार्थकत्वम्।

"वृक्षाद्विभजते पर्णम्" इत्यत्र विभागजन्यः पूर्वदेशसंयोगनाशः धात्वर्थः। वृक्षापादानकविभागजन्यपूर्वदेशसंयोगनाशः पर्णवृत्तिरिति बोधः।

"वलाहकात् विद्योतते विद्युत्" इत्यत्र विपूर्वकद्युतधातोः विभागजन्यसंयोगानुकूलक्रियारूपनिस्सरणपूर्वकं विद्योतनमर्थः। वलाहकापादानकविभागजन्यसंयोगानुकूलक्रियोत्तरकालिकं विद्युत्कर्तृकं विद्योतनमिति बोधः। इदम् उपात्तविषयम् इत्युच्यते। वलाहको नाम धूमज्योतिस्सलिसमरुतां संघातः। ततोऽवयवभूतज्योतिषः भेदविवक्षया विभागविवक्षणात् स संघातोऽवधिः। यदा तु तेजस आधारत्वेन स विवक्ष्यते तदा "वलाहके विद्योतते" इति सप्तमी।

यदा तु अभेदेन विवक्षा, तेजोमयत्वात् प्रकाशनसामर्थ्यम् उदकधूमादेस्तत्प्रकाशप्रतिबन्धकत्वं च न विवक्षितम्, तदा "वलाहको विद्योतते" इति।

यदा तु प्रत्यक्षसिद्धमागमनं मनसि निधाय "कुतो भवान्" इति प्रश्ने "पाटलिपुत्रात्" इति उत्तरयति तदा तत्र आकाङ्क्षावादोक्तरीत्या वाक्यैकदेशन्यायेन बोधः। एतत् अपेक्षितक्रियम् इत्युच्यते।

"वृक्षात् पतति" इति तु निर्दिष्टविषयम्। निर्दिष्टः साक्षात् धातुना बोधितः स्ववाच्यत्वेन सर्वत्र प्रसिद्धः विषयो निरूपकोऽर्थः पतनादिक्रियारूपो यस्य तत्।

घटाद्भिन्न इत्यादावप्यनेनैवापादानत्वम्। सूत्रेऽपायशब्देन भेदस्यापि ग्रहणम्, "पञ्चमी विभक्ते"[१] इत्यत्र विभक्तिशब्देनेव। घटावधिकभेदाश्रयः पट इति बोधः। भेदमूलकसंबन्धविवक्षायां घटीयो भेद इत्यपि प्रयोगः साधुः।

---

[१] सू. २.३.४२

नन्वेवंरीत्या अपायशब्देन भेदस्य ग्रहणेऽपि घटादीनामपादानत्वासिद्धिरेव। नदी कूलं भिनत्तीत्यत्रेव 'घटाद्भिन्नः पटः' इत्यत्र द्विधाभवनानुकूलव्यापाररूपविदारणस्याप्रतीतेः। भिदिर् विदारणे इत्यनुशासनेन विदारणस्यैव भेदपदार्थत्वादिति चेत् — न। विदारण इत्यनेन भेदज्ञानविषयत्वरूपविदारणस्यापि विवक्षितत्वात्। एकत्वेन गृहीतस्य घटपटादिवस्तुजातस्य भेदज्ञानविषयत्वेन ज्ञाने बुद्धिकल्पितविदारणस्य घटाद्भिन्न इत्यत्रापि सत्त्वात्। इति मञ्जूषा।

इत्थं वैयाकरणग्रन्थानुसारेण "ध्रुवमपायेऽपादानम्"[१] इति सूत्रं सोदाहरणं व्याख्यातम्। अथ नैयायिकग्रन्थानुसारेण तत्सूत्रं व्याख्यायते, पञ्चम्यर्थश्च निरूप्यते।

कारकचक्रानुसारेण अपादानपञ्चम्यर्थनिरूपणम्[२]

परकीयक्रियाजन्यविभागाश्रयत्वमपादानत्वम्। परकीयत्वं परसमवेतत्वम्। यस्यापादानत्वं विवक्ष्यते तदपेक्षया परत्वमत्र बोध्यम्। "वृक्षात् पर्णं पतति" इत्यत्र अपादानवृक्षापेक्षया परं पर्णं, तत्समवेता पतनक्रिया, तज्जन्यः विभागः वृक्षपर्णविभागः तदाश्रयत्वं वृक्षस्यास्तीति तस्यापादानता। पर्णनिष्ठपतनजन्यविभागस्य वृक्षपर्णोभयनिष्ठतया पतनक्रियाजन्यविभागाश्रयस्य पर्णस्य अपादानत्ववारणाय क्रियायां परकीयत्वनिवेशः। अत्र तु पञ्चम्याः विभागजनकत्वं भेदप्रतियोगितावच्छेदकत्वं चार्थः। विभागे भेदे च वृक्षस्य आधेयतासंबन्धेनान्वयः। पञ्चम्यर्थयोः आश्रयत्वसंबन्धेन धात्वर्थे पतनेऽन्वयः। एवं च वृक्षनिष्ठविभागजनकवृक्षनिष्ठभेदप्रतियोगितावच्छेदकपतनाश्रयः पर्णमिति बोधः। वृक्षनिष्ठः भेदः पतनवान्नेति भेदः।

विभागे धात्वर्थतानवच्छेदकेति विशेषणं देयम्। तेन "वृक्षं त्यजति खगः" इत्यत्र खगवृत्तिक्रियाजन्यविभागाश्रयत्वात् वृक्षस्यापादानत्वं स्यादिति शङ्कायाः नावसरः। तत्र विभागानुकूलव्यापारस्य त्यजधात्वर्थतया विभागस्य धात्वर्थतावच्छेदकत्वात्। एवं च पतधातोः विभागानवच्छिन्नः व्यापारः अर्थ इति लभ्यते।

यत्तु तद्धात्वर्थतावच्छेदकावच्छिन्ना या क्रियानिष्ठा जनकता तन्निरूपितजन्यताश्रयविभागाश्रयत्वमपादानत्वम्। खगनिष्ठक्रियानिष्ठा जनकता विभागानवच्छिन्नैव भवति। न हि विभागविशिष्टत्वेन रूपेण क्रियायाः विभागजनकत्वम्। तथा च त्यजधातोः विभागावच्छिन्नक्रियावाचकतया विभागो धात्वर्थतावच्छेदकः। तदव-

[१] सू. १.४.२४

[२] कारकचक्रे पृ. ६३

च्छिन्नजनकतानिरूपितजन्यताश्रयत्वं न विभागस्येति "वृक्षं त्यजति खगः" इत्यत्र वृक्षस्य नापादानत्वप्रसक्तिः। "वृक्षात् पर्णं पतति" इत्यत्र विभागस्य धात्वर्थेऽप्रवेशात् न विभागो धात्वर्थतावच्छेदकः, अपि तु व्यापारत्वमेव तथा। व्यापारत्वावच्छिन्नजनकतानिरूपितजन्यताश्रयत्वं विभागेऽस्तीति तदाश्रयस्यापादानत्वोपपत्तिः। एवं च विभागे धात्वर्थतानवच्छेदकेति विशेषणं न देयम् इति।

तन्न सत्। तथा सति अधस्संयोगावच्छिन्नक्रियाया एव पतधात्वर्थतया वृक्षपर्णविभागे पर्णाधस्संयोगस्य जनकतानवच्छेदकतया तद्धात्वर्थतावच्छेदकाधस्संयोगावच्छिन्नजनकतानिरूपितजन्यताश्रयविभागाश्रयत्वं वृक्षे नास्तीत्यपादानलक्षणासंभवापत्तेः। तद्धात्वर्थतावच्छेदकोपलक्षितजनकतानिरूपितजन्यत्वं चोभयत्र समानमिति।

एवं च परसमवेतक्रियाजन्यतद्धात्वर्थतानवच्छेदकविभागाश्रयत्वमपादानत्वमिति निष्कर्षः। "ग्रामात् गच्छति" इत्यत्र गमनजन्यगमधात्वर्थतानवच्छेदकविभागाश्रयत्वात् ग्रामस्य अपादानत्वम्।

"ध्रुवमपायेऽपादानम्"[१] इति पाणिनिसूत्रस्यायमर्थः। अपाये = विभागे, ध्रुवं = निश्चलम्, तद्विभागजनकक्रियाशून्यमपादानमिति।

न चैवं "धावतोऽश्वात् अश्ववारः पतति" इत्यत्र अश्वस्य अपादानत्वं न स्यात्, अश्वस्य विभागजनकक्रियाशून्यत्वाभावादिति वाच्यम्। तत्र पञ्चमीप्राप्त्यर्थं सूत्रान्तरस्य करणीयत्वात्।

वस्तुतस्तु अश्वस्य धावनं अश्ववारपतनं च अश्वाश्ववारपतने हेतुः। अश्ववारपतनं च अश्वाश्ववारविभागे हेतुः। एवं चाश्ववारपतनेन अन्यथासिद्धस्य धावनस्य विभागं प्रत्यहेतुत्वात् विभागजनकपतनशून्यस्याश्वस्यापादानत्वसंभवेन न सूत्रान्तरप्रणयनस्यावश्यकतेति मम प्रतिभाति।

वस्तुतस्तु — विभागजनकत्वं यत्क्रियायामन्वीयते, तत्क्रियाशून्यत्वमपादानत्वम्। तेन "धावतोऽश्वात् पतति" इत्यादौ न काप्यनुपपत्तिः। तत्र पतनक्रियायामेव पञ्चम्यर्थस्य विभागजनकत्वस्यान्वयेन अश्ववृत्तिधावनक्रियायां तदनन्वयादिति।

मतान्तरम्

केचित्तु — अपाये विभागे, ध्रुवम् अवधिभूतमपादानमित्यर्थः। अवधित्वं स्वरूपसंबन्धविशेषः पञ्चम्युल्लेखिप्रतीतिबलात् कल्प्यते। तेन "धावतोऽश्वात्

---

[१] सू. १.४.२४

पतति'' इत्यादौ सक्रियस्यापि अश्वादेरपादानत्वं नानुपपन्नम्। अत एव वृक्षपर्णयोः क्रियया पर्णस्य विभागेऽपि वृक्षस्यावधित्वोपपत्तिः इत्याहुः।

''वृक्षात् विभजते पर्णम्'' इत्यादौ विभागावधित्वमपादानत्वम्। अवधित्वम् अवधितानिरूपकत्वात्मकमवधिमत्त्वं वा स्वरूपसंबन्धरूपं पञ्चम्यर्थः। वृक्षावधिकविभागाश्रयः पर्णमित्यन्वयबोधः।

न चैवं 'पर्णं स्वस्माद्विभजत' इत्यपि स्यात्, उभयनिष्ठविभागावधित्वस्योभयत्रैव सत्त्वादिति वाच्यम्। स्वप्रतियोगिकत्वविशिष्टसंयोगस्येव स्वावधिकत्वविशिष्टविभागाश्रयत्वस्य स्वस्मिन् अभावात्।

एवं चापादानपदं पञ्चमी च नानार्थकमिति ध्येयम्। न चैवं परकीयस्पन्दनजन्यविभागाश्रयत्वेन वृक्षस्य, 'वृक्षात् पर्णं स्पन्दत' इत्यपि स्यादिति वाच्यम्। परकीयक्रियेत्यत्र क्रियापदेन सकर्मकधात्वर्थस्य विवक्षितत्वात्। स्पन्देश्चाकर्मकत्वात्। तथा च परसमवेतसकर्मकधात्वर्थजन्यतद्धात्वर्थतानवच्छेदकविभागाश्रयत्वमपादानत्वमिति निष्कर्षः।

शब्दशक्तिप्रकाशिकानुसारेण अपादानत्वनिर्वचनम्[१]

अपादानत्वं निर्वक्ति —

क्रियाधर्मिणि यः स्वार्थः पञ्चम्या विग्रहस्थया।
अनुभाव्यः कारकं तदपादानत्वसंज्ञकम्।।

क्रिया = धात्वर्थः। यद्धातूपस्थाप्ये यादृशार्थे धर्मिणि विग्रहवाक्यस्थया पञ्चम्या यः स्वार्थोऽनुभावयितुं शक्यः कारकं च सोऽर्थः तद्धातूपस्थाप्यतादृशक्रियायामपादानत्वमुच्यते। तथा च कारकत्वे सति यद्धातूपस्थाप्ययादृशार्थधर्मिकान्वयबोधप्रकारः यः पञ्चम्यर्थः स तद्धातूपस्थाप्यतादृशक्रियायामपादानत्वमिति पर्यवसितम्। ''वृक्षात् पतितः'' इत्यादौ वृक्षावधिकविभागानुकूलपतनकर्तेत्यन्वयबोधः। तत्र धातूपस्थाप्यपतने पञ्चम्युपस्थाप्यो विभागः प्रकार इति स विभाग एव तत्रापादानत्वम्।

न च 'वृक्षादिव स्वस्मात् पतितश्चैत्रः' इति प्रयोगवारणाय धात्वर्थान्वितं परसमवेतत्वमपि तत्र पञ्चम्यर्थ इति वाच्यम्। परसमवेतेत्यस्य पञ्चमीप्रकृत्यर्थभिन्नसमवेतेत्यर्थः। स्वभिन्नसमवेतपतनस्य स्वस्मिन् बाधान्न तादृशप्रयोगः। तथा च परसमवेतत्वमप्यपादानत्वं स्यादिति वाच्यम्। इष्टापत्तेः।

---

[१] श.श.प्र.पृ. २९७-३०५

वस्तुतस्तु — परसमवेतत्वं न पञ्चम्यर्थः, तथा सति द्रव्यान्यसमवेतस्य पतनस्याप्रसिध्द्या "द्रव्यात् पतति खगः" इत्यादेरयोग्यतापत्तेः। परं तु स्वावधिकत्वसंबन्धेन प्रकृत्यर्थान्वितस्य पञ्चम्यर्थविभागस्य सामानाधिकरण्यानुकूलत्वोभयसंबन्धेन धात्वर्थे पतनेऽन्वयस्य व्युत्पन्नत्वात् "न स्वस्मात् पतितश्चैत्रः" इति प्रयोगापत्तिः। चैत्रावधिकत्वविशिष्टविभागाधिकरणनिष्ठं यत् चैत्रविभागानुकूलं पतनं तस्य चैत्रे बाधात्। स्वावधिकत्वविशिष्टविभागस्य स्वस्मिन्नसत्वात्। "वृक्षात् पतितश्चैत्रः" इत्यत्र तु वृक्षावधिकत्वविशिष्टविभागाधिकरणचैत्रनिष्ठपतनाश्रयत्वस्य चैत्रे सत्त्वात् अपादानत्वोपपत्तिः प्रयोगोपपत्तिश्च।

विग्रहस्थयेति विशेषणस्य प्रयोजनमुच्यते। प्रासादमारुह्य प्रेक्षक इत्यर्थे प्रासादात् प्रेक्षत इति वाक्यं प्रयुज्यते। अत्र पञ्चम्याः स्वकर्मकारोहणोत्तरकालिकत्वमर्थः। नैतत् वस्तुतः अपादानत्वरूपम्। एतस्य अपादानतारूपत्ववारणाय विग्रहस्थया इति पञ्चम्याः विशेषणं दत्तम्। नेयं पञ्चमी विग्रहस्था। न हि 'प्रासादमारुह्य प्रेक्षक' इत्यस्य प्रासादात् प्रेक्षत इति विग्रहवाक्यम्। अतो न दोषः।

अपादानशब्दस्तु तत्तत्क्रियानधिकरणत्वे सति तत्तत्क्रियाजन्यविभागाश्रये शक्त इति न तादृशक्रियाश्रये खगादौ अपादानशब्दप्रयोगः।

तरुकर्मकस्त्याग एव तरुतः पतनम्। अतः तरोः त्यागं प्रति कर्मत्ववत् अपादानत्वमपि इष्टमेव। न च तर्हि 'तरोः त्यजति' इति प्रयोगः स्यादिति वाच्यम्। धात्वर्थतानवच्छेदकीभूते एव विभागे पञ्चम्याः साधुतया त्यजेर्विभागावच्छिन्नक्रियावाचितया धात्वर्थतावच्छेदके विभागे पञ्चम्या असाधुत्वात्।

'वृक्षादपैति' इत्यादौ लक्षणया पतनमेव धात्वर्थः। पञ्चम्यर्थो विभागः। तत्र विभागावच्छिन्नक्रियायाः धात्वर्थत्वे 'वृक्षं त्यजति, जहाति' इत्यादिवत् 'वृक्षमपैति' इति प्रयोगः साधुः।

पतधातुस्तु न विभागावच्छिन्नं स्पन्दमभिधत्ते, किं तु अधस्संयोगावच्छिन्नं, गुरुत्वप्रयोज्यपतनत्वजात्यवच्छिन्नं वा अभिधत्ते।

नन्वेतावता अकर्मकधातुयोग एवापादानपञ्चम्याः साधुतया 'वृक्षाच्चलति' इतिवत् 'वृक्षात् स्पन्दत' इत्यपि प्रयोगः स्यादिति वाच्यम्। इष्टापत्तेः।

मतान्तरखण्डनम्

यत्तु — "तरुं त्यजति" इत्यत्र विभागो धात्वर्थः। क्रियाजन्यविभागत्वेनापादानत्वमिव धात्वर्थतावच्छेदकीभूतफलत्वेन कर्मत्वमपीति अपादानत्वकर्मत्वयोः

विभक्तिप्रसक्तौ कर्मत्वस्य परत्वात् तस्य बोधिका द्वितीयैव प्रवर्तते, न त्वपादानत्वस्य बोधिका पञ्चमी, तथैव साकाङ्क्षत्वात्,

अपादानसंप्रदानकरणाधारकर्मणाम्।
कर्तुश्चोभयसंप्राप्तौ परमेव प्रवर्तते।।

इत्यनुशासनात् इति। तच्चिन्त्यम्। त्यजेः स्पन्दमात्रे लक्षणास्थले तरोस्त्यजतीति प्रयोगापत्तेः।

"वृक्षाद्विभजते खगः" इत्यत्रावधित्वमवधितानिरूपकत्वं वा पञ्चम्यर्थः धात्वर्थेऽन्वेति। तेन वृक्षनिष्ठावधितानिरूपकविभागवान् खगः इत्याकारकस्तत्र बोधः। स्वप्रतियोगिकसंयोगस्येव स्वावधिकविभागस्यापि स्वस्मिन्नसत्त्वादेव स्वस्माद्विभजत इत्यादिको न प्रयोगः। अवधित्वं च स्वरूपसंबन्धविशेषः पदार्थान्तरं वा।

व्युत्पत्तिवादरीत्या अपादानत्वनिरुक्तिः[१]

"वृक्षात् पर्णं पतति" इत्यादौ पञ्चम्या प्रकृत्यर्थस्य वृक्षादेः पतनादिक्रियानिरूपितमपादानत्वं प्रत्याय्यते। अपादानत्वं च स्वनिष्ठभेदप्रतियोगितावच्छेदकीभूतक्रियाजन्यविभागाश्रयत्वम्। स्वं — वृक्षः तन्निष्ठो भेदः "पतनवान्न" इति प्रतीतिसिद्धः तत्प्रतियोगितावच्छेदकीभूता क्रिया पतनक्रिया तज्जन्यो विभागः वृक्षपर्णविभागः तदाश्रयत्वं वृक्षेऽस्तीति समन्वयः। पर्णादेः स्वनिष्ठः यः वृक्षविभागः तज्जनकं यत् स्वपतनं तदपादानत्वमादाय "पर्णं स्वस्मात् पतति" इति प्रयोगवारणाय स्वनिष्ठभेदप्रतियोगितावच्छेदकीभूतेति क्रियायां विशेषणम्। पर्णनिष्ठक्रियायां पर्णनिष्ठभेदप्रतियोगितावच्छेदकत्वं नास्तीति नोक्तदोषः।

तत्र क्रियायाः धातुनैव लाभात् भेदप्रतियोगितावच्छेदकत्वे विभागे च पञ्चम्याः शक्तिद्वयम्। भेदे विभागे च प्रकृत्यर्थस्य वृक्षस्याधेयतासंबन्धेनान्वयः। प्रतियोगितावच्छेदकत्वमाश्रयतासंबन्धेन, विभागश्च जनकतासंबन्धेन क्रियायामन्वेति। जनकतासंबन्धस्य वृत्त्यनियामकस्याभावप्रतियोगितानवच्छेदकतया नञा "वृक्षान्न पतति पर्णम्" इत्यादौ तत्संबन्धावच्छिन्नप्रतियोगिताकाभावः क्रियायां बोधयितुं न शक्यत इति यदि विभाव्यते, तदा विभागजनकत्वमेव पञ्चम्यर्थोस्तु। प्रतियोगितावच्छेदकत्वस्येव तस्याप्याश्रयतासंबन्धेन क्रियायामन्वयः। एवं च वृक्षनिष्ठभेदप्रतियोगितावच्छेदकतन्निष्ठविभागजनकपतनाश्रयः पर्णमित्याकारक उक्तस्थले बोधः।

[१] व्यु.वा.पृ. २५२-२५४

आक्षेपः

अथ पञ्चमीसमभिव्याहृतनञा उक्तयोः पञ्चम्यर्थयोः भेदप्रतियोगितावच्छेदकत्व-विभागजनकत्वयोः द्वयोः अभावद्वयं बोध्यते? उत यथायोगमेकतरस्य वा? नाद्यः पक्षः, "वृक्षात् पर्णं पतति, न स्वस्मात्" इत्यत्र स्वनिष्ठपतने स्वनिष्ठभेद-प्रतियोगितावच्छेदकत्वाभावसत्त्वेऽपि स्वनिष्ठविभागजनकत्वाभावासत्त्वेन अयोग्य-तापत्तेः, "वृक्षात् पतति न भूतलात्" इत्यत्र पतने भूतलनिष्ठविभागजनकत्वा-भावसत्त्वेऽपि भूतलनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावासत्त्वेन अयोग्यतापत्तेश्च। नापि द्वितीयः, "वृक्षात् पर्णं पतति न पर्णात्" इत्यत्र पत्रनिष्ठपतने पत्रनिष्ठ-विभागजनकत्वसत्त्वेन तदभावः बाधितः, तथा पत्रान्तरनिष्ठभेदप्रतियोगितावच्छेद-कत्वसत्त्वेन तदभावोऽपि बाधितः इति योग्यतायाः निर्वाहयितुमशक्यत्वादिति।

समाधानम्

अत्राहुः — विभागो जनकत्वं च पञ्चम्यर्थः। विभागे प्रकृत्यर्थस्यावधिकत्वं संबन्धः। तेन संबन्धेन प्रकृत्यर्थविशिष्टस्य विभागस्य विशिष्टनिरूपितत्वसंबन्धेन जनकत्वेऽन्वयः। विशिष्टविभागनिरूपितजनकत्वस्य क्रियायामन्वयः। नञ् सम-भिव्याहारे नञर्थेऽभावे तस्य प्रतियोगित्वसंबन्धेनान्वयः। अभावस्य क्रियाया-मन्वयः। जनकत्वं च फलोपधानरूपम्। फलोपधानं नाम कार्याव्यवहित-प्राक्क्षणावच्छेदेन कार्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वे सति कार्यसामानाधिकरण्यम्। वृक्षपत्रविभागजनकपत्रनिष्ठपतनक्रिया च न पत्रा-वधिकत्वविशिष्टविभागोपधायकम्। पत्रस्य स्वावधिकत्वविशिष्टविभागानधिकरण-त्वेन पत्रक्रियायां विशिष्टविभागसामानाधिकरण्याभावात्। अतः 'वृक्षात् पर्णं पतति न स्वस्मात्' इति प्रयोगस्य नानुपपत्तिः। वृक्षावधिकत्वविशिष्टविभागजनकं स्वावधिकत्वविशिष्टविभागजनकत्वाभाववच्च यत् पतनं तदाश्रयः पर्णमिति हि तत्र बोधः। स चाबाधितार्थविषयक इति।

वृक्षान्यस्मात् पतति पर्णे 'वृक्षान्न पतति पर्णम्' इति वाक्यात् वृक्षावधि-कत्वविशिष्टविभागजनकत्वाभाववत् यत् पतनं तदाश्रयः पर्णमिति बोधः। यदा तु पर्णं न पतति तदा 'वृक्षात् न पतति पर्णम्' इति वाक्यात् वृक्षावधिकत्व-विशिष्टविभागजनकपतनानाश्रयः पर्णमिति ब्रोध इत्यूह्यम्।

"वृक्षाद्विभजते" इत्यत्रापि वृक्षावधिकत्वं विभागे प्रतीयते। तत्रापादानताया अवधितारूपत्वात् अवधित्वं पञ्चम्यर्थः। वृक्षावधिकत्वविशिष्टविभागनिरूपित-मेवाश्रयत्वमाख्यातेन बोध्यते। अतो वृक्षः स्वस्माद्विभजते इति न प्रयोगः। यथा

हि स्वप्रतियोगिकत्वविशिष्टसंयोगः स्वस्मिन्न वर्तते तथा स्वावधिकत्वविशिष्टविभागोऽपि स्वस्मिन्न वर्तते इति।

फलोपधायकत्वरूपस्य जनकत्वस्य पञ्चम्यर्थत्वे गौरवमिति यदि आलोच्यते, तदा विभागः अधिकरणता प्रयोजकत्वं च 'वृक्षात् पर्णं पतति' इत्यादौ पञ्चम्यर्थः। विभागेऽवधिकत्वसंबन्धेन प्रकृत्यर्थस्यान्वयः। तद्विशिष्टविभागस्य निरूपितत्वसंबन्धेनाधिकरणतायामन्वयः। अधिकरणतायाः निरूपितत्वसंबन्धेन प्रयोजकतायामन्वयः। प्रयोजकतायाः आश्रयत्वसंबन्धेन धात्वर्थपतनेऽन्वयः। तथा च वृक्षावधिकत्वविशिष्टविभागनिरूपिताधिकरणतानिरूपितप्रयोजकताश्रयपतनाश्रयः पर्णम् इत्यन्वयबोधः। वृक्षावधिकत्वविशिष्टविभागाधिकरणता पर्णनिष्ठा। तां प्रति पत्रनिष्ठपतनस्य प्रयोजकत्वात् उक्तवाक्यार्थोपपत्तिः इति न्यरूपि भट्टाचार्यैः।

पदवाक्यरत्नाकरानुसारेण अपादानपञ्चम्यर्थः[१]

ङसिभ्यांभ्यस इत्येषा विभक्तिः पञ्चमी तया।
अपायत्वं ध्रुवत्वं चेत्यपादानत्वमुच्यते।।

ङसिभ्यांभ्यस इति पञ्चमी। ङकार इत्संज्ञकः। इकार उच्चारणार्थः। "तरोः पत्रं पतति" इत्यत्र अपादानत्वं पञ्चम्यर्थः। अपादानत्वं च ध्रुवत्वे सति तत्तत्क्रियाजन्यविभागाश्रयत्वम्। "ध्रुवमपायेऽपादानम्"[२] इत्यनुशासनात्। ध्रुवत्वं तत्क्रियानाश्रयत्वम्। तथा च तत्क्रियानाश्रयत्वे सति तत्क्रियाजन्यविभागाश्रयत्वमपादानत्वमित्युक्तं भवति। विशेषणस्याभावात् पत्रस्य न स्वनिष्ठक्रियापादानत्वम्। विशेष्यविशेषणयोरेकक्रियायां निवेशात् "कुड्यात् पततोऽश्वात् पतति" इत्यत्र पतनान्तरकर्तर्यश्वे तदितरकर्तृकपतनापादानत्वहानिर्न भवति। तथा च क्रियाविशिष्टत्वमपादानत्वम्। वैशिष्ट्यं च स्वानधिकरणत्वस्वजन्यविभागाश्रयत्वोभयसंबन्धेन।

यत्तु भर्तृहरिणा —

अपाये यदुदासीनं चलं वा यदि वाचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते।।

पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते।।

---

[१] प.वा.र.पृ. ७४२-७५८

[२] सू. १.४.२४

उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे।
विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते।।

मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक्।।

इत्युक्तम्। तस्याप्युक्तार्थे एव पर्यवसानम्। व्याख्यातृकृततद्विवरणानुसारात्। तथाहि विवरणम् —

"अपाये = विभागे, सतीति शेषः। उदासीनं विभागजनकक्रियानधिकरणम्। अतदावेशात् = विभागजनकक्रियानधिकरणत्वात्। ननु 'परस्परस्मान्मेषावपसरतः' इत्यत्र उभयकर्मजन्ये विभागे विभागजनकक्रियानधिकरणत्वं न कस्यापि मेषस्येत्याशङ्कते — उभावपीत्यादिना। न विभागजनकत्वेन क्रिया प्रकृते निवेशनीया, किं तु ताद्रूप्येणेति नानुपपत्तिरिति समाधत्ते — प्रविभक्ते इत्यादिना। तु इत्यस्य अपीत्यर्थः। नन्वपादानसंज्ञावरुद्धे कथं कर्तृसंज्ञा मेषयोः 'आकडारादेका संज्ञा'[1] इति प्रतिज्ञानात् इत्याशङ्क्य भिन्नभिन्नक्रियानिरूपितकारकान्तरसमावेशो न विरुद्ध इत्यभिप्रायेणाह — मेषान्तर इत्यादिना।" इति।

तत्र क्रियादेः अन्यलभ्यत्वात् विभागजनकत्वं भेदप्रतियोगितावच्छेदकत्वं पञ्चम्यर्थः। विभागे भेदे च प्रकृत्यर्थस्य तरोः आधेयतासंबन्धेन युगपदन्वयः। तथा च "तरोः पत्रं पतति" इत्यत्र तरुनिष्ठविभागजनिका तरुनिष्ठभेदप्रतियोगितावच्छेदिका च पतनक्रिया वाक्यार्थः।

एकस्यैव तरोर्यौगपद्येनोभयत्रान्वयस्वीकारेण पत्रान्तरनिष्ठभेदप्रतियोगितावच्छेदिकामेतत्पत्रस्य तर्वादिविभागजनिकामेतत्क्रियामादाय 'पत्रात् पत्रं पतति' इति न प्रयोगः।

नन्वेवमपि वृक्षाद्वेपते कम्पते इत्यादिप्रयोगो दुर्वारः पञ्चम्यर्थस्य विभागजनकत्वस्य धात्वर्थे कम्पादावन्वयसंभवात्। "आसनाच्चलितः" इत्यादेरिव तस्येष्टत्वे तरोस्त्यजतीति स्यात् इति चेत् — उच्यते।

ब्रूते त्यजिजहात्यादिर्विभागफलिकां क्रियाम्।
उक्तार्थानामप्रयोगान्न चापादानपञ्चमी।।

त्यजत्यादिना विभागजनकक्रियावाचिना पञ्चम्यर्थस्य क्रोडीकृतत्वात् उक्तार्थानामप्रयोग इति तर्वादिपदान्न पञ्चमी। किं तु विभागान्विताधेयतार्थिका द्वितीयैव। परया कर्तृसंज्ञया अपादानसंज्ञा बाध्यत इति वैयाकरणाः।

---

[1] सू. १.४.१

नन्वेवमपसरत्यादेः विभागफलकक्रियावाचकतया "सभातोऽपसरति" इत्यादौ पञ्चम्यनुपपत्तिः। न हि स्पन्दत्यपसरत्योः एकार्थकत्वम्, अनुभवविरोत् इति चेत् — उच्यते।

ये देशान्तरसंयोगफलकस्पन्दवाचिनः।
अकर्मका निरेत्याद्याः पञ्चमी तान् व्यपेक्षते।।

निरेत्याद्याः निःपूर्वकेण्धातुपर्यायाः निर्गच्छत्यपसरत्यादयः। तान् व्यपेक्षते — तन्निरूपिताकाङ्क्षावती। निर्गम्यपसरत्यादिर्धातुः बहिरादिसंयोगफलकक्रियावाची धात्वर्थान्तर्भूतबहिरादिकर्मकत्वादकर्मकः। तेन विभागस्य फलविधयानुपादानात् पूर्वदेशस्य अपादानत्वं निराबाधम्। तथा चानभिहितविभागाभिधानाय "गृहान्निर्गच्छति" "सदसोऽपसरति" इत्यादौ निर्गम्यादिः पञ्चम्या अपेक्ष्यते।

एवम् ऊर्ध्वसंयोगफलकक्रियावाचिनः उद्धरतेर्योगेऽपि "स्थाल्याः पुलाकमुद्धरति" इत्यादौ पञ्चमी भवति। कुतो भवान् इति प्रश्ने प्रतिष्ठानात् इत्युत्तरे च आगत इत्यध्याहारात् पञ्चम्युपपादनीया। "घनात् विद्योतते विधुः" इत्यत्र निस्सृत्य इत्यध्याहृत्य पञ्चम्युपपादनीया।

तरोर्विभजते पत्रम् अस्थ्नो विभजते त्वचम्।
इत्यादाववधित्वार्थो ङसिर्धातुमपेक्षते।।

विभजिर्द्विधा — केवलविभागवाची फलावाचकत्वादकर्मकः। विभागजनकविभागव्यधिकरणविदलनादिक्रियावाची सकर्मकः। उभयत्र पञ्चम्याः विभागान्वितमवधित्वमवधिमत्त्वं वा अर्थः। तच्च स्वरूपसंबन्धरूपोऽतिरिक्तो वा पदार्थः। तथा च "तरोः पत्रं विभजते" इत्यत्र तर्वधिकविभागाश्रयत्वं पत्रे प्रतीयते। "अस्थ्नो मांसं विभजते कौणपः" इत्यत्र अस्थ्यवधिकमांससमवेतविभागानुकूलोत्कर्तनादिकक्रियाश्रयत्वं कौणपे प्रतीयते। "ध्रुवमपायेऽपादानम्"[1] इति सूत्रम् अपाये विभागे ध्रुवमवधिभूतमपादानसंज्ञमिति व्याख्येयम्, योगविभागादिति वाक्यपदीये हरिचरणाः।

विभक्त्यर्थनिर्णये[2] अपादाने पञ्चमीविचारः

ङसिभ्यांभ्यस् इति त्रयः प्रत्ययाः सरसः समुपैति, "सुमनसः समधीते" इत्यादौ श्रूयमाणत्वात् असः अस्त्वेन भ्यामः भ्यांत्वेन भ्यसो भ्यस्त्वेन वाचकत्वम्। ङकार इकारश्चानुबन्धः। क्वचिदप्यश्रूयमाणत्वान्न तौ वाचकताकुक्षि-

[1] सू. १.४.२४
[2] पृ. ३१९

प्रविष्टौ। अनुशासनसिद्धाः पञ्चम्या अर्थाः। अनुशासनं च "अपादाने पञ्चमी"[१] इति। तत्रापादानमपादानत्वं वा अर्थ इति वक्ष्यते। अत्रापि अनभिहिते इत्यधिकारः। तेन "चौरभीत" इत्यत्र समासेन, "व्याघ्र इति बिभेति" इत्यत्र निपातेनापादानाभिधानेन न पञ्चमी। अपादानपदसंकेतग्राहकं सूत्रं "ध्रुवमपायेऽपादानम्"[२] इति। ध्रुवं यत् अपाययुक्तं अपाये साध्ये यत् अवधिभूतं तत्कारकम् अपादानसंज्ञं भवतीत्यर्थकम्। अपायो विश्लेषः संबन्धापगम इति यावत्। विश्लेषस्य साध्यत्वं क्रियाजन्यत्वम्। तेन स्वतःसिद्धविश्लेषवतो ध्रुवस्य नापादानत्वम्। अतो मेरोरयमायातीति न प्रयोगः। "तरोः पत्रं पतति" इत्यत्र विश्लेषस्य संयोगनाशस्य प्रयोजको विभागोऽपायः तद्वत्त्वमपायित्वम्। क्रियानधिकरणत्वं ध्रुवत्वम्। तत्र विभागो भेदश्च पञ्चम्यर्थः। लाघवात्। क्रियावदन्यो विभागवान्न पञ्चम्यर्थो, गौरवात्। विभागस्य जनकतया भेदस्य प्रतियोगितावच्छेदकतया क्रियायामन्वयः। वृक्षस्य पतनक्रियावदन्यत्वात् विभागवत्त्वाच्चापादानत्वम्।

क्रियावदन्यत्वं तु तत्क्रियावदन्यत्वम्। तेन "कुड्यात् पततोऽश्वात् पतति" इत्यत्र अश्वस्य पतनक्रियावत्त्वेऽपि अश्वकर्तृकपतनक्रियापादानत्वस्य न हानिः। तदुक्तं हरिणा —

अपाये यदुदासीनं चलं वा यदि वाचलम्।
ध्रुवमेवातदावेशात्तदपादानमुच्यते।।

पततो ध्रुव एवाश्वो यस्मादश्वात् पतत्यसौ।
तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमुच्यते।।

उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मजे।
विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते।।

मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक्।।

इति। अपाये - विभागे सतीति शेषः। उदासीनं कर्मकर्त्रादिभिन्नं कारकं चलं धावदश्वादि, अचलं तरुपर्वतादि, अतदावेशात् क्रियाशून्यत्वात्।

ननु 'परस्परस्मात् मेषावपसरतः' इत्यादौ उभयकर्मजन्यविभागवत्तया विभागजनकक्रियावदन्यत्वं न कस्यापि मेषस्य। तत्कथं मेषयोरपादानत्वमिति शङ्कते — उभावपीत्यादि।

---

[१] सू. २.३.२८
[२] सू. १.४.२४

नन्वपादानसंज्ञायां क्रिया क्रियात्वेन विभागजनकत्वेन वा न प्रवेशनीया। किं तु ताद्रूप्येणेति नानुपपत्तिरिति समाधत्ते — प्रविभक्ते त्वित्यादि। तु = तथापि। प्रविभक्ते भिन्ने क्रिये विवक्षिते, तद्रूपेणेति शेषः।

ननु कर्तृसंज्ञावरुद्धयोर्मेषयोः कथमपादानसंज्ञा। "आकडारादेका संज्ञा"[१] इति संज्ञाप्रतिनियमात् इत्याशङ्क्य भिन्नभिन्नक्रियानिरूपितसंज्ञाद्वयसमावेशो न विरुद्ध इति सामाधत्ते — मेषान्तरेत्यादि।

अवधित्वं विभागजनकतत्क्रियावदन्यत्वे सति तत्क्रियाजन्यविभागवत्त्वम्। यद्यतिरिक्तशक्तिस्वरूपमवधित्वं तथाप्येतदभिव्यङ्ग्यमेव तत्। तत् कर्तृत्वं क्रियाश्रयत्वम्। अत्रापि क्रिया तद्रूपेणैव निविशत इति भावः।

सर्वमिदं बालोपलालनं, न तु पञ्चम्यर्थविवेचनम्। क्रियादेरन्यलभ्यत्वात् तत्तत्क्रियादेरननुगमेन पञ्चम्यर्थप्रवेशानुपपत्तेः। तस्माद्भेदो विभागश्च पञ्चम्यर्थः। तत्र प्रकृत्यर्थस्य आधेयतया अन्वयः। विभागस्य जनकतया भेदस्य प्रतियोगितावच्छेदकतया पतनादिक्रियायामन्वयः। "तरोः पत्रं पतति" इत्यत्र तरुसमवेतविभागजनकस्य तरुवृत्तिभेदप्रतियोगितावच्छेदकस्य पतनस्याश्रयः पत्रमित्यन्वयबोधः।

शाब्दिकैकदेशिमतखण्डनम्

शाब्दिकैकदेशिनस्तु विभाग एव पञ्चम्यर्थः, न तु भेदः। न च 'पत्रात् पत्रं पतति' इति प्रयोगप्रसङ्ग इति वाच्यम्। परया कर्तृसंज्ञया अपादानसंज्ञाबाधात् पञ्चम्यनुपपत्तेः। संज्ञाया एव विभक्तिनिष्पादकत्वादिति वदन्ति।

तन्न। एवं सति "वृक्षात् पर्णं पतति न पत्रात्" इत्यत्र निषेधप्रतीत्यनुपपत्तेः। पतने पत्रसमवेतविभागजनकत्वाभावस्य नञा बोधनासंभवात् अयोग्यत्वात्। 'गुणान्न पतति' इत्यादाविव प्रकृत्यर्थसमवेतत्वाभावस्य पञ्चम्यर्थे विभागे बोधनस्याप्यसंभवात्। विभागस्य पत्रसमवेततया अयोग्यत्वात्। भेदस्य पञ्चम्यर्थतावादे तु पत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावस्य पतने नञा बोधनसंभवान्निषेधप्रतीत्युपपत्तिः।

पत्रात् पत्रं पततीति प्रयोगापत्तिशङ्का

नन्वेवमपि पत्रसमवेतविभागजनकत्वस्य पत्रान्तरनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य च द्वयोः पतने सत्त्वान्निषेधप्रतीत्यनुपपत्तिः, 'पत्रात् पत्रं पतति' इति प्रयोगप्रसङ्गश्च।

---

[१] सू. १.४.१

न च तत्तत्पत्रनिष्ठभेदप्रतियोगितावच्छेदकत्वस्य समुदायो नञा निषिध्यत इति निषेधप्रतीत्युपपत्तिः, तथाविधसमुदाय एव पञ्चम्याः साधुत्वान्न दर्शितप्रयोगश्चेत्यादि पूर्वोक्तप्रायं सांप्रतमिति वाच्यम्। युगसहस्रेणापि ग्रहीतुमशक्यत्वात्।

न च स्ववृत्तिविभागजनकत्वस्ववृत्तिभेदप्रतियोगितावच्छेदकत्वोभयसंसर्गावच्छिन्नप्रतियोगिताकः पत्रसामान्याभाव एव पतने नञा बोध्यते। पञ्चमी तु प्रतियोगितावच्छेदकसंसर्गानुवादिकेत्यपि पूर्वोक्तप्रायं युज्यत इति वाच्यम्। वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वानभ्युपगमात्। अभ्युपगमे तु विभागप्रतियोगित्वविशिष्टजनकत्वस्वरूपसाक्षात्संसर्गावच्छिन्नप्रतियोगिताकस्य पत्रसामान्याभावस्य पत्रापादानकपतनेऽपि सत्त्वेन पत्रात् पतति पतङ्गे 'पत्रान्नायं पतति' इति प्रयोगप्रसङ्गात्।

न च परंपरामुद्रया तादृशसंसर्गावच्छिन्नप्रतियोगिताक एव सामान्याभावः पञ्चम्यन्तपत्रपदपत्यादिधातुसमभिव्याहृतनञा बोध्यते। परम्परा हि विभागनिरूपकत्वजनकत्वानि भेदानुयोगित्वप्रतियोगित्वावच्छेदकानि च परस्परशृङ्खलितान्येव संसर्गः। तत्र प्रथमपरंपरास्थले पत्रत्वावच्छिन्नप्रतियोगितानिरूपिता विभागसंसर्गता, तया निरूपिता निरूपकत्वे तया निरूपिता जनकत्वे च संसर्गता। तन्निरूपितानुयोगिता नञर्थाभावे भासते। द्वितीयपरम्परायामप्यनया रीत्या संसर्गता बोध्या। विभागप्रतियोगित्वविशिष्टजनकतास्वरूपसाक्षात्संसर्गे तु विशिष्टधर्मावच्छिन्नजनकतावृत्तिरेकैव संसर्गता प्रतियोगित्वानुयोगित्वाभ्यां निरूप्यत इति परंपराविशिष्टसंसर्गयोः संसर्गताविवेक इति न दर्शितप्रयोगप्रसङ्ग इति वाच्यम्।

परंपरासंसर्गतासु प्रथमा प्रतियोगितया चरमा पुनरनुयोगितया, प्रथमैवानुयोगितया चरमैव प्रतियोगितया निरूप्यत इत्यत्र विनिगमकाभावात्। दृश्यन्ते च प्राचां निबन्धनेषु प्रतियोगिविश्रान्ताः संसर्गरचनाः। न चोभयथापि परंपरातो विशिष्टस्य संसर्गताविवेक उत्पद्यत इति वाच्यम्। विलोमानुलोमपरंपरासंसर्गावच्छिन्नप्रतियोगिताकाभावयोरविशेषप्रसङ्गादिति परंपरायाः संसर्गत्वस्य नितरां प्रतियोगितावच्छेदकत्वस्य चानुपपत्त्या "पत्रं न पत्रात् पतति" इत्यत्र निषेधप्रतीत्यनुपपत्तिरिति चेत् —

तत्र गुरुचरणोक्तं समाधानम्

अत्र गुरुचरणाः। पुष्पवन्तौ नेत्यत्र विभक्त्युपस्थाप्यद्वित्वविशिष्टयोः सूर्याचन्द्रमसोर्नञर्थान्वये सूर्याचन्द्रोभयत्वावच्छिन्नप्रतियोगिताकाभावो बुध्यताम्। यत्र तु निष्पुष्पवन्तमित्यव्ययीभावः, तत्र द्वित्वोपस्थापकाभावात् द्वित्वावच्छिन्नप्रतियोगिता-

काभावबोधनासंभवात् न्यूनवृत्तिभ्यां सूर्यत्वचन्द्रत्वाभ्यामवच्छिन्नव्यासक्तप्रतियोगिताकः सूर्यचन्द्रमसोरत्यन्ताभावः प्रतीयते यथा, तथा न पत्रादित्यादौ विभागजनकत्वभेदप्रतियोगितावच्छेदकत्वपर्याप्तप्रतियोगिताकोऽप्यभाव इति।

यदि च पुष्पवन्तपदादेः सूर्याचन्द्रोभयमर्थः। तथा चोभयत्वावच्छिन्ना प्रतियोगिता जनकतात्वनिष्ठया अवच्छेदकत्वनिष्ठया चावच्छेदकतया निरूप्यते। अथ वा उभयत्वनिष्ठावच्छेदकता सामानाधिकरण्येन जनकतात्वावच्छेदकत्वाभ्यामवच्छिद्यते। तत्र जनकतात्वनिष्ठावच्छेदकता निरूपकत्ववृत्त्या, सा च विभागवृत्त्या, अवच्छेदकत्वत्वनिष्ठा तु प्रतियोगितावृत्त्या सा च भेदनिष्ठया अवच्छेदकतया निरूप्यते। स्रोतोद्वयमुखभूतं तु विभागभेदयोरवच्छेदकत्वद्वयमेकमेव पत्रत्वावच्छिन्नया अवच्छेदकतया निरूप्यत इति। अमुमेवाभावं पत्रपतनकर्तृपत्रे विभागजनकत्वतन्निष्ठभेदप्रतियोगितावच्छेदकत्वं पतने नास्तीति वाक्येन प्रामाणिका व्यवहरन्ति। एतादृशाभावबोधः पत्रत्वाद्यवच्छिन्नैकप्रकारतानिरूपितविभागभेदोभयनिष्ठविशेष्यताकः संभवति। प्रकारताद्वयनिरूपितैकविशेष्यताकस्य संशयादेरिव विशेष्यताद्वयनिरूपितैकप्रकारताकबोधस्याभ्युपेयत्वात्। अत एव संशयाव्यवहितोत्तरं प्रत्यक्षमिति वाक्येन मानान्तरेण वा यस्मात् संशयादव्यवहितं तस्मादुत्तरं प्रत्यक्षमिति प्रत्याय्यते। संशयत्वावच्छिन्नया एकप्रकारतया अव्यवधानोत्तरत्वविषयतयोः ताभ्यां च प्रत्यक्षविशेष्यताया निरूपणेन फलत एकतमसंशयाव्यवहितपूर्वस्य चिरातीतसंशयान्तरोत्तरप्रत्यक्षस्य अनवगाहनात्।

एवमेव धूमत्वादिसामान्यधर्ममन्तर्भाव्य वह्न्यादेः कारणत्वमपि सुग्रहम्। तत्तद्धूमाव्यवहितपूर्वक्षणावच्छेदेन तत्तद्धूमाधिकरणे विद्यमानस्य अभावस्य प्रतियोगितासामान्याभावो वह्नौ धूमकारणता। स चैक एवाभावः, न तु धूमव्यक्तिघटितकूटात्मकः, युगसहस्रेणापि दुर्ग्रहत्वात्। संभवति चैकयैव धूमत्वावच्छिन्नावच्छेदकतया निरूपितमव्यवहितम् अव्यवहितपूर्वक्षणावच्छिन्नत्वे अधिकरणत्वे चावच्छेदकताद्वयं, ताभ्यां निरूपितं विद्यमानत्वे तेन चाभावेऽवच्छेदकत्वमेकैकमेव परस्परनिरूपितमभावनिष्ठावच्छेदकत्वेन निरूपिता प्रतियोगितात्वावच्छिन्ना प्रतियोगितेति तन्निरूपकोऽनुगतः सामान्याभावः। तद्बुद्धिं प्रति धूमत्वावच्छिन्नैकप्रकारतानिरूपिताव्यवहितपूर्वक्षणावच्छिन्नत्वाधिकरणवृत्तिविशेष्यताद्वयनिरूपितविद्यमानत्वादिनिष्ठैकविषयताको व्यभिचारग्रह एव विरोधी, न तु धूमान्तरव्यवहितपूर्वक्षणावच्छेदेन धूमान्तराधिकरणे विद्यमानं वह्न्यभावमवगाहमान इत्यन्यत्र विस्तारोऽनुसन्धेयः इति पदवाक्यरत्नाकरे प्राहुः।

विभागभेदयोः पञ्चम्यर्थत्वम्

वस्तुतस्तु विभागो भेदश्च पञ्चम्यर्थः। विभागस्य जनकत्वेन भेदस्य स्वसमानाधिकरणविभागजनकत्वविशिष्टेन प्रतियोगितावच्छेदकत्वेन संबन्धेन पतनादिक्रियायामन्वयः। "तरोः पत्रं पतति न पत्रात्" इत्यत्र पत्रवृत्तिभेदस्य दर्शितेन विशिष्टप्रतियोगितावच्छेदकत्वेन संबन्धेनावच्छिन्नप्रतियोगिताकोऽभावो नञा पतने बोध्यते। अतो भेदस्य पत्रान्तरनिष्ठस्य प्रतियोगितावच्छेदकत्वसंबन्धेन पतने सत्त्वेऽपि न निषेधप्रतीत्यनुपपत्तिः। दर्शितविशिष्टप्रतियोगितावच्छेदकत्वसंबन्धेन पत्रान्तरनिष्ठभेदस्यापि पतने सत्त्वात् वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकताया युक्तिसहत्वात्। यो हि वृत्त्यनियामकः संबन्धः प्रतियोगिविशिष्टबुद्धिं नार्जयति स न प्रतियोगितावच्छेदकः। यो हि विशिष्टबुद्धिमर्जयति स प्रतियोगितावच्छेदक एव। तद्वैशिष्ट्यं प्रति तत्संबन्धावच्छिन्नप्रतियोगिताकाभावस्य विरोधित्वात् इत्यादियुक्तेः द्वितीयाविवरणे दर्शितत्वात्।

यदि च वृत्त्यनियामकसंबन्धो न प्रतियोगितावच्छेदक इति मन्त्रपाठमण्यादिवत् प्रतियोगितावच्छेदकत्वबुद्धिं विरुणद्धि तदा भेदस्य दर्शितविशिष्टप्रतियोगितावच्छेदकत्वविशिष्टा विशेषणतैव संबन्धः पतनादिक्रियायामन्वयघटकः न पत्रादित्यत्र नञर्थाभावस्य प्रतियोगितावच्छेदकश्चाभ्युपगम्यते। यदत्र परंपरासंबन्धस्य न संसर्गत्वं न वा प्रतियोगितावच्छेदकसंसर्गत्वमिति बाधकमुक्तं, तदप्यकिंचित्करम्। 'सुरभि जलं लोहितः स्फटिक' इत्यत्र समवायिसंयोगस्य संसर्गतायाः "कर्पूरगन्धो न तटाकजले किं तु कुम्भोदके, मञ्जिष्ठारागो न मैत्रवस्त्रे किं तु चैत्रपटे" इत्यत्र प्रतियोगितावच्छेदकतायाः सर्वानुभवसिद्धत्वात्।

प्रकृतेऽपि विभागभेदयोः पञ्चम्यर्थयोः जनकत्वप्रतियोगितावच्छेदकत्वाभ्यां परंपराभ्यां पतनादिक्रियायामन्वयात् न पत्रादित्यादौ परंपरायाः प्रतियोगितावच्छेदकसंसर्गतया निषेधप्रतीत्युपपत्तिः। नञ्निर्मुक्तवाक्ये येन संबन्धेन यस्य यत्रान्वयः तत्र नञ्समभिव्याहारे तत्संबन्धावच्छिन्नप्रतियोगिताकः तस्याभावः तत्रान्वेतीति व्युत्पत्तेः।

परंपरायाः संसर्गत्वोपपादनम्

न च सुरभि जलमित्यादिप्रत्यक्षादिबुद्धौ परंपरायाः संसर्गत्वेऽपि शाब्दे क्वापि संसर्गत्वाभावात् प्रकृतेऽपि न संसर्गत्वं न वा प्रतियोगितावच्छेदकसंसर्गत्वमिति वाच्यम्। 'पचति' इत्यादौ विक्लित्त्यादिफलस्य जनकतया प्रयोजकतया वा फूत्कारादिव्यापारे तस्य प्रयोजकतया तिङर्थे प्रयत्नेऽन्वयदर्शनात्।

एवं ''चैत्रेण न पच्यते'' इत्यादौ तृतीयार्थस्य प्रयत्नस्य प्रयोज्यतया संबन्धेनावच्छिन्नप्रतियोगिताकोऽभावः पाकेऽन्वेतीति सर्वानुभवात्।

न हि जनकता जन्यता प्रयोजकता वा साक्षात्संबन्धः। न च जनकत्वमतिरिक्तपदार्थः, तस्य साक्षात्संबन्धत्वमिति वाच्यम्। जनकत्वस्य तथात्वे तु जन्यत्वस्यापि तथात्वावश्यकत्वात् प्रतिजनकं प्रतिजन्यं च जन्यत्वजनकत्वयोरतिरिक्तयोरनन्तकल्पनापेक्षया कार्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकस्य क्लृप्तस्य तथात्वौचित्यात्। जन्यत्वस्यातिरिक्तत्वपक्षेऽपि प्रयोजकत्वस्य साक्षात्संबन्धत्वाभावात् प्रयोजकतया प्रयोज्यतया वा अन्वये परंपरायास्तथात्वावश्यकत्वमिति।

न च फलस्य व्यापारे तस्य प्रयत्ने जनकतया अन्वयो न तु प्रयोजकतयेति वाच्यम्। अधिश्रयणाद्यवतारणान्तानां व्यापाराणां विक्लित्त्यादिजनकत्वविरहात्। मध्यमव्यापाराणां जनकत्वेऽपि प्रथमव्यापारेषु प्रयोजकतयैव विक्लित्त्यादेरन्वयसंभवात्। 'पचति' इत्यत्रापि व्यापारस्य तथैवान्वयात्।

न चात्र साध्यत्वाख्यविषयित्वसंबन्धेनान्वय इति वाच्यम्। प्रथमव्यापारस्य चरमव्यापारानुकूलप्रयत्ने तथान्वयासंभवात्।

एवं ''चैत्रेण पच्यते'' इत्यत्र तृतीयार्थयत्नस्यापि न साध्यत्वाख्यविषयत्वेन व्यापारेऽन्वयः। प्रथमव्यापारसाध्यप्रयत्नस्य मध्यमचरमव्यापारेषु साध्यत्वविरहादिति प्रयोज्यतयैवान्वय इति ''चैत्रेण न पच्यत'' इत्यत्र प्रयोज्यतासंबन्धावच्छिन्नप्रतियोगिताकः प्रयत्नाभावो व्यापारे प्रतीयते इति परम्परायाः संसर्गत्वं प्रतियोगितावच्छेदकसंसर्गत्वं च सर्वसंमतमिति।

यदि च भेदोऽपि पत्यादिधातोरेवार्थः। सर्वत्र पञ्चमीघटितशाब्दसामग्र्यां भेदोपस्थितेर्निवेशनापेक्षया पत्यादिधातुघटितकतिपयशाब्दसामग्र्यां तन्निवेशनस्यैवोचितत्वात्।

न च पत्यादिधात्वर्थस्य भेदस्य धात्वर्थे विशेषणतया अन्वयित्वात् फलतया तदन्वयिनोऽपादानस्य कर्मत्वात् द्वितीयापत्तिरिति वाच्यम्। अपायवतो ध्रुवस्य निरवकाशया अपादानसंज्ञया कर्मसंज्ञाबाधात्। संयोगभेदोभयफलवत एव पत्यादिकर्मत्वादित्यस्य द्वितीयाविवरणे दर्शितत्वाच्च।

धात्वर्थभेदेऽपादानस्यान्वये पञ्चम्यर्थस्य क्रियाजन्यविभागादिरूपापायस्य अन्वयसामग्री प्रयोजिका। अतः केवलं भेदान्वयापत्त्या 'मेरोरयमायाति' इति न प्रयोग इति विभाव्यते; तदा भेदो न पत्यादिधातोः न वा पञ्चम्या अर्थः। किं तु विभागादिरूपपञ्चम्यर्थे व्यापारवद्भेदावच्छिन्नसमवायावच्छिन्नाधेयतासंबन्धेन प्रकृत्यर्थ-

स्यान्वयः। तत एव 'पत्रात् पत्रं पतति' इति न प्रयोगः। "वृक्षात् पत्रं पतति न तु पत्रात्" इत्यपि दर्शिताधेयत्वसंबन्धावच्छिन्नप्रतियोगिताकः पत्राभावो विभागे प्रतीयत इति निषेधप्रतीत्युपपत्तिः। दर्शिताधेयत्वस्य वृत्त्यनियामकत्वेऽपि प्रतियोगितावच्छेदकसंबन्धत्वं सर्वसंमतमेव। अन्यथा "गुणान्न पतति" इत्यत्र निषेधप्रतीतेः कथमप्यनुपपत्तेः दर्शिताधेयत्वसंबन्धावच्छिन्नप्रतियोगिताको गुणाभावो विभागे प्रतीयत इति निषेधप्रतीतिरित्थमेव संभवतीति।

'समवायादभावाद्वा न पतति' इत्यत्र दर्शिताधेयत्वं समवायादेः व्यधिकरणः संबन्धः। तत्संबन्धावच्छिन्नप्रतियोगिताकः समवायादेरभावो विभागे प्रतीयत इति निषेधप्रतीत्युपपत्तिः।

गुणात् समवायादभावाद्वा न पततीति प्रयोगविचारः

ननु यतः पतनादिकं प्रसिद्धं तस्यैव निषेधो नञा प्रत्याय्यते। अत एव नञ्विनिर्मुक्तशब्दप्रयोगे यद्वैशिष्ट्यं यत्र प्रतीयते, नञि समभिव्याहृते तन्निषेधस्तत्र प्रतीयत इति व्युत्पत्तिः। इत्थं च गुणाद्यपादानकपतनाप्रसिद्ध्या 'गुणात् समवायात् अभावाद्वा पतति' इति प्रयोगविरहात् 'गुणात् समवायात् अभावाद्वा न पतति' इति वाक्यमयोग्यमेव। तत्, कथं दर्शिताधेयत्वसंबन्धावच्छिन्नप्रतियोगिताको गुणादेरभावो विभागे प्रतीयते, येन वृत्त्यनियमाकसंबन्धस्य प्रतियोगितावच्छेदकसंबन्धत्वं स्यादिति चेत्—

तर्हि न 'पत्रात् पतति' इत्यत्र दर्शिताधेयत्वेन संबन्धेन पत्रविशिष्टस्य विभागस्य जनकं यत् पतनं तत्कर्मत्वस्य पतङ्गादिनिष्ठस्य प्रसिद्धस्याभावो नञा पत्रे बोध्यत इति निषेधप्रतीत्युपपत्तिः।

"वृक्षात् पतनं पत्रस्य न तु पत्रात्" इत्यत्र तथा पत्रविशिष्टस्य विभागस्य जनकतासंबन्धावच्छिन्नप्रतियोगिताकोऽभावो नञा पतने बोध्यते। यदि च जनकत्वस्य वृत्त्यनियामकतया न प्रतियोगितावच्छेदकसंबन्धत्वं तदा पूर्ववत् पतनस्य पत्रादित्यत्रानुषङ्गेण तथा पत्रविशिष्टस्य विभागस्य जनकं यत् पतनं पतङ्गादिकर्तृकं प्रसिद्धं तदन्यत्वं नञा वृक्षापादानकपतने बोध्यत इति निषेधप्रतीत्युपपत्तिः।

अथ वा पत्रापादानकपतने खगादिकर्तृके प्रसिद्धे पत्रस्येति षष्ठ्यन्तार्थस्य पत्रकर्तृकत्वस्याभावो नञा बोध्यत इति निषेधप्रतीत्युपपत्तिः।

एवं यन्मूर्तापादानकं पतनमप्रसिद्धं तद्वाचकपदात् नञ्समभिव्याहारेऽपि न पञ्चमी। अत एव 'गुणान्न पतति' इतिवत् 'भूतलात् पातालाद्वा न पतति' इति न

प्रयोगः। समवाये व्यापारवद्भेदस्येव मूर्तवृत्तित्वस्यापि वैशिष्ट्यं विशेषणम्। तेन व्यापारवद्भेदावच्छिन्नमूर्तवृत्तित्वावच्छिन्नसमवायावच्छिन्नाधेयत्वसंबन्धेन प्रकृत्यर्थस्य पञ्चम्यर्थे विभागेऽन्वयोऽभ्युपेतव्यः। अतो 'वृक्षादिव गगनात् जीवाद्वा पतति' इति न प्रयोगः। अन्यथा व्यापारवद्भिन्नगगनादिनिष्ठविभागजनकत्वस्य पतने सत्त्वात् दर्शितप्रयोगस्य दुर्वारतापत्तेः। 'गुणान्न पतति' इत्यत्रेव 'गगनात् जीवाद्वा न पतति' इत्यत्रापि निषेधगतिरवसेयेतीयमभिनवा रीतिरिहानुसन्धेया।

वृक्षाद्वेपते स्पन्दते वेत्यादिप्रयोगवारणप्रकारः

नन्वेवमपि 'वृक्षाद्वेपते स्पन्दते वा' इत्यादिप्रयोगो दुर्वारः। पञ्चम्यर्थविभागस्य धात्वर्थे कम्पादौ जनकतया अन्वयसंभवात्। न च फलव्यापारोभयवाचकधातुजन्योपस्थितिः पञ्चम्यर्थविभागान्वयबोधे हेतुरिति वेपतिस्पन्दयोर्व्यापारमात्रवाचकतया फलावाचकत्वात् तज्जन्योपस्थितेर्विभागान्वयबोधहेतुत्वात् न दर्शितप्रयोग इति वाच्यम्। तथा सति आसनाच्चलित इति प्रयोगानुपपत्तेः चलतेरपि फलावाचकत्वात्।

न च चलतेः संनिहितदेशसंयोगफलकव्यापारवाचित्वात् फलवाचकत्वमेव। तथात्वेऽपि धात्वर्थान्तर्भूतकर्मकत्वान्न सकर्मकत्वम्। फलवाचकस्यापि धातोर्योगे पञ्चमी भवत्येव। यथा "पर्यङ्कात् पीठे समुपविशति" इत्यादौ। तथा "आसनाच्चलितः" इत्यत्रापि पञ्चमीप्रयोगो निष्प्रत्यूह एवेति वाच्यम्।

तथापि "तरोस्त्यजति" इति प्रयोगापत्तेः। त्यजेः फलव्यापारोभयवाचकतया तज्जन्योपस्थितेः पञ्चम्यर्थविभागान्वयबोधहेतुत्वे बाधकाभावादिति चेत्—

तरोस्त्यजतीति प्रयोगवारणप्रकारः

अत्र केचित्। फलव्यापारोभयविषयकज्ञानोद्देश्यताकसंकेतीयज्ञाननिष्ठविषयतायां विभागविषयकत्वानवच्छिन्नत्वस्य फलविषयकत्वावच्छिन्नत्वव्यापारविषयकत्वावच्छिन्नत्वयोश्च निवेशः। तथा सति तादृशज्ञाननिष्ठतादृशविषयताकसंकेतज्ञानजन्यसंस्कारसहकृतधातुजन्योपस्थितिः पञ्चम्यर्थविभागान्वयबोधे हेतुरिति त्यजिजन्योपस्थितिर्न तथा। त्यजेः संकेतीयज्ञाननिष्ठविषयतायाः विभागविषयकत्वावच्छिन्नत्वात्। संकेतस्य विभागस्पन्दोभयविषयकज्ञानोद्देश्यकत्वादिति त्यजर्थे पञ्चम्यर्थस्य नान्वय इति वदन्ति।

तच्चिन्त्यम्। त्यजेः संयोगस्पन्दोभयवाचकत्वभ्रमदशायां तादृशशाब्दबोधप्रसक्त्या तादृशप्रयोगापत्तेः। न च संकेतज्ञाने भ्रमान्यत्वं विशेषणम्। अतो न

तादृशशाब्दप्रसक्तिरिति वाच्यम्। तथापि यत्र पचिना अवतारणव्यापारोऽभिहितः तत्र 'चुल्ल्याः पचति' इति प्रयोगापत्तेः। किं च विभागार्थकविभजतियोगे 'वृक्षाद्विभजत' इत्यत्रेव 'तरोस्त्यजति' इति अवधित्वार्थकपञ्चमीप्रयोगापत्तिरिति।

शाब्दिकास्तु

त्यजतिफलविभागवत्तया वृक्षस्य कर्मत्वात् परया कर्मसंज्ञया अपादानसंज्ञाया बाधात् 'तरोः त्यजति' इति न प्रयोग इत्याहुः।

तदपि न सुन्दरम्। "गोभ्यः पयांसि दोग्धि" इत्यत्रेव अवधित्वविवक्षया तथा प्रयोगापत्तेः। न च विभागः स्पन्दनं व्यापार एतत्त्रितयार्थकस्यापि दुहेः विभागाविवक्षायां अपादानार्थकपञ्चम्यन्तस्य गोभ्य इत्यस्य प्रयोग इति वाच्यम्। तथा सति त्यजेरपि विभागाविवक्षायां स्पन्दमात्रप्रतिपादने "तरोः त्यजति" इति प्रयोगापत्तेः।

तस्मादिदमत्र तत्त्वम्। विभागानुयोगित्वस्वरूपमवधित्वम्। तत्र विभागस्य धातुना अलाभे पञ्चम्याः विभागोऽर्थः। पञ्चम्यर्थविभागान्वये संयोगव्यापारोभयवाचकधातुजन्या व्यापारोपस्थितिस्तन्त्रम्। विभागस्य धातुलभ्यत्वे तु पञ्चम्या अनुयोगित्वमर्थः। पञ्चम्यर्थानुयोगित्वान्वये तु प्रधानीभूतधात्वर्थव्यापारे साक्षात् विशेषणतानापन्नविभागोपस्थितिः धातुजन्या तन्त्रम्। "वृक्षात् विभजते" इत्यत्र विभागस्य प्रधानव्यापारे विशेषणतापन्नस्यैव धातुजन्योपस्थितिः। "गोभ्यः पयांसि दोग्धि" इत्यत्र स्पन्दनविशेषणतया उपस्थितस्यापि विभागस्य प्रधानव्यापारे साक्षाद्विशेषणत्वात् दुहिजन्या विभागोपस्थितिस्तन्त्रम्। इत्थं च त्यजेः संयोगावाचकतया तदर्थे न पञ्चम्यर्थविभागस्यान्वय इति प्रधानव्यापारे साक्षाद्विशेषणतैव। विभागस्य त्यजिना उपस्थापनान्न तत्र पञ्चम्यर्थानुयोगित्वस्यान्वय इति 'तरोस्त्यजति' इति न प्रयोगः। प्रधानव्यापारे साक्षाद्विशेषणीभूतविभागवाचकधातुजन्योपस्थितिः पञ्चम्यर्थानुयोगित्वान्वये तन्त्रमिति तु फलितार्थः।

अतः 'तरोः त्यज्यत' इति कर्माख्यातप्रयोगोऽपि निरस्तः। कर्माख्याते विभागस्य व्यापारविशेषणतया भानेऽपि त्यजेर्विशेषणीभूतविभागवाचकत्वात्। प्राचां मते धातोः फलावच्छिन्नव्यापारार्थकतया नव्यानां फलव्यापारोभयवाचकतया विभागस्य गमनादिव्यावर्तकत्वं त्यज्यर्थव्यापारे सर्वथैवोपेयमिति।

सदसोऽपसरति इति प्रयोगसाधुत्वम्

नन्वेवं विभागव्यापारोभयवाचकस्यापसरत्यादेर्योगे 'सदसोऽपसरति' इति प्रयोगो न स्यात्। धातोर्विशेषणीभूतविभागवाचकतया तदर्थे विभागे पञ्चम्यर्थानुयोगित्वा-

न्वयाप्रसक्तेरिति चेत् — न। धातोरपसरत्यादेर्विभागावाचकत्वात्। किं तु अप-पूर्वस्य सरत्यादेः पूर्वदेशान्यदेशसंयोगफलकस्पन्दवाचकत्वमिति तदर्थे स्पन्दे पञ्चम्यर्थविभागान्वयसंभवात् भवति सरसोऽपसरतीत्यादिकः प्रयोगः।

संयोगफलकधातुयोगे पञ्चमी

"वृक्षात् पतति गच्छति वा पत्रम्" इत्यादौ पतेः अधोदिगवच्छिन्नसंयोगफलकः गमेस्तु संयोगफलको व्यापारोऽर्थः। 'उपत्यकाभ्यो गिरिमधिरोहत्यारोहति वा' इत्यादौ अधिपूर्वकस्य आङ्-पूर्वकस्य च रोहतेः ऊर्ध्वदिगवच्छिन्नसंयोगफलको व्यापारोऽर्थः। "जलादुद्गच्छति उन्मज्जति वा पद्मम्" इत्यादौ उत्पूर्वकस्य गच्छतेः मज्जतेश्च ऊर्ध्वदेशसंयोगफलको व्यापारोऽर्थः।

"पर्यङ्कादुपविशति पीठे" इत्यादावुपविशतेः स्फिग्भूसंयोगस्य स्फिङ्मूर्त-संयोगस्य वा अनुकूलो व्यापारोऽर्थः। यदि जलेषूपविष्टो योगी न निमज्जतीति प्रयोगः तदा स्फिङ्मूर्तसंयोगः फलतया बोध्यः। ऊर्ध्वदेशादिकर्मणो धात्वर्थान्त-र्भावात् धात्वर्थान्तर्भूतकर्मकत्वात् उद्गच्छादीनामकर्मकत्वमिति। पञ्चमीनां दर्शितेषु प्रयोगेषु विभागोऽर्थः। स च जनकतया व्यापारेऽन्वेति।

"ग्रामादजां वनं नयति, विपणेः पण्यभारं गृहं वहति" इत्यादौ नयतेः प्रेरकदेशावधिकप्रेर्यदेशवृत्तिपरत्वनिरूपितापरत्वसमानाधिकरणः संयोगः कर्मव्या-पारश्चार्थः। आङ्-पूर्वकस्य नयतेरर्थे तादृशपरत्वसमानाधिकरण एव संयोगः निविशतेः वहतेश्च संयोगः आधेयकर्म आधारकर्मस्वरूपो व्यापारश्चार्थः।

"वणिग्गृहात् कनकं स्वगृहं हरति तस्करः" इत्यत्र हरतेः संयोगः कर्मव्या-पारश्चार्थः।

"वृक्षाच्छाखां भूमिं कर्षति" इत्यत्र कृषेः कर्षकदेशावधिककर्षणीयदेशवृत्ति-परत्वनिरूपितापरत्वसमानाधिकरणः संयोगः कर्मव्यापारश्चार्थः। तादृशापरत्व-समानाधिकरणः संयोगः आङ्पूर्वस्य कृषेरर्थे निविशते। पञ्चमीनां विभागोऽर्थः। स च जनकतया संयोगजनके अजाकर्मणि भारकर्मणि कनककर्मणि शाखाकर्मणि अन्वेति, न तु कर्तृव्यापारे। ग्रामवर्तिनामपि ताडनादिना अजादेर्वने नयनादिति "नगराद्वनं गमयत्वरातीन्" इत्यादावपि पञ्चम्यर्थो विभागो जनकतया अराति-कर्मण्येवान्वेति।

"स्थाल्या ओदनमुद्धरति" इत्यादौ उद्धरतेः ऊर्ध्वदेशसंयोगानुकूलकर्मानुकूलो व्यापारोऽर्थः। ऊर्ध्वदेशस्य कर्मणो धातुनाभिधानात् नास्य द्विकर्मकत्वम्। पञ्चम्या विभागोऽर्थः। स चोर्ध्वदेशसंयोगजनके ओदनकर्मण्यन्वेति।

"मन्दुराभ्यो हयान् रथे युनक्ति" इत्यत्र पार्थिवद्रव्यसंयोगानुकूलकर्मानुकूलव्यापारो युजेरर्थः। पार्थिवस्य कर्मणो धातुनाभिधानात् नास्य द्विकर्मकत्वम्। अत्रापि पञ्चम्यर्थो विभागो जनकतया पार्थिवसंयोगजनके हयकर्मण्यन्वेति।

विभागार्थकधातुयोगे पञ्चम्युपपादनम्

विभागार्थकधातुयोगे पञ्चमी यथा "वृक्षाद्विभजते पत्रं वायुः, अस्थ्नो विभजते मांसं कौणपः" इत्यत्र विभजतेः पार्थिवद्रव्यविभागानुकूलकर्मानुकूलव्यापारोऽर्थः। विभागफलवतः पार्थिवस्य कर्मणो धातुनाभिधानान्नास्य द्विकर्मकत्वम्। पार्थिवविशेषणात् 'जले जलाद्वा विभजत' इति न प्रयोगः। पार्थिवविभागानुकूलकर्मस्वरूपफलवत्त्वात् पत्रमांसयोः कर्मत्वम्। अत्र पञ्चम्यर्थोऽनुयोगित्वस्वरूपमवधित्वं निरूपकतया, अनुयोगितानिरूपकत्वस्वरूपमवधिमत्त्वं वा स्वरूपेण संबन्धेन पार्थिवविभागे अन्वेति।

"वृक्षात् पुष्पं चिनोति" इत्यत्र प्रतियोग्युत्पत्तिद्वितीयक्षणोत्पन्नसंयोगप्रतिद्वन्द्वी विभागः कर्मव्यापारश्चिनोत्यर्थः। "गोभ्यः पयांसि दोग्धि" इत्यत्र दुहेरुक्त एवार्थः अत्रापि पञ्चम्यर्थोऽवधित्वमवधिमत्त्वं वा विभागेऽन्वेति। न च चिनोतेर्दुहेश्च विभागाविवक्षायामत्र विभागार्थिका पञ्चमीति वाच्यम्। संयोगार्थकधातुयोग एव पञ्चम्या विभागार्थकत्वात्। अन्यथातिप्रसङ्गादित्युक्तत्वात्।

यदि वा अपसरत्यादेः देशान्तरसंयोगफलको व्यापारो नार्थः। तथा सति बिलादर्धमायाते सर्पे 'बिलात् सर्पोऽपसृतः' इति प्रयोगप्रसङ्गात्। तस्मात् सर्वावयवावच्छिन्नपूर्वदेशविभागफलककर्मफलको व्यापारः अपपूर्वकस्य निःपूर्वकस्य च गमनार्थकधातोरर्थः। विभागफलवतः पूर्वदेशस्य धातुनाभिधानात् कर्मफलवतो व्यापारवत्तया कर्तृत्वाच्च नापसरत्यादेः सकर्मकत्वमिति विभाव्यते — तदा सदसोऽपसरतीत्यादौ पञ्चम्या अवधित्वमवधिमत्त्वं वा अर्थो विभागेऽन्वेति।

यदि च सर्वावयवावच्छिन्नपूर्वदेशान्यसंयोगफलको व्यापारोऽपसरत्यादेरर्थः तदा "सदसोऽपसरति निस्सरति अपगच्छति निर्गच्छति अपैति निरेति वा" इत्यादौ पञ्चम्या विभागोऽर्थो जनकतया व्यापारे अन्वेति।

नानाविधापायार्थकपञ्चम्युदाहरणानि

क्वचिदन्यादृशोऽप्यपायः यथा "वैपणिकात् मौक्तिकं क्रीणाति, नृपात् गां प्रतिगृह्णाति" इत्यादौ स्वस्वामिभावसंबन्धविगमोऽपायः पञ्चम्यर्थः क्रये प्रतिग्रहे प्रयोजकतया अन्वेति। क्रयस्तु स्वत्वेच्छाप्रयोज्यं दानम्। प्रतिग्रहः स्वत्वोद्देश्य-

केच्छेति तृतीयाविवरणोक्तं स्मर्तव्यम्। पञ्चम्याः स्वत्वनाशोभयं खण्डशो वा धात्वर्थः। तत्र प्रकृत्यर्थस्य निरूपितत्वेन संबन्धेन स्वत्वे, तस्य प्रतियोगिता-निरूपितानुयोगितया नाशेऽन्वयः। तथाविधनाशस्य जनकतया क्रयव्यापारे दाने प्रतिग्रहव्यापारे स्वत्वेच्छायां चान्वयः। तथा च वैपणिकनिरूपितस्वत्वनिष्ठप्रति-योगितानिरूपितानुयोगिताश्रयनाशजनकदानानुकूलकृतिमान् तादृशप्रतिग्रहानुकूल-कृतिमांश्चेति बोधः।

"नरकात् पापाद्वा पितॄनुद्धरति" इत्यत्रोर्ध्वलोकप्राप्तिफलकादृष्टफलकः श्राद्धादि-व्यापार उद्धरतेरर्थः। अदृष्टफलवता पितृकर्मणा अस्य सकर्मकत्वम्। प्राप्ति-फलवतः ऊर्ध्वलोकस्य धातुनाभिधानान्न तेन कर्मणा सकर्मकत्वमिति न द्विकर्म-कत्वम्। पञ्चम्यर्थोऽत्र नाशः प्रकृत्यर्थविशेषितः ऊर्ध्वलोकप्राप्तिजनके पितृगतेऽदृष्टे जनकतयान्वेति। नरकादिप्रतियोगिकनाशजनकम् ऊर्ध्वलोकप्राप्तिफलकं यत् पितृ-गतमदृष्टं तत्फलकश्राद्धादिव्यापारानुकूलकृतिमानित्यन्वयबोधः।

"शतात् वियुज्यन्ते शुध्यन्ति वा दशमिता" इत्यत्र धातोः अपेक्षाबुद्धिविषय-त्वाभावोऽर्थः। शतपदस्य शतत्वं संख्या अर्थः। पञ्चम्याः अनुत्पादोऽर्थः प्रयोजक-तया धात्वर्थेऽन्वेति। तथा च शतत्वसंख्यानुत्पादप्रयोजकस्य अपेक्षाबुद्धि-विषयत्वाभावस्याश्रया दशमिता इत्यन्वयबोधः।

"नरकात् पापाद्वा मुच्यत" इत्यत्र दैवादिकस्य मुच्यतेः दुःखात्यन्तविमो-क्षानुकूलः तत्त्वज्ञानादिव्यापारोऽर्थः। फलसमानाधिकरणव्यापारार्थकतया अस्य न सकर्मकत्वम्। पञ्चम्या अनुत्पादो नाशश्चार्थः प्रयोजकतया तत्त्वज्ञानादौ व्यापारे-ऽन्वेति। नरकानुत्पादस्य पापनाशस्य वा प्रयोजको यो मोक्षानुकूलस्तत्त्वज्ञानादि व्यापारः तदाश्रय इति शाब्दबोधः।

"सर्वपापैः स मुच्यते" इत्यत्र मुञ्चतेः संबन्धाभावप्रयोजको नाशादिव्या-पारोऽर्थः। तृतीयार्थः प्रतियोगिताकत्वं कर्तृत्वं नाशेऽन्वेति। व्युत्पत्तिवैचित्र्येण पापस्य संबन्धेऽप्यन्वयः। संबन्धाभावस्वरूपफलवत्तया तच्छब्दार्थस्य कर्मत्वम्। तथा च पापप्रतियोगिकनाशप्रयोज्यस्य पापसंबन्धाभावस्याश्रयः स इत्यन्वयबोधः।

"बन्धनान्निगडाद्वा मुच्यते" इत्यत्र मुच्यतेः बन्धनाख्यसंयोगनाशकविभागोऽर्थः। पञ्चम्याः अवधित्वमर्थः विभागेऽन्वेति। विभागस्य धातुना प्राधान्येनोपस्थापनात् प्रधानव्यापारे साक्षाद्विशेषणतयोपस्थित्यविषयत्वात् संबन्धनाशशब्दस्य [बन्धन-शब्दस्य] करणल्युटा रज्जुनिगडादिपरतया धातुनानभिधानान्न ततः पञ्चम्यनुपपत्तिः।

ननु पञ्चम्या नानाविधापायार्थकतामपेक्ष्य एकविधातिरिक्तावधित्वार्थकत्वमेवोचितं लाघवात्। दर्शितेषु सकलस्थलेषु एकविधस्यावधित्वस्य धात्वर्थेऽन्वयोपगमात् अभीष्टसिद्धेरिति चेत् —

मैवम्। नानाविधापायस्य प्रतीयमानस्यापलापापत्तेः। 'अयमस्मात्तार' इत्यादौ अवधित्वस्यैकविधतया नामार्थान्वयेन कारकत्वस्य हान्यापत्तेश्च। किं च पञ्चम्या एकविधावधित्वार्थकत्वं न संभवति। तथा हि — "वृक्षात् पचति" इत्यत्र पाके वृक्षावधित्वान्वयवारणाय तदन्वयबोधं प्रति गमनार्थकधातुजन्योपस्थितेः कारणत्वमुपेयम्। तथा च "वृक्षात् विभजत" इत्यत्रानन्वयापत्तेः। न च यद्यद्धातुयोगे पञ्चमी दृश्यते तत्तद्धातुजन्योपस्थितिः पञ्चम्यर्थावधित्वान्वयबोधे कारणमिति वाच्यम्। अननुगमात्। "वृक्षात् क्रीणाति" इति प्रयोगापत्तेश्चेत्यलं विस्तरेण।

"प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या"[१] इति वार्तिकेन सिद्धा कुतो भवानिति प्रश्ने प्रतिष्ठाननगरात् इत्युत्तरे आगत इति पदाध्याहारेण पञ्चमी विभागार्थिका बोध्या।

भाट्टचिन्तामण्यनुसारेण अपादानत्वनिष्कर्षः[२]

अपादानत्वं पञ्चम्यर्थः। "अपादाने पञ्चमी"[३] इति सूत्रात्। अपादात्वं च परसमवेतक्रियाजन्यविभागाश्रयत्वम्। विभागहेतुक्रियानाश्रयत्वे सति विभागाश्रयत्वमिति तदर्थः। "ध्रुवमपायेऽपादानम्"[४] इति सूत्रात्। अपायो विश्लेषः विभागवियोगादिशब्दवाच्यः। अन्यस्य विभागवियोगादि [हेतु] क्रियाश्रयस्य विभागादौ सति विभागवियोगाश्रयत्वेन ध्रुवं स्थिरं विभागवियोगादिनिरूपकमिति यावत्। तदपादानमिति सूत्रार्थः। यथा "वृक्षात् पर्णं पतति"। अधस्संयोगानुकूलक्रिया पतेरर्थः, अधःसंयोगप्रयोजकविभागानुकूलक्रिया वा। एवं चाधःसंयोगानुकूलक्रियानाश्रयत्वे सति तादृशक्रियाजन्यविभागाश्रयत्वात् वृक्षस्यापादानत्वम्।

इत्थं च तद्धात्वर्थतावच्छेदकफलजनकक्रियानाश्रयत्वे सति तादृशक्रियाजन्यफलनिरूपकत्वं तादृशक्रियानिरूपकत्वं चेति निष्कर्षः।

---

[१] वा. १४७६; सू. २.३.२८; म.भा.पृ. ५०५
[२] भा.चि.पृ. १०४
[३] सू. २.३.२८
[४] सू. १.४.२४

भाट्टचिन्तामणावेव[1]

एवं "धावतोऽश्वात् पतति" इत्यत्र अश्वस्योक्तक्रियाश्रयत्वेऽपि तस्य विभागहेतुत्वाभावात् अपादानत्वोपपत्तिः।

न चैवं "मेषान्मेषोऽपसरति" इत्यत्र मेषस्य कथमपादानत्वम्, उभयकर्मजविभागस्यैक्येन तज्जनकक्रियानाश्रयत्वाभावात् इति वाच्यम्। विभागजनकक्रियायाः भेदात् एकक्रियामादाय अपरस्यापादानत्वोपपत्तेः।

अन्योन्यस्मान्मेषावपसरतः इत्यत्रोभयकर्मजविभागस्यैकत्वेऽपि तत्तज्जनकक्रियामादाय परस्परस्य तदनाश्रयत्वोपपादनात्।

"वृक्षात् वस्त्रं पतति" इत्यत्र पतनक्रियां धात्वर्थमादाय संगमनीयम्।

न चैवं 'वृक्षात् स्पन्दत' इत्यापत्तिरिति वाच्यम्। "गृहाच्चलितः, राज्याच्चलितः" इतिवत् इष्टत्वात्।

"वलाहकात् विद्युत् विद्योतते" इत्यत्र निःसृत्य इत्यध्याहारेणोपपदविभक्तिः।

भाट्टरहस्यानुसारेण अपादानत्वनिरूपणम्[2]

पञ्चम्यर्थोऽपि भावनायामेवान्वेति। नैयायिकमतम्। पञ्चम्यर्थश्च "अपादाने पञ्चमी"[3] इति सूत्रात् अपादानत्वरूपः। तच्च "ध्रुवमपायेऽपादानम्"[4] इति सूत्रेण निरुक्तम्। तथा हि — अपाये = विभागे, ध्रुवम् = निश्चलम् क्रियानाश्रयं यत् तत् अपादानसंज्ञं स्यादिति सूत्रार्थः। तथा च क्रियानाश्रयत्वे सति क्रियाजन्यविभागाश्रयत्वमपादानत्वम्। अस्ति चेदं "वृक्षात् पर्णं पतति" इत्यत्र वृक्षे पतनक्रियानाश्रयत्वात् पतनक्रियाजन्यविभागाश्रयत्वाच्च। अत्र चोदासीने घटादावतिव्याप्तिवारणाय विशेष्यम्। पर्णेऽतिव्याप्तिवारणाय सत्यन्तम्।

क्रियानाश्रयत्वं च यद्यपि सामान्यतो न क्रियावन्निष्ठभेदप्रतियोगित्वम्। प्रतियोगितासामान्यनिवेशे पतनवत्यपि पर्णे पर्णतदितरोभयभेदसत्त्वेन तत्प्रतियोगित्वसत्त्वात् क्रियाजन्यविभागाश्रयत्वसत्त्वाच्चापादानत्वापत्तौ "पर्णं स्वस्मात् पतति" इति प्रयोगापत्तेः। प्रकृत्यर्थतावच्छेदकावच्छिन्नत्वनिवेशे च 'द्रव्यात् पतति' इत्यस्यानुपपत्तेः। पतनवति पर्णे द्रव्यत्वावच्छिन्नप्रतियोगिताकभेदाभावात्।

---

[1] पृ. १०४

[2] भा.र.पृ. १२७-१३०

[3] सू. २.३.२८

[4] सू. १.४.२८

तथापि प्रकृत्यर्थतावच्छेदकाश्रययत्किंचित्पर्णव्यक्तित्वावच्छिन्नप्रतियोगितानिवेशेनैव क्रियावन्निष्ठभेदप्रतियोगित्वं निर्वाच्यम्। तच्च पतमानपर्णनिष्ठभेदनिरूपितयत्किंचित्पर्णव्यक्तित्वावच्छिन्नप्रतियोगित्वमुदासीने पर्णेऽपि। अतः क्रियाजन्यविभागाश्रयत्वोपादानमिति। अतः वृक्षात् पतति पर्णे "पर्णात् पतति पर्णम्" इति न प्रयोगः।

अत्र विभागः परसमवेतत्वं (भेदवत्समवेतत्वं) च पञ्चमीशक्यम्। तत्र प्रकृत्यर्थो वृक्षः विभागे समवेतत्वसंबन्धेन परशब्दार्थैकदेशे भेदे च प्रकृत्यर्थतावच्छेदकाश्रयः विभागाश्रयश्च या वृक्षव्यक्तिः तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेनान्वेति। विभागः जनकत्वसंबन्धेन, परसमवेतत्वं च स्वरूपसंबन्धेन धात्वर्थपतनेऽन्वेति। तथा च वृक्षसमवेतविभागजनकवृक्षत्वरूपप्रकृत्यर्थतावच्छेदकाश्रयविभागाश्रयीभूत व्यक्तित्वावच्छिन्नवृक्षवन्निष्ठप्रतियोगिताकभेदाश्रयसमवेतपतनाश्रयः पर्णमिति बोधः।

अत्र प्रकृत्यर्थतावच्छेदकाश्रययत्किंचिद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वस्यैव प्रकृत्यर्थस्य वृक्षस्य पञ्चम्यर्थे भेदे संसर्गत्वोक्तौ वृक्षात् पतति पर्णे 'पर्णात् पतति' इति प्रयोगापत्तिः। तत्पतनस्यापि प्रकृत्यर्थतावच्छेदकपर्णत्वाश्रययत्किंचिदुदासीनपर्णव्यक्तित्वावच्छिन्नप्रतियोगिताकभेदवत्पतमानपर्णवृत्तित्वात्, पतमानपर्णवृत्तिविभागजनकत्वाच्च। अतस्तद्व्यावृत्यर्थं प्रकृत्यर्थस्य भेदेन सहान्वये संसर्गघटकव्यक्तौ पतनजन्यविभागाश्रयत्वं विशेषणमिति केचित् नैयायिकनव्याः।

अन्येषां नैयायिकानां मतम्

अन्ये तु गुरुभूतसंसर्गघटितव्युत्पत्तिविशेष[कार्यकारणभावविशेष] कल्पनायां गौरवापत्तेः। क्रियानाश्रयत्वं न क्रियावन्निष्ठभेदप्रतियोगित्वम्। अपि तु क्रियावत्प्रतियोगिकभेदाश्रयत्वम्। तदा क्रिया भेदप्रतियोगितावच्छेदिका। भेदश्चाभावीयविशेषणतासंबन्धेनापादानवृत्तिः। तादृशभेदाश्रयत्वं चोदासीनपर्णादावपीति तद्व्यावृत्त्यर्थं विशेष्यदलम् (क्रियाजन्यविभागाश्रयत्वम्)। तथा चास्मिन् पक्षे विभागः भेदश्च पञ्चम्यर्थः। तत्र चाधेयतासंबन्धेन प्रकृत्यर्थस्यान्वयः। विभागस्य जनकत्वसंबन्धेन, भेदस्य च प्रतियोगितावच्छेदकत्वसंबन्धेन धात्वर्थेऽन्वयः। वृक्षवृत्तिविभागजनकवृक्षनिष्ठभेदप्रतियोगितावच्छेदकपतनानुकूला भावनेति शाब्दबोधः।

अत्र "ग्रामादागच्छतोऽश्वात् पतति" इत्यत्र अश्वस्य आगमनापादानत्वं ग्रामस्य पतनापादानत्वं च स्यात्। तद्वारणाय क्रियाविशेषविवक्षा कार्या। तेन यन्निष्ठविभागजनकत्वेन यन्निष्ठभेदप्रतियोगितावच्छेदकत्वेन च यत्क्रिया विवक्षिता तत्त्वं

तत्क्रियापादानत्वमिति निष्कर्षः। वृक्षनिष्ठविभागजनकत्वेन वृक्षनिष्ठभेदप्रतियोगितावच्छेदकत्वेन च पर्णनिष्ठा पतनक्रिया विवक्षितेति वृक्षस्य पतनक्रियापादानत्वम्। "ग्रामदागच्छतोऽश्वात् पतति" इत्यत्र ग्रामनिष्ठविभागजनकत्वेन ग्रामनिष्ठभेदप्रतियोगितावच्छेदकत्वेन च अश्वनिष्ठागमनक्रिया विवक्षितेति आगमनं प्रति ग्रामस्यापादानत्वम् नाश्वस्य, अश्वनिष्ठविभागजनकत्वेन अश्वनिष्ठभेदप्रतियोगितावच्छेदकत्वेन च देवदत्तनिष्ठपतनक्रिया विवक्षितेति पतनं प्रति अश्वस्यापादानत्वं न ग्रामस्येति सिध्यति।

अत एव "परस्परस्मान्मेषावपसरतः" इत्यत्रोभयकर्मजविभागस्थले विभागस्यैकत्वेऽपि या या क्रिया विवक्षिता, तत्तत्क्रियाविशेषमादायैव तदनाश्रयस्य तदपादानत्वं निर्वचनीयम्। विवक्षापदोपादानेन च यदा नोक्तरूपेण विवक्षा, अपि तु अवयवावयविभावेनैव विवक्षा तदा "वृक्षस्य पर्णं पतति" इत्येव प्रयोग इति न तत्रापादानत्वप्रसङ्गः।

यत्पदं च यत्पदाभिधेयपरम्। तेन "वृक्षात् तस्मिन्नेव वृक्षे पर्णं पतति" इत्यत्र सप्तम्यन्तपदाभिधेयत्वविशिष्टस्य नापादानत्वम्।

अपादानत्वलक्षणस्य क्वचित् अतिव्याप्तिशङ्कातत्परिहारौ

न चैवमपि "वृक्षं त्यजति" इत्यत्र "स्पन्दते पर्णम्" इत्यत्र च वृक्षे अपादानत्वापत्तिः, क्रियाजन्यविभागाश्रयत्वात् क्रियानाश्रयत्वाच्च वृक्षस्येति वाच्यम्। वृक्षेऽपादानत्वसत्त्वेऽपि धात्वर्थतावच्छेदकविभागरूपफलाश्रयत्वेन त्यागकर्मत्वस्यापि सत्त्वात् बलीयस्या कर्मसंज्ञया द्वितीयाविभक्त्युत्पत्तेः पञ्चम्या अप्रयोगात्। "स्पन्दते पर्णम्" इत्यत्र "आसनाच्चालितः" "राज्याच्चालितः" इतिवत् "वृक्षात् स्पन्दते" इति प्रयोगस्यापीष्टत्वात्।

अत एव 'स्पन्दत' इत्यत्र वृक्षस्यापादानत्ववारणार्थं क्रियापदं सकर्मकधातुपरम्। सकर्मकधात्वर्थजन्यविभागाश्रयस्यैवापादानत्वमिति केषांचित्समाधानमपास्तम्। तत्रापादानत्वस्येष्टत्वात्। अपि च सकर्मकधात्वर्थेत्युक्तावपि त्यजधातोः सकर्मकतया तदर्थक्रियाजन्यविभागाश्रयस्य वृक्षस्यापादानत्वापत्तेरवारणात् 'वृक्षात् त्यजति' इति प्रयोगापत्तिर्दुर्वारा।

अथ वा उभयत्रापादानत्वव्यावृत्त्यर्थं धात्वर्थतावच्छेदकफलभिन्नत्वं विभागविशेषणं देयम्। त्यजेर्हि विभागानुकूलो व्यापारो वाच्यः। अतो विभागस्य धात्वर्थतावच्छेदकत्वात् तद्भिन्नविभागाश्रयत्वाभावेन न वृक्षस्यापादानत्वापत्तिः।

स्पन्दतेश्च धात्वर्थतावच्छेदकफलाभावेन तद्भेदस्याप्रसिद्ध्या तद्विशिष्टविभागाप्रसिद्ध्या नापादानत्वापत्तिः।

अथ वा यन्निष्ठविभागेत्यपहाय यन्निरूपितेति लक्षणे निवेशनीयम्। यन्निरूपितविभागजनकत्वेन यन्निष्ठभेदप्रतियोगितावच्छेदकत्वेन च यत्क्रिया विवक्षिता तत्त्वं तत्क्रियापादानत्वमिति फलितम्। 'वृक्षात् पर्णम्' इत्यत्र प्रकृत्यर्थस्य वृक्षस्य निरूपितत्वं विभागे संसर्गः। तथा च वृक्षनिरूपितविभागजनकं वृक्षनिष्ठभेदप्रतियोगितावच्छेदकं च पतनमिति शाब्दबोधः। स्पन्दते इत्यत्रापादानत्ववारणाय क्रिया सकर्मिकैव लक्षणे विवक्षिता। 'आसनाञ्चलिता, सार्थात् हीयते पशुः' इत्यादयः प्रयोगास्तु अवधित्वरूपं पञ्चम्यर्थमादाय नेयाः इत्याहुः। वैयाकरणनव्या अपि केचिदेवम्।

अपादानत्वमखण्डोपाधिरिति स्वमतम् (खण्डदेवमतम्)

वस्तुतस्तु पूर्वोक्तगुरुभूतशक्यतावच्छेदकभेदेन अनेकशक्तिकल्पनया गौरवम्। अपि च प्रकृत्यर्थस्य पञ्चम्यर्थे विभागे भेदे चान्वयाङ्गीकारात् तदानुसारेण प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविभागनिष्ठविशेष्यतासंबन्धेन पञ्चमीजन्योपस्थितिः कारणमिति, प्रकृत्यर्थनिष्ठप्रकारतानिरूपितभेदनिष्ठविशेष्यतासंबन्धेन शाब्दबोधं प्रति भेदनिष्ठविशेष्यतासंबन्धेन पञ्चमीजन्योपस्थितिःकारणमिति कार्यकारणभावद्वयं कल्पनीयम्। तथा च पञ्चम्यर्थस्य विभागस्य जनकतासंबन्धेन धात्वर्थे, पञ्चम्यर्थस्य भेदस्य च प्रतियोगितावच्छेदकत्वसंबन्धेन तत्रैवान्वय इत्यङ्गीकारात् तदनुसारेण पञ्चम्यर्थविभागनिष्ठजनकतासंबन्धावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधं प्रति विशेष्यतासंबन्धेन धातुजन्योपस्थितिः कारणमिति, पञ्चम्यर्थभेदनिष्ठप्रतियोगितावच्छेदकत्वसंबन्धावच्छिन्नप्रकारतानिरूपित विशेष्यतासंबन्धेन बोधं प्रति विशेष्यतासंबन्नधेन धातुजन्योपस्थितिः कारणमिति च कार्यकारणभावद्वयं कल्पनीयम् इति गौरवम्। तदपेक्षया लाघवात् अपादानमपादानमित्यनुगतव्यवहारसाक्षिकतया अपादानत्वमखण्डोपाधिरूपमेकं निरुक्तापादानत्वसमनियतं धर्मं कल्पयित्वा, तत्रैव पञ्चम्याः शक्तिं कल्पयित्वा तस्मिंश्च प्रकृत्यर्थान्वयायैकाम्, तस्य चाख्यातार्थान्वयाय एकां व्युत्पत्तिं कल्पयितुमुचितम्। प्रकृत्यर्थस्यापादानत्वे आधेयता संसर्गेणान्वयः। अपादानत्वस्य स्वनिरूपकधात्वर्थानुकूलत्वसंबन्धेनाख्यातार्थकृतावन्वयः। वृक्षनिष्ठापादातानिरूपकपतनानुकूला पर्णनिष्ठा कृतिः इति बोधः। तदेवं प्रचुरप्रयोगात् अखण्डे अपादानत्वे पञ्चम्याः शक्तिः।

यत्र तु "वृक्षाद्विभजते" इत्यादौ विभागजन्यविभागाश्रयत्वाभावान्नोक्तापादानत्वसंभवः, तत्र लक्षणया स्वरूपसंबन्धविशेषरूपमवधित्वं पञ्चम्यर्थः। तस्मिन् पक्षेऽपि अपाये = विभागे ध्रुवम् = अवधिभूतमपादानसंज्ञं स्यादिति वाक्यपदीयादौ सूत्रं व्याख्यातम्। तस्यापि स्वनिरूपकविभागानुकूलत्वसंबन्धेन भावनायामन्वयः। वृक्षनिष्ठावधितानिरूपकविभागानुकूलकृतिः कर्तृवृत्तिः इति शाब्दबोधः। स्वनिष्ठविभागावधित्वस्य स्वस्मिन् अभावाच्च न स्वस्माद्विभजते इति प्रयोगः।

अथ वा सर्वेष्वपि पूर्वोक्तेषु पक्षेषु अवधित्वमेव पञ्चम्यर्थः। तस्य च क्वचित् "वृक्षात्पर्णं पतति" इत्यादौ धात्वर्थजन्यविभागद्वारकः भावनायामन्वयः स्वनिरूपकविभागानुकूलपतनानुकूलत्वेनान्वयः इति यावत्।

क्वचित् 'वृक्षाद्विभजते' इत्यादौ धात्वर्थद्वारकोऽन्वयः। स्वनिरूपकधात्वर्थभूतविभागानुकूलत्वसंबन्धेन पञ्चम्यर्थस्यावधित्वस्य भावनायामन्वय इति यावत् इत्यपि सुवचम्।

"वलाहकात् विद्योतते विद्युत्" इत्यत्र निस्सरणजन्यं विद्योतनं लक्षणया द्युतेरर्थः। तदेकदेशे निस्सरणे पञ्चम्यर्थस्य अवधित्वस्यान्वयः। वलाहकावधिकनिस्सरणजन्यद्योतनानुकूला भावना विद्युत्कर्तृका इति बोधः।

एवं "कुसूलात् पचति" इत्यत्र आदानजन्यः पाकः धात्वर्थः। आदाने पञ्चम्यर्थान्वयः। कुसूलावधिकादानजन्यः पाक इति नव्यवैयाकरणाः।

अस्मन्मते तु लक्षणायामेकदेशान्वये च प्रमाणाभावात् पञ्चम्यर्थोऽपादानत्वादिरेव स्वनिरूपकनिस्सरणजन्यविद्योतनानुकूलत्वसंसर्गेण कृतावन्वेति।

"कुतो भवान्" इत्यादौ प्रश्ने, 'पाटलीपुत्रात्" इत्युत्तरे च आगत इत्यध्याहारेणान्वयो वक्तव्यः — इति।

जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्[१] इति वार्तिकव्याख्यानम्

जुगुप्साद्यर्थकधातुभिर्योगे जुगुप्सादिविषयस्यापादानत्वमित्यर्थः। "पापात् जुगुप्सते" पापविषये कुत्सितत्वबुद्ध्या न रमत इत्यर्थः। "धर्मात् प्रमाद्यति" धर्मविषये मुह्यतीत्यर्थः। वास्तवसंयोगविश्लेषयोरभावात् वचनमिदम्। यदा तु 'जुगुप्सत' इत्यादेः निवर्तते इत्यर्थः आश्रीयते, तदा बुद्धिकृतविश्लेषावधित्वमादाय अपादानत्वादेव सिद्धमिति वार्तिकमिदं भाष्ये प्रत्याख्यातम्। (बालमनोरमा)

[१] वा. १०७९

लघुशब्देन्दुशेखरे[१]

जगुप्सादीनां यद्विषयकत्वेन विवक्षा तत् अपादानम्। तस्यैव विषयस्य क्रियाजनकरूपकारकत्वेन अविवक्षायां संबन्धित्वेन च विवक्षायां "पापस्य जुगुप्सते" इति षष्ठी भवत्येव सत्यभिधाने (शिष्टप्रयोगे)। एषां धातूनां स्वार्थपूर्वकबौद्धविश्लेषजनकनिवृत्तिलक्षणया सूत्रेणैव सिद्धेः इदं वार्तिकमुत्तरसूत्राणि च प्रत्याख्येयानीति भाष्ये स्पष्टम्।

लघुमञ्जूषायाम्[२]

अधर्मात् जुगुप्सति। अनिष्टसाधनताज्ञानरूपा निन्दा जुगुप्सतेरर्थः। विषयता पञ्चम्यर्थः। "गुप्तिज्किद्भ्यः सन्"[३] इति सूत्रात् स्वार्थे सन्। "गुपेर्निन्दायाम्" इति वार्तिकात् निन्दार्थकोऽत्र सन्। अधर्मविशेष्यकमनिष्टसाधनत्वप्रकारकं ज्ञानमिति बोधः। अनिष्टसाधनताज्ञानपूर्वकमधर्मान्निवर्तत इत्यर्थ इति भाष्यकृन्मतम्। तेन ध्रुवमपाये इत्येवापादानमिति वार्तिकप्रत्याख्यानात्। इत्थं हि भाष्यम् — इह तावत् अधर्मात् जुगुप्सते, अधर्मात् बीभत्सते। य एष मनुष्यः प्रेक्षापूर्वकारी भवति, स पश्यति दुःखोऽधर्मः, नानेन कृत्यमस्तीति, स बुद्ध्या संप्राप्य निवर्तते। तेन ध्रुवमपायेऽपादानमित्येव सिद्धम् — इति। इत्थं च अधर्मविशेष्यकानिष्टसाधनत्वप्रकारकज्ञानं चैत्रीयमिति बोधः वार्तिकमते। अनिष्टसाधनताज्ञानपूर्विका अधर्मापादानिका निवृत्तिश्चैत्रीयेति बोधः भाष्यमते।

धर्माद्विरमति। प्रागभावसाधारणकृत्यभावानुकूलो व्यापारः विरमतेरर्थः। योगक्षेमसाधारणी चात्रानुकूलता। स च व्यापारः धर्मविषयकः उपेक्षाविशेष एव। कृत्यभावपदेन कृतिध्वंसः कृतिप्रागभावश्च विवक्षितः। ध्वंसविषये उत्पत्तिहेतुतारूपा अनुकूलता व्यापारे। प्रागभावस्यानादित्वेनोत्पत्त्यभावात् तत्क्षेमहेतुतारूपा अनुकूलता व्यापारे। क्षेमः सत्तापरिपालनम्। धर्मविषयकृत्यभावानुकूलो व्यापारः धर्मविषयकोपेक्षात्मकः चैत्रीय इति बोधः। तदुक्तं भाष्ये — य एष मनुष्यो नास्तिकबुद्धिर्भवति स पश्यति नेदं किंचित् धर्मो नाम नैनं करिष्यामीति स बुद्ध्या संप्राप्य ततो निवर्तते — इति। तेन हि कदापि धर्मानाचरणेऽपि तथा प्रयोग इति लभ्यते।

---

[१] पृ. ६८९
[२] पृ .१२९१
[३] सू. ३.१.५

नैयायिकमतखण्डनम्

एतेन — जीवनकालावच्छिन्नः कृत्यसमानाधिकरणः कृतिध्वंसः विरमतेरर्थः। कृतिश्च सर्वत्र एकविषयैव। पञ्चम्यर्थो विषयत्वं कृतिद्वयेऽप्यन्वेति। जीवनं च कर्तृसंबन्धि। सामानाधिकरण्यं च समभिव्याहृतकर्तृपदबोध्यशरीरजातीयशरीर-घटितम्। तथा च कृत्यसमानाधिकरण इत्यस्य कृत्यवच्छेदकसमभिव्याहृत-चैत्रपदबोध्यशरीरवृत्तिचैत्रत्वविशिष्टशरीरावच्छिन्नात्मवृत्तिः इत्यर्थः। इदानीं धर्मं कृत्वा पुनः अस्मिन् जन्मनि कदापि यदि धर्मं न करोति तदा धर्माद्विरमति इति प्रयोगः। धर्मकृतिध्वंसे सति पुनः धर्मं करोति चेत् तत्कृतिध्वंसः कृति-समानाधिकरणः तद्भिन्नः यः पुनः धर्मं न करोति तदीयकृतिध्वंसः इति तात्पर्यम्। साजात्यस्य समभिव्याहृतकर्तृपदबोध्यशरीरवृत्तिजातिमत्त्वरूपस्य विवक्षितत्वात् इदानीं धर्मं कृत्वा विरतः जन्मान्तरे धर्मं करोति चेत् तादृशकृति-सामानाधिकरण्यमेव एतज्जन्मीयकृतिध्वंसे इति कथं धर्माद्विरमतीति प्रयोगस्योप-पत्तिः इति शङ्कायाः नावसरः। एवं युवशरीरावच्छेदेन धर्मं कुर्वत्यपि बालशरीरावच्छिन्नकृतिध्वंसमादाय धर्माद्विरमतीति न प्रयोगः। नापि पूर्वापर-कालयोः धर्मकरणे मध्ये मुहूर्तमात्रमकरणे विरमतीति प्रयोगः, तत्कृतिध्वंसस्य कृतिसमानाधिकरणत्वात् — तथा च चैत्रसंबन्धिजीवनकालावच्छिन्नकृत्यसमा-नाधिकरणकृतिध्वंसवांश्चैत्र इति बोधः इति परास्तम्।

पूर्वोक्तभाष्यविरोधात्। येनास्मिन् जन्मनि कदापि धर्मो नाचरितः तं विषयी-कृत्य 'धर्माद्विरमति' इति प्रयोगः भाष्यसंमतः। स च विरमतेः कृतिध्वंसार्थकत्वे न संगच्छते। अपि च धर्माद्विरतोऽपि पुनः प्रवृत्त इति प्रयोगस्य भवन्मते-ऽनुपपत्तिः। धर्मविषयकृतिध्वंसस्य धर्मविषयककृतिसमानाधिकरणत्वात्।

धर्मात् प्रमाद्यति। अत्रेष्टसाधने वस्तुनि समानदेशवत्त्वसमानकालिकत्वोभय-संबन्धेन अधिकारविशिष्टम् इष्टसाधनत्वाभावज्ञानम् अनिष्टसाधनत्वज्ञानं वा धात्वर्थः। पञ्चम्यर्थो विषयत्वं धात्वर्थज्ञानान्वयि।

जुगुप्सादीनां यद्विषयकत्वेन विवक्षा तत् अपादानम्। तत्पूर्वकनिवृत्तिपर्यन्तं सर्वत्र धात्वर्थ इति भाष्यमतम्।

कारकचक्रे[१]

"अधर्मात् जुगुप्सते" इत्यादौ पञ्चम्याः कर्मत्वमर्थः। धातोः निन्दा अर्थः। अधर्मं निन्दतीत्यर्थः। निन्दा नाम द्वेषः। अधर्मविषयकद्वेषाश्रय इत्यर्थः।

---

[१] पृ. ७४

"अधर्मात् विरमति" इत्यादौ धातोः करणानन्तरमकरणमर्थः। पञ्चम्याः कर्मत्वमर्थः। स च करणेऽकरणे चान्वेति। अधर्मं कृत्वा पुनर्न करोतीत्यर्थः।

एवं "धर्मात् प्रमाद्यति" इत्यादौ पञ्चम्या विषयित्वमर्थः। धातोरनवधानमर्थः। आख्यातस्याश्रयत्वमर्थः। अधर्मविषयकानवधानाश्रयः इति शाब्दधीः।

शब्दशक्तिप्रकाशिकायाम्[1]

"पापान्निवर्तते" "अधर्माद्विरमति" इत्यादौ पञ्चम्याः द्वेषोर्थः। तत्र प्रकृत्यर्थस्य विषयत्वेनान्वयः। द्वेषस्य निवृत्तिरूपे धात्वर्थे जन्यत्वसंबन्धेनान्वयः। तेन पापगोचरद्वेषजन्यनिवृत्तिमान् इत्येवं तत्र बोधः। तत्र विषयत्वं पञ्चम्यर्थः। पापगोचरनिवृत्तिमानिति वाक्यार्थः इत्यन्ये।

पदवाक्यरत्नाकरे[2]

पापाद्विरमतीत्यादौ विषयत्वाभिधायिनी।
व्याघ्राद्बिभेतीत्यादौ तु हेतुतामाह पञ्चमी।।

पापाद्विरमति, जुगुप्सति, धर्मात् प्रमाद्यति इत्यत्र विरमेः निवृत्तिरर्थः, गुपेर्गर्हा नाम द्वेषविशेषोऽर्थः प्रमाद्यतेरनुद्बुद्धसंस्कारोऽर्थः। पञ्चम्यर्थो विषयत्वम्। तथा च पापविषयकनिवृत्तिमान्, पापविषयकद्वेषविशेषवान्, धर्मविषयकानुद्बुद्धसंस्कारवान् इति क्रमशो बोधाः।

परे तु करणानन्तरमकरणं विरमतेरर्थः, गर्हाप्रयुक्तप्रवृत्त्यभावः गुपेरर्थः, कर्तव्यतास्मरणाभावप्रयुक्तप्रवृत्त्यभावः प्रमाद्यतेरर्थः। पञ्चम्यर्थविषयत्वं च व्युत्पत्तिवैचित्र्यात् करणगर्हयोः अभावप्रतियोगिषु करणप्रवृत्तिस्मरणेषु चान्वेति। तथा च पापविषयककरणानन्तरितः पापविषयककरणाभावः, पापविषयकगर्हाप्रयुक्तः, पापविषयकप्रवृत्त्यभावः, धर्मविषयककर्तव्यतास्मरणाभावप्रयुक्तः, धर्मविषयकप्रवृत्त्यभाव इति क्रमशो वाक्यार्थबोध इत्याहुः।

विभक्त्यर्थनिर्णये[3]

"जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्"[4] इति वार्तिकं जुगुप्सादिविषयेऽपादानत्वं बोधयति। "पापात् जुगुप्सते विरमति वा" इत्यत्र गुपेः गर्हा नाम

[1] पृ. ३०१
[2] पृ. ७६०
[3] पृ. ३३७
[4] वा. १०७९

द्वेषविशेषः विरमतेः निवृत्तिः यत्नोऽर्थः धर्मात् प्रमाद्यतीत्यत्र प्रमादेः अनुद्बुद्ध-संस्कारोऽर्थः। सर्वत्र पञ्चम्याः विषयत्वमर्थः। तथा च पापविषयकगर्हाश्रयत्वं पापविषयकनिवृत्त्याश्रयत्वं धर्मविषयानुद्बुद्धसंस्काराश्रयत्वं वाक्यार्थ इति संप्रदायः।

केचित्तु गुपेः गर्हाप्रयुक्तः प्रवृत्त्यभावोऽर्थः। विरमतेः करणानन्तरमकरणमर्थः। प्रमाद्यतेः कर्तव्यतास्मरणाभावप्रयुक्तः प्रवृत्त्यभावोऽर्थः। पञ्चम्यर्थो विषयत्वं गर्हा-करणयोरभावप्रतियोगिषु चान्वेति। पापविषयकगर्हाप्रयुक्तः पापविषयकप्रवृत्त्यभावः पापविषयककरणादनन्तरस्तदभावः धर्मविषयककर्तव्यतास्मरणाभावप्रयुक्तो धर्म-विषयकप्रवृत्त्यभावो वाक्यार्थ इत्याहुः।

वस्तुतस्तु बुद्ध्यादिविगमस्वरूपापायवतो जुगुप्साद्यपादानत्वज्ञापनार्थं ध्रुव-सूत्रैकवाक्यतया वार्तिकारम्भः। न तु पञ्चम्या विषयत्वार्थकत्वज्ञापनार्थम्। तथा सति "अपादाने पञ्चमी"[1] इति सूत्रैकवाक्यतया तदारम्भः स्यात्। तथा च कर्तव्यत्वप्रकारकज्ञानविशेष्यत्वाभावः पञ्चम्या अर्थः। स च प्रयोजकतया जुगुप्सायामन्वेति। पञ्चम्यर्थे तादृशाभावे प्रकृत्यर्थस्याधेयतयान्वयः। जुगुप्सा तु द्वेषविशेषः, यद्वा अपकर्षप्रतिपत्त्यनुकूलव्यापारः। अत एव जुगुप्सतिः सकर्मकः। तत्र कर्मणोऽपादानत्वविवक्षायां पञ्चमी। इतरथा तु 'पापकर्माणि जुगुप्सते' इति द्वितीयैव प्रमाणम्। एवं "पापात् जुगुप्सते" इत्यत्र पापपदस्य पापकर्मपरतायां दुरितजनकत्वमपकर्षः, दुरितपरतायां दुःखजनकत्वम्। तथा च पापवृत्तेः कर्तव्यत्वप्रकारकबुद्धिविशेष्यत्वाभावस्य प्रयोजकोऽपकर्षप्रतिपत्त्यनुकूलो व्यापारो वाक्यार्थः। पापस्यापकर्षप्रतिपत्तिविशेष्यत्वमर्थात् प्रतीयते। न ह्यन्यनिष्ठस्य कर्तव्यताबुद्धिविशेष्यत्वाभावस्य प्रयोजकोऽन्यनिष्ठापकर्षप्रतिपादकः संभवति।

"देवदत्तात् जुगुप्सते" इत्यत्र पञ्चम्याः गुणाभावः अर्थः। गुणो धैर्यादिः। अप-कर्षश्चात्र क्रोधलोभादिः। देवदत्तवृत्तेः गुणाभावस्य प्रयोजकः क्रोधलोभादिप्रति-पत्त्यनुकूलो व्यापारो वाक्यार्थः।

एतेन जुगुप्सारूपद्वेषविषयस्य क्रियाफलेन विषयत्वेनाभिप्रेततया संप्रदानत्व-मेव। यथा श्राद्धाय निगर्हत इति। तथा चात्रापादानत्वाभावात् पञ्चम्यप्रसक्तेः 'पापात् जुगुप्सते' इति प्रयोगो न स्यादित्यपि समाहितम्। क्रियाफलेन अपकर्ष-प्रतिपत्त्या अनभिप्रेतत्त्वात् संप्रदानत्वाप्रसक्तेरिति।

[1] सू. २.३.२८

"पापाद्विरमति निवर्तते वा" इत्यत्र धातोर्निवृत्तिर्यत्न एवार्थः। पञ्चम्याः काम्यत्वाभावोऽर्थः। पापवृत्तेः काम्यत्वाभावस्य प्रयोजिका निवृत्तिर्वाक्यार्थः। पापे निवृत्तिविषयत्वमर्थात् प्रतीयते।

करणानन्तरमकरणं तु न विरमत्यादेरर्थः। तथा सति "रामः परस्त्रीगमनात् विरतो निवृत्तो वा" इति प्रयोगानुपपत्तेः।

"धर्मात् प्रमाद्यति" इत्यत्र प्रमाद्यतेः निश्चयाभावोऽर्थः। पञ्चम्याः प्रवृत्तिविषयत्वाभावोऽर्थः। धर्मवृत्तेः प्रवृत्तिविषयत्वाभावस्य प्रयोजको निश्चयाभाव इति बोधः। निश्चयस्त्वर्थात् कर्तव्यत्वप्रकारकः। निश्चयविशेष्यत्वं धर्मे पूर्ववदर्थात् प्रतीयते।

"तीर्थात् प्रमाद्यति" इत्यत्र तीर्थपदस्य तीर्थगमने धातोर्वा गमननिश्चयाभावे लक्षणा। स्मरणं तु न प्रमाद्यर्थे निविशते। तथा सत्यनवगतान्धपुत्रो दशरथोऽन्धपुत्ररक्षणात् प्रामाद्यत् इत्यत्र अपूर्वान्धपुत्ररक्षणविशेष्यकस्मरणाप्रसिद्ध्या अनन्वयापत्तेरिति।

भाट्टरहस्ये[१]

यत्तु — "जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्"[२] इति वार्तिकम् एतेषां योगे पञ्चमी वाच्येत्यर्थकम्, तत् लाक्षणिकानुशासनम्। अतः "पापात् जुगुप्सते विरमति धर्मात् प्रमाद्यति" इत्यादौ पञ्चमी। तत्राद्ये निन्दा धात्वर्थः। तच्च विगानम्। पञ्चम्यर्थो विषयित्वम्। प्रकृत्यर्थश्च निरूपितत्वसंबन्धेन तत्रान्वेति। विषयित्वं च स्वाश्रयविगानवत्त्वसंबन्धेन आख्यातार्थे आश्रयत्वेऽन्वेति। पापनिरूपितविषयित्वाश्रयविगानवत्त्वसंबन्धावच्छिन्नमाश्रयत्वं चैत्रवृत्तीति बोधः।

द्वितीये करणानन्तरमकरणं धात्वर्थः। पञ्चम्यर्थो विषयित्वम्। आख्यातार्थ आश्रयत्वम्। विषयित्वस्य धात्वर्थकृतिघटितसंबन्धेन (स्वाश्रयकृत्यनन्तरकालीनस्वाश्रयकृत्यभाववत्त्वसंबन्धेन) आख्यातार्थे आश्रयत्वेऽन्वयः। तथा च पापविषयककृत्यनन्तरकालीनपापविषयककृत्यभावाश्रयत्वं चैत्रवृत्तीति बोधः।

तृतीये पञ्चम्यर्थो विषयित्वम्। अनवधानं धात्वर्थः। आख्यातार्थ आश्रयत्वम्। स्वाश्रयावधानवत्त्वमाश्रयत्वे पञ्चम्यर्थस्य संबन्धः। तथा च धर्मविषयकावधानवत्त्वसंबन्धावच्छिन्नमाश्रयत्वं चैत्रवृत्तीति बोधः।

---

[१] पृ. १३०

[२] वा. १०७९

भीत्रार्थानां भयहेतुः[1] इति सूत्रव्याख्या

भयार्थकानां त्राणार्थकानां च धातूनां प्रयोगे भयहेतुः अपादानं स्यात्। "चोरात् बिभेति"। "चोरात् त्रायते"। भयहेतुः किम्। "अरण्ये बिभेति त्रायते वा"।

आद्ये उदाहरणे चोरेण हेतुना बिभेतीत्यर्थः। हेतुतृतीया प्राप्ता। द्वितीये चोरेण हेतुना आत्मानं तत्कृतवधबन्धनादिनिवृत्त्यै रक्षतीत्यर्थः। यदा तु "चोरात् बिभेति", भीत्या निवर्तते, "चोरात् त्रायते" आत्मानं त्रातुं निवर्तयतीत्यर्थः अश्रीयते तदा बुद्धिकल्पितविश्लेषावधित्वमादायापादानत्वं सिद्धमिति इदं सूत्रं भाष्ये प्रत्याख्यातम्।

प्रौढमनोरमायाम्[2]

कथं तर्हि "कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे" इति रामायणम्? कस्मात् बिभ्यतीति हि भाव्यम्। अत्राहुः — कस्येत्यस्य बिभेतीत्यत्र नान्वयः, अपि तु संयुगे इत्यत्र। जातरोषस्य कस्य संयुगे देवाः बिभ्यतीत्यन्वयः। न चैवं संयुगस्यैवापादानत्वापत्तिरिति वाच्यम्। परया अधिकरणसंज्ञया अपादानसंज्ञायाः बाधात्। अधिकरणत्वाविवक्षायां तु संयुगात् इति अपादानत्वमिष्टमेव। अन्ये तु शेषत्वविवक्षया कस्येति षष्ठीत्याहुः।

लघुशब्देन्दुशेखरे[3]

भयं भीः त्राणं त्राः, तदाह — भयार्थानामिति। हेतुतृतीयापवादोऽयम्। अरण्ये इति। भयार्थानां योगे कारकमपादानमित्यर्थेऽविशेषात् सर्वसंज्ञापवादः स्यादिति भावः।

लघुमञ्जूषायाम्[4]

"चोरात् बिभेति त्रायते वा"। अनिष्टज्ञानं भयम्। अनिष्टपरिहारः त्राणम्। अनिष्टहेतुरत्रापादानम्। "भीत्रार्थानां भयहेतुः"[5] इति सूत्रात्। चोरापादानकानिष्टज्ञानं, तदपादानकानिष्टपरिहार इति बोधः। सूत्रे भयहेतुरित्यस्य भयैकदेशानिष्टहेतुः इत्यर्थः। यज्जन्यं भयमेव न प्रसिद्धं तत्र पञ्चमी न भवत्येव। तस्या

---

[1] सू. १.४.२५
[2] पृ. ९२३
[3] पृ. ६८९
[4] पृ. १२९३
[5] सू. १.४.२५

इष्टत्वे तु हेतुत्वारोपा सा। एवम् "अन्तरिक्षे न जुहोति, परमाणुं न पश्यति" इत्यादेः उपपत्तिः। आरोपितस्यैव निषेधात् बोधाच्च।

भाष्यात्तु — भयपूर्विका त्राणपूर्विका च निवृत्तिः निवर्तना चानयोरर्थः। बुद्धिप्राप्तचोरापादानिका बुद्धिप्राप्तचोरभयपूर्विका निवृत्तिः, बुद्धिप्राप्तचोरापादानिका अनिष्टपरिहारफलिका निवर्तनेति च बोधः — इति लभ्यते।

चोरमध्यगतोऽपि तत्संपर्कफलवधादिनिवर्तनात् चोरेभ्यो निवर्तितः इत्युच्यते। एतत्सूत्रविषयेऽपि हेतुत्वापादानत्वाविवक्षायां षष्ठी भवत्येव।

कारकचक्रे[१]

"व्याघ्रात् बिभेति, शत्रोः परित्रायते" इत्यादौ पञ्चमी नापादाने, किं तु "भीत्रार्थानां भयहेतुः"[२] इति सूत्रेणानुशिष्टायाः पञ्चम्याः हेतुत्वमर्थः। आधेयतया प्रकृत्यर्थस्यान्वयः। हेतुत्वस्य निरूपकतासंबन्धेन धात्वर्थे भयेऽन्वयः। आख्यातार्थः आश्रयत्वम्। व्याघ्रनिष्ठहेतुतानिरूपकभयाश्रयः चैत्र इति "व्याघ्रात् बिभेति" इति वाक्यात् बोधः।

"शत्रोः परित्रायते" इत्यत्रापि हेतुत्वं पञ्चम्यर्थः। भयाभावः अनुकूलव्यापारश्च धात्वर्थः। धात्वर्थतावच्छेदके भये पञ्चम्यर्थस्य हेतुत्वस्य निरूपकतयान्वयः। शत्रुहेतुकभयाभावानुकूलव्यापारवांश्चैत्र इति बोधः।

शब्दशक्तिप्रकाशिकायाम्[३]

"व्याघ्रात् बिभेति, त्रस्यति" इत्यादौ हेतुत्वं जन्यत्वं वा पञ्चम्यर्थः। तस्य भावित्वेन स्वानिष्ठचिन्तनपर्यवसितस्य भयस्यैकदेशेऽनिष्टे चिन्तने वा अन्वयः। व्याघ्रहेतुकस्वानिष्टस्य भावित्वेन चिन्तनवान् व्याघ्रहेतुकत्वेन भाव्यनिष्टधर्मिकचिन्तनवानिति वा बोधः। आद्ये पञ्चम्यर्थस्य हेतुत्वस्य निरूपकतया अनिष्टेऽन्वयः। व्याघ्रहेतुकस्वानिष्टविशेष्यकभावित्वप्रकारकचिन्तनवानिति बोधः। द्वितीये पञ्चम्यर्थस्य जन्यत्वस्य स्वनिष्ठप्रकारतानिरूपितभाव्यनिष्टत्वावच्छिन्नविशेष्यतानिरूपकत्वेन चिन्तनेऽन्वयः। तथा च व्याघ्रजन्यत्वनिष्ठप्रकारतानिरूपितभाव्यनिष्टनिष्ठविशेष्यतानिरूपकचिन्तनवानिति बोधः। "चोरात् त्रायते" इत्यत्र बोधस्तु शब्दशक्तिप्रकाशिकायां न प्रदर्शितः।

---

[१] पृ. ६७
[२] सू. १.४.२५
[३] पृ. ३००

व्युत्पत्तिवादे[1]

"व्याघ्रात् बिभेति, दस्युभ्यो रक्षति" इत्यादौ "भीत्रार्थानां०" इत्यनेनापादानत्वम्। भयं च परतोऽनिष्टसंभावना। त्राणं चानिष्टनिवृत्त्यनुकूलो व्यापारः। तदर्थकधातुयोगे तादृशानिष्टजनकमपादानसंज्ञमिति सूत्रार्थः। पञ्चम्यर्थस्तत्र प्रयोज्यत्वम्। तस्य निरुक्तधात्वर्थघटकानिष्टेऽन्वयः। तथा च व्याघ्रहेतुकानिष्टसंभावनाश्रयः दस्युहेतुकानिष्टनिवृत्त्यनुकूलव्यापाराश्रयः इति क्रमशो बोधः।

अथ यस्य व्याघ्राधीनमनिष्टमप्रसिद्धम्, अथ च व्याघ्रहेतुकत्वेन मरणं संभावयति तत्पुरुषपरः "व्याघ्रादयं बिभेति" इति प्रयोगः कथं प्रमाणम्। अनिष्टे व्याघ्राधीनत्वस्य बाधादिति चेत् —

तर्हि भयार्थकधातुयोगे प्रयोज्यताप्रकारकत्वं पञ्चम्यर्थः। तच्चानिष्टसंभावनायामन्वेति। तथा च व्याघ्रप्रयोज्यताप्रकारकानिष्टविशेष्यकसंभावनाश्रयोऽयमिति बोधः। व्याघ्राधीनत्वस्य तत्पुरुषीयेऽनिष्टे बाधेऽपि अनिष्टसंभावनायां व्याघ्राधीनत्वप्रकारकत्वमबाधितमेवेति नानुपपत्तिः। एवं च शत्रुभ्रमेण मित्रादपि बिभेतीत्यादिवाक्यस्यापि प्रामाण्यनिर्वाहः।

एवं च भयार्थकधातुयोगे भयहेतुत्वेन संभावितमपादानमिति एकः सूत्रार्थः। अनिष्टविरहानुकूलव्यापाररूपत्राणार्थकधातुयोगे अनिष्टप्रयोजकमपादानमित्यपरः सूत्रार्थः।

अनिष्टं च दुःखमेव सर्वत्रानुगतम्। यज्जन्यं दुःखं कस्यापि न प्रसिध्यति तादृशस्याहिकण्टकादेः यद्यपादानत्वमिष्यते तदा तन्निष्ठदुःखोपधायकव्यापारविरहानुकूलव्यापारः तदपादानकं स्वकर्मकं रक्षणमिति वक्तव्यम्। एतदुक्तं भवति — "अहेः आत्मानं रक्षति" इत्यत्र दुःखोपधायकव्यापारविरहानुकूलव्यापारो धात्वर्थः। पञ्चम्यर्थस्य आधेयत्वस्य व्यापारविरहेऽन्वयः। दुःखे च द्वितीयार्थाधेयत्वान्वयः। तथा च अहिवृत्तिः यः स्ववृत्तिदुःखोपधायकव्यापाराभावः तदनुकूलव्यापारवानिति बोधः इति। अधिकविचारोऽत्र गूढार्थतत्त्वालोके द्रष्टव्यः।

पदवाक्यरत्नाकरे[2]

"चौरात् बिभेति त्रायते" इत्यादौ अनिष्टस्य भावित्वेन चिन्तनं भयम्, अनिष्टानुत्पत्त्यनुकूलो व्यापारः त्राणम्। पञ्चम्यर्थो हेतुता जन्यता वा अनिष्टे-

---

[1] पृ. २५५
[2] पृ. ७६१-७६५

ऽन्वेति। तथा च चौरहेतुकमनिष्टं भावित्वेन चिन्तयति, चौरहेतुकानिष्टानुत्पत्त्यनुकूलव्यापारवानित्यन्वयबोधः।

यत्र च भयापादानस्यापि न हेतुत्वविवक्षा तत्र संबन्धसामान्यार्थिका शेषे षष्ठ्येव प्रमाणम्। अत एव "कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे" इति रामायणे कस्य संयुगे इति संबन्ध इति प्राञ्चः।

तच्चिन्त्यम्। "नरकात् बिभेति, नरकात् त्रायते" इत्यादौ नरकजन्यानिष्टान्तराभावात्।

वस्तुतो भयत्वं द्वेषत्वावान्तरजातिः। सैव भीधातोः प्रवृत्तिनिमित्तम्। फलवाचकत्वादेवासौ यतिवदकर्मकः।

दुःखविषयकद्वेषविशेषात्मके भये च दुःखं मम भविष्यतीत्याकारकं ज्ञानं समवायसंबन्धेन कारणम्। तेन रागान्धानामास्तिकानां नरकात्, यक्ष्यमाणानां यागश्रमात्, मुमुक्षूणां कुतोऽपि क्लेशाद्वा न भयमित्यादयः प्रयोगा उपपद्यन्ते। आस्तिकानां परस्त्रीरतिविषयकोत्कटेच्छया नरके स्ववृत्तित्वेन भविष्यत्वज्ञानप्रतिबन्धात् न भयम्। यागश्रमस्य दुःखरूपत्वेऽपि यागजन्यस्वर्गस्य तदपेक्षया बलवत्त्वेन तद्विषयकोत्कटेच्छया तत्र द्वेषाभावात् तस्य स्ववृत्तित्वेन भावित्वप्रतिसन्धानेऽपि न तस्मात् भयम्। मुमुक्षूणां च द्वेषसामान्याभावादेव तद्विशेषभयाभाव इति तेषां प्रयोगाणामुपपत्तिः। अनिष्टसंभावनायाः भयत्वे तु दुःखस्य दुःखान्तराप्रयोजकत्वात् दर्शितप्रयोगाणामनुपपत्तिरेव स्यात्।

दुःखसाधनचौरादिविषयके द्वेषविशेषे च भयापादानस्य चौरादेः अनिष्टसाधनत्वमासन्नत्वं च ज्ञायमानं जनकम्। चौरेभ्यो हि भवति आसन्नतया प्रतिसंहितेभ्य एव भयम्। आसत्तिप्रकर्षाच्च भयप्रकर्षः। आसत्तिरपि दैशिकी (संनिकृष्टदेशसंयोगरूपा) कालिकी (संनिकृष्टकालसंयोगरूपा) यथानुभवमूहनीया। एवं च विषयविषयिभावलक्षणा हेतुतैव पञ्चम्यर्थः। तथा च "चौरात् बिभेति" इत्यत्र चौरविषयकभयं वाक्यार्थः।

"व्याघ्रात् गां त्रायते" इत्यत्र त्राधातोः त्राणमर्थः। त्राणं नाम भयाभावानुकूलो व्यापारः। तत्र भयाभावः धात्वर्थतावच्छेदकं फलम्। तद्वान् त्रातव्यः गौः कर्म। भयाभावश्च भयकारणविघटनद्वारा त्रातृव्यापारप्रयोज्यः। विषयत्वं पञ्चम्यर्थः। भयान्वयि। तथा च गोवृत्तेः व्याघ्रविषयकभयप्रतियोगिकाभावस्यानुकूलो यो व्यापारः तदनुकूलकृतिमानिति बोधः।

ननु भयं यदि द्वेषविशेषरूपं तदा द्वेषविषयकद्वेषाप्रसिद्ध्या "स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्" इत्यत्र कथं वाक्यार्थः इति चेत् — उच्यते। तत्र भयहेतुकानिष्टाभावप्रयोजको व्यापारो न प्रतीयते। परं तु भाविनो दुःखविशेष-साधनात् भयात् भयान्तरसंभवात् भयगोचरभयाभाव एव प्रतीयते।

अपि च भयस्य द्वेषविशेषस्वरूपत्वे "द्वितीयात् भयं भवति" इति श्रुतिरुप-पद्यते। अनिष्टसंभावनारूपत्वे तु नोपपद्यते। तथा हि द्वेषस्यायं स्वभावो यत् स्वसमवायिविषयको न भवतीति। अतो विषयतया द्वेषं प्रति स्वसमवायिभेदस्य कारणत्वात् स्वस्मान्न भयमिति परिसंख्याया उपपत्तिः। स्वस्य स्वविषयकद्वेष-कारणताविरहात्। अनिष्टसंभावनायाः भयरूपत्वे तु स्वहेतुकानिष्टसंभावनायाः संभवेन तदनुपपत्तिरेव स्यादिति।

विभक्त्यर्थनिर्णये[१]

बिभेत्यादियोगे पञ्चमीं ज्ञापयति "भीत्रार्थानां भयहेतुः"[२] इति सूत्रम्। भयार्थकानां त्राणार्थकानां च धातूनां योगे भयहेतुर्यस्तत्कारकमपादानसंज्ञं स्यादित्यर्थकम्। "व्याघ्रात् बिभेति त्रायते वा" इत्यादौ भयहेतुत्वमर्थो भयेऽन्वेति। व्याघ्रहेतुकं यत् भयं तदाश्रयः, व्याघ्रहेतुकं यत् भयं तन्निवर्तकव्यापाराश्रय इति च बोधः।

गौडास्तु — परतोऽनिष्टसंभावनास्वरूपं भयम्। तदर्थका बिभेत्यादयः। अनिष्टानुत्पत्त्यनुकूलव्यापारस्वरूपं त्राणम्। तदर्थकाः त्रायत्यादयः। एतेषां धातूनां योगेऽनिष्टप्रयोजकमपादानसंज्ञं भवतीति सूत्रार्थः। इत्थं च पञ्चम्याः प्रयोजकत्व-मर्थः धात्वर्थघटकेऽनिष्टेऽन्वेति। यदि च यस्य पुंसो व्याघ्राधीनमनिष्टमप्रसिद्धं व्याघ्राधीनत्वेन मरणमसौ संभावयति तत्पुरुषपरो 'व्याघ्रादयं बिभेति' इति प्रयोगः, तदा पञ्चम्यर्थः प्रयोज्यत्वप्रकारकत्वं धात्वर्थेऽनिष्टसंभावनायामन्वेति। दर्शितस्थले तस्य पुंसो व्याघ्रप्रयोज्यत्वप्रकारिकायाः अनिष्टसंभावनायाः सत्त्वान्नानुपपत्तिः। एवं च शत्रुभ्रमेण मित्रात् बिभेतीति प्रयोग उपपद्यते। इत्थं च भयार्थकधातुयोगे भय-हेतुत्वेन संभावितमित्येकः, त्राणार्थकधातुयोगेऽनिष्टप्रयोजकमपादानमित्यपरः सूत्रार्थः। अनिष्टं च दुःखमेव सर्वत्रानुगतं बोध्यम्।

यत्प्रयोज्यं दुःखं कस्यापि न प्रसिद्धं तादृशस्याहिकण्टकादेः यद्यपादानत्व-मिष्यते तदा दुःखोपधायकव्यापारविरहस्यानुकूलो व्यापारस्त्राणम्। तत्र दुःखवतः कर्मत्वं तथाविधव्यापारविरहाश्रयस्यापादानत्वम्। तथा च तादृशाहिकण्टकाद्य-

[१] पृ. ३३९

[२] सू. १.४.२५

पादानकं स्वकर्मकत्राणमेव प्रसिद्धमिति। यत्राचेतनस्य घटादेः कर्मत्वं तत्रा-शोपधायकव्यापारविरहानुकूलव्यापारस्वरूपं त्राणम्। तत्र नाशवतः कर्मत्वम्। एवं "तत्सर्पात् त्रायते" इत्यादौ पञ्चम्या आधेयत्वमर्थ इति वदन्ति।

तच्चिन्त्यम्। "नरकात् बिभेति" इत्यादौ नरकजन्यानिष्टान्तरस्याभावात् अनन्वयापत्तेः। प्रयोज्यत्वप्रकारत्वस्य पञ्चम्यर्थस्यानिष्टसंभावनायामन्वयोपगमेऽपि प्रयोज्यत्वस्यानिष्टान्वयानुपगमे व्याघ्रप्रयोज्यो वृकनाशः वृकप्रयोज्यो बालनाशः बालश्च मम पुत्र इति ज्ञानदशायां "बालपुत्रोऽयं व्याघ्रात् बिभेति" इति प्रयोगापत्तेः। अनिष्टान्वये तु दोषस्य स्वयमेव दर्शितत्वात्।

न च प्रयोज्यत्वप्रकारकत्वस्य स्वनिरूपितानिष्टनिष्ठविशेष्यताप्रतियोगित्वेन संबन्धेन संभावनायामन्वयोपगमान्नोक्तदोष इति वाच्यम्। तथा सति संभावनामात्रस्य बिभेत्यर्थत्वापत्तेः। व्याघ्रप्रयोज्यं चैत्रस्य दुःखं संभाव्यत इति ज्ञानदशायां "मैत्रो व्याघ्रात् बिभेति" इति प्रयोगापत्तेः। तत्तत्पुरुषीयदुःखविषयकतत्तत्पुरुषीयसंभावनाया धात्वर्थत्वेऽननुगमात् दुर्ग्रहत्वापत्तेः। समानाधिकरणदुःखविषयकसंभावनायास्तथात्वे तु यत्र दुःखत्वेन शरीरनाशादिः संभावितः तत्र बिभेतीति प्रयोगानापत्तेः। 'नरकात्त्रायत' इत्यादावपि नरकप्रयोज्यानिष्टान्तरस्याभावादनन्वयप्रसङ्ग इति।

भयत्वं द्वेषत्वावान्तरजातिः। सैव बिभेतेः प्रवृत्तिनिमित्तम्। फलावाचकत्वादेवासौ यतिवदकर्मकः। तत्र दुःखगोचरे भये स्वस्मिन् भावित्वप्रतिसन्धानमेव कारणम्। अत्र द्वेषस्तत्सामग्री वा सहकारितया अपेक्ष्यते। अतो रागान्धानामास्तिकानां नरकात् यियक्षूणां यागश्रमात् मुमुक्षूणां कुतोऽपि क्लेशाद्वा न भयमित्यादयः प्रयोगा उपपद्यन्ते। उपायविषये भये भयापादानस्यानिष्टसाधनत्वमासन्नत्वं च ज्ञायमानं जनकम्। चौरेभ्यो हि भवत्यासन्नतया प्रतिसंहितेभ्य एव भयम्। आसत्तिप्रकर्षाच्च भयप्रकर्षः। आसत्तिरपि कालिकी दैशिकी यथानुभवमूहनीया। एवं च विषयविषयिभावलक्षणहेतुतैव पञ्चम्यर्थः। "चौरेभ्यो बिभेति" इत्यत्र चौरगोचरभयं वाक्यार्थः। त्राणमपि भयाभावानुकूलो व्यापारः। तत्र भयाभावस्वरूपफलवान् त्रातव्यः कर्म। भयाभावस्तु कारणविघटनद्वारा त्रातृव्यापारप्रयोज्यः। "व्याघ्रात् गां त्रायते" इत्यत्र गोवृत्तेः व्यघ्रविषयकभयप्रतियोगिकाभावस्य प्रयोजको व्यापारः तत्कर्तृत्वं वाक्यार्थः।

नन्वेवं "स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्" इत्यत्र भयात् त्रातुमित्यत्र चानन्वयापत्तिः। भयस्य द्वेषतया त्राणस्य तदभावाकूलव्यापारतया द्वेषविषयकद्वेषाप्रसक्त्या भयहेतुकत्राणाप्रसिद्धेः। भयस्यानिष्टसंभावनास्वरूपत्वे तु त्राणस्यानिष्टा-

नुत्पादकव्यापारस्वरूपतया अनिष्टसंभावनाहेतुकानिष्टान्तरस्य संभवान्नान्वयानुपपत्तिरिति चेत् —

मैवम्। तथा हि — भयस्य द्वेषविशेषस्वरूपस्य दुःखविशेषसाधनत्वमनुभवसिद्धमिति भाविभयगोचरभयसंभवात् भयगोचरभयानुत्पादनस्वरूपत्राणस्य नाप्रसिद्धिः। अत एव "द्वितीयाद्धि भयम्" इति श्रुत्या स्वस्यापि भयमिति परिसंख्यायते द्वेषस्य विषयस्वाभाव्येन विषयतया द्वेषं प्रति द्वेषसमवायिभेदस्य हेतुत्वात् स्वविषयकभयाप्रसिद्धेः। भयस्यानिष्टसंभावनास्वरूपत्वे तु स्वहेतुकानिष्टसंभावनायाः संभवान्न परिसंख्यानसंभव इति गुरुचरणाः। (पदवाक्यरत्नाकरकाराः)

स्वमताविष्करणम्

वस्तुतस्तु अनिष्टोत्पत्तिसंभावनाजन्यदुःखं भयम्। अनिष्टं च दुःखप्रयोजकतावच्छेदकधर्मविशिष्टं मरणादि। तत्र यद्धर्मावच्छिन्नस्य येन संबन्धेन मरणादिसाधनत्वमवगतं स्वस्मिन् तद्धर्मावच्छिन्नस्य तत्संबन्धज्ञानं मरणाद्यनिष्टोत्पत्तिसंभावनायाः जनकम्। सा तु दुःखं जनयति। तथा मरणादिसाधनतयावगतस्य व्याघ्रस्य स्वस्मिन् संनिधिसंबन्धज्ञानं मरणाद्युत्पत्तिं संभावयति। संभावना तु दुःखं जनयति। अनिष्टसाधनताज्ञानादिसहकृतसंबन्धज्ञानप्रयोज्यत्वस्वरूपं भयहेतुकत्वम्। ईदृशप्रयोज्यताविशेषलाभार्थमेव सूत्रे भयपदम्। ईदृशप्रयोज्यताविशेषस्य हेतुतासामान्यविलक्षणस्य धात्वर्थभय एवान्वयान्न कारकत्वहानिरिति।

"व्याघ्रात् बिभेति" इत्यत्र पञ्चम्यर्थे दर्शितप्रयोज्यत्वे निरूपकतया प्रकृत्यर्थस्यान्वयः। तथाविधप्रयोज्यत्वस्य अनिष्टसंभावनाजन्यदुःखे भयेऽन्वयः। तथा च व्याघ्रप्रयोज्यं भयं वाक्यार्थः। व्याघ्रादेः स्वविशेष्यकानिष्टसाधनताज्ञानादिसहकृतस्वसंबन्धज्ञानद्वारा अनिष्टोत्पत्तिसंभावनाजन्यदुःखप्रयोजकत्वं संनिधिस्वरूपस्य संबन्धस्यातिशयस्वरूपप्रकर्षेण ज्ञानं संभावनाकोटेरनिष्टोत्पत्तेरुत्कटत्वं प्रयोजयति। अथ वा अनिष्टोत्पत्तेरवधारणमेव जनयतीत्युभयथा दुःखमुत्कटं प्रयोजयतीति संनिधिप्रकर्षेण भयप्रकर्षः। इत्थं च "द्वितीयाद्धि भयम्" इति श्रुतिः भये द्वितीयहेतुकत्वपरिसंख्यां बोधयति। इतरथा द्वितीयादित्यस्य व्यर्थत्वापत्तेः। परिसंख्यया तु प्रकृते द्वितीयान्यहेतुकत्वस्य स्वहेतुकत्वपर्यवसन्नस्य व्यवच्छेदः। भयस्य स्वहेतुकत्वं न संभवति। स्वसंनिधिज्ञानस्यानिष्टोत्पत्तिसंभावनां प्रत्यप्रयोजकत्वात्। "सोऽहमात्मना संबद्धः" इत्याकारके सकलदुःखोच्छेदप्रयोजके ज्ञाने विद्यमाने भयापत्तेः।

एवं "नरकात् बिभेति" इत्यादौ नरकपदस्य कुम्भीपाकादिसंबन्धज्ञानं शरीरतापाद्यनिष्टोत्पत्तिं संभावयति, संभावना तु दुःखं जनयतीति नानुपपत्तिः। नरकपदस्य सुखासंभिन्नदुःखपरता न संगच्छते। तथा सति दुःखात् व्यथाया वा बिभेतीति प्रयोगापत्तेः। "भयात् भेतव्यम्" इत्यादौ भयपदस्य भयजनके व्याघ्रचौरादौ लक्षणेति नानुपपत्तिः।

यदि च "दुःखात् बिभेति" इति प्रयोगोऽभ्युपेयते तदा दुःखस्य भोगस्वरूपानिष्टसाधनस्य संबन्धज्ञानं भोगस्वरूपानिष्टस्योत्पत्तिं संभावयति। संभावना तु दुःखमिति नानुपपत्तिः। एवं "भयात् बिभेति" इत्यादावपि इयमेव गतिर्बोध्या।

एतेन "व्याघ्रात् भयात् बिभेति" इत्यत्रापादानस्य भयस्य विषयित्वं धात्वर्थे भयेऽन्वेति। व्याघ्रविषयित्वमपादानभयेऽन्वेति। भयं तु द्वेषविशेषः। व्याघ्रविषयकभयविषयकभयं वाक्यार्थ इति तु न युज्यते। यतो हि व्याघ्रविषयकद्वेषविषयकद्वेषो न संभवति। तथा हि व्याघ्रविषयकद्वेषस्यानिष्टसाधनत्वज्ञानं विना तद्विषयकद्वेषानुत्पादात्। तच्च ज्ञानं तदैव संभवति यदि व्याघ्रस्य बलवदनिष्टाननुबन्धीष्टसाधनत्वं स्यात्। तत्त्वबाधितमिति [तत्तु बाधितमिति] न तत्ज्ञानं संभवति। न चानिष्टसाधनत्वभ्रमात् द्वेषविषयकद्वेषसंभवान्नानुपपत्तिरिति वाच्यम्। तथा सति "व्याघ्रात् भयात् बिभेषि वा" इत्यत्राभ्रान्तस्य वक्तुः संबोध्यस्य वा शाब्दानुदयप्रसङ्गात् इत्यपि परास्तम्।

भयादिपदार्थस्य दर्शितत्वात्। व्याघ्रप्रयोज्यस्य भोगस्वरूपानिष्टोत्पत्तिसंभावनाजन्यदुःखस्वरूपस्य भयस्य कर्तरि संबोध्ये अन्यत्र च संभवात्।

एवं "चौरेभ्यो बिभेति उद्विजते वा" इत्यत्र चोरप्रयोज्यमनिष्टं धनहरणादि तदुत्पत्तिसंभावनया दुःखमिति। उद्वेगोऽपि भयमेव। यत्र दर्शितभयप्रयोज्यत्वस्य तत्त्वेन न विवक्षा किं तु शेषत्वेन तत्र षष्ठ्येव प्रमाणम्। अत एव — "कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे" इति, "कुमार्या इव कान्तस्य त्रस्यति स्पृहयन्ति च" इति च प्रयोग उपपद्यते।

एवं "व्याघ्रात् गां त्रायते रक्षति च" इत्यत्र भयस्वरूपदुःखप्रतियोगिकाभावप्रयोजको व्यापारो धात्वर्थः। तत्र भयाभावस्वरूपफलवत्तया गवादेः कर्मत्वम्। पञ्चम्यास्तथाविधप्रयोज्यत्वमर्थः फलैकदेशे भये व्युत्पत्तिवैचित्र्येणान्वेति। अथ वा भयमभावश्च खण्डशः फलतया धात्वर्थः। तत्र पञ्चम्यर्थस्य भये तस्य प्रतियोगितया अभावे तस्य प्रयोजकतया व्यापारे अन्वयः। व्याघ्रप्रयोज्यभयप्रतियोगिको यः गोवृत्तिरभावः तत्प्रयोजकव्यापारानुकूलकृतिमानित्यन्वयबोधः।

यस्या अहिकण्टकादिव्यक्तेः क्वापि न भयप्रयोजकत्वं तस्याः तद्व्यक्तित्वेन न त्राणापादानत्वं, तद्व्यक्तेस्त्रायत इत्यप्रयोगात्। सर्पत्वादिना अपादानत्वमिष्यत एव। यद्धर्मावच्छिन्नस्य संबन्धज्ञानमनिष्टोत्पत्तिं संभावयति तद्धर्मवतस्तथात्वोपगमात्।

"भयात् त्रायते" इत्यत्र भयप्रयोज्यस्य भयस्याभावप्रयोजकव्यापारः प्रतीयते। भयप्रयोज्यं यथा तथा दर्शितमेव। भयं तु दुःखं प्रत्यक्षसिद्धमेव। भयमतिदुःखमिति भयेनातिदुःखितोऽस्मीति चानुभवात्। बिभेत्याद्यर्थे भयं दुःखमेव, चेतनकर्तृकत्वनियमात्। यत्र चेतनकर्मकं रक्षणं तत्र दुःखस्वरूपभयाभावप्रयोजको व्यापार एव धात्वर्थः।

यत्राचेतनकर्मकं रक्षणं तत्र "वह्नेः पटं रक्षति, काकेभ्यो दधि रक्षति" इत्यादौ नाशानुत्पादप्रयोजको व्यापारो रक्षतेरर्थः। तत्र नाशान्वयि प्रयोज्यत्वसामान्यं पञ्चम्यर्थः। वह्निप्रयोज्यपटनाशानुत्पादप्रयोजकव्यापारकर्ता, काकप्रयोज्यदधिनाशानुत्पादप्रयोजकव्यापारकर्ता इत्यन्वयबोधः।

"आतपात् कुसुमं रक्षति वा" इत्यत्र अपकारानुत्पादप्रयोजको व्यापारो धात्वर्थः। प्रकृते पुष्पापकारः शोष एव। पञ्चम्यर्थः प्रयोज्यत्वं अपकारेऽन्वेति।

भाट्टरहस्ये[१]

एवं "भीत्रार्थानां भयहेतुः"[२] इत्यनुशासनात् भयार्थानां त्राणार्थानां च धातूनां योगे भयहेतुरपादानसंज्ञः स्यात् इत्यर्थकेन "चोरात् बिभेति, चोरात् धनिकं त्रायते" इत्यत्र पञ्चमी। अत्रोभयत्र हेतुमत्त्वं (जन्यत्वं) पञ्चम्यर्थः। आद्ये भयं धात्वर्थः। द्वितीये भयाभावानुकूलो व्यापारः, न तु भयाभावमात्रम्। तथात्वे धनिकस्य धात्वर्थतावच्छेदकफलाभावेन तदाश्रयत्वरूपकर्मत्वानुपपत्तेः। अस्मन्मते तु व्यापारस्य भयाभाव एव फलमिति तदाश्रयत्वात् कर्मत्वोपपत्तिः। आख्यातार्थः आश्रयत्वम्। तेन सह पञ्चम्यर्थस्य हेतुमत्त्वस्य स्वाश्रयधात्वर्थवत्त्वमुभयत्र संबन्धः। चोरहेतुकभयाश्रयत्वं चोरहेतुकभयाभावानुकूलव्यापाराश्रयत्वमिति शाब्दबोधः।

"कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे" इत्यत्र कस्य संयुग इत्येवं संयुगघटिसंबन्धेन भावनान्वयात् षष्ठी। न चैवं संयुगस्यैवापादानत्वापत्तिः। परया अधिकरणसंज्ञया बाधात्। अधिकरणत्वाविवक्षायामिष्टापत्तेः।

---

१ पृ. १३१

२ सू. १.४.२५

पराजेरसोढः[१] इति सूत्रव्याख्यानम्

परापूर्वकजिधातोः प्रयोगेऽसह्योऽर्थः अपादानं स्यात्। "अध्ययनात् पराजयते", ग्लायतीत्यर्थः। हेतुतृतीयापवादः। असोढः किम्। "शत्रून् पराजयते", अभिभवतीत्यर्थः।

लघुमञ्जूषायाम्[२]

"अध्ययनात् पराजयते"। कृत्यसाध्यत्वधीसमानाधिकरणः तद्विषयकोत्साहाभावो धात्वर्थः। विषयोऽत्रापादानम्। अध्ययनापादानकः देवदत्तकर्तृकः कृत्यसाध्यत्वधीसमानाधिकरणः उत्साहाभाव इति बोधः। उत्साहाभावपूर्विका निवृत्तिः इति वा। "शत्रून् पराजयते" इत्यत्र तिरस्कारानुकूलो व्यापारो धात्वर्थः।

"अध्ययनात् पराजयते" इत्यत्र अनिष्टं धात्वर्थः अध्ययनजन्यमनिष्टमिति बोध इति न युक्तम्। तथा बोधाननुभवात्। असोढशब्देन तदर्थालाभाच्च।

"प्रेक्षापूर्वकारी मनुष्यः अध्ययनस्य दुःखत्वदुर्धरत्वादि पर्यालोच्य बुद्ध्या प्राप्य ततो निवर्तते" इति भाष्येण सर्वथा अध्ययनेऽप्रवृत्तावप्यस्य प्रयोगस्येष्टतया तत्रानिष्टस्याध्ययनजन्यत्वासंभवाच्च।

शब्दशक्तिप्रकाशिकायाम्[३]

"रणात् पराजयते" इत्यत्र युद्धनिवृत्तिः पराजेरर्थः। पञ्चम्यास्तु द्वेषः। तेन रणगोचरद्वेषजन्ययुद्धनिवृत्तिमान् इति बोधः।

अन्ये तु — कृत्यसाध्यत्वधीप्रयुक्तप्रवृत्त्यभाववत्त्वं तत्र पराजेरर्थः। पञ्चम्यास्तु विशेष्यत्वम्। तच्च निरूपकतया धात्वर्थैकदेशे बुद्धावन्वितम्। तेन रणविशेष्यककृत्यसाध्यत्वप्रकारकधीप्रयुक्तप्रवृत्त्यभाववानित्यकारकस्तत्र बोध इति वदन्ति।

पदवाक्यरत्नाकरे[४]

"रणात् पराजयते" इत्यत्र द्वेषाधीना निवृत्तिः पराजेरर्थः। पञ्चम्यर्थः विषयता द्वेषनिवृत्त्योरुभयोरन्वेति। रणविषयकद्वेषाधीनरणविषयकनिवृत्तिमान् इत्यन्वय-

---

[१] सू. १.४.२६
[२] पृ. १२९४
[३] पृ. ३०१
[४] पृ. ७६८

बोधः। अत एव "पराजेरसोढः"[१] इत्यनुशासने पराजेर्योगेऽसहनस्य द्वेषस्य विषयोऽपादानत्वेन संज्ञायते।

"शत्रून् पराजयते" इत्यत्र पराजेः अभिभवानुकूलो व्यापारोऽर्थः। अत्र अभिव्याप्यतया शत्रोः कर्मत्वमेव कर्मसंज्ञया अपादानसंज्ञाया बाधात्।

विभक्त्यर्थनिर्णये[२]

पराजेर्योगे पञ्चमीं ज्ञापयति "पराजेरसोढः"[३] इति सूत्रम्। पराजेर्योगे असोढः सोढुमशक्यो योऽर्थस्तत्कारकमपादानसंज्ञं स्यादित्यर्थकम्। 'रणात्पराजयत' इत्यादिप्रयोगः।

अत्र गौडाः — पराजेः युद्धनिवृत्तिरर्थः। पञ्चम्याः द्वेषोऽर्थः। तत्र प्रकृत्यर्थस्य विषयित्वेनान्वयः। द्वेषस्तु जन्यतया युद्धनिवृत्तावन्वेति। तथा च रणगोचरद्वेषजन्ययुद्धनिवृत्तिर्वाक्यार्थ इति वदन्ति।

तदसत्। युद्धनिवृत्तेः धात्वर्थत्वे "अध्ययनात् पराजयते" इत्यादावनन्वयापत्तेः। न च निवृत्तिमात्रं धात्वर्थः, तत्र व्युत्पत्तिवैचित्र्येण पञ्चमीप्रकृत्यर्थस्य विषयित्वेनान्वयः। युद्धविषयकनिवृत्तिर्वाक्यार्थ इति वाच्यम्। तथापि 'विषात् पराजयत' इति प्रयोगापत्तेः।

तस्मादिदमत्राकूतम्। पराजयतेर्भङ्गफलकव्यापारः अर्थः। स च भङ्गः कर्तृगतश्चेत् तदा फलसमानाधिकरणव्यापारार्थकतया नास्य सकर्मकत्वम्। तत्र यद्विषयकद्वेषप्रयोज्यः पराजयव्यापारः तद्वाचकपदात् पञ्चमी भवति। पूर्वसूत्रे भयहेतुशब्देनानिष्टसाधनताज्ञानादिद्वारकप्रयोज्यत्वं पञ्चम्यर्थतया ज्ञापितम्। प्रकृतेऽसोढशब्देन द्वेषद्वारकप्रयोज्यत्वं तथा। तत्र पञ्चम्याः द्वेषोऽर्थः प्रयोज्यतया व्यापारेऽन्वेति।

अथ वा स्वविषयकद्वेषद्वारकप्रयोज्यत्वं पञ्चम्यर्थः स्वरूपेण व्यापारेऽन्वेति। "अध्ययनात् पराजयते" इत्यत्र वादिवाक्यार्थदोषप्रतिपादकोत्तरवाक्यप्रयोक्तृत्वं भङ्गः फलं, शास्त्रार्थानभिज्ञानं व्यापारो धात्वर्थः। तत्र विषयितया प्रकृत्यर्थविशेषितः पञ्चम्यर्थो द्वेषः प्रयोज्यतया, अथ वा निरूपितत्त्वेन प्रकृत्यर्थविशेषितं स्वविषयकद्वेषद्वारकप्रयोज्यत्वं स्वरूपेणान्वेति। अनध्ययनविषयकद्वेषसाध्यद्वेषस्याध्ययने प्रवृत्त्यनुत्पादद्वारा अध्ययनाभावप्रयोजकत्वम्, अध्ययनाभावप्रयोज्यं

[१] सू. १.४.२६
[२] पृ. ३४५
[३] सू. १.४.२६

शास्त्रार्थानभिज्ञानमिति। तथा च अध्ययनविषयकद्वेषप्रयोज्यं दर्शितभङ्गफलकशास्त्रार्थानभिज्ञानं वाक्यार्थः।

एवं "रणात् पराजयते" इत्यत्र पलायननिलयनादिः भङ्गः फलं, शौर्याभावो व्यापारो धात्वर्थः। शौर्यं तु परकर्मप्रहरणकर्तृत्वं प्रकृते बोध्यम्। रणस्तु परस्परप्रहरणम्। रणगोचरद्वेषस्य रणे प्रवृत्त्यनुत्पादद्वारा रणाभावप्रयोजकत्वम्। रणाभावप्रयोज्यो दर्शितशौर्यस्याभाव इति।

एवं "विवादात् पराजयते" इत्यत्र परोद्भावितदोषानुद्धरणं भङ्गः फलं, प्रतिज्ञातार्थोपपादकपरस्परवाक्यं तद्गोचरद्वेषस्तु साक्षादेव दर्शितव्यापारप्रयोजकः।

अविद्यमानो द्वेष्योऽसोढः। विद्यमानस्तु सोढ एव। अतः 'शत्रोः पराजयत' इति न प्रयोगः। शत्रोर्विद्यमानतया सोढत्वात्। अत एव "असोढ इति किम् शत्रुं पराजयते" इति काशिका संगच्छते। अन्यथा द्वेष्यत्वस्वरूपासोढत्वस्यानपायादसंगत्यापत्तेः। इत्थं च पराजेः भङ्गफलकव्यापारार्थकत्वमेव। निवृत्त्याद्यर्थकत्वे तु काशिकोदाहरणासंगतिरपि द्रष्टव्या।

भाट्टरहस्ये[१]

एवं "पराजेरसोढः"[२] इति सूत्रात् पराजेः धातोः योगे असह्योऽर्थोऽपादानसंज्ञः स्यादित्यर्थकात् "अध्ययनात् पराजयते" इत्यत्र पञ्चमी। अत्र धात्वर्थोऽरिष्टम्। पञ्म्यर्थो जन्यत्वम्। अध्ययनजन्यारिष्टाश्रयत्वमिति बोधः।

"शत्रून् पराजयते" इत्यत्र तु शत्रुनिष्ठानिष्टसाधनानुकूलकृत्याश्रयत्वमिति बोधात् द्वितीया। केचित्तु असहनं धात्वर्थः। अध्ययनं न सहत इति विवरणात् इत्याहुः।

वारणार्थानामीप्सितः[३] इति सूत्रार्थविचारः

प्रवृत्तिविघातो वारणम्। वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्। "यवेभ्यो गां वारयति"। यवेषु प्रवर्तितुमिच्छन्तीं गां प्रवृत्तिविमुखीकरोतीत्यर्थः। संयोगपूर्वकविश्लेषाभावात् ध्रुवमपाय इत्यप्राप्ताविदं वचनम्। तत्र यवानां स्वकीयत्वेन संरक्षणीयतया ईप्सितत्वादपादानत्वं, न तु गोः, तस्याः परकीयत्वेना-

---

[१] पृ. १३१
[२] सू. १.४.२६
[३] सू. १.४.२७

नीप्सितत्वात् वारणीयतया ईप्सितत्वव्याघाताच्च। तथा च "तथायुक्तं चानीप्सितम्"[1] इति गोः कर्मत्वात् द्वितीया।

लघुशब्देन्दुशेखरे[2]

प्रवृत्तिविघात इति। भक्षणसंयोगादिजनकव्यापाराभावानुकूलो व्यापारः इत्यर्थः। ईप्सित इति। वारणार्थधात्वर्थफलाश्रय इत्यर्थः। उदाहरणे च तद्धात्वर्थव्यापारजन्यसंयोगादिरूपफलाश्रयत्वात् यवानामपादानत्वम्। ईप्सित इत्यनेन प्रधानाप्रधानान्यतरव्यापाराश्रयमात्रस्याक्षेपः। कर्मलक्षणे तु तमप्ग्रहणात् प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयस्य ग्रहणम्।

बृहन्मञ्जूषायाम्[3]

"यवेभ्यो गां वारयति" इत्यत्र भक्षणादिफलजनकव्यापाराभावानुकूलो व्यापारो धात्वर्थः। "वारणार्थानामीप्सितः"[4] इति सूत्रेण यवानामपादानत्वम्। तत्रेप्सित इत्यस्य वारणार्थधात्वर्थतावच्छेदकफलाश्रयत्वेनेच्छाविषय इत्यर्थः। उदाहरणे च धात्वर्थतावच्छेदकसंयोगरूपफलाश्रयत्वेन गवेप्सितत्वात् यवानामपादानत्वम्। तत्र कर्मनिष्ठव्यापारस्य भक्षणादेः भक्षणत्वावच्छिन्नप्रतियोगिताक एवाभावो भासते, व्युत्पत्तिवैचित्र्यात्। तात्पर्यवशाच्च विशिष्यैव शक्तिः। नानार्थत्वमिष्टमेवेत्यपि कश्चित्।

एवं च यवनिष्ठसंयोगजनकव्यापारस्य भक्षणादेः गोवृत्तिर्योऽभावः तदनुकूलो व्यापार इति बोधः। यदि तु प्रतिषिद्धे गवि भक्षयत्यपि वारयतीति प्रयोगः, तदा तादृशाभावप्रकारेच्छाविशिष्टो व्यापार एव धात्वर्थ इति बोध्यम्।

अत्र केचित् — यत्र नान्तरीयकतया चैत्रादेः विषादिभोजनं प्रसक्तं, न तु स्वेच्छया, तत्र तद्भोजननिवर्तकव्यापारकर्तरि 'चैत्रं विषाद्वारयति' इति प्रयोगवारणाय सन् प्रयोगः। अत एव "सविषादन्नाद्वारयति" इत्येव तत्र प्रयोगः।

न च 'कूपादन्धं वारयति' इति न स्यात्, न हि कूपपतनमन्धस्येच्छाविषयः इति वाच्यम्। कूपपतनत्वेनेच्छाविषयत्वाभावेऽपि अभिमुखदेशगमनत्वेन तस्यापीच्छाविषयत्वात् इत्याहुः।

---

[1] सू. १.४.५०

[2] पृ. ६९०

[3] पृ. १८६

[4] सू. १.४.२७

लघुमञ्जूषायाम्[1]

"यवेभ्यो गां वारयति, अग्नेर्माणवकं वारयति, कूपादन्धं वारयति"। अत्र भक्षणसंयोगादिजनकव्यापाराभावानुकूलो व्यापारो धात्वर्थः। अभावप्रतियोगिव्यापारजन्यफलाश्रयोऽत्र अपादानम्। "वारणार्थानामीप्सितः"[2] इति सूत्रात् वारणार्थधात्वर्थफलाश्रयत्वमत्रेप्सितत्वम्। तेन भक्षणसंयोगाद्याश्रयत्वात् यवादीनामपादानत्वम्। अनुकूलता चात्र योग्यतारूपैव। तेन प्रतिषिद्धे गवि भक्षयत्यपि "अयं वारयति, तथापि न निवर्तते" इति प्रयोगसिद्धिः। अप्रवृत्तवारणेऽप्ययं प्रयोगः। "यदीमा गावस्तत्र गच्छन्ति, ध्रुवं सस्यनाशः, तन्नाशेऽधर्मो राजभयं च बुद्ध्या प्राप्य निवर्तयति" इति भाष्यात्। उक्तव्यापारानुकूलनिवर्तना च तन्मते धात्वर्थः। अन्त्येऽभिमुखदेशगमनत्वेनान्धस्य कूपपतनमन्धस्येच्छाविषयः।

एवं नान्तरीयकविषभोजनप्रसक्तौ तद्वारणकर्तरि चैत्रे "विषाद्वारयति" इति प्रयोगो भवत्येव। विषस्य विषत्वेन इच्छाविषयत्वाभावेऽपि भक्ष्यत्वेनेच्छाविषयत्वात्।

कारकचक्रे[3]

"कूपात् अन्धं वारयति" इत्यादौ पञ्चम्याः पतनमर्थः। ण्यन्तधातोः प्रतिबन्धानुकूलो व्यापारोऽर्थः। प्रतिबन्धान्वयि आधेयत्वं द्वितीयार्थः। प्रतिबन्धो नामानुत्पादः। कृतिः आख्यातार्थः। तथा च अन्धवृत्तिः यः कूपपतनप्रतिबन्धः तदनुकूलव्यापारानुकूलकृतिमान् इति वाक्यार्थ इति केचित्। तन्न युक्तम्। यस्मिन् कूपे कस्यापि पतनमप्रसिद्धम्, तत्रासंभवात्।

अत एव द्वितीयायाः पतनमर्थः। पञ्चम्याः धात्वर्थतावच्छेदकान्वयि वृत्तित्वमर्थः। धातोश्चाभावानुकूलव्यापारोऽर्थः। तथा च कूपवृत्त्यन्धपतनाभावानुकूलव्यापारविषयकयत्नवान् इत्यर्थोऽपि न युक्तः। यदन्धस्य पतनमप्रसिद्धं, तत्र असंभवात्।

किं तु धातोः अभावानुकूलव्यपारोऽर्थः। पञ्चम्याः वृत्तित्वमर्थः। द्वितीयायाः प्रतियोगित्वमर्थः। उभयोः धात्वर्थतावच्छेदकेऽभावेऽन्वयः। अभावश्च कूपादिसमभिव्याहारवशात् पतनादिसंबन्धेन बोध्यः। एवं च पतनादिसंबन्धेन कूपवृत्त्यन्धप्रतियोगिकाभावानुकूलव्यापारविषयकयत्नवानित्यन्वयबोधः।

---

[1] पृ. १२९५

[2] सू. १.४.२७

[3] पृ. ६८

एवम् "एतस्मात् सविषान्नात् मित्रं वारयति" इत्यादौ यत्सविषान्नस्य यन्मित्रस्य च भोजनमप्रसिद्धम्, तत्रापि भोजनादिसंबन्धेन सविषान्नवृत्तिमित्रप्रतियोगिकाभावानुकूलव्यापारविषयकयत्नवान् इत्यन्वयधीः। एवं सर्वत्र बोध्यम्।

"कूपादन्धं वारयति" इत्यत्र सविषान्नात् "मित्रं वारयति" इत्यत्र च यथायथं धातोः पतनं भोजनम् अभावानुकूलव्यापारश्चार्थः। पञ्चम्याश्च यथायथं द्वितीयार्थकर्तृत्वान्वितद्वित्वसहितं वृत्तित्वं कर्मत्वं चार्थः। द्वितीयायाश्च कर्तृत्वमर्थः। धात्वर्थतावच्छेदकीभूते चाभावे धात्वर्थस्य पतनादेः अधिकरणत्वेन, द्वित्वावच्छिन्नस्य पञ्चम्यर्थवृत्तित्वद्वितीयार्थकर्तृत्वोभयस्य च प्रतियोगित्वेनान्वयः, व्युत्पत्तिवैचित्र्यात्। एवं च पतनसामान्ये कूपवृत्तित्वान्धकर्तृत्वोभयाभावानुकूलव्यपारविषयकयत्नवान् इत्याद्यस्य, भोजनसामान्ये सविषान्नकर्मकत्वमित्रकर्तृत्वोभयाभावानुकूलव्यापारविषयकयत्नवानिति द्वितीयस्यान्वयबोधः।

शब्दशक्तिप्रकाशिकायाम्[१]

"कूपादन्धं वारयति, विषाद् बालं निवारयति" इत्यादौ क्रियाधर्मिकनिवृत्त्यनुकूलव्यापारो वारणम्। तदन्तर्गतनिवृत्तौ पञ्चम्या कूपादिप्रकारकत्वं द्वितीयया चान्धादिनिष्ठत्वं प्रत्याय्यते। क्रिया च पतनभोजनादिः विशेषतो ग्राह्या। तथा चान्धनिष्ठायाः पतनधर्मिककूपप्रकारकनिवृत्तेः बालनिष्ठायाश्च भोजनधर्मिकविषप्रकारकनिवृत्तेः अनुकूलव्यापारवानित्याकारकः तत्र बोधः। तथाविधनिवृत्त्यनुकूलव्यापारश्च स्वार्थधीद्वारा "कूपे मा पत, विषं मा भुङ्क्ष्व" इत्याद्यभिलापरूपः स्फुट एव।

यत्तु पतनादिप्रतिकूलव्यापार एव वारणम्, तदेकदेशे च पतनादावन्धादेः आधेयत्वेन, कूपादेः कर्मत्वेन अन्वयात् अन्धनिष्ठस्य कूपकर्मकपतनस्य प्रतिकूलव्यापारवानित्यादिरूपः "कूपादन्धं वारयति" इत्यादितो बोध इति।

तत्तुच्छम् — तादृशपतनस्याप्रसिद्धिस्थले तादृशवाक्यस्यायोग्यार्थकत्वापत्तेः।

"परस्वेभ्यः पाणिं निवारयति" इत्यत्र आनयनधर्मिकनिवृत्त्यनुकूलव्यापारो निवारणम्। तदन्तर्गतनिवृत्तौ च पाण्यादेः अवच्छेदकत्वेन परस्वादेश्च प्रकारत्वेनान्वयः। तादृशव्यापारः कराकुञ्चनादिरेव। तथा च परस्वप्रकारकानयनधर्मिकपाण्यवच्छिन्ननिवृत्त्यनुकूलव्यापारवान् इति बोधः।

---

[१] पृ. ३०४

"स्वाङ्गात् बाणं वारयति" इत्यत्र यद्यपि बाणनिष्ठस्य स्वाङ्गसंयोगस्य विरोधिव्यापारो नार्थः, तादृशसंयोगस्याप्रसिद्धेः तथापि बाणसंयोगाभावनिष्ठायाः स्वाङ्गवृत्तितायाः प्रयोजकव्यापारवत्त्वम्, तथा च संयोगाभावनिष्ठस्वाङ्गवृत्तित्वप्रयोजकव्यापारः तत्र वारणम्। तन्निविष्टे च संयोगे द्वितीयान्तलभ्यस्य बाणप्रतियोगिकत्वस्य आश्रयतया संयोगाभावनिष्ठे च पञ्चम्यन्तलभ्यस्य स्वाङ्गवृत्तित्वस्याभेदेनान्वयः। कार्याभावे इव तन्निष्ठे अधिकरणविशेषवृत्तित्वेऽपि प्रतिबन्धकस्य प्रयोजकत्वात्। तथा च स्वाङ्गवृत्तित्वाभिन्नं यत् बाणप्रतियोगिकसंयोगाभावनिष्ठं तत्प्रयोजकव्यापारानुकूलकृतिमानिति बोधः। बाणप्रतियोगिकसंयोगाभावनिष्ठ स्वाङ्गवृत्तित्वंप्रयोजकव्यापारानुकूलकृतिमानिति बोधः पर्यवसितः। बाणसंयोगाभावनिष्ठस्य स्वाङ्गवृत्तित्वस्य प्रयोजकत्वं बाणापसारणादिव्यापारस्य नासिद्धम्।

व्युत्पत्तिवादरीत्या वारणार्थकधातुयुक्तपञ्चम्यर्थविचारः

"यवेभ्यो गां वारयति, कूपादन्धं वारयति" इत्यादौ "वारणार्थानाम्०"[१] इत्यनेन यवकूपादेरपादानत्वम्। वारणं नाम क्रियाप्रतिषेधः। तदर्थकधातुयोगे ईप्सितः तत्तत्क्रियाजन्यफलभागितया तत्तत्क्रियाकर्तुरभिप्रेतोऽपादानमिति सूत्रार्थः। क्रिया च भक्षणगमनादिरूपा। तात्पर्यवशात् क्वचित् कस्याश्चित् क्रियायाः प्रतिषेधो वारयत्यादिना बोध्यते। प्रतिषेधः कर्तृत्वाभावानुकूलव्यापारः। कर्तृत्वाभावरूपं यत् धात्वर्थतावच्छेदकं फलं तदाश्रयतया गवान्धादेः कर्मता। गवादिपदोत्तरपञ्चम्या यवादिगतत्वेनेच्छाविषयफलकत्वं धात्वर्थैकदेशभक्षणादौ प्रत्याय्यते। गतत्वे निरूपितत्वसंबन्धेन प्रकृत्यर्थस्यान्वयः। इच्छा च भक्षणादिक्रियाकर्तृगवादिनिष्ठा पञ्चम्यर्थेऽन्तर्भावनीया।

एवं चोक्तस्थलयोः यवकूपादिनिष्ठत्वेन गवान्धादिसमवेतेच्छाविषयो यो गलाधस्संयोगोत्तरदेशसंयोगादिः गवादिनिष्ठतत्फलकव्यापारविशेषकर्तृत्वाभावानुकूलव्यापारानुकूलकृतिमानित्याकारको बोधः। "यवकूपादिनिष्ठः गलाधस्संयोगः उत्तरदेशसंयोगश्च भवतु" इत्याकारः इच्छायाः बोध्यः।

अन्धादेर्यद्यपि कूपगमनत्वादिना नेच्छा। तथापि अभिमुखदेशगमनत्वादिना कूपगमनादिविषयकेच्छा वर्तत एवेति वस्तुगत्या यः कूपादिदेशः तद्गतत्वेन क्रियाजन्यसंयोगस्य तदिच्छाविषयत्वमक्षतमेव।

न च प्रकृतयवकूपादिनिष्ठफलविशेषजनकत्वमेव पञ्चम्यर्थोऽस्तु, किमिच्छान्तर्भावेणेति वाच्यम्। यत्र चैत्रादेः नान्तरीयकतया विषभोजनादिकं, न तु

[१] सू. १.४.२७

स्वेच्छातः, तत्र तद्भोजनविरोधिव्यापारकर्तरि 'चैत्रं विषाद्वारयति' इति न प्रयोगः, अपि तु "सविषाद्वारयति" इत्येव प्रयोगः। तत्र 'चैत्रं विषाद्वारयति' इति प्रयोग-वारणाय सूत्रकृता ईप्सित इत्यनेन सन्प्रत्ययेनेच्छोपादानात्।

अत एव यद्यवादिकं केनापि न भुक्तं तत्कर्मकभोजनाप्रसिद्धावपि भोजनफले संयोगविशेषे (गलाधस्संयोगे) तद्यवादिगतत्वेनेच्छाविषयत्वस्य प्रसिद्ध्या "तद्य-वाद्गां वारयति" इत्यादिप्रयोगोपपत्तिः।

एतेन — तत्र भक्षणादौ तद्यवादिकर्मकत्वगवादिकर्तृकत्वोभयाभावः बोधनीयः। तदनुसारेण भक्षणनिष्ठो द्वित्वावच्छिन्नप्रतियोगिताको योऽभावः तदनुकूलव्यापारो धात्वर्थः। प्रयोगितायां गोनिष्ठकर्तृताकत्ववृत्तित्वस्य यवनिष्ठकर्मताकत्ववृत्तित्वस्य चान्वयः। यदि वारणं न स्यात् तदा भक्षणं गोकर्तृकं यवकर्मकं च स्यात्। अतो वारणं भक्षणनिष्ठोभयाभावप्रयोजकमिति कैश्चित् कृतः प्रयासः अनादेयः।

प्रयासश्च अन्यत्र क्लृप्तधात्वर्थतावच्छेदकफलशालित्वरूपकर्मत्वबोधकत्वव्युत्पत्ति-संकोचः व्युत्पत्त्यन्तरकल्पनं च।

पदवाक्यरत्नाकरे[१]

क्रियानिवृत्तिजनकव्यापारान्तरवाचिनः।
धातवो वारयत्याद्याः प्रत्याकाङ्क्षन्ति पञ्चमीम्।।

वारयत्यादिधातुः धातुशक्यतावच्छेदकत्वोपलक्षितपतनत्वाद्यवच्छिन्नप्रतियोगिताक-मभावं फलविधयाभिधत्ते, तथा तत्प्रयोजकं "मा पत" इति वाक्यरूपं व्यापारं चाभिधत्ते। धातुजन्योपस्थितिः शक्यतावच्छेदकत्वरूपमुपलक्षणधर्मं परित्यज्य पतनाभावत्वादिना फलमवगाहते। तत्राभावस्वरूपफलाधिकरणतया विवक्षिते कर्मसंज्ञा बलीयसीति ततो द्वितीया। फलीभूताभावप्रतियोगिक्रियायाः अधिकर-णादिकारकाणि कूपादीनि अपादानसंज्ञकानीति तत्रत्या पञ्चमी तानि कारकाण्य-भिधत्ते।

"कूपादन्धं वारयति" इत्यत्र अन्धवृत्तिर्यः कूपाधिकरणकपतनप्रतियोगिको-ऽभावः तदनुकूलव्यापारानुकूलकृतिमानिति बोधः।

पञ्चम्यर्थः अधिकरणत्वम्। तस्य निरूपकतासंबन्धेन फलरूपे धात्वर्थे पतना-भावेऽन्वयः। द्वितीयार्थः आधेयत्वम्। तस्यापि स्वरूपसम्बन्धेन तत्रैवान्वयः।

---

[१] पृ. ७६८

"यवेभ्यो गां वारयति" इत्यत्र गोवृत्तिर्यः यवकर्मकभक्षणप्रतियोगिकाभावः तदनुकूलव्यापारानुकूलकृतिमान् इति बोधः।

"परस्वेभ्यः पाणिं वारयति" इत्यत्र पाणिवृत्तिर्यः परस्वकर्मकादानप्रतियोगिकोऽभावः तदनुकूलव्यापारानुकूलकृतिमानित्यन्वयबोधः।

"शरेभ्यः शरीरं वारयति" इत्यत्र शरीरवृत्तिर्यः शरकरणकव्याधप्रतियोगिकोऽभावः तदनुकूलव्यापारानुकूलकृतिमानित्यन्वयबोधः।

"पुष्पेभ्यः आतपं वारयति" इत्यत्र आतपवृत्तिर्यः पुष्पकर्मकशोषणप्रतियोगिकोऽभावः तदनुकूलव्यापारानुकूलकृतिमानिति बोधः।

"श्वपचेभ्यो दातारं वारयति" इत्यत्र दातृवृत्तिर्यः श्वपचसंप्रदानकदानप्रतियोगिकोऽभावः तदनुकूलव्यापारानुकूलकृतिमानिति बोधः।

यत्तु क्रियाविषयकनिवृत्त्यनुकूलो व्यापारो वारयतेरर्थः। निवृत्त्यन्वितमाधेयत्वं द्वितीयायाः, प्रकारित्वं पञ्चम्या अर्थः। तथा च कूपप्रकारिकायाः अन्धवृत्तेः पतननिवृत्तेरनुकूलो व्यापारो भवति "कूपादन्धं वारयति" इति वाक्यस्यार्थः। "कूपे मा पतेयम्" इत्याकारिकायां निवृत्तौ कूपप्रकारकतायाः निराबाधादिति।

तन्न। तथा सत्यचेतनकर्मके "पुष्पेभ्य आतपं वारयति" इत्यादौ, "कूपादन्धं वारयति न पुनरन्धो निवर्तते" इत्यादौ चागतेः। पूर्वत्र अचेतने निवृत्त्याख्ययत्नस्याभावात्, उत्तरत्र व्यापारे निवृत्त्यनुकूलत्वस्याभावात्।

अपि च कूपे मा पतेयमित्याकारकनिवृत्तिप्रकारतामादाय कूपस्यापादानत्वोपपादने "क्षेत्रे यवेभ्यो गां वारयति" क्षेत्रादिभ्योऽपि पञ्चम्यापत्तेः। "क्षेत्रे यवं मा भक्षयेयम्" इत्याकारकनिवृत्तिप्रकारतायाः क्षेत्रे सत्त्वात्।

विभक्त्यर्थनिर्णये[1]

वारयत्यादियोगे पञ्चमीं ज्ञापयति "वारणार्थानामीप्सितः"[2] इति सूत्रम्। वारणार्थानां धातूनां योगे ईप्सितो योऽर्थस्तत्कारकमपादानसंज्ञकं भवतीत्यर्थकम्। "यवेभ्यो गां वारयति, कूपात् अन्धं वारयति" इति प्रयोगः।

अत्र गौडाः — वारणं क्रियाप्रतिषेधप्रतियोगिनी क्रिया भक्षणगमनादिरूपा। तात्पर्यवशात् क्वचित् कस्याश्चित् प्रतिषेधो वारयत्यादिना बोध्यते। प्रतिषेधस्तु

[1] पृ. ३४७
[2] सू. १.४.२७

कर्तृत्वाभावानुकूलो व्यापारः। कर्तृत्वाभावस्वरूपफलवत्तया गवान्धादेः कर्मता। पञ्चम्यास्तु देशादिगतत्वेनेच्छाविषयत्वमर्थः। गतत्वं तु आधेयत्वम्। तथा चाधेयत्वप्रकारकेच्छाविषयत्वं पञ्चम्यर्थो भक्षणगमनादिफले गलाधस्संयोगोत्तरदेशसंयोगादावन्वेति। प्रकृत्यर्थस्य निरूपकतया आधेयत्वेऽन्वयः। इच्छा तु भक्षणादिकर्तुः बोध्या। एवं च यवाधेयत्वप्रकारकेच्छाविषयगलाधःसंयोगफलकभक्षणकर्तृत्वाभावस्य गोवृत्तेरनुकूलो व्यापारः, कूपाधेयत्वप्रकारकेच्छाविषयोत्तरसंयोगफलकगमनकर्तृत्वाभावस्यान्धवृत्तेरनुकूलव्यापारश्च वाक्यार्थः। यद्यप्यन्धादेः कूपाधेयत्वप्रकारिका नेच्छा तथाप्यभिमुखदेशाधेयत्वप्रकारिकेच्छा विद्यत एव। अभिमुखत्वेन कूपादिस्तत्र भासत एवेति नानुपपत्तिः।

न च पञ्चम्या आधेयत्वमर्थो भक्षणादिफले गलाधस्संयोगादावन्वियात्, किं पञ्चम्यर्थे इच्छान्तर्भावेणेति वाच्यम्। यत्रान्नपिहितविषभोजनप्रतिषेधव्यापारः तत्र 'विषाद्वारयति' इति न प्रयोगः किं तु सविषान्नाद्वारयतीति प्रयोगः। तत्र पूर्वप्रयोगवारणायेच्छायाः पञ्चम्यर्थान्तर्भावात्। यस्य यवादेर्न केनापि भक्षणं तत्परात् 'यवात् गां वारयति' इति प्रयोगस्यानुपपत्तेश्च। इच्छायास्तदन्तर्भावे तु तद्यवाधेयत्वप्रकारकेच्छाविषयफलकभक्षणकर्तृत्वाभावानुकूलव्यापारबोधस्य संभवात् भवति तथाविधप्रयोगः। एवं च दर्शितस्थले भक्षणादौ तद्यवाधेयत्वस्य गोकर्तृकत्वस्य चोभयाभावः प्रतीयते। तदर्थं व्युत्पत्त्यन्तरकल्पनं च न युक्तं, गौरवात्।

न च सर्वत्रैवोभयाभावबोधान्न व्युत्पत्त्यन्तरकल्पनमिति वाच्यम्। तथा सति "गगनात् गां वारयति" इति प्रयोगापत्तेः। गगनाधेयत्वगोकर्तृकत्वोभयाभावस्य भक्षणे सत्त्वात्। तस्मात् इच्छायास्तथात्वमेवोचितम्। एतदर्थमेव सूत्रेऽपीप्सितपदमित्याहुः।

तच्चिन्त्यम्। तथा सति "क्षेत्रात् वन्यां वारयति, नृपादातपं छत्रेण वारयति" इत्यादावचेतनस्य वन्यादेः गमनकर्तुः इच्छाविरहात् क्षेत्राद्याधेयत्वप्रकारकेच्छाविषयत्वस्य गमनफले संयोगादौ विरहादनन्वयापत्तेरिति।

गुरुचरणास्तु — वारयत्यादिधातुः धातुप्रवृत्तिनिमित्तत्वोपलक्षितपतनत्वाद्यवच्छिन्नप्रतियोगिताकमभावं फलविधयाभिधत्ते। तत्प्रयोजकमपि मा पतेति वाक्यादिव्यापारः प्रधानतया तज्जनिता तु पदार्थोपस्थितिः उपलक्षणधर्ममोषेण पतनाभावत्वादिना फलमवगाहते। तत्राभावस्वरूपफलाधिकरणतया विवक्षिते कर्मसंज्ञा बलीयसीति ततो द्वितीयाफलभूताभावप्रतियोगिक्रियाकारकाणि पुनरपादानसंज्ञानीति तत्रत्या पञ्चमी तानि कारकाण्यभिधत्ते। "कूपादन्धं वारयति" इत्यत्र कूपाधिकरणकपतनप्रतियोगिकस्य अन्धवृत्तेः, "यवेभ्यो गां वारयति" इत्यत्र यव-

कर्मकभक्षणप्रतियोगिकस्य गोवृत्तेः, "परस्वेभ्यः पाणिं वारयति" इत्यत्र परस्व-कर्मकोपादानप्रतियोगिकस्य पणिवृत्तेः, "परेभ्यः शरीरं वारयति" इत्यत्र शरीर-करणकबाधप्रतियोगिकस्य शरीरवृत्तेः, "पुष्पेभ्यः आतपं वारयति" इत्यत्र पुष्प-कर्मकशोषणप्रतियोगिकस्य आतपवृत्तेः, "श्वपचेभ्यो दातारं वारयति" इत्यत्र श्वपचसंप्रदानकदानप्रतियोगिकस्य दातृवृत्तेः अभावस्यानुकूलो व्यापारो वाक्यार्थ इति प्राहुः।

मतान्तरखण्डनम्

केचित्तु "कूपादन्धं वारयति" इत्यदौ धात्वर्थतावच्छेदकत्वोपलक्षितधर्माव-च्छिन्नक्रियागोचरनिवृत्त्यनुकूलो व्यापारो वारयतेरर्थः। तत्र निवृत्त्यन्वितं समवेतत्वं द्वितीयार्थः। पञ्चम्यास्तु प्रकारित्वमर्थः। "कूपे मा पतेयम्" इत्याकारकनिवृत्तेः कूपप्रकारकत्वात्। तथा च कूपप्रकारिकायाः अन्यसमवेतायाः पतननिवृत्तेरनुकूलो व्यापारो वाक्यार्थ इति वदन्ति।

तन्न। "पुष्पेभ्यः आतपं वारयति" इत्यादावनन्वयापत्तेः। आतपादेरचेतनस्य निवृत्त्यसंभवात्। "कूपादन्धं वारयति न पुनरन्धो निवृत्तः" इति प्रयोगानुपपत्तेश्च। निवृत्तितदभावयोरेकत्रासंभवात्।

किं च प्रकारित्वमपि न पञ्चम्यर्थः संभवति। तथा सति "क्षेत्रे खले वा यवेभ्यो गां वारयति" इत्यत्र क्षेत्रादिपदात् पञ्चम्यापत्तेः। "क्षेत्रे यवं मा भक्षयेयम्" इत्याकारकनिवृत्तौ क्षेत्रादेः प्रकारत्वात्।

स्वमतोपन्यासः

वस्तुतस्तु — धात्वर्थतावच्छेवदकत्वोपलक्षितधर्मावच्छिन्नक्रियागोचरप्रवृत्त्यभाव-प्रयोजकज्ञानानुकूलव्यापारो वारयतेरर्थः। तथाविधज्ञानस्वरूपफलवत्तया गवान्धादेः कर्मत्वम्। तथाविधं ज्ञानं तु प्रवृत्तिविषयक्रियानिष्ठस्य अनिष्टसाधनत्वस्य कृत्य-साध्यत्वस्य वा अवगाहि बोध्यम्। तदनुकूलो दण्डोद्यमनादिः वारयतुर्व्यापारः यवभक्षणे कृत्यसाध्यताबुद्धिं गवादेर्जनयतीति न यवभक्षणे प्रवृत्तिः। 'अग्रे कूपः' इति "कूपे मा पत" इति वाक्यं तु कूपपतननिष्ठानिष्टसाधनत्वस्य स्मारकमिति नान्धस्य कूपपतनप्रवृत्तिः।

एवं च "यवेभ्यो गां वारयति" इत्यत्र पञ्चम्याः कर्मत्वमर्थः। प्रवृत्तिविषय-क्रियायामन्वेति। तथा च यवकर्मकभक्षणविषयकप्रवृत्त्यभावप्रयोजकज्ञानस्य गो-वृत्तेः अनुकूलव्यापारो वाक्यार्थः।

यत्र तु गवादेः भक्षणादावुत्कटो रागः, ताडनादौ न तथा द्वेषो वा तत्र "दण्डिना वारिता अपि गावो यवभक्षणे प्रवर्तन्ते न निवर्तन्ते वा" इति प्रयोगः दण्डिकर्तृकव्यापारप्रयोज्यस्य यवभक्षणप्रवृत्त्यभावप्रयोजकज्ञानस्याश्रया इति वारिता इत्यन्तस्यार्थः। वारयतेर्दर्शितार्थकत्व एवोभयविधः प्रयोगः संगच्छते। अत एव "प्रवृत्तिविघातो वारणम्" इति काशिका। सूत्रे ईप्सितपदं पञ्चम्याः कर्मत्वमर्थं सूचयति। यस्य यवादेर्न केनापि भक्षणं तत्परयवेभ्यो 'गां वारयति' इति न प्रयोगः। यदि प्रयोगः तदा यवकर्मत्वस्य स्वावच्छिन्नया भक्षणप्रकारितया प्रवृत्तान्वय इति नानुपपत्तिः।

एवमेव "कूपादन्धं वारयति कारुणिकः" इति "कारुणिकेन वारितोऽप्यन्धो न निवर्तते" इति प्रयोगेऽप्यन्वयः। इयांस्तु विशेषो यदत्र कूपकर्मकगमनस्य प्रवृत्तान्वय इति।

"पुष्पेभ्य आतपं वारयति" इत्यादौ अचेतने कर्मणि वारयतेः क्रियाभावप्रयोजकव्यापारोऽर्थः। क्रियाभावस्वरूपफलवतः कर्मत्वात् तद्वाचकपदात् द्वितीया। पञ्चम्याः कर्मत्वमर्थः फलैकदेशक्रियायामन्वेति। तथा च पुष्पकर्मकगमनाभावस्य शोषणाभावस्य वा आतपवृत्तेरनुकूलो व्यापारो वाक्यार्थः।

न चैवं क्रियाभावप्रयोजकव्यापार एव सर्वत्र वारयतेरर्थोऽस्तु इति वाच्यम्। वारिता अपि गावो यवं भुञ्जते इति 'वारितोऽप्यन्धः कूपं गतः' इति प्रयोगानुपपत्तेः। भक्षणादिक्रियाभावस्वरूपफलाश्रयस्य वारणकर्मणः भक्षणादिक्रियाकर्तृत्वानुपपत्तेः।

आक्षेपः समाधानं च

ननु वारयतेर्नानाविधार्थकत्वाभ्युपगमे 'यवेभ्यो गां वारयति' इत्यादौ चेतने कर्मणि क्रियाभावेच्छाप्रयोज्यव्यापार एवार्थोऽस्तु, किं प्रवृत्त्यभावप्रयोजकज्ञाननिवेशनेन। तावतैव 'वार्यमाणा गावो भुञ्जत' इत्यादिप्रयोगोपपत्तेः। फलीभूतायाः क्रियाभावेच्छायाः विषयस्य गवादेः वारणकर्मत्वेऽपि भक्षणकर्तृत्वाविरोधादिति चेत् —

स्यादेवं यदि यवभक्षणेच्छया विधीयमाने क्षेत्रस्य कण्टकाद्यावरणेऽपि 'वारयति' इति प्रयोगः। यदि च वारयतेर्नानार्थकत्वेऽनुगतप्रवृत्तिनिमित्ताभावे प्रयोगातिप्रसङ्गः। क्रियाभावप्रयोजकव्यापारार्थकत्वे तु यवकर्मकत्यागाभावप्रयोजकव्यापारेऽपि "यवेभ्यो गां वारयति" इति प्रयोगप्रसङ्ग इति विभाव्यते, तदा संबन्धाभावप्रयोजककार्यानुकूलो व्यापारो वारयतेरर्थः। तथाविधकार्यस्य फलतया तद्वतो

गवादेः कर्मत्वम्। यदीयसंबन्धाभावस्तद्वाचकपदात् पञ्चमी। सूत्रेऽपीप्सितपदेन आप्तीच्छाविषयप्रतिपादनं बालोपलालनम्। कर्तुरीप्सितेतिसूत्रवत् आप्तिमत एवापादानत्वविवक्षणात्। आप्तिस्तु प्राप्तिः। सा च संबन्ध एव। तदभावप्रयोजकं क्वचित् अनिष्टसाधनताज्ञानस्वरूपं कार्यम्। यथा गवादेः यवभक्षणत्वावच्छेदेन दण्डताडनाद्यनिष्टसाधनताज्ञानं कण्ठावच्छेदेन यवसंबन्धस्य यवसंयोगस्याभावं प्रयोजयति। यस्य यवादेर्न केनापि भक्षणं तत्संयोगाभावमपि सामान्यतो यवभक्षणत्वावच्छेदेनानिष्टसाधनताज्ञानमेव प्रयोजयति। अन्यथा तद्व्यक्तिभक्षणस्यानुपस्थित्या तद्गतानिष्टसाधनताज्ञानासंभवात् कुतोऽपि यवात् वारणासंभवात्।

एवं कूपगमनत्वावच्छेदेन शरीरोपघातकपतनानिष्टसाधनताज्ञानमन्धस्य चरणावच्छेदेन कूपसंयोगस्याभावं प्रयोजयति।

क्वचित् अचेतने कर्मणि ज्ञानातिरिक्तं कार्यं यथा आतपादेः छत्राद्यावरणसंयोगः नृपसंयोगाभावं पुष्पसंयोगाभावं वा प्रयोजयति।

एवं पञ्चम्या आधेयत्वं निरूपकत्वं वा अर्थः। तच्च धात्वर्थैकदेशे संबन्धेऽन्वेति। तथा च "यवेभ्यो गां वारयति" इत्यत्र यवनिरूपितसंयोगाभावप्रयोजककार्यस्य गोवृत्तेरनुकूलो यो व्यापारः तदनुकूलकृतिमान् दण्डीत्यन्वयबोधः।

एवं "कूपादन्धं वारयति, पुष्पात् नृपाद्वा आतपं वारयति, क्षेत्रात् वन्यां वारयति" इत्यादावप्यन्वयो बोध्यः।

एवं "चण्डालात् कनकं वारयति दाता" इत्यत्र चण्डालसंप्रदानककनकदाननिष्ठानिष्टसाधनताज्ञानविषयत्वस्वरूपकार्यस्य कनकनिष्ठस्य प्रयोजकं तथाविधागमस्मरणं दातुः, तथाविधविषयत्वं तु कनके चाण्डालस्वत्वाभावं प्रयोजयति। इत्थं च वारयतेर्न नानार्थता। न वा 'वार्यमाणा गावो यवं भुञ्जते' इत्यादिप्रयोगानुपपत्तिः। संबन्धस्तु प्रयोज्यो बोध्यः। तेन घटसमवेतत्वाभावप्रयोजकस्याग्निसंयोगविशेषसामानाधिकरणस्य श्यामनिष्ठस्यानुकूले पाचकव्यापारे सत्यपि 'घटात् श्यामं रूपं वारयति पाचकः' इति न प्रयोगः।

यत्र तु वारणान्तर्भूतस्य संबन्धाभावस्यैव वारयत्यादिना विवक्षणं तत्र संबन्धस्याभावे विशेषणतया फलत्वात् तद्वतः कर्मत्वमिति तत्र परत्वात् द्वितीयैव प्रमाणम्। यथा "कूपं वारयति पान्थः, मांसं वारयति मुनिः"। अत्र कूपवृत्तिसंबन्धाभावप्रयोजककृतिमान् पान्थः इत्यादिरन्वयबोधः।

यत्र चाभावप्रयोजकव्यापारस्यैव वारणान्तर्भूतस्य विवक्षणं तत्र संबन्धस्य वारणानन्तर्भूतत्वात् तद्वतो नापादानत्वमिति तत्र न पञ्चमी। वारणार्थकधात्वर्थान्तभूतसंबन्धवत एवापादानत्वविधानात्।

प्रतियोग्यविशेषितस्य फलीभूतस्याभावस्य प्रतियोग्येव कर्म न त्वधिकरणम्। यथा "घटं रहयति" इत्यादौ घटादिः प्रतियोगी तथात्रापीति प्रतियोगिन्येव द्वितीया। यथा "कूपगमनं कूपसंयोगं वा वारयति पान्थः" इत्यादौ। अत्र द्वितीयायाः प्रतियोगित्वमर्थः। तच्च फलेऽभावेऽन्वेति। तथा च कूपगमनप्रतियोगिताकस्य कूपसंयोगप्रतियोगिताकस्य वा अभावस्य प्रयोजको यो व्यापारः तदनुकूलकृतिमान् पान्थ इत्यन्वयबोधः। एवं मांसभोजनं मांसकण्ठसंयोगं वा वारयति मुनिः इत्यादावप्यन्वयो बोध्यः।

यत्राभावेऽधिकरणस्य संबन्धो विवक्षितः तत्र शेषे षष्ठ्येव प्रमाणम्। यथा "अन्धस्य कूपगमनं कूपसंयोगं वा वारयति दयालुः, मांसभोजनं पुत्रस्य वारयति मुनिः, पापकर्म स्वस्य वारयति विद्वान्" इति। अन्वयबोधः पूर्ववदेव। विशेषस्तु प्रतियोग्यन्विते प्रयोजकव्यापारविशेषणेऽभावे षष्ठ्यर्थसंबन्धभानमिति। एवं वारयत्यादेः दर्शितार्थकतायामेव दर्शितनिखिलप्रयोगोपपत्तिः त्यागाभावप्रयोजकव्यापारे वारयतिप्रयोगानुपपत्तिश्चेति।

वारयतिपर्यायाः वर्जयतिनिवर्तयतिप्रभृतयः। तेन "यवेभ्यो गां वर्जयति" इत्यादिः प्रयोगः। अत एव "यवेभ्यो गां वारयति निवर्तयति" इति काशिका।

शाब्दिकमतखण्डनम्

यत्तु सूत्रीयेप्सितशब्देन अनीप्सितस्यापि ग्रहणम्। तेन "अग्नेर्माणवकं वारयति" इति प्रयोग इति शाब्दिकैरुक्तम्। तत् सूत्रार्थानभिज्ञानविजृम्भितम्। ईप्सितशब्देन संबन्धवतोऽपादानत्वाभिधानात् इत्युक्तत्वात्। दर्शितकार्यस्वरूपफलवतः कर्मत्वे संबन्धप्रयोजकक्रियादिमत्त्वं तन्त्रम्। अतः सांनिध्याभावस्वरूपस्य संबन्धाभावप्रयोजकस्य फलस्य प्रयोज्यस्य सत्त्वेऽपि दण्डिकूपादेर्न कर्मत्वमिति 'माणवकादग्निं, कूपमन्धाद्वा वारयति' इति न प्रयोगः। संबन्धप्रयोजकक्रियादेः माणवकेऽन्धे च विद्यमानस्य अग्नौ कूपे च विरहादिति, माणवकादेस्तथात्वात् कर्मत्वमेवेति।

भाट्टरहस्यानुसारेण वारणार्थधातुयोगे पञ्चम्यर्थः[१]

"वारणार्थानामीप्सितः"[२] इति सूत्रात् वारणार्थानां योगे ईप्सितोऽर्थोऽपादानसंज्ञः स्यात् इत्यर्थकात् "यवेभ्यो गां वारयति" इत्यादौ पञ्चमी। अत्र पञ्चम्यर्थः प्रतियोगित्वम्। द्वितीयार्थो वृत्तित्वम्। धात्वर्थश्च विनाशानुकूलव्यापाराभावानुकूलव्यापारः। यत्नश्चाख्यातार्थः। पञ्चम्यर्थस्य स्वनिरूपको यो विनाशः तदनुकूलव्यापाराभावानुकूलव्यापारानुकूलत्वसंबन्धेन कृतावन्वयः। द्वितीयार्थस्य स्वाश्रयः यः विनाशानुकूलव्यापाराभावः तदनुकूलव्यापारानुकूलत्वसंबन्धेन यत्नेऽन्वयः। तथा च यवप्रतियोगिकविनाशानुकूलो भक्षणादिरूपो यो व्यापारः तस्य गोवृत्तिर्योऽभावः तदनुकूलव्यापारानुकूला कृतिः देवदत्तवृत्तिरिति बोधः पर्यवसितः।

अत्र च यवानां वस्तुत ईप्सितत्वात् पञ्चमी। न चैवं गोः ईप्सितत्वात् पञ्चम्यापत्तिः, तस्याः ईप्सिततमत्वेन कर्मत्वोपपत्तेः। एतदर्थमेव कर्तुरीप्सिततमं कर्मेत्यत्र तमप्ग्रहणम्। धात्वर्थतावच्छेदकीभूतस्य विनाशानुकूलव्यापारध्वंसस्य गोमात्रवृत्तित्वात् तत्रैव द्वितीया।

एवं "कूपादन्धं वारयति" इत्यत्र वृत्तित्वं पञ्चम्यर्थः। पतनानुकूलव्यापाराभावानुकूलव्यापारो धात्वर्थः। तथा च कूपवृत्ति यत् अधःप्रदेशावच्छिन्नसंयोगानुकूलक्रियारूपं पतनं तदनुकूलो योऽन्धवृत्तिव्यापारः तदभावानुकूलो यो व्यापारः तदनुकूलकृतिश्चैत्रवृत्तिः इति बोधः।

एवं "पुष्पेभ्य आतपं वारयति" इत्यत्र शुष्कीभावानुकूलव्यापाराभावानुकूलव्यापारो धात्वर्थः। शुष्कीभावान्वयि वृत्तित्वं पञ्चम्यर्थः। व्यापाराभावान्वयि वृत्तित्वं द्वितीयार्थः। पुष्पवृत्तिशुष्कीभावानुकूलव्यापाराभावो य आतपनिष्ठः तदनुकूलव्यापारानुकूला कृतिः इति बोधः।

"अग्नेर्माणवकं वारयति" इत्यत्र जन्यत्वं पञ्चम्यर्थः। दाहानुकूलव्यापाराभावानुकूलव्यापारो धात्वर्थः। द्वितीयार्थः वृत्तित्वम्। तथा च अग्निजन्यस्य दाहस्यानुकूलव्यापाराभावो यो माणवकनिष्ठः तदनुकूलव्यापारानुकूला कृतिरिति बोधः।

न चैवं धात्वर्थाननुगमः। अनुभवानुरोधेन धातोः अनेकार्थेषु लक्षणायाः स्वीकर्तव्यतया अननुगमस्यादोषत्वात्। "यवेभ्यो गां वारयति, अन्यथा भक्षयिष्यति" इति, "कूपादन्धं वारयति, अन्यथा पतिष्यति" इति, "पुष्पेभ्य आतपं

---

[१] पृ. १३२

[२] सू. १.४.२७

वारयति, अन्यथा शुष्काणि भविष्यन्ति'' इति, ''अग्नेर्माणवकं वारयति, अन्यथा दग्धो भविष्यति'' इति प्रयोजनस्य भेदेन विवरणात्।

अन्ये तु अनुगमरसिकाः सर्वत्र संयोगजनकव्यापाराभावस्य कर्मकारकवृत्तेरनुकूलो यो व्यापारः स एव धात्वर्थः। वृत्तित्वं पञ्चम्यर्थ इत्याहुः। तन्न। ''यवेभ्यो गोसंयोगं वारयति, यवेभ्यः कार्मणिकं वारयति'' इत्यादावनुगमानुपपत्तेः।

ननु ''वारणार्थानामीप्सितः''[१] इति सूत्रेण न तावदीप्सिते वारयतिक्रियायोगे एवापादानत्वमिति नियमः। ''इष्टादन्नादंशं ददाति'' इत्यादौ तदभावेऽपि दर्शनात्। नापि वारयत्यर्थयोगे ईप्सित एवापादानमिति नियमः। ''सर्पाद्वारयति, गङ्गास्नानाद्वारयति'' इत्यादावनीप्सितेऽपि दर्शनादिति चेत् — न। निवार्यनिवारकान्यतरस्येप्सित इति तदर्थात्। सर्पादयो हि निवारकस्यानिष्टा अपि पुरोवृत्तित्वादिना निवार्यस्येष्टा एव। ''पुष्पेभ्य आतपं वारयति'' इत्यादौ निवार्यस्याचेतनत्वात् निवारकग्रहणम्।

अथ वा धात्वर्थतावच्छेदकीभूतस्य विनाशानुकूलव्यापाराभावरूपस्य फलस्य यत् फलं विनाशादि तत्संबन्धित्वेन प्रसक्तस्य यवादेस्तद्विपरीतत्वेन निवारकेच्छाविषय इति तदर्थ इति न कश्चित् विरोधः।

सूत्राणां प्रत्याख्यानस्याशयः

वस्तुतस्तु बहुधा एतानि सर्वाणि सूत्राणि भाष्यकारेण प्रत्याख्यातानि। तस्यायमाशयः — ''ध्रुवमापाये०''[२] इति सूत्रे हि न वस्तुत एव क्रियाजन्यो विभागोऽभिप्रेतः, अपि तु तर्कितोऽपि। यदीयं क्रिया न स्यात्, तदा कर्मकारकेणापादानस्य संबन्धः स्यात्, क्रियया तु स निवारित इति तदभावो जनित इति। तदभिप्रायमेव चापायपदम्।

आवश्यकं चैतादृशं व्याख्यानम् ''असंयुक्तादेव चोरात् पलायितः'' इत्येतदर्थम्। ततश्च तत्सूत्रेणैव यवादेरप्यपदानत्वसिद्ध्या सूत्रान्तरवैयर्थ्यमिति।

न चैवं गवादेरपि तर्किततादृशाभावाश्रयत्वात् अपादानत्वापत्तिरिति वाच्यम्। ईप्सिततमत्वादिप्रयुक्तकर्मसंज्ञया परया अपादानसंज्ञायाः बाधात्। वैपरीत्येन विवक्षायां गोरपादानत्वस्य यवानां कर्मत्वस्य च विवक्षायामिष्टापत्तेश्च। न च उभयोः सत्यां विवक्षायामपादानत्वापत्तिरिति वाच्यम्। वारयतेः सकर्मकत्वेन अन्यतरस्य कर्मत्वविवक्षाया आवश्यकत्वात्।

---

[१] सू. १.४.२७
[२] सू. १.४.२४

अन्तर्धौ येनादर्शनमिच्छति[१] इति सूत्रार्थः

व्यवधाने सति यत्कर्तृकस्य आत्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात्। व्यवधानेनेति यावत्। मातुर्निलीयते कृष्णः।

कृष्णः मातृकर्तृकस्वविषयकदर्शनविरहाय कुड्यादिना प्रच्छन्नो भवतीत्यर्थः। अत्र व्यवधानमाश्रित्य मातृकर्तृकस्वविषयकदर्शनविरहस्य कृष्णेनेष्यमाणतया मातुरपादानत्वात् पञ्चमी। कर्तृतृतीयापवादोऽयम्, षष्ठ्यपवादो वा। भाष्ये तु बुद्धि-कृतमपादानत्वमाश्रित्य सूत्रमिदमपि प्रत्याख्यातम्।

अन्तर्धौ किम्। ''चौरान्न दिदृक्षते''। इच्छतिग्रहणं किम्। अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात् ''देवदत्तात् यज्ञदत्तो निलीयते''।

लघुशब्देन्दुशेखरे[२]

अन्तर्धिः अन्यकर्तृकस्वकर्मकदर्शनाभावानुकूलः व्यवहितदेशस्थितिरूपः तद्घ-टकं यत्कर्तृकं दर्शनाभावमिच्छति तत् अपादानमित्यर्थः। येनेत्यत्र ''कर्तृकर्मणोः-कृति''[३] इति षष्ठ्या भाव्यम्। सौत्रत्वात् साधुत्वम्। आत्मनः इति प्रत्या-सत्तिलभ्यम्। ''मातुर्निलीयते'' इत्यादौ इच्छा आक्षेपलभ्या। चोरानिति। चोर-कर्मकदर्शनेच्छाभाव इति शाब्दोऽर्थः। स च चोरकर्तृकस्वदर्शनाभावायेति अपा-दानत्वप्राप्तिः।

इच्छामात्रस्य आक्षेपलभ्यत्वे इव विशिष्टस्य आक्षेपलभ्यत्वेऽपि स्यादिति तद्वारणाय अन्तर्धिग्रहणम्। प्रकृते च नान्तर्धिः इति न दोषः।

येनेत्यस्याभावे स्वकर्मकदर्शनाभावं य इच्छति इत्यर्थे कर्तुरेव स्यात् अतः येनेति।

इच्छतिग्रहणं किमिति। अन्तर्धौ सति यत्कर्तृकदर्शनस्याभावः तदपादान-मित्यर्थोऽस्त्वति भावः। सत्यपीति। अदर्शनेच्छया तदनुकूलव्यापारकरणे दैव-वशात् दर्शने सत्यपीत्यर्थः। अन्यथा यत्र दर्शनाभाव एव तत्रैव स्यादिति भावः।

---

[१] सू. १.४.२८

[२] पृ. ६९०

[३] सू. २.३.६५

लघुमञ्जूषायाम्[१]

"मातुर्निलीयते कृष्णः"। स्वकर्मकदर्शनाभावप्रयोजकदेशविशेषस्थितिर्धातोरर्थः। धात्वर्थदर्शनकर्तात्रापादानम्। तत्पूर्वकनिवृत्तिः धातोरर्थः। तत्र मातुरपादानत्वेनान्वय इति भाष्यमतम्। दर्शने मातृकर्तृकत्वं प्रत्यासत्तिगम्यम्।

कारकचक्रे[२]

"उपाध्यायादन्तर्धत्ते" इत्यादौ धातोः स्वविषयकप्रत्यक्षविरोधिव्यापारोऽर्थः। पञ्चम्याः संबन्धित्वमर्थः। धात्वर्थतावच्छेदके प्रत्यक्षे अन्वेति। आख्यातस्य कृतिरर्थः। तथा चोपाध्यायसंबन्धिस्वविषयकप्रत्यक्षविरोधिव्यापारानुकूलकृतिमानित्यन्वयबोधः।

व्युत्पत्तिवादे[३]

"उपाध्यायादन्तर्धत्ते छात्रः" इत्यादौ "अन्तर्धौ येनादर्शनमिच्छति"[४] इत्यपादानता। अन्तर्धिरन्तर्धानम्। स्वनिष्ठान्यकर्तृकदर्शनविषयताविरहोद्देश्यको व्यापारः। विरहोद्देश्यकत्वं च विरहेच्छाधीनत्वम्। एवं च व्यापारानुकूलतया अन्तर्धानघटकः यत्कर्तृकदर्शनविषयताविरहोद्देशः (विरहेच्छा) सोऽपादानमिति सूत्रार्थः।

उक्तस्थलीयपञ्चम्याः अन्तर्धिघटकदर्शनान्वयि कर्तृतानिरूपकत्वमर्थः। एवं च उपाध्यायकर्तृकदर्शनविषयतायाः यः स्वनिष्ठोऽभावः तदुद्देश्यकव्यापारकर्ता छात्र इति तत्रान्वयबोधः।

पदवाक्यरत्नाकरे[५]

लीयतिर्दर्शनाभावजनिकां वदति क्रियाम्।
मातुर्न्यलीयतेत्यादौ पञ्चमी चेष्यमाणताम्।।

"मातुर्निलीयते बालः" इत्यादौ स्वकर्मकदर्शनाभावानुकूलो व्यापारो लीयतेरर्थः। पञ्चमी तु वृत्तिमत्त्वेनेच्छाविषयत्वमभिधत्ते। तेन मातृवृत्तित्वप्रकारकेच्छाविषयीभूतः स्वकर्मकदर्शनाभावः वाक्यार्थः। "मत्कर्मकदर्शनाभावः मातृवृत्तिर्भवतु" इति इच्छायाः आकारः।

---

[१] पृ. १२९६
[२] पृ. ७४
[३] पृ. २५८
[४] सू. १. ४.२८
[५] पृ. ७७०

इच्छायाः पञ्चम्यर्थघटकत्वादेव "बालो मातुर्निलीयते, माता पुनरेनं पश्यत्येव" इत्यादयः प्रयोगाः सूपपादाः। तदर्थमेव सूत्रे इच्छतिग्रहणम्।

विभक्त्यर्थनिर्णये[१]

निलीयत्यादियोगे पञ्चमीं ज्ञापयति "अन्तर्धौ येनादर्शनमिच्छति"[२] इति सूत्रम्। अन्तर्धिनिमित्तं येनादर्शनमात्मनस्तत्कारकमपादानसंज्ञकं भवतीत्यर्थकम्। मातुर्निलीयते बाल इति प्रयोगः। अत्र स्वकर्मकदर्शनाभावप्रयोजको व्यापारो निलीयतेरर्थः। पञ्चम्यास्तु वृत्तिमत्त्वप्रकारकेच्छाविषयत्वमर्थः स्वकर्मकादर्शनेऽन्वेति। प्रकृत्यर्थस्य निरूपकतया वृत्तिमत्त्वेऽन्वयः। तथा च मातृनिरूपितवृत्तिमत्त्वप्रकारकेच्छाविषयस्य स्वकर्मकदर्शनाभावस्यानुकूलो व्यापारो वाक्यार्थः। इष्यते हि बालेन "माता मां मा द्राक्षीत्" इति मातृवृत्तित्वेन स्वकर्मकदर्शनाभावः।

अत एव "मातुर्निलीयते बालः, माता पुनरेनं पश्यत्येव" इत्यादयः प्रयोगा उपपद्यन्ते। सूत्रेऽप्येतदर्थमिच्छतिग्रहणमिति शाब्दिकसंमतः पन्थाः।

वस्तुतस्तु दर्शनाभावप्रयोजकव्यापारो नान्तर्धिः। तथा सति सूत्रेऽन्तर्धावित्यस्य वैयर्थ्यापत्तेः। किं च स्वकर्मकादर्शनेच्छया येन शत्रुचक्षुर्नाशितं तत्र सोऽयं शत्रोर्निलीयत इति प्रयोगप्रसङ्गः। तस्माच्चक्षुस्संयोगप्रतिबन्धकदेशसंयोगोऽन्तर्धिशब्दार्थः। स एव निलीयतेरर्थः। प्रतिबन्धकस्तु व्यवहितदेशसंयोगः। अत एव "व्यवधानमन्तर्धिः" इति काशिका। यदि च 'तमसि निलीयते' इति प्रयोगः तदा चाक्षुषजनकसंयोगप्रतिबन्धकदेशसंयोगस्तथा। पञ्चम्यास्तु दर्शनाभावेच्छा अर्थः। तत्र प्रकृत्यर्थस्य कर्तृतया दर्शनेऽन्वयः। दर्शनाभावेच्छायाः प्रयोज्यतया अन्तर्धावन्वयः। "मातुर्निलीयते बालः" इत्यत्र मातृकर्तृकदर्शनाभावेच्छाप्रयोज्यतथाविधसंयोगानुकूलकृतिमान् बाल इत्यन्वयबोधः। व्यवधानाद्यपनयेन मातुः दर्शनेऽपि सति तथा प्रयोगार्थं सूत्रे इच्छतीत्युक्तम्। अत एव "इच्छतिग्रहणं किम्। अदर्शनेच्छायां सत्यां सत्यपि दर्शने यथा स्यात्" इति काशिका।

वस्तुतस्तु चाक्षुषाभावप्रयोज्यव्यवहितादिदेशसंयोगोऽन्तर्धिः। पञ्चम्याः कर्तृत्वमर्थः चाक्षुषेऽन्वेति। चाक्षुषाभावस्तु चाक्षुषविषयत्वाभावः स्ववृत्तिरन्तर्धौ निविशते। स्वान्यवृत्तिचाक्षुषविषयत्वाभावेच्छायां न पञ्चमी। अत एव "अन्तर्धाविति किम्। चौरान्न दिदृक्षते" इति काशिका। अत्र चौरवृत्तिचाक्षुषविषयत्वाभावेच्छाप्रयोज्यव्यापारस्य सत्त्वेऽपि नान्तर्धिः। तथा च यत्र स्वकर्मकचौरकर्तृक-

[१] पृ. ३५५
[२] सू. १.४. २८

दर्शनाभावेच्छया चौरकर्मकस्वकर्तृकदर्शनाभावेच्छा तत्र 'चौरेभ्योऽयं निलीयत' इति न प्रयोगः। एवं "मातुरन्तर्धत्ते निलीयते वा" इत्यत्र मातृकर्तृकचाक्षुषविषयत्वाभावस्य स्ववृत्तेः उद्देश्यिनी या इच्छा तत्प्रयोज्यस्य व्यवहितादिदेशसंयोगस्वरूपव्यापारस्याश्रयो बाल इत्यन्वयबोधः। इत्थं च 'निलीनमपि बालं माता पश्यति' इति प्रयोगोपपत्तिः। दर्शितान्तर्धेराश्रयस्य निलीनशब्दार्थतया तत्र दर्शनकर्मत्वस्याविरोधात्। अत एव "उपाध्यायादन्तर्धत्ते, उपाध्यायान्निलीयते, मा मामुपाध्यायो द्राक्षीदिति निलीयते" इति काशिका। अत्र इत्यन्तं पञ्चम्यर्थसहितस्य धात्वर्थस्य प्रयोज्यान्तस्य विवरणम्। निलीयत इति व्यवहितादिदेशसंयोगस्य धात्वर्थस्य प्रधानस्य विवरणमिति।

भाट्टरहस्ये[१]

"अन्तर्धौ येनादर्शनमिच्छति"[२] इत्यनेन अन्तर्धौ व्यवधाने सति यत्कर्तृकस्य आत्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात् इत्यर्थकेन "मातुर्निलीयते कृष्णः" इत्यादौ पञ्चमी। अत्र च प्रत्यक्षाभावेच्छापूर्वकः प्रत्यक्षविरोधिव्यापारः धात्वर्थः। वृत्तित्वं पञ्चम्यर्थः धात्वर्थतावच्छेदके प्रत्यक्षेऽन्वेति। विरोधित्वं तज्जनकलौकिकसंनिकर्षाभावानुकूलत्वम्। कृतिराख्यातार्थः। तथा च मातृवृत्तिस्वविषयकप्रत्यक्षाभावेच्छापूर्वको यः प्रत्यक्षजनकलौकिकसंनिकर्षाभावानुकूलव्यापारः तदनुकूलकृतिः कृष्णवृत्तिः इति शाब्दबोधः। व्युत्पत्तिबलेन च प्रत्यक्षे कृष्णविषयकत्वस्य बोधः पार्ष्ठिकः।

आख्यातोपयोगे[३] इति सूत्रार्थः

उपयोगे — नियमपूर्वकविद्यास्वीकारे, आख्याता-वक्ता- अध्यापयिता अपादानसंज्ञः स्यात्। उपाध्यायादधीते। ब्रह्मचर्यादिनियमविशेषपूर्वकमुपाध्यायस्योच्चारणमनु उच्चारयतीत्यर्थः। उपयोगे किम्। "नटस्य गाथां शृणोति"। नटजन्यं गाथाश्रवणमिति बोधात् नटस्य कारकत्वमिति शङ्का। नियमपूर्वकविद्यावक्तृत्वाभावान्नेत्युत्तरम्।

---

[१] पृ. १३४

[२] सू. १.४.२८

[३] सू. १.४.२९

लघुमञ्जूषायाम्[१]

"उपाध्यायादधीते"। उच्चारणोत्तरकालिको नियमपूर्वको ग्रन्थस्वीकारानुकूलो व्यापारो धात्वर्थः। उच्चारणाश्रयोऽत्रापादानम्। अपादानत्वेनैव बोधः सर्वत्र।

उपाध्यायान्निस्सरन्तं ग्रन्थमधीत इत्यर्थः। 'नटस्य गाथां शृणोति' इत्यादावतिप्रसङ्गः अनभिधानात् वारणीय इति भाष्यमतम्।

व्युत्पत्तिवादे[२]

"पण्डितात् पुराणं शृणोति, उपाध्यायादधीते, रामात् अधीतः संदेशः" इत्यादौ आख्यातुः "आख्यातोपयोगे" इत्यनेन अपादानता। तत्र प्रकृत्यर्थपण्डितादिकर्तृकोच्चारणाधीनत्वं पञ्चम्यर्थः। तस्य श्रवण-उच्चारण-अर्थविशेषज्ञानादिक्रियायामन्वयः। पण्डितकर्तृकोच्चारणाधीनपुराणकर्मकश्रवणानुकूलकृतिमान्, उपाध्यायकर्तृकोच्चारणाधीनोच्चारणानुकूलकृतिमान्, रामकर्तृकोच्चारणाधीनार्थविशेषज्ञानवानिति बोधः।

पदवाक्यरत्नाकरे

उच्चारणानन्तरितमुच्चारणमधीङोऽर्थः। प्रथमोच्चारणान्वयि कर्तृत्वं पञ्चम्यर्थः। उपाध्यायकर्तृकोच्चारणाव्यवहितोच्चारणकर्तेति बोध इत्युक्तम्।

विभक्त्यर्थनिर्णये[३]

अधीङादियोगे पञ्चमीं ज्ञापयति "आख्यातोपयोगे"[४] इति सूत्रम्। आख्याता वक्ता आख्याफले उपयोगे सति अपादानसंज्ञः स्यादित्यर्थकम्। आख्यानफलं तु शिष्यस्योच्चारणमर्थज्ञानं वा। श्रोतुस्तु पुण्यं अधर्मध्वंसो वा। "उपाध्यायादधीते" इत्यत्राध्ययनं द्विविधमपि पूर्वोक्तम्। पञ्चम्या आख्यानं वाक्यमर्थः। तच्च अध्ययनफले उच्चारणे अर्थप्रतिपादकताज्ञाने वा प्रयोज्यतयान्वेति। उच्चारणफलकं श्रावणमर्थप्रतिपादकताज्ञानफलकं श्रावणं चेति द्विविधमध्ययनमधीङोऽर्थः। उच्चारणं तु वर्णोत्पादकतयोपलक्षितः विवृतादिः प्रयत्नः। आख्याने तु प्रकृत्यर्थस्य कर्तृतयान्वयः। एवम् उपाध्यायकर्तृकवाक्यप्रयोज्यस्योच्चारणस्यार्थप्रतिपादकताज्ञानस्य वा अनुकूलं यत् श्रावणं तदाश्रय इत्यन्वयबोधः।

---

[१] पृ. १२९७

[२] पृ. २५७

[३] पृ. ३५७

[४] सू. १.४.२९

"गरलात् बडवानलाद्वा दाहवदान्यतां शिक्षते" इत्यादौ यदि न हेतुतृतीया-प्रयोगः तदा आख्यानं ज्ञापनम्। तच्च क्रियाकर्तव्यताज्ञानानुकूलव्यापारः पञ्चम्यर्थः प्रयोज्यतया शिक्षणादिफले प्रवृत्तावन्वेति। शिक्षतेस्तु प्रवृत्तिफलकं परकर्तृक-क्रियाया दर्शनं ज्ञानसामान्यं वा अर्थः। बडवानलादेस्तु दाहकर्तृत्वमेव दाहकर्तव्य-ताज्ञानप्रयोजकमिति नानुपपत्तिः। पञ्चम्यर्थे तथाविधव्यापारे प्रकृत्यर्थस्य आधेय-तयान्वयः।

एवं "पाचकात् पाकं शिक्षते, नटात् नाट्यं शिक्षते" इत्यादौ। इत्थं च पक्तव्यमिति पाकाङ्गस्य चुल्लीप्रज्वालनादिकर्मणः प्रदर्शनस्वरूपः पाचकव्यापारः पाककर्तव्यताज्ञानं जनयति। तथाविधज्ञानं तु पाकप्रवृत्तिप्रयोजकमिति। इत्थं नटनीयमिति नाट्याङ्गस्याङ्गुलिचेष्टादिकर्मणः प्रदर्शनस्वरूपो नटव्यापारः नाट्ये कर्तव्यताज्ञानं तच्च प्रवृत्तिं जनयतीत्येवमन्यत्राप्यूह्यम्। तथा च पाचकवृत्तिः कर्तव्यताज्ञापनस्वरूपो यो व्यापारः तत्प्रयोज्यायाः पाकसाध्यिकायाः प्रवृत्तेः अनुकूलं यत् परकर्तृपाकस्य दर्शनं ज्ञानसामान्यं वा तदाश्रयः इति बोधः। एवं नटवृत्तितथाविधव्यापारप्रयोज्यायाः नाट्यसाध्यिकायाः प्रवृत्तेरनुकूलं यत् अन्य-कर्तृकनाट्यदर्शनं तदाश्रय इति बोधः।

एवं "पण्डितात् पुराणं शृणोति" इत्यादौ लक्षणपञ्चकोपेतमार्षवाक्यं पुराणम्। पञ्चम्या आख्यानवाक्यमर्थः प्रयोज्यतया धात्वर्थे श्रवणेऽन्वेति। तथा च पण्डित-कर्तृकवाक्यप्रयोज्यं यत् पुराणकर्मकश्रवणं तदाश्रय इति बोधः।

अत्रोपयोगः पुण्यजनकत्वमधर्मध्वंसजनकत्वं वा श्रवणे स्वरूपसत् अपेक्षि-तम्। तस्य तु बोधः पञ्चमीसाधुत्वार्थमानान्तरेणैवेति। यत्र नेदृश उपयोगस्तत्र न पञ्चमी, यथा 'नटस्य शृणोति' इत्यादौ। अत एव "उपयोग इति किम्। नटस्य शृणोति" इति काशिका। "पिकाद्वने शृणोति" इत्यादौ हेतौ पञ्चमी। अत एव हेतुपञ्चम्या गतार्थता (न) संभवति। पुण्यजनकत्वाद्युपयोगप्रतीतिजनकतया सार्थ-कत्वात्।

एतेन "पण्डितात् पुराणं शृणोति, उपाध्यायात् वेदमधीते" इत्यादावुच्चारणा-धीनत्वं पञ्चम्यर्थः। प्रकृत्यर्थस्य कर्तृतया उच्चारणेऽन्वयः। उच्चारणाधीनत्वं श्रवणे, उच्चारणे अर्थपरत्वज्ञाने वाध्ययनेऽन्वेतीत्यपि निरस्तम्।

"नटस्य शृणोति" इत्यत्र पञ्चम्यापत्तेः। नटोच्चारणाधीनत्वस्य श्रवणे सत्त्वात्। एवम् "उपाध्यायाद्वेदं शृणोति" इत्यत्र श्रवणस्योच्चारणजनकत्वमपि शिष्योपयोगः। पुण्यजनकत्वमेव शिष्यान्योपयोग इति।

भाट्टरहस्ये[१]

नियमपूर्वकविद्यास्वीकारे वक्ता अपादानसंज्ञः स्यात् इत्यर्थकेन "आख्यातोपयोगे"[२] इति सूत्रेण उपाध्यायादधीते इत्यत्र पञ्चमी। अत्र उच्चारणोत्तरकालीनमनभ्यस्तोच्चारणं धात्वर्थः। वृत्तित्वं पञ्चम्यर्थः। इदमपि सूत्रं भाष्यकारेण प्रत्याख्यातम्। उच्चारणक्रियाजन्यशब्दजनकस्वसमानजातीयशब्दानामुपाध्यायमुखनिस्सृतत्वेन उपाध्यायस्य क्रियाजन्यविभागाश्रयत्वात् 'ध्रुवमपाये०'[३] इति सूत्रेणैव तत्सिद्धेः।

न चैवंविधस्य विभागस्य मुख्यविभागत्वाभावात् नैकविधत्वमपादानत्वस्येति वाच्यम्। नानाविधानामेवंजातीयकानामपादानत्वानां व्यापकीभूते अखण्डोपाधिरूपे अपादानत्वे एव तात्पर्यात्। अत एव एवंविधाः प्रयोगाः सर्वे शक्ता एवेत्यपि शक्यं वक्तुम्। तज्ज्ञापनमेव च प्रत्याख्यानफलम्। तथाविधतत्तद्रूपेण निरूढलक्षणया बोधसिद्ध्यर्थं तत्तत्सूत्राणीति मत्वा अस्माभिरन्यैश्च तत्तत्सूत्राणि व्याख्यायन्त इति खण्डदेवैः प्रतिपादितम्।

जनिकर्तुः प्रकृतिः[४] इति सूत्रव्याख्यानम्

जायमानस्य हेतुरपादानं स्यात्। "ब्रह्मणः प्रजाः प्रजायन्ते"। ब्रह्मणः इत्यस्य हिरण्यगर्भादित्यर्थः। घटादिषु कुलालादेरिव हिरण्यगर्भस्य प्रजोत्पत्तौ निमित्तकारणत्वमिति भावः। वृत्तिकृन्मतमेतदयुक्तम्। संयोगविश्लेषसत्त्वेन "ध्रुवमपाये०" इत्येव सिद्धत्वात्। अतोऽत्र हेतुशब्दः उपादानकारणपर एव। अत एव भाष्यकैयटयोः "गोमयात् वृश्चिका जायन्ते" "गोलोमाविलोमभ्यो दूर्वा जायन्ते" इत्युदाहृत्य परिणामेषु प्रकृतिद्रव्यावयवानुस्यूतिसत्त्वेऽपि बुद्धिकृतविश्लेषसत्त्वात् "ध्रुवमपाये०" इत्येव सिद्धमिति प्रत्याख्यानं संगच्छते। एवं च "ब्रह्मणः प्रजाः प्रजायन्ते" इत्यत्र ब्रह्मशब्देन मायोपहितमीश्वरचैतन्यमेव विवक्षितम्। तद्धि सर्वकार्योपादानमिति वेदान्तसिद्धान्तः इति बालमनोरमा[५]

---

[१] पृ. १३४
[२] सू. १.४.२९
[३] सू. १.४.२४
[४] सू. १.४.३०
[५] पृ. ४३८

प्रौढमनोरमायां विशेषाः[१]

जननं जनिः उत्पत्तिः। "इञ[इण]जादिभ्यः"[२] इति जनेर्भावे इञ[इण्]। "जनिघसिभ्यामिण्"[३] इत्युणादिसूत्रेण इण् वा। "जनिवध्योश्च"[४] इति वृद्धिप्रतिषेधः। तस्याः कर्तेति शेषषष्ठ्या समासः। तथा च धात्वन्तरयोगेऽपि भवति। "अङ्गादङ्गात् संभवसि" इति यथा। तदेतदाह — जायमानस्येति।

एतेन "इक्श्तिपौ धातुर्निदेशे"[५] इति इका निर्देशोऽयमित्याश्रित्य "गमहन०"[६] इत्युपधालोपं, धातुं प्रति कर्तृत्वाभाव इत्यर्थासंगतिं, "तृजकाभ्यां०"[७] इति निषेधात् समासानुपपत्तिं चोद्भावयन्तो मीमांसावार्तिककाराः समाहिता इति भावः।

इह सूत्रे प्रकृतिग्रहणं हेतुमात्रपरमिति वृत्तिकृन्मतम्, "पुत्रात् प्रमोदो जायते" इत्युदाहरणात्। उपादानमात्रपरमिति तु भाष्यकैयटमतम्। तस्मात् उभयसाधारणमुदाहरणमाह — ब्रह्मण इति। ब्रह्मा हिरण्यगर्भः स च हेतुमात्रं न तूपादानमिति वृत्तिकृन्मते। ब्रह्म मायाशबलमीश्वरचैतन्यम्। तद्धि सर्वकार्योपादानम् इति वेदान्तसिद्धान्तः इति भाष्यमते। तथा हि भाष्यम् — अयमपि योगः शक्योऽवक्तुम्। कथं गोमयात् वृश्चिको जायते, गोलोमाविलोमभ्यो दूर्वा जायन्ते। अपक्रामन्ति तास्तेभ्यः — इति।

अत्रापक्रामन्तीति प्रतीकमुपादाय — लोकप्रसिद्ध्याश्रयणेनैतदुच्यते। लोके यद्यस्मात् जायते तत् तस्मान्निर्गच्छति — इति कैयटेन व्याख्यातम् यदि प्रकृतिशब्दः कारणमात्रपरः स्यात् तदा दण्डादिनिमित्तकारणवाचकादपि सूत्रसत्त्वे पञ्चमी स्यात्। प्रत्याख्यानपक्षे तु ततः कार्यस्य निर्गमाभावात्। प्रत्याख्यानविरोधः स्पष्ट एवेति सूत्रे प्रकृतिशब्दः उपादानकारणमात्रपर इति लभ्यते।

भाष्यकैयटमतमेव युक्तम्। प्रकृतिशब्दस्योपादानकारणे एव प्रसिद्धेः। किं च वृत्तिमते कारके इत्यधिकृतस्य कारणसामान्यवाचिनः निर्धारणसप्तम्यन्तस्यान्वयोऽसंभवी। न हि कारणानां मध्ये उपादानकारणमितिवत् कारणानां मध्ये कारणमिति संभवति इति शब्दरत्ने।[८]

---

[१] पृ. ९२४

[२] वा. २२३०, सू. ३.३.१०८/३२८५

[३] उणादि. ५६९

[४] सू. ७.३.३५

[५] वा. २२२६

[६] सू. ६.४.९८

[७] सू. २.२.१५

[८] पृ. ९२५

ननु यदि, प्रकृतिशब्द उपादानकारणमात्रपरः तर्हि 'पुत्रात् प्रमोदो जायत' इत्याद्युदाहरणानां का गतिः इति चेत् पुत्रे उपादानत्वारोपेणेति गृहाण। कारकाधिकारेऽस्य पाठकरणेन यथा न सूत्रजन्यशाब्दबोधानुपपत्तिः तथैवार्थकल्पना उचितेति भावः इति भैरवी।[१]

लघुमञ्जूषायाम्[२]

"ब्रह्मणः प्रजाः प्रजायन्ते"। उपादानकारणमत्रापादानम्। "जनिकर्तुः प्रकृतिः"[३] इति सूत्रात्। प्रकृतिः उपादानकारणम्। ब्रह्मापादानिका [ब्रह्मोपादानिका] प्रजाकर्तृका उत्पत्तिः इति बोधः। ब्रह्मणो निस्सरमाणा जायन्त इत्यर्थः। निस्सरणं लोकप्रसिद्धम्। यत् यस्माज्जायते तत् निर्गच्छतीति लोकव्यवहारात्। स च व्यवहार उपादानकारण एवेति भाष्यसंमतम्। "पुत्रात् प्रमोदो जायते" इत्यादौ उपादानत्वारोपेणापादानत्वं बोध्यम् इत्युक्तम्।

"विभाषा गुणेऽस्त्रियाम्"[४] इत्यत्र विभाषेति योगविभागात् हेतौ...पञ्चमीति बृहन्मञ्जूषा[५] —

शब्दशक्तिप्रकाशिकायाम्[६]

"धर्मादुत्पद्यते सुखम्" "दण्डात् जायते घटः" इत्यादौ धातुना स्वाधिकरणसमयध्वंसानधिकरणसमयसंबन्धरूपः तत्तत्समयवृत्तिध्वंसप्रतियोगिसमयावृत्तित्वे सति तत्तत्समयसंबन्धरूप एव वा उत्पादः प्रत्याय्यते। पञ्चम्या च उत्पादान्वयि जन्यत्वं बोध्यते। तथा च धर्मजन्यः यः स्वाधिकरणसमयसंबन्धः तद्वत् सुखम्, दण्डजन्यः यः स्वाधिकरणसमयसंबन्धः तद्वान् घटः इत्याकारकस्तत्र बोधः। स्वं = सुखम्, घटश्च।

वार्तिककृतस्तु — 'उत्पद्यत' इत्यादौ प्रागभावप्रतियोगितारूपमेवोत्पत्तिमत्त्वं धात्वर्थः। तत्र च तिङर्थस्य वर्तमानादिकालस्य अवच्छेद्यतासंबन्धेनान्वयात् भाविनि 'उत्पद्यते' इत्यादिको न प्रयोगः। तथा च प्रयोज्यत्वं पञ्चम्यर्थः। धर्मजन्यवर्तमानकालावच्छिन्नप्रागभावप्रतियोगित्ववत् सुखम् इति बोधः। भाविनि

---

१ पृ. ९२५
२ पृ. १२९७
३ सू. १.४.३०
४ सू. २.३.२५
५ पृ. १८७
६ पृ. ३०२

तु 'उत्पत्स्यत' इति प्रयोगः न तु 'उत्पद्यत' इति। तत्र भविष्यत्कालावच्छेद्यस्यैव प्रागभावप्रतियोगित्वस्य सत्त्वेन वर्तमानकालावच्छेद्यस्य तस्यासत्त्वात्।

न चैवं प्रागभावप्रतियोगित्वस्य धर्माद्यजन्यत्वात् धर्मादुत्पद्यते सुखमित्यादेः अयोग्यतापत्तिरिति वाच्यम्। सुखादेः आद्यक्षणसंबन्धरूपायामप्युत्पत्तौ धर्मादिजन्यत्वे प्रमाणाभावेन उक्तदोषस्य मतान्तरेप्यविशिष्टत्वात्। आद्यक्षणसंबन्धस्य धर्माद्यजन्यत्वेऽपि तदधीनत्वोपगमेन पञ्चमीसमर्थने प्रागभावप्रतियोगित्वरूपायामप्युत्पत्तौ तदधीनत्वस्य सुवचत्वात् इति तर्कालंकाराः प्राहुः।

व्युत्पत्तिवादे[१]

"मृत्पिण्डात् घटो जायते" इत्यादौ "जनिकर्तुः प्रकृतिः"[२] इत्यनेनापादानत्वम्। तत्र प्रकृतित्वं न विकारित्वम्। प्रकृतिविकृतिभावाभावेऽपि "प्राक्केकयीतो भरतस्ततोऽभूत्, वायोर्जातः" इत्यादौ पञ्चमीदर्शनात्। न हि सुतवपुषः मातापितृशरीरविकारत्वम्, अपि तु तदीयशुक्रशोणितादिविकृतित्वमेव। शुक्रशोणितादेः शरीरस्थत्वेऽपि मलमूत्रादेरिव शरीरावयवत्वाभावात्।

न च तत्र हेतुपञ्चम्येव, नापादानपञ्चमीति वाच्यम्। गुणातिरिक्तहेतौ पञ्चम्यनुशासनविरहात्। अन्यथा "दुग्धात् दधि जायते, मृत्तिकाभ्यो घटो जायते, शृङ्गात् धनुर्जायते" इत्यादावपि हेतुपञ्चम्यैवोपपत्तौ "जनिकर्तुः प्रकृतिः" इति सूत्रस्यैव वैयर्थ्यापत्तेः। तस्मात् कारणत्वमेव प्रकृतित्वम्। मृत्पिण्डकारणकोत्पत्त्याश्रयो घट इति बोधः। "दण्डात् घटो जायते" इत्यादयोऽपि प्रयोगा इष्यन्त एव।

अत एवेश्वरस्य द्रव्यादिकार्याप्रकृतित्वेऽपि "यतो द्रव्यं गुणाः कर्म" इत्यादौ पञ्चमी। ईश्वरस्य द्रव्यादिकारणत्वेऽपि द्रव्यादिविकारित्वाभावात्।

न च प्रकृतिपदेन कारणमात्रविवक्षायामपि क्रियाविवक्षाभावात् अपादानपञ्चम्यनुपपत्तिः। हेतुपञ्चमी च प्रकृतेऽनुपपन्नैवेति वाच्यम्। अगत्या तत्र जायत इत्यादिक्रियाध्याहारेण पञ्चम्या उपपादनीयत्वात् इति भट्टाचार्याः।

अत्र प्रकाशः[३]

इदं त्ववधेयम् — "यतो द्रव्यं गुणाः कर्म तथा जातिः परापरा" इत्यत्र जायते इत्यध्याहर्तुमशक्यम्, जातेर्नित्यत्वात्। अतोऽत्र हेतुपञ्चम्येव। न चैवमनुपपत्ति-

---

[१] पृ. २५७

[२] सू. १.४.३०

[३] व्यु.व्या.प्र.पृ. २५७

स्तदवस्था। उत्पादकत्वं ज्ञापकत्वं चेति द्विविधमेव हि हेतुत्वम् यथायोग्यं विवक्षितम्। एवं चात्र प्रकृतित्वं न कारणत्वमात्रम्, किं तु समवायिकारणत्वमेव। तथा च "तन्तुभ्यः पटो जायते" इत्यत्र पञ्चम्याः समवायावच्छिन्नत्वमर्थः। समवाये प्रकृत्यर्थः निरूपितत्वसंबन्धेनान्वेति। समवायावच्छिन्नत्वं जन्यत्वरूपे धात्वर्थे स्वरूपसंबन्धेनान्वेति। तथा च तन्तुनिरूपितसमवायसंबन्धावच्छिन्न-जन्यत्वाश्रयः पट इति बोधः। "दण्डात् घटो जायते" इत्यादौ तु हेतुपञ्चम्येवेति वदन्ति।

पदवाक्यरत्नाकरे[१]

प्रकृतौ च जनेः कर्तुरपादानत्वमिष्यते। "ब्रह्मणः प्रजाः प्रजायन्ते" इत्यत्र जनेः उत्पत्तेः कर्त्र्यः याः प्रजाः तन्निरूपितं प्रकृतित्वमुपादानत्वं वा ब्रह्मणः प्रतीयते। धात्वन्तरोपात्तायामप्युत्पत्तावेवम्। अत एव —

अङ्गादङ्गात् संभवसि हृदयादभिजायसे।
आत्मा वै पुत्रनामासि त्वं जीव शरदः शतम्।।

इति श्रुतिः। अत्र व्याख्याकारः — प्रकृतित्वस्य विकारित्वरूपत्वे "रघोरजोऽजायत" इत्यादौ "ब्रह्मणः प्रजाः प्रजायन्ते" इत्यादौ च पञ्चम्यनुपपत्तिप्रसङ्गः। सुतादिशरीरस्य पित्रादिशरीरविकृतित्वाभावात् तदीयशुक्रशोणितादिविकृतित्वस्यैव तत्र सत्त्वात्। शुक्रशोणितादीनां मलमूत्रादेरिव शरीरावयवत्वाभावात् तदवयवारभ्यत्वस्यैव तद्विकाररूपत्वात्। एवं ब्रह्मणो निमित्तकारणत्वादेव प्रकृतित्वविरहः। तस्मात् कारणत्वसामान्यमेव तदिति केचिदाहुः। तन्न सुन्दरम्। पुत्रस्य पितृविकृतित्वानपायात्। न हि मलमूत्रादिसदृशं शुक्रशोणितादि, पित्रोरारम्भकत्वात्। अत एव — "षाट्कौशिकं शरीरं त्रीणि मातृतस्त्रीणि पितृतः। त्वङ्मांसरुधिराणि मातृतः, अस्थिस्नायुमज्ज्ञानः पितृतः" — इति श्रूयते। तस्मात् विद्यमाननाशप्रतियोगित्वं प्रकृतित्वम्। न च खण्डपटस्य महापटजन्यत्वात् महापटः खण्डपटस्य प्रकृतिरिति व्यवहारः स्यादिति वाच्यम्। समवायिकारण-निष्ठनष्टजातीयत्वस्य प्रकृतित्वात्। महापटस्य खण्डपटसमवायिकारणत्वविरहात्। "तन्तुभ्यः पटः" इत्यादौ तु हेतुपञ्चमी।

अपादानपञ्चमी तु "मृत्पिण्डात् घटो जायते" इत्यादौ। तत्र नष्टपिण्डजातीयाया मृदः घटसमवायिकारणत्वात्। साजात्यं च येन रूपेण प्रकृतित्वं तेन रूपेण

---

[१] पृ. ७७१

बोध्यम्। अतो द्रव्यत्वादिना तन्त्वादेर्महापटादिसाजात्येऽपि न प्रकृतित्वम्। द्रव्यत्वादेः प्रकृतितानवच्छेदकत्वात् इत्याशयेन उपादानत्वं वेत्युक्तम्।

सूत्रे जनिपदमुत्पत्तिपरं, न तु जनिधातुपरमित्याशयेनाह — धात्वन्तरेति। उत्पत्त्यर्थकसंभवत्यादियोग इत्यर्थः। अन्ये तु संभवत्यादियोगे "विभाषा गुणेऽस्त्रियाम्"[१] इति सूत्रेण हेतौ पञ्चमी। तथा च सूत्रे जनिपदं जनिधातुबोध्योत्पत्तिपरमेवेत्याहुः। — इति।

विभक्त्यर्थनिर्णये[२]

जन्यादिधातुयोगे पञ्चमीं ज्ञापयति "जनिकर्तुः प्रकृतिः"[३] इति सूत्रम्। जनिकर्तुः उत्पत्त्याश्रयस्य प्रकृतिः समवायिकारणमपादानसंज्ञं भवतीत्यर्थकम्। अत्र "शृङ्गात् शरो जायते" इति प्रयोगः।

अत्र गौडाः — प्रकृतित्वं न विकारित्वम्। प्रकृतिविकृतिभावविरहेऽपि "रघोरजोऽजायत" इत्यादौ पञ्चमी। न च सुतवपुषः पित्रोः शरीरविकृतित्वमपि। तदीयशुक्रशोणितविकृतित्वमेव। शुक्रशोणितादेः शरीरत्वेऽपि मलमूत्रादेरिव शरीरावयवत्वाभावात्। तदवयवारभ्यत्वस्यैव तद्विकारतारूपत्वात्। न चात्र हेतौ पञ्चमी न त्वपादानत्व इति वाच्यम्। ऋणगुणातिरिक्तहेतौ पञ्चम्यनुशासनविरहात्। अन्यथा हेतुपञ्चम्यैवोपपत्तौ जनिकर्तुरिति सूत्रस्य वैयर्थ्यापत्तेः। तस्मात् कारणत्वमेव प्रकृतित्वम्। "दण्डात् घटो जायते" इत्यादयः प्रयोगा इष्यन्त एव। अत एवेश्वरस्य कार्याप्रकृतित्वेऽपि यतो द्रव्यं गुणाः कर्मेत्यादौ पञ्चमी। न चात्र क्रियायोगाभावात् कथमपादानपञ्चमीति वाच्यम्। 'अगत्या जायत' इत्यादिक्रियाध्याहारेण पञ्चम्या उपपादनीयत्वात्। निरूप्यत्वं पञ्चम्यर्थः शृङ्गादिविशिष्टं धात्वर्थे जन्यादावन्वेति इत्याहुः। शृङ्गनिरूपितजन्यत्वाश्रयाः शराः।

तन्न सुन्दरम्। पुत्रस्य पितृविकृतित्वात्। न हि मलमूत्रादिसदृशं शुक्रशोणितादि, पित्रोरारम्भकत्वात्। अत एव षाट्कौशिकं शरीरम्। त्रीणि मातृतः त्रीणि पितृतः त्वङ्मासरुधिराणि मातृतः अस्थिस्नायुमज्ञानः पितृतः इति।

यदपि ऋणगुणातिरिक्ते हेतौ न पञ्चमीति। तदपि दाहो दहनान्न तु जलादित्यादेः निजशिरोमणिवचनस्य विरुद्धम्। दर्शयिष्यमाणपञ्चम्यनुशासनतया अकिंचित्करमेव। अत एव — "यतो द्रव्यं गुणाः कर्म तथा जातिः परापराः" इत्यत्र जायत

---

[१] सू. २.३.२५
[२] पृ. ३५९
[३] सू. १.४.३०

इत्यध्याहारेण पञ्चम्युपपादनमप्ययुक्तम्। जायत इत्यध्याहारेण जातिरित्यादावन्वयासंभवात्। हेतुपञ्चम्यैवोपपत्तेः।

अत एवोत्पादकत्वं ज्ञापकत्वं चेति द्विविधमत्र हेतुत्वं यथायोग्यमिति प्रकाशे महामहोपाध्यायचरणाः।

तस्मात् प्रकृतित्वं समवायिहेतुत्वम्। तथा च पञ्चम्याः समवायावच्छिन्नत्वमर्थः। तत्र प्रकृत्यर्थस्य समवाये निरूपकतयान्वयः। समवायावच्छिन्नत्वस्य जन्यादिधात्वर्थे जन्यत्वेऽन्वयः। एवं च "तन्तुभ्यः पटः, कपालेभ्यो घटः, शृङ्गाच्छरो वा जायते" इत्यादौ तन्तुनिरूपितसमवायावच्छिन्नजन्यत्वाश्रयः पट इत्यादिरन्वयबोधः।

यदि च विकारित्वमेव प्रकृतित्वम्। तच्च विद्यमाननाशप्रतियोगित्वम्। अन्यथा रूपस्य घटः प्रकृतिः इति प्रयोगापत्तेः। न च तथापि महापटः खण्डपटस्य प्रकृतिः इति प्रयोगापत्तिरिति वाच्यम्। समवायिहेतोः नष्टजातीयत्वस्य तथात्वात्। न हि महापटः समवायिहेतुः इति।

एवं "तन्तुभ्यः पटः" इति नापादानपञ्चमी। किं तु "मृत्पिण्डात् घटो जायते" इत्यादौ नष्टपिण्डजातीयमृदः घटारम्भकत्वात्। येन रूपेण प्रकृतित्वं तेन रूपेण साजात्यं बोध्यम्। अतो द्रव्यत्वादिना तत्त्वादेः नष्टमहापटादिसाजात्येऽपि न प्रकृतित्वम्। द्रव्यत्वादेः प्रकृतित्वानवच्छेदकत्वात्। पुत्रस्य शुक्रशोणितनाशजन्यत्वेऽपि पितरौ न प्रकृतिः। पित्रादिगतचैत्रत्वादिजातेरवयविमात्रवृत्तितया शुक्राद्यवृत्तित्वात्। एवं "दध्नः दुग्धं, शरस्य शृङ्गं, भस्मनः काष्ठं प्रकृतिः" इत्यादौ दुग्धपरमाणूनां दुग्धत्वेन नष्टदुग्धसाजात्यं शृङ्गावयवस्य शृङ्गत्वेन नष्टशृङ्गसाजात्यं काष्ठपरमाणूनां काष्ठत्वेन नष्टकाष्ठसाजात्यं दुग्धत्वादिजातेरवयवावयविवृत्तित्वात् भवत्युपपत्तिः इति विभाव्यते —

तदा पञ्चम्याः स्वप्रकृत्यर्थतावच्छेदकत्वोपलक्षितजातिमत्प्रतियोगिको नाशोऽर्थः। तत्र प्रकृत्यर्थस्याधेयतयान्वयः। तथाविधनाशस्तु प्रयोज्यतया जन्यादिधात्वर्थे उत्पत्तावन्वेति।

एवं "दुग्धात् दधि भवति, काष्ठात् भस्म भवति, शृङ्गाच्छरो जायते, गोमयात् वृश्चिक उत्पद्यते, पाषाणात् भेको भवति" इत्यादौ दुग्धवृत्तिदुग्धनाशप्रयोज्योत्पत्त्याश्रयो दधीत्यादिरन्वयबोधः।

अत एव हेतुपञ्चम्या नास्य सूत्रस्य गतार्थत्वम्। नाशप्रयोज्यत्वस्वरूपविलक्षणार्थप्रतिपत्तिफलकत्वात्। एतेन यदत्र "ब्रह्मणः प्रजाः प्रजायन्ते" इत्याद्यु-

दाहरणं हेतुपञ्चम्याः (गतार्थत्वात्) सूत्रं प्रत्याख्यातमिति निरस्तम्। उदाहरणस्य दर्शितत्वात्। ब्रह्मण इत्यादिरत्रोदाहरणप्रयोगः सूत्रार्थानभिज्ञानविजृम्भितः।

अङ्गादङ्गात् संभवसि हृदयादभिजायसे।
आत्मा वै पुत्रनामासि त्वं जीव शरदः शतम्।।

इति श्रुतौ तु नापादानपञ्चमी। किं तु हेतुपञ्चमी।

भुवः प्रभवः[१] इति सूत्रार्थः

पूर्वसूत्रे "जनिकर्तुः प्रकृतिः"[२] इत्यत्र समासनिर्दिष्टमपि कर्तृपदमेकदेशे स्वरितत्वप्रतिज्ञाबलात् इहानुवर्तते। भवनं भूः। प्रभवति प्रथमं प्रकाशतेऽस्मिन्निति प्रभवः, प्रथमप्रकाशस्थानमित्यर्थः। भवनकर्तुः प्रथमप्रकाशस्थानमपादानसंज्ञकं स्यादिति सूत्रार्थः। "हिमवतो गङ्गा प्रभवति"। गङ्गा हिमालये प्रथमं प्रकाशत इत्यर्थः।

प्रथमप्रकाशोऽत्र धात्वर्थः। तदाधारो हिमवदादिरत्रापादानम्। हिमवदपादानको गङ्गाकर्तृकः प्रथमप्रकाश इति बोधः। हिमवतो निस्सरमाणा प्रकाशत इति वा अर्थः। प्रभवतेः प्रथमः प्रकाशोऽर्थः। हिमवद्धेतुकः गङ्गाकर्तृकः प्रथमः प्रकाश इत्यर्थः। हेतुः पञ्चम्यर्थः। भुवः प्रभवः इति सूत्रस्वरसात्। प्रभवत्यस्मादिति हि तत्र प्रभवः।[३]

कारकचक्रे[४]

"हिमवतो गङ्गा प्रभवति" इत्यादौ न पञ्चम्या हेतुत्वं धातुना च उत्पत्तिः प्रत्याय्यते। तथा सति "जनिकर्तुः प्रकृतिः"[५] इत्यत एव उपपत्तौ "भुवः प्रभवः"[६] इति सूत्रप्रणयनवैयर्थ्यात्। किं तु प्रकर्षेण भवनं प्रभवनं प्रकाशः, आद्यबहिस्संयोग इति यावत्। स एव धात्वर्थः। बहिः पदार्थः प्रकृते भूमण्डलमेव। पञ्चम्यर्थः संयोगध्वंसाव्यवहितोत्तरक्षणवृत्तित्वम्। आख्यातार्थः आश्रयत्वम्। तथा च हिमवत्संयोगध्वंसाव्यवहितोत्तरक्षणवृत्त्याद्यपृथिवीसंयोगाश्रयतावती गङ्गा इत्यन्वयबोधः।

---

[१] सू. १.४.३१
[२] सू. १.४.३०
[३] बृ.म.पृ. १८७
[४] पृ. ७३
[५] सू. १.४.३०
[६] सू. १.४.३१

'वैकुण्ठात् काशीतो वा गङ्गा प्रभवति' इत्यप्रयोगात् अव्यवहितेति आद्येति च विशेषणम्। वैकुण्ठसंयोगध्वंसाव्यवहितोत्तरक्षणे भूसंबन्धस्याभावात्, काशीसंयोगध्वंसाव्यवहितोत्तरक्षणे चाद्यस्य भूसंबन्धस्याभावान्न तथा प्रयोगः।

"वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य" इत्यादावप्ययमेवार्थः। परं तु तत्र वल्मीकाग्रदेशो बहिःपदार्थ इति विशेषः। तथा च वल्मीकाग्रसंयोगध्वंसाव्यवहितोत्तरक्षणवर्त्याद्यवल्मीकाग्रोर्ध्वदेशसंयोगाश्रयो धनुःखण्डमित्यन्वयबोधः इत्युक्तम्।

शब्दशक्तिप्रकाशिकायाम्[१]

"वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य" इत्यत्र धातोरर्थः प्राक् प्रकाशनम्। तत्र पञ्चम्या अधिकरणत्वमाधेयत्वं वा अर्थः। "भुवः प्रभवः"[२] इति सूत्रेणाधिकरणस्यैवापादानत्वोपदेशात्। एवं च वल्मीकाग्रवृत्तिप्रथमप्रकाशनवत् आखण्डलस्य धनुःखण्डमित्याकारकस्तत्र बोधः। वल्मीकः — सातपो मेघः। आखण्डलः — शक्रः। "वल्मीकाग्रे आविर्भवति" इत्यादौ च प्रकाशपर्यवसितोऽप्याविर्भावः न प्रपूर्वस्य भवतेरर्थ इति तत्राधिकरणतायां सप्तम्येव प्रमाणम् — इत्युक्तम्।

व्युत्पत्तिवादे[३]

"हिमवतो गङ्गा प्रभवति" इत्यादौ "भुवः प्रभवः"[४] इत्यनेनापादानता। यत्संबन्धात् प्रभवनं प्रथमप्रकाशः स प्रभवः। प्रथमप्रकाश एव प्रभवत्यर्थः। पञ्चम्यर्थः संबन्धाधीनत्वम्, तादृशक्रियायामन्वेति। संबन्धे च प्रकृत्यर्थस्य हिमवतोऽन्वयः। हिमवत्संबन्धाधीनप्रथमप्रकाशाश्रयः गङ्गा इत्यन्वय बोधः।

पदवाक्यरत्नाकरे[५]

"हिमवतो गङ्गा प्रभवति" इत्यत्र प्रभवतिः प्रकाशपर्यायः। प्रकाशस्तु दर्शनयोग्यत्वाभावावच्छेदकदेशाव्यवहितदेशावच्छेदेन दर्शनयोग्यत्वम्। द्वितीयदेशान्वयि तादात्म्यं पञ्चम्यर्थः। तथा च हिमवदभिन्नो यः दर्शनयोग्यत्वाभावावच्छेदकदेशाव्यवहितदेशः तद्दर्शनयोग्यतावती गङ्गेति वाक्यार्थः इत्याहुः।

---

[१] पृ. ३०१-३०२
[२] सू. १.४.३१
[३] पृ. २५७
[४] सू. १.४.३१
[५] पृ. ७७१

विभक्त्यर्थनिर्णये[१]

प्रभवतियोगे पञ्चमीं ज्ञापयति "भुवः प्रभवः"[२] इति सूत्रम्। भवनं भूः। भुवः कर्तुः प्रभवो योऽर्थः तत् कारकमपादनसंज्ञं भवतीत्यर्थकम्। प्रभवः प्रकाशनाधिकरणम्। भवनं प्रथमप्रकाशः। "हिमवतो गङ्गा प्रभवति" इत्यत्र पञ्चम्या अधिकरणमाधेयत्वं वा अर्थः प्रभवत्यर्थे प्रथमप्रकाशेऽन्वेति हिमवद्वृत्तिप्रथमप्रकाशवती गङ्गेत्यन्वयबोध इति वदन्ति। संबन्धाधीनत्वं पञ्चम्यर्थः धात्वर्थे प्रथमप्रकाशेऽन्वेतीत्यन्ये।

दर्शनयोग्यत्वाभावावच्छेदकदेशाव्यवहितदेशावच्छेदेन दर्शनयोग्यत्वं प्रकाशः प्रभवत्यर्थः। द्वितीयदेशान्वयि तादात्म्यं पञ्चम्यर्थः। तथा च हिमवदभिन्नो यो दर्शनयोग्यत्वाभावावच्छेदकदेशः तदवच्छिन्नदर्शनयोग्यतावती गङ्गेति वाक्यार्थ इति गुरुचरणाः।

वस्तुतस्तु प्रथमप्रकाशः पञ्चम्यर्थो न संभवति। प्रकाशे दर्शनस्वरूपे ज्ञानसामान्यस्वरूपे वा प्रथमत्वस्यासंभवात्। तथा हि तत्प्रागभावाधिकरणसमयवर्तित्वं तत्प्रथमत्वम्। तच्च प्रकृते न संभवति। हिमवदन्यदेशे प्रकाशस्यापि प्रकाशान्तरप्रागभावाधिकरणसमयवर्तित्वात्। न चात्र सजातीयाधिकरणसमयध्वंसानधिकरणसमयवर्तित्वं प्रथमत्वम्। तच्च प्रथमप्रकाश एव। द्वितीयादिप्रकाशस्य प्रथमप्रकाशाधिकरणसमयध्वंसाधिकरणसमयवर्तित्वात् न तत्त्वमिति वाच्यम्। दर्शनस्वरूपाणां ज्ञानस्वरूपाणां वा प्रकाशानामनादौ संसारे दर्शनाधिकरणसमयध्वंसाधिकरणसमयवर्तित्वात् तत्प्राथम्याप्रसिद्धेः।

न च गङ्गाविषयकत्वेन प्रकाशस्य साजात्यं विवक्षणीयम्। अतो नाप्रसिद्धिरिति वाच्यम्। हिमवद्गङ्गासंबन्धात् प्राग्वर्तिनां जनानां गङ्गोपनीतभानादिसंभवात् अप्रसिद्धितादवस्थ्यात्। प्रकाशस्याननुगमापत्तेश्च।

तस्मात् प्रथमावयवावच्छेदेन लौकिकं चाक्षुषं प्रत्यक्षं वा प्रकाशः। प्रथमत्वमवयवानां तु स्वारभ्यारम्भकावयवाधिकरणसमयध्वंसानधिकरणसमयवर्तित्वम्। इदमेव मूलत्वम्। हैमवतश्च गङ्गावयवस्य स्वोत्पादकसमयवर्तितया तथात्वम्। देशान्तरीयस्य तु हैमवताधिकरणसमयध्वंसाधिकरणसमयवर्तितया न तथात्वम्। एवं वृक्षमूलस्यापि मध्यशाखाद्यपेक्षया प्रथमत्वम्। एवं च "हिमवतो गङ्गा प्रभवति" इत्यत्र दर्शितः प्रकाशः प्रभवत्यर्थः। विषयत्वस्वरूपं कर्तृत्वं

---

[१] पृ. ३६१
[२] सू. १.४.३१

तिङर्थः। पञ्चम्याः प्रकाशान्वयिकर्तृत्वघटितसंबन्धावच्छिन्नमाधेयत्वमर्थः। तथा च हिमवद्वृत्तेः प्रथमावयवावच्छिन्नस्य लौकिकस्य चाक्षुषस्य प्रत्यक्षस्य वा विषयो गङ्गेत्यन्वयबोधः। दर्शिते प्रभवत्यर्थे प्रथमत्वमवयवे एव विवक्षितम्। अतो "हिमवतो गङ्गा प्रभवति, काश्मीरेभ्यो वितस्ता प्रभवति"। प्रथमत उपलभ्यत इत्यर्थ इति काशिका। अत्र प्रथमत्वस्य धात्वर्थविशेषणत्वे प्रथममिति स्यात्, न तु तस्यन्तप्रयोगः। तसेरवच्छिन्नत्वमर्थः। पृष्ठतो गरुडध्वज इति दर्शनात्। अवच्छिन्नत्वं तु प्रकृते स्वरूपसंबन्धविशेषः विषयित्वं वेत्यन्यदेतत्।

अथ वा पञ्चम्या हेतुत्वमर्थः। अत एव प्रभवत्यस्मादिति प्रभव इति काशिका। हेतुत्वं च दैशिकं बोध्यम्। प्रथमावयवाधीनस्य दर्शितप्रकाशस्य प्रयोजकता प्रथमावयवसत्ताप्रयोजकस्य हिमवतः इति। अत एव 'क्षेत्राच्छालिः वृक्षात् पुष्पं वा प्रभवति' इति न प्रयोगः। शालिपुष्पयोः मूलवृत्त्योः प्रथमावयवयोः क्षेत्रवृक्षाभ्यामन्यत्रापि परेणानयने सति संयोगसंभवात् क्षेत्रवृक्षयोः मूलवृत्तिसत्ताप्रयोजकत्वविरहात्। प्रयोजकत्वं तु प्रकृते नियामकत्वं व्यापकत्वमिति यावत्। एवं—

"वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्य" इत्यत्रापि शक्रधनुःखण्डस्य प्रथमावयवसत्तानियामकं वल्मीकाग्रं शक्रधनुःखण्डस्य दर्शितप्रकाशे हेतुः।

"मेघाद्विद्युत्प्रभवतितराम्" इत्यादौ विद्युदादिप्रथमावयवसत्तानियामको मेघादिः दर्शितप्रकारो हेतुरिति।

अत्र प्रभवतिपर्यायस्य आविर्भवत्यादेः योगे न पञ्चमी, किं तु सप्तमी। यथा— वल्मीकाग्रे शक्रधनुः खण्डमाविर्भवति इति केचित्।

वस्तुतस्तु सूत्रे भुव इत्युपादानात् दर्शितप्रकाशार्थकस्य भूधातोर्योगे पञ्चमीति ज्ञायते।

अन्यथा प्रभुवो भव इत्येव मुनिः सूत्रयेत्। प्रभव इत्यत्र प्रशब्दोपादानं भुवो दर्शितप्रकाशार्थकत्वज्ञापनार्थमिति 'वल्मीकादाविर्भवति प्रादुर्भवति वा शक्रधनुः' इत्यादिप्रयोगोऽपीष्ट एव।

अत्र भीत्रार्थानामित्यादिसप्तसूत्री प्रत्याख्याता फणिभाष्यकृद्भिः। तत्र चौरेभ्यो बिभेति भयान्निवर्तते, त्रायते रक्षणेन निवर्तयति, पराजयते ग्लान्या निवर्तते, वारयति प्रवृत्तिं प्रतिबध्नन् निवर्तयति, निलीयते निलयनेन निवर्तते, अधीते उपाध्यायान्निस्सरन्तं शब्दं गृह्णाति, ब्रह्मणः प्रपञ्चो जायते ततो निर्गच्छति, प्रभवति भूत्वा निस्सरति इति धातूनां स्वेच्छया अर्थकल्पनेन शाब्दिकानां प्रत्याख्यानोपपादनं शास्त्रमर्यादालङ्घनफलकं स्वातन्त्र्यमेव।

भाट्टरहस्ये विशेषाः

"भुवः प्रभवः"[१] इत्यनेन प्रकर्षविशिष्टस्य भवनस्य यः कर्ता, तस्य यः प्रभवनप्रतियोगी सोऽपादानसंज्ञकः स्यात् इत्यर्थकेन "हिमवतो गङ्गा प्रभवति" इत्यत्र पञ्चमी। अत्र प्रकर्षः संयोगध्वंसक्षणाव्यवहितोत्तरक्षणवृत्तित्वम्। धात्वर्थश्च एतत्सर्गीयभारतवर्षस्थभूसंयोगध्वंसासमानकालीनस्तादृशभूसंयोगः। प्रतियोगित्वं पञ्चम्यर्थः। तस्य च प्रकर्षार्थसंयोगद्वारा आख्यातार्थेऽन्वयः। आख्यातार्थः आश्रयत्वम्। धातूपसर्गार्थभूतेषु सर्वेषु संयोगेषु गङ्गावृत्तित्वस्यान्वयः। तथा च हिमवत्प्रतियोगिकसंयोगध्वंसक्षणाव्यवहितोत्तरक्षणवृत्त्येतत्सर्गीयभारतवर्षस्थभूगङ्गा संयोगध्वंसासमानकालीनैतत्सर्गीयभारतवर्षस्थभूसंयोगाश्रयत्वं गङ्गावृत्तीति बोधः पर्यवसितः।

अत्र वैकुण्ठसंयोगध्वंसक्षणोत्तरं तादृशभूगङ्गा संयोगस्य आद्यस्य जायमानतया "वैकुण्ठात् भुवि प्रभवति गङ्गा" इति प्रयोगापत्तिः। तद्वारणाय अव्यवहितेति। काशीसंयोगध्वंसाव्यवहितोत्तरक्षणे उक्तविधभूगङ्गासंयोगानां केषांचित् जायमानतया "काशीतो गङ्गा भुवि प्रभवति" इति प्रयोगापत्तिः, तद्वारणाय तादृशसंयोगध्वंसासमानकालीनेति। एवं च आद्यस्यापि संयोगस्य तदव्यवहितपूर्वक्षणवृत्तिवैकुण्ठसंयोगध्वंसाद्यव्यवहितोत्तरत्वात् वैकुण्ठात् प्रभवतीति प्रयोगापत्तेः अनिवारणात् प्रकर्षार्थसंयोगध्वंसक्षणेऽप्याद्यत्वं विशेषणं देयम्।

वस्तुतस्तु "वैकुण्ठात् भुवि प्रभवति" इति प्रयोगस्य इष्टापत्त्यैव परिहर्तुं शक्यत्वात् न तन्निवारणाय पदद्वयदानम्।

विभक्त्यर्थनिर्णये[२] करणे चेत्यादिसूत्रव्याख्यानम्

करणे पञ्चमीं ज्ञापयति — "करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य"[३] इति सूत्रम्। स्तोकाल्पकृच्छ्रकतिपय इत्येतेभ्यः शब्देभ्योऽसत्त्ववचनेभ्यः करणेऽर्थे पञ्चमीविभक्तिर्भवतीत्यर्थकम्। कृच्छ्रशब्दस्य दुःखमर्थः। कतिपयशब्दस्य संख्यात्वावान्तरजातिमती संख्या अर्थः। असत्त्ववचनत्वं द्रव्यवाचिपदासामानाधिकरण्यम्। चकारात् तृतीयापि भवति। "स्तोकेन स्तोकाद्वा, अल्पेन अल्पाद्वा, कृच्छ्रेण कृच्छ्राद्वा, कतिपयेन कतिपयाद्वा मुक्तो मुच्यते वा" इत्यादौ तृतीयापञ्चम्योः करणव्यापारोऽर्थः। स च प्रयोज्यतया धात्वर्थेऽन्वेति।

---

[१] सू. १.४.३१
[२] पृ. ३६४
[३] सू. २.३.३३

व्यापारे प्रकृत्यर्थस्य प्रयोज्यतयान्वयः। तथा च स्तोकप्रयोज्यव्यापारजन्यमोचन-कर्मेत्यादिरन्वयबोधः। बहुतरदाने द्वेषात् अल्पसंख्याया द्वेषानुत्पादद्वारा स्वाश्रय-ज्ञाने प्रयोजकत्वम्। दानं व्यापारः। कृच्छ्रस्य स्वविषयको द्वेषो व्यापारः। द्रव्यवाचकपदसामानाधिकरण्ये न पञ्चमी, यथा "स्तोकेन विषेण हतः" इति।

ल्यब्लोपे पञ्चम्यधिकरणे च[१] इति वार्तिकार्थः

ल्यबन्तस्य लोपे अदर्शने अप्रयोगे सति गम्यमानतदर्थं प्रति कर्मण्यधिकरणे च पञ्चमी वाच्येत्यर्थः। "प्रासादात् प्रेक्षते"। प्रासादमारुह्य प्रेक्षते इत्यर्थः। "आसनात् प्रेक्षते"। आसने उपविश्य प्रेक्षत इत्यर्थः। "श्वशुरात् जिह्रेति"। श्वशुरं वीक्ष्य लज्जत इत्यर्थः। प्रासादकर्मकारोहणोत्तरकालिकं प्रेक्षणं, आसनाधिकरणकोप-वेशोत्तरकालिकं प्रेक्षणमिति रीत्या बोधः। पञ्चम्यर्थः ल्यबन्तक्रियाकर्म वा ल्यबन्तक्रियां प्रति अधिकरणं वा "फलेभ्यो यातीत्यत्रेव बोधप्रक्रिया" इति शेखरे।

लघुमञ्जूषायाम्[२]

"प्रासादात् प्रेक्षते" इत्यादौ तु वाक्यैकदेशन्यायेन बोधः। पञ्चम्यर्थो ल्यबन्तार्थक्रियाकर्म। अयमाशयः — ल्यबन्तरहितेन वाक्येन, समुदायशक्तिमहिम्ना यत्र ल्यबन्तार्थः प्रतीयते तत्र प्रतीयमानवाक्यार्थभूतक्रियान्वयिनोः कर्माधिकरणयोः पञ्चमीति वार्तिकार्थः फलति। प्रासादकर्मकपूर्वकालावच्छिन्नारोहणकर्तृकर्तृकं तद-व्यवहितोत्तरकालिकं प्रेक्षणमिति बोधोदयेन तत्समुदायस्य तत्समुदायार्थे शक्तिः।

"आसनात् प्रेक्षते" इत्यादौ अधिकरणं पञ्चम्यर्थः। आसनाधिकरणक-पूर्वकालावच्छिन्नोपवेशकर्तृकर्तृकं तदव्यवहितोत्तरकालिकं प्रेक्षणमिति बोधः।

प्रासादादितो निस्सरता चक्षुषा तद्वृत्त्या वा प्रेक्षत इत्यर्थः। प्रासादस्थ-पुरुषान्निष्क्रमणमेव प्रासादावधिकत्वेनोपचर्यत इति भाष्यमतम्। एतदुक्तं भवति — प्रेक्षणं चक्षुषा पदार्थानां ज्ञानम्। तैजसं चक्षुः बहिः निस्सृत्य विषयान् गृह्णाति। धातोः निस्सरणाङ्गकं प्रेक्षणमर्थः। तत्राङ्गभूतनिस्सरणं प्रति प्रासादः उपात्त-विषयमपादानं भवति। तथा च प्रासादादिप्रदेशात् चाक्षुषं तेजः प्रसृत्य पदार्थान् गृह्णातीत्यर्थः।

---

[१] वा. १४७४-१४७५, सू. २.३.२८/५८७ म.भा.पृ. ५०५
[२] पृ. १२९८

पदवाक्यरत्नाकरे[1]

अध्याहृतल्यबन्तस्य कर्माधिकरणं तथा।
प्रासादात् पश्यतीत्यादौ विभक्तिर्वक्ति पञ्चमी।।

"प्रासादात् पश्यति, आसनात् प्रेक्षते" इत्यादौ आरुह्य उपविश्य इत्यध्याहार्यम्। अध्याहृतल्यबन्तस्य कर्मण्यधिकरणे च पञ्चमी। प्रासादकर्मकारोहणोत्तरकालिकदर्शनाश्रयः, आसनाधिकरणकोपवेशनोत्तरकालिकप्रेक्षणाश्रयः इति यथाक्रमं बोधः।

विभक्त्यर्थनिर्णये[2]

"ल्यब्लोपे कर्मण्युपसंख्यानम्"[3] इति वार्तिकं ल्यबन्तधातुलोपे सति कर्मवाचकपदात् पञ्चमीं विधत्ते। यथा "प्रासादात् प्रेक्षते" इति। अत्र लोपः ल्यबन्तस्य आरुह्येत्यादेः स्मारकः। पञ्चम्याः कर्मत्वमर्थः। अथ वा पञ्चम्याः कर्मताविशिष्टारोहणस्य सामानाधिकरण्यावच्छिन्नमुत्तरकालिकत्वमर्थः प्रेक्षणादावन्वेति। तथा च प्रसादकर्मकारोहणस्य समानाधिकरणमुत्तरकालिकं यत् प्रेक्षणं तत्कर्तृत्वं वाक्यार्थः। कर्मणीत्युपलक्षणम्। कारकान्तरवाचकपदादपि पञ्चमी भवति। यथा "आसनात् प्रेक्षते" इति। अत्राधिकरणवाचकात् पञ्चमी। उपविश्येति ल्यबन्तस्य लोपः स्मारकः। पञ्चम्याः अधिकरणत्वमर्थः। अथ वा आधेयताविशिष्टोपवेशनस्य सामानाधिकरण्यावच्छिन्नमुत्तरकालिकत्वं पञ्चम्यर्थः। एवं यत्कारकार्थविभक्तिसमभिव्याहृतस्य ल्यबन्तस्य लोपस्तत्कारकार्थिका तत्र पञ्चमी।

घनान्निस्सृत्य विद्योतते इत्यत्रापादानार्थकपञ्चमीसमभिव्याहृतस्य ल्यबन्तस्य लोपेऽपादानार्थिकैव पञ्चमी। यथा "वलाहकाद्विद्योतते विद्युत्" इत्यत्र पञ्चम्या अपादानत्वमर्थः। लोपो निस्सृत्येति ल्यबन्तस्य स्मारकः। अथ वा घनापादानकनिस्सरणस्य सामानाधिकरण्यावच्छिन्नमुत्तरकालिकत्वं पञ्चम्यर्थः विद्योतनेऽन्वेति। घनापादानकनिस्सरणस्य समानाधिकरणमुत्तरकालिकं यत् विद्योतनं तत्कर्तेत्यन्वयबोधः। नात्रापि यादृच्छिकः निस्सृत्येत्यध्याहारः किं तु आनुशासनिकः।

यदि च आसनात् प्रेक्षत इत्यत्रापि अध्यास्य अधिष्ठाय वेत्यादेः ल्यबन्तस्य लोपे कर्मण्येव पञ्चमी न कारकान्तर इति कर्मणीति नोपलक्षणमिति विभाव्यते,

---

[1] पृ. ७७२
[2] पृ. ३६५
[3] वा. १४७४-१४७५, सू. २.३.२८/५८७ म.भा.पृ. ५०५

तदा "वलाहकाद्विद्योतते तडित्" इत्यत्रापि विभिद्य विदीर्य वेत्यादेः ल्यबन्तस्य लोपे कर्मण्येव पञ्चमी न तु निस्सृत्येत्यध्याहार इति बोध्यम्। इति विभक्त्यर्थनिर्णये कारकपञ्चम्यर्थनिर्णयः।

यतश्चाध्वकालनिर्माणं ततः पञ्चमी[१] इत्यादिवार्तिकार्थः

तद्युक्तादध्वनः प्रथमासप्तम्यौ[२] कालात् सप्तमी वक्तव्या[३] "वनात् ग्रमो योजनं योजने वा"। "कार्तिक्याः आग्रहायणी मासे"।

यतश्चेति। "यत इति तृतीयार्थे तसिः। येनावधिना अध्वनः कालस्य वा निमानं परिच्छेदः इयत्ता गम्यते ततः पञ्चमी वाच्येत्येकं वाक्यम्। तद्युक्तादिति। तेन पञ्चम्यन्तेन युक्तात् अन्वितात् अध्ववाचिनः पञ्चमीसप्तम्यौ वाच्ये इति द्वितीयं वाक्यम्।

कालात् सप्तमी च वक्तव्येति वाक्यान्तरम्। तद्युक्तात् इत्यनुषज्यते। तेन पञ्चम्यन्तेन अन्वितात् कालवाचिनः सप्तमी वाक्तव्येत्यर्थः। वनादिति। अत्र योजनात्मकमध्वपरिमाणं वनेन पूर्वावधिना परिछिद्यते। कस्मादारभ्य योजनमित्याकाङ्क्षोत्थानात्। योजनं योजने इति प्रथमासप्तम्योरपि स्वोत्तराव्यवहितदेशवृत्तित्वमर्थः। वनात्मकपूर्वावधिकयोजनोत्तरदेशे ग्राम इत्यर्थः। अवधिकत्त्वेऽपि विश्लेषाप्रतीतेः "ध्रुवमपाये०"[४] इति सूत्रेण अपादानत्वाभावात् वचनम्।

कार्तिक्या इति। कार्तिक्याः मासे आग्रहायणी इत्यन्वयः। अत्र मासात्मकं कालपरिमाणं कार्तिक्या पूर्वावधिना परिच्छिद्यते। कस्मादारभ्य मासे इत्याकाङ्क्षोत्थानात्। मास इति सप्तम्यास्तु स्वोत्तराव्यवहितकालवृत्तित्वमर्थः। कार्तिकपौर्णमास्यात्मकपूर्वावधिकमासोत्तरकाले मार्गशीर्षपौर्णमासीत्यर्थः।[५]

लघुमञ्जूषायाम्[६]

"वनात् ग्रामो योजने योजनं वा"। अत्राव्यवहितोत्तरत्वं पञ्चम्यर्थः। स्वाव्यवहितोत्तरवृत्तित्वं प्रथमासप्तम्योरर्थः। एवं च वनाव्यवहितोत्तरयोजनाव्यवहितोत्तरदेशवृत्तिः ग्राम इति बोधः।

---

[१] वा. १४७७ सू. २.३.२८/५८७ म.भा.पृ. ५०५

[२] वा. १४७९ सू. २.३.२८/५८७ म.भा.पृ. ५०५

[३] वा.१४७८ सू. २.३.२८/५८७ म.भा.पृ. ५०५

[४] सू. १.४.२४

[५] बा.म.रमा.पृ. ४३९

[६] पृ. १२९८

"कार्तिक्या आग्रहायणी मासे" इत्यत्र स्वावयवकत्वं पञ्चम्यर्थः। स्वाव्यवहितोत्तरकालवृत्तित्वं सप्तम्यर्थः। कार्तिक्यवयवकत्रिंशत्तिथ्यात्मकमासाव्यवहितोत्तरकालवृत्तिः आग्रहायणीत्यर्थः।

भाष्यमतं तु — "वनान्निःसृत्य योजने गते ग्रामः" इत्यतः प्राप्यत इत्यध्याहारेण बोधः। निस्सृत्येति "परावरयोगे च"[१] इति क्त्वा। वनावधिकविभागानुकूलव्यापारसंबद्धे योजने गते ग्रामः प्राप्य इति बोधः। योजनमिति प्रथमान्तत्वे गतं चेत् इति शेषः। कार्तिक्या इत्यादेरपि ततः प्रभृति गते मासे आग्रहायणीत्यर्थः इति।

अत्र सर्वत्र भाष्यसंमत एवार्थे साधुत्वम्, यथोत्तरं मुनीनां प्रामाण्यात्। सर्वत्र तत्तकारकत्वाविवक्षायां षष्ठ्याः साधुत्वमिष्टमेव, अनभिधानं वेति तत्त्वम्।

एतेन शब्दकौस्तुभे दीक्षितेन यदुक्तं — निवृत्तिनिवारणादिक्रियान्तरविशिष्टे धात्वर्थे वृत्तिमाश्रित्य यथाकथंचिदुक्तप्रयोगाणां समर्थनेऽपि मुख्यार्थपुरस्कारेण षष्ठीप्रयोगो दुर्वारः, 'नटस्य शृणोति' इतिवत्। न हि उपाध्यायनटयोः क्रियानुकूलव्यापारांशे विशेषो वक्तुं शक्यः। अनभिधानब्रह्मास्त्रमादाय प्रत्याख्यानं तु नातीव मनोरमम्। एवं च "जुगुप्साविराम०"[२] इत्यादिवार्तिकमारम्भणीयमेव। तथा च सूत्रवार्तिकमतमेवेह प्रबलम् इति, तन्निरस्तं वेदितव्यम्। क्वचित् सूत्रवार्तिकयोः प्राबल्यं क्वचित् भाष्यस्येति वैषम्ये मानाभावात्।

पदवाक्यरत्नाकरे[३]

यतश्चाध्वकालविमानम् इति वार्तिकमेवं व्याख्यातम् —

यतोऽध्वकालनिर्माणं ततो भवति पञ्चमी।
सप्तमी केवलं कालादध्वनः प्रथमापि च।।

यतो यदवधिकं अध्वकालयोर्निर्माणं निर्गतं मानं परिमाणं तद्वाचकात् पञ्चमी, तथाविधपञ्चमीत्युक्ताध्वावयववाचकपदात् प्रथमासप्तम्यौ, तथा कालावयववाचकात् सप्तमीमात्रं वार्तिकेन विधीयते। योजनादिशब्दा मुख्यया वृत्त्या परत्वविशेषमभिदधति। गौण्या तु तदभिव्यञ्जकसंयुक्तसंयोगघटकान् परत्वप्रतियोगिकापरत्वाधिकरणदेशान् अभिदधति। तथा च "ग्रामात् योजनं योजने वा वनम्" इत्यादौ

१ सू. ३.४.२०
२ वा. १०७९
३ पृ. ७७३

पञ्चम्याः अवधिमत्त्वं प्रथमायाः सप्तम्या वा अधिकरणत्वमर्थ इति ग्रामावधिक-योजनात्मकपरत्वाधिकरणं वनम् इति बोधः।

कार्तिक्या आग्रहायणी मासे इत्यत्र कार्तिक्यादिपदं तदुत्पन्नस्थिरद्रव्ये लाक्षणिकम्। तथा च कार्तिक्युत्पन्नावधिकमासस्वरूपापरत्वाधिकरणमाग्रहायण्युत्पन्नवस्तु इति अन्वयबोधः।

विभक्त्यर्थनिर्णये[१] अकारकपञ्चम्यर्थः

नामार्थान्वयिनः पञ्चम्यर्थाः अकारकतया संज्ञायन्ते। तत्र — "यतश्चाध्व-कालनिमानं ततः पञ्चमी।[२] तद्युक्तादध्वनः प्रथमासप्तम्यौ।[३] कालात् सप्तमी वक्तव्या"[४] इति वार्तिकम्। यतो यदवधिकम् अध्वकालयोर्निमाणं निर्गतं मानं परिमाणं तद्वाचकात् पञ्चमी भवति। तथाविधपञ्चमीयुक्तात् अध्वावयववाचकपदात् प्रथमासप्तम्यौ। तथा कालावयववाचकात् सप्तमीमात्रं भवतीत्यर्थकम्। कालस्य परिमाणं स्वावयवकालसंख्या बोध्या। पञ्चम्यर्थान्वयं नामार्थयोरध्वकालविशेष-योर्ज्ञापयति यथा "ग्रामाद्योजने योजनं वा वनम्" इत्यादौ। अत्र पञ्चम्या अवधित्वमर्थः। तच्च योजनशब्दार्थस्य योजनपरिमाणविशिष्टस्यैकदेशे योजन-परिमाणे व्युत्पत्तिवैचित्र्यात् अन्वेति। अवधिमत्त्वं तु घटितत्वम्। ग्रामावधि-घटितत्वं तु ग्रामाधिकरणदेशपरिमाणघटितत्वम्। योजनपरिमाणे तद्घटितत्वं तदारभ्यत्वम्। अथ वा तज्ज्ञानसापेक्षज्ञानविषयत्वम्। संयुक्तदेशसंयोगः समाना-वयवावच्छिन्नः सप्तम्याः प्रथमायाश्चार्थः। एवं च ग्रामावधिकयोजनपरिमाण-वद्देशसंयुक्तदेशसंयोगवद्वनम् इत्यन्वयबोधः।

समानावयवावच्छिन्नत्वनिवेशात् अग्रपृष्ठादिभिन्नभिन्नावच्छेदेन योजनवनयोः संयोगे तथा न प्रयोगः।

एवं "कार्तिक्या मासे आग्रहायणी" इत्यत्र पञ्चम्याः अवधित्वमेवार्थः। तच्च त्रिंशद्दिनवर्तिनः मासशब्दार्थस्यैकदेशे त्रिंशद्दिनेऽन्वेति। सप्तम्यास्तु त्रिंशद्दिन-नाशोत्पत्तिकालिकोत्पत्तिकत्वमर्थः। तथा च कार्तिक्यवधिकं त्रिंशद्दिनवर्तमानीय-त्रिंशद्दिननाशोत्पत्तिकालोत्पत्तिमती आग्रहायणीत्यन्वयबोधः।

---

[१] पृ. ३६६

[२] वा. १४७७, सू. २.३.२८/५८७; म.भा.भाष्यम्.पृ. ५०५

[३] वा. १४७९

[४] वा. १४७८

एवं "कुरुक्षेत्रात् चत्वारि योजनानि चतुर्षु योजनेषु वा पृथूदकम्" इत्यत्र चतुर्योजनपरिमाणविशेषविशिष्टः चतुर्योजनशब्दयोः प्रथमान्तयोः सप्तम्यन्तयोश्चार्थः। तादृशपरिमाणविशेषे पञ्चम्यर्थावधित्वस्यान्वयः। कुरुक्षेत्रावधिकचतुर्योजनपरिमाण-विशेषविशिष्टदेशसंयुक्तदेशसंयोगवत्पृथूदकमिति बोधः।

एवं 'कार्तिक्याः त्रिमासे त्रिषु मासेषु वा माघी' इत्यत्र मासत्रयवर्ती त्रिमास-शब्दार्थः। तत्र पञ्चम्यर्थस्यावधित्वस्यान्वयः। कार्तिक्यवधिकमासत्रयवर्तिदिन-समुदायनाशोत्पत्तिकालिकोत्पत्तिमती माघीत्यन्वयबोधः।

गुरुचरणास्तु — योजनादिशब्दा मुख्यया वृत्त्या परत्वविशेषमभिदधति। गौण्या तु तदभिव्यञ्जकसंयुक्तसंयोगघटकान् परत्वप्रतियोगिकापरत्वाधिकरणदेशानभि-दधति। मासादिपदमपि तावदादित्यपरिस्पन्दान्तरितजन्मनोः वस्तुनोः सामयिकम-परत्वविशेषमभिदधत् तत्संसर्गगुणेन तदन्तरालकालावयवानभिधत्ते। स्वीक्रियते च संख्याया इव परत्वादेरपि समवायाख्येन येन केनापि संसर्गेण गुणकर्मणोरपि व्यवहारात् वैशिष्ट्यम्। तथा च "ग्रामात् योजनं योजने वा वनम्" इत्यत्र पञ्चम्या अवधिमत्त्वं प्रथमायाः सप्तम्या वा अधिकरणत्वमर्थ इति ग्रामावधिकयोजनात्मक-परत्वाधिकरणं वनमित्यन्वयबोधः।

"कार्तिक्या आग्रहायणी मासे" इत्यादौ तु कार्तिक्यादिपदं तदुत्पन्नस्थिरद्रव्ये लाक्षणिकम्। तथा च कार्तिक्युत्पन्नस्थिरद्रव्यावधिकमासस्वरूपपरत्वाधिकरणा-ग्रहायण्युत्पन्नस्थिरद्रव्यमित्यन्वयबोधः इति प्राहुः।

भाट्टरहस्ये

"ल्यब्लोपे कर्मण्यधिकरणे च"[१] इत्यनेन वार्तिकेन अर्थाध्याहारादिना गम्यमाने ल्यबन्तकर्मणि अधिकरणे वा पञ्चमी स्यात् इत्यर्थकेन प्रासादात् प्रेक्षत इत्यादौ पञ्चमी। "प्रासादमारुह्य प्रेक्षते", प्रासादे स्थित्वा प्रेक्षत इत्यर्थः। अत्र कर्मत्व-मधिकरणत्वं वा पञ्चम्यर्थः। तस्य च स्वनिरूपकारोहणादिभावनोत्तरकालि-कत्वादिसंसर्गेण प्रेक्षणभावनायामन्वयः। न च गम्यमानक्रियायाः कथं संसर्ग-घटकत्वमिति वाच्यम्। कस्मात्त्वम्, नद्याः इत्यादौ आगतादिपदाध्याहारेण गम्य-मानक्रियादेः विशेष्यत्वादिकं यथा स्वीक्रियते तथा संसर्गघटकत्वस्वीकारे विरोधाभावात्।

---

[१] वा. १४७४, १४७५

एवम् — "यतश्चाध्वकालविमानं तत्र पञ्चमी"[१] "तद्युक्तादध्वनः प्रथमा-सप्तम्यौ"[२] "कालात् सप्तमी च वक्तव्या"[३] इत्यादिवार्तिकात् "वनात् ग्रामो योजनं योजने वा, कार्तिक्या आग्रहायणी मासः" इत्यादौ पञ्चमी। अत्रावधित्वं पञ्चम्यर्थः। वनावधिकयोजनपरिमितदेशवृत्तिः ग्रामः इति बोधः फलितः। प्रथमार्थोऽप्यधि-करणत्वमेव।

अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते[४] इति सूत्रार्थः

अन्य, आरात्, इतर, ऋते, दिक्शब्द, अञ्चूत्तरपद, आच्, आहि एभिरष्टभिर्योगे सति पञ्चमी स्यात्। "अन्य" — इत्यर्थग्रहणम्। अन्यार्थकशब्दयोगे पञ्चमीति फलितम्। तेन भिन्नादिशब्दयोगेऽपि पञ्चमी सिध्यति। इतरग्रहणं प्रपञ्चार्थम्। अर्थग्रहणस्य प्रयोजनप्रदर्शकम्। अन्यो भिन्न इतरो वा कृष्णात्। कृष्णप्रति-योगिकभेदवान् इत्यर्थः। प्रतियोगित्वं पञ्चम्यर्थः। "आरात् वनात्"। वनस्य दूरं समीपं वेत्यर्थः। "अराद्दूरसमीपयोः" इत्यमरः। ऋते कृष्णात्। कृष्णस्य वर्जने सुखं नास्तीत्यर्थः। पूर्वो ग्रामात्। ग्रामावधिकपूर्वदिग्वर्ती इत्यर्थः। अवधित्वं पञ्चम्यर्थः। दिशि दृष्टः शब्दो दिक्शब्दः। तेन संप्रति देशकालवृत्तिना योगेऽपि भवति। "चैत्रात् पूर्वः फाल्गुनः"। अवयववाचियोगे तु न। "तस्य परमाम्रे-डितम्"[५] इति निर्देशात्। द्विरुक्तस्य परावयवः आम्रेडितसंज्ञकः स्यात् इति तदर्थः। "पूर्वं कायस्य"। शरीरस्य पूर्वावयव इत्यर्थः।

अञ्चूत्तरपदस्य तु दिक्शब्दत्वेऽपि "षष्ठ्यतसर्थप्रत्ययेन"[६] इति षष्ठीं बाधितुं पृथग्ग्रहणम्। "प्राक् प्रत्यग्वा ग्रामात्"। ग्रामावधिकपूर्वदिग्वर्ती ग्रामावधिक-पश्चिमदिग्वर्ती इत्यर्थः। अवधित्वं पञ्चम्यर्थः।

आच् — "दक्षिणा ग्रामात्"। ग्रामावधिकदक्षिणदिग्वर्ती इत्यर्थः। आहि — "दक्षिणाहि ग्रामात्"। अर्थः स एव।

"अपादाने पञ्चमी"[७] इति सूत्रे "कार्तिक्याः प्रभृति"[८] इति भाष्यप्रयोगात् प्रभृत्यर्थकशब्दयोगे पञ्चमी। "भवात् प्रभृति आरभ्य वा सेव्यो हरिः"।

---

[१] वा. १४७७
[२] वा. १४७९
[३] वा. १४७८
[४] सू. २.३.२९
[५] सू. ८.१.२
[६] सू. २.३.३०
[७] सू. २.३.२८
[८] म.भा.पृ. ५०६

"अपपरिबहिरञ्चवः पञ्चम्या"[1] इति समासविधानात् ज्ञापकात् बहिर्योगे पञ्चमी। ग्रामात् बहिः।

लघुमञ्जूषायाम्[2]

"घटादन्यः" इत्यादौ स्वप्रतियोगिकभेदसंबन्धः पञ्चम्यर्थः। तेन संबन्धेन प्रकृत्यर्थस्यान्यस्मिन्नन्वयः। एतेन घटादितरो व्याख्यातः। अन्य इत्यर्थग्रहणमिति तु भाष्यानुक्तत्वात् इतरग्रहणाद्यायुक्तम्। "घटाद्भिन्न" इत्यादौ तु "ध्रुवमपाये०"[3] इत्यनेनापादानत्वात् पञ्चमी सिद्धा। अपायशब्देन भेदस्यापि ग्रहणात्।

"ऋते कृष्णात् नोत्पद्यते सुखम्"। अत्र ऋतेशब्दार्थः संसर्गाभावः। प्रतियोगित्वं पञ्चम्यर्थः। कृष्णशब्दस्तद्भक्तिलाक्षणिकः कृष्णभक्तिप्रतियोगिकाभावप्रयोज्यः सुखकर्तृकोत्पत्त्यभावः इति बोधः।

"कृष्णात् ऋते दुःखम्"। अत्र ऋतेशब्दार्थस्य संसर्गाभावस्य सामानाधिकरण्यसंबन्धेन दुःखेऽन्वयः। कृष्णभक्तिप्रतियोगिकाभावसमानाधिकरणं दुःखमिति बोधः।

"कृष्णात् ऋते नरः शोच्यः"। अत्र अभाववान् ऋतेशब्दार्थः। कृष्णभक्त्यभाववान् नरः शोच्यः इति बोधः।

"कृष्णादृते न धनुर्धरः" इत्यत्र भेदवान् ऋतेशब्दार्थः। कृष्णप्रतियोगिकभेदवान् न धनुर्धर इति बोधः।

ऋतेशब्दयोगे द्वितीयापि। यथा 'ऋते वातं वृक्षः पतति'। वाताभाववान् वृक्षः पतति इति बोधः। वृक्षपतने वातजन्यत्वाभावलाभस्त्वार्थः।

"पूर्वो ग्रामात्"। उदयाचलसंनिहितदेशः पूर्वपदार्थः। पञ्चम्यर्थोऽवधित्वम्। पूर्वत्वं च अवध्यपेक्षोऽखण्डोपाधिः। एवं परत्वाद्यपि। ग्रामवधिकपूर्वत्ववानित्यादिक्रमेण बोधः।

"चैत्रात् पूर्वः फाल्गुनः" इत्यत्र प्रतियोगिध्वंसानधिकरणकालभवः पूर्वपदार्थः। तत्तदवधिबोधकपदसमभिव्याहारवशाच्च तद्रूपप्रतियोगितद्ध्वंसानधिकरणकालस्य तत्त्वेन भानम्। प्रतियोगी च ध्वंसश्चेति द्वन्द्वः। चैत्रादिः (मासः) प्रतियोगी तद्ध्वंसश्च तयोरनधिकरणं यः कालः तत्र भव इत्यर्थः। चैत्रस्याधिकरणकालः

---

[1] सू. २.२.१२
[2] पृ. १२९९
[3] सू. १.४.२४

चैत्रशुद्धप्रतिपदादित्रिंशत्तिथ्यात्मकः कालः तद्ध्वंसाधिकरणकालः चैत्रामावास्यानन्तरकालः वैशाखादिव्यवहारयोग्यः कालः, चैत्रतद्ध्वंसानधिकरणकालः चैत्रशुद्धप्रतिपत्तः प्राक् विद्यमानः कालः तत्र भव इत्यर्थः। तद्ध्वंसानधिकरणमात्रनिवेशे 'चैत्रात् पूर्वश्चैत्रः' इति प्रयोगापत्तिः। प्रतियोगिमात्रानधिकरणकालभवस्य पूर्वपदार्थत्वे वैशाखादावपि 'चैत्रात् पूर्वः वैशाखः' इति प्रयोगापत्तिः। अतः उभयानधिकरणेति कालविशेषणम्।

तथा च चैत्रावधिकपूर्वकालभवः फाल्गुन इति बोधः पर्यवसितः। पूर्वोक्तमखण्डोपाधिपूर्वत्वपरिचायकम्। प्रतियोगिध्वंसानधिकरणकालत्वस्य शक्यतावच्छेदकत्वे गौरवम्। प्रत्येकं खण्डशः शक्तौ शक्त्यानन्त्यम्। चैत्ररूपप्रतियोगिचैत्रध्वंसैतदुभयानधिकरणचैत्रावधिककालभवः फाल्गुन इति बोधाङ्गीकारे एकस्य चैत्रस्यानेकधान्वयाङ्गीकारे गौरवम्, अव्युत्पत्तिश्च। अतः पूर्वत्वेन भानमुक्तम्।

कालस्य क्रियामात्रपरिच्छेदकत्वात् तद्भवपर्यन्तं पूर्वादिशब्दानामीदृशेषु लक्षणा। लक्षणाभावे तु चैत्रात् पूर्वं फाल्गुन इत्येव प्रयोगः। अस्तीत्यध्याहारः। पूर्वमिति अधिकरणशक्तिप्रधानम्।

"चैत्रात् पूर्वं माघः" इत्यादौ तात्पर्यवशात् यथायथं त्रिंशद्दिनव्यवहितस्योक्तकालस्य पूर्वत्वेन भानम्।

चैत्रात् परः। अत्र तत्तदवधिसमभिव्याहारवशात् तद्ध्वंसाधिकरणकालः परत्वेन परशब्दार्थः।

"कृष्णात् परोऽर्जुनः" इत्यत्र कृष्णोत्पत्तिकालध्वंसाधिकरणकालभवः परत्वेन परशब्दार्थः। तत्रैव कृष्णस्यावधित्वम्। कृष्णोत्पत्त्यनन्तरमर्जुनो जात इति लोकव्यवहारात्।

"प्रयागादुत्तरं काशी" इत्यादौ संयुक्तसंयोगवद्देशः उत्तरत्वेन रूपेण उत्तरमित्यधिकरणशक्तिप्रधानाव्ययस्यार्थः। तस्य च पूर्वपश्चिमदक्षिणादेः तात्पर्यवशात् तत्त्वेन तत्तत्प्रयोगेषु भानम्।

"गृहात् गङ्गा मम परा काश्याः सैवापरा मम" इत्यादौ विप्रकृष्टदेशस्थः परत्वादिना परापरशब्दार्थः। अवधिः पञ्चम्यर्थः। गृहावधिकमत्संबन्धिपरत्ववती गङ्गा इत्यादिक्रमेण बोधः। ममेत्यत्र तु न पञ्चमी। प्रत्यासत्त्या यस्य यत्रोत्थिताकाङ्क्षा तद्वाचकादेव तत्पदनिमित्तविभक्तिस्वीकारात्। परादिपदं चावधावेव नित्यसाकाङ्क्षम्, न संबन्धिनीति स्पष्टमेव।

"प्राक् प्रत्यग्वा ग्रामात्" इति पूर्वादिशब्दैर्व्याख्यातम्। ग्रामावधिकपूर्वभवः, ग्रामावधिकपश्चिमभव इति बोधः।

"भवात् प्रभृति आरभ्य वा सेव्यो हरिः" अत्र प्रभृतीति आरभ्येत्यर्थकमव्ययम्। तदर्थयोगे पञ्चमी। अवधिमादायेति प्रभृतिशब्दार्थः। आरभ्येत्यस्याप्ययमर्थः। ग्रहणारम्भणे चार्थौ। भवस्यावधित्वं च समभिव्याहृतपदार्थनिरूपितम्। प्रकृते मरणान्तकालस्य भवोऽवधिः। मरणान्तकालावधिं भवकालमादाय तावत्कालं हरिः सेव्यः इति बोधः। तत्र गम्यमानक्रियापेक्षं भवस्यावधित्वमिति अपादानत्वादेवात्र पञ्चमी। तच्चावधिमादायेत्याद्यर्थयोगेन तद्वाचकप्रभृत्यादियोगेन च गम्यते।

एवं "कार्तिक्या आग्रहायणी मासे" इत्यतोऽपि कार्तिक्यवयवके कार्तिकीघटिते मासे कार्तिकीमादाय गते सति आग्रहायणी इति बोधः।

आरभ्येत्यस्य गृहीत्वेत्येतन्मात्रार्थकत्वे आद्यक्षणमारभ्येत्यादौ कर्मत्वात् द्वितीया। प्रभृतिशब्दस्य अधातुत्वेन तदर्थस्य अक्रियात्वात् न तद्विशेषणे द्वितीया। प्रभृतिसमानार्थकस्य आरभ्येत्यस्यापि वाक्यैकदेशन्यायेन अवधिसहितादानार्थकतेति न तद्विशेषणस्य कर्मत्वम्। एवं चावधिमादायेत्यर्थे पञ्चम्येव। अवधिमनन्तर्भाव्य केवलादानार्थकत्वे द्वितीयैवेति व्यवस्थया प्रयोगाः। यथा भवादारभ्य, आद्यक्षणमारभ्येति।

यदा तु आरभ्येत्यस्य प्रथमक्रियारूपमारम्भं कृत्वेत्यर्थः, तदा तद्योगे सप्तम्यपि — "आरभ्य तस्यां दशमीं तु यावत् प्रपूजयेत् पर्वतराजपुत्रीम्।" इति यथा।

शब्दशक्तिप्रकाशिकायां च[१]

"पूर्वो ग्रामात्" इत्यत्र उदयाचलसंनिकृष्टरूपस्य पूर्वपदार्थस्य एकदेशे तादृशसंनिकृष्टत्वे ग्रामाद्यवधिकत्वं पञ्चम्या बोध्यते। तथा च ग्रामावधिकं यत् उदयाचलसंनिकृष्टत्वं तद्वान् इति बोधः।

"ग्रामादुत्तरो दक्षिणः" इत्यादौ कैलाससंनिकृष्टत्वादिपर्यवसितोत्तरत्वादौ तत् बोध्यते। ग्रामावधिकं यत् कैलाससंनिकृष्टत्वं तद्वान् ग्रामावधिकं यत् कैलासविप्रकृष्टत्वं तद्वानिति च बोधः।

"ग्रीष्मात् पूर्वो वसन्तः", "कृष्णात् पूर्वो हलायुधः" इत्यादौ प्रागभावाधिकरणक्षणोत्पन्नत्वादिपर्यवसन्नस्य पूर्वत्वादेः घटके प्रागभावादौ ग्रीष्मादिनिष्ठ-

---

[१] पृ. ३७८

प्रतियोगिताकत्वं पञ्चम्या बोध्यते। ग्रीष्मनिष्ठप्रतियोगितानिरूपकः यः प्रागभावः तदधिकरणक्षणोत्पन्नः वसन्तः, कृष्णप्रतियोगिकप्रागभावाधिकरणक्षणोत्पन्नः हलायुधः (बलरामः) इति च बोधः।

''घटादन्यः, भिन्नः, पृथक्'' घटत्वाद्यवच्छिन्नमवधित्वं प्रतियोगित्वं वा अन्यादिपदार्थैकदेशे भेदे निरूपकत्वसंबन्धेनान्वयि पञ्चम्या बोध्यते। घटनिष्ठघटत्वावच्छिन्नावधितानिरूपकभेदवान् इति घटनिष्ठघटत्वावच्छिन्नप्रतियोगितानिरूपकभेदवान् इति वा बोधः।

''गृहात् गङ्गा मम परा काश्याः सैवापरा मम'' इत्यादौ विप्रकृष्टत्वसंनिकृष्टत्वरूपयोः दैशिकपरत्वापरत्वयोरन्वितं गृहकाश्यादिसापेक्षत्वं पञ्चम्यर्थः। स च स्वरूपसंबन्धः पदार्थान्तरं वा। तेन 'गृहापेक्षया मद्विप्रकर्षवती गङ्गा, काश्यपेक्षया मत्संनिकर्षवती गङ्गा' इत्याकारकः तत्र बोधः। — इति वर्णितम्।

व्युत्पत्तिवादानुसारेण अन्यादिपदयोगे पञ्चम्यर्थविचारः[१]

''गुणो द्रव्यात् भिन्नः'' इत्यादौ ''अन्यारात्०''[२] इति सूत्रेण पञ्चमी। सूत्रस्थान्यपदस्य अन्यार्थकपदपरत्वात् इति बहवः। न चान्यपदेन तदर्थकपदविवक्षणे अन्यार्थकेतरपदस्यापि अन्यार्थकत्वात् अन्यपदेनैव तत्संग्रहात् इतरपदवैयर्थ्यम् इति वाच्यम्। अन्येतरपदयोः मध्ये एकस्यान्योन्याभावविशिष्टार्थकपदपरत्वात् अपरस्य पृथक्त्वरूपगुणविशिष्टार्थकपदपरत्वाच्चोभयोः सार्थक्यात्। ''पृथग्विना०''[३] इत्यादिसूत्रे पृथक्पदोपादानं तद्योगे वैकल्पिकतृतीयासिद्ध्यर्थम्। वस्तुतस्तत्र पृथक्पदमसाहित्यार्थकम्, न तु पृथक्त्वगुणवदर्थकम्। ''दुनोति चन्द्रात् पृथगप्यनङ्गः'' इत्यादौ असाहित्यस्यैव पृथक्पदात् प्रतीतेः। चन्द्रासहितोऽप्यनङ्गः पीडयतीति हि तत्र बोधः।

ननु अन्यादिपदं नान्योन्याभावार्थकपदपरम्, तथा सति ''घटः पटो न'' इत्यादावपि नञः अन्योन्याभावार्थकतया तद्योगे पञ्चम्यापत्तेः। अपि तु पृथक्त्वरूपगुणविशिष्टार्थकम्।

न च सूत्रेऽन्यपदमन्योन्याभावविशिष्टार्थकपदपरम्। नञ्पदं च न तथा। तस्य भेदमात्रवाचकत्वात्। नञः निपातत्वेन तदर्थस्य भेदस्य नामार्थे प्रतियोगितारूपेणानुयोगितारूपेण वा भेदसंबन्धेन अन्वयसंभवेन भेदविशिष्टार्थकत्वाभावात्

---

[१] व्यु.वा.पृ. २६६

[२] सू. २.३.२९

[३] सू. २.३.३२

नञ्योगे पञ्चम्यनापत्तेः इति वाच्यम्। "द्रव्यात् गुणस्य भेदः" इत्यादौ पञ्चमी-निर्वाहाय अन्यादिपदस्य भेदार्थकपदपरतायाः आवश्यकत्वात्। तथा च भेदार्थक-नञ्योगे पञ्चम्यापत्तिः दुर्वारा। न च तथा सति "घटादन्यः पटः" इत्यादौ भेदविशिष्टार्थकान्यादिपदयोगे पञ्चम्यनुपपत्तिः इति वाच्यम्। तत्र भेदविशिष्ट-वाचकस्यान्यपदस्य विशेषणतया भेदवाचकतायाः अनपायात्। तथा च भेद-वाचकत्वेन रूपेण अन्यपदेनैव इतरपदस्यापि संग्रहसंभवात् अन्येतरोभय-पदोपादानसार्थक्यं न संभवतीति चेत् —

न। अन्योन्याभाववाचकपदस्य पञ्चम्यनुपयोगित्वे "द्रव्यादन्यो गुणः" इत्यादौ पञ्चम्यनुपपत्तेः। गुणादौ पृथक्त्वरूपगुणासंभवेन अन्योन्याभावस्यैव तत्र अन्य-पदार्थतायाः स्वीकरणीयत्वात्। तर्हि "घटः पटो न" इत्यत्र पटपदात् पञ्चम्या-पत्तिरिति नाशङ्कनीयम्। निपातातिरिक्तान्योन्याभावार्थकपदयोगे पञ्चमीति स्वीकारेण अन्योन्याभावार्थकनञ्रूपनिपातयोगे पञ्चमीवारणसंभवात्।

वस्तुतस्तु अन्योन्याभावनिरूपितप्रतियोगित्वरूपार्थविवक्षायां पञ्चमी। नञर्था-न्योन्याभावनिरूपितप्रतियोगिता च न विभक्त्या बोध्यते। आधेयत्वातिरिक्त-विभक्त्यर्थस्य नञर्थे प्रतियोगितासंबन्धेनैव अन्वयः इति व्युत्पत्तेः। आधेयत्व-रूपविभक्त्यर्थस्य तु प्रतियोगित्वातिरिक्तेन स्वरूपसंबन्धेनान्वयः "भूतले न घटः" इत्यादौ घटाभावो भूतलवृत्तिरिति बोधात् दृष्टः। "न चैत्रस्येदम्" इत्यादौ चैत्रनिरूपितस्वत्वाभाववत् इदम् इति बोधोदयेन विभक्त्यर्थस्य स्वत्वस्य प्रतियोगितासंबन्धेनान्वयो दृष्टः। अतः आधेयत्वातिरिक्तविभक्त्यर्थस्य नञर्थे प्रतियोगितयैवान्वयः इति व्युत्पत्तिः कल्पिता। अतो नञ्-योगे न पञ्चमी।

अथ पृथक्त्वाख्यगुणानङ्गीकर्तृमीमांसकमते सूत्रेऽन्येतरपदयोरेकतरवैयर्थ्यं दुर्वारम्, इति चेत् — न। तन्मतेऽपि एकपदस्य प्राधान्येन अन्योन्याभाव-वाचकत्वम्, अपरपदस्य अन्योन्याभावविशिष्टवाचकत्वम् इत्यभ्युपगमेन द्वयोः सार्थक्यसंभवात्। 'घटात् भेदः' 'घटादन्यत्वम्' इत्यादौ प्राधान्येनान्योन्याभावः प्रतीयते। 'घटादन्यः, घटाद्भिन्नः' इत्यादौ विशेषणतया भेदः प्रतीयते। उभयत्रापि पञ्चमीनिर्वाहाय अन्येतरपदयोः द्वयोरुपादानम् इति पर्यवसितम्।

वस्तुतः सूत्रे अन्यपदमितरपदं च तदानुपूर्वीकशब्दस्वरूपपरम्। अर्थपरत्वे 'घटादन्यः' इतिवत् 'घटादेकः' इति प्रयोगापत्तेः।

यदि चैकपदस्य अन्यत्वरूपेण नान्यार्थकता। किं तु समभिव्याहृतान्यत्वो-पलक्षिते वस्तुनि बुद्धिविषयतावच्छेदकघटत्वादिनैव। "चैत्र एकमानयति, मैत्र-

श्चापरम्'' इत्यादौ घटत्वपटत्वादिनैव आनयनकर्मतादिप्रतीतेः न तु घटपटान्यत्वादिना। अन्यत्वान्वयिप्रतियोगिवाचकपदसमभिव्याहाराभावात्। अन्यथा = अर्थपरत्वाभावे एकपदयोगे पञ्चम्याः असाधुत्वेऽपि घटस्यैक इति प्रतियोगिनि षष्ठ्यापत्तेः इत्युच्यते, तदापि अन्यार्थकतदादिपदयोगे पञ्चमीप्रयोगापत्तेः [स्वभिन्नार्थकतदादिपदसमभिव्याहारस्थले ''चैत्रस्तं पश्यति'' इत्यादौ चैत्रपदोत्तरं पञ्चम्यापत्तेः]। तथा च ''घटात् भिन्नं, घटात् भिद्यते'' इत्यादौ पञ्चमीनिर्वाहाय तत्रापादानत्वमेव कथंचित् उपपादनीयम्। तथा हि — भिदधातोः नान्योन्याभावोऽर्थः। ''घटात् भिनत्ति पटः'' इति प्रयोगापत्तेः। भिदधातोरन्योन्याभावार्थकस्याकर्मकत्वेन ''भिद्यते घटः'' इति कर्मणि प्रयोगानुपपत्तेश्च। न च कर्तर्येवायं प्रयोग इति वाच्यम्। कर्तरि यगात्मनेपदासंभवात्। अदैवादिकत्वात् परस्मैपदित्वाच्च श्यन्कर्त्रात्मनेपदयोरनवकाशात्। अकर्मकधातुयोगे कर्मकर्तृविवक्षाया अप्ययोगात्। कस्यचित् अकर्मकस्य योगे ण्यर्थान्तर्भावेणैव कर्मकर्तृत्वस्योपपादनीयत्वात्। अन्योन्याभावस्याजन्यतया तदर्थकधातौ ण्यर्थान्तर्भावस्य दुष्करत्वात्।

अतः अन्यत्वेन ज्ञापनं भिदधातोरर्थः। ज्ञापनं ज्ञानविषयताप्रयोजकव्याप्तिपक्षधर्मता तदाश्रयोऽसाधारणधर्म एव भिदाकर्तृत्वात् भेदक उच्यते। अन्यत्वप्रकारकानुमितिविषयतारूपधात्वर्थतावच्छेदकफलाश्रयो भिदाकर्मतया भेद्यः। तथा च 'पटत्वं घटात् पटं भिनत्ति' इत्यादिप्रयोग एव साधीयान्। ''ध्रुवमपायेऽपादानम्''[१] इति सूत्रे हि प्रतियोग्यवध्यन्यतरत्वमेवापादानत्वमगत्या विवक्षणीयम्। तथा चात्र घटनिष्ठप्रतियोगित्वस्य पञ्चम्यर्थस्य धात्वर्थैकदेशेऽन्यत्वे निरूपकतासंबन्धेनान्वयः। द्वितीयान्तार्थस्य पटवृत्तित्वस्य धात्वर्थघटकविषयतायामन्वयः। धात्वर्थव्याप्तिपक्षधर्मत्वस्य आख्यातार्थाश्रयत्वरूपे कर्तृत्वे निरूपितत्वसंबन्धेनान्वयः। आश्रयत्वस्य पटत्वे स्वरूपसंबन्धेनान्वयः। तथा च घटप्रतियोगिकान्यत्वप्रकारकानुमितिनिरूपितपटवृत्तिविषयताप्रयोजकव्याप्तिपक्षधर्मताश्रयः पटत्वमिति बोधः।

''पटत्वेन घटात् भिद्यते पटः'' इत्यादौ च पटत्ववृत्तिव्याप्तिपक्षधर्मताप्रयोज्यघटान्यत्वप्रकारकानुमितिविषयतावान् पट इति बोधः।

एवं च पृथिवी इतरेभ्यो भिद्यत इत्यादौ पूर्वोक्तरीत्या पृथिव्यामितरभेदाप्रतीतेः पृथिवीविशेष्यकेतरभेदसाध्यकप्रतिज्ञात्वकथनं प्राचामनवधानविजृम्भितम्।

---

[१] सू. १.४.२४

पदवाक्यरत्नाकरे[1] अन्यारादित्यादिसूत्रव्याख्यानसरणिः

दिक्शब्दाञ्चूत्तरपदाजाह्यन्यैरितरेण च।
आराद्दतेभ्यां च योगे नाम्नो भवति पञ्चमी।।

उदयाचलावधिकमपरत्वं तद्विशिष्टं च देशमभिदधतः पूर्वादयः दिक्शब्दाः, तथाविधाः प्रागादयोऽञ्चूत्तरपदाः, आजन्ताः दक्षिणाप्रभृतयः, आह्यन्ताः दक्षिणाहिप्रभृतयः, अन्येतरशब्दौ पृथक्त्वविशिष्टवाचिनौ। प्रपञ्चार्थमितरग्रहणम्। तेन पृथक्त्वार्थकानामितरेषामपि लाभात् "चैत्रात् भिन्नः, पृथक्" इत्यादिकमुपपद्यते। एवं च दिक्शब्दादिभिः पूर्वोक्तैर्योगे आरात् ऋते आभ्यां योगे च नाम्नः पञ्चमी भवति। "इतरस्त्वन्यनीचयोः" इति कोशसिद्धनीचवाचकस्तु इतरशब्दो नेह गृह्यते। "पञ्चमी विभक्ते"[2] इति सूत्रविहितपञ्चम्यैवार्थसिद्धेः। ऋते शब्दयोगे द्वितीयापि। तेन "पुरुषाराधनमृते" इति प्रयोगोऽपि प्रमाणम्। आरात् इति दूरसमीपयोर्वर्तते।

"पूर्वो ग्रामात् तडागः" इत्यादौ पञ्चम्याः परत्वनिरूपकत्वमर्थः। तथा च ग्रामवृत्तिपरत्वनिरूपकमुदयाचलावधिकं यदपरत्वं तदाश्रयस्तडाग इति बोधः।

"माधवात्पूर्वो मधुः" इत्यत्र पूर्वपदेन प्रागभावाधिकरणमुच्यते। पञ्चम्या प्रतियोगित्वमुच्यते। प्रागभावे तस्यान्वयः। माधवप्रयितोगिकप्रागभावाधिकरणं मधुः इत्यन्वयबोधः।

प्रागादिशब्दानां दिक्शब्दत्वेऽपि ग्रामस्य दक्षिणतः इत्यादाविव "षष्ठ्यतसर्थप्रत्ययेन"[3] इति सूत्रप्राप्तां षष्ठीं बाधितुं पृथग्ग्रहणम्। अतो "ग्रामात् प्राक् तडागः" इत्यादौ ग्रामवृत्तिपरत्वनिरूपकोदयाचलावधिकापरत्ववति देशे तडाग इति बोधः।

एवं "ग्रामात् दक्षिणा, दक्षिणाहि वा" इत्यादौ बाडवानलावधिकापरत्ववद्देशः दक्षिणापदस्यार्थः। पञ्चम्याः परत्वनिरूपकत्वमर्थः। आजादेः दैशिकमधिकरणत्वमर्थः। तेन ग्रामवृत्तिपरत्वनिरूपकबडवानलावधिकापरत्ववति देशे तडाग इति वाक्यार्थः।

---

[1] पृ. ७७५
[2] सू. २.३.४२
[3] सू. २.३.३०

अवयववाचिपूर्वादिपदयोगे षष्ठ्येव प्रमाणम्। "तस्य परमाम्रेडितम्"[१] इति सूत्रेऽवयववाचकपरशब्दयोगे षष्ठीनिर्देशात् ज्ञापकात्। तेन पूर्वः कायस्येति साधुः, न तु कायादिति। शरीरस्य दक्षिणाहि तिलः, न तु शरीरात्। "चैत्रादन्य इतरः" इत्यादौ चैत्रावधिकपृथक्त्ववानिति बोधः।

अत्रैकदेशिन आहुः — सूत्रेऽन्योन्याभाववानेव अन्यादिपदार्थः। अर्थपरमन्यपदम्, न तु स्वरूपार्थम् इति प्रपञ्चनाय पृथक् इतरपदोपादानम्। न च घटात् न इति प्रयोगापत्तिः इति वाच्यम्। नञोऽभावसामान्यार्थकत्वात्। संसर्गमर्यादया तादात्म्यसंबन्धावच्छिन्नप्रतियोगितायाः भानेन "घटो न" इत्यादौ घटान्योन्याभावस्यार्थतो लाभात् अन्योन्याभावत्वस्य नञ्प्रवृत्तिनिमित्तत्वाभावात्। एतदुक्तं भवति अन्योन्याभावत्वावच्छिन्नवाचकपदयोगे पञ्चमी। नञ्पदं तु नान्योन्याभावत्वावच्छिन्नवाचकमिति न तद्योगे पञ्चमीति।

भवतु वा अन्योन्याभावत्वावच्छिन्नवाचकः नञ्। तथापि यथा निपातानामभेदान्वयं प्रति योग्यता नास्ति तथा नञर्थस्य विभक्तिविशेषार्थान्वयं प्रति योग्यता नास्तीति कल्प्यते — इति।

"वनात् आरात्" इत्यत्र वनावधिकं परत्वमपरत्वं वा अर्थः। ऋतेशब्दस्यान्योन्याभावस्तद्वान् अत्यन्ताभावः तद्वांश्चार्थः।

"स्तोकादृते पचति, जलादृते गन्धः, गन्धादृते पाषाणः, धूमादृते वह्निः" इति चतुर्णामुदाहरणानि।

प्रथमे स्तोकभेदस्य पाके स्वरूपेण, द्वितीये जलभेदवतो निष्ठत्वेन गन्धेऽन्वयः। भेदस्य ऋतेशब्दार्थत्वेऽपि जलभेदगन्धयोः सामानाधिकरण्यलाभो न स्यात्। ऋते पदस्य सप्तम्यन्तस्मरणेऽपि सप्तम्याः सामानाधिकरण्यावाचकत्वात् इति भेदवानेव तत्र ऋते पदार्थः। निष्ठत्वं संबन्धः लुप्तसप्तम्यर्थो वा।

"गन्धादृते पाषाणः" इत्यत्रान्योन्याभावतद्वतोर्वाच्यत्वे गन्धादृते कुसुममित्यपि प्रमाणं स्यात्, गन्धभेदस्य कुसुमेऽपि सत्त्वात् इति तत्रात्यन्ताभाव एव ऋतेपदार्थः। तस्य स्वरूपेण पाषाणेऽन्वयः। गन्धात्यन्ताभाववान् पाषाण इति बोधः।

"धूमादृते वह्निः" इत्यत्र अन्योन्याभावतद्वतोः अत्यन्ताभावस्य वा ऋतेपदार्थत्वे धूमादृते आर्द्रेन्धनप्रभववह्निः इत्यपि प्रमाणं स्यात्। अतोऽत्यन्ताभाववानेव ऋतेपदार्थः। तस्याधेयतासंबन्धेन वह्नावन्वयात् धूमाभाववद्वृत्तिर्वह्निः

---

[१] सू. ८.१.२

इति बोधः। आर्द्रेन्धनप्रभववह्नेः धूमात्यन्ताभाववद्वृत्तित्वविरहात् न धूमादृते आर्द्रेन्धनप्रभववह्निरिति वाक्यस्य प्रामाण्यम्।

विभक्त्यर्थनिर्णये[1] अन्यारादित्यादिसूत्रव्याख्यानसरणिः

अन्यादिशब्दयोगे नानाविधार्थिकां पञ्चमीं ज्ञापयति "अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते"[2] इति सूत्रम्। अन्यः अरात् इतर ऋते इति स्वरूपतः शब्दाः, दिक्शब्दाः दिग्भेदार्थकशब्दाः पूर्वादयः न तु दिक्सामान्यार्थकाः दिगादयः, अञ्चूत्तरपदाः शब्दाः दिग्भेदार्थकाः प्रागादयः न तु सध्र्यङ् देवद्र्यङ्ङादयः, आच्प्रत्ययः आहिप्रत्ययश्च एतैः शब्दैर्योगे पञ्चमी भवतीत्यर्थकम्। अन्येतरयोरुभयोरुपादानं पर्यायग्रहणार्थम्। तेन परभिन्नादिशब्दयोगेऽपि पञ्चमी साधुः।

अन्यशब्दस्य भेदविशिष्टोऽर्थः। भेदविशिष्टार्थकप्रातिपदिकशब्दः पर्यायः तादृशः शब्दो रूढ इतरपरादिः कृत्तद्धितान्तादिर्भिन्नभेदवदादिः।

"शक्रादन्यो नहुषः" इत्यत्र पञ्चम्याः स्वप्रकृत्यर्थतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नप्रतियोगित्वमर्थः। तच्च व्युत्पत्तिवैचित्र्येणान्यपदार्थैकदेशे भेदे स्वनिरूपितानुयोगितासंबन्धेनान्वेति। प्रकृत्यर्थस्याधेयतया तथाविधप्रतियोगित्वेऽन्वयः। तथा च शक्रवृत्तिशक्रत्वावच्छिन्नप्रतियोगिताकभेदवदभिन्नो नहुष इत्यन्वयबोधः।

न च प्रतियोगित्वमात्रं पञ्चम्यर्थोऽस्तु, किमवच्छिन्नान्तनिवेशेनेति वाच्यम्। तथा सति "घटादन्यो घटः" इति प्रयोगप्रसङ्गात्। घटनिष्ठप्रतियोगिताकस्य नीलघटभेदस्य पीतघटे सत्त्वात्।

ननु प्रकृत्यर्थस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नत्वेन आधेयत्वेन चोभाभ्यां संबन्धाभ्यां पञ्चम्यर्थे प्रतियोगित्वेऽन्वयोपगमात् नोक्त दोष इति चेत्, सत्यम्। तथा सति पञ्चमी साधुत्वार्थिकैव। प्रकृत्यर्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन संबन्धेनान्यत्वेऽन्वय इत्येव ज्यायः।

अत एव "अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वमिह व्युत्पत्तिबललभ्यम्। न हि भवति 'नीलो घटो घटादन्य' इति" इत्यनुमानदीधितावुक्तम्।

समानविभक्तिकनामार्थयोरेव भेदान्वयो न व्युत्पत्तिसिद्धः। अत एव विभक्तेर्निरर्थकतावादीनां मते "राज्ञः पुरुषः" इत्यादौ स्वस्वामिभावसंबन्धेन राजपदार्थस्य पुरुषपदार्थेऽन्वयः।

---

[1] पृ. ३६८

[2] सू. २.३.२९

यदि च विरुद्धविभक्तिकनामार्थयोरपि न भेदान्वयोऽभ्युपेयते, तदा प्रतियोगित्वमात्रं पञ्चम्यर्थः। तस्य प्रकृत्यर्थतावच्छेदकावच्छिन्नप्रतियोगित्वीयनिरूपितानुयोगितया भेदेऽन्वयः। अथ वा प्रकृत्यर्थतावच्छेदकावच्छिन्नत्वाधेयत्वोभयसंबन्धेन प्रकृत्यर्थस्य प्रतियोगित्वे तस्य स्वनिरूपितानुयोगितया भेदेऽन्वयः। अन्वयबोधस्तु पूर्ववदेव।

एवं शक्रादितरः परो भिन्नो भेदवान् वा इत्यादावन्वयो बोध्यः। इयांस्तु विशेषः। भिन्न इत्यत्र भेदाश्रयः भेदवानित्यत्र भेदसंबन्धी प्रतीयते। नञ्पदं न भेदविशिष्टार्थकमिति तद्योगे न पञ्चमी, किं तु प्रथमोपात्ता प्रथमैव।

न चैवं 'गुणाद्भेदो द्रव्यस्य' इत्यादौ भेदशब्दस्य विशिष्टार्थत्वाभावात् भेदमात्रार्थकतया पञ्चम्यनुपपत्तिरिति वाच्यम्। गुणाद्वैधर्म्यमित्यत्रेव गुणाद्भेद इत्यादावपि विभक्तपञ्चमीसंभवात् इत्यस्य वक्ष्यमाणत्वात्।

भवतु वा अन्यशब्दस्य भेदार्थकः शब्दः पर्यायः तथापि सूत्रे निपातातिरिक्तपर्यायस्य ग्रहणात् नञ्पदयोगे न पञ्चमी।

यत्तु अन्यपदस्य पृथक्त्वगुणविशिष्टोऽर्थः। पृथक्त्वार्थकशब्द एव पर्यायः। भिदधातोरपि पृथक्त्वमेवार्थः। नञ्पदं तु न पृथक्त्वार्थकमिति तद्योगे पञ्चमी न भवति। अत एव पृथक्त्वगुणसिद्धिरिति।

तत्तुच्छम्। अन्यादिशब्दस्य पृथक्त्वार्थकत्वासंभवात्। द्रव्यादन्यो गुण इत्यादिप्रयोगानुपपत्तेः। भिदेरपि न पृथक्त्वमर्थः। 'द्रव्यात् कर्मादिभ्यश्च भिद्यते गुणः' इत्यादिप्रयोगात्। गुणे गुणानङ्गीकारात् पृथक्त्वान्वयासंभवात्। भेदस्यान्वयसंभवात् भेदार्थकत्वावश्यंभावात्। भेदत्वस्याखण्डोपाधितया शक्यतावच्छेदकगौरवविरहात्। प्रकृते लक्षणानुपपत्तेः।

पृथक्त्वाख्यगुणसिद्धिस्तु "मल्लात् मल्लोऽपयाति, मेषात् मेषोऽपसरति" इत्यादौ पृथक्त्वस्यापि पञ्चम्यर्थतया तत्र प्रकृत्यर्थस्यावधितयान्वयः। तथाविधस्य पृथक्त्वस्य क्रियायां सामानाधिकरण्येनान्वयः।

न चात्र भेदः पञ्चम्यर्थः। तस्य प्रतियोगितावच्छेदकतया क्रियायामन्वय इति वाच्यम्। "परस्परस्मात् मल्लौ मेषौ वा अपसरतः" इत्यादावपादानकर्त्रोरुभयोः क्रियावत्त्वात् भेदान्वयासंभवात्।

न च तत्तत्क्रिया भेदप्रतियोगितावच्छेदिकेति वाच्यम्। तत्तत्क्रियादेर्भेदप्रतियोगितावच्छेदकत्वेऽपि धातुना ताद्रूप्येणानुपस्थापनात् तत्रान्वयासंभवात्। भेद-

प्रतियोगितावच्छेदकमपसरणमिति सामान्यतो बोधस्य स्वस्मादपसरत इत्यादावपि संभवात् इत्यादियुक्तेः गुरुग्रन्थादौ युक्त्यन्तरस्य पृथक्त्वसाधकस्य अनुसन्धानेन पृथक्त्वं साधनीयमिति।

प्रकृते पृथक्त्वानुपपत्तिः। सूत्रशब्दस्य पृथक्त्वार्थकत्वकल्पनं नैव युज्यते। यतो हि सिद्धमर्थं शब्दोऽभिधत्ते, न हि शब्देनार्थसिद्धिः। अन्यथा खपुष्पादिशब्दात् अतिरिक्तवस्तुसिद्ध्यापत्तेः।

नञोऽभावत्वं प्रवृत्तिनिमित्तं न तु भेदत्वम्। अनुयोगिवाचके प्रथमान्ते सति प्रथमान्तार्थस्य तादात्म्यावच्छिन्नप्रतियोगितया नञर्थेऽभावेऽन्वयोपगमात् "घटो न पटः" इत्यादौ घटादौ पटादिभेदस्य अर्थतः प्रतीतिसंभवात् नञ्योगे पञ्चम्यप्रसक्तेः 'घटो न पटात्' इत्यादिको न प्रयोग इत्यपि वदन्ति।

ऋतेयोगे पञ्चमी यथा — "कृष्णादृते व्रजो विरसः" इत्यादौ। अत्र पञ्चम्याः प्रतियोगित्वमर्थः। तत्र प्रकृत्यर्थस्य पूर्ववदन्वयः। ऋतेशब्दार्थोऽत्यन्ताभावः। तत्र प्रतियोगित्वस्य पूर्ववदन्वयः। विरसस्तु प्रीत्यजनकः। तथा च कृष्णवृत्तिकृष्णत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववान् व्रजः प्रीत्यजनकाभिन्न इत्यन्वयबोधः।

ऋतेशब्दार्थो भेदोऽपि। यथा "कृष्णादृते जनः गोवर्धनासह" इत्यादौ कृष्णवृत्तिकृष्णत्वावच्छिन्नप्रतियोगिताकभेदवान् जनः गोवर्धनासह इति बोधात्।

क्वचिदत्यन्ताभाववान् भेदवांश्च ऋतेशब्दार्थः। यथा "रामादृते न लक्ष्मणः" इत्यत्रात्यन्ताभाववान्, "रामादृते भक्तिः प्रीतिर्वा न लक्ष्मणस्य" इत्यत्र भेदवान् प्रतीयते।

आराद्योगे पञ्चमी यथा — "ग्रमादारात् तटाकः, तटाकादारात् वनम्" त्यादौ। आराच्छब्दो दूरसमीपयोर्वर्तते। सामीप्यं च सामान्यतः संयुक्तसंयोगित्वम्। विशेषतः स्वल्पेतरसंयोगघटितपरंपरासंबन्धवत्त्वम् इतरापेक्षम्। तदन्यत् सामान्यतः समीपान्यत्वं दूरत्वं बहुतरसंयोगघटितपरंपरावत्त्वम्। परंपराघटकप्रथमसंयोगान्वयि प्रतियोगित्वं तु पञ्चम्यर्थः। सामीप्यदूरत्वघटकचरमसंयोगयोः तटाकवनादावन्वयः। तथा च ग्रामप्रतियोगिकसंयोगवद्देशसंयोगवान् तटाकः तटाकप्रतियोगिताकसंयोगवद्देशसंयुक्तबहुतरदेशसंयोगपरंपराघटकसंयोगवद् वनमिति अन्वयबोधः। वनादारादित्यत्र वनावधिकं परत्वमपरत्वं च अर्थ इति गुरुचरणाः।

दिक्शब्दयोगे यथा "ग्रामात् पूर्वो दक्षिणः पश्चिम उत्तरो वा आरामः" इत्यादौ। अत्र उदयाचलसंनिहितः पूर्वपदार्थः। बडवानलसंनिहितो दक्षिणपदार्थः। अस्ताचलसंनिहितः पश्चिमपदार्थः। कैलाससंनिहित उत्तरपदार्थः। पदार्थैकदेशतत्तत्सां-

निध्यान्वय्यवधित्वं पञ्चम्यर्थः। तच्च तत्तत्सांनिध्यस्वरूपपरंपराघटकसंयोगान्वयि-परंपरान्तरघटकसंयोगसंख्यान्यूनसंख्यावत्त्वम्। तत्र प्रकृत्यर्थस्य स्वसंयोगघटि-तत्वसंबन्धेन परंपरान्तरेऽन्वयः। तथा च ग्रामसंयोगघटितोदयाचलपरंपराघटक-संयोगन्यूनसंख्याकसंयोगघटितोदयाचलपरंपराघटकसंयोगवान् आराम इत्यन्वय-बोधः। एवं बडवानलादिसांन्निध्यमादायान्वयबोध ऊहनीयः।

वस्तुतस्तु तत्सान्निध्यं तत्संयोगघटितपरंपरान्तरघटकतत्संयोगघटितपरंपरा-घटकसंयोगवत्त्वम्। भवति हि ग्रामविश्रान्तोदयाचलसंयोगघटितपरंपरायाः घटिका उदयाचलसंयोगघटिता ग्रामविश्रान्ता परंपरेति ग्रामापेक्षया उदयस्यान्तिक आरामः इति।

एवं परंपरान्वयिसंयोगघटितत्वं पञ्चम्यर्थः। प्रकृत्यर्थस्य संयोगे आधेय-तयान्वयः। एवमन्वयबोध ऊहनीयः। घटकत्वं तु तद्विषयताव्यापकविषय-ताकत्वम्। घटितत्वं तु तद्विषयताव्याप्यविषयताकत्वम्।

परे तु उदयाचलाद्यवधिकापरत्वविशिष्टः पूर्वादिपदार्थः। पञ्चम्याः परत्वमर्थः। तत्र प्रकृत्यर्थस्य आधेयतयान्वयः। तथा च ग्रामवृत्तिपरत्वनिरूपकमुदया-चलावधिकं यदपरत्वं तदाश्रयस्तटाक इत्यन्वयबोधः "ग्रामात् पूर्वस्तटाकः" इत्यादौ जायते। एवमेव प्रागादिशब्दयोगेऽप्यन्वयबोध इति वदन्ति।

पूर्वादिशब्दस्य दिगन्यार्थे वर्तमानतायां पञ्चमी यथा "माधवात् पूर्वो मधुः, कृष्णात् पूर्वो हलायुधः" इत्यादौ। अत्र कालिकसंबन्धेन प्रागभाववान् पूर्वपदार्थः। प्रागभावान्वयि प्रतियोगित्वं पञ्चम्यर्थः। तत्र प्रकृत्यर्थस्याधेयतया अन्वयः। तथा च माधववृत्तिप्रतियोगिताकप्रागभाववान् मधुः इत्यादिरन्वयबोधः। प्रागभावकालो-त्पत्तिमत्त्वं न पूर्वपदार्थावच्छेदकम्, प्रागभावापेक्षया गुरुत्वादिति।

अन्ये तु कालिकपरत्ववान् पूर्वपदार्थः। परत्वान्वय्यपरत्वनिरूपकत्वं पञ्चम्यर्थः। प्रकृत्यर्थस्य आधेयतया अपरत्वेऽन्वयः। तथा च कृष्णवृत्त्यपरत्व-निरूपकपरत्ववान् हलायुध इत्यन्वयबोधः इत्याहुः।

यदि च "शब्दात् पूर्वं गगनं, जन्यज्ञानात् पूर्वो जीवः, कार्यमात्रात् पूर्वो भगवान्" इत्यादिः प्रयोगः तदा प्रागभावाधिकरणकालवृत्तित्वं पूर्वत्वम्। अथ वा अधिकरणसमयध्वंसानधिकरणत्वविशिष्टस्याधिकरणभेदस्य विशिष्टे समये वर्त-मानत्वम्। तथा च द्वितीयादिक्षणवर्तिन्यतिप्रसङ्गवारणाय विशिष्टस्येत्यन्तं भेदस्य विशेषणम्। आद्यक्षणवृत्तिनि स्वस्मिन् पूर्वत्ववारणाय अधिकरणभेदस्य वैशिष्ट्यं समयविशेषणम्। कालिकसंबन्धेन वस्तुमात्रानधिकरणे जीवादौ वर्तमानस्य

ज्ञानसुखादेः घटादिपूर्वत्ववारणाय समय इति पदे। तेन कालिकसंबन्धावच्छिन्नाधेयत्वं तथाविधानधिकरणनिरूपितं पूर्वत्वम्। तच्च जीवादौ कालिकेन वर्तमाने ज्ञानसुखादौ नातिप्रसक्तम्। अधिकरणत्वं ध्वंसाधिकरणत्वं च कालिकेनैव बोध्यम्। तेन कपालादिस्वरूपाधिकरणध्वंसाधिकरणकापालिकादिभिन्ने तन्तुसमुदाये वर्तमानस्य पटस्य न घटादिपूर्वत्वम्। तथाविधध्वंसानधिकरणत्ववैशिष्ट्यमधिकरणभेदस्य विशेषणताघटितसामानाधिकरण्येन बोध्यम्। अतः स्वोत्तरवर्तिनि नातिप्रसङ्गः।

एवं च पञ्चम्याः निरूपितत्वमर्थः। तच्च भेदप्रतियोगिन्यधिकरणे ध्वंसप्रतियोगिन्यधिकरणसमये चान्वेति। तथा च शब्दनिरूपिताधिकरणसमयध्वंसानधिकरणे शब्दनिरूपिताधिकरणभिन्ने समये वर्तमानं गगनम् इत्यादिरन्वयबोधः। एवमेव "माधवात् पूर्वो मधुः, कृष्णात् पूर्वो हलायुधः" इत्यादावप्यन्वयो बोध्यः।

अञ्चूत्तरपदयोगे यथा — "नगरात् प्राक् अवाक् प्रत्यगुदग्वा क्रीडापर्वतः" इत्यादौ। अत्राप्युदयाचलादिसंनिहितः प्रागादिशब्दार्थः। पूर्वोक्ततत्तत्सांनिध्यान्वयिपूर्वोक्तमवधिमत्त्वं पञ्चम्यर्थः। "ग्रामात् पूर्वं आरामः" इत्यादाविवान्वयबोधः। एवं "माधवात् प्राक् मधुः कृष्णात् प्राक् हलायुधः" इत्यादावप्यन्वयो बोध्यः।

प्रागादिशब्दानां दिक्शब्दत्वेऽपि "ग्रामस्य दक्षिणतः" इत्यादाविव अतसर्थप्रत्ययोगे प्रसक्तायाः षष्ठ्याः निषेधाय पृथग्ग्रहणम्। तेन "नगरात् प्राचीन आराम" इत्यादौ अतसर्थस्य प्रत्ययस्य योगे षष्ठी न भवति।

आच् योगे आहियोगे च यथा "नगराद्दक्षिणा दक्षिणाहि वा पर्वतः, नगरादुत्तरा उत्तराहि वा कासारः" इत्यादौ। अत्र दक्षिणोत्तरशब्दयोरर्थः पूर्वोक्त एव। पञ्चम्याः पूर्वोक्तमवधिमत्त्वमर्थः। तच्च पूर्वोक्ततत्तत्सांनिध्येऽन्वेति। आजाहिप्रत्यययोरधिकरणार्थकयोः आधेयत्वमर्थः। तथा च नगरावधिकवडवानलसंनिहितदेशवृत्तिः पर्वत इत्यादिः अन्वयबोधः। अनयोः प्रत्यययोः अतसर्थतया प्राप्तषष्ठीनिषेधार्थमेव उपादानमिति।

अवयववाचिपूर्वादिशब्दयोगे षष्ठ्येव प्रमाणम्। "तस्य परमाम्रेडितम्"[१] इति निर्देशात्। तेन "पूर्वं कायस्य शरीरस्य दक्षिणाहि तिल" इत्यादौ कायशरीरादिपदान्न पञ्चमी। पूर्वपदस्य पूर्वकायस्वरूपवाचकत्वात्। दक्षिणपदस्य दक्षिणभागस्वरूपशरीरावयववाचकत्वादिति।

---

[१] सू. ८.१.२

"अपादाने पञ्चमी"[१] इति सूत्रविवेचने "कार्तिक्याः प्रभृति" इति भाष्यप्रयोगात् प्रभृतिशब्दयोगे पञ्चमी। तदेतत् भाष्यं विवृण्वता कैयटेन तत आरभ्येत्यर्थः इत्युक्तम्। तेन आरभ्येति ल्यबन्तयोगेऽपि पञ्चमी साधुरिति ज्ञायते। "कार्तिक्याः प्रभृति आरभ्य वा सेव्यते गङ्गा" इत्यादौ प्रभृतिशब्दस्याधिकरणकाल-ध्वंसाधिकरणसमयोऽर्थः। आरभ्येति शब्दस्याप्ययमेवार्थः। पञ्चम्यास्तु अधि-करणान्वयि निरूपकत्वमर्थः। प्रभृत्यर्थः सेवने व्यापकतया आधेयतया वा अन्वेति। तथा च कार्तिक्यधिकरणसमयध्वांसाधिकरणं यः समयः तद्व्यापकस्य तद्वृत्तेर्वा सेवनस्य कर्म गङ्गेत्यन्वयबोधः। एवमेव "भवात् प्रभृति आरभ्य वा सेव्यो हरिः" इत्यादावन्वयबोधो बोध्यः।

ततः प्रभृति संक्रान्तावुपरागादिपर्वसु।
त्रिपिण्डमाहरेच्छ्राद्धमेकोद्दिष्टं मृताहनि।।

इत्यादौ यदि प्रभृत्यर्थस्य निपातार्थतया संक्रान्त्यादिकालेऽभेदान्वयो न युज्यते तदा संक्रान्त्यादिवृत्तिश्राद्धप्रभृत्यर्थस्य आधेयतयैवान्वय इति।

"अपपरिबहिरञ्चवः पञ्चम्या"[२] इति सूत्रेण समासविधानात् ज्ञापकात् बहिःशब्दयोगेऽपि पञ्चमी साधुरिति ज्ञायते।

"नगराद् बहिः आरामः" इत्यादौ अवयवसंयुक्तान्यावयवसंयुक्तो बहिः शब्दार्थः। पञ्चम्याः अवयवान्वयि समवायित्वम् अन्वयत्वान्वयि प्रतियोगित्वं चार्थः। बहिः पदार्थस्याधेयतया आरामेऽन्वयः। तथा च नगरसमवाय्यवयवसंयुक्तो यो नगरप्रतियोगिकभेदवत्संबन्ध्यवयवसंयुक्तः तद्वृत्तिः आरामः इत्यन्वयबोधः। "काश्याः बहिर्मिथिला" इति प्रयोगवारणाय अवयवसंयुक्तत्वम्, अन्यावयवसंयुक्ते विशेषणम्। अत एवानधिकरणं बहिःपदार्थ इत्यपि प्रत्युक्तम्। घटस्य घटानधि-करणतया "घटे जलं घटात् बहिः" इति प्रयोगप्रसङ्गाच्च।

"ज्ञापकसिद्धं न सर्वत्र" इति 'करस्य करभो बहिः' इत्यादौ षष्ठी। अत्र पृष्ठावयवयुक्तोऽवयवो बहिरर्थः। तत्र षष्ठ्यर्थसंबन्धस्यान्वय इति।

भाट्टरहस्ये[३]

"अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते"[१] इति सूत्रेण एभिः शब्दैर्योगे पञ्मीत्यर्थकेन "कृष्णादन्यः" इत्यादौ पञ्चमी। प्रतियोगित्वमत्र पञ्चम्यर्थः। तस्य

---

[१] सू. २.३.२८
[२] सू. २.१.१२
[३] भा.र.पृ. १५७

स्वनिरूपकान्योन्याभावाश्रयकर्तृकत्वसंबन्धेन अध्याहृताख्यातार्थेऽन्वयः। अन्य इत्यर्थग्रहणमिति सूचनाय पृथक् इतरपदोपादानम्। अत एव 'कृष्णादितरः, कृष्णात् पृथक्' इत्यपि द्रष्टव्यम्।

न चैवं "घटः पटो न, घटस्यान्योन्याभावः, घटस्य संयोगाभावः, घटस्य तादात्म्याभावः" इत्यादावपि पञ्चम्यापत्तिः, 'घटाद्विभागः, घटात् भेदः पटस्य' इत्यादाविव धर्ममात्रवाचित्वेऽपि पञ्चम्यापत्तेर्दुर्वारत्वात् इति वाच्यम्।

पञ्चम्यर्थो हि प्रतियोगित्वं स्वनिरूपकभेदादिघटितसंबन्धेनास्मन्मते आख्यातार्थेऽन्वेति। तत्रान्यादिपदं संसर्गतात्पर्यग्राहकम्। परमते तु अन्यादिपदोपस्थापिते भेदादावेव निरूपकत्वसंबन्धेनान्वेतीति विशेषः।

तदिह अन्यादिपदैः भेदादेः विशिष्य भेदत्वादिनोपस्थापितत्वात् युक्ता तद्योगे पञ्चमी। अन्योन्याभावादिपदैस्तु अन्योन्यादिपदवाच्यतादात्म्याद्यभावेन बोधान्न तद्योगे पञ्चमी। नञोऽपि लाघवेन अभावत्वेनैव वाचकता, न तु, भेदत्वादिना, अनेकशक्तिकल्पनापत्तेः। तथा च भेदत्वावच्छिन्नभेदवाचकपदयोग एव पञ्चमीति अभावत्वावच्छिन्नवाचकनञ्योगे न पञ्चमी।

न चैवं "घटः पटो न" इत्यादौ पञ्चम्यनापत्तावपि षष्ठ्यापत्तिर्दुर्वारेति वाच्यम्। "नियतप्रयोगा हि केचिदव्ययाः" इत्यनुशासनान्तरेण तदनापत्तेः। "नेयं विभाषा" इत्यादिभाष्यप्रयोगाच्च। नञ्योगे पञ्चम्यां हि नेयं विभाषायाः इति प्रयोक्तव्यम्।

"वनादारात् ग्रामः, ऋते कृष्णान्न किंचित्"। अत्रापि प्रतियोगित्वं पञ्चम्यर्थः। वनप्रतियोगिकदूरत्वसमीपत्ववान् ग्रामः, कृष्णप्रतियोगिकाभावप्रयुक्तः किंचिदभावः इति बोधः।

यस्तु पुरुषाराधनमृते इति प्रयोगः, स "ऋते द्वितीया च" इति चान्द्रसूत्रादवगन्तव्यः।

दिशि दृष्टः शब्दो दिक्शब्दः। तेनात्र लक्षणया देशकालवाचिना शब्देन योगे पञ्चमीत्यर्थः। "पूर्वो ग्रामाद्देशः, चैत्रात् पूर्वः फाल्गुनः" इत्यादिकमुदाहरणम्। अवयववाचिना पूर्वादिना योगे तु न पञ्चमी। पूर्वं कायस्य। अञ्चूत्तरपदयोगे — प्राक् प्रत्यग्वा ग्रामात्। आच्योगेऽपि — दक्षिणा ग्रामात्।[1] आहियोगेऽपि — दक्षिणाहि ग्रामात्।

---

[1] सू. २.३.२९

एवं "कार्तिक्याः प्रभृति"[1] इति भाष्ये प्रयोगात् प्रभृत्यर्थयोगेऽपि पञ्चमी। "भवात् प्रभृति सेव्यो हरिः"।

अपपरी वर्जने[2] इत्यादिसूत्रव्याख्यानम्

एतौ वर्जने कर्मप्रवचनीयौ स्तः।

आङ् मर्यादावचने[3] — आङ् मर्यादायामुक्तसंज्ञः स्यात्। वचनग्रहणादभिविधावपि।

पञ्चम्यपाङ्परिभिः[4] — एतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। "अपहरेः, परिहरेः संसारः"। परिरत्र वर्जने। हरिं वर्जयित्वा जनिमृतिचक्रात्मकं संसरणमित्यर्थः। लक्षणादौ तु "हरिं परि"। "आमुक्तेः संसारः"। मुक्तेः प्राक् इत्यर्थः। "आ सकलात् ब्रह्म"। ब्रह्म सकलमभिव्याप्य वर्तत इत्यर्थः।

लघुमञ्जूषायाम्[5]

"अपहरेः संसारः"। हरिशब्दस्तद्भक्तिपरः। हरिविषयकभक्त्यभावसमानाधिकरणः संसार इति बोधः।

"आमुक्तेः संसारः"। अत्र आङः मर्यादा अर्थः। तत्र मर्यादा द्विविधा कालरूपा देशरूपा च। कालगतमर्यादात्वं च स्वस्वोत्तरकालयोः स्वप्रागभावाधिकरणकालभवो यः समभिव्याहृतपदार्थः तदनधिकरणत्वम्। स्वस्वोत्तरकालयोः इत्यस्य तदनधिकरणत्वमित्यत्रान्वयः। स्वं — मुक्तिः। मुक्त्युत्पत्तिकालः मुक्त्युत्पत्त्युत्तरकालश्च। तयोः मुक्तिप्रागभावाधिकरणकालभवो यः संसारः तदनधिकरणत्वं मुक्तितदुत्तरकालयोरस्ति। मार्यादामार्यादिभावः संबन्धः आङ्द्योत्यः पञ्चम्यर्थः। मुक्तिमर्यादाकः संसार इति बोधः। संसारे मुक्तिकालप्रागभावाधिकरणकालनिरूपिता तद्भिन्नकालावृत्तित्वविशिष्टा च या व्यापकता तद्बोधः न शाब्दः, अपि तु आर्थः।

"प्रयागात् प्रभृति आकाश्याः वृष्टो देवः" इत्यादौ देशो मर्यादा। देशगतमर्यादात्वं च स्वस्वोत्तरदेशयोः प्रयागतदाद्यन्तरालदेशवृत्तिसमभिव्याहृतपदार्थवृष्ट्याद्यनधिकरणत्वम्।

---

[1] म.भा.पृ. ५०६

[2] सू. १.४.८८

[3] सू. १.४.८९

[4] सू. २-३-१०

[5] पृ. १३०५

प्रयागादिकाशीमर्यादाकवृष्टिकर्ता देव इति बोधः। वृष्टौ प्रयागादिकाशीपश्चिम-देशनिरूपितस्वभिन्नवृत्तित्वसमानाधिकरणव्यापकताबोधस्त्वार्थः।

"आ सकलात् ब्रह्म"। आङ्द्योत्योऽभिविधिरूपः संबन्धः पञ्चम्यर्थः। सकलव्यापकं ब्रह्मेति बोधः। अभिविधिरपि द्विविधः कालिको दैशिकश्च। आद्यो यथा — "कार्तिक्याः चैत्रं यावच्छीतम्"। कार्तिकीप्रभृति चैत्रान्तकालव्यापकं शीतमिति बोधः। चैत्रपदं तदन्तकालपरम्। अन्त्यो यथा — "काशीतः पाटलिपुत्रं यावत् वृष्टो देवः"। काशीप्रभृति पाटलिपुत्रान्तदेशव्यापकत्वं वृष्टौ प्रतीयते। अनयोः तात्पर्यवशात् कदाचित् व्यापकत्वं तद्भिन्नकालावृत्तित्वविशिष्टं तद्भिन्न-देशावृत्तित्वविशिष्टं च प्रतीयत इति बोध्यम्।

शब्दशक्तिप्रकाशिकायाम्[१]

"परि गृहात् गतः, अप गृहात् भुक्तः" इत्यादौ परि अप अनयोः परित्यज्ये-त्यर्थः। स च धात्वर्थ एव साकाङ्क्षः। तेन 'गृहात् परि चैत्रः' इत्यादिको न प्रयोगः।

"आ देहात् वस्त्रम्, आ गृहात् उद्यानम्" इत्यत्र अभिव्याप्तत्वं मर्यादा वा आङोऽर्थः। तेन "देहव्याप्तं वस्त्रम्, गृहमर्यादाकमुद्यानम्" इत्यकारकस्तत्र बोधः, तत्पर्यन्तत्वं तदवधिकविप्रकर्षशून्यत्वे सति तत्संनिकृष्टत्वरूपं मर्यादापदार्थः। तदभिव्याप्तत्वं तदारम्भकावयवावच्छेदेन तत्संयुक्तत्वम् — इति प्रत्यपादि।

पदवाक्यरत्नाकरे[२]

"अप हरेः परि हरेर्वा संसारः" इत्यत्र अत्यन्ताभावः कर्मप्रवचनीययोः अपपर्योरर्थः। पञ्चम्याः आधेयत्वमर्थः। अत्यन्ताभावस्य प्रतियोगितासंबन्धेन संसारेऽन्वयः। हरिवृत्त्यत्यन्तावभावप्रतियोगी संसार इति बोधः।

मर्यादायां वर्तमानस्य आङः क्वचित् अव्यवधानाभावः क्वचित् संसर्गा-भावोऽर्थः। अव्यवधानं क्वचित् कालिकं क्वचित् दैशिकं क्वचित् पाठिकं क्वचित् अन्यथापि। संसर्गस्य तादात्म्यसंयोगसादेश्य समानकालीनत्वादेरभावोऽपि यथायथं तात्पर्यवशादुपतिष्ठते।

"आ मुक्तेः संसारः" इत्यत्र मुक्तिनिरूपितं कालिकमव्यवधानं मुक्तिसमान-कालिकत्वाभावः। "आसमुद्रात् मृदः" इत्यत्र मृदां समुद्रनिरूपितं दैशिक-मव्यवधानं तादात्म्यस्य सादेश्यस्य संयोगस्य वा अभावो भासते। "आक-

---

[१] पृ. ३७९
[२] पृ. ७७९

डारादेका संज्ञा"[१] इत्यत्र एकसंज्ञाकशब्दविधीनां कडारसूत्रनिरूपितं पाठिकमव्यवधानं तत्पठितत्वाभावश्च बोध्यत इति।

अभिविधौ वर्तमानस्य आङः व्यापकत्वमितरसंबन्धश्चार्थः। तत्र व्यापकताघटकः इतरनिरूपितश्च एक एव संसर्गः प्रतीयते।

"आ परमाणोः पृथिवी" इत्यादौ पृथिवीत्वसामानाधिकरण्येन तादात्म्यसंसर्गावच्छिन्ना पच्यमानपरमाणुव्यापकता तदितरतादात्म्यं च भासते। परमाणोस्तादात्म्येन जलीयपरमाणावपि सत्त्वात् व्यभिचारवारणाय पच्यमानेति। पच्यमानत्वं च पार्थिवपरमाणावेव नान्यत्र।

"आसमुद्रात् यशः" इत्यत्र यशसि समुद्राभिव्यापकत्वं समुद्रेतरसंबन्धश्च भासते।

तत्संबन्धतदितरसंबन्धावेवाभिविधिः, न तु व्यापकतापि आ परमाणोरिति दर्शनादित्यपि वदन्ति।

विभक्त्यर्थनिर्णये[२]

पञ्चमीविधायकयोगार्थं केषुचिच्छब्देषु कर्मप्रवचनीयसंज्ञां विधत्ते "अपपरी वर्जने"[३] इति सूत्रम्। अपपरिशब्दौ वर्जनेऽर्थे कर्मप्रवचनीयसंज्ञौ भवतः इत्यर्थकम्। वर्जनाद्यर्थविरहे न कर्मप्रवचनीयता, यथा "ओदनं परिषिञ्चति" इत्यादौ।

"आङ् मर्यादावचने"[४] इति सूत्रम् आङ् इत्येष शब्दः मर्यादावचने स्वार्थमर्यादाप्रतिपादने सति कर्मप्रवचनीयसंज्ञो भवतीत्यर्थकम्। मर्यादायामित्येतावन्मात्रोक्त्यैव समीहितसिद्धौ वचनग्रहणमभिविधावपि कर्मप्रवचनीयतां ज्ञापयति। तथा हि काशिका "वचनग्रहणादभिविधिरपि गृह्यते" इति। मर्यादावचन इति ईषदर्थे क्रियायोगे पञ्चमीं ज्ञापयति "पञ्चम्यपाङ्परिभिः"[५] इति सूत्रम् अप आङ् परि इत्येतैः कर्मप्रवचनीयैर्योगे पञ्चमी भवतीत्यर्थकम्।

"अप त्रिगर्तेभ्यः परि त्रिगर्तेभ्यो वा वृष्टो देवः" इत्यादौ अपपरिशब्दयोः वर्जनमत्यन्ताभावोऽर्थः। पञ्चम्याः आधेयत्वमर्थः अत्यन्ताभावेऽन्वेति। स प्रति-

---

[१] सू. १.४.१

[२] पृ. ३७६

[३] सू. १.४.८८

[४] सू, १.४.८९

[५] सू. २.३.१०

योगितया वृष्टावन्वेति। तथा च त्रिगर्तवृत्त्यत्यन्ताभावप्रतियोगिवृष्टिकर्ता देव इत्यन्वयबोधः। एवमेव "अपहरेः परि हरेर्वा संसारः" इत्यादावप्यन्वयो बोध्य इति संप्रदायः।

अत्र समानकालिकत्वसंबन्धेनाप्यत्यन्ताभावस्य समभिव्याहृतपदार्थे वृष्ट्यादावन्वयः। तेन कालान्तरावच्छेदेन त्रिगर्तवृत्तेरत्यन्ताभावस्य प्रतियोगिन्यपि त्रिगर्तवर्षणे तथा न प्रयोगः।

वस्तुतस्तु समभिव्याहृतार्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन संबन्धेनात्यन्ताभावेऽन्वयः। तथाविधात्यन्ताभावस्य समानकालिकतया समभिव्याहृतार्थेऽन्वयः। तथा च त्रिगर्तवृत्तेः वृष्ट्यत्यन्ताभावस्य समानकालिकी या वृष्टिः तत्कर्ता देव इत्यन्वयबोधः। तेन त्रिगर्तवृत्तेः वृष्टिगगनाद्युभयाभावस्य प्रतियोगिनि समानकालिकेऽपि त्रिगर्तवर्षणे तथा न प्रयोगः।

आङो मर्यादा अर्थः। सा चाव्यवधानसंसर्गयोः अभावौ। तत्राव्यवधानं क्वचित् कालिकं क्वचित् दैशिकं क्वचित् पाठिकं क्वचिदन्यथापि। संसर्गस्य तादात्म्यसंयोगसादेश्यसमानकालिकत्वादेरभावोऽपि यथायथं तात्पर्यवशादुपतिष्ठते।

"आ मुक्तेः संसारः" इत्यत्र संसारे मुक्तिनिरूपितं कालिकमव्यवधानं मुक्तिसमानकालिकत्वाभावश्च, "आ समुद्रात् मृदः" इत्यत्र मृदां समुद्रनिरूपितं दैशिकमव्यवधानं तादात्म्यस्य सादेश्यस्य संयोगस्य वा अभावश्च, "आकडारादेका संज्ञा"[१] इत्यत्र एकसंज्ञाकशब्दविधीनां कडारसूत्रनिरूपितं पाठिकमव्यवधानं तत्पठितत्वाभावश्च अवगम्यते।

अभिविधौ वर्तमानस्य आङः व्यापकत्वमितरसंबन्धश्चार्थः। स च व्यापकताघटक इतरनिरूपितश्च एक एव संसर्गः प्रतीयते। आ परमाणोः (पृथिवीत्यादौ) पृथिवीत्वसामानाधिकरण्येन तादात्म्यसंसर्गावच्छिन्ना पच्यमानपरमाणुव्यापकता तदितरतादात्म्यं च भासते। "आ समुद्राद्यशः" इत्यादौ यशसि समुद्राभिव्यापकत्वं समुद्रेतरसंबन्धो भासत इतीयं रीतिरन्यत्रापि ज्ञेयेति पदवाक्यरत्नाकरे गुरुचरणाः।

व्युत्पत्तिवादपरिशीलनम्

केचित्तु यावच्छब्दतुल्यार्थकस्य आङः मर्यादा अभिविधिश्चार्थः। मर्यादा तु सीमा कालरूपा देशरूपा च। कालरूपा यथा "तस्यामारभ्य तां देवीमा दशम्याः प्रपूजयेत्" इत्यादौ। कालनिष्ठं सीमात्वं तु समभिव्याहृतकालप्रागभावानधिकरण-

---

[१] सू. १.४.१

स्वप्रागभावाधिकरणस्वसजातीययावत्कालवृत्तिसमभिव्याहृतक्रियानधिकरणत्वम्। दर्शितस्थले पूजारूपक्रियायाः शुक्लदशमीनिष्ठसीमात्वनिरूपकत्वमाङ्शब्देन प्रत्याय्यते। तावतैवार्थतः शुक्लदशम्याः मर्यादात्वं लभ्यते। तन्निष्ठसीमात्वनिरूपकत्वं च तद्वृत्तित्वे सति कृष्णनवमीप्रागभावानधिकरणतत्प्रागभावाधिकरणतिथिकूटव्यापकत्वम्।

तावता षोडशतिथ्यधिकरणकषोडशपूजारूपस्यैककर्मणो विधेयतया लाभः। व्याप्यकालसमुदाये सजातीयत्वविशेषणात् पूजाया उक्तविशेषणद्वयाक्रान्तदण्डादिसमुदायाव्यापकत्वेऽपि न बाधः। अन्वयितावच्छेदकघटकरूपेण साजात्यस्य विवक्षणात् उक्तस्थले च तिथेरित्यध्याहारेण दशमीपदार्थतावच्छेदकस्य तिथित्वघटितत्वेन वा अन्वयितावच्छेदकतया तिथित्वलाभात् तेन रूपेण दण्डादेः दशमीसजातीयत्वाभावात्। तिथिः सखण्डकालविशेषरूपः। तत्र च प्रागभाव एव आङोऽर्थः। पञ्चम्याः प्रतियोगित्वमनुयोगित्वं वा अर्थः। तत्र प्रकृत्यर्थस्य दशम्याः अन्वयः। तावता च दशमीप्रतियोगिकप्रागभावलाभः। तस्य स्वप्रतियोग्यवृत्तित्वविशिष्टव्यापकतासंबन्धेन पूजारूपसमभिव्याहृतक्रियायामन्वयः। व्यापकत्वं च स्वाधिकरणतिथिनिष्ठाभावप्रतियोगितानवच्छेदकपूजाविशेषत्ववत्त्वं स्वाधिकरणकृष्णनवमीप्रतियोगिकप्रागभावावच्छिन्नभेदविशिष्टकालिकविशेषणतासंबन्धेन बोध्यम्। तेन कृष्णनवमीप्रतियोगिकप्रागभाववत्प्रतियोगिकभेदस्याप्रसिद्धावपि न क्षतिः। तद्दशमीप्रागभावाधिकरणकालस्य स्वाधिकरणकृष्णनवमीप्रागभावावच्छिन्नभेदवत्त्वसंबन्धेन तत्प्रागभावाधिकरणत्वाक्षतेः।

न चैवं व्यवहितकृष्णनवमीप्रतियोगिकप्रागभावावच्छिन्नभेदघटितसंबन्धेन प्रकृतकृष्णनवमीपूर्वतिथीनामपि तत्तद्दशमीप्रागभाववत्त्वात् तदधिकरणतिथिव्यापकत्वं पूजाविशेषेऽपि न संभवतीति वाच्यम्। स्वावच्छिन्नकृष्णनवमीप्रागभावाधिकरणत्वसंबन्धेन स्वावच्छिन्नभेदस्य संबन्धघटकत्वोपगमात्। तेन संबन्धेन प्रकृतनवमीपूर्वतिथीनां तत्तद्दशमीप्रागभावानधिकरणत्वात् पूजाविशेषस्य व्यापकत्वाक्षतेः।

देशरूपा यथा "काशीतः आ कौशिक्याः व्रजति" इत्यत्र कौशिक्या गमनसीमात्वं प्रतीयते। तच्च काशीपूर्वकौशिकीपश्चिमदेशव्यापकगमनानधिकरणत्वम्। आङ्शब्देन कौशिक्यनधिकरणकत्वे सति काशीपूर्वकौशिकीपश्चिमदेशव्यापकत्वं गमने प्रत्याय्यते। तत्र आङ्शब्दार्थः पश्चिमदेशः। तदन्वय्यवधिमत्वं पञ्चम्यर्थः। तत्र प्रकृत्यर्थस्य कौशिक्या अन्वयः। तावता कौशिका-

वधिकपश्चिमदेशलाभः। तस्य स्वावधीभूतकौशिक्यवृत्तित्वविशिष्टव्यापकत्वसंबन्धेन गमनेऽन्वयः। व्यापकत्वं च काशीपूर्वाभिन्नस्वनिष्ठाभावप्रतियोगितानवच्छेदकगमनविशेषत्ववत्त्वमिति।

अभिविधिरपि कालरूपो देशरूपश्च। कालरूपो यथा "कार्तिकमारभ्य आ चैत्राच्छीतं भवति" इत्यादौ। देशरूपो यथा "काशीतः आपाटलिपुत्रात् वृष्टो देवः" इत्यादौ। प्रथमे कार्तिकपूर्वकालोत्तरचैत्रोत्तरकालपूर्वकालव्यापकत्वं चैत्रोत्तरकालावृत्तित्वसहितं शीतभावे प्रत्याय्यते। द्वितीये काशीपश्चिमदेशपूर्वपाटलीपुत्रपूर्वदेशव्यापकत्वं पाटलिपुत्रपूर्वदेशावृत्तित्वसहितं वृष्टावाङ्शब्देन प्रत्याय्यते। शेषः पूर्वदिशावसेय इत्याहुः।

तच्चिन्त्यम्। मर्यादायां व्यापकताभाने मानाभावात्। "आ कडारादेका संज्ञा"[१] इत्यत्र व्यापकताभानस्य असंभवाच्च। तथा हि एष संज्ञाविधिः न कडारसूत्रपूर्वसूत्रव्यापकः। "इको गुणवृद्धी"[२] "न धातुलोप आर्धधातुके"[३] इत्यादिपूर्वसूत्रे तद्विरहात्। नाप्यव्यवहित-पूर्व-सूत्रव्यापकः। "वाहिताग्न्यादिषु"[४] इत्यव्यवहितपूर्वसूत्रे तद्विरहात्। एवं "प्रभासत आ गङ्गासागरात् मृदः" इत्यादौ प्रभासपूर्वभूतगङ्गासागरपश्चिमदेशानां सरित्कासारदेवखातानां मृदन्यत्वात् मृदां तादृशदेशाव्यापकत्वात् तद्भावायोगाच्च।

एवम् "आ परमेश्वरात् आत्मनां कर्मबन्धः" इत्यादौ पूर्वोत्तरादिदेशकालान्यतरस्वरूपसीम्नोऽप्ययोगादिति। एवमभिविधावपि व्यापकत्वस्य सीम्नश्चानुपपत्तिरूहनीया।

तस्मात् मर्यादायामाङः संबन्धाभावः संबन्धिसंबन्धश्चार्थः। "आ कडारादेका संज्ञा"[५] इत्यत्र कडारसूत्रसंबन्धस्याभावः संबन्धश्च प्रतिपाद्यत्वम् एकसंज्ञाविधौ प्रतीयते। तत्र पञ्चम्या निरूपितत्वमर्थः। तथा च कडारसूत्रनिरूपितप्रतिपाद्यत्वाभाववान् कडारपूर्वसूत्रप्रतिपाद्य एकसंज्ञाविधिः इत्यन्वयबोधः।

अभावप्रतियोगी संबन्धिनिरूपितश्च एक एव संबन्धो बोध्यः। तेन समुद्रतादात्म्याभावसमुद्रसमकालिकत्वयोश्च गगने सत्त्वेऽपि आ समुद्रात् गगनमिति न प्रयोगः।

---

[१] सू. १.४.१
[२] सू. १.१.३
[३] सू. १.१.४
[४] सू. २.२.३७
[५] सू. १.४.१

यदि च कडारसूत्रोत्तरसूत्रेऽपि एकसंज्ञाविधिविरहोऽभिसंहितः तदा प्रागभावानधिकरणसूत्रप्रतिपाद्यत्वाभाव एव प्रकृते मर्यादा। तत्र प्रागभावानधिकरणसंबन्धाभाव आङोऽर्थः। पञ्चम्याः प्रतियोगित्वमर्थः प्रागभावेऽन्वेति। कडारसूत्रप्रतियोगिताकप्रागभावानधिकरणं कडारसूत्रं तदुत्तरसूत्रकदम्बकं च। आनुपूर्वीविशेषविशिष्टवर्णकलापस्वरूपस्य "वृद्धिरादैच्"[१] "अ अ" इत्यन्तस्य अष्टाध्यायीग्रन्थस्य "वाहिताग्न्यादिषु"[२] इति सूत्रान्तभागः कडारसूत्रानुपूर्वीविशिष्टवर्णप्रागभावस्याधिकरणम्। अनधिकरणं च "अनभिहिते"[३] इत्यादिसूत्रभाग इति तत्र तथाविधस्याधिकरणस्य स्वाभिन्नसूत्रनिरूपितप्रतिपाद्यत्वं संबन्धः। तथाविधानधिकरणस्य तु स्वाभिन्नसूत्रनिरूपितप्रतिपाद्यत्वसंबन्धाभावश्च एकसंज्ञाविधौ प्रतीयते। कडारसूत्रपूर्वत्वम् आङ्प्रयोगोत्तरत्वविशिष्टं बोध्यम्। यत्र आङ्प्रयोगे द्वितीयोऽवधिर्न दृश्यते तत्र आङ्प्रयोगाधिकरणमानुपूर्वी वा कालो वा देशो वा अवधिः। तत्रानुपूर्वी प्रकृते आकडारादेका संज्ञेति सूत्रानुपूर्वी तथाविधावधिः तथाविधानुपूर्व्युत्तरत्वविशिष्टस्य दर्शितसूत्रप्रागभावाधिकरणस्य दर्शितसंबन्धः प्रतीयते। अत एव काशिकायाम् आकडारादिसूत्रव्याख्याने — "कडाराः कर्मधारये"[४] इति वक्ष्यति। आ एतस्मात् सूत्रादवधेः यदित ऊर्ध्वमनुक्रमिष्यामः तत्र एकसंज्ञा भवतीति वेदितव्यम् — इत्युक्तम्।

तथाविधकालो यथा "आ मरणाद्धितमभिसन्धत्ते धीरः" इत्यादौ। अत्र हिताभिसन्धानस्य मरणकालाधेयत्वाभावः आङ्प्रयोगोत्तरमरणप्रागभावाधिकरणकालाधेयत्वं च प्रतीयते। अत्रापि न व्यापकत्वस्य भानम्। मरणप्रागभावाधिकरणसुषुप्त्यादिकालेऽभिसंधानविरहात्। अत्र संबन्धाधेयत्वं कालिकसंबन्धावच्छिन्नं बोध्यम्। अतो नानुपपत्तिः।

तथाविधदेशो यथा — "आसमुद्रात् क्षितिः" इत्यादौ। अत्र तादात्म्याभावः संयुक्तदेशतादात्म्यं च आङोऽर्थः। तत्र संयुक्तदेशे आङ्प्रयोगाधिकरणपार्थिवावधिकं पूर्वत्वं दक्षिणत्वं पश्चिमत्वमुत्तरत्वं च समुदितं प्रत्येकं वा तात्पर्यवशादवगम्यते। अतः समुद्रवर्तिनां न दर्शितप्रयोगः। तथा च समुद्रभिन्ना तादृशपार्थिवावधिकपूर्वेण समुद्रसंयुक्तवेलादिदेशेनाभिन्ना क्षितिरित्यन्वयबोधः।

क्वचित् सजातीयोऽप्यवधिः यथा — "मिथ्याज्ञानमा परमात्मनः" इत्यादौ। अत्र समवेतत्वाभावः भोक्तृसमवेतत्वं चाङोऽर्थः। भोक्ता तु साजात्यसंबन्धवानिति

---

[१] सू. १.१.१

[२] सू. २.२.३७

[३] सू. २.३.१

[४] सू. २.२.३८

नानुपपत्तिः। भोक्तुः व्यापकतासंबन्धेन समवायेऽन्वयः। तथाविधसमवायावच्छिन्नमाधेयत्वमवधिं विना मिथ्याज्ञानेऽनुपपन्नमिति।

स्थावरजीवन्मुक्तादिर्भोक्तावधिः। तस्यावधित्वं परमात्मन इव बोध्यम्। तथा च स्थावरजीवन्मुक्तासमवेतत्वविशिष्टं तथाविधभोक्तृसमवेतत्वम् अथ वा स्थावरजीवन्मुक्तभिन्नभूता एव भोक्तृतया भासन्ते। तथा च परमात्मासमवेतं स्थावरजीवन्मुक्तभिन्नभोक्तृव्यापकसमवायावच्छिन्नाधेयत्ववत् मिथ्याज्ञानमित्यन्वयबोधः।

क्वचिन्न द्वितीयोऽवधिः यथा — "आ मुक्तेः संसारः" इत्यादौ। अत्र मुक्तिकालावृत्तित्वं मुक्तिप्रागभावकालवृत्तित्वं च पूर्वावधिरहितं संसारे प्रतीयते।

क्वचित् द्वितीयावधियोगः यथा — "तत आरभ्य तां देवीमा दशम्याः प्रपूजयेत्" इत्यादौ। अत्र पूर्वकालावृत्तित्वमुत्तरकालवृत्तित्वमारभ्यशब्दार्थः। तत्र पूर्वत्व-घटकप्रगभावान्वयि प्रतियोगित्वम् उत्तरत्वघटकाधिकरणान्वयि निरूपकत्वं च पञ्चम्या अर्थः। आङस्तु समानकालिकत्वाभावः प्रागभावकालिकत्वं चार्थः। कालान्वयि निरूपकत्वं प्रागभावान्वयि प्रतियोगित्वं च पञ्चम्यर्थः। तथा च कृष्णनवमीप्रतियोगिकप्रागभावकालावृत्तिः कृष्णनवमीनिरूपिताधिकरणकालध्वंसाधिकरणकालस्वरूपोत्तरकालवृत्तिः दशमीप्रतियोगिकप्रागभावकालिकी देवीकर्मिका पूजा वाक्यार्थः। कृष्णनवम्यादिसकलतिथिवृत्तित्वं तु पूजायां प्रतितिथि पूजाङ्गविशेषोपदेशादवगम्यते। नवम्यादितिथिस्तु तत्तच्चन्द्रकालानुक्रियाप्रचयाधिकरणकालस्वरूपा तथाविधक्रियापचयमात्रावस्थायिजन्यपदार्थस्वरूपा वेत्यन्यदेतत्।

देशस्वरूपोभयावधियोगो यथा — काशिकायाम् "आ पाटलिपुत्रात् वृष्टो देवः आ मथुरायाः" इत्यादौ। अत्र दैशिकसंसर्गावच्छिन्नाधेयत्वस्याभावः तथाविधं पश्चिमदेशाधेयत्वं च प्रथमस्य आङोऽर्थः। पञ्चम्यास्तु आधेयत्वान्वयि निरूपितत्वं पश्चिमत्वान्वय्यवधिमत्त्वं चार्थः। एवं द्वितीयस्याङः तथाविधाधेयत्वाभावः तथाविधं पूर्वदेशाधेयत्वं, पञ्चम्यास्तु निरूपितत्वम् अवधिमत्वं चार्थः। तथा च पाटलिपुत्रावृत्तेः पाटलिपुत्रावधिकपश्चिमवृत्तेः मथुरानिरूपिताधेयत्वाभाववत्याः मथुरावधिकपूर्वदेशवृत्तेः वृष्टेः कर्ता देव इत्यन्वयबोधः।

"आकृष्णनवमीपूर्वतिथि आशुक्लदशमि देवीं पूजयेत्" इति, "आपाटलिपुत्रमामथुरं वृष्टो देवः" इति चाव्ययीभावसमासे तु आङो निपाततया तदर्थे भेदान्वये बाधकाभावात् दर्शित एवान्वयबोधः। इयांस्तु विशेषः — समासे विभक्तेर्लुप्ततया पञ्चम्यर्थयोः निरूपितत्वप्रतियोगित्वाद्योः संसर्गतया भानमिति।

आङोऽभिविधिरप्यर्थः। स च तत्संबन्धतदितरसंबन्धौ। "आ परमाणोः पृथिवी" इत्यादौ पृथिवीत्वसामानाधिकरण्येन परमाणोस्तदन्यस्य च तादात्म्यं प्रतीयत इति केचित्।

परे तु तद्व्यापकत्वं तदितरसंबन्धश्चाभिविधिः। व्यापकताघटक इतरनिरूपितश्च संबन्ध एक एव बोध्यः। तेन संबन्धान्तरेण व्यापकत्वे नातिप्रसङ्गः। "आ परमाणोः पृथिवी" इत्यादौ पृथिवीत्वसामानाधिकरण्येन पच्यमानपरमाणुव्यापकत्वं परमाणुभिन्नतादात्म्यं च प्रतीयत इत्याहुः। तदुभयमपि चिन्त्यम्। आ गुणाज्ञातिरिति प्रयोगप्रसङ्गात्।

अन्ये तु कार्तिकमारभ्य "आ चैत्राच्छीतम्" इत्यत्र आङ उत्तरकालोऽर्थः। तस्य स्वपूर्वकालव्यापकत्वेन स्वावृत्तित्वेन चापरपदार्थेऽन्वयः। पञ्चम्या उत्तरत्वान्वयि निरूपकत्वमर्थः। आरभ्यशब्दस्य पूर्वकालोत्तरकालोऽर्थः। पूर्वत्वान्वयि प्रतियोगित्वं द्वितीयार्थः। तावता कार्तिकपूर्वकालोत्तरकालो लभ्यते। स चायं कालः संसर्गीभूतव्यापकताघटकस्वपूर्वकालस्य विशेषणं न तु क्वाप्यन्वेति। पूर्ववदेव कार्तिकपूर्वकालोत्तरस्वपूर्वकालनिष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वं संसर्गः। आरभ्यान्तवाक्यं दर्शितव्यापकतासंसर्गकान्वयतात्पर्यकम्। तथा च चैत्रोत्तरकालवृत्ति कार्तिकपूर्वकालोत्तरीभूतचैत्रोत्तरपूर्वकालव्यापकं च शीतमित्यन्वयबोधः।

एवं "काशीतः आपाटलिपुत्रात् वृष्टो देवः" इत्यादौ पूर्वदेश आङोऽर्थः। पूर्वत्वान्वय्यवधिमत्त्वं पञ्चम्यर्थः। तावता पाटलिपुत्रपूर्वदेशो लभ्यते। तस्य तु काशीपश्चिमदेशावधिकपूर्वीभूतस्वपश्चिमदेशव्यापकत्वेन स्वावृत्तित्वेन चापरशब्दार्थेऽन्वयः। तथा च पाटलिपुत्रपूर्वदेशवृत्तित्वं काशीपश्चिमदेशावधिकपूर्वभूतपाटलिपुत्रपूर्वावधिकपश्चिमदेशव्यापकत्वं च वृष्टौ प्रतीयते। आरभ्यान्तवाक्यं पूर्ववत्तात्पर्यग्राहकमेवेति वदन्ति।

तदपि चिन्त्यम्। "आ शैशवादधीतमा यौवनात्" इत्यादौ यौवनोत्तरकालपूर्वीभूतशैशवपूर्वकालोत्तरकालव्यापकत्वस्याध्ययने विरहात्। तादृशानध्यायरोगादिकालेऽध्ययनविरहादिति।

तस्मात् संबन्धिसंबन्धाभावः संबन्धीतरसंबन्धश्चाभिविधिः आङोऽर्थः। संबन्ध्यन्वयि निरूपितत्वमितरान्वयि प्रतियोगित्वं च पञ्चम्यर्थः। आ परमाणोः तादात्म्याभावः पार्थिवपरमाणुतादात्म्यं च पृथिव्यां प्रतीयते। यादृशसंबन्धस्याभावो भासते तादृश एव संबन्धः इतरसंबन्धश्च भासते। अतः समुद्रसंयुक्तशैवालतादात्म्याभावसमुद्रसमकालिकत्वसमुद्रेतरशब्दवत्तादात्म्यानां गगने सत्त्वेऽपि "आ

समुद्रात् गगनम्'' इति न प्रयोगः। न वा गगनसमवेतशब्दतादात्म्याभाव-गगनतादात्म्यगगनेतरपृथिव्यादिसमकालिकत्वानां गगने सत्त्वेऽपि "आ गगनात् गगनम्'' इति प्रयोगः।

"आ चैत्राच्छीतं भवति'' इत्यत्र उत्तरकालाधेयत्वस्याभावः आधेयत्वमितराधेयत्वं च आङोऽर्थः। उत्तरत्वं ध्वंसाधिकरणत्वम्। पञ्चम्याः प्रतियोगित्वं निरूपितत्वं चार्थः। प्रतियोगित्वध्वंसेतरत्वयोर्निरूपितत्वमाधेयत्वेऽन्वेति। आधेयत्वं तु कालिकविशेषणतावच्छिन्नं बोध्यम्। तथा च चैत्रप्रतियोगिताकोत्तरकालवृत्ति चैत्रवृत्ति चैत्रेतरकालवृत्ति शीतं तद्भवनं वा वाक्यार्थः।

"आ प्रयागात् अन्तर्वेदिः'' इत्यादौ पूर्वदेशतादात्म्याभावः तादात्म्यम् इतरदेशतादात्म्यं च आङोऽर्थः। पञ्चम्याः पूर्वत्वान्वय्यवधिमत्त्वं तादात्म्यान्वयि निरूपितत्वम् इतरत्वान्वयि प्रतियोगित्वं चार्थः। तथा च प्रयागपूर्वदेशभिन्ना प्रयागप्रतियोगिताकेतरपश्चिमादिदेशाभिन्ना चान्तर्वेदिः इत्यन्वयबोधः।

"आ कीटात् आ कैटभारेः अभीष्टलाभप्रयुक्तकृतकृत्यता'' इत्यादौ कैटभार्यवधिकोत्कृष्टपरमात्मावृत्तित्वमाधेयत्वमितरात्मवृत्तित्वं द्वितीयस्य आङोऽर्थः। प्रथमस्य तु कीटावधिकापकृष्टनारकिकात्मावृत्तिदर्शितोभयं चार्थः। पञ्चम्याः उत्कर्षापकर्षान्वय्यवधिमत्त्वं निरूपितत्वं प्रतियोगित्वं च पूर्ववदर्थः। तथा च कैटभार्यवधिकोत्कृष्टपरमात्मावृत्तिः कैटभारिवृत्तिः कीटवृत्तिः कीटावधिकापकृष्टनारकिकात्मवृत्तिः कीटवृत्तिः कीटप्रतियोगिताकेतरात्मवृत्तिश्च कृतकृत्यतेत्यन्वयबोधः।

एवं कीटतदितराधेयत्वयोः कैटभारितदितराधेयत्वयोश्च अविशेषेण प्रतीत्या कीटकैटभारिवृत्तिकृतकृत्यभावस्य नारकिकेतरपरमात्मेतरसकलात्मव्यापकत्वमर्थतः प्रतीयते।

एवं मर्यादायामपि कृष्णनवमीप्रभृतितिथिवृत्तित्वस्य दशमीपूर्वकालवृत्तित्वत्वेन लाभात् पूजायां नवमीप्रभृतिषोडशतिथिव्यापकत्वमर्थतः प्रतीयते बाधकविरहात्।

प्रतिः प्रतिनिधिप्रतिदानयोः[१] इति सूत्रव्याख्यानम्

एतयोरर्थयोः प्रतिः कर्मप्रवचनीयसंज्ञः स्यात्।

---

[१] सू. १.४.९२

प्रतिनिधिप्रतिदाने च यस्मात्[१] इति सूत्रव्याख्यानम्

यत्संबन्धिनी प्रतिनिधिप्रतिदाने तस्मात् कर्मप्रवचनीययुक्तात् पञ्चमी स्यात्। "प्रद्युम्नः कृष्णात् प्रति"। प्रद्युम्नः कृष्णनिरूपितप्रतिनिधित्ववान् इत्यर्थः। प्रतिनिधित्वं पञ्चम्यर्थः। प्रतिस्तु तद्योतकः। तिलेभ्यः प्रतियच्छति माषान्। मुख्यस्याभावे यः तत्सदृश उपादीयते स प्रतिनिधिः दत्तस्य प्रतिनिर्यातनं प्रतिदानम्।

लघुमञ्जूषायाम्[२]

"प्रद्युम्नः कृष्णात् प्रति"। सदृशः प्रत्यर्थः। कृष्णसदृशः प्रद्युम्न इति बोधः। तिलेभ्यः प्रतियच्छति माषान्। अत्र ग्रहणपूर्वकं प्रत्यर्पणं प्रतिसमभिव्याहृत-यच्छतेरर्थः। तिलग्रहणपूर्वकं माषप्रतिदानमिति बोधः।

पदवाक्यरत्नाकरे[३]

प्रतिनिधौ वर्तमानस्य प्रतेः भेदः तत्कार्यकारित्वं चार्थः। "प्रद्युम्नः कृष्णात् प्रति" इत्यत्र कृष्णभिन्नः कृष्णकार्यकारी प्रद्युम्न इति बोधः।

प्रतिदाने वर्तमानस्य प्रतेः ऋणत्वध्वंसजनकत्वमर्थः। पञ्चम्यास्तु ऋणत्वान्वयि आदानजन्यत्वमर्थः। ऋणत्वं तु स्वत्वमिव पदार्थान्तरं पापविशेषो वा। "तिलेभ्यः प्रतियच्छति माषान्" इत्यत्र तिलादानजन्यऋणत्वध्वंसजनकमाषदानकर्तेत्यन्वय-बोधः।

विभक्त्यर्थनिर्णये[४]

पञ्चमीविधानार्थं प्रतेरर्थविशेषे कर्मप्रवचनीयतां ज्ञापयति "प्रतिः प्रतिनिधि-प्रतिदानयोः"[५] इति सूत्रम्। प्रतिनिधौ प्रतिदाने चार्थे प्रतिः कर्मप्रवचनीयसंज्ञः स्यात् इत्यर्थकम्। कर्मप्रवचनीययोगे पञ्चमीं ज्ञापयति "प्रतिनिधिप्रतिदाने च यस्मात्"[६] इति सूत्रं यस्मात् प्रतिनिधिः यतश्च प्रतिदानं तत्र कर्मप्रवचनीयप्रतियोगे पञ्चमी विभक्तिर्भवतीत्यर्थकम्।

---

[१] सू. २.३.११
[२] पृ. १३०७
[३] पृ. ७८१
[४] पृ. ३८७
[५] सू. १.४.९२
[६] सू. २.३.११

प्रतिनिधौ यथा "अभिमन्युरर्जुनात् प्रति, प्रद्युम्नः कृष्णात् प्रति" इत्यादौ। अत्र प्रतिनिधौ वर्तमानस्य प्रतेः भेदः तत्कार्यकारित्वं चार्थः। पञ्चम्याः भेदान्वयि प्रतियोगित्वं कार्यान्वयि निरूपितत्वं चार्थः। तथा चार्जुनप्रतियोगिकभेदवान् अर्जुननिरूपितकार्यकृदभिमन्युः इत्यादिरन्वयबोधः।

प्रतिदाने यथा "माषानस्मै तिलेभ्यः प्रतियच्छति" इत्यादौ। अत्र प्रतिदाने वर्तमानस्य प्रतेः ऋणत्वध्वंसजनकत्वमर्थः। पञ्चम्यास्तु ऋणत्वान्वयि आदान-जन्यत्वमर्थः। ऋणत्वं तु स्वत्वमिव पदार्थान्तरम्। पापविशेषो वा। तथा च एतत्संप्रदानकं तिलादानजन्यर्णत्वध्वंसजनकं माषकर्मकदानं यत् तत्कर्तृत्वं वाक्यार्थ इति संप्रदायः।

वस्तुतस्तु सदृश एव प्रतिनिधिशब्दार्थः। अत एव चन्द्रस्य प्रतिनिधि मुखमिति प्रयोगः। तथा च प्रतेरपि सदृश एवार्थः। सादृश्यान्वयि प्रतियोगित्वं पञ्चम्यर्थः। यत्तु मुख्यस्य सदृशः प्रतिनिधिरिति काशिकायामुक्तम्। तत्र मुख्यत्वोक्त्या कार्यसदृशकार्यकारी प्रतिनिधिरिति ज्ञाप्यते। तत्र पञ्चम्याः प्रथमकार्यान्वयि जन्यत्वमर्थः। कार्यं तु कार्यतावच्छेदकत्वोपलक्षिततत्तद्धर्मविशिष्टं बोध्यम्। यद्धर्मविशिष्टे पञ्चम्यर्थान्वयः तद्धर्मविशिष्ट एव सादृश्यान्वयः। "अभिमन्युरर्जुनात् प्रति" इत्यादावर्जुनजन्ययुद्धसदृशयुद्धकर्ता अभिमन्युः इत्यादिरन्वयबोधः। यदि निपातार्थस्याभेदान्वयो न मन्यते तदा प्रतेः कार्यसदृशकार्यकारित्वमेवार्थः। एवम् "अश्वो रथात् प्रति" इत्यादौ रथजन्यगमनसदृशगमनकर्ता अश्व इत्यन्वयबोधः।

प्रतिदानं द्वितीयदानं सदृशदानमिति यावत्। "माषानस्मै तिलेभ्यः प्रतियच्छति" इत्यादौ पञ्चम्यर्थहेतुत्वस्य माषादानेऽन्वयः। माषाणां श्यामत्वादिना तिल-सादृश्यात्।

यत्तु काशिकायां प्रतिदानं दत्तस्य प्रतियातनमित्युक्तं, तत्र प्रतियातनं प्रतियत्न-फलकं प्रतिप्रयोजनकं प्रत्युपकारकमिति यावत्। तथा च एतत्संप्रदानकतिल-हेतुकमाषकर्मकप्रत्युपकारकदानकर्तृत्वं वाक्यार्थः।

यत्तु ऋणापाकरणं प्रतिदानमिति तत् सूत्रविरुद्धम्। सूत्रे प्रतिदानग्रहणं न हि ऋणप्रयोग उद्धारो वा दानमिति। वृत्तौ दत्तस्य प्रतियातनम् इत्युक्तम्। न हि ऋणं दत्तं भवतीति।

एवं "वलयौ मित्राय कुण्डलाभ्यां प्रतियच्छति" इत्यादौ "नलोऽश्वहृदय-वर्णायाक्षहृदयात् प्रतियच्छति" इत्यादौ च दर्शितरीत्या अन्वयो बोध्यः। सूत्रे वृत्तौ च यस्मादिति पञ्चमी हेत्वर्थिकैव। अन्यथा अनुपपत्तेः इति।

भाट्टरहस्ये[१]

"प्रद्युम्नः कृष्णात् प्रति"। कृष्णप्रतिनिधिरित्यर्थः। मुख्याभावे यस्तादृश उपादीयते स प्रतिनिधिः। प्रतियोगित्वं पञ्म्यर्थः। प्रतिदानं दत्तस्य प्रतिनिर्यातनम्। दानजन्योपकारप्रत्युपकार इति यावत्। "तिलेभ्यः प्रतियच्छति माषान्"। अत्र कर्मत्वं पञ्चम्यर्थः। तस्य च निपातोपात्तदानभावनायामन्वयः। तथा च तिलकर्मक-दानभावनाजन्योपकारप्रत्युपकारजनकीभूता माषकर्मिका दानभावना चैत्रवृत्तिः इति शाब्दबोधः इत्युक्तम्।

अकर्तर्यृणे पञ्चमी[२] इति सूत्रार्थः

कर्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमी स्यात्। "शतात् बद्धः"। कर्तृ-वर्जितमित्यस्य कर्तृसंज्ञारहितमित्यर्थः। "शतात् बद्धः" इत्यस्य नियमितकाले प्रत्यर्पणाभावे सति सुवर्णादिशतेन ऋणेन हेतुना अधमर्णो बद्ध इत्यर्थः। हेतुतृतीयापवादः।

अकर्तरि किम्। "शतेन बन्धितः"। अधमर्णः उत्तमर्णेन इति शेषः। बन्धेः हेतुमण्ण्यन्तात् कर्मणि क्तः। अधमर्णः उत्तमर्णेन बद्ध इत्यण्यन्तस्यार्थः। शतेन ऋणेन प्रयोजककर्त्रा उत्तमर्णेन प्रयोज्यकर्ता बन्धनं कारितः अधमर्णः इति ण्यन्तस्यार्थः। अत्र शतमृणं प्रयोजकत्वात् कर्तृसंज्ञं हेतुसंज्ञं च। "तत्प्रयोजको हेतुश्च"[३] इत्यत्र चकारेण कर्तृसंज्ञाया अपि विधानात्। ततश्च शतशब्दात् कर्तरि तृतीयां बाधित्वा अपवादत्वात् पञ्चमी स्यात्। तद्वारणाय अकर्तरीत्युक्तम्। शतस्य हेतुत्वेऽपि कर्तृत्वात् न ततः पञ्चमी। "शतात् बद्धः"। हेतुहेतुमद्भावः पञ्चम्यर्थः। शतहेतुकबन्धनकर्तेति बोधः इति लघुमञ्जूषायाम्।[४]

पदवाक्यरत्नाकरे[५]

"शतात् बद्धः" इत्यादौ ऋणत्वमृणं वा हेतुता हेतुमत्ता वा खण्डशः पञ्चम्यर्थः। ऋणाभिन्नशतहेतुकबन्धनकर्मेत्यन्वयबोधः। ऋणकर्तृकबन्धनविवक्षा-याम् 'ऋणेन बद्धः' इत्येव प्रमाणम्। विभक्त्यर्थनिर्णयेऽप्येवम्।

---

[१] पृ. १३८
[२] सू. २.३.२४
[३] सू. १.४.५५
[४] पृ. १३०८
[५] पृ. ७८२

भाट्टरहस्ये[१]

"अकर्तर्यृणे पञ्चमी"[२] इति सूत्रात् कर्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमीत्यर्थकात् "ऋणात् बद्धः, शतात् बद्धः" इत्यादौ पञ्चमी। अत्र हेतुत्वं पञ्चम्यर्थः। शतमिह उत्तमर्णाय धार्यमाणत्वात् ऋणमेव। तस्य कर्तृत्वे तु शतेन बन्धित इत्येवं तृतीयैव। अत्र हि णिजन्तत्वात् बन्धनप्रयोजके ऋणे हेतुत्ववत् "तत्प्रयोजको हेतुश्च"[३] इति चकारेण कर्तृसंज्ञाया अपि करणात् कर्तृत्वावश्यकतया तृतीयान्तत्वमेव।

विभाषा गुणेऽस्त्रियाम्[४] इति सूत्रार्थः

गुणे हेतौ अस्त्रीलिङ्गे पञ्चमी वा स्यात्। "जाड्यात् जाड्येन वा बद्धः"। जडस्य भावः जाड्यम्। "गुणवचनब्राह्मणादिभ्यः कर्मणि च"[५] इति ष्यञ्। गुणे किम्। "धनेन कुलम्"। अस्त्रियां किम्। "बुद्ध्या मुक्तः"।

विभाषा इति योगविभागात् योगविभागस्येष्टसिद्ध्यर्थत्वात् अगुणे स्त्रियां च क्वचित्। "धूमात् अग्निमान्"। अत्र धूमस्यागुणत्वेऽपि हेतुत्वात् ततः पञ्चमी। नास्ति घटोऽनुपलब्धेः। अत्र अनुपलब्धेः स्त्रीत्वेऽपि घटाभावहेतुत्वात् ततः पञ्चमी। अगुणे स्त्रियां च हेतौ पञ्चम्याः "बाहुलकं प्रकृतेस्तनुदृष्टेः"[६] इति वार्तिकनिर्देशोऽपि ज्ञापकः इति प्रौढमनोरमायाम्[७]

शेखरे[८]

"धूमादग्निमान्" इत्यत्र धूमपदस्य धूमज्ञाने लक्षणा। अग्निमत्पदं स्वज्ञानविषये लाक्षणिकम्। जन्यजनकभावः पञ्चम्यर्थः। धूमज्ञानजन्यज्ञानविषयाग्निमान् इति बोधः प्रोक्तः।

---

[१] पृ. १३९
[२] सू. २.३.२४
[३] सू. १.४.५५
[४] सू. २.३.२५
[५] सू. ५.१.१२४
[६] वा. २१५३
[७] पृ. ९३०
[८] पृ. ६९७

लघुमञ्जूषायाम्[१]

धूमज्ञानेऽग्निज्ञाने च विद्यमानस्य जन्यजनकभावस्य तद्विषययोः धूमवह्न्योः आरोप इत्युक्तम्।

शब्दशक्तिप्रकाशिकायाम्[२]

"धूमेन वह्निः" इत्यत्र तृतीयायाः ज्ञापकत्वमर्थः इति स्वीकृत्य वाक्यार्थबोधो वर्णितः। सैव रीतिः 'धूमात् वह्निः' इत्यत्रापि। तथा हि — वह्न्यादेः धूमाद्यजन्यत्वेन धूमादिनिष्ठजनकत्वानिरूपकत्वात् अगत्या ज्ञापकत्वरूपं गौणमेव हेतुत्वं तृतीयायाः पञ्चम्या वा अर्थः। तेन धूमादिनिष्ठं यत् ज्ञापकत्वं तद्वान् वह्निः इत्याकारकस्तत्रान्वयबोधः। तद्वत्त्वं च स्वप्रतियोगिक (स्वनिरूपक) अनुमिति विषयत्वसंबन्धेन ग्राह्यम्।

न च धूमादेः वह्न्यादिज्ञानजनकत्वं बाधितम्, लिङ्गस्य अनुमितावहेतुत्वादिति वाच्यम्। वह्न्याद्यवगाहिनि धूमसाक्षात्कारे विषयविधया धूमादेः जनकत्वसंभवात्। वह्नयाद्यवगाहिनि धूमनिष्ठत्वेनाभावप्रत्यक्षे संनिकर्षघटकतया धूमादेः जनकत्वसंभवाच्च।

वस्तुतस्तु "धूमेन धूमात्" इत्यत्र धूमपदस्य धूमज्ञाने लक्षणा। धूमज्ञाननिष्ठं ज्ञापकत्वं तृतीयया पञ्चम्या वा लक्षणया बोध्यत इति मणिकृतः — इत्युक्तम्।

व्युत्पत्तिवादे[३] धूमेन वह्निमान् पर्वत इति वाक्यार्थवर्णनम्

मणिकारदर्शितादन्य एव पन्थाः परिष्कृत्य प्रदर्शितः। तथा हि — "पर्वतो धूमेन वह्निमान्" इत्यादौ हेतुतृतीयैव। तत्र ज्ञानजनकज्ञानविषयत्वं हेतुत्वम्, ज्ञानजन्यज्ञानविषयत्वरूपं हेतुमत्त्वं वा तृतीयार्थः। हेतुशब्दो यद्यपि कारणपर्यायः, न तु ज्ञापकपर्यायः। तथापि "हेतौ" इति सूत्रस्थं हेतुपदं न समभिव्याहृतनिरूपितहेतुतामात्रपरम्, अपि तु समभिव्याहृततज्ज्ञानान्यतरनिरूपितहेतुतापरमिति समभिव्याहृतवह्न्यादिज्ञानहेतुभूतज्ञानविषयधूमादिवाचकपदादपि तृतीया तत्सूत्रेणानुशिष्यते। गुणरूपे हेतौ पञ्चम्याः विकल्पेन विधायकं "विभाषागुणेऽस्त्रियाम्"[४] इति सूत्रान्तरमपि अन्यतरनिरूपितहेतुताविषयकमेव। अतो "जाड्यात् बद्धो

---

[१] पृ. १३०८
[२] पृ. ३६८
[३] पृ. २२८
[४] सू. २.३.२५

जाड्येन वा'' इत्यत्र जाड्यस्य हेतुत्ववत् ''धूमाद्वह्निमान् धूमेन वा'' इत्यादौ धूमादेः वह्न्यादिज्ञानहेतुता प्रतीयते। हेतुत्वं च पूर्वोक्तं प्रयोजकत्वमेव (समभिव्याहृतपदार्थतज्ज्ञानान्यतरनिरूपितहेतुत्वमेव)।

गुणपदं च न रूपादिचतुर्विंशतिपरम्। धूमादौ रूपादित्वाभावात्। न च धूमपदं धूमज्ञानपरम्। तस्य रूपादित्वरूपगुणत्वमस्त्येवेति वाच्यम्। तत्र धूमपदस्य ज्ञानलाक्षणिकत्वेन तस्य तथात्वेऽपि ''अज्ञानात् बद्धः'' इत्यादौ ज्ञानाभावस्यैव बन्धहेतुत्वेन तस्य रूपादिचतुर्विंशत्यन्तर्गतत्वरूपगुणत्वाभावेन पञ्चम्यनुपपत्तेः।

न च तत्र गुणपदं धर्ममात्रपरमिति वाच्यम्। गगनादेरपि कालिकसंबन्धेन धर्मतया अव्यावर्तकत्वात् समवायादिना वृत्तित्त्वरूपं धर्मत्वं च अभावाद्यसंग्राहकम्। नापि द्रव्याश्रितत्वं गुणत्वम्। 'सत्तावान् गुणत्वात्' इत्यादौ गुणत्वे तदभावात् पञ्चम्यनुपपत्तेः।

अपि तु कार्यस्य ज्ञाप्यस्य वा आश्रये आश्रितत्वम्। ''जाड्यात् बद्धः'' इत्यत्र जाड्यस्य स्वप्रयोज्यबन्धाश्रये आश्रितत्वात्, धूमादेः स्वज्ञाप्यवह्न्याद्याश्रये पर्वतादावाश्रितत्वात् गुणत्वम्।

हेतौ गुणत्वविशेषणप्रयोजनं च पितुः पाण्डित्येन पुत्र आहूतः, धूमस्य स्वस्मिन् सत्त्वेन ''पर्वतो वह्निमान्'' इत्यादौ पञ्चमीवारणम्। आद्ये पाण्डित्यस्य कार्यं यत् आह्वानं तदाश्रये पुत्रे पितृगतपाण्डित्यस्यासत्वान्न पञ्चमी। द्वितीये स्वपदार्थः पर्वतः। धूमनिष्ठस्य सत्त्वस्य ज्ञाप्यो यो वह्निः तदाश्रये पर्वते धूमनिष्ठस्य सत्त्वस्याभावान्न ततः पञ्चमी।

तथा च ''पर्वतो वह्निमान् धूमात्'' इत्यत्र ज्ञापकत्वं ज्ञाप्यत्वं वा पञ्चम्यर्थः। ज्ञापकत्वं च ज्ञानजनकप्रमाविषयत्वम्। ज्ञाप्यत्वं च प्रमाजन्यज्ञानविषयत्वम्। प्रमापदानिवेशे यस्य पुरुषस्य वह्निर्धूमव्याप्य इति भ्रमोऽस्ति तस्य पुरुषस्य धूमानुमितिर्भवति। अतः वह्नेः धूमज्ञानजनकभ्रमात्मकज्ञानविषयत्वरूपज्ञापकत्वसत्त्वेन 'वह्निना वह्नेर्वा धूमवानयम्' इति प्रयोगापत्तिः। तद्वारणाय प्रमात्वनिवेशः। प्रमात्वं च यावद्भ्रमभिन्नत्वरूपं विवक्षणीयम्। एवं च ज्ञानजनकयावद्भ्रमभिन्नज्ञानविषयत्वं ज्ञापकत्वमित्युक्तं भवति। यावद्भ्रमभिन्नत्वानिवेशे वह्निः धूमव्याप्य इति ज्ञानस्यापि वह्नित्वांशे प्रमात्वमादाय पूर्वोक्तातिप्रसङ्गः स्यात्।

यावद्भ्रमभिन्नत्वं च प्रकारताविशिष्टविशेष्यताशून्यत्वम्। वैशिष्ट्यं च स्वनिरूपितत्वस्वावच्छेदकधर्मावच्छिन्नप्रतियोगिताकप्रतियोगिव्यधिकरणाभाववन्निष्ठत्वोभय संबन्धेनेति।

न चैवमपि "पर्वतो वह्निमान् द्रव्यत्वात् द्रव्यत्वेन वा" इति प्रयोगापत्तिः, द्रव्यत्वे प्रमेयत्वावच्छिन्नवह्निज्ञापकत्वस्य पर्वतवृत्तित्वविशिष्टद्रव्यत्वत्वेन वह्नित्वावच्छिन्नवह्निज्ञापकत्वस्य च सत्त्वात् इति वाच्यम्। पञ्म्यर्थे ज्ञापकत्वे यद्धर्मावच्छिन्नमन्वेति, ज्ञापकत्वं च यद्धर्मावच्छिन्नेऽन्वेति तादृशान्वयप्रतियोगितावच्छेदकानुयोगितावच्छेदकाभ्यां ज्ञाप्यज्ञापकभावस्य पञ्चम्यादिना बोधनात्। द्रव्यत्वत्वावच्छिन्नस्य वह्नित्वावच्छिन्नज्ञापकत्वविरहात् नोक्तप्रयोगापत्तिः।

एवं ज्ञाप्यं यत् वह्निमत्वं तदवच्छेदकपर्वतत्वावच्छिन्नांशे ज्ञापकत्वं ज्ञाप्यत्वं वा प्रतीयत इति नियमः। तेन महानसत्वावच्छिन्ने वह्निज्ञापकत्वस्य महानसत्वे सत्त्वात् "पर्वतो वह्निमान् महानसत्वात् महानसत्वेन वा" इति प्रयोगापत्तिरिति शङ्कायाः नावसरः। वह्निमत्त्वान्वयितावच्छेदकपर्वतत्वाववच्छिन्ने वह्निज्ञापकत्वस्य महानसत्वेऽभावात्।

अत्रेदमवधेयम् — "पर्वतो वह्निमान् धूमात् न द्रव्यत्वात्, नापि महानसत्वात्" इत्यादौ नञा द्रव्यत्वमहानसत्वादिज्ञाप्यत्वाभावः वह्निमत्त्वे न बोधयितुं शक्यते। वह्निमत्त्वे प्रमेयत्वेन रूपेण द्रव्यत्वज्ञाप्यत्वस्य, महानसावच्छेदेन महानसत्वज्ञाप्यत्वस्य च सत्त्वेन तदभावस्य बाधात्।

वह्नित्वावच्छिन्नं यत् द्रव्यत्वज्ञाप्यत्वं तस्याप्रसिद्ध्या तदभावः, महानसावच्छिन्नं यत् वह्निनिष्ठं महानसत्वज्ञाप्यत्वं तस्याप्रसिद्ध्या तदभावश्च न प्रत्याययितुं शक्यः।

अतः ज्ञानजन्यतावच्छेदकत्वरूपं ज्ञानप्रयोज्यत्वं समभिव्याहृतपर्वतादिविशेष्यतानिरूपितं विधेयत्वं च विशकलितं पञ्चम्यर्थः। तथा च "पर्वतो वह्निमान् धूमात् धूमेन वा" इत्यादौ धूमज्ञानजन्यतावच्छेदिका पर्वत्वावच्छिन्नविशेष्यतानिरूपिता या विधेयता तदाश्रयवह्निमान् पर्वत इत्याकारको बोधः।

एवं च "पर्वतो वह्निमान् धूमात् न द्रव्यत्वात् नापि महानसत्वात्" इत्यत्र पर्वतनिष्ठविशेष्यतानिरूपितायां वह्नित्वावच्छिन्नविधेयतायां द्रव्यत्वमहानसत्वादिज्ञानप्रयोज्यत्वाभावः नञा बोध्यते। तत्प्रयोज्यत्वं च प्रमेयत्वाद्यवच्छिन्नविधेयतायां प्रसिद्धम्। द्रव्यत्वमहानसत्वादिविषयकज्ञानप्रयोज्यत्वाभाववती या पर्वतत्वावच्छिन्नविशेष्यतानिरूपिता वह्नित्वावच्छिन्नविधेयता तदाश्रयवह्निमान् पर्वतः इत्याकारको बोधो जायते।

विधेयतायां वह्नित्वावच्छिन्नेति विशेषणात् धूमत्वावच्छिन्नविषयकज्ञानप्रयोज्यत्वाभाववत्तत्तद्वह्नित्वावच्छिन्नविधेयताश्रयतायाः वह्नौ सत्त्वात् "पर्वतो वह्नि-

मान् न धूमात्'' इति प्रयोगापत्तिरिति शङ्कायाः नावसरः। वह्नित्वावच्छिन्न-विधेयतायां धूमत्वावच्छिन्नविषयकज्ञानप्रयोज्यत्वाभावस्य बाधात्।

ननु यत्र वह्नित्वावच्छिन्नविधेयतात्वमन्वयितावच्छेदकं तत्रैव तदवच्छेदेनेत-रान्वयः संभवति। अत्र च वह्नित्वावच्छिन्नत्वाविशेषितं विधेयतात्वमेवान्वयिता-वच्छेदकमिति कथमन्वयितानवच्छेदकवह्नित्वावच्छिन्नविधेयतात्वावच्छेदेन अभा-वान्वय इति चेत् — न। पञ्चम्यर्थविधेयतायाः वह्न्यादौ वह्नित्वावच्छेदे-नान्वयोपगमात्। ''तदवच्छेदेन तदन्वये चावच्छेदकतद्रूपस्य तद्विशेषणांशे धर्मि-पारतन्त्रेण प्रकारत्वम्'' इति नियमात् तदवच्छेदेन = वह्नित्वावच्छेदेन, तदन्वये = विधेयतान्वये, अवच्छेदकतद्रूपस्य = वह्नित्वस्य तद्विशेषणांशे = वह्निविशेषणे विधेयत्वे, धर्मिपारतन्त्र्येण = वह्निद्वारा प्रकारत्वम् = अवच्छिन्नत्वसंबन्धेन प्रकारत्वं लभ्यते। तथा च वह्नित्वावच्छिन्नविधेयता अन्वयिनी। वह्नित्वावच्छिन्न-विधेयतात्वमन्वयितावच्छेदकमिति तदवच्छेदेन नञर्थान्वयः संभवति।

वह्निपदं वह्नित्वावच्छिन्नविधेयताशालिज्ञानपरम्। तदुत्तरमतुप्प्रत्ययः विशेष्यता-रूपसंबन्धपर इति प्राचीनमते तु वह्नित्वावच्छिन्नविधेयतात्वस्यान्वयितावच्छेद-कत्वमविवादमेव।

विधेयतायाः तत्तत्संबन्धावच्छिन्नविधेयतात्वेन पञ्चम्यर्थत्वं स्वीकरणीयम्। तेन अयं जानातीति समवायसंबन्धेन ज्ञानस्य साध्यतास्थले आत्मनिष्ठविशेष्य-तानिरूपितायां विषयतासंबन्धावच्छिन्नायां ज्ञाननिष्ठविधेयतायां द्रव्यत्वरूपलिङ्ग-विषयकज्ञानप्रयोज्यत्वसत्त्वेन तदभावस्य बाधिततया ''अयं जानाति आत्मत्वात् न द्रव्यत्वात्'' इति प्रयोगस्यानुपपत्तिरिति शङ्कायाः नावकाशः। समवायसंबन्धा-वच्छिन्नज्ञाननिष्ठविधेयतायामेव द्रव्यत्वज्ञानप्रयोज्यत्वाभावस्य नञा तत्र बोधनात् तस्य चाबाधितत्वात्।

एवं ज्ञानप्रयोज्यत्वप्रविष्टं ज्ञानमपि तत्तत्संबन्धावच्छिन्नप्रकारताकत्वविशिष्टं विवक्षितम्। तेन समवायेन हेतुत्वपरस्य 'अयं वह्निमान् तद्रूपात् (पर्वतीयरूपात्) न तु धूमात्' इति प्रयोगस्य नानुपपत्तिः। वह्निनिष्ठविधेयतायां संयोगसंबन्धा-वच्छिन्नधूमनिष्ठप्रकारतानिरूपकज्ञानप्रयोज्यत्वस्य सत्त्वेऽपि समवायसंबन्धाव-च्छिन्नधूमनिष्ठप्रकारतानिरूपकज्ञानप्रयोज्यत्वाभावस्याबाधितत्वात्। समवायादिसंबन्ध-विशेषघटितधर्मस्य अन्वयितावच्छेदकतया भाने नियमाकं तु तात्पर्यमेव।

प्रकारतायां मुख्यविशेष्यतानिरूपितत्वमपि निवेशनीयम्। अन्यथा 'धूमाधि-करणवृत्त्यत्यन्ताभावाप्रतियोगिवह्निसमानाधिकरणधूमवान् पर्वतः' इत्याकारकपरा-

मर्शरूपज्ञानस्यैव वह्निनिष्ठविधेयताप्रयोजकतया तस्मिन् ज्ञानेऽभावस्यापि प्रकारतया अभावप्रकारकताद्दशज्ञानप्रयोज्यत्वं वह्निनिष्ठविधेयतायामस्तीति 'पर्वतो वह्निमान् अभावात्' इति प्रयोगापत्तिः, इति शङ्कायाः नावकाशः। अभावनिष्ठप्रकारतायाः प्रतियोगिनिष्ठविशेष्यतानिरूपितत्वेऽपि मुख्यविशेष्यतानिरूपितत्वाभावात्। पर्वतनिष्ठा विशेष्यता हि मुख्यविशेष्यता। न हि तन्निरूपिता अभावनिष्ठा प्रकारता। प्रकारत्वानवच्छिन्नं विशेष्यत्वं मुख्यविशेष्यत्वम्। — इति भट्टाचार्याणां निरूपणवैखरी।

पदवाक्यरत्नाकरे विद्यमानं निरूपणम्[१]

स्त्रियामपि गुणेऽगुणे च ज्ञापके हेतौ पञ्चमी साधुः। "तदशिष्यं संज्ञाप्रमाणत्वात्"[२] "लुब्योगाप्रख्यानात्"[३] इत्यादौ ज्ञापके हेतौ पाणिनिना पञ्चमीनिर्देशात्। लोकेऽपि नास्ति घटोऽनुपलब्धेः इत्यत्र अनुपलब्धिज्ञाप्यत्वस्य घटनास्तितायामन्वयस्यानुभवात्।

अपि च ज्ञातं सत् यत् ज्ञापकं अनुपलब्ध्यादि तदेव पञ्चम्या संबध्यते, न तु अज्ञातं सत् ज्ञापकं चक्षुरादि। अतः 'इन्द्रियात् घटः' इति न प्रयोगः। ज्ञातज्ञापके सर्वत्र पञ्चमी। "धूमादग्निमान् पर्वतः इति, जीवः कर्ता बुद्धेः" इति च प्रयोगात्।

एवं च ज्ञापकत्वं पञ्चम्यर्थः। तत्राधेयतासंबन्धेन प्रकृत्यर्थस्यान्वयः। ज्ञापकत्वस्य निरूपकतासंबन्धेनाग्नावन्वयः। 'धूमनिष्ठज्ञापकतानिरूपकवह्निमान् पर्वतः' इति 'धूमादग्निमान् पर्वतः' इति वाक्यात् बोधः।

मणिकारमतम्

"धूमादग्निमान्" इत्यादौ धूमपदं धूमज्ञाने, अग्निपदमग्निज्ञाने ज्ञानविषयाग्नौ वा लाक्षणिकम्। जनकत्वं जन्यत्वं वा पञ्चम्यर्थः। धूमज्ञानविशेषितः सः ज्ञानान्तरेऽन्वेति। धूमज्ञानजन्यज्ञानविषयाग्निमान् इति बोधः इत्याहुः। अत्र मते योगविभागाभावेऽपि गुणवाचकत्वादेव पञ्चमीसिद्धिः।

अपरे तु ज्ञानजन्यत्वं पञ्चम्यर्थः। ज्ञाने धूमस्य विषयतासंबन्धेनान्वयः। अग्निपदस्य ज्ञानविषयाग्नौ लक्षणा। तदेकदेशज्ञाने पञ्चम्यर्थस्य जन्यत्वस्यान्वयः। तथा च धूमविषयकज्ञानजन्यज्ञानविषयाग्निमानिति बोधः इत्याहुः।

---

[१] प.वा.र.पृ. ७८२

[२] सू. १.२.५३

[३] सू. १.२.५४

नवीनमतम्

वह्निरेव जिज्ञासितः न तु वह्निज्ञानं ज्ञायमानो वह्निर्वेति पर्वतोऽग्निमानिति प्रतिज्ञावाक्यघटकानि पदानि मुख्यवृत्त्यैव प्रवर्तन्ते। हेतावपि धूमादिपदं मुख्यार्थकमेव। अयमाशयः — वह्निजिज्ञासायाः वह्निज्ञानेनैव निवृत्तिः न तु वह्निज्ञानज्ञानेनेति "पर्वतो वह्निमान्" इत्यादिवाक्येन वह्निज्ञानमेव जननीयम्, न तु वह्निज्ञानज्ञानम्। तच्च वह्निपदस्य मुख्यार्थकत्व एव संभवति। एवं धूममधिकृत्यैव उदाहरणादिवाक्येन ज्ञापकताप्रयोजकस्य व्याप्त्यादेर्धर्मस्य उपपादनात् धूमपदेन धूमज्ञानलक्षणे तु धूमज्ञानस्यैव वह्निज्ञानजनकताप्रयोजकं रूपमुक्तं स्यात्। अतः धूमपदमपि मुख्यार्थकमिति। तस्मात् ज्ञानजन्यज्ञानविषयत्वं पञ्चम्यर्थः। प्रथमज्ञाने धूमस्य विषयतासंबन्धेनान्वयः। विषयत्वास्याग्नावन्वयः। धूमविषयकज्ञानजन्यज्ञानविषयाग्निमानिति बोध इत्याहुः।

वस्तुतस्तु — धूमवह्निपदाभ्यां लक्षणया ज्ञानमुपस्थाप्यते। शक्त्या स्वस्वार्थः। पञ्चम्याः 'जाड्यात् बद्धः' इत्यादाविव जनकत्वं जन्यत्वं वा अर्थः। स्वीक्रियते चैकप्रातिपदिकशक्यलक्ष्यार्थयोः भेदसंबन्धेनान्वयः।

तथा च धूमः ज्ञाने, ज्ञानं जनकतायाम्, सा ज्ञाने, तत् वह्नावन्वेतीति धूमविषयकज्ञाननिष्ठहेतुतानिरूपकज्ञानविषयवह्निमानयं पर्वतः इति बोधः प्रतिज्ञाहेतुभ्यां संभूय उत्पाद्यते। केवलया प्रतिज्ञया 'पर्वतो वह्निमान्' इत्येव बोध्यते, न तु ज्ञेयवह्निमानिति हेतुसमभिव्याहारज्ञानान्तरितो हि वह्न्यादिपदस्य ज्ञाने लक्षणाग्रहः हेतुपञ्चम्यर्थान्वयबाधात्। एतदुक्तं भवति। "धूमात्" इति वाक्यं "पवतो वह्निमान्" इति वाक्यसमभिव्याहृतम् इति ज्ञाने सति पञ्चम्यर्थस्य हेतुत्वस्य वह्निपदमुख्यार्थे वह्नौ बाधात् वह्निपदस्य वह्निज्ञाने भवति नान्यथेति।

नञ्समभिव्याहृतपञ्चम्यर्थविचारः

ननु "घटः पृथिवी गन्धात् न रूपात्, न पटत्वात् नापि स्नेहात्" इत्यादौ नञ्समभिव्याहारस्थले कथमन्वयबोधः। न तावत् घटः गन्धज्ञानजन्यज्ञानविषयपृथिवीत्ववान् रूपज्ञानजन्यज्ञानविषयपृथिवीत्वाभाववान् तादृशपृथिवीत्ववदन्योन्याभाववान् वा इति बोधः संभवति। घटे पृथिवीत्वाभावस्य पृथिवीत्ववदन्योन्याभावस्य वा बाधितत्वात्। नापि पञ्चम्यर्थस्य ज्ञानज्ञाप्यत्वस्य प्रतियोगितया नञर्थेऽभावेऽन्वयं तस्य च पृथिवीत्वेऽन्वयं स्वीकृत्य रूपज्ञानज्ञाप्यत्वाभाववत्पृथिवीत्ववानिति बोधः। पृथिवीत्वे रूपज्ञानज्ञाप्यत्वाभावस्य बाधादेव। पृथिवीत्वव्याप्यरूपवान् घट इत्याकारकस्य भ्रमात्मकपरामर्शस्य घटः

पृथिवी इत्यनुमितिं प्रति हेतुतया पृथिवीत्वे रूपविषयकोक्तपरामर्शात्मकज्ञानजन्योक्तानुमित्यात्मकज्ञानविषयत्वस्य सत्त्वेन तदभावस्य बाधितत्वात्। अत एव पृथिवीत्वज्ञाने रूपादिज्ञानजन्यत्वस्याभावः, पृथिवीत्वज्ञाननिरूपितहेतुतायां रूपादिज्ञाननिष्ठत्वाभावः, पृथिवीत्वज्ञानजनकज्ञाने रूपादिविषयकत्वाभावो वा बोधयितुमशक्यः इति चेत् —

अत्रोच्यते। उक्तस्थले प्रतिज्ञासमभिव्याहृतहेतुपञ्चम्या हेतौ पक्षसंबन्धोऽपि प्रतिपाद्यते। तेन पक्षे हेतुसंबन्धोऽपि हेतुवाक्यादेवावगम्यते। अत एव हेत्ववयवेन गतार्थत्वात् उपनयादिप्रयोगासंभवात् उदाहरणान्त एव न्यायः। एवं च "घटः पृथिवी गन्धात् न पटत्वात्" इत्यादौ पटत्वे घटसंबन्धाभाव एव प्रतीयत इति गुरुमतानुसारिणः। परं तु अत्र मते न पटत्वान्न स्नेहात् इत्यादीनामुपपत्तावपि न रूपादित्यत्रानुपपत्तितादवस्थ्यम्। रूपे घटरूपपक्षसंबन्धसत्त्वेन तदभावस्य बाधितत्वेन बोधयितुमशक्यत्वात्।

अतः वस्तुत इत्यादिना प्रकारान्तरेण उक्तस्थलेषु निर्वाहः कृतः पदवाक्यरत्नाकरे। तथा हि धूमादित्यत्र लिङ्गबोधकपदस्य धूमपदस्य स्वशक्यनिष्ठभ्रमसामान्यभिन्नत्वविशिष्टकेवलविषयतानिरूपकत्वसंबन्धेन ज्ञानलक्षकत्वम्। अतः धूमपदशक्यार्थस्य धूमस्य स्वनिष्ठभ्रमसामान्यभिन्नत्वविशिष्टकेवलविषयतानिरूपकत्वसंबन्धेन धूमपदलक्ष्यार्थे ज्ञानेऽन्वयः। पञ्चम्यर्थहेतुतायास्तु प्रकृतपक्षकप्रकृतसाध्यकानुमितित्वावच्छिन्ननिरूपकतासंबन्धेन साध्यवाचिवह्न्यादिपदलक्ष्यार्थे वह्न्यादिज्ञानेऽन्वयः। तथा च "पर्वतो वह्निमान् धूमात्" इति वाक्यात् धूमनिष्ठभ्रमसामान्यभिन्नत्वविशिष्टविषयतानिरूपकज्ञाननिष्ठा या हेतुता प्रकृतपक्षकप्रकृतसाध्यकानुमितित्वावच्छिन्नतन्निष्ठनिरूपकताकज्ञानविषयवह्निमानिति बोधः।

"घटः पृथिवी न गन्धात् न पटत्वात्" इत्यादौ केवलगन्धविषयकभ्रमसामान्यभिन्नज्ञानवृत्तिहेतुतायां घटपक्षकपृथिवीतादात्म्यसाध्यकानुमितित्वावच्छिन्ननिरूपकतास्वरूपः संसर्गः, पृथिवीज्ञाने तत्संसर्गावच्छिन्नप्रतियोगिताकः पटत्वविषयकभ्रमसामान्यभिन्नज्ञाननिष्ठहेतुत्वस्याभावश्च भासते। तथा च पृथिवीत्वव्याप्यगन्धवान् घटः इति ज्ञानस्य प्रमात्वेन भ्रमभिन्नतज्ज्ञानवृत्तिहेतुतायां घटपक्षकपृथिवीतादात्म्यसाध्यकानुमितित्वावच्छिन्ननिरूपकतास्वरूपः संबन्धो वर्तते। "पृथिवीत्वव्याप्यपटत्ववान् घटः" इति ज्ञानस्य भ्रमत्वेन पृथिवीज्ञाने भ्रमभिन्नज्ञाननिष्ठहेतुतानिरूपकत्वाभावश्च वर्तते इति तादृशप्रयोगस्य निर्वाहः।

कैवल्यं तु विशेष्यताद्वयासंवलनम्। असंवलनम् असामानाधिकरण्यम्। एतादृशकैवल्यविशेषणप्रयोजनं तु पटो गन्धव्याप्यपटत्ववान्, घटो गन्धव्याप्य-

घटत्ववान् इति समूहालम्बनहेतुकत्वस्य 'घटो गन्धवान्' इत्यनुमितौ सत्त्वेऽपि न प्रकृतवाक्यार्थबाधः। समूहालम्बने विशेष्यताद्वयसत्त्वेन विषयतायां कैवल्याभावात्।

विभक्त्यर्थनिर्णये[1] विभाषा गुण इति सूत्रार्थनिरूपणम्

गुणे हेतौ वैकल्पिकीं पञ्चमीं ज्ञापयति "विभाषागुणेऽस्त्रियाम्"[2] इति सूत्रम्। गुणे हेतौ विभाषा पञ्चमी भवति न तु स्त्रीलिङ्गे इत्यर्थकम्। "जाड्याज्जाड्येन वा बद्धः" इत्यादौ पञ्चमीतृतीययोर्हेतुत्वमर्थः। जाड्यहेतुकबन्धनकर्मेत्यन्वयबोधः। अत्र जाड्यं मोहो मिथ्याज्ञानमिति यावत्। तस्य गुणत्वं स्फुटमेव। गुण इत्युपादानात् "धनेन कुलम्" इत्यादौ न पञ्चमी। गुणेऽपि स्त्रियां न पञ्चमी यथा "बुद्ध्या मुक्तः" इत्यादौ। अत्र सूत्रे विभाषोपदेशात् ऋणे कर्तरि हेतौ पञ्चम्येव तृतीयापवादश्च प्रतीयते।

अत्र विभाषेति योगविभागात् अगुणे गुणेऽपि स्त्रियां च क्वचित् हेतौ पञ्चमी यथा "धूमादग्निमान् नास्ति घटोऽनुपलब्धेः" इत्यादाविति शाब्दिकाः।

तन्न शोभनम्। तावतापि "घटो दण्डात् दाहो दहनात्" इत्यादौ पञ्चम्यनुपपत्तेः। "धूमात्" इत्यादौ ज्ञापकत्वस्वरूपहेतुत्वस्य सूत्रादलाभात् ज्ञापकत्वे पञ्चम्यनुपपत्तेश्च।

तस्मात् गुणे अप्रधाने अकर्तरीति यावत्। ऋणस्य पूर्वसूत्रेणोपादानात् ऋणान्यस्मिन्नकर्तरि हेतौ विभाषा पञ्चमी भवतीति सूत्रार्थ इति। अत एव "प्रतिनिधिप्रतिदाने च यस्मात्" इति हेतुपञ्चमीनिर्देशोऽपि संगच्छते।

एवं "घटो दण्डात्" इत्यादौ पञ्चम्या जनकत्वमर्थः। तच्च निरूपकतया अपरपदार्थे घटादावन्वेति। प्रकृत्यर्थस्य आधेयतया पञ्चम्यर्थजनकत्वेऽन्वयः। तथा च दण्डवृत्तिजनकतानिरूपको घट इत्यन्वयबोध इति प्राञ्चः।

एकदेशिनस्तु निरूपकत्वादिसंबन्धस्य वृत्त्यनियामकस्य प्रतियोगितानवच्छेदकत्वात् "दाहो दहनात् न तु जलात्" इत्यादौ जनकत्वाभावप्रतीत्यसंभवात् निरूपकत्वान्यसंबन्धावच्छिन्नप्रतियोगिताकस्य जनकत्वाभावस्य दाहेऽपि सत्त्वात् 'दाहो न दहनात्' इत्यादिप्रयोगापत्तेः जनकत्वं न पञ्चम्यर्थः किं तु जन्यत्वम्। तस्य स्वरूपसंबन्धावच्छिन्नप्रतियोगिताकाभावः नञा प्रत्याय्यते। जन्यत्वे

---

[1] पृ. ३८९
[2] सू. २.३.२५

प्रकृत्यर्थस्य निरूपितत्वेनान्वयः। तथा च जलनिरूपितजन्यत्वाभाववान् दाह इत्यन्वयबोध इति वदन्ति।

तदत्र वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वे युक्तेः द्वितीयाविवरणे दर्शितत्वात् न किंचिदेतत्। प्रतियोगिवैशिष्ट्यबुद्ध्यजनकस्य वृत्त्यनियामकस्य प्रतियोगितानवच्छेदकत्वात्। गगनादिसंयोगस्य वृत्त्यनियामकस्य प्रतियोगिवैशिष्ट्य-बुद्ध्यजनकत्वादेव प्रतियोगितानवच्छेदकत्वम्।

अन्यथा "घटो न पारिमाण्डल्यात्" इत्यत्र जन्यत्वाभावस्यापि नञा बोधयितुमशक्यत्वात् जन्यत्वस्यापि पञ्चम्यर्थत्वानुपपत्तेः। तस्मात् जनकत्वं जन्यत्वं वा पञ्चम्यर्थः। उभयथापि वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेद-कत्वमिति।

"घटो न पारिमाण्डल्यात्" इत्यत्र प्रकृत्यर्थस्य पञ्चम्यर्थे जनकत्वे आधेयतासंसर्गावच्छिन्नप्रतियोगिताकः जन्यत्वे निरूपकतासंबन्धावच्छिन्नप्रतियोगि-ताकः अभावः नञा प्रत्याय्यते। 'गगनं न पारिमाण्डल्यात्' इत्यत्र 'अन्धो गगनं न पश्यति' इत्यत्रेव द्विधा नञर्थस्य भानमिति तृतीयाविवरणे प्रागेवोक्तम्।

यदि च वृत्त्यनियामकस्य प्रतियोगितावच्छेदकत्वे ब्रह्मशापः न पारि-माण्डल्यादिवाक्यमयोग्यं चाभ्युपेयते तदा भवतु जन्यत्वं पञ्चम्यर्थ इति।

ज्ञापकत्वमपि पञ्चम्यर्थः "तदशिष्यं संज्ञाप्रमाणत्वात्"[१] "लुब्योगाप्रख्यानात्"[२] इत्यादिनिर्देशात्। "पर्वतो वह्निमान् धूमात्" इत्यत्र पञ्चम्यर्थो ज्ञापकत्वं निरूपक-तया वह्न्यादिपदार्थेऽन्वेति। धूमवृत्तिज्ञापकतानिरूपकवह्निमान् पर्वत इत्यन्वय-बोधः।

मणिकृतस्तु प्रतिज्ञासमभिव्याहृतपञ्चम्यन्तधूमादिपदस्य ज्ञाने लक्षणा। हेत्व-वयवसमभिव्याहृतप्रतिज्ञाघटकसाध्यवाचिवह्न्यादिपदस्यापि ज्ञाने ज्ञायमानवह्नौ वा लक्षणा। पञ्चम्या जनकत्वं जन्यत्वं वा अर्थः। तच्च ज्ञाने लक्ष्ये लक्ष्यता-वच्छेदकघटके वा अन्वेति। तथा च धूमज्ञानहेतुकवह्निज्ञानविषयः पर्वत इति धूमज्ञानहेतुकज्ञानविषयवह्निमान् पर्वत इति चान्वयबोध इति वदन्ति।

यत्तु प्रतिज्ञाघटकसाध्यवाचिपदस्य ज्ञाने लक्षणाभ्युपगमे प्रतिज्ञायाः विप्रतिपत्ति-समानशब्दार्थकत्वप्रदर्शनपरस्य "आवृत्तौ सैव प्रतिज्ञा" इति वाक्यस्य विरोधः। विप्रतिपत्तिवाक्ये साध्यवाचिपदस्य ज्ञाने लक्षणाविरहात्। "पर्वतो वह्निमान्"

[१] सू. १.२.५३
[२] सू. १.२.५४

इत्युक्ते 'कुत' इति जिज्ञासायां 'धूमात्' इत्युत्तरवाक्येऽपि धूमपदस्य धूमज्ञाने न लक्षणा, प्रयोजनविरहात्। कोशादिज्ञापितरूढिविरहाच्च।

तस्मात् ज्ञापकत्वं पञ्चम्यर्थः। तत एव प्रतिज्ञाहेत्वोः एकवाक्यतासंभवः। तत्रापि "जलं स्पर्शवत् रूपात् न गन्धात् नापि शब्दात्" इत्यादौ निरूपकत्वादिवृत्त्यनियामकसंबन्धस्याभावप्रतियोगितानवच्छेदकतया तत्संबन्धावच्छिन्नप्रतियोगिताकज्ञापकत्वाभावस्य नञा बोधयितुमशक्यत्वात् नञर्थान्वयानुरोधात् ज्ञाप्यत्वं ज्ञानज्ञाप्यत्वं वा पञ्चम्यर्थ इति नव्यैरुक्तम्।

तच्च न शोभनम्। तथा हि — विप्रतिपत्तिसमानार्थकत्वं प्रतिज्ञाया हेत्ववयवासंवलितायाः अक्षतमेव। केवलप्रतिज्ञायाः साध्यवाचिपदस्य ज्ञाने लक्षणाविरहात्।

यदपि रूढिप्रयोजनान्यतरभावो लक्षणाबाधक इत्युक्तम्, तत्र दर्शितनिर्देशात् रूढेरेव जागरूकत्वम्। अन्यथा ज्ञापकत्वे पञ्चम्या अपि लक्षणाविरहप्रसङ्गात्।

ननु साध्यहेतुपदयोः ज्ञाने लक्षणाभ्युपगमेऽपि "जलं स्पर्शवत् रूपात् गन्धात्" इत्यादौ निषेधप्रतीत्यनुपपत्तिः। तथा हि नञा न तावज्जले गन्धज्ञाप्यस्पर्शात्यन्ताभावः तद्वदन्योन्याभावो वा बोधयितुं शक्यते। जलपक्षकभ्रमात्मकगन्धपरामर्शानुमेयस्पर्शस्य सत्त्वात्। अत एव स्पर्शज्ञाने गन्धज्ञानजन्यत्वाभावोऽपि न बोधयितुं शक्यः। न वा गन्धप्रमानुमेयस्पर्शस्यात्यन्ताभावादिस्तथा। पृथिवीपक्षकगन्धप्रमानुमितिविधेयतावच्छेदकस्पर्शत्वावच्छिन्नस्य जले सत्त्वात्।

न च स्पर्शत्वावच्छिन्नस्य जले सत्त्वेऽपि गन्धप्रमानुमेयस्पर्शव्यक्तेः पृथिवीवृत्तेरत्यन्ताभावः अविकल एवेति निषेधप्रतीत्युपपत्तिरिति वाच्यम्।

तथापि "जलं द्रव्यत्ववत् स्पर्शात् न गन्धात्" इत्यत्र गन्धप्रमानुमेयद्रव्यत्वव्यक्तेः जले सत्त्वात् निषेधप्रतीत्यनुपपत्तेः। अत एव द्रव्यत्वज्ञाने गन्धप्रमाहेतुकत्वाभावो न तथा, पृथिवीपक्षकद्रव्यत्वानुमितौ गन्धप्रमाहेतुकत्वसत्त्वात्।

न च कस्याश्चित् द्रव्यत्वानुमितेः गन्धप्रमाहेतुकत्वेऽपि सर्वस्या न तथात्वमिति निषेधप्रतीत्युपपत्तिरिति वाच्यम्। तथा सति 'पृथिवी द्रव्यत्ववती स्पर्शान्न गन्धात्' इति प्रयोगप्रसङ्गात्। स्पर्शलिङ्गकद्रव्यत्वानुमितेः गन्धप्रमाहेतुकत्वाभावात् निषेधप्रतीत्यापत्तेः। अत एव द्रव्यत्वे गन्धज्ञानज्ञाप्यत्वाभावोऽपि न प्रतीयते, बाधादिति चेत् —

अत्र गुरुचरणाः — गुरुमते प्रतिज्ञाहेत्वन्तभागात् हेतौ पक्षसंबन्धोऽपि प्रतीयते। अत एव उदाहरणान्त एव न्यायः। तथा च प्रकृते जलसंबन्धाभाव एव

नञा प्रत्याय्यते। मतान्तरे तु विशेष्यताद्वयासंवलितमेव प्रकारतानिरूपितविशेष्यत्वं तत्प्रतियोगित्वेन लिङ्गविशिष्टं भ्रमसामान्यभिन्नं ज्ञानं यत् तस्यैव लिङ्गपदलक्ष्यत्वात् तादृशज्ञानस्य पञ्चम्यर्थहेतुतायां तस्याः प्रकृतपक्षकप्रकृतसाध्यकानुमितित्वावच्छिन्ननिरूपकतया संसर्गेण साध्यपदलक्ष्यार्थे साध्यज्ञानेऽन्वय इति व्युत्पत्त्या "जलं द्रव्यत्ववत् स्पर्शात् न गन्धात्" इत्यत्र दर्शितविषयताकभ्रमसामान्यभिन्नस्पर्शज्ञाननिरूपिताया हेतुतायाः जलपक्षकद्रव्यत्वसाध्यकनिरूपकता संसर्गः द्रव्यत्वज्ञाने भासते। तत्संसर्गावच्छिन्नप्रतियोगिताको दर्शितविषयताकभ्रमसामान्यभिन्नगन्धज्ञाननिष्ठहेतुत्वस्याभावोऽपि प्रतीयत इति।

विशेष्यताद्वयासंवलननिवेशात् "जलं द्रव्यत्ववत् स्पर्शात्, पृथिवी द्रव्यत्ववती गन्धात्" इत्यादिन्यायजसमूहालम्बनपरामर्शजन्यत्वस्य जलपक्षकद्रव्यत्वानुमितौ सत्त्वेऽपि न प्रकृतवाक्यार्थबाधः, समूहालम्बनविषयतायाः विशेष्यताद्वयसंवलनात् इति प्राहुः।

वस्तुतस्तु — साध्यवाचिवह्न्यादिपदस्य ज्ञानविधेयवह्न्यादौ लक्षणा। ज्ञानविधेयवह्नेस्तु स्वनिष्ठविधेयतानिरूपितोद्देश्यतया स्वविधेयकज्ञानीययापि संबन्धेन पक्षे पर्वतेऽन्वयः। अत एव पर्वते एकत्र द्वयमिति रीत्या वह्निगुणयोः साध्यतायां "पर्वतो वह्निमान् गुणवान् धूमात् द्रव्यत्वात्" इति न्यायजन्यस्य 'वह्निव्याप्यधूमवान् गुणव्याप्यद्रव्यत्ववान् पर्वतः' इत्याकारकस्य एकत्र द्वयमिति रीत्या धूमद्रव्यत्वप्रकारकैकविशेष्यताकस्य परामर्शस्य जन्यत्वेऽपि 'पर्वतो वह्निमान् गुणवान्' इत्याकारकानुमितेः 'पर्वतो वह्निमान् धूमात् न द्रव्यत्वात्' इत्यादौ न निषेधप्रतीत्यनुपपत्तिः। वह्निविधेयताकज्ञानत्वावच्छिन्नं प्रति द्रव्यत्वप्रमायाः अजनकत्वात् वह्निविधेयताविशेषणज्ञाने द्रव्यत्वप्रमाहेतुकत्वाभावप्रतीतिसंभवात्।

एवं "जलं द्रव्यत्वात् स्पर्शान्न गन्धात्" इत्यादौ स्पर्शप्रमाया द्रव्यत्वविधेयताकज्ञानजनकत्वात् द्रव्यत्वविधेयकज्ञानोद्देश्यतायाः जले सत्त्वात् स्पर्शप्रमाजन्यज्ञानविधेयस्य द्रव्यत्वस्य दर्शितोद्देश्यतया जलेऽन्वयः संभवति। गन्धप्रमाया द्रव्यत्वविधेयताकज्ञानत्वावच्छिन्नं प्रति जनकत्वेऽपि गन्धप्रमाजन्यज्ञानोद्देश्यतायाः जले विरहात्। पक्षनिष्ठोद्देश्यताकज्ञानं प्रति पक्षसंबन्धविषयकलिङ्गविषयकज्ञानस्य हेतुत्वात् गन्धप्रमायाः जलसंबन्धाविषयकतया गन्धप्रमाजन्यज्ञाने जलोद्देश्यताकत्वविरहात् दर्शितोद्देश्यतासंसर्गेण गन्धप्रमाजन्यज्ञानविधेयत्वापन्नस्य द्रव्यत्वस्य जले वैशिष्ट्यविरहान्नान्वयः। दर्शितोद्देश्यतासंसर्गावच्छिन्नप्रतियोगिताकस्य गन्धप्रमाजन्यज्ञानविधेयद्रव्यत्वाभावस्य नञा बोधनसंभवान्निषेधप्रतीत्युपपत्तिः।

ननु दर्शिते "पर्वतो वह्निमान् गुणवान् धूमात् द्रव्यत्वात्" इत्यादौ वह्निविधेयताकज्ञानत्वावच्छिन्नं प्रति द्रव्यत्वप्रमाया अजनकत्वेऽपि वह्निगुणोभयसमूहालम्बनजनकत्वस्याक्षतत्वात् द्रव्यत्वान्न वह्निमानित्यादौ कथं वह्निज्ञाने द्रव्यत्वप्रमाहेतुकत्वाभावस्य नञा बोधनसंभव इति चेत् —

मैवम्। यतो भ्रमाजन्यत्वविशिष्टविषयितासंसर्गेण लिङ्गविशिष्टज्ञानस्य लिङ्गपदलक्ष्यस्य अर्थतो लिङ्गविषयकज्ञानत्वावच्छिन्नस्य ज्ञानविधेयताविशेषेण ज्ञानेऽन्वय इति द्रव्यत्वप्रमानिष्ठहेतुतायाः निरूपितवह्निविधेयताकज्ञानत्वावच्छिन्नजन्यत्वस्य व्यधिकरणसंबन्धतया तत्संबन्धावच्छिन्नप्रतियोगिताकाभावो वह्निगुणोभयानुमितौ वह्निविधेयकत्वावच्छेदेन नञा बोध्यते, बाधकाभावात्।

वस्तुतस्तु पञ्चम्या जन्यत्वमर्थोस्तु। लिङ्गप्रमायाः लिङ्गविषयकज्ञानत्वावच्छिन्ननिरूपितत्वेन संबन्धेनान्वयः। तादृशजन्यत्वस्य स्वरूपेण लक्ष्ये साध्यज्ञानेऽन्वयः। व्युत्पत्तिवैचित्र्येण विधेयितासंबन्धावच्छिन्नजन्यतावच्छेदकतया साध्येऽन्वेतीति। ज्ञानविधेयसाध्यस्य लक्ष्यत्वे तु तादृशजन्यत्वस्य स्वरूपेण ज्ञाने, अवच्छेदकतया साध्ये तद्विधेयतायां वा अन्वय इति द्रव्यत्वप्रमाजन्यतावच्छेदकतासंबन्धावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावो नञा साध्ये तद्विधेयतायां वा बोध्यत इति। दर्शितोद्देश्यतासंबन्धः साध्यज्ञानस्य ज्ञानविधेयसाध्यस्य च तुल्य इति तदन्वय ऊहनीय इति।

दर्शितसंसर्गेण लिङ्गप्रमानिष्ठहेतुतायाः साध्यविधेयताविशेषणज्ञानेऽन्वयोपगमे तु धूमादग्निमित्यादिपक्षवाचकपदासमभिव्याहृतवाक्येऽपि नान्वयबोधानुपपत्तिः, न वा गन्धाच्छब्दाद्वा न स्नेहवानित्यादिपक्षसमभिव्याहृतवाक्ये निषेधप्रतीत्यनुपपत्तिः।

अथ वा साध्यपदस्य साध्यज्ञाने लक्षणा। तत्र लिङ्गप्रमानिष्ठहेतुतायाः दर्शितसंसर्गेणैवान्वयः। साध्यज्ञानस्य साध्यतावच्छेदकावच्छिन्नविधेयतानिरूपितोद्देश्यतया तादृशोद्देश्यतास्वरूपसंबन्धवतो मत्वर्थस्य तादात्म्येन वा पक्षतावच्छेदकविशिष्टे पक्षेऽन्वयः। "पर्वतो वह्निमान् धूमात्" इति हेत्वन्तवाक्ये धूमप्रमाहेतुताकवह्निज्ञानीयवह्नित्वावच्छिन्नविधेयतानिरूपितोद्देश्यतावदभिन्नः पर्वतः इत्यन्वयबोधः। "जलं द्रव्यत्ववत् न गन्धात्" इत्यत्र गन्धप्रमाहेतुकं यत् घटो द्रव्यत्ववानित्यादि द्रव्यत्वज्ञानं तदीयद्रव्यत्वनिष्ठविधेयतानिरूपितोद्देश्यतायाः जले विरहात् तादृशोद्देश्यत्वस्यात्यन्ताभावः तद्वदन्योन्याभावो वा जले नञा बोध्यत इति निषेधप्रतीत्युपपत्तिः।

न च 'द्रव्यत्वव्याप्यगन्धवान् घटः, द्रव्यत्वव्याप्यस्पर्शवज्जलम' इति समूहालम्बनगन्धप्रमात्मकपरामर्शजन्यानुमित्युद्देश्यतायाः जले सत्त्वात् कथं तादृशो-

द्देश्यत्ववदन्योन्याभावस्य प्रतीतिः इति वाच्यम्। मुख्यविशेष्यताद्वयानिरूपकत्वेन लिङ्गप्रमायाः विशेषणीयत्वात्। तथा च मुख्यविशेष्यताद्वयानिरूपिका घटो द्रव्यत्वव्याप्यगन्धवान् इत्याकारिका एकमात्रविशेष्यिका या गन्धप्रमा तज्जन्यानुमित्युद्देश्यतायाः जले विरहात् निषेधप्रतीत्युपपत्तेः मुख्यविशेष्यताद्वयनिरूपकदर्शितसमूहालम्बनस्वरूपगन्धप्रमाजन्यानुमित्युद्देश्यतायाः जले सत्त्वेऽप्यकिंचित्करत्वादिति प्राचीनपथपरिष्कारः।

वृत्त्यनियामकसंबन्धस्य प्रतियोगितावच्छेदकत्वे ब्रह्मशापं मन्वानानां नव्यानां मते "पर्वतो वह्निमान् धूमात् न तु द्रव्यत्वात्" इत्यादौ वह्निज्ञाने द्रव्यत्वप्रमाहेतुकत्वस्याभावो नञा बोधयितुं न शक्यते। दर्शितसंसर्गस्य वृत्त्यनियामकतया तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः। स्वरूपादिसंबन्धावच्छिन्नप्रतियोगिताकस्याभावस्य द्रव्यत्वप्रमाजन्यगुणादिज्ञानेऽपि सत्त्वादिति पञ्चम्याः ज्ञानज्ञाप्यत्वमर्थः। तदेकदेशे ज्ञाने प्रातिपदिकार्थो विषयित्वेनान्वेति, कर्तृकृदर्थैकदेशकृतौ धात्वर्थवत् आकाङ्क्षावैचित्र्यात्। विषयित्वं भ्रमसामान्यभिन्नत्वविशिष्टमन्वयघटकम्। तथा च द्रव्यत्वप्रमाजन्यज्ञानविषयत्वस्य गुणादौ प्रसिद्धस्य स्वरूपसंसर्गावच्छिन्नप्रतियोगिताकोऽभावः वह्नौ नञा बोध्यत इति निषेधप्रतीत्युपपत्तिः।

"जलं द्रव्यत्ववत् स्पर्शात् न तु गन्धात्" इत्यादौ गन्धप्रमाजन्यज्ञानविषयत्वस्याभावः द्रव्यत्वे जलावच्छेदेन नञा प्रत्याय्यत इति निषेधप्रतीतेर्नानुपपत्तिः।

"धूमादग्निमान्" इत्यादौ पक्षपदासमभिव्याहृतवाक्येऽपि नान्वयबोधानुपपत्तिः धूमप्रमाजन्यज्ञानविषयवह्निमानित्याकारकान्वयबोधस्य निष्प्रत्यूहत्वात्।

नव्यमते पुनरिदं चिन्त्यम् — तथा हि ज्ञानज्ञाप्यत्वस्य पञ्चम्यर्थत्वाभ्युपगमे "गन्धात् द्रव्यत्ववान्" इत्यादौ नान्वयबोधः स्यात्। जलावच्छेदेन द्रव्यत्वे गन्धप्रमाजन्यज्ञानविषयत्वाभावस्य सत्त्वात्।

न च पृथिव्यवच्छेदेन द्रव्यत्वे गन्धप्रमाज्ञाप्यत्वस्य सत्त्वात् अन्वयबोधोपपत्तिरिति वाच्यम्। तथा सति जलावच्छेदेन तदभावस्य सत्त्वात् गन्धात्र द्रव्यत्ववत् इति वाक्यप्रयोगप्रसङ्गात्। द्रव्यत्वं गन्धात्र गन्धाच्चेति प्रयोगप्रसङ्गाच्च।

न च "जलं द्रव्यत्ववत् गन्धात्" इत्यत्र गन्धप्रमाज्ञाप्यद्रव्यत्वस्यात्यन्ताभावः तद्वदन्योन्याभावो वा नञा जले प्रत्याय्यत इति वाच्यम्। "घटो द्रव्यत्ववान् गन्धात् जलं द्रव्यत्ववत् न गन्धात्" इत्यत्र गन्धप्रमाज्ञाप्यत्वविशिष्टस्य द्रव्यत्वस्य घट इव जलेऽपि सत्त्वात् निषेधप्रतीत्यनुपपत्तेः।

यदि च गन्धप्रमाज्ञाप्यद्रव्यत्वस्य स्वज्ञानीयस्वनिष्ठविधेयतानिरूपितोद्देश्यतया घटादावन्वयः तादृशोद्देश्यतासंबन्धावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः तादृशोद्देश्यत्वावश्छिन्नप्रतियोगितावच्छेदकताकः तद्वदन्योन्याभावो वा जले नञा प्रत्याय्यत इति स्वीक्रियते, तदा वृत्त्यनियामकसंबन्धस्य तादृशोद्देश्यत्वस्य अत्यन्ताभावप्रतियोगिताया अवच्छेदकत्वं भेदप्रतियोगितावच्छेदकतायाश्चावच्छेदकत्वं स्वयमेवाभ्युपेतमिति साध्यपदस्य साध्यज्ञाने लक्षणाया युक्तत्वात्। साध्यज्ञानस्य तादृशोद्देश्यत्वसंसर्गेण पक्षेऽन्वयस्य समुचितत्वादिति प्राचीनमतमेव श्रेयः। पञ्चम्या ज्ञानज्ञाप्यत्वे लक्षणाकल्पनं वृथैवेति।

भाट्टरहस्ये

"विभाषा गुणेऽस्त्रयाम्"[१] इति सूत्रं इत्थं व्याख्यातम् — गुणे हेतौ अस्त्रीलिङ्गे पञ्चमी वा स्यात् इति सूत्रार्थः। "जाड्यात् जाड्येन वा बद्धः"। गुणत्वाभावे स्त्रीलिङ्गे वा "धनेन कुलम्, बुद्ध्या युक्तः" इत्यादौ तृतीयैव। "हेतौ"[२] इति सूत्रात्। गुणत्वं चेह परतन्त्रत्वमात्रम्। तेन "वह्निमान् धूमात्" इत्यादौ पञ्चमी। नास्तीह घटः अनुपलब्धेः इत्यादौ स्त्रीलिङ्गे तु पञ्चमी "बाहुलकं प्रकृतेस्तनुदृष्टेः"[३] इति वार्तिकप्रयोगात् अनुसन्धेया — इति।

पृथग्विनानानाभिस्तृतीयान्यतरस्याम्[४] इति सूत्रार्थः

एभिर्योगे तृतीया स्यात् पञ्चमीद्वितीये च। अन्यतरस्यां ग्रहणं समुच्चयार्थम्, पञ्चमीद्वितीये चानुवर्तेते। "पृथग् रामेण रामात् रामं वा"। एवं विना नाना इति कौमुदी।

पञ्चमीद्वितीये चेति। तृतीयाभावपक्षे इति शेषः। "अपादाने पञ्चमी[५], षष्ठ्यतसर्थप्रत्ययेन[६], एनपा द्वितीया[७], पृथग्विना०[८]" इति सूत्रक्रमः। तत्र षष्ठीति अस्वरितत्वान्नानुवर्तते। पञ्चमी द्वितीयेति चानुवर्तते। तथा च तृतीयाभावपक्षे पञ्चमी द्वितीया चेति भावः। ननु तृतीयाभावपक्षे द्वितीयैव संनिहितत्वात् स्यात्, न तु पञ्चम्यपि, षष्ठ्यतसर्थेत्यत्र तदनुवृत्तेरभावात्। अतोऽत्र पञ्चम्याः समावेशो-

---

[१] सू. २.३.२५
[२] सू. २.३.२३
[३] वा. २१५३
[४] सू. २.३.३२
[५] सू. २.३.२८
[६] सू. २.३.३०
[७] सू. २.३.३१
[८] सू. २.३.३२

ऽनुपपन्न इत्यत आह — अन्यतरस्यांग्रहणमिति। तृतीया चेत्येतावतैव संनिहित-द्वितीयासमुच्चयसिद्धेः अन्यतरस्यामितिगुरुयत्नकरणं व्यवहिताया अपि पञ्चम्याः समुच्चयार्थम्। अव्ययानामनेकार्थत्वादिति भावः इति बालमनोरमा।

लघुमञ्जूषायाम्[१]

"पृथग् विना नाना रामं रामात् रामेण वा"। पञ्चम्यादिविभक्तीनां प्रति-योगित्वमर्थः। पृथक्त्वं गुणविशेष इत्येके। भेद इत्यन्ये। अन्त्ये "इमौ भ्रातरौ पृथक् जातौ" इति व्यवहारः गौणः। विनानाने ऋतशब्दसमानार्थे।

पदवाक्यरत्नाकरे[२]

नानादिशब्दयोगे पञ्चमीतृतीयाद्वितीयाः। विनादिशब्दानामत्यन्ताभावः तद्वान् अन्योन्याभावः तद्वांश्च यथायथमर्थः। "गन्धं विना वायुः, धूमं विना वह्निः, जलं विना निःस्नेहो गन्धो वा" इत्यादिवत् नानापृथक्पदयोरप्युदाहरणानि।

न चैवं विनानानापृथक्शब्दानां पर्यायतया सूत्रे विनार्थैः इत्येव लाघवात् वक्तुमुचितमिति वाच्यम्। "हिरुङ् नाना च वर्जने" इत्यमरेण हिरुक्शब्दस्यापि वर्जनार्थकत्वेन विनार्थकत्वात् तद्योगेऽपि "हिरुक् देवदत्तस्य" इत्यत्र तृतीयादीनां वारणाय पृथगादिशब्दोपादानस्य सार्थक्यात्।

विभक्त्यर्थनिर्णये[३]

पृथगादिशब्दयोगे पञ्चमीं ज्ञापयति "पृथग्विनानानाभिस्तृतीयान्यतरस्याम्"[४] इति सूत्रम्। पृथक् विना नाना इत्येतैः शब्दैर्योगे तृतीयाविभक्तिर्भवति अन्यतरस्यां पञ्चमी इत्यर्थकम्। अन्यतरस्यामित्यनेन द्वितीयापि समुच्चीयते। पृथग्विनाना-नाशब्दानां वर्जनम् अत्यन्ताभावः तद्वान् अन्योन्याभावः तद्वांश्चार्थः।

न च पृथगादिशब्दानां पर्यायत्वे सूत्रे विनार्थैः इत्येव प्रयुज्येतेति वाच्यम्। "हिरुक् देवदत्तस्य" इत्यत्र विनापर्यायस्य हिरुक्शब्दस्य योगे तृतीयादिप्रसङ्गात् तद्वारणाय पृथगादिशब्दग्रहणात्। हिरुक्शब्दस्यापि वर्जनमर्थः। "हिरुक् नाना च वर्जने" इत्यमरसिंहात्।

---

[१] पृ. १३०८

[२] पृ. ७८८

[३] पृ. ३९९

[४] सू. २.३.३२

"वह्निना वह्नेः वह्निं वा विना जलम्" इत्यत्रात्यन्ताभावो विनार्थः। सः विशेषणतया जलेऽन्वेति। तृतीयापञ्चमीद्वितीयानां प्रतियोगित्वमर्थः। तत्र प्रकृत्यर्थस्य स्ववृत्तिप्रकृत्यर्थतावच्छेदकाद्यन्वयितावच्छेदकावच्छिन्नत्वेन संसर्गेणान्वयः। तथा च वह्नित्वावच्छिन्नवह्निप्रतियोगिताकात्यन्ताभाववज्जलमित्यन्वयबोधः। प्रकृत्यर्थतावच्छेदकादेः संसर्गमध्ये निवेशात् पर्वतीयवह्नेर्विरहेऽपि 'वह्निं विना महानसम्' इति न प्रयोगः न वा पर्वतीयं वह्निं विना महानसमिति प्रयोगानुपपत्तिः।

क्वचित् विनार्थात्यन्ताभावस्य व्याप्यव्यापकभावेन संबन्धेनान्वयः यथा "वह्निना वह्नेः वह्निं वा विना न धूमः" इत्यादौ।

क्वचित् प्रयोज्यप्रयोजकभावसंबन्धेनान्वयः। यथा "दण्डात् दण्डेन दण्डं वा विना न घटः" इत्यादौ। पृथगादियोगे यथा "वह्निना वह्नेः वह्निं वा पृथक् नाना वा जलम्" इत्यादौ। पृथक्शब्दस्य स्वरूपेणविवक्षणात् पृथक्त्वगुणविशिष्टवाचिपृथक्शब्दयोगेऽपि एता विभक्तयः "घटेन घटात् घटं वा पृथक् पटः" इत्यादौ। अत्र तृतीयादीनामवधिमत्त्वमर्थः पृथक्पदार्थतावच्छेदके पृथक्त्वेऽन्वेति। घटावधिकपृथक्त्ववान् पटः इत्यर्थः।

विनार्थोऽत्यन्ताभाववान् यथा "रूपेण रूपात् रूपं वा विना स्पर्शः" इत्यादौ। अत्यन्ताभाववतः आधेयतया स्पर्शेऽन्वयः। रूपप्रतियोगिकात्यन्ताभाववद्वृत्तिः स्पर्शः।

विनार्थोऽन्योन्याभावो यथा "अर्जुनेनार्जुनात् अर्जुनं वा विना पाण्डवाः सैन्धवेन वारिताः" इत्यादौ। अत्रान्योन्याभावो विशेषणतया पाण्डवेष्वन्वेति।

विनार्थोऽन्योन्याभाववान् यथा "पाण्डवैः पाण्डवेभ्यः पाण्डवान् वा विना प्रीतिर्दुर्योधनस्य" इत्यादौ। अत्रान्योन्याभाववत आधेयतया प्रीतावन्वयः। पाण्डवप्रतियोगिकान्योन्याभाववन्निष्ठा दुर्योधनस्य प्रीतिः इति बोधः।

भाट्टरहस्ये[१]

एवं — "पृथग्विनानानाभिस्तृतीयान्यतरस्याम्"[२] इति सूत्रात् एभिर्योगे तृतीया स्यात् पञ्चमी द्वितीया चेत्यर्थकात् "पृथग्रामात् रामेण रामम्" इत्यादौ द्वितीयातृतीयाभ्यां विकल्पेन पञ्चमी। एवं विनानानायोगेऽपि। अत्र प्रतियोगित्वं विभक्त्यर्थः। तत्र द्वितीया संनिहितत्वादेवानुवर्तते। पञ्चमी तु मण्डूकप्लुत्या अनुवर्तनीया। भाष्यकृता तथैव व्याख्यातत्वात्।

---

[१] पृ. १३९

[२] सू. २.३.३२

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य[१] इति सूत्रार्थः

स्तोक अल्प कृच्छ्र कतिपय एतेभ्यः अद्रव्यवचनेभ्यः करणे तृतीयापञ्चम्यौ स्तः। "स्तोकेन स्तोकाद्वा मुक्तः"। लघुना आयासेन मुक्त इत्यर्थः। द्रव्ये तु "स्तोकेन विषेण हतः"। "अल्पेन अल्पाद्वा मुक्तः"। "कृच्छ्रेण कृच्छ्राद्वा मुक्तः"। कष्टेनेत्यर्थः। "कतिपयेन कतिपयाद्वा मुक्तः"। अकृत्स्नेन साधनेनेत्यर्थः।

लघुशब्देन्दुशेखरे[२]

करणे तृतीयायाः सिद्धत्वेन पञ्चम्यर्थं वचनमिदम्। चकारः "तृतीयान्यतरस्याम्"[३] इत्यनुकर्षणार्थः। षष्ठी "गापोष्टक्"[४] इतिवत्। अद्रव्येति। द्रव्यभिन्नवचनेभ्य इत्यर्थः। द्रव्यपदेनात्र सर्वनाम्ना परामर्शयोग्यं लिङ्गनिरूपितविशेष्यं वा। स्तोकशब्दो यद्धर्मावेशात् द्रव्ये स्तोकव्यवहारः तद्धर्मपरः। स च धर्मोऽल्पादिशब्दप्रवृत्तिनिमित्तमेव। शुक्लादिवच्चैते धर्मवचना अपि। करणत्वं च परम्परया। करणे किम्। "स्तोकं पचति"। असत्त्वभूतफलसमानाधिकरणविशेषणत्वादत्र स्तोकशब्दस्यासत्त्ववचनत्वमिति दिक्। लघुमञ्जूषायामप्येवम्।

पदवाक्यरत्नाकरे[५]

अल्पादयः शब्दाः सामानाधिकरण्येन द्रव्यमविशेषयन्तः करणवाचिनीं पञ्चमीं तृतीयां च व्यपेक्षन्ते। यथा "अल्पेन अल्पाद्वा मुक्तः" इत्यादि। द्रव्यसमानाधिकरणे "स्तोकेन विषेण हतः" इत्यादौ तृतीयैव। क्रियासमानाधिकरणे कर्मणि द्वितीयैव। "वाजपेयेन यजेते" इत्यादौ करणानुवादे तृतीयैव।

भाट्टरहस्ये[६]

"करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य"[७] इति सूत्रादेभ्यः करणे तृतीयापञ्चम्यौ स्याताम् इत्यर्थकात् "स्तोकेन स्तोकाद्वा मुक्तः" इत्यादौ तृतीयया सह पञ्चमी। करणत्वं पञ्चम्यर्थः। द्रव्यरूपसत्त्ववचने तु 'स्तोकेन विषेण हतः' इत्यादौ तृतीयैव।

---

[१] सू. २.३.३३
[२] पृ. ६९८
[३] सू. २.३.३२
[४] सू. ३.२.८
[५] पृ. ७९०
[६] पृ. १४०
[७] सू. २.३.३३

विभक्त्यर्थनिर्णये[१]

दूरान्तिकार्थकशब्दयोगे पञ्चमीं ज्ञापयति "दूरान्तिकार्थेभ्यः पञ्चम्यन्यतरस्याम्" ["दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्"[२]] इति सूत्रम्। दूरान्तिकार्थैः शब्दैर्योगे षष्ठी भवति अन्यतरस्यां पञ्चमी भवतीत्यर्थकम्। "ग्रामस्य ग्रामाद्वा दूरं विप्रकृष्टं वा" इत्यत्र दूरादिशब्दस्य दैशिकपरत्वविशिष्टः तादृशपरत्वव्यञ्जकबहुतरसंयोगघटित-परंपराश्रयो वा अर्थः। षष्ठीपञ्चम्योरवधित्वमर्थः परत्वे बहुतरसंयोगे वान्वेति। तथा च ग्रामावधिकपरत्ववानित्यन्वयबोधः।

"ग्रामस्य ग्रामाद्वा अन्तिकं सविधं वा" इत्यत्र अन्तिकशब्दस्य दैशिका-परत्वविशिष्टः तादृशपरत्वव्यञ्जकस्वल्पतरसंयोगघटितपरम्पराश्रयो वा अर्थः। ग्रामावधिकापरत्ववानित्यन्वयबोधः।

दूरान्तिकदेशेभ्यो वैकल्पिकीं पञ्चमीं ज्ञापयति "दूरान्तिकार्थेभ्यो द्वितीया च"[३] इति सूत्रम्। दूरान्तिकार्थशब्देभ्यः द्वितीया भवति, चकारात् तृतीया पञ्चमी च समुच्चीयत इत्यर्थकम्। "ग्रामस्य ग्रामाद्वा अन्तिकम् अन्तिकेनान्तिकाद्वा" "सविधं सविधेन सविधाद्वा" इत्यादौ। दर्शित एवान्वयबोधः। दूरान्तिकशब्देभ्यः सप्तम्यपि भवति। तत्रानुशासनं दर्शयिष्यते। तेन "ग्रामस्य ग्रामाद्वा दूरे विप्रकृष्टे वा सविधे अन्तिके वा" इति प्रयोगः। अत्र दूरान्तिकार्थकशब्दप्रकृतिकानां द्वितीयातृतीया-पञ्चमीसप्तमीनां प्रातिपदिकार्थमात्रे विधानमिति शाब्दिकाः।

"दूरेण तं परिहरन्ति सदैव रोगाः" इत्यत्र "दूरादावसथान्मूत्रम्" इत्यत्र च तृतीयापञ्चम्योरधिकरणार्थकत्वं दृश्यते। तस्मादिदमवगम्यते यत्र दूरादिपदार्था-नामितरस्मिन् विशेषणतयान्वयः तत्र विभक्त्यर्थद्वारैवान्वयः, यत्र तु नान्वयस्तत्र प्रातिपदिकार्थमात्रे द्वितीयादयो विभक्तय इति।

अत्राप्यसत्त्ववचनस्येत्यनुवर्तते। तेन शब्दान्तरसमानाधिकरणदूरादिशब्दात् विशेषणविभक्तिर्भवति यथा दूरः पन्थाः दूराय पथे स्पृहयति।

विभक्त्यर्थनिर्णये[४] पञ्चमी विभक्ते इति सूत्रव्याख्यानम्

वैधर्म्यार्थयोगे पञ्चमीं ज्ञापयति "पञ्चमी विभक्ते"[५] इति सूत्रम्। निर्धारणाश्रये विभक्ते सति यतो विभागः ततः पञ्चमी भवतीत्यर्थकम्। षष्ठीसप्तम्योरपवादः।

---

[१] पृ. ४०१
[२] सू. २.३.३४
[३] सू. २.३.३५
[४] पृ. ४०२
[५] सू. २.३.४२

विभागो वैधर्म्यम्। तच्च सजातीयावधिकोत्कर्षापकर्षस्वरूपम्। निर्धारणं तु सामान्यधर्मावलीढयत्किंचिद्व्यक्तिवैधर्म्यम्। विभागस्तु अन्वयितावच्छेदकावच्छिन्नवैधर्म्यमिति विशेषः। "पाटलिपुत्रेभ्य आढ्यतरा माथुरा" इत्यत्र आढ्यतरत्वमधिकसंख्याकधनवत्त्वम्। पञ्चम्यास्तु भेदप्रतियोगितावच्छेदकत्वमर्थः। तच्चापरशब्दार्थतावच्छेदकेऽन्वयितावच्छेदकेऽन्वेति। भेदे च प्रकृत्यर्थस्य धनावच्छिन्नाधिकरणतानिरूपिताधेयतयान्वयः। तथा च धनवत्पाटलिपुत्रवृत्तिभेदप्रतियोगितावच्छेदकाढ्यतरत्ववदभिन्नाः माथुरा इत्यन्वयबोधः।

यादृशधर्मेऽन्वयितावच्छेदके भेदप्रतियोगितावच्छेदकत्वस्यान्वयः तत्सजातीयधर्मावच्छिन्नाधिकरणतानिरूपिताधेयतया प्रकृत्यर्थस्य भेदेऽन्वयो विवक्षितः। साजात्यं चान्वयितावच्छेदकघटकतावच्छेदकरूपेण बोध्यम्। प्रकृते तु तादृशं रूपं धनवत्त्वमेव। अतो "वृक्षेभ्यो दरिद्रेभ्यो वा आढ्यतरा माथुरा" इति न प्रयोगः।

यत्तु "वैश्येभ्यः क्षत्रियाः शूराः शूद्रेभ्यो धनिनो विशः" इत्यादौ शौर्यसंख्यानिष्ठभेदप्रतियोगितावच्छेदकजातिमत्संख्यावत्त्वं धनसंख्यानिष्ठभेदप्रतियोगितावच्छेदकजातिमत्संख्यावत्त्वं च पञ्चम्यर्थः। शूरपदार्थतावच्छेदके शौर्ये धनिशब्दार्थतावच्छेदके धने यथायोग्यमन्वेति। पञ्चम्यर्थैकदेशे शौर्ये धने प्रकृत्यर्थस्यान्वयः। तथा च वैश्यशौर्यसंख्यानिष्ठभेदप्रतियोगितावच्छेदकजातिमत्संख्यावच्छौर्यवदभिन्नाः क्षत्रिया इत्यादिरन्वयबोध इति।

तन्न शोभनम्। शौर्यधनादेः पञ्चम्यर्थेऽनुप्रवेशे पञ्चम्यर्थस्याननुगमापत्तेः। यत्रैकैकमेव धनमुत्कृष्टापकृष्टं तत्र अस्मादसौ धनिक इत्यादिप्रयोगानुपपत्तेश्च। धनिकत्वमतिशयितधनवत्त्वम्। अतिशयः बहुमूल्यता च उभयथाप्यतिशयितधनवत्त्वं धननिष्ठभेदप्रतियोगितावच्छेदकमिति दर्शितपक्षे न काप्यनुपपत्तिरिति।

"अयमस्माद्दीर्घ" इत्यत्र दीर्घत्वं परिमाणविशेषः। तस्य ह्रस्वपरिमाणवदिदंपदार्थनिष्ठभेदप्रतियोगितावच्छेदकत्वमक्षतमेव।

एवम् "अस्माद्ध्रस्वः" इत्यत्र ह्रस्वत्वं परिमाणविशेषः। तस्यापि दीर्घावधिकत्वं दर्शितप्रायमिति।

"अयमस्मात्तारो मन्द्रो वा" इत्यत्र सजातीयसाक्षात्कारस्य प्रतिबन्धकतावच्छेदकजातिमत्वं तारत्वम्, प्रतिबध्यतावच्छेदकजातिमत्त्वं मन्द्रत्वम्। तारत्वं मन्द्रनिष्ठस्य, मन्द्रत्वं तारनिष्ठस्य भेदस्य प्रतियोगितावच्छेदकमिति नानुपपत्तिः।

"श्वपाकात् यवनो नीचः" इत्यत्र नीचत्वं वेदनिषिद्धतावच्छेदकत्वोपलक्षितधर्मविशिष्टकर्मकर्तृत्वम्। तादृशधर्मविशिष्टस्य गोहननादेः अतिशयितनरक-

प्रयोजकस्य कर्तृत्वं यवननिष्ठं तादृशधर्मविशिष्टश्वपचादिनरकप्रयोजककर्मकर्तृश्च-पाकवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकमिति। नीचपर्याय इतरशब्दोऽधमशब्दश्च।

"तस्मादयमधिकः" इत्यत्र अधिकत्वमधिकसंख्यावत्त्वं न्यूनसंख्याकतद्वृत्तिभेद-प्रतियोगितावच्छेदकमिति। संख्याया आधिक्यं स्वान्यसंख्याव्याप्यत्वं, न्यूनत्वं तु स्वान्यसंख्याव्यापकत्वम्। दशत्वव्याप्यं शतत्वं न तु दशत्वं तद्व्याप्यं, दशमात्रे व्यभिचारादिति शतत्वमधिकम्। शतत्वव्यापकं दशत्वमिति तन्न्यूनम्।

अधिकसंख्या क्वचिदवयवगता यथा "गुञ्जाया अधिको यवः"। क्वचित् मूल्यगता यथा "रजतादधिकं हिरण्यम्"। क्वचित् पुण्यगता यथा "पितुरधिको युधिष्ठिरः"। क्वचित् विद्यागता यथा "वैशम्पायनादधिको व्यासः"। क्वचित् गुणगता "तेजसोऽधिके क्षितिपाथसी"। एवमन्यत्राप्यूहनीयम्। "तस्मात् स्थूलः कृशो वा" इत्यत्र दीर्घत्वह्रस्वत्ववत् अन्वयो बोध्यः।

केचित्तु "तस्मात् अयं दीर्घः" इत्यत्र पञ्चम्यर्थस्य अवधिमत्त्वरूपस्या-पादानत्वस्य दीर्घादिनामार्थेऽन्वयानुपपत्तेः भवतीति क्रियाध्याहार इति वदन्ति।

तदसत्। कारकेऽपादानत्वस्वरूपस्य दर्शितत्वात्। विभक्तपञ्चम्याः तदर्थ-कत्वविरहात्। भवतीत्यध्याहारेऽपि भवत्यर्थयोरुत्पत्तिमत्तयोः निरवधिकत्वेनानन्व-यापत्तेश्च। किं चावधित्वमपि नैकम्। यतः विभागनिरूपकोऽवधिः न परत्व-पृथक्त्वादिनिरूपक इत्यास्तां विस्तरः।

काशिकावृत्तौ निर्धारणाश्रये यस्मिन् विभक्तमस्ति ततः पञ्चमीति व्याख्यातम्। तदनुरोधेन प्रकृतेऽपि तथा व्याख्यातम्। निर्धारणं तु षष्ठ्यां विशेषेण वक्ष्यते।

यदि च "नागरिकेषु पाटलिपुत्रेभ्य आढ्यतरा माथुरा" इति "नरेषु क्षत्रिया वैश्येभ्यः शूरा" इति च प्रयोगः तदा वृत्तौ निर्धारणाश्रय इत्युपादानं युक्तमेवेति।

दूरान्तिकार्थेभ्यो द्वितीया च[1] इति सूत्रार्थः

एभ्यो द्वितीया स्यात् चात् पञ्चमीतृतीये च। प्रातिपदिकार्थमात्रे विधिरयम्। तथा च प्रथमापवाद इति फलितम्। "ग्रामस्य दूरं दूरात् दूरेण वा, अन्तिकम् अन्तिकात् अन्तिकेन वा"। असत्त्ववचनस्येत्यनुवृत्तेर्नेह — दूरःपन्थाः। पन्थाः द्रव्यम्। तद्विशेषणं दूरशब्दः सत्त्ववचनः।

"दूरादावसथान्मूत्रं दूरात् पादावनेजनम्" इति भाष्यप्रयोगात् सप्तम्यर्थेऽधि-करणेऽप्ययं विधिः।

---

[1] सू. २.३.३५

लघुमञ्जूषायाम्[१]

"ग्रामस्य दूरात् दूरेण दूरं वा आगतम्"। अत्र पञ्चम्यादयः प्रातिपदिकार्थे। दूरदेशवृत्ति दूरशब्दार्थः। षष्ठ्यर्थः संबन्धः। ग्रामसंबन्धिदूरदेशवृत्ति गमनमिति बोधः। ग्रामस्यान्तिकात्। समीपदेशवृत्ति अन्तिकशब्दार्थः। ग्रामसंबन्ध्यन्तिकदेशवृत्ति गमनमिति बोधः।

भाट्टरहस्ये[२]

एवं "दूरान्तिकार्थेभ्यो द्वितीया च"[३] इति सूत्रादेभ्यो द्वितीया। चात् पञ्चमीतृतीये इत्यर्थकात् "ग्रामस्य दूरं दूरात् दूरेण वा" इत्यादौ द्वितीयातृतीयाभ्यां सह पञ्चमी। प्रातिपदिकमात्रार्थे विधिरयम्। न त्वत्र विभक्त्यर्थोऽन्यः कश्चित्। इह सप्तम्यपि। "सप्तम्यधिकरणे च"[४] इति सूत्रे चकारेण दूरान्तिकार्थेभ्य इत्यनुकर्षणात्। तेन 'ग्रामस्य दूरेऽस्ति' इति प्रयोगोऽपि नानुपपन्नः। अत्रासत्त्ववचनस्यानुवर्तनात् सत्त्ववचनत्वे नैतद्विभक्तिचतुष्टयनियमः। सत्त्ववचनत्वं चेह सामानाधिकरण्येन प्रातिपदिकार्थविशेषणत्वम्। तेन "दूरः पन्थाः" इत्यादौ दूरशब्दस्य पथि विशेषणत्वेन तद्विभक्त्यैव विभक्तिः।

यद्यपि चास्मन्मते विशेषणानामप्याख्यातेनैवान्वयः, तथैव यत्र दूरत्वविशिष्टाभेदः संसर्गघटकः तत्र प्रथमा, यत्र दूरत्वाधारता संसर्गघटिका तत्र विभक्तिचतुष्टयमिति न कोऽपि विरोधः। तत् सिद्धं सर्वत्र पञ्चम्यर्थः भावनान्वयी इति।

इति पञ्चम्यर्थविचारः

---

१ पृ. १३०९
२ पृ. १४०
३ सू. २.३.३५
४ सू. २.३.३६

अथ षष्ठ्यर्थविचारः

षष्ठी शेषे[1] इति सूत्रार्थः

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसंबन्धः शेषः, तत्र षष्ठी स्यात्। "राज्ञः पुरुषः"। कर्मत्वकर्तृत्वादीनामपि संबन्धत्वसामान्यात्मना विवक्षायां षष्ठ्येव। "सतां गतम्"। सत्संबन्धिगमनमित्यर्थः। कर्तृत्वविवक्षायां तु सद्भिर्गतमिति तृतीया भवत्येव। कृद्योगलक्षणा षष्ठी तु न भवति। "न लोकाव्ययनिष्ठाखलर्थतृनाम्"[2] इति निषेधात्।

"सर्पिषो जानीते"। कर्त्राश्रिता सर्पिस्संबन्धिनी प्रवृत्तिः इति बोधः। करणत्वविवक्षायां तु सर्पिषा उपायेन प्रवर्तत इत्यर्थः।

"मातुः स्मरति"। देवदत्तकर्तृकं मातृसंबन्धिस्मरणमित्यर्थः। कर्मत्वविवक्षायां मातरं स्मरतीत्यर्थः।

एधोदकस्योपस्कुरुते। एधशब्दः अकारान्तः पुंलिङ्गः। "कारके"[3] इति सूत्रे एधाः पक्ष्यन्ते इति भाष्यप्रयोगात्। एधाश्चोदकाश्चेति द्वन्द्वात् षष्ठी। "जातिरप्राणिनाम्" इत्येकवद्भावः। शोषणगन्धद्रव्याधानादिना परिष्करणमुपस्करणम्। एधोदकसंबन्धिपरिष्करणमिति बोधः। कर्मत्वविवक्षायां एधोदकर्मकं परिष्करणमिति बोधः।

एधश्शब्दः सकारान्तोऽप्यस्ति नपुंसकलिङ्गः। तदानीम् एधः दकस्येति च्छेदः। उदकशब्दपर्यायः दकशब्दोऽप्यस्ति। तथा च एधः कर्तृ उदकं परिष्कुरुत इत्यर्थः। कर्मत्वस्य शेषत्वविवक्षायां तु षष्ठी। निम्बकरञ्जादिकाष्ठविशेषप्रज्वलिताग्नितप्तोदकस्य गुणविशेषो वैद्यशास्त्रप्रसिद्धः।

---

[1] सू. २.३.५०
[2] सू. २.३.६९
[3] सू. १.४.२३

प्रौढमनोरमायाम्[१]

"ज्ञोऽविदर्थस्य करणे"[२], "अधीगर्थदयेशां कर्मणि"[३], "कृञः प्रतियत्ने"[४], "रुजार्थानां भाववचनानामज्वरेः"[५], "आशिषि नाथः"[६], "जासिनिप्रहणनाटक्राथपिषां हिंसायाम्"[७], "व्यवहृपणोः समर्थयोः"[८], "कृत्वोऽर्थप्रयोगे कालेऽधिकरणे"[९] "इत्यष्टसूत्री तु नेह व्याख्याता। तस्याः समासनिवृत्तिफलकत्वात्। तथा हि — तत्र शेष इत्यनुवर्तते। शेषत्वेन च विवक्षिते च करणादौ षष्ठी सिद्धैव। तदयमर्थः — इह षष्ठ्येव, न तु लुक्। तथा च लुकः प्रयोजकीभूतः समास एव नेति तथा च वार्तिकम् —

प्रतिपदविधाना षष्ठी न समस्यते इत्यादि। हरिश्चाह —

कारकैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये।।

इति। तेन शेषत्वविवक्षायां "सर्पिषः ज्ञानम्, मातुः स्मरणम्" इत्यादीन्यसमस्तान्येव साधूनि। हरिस्मरणमित्यादीनि तु शेषत्वाविवक्षायां कृद्योगषष्ठ्या समासे बोध्यानि। तत्र च कारकपूर्वकत्वात् कृदुत्तरपदप्रकृतिस्वरः। शेषषष्ठ्या समासे तु अन्तोदात्तत्वं स्यात्। तच्चानिष्टम्। तथा च स्वरार्थेयमष्टसूत्रीति निष्कर्षः। किं च "मातुः स्मृतम्" इत्यादौ समासाभावोऽपि फलम्। न हि तत्र कारकषष्ठी लभ्यते। "न लोकाव्यय॰"[१०] इति निषेधात्। आह च —

निष्ठायां कर्मविषया षष्ठी च प्रतिषिध्यते।
शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यते।।

इति। एवं स्थिते वृत्त्यादिबहुग्रन्थेषु इह प्रकरणे उदाहरणं प्रत्युदाहरणं च यद्यत् तिङन्तं दृश्यते तत् सर्वम् उपलक्षणतया नेयमिति हरदत्तादयः — इति।

---

[१] पृ. ९३६
[२] सू. २.३.५१
[३] सू. २.३.५२
[४] सू. २.३.५३
[५] सू. २.३.५४
[६] सू. २.३.५५
[७] सू. २.३.५६
[८] सू. २.३.५७
[९] सू. २.३.६४
[१०] सू. २.३.६९

"भजे शम्भोश्चरणयोः"। अत्र चरणयोः कर्मत्वस्य शेषत्वविवक्षायां षष्ठी। शम्भुचरणसंबन्धि भजनमित्यर्थः।

फलानां तृप्तः। अत्रापि करणत्वस्य शेषत्वविवक्षायां षष्ठी। फलसंबन्धिनी तृप्तिरिति बोधः।

लघुमञ्जूषायाम्[१]

षष्ठ्यर्थः संबन्धत्वेन रूपेण तत्तद्रूपेण = स्वत्वस्वामित्वसमूहादिरूपेण च स्वस्वामिभावादिः संबन्धः। एवं संबन्धत्वेन रूपेण क्रियाकारकभावश्च षष्ठ्यर्थः। अत एव — तत्तद्रूपेण संबन्धत्वादेव अनेकसंबन्धसत्त्वेऽपि स्वत्वादिसंबन्ध-विशेषतात्पर्येण चैत्रस्य नेदं वास इति प्रयुज्यते। अत एवैकशतं षष्ठ्यर्था इति "षष्ठी स्थानेयोगा"[२] इति सूत्रस्थं भाष्यं संगच्छते। द्वितीयादितश्च क्रियाकारक-भावस्य तत्तद्रूपेणैव क्रियाकारकभावत्वादिरूपेणैव बोधः। तथैवानुभवात्। "मातुः स्मरति" इत्यादौ च तत्तद्रूपेण बोधे द्वितीयादीनां बाधिकानां सत्त्वात् संबन्धत्वेनैव बोधः मातृसंबन्धिस्मरणमितीति नव्याः।

प्राञ्चस्तु अत्रापि क्रियाकारकभावमूलकं विशेषणत्वरूपं विषयत्वमेव निमित्तत्वमेव वा तत्त्वेन संबन्धत्वेन वा विवक्षितम्। अत एव हरिणा —

संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।
श्रुतायामश्रुतायां वा क्रियायामभिधीयते।।

इति क्रियाकारकपूर्वकत्वमेव संबन्धस्य प्रोक्तम्। क्रियाकारकसंबन्धः कारणं, शेषसंबन्धस्तु फलभूतः। यथा "राज्ञः पुरुषः" इत्यत्र राजपुरुषौ कर्तृसंप्रदानरूपौ "अभूतां राजा पुरुषाय ददाति" इति तन्मूलकस्वस्वामिभावप्रतीतौ कर्त्रादिविशेष-रूपतानवगमः। हरिश्लोके कारकशब्देन करणत्वादिशक्तय उच्यन्ते। अत्र अश्रूयमाणा दानादिक्रिया संबन्धलक्षणकार्यानुपपत्त्या अनुमीयमाना संनिहितेति तन्मुखेन समन्वयः। सिद्धस्वभावानां द्रव्याणां क्रियां विना परस्परं संबन्धाभावात्। क्रिया हि निःश्रयणीव संबन्धं करोति। एवं च संबन्धिनोरप्यनुमीयमान-क्रियानिमित्तत्वरूपं कारकत्वमस्ति।

"मातुः स्मरति" इति श्रुतायां क्रियायां क्रियाकर्मत्वमूलकः उक्तः संबन्धः। सामीप्याद्यपि बुद्धिस्थैकदेशाधिकरणकस्थितिक्रियाकर्तृत्वनिमित्तकमित्याद्यूह्यम्।

---

[१] पृ. १३०९
[२] सू. १.१.४९

क्रियाकारकपूर्वकसंबन्धस्य षष्ठ्यर्थत्वादेव "पर्वतस्य वृक्षाः" इति न। वृक्ष-पर्वतयोराधाराधेयभावमूलकसंबन्धाभावात्। न च संयोगः आधाराधेयभावमूलकः इति वाच्यम्। आधाराधेयभावस्य संयोगमूलकत्वेन संयोगस्याधाराधेयभाव-मूलकत्वाभावात्।

किं च संयोगो न संबन्धः। संबन्धस्य पदार्थयोजनामात्रहेतुत्वात्। संयोगस्य स्वतः पदार्थत्वात्। सांसर्गिकविषयतया तस्याभानाच्च। संबन्धश्च षष्ठ्यादिभि-रेवोच्यते। संबन्धपदेनापि सांसार्गिकविषयतावत्त्वेन नोच्यत इति संबन्धः सर्वथा पदागम्यः।

संयोगस्तु न कदापि षष्ठ्यादिभिः सांसर्गिकविषयतयोच्यते। इमौ संयुक्तावित्येव तत्र व्यवहारात्। संयोगे संबन्धत्वव्यवहारस्तु उभयाश्रिततत्वरूपः यः संबन्धस्य धर्मः तद्वत्त्वात् गौणः।

अत एव संयोगस्य संबन्धत्वाभावात् षष्ठ्यर्थत्वाभावाच्च मतुप्सूत्रे भाष्ये — "'वृक्षवान् पर्वतः' इत्याद्यर्थं सप्तम्युपादानम्। 'गोमान् देवदत्तः' इत्याद्यर्थं च षष्ठ्युपादानम्" इत्युक्तम्। षष्ठ्यर्थश्च सांसर्गिकविषयतयैव भासते। अत एव "षष्ठी शेषे"[१] इति सूत्रे भाष्ये — "'राज्ञः पुरुषः' इत्यत्र राजा विशेषणम्, पुरुषो विशेष्यः" इत्युक्तम्। अन्यथा संबन्धं विशेष्यतया विशेषणतया वा ब्रूयात् इति प्राहुः।

राज्ञः पुरुषः — इत्यत्र स्वस्वामिभावः षष्ठ्यर्थः। स च स्वत्वस्वामित्व-समूहरूपः। यत्तु स्वामित्वं स्वत्वं वा षष्ठ्यर्थ इति। तन्न। तस्यैकमात्रवृत्तितया संबन्धत्वायोगात्। संबन्धो हि संबन्धिभ्यां भिन्नः उभयसंबन्धी। न च तदपि एकत्र आश्रयतया अन्यत्र निरूपकतयास्त्येवेति वाच्यम्। निरूपकत्वस्य वृत्त्यनियाम-कत्वेन उभयत्र संबन्धत्वप्रतीत्यनापत्तेः। उक्तं च हरिणा —

द्विष्ठोऽप्यसौ परार्थत्वात् गुणेषु व्यतिरिच्यते।
तत्राभिधीयमानश्च प्रधानेऽप्युपयुज्यते।।

परार्थत्वात् गुणानां परं प्रति विशेषणत्वेन विवक्षितत्वात् इत्यर्थः। अयं भावः — भेदे सति विशेषणतया विवक्षितस्य संबन्धं विना विशेषणत्वासंभवेन तदाकाङ्क्षितत्वात् तत्र विशेषणे संबन्धो व्यतिरिच्यते उद्भूततया प्रतीयत इति तत्रैव षष्ठी। विशेष्ये तु पदान्तरासमभिव्याहारे स्वार्थनिरूपितविशेष्यत्वेन भासमानत्वरूपस्वनिष्ठत्वादेव न विशेष्यतानियामकसंबन्धापेक्षा। तत्र विशेषणे

[१] सू. २.३.५०

शब्देन षष्ठ्यादिना अंशतः प्रतीयमानः प्रधानेऽप्युपयुज्यते। तस्य संबन्धस्य द्विष्ठत्वस्वभावत्वात् राजादिनिरूपितविशेष्यतायाः राजादिपदसंनिधाने प्रतीयमानायाः उपकारको भवतीत्यर्थः।

यत्र तु पदान्तरासमभिव्याहृततया "राज्ञः" इत्युक्तम्, तत्र संबन्धिसामान्यमध्याहृत्य तन्निरूपितविशेषणत्वप्रतीतिः इति विशेषः। राज्ञ इति हि स्वामित्वमवगम्यमानम् अन्यथानुपपत्त्या पुरुषे स्वत्वमवगमयति। एवं च राजस्वामिकमिति ततो बोधः। तदनन्तरं राजस्वामिकं किमिति विशेषजिज्ञासा भवति, पुरुषादिपदैश्च तन्निवृत्तिर्भवति।

एवं च सर्वत्र संबन्धिद्वयवृत्तिधर्मसमूहः संबन्धिनोः भेदे संबन्धः। स्पष्टं चेदं "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी"[१] इति सूत्रे भाष्ये। तत्र हि "अधिब्रह्मदत्ते पञ्चालाः" इत्यत्रानेन ब्रह्मदत्ते सप्तम्यां पञ्चालात् द्वितीया प्राप्नोति। अधिद्योत्यस्य ब्रह्मदत्तनिष्ठस्य संबन्धस्य सप्तम्या उक्तत्वेऽपि तद्द्योत्यस्य पञ्चालनिष्ठसंबन्धस्य तया असंप्रत्ययात् इत्युक्तम्। अन्यतरस्यैव संबन्धत्वे तु भाष्यासंगतिः स्पष्टैव।

धर्मद्वयसमूहस्य संबन्धत्वादेव स्वस्वामिभावः अवयवावयविभावः आधाराधेयभावः प्रतियोग्यनुयोगिभावः विशेष्यविशेषणभावः संबन्धः इत्यदिव्यवहारः। तत्राभावप्रतियोगिनोः प्रतियोगित्वानुयोगित्वसमूहः संबन्धः।

एवं च षष्ठ्याः संबन्धो विशेषणत्वं चार्थः इति विशेषणादेव षष्ठी। अत एव "राज्ञः पुरुषः" इत्यत्र राजपदसंनिधाने प्रतीयमानं पुरुषे विशेष्यत्वरूपमाधिक्यं वाक्यार्थः। राज्ञि प्रतीयमानं तत्प्रतिद्वन्द्वि विशेषणत्वं तु पुरुषादिपदान्तरासमभिव्याहारेऽपि 'राज्ञः' इत्येतावन्मात्रेण प्रतीतेः षष्ठ्यर्थ इत्युक्तं "षष्ठी शेषे"[२] इति सूत्रे भाष्ये। किं च 'राज्ञः' इत्युक्ते तत्संबन्ध्याकाङ्क्षोत्थित्या तदुत्थापकस्वामित्वादिशक्तिरपि षष्ठ्यर्थ इत्यपि भाष्ये स्पष्टम्। यदा तु पुरुषस्य विशेषणत्वविवक्षा तदा पुरुषस्य राजेत्यपि।

ननु "मम भ्राता" इत्यादौ कः षष्ठ्यर्थः। न च एकस्मात् जन्म षष्ठ्यर्थ इति वाच्यम्। एकत्र स्थाने उषितानां पान्थानामपि संबन्धापत्तेरिति चेत् —

सत्यम्। एकोदरशायित्वमात्रेण व्यवहारनियामकः काल्पनिकोऽवयवावयविभावः संबन्धः। एतेन सामानाधिकरण्यं न संबन्ध इति सूचितम्।

---

[१] सू. २.३.९
[२] सू. २.३.५०

व्युत्पत्तिवादानुसारेण शेषषष्ठ्यर्थनिरूपणम्[१]

संबन्धविवक्षायां कारकविभक्त्यप्रसक्तेः "शेषे षष्ठी" इत्यनेन चैत्रस्येदम् इत्यादौ षष्ठी विधीयते।

"चैत्रस्य द्रव्यम्" इत्यत्र स्वत्वं षष्ठ्यर्थः। चैत्रनिरूपितस्वत्ववत् द्रव्यमिति बोधः।

"चैत्रस्य स्वं, घटस्य कारणम्" इत्यादौ निरूपितत्वं षष्ठ्यर्थः चैत्रनिरूपित-स्वत्ववत्, घटनिरूपितकारणत्ववत् इति बोधः।

"चैत्रस्य हस्तः" इत्यादौ अवयवत्वं षष्ठ्यर्थः। चैत्रनिरूपितावयवत्ववान् हस्त इति बोधः।

अत्र स्वत्वनिरूपितावयवत्वादीनां संबन्धत्वेनैव षष्ठ्यर्थता, न तु विशिष्य स्वत्वत्वादिना। शक्त्यानन्त्यप्रसङ्गात्।

न च संबन्धत्वेन रूपेण संबन्धानां षष्ठीवाच्यत्वे 'चैत्रस्य नेदं वासः' इति प्रयोगानुपपत्तिः। वाससि चैत्रसंयोगसत्त्वेन चैत्रसंबन्धाभावस्य बाधितत्वादिति वाच्यम्। चैत्रस्वत्वाभावतात्पर्येण हि तथाप्रयोगः। अतस्तत्र विशेषरूपेण स्वत्वत्वेन स्वत्वे षष्ठ्याः लक्षणा। चैत्रनिरूपितस्वत्वाभाववत् वास इति तत्र बोध इति नानुपपत्तिः प्रयोगस्य। न च तथा सति सुब्विभक्तौ न लक्षणेति प्रवादा-संगतिरिति वाच्यम्। तादृशप्रवादस्य अनुशासनासत्त्वे एकविभक्त्यर्थे अपर-विभक्तेर्न लक्षणेत्येतत्परत्वात्। अत एव "चैत्रो गच्छति" इत्यादौ प्रथमादेः न द्वितीयार्थकर्मत्वे लक्षणा। अतो न तत्र चैत्रकर्मकगमनप्रतीतिः। अनुशासनसत्त्वे तु "पशुना रुद्रं यजते" इत्यादौ कर्मत्वे तृतीयायाः, संप्रदानत्वे च द्वितीयायाश्च लक्षणा इष्टैव।

एवं च प्रकृतेऽनुशासनविरहेऽपि स्वत्वादेः विभक्त्यन्तरार्थत्वविरहेण षष्ठ्याः स्वत्वत्वेन रूपेण स्वत्वे लक्षणायां बाधकाभावः।

अत एव संबन्धत्वेन रूपेण संबन्धे षष्ठ्याः शक्त्युपगमादेव "कृद्योगापि हि षष्ठी संबन्धत्वेनैव बोधयतीति मिश्राः। एवकारेण कर्तृत्वत्वकर्मत्वत्वादिविशेष-रूपव्यवच्छेदः। घटसंयुक्तेऽपि "कुविन्दे कुविन्दः पटस्य कर्ता न घटस्य" इत्यादौ संबन्धाभावः बोधयितुमशक्य इति कर्मत्वत्वविशिष्टे कर्मत्वे षष्ठ्याः लक्षणया घटनिष्ठकर्मतानिरूपकत्वाभाववत्कृतिमान् इति बोधः सम्पादनीयः। "कर्तृकर्मणोः कृति"[२] इति सूत्रं तु नञ्समभिव्याहारस्थलीयनिरूढलक्षणासम्पादकम्।

---

[१] व्यु.वा.पृ. २६४

[२] सू. २.३.६५

इत्थमेव च संबन्धत्वेन कर्मत्वादिविवक्षया "मातुः स्मृतम्" इत्यादौ "अधीगर्थ०" इत्याद्यनुशासनस्य वैयर्थ्यं संबन्धत्वेन विवक्षायां शेषषष्ठ्यैव निर्वाहात् इत्याशङ्क्य "अधीगर्थदयेशां कर्मणि"[1] इत्याद्यनुशासनस्य नियमपरतया सार्थक्योपपादनं वृत्तिकृताम् उपपद्यते। संबन्धत्वविशिष्टसंबन्धविवक्षायां "शेषे षष्ठी" इत्यस्य षष्ठ्यविधायकत्वे तादृशानुशासनस्य विधित्वमेव स्यात्।

अत एव च "आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्ठमुच्यते" इत्यत्र पक्वम् इत्यतः प्राक् शूद्रस्य इत्यनुषज्यमानायाः षष्ठ्याः संबन्धत्वेन कर्तृत्वमर्थः, न तु स्वत्वम्। शूद्रकर्तृकवृषोत्सर्गे चरुहोमानुपपत्तेः इति नवीनस्मार्तानां मतमुपपद्यते। शूद्रस्येत्यत्र षष्ठ्याः कर्तृत्वार्थकत्वे तु होमसाधनीभूतचरुद्रव्यस्य ब्राह्मणकर्तृकपाककर्मीभूतस्य शूद्रकर्तृकपाकाभावेनोच्छिष्टत्वाभावान्न तद्धोमानुपपत्तिः।

न च तत्र कृद्योगा षष्ठी कर्तृत्वत्वेनैव बोधयतीति वाच्यम्। निष्ठायोगे "न लोकाव्ययनिष्ठाखलर्थतृनाम्"[2] इति सूत्रेण षष्ठ्याः निषेधात्।

अत एव "नाग्निस्तृप्यति काष्ठानां न पुंसां वामलोचना" इत्यादौ करणत्वादेः संबन्धत्वेन विवक्षया षष्ठ्युपपत्तिः। विशेषरूपेण करणत्वत्वादिना करणत्वादि-संबन्धविवक्षायां तृतीयादिविधिविषयतया षष्ठ्यनुपपत्तेः।

अथ संबन्धत्वेन संबन्धस्य षष्ठीवाच्यत्वे 'पुरुषस्य दण्डः' इतिवत् 'दण्डस्य पुरुषः' इत्यपि प्रयोगः स्यात्। "एवं दण्डी पुरुषो रूपवान् घटः" इत्यादिवत् दण्डरूपादेः पुरुषघटाद्यनाधारत्वेऽपि 'पुरुषी दण्डः, घटवत् रूपम्' इत्यादिः प्रयोगो दुर्वारः। तदत्रास्तीत्यर्थ इव तदस्येत्यर्थे मतुपो विधानात्। पुरुषघटादि-संबन्धस्य दण्डरूपादौ सत्त्वात् इति चेत् —

विशिष्य केषांचित् संबन्धानां षष्ठ्यर्थत्वोपगमेऽपि घटस्य रूपमित्यादि-प्रयोगानुरोधेन समवेतत्वादेः षष्ठ्यर्थतायाः आवश्यकत्वेन "हस्तस्य चैत्रः, चैत्रवान् हस्तः, शाखायाः वृक्षः, वृक्षवती शाखा" इति कुतो न प्रयुज्यते? पूर्वप्रयोगा-भावादिति चेत् — तुल्यम् इति निरूपितम्।

पदवाक्यरत्नाकरानुसारेण शेषषष्ठ्यर्थप्रतिपादनम्[3]

विभक्त्यन्तरबोधेभ्यो भिन्नः शेषोऽभिधीयते।
संबन्धत्वनिमित्तेन षष्ठी तत्र प्रवर्तते।।

---

[1] सू. २.३.५२
[2] सू. २.३.६९
[3] प.वा.र.पृ. ९२

प्रथमादीनां यानि प्रवृत्तिनिमित्तानि संबुद्धित्वादीनि तदितरधर्मविशेषः शेषः। तं च षष्ठी संबन्धत्वेन प्रवृत्तिनिमित्तेनाभिधत्ते। संबन्धत्वं हि नाम संयोगसमवाय-स्वस्वामिभाववैशिष्ट्यकरणत्वकर्मत्वादिषु अनुगतं अनुयुक्तत्वप्रतियुक्तत्वादिकम्। अनुयुक्तत्वं सानुयोगिकत्वम्। प्रतियुक्तत्वं सप्रतियोगिकत्वम्।

एकमात्रनिष्ठस्य संबन्धत्वविरहात् उभयनिष्ठस्यैव तथात्वेन च संयोगादीनाम्, उभयोरेकं प्रतियोगि, अपरं चानुयोगि। यत्संबन्धेन यस्य यस्मिन् बुद्धिः प्रमा तत्संबन्धस्य तदनुयोगिकत्वम् अपरप्रतियोगिकत्वं च। अनुयोगित्वप्रतियोगित्वे स्वरूपसंबन्धविशेषात्मके। यतः समवाये वाय्वनुयोगिकत्वावच्छिन्नरूपप्रतियोगि-कत्वविरहात् न वायौ रूपमिति प्रतीतिव्यवहारौ स एव चानुयुक्तत्वादिर्धर्मः संबन्धत्वम्। "एकशतं षष्ठ्यर्थाः" इति महाभाष्यवचनमपि न प्रवृत्तिनिमित्ता-नामपरिमितत्वं ग्राहयति, किं तु विशेष्यव्यक्तीनाम्।

एवं च "राज्ञः पुरुषः, घटस्य रूपम्" इत्यादौ राजप्रतियोगिकत्वघटानु-योगिकत्वादिना रूपेण स्वत्वसमवायादिः पुरूषरूपादौ भासते 'राजप्रतियोगिकवान् पुरुषः, घटानुयोगिकवत् रूपम्' इति बोधः। न तु स्वत्वत्वसमवायत्वादिना स्वत्वसमवायादिः भासते। तथा सति "मातुः स्मरति" इत्यादौ कर्मतात्वेन कर्मतायाः षष्ठीवाच्यतापत्त्या कर्मतात्वस्य च द्वितीयावाच्यतावच्छेदकतया तद्विशिष्टस्य पूर्वोक्तशेषत्वानुपपत्त्या "शेषे षष्ठी" न स्यात्। न च "मातुः स्मरति" इत्यत्र या षष्ठी सा "अधीगर्थदयेशां कर्मणि"[१] इत्यनुशासनसिद्धा कारकषष्ठी, न तु शेषषष्ठीति वाच्यम्। तत्रापि सूत्रे शेषे इत्यनुवृत्तेः।

अत एव शेषे षष्ठ्यैव सिद्धेऽर्थे "ज्ञोऽविदर्थस्य करणे"[२] इत्याद्यष्टसूत्रीविधानं "सर्पिषो ज्ञानं, मातुः स्मरणम्" इत्यादौ शेषे षष्ठ्येव न तु लुक्प्रयोजकसमास इति ज्ञापनार्थमित्यभियुक्ताः। एतदुक्तं भवति — "अधीगर्थदयेशां०"[३] इत्यादिसूत्रैः तत्तद्योगे षष्ठ्याः विधाने "प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यम्"[४] इति वार्तिकेन "षष्ठी"[५] इति सूत्रप्राप्तस्य समासस्य निषेधः। "षष्ठी शेषे"[६] इत्यनेन तत्र षष्ठीविधाने तु तस्याः प्रतिपदविहितत्वाभावात् उक्तवार्तिकस्य तत्राप्रवृत्तिः, इति प्रतिपदविधानेत्यस्य पदयोगमपेक्ष्य विहितेत्यर्थकत्वात् इति।

---

[१] सू. २.३.५२
[२] सू. २.३.५१
[३] सू. २.३.५२
[४] [illegible] १३२०
[५] [illegible] २.२.८
[६] [illegible] २.३.५०

यदाह हरिः —

कारकैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये।।

इति। "ज्ञोऽविदर्थस्य करणे"[१] इत्यादिसूत्राष्टकेन पदमुपलक्ष्य विहिता षष्ठी समासनिषेधार्थेति तदर्थः।

"हरिस्मरणम्" इत्यादौ तु कृद्योगलक्षणकारकषष्ठ्या समासः। "प्रतिपदविधाना षष्ठी न समस्यत"[२] इति वार्तिकेन प्रतिपदविधानायाः शेषषष्ठ्या एव समासनिषेधात्। कारकषष्ठ्याः समासस्तु भवत्येव। तदभिप्रायमेव "कृद्योगा च षष्ठी समस्यत"[३] इति प्रतिप्रसववार्तिकम्।

ननु अष्टसूत्र्यां "सर्पिषो जानीते" इत्यादितिङन्तोदाहरणं काशिकायां कथं संगच्छते? अष्टसूत्रीविहितषष्ठ्याः समासनिषेधमात्रप्रयोजनकत्वे तिङन्तेन सह समासस्यासंभवात् तन्निषेधाप्रसक्तेरिति चेत् — न। तेषामुदाहरणानां कृदन्तोपलक्षणतया नेयत्वात्। अत एव भट्टोजीदीक्षितैः "सर्पिषो ज्ञानम्" इत्यादिकृदन्तयोग एवोदाहरणान्युक्तानि।

विभक्त्यर्थनिर्णये[४] षष्ठीविभक्त्यर्थनिर्णयः

ङस् ओस् आम् इति त्रयः प्रत्ययाः। तत्र ङकारोऽनुबन्धः क्वचिदप्यश्रूयमाणत्वान्न वाचकताकुक्षिप्रविष्टः। "सुमनसः सौकुमार्यं सुमनसोः सौरभ्यं सुमनसां मार्दवम्" इत्यादौ श्रूयमाणत्वात्। असः अस्त्वेन ओसः ओस्त्वेन आमः आम्त्वेन वाचकत्वम्। अनुशासनसिद्धः षष्ठ्यर्थः। अनुशासनं च "षष्ठी शेषे"[५] इति सूत्रम्। उक्तेभ्यः कर्मादिभ्यः प्रातिपदिकार्थादिभ्यश्च भिन्नः शेषः।

काशिकाकृतस्तु यच्चाप्रधानं तच्छेषशब्देनोच्यते। तदुभयत्र पर्यायेण वा षष्ठी भवतीत्याहुः।

तत्र शेषस्तावद्भिन्नत्वेन अप्रधानमपि अप्रधानत्वेन न षष्ठीवाच्यम्। किं तु शेषत्वेन। शेषत्वं संबन्धत्वम्। सप्रतियोगित्वे सति सानुयोगित्वं प्रतियोगित्वानुयोगित्वनिरूपकतावच्छेदकधर्मवैशिष्ट्यमिति॑ यावत्। एकशतं षष्ठ्यर्था इति

[१] सू. २.३.५१
[२] वा. १३२०
[३] वा. १३१७
[४] पृ. ४०५
[५] सू. २.३.५०

महाभाष्यमपि न प्रवृत्तिनिमित्तानामनेकविधत्वं ज्ञापयति। किं तु शेषव्यक्तीनां संभवति शक्त्यैक्ये अनन्तशक्तिकल्पनाया अन्याय्यत्वात् दर्शितधर्मवान् शेषः संयोगसमवायस्वत्वकर्तृत्वादिकारकविषयत्वादिभेदादनेकविधः।

"हिमानां गिरिः गजस्यालानम् वलिकायाः स्तम्भः" इत्यादौ षष्ठ्यर्थः संयोगः। तत्र प्रकृत्यर्थस्य प्रतियोगितयान्वयः। हिमप्रतियोगिकसंयोगवान् गिरिः इत्यन्वयबोधः। "पुरुषस्य दण्डः कर्णस्यावतंसः हृदयस्य हारः" इत्यादौ षष्ठ्यर्थसंयोगे प्रकृत्यर्थस्यानुयोगितयान्वयः। पुरुषानुयोगिकदण्डवानित्यादिरन्वयबोधः। "वृक्षस्य शाखा" इत्यादौ समवायः षष्ठ्यर्थः। तत्र प्रकृत्यर्थस्य प्रतियोगितयान्वयः। वृक्षप्रतियोगिकसमवायवती शाखेत्यन्वयबोधः। "पटस्य नीलिमा" इत्यादौ समवेतत्वं षष्ठ्यर्थः। तत्र प्रकृत्यर्थस्य निरूपितत्वेनान्वयः। वृक्षनिरूपितसमवेतत्ववान्नीलिमेत्यन्वयबोधः।

"राज्ञः पुरुषः" इत्यादौ स्वत्वं षष्ठ्यर्थः। तत्र प्रकृत्यर्थस्य निरूपितत्वेनान्वयः। राजनिरूपितस्वत्ववान् पुरुष इत्यन्वयबोधः। "पुरुषाणां राजा, चित्राणां गवामयं, नक्षत्राणां शशी" इत्यादौ स्वामित्वं षष्ठ्यर्थः। तत्र निरूपितत्वेन प्रकृत्यर्थस्यान्वयः। पुरुषनिरूपितस्वामित्ववान् राजेत्यादिः अन्वयबोधः।

"सतां गतम्" इत्यादौ कर्तृत्वं षष्ठ्यर्थः। तत्राधेयतया प्रकृत्यर्थस्यान्वयः। कर्तृत्वस्य निरूपकतया गतशब्दार्थे गमनेऽन्वयः। सन्निष्ठकर्तृतानिरूपकं गमनमित्यन्वयबोधः। "फलानां तृप्तः, पयसामभिषेकः" इत्यादौ करणत्वं व्यापारः षष्ठ्यर्थः। तत्र प्रयोज्यतया प्रकृत्यर्थस्यान्वयः। "ब्राह्मणस्य दानम्" इत्यादौ संप्रदानत्वं स्वत्वोद्देश्यतावच्छेदकत्वस्वरूपं षष्ठ्यर्थः। तत्राधेयतया प्रकृत्यर्थस्य अन्वयः। ब्राह्मणनिष्ठसंप्रदानतानिरूपकं दानम्। "कान्तस्य त्रस्यति" इत्यादौ दर्शितभयहेतुत्वरूपमपादानत्वं षष्ठ्यर्थः। तत्राधेयतया निरूपकतया वा प्रकृत्यर्थस्यान्वयः। कान्तनिष्ठहेतुतानिरूपकस्त्रासः। "पाकस्य गृहम्" इत्यादौ अधिकरणत्वं "पीठस्योपवेशनम्" इत्यादावाधेयत्वं षष्ठ्यर्थः। तत्र निरूपकतया प्रकृत्यर्थस्यान्वयः। पाकनिरूपिताधिकरणताश्रयो गृहम्, पीठनिरूपिताधेयत्वाश्रयः उपवेशनम्। "शास्त्रस्य ज्ञाता" इत्यादौ विषयत्वं षष्ठ्यर्थः। तत्राधेयतया प्रकृत्यर्थस्यान्वयः। विषयत्वस्य निरूपकतया ज्ञानेऽन्वयः। शास्त्रनिष्ठविषयतानिरूपकज्ञानाश्रयः। "भ्रमस्य रजतम्" इत्यादौ विषयत्वं पञ्चम्यर्थः। तत्र निरूपितत्वेन प्रकृत्यर्थस्यान्वयः। विषयत्वस्य आश्रयतया रजतेऽन्वयः। भ्रमनिरूपितविषयताश्रयः रजतम्।

"अस्य पिता" इत्यत्र षष्ठ्यर्थो जनकत्वम्। तत्र निरूपितत्वेन इदमर्थस्यान्वयः। जनकत्वस्याश्रयतया पितर्यन्वयः। इदंनिरूपितजनकताश्रयः पिता। "अस्य पुत्रः" इत्यत्र जन्यत्वं षष्ठ्यर्थः। इदंनिरूपितजन्यत्वाश्रयः पुत्रः। यदि च पितृत्वादिकं जनकत्वादिघटितं तदा निरूपितत्वं षष्ठ्यर्थः। तस्य पित्राद्यर्थघटकजनकत्वादावन्वयः। एवमन्यादृशोऽपि शेषो बोध्यः।

भाट्टरहस्यानुसारेण शेषषष्ठ्यर्थः[१]

एवं षष्ठ्यर्थोऽपि भावनायामेवान्वेति। स च "षष्ठी शेषे"[२] इति सूत्रानुशिष्टः। तथा हि — उक्तादन्यः शेषः। उक्तानि च पूर्वं कर्मत्वादीनि तद्भिन्नाश्च सजातीयत्वात् स्वस्वामिभावादयः संबन्धाः। तेषु षष्ठी स्यादिति सूत्रार्थः। तेषु च संबन्धेषु षष्ठ्याः न प्रत्येकरूपेण शक्तिः। अनेकशक्तिकल्पनापत्तेः। अपि तु संबन्धत्वेन सामान्यरूपेण । संबन्धत्वं च "इमौ संबद्धौ" इति प्रतीतिसाक्षिको धर्मविशेषः। एवं च शक्यतावच्छेदकस्य संबन्धत्वस्य कर्तृत्वकर्मत्वादिष्वपि सत्त्वात् तेषामपि संबन्धत्वेन रूपेण षष्ठ्यर्थतास्त्येव। अत एव "सतां गतम्, सर्पिषो जानीते, मातुः स्मरति, एधोदकस्योपस्कुरुते, शम्भोर्भजे चरणयोः, फलानां तृप्तः" इत्यादयः प्रयोगाः संगच्छन्ते। अत एव उक्तशक्यतावच्छेदककर्मत्वत्वाद्यतिरिक्तसंबन्धत्वरूपशक्यतावच्छेदकावच्छिन्नसंबन्धा एव शेषशब्दार्थः।

स च यथैव "राज्ञः पुरुष" इत्यादौ स्वस्वामिभावः तथैव "सतां गतम्" इत्यादौ कर्तृत्वादिकमपि। संबन्धत्वं च सर्वत्र शक्यतावच्छेदकम्। अत एव कर्तृत्वत्वादिना तद्बोधे लक्षणेति वक्ष्यते।

न चैवं संबन्धत्वेन रूपेण सर्वसंबन्धानां शक्यत्वे "एकशतं षष्ठ्यर्थाः" इति महाभाष्यकारीयवचनानुपपत्तिः इति वाच्यम्। पार्थशब्दस्य अर्जुन इव प्रचुरप्रयोगेण तत्संबन्धग्रहणे संभवति अन्यसंबन्धग्रहणस्यान्याय्यत्वमिति सूचनार्थत्वात्।

तदिह "राज्ञः पुरुषः" इत्यत्र सेवकत्वं षष्ठ्यर्थः। तत्र निरूपकतासंबन्धेन राज्ञोऽन्वयः। आधेयत्वसंसर्गेण च तस्य पुरूषेऽन्वयः। राजनिरूपितसेवकत्ववान् पुरूष इत्यन्वयबोधः। "सर्पिषो जानीते" इत्यत्र संबन्धत्वेन करणत्वं षष्ठ्यर्थः, तस्य धात्वर्थेऽन्वयः इत्येवं तत्र तत्र योग्यतानुसारेण

---

[१] पृ. १४१
[२] सू. २.३.५०

समभिव्याहृतमात्र एवान्वय इति नात्र कारकविभक्तिवत् क्रियान्वयनियम इति तार्किकाः शाब्दिकाः मीमांसकाश्च।

वस्तुतस्तु — योग्यताद्यनुसारेण साक्षात्परम्परासाधारण्येन षष्ठ्यर्थस्यापि क्रियायामेवान्वयः। सुबर्थप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति भावनानिष्ठविशेष्यतासंबन्धेन लिङ्गानन्वयिपदजन्योपस्थितिः कारणमित्येककार्यकारणभावेनान्वयोपपत्तेः। इतरथा षष्ठीभिन्नसुबर्थस्थले एका व्युत्पत्तिः, षष्ठीस्थले चान्येति व्युत्पत्तिद्वयकल्पनापत्तेः। इष्यते च परैरपि "स्थाल्यां तण्डुलं पचति, गृहे चैत्रः पचति" इत्यादौ सप्तम्यर्थस्य तण्डुलचैत्रद्वारकः क्रियान्वयः, न तु तण्डुलादावेव। ततश्च राज्ञः षष्ठ्यर्थे सेवकत्वे, तस्य च स्वाश्रयपुरुषकर्तृकत्वसंबन्धेन अस्त्यर्थे सत्ताश्रयत्वेऽन्वयः इत्येव युक्तम्।

षष्ठी हेतुप्रयोगे[१] इति सूत्रार्थः

हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। "अन्नस्य हेतोः वसति"। हेतौ द्योत्ये इति। हेतुत्वे द्योत्य इत्यर्थः। हेतुवाचकात् षष्ठीति फलितम्। हेतौ इति तृतीयां बाधित्वा षष्ठी। हेतुप्रयोगे किम्। "अन्नेन वसति"। हेतौ द्योत्य इति किम्। "अन्नस्य हेतोः तुभ्यं नमः"। अत्र युष्मच्छब्दान्न भवति।

भाट्टरहस्ये[२]

यानि तु "षष्ठी हेतुप्रयोगे"[३] इत्यादीन्यनुशासनानि तानि लाक्षणिकानुशासनानि। तथा हि "षष्ठी हेतुप्रयोगे" इति सूत्रात् हेतुशब्दप्रयोगे हेतुत्वत्वेन हेतुत्वे बोध्ये षष्ठी स्यात् इत्यर्थकात् "अन्नस्य हेतोः वसति" इत्यत्र षष्ठी। अत्र हेतुत्वत्वेन हेतुत्वं लक्षणया षष्ठ्यर्थः। हेतुशब्दप्रयोगस्तात्पर्यग्राहकः। तदुत्तरषष्ठ्याः समानविभक्तिकत्वसिद्ध्यर्थं स एवार्थः। अन्नहेतुकवासाश्रयत्वमित्यादिशाब्दबोधः।

अत्र हेतुशब्दप्रयोगाभावे हेतुत्वत्वेन हेतुत्वविवक्षायां पूर्वोक्तरीत्या तृतीयैव। शेषत्वेन हेतुत्वविवक्षायां तु हेतुशब्दप्रयोगाभावेऽपि शक्त्यैव षष्ठ्यन्तः प्रयोगः। सर्वनाम्नस्तु हेतुशब्दप्रयोगे हेतुत्वत्वेन हेतुत्वविवक्षायां षष्ठी वैकल्पिकी "सर्वनाम्नस्तृतीया च"[४] इति सूत्रात्। "केन हेतुना वसति, कस्य हेतोर्वसति"।

---

[१] सू. २.३.२६
[२] पृ. १४४
[३] सू. २.३.२६
[४] सू. २.३.२७

तृतीयेत्युपलक्षणम्। "निमित्तकारणहेतुषु सर्वासां प्रायोदर्शनम्"[१] इति वार्तिकात्। तेन "को हेतुः वसति चैत्रः, कं हेतुं वसति, कस्मै हेतवे वसति, कस्माद्धेतोर्वसति, कस्मिन् हेतौ वसति" इत्यादयोऽपि प्रयोगाः साधवः।

अत्र सर्वत्र हेतुत्वमेव विभक्त्यर्थः, अनुशासनबलात्। कीदृशहेतुकं वासाश्रयत्वमित्यादिरेव च शाब्दबोधः। एवं "किं निमित्तं वसति, किं कारणं वसति" इत्यादिकमपि। निमित्तादिशब्दानामेकार्थकत्वेऽपि पृथगुपादानमुपलक्षणार्थम्। तेन प्रयोजनादिपदप्रयोगेऽपि सर्वा विभक्तयो भवन्ति।

असर्वनाम्नोऽपि हेत्वादिशब्दप्रयोगे सर्वा विभक्तयः। "अन्नात् हेतोः वसति"। अन्नेन कारणेन वसति।

वृत्तिकारेण "सर्वनाम्नस्तृतीया च"[२] इति सूत्रे पठितस्याप्यस्य वार्तिकस्य हेतौ इति सूत्रे भाष्यकारेण पाठात्। प्रायग्रहणम् असर्वनाम्नः प्रथमाद्वितीये न स्तः इत्येतदर्थकम्। तेन 'अन्नं कारणं वसति' इति न प्रयोगः।

लघुमञ्जूषायाम्[३]

"अन्नस्य हेतोः वसति" इत्यत्र हेतुहेतुमद्भावः षष्ठ्यर्थः। हेतुशब्दोऽत्रैव तात्पर्यग्राहकः। अन्नहेतुको वास इति बोधः।

सर्वनाम्नस्तृतीया च[४] इति सूत्रार्थः

सर्वनाम्नः हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च। सर्वनामशब्दात् हेतुशब्दाच्च तृतीयाषष्ठ्यौ। "केन हेतुना वसति"। "कस्य हेतोः"। निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्। निमित्तपर्यायाणां प्रयोगे तेभ्यः तत्समानाधिकरणशब्देभ्यश्च सर्वासां विभक्तीनां प्रायेण प्रयोगो भवतीत्यर्थः। "किं निमित्तं वसति, केन निमित्तेन, कस्मै निमित्ताय" इत्यादि। एवं "किं कारणम्, को हेतुः, किं प्रयोजनम्" इत्यादि। प्रायग्रहणात् असर्वनाम्नः प्रथमाद्वितीये न स्तः। "ज्ञानेन निमित्तेन हरिः सेव्यः, ज्ञानाय निमित्ताय" इत्यादि।

---

[१] वा. १४७३

[२] सू. २.३.२७

[३] पृ. १३१७

[४] सू. २.३.१७

पदवाक्यरत्नाकरे[१]

सर्वनामसमानाधिकरणे प्रथमादयः।
अन्यत्र हेतुपर्याये तृतीयाद्या विभक्तयः।।

हेतु-कारण-निमित्त-प्रयोजनार्थादिशब्दो यदि सर्वनामसमानाधिकरणः तत्र "को हेतुः वसति, कं हेतुं वसति" इत्यादिक्रमेण सर्वा विभक्तयः। "धनेन निमित्तेन वसति" इत्यादौ तृतीयाद्या एव साधवो न प्रथमाद्वितीये। अत्र च यथायथं हेत्वादिशब्दो जनकं प्रयोजनं चाभिधत्त इत्युक्तं प्राक् "हेतौ" इति सूत्रव्याख्यानावसरे। विभक्तीनां तत्तद्धेतुकत्वमर्थः शेषो वा।

षष्ठ्यतसर्थप्रत्ययेन[२] इति सूत्रार्थः

"दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः"[३] इत्यारभ्य "आहि च दूरे"[४] "उत्तराच्च"[५] इत्यन्तैः सूत्रैः दिग्देशकालवृत्तिभ्यः शब्देभ्यः स्वार्थे प्रत्यया विहिताः। तत्र "दक्षिणोत्तराभ्यामतसुच्" इति विहितः यः अतसुच् प्रत्ययः तस्यार्थः दिग्देशकालरूपः स एवार्थो यस्य सोऽतसर्थप्रत्ययः। तद्योगे षष्ठी स्यादिति सूत्रार्थः। "अन्यारात्"[६] इति सूत्रे दिक्शब्देत्यनेन या पञ्चमी विहिता तदपवादोऽयम्। ग्रामस्य दक्षिणतः, पुरः, पुरस्तात्, उपरि, उपरिष्टात्।

प्रौढमनोरमायाम्[७]

कथं तर्हि "ततः पश्चात्" इति। "ततः पश्चात् स्रंस्यते ध्वंस्यते च" इति भाष्यप्रयोगात् पश्चाद्योगे पञ्चम्यपि।

एनपा द्वितीया[८] इति सूत्रार्थः

एनबन्तेन योगे द्वितीया स्यात्। एनपा इति योगविभागात् षष्ठ्यपि। "दक्षिणेन ग्रामं ग्रामस्य वा"। एवम् "उत्तरेण ग्रामं ग्रामस्य वा, पूर्वेण ग्रामं ग्रामस्य वा"।

---

१ पृ. ८०४
२ सू. २.३.३०
३ सू. ५.३.२७
४ सू. ५.३.३७
५ सू. ५.३.३८
६ सू. २.३.२९
७ पृ. ९४१
८ सू. २.३.३१

भाष्ये तु "षष्ठ्यतसर्थ०"[१] इति सूत्रात् प्राक् "एनपा द्वितीया"[२] इति सूत्रस्य पाठ इति "पृथग्विना०"[३] इति सूत्रे उक्तम्। अतोऽत्र सत्यपि योगविभागे षष्ठीग्रहणानुवृत्तेरसंभवात् एनपा योगे षष्ठ्यसाधुरेवेत्युक्तम्।

कथं तर्हि "तत्रागारं धनपतिगृहादुत्तरेणास्मदीयम्" इति। उत्तरेणेति तृतीयान्तं तोरणेनेत्यनेन समानाधिकरणं बोध्यम्। इति प्रौढमनोरमा।[४]

"स्त्र्यधिकारात् परेण वासरूपविधिर्न" इत्यत्र परेणेति। ततः परेण शास्त्रेण वासरूपसंबन्धो नेत्यर्थः।

"ततः परेण नायमनुवर्तत" इत्यत्र सार्वविभक्तिकः षष्ठ्यन्तात् तसिरिति बोध्यमिति शब्दरत्ने।

एवम् — एनपा द्वितीया इति सूत्रात् एनबन्तयोगे द्वितीया, योगविभागात् षष्ठी चेत्यर्थकात् "दक्षिणेन ग्रामम्, ग्रामस्य वा" इत्यत्र षष्ठी। प्रतियोगित्वं षष्ठ्यर्थः। ग्रामप्रतियोगिकदक्षिणदिशीत्यर्थः। पञ्चम्यपवादः, पूर्वलिखितभाष्यात्। अत एव — "तत्रागारं धनपतिगृहादुत्तरेणास्मदीयम्" इत्यादिरपप्रयोगः। हरदत्तादयोऽप्येवम्।

एवं "दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्"[५] इति सूत्रात् एतैर्योगे षष्ठी वेत्यर्थकात् "दूरमन्तिकं वा ग्रमस्य ग्रमाद्वा" इत्यत्र पञ्चम्या सह वैकल्पिकी षष्ठी। प्रतियोगित्वं तदर्थः।

दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्[६] इति सूत्रार्थः

दूरार्थकैः अन्तिकार्थकैश्च शब्दैर्योगे षष्ठी स्यात् पञ्चमी च। "दूरं निकटं ग्रामस्य ग्रामाद्वा"। अन्यतरस्यांग्रहणं समुच्चयार्थम्। तेन च विप्रकृष्टापि पञ्चमी समुच्चीयते व्याख्यानात्, न तु षष्ठीद्वितीयातृतीयाः।

पदवाक्यरत्नाकरे[७]

अतसर्थयुतात् षष्ठी द्वितीयाप्येनपायुतात्।
दूरान्तिकार्थयुक्तात्तु षष्ठी पक्षे तु पञ्चमी।।

---

[१] सू. २.३.३०
[२] सू. २.३.३१
[३] सू. २.३.३२
[४] पृ. ९४२
[५] सू. २.३.३४
[६] सू. २.३.३४
[७] पृ. ८०५

''ग्रामस्य दक्षिणतः पुरः पुरस्तात् उपरि उपरिष्टात्'' इत्यादौ षष्ठ्येव। ''विन्ध्यात् दक्षिणतः'' इत्यादौ विन्ध्यमारभ्य दक्षिणतः इति ल्यबन्ताध्याहारे कर्मणि पञ्चमी। एवं ''दक्षिणेन ग्रामं ग्रामस्य वा'' इत्यत्र एनबन्तेन योगे षष्ठी द्वितीया च प्रमाणम्, न तु पञ्चमी। ''प्रकृतायाः पञ्चम्याः षष्ठीद्वितीये चाधिके भवतः'' इति महाभाष्यात्।

तथा ''धनपतिगृहादुत्तरेणास्मदीयम्'' इत्यादौ उत्तरेणेति तृतीयान्तम्। तदपि तोरणेनेत्यस्य समानाधिकरणम्। अतो दिक्शब्दयोगे पञ्चमी।

तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन।
यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः।।

इति पूर्णश्लोकः मेघसंन्देशस्थः।

''ततः पश्चात् स्रंस्यते'' इति भाष्यप्रयोगात् अतसर्थप्रत्ययान्तोऽपि पश्चाच्छब्दः पञ्चम्याः निमित्तम्। लुप्तोऽप्यतसर्थप्रत्ययः षष्ठीनिमित्तमिति ''प्राक् ग्रामात्'' इत्यादौ प्राप्तां षष्ठीमपवदति। अञ्चूत्तरपदयोगे पञ्चम्याः प्रतिप्रसव इत्यभिहितमधस्तात्। ''दूरमन्तिकं ग्रामस्य ग्रामात्'' इत्युभयमपि प्रमाणम्।

भाट्टरहस्ये[१]

एवं ''षष्ठ्यतसर्थप्रत्ययेन''[२] इति सूत्रात् अतसर्थप्रत्ययः अतसुच् प्रत्ययादिः ''दक्षिणोत्तराभ्यामतसुच्''[३] इत्यादिसूत्रविहितः तेन योगे षष्ठीत्यर्थकात् ''ग्रामस्य दक्षिणतः, ग्रामस्योत्तरतः, ग्रामस्योपरि, ग्रामस्योपरिष्टात्'' इत्यादौ षष्ठी। अत्र प्रतियोगित्वं षष्ठ्यर्थः। तत्त्वेन प्रतियोगित्वत्वेन बोधार्थं पृथक् सूत्रम्, न तु पञ्चम्यपवादार्थम्। ''विन्ध्यात् दक्षिणतः'' इत्यादिप्रयोगस्येष्टत्वात्। अत एव ''ततः पश्चात् स्रंस्यते ध्वंस्यते इत्यादिभाष्यप्रयोगः सामान्येन ज्ञापक इति केचित्''। तन्न। ''प्रकृतायाः पञ्चम्याः द्वितीयाषष्ठ्यौ बाधिके भविष्यतः'' इति ''पृथग्विना॰''[४] इति सूत्रस्थभाष्यविरोधात्। अतः पञ्चम्यपवादार्थमप्येतदनुशासनम्। विन्ध्यात् इत्यादिप्रयोगस्त्वपप्रयोगः। ज्ञापकं च पश्चाच्छब्दयोगमात्रविषयकम्। श्रूयमाणस्यैव चास्य अतसुच्प्रत्ययस्य निमित्तता, न तु लुप्तस्य। ''प्राक् ग्रामात्'' इत्यादौ प्रत्ययलोपे षष्ठ्यभावस्य भाष्यकैयटसिद्धत्वात्।

---

[१] पृ. १४५
[२] सू. २.३.३०
[३] सू. ५.३.२८
[४] सू. २.३.३२

ज्ञोऽविदर्थस्य करणे[1] इति सूत्रार्थः

जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात्। सर्पिषो ज्ञानम्। शेषत्वेनेत्यस्य संबन्धत्वेनेत्यर्थः। वस्तुतः कारणीभूतं यत् सर्पिः तत्संबन्धिनी प्रवृत्तिरित्यर्थः। "षष्ठी शेषे"[2] इति सूत्रेण सिद्धेऽपि "प्रतिपदविधाना षष्ठी न समस्यत"[3] इत्येतदर्थं वचनम्।

भाट्टरहस्ये[4]

एवं करणत्वादिकमपि यत्र संबन्धत्वेन षष्ठ्यर्थः तत्र धात्वर्थद्वारकः भावनायामन्वयः। अत एव तत्प्रतिपादकं "ज्ञोऽविदर्थस्य करणे"[5] इति सूत्रम्। अत्र भाष्यव्याख्यानात् "शेषे" इत्यनुवर्तते। तेन ज्ञानभिन्नार्थकस्य जानातेः धातोः करणे शेषत्वेन विवक्षिते षष्ठी स्यात् इति सूत्रार्थः। "सर्पिषो जानीते, सर्पिषो ज्ञानम्"। अत्र लक्षणया ज्ञानपूर्विका प्रवृत्तिः ज्ञाधात्वर्थः। तस्यां सर्पिषः करणत्वमेव यदा शेषत्वेन विवक्षितं, तदा सर्पिषः इति षष्ठी। करणत्वत्वेन करणत्वविवक्षायां सर्पिषा इति तृतीयैव। ज्ञानार्थकत्वे तु विषयत्वार्थिका द्वितीया। तस्य संबन्धत्वेन बोधे तु षष्ठ्येव।

न चैवं "शेषे षष्ठी" इत्यनेनैव सिद्धे पृथक्सूत्रवैयर्थ्यमिति वाच्यम्। षष्ठीपुनर्विधिः षष्ठ्येव, न तु लुक् इत्येवं परः। तेन तद्व्याप्यः समासो निवर्तते। ततश्च संबन्धत्वेन उक्तधात्वर्थकरणत्वविवक्षायां न षष्ठीसमासः।

विभक्त्यर्थनिर्णये[6]

करणार्थे षष्ठीं ज्ञापयति "ज्ञोऽविदर्थस्य करणे"[7] इति सूत्रम्। ज्ञानातेरविदर्थस्य करणे कारके षष्ठीविभक्तिर्भवतीत्यर्थकम्। अवित् ज्ञानभिन्नं अथवा अज्ञानं मोहः मिथ्याज्ञानमिति यावत्। ज्ञानभिन्नप्रवृत्तिरूपोऽर्थो बोध्यः। तथा हि काशिका — प्रवृत्तिवचनो जानातिरविदर्थो भवति अथ वा मिथ्याज्ञानवचनः — इति।

---

[1] सू. २.३.५१
[2] सू. २.३.५०
[3] वा. १३२०
[4] पृ. १४२
[5] सू. २.३.५१
[6] पृ. ४०७
[7] सू. २.३.५१

"सर्पिषो जानीते" इत्यत्र षष्ठ्याः स्वजन्यं स्वविषयकप्रत्यक्षं व्यापारः करणत्वमर्थः प्रयोज्यतया प्रवृत्तिरूपे धात्वर्थेऽन्वेति। मिथ्याज्ञानरूपे धात्वर्थे तु षष्ठ्याः लयो व्यापारोऽर्थः। लयस्तु तथाविधं धारापन्नं प्रत्यक्षं तज्जन्यदृढ-संस्कारजन्यं स्मरणं वा। तथा च सर्पिःप्रत्यक्षप्रयोज्यप्रवृत्त्याश्रयत्वं वाक्यार्थः। अथ वा सर्पिर्लयप्रयोज्यं सर्पिस्तादात्म्यावगाहिसकलवस्तुविषयकं यन्मिथ्याज्ञानं तदाश्रयत्वं वाक्यार्थः। यो यद्विषयकलयवान् स तन्मयं जगत् पश्यतीति। एवं "मधुनो जानीते" इत्यादावप्यनया रीत्यान्वयो बोध्यः।

अधीगर्थदयेशां कर्मणि[१] इति सूत्रार्थः

इक् स्मरणे नित्यमधिपूर्वः तस्यार्थ इवार्थो यस्य सः अधीगर्थः स्मरणार्थकः इति यावत्। एषां कर्मणि शेषे षष्ठी स्यात्। "मातुः स्मरणम्"। वस्तुतः कर्मीभूतमातृसंबन्धि स्मरणमित्यर्थः। "सर्पिषो दयनम्"। वस्तुतः कर्मीभूत-सर्पिस्संबन्धि दयनमित्यर्थः। "दय दानगतिरक्षणाहिंसादानेषु" सर्पिष ईशनम्। वस्तुतः कर्मीभूतसर्पिस्संबन्धि ईशनम् यथेष्टविनियोग इत्यर्थः।

भाट्टरहस्ये[२]

एवम् उत्तरेष्वपि सप्तसु सूत्रेषु षष्ठीपुनर्विधिः "मातुः स्मरणम्" इत्यादौ शेषषष्ठीसमासनिषेधार्थ एव। तत्र हि "अधीगर्थदयेशां कर्मणि"[३] इति सूत्रादेषां कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थकात् "मातुरध्येति, मातुः स्मरति, मातुःस्मरणम्, सर्पिषो दयते, सर्पिषो दयनम्, जगतामीष्टी, जगतामीशनम्" इत्यादौ षष्ठी विहिता। अधीगर्थाः स्मृत्यर्थाः। अत्र शेषत्वादेव षष्ठीप्राप्तौ पुनः षष्ठीविधिः षष्ठीसमासप्रतिषेधार्थः।

न चैवं हरिस्मरणमिति प्रयोगानुपपत्तिः इति वाच्यम्। तस्य कृद्योगे कर्मत्वत्वेन कर्मत्वबोधकषष्ठीसमासत्वेनोपपत्तेः। तत्फलं च कारकपूर्वकत्वात् कृदुत्तरपद-प्रकृतिस्वरः मकारोत्तराकारस्योदात्तः। शेषषष्ठीसमासत्वे अन्तोदात्तत्वापत्तेः। तथा च स्वरार्थेयमष्टसूत्रीति फलितम्।

किं च यत्र "मातुः स्मृतम्" इत्यादौ "न लोकाव्यय०"[४] इत्यनेन कर्मषष्ठी प्रतिषिद्धा, तत्र शेषषष्ठ्या समासप्रसक्तौ तन्निषेधार्थं षष्ठीपुनर्विधिः।

---

१ सू. २.३.५२
२ पृ. १४२
३ सू. २.३.५२
४ सू. २.३.६९

विभक्त्यर्थनिर्णये[१]

"अधीगर्थदयेशां कर्मणि"[२] इति सूत्रम् अधिपूर्वकस्य इक्धातोः स्मरणमर्थः तदर्था ये धातवः तेषां दयधातोः ईशधातोश्च कर्मणि षष्ठीविभक्तिर्भवतीत्यर्थकम्। "मातुरध्येति स्मरति चिन्तयति वा" इत्यादौ षष्ठ्याः आधेयत्वस्वरूपं कर्मत्वमर्थः फले विषयत्वेऽन्वेति। मातृवृत्तिविषयताप्रतियोगिस्मरणाश्रयत्वं वाक्यार्थः। "दय दानगतिरक्षणहिंसादानेषु" इति दयतेस्त्रयोऽर्थाः। तेषां कर्मणि षष्ठी। तत्र दाने यथा "सर्पिषो मधुनो वा दयते" इत्यत्र सर्पिष्कर्मकं मधुकर्मकं वा यद्दानं तदाश्रयत्वं वाक्यार्थः। गतौ यथा "तीर्थस्य दयत" इत्यत्र तीर्थकर्मकगमनाश्रयत्वं वाक्यार्थः। रक्षणे यथा "दीनस्य दयते" इत्यत्र दीनकर्मकरक्षणाश्रयत्वं वाक्यार्थः। ईश ऐश्वर्ये इति ईशधातोः ऐश्वर्यमर्थः। तच्च स्वत्वफलनिरूपकं स्वामित्वम्। ऐश्वर्यकर्मणि षष्ठी यथा "सर्पिष ईष्टे" इत्यत्र सर्पिर्वृत्तिस्वत्वनिरूपकस्वामित्वाश्रयत्वं वाक्यार्थः।

कृञः प्रतियत्ने[३] इति सूत्रार्थः

प्रतियत्नो गुणाधानम्। कृञः कर्मणि शेषे षष्ठी स्यात् गुणाधाने। "एधोदकस्योपस्कुरुते"। कर्मीभूतैधोदकसंबन्धि परिष्करणमित्यर्थः।

भाट्टरहस्ये[४]

एवं "कृञः प्रतियत्ने" इति सूत्रात् गुणाधाने विद्यमानस्य करोतेः कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थकात् एधोदकस्योपस्कुरुते, एधोदकस्योपस्करणमित्यत्र षष्ठी। प्रयोजनं पूर्ववत्। "अधीगर्थदयेशां कर्मणि"[५] इति सूत्रव्याख्याने द्रष्टव्यम्।

विभक्त्यर्थनिर्णये[६]

कृञः कर्मणि षष्ठीं ज्ञापयति "कृञः प्रतियत्ने"[७] इति सूत्रम्। कृञः कर्मणि षष्ठीविभक्तिर्भवति प्रतियत्ने गम्यमाने इत्यर्थकम्। सतो गुणान्तराधानं प्रतियत्न इति काशिका। "एधोदकस्योपस्कुरुते पाचकः" इत्यत्र षष्ठ्याः कर्मत्वमर्थः धात्वर्थे

---

[१] पृ. ४०७
[२] सू. २.३.५२
[३] सू. २.३.५३
[४] पृ. १४३
[५] सू. २.३.५२
[६] पृ. ४०८
[७] सू. २.३.५३

उपकरणेऽन्वेति। उपकरणं संनिधापनम्। तथा च एधोदककर्मकसंनिधापन-प्रयत्नाश्रय इत्यन्वयबोधः। तदनन्तरं सतः पाकस्य क्षिप्रसंपत्तिरूपगुणाधायक-मेधोदकसंनिधापनमिति वैयञ्जनिको बोध इति वृत्तिस्वरसादवगम्यते।

वस्तुतस्तु प्रतियत्नो द्वितीययत्नः। स चोपकारस्वरूप उपपूर्वकस्य करोतेरर्थः। तत्कर्मणि षष्ठीविभक्तिर्भवतीति सूत्रार्थः। अत एव "उपात् प्रतियत्ने"[१] इति सूत्रविहितस्य सुट आगमत्वात् निरर्थकस्य धात्वर्थप्रतियत्नद्योतकत्वमुक्तम्। उपकारश्च द्विविधः उप समीपे करणं स्थापनं संनिधापनमिति यावत् इत्येकः। एतस्यैव प्रतियत्नस्य द्योतकः सुडागमः। द्वितीयस्तु दुःखनाशसुखान्यतरानु-कूलव्यापारस्वरूपः। एतस्मिन् प्रतियत्ने विवक्षिते न सुडागमः। आद्यो यथा "एधोदकस्योपस्कुरुते पाचकः" इत्यत्रान्वयबोधः पूर्ववदेव। द्वितीयो यथा "दीनस्योपकुरुते कारुणिकः" इत्यादौ षष्ठ्या आधेयत्वस्वरूपं कर्मत्वं दुःख-नाशादौ फलेऽन्वेति। तथा च दीनवृत्तिदुःखनाशानुकूलप्रयत्नाश्रयः कारुणिक इत्यन्वयः। क्वचित् प्रतिक्रियापि प्रतियत्नः। प्रतिक्रिया च क्रियाविघातकक्रिया। सा च प्रतिपूर्वकस्य करोतेरर्थः। तत्कर्मण्यपि षष्ठी यथा — "गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक् स्वभेषजैः" इत्यादौ। प्रतिक्रिया क्रियाभिघातकक्रिया धात्वर्थः। तत्र गुर्वादिकर्मत्वस्य षष्ठ्यन्तार्थस्यान्वयः। क्रियाविशेषणस्य कर्मत्वात् उपक्रिया-विशेषणेऽपि षष्ठी। यथा "स हि तत्त्वतो ज्ञातः स्वात्मसाक्षात्कारस्योपकरोति" इत्यादौ। अत्र स्वात्मसाक्षात्काराभिन्नोपकारप्रयत्नाश्रयः स इत्यन्वयबोधः।

रुजार्थानां भाववचनानामज्वरेः[२] इति सूत्रार्थः

भावकर्तृकाणां ज्वरवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात्। रुजा पीडा रोगः अर्थो येषां ते धातवः रुजार्थाः। वक्तीति वचनः। कर्तरि ल्युट्। प्रकृत्यर्थो न विवक्षितः। भावः धात्वर्थः वचनः कर्ता येषामिति विग्रहः। भावकर्तृकाणामिति फलितम्।

चौरस्य रोगस्य रुजा। रोगश्चौरं संतापादिना पीडयतीति पर्यवसन्नम्। रोग-कर्तृका वस्तुतः कर्मीभूतचौरसंबन्धिनी पीडेति बोधः।

[१] सू. ६.१.१३९
[२] सू. २.३.५४

अज्वरिसंताप्योरिति वाच्यम्[१]

रुजार्थानां भाववचनानां ज्वरिसंतापिवर्जितानामिति सूत्रं वक्तव्यमित्यर्थः। "रोगस्य चौरज्वरः, चौरसंतापो वा"। रोगकर्तृकं चौरसंबन्धि ज्वरादिकमित्यर्थः। अत्र चौरज्वरशब्दे चौरसंतापशब्दे च शेषषष्ठ्या समासो भवत्येव। शेषषष्ठ्याः पुनर्विध्यभावात्। एवं च ज्वरिसंताप्योः रुजार्थकत्वात् रोगात्मकभावकर्तृकत्वाच्च तत्कर्मणश्चौरस्य शेषत्वविवक्षायां नानेन षष्ठी। किं तु कृद्योगे षष्ठी, "षष्ठी शेषे"[२] इत्येव वा षष्ठी। अतः चौरज्वरः चौरसंताप इति समासो भवत्येव।

विभक्त्यर्थनिर्णये[३]

"रुजार्थानां भाववचनानामज्वरेः"[४] इति सूत्रम्। भाववचनानां भावकर्तृकाणां रुजार्थानां ज्वरिवर्जितानां कर्मणि षष्ठीविभक्तिर्भवतीत्यर्थकम्। "चौरस्य रुजति रोगः" इत्यादौ रुजेः दुःखानुकूलव्यापारोऽर्थः। तिङः प्रयोजकत्वमर्थः। षष्ठ्याः आधेयत्वस्वरूपं कर्मत्वमर्थः। पित्तादिविकारो रोगः। तथा च चौरवृत्तिदुःखानुकूलधातुविकारस्वरूपव्यापारप्रयोजकः पित्तादिविकार इत्यन्वयबोधः। रुजार्थानामित्युपादानात् "एति जीवन्तमानन्दो नरं वर्षशतादपि" इत्यादौ कर्मणि न षष्ठी। भाववचनानामित्युपादानात् नदीकूलानि रुजतीत्यादौ कर्मणि न षष्ठी। अत्र रुजेः नाशानुकूलव्यापारोऽर्थः। अज्वरेः इत्युपादानात् "चौरं ज्वरयति रोगः" इत्यादौ कर्मणि न षष्ठी।

"अज्वरिसंताप्योरिति वक्तव्यम्" इति वार्तिकात् "चौरं संतापयति संतापः" इत्यादौ कर्मणि न षष्ठी।

अत्र धातोः दुःखानुकूल औष्ण्यानुभवोऽर्थः। संतापशब्दस्य उद्भूतस्पर्शवत्तेजस्संयोगोऽर्थः।

एवं "भोक्तॄ रुजति बहुभोजनं, कामुकस्य क्षयिष्यत्यनवरतरतम्" इत्यादिको भावकर्तृकरुजार्थप्रयोगोऽपीष्ट एव।

---

[१] वा. १५०७
[२] सू. २.३.५०
[३] पृ. ४०९
[४] सू. २.३.५४

भाट्टरहस्ये[१]

एवम् "रुजार्थानां भाववचनानामज्वरेः"[२] इति सूत्रात् रुजा व्याधिः तदर्थानां भाव एव यत्र कर्ता तेषां ज्वरिवर्जितानां कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थकात् "चोरस्य रुजति रोगः, चोरस्य रोगस्य रुजा" इत्यादौ चोरे षष्ठी। अत्र रोगाख्यव्याधेरेव व्याध्यन्तरं प्रति कर्तृत्वात् भावकर्तृकत्वम्। तस्य कर्मणि चोरे संबन्धत्वेन विवक्षिते कर्मत्वे षष्ठी। कर्मत्वत्वेन विवक्षिते तु तिङन्ते द्वितीयैव। कृदन्ते तु षष्ठीसमासोऽपि। संबन्धत्वेन विवक्षायां तु न षष्ठीसमास इत्यादि पूर्ववत्। अत्र "अज्वरिसंताप्योरिति वाच्यम्"[३] इति वार्तिकात् "रोगस्य चौरज्वरः चौरसंतापः" इत्यादौ समासो भवत्येव। भावकर्तृकग्रहणाच्च नद्याः कूलरुजा नदी कूलं रुजतीत्यादिप्रयोगः। नदी अत्र न भावः।

आशिषि नाथः[४] इति सूत्रव्याख्यानम्

आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात्। "सर्पिषो नाथनम्"। इदं च भूयादित्याशासनं नाथतेरर्थः। आशासनमिच्छा। वस्तुतः कर्मीभूतसर्पिस्संबन्धि आशासनमित्यर्थः। आशिषि किम्। "माणवकनाथनम्"। माणवकसंबन्धिनी याच्ञेत्यर्थः।

विभक्त्यर्थनिर्णये[५]

नाथतेः कर्मणि षष्ठीं ज्ञापयति "आशिषि नाथः"[६] इति सूत्रम्। आशीरर्थे वर्तमानस्य नाथतेः कर्मणि षष्ठीविभक्तिर्भवतीत्यर्थकम्। आशीः आशंसा लिप्सेति यावत्। "सर्पिषो नाथते" इत्यादौ षष्ठ्या आधेयत्वरूपं कर्मत्वमर्थः। तच्च धात्वर्थेच्छाफले विषयत्वे उद्देश्यत्वे वा अन्वेति। तथा च सर्पिर्वृत्तिविषयताकेच्छाश्रयत्वं वाक्यार्थः। आशिषीत्युपादानात् माणवकमुपनाथयतीत्यादौ कर्मणि न षष्ठी। अत्र नाथतेरुपतापोऽर्थः। "नाथृ नाधृ याच्ञोपतापैश्वर्याशीःषु" इत्यभिधानात्।

---

१ पृ. १४३

२ सू. २.३.५४

३ वा. १५०७

४ सू. २.३.५५

५ पृ. ४१०

६ सू. २.३.५५

भाट्टरहस्ये[१]

एवम् "आशिषि नाथः" इति सूत्रात् आशीरर्थकस्य नाथतेः कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थकात् "सर्पिषो नाथते, सर्पिषो नाथनम्" इत्यादौ षष्ठी। सर्पिस्ते बहुलं भूयात् इत्याशास्ते इत्यर्थः। आशीरर्थकत्वाभावे तु माणवक-नाथनमिति समासः।

जासिनिप्रहणनाटक्राथपिषां हिंसायाम्[२] इति सूत्रार्थः

हिंसार्थानामेषां शेषे कर्मणि षष्ठी स्यात्। चौरस्योज्जासनम्। वस्तुतः कर्मीभूतचौरसंबन्धिनी हिंसेत्यर्थः। निप्रौ संहतौ विपर्यस्तौ व्यस्तौ वा। चौरस्य निप्रहणनम्, प्रणिहननम्, निहननम्, प्रहणनं वा। नट अवस्कन्दने, चुरादिः। "चौरस्योन्नाटनम्"। क्रथ हिंसायाम्। "चौरस्य क्राथनम्"। "वृषलस्य पेषणम्"। हिंसायां किम्। "धानापेषणम्"।

भाट्टरहस्ये[३]

एवं जासिनिप्रहणेत्यादिसूत्रात् हिंसार्थानामेषां कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थकात् चौरस्योज्जासनम्, निप्राभ्यामुपसर्गाभ्यां समस्ताभ्यां व्यस्ताभ्यां वा युक्तो हनः निप्रहणः। "चौरस्य निप्रहणनम्, प्रणिहननम्, निहननं वा, चौरस्यो-न्नाटनम्, चौरस्य क्राथनम्, चौरस्य पेषणम्" इत्यादौ षष्ठी। हिंसात्वाभावे तु धानापेषणमिति समासः।

विभक्त्यर्थनिर्णये[४]

हिंसार्थकानां कतिपयधातूनां कर्मणि षष्ठीं ज्ञापयति "जासिनिप्रहणनाटक्राथ-पिषां हिंसायाम्"[५] इति सूत्रम्। जासिनिप्रहणनाटक्राथपिष इत्येषां धातूनां हिंसार्थकानां कर्मणि षष्ठी भवतीत्यर्थकम्। प्राणात्यन्तवियोगफलको व्यापारो हिंसा, तदर्थका एते धातवः। तथा हि उत्पूर्वकस्य जासेः प्रणिपूर्वकस्य निपूर्वकस्य प्रपूर्वकस्य च हन्तेः उत्पूर्वकस्य नाथेः क्राथतेः पिषेश्च हिंसा अर्थः। "चौरस्योज्जासयति निप्रहन्ति प्रणिहन्ति निहन्ति प्रहन्ति उन्नाटयति उत्क्राथयति

---

[१] पृ. १४३
[२] सू. २.३.५६
[३] पृ. १४३
[४] पृ. ४१०
[५] सू. २.३.५६

पिनष्टि वा'' इत्यादौ षष्ठ्या आधेयत्वस्वरूपं कर्मत्वमर्थः। तच्च हिंसाफले प्राणात्यन्तवियोगेऽन्वेति। तथा च चौरवृत्तिप्राणात्यन्तवियोगफलकव्यापाराश्रय इत्यन्वयबोधः।

हिंसायामित्युपादानात् ''धानाः पिनष्टि'' इत्यत्र कर्मणि न षष्ठी। आरम्भकसंयोगफलिका आरम्भसंयोगफलिका च पार्थिवक्रिया विजातीया पिनष्टेरर्थः। तत्राद्यं फलमादाय ''माषं पिनष्टि'' इति प्रयोगः। द्वितीयं फलमादाय ''धानाः पिनष्टि'' इति प्रयोगः।

व्यवहृपणोः समर्थयोः[१] इति सूत्रार्थः

समौ तुल्यौ अर्थौ ययोस्तौ समर्थौ तयोः समर्थयोः शकन्ध्वादित्वात् पररूपम्। एकार्थकस्य व्यवपूर्वकहृञ्धातोः पणधातोश्च कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादित्यर्थः। इदमपि समासनिवृत्त्यर्थमेव। अक्षैः क्रीडने क्रयविक्रयविषयकमूल्यसंवादे चानयोः व्यवहृपणोः एकार्थकत्वम्। शतस्य व्यवहरणं पणनं वा। द्यूतव्यवहारेण क्रयविक्रयव्यवहारेण वा शतं गृह्णातीत्यर्थः। वस्तुतः कर्मीभूतशतसंबन्धि अक्षक्रीडनेन ग्रहणम्, क्रयविक्रयविषयकमूल्यव्यवहारेण ग्रहणं वेति शाब्दबोधः।

समर्थयोः किम्। शलाकाव्यवहारः। गणनेत्यर्थः। वस्तुतः कर्मीभूतशलाकासंबन्धिगणनेति फलितम्। ''ब्राह्मणपणनम्''। स्तुतिरित्यर्थः। कर्मीभूतब्राह्मणसंबन्धिनी स्तुतिः। उभयत्र षष्ठ्याः पुनर्विध्यभावात् अस्त्येव समासः।

भाट्टरहस्ये[२]

एवम् — ''व्यवहृपणोः समर्थयोः''[३] इति सूत्रात् एकार्थयोरनेकार्थयोः कर्मणि शेषत्वेन षष्ठी स्यादित्यर्थकात् ''शतस्य व्यवहरणं शतस्य पणनम्'' इत्यादौ षष्ठी। अत्र हि व्यवपूर्वकहृधातोः पणनापरपर्यायं द्यूतमप्यर्थः। पणधातोश्च क्रयविक्रयव्यवहारोऽपि। अतो द्वयोस्तुल्यार्थकत्वम्। अर्थान्तरत्वे तु षष्ठीविध्यभावान्न समासप्रतिषेधः। शलाकाव्यवहारः — गणनेत्यर्थः। ब्राह्मणपणनं स्तुतिरित्यर्थः।

---

[१] सू. २.३.५७

[२] पृ. १४४

[३] सू. २.३.५७

विभक्त्यर्थनिर्णये[1]

व्यवहृपणोः कर्मणि षष्ठीं ज्ञापयति "व्यवहृपणोः समर्थयोः"[2] इति सूत्रं व्यवहृपण इत्येतयोर्धात्वोः समर्थयोः समानार्थयोः कर्मणि षष्ठी भवतीत्यर्थकम्। द्यूते क्रयविक्रयव्यवहारे चानयोर्धात्वोस्तुल्यार्थता। "शतस्य व्यवहरते वा पणते वा" इत्यादौ द्यूतं क्रयो विक्रयश्च व्यवहरतेः पणतेश्चार्थः। त्यागलाभान्यतर-फलकाक्षपातनादिव्यापारो द्यूतम्। त्यागे स्वत्वनाशप्रकारतानिरूपितविशेष्यत्वस्य तत्संबन्धावच्छिन्नाधेयत्वस्य वा कर्मत्वस्यान्वयः। लाभः स्वत्वेच्छा। तत्र स्वत्व-प्रकारतानिरूपितविशेष्यत्वस्य तत्संबन्धावच्छिन्नाधेयत्वस्य वा कर्मत्वस्यान्वयः। तथा च शतकर्मताकत्यागस्य शतकर्मताकस्य लाभस्य वा फलकं यदक्षपात-नादिकं तदनुकूलकृतिमानित्यन्वयबोधः। क्रयो विक्रयश्च प्रागेव निरूपितस्तत्र कर्मत्वान्वयोऽपि दर्शित एवेति शतकर्मताकक्रयकर्तृत्वं शतकर्मताकविक्रयकर्तृत्वं च वाक्यार्थः।

समर्थयोरित्युपादानात् "शलाकां व्यवहरति" इत्यादौ कर्मणि न षष्ठी। व्यवहरतेर्गणनार्थकत्वात्। तथा च शलाकाकर्मताकपरिगणनकर्तृत्वं वाक्यार्थः। एवं "ब्राह्मणं पणायति" इत्यादावपि कर्मणि न षष्ठी, पणतेः स्तुत्यर्थकत्वात्। अत एवात्र आयप्रत्ययः। "स्तुत्यर्थस्य पणतेरायप्रत्यय इष्यते"[3] इति वार्तिकात्। तथा च ब्राह्मणकर्मताकस्तुतिकर्तृत्वं वाक्यार्थः।

विभक्त्यर्थनिर्णये कृत्वोऽर्थप्रयोगे कालेऽधिकरणे चेति सूत्रार्थः

अधिकरणे काले षष्ठीं ज्ञापयति "कृत्वोऽर्थप्रयोगे कालेऽधिकरणे"[4] इति सूत्रम्। कृत्वोऽर्थानां प्रत्ययानां प्रयोगे सति कालरूपेऽधिकरणेऽर्थे षष्ठी-विभक्तिर्भवतीत्यर्थकम्। काले इत्यस्य कालवाचिशब्दादित्यर्थः। तथा च काल-विशेषवाचिशब्दात् अधिकरणेऽर्थे षष्ठी भवतीति सूत्रार्थः।

"पञ्चकृत्वोऽह्नो भुङ्क्ते" इत्यादौ क्रियाभ्यावृत्तिगणने विहितस्य कृत्वसुच्प्रत्ययस्य अभ्यावृत्तिमात्रमर्थः, अनन्यलभ्यत्वात्। क्रियाया धातुना गणनस्य संख्यार्थकशब्देन लाभात्। अभ्यावृत्तिः पौनःपुन्यमुत्पत्तिरिति यावत्। अत एव काशिकायां — "एककर्तृकाणां तुल्यजातीयानां क्रियाणां जन्म संख्यानं क्रियाभ्यावृत्तिगणनमिति व्याख्यातम्। तत्रोत्पत्तौ तद्धितार्थे पञ्चशब्दार्थस्य पञ्चत्वसंख्याविशिष्टस्य प्रतियोगि-

---

[1] पृ. ४१०, ४१२

[2] सू. २.३.५७

[3] काशिका द्वितीय भागः - पृ. २१८, सू. २.३.५७

[4] सू. २.३.६४

तयान्वयः। पञ्चान्वितोत्पत्तेः धात्वर्थतावच्छेदकैकधर्मावच्छिन्नसमानाधिकरणभूते धात्वर्थे प्रतियोगितयान्वयः। तत एव क्रियाजन्मसंख्यानलाभः। धात्वर्थतावच्छेदकैकधर्मावच्छिन्नत्वनिवेशात् चैत्रस्य त्रिर्भोजने द्विर्गमने सति 'चैत्रः पञ्चकृत्वो भुङ्क्ते गच्छति वा' इति न प्रयोगः। सामानाधिकरण्यनिवेशात् चैत्रस्य त्रिर्भोजने मैत्रस्य द्विर्भोजने सति 'चैत्रो मैत्रो वा पञ्चकृत्वो भुङ्क्ते' इति न प्रयोगः। प्रकृत्यर्थविशेषितेन कृत्वोऽर्थप्रत्ययार्थेन विशेषिते धात्वर्थे प्रकृत्यर्थकालविशेषविशेषितस्य षष्ठ्यर्थस्याधेयत्वस्यान्वयः। तथा च पञ्चप्रतियोगितानिरूपकोत्पत्तिप्रतियोग्यहर्वृत्तिभोजनकर्तृत्वं वाक्यार्थः। व्युत्पत्तिवैचित्र्येण समानाधिकरणे एकधर्मावच्छिन्ने धात्वर्थे कृत्वोर्थप्रत्ययार्थस्योत्पत्तेरन्वयः। कृत्वोऽर्थप्रत्ययार्थविशिष्टे धात्वर्थे षष्ठ्यर्थस्य आधेयत्वस्यापि व्युत्पत्तिवैचित्र्येणान्वयः। अत एव कृत्वोऽर्थप्रयोगोपादानं संगच्छते। तदुपादानफलं तु कृत्वोर्थप्रत्ययप्रयोगशून्ये "अह्नि भुङ्क्ते शेते वा" इत्यादौ कालेऽधिकरणे न षष्ठी।

शाब्दिकमतपरामर्शः

शाब्दिकास्तु "ज्ञोऽविदर्थस्य०"[१] इति सूत्रेण करणे "अधीगर्थ०"[२] इत्यादिना "व्यवहृपणोः०"[३] इत्यन्तेन सूत्रषट्केन कर्मणि "कृत्वोऽर्थप्रयोगे०"[४] इति सूत्रेण अधिकरणे कारके यत् षष्ठीविधानं तत् शेषत्वेन विवक्षिते बोध्यम्। "षष्ठी शेषे"[५] इत्यतः शेष इत्यस्यानुवृत्तेर्जागरूकत्वात्।

न चैवं "षष्ठी शेषे"[६] इत्यनेन षष्ठ्यां सिद्धायां दर्शिताष्टसूत्रीप्रणयनं व्यर्थमिति वाच्यम्। "सर्पिषो ज्ञानम्" इत्यादौ समासनिषेधफलकतया सार्थक्यात्।

न च दर्शिताष्टसूत्र्या न समासनिषेधफलकत्वं, किं तु समासे षष्ठीलुग्निवृत्तिफलकत्वम्, तत एव सार्थक्यसंभवादिति वाच्यम्। अलुक्समासे प्रमाणाभावात्। समासनिषेधफलकत्वस्य आनुशासनिकस्य औचित्यात्। तथा च वार्तिकं "प्रतिपदविधाना षष्ठी न समस्यते"[७] इति। हरिरप्याह —

कारकैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः।
प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये।।

---

[१] सू. २.३.५१
[२] सू. २.३.५२
[३] सू. २.३.५७
[४] सू. २.३.६४
[५] सू. २.३.५०
[६] सू. २.३.५०
[७] वा. १३२०

इति। प्रतिपदमित्यत्र प्रतियोगे इत्थंभावाख्याने द्वितीया संबन्धमभिधत्ते। तथा च पदसंबन्धिनी षष्ठी कारकव्यपदेशवती श्रूयमाणक्रिये सूत्रे प्रोक्ता समासनिवृत्त्यर्थेत्यर्थः। इत्थं च "सर्पिषो ज्ञानं, मातुः स्मरणम्" इत्यादिकः प्रयोगः शेषत्वविवक्षायामसमस्त एव साधुः। हरिस्मरणमित्यादिसमासस्तु शेषत्वाविवक्षायां कृद्योगषष्ठ्या बोध्यः। तत्र कारकपूर्वकत्वात् "गतिकारक०"[१] इत्यादिना विहितः कृदुत्तरपदप्रकृतिस्वरः मध्योदात्तो भवति। शेषषष्ठ्या समासोपगमे तु अन्तोदात्तः तत्पुरुषस्वरः स्यादिति स्वरार्थेयमष्टसूत्रीति निगलितार्थः।

किं च "मातु स्मृतम्" इत्यादौ समासाभावोऽष्टसूत्र्या ज्ञाप्यते। कृद्योगप्रयुक्तकर्मषष्ठ्याः निष्ठायां निषेधात्। कर्मविषया षष्ठी निष्ठायां प्रतिषिध्यत इत्युक्तेः। शेषषष्ठ्या समासस्तु दर्शिताष्टसूत्रीज्ञाप्यनिषेधस्य विषय एवेति वदन्ति।

अत्रेदं चिन्त्यम्। "हरिस्मरणम्" इत्यादौ कृदुत्तरपदप्रकृतिस्वरः मध्योदात्तः नान्तोदात्तः शेषषष्ठीतत्पुरुषस्वर इति नायं शेषषष्ठीतत्पुरुष इति तु तदैव संगच्छते यदि च "सुगन्धिं पुष्टिवर्धनम्" इत्यादिवेदे कारकस्य शेषत्वविवक्षायां पुष्टिवर्धनशब्दस्य शेषषष्ठीतत्पुरुषसमासोपगमेऽन्तोदात्तस्वर उपलभ्येत। नायं दृष्टचर इति न किंचिदेतत्।

"मातुःस्मृतम्" इत्यादावपि न शेषषष्ठ्या निषेधः। "न लोकाव्यय०"[२] इति निषेधस्य "क्तस्य च वर्तमाने नपुंसके भावे उपसंख्यानम्"[३] इति वार्तिकेन प्रतिप्रसवात्। न च कर्मषष्ठ्या निष्ठायां निषेध इति वाच्यम्। निष्ठायां निषेधस्याप्रामाणिकत्वात्। प्रामाणिकत्वे तु क्तवतुमात्रविषयत्वात्। अत एव "ग्रामस्य गतम् ओदनस्य भुक्तम्" इत्यादिको भावाधिकरणक्तान्ते कर्मविषयषष्ठीप्रयोगः प्रामाणिकानां संगच्छते।

किं च दर्शिताष्टसूत्र्याः शेषषष्ठीसमासनिषेधफलकत्वाभ्युपगमे सुरेशिता जनेशिता नदीशितेत्यादिकः षष्ठीसमासो न स्यात्। कर्मषष्ठ्याः तृनि "न लोकाव्यय०"[४] इत्यनेन निषेधात् दर्शिताष्टसूत्र्या शेषषष्ठीसमासनिषेधस्य ज्ञापनादिति।

तस्मात् करणे कर्मणि अधिकरणे तत्त्वेन विवक्षिते अष्टसूत्र्या षष्ठी विधीयते। न चैवं कारकविभक्तेः ज्ञापकं विना स्वार्थकविभक्त्यन्तर-

---

[१] सू. ६.२.१३९
[२] सू. २.३.६९
[३] वा. १५१४
[४] सू. २.३.६९

बाधकत्वनियमात् दर्शितोदाहरणेषु तृतीयाद्वितीयासप्तमीनां बाधप्रसङ्ग इति वाच्यम्। ईदृशनियमे मानाभावात्।

दिवस्तदर्थस्य[१] इति सूत्रव्याख्यानम्

पूर्वसूत्रनिर्दिष्टव्यवहृपणौ तच्छब्देन परामृश्यते। तयोः व्यवहृपणोः अर्थ एवार्थो यस्य सः तदर्थः तस्य तदर्थस्य। दिवः विशेषणमेतत्। तथा च द्यूतार्थकस्य क्रयविक्रयव्यवहारार्थकस्य च दिवः कर्मणि षष्ठी स्यात्। इह शेष इति नानुवर्तते, व्याख्यानात्। तथा च कर्मणः शेषत्वविवक्षाविरहात् "षष्ठी शेषे"[२] इत्यप्राप्तौ इदं वचनम्। न तु कृदन्तयोगे समासनिवृत्त्यर्थम्। शतस्य दीव्यति। अक्षक्रीडनेन क्रयविक्रयविषयकमूल्यविसंवादे वा शतकर्मकं ग्रहणमिति बोधः। अत्र शेषे इत्यननुवृत्तेः कर्मत्वप्रकारक एव बोधः। अत एव "द्वितीया ब्राह्मणे"[३] इत्युत्तरसूत्रे "ग्रामस्य तदहः सभायां दीव्येयुः" इत्यत्र "नित्यषष्ठीप्राप्तौ द्वितीयार्थम्" इति भाष्यकैयटयोः उक्तं संगच्छते। तदर्थस्य किम्। ब्राह्मणं दीव्यति, स्तौतीत्यर्थः।

भाट्टरहस्ये[४]

एवम् — "दिवस्तदर्थस्य"[५] इति सूत्रात् "व्यवहृपणोः समर्थयोः"[६] इति पूर्वसूत्रोक्तपरामर्शितच्छब्दबलेन द्यूतार्थकस्य क्रयविक्रयरूपव्यवहारार्थकस्य च दिवः कर्मणि कर्मत्वत्वेन विवक्षिते षष्ठी स्यादित्यर्थकात् "शतस्य दीव्यति" इत्यादौ षष्ठी। स्तुत्यादिरूपार्थान्तरपरत्वे तु "ब्राह्मणं दीव्यति" इति द्वितीयैव। अत्र सूत्रे न शेषत्वेन कर्मत्वविवक्षा। अन्यथा दिवः पूर्वसूत्र एव पठितुं शक्यत्वेन पृथक्सूत्रारम्भवैयर्थ्यात्।

दिवेरुपसर्गयोगे तु विकल्पेन षष्ठी। "विभाषोपसर्गे"[७] इति सूत्रात्। "शतस्य शतं वा प्रतिदीव्यति"। इदं च लोके। वेदे ब्राह्मणे तु "द्वितीया ब्राह्मणे"[८] इति सूत्रात् छन्दसि उपसर्गयोगाभावेऽपि द्वितीयैव। "ग्रामस्य तदहः सभायां दीव्येयुः"[९] इत्यादौ।

---

[१] सू. २.३.५८
[२] सू. २.३.५०
[३] सू. २.३.६०
[४] पृ. १४६
[५] सू. २.३.५८
[६] सू. २.३.५७
[७] सू. २.३.५९
[८] सू. २.३.६०
[९] श.ब्रा. १३ का.

विभक्त्यर्थनिर्णये[१]

दिवः कर्मणि षष्ठीं ज्ञापयति "दिवस्तदर्थस्य"[२] इति सूत्रम्। व्यवहृपणि-समानार्थकस्य दीव्यतेः कर्मणि षष्ठीविभक्तिः भवतीत्यर्थकम्। "शतस्य दीव्यति" इत्यादौ षष्ठ्याः कर्मत्वमर्थः। तथा च शतकर्मताकद्यूतकर्तृत्वं पूर्ववत् वाक्यार्थः। यदि च क्रयविक्रयावपि दिवोऽर्थाविति तदा शतकर्मताकक्रयादिकर्तृत्वं वाक्यार्थः।

यद्यपि पूर्वसूत्रे दिवः कथने पृथक्सूत्रप्रणयनं न भवतीति लाघवं संभवति, तथाप्यग्रिमसूत्रेऽनुवृत्त्यर्थं पृथक्सूत्रारम्भ इति।

सोपसर्गस्य दिवः कर्मणि वैकल्पिकीं षष्ठीं ज्ञापयति "विभाषोपसर्गे"[३] इति सूत्रम्। उपसर्गे सति दिवस्तदर्थस्य कर्मणि विभाषा षष्ठीविभक्तिर्भवतीत्यर्थकम्। "शतस्य शतं वा प्रतिदीव्यति" इत्यादौ षष्ठीद्वितीययोः कर्मत्वमर्थः। वाक्यार्थस्तु पूर्ववत्।

विभाषोपदेशात् निरुपसर्गस्य दिवोऽर्थस्य द्यूतादेरतिशयितस्यापि कर्मणि न द्वितीया, किं तु षष्ठ्येवेति प्रतीयते। द्यूतादिभिन्नार्थकस्य दिवः सोपसर्गस्यापि कर्मणि द्वितीयैव, न तु षष्ठी, यथा "शलाकां प्रतिदीव्यति" इत्यादौ।

निरुपसर्गस्य दिवः कर्मणि क्वचित् षष्ठ्यपवादं ज्ञापयति "द्वितीया ब्राह्मणे"[४] इति सूत्रम्। ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया विभक्तिर्भवती-त्यर्थकम्। ब्राह्मणं संहितेतरवेदभागः। "विप्रश्च आद्ये ग्रामस्य तदहः सभायां दीव्येयुः" इति। अत्र निरुपसर्गस्य दिवस्तदर्थस्य कर्मणि द्वितीयाप्रयोगः ब्राह्मण-भागान्तर्भूत एव। अत्र ब्राह्मणभागस्य सम्यक् उच्चारणेन देवने गोः कर्मत्वं प्रतीयते। द्वितीये "विप्रस्य गां दीव्यति, विप्रो गां दीव्यति" इत्यत्र द्वितीयया षष्ठ्यपवादः।

विभाषोपसर्गे[५]

पूर्वयोगापवादः। शतस्य शतं वा प्रतिदीव्यति।

---

[१] पृ. ४१६
[२] सू. २.३.५८
[३] सू. २.३.५९
[४] सू. २.३.६०
[५] सू. २.३.५९

प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने[१] इति सूत्रार्थः

देवतासंप्रदानकेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणः हविषः वाचकात् शब्दात् षष्ठी स्यात्। "अग्नये छागस्य हविषो वपायाः मेदसः प्रेष्य अनुब्रूहि वा"। मैत्रावरुणं प्रति प्रध्वर्युकर्तृकोऽयं संप्रैषः। "हे मैत्रावरुण"। अग्न्युद्देशेन प्रदास्यमानं छागसंबन्धि यत् हविः वपाख्यं मेदोरूपं तत् प्रेष्य। "होता यक्षदग्निं छागस्य वपाया मेदसो जुषतां हविर्होतर्यज" इति प्रैषेण प्रकाशयेत्यर्थः। मेदश्शब्देन वस्त्रखण्डतुल्यो मांसविशेषः उच्यते। "अनुब्रूहि वा" इति। 'हे मैत्रावरुण! अग्न्युद्देश्येन प्रदास्यमानं छागसंबन्धि यद्धविः वपाख्यं मेदोरूपं तत् पुरोनुवाक्यया प्रकाशय' इत्यर्थः।

भाट्टरहस्ये[२]

एवं "प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने"[३] इति सूत्रात् देवतासंप्रदानकेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविर्विशेषस्य वाचकात् षष्ठीत्यर्थकात् "अग्नये छागस्य हविषो वपाया मेदसोऽनुब्रूहि प्रेष्य वा" इत्यत्र कर्मत्वत्वेन विवक्षिते षष्ठी। अत्र शेषग्रहणं न संबध्यते। प्रेष्येति लोडन्तेन समासस्याप्रसक्तत्वेन तत्प्रतिषेधार्थत्वानुपपत्तेः। "हविषः प्रस्थितत्वेन विशेषणे प्रतिषेधो वक्तव्यः"[४] इति वार्तिकात् प्रस्थितत्वेन विशेषणे द्वितीयैव। अत एव "इन्द्राग्निभ्यां छागस्य हविर्वपां मेदः प्रस्थितं प्रेष्य" इति प्रयोगः।

विभक्त्यर्थनिर्णये[५]

तिङन्तविशेषस्य कर्मणि षष्ठीं ज्ञापयति "प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने"[६] इति सूत्रम्। इष्यतेर्दैवादिकस्य लोण्मध्यमपुरुषैकवचनं प्रेष्य इति। तत्साहचर्यात् ब्रुविरपि तथाभूत एव गृह्यते इति प्रेष्यब्रूहि इत्येतयोः तिङन्तयोः कर्मणि हविषः षष्ठी भवति देवतायां संप्रदाने सतीति सूत्रार्थः। हविषो हविर्वाचकशब्दादित्यर्थः।

"अग्नये छागस्य हविषो वपाया मेदसो वा प्रेष्य, अग्नये छागस्य हविषो वपाया वा मेदसोऽनुब्रूहि" इत्यादौ प्रपूर्वकस्येष्यतेरनुपूर्वकस्य ब्रुवोश्च दानमर्थः। षष्ठ्यास्तु

---

[१] सू. २.३.६१
[२] पृ. १४६-१४७
[३] सू. २.३.६१
[४] वा. १५०८, सू. २.३.६१
[५] पृ. ४१७, ४१८
[६] सू. २.३.६१

कर्मत्वमर्थः। तथा चाग्निसंप्रदानताकच्छागकर्मताकाशंसाविषयदानकर्तृत्ववांस्त्व-मित्यादिरन्वयबोधः। प्रेष्यब्रुवोः इत्युपादानात् "अग्नये छागं हविर्वपां मेदो वा जुहुधि" इत्यादौ धात्वन्तरकर्मणि न षष्ठी। हविष इत्युपादानात् "अग्नये गोमयानि प्रेष्य" इत्यादौ कर्मणि न षष्ठी। देवतासंप्रदान इत्युपादानात् "माणवकाय पुरोडाशं प्रेष्य" इत्यादौ कर्मणि न षष्ठी।

"हविषः प्रस्थितस्य प्रतिषेधो वक्तव्यः"[1] इति वार्तिकम्। प्रस्थितशब्दसमा-नाधिकरणहविःशब्दात् षष्ठीं प्रतिषेधति। यथा "इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य" इत्यादौ। प्रस्थितं प्रकर्षेण स्थितम्। प्रकर्षस्तु प्रोक्षणाभिमन्त्रण-यथोक्तस्थानकत्वम्।

विभक्त्यर्थनिर्णये चतुर्थ्यर्थे बहुलं छन्दसि इति सूत्रार्थः

संप्रदानेऽर्थे षष्ठीं ज्ञापयति "चतुर्थ्यर्थे बहुलं छन्दसि"[2] इति सूत्रम्। छन्दसि चतुर्थ्यर्थे संप्रदानत्वादौ षष्ठीविभक्तिर्भवति बहुलमित्युपादानात् चतुर्थी क्वचित् षष्ठीनिषेधश्चेत्यर्थकम्। "पुरुषमृगश्चन्द्रमसश्चन्द्रमसे वा दातव्यः" इत्यादौ षष्ठी-चतुर्थ्योः संप्रदानत्वमर्थः। तथा च चन्द्रमस्संप्रदानताकाभीष्टकर्तव्यदानकर्म पुमान् मृग इत्यन्वयबोधः। बहुलग्रहणात् "कृष्णो रात्र्यै" इत्यत्र न षष्ठी। कृष्णो मृगः। दातव्य इत्यनुषज्यते। रात्रिसंप्रदानत्वं चतुर्थ्यन्तार्थः। रात्रिसंप्रदानताकाभीष्ट-कर्तव्यदानकर्म कृष्णो मृग इत्यन्वयबोधः। छन्दसीत्युपादानात् लोके 'चन्द्रमसेऽर्धं ददाति' इत्यादौ न षष्ठी।

विभक्त्यर्थनिर्णये यजेश्च करणे इति सूत्रार्थः

करणे षष्ठीं ज्ञापयति "यजेश्च करणे"[3] इति सूत्रम्। यजधातोः करणे षष्ठी भवति छन्दसिप्रयोगे चकारात् तृतीयापीत्यर्थकम्। यजेः कर्मणः करणसंज्ञा-विधानात् कर्मण्येव षष्ठी। न चैवं "यजेश्च कर्मणि" इत्येव सूत्रं स्यादिति वाच्यम्। यजेः संप्रदाने कर्मसंज्ञाविधानात् षष्ठ्याः संप्रदानार्थकतापत्तेः कर्मत्वार्थक-तानुपपत्तेश्च। "घृतस्य घृतेन वा यजते" इत्यादौ यजेः देवतोद्देश्यको विहितो वा त्यागोऽर्थः। त्यागस्तु स्वत्वनाशानुकूलेच्छा। षष्ठ्यास्तृतीयायाश्च स्वत्वनाशस्वरूप-फलान्वय्याधेयत्वस्वरूपकर्मत्वमर्थः। तथा च घृतवृत्तिस्वत्वनाशानुकूलेच्छाश्रयत्वं वाक्यार्थः। छन्दसीत्युक्तेर्लोके 'घृतेन यजते' इत्यादौ न षष्ठी।

---

[1] वा. १५०८, सू. २.३.६१

[2] सू. २.३.६२

[3] सू. २.३.६३

कृत्वोऽर्थप्रयोगे कालेऽधिकरणे[१] इति सूत्रार्थः

कृत्वसुजर्थार्थकानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यात्। "पञ्चकृत्वोऽह्नो भोजनम्"। अहस्संबन्धि "पञ्चवारं भोजनम्"। "द्विरह्नो भोजनम्"। अहस्संबन्धि द्विवारं भोजनम्। अत्राधिकरणत्वस्य संबन्धत्वेन विवक्षा। शेषे किम्। "द्विरहन्यध्ययनम्"। अहरधिकरणकं द्विवारमध्ययनम्। अत्राधिकरणत्वत्वेनाधिकरणत्वस्य विवक्षितत्वात् सप्तम्येव।

भाट्टरहस्ये[२]

एवं "कृत्वोऽर्थप्रयोगे कालेऽधिकरणे"[३] इति सूत्रात् कृत्वोऽर्थानां शब्दानां प्रयोगे कालवाचिन्यधिकरणे शेषत्वेन विवक्षिते षष्ठी स्यात् इत्यर्थकात् "पञ्चकृत्वोऽह्नो भुङ्क्ते, पञ्चकृत्वोऽह्नो भोजनम्, द्विरह्नो भोजनम्" इत्यत्र षष्ठी। अत्र षट्सूत्र्या विच्छिन्नमपि शेषग्रहणं व्याख्यानतो मण्डूकप्लुत्या अनुवर्तते। अधिकरणत्वत्वेन विवक्षायां तु "द्विरहनि भुङ्क्ते" इति सप्तम्येव। तत् सिद्धम् इयमष्टसूत्री शेषत्वविवक्षायां समासप्रतिषेधार्थेति।

कर्तृकर्मणोः कृति[४] इति सूत्रार्थः

कृत्प्रत्यये प्रयुज्यमाने सति कृदन्तधात्वर्थस्य कर्तरि कर्मणि च षष्ठी स्यात्। "कृष्णस्य कृतिः"। कृधातोः भावे स्त्रियां क्तिन्। कृष्णकर्तृका सृष्टिरित्यर्थः। कर्तरि षष्ठी। "जगतः कर्ता कृष्णः"। जगत्कर्मकसृष्ट्यनुकूलव्यापारवानित्यर्थः। कर्मणि षष्ठी।

गुणकर्मणि वेष्यते[५] इति वार्तिकार्थः

द्विकर्मककृदन्तधातुयोगे अप्रधानकर्मणि षष्ठीविकल्प इष्यत इत्यर्थः। "नेता अश्वस्य स्रुघ्नस्य स्रुघ्नं वा"। अत्र अश्वः प्रधानकर्म। स्रुघ्नः गुणकर्म।

कृत पूर्वी कटमिति वाक्यार्थविचारः

ननु सूत्रे कृतीति व्यर्थम्। न च तिङ्व्यावृत्त्यर्थं तदिति वाच्यम्। "ओदनं पचति" इत्यादौ "न लोक०"[१] इति लादेशयोगे षष्ठीनिषेधादेव षष्ठ्यभावसिद्धेः। न

---

[१] सू. २.३.६४

[२] पृ. १४४

[३] सू. २.३.६४

[४] सू. २.३.६५

[५] वा. ५०४२, सू. २.३.६५

च तद्धितव्यावृत्त्यर्थं तदिति वाच्यम्। "शतेन क्रीतः, शत्योऽश्वः" इत्यादौ कर्मणः तद्धितयत्प्रत्ययाभिहितत्वादेव अश्वादौ षष्ठ्यभावसिद्धेः। न च "देवदत्तं हिरुक्" इत्यादौ हिरुगाद्यव्ययबोध्यवर्जनादिक्रियां प्रति कर्मत्वात् अनेन षष्ठी शङ्क्या। "न लोकाव्यय०" इति सूत्रेणाव्यययोगे षष्ठीनिषेधात्। शेषत्वविवक्षायां तु अत्र षष्ठी इष्यत एव। एवं च परिशेषात् कृद्योग एवेयं षष्ठी पर्यवस्यतीति किं कृद्ग्रहणेनेति चेत् — अत्रोच्यते। "कृतपूर्वी कटम्" इति तद्धितयोगे षष्ठीवारणाय कृद्ग्रहणात्। तथा हि —

कटः पूर्वं कृतः अनेनेति लौकिकविग्रहः। तत्र पूर्वमिति क्रियाविशेषणम्। सुप् सुपेति समासः। अनेनेत्यनुवत्तौ कृतपूर्वशब्दात् "पूर्वादिनिः"[2] "सपूर्वाच्च"[3] इति इनिप्रत्ययः तद्धितः। तत्र करोतिक्रियापेक्षया कटस्य कर्मत्वात् अनेन "कर्तृ-कर्मणोः०"[4] इति सूत्रेण षष्ठीप्राप्तौ तद्धितयोगान्न भवति।

ननु कृतः कटः पूर्वमनेनेति विग्रहे कृतशब्दस्य पूर्वशब्देन समासो न संभवति कृतशब्दस्य कटशब्दसापेक्षत्वेन सामर्थ्यविरहात्। अत एव तद्धित इनिप्रत्ययोऽपि दुर्लभः। किं च कृत इति क्तप्रत्ययेन कर्मणोऽभिहितत्वेन ततः षष्ठ्याः प्राप्तिरेव नास्तीति किं तन्निवृत्त्यर्थेन कृद्ग्रहणेन। क्तप्रत्ययेन कृता कर्मणः अभिहितत्वादेव कटात् द्वितीया दुर्लभेति चेत् — न।

कृत अम् पूर्व अम् इत्यलौकिकविग्रहवाक्ये कटस्यासंनिहिततया कर्मत्वे-नान्वयासंभवेन कृञ्धातोस्तदानीमकर्मकतया कर्मणि क्तप्रत्ययस्यासंभवे सति "नपुंसके भावे क्तः"[5] इति भावे क्तप्रत्यये कृते सति कृतशब्दस्य कटशब्दसापेक्षत्वाभावात् समासतद्धितौ निर्बाधौ। ततश्च कृतपूर्वीति तद्धितान्तस्य पूर्वं कृतवानित्यर्थः पर्यवस्यति। "किं कृतवान्" इति कर्मजिज्ञासायां "कटम्" इत्यन्वेति। गुणभूतयापि क्रियया कारकसंबन्धस्य "कटं कृतवान्" इत्यादौ दर्शनात्। तच्च कर्मत्वं न क्तप्रत्ययेनाभिहितम्। तस्य भावे विधानात्। नापि इनिप्रत्ययेन। तस्य कर्तरि विधानात्। तथा च असति कृद्ग्रहणे कटशब्दात् षष्ठी स्यात्। तद्व्यावृत्त्यर्थं कृद्ग्रहणमिति भाष्ये स्पष्टम्।

---

[1] सू. २.३.६९
[2] सू. ५.२.८६
[3] सू. ५.२.८७
[4] सू. २.३.६५
[5] सू. ३.३.११४

न च निष्ठायोगे निषेधादेवात्र षष्ठी न भविष्यतीति वाच्यम्। "नपुंसके क्ते भावे षष्ठ्या उपसंख्यानम्"[१] इति "क्तस्य च वर्तमाने"[२] इति सूत्रस्थवार्तिकेन निष्ठायोगे षष्ठीनिषेधस्यात्राप्रसक्तेः। तथा च षष्ठ्यभावे उक्तरीत्या अनभिहितत्वात् कर्मणः द्वितीया सुलभैव।

न च कृतेऽपि कृद्ग्रहणे षष्ठी दुर्वारा। कृतेति क्तप्रत्ययात्मककृद्योगस्य सत्त्वादिति वाच्यम्। कृद्ग्रहणसामर्थ्येन भाष्योदाहरणेन च वृत्त्यन्तर्भावानापन्नकृद्योगस्य विवक्षितत्वात्। प्रकृते च कृतेत्यस्य तद्धितवृत्यन्तर्भूतत्वान्न तद्योगः षष्ठीनिमित्तम्।

न चैवं सति "ओदनस्य पाचकतमः, ओदनस्य पाचकग्रहणम्" इत्यादौ षष्ठी न स्यात्, वृत्त्यनन्तर्भूतकृद्योगाभावात्। तथा च "ओदनं पाचकतमः, ओदनं पाचकग्रहणम्" इति द्वितीयैव स्यादिति वाच्यम्। इष्टापत्तेः।

अत एव मतुबधिकारे "प्रज्ञाश्रद्धार्चाभ्यो णः"[३] इति सूत्रे प्राज्ञो व्याकरणम् इति उदाहरिष्यते मूलकृता।

न चैवं "घटः क्रियते" इत्यत्रापि कर्मणः विवक्षाभावमाश्रित्य भावलकारे सति अनन्तरं घटस्य कर्मत्वेनान्वयसंभवात् अनभिहितत्वात् द्वितीया दुर्वारेति वाच्यम्। वैषम्यात्। कृतपूर्वीत्यत्र हि अलौकिकविग्रहदशायां कटशब्दस्यासंनिधानात् कर्मणो विवक्षा न संभवतीति भावे क्तप्रत्यय इति युक्तमाश्रयितुम्। 'क्रियत' इत्यत्र तु अविवक्षा न संभवत्येव। कृत्तद्धितसमासैकशेषसनाद्यधातुरूपवृत्तिपञ्चकानन्तर्भूतत्वेन वृत्तिशून्यतया विग्रहाभावात्। तथा च वृत्तिविषय एवायं व्युत्पत्तिप्रकार इति।

आक्षेपः समाधानं च

ननु भट्टिकाव्ये

> ददैर्दुःखस्य मादृग्भ्यो धायैरामोदमुत्तमम्।
> लिम्पैरिव तनोर्वातैश्चेतयः स्यात् ज्वलो न कः।।

इति श्लोकोऽस्ति। श्रीरामस्य विरहार्तस्य वाक्यमेतत्। अत्र दुःखस्येति तनोरिति च कर्मणि षष्ठी। मादृग्भ्यो दुःखं ददैः ददद्भिः, पुष्पादीनामामोदं परिमलं धायैः पोषकैः तनोः तनुं शरीरं लिम्पैः लिम्पद्भिः कः चेतयः प्राणी ज्वलः ज्वलन्निव न स्यात् इत्यर्थः। अत्र आमोदस्योत्तमस्येति कर्मणि षष्ठ्या भाव्यम्। धायशब्दस्य

---

[१] वा. १५१४
[२] सू. २.३.६७
[३] सू. ५.२.१०१

पोषणार्थकधाञ्धातोः "ददातिदधात्योर्विभाषा"[१] इति सूत्रविहितणप्रत्ययात्मक-कृदन्तत्वात् इति चेत् — न। उत्तममामोदं पुष्पादीनां गृहीत्वा दुःखस्य पोषकैः इत्येवं गृहीत्वेत्यध्याहृत्य तद्योगे द्वितीयाया उपपत्तेः — इति प्रौढमनोरमाशेखरादि-ग्रन्थसंकलनपूर्वकं बालमनोरमायां निरूपणम्।

सर्वमिदमभिप्रेत्य वाक्यपदीयेऽप्युक्तम् —

"विशेषकर्मसंबन्धे निर्मुक्तेऽपि कृतादिभिः।
विशेषनिरपेक्षोऽन्यः कृतशब्दः प्रवर्तते।।

अकर्मकत्वात् सत्येवं क्तान्ते भावाभिधायिनि।
ततः क्रियावता कर्त्रा योगो भवति कर्मणाम्।।

अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः।
क्रिया संबध्यते तद्वत् कृतपूर्व्यादिषु स्थिता।।"

इति। तदुक्तं महाभाष्येऽपि — यदा वाक्यं न तदा प्रत्ययः, यदा प्रत्ययः सामान्येन तदा वृत्तिः — इति। न तदा प्रत्ययः = न तदा भावे प्रत्ययः। सकर्मकत्वात्। यदा प्रत्ययः, भावे इति शेषः, तदा वृत्तिरेव। सा च न कदापि कर्मक्तान्तेनेत्याह — सामान्येनेति।

उक्तरीत्या कर्महीनार्थकधातुप्रकृतिकक्तान्तेनेत्यर्थः। अनेन तादृशक्तान्तस्य वाक्ये न प्रयोग इति स्पष्टमेवोक्तम्। किं च योऽसौ कृतकटयोः अभिसंबन्धः सामानाधिकरण्यरूपः स उत्पन्ने तद्धितप्रत्यये निवर्तत इति च भाष्ये उक्तम्। तेन तद्धितेऽकृते 'कृतः कटः' इत्येवेति ध्वनितम्। अत एव 'कटं क्रियते' इति न ततश्च पूर्वं कृतमनेनेत्यर्थे पूर्वादिनिः इति तद्धिते कृते पश्चात् फलस्याश्रया-काङ्क्षायां 'कटम्' इत्यादेः विशेषकर्मणोऽन्वयः। एतेनासामर्थ्यात् तद्धितो न स्यादित्यपास्तम्। तदुत्पत्तिकालेऽसामर्थ्याभावात्। कारकान्वयो गुणीभूतक्रिया-यामपि।

वाक्यपदीयस्यायमर्थः — निर्मुक्ते प्राप्ते, वाक्ये इति शेषः। विशेषकर्म-निरपेक्षोऽन्यः भावक्तान्तः प्रवर्तते वृत्तिघटको भवति। सामान्यकर्म तु नान्तरीय-कत्वात् अविवक्षितम्। तदाह — अकर्मकत्वे इत्यादि। ततः = वृत्तेः अनन्तरं क्रियाद्वारकसंबन्धेन तद्धितार्थकर्त्रा कटमित्यादेः संबन्धः। प्रकारान्तरमाह — अविग्रहेति। कर्तुः पृथग्ग्रहणरहितेत्यर्थः। एवं च प्रधानार्थकर्त्रा संसृष्टयापि क्रियया कारकाणां क्रियान्वयः इति तदर्थः। (यथा ग्रामं गतवानित्यादौ) इति मञ्जूषायाम्।

---

[१] सू. ३.१.१३९

भाट्टरहस्यरीत्या उक्तस्थले निर्णयः[१]

एवं "कर्तृकर्मणोः कृति"[२] इति सूत्रात् कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् इत्यर्थकात् "कृष्णस्य कृतिः, जगतः कर्ता कृष्णः" इत्यादौ षष्ठी। अत्र कर्तृत्वत्वेन कर्तृत्वं, कर्मत्वत्वेन कर्मत्वं च लक्षणया षष्ठ्यर्थः, न तु शेषत्वेन। व्याख्यानवशेन शेष इत्यस्य निवृत्तिप्रतीतेः। अत्रोभयत्र कर्तृत्वकर्मत्वयोः कृदुपात्त-कृतावेवान्वयः, ओदनस्य पक्तेत्यादिवत्। न तु धात्वर्थे प्रधानक्रियायां वा। एतच्चानुपदमेव स्पष्टीकरिष्यते। धातुस्तु साधुत्वार्थः। "ओदनस्य पाकः" इत्यादौ तु धात्वर्थस्य कृदर्थकृतावेवान्वय इत्यपि वक्ष्यते। "कृतपूर्वी कटम्" इत्यत्र षष्ठीव्यावृत्त्यर्थं सूत्रे कृद्ग्रहणम्।

नन्वेवं न तत्र द्वितीयापि, क्तप्रत्ययेन कर्मकारकस्य अभिहितत्वेन तस्याः अप्राप्तेः। अत एवानभिहिताधिकारविहितषष्ठ्या अपि तत्राप्रसक्तत्वेन न तद्व्या-वृत्त्यर्थं कृद्ग्रहणम्। किं च कृतपदस्य कटरूपविशेषणवत्त्वेन पूर्वशब्देन साकं समासानुपपत्तिः, "सविशेषणणानां वृत्तिर्नेष्यते" इति निषेधादिति चेत् —

अत्र वैयाकरणनव्याः

पूर्वं कृतशब्दः कर्मविशेषरूपकटान्वयमप्रतिपद्यमान एव कर्मसामान्यवाचिक्त-प्रत्ययान्ततया भावार्थकक्तप्रत्ययान्ततया वा व्युत्पादितः पूर्वपदेन समस्यत इति न समासानुपपत्तिः। पश्चाच्च "कटं कृतवान्" इतिवत् "कृतपूर्वी" इत्यत्रापि द्वितीयान्तस्य कृञर्थेऽन्वयः। कृत्प्रत्ययेन तस्यानभिधानाच्च द्वितीयोपपत्तिः — इति।

वैयाकरणनव्यमतखण्डनम्

तन्न। तथा सति 'ऋद्धस्य राजपुरुषः' इत्यपि प्रयोगः साधुः स्यात्। आदौ राजपदस्य षष्ठ्यन्तस्य पुरुषपदेन समासे कृते पश्चात् ऋद्धपदार्थस्य राजपदार्थे-ऽन्वयसंभवात्। समासवेलायां राजपदस्य ऋद्धपदसापेक्षत्वाभावात् असामर्थ्य-विरहात्।

किं च "कृतपूर्वी कटम्" इत्यत्र क्तप्रत्ययेन कर्मसामान्याभिधानेऽपि कट-रूपस्य कर्मविशेषस्यानभिधानेन कटपदस्य द्वितीयान्तत्वोपपादने "ओदनः पच्यते-तमाम्" "गुरुर्धरित्री क्रियतेतरां त्वया"[३] इत्यादावपि द्वितीयान्तत्वापत्तेश्च।

---

[१] भा.र.पृ. १४७-१५०

[२] सू. २.३.६५

[३] माघ. १-३६

क्तप्रत्ययस्य भावार्थकत्वे कृञः अविवक्षितकर्मकतया अकर्मकत्वेन पश्चादपि कटरूपकर्मान्वयानुपपत्तेश्च। इतरथा "ओदनः पच्यते" इति भावाख्याते द्वितीयापत्तेश्च। अनयैव दिशा 'ओदनं पाचकतमः, ओदनं पाकग्रहणम्' इत्यादिप्रयोगाणामप्यापत्तेश्च। सविशेषणत्वेन तादृशप्रयोगापत्तिवारणे 'ओदनस्य पाचकतमः' इति षष्ठ्यन्तप्रयोगस्याप्यनापत्तेश्च। अतः 'कटम्' इत्यस्य कथमपि न धात्वर्थान्वयः संभवी। एतेन कारकाणां धात्वर्थान्वयवादिनो नैयायिका अपि परास्ताः।

स्वमतम् खण्डदेवस्य

अतोऽत्रैवं समाधेयम् — न कटस्य धात्वर्थेऽन्वयः। धात्वर्थान्वयस्य कारकाणामव्युत्पन्नत्वात् धात्वर्थस्य प्रत्ययार्थभावनायामन्वयेन गुणभूततया तत्र "गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यात्" इति न्यायेन कारकाणामन्वयासंभवात् इति यावत्। नापि क्ताद्यर्थे; प्रथमान्तत्वापत्तेः, असमर्थसमासापत्तेश्च। समासघटकपदार्थस्य समासाघटकपदसापेक्षत्वे असमर्थतायाः सर्वेष्टत्वात्। अपि तु तद्धितार्थ एव कटस्यान्वयः। कर्ता हि तद्धितवाच्यार्थः। अतस्तद्विशेषणतया कृतिरपि तद्धितार्थः। यद्वा स्वातन्त्र्येण कृतिः लक्षणया तद्धितार्थः। तस्यां च लिङ्गानन्वयिन्यां कटकर्मकत्वस्यान्वयः। तद्धितान्तेन कर्मकारकस्यानभिहिततया प्रथमाया न प्रसक्तिः। विशेष्यवाचकपदोपस्थाप्यायां कृतावन्वयाच्च 'ओदनस्य पाचकः' इतिवत् न समासभङ्गः। वृत्तिघटकविशेषणस्य पदान्तरसापेक्षतायामेवासमर्थता न तु वृत्तिघटकविशेष्यस्येति महाभाष्ये स्पष्टम्।

यत्र तु "ओदनः पच्यतेतराम्" इत्यादौ तद्धितेन अतिशयमात्राभिधानात् न कृतेरभिधानम्, तत्र लकारार्थकृतावेव कारकान्वयात् तेन च कर्मत्वस्योक्तत्वेन न द्वितीयापत्तिः। यद्वा 'पचतिकल्पम्' इत्यादिवत् 'तराम्' इत्यस्य तात्पर्यग्राहकत्वाङ्गीकारात् पचधातुनैव अतिशयविशिष्टपाकस्य लक्षणया प्रतिपादनात् 'तराम्' इत्यस्य निरर्थकत्वेन तेन सह वृत्त्युपपत्तिः। यद्वा 'अस्माकं गुरुकुलम्' इतिवत् नित्यसापेक्षत्वात् वृत्त्युपपत्तिः। एवम् "ओदनस्य पाचकतमः, ओदनस्य पाचकग्रहणम्" इत्यत्रापि द्रष्टव्यम्।

"कृतपूर्वी कटम्" इत्यादौ तु कर्तृत्वस्य इनिप्रत्ययेनैवोक्तेः तदुक्तकृतौ कटमित्यस्यान्वयात् द्वितीयोपपत्तिः।

एवं 'व्याकरणं प्राज्ञः' इत्यत्रापि प्रकर्षेण जानातीति प्रज्ञः प्रज्ञ एव प्राज्ञ इति स्वार्थविहितेन तद्धितेनाण्प्रत्ययेन कृदर्थकृतेरप्युपादानेन तत्रान्वयोपपत्तेः।

अत एवोक्तं हरिणा —

ततः क्रियावता कर्त्रा योगो भवति कर्मणाम्।
अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः।।

क्रिया संबध्यते तद्वत् कृतपूर्व्यादिषु स्थिता। इति। अविग्रहा — विशेष्यत्वेनानुपस्थितापीत्यर्थः। गतादिस्था गतमित्यादिकृत्पदस्था। धात्वर्थान्वयमादाय तच्छाब्दबोधोपपादनं वैयाकरणानामसंगतमेव। कारकाणां धात्वर्थान्वयस्य क्वाप्यव्युत्पन्नत्वात्। नन्वेवम् "ओदनस्य पाकः, कृष्णस्य कृतिः" इत्यादौ क्व कारकान्वयः? न तावत् धात्वर्थे पाके। त्वयानङ्गीकारात्। नापि घञर्थे, तस्य लिङ्गान्वयित्वात्। लिङ्गान्वयिन्यामपि कृतावन्वये वस्तुपदाभिधेयायां कृतावप्यन्वयापत्तेरिति चेत् — 'पक्ता' इत्यादाविव 'पाकः' इत्यत्रापि कारकान्वयार्थं घञैव कृतिविशिष्टपाकस्याभिधानेन कृतौ कारकान्वयोपपत्तेः। यद्वा घञः शक्त्या पाकोऽर्थः, लक्षणया कृतिरर्थः। लक्ष्यार्थकृतौ कारकान्वयः। पाकानुकूलकृतिसाध्यः 'पाकः' इति बोधः।

अत्रैव मतान्तरम्

केचित्तु — "ओदनस्य पाकः" इत्यत्र घञः न कृतौ लक्षणा। तद्योगे षष्ठी च न कारकपरा। अपि तु शेषषष्ठ्येव। तादृशषष्ठ्यर्थसंबन्धस्यापि अध्याहृतास्तिपदार्थप्रधानक्रियायां स्वाश्रयपाककर्तृकत्वरूपपरंपरासंबन्धेनान्वयः। ओदनसंबन्धिपाककर्तृकं (पाकनिष्ठं) सत्ताश्रयत्वमिति बोधः। एवं "कृष्णस्य कृतिः" इत्यत्रापि शेषे षष्ठ्येव। न चैवं सति कृद्योगनिमित्तकषष्ठीविधिवैयर्थ्यमिति वाच्यम्। तस्य तृजादिकृद्विषयत्वेनाप्युपपत्तेः — इत्याहुः।

अतः सिद्धं कृद्योग एव कर्तृकर्मणोः षष्ठी न तु सार्थकतद्धितयोगे, कारकवाचितद्धितयोगे वेत्येतदर्थज्ञापकं कृद्ग्रहणमिति।

अत एव "कृतपूर्वी" इत्यत्र नित्यसापेक्षत्वात् कृत्प्रत्ययार्थेन अन्वयमङ्गीकृत्य "कृतपूर्वी कटः" इत्यस्याप्यापत्तिरपास्ता। उक्ततद्धितयोगे कारकाणां कृतावन्वयः इत्येवंविधज्ञापनसमभिव्याहृतकृद्योग एव षष्ठी, न तु तादृशतद्धितयोगेऽपीति।

पदवाक्यरत्नाकरे[१] कर्तृकर्मणोः कृतीति सूत्रार्थविचारः

कृदन्तधातुयोगेन भवेत् कर्तरि कर्मणि।
प्रधाने नियता षष्ठी गुणे तूभयथा मता।।

[१] प.वा.र.पृ. ८०७-८१४

"ओदनस्य पाकः, कृष्णस्य कृतिः" इत्यादौ कृदन्तधातुयोगे द्वितीयाया इव कर्तृत्वं कर्मत्वं च षष्ठ्याः अर्थः। द्विकर्मककृदन्तधातुयोगे तु प्रधानकर्मणि षष्ठ्येव, गुणकर्मणि तु द्वितीया षष्ठी च। "गुणकर्मणि वेष्यते"[१] इति वार्तिकात्। 'नेता अश्वस्य ग्रामं ग्रामस्य वा'। अनया कारिकया "कर्तृकर्मणोः कृति"[२] इति सूत्रं व्याख्यातम्।

कृतपूर्वी कटमिति वाक्यार्थः

नन्वत्र सूत्रे कृतीति व्यर्थम्। धातवो हि द्विविधाः तिङन्ताः कृदन्ताश्च। तत्र तिङन्तधातुयोगे कर्तरि कर्मणि च षष्ठ्याः "न लोकाव्ययनिष्ठाखलर्थतृनाम्"[३] इति सूत्रेण प्रतिषेधात् परिशेषतः कर्तृकर्मणोः इति सूत्रं कृदन्तधातुयोग एव प्रवर्तिष्यत इति कृद्ग्रहणस्यानावश्यकत्वादिति चेत् — न। "कृतपूर्वी कटम्" इत्यादौ तद्धितयोगे कर्मणि षष्ठीवारणाय कृतीत्यस्योपादानात्।

अथ पूर्वं कृतमनेनेति विग्रहे "सपूर्वाच्च"[४] इति सूत्रेण सोपपदात् पूर्वपदात् कर्तरि इनिः विधीयते। तत्र कृतपदस्य कटपदसमानाधिकरणत्वे समासरूपा वृत्तिरेवानुपपन्ना। "ऋद्धस्य राज्ञः पुरुषः' इत्यादाविव "सविशेषणानां वृत्तिर्न"[५] इति वार्तिकेन तन्निषेधात्। इदमुपलक्षणम् — पूर्वं समासे कृतेऽपि कटपदेन कृतपदस्य सामानाधिकरण्यमनुपपन्नमेव। "वृत्तस्य विशेषणयोगो न"[६] इति वार्तिकविशेषात्।

किं च सूत्रे कृतीत्यस्य वैयर्थ्यम्। निष्ठाभिहितकर्मणि अनभिहिताधिकारीय-षष्ठ्याः अप्रसक्तेः। 'कटम्' इति तदपवादेन द्वितीयाप्यनुपपन्ना। तस्या अप्यनभि-हिताधिकारीयत्वात् इति चेत् —

भट्टोजिमतखण्डनम्

अत्राह भट्टोजिः — कृतमिति भावार्थकक्तान्तमविवक्षितकर्मकमेव पूर्वशब्देन समासं प्राप्य कर्तरि तद्धितं जनयित्वा कृतपूर्वीति शब्दं साधयति। स च प्राक्कालिककरणकर्तेति बोधं जनयति। भावक्तान्तकृञ्-धात्वर्थकरणे कटकर्म-कत्वस्यान्वयः — इति।

---

[१] वा. ५०४२, सू. २.३.६५
[२] सू. २.३.६५
[३] सू. २.३.६९
[४] सू. ५.२.८७
[५] म.भा.vol.II. पृ. ३२०, सू. २.१.१
[६] म.भा.vol.II. पृ. ३२०, सू. २.१.१

तन्न। कर्मान्वयिनः कृञः भावप्रत्ययदौर्लभ्यात् अकर्मकधातोर्हि भावे प्रत्ययः अनुशिष्टः। अन्यथा कर्मान्वयिनोऽपि धातोः भावप्रत्ययस्य साधुत्वे भावप्रत्ययान्तगम्येऽर्थे ग्रामकर्मकत्वस्यान्वयसंभवेन "गतं ग्रामम्, गम्यते वा ग्रामम्" इति प्रयोगापत्तेः। अविवक्षितकर्मकत्वे कदापि कर्मान्वयस्यानुपपत्तेः, विवक्षितकर्मकत्वे च भावप्रत्ययस्यानुपपत्तेः। एतदुक्तं भवति — भावे क्तप्रत्ययदशायां कर्मणोऽविवक्षा, कृतपूर्वीति निष्पत्त्यनन्तरं तदेकदेशे कृतपदार्थे कटकर्मकर्मकत्वान्वय इति न संभवति। एकत्र प्रयोगे विवक्षायाः अविवक्षायाश्च विरोधात् इति।

कर्मप्रत्ययान्तकृतपदस्य पूर्वपदेन वृत्त्यभ्युपगमे तु कर्मणि षष्ठ्याः द्वितीयायाश्चासंभव एव वर्तते। उभयत्र अनभिहिते इत्यस्याधिकारात्।

किं च कृञोऽर्थे कर्मान्वयोपगमे कथं कृतीत्युपादानेन तत्र षष्ठीवारणम्? प्रत्युत कृदन्तयोगस्य कटेऽनपायात् षष्ठ्या एव प्रसक्तेः। अतो भट्टोजिनिर्वाहो न युक्तः।

भाट्टमतखण्डनम्

यदपि भाट्टैरुक्तम् — कारकाणां सर्वत्र प्रत्ययार्थभावनायामेवान्वयः, न तु धात्वर्थे, तस्याप्याख्यातार्थे विशेषणतया गुणत्वात्। "गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यात्" इति न्यायात्। कर्मणि भावे च विहिताः प्रत्ययाः तिङ् कृतश्च, अव्ययकृतः तद्धिताश्च भावनामभिदधति। अन्यथा कारकान्वयानुपपत्तेः। कारकाणां भावनान्वयित्वस्यैव व्युत्पत्तिसिद्धत्वात्। कर्मकर्त्रर्थककृतां तु शक्त्या लक्षणया वा भावनाबोधकत्वमिति "ग्रामं गतवान्" इत्यादौ कृदर्थभावनायां ग्रामकर्मकत्वस्येव "कृतपूर्वी कटम्" इत्यादौ कर्तृवाचकतद्धितेनिप्रत्ययार्थभावनायां कटकर्मकत्वस्यान्वयः। कृदर्थभावनाकर्मणः निष्ठया अभिधानेऽपि तद्धितार्थभावनाकर्मणोऽनभिधानात् न द्वितीयानुपपत्तिः। तथा च कृदुपात्ताया एव भावनायाः कर्मणि षष्ठी न तु तद्धितोपात्ताया इत्यावेदयितुं सूत्रे कृतीति निर्दिष्टम्। यदाह हरिः —

ततः क्रियावता कर्त्रा योगो भवति कर्मणाम्।
अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः।।
क्रिया संबध्यते तद्वत् कृतपूर्व्यादिषु स्थिता।

इति। क्रिया भावना। कर्त्रा योगः कर्त्रेकदेशभावनायामन्वयः। — इति। तदपि चिन्त्यम्। भावकृतां भावनाबोधकत्वस्य अनुभवविरुद्धत्वात्।

ननु भावकृतां भावनाबोधकत्वाभावे भावकृद्योगे "ओदनस्य पाकः" इत्यादौ भवतु नाम शेषे षष्ठ्येव। कृद्योगषष्ठी तु कर्तृकर्मार्थकृत्स्वेव भविष्यतीति चेत् — न। "उभयप्राप्तौ कर्मणि"[१] इत्यस्य निर्विषयकत्वापत्तेः। "आश्चर्यो गवां दोहोऽगोपेन" इत्यादौ दोहपदस्य भावकृदन्ततया तद्योगे कर्मणि गवि कर्तर्यगोपे च "कर्तृकर्मणोः कृति"[२] इति प्राप्तां षष्ठीं कर्मणि नियमयितुं हि तत् सूत्रम्। तत्र भावप्रत्ययान्तयोगे "कर्तृकर्मणोः कृति"[३] कर्ममात्रे शेषत्वविवक्षायां शेषषष्ठ्याः साधुत्वात् उभयत्र प्राप्त्याभवात् कस्य नियमनं तेन क्रियेत?

ननु करणादिकृत् = "करणाधिकरणयोश्च"[४] इत्यादिना विहितः ल्युडादिः "उभयप्राप्तौ कर्मणि"[५] इति सूत्रस्य विषयः। तत्र कृदर्थभावनायाः सत्त्वात् तत्रैव षष्ठ्यर्थकर्मत्वकर्तृत्वयोरन्वयसंभवात् कर्मणि षष्ठीनियमनमुक्तसूत्रस्य प्रयोजनम्।

वस्तुतस्तु करणादिकृतामपि भावनाबोधकत्वमनुभवविरुद्धमिति यद्यालोच्यते तदा "गुणानां च परार्थत्वात्" इति न्यायेन भावनायां कारकत्वेनान्विते धात्वर्थे इतरकारकाणामनन्वय इति निर्णीयते, न तु घञन्तेन प्रधानवदुपस्थापिते धात्वर्थे। एतदुक्तं भवति — 'पचति' इत्यादौ 'पाकं करोति' इत्यादिविवरणेन कर्मत्वेन धात्वर्थपाकस्य आख्यातार्थभावनायामन्वयात् गुणत्वम्, ओदनादिकर्मणा सह कर्मत्वेन साम्यं चेति तत्रैवौदनादिकर्मकत्वस्यानन्वय इति उक्तन्यायेन निश्चीयते। 'पाक' इत्यादौ घञन्ते तु धात्वर्थपाकस्य कर्मत्वेन प्रत्ययार्थभावनान्वयविरहात् गुणत्वाभावात् तत्रौदनादिकर्मणोऽन्वयो निराबाध इति नोक्तानुपपत्तिरिति इति चेत् — न।

इत्थम् "ओदनस्य पाकः" इत्यादौ भावकृदन्तार्थे षष्ठ्यर्थकर्मत्वान्वयस्योपपादनेऽपि "कृतपूर्वी कटम्" इत्यादौ न कोऽप्युपयोगः। तथा हि तत्र कृतपदार्थस्य तद्धितार्थभावनायामनन्वये सामर्थ्याभावात् समासानुपपत्तिः। अन्वये तु तेनैव तद्धितार्थभावनायाः कर्माकाङ्क्षायाः निवृत्तेः पुनः कटस्य तत्र कर्मत्वेनान्वयो न संभवति। एककर्मावरुद्धायां भावनायां कर्मान्तरान्वयस्यानाकाङ्क्षितत्वात्। अन्यथा एककर्मान्वितायामपि भावनायां कर्मान्तरान्वयस्योपगमे धात्वर्थान्तर्भूतकर्मकपतत्यर्थभावनायामपि कर्मान्वयप्रसङ्गात्। तथा च 'भूमिं पतति' इत्यस्यापि प्रामाण्यं स्यात्।

---

[१] सू. २.३.६६
[२] सू. २.३.६५
[३] सू. २.३.६५
[४] सू. ३.३.११७
[५] सू. २.३.६६

अथ कृतादिपदार्थपरित्यागेन "कृतपूर्वी" इत्यत्र तद्धितस्य प्राक्कालीनभावनावान् अर्थः। कृतपदं तात्पर्यग्राहकम्। एवं च तादृशभावनायां कटकर्मकत्वान्वये षष्ठ्याः प्रसक्तौ तां वारयितुं कृतीत्यस्योपादानम् इति चेत् — न।

तदा "पक्वपूर्वी सूपान्, अधीतपूर्वी वेदान्" इत्यादेः पर्यायताप्रसङ्गात्। तत्रापि पक्वादिपदार्थपरित्यागेन प्राक्कालिकभावनावत एव सूपादिकर्मकत्वानुपपत्त्या तद्धितार्थतायाः वक्तव्यत्वात्। न च पक्वादिपदसमभिव्याहृतेन तद्धितेन पाकादिभावनैव प्रतिपाद्यते अतो न पर्यायता। तदेकदेशपाकादौ षष्ठ्यर्थकर्मत्वान्वयवारणाय कृतीत्यस्योपादानम् इति न तद्वैयर्थ्यमिति वाच्यम्। एवं सति विग्रहावस्थायां समासावस्थायां च विवक्षितस्यापि निष्ठार्थस्य इनिप्रत्ययोत्पत्तौ तेनैव भावनायाः लाभात् निष्ठायाः निरर्थकत्वं युक्तम्, न तु धातोः तदर्थस्य केनापि अलाभात्। अतो धातोरर्थे धात्वर्थोपहिततद्धितार्थभावनायां वा कर्मान्वयः संभवतीति किं तद्धितानां पाकादिभावनावाचकतया नानार्थताभ्युपगमेन।

अत्रोच्यते —

क्रियाक्तायां भावनायामिनिः, क्तान्तो निरर्थकः।
सूत्रे कृतीत्युपादानसामर्थ्यादवसीयते।।

"कृतपूर्वी" इत्यादौ निष्ठायाः निरर्थकत्वोपगमेऽपि धातोः कृदन्तत्वमक्षतम् इति कृतीत्यस्योपादानेऽपि तत्र षष्ठीप्रसक्तिर्दुर्वारेति तदुपादानसामर्थ्यादेव क्तान्तं कृतादिपदं निरर्थकमिति ज्ञायते। इनिप्रत्ययस्य नानार्थकत्वमनन्यगतिकतया उपेक्ष्यते। प्रकरणादिबलादेव "कृतपूर्वी" इत्यत्र करणभावनावान् "पक्वपूर्वी" इत्यत्र पाकभावनावानिति तद्धितेन बोध्यते। तदेकदेशे पाके भावनायां वा ओदनकर्मकत्वस्य कृतौ भावनायां वा कटकर्मकत्वस्य विवक्षायां ओदनादिपदात् षष्ठीं वारयितुमेव सूत्रे कृतीति उपात्तम्। द्वितीया तु सामान्यतो विहिता भवत्येवेति "ओदनं पक्वपूर्वी, कटं कृतपूर्वी" इत्यादौ न कर्मणि षष्ठी किं तु द्वितीयैवेति।

क्रियाक्तायाम् — अनुकूलत्वसंबन्धेन पाकादिक्रियाविशिष्टायाम्। सप्तम्यर्थो वाचकत्वम् इनिप्रत्ययेनान्वेति। इनिप्रत्ययः पाकादिविशिष्टभावनावाचक इत्यर्थः।

तथा च "पक्वपूर्वी सूपान्" इत्यादौ पाकानुकूलभावनावानिनिप्रत्ययस्यैवार्थः। न तु पाककर्म, पाको वा क्तान्तस्यार्थः। पच्यादिपदजन्यपाकोपस्थितेः पाकानुकूलभावनावति तद्धितवृत्ति(शक्तिर्लक्षणा वा)ग्राहकतयैवोपयोगः।

यथा इदमेतदादिशब्दानां प्रत्यक्षविषयेषु शक्तेः "अयं देवदत्तः" इत्यादौ चक्षुस्संनिकर्षजन्यदेवदत्तप्रत्यक्षस्य यथेदंपदजन्यबोधे न साक्षाज्जनकत्वम्। किं तु

इदंपदशक्तिग्रहो देवदत्तप्रत्यक्षं विना न संभवतीति तादृशप्रत्यक्षस्य इदं पदशक्तिग्राहकतया तज्जन्यान्वयबोधप्रयोजकत्वम् तथेति।

यदि च पच्यर्थे कारकान्वयः स्यात् तदास्य पचेः कृदन्तत्वेन शेषषष्ठ्येव प्रवर्तेत। निष्ठापर्युदासेन षष्ठीवारणे कृतीत्युपादानमनर्थकमापद्यते। तदुपादान-सामर्थ्यमेव 'पक्वपूर्वी' इत्यादौ पक्वादिपदस्य निरर्थकत्वं ज्ञापयतीति सारम्।

विषयान्तरम्

कृद्योगे षष्ठीविधिरनित्यः। "धायैरामोदमुत्तमम्" इति भट्टिप्रयोगात् "तदर्हम्"[1] इति सूत्रनिर्देशाच्च। "तदर्हम्" इति सूत्रं तमर्हतीत्यर्थे वतिप्रत्ययविधायकम्। तत्र अर्हतीत्यर्ह इति कर्त्रर्थककृद्योगे तदिति द्वितीयान्तनिर्देशोऽनुपपन्न इति स एव कृद्योगषष्ठीविधेः अनित्यत्वं ज्ञापयतीति।

विभक्त्यर्थनिर्णये[2] कर्तृकर्मणोरिति सूत्रार्थविचारः

कृद्योगे षष्ठीं ज्ञापयति "कर्तृकर्मणोः कृति"[3] इति सूत्रम्। कृत्प्रत्यययोगे कर्तरि कर्मणि च षष्ठीविभक्तिर्भवतीत्यर्थकम्। "भवत आसिका शायिका वा, कृष्णस्य कृतिः" इत्यादौ षष्ठ्याः कर्तृत्वं तृतीयया इवार्थः तच्चासनशयनकरणेषु धात्वर्थेष्वन्वेति। "ओदनस्य पाकः जगतः सृष्टिः" इत्यादौ षष्ठ्याः कर्मत्वं द्वितीयाया इवार्थः। तच्च पाकसर्गादौ धात्वर्थेऽन्वेति।

ननु तिङो लादेशतया पर्युदासेऽर्थादेव कृद्योगलाभात् सूत्रे कृतीति व्यर्थमिति चेत् — न। "कृतपूर्वी कटम्" इत्यादौ तद्धितयोगे षष्ठीवारणार्थं तदुपादानात्।

कृतपूर्वी कटमिति वाक्यार्थविचारः

अथ पूर्वं कृतमनेनेति विग्रहे "सपूर्वाच्च"[4] इति सूत्रेण कर्तरि तद्धितेनिप्रत्ययो विधीयते। तत्र कृतपदस्य कटसामानाधिकरण्ये वृत्तिरेवानुपपन्ना। "ऋद्धस्य राजपुरुषः" इत्यादाविव "सविशेषणानां वृत्तिर्न, वृत्तस्य विशेषणयोगो न"[5] इति वार्तिकेन तन्निषेधात्। सूत्रे कृतीत्यस्यापि वैयर्थ्यम्। निष्ठाभिहिते कर्मणि षष्ठ्य-

---

[1] सू. ५.१.११७

[2] पृ. ४१८

[3] सू. २.३.६५

[4] सू. ५.२.८७

[5] म.भा. vol.II, पृ. ३२०, सू. २.१.१

प्रसक्तेः। षष्ठ्यपवादेन कटमिति द्वितीयाप्यनुपपन्ना। द्वितीयाषष्ठ्योः कारकार्थिकयोः अनभिहिताधिकारीयत्वादिति चेत् —

भाट्टमतखण्डनम्

अत्र भाट्टाः। कारकाणां सर्वत्र प्रत्ययार्थभावनायामेवान्वयः, न तु धात्वर्थे। "गुणानां च परार्थत्वादसंबन्धः समत्वात् स्यात्" इति न्यायात्। कर्मभावप्रत्ययाव्ययकृतोऽपि भावनामभिदधति, अन्यथा कारकान्वयानुपपत्तेः। कर्तृकृतां तु शक्त्या भक्त्या वा भावनाबोधकत्वमिति "ग्रामं गतवान्" इत्यादौ कृदर्थभावनायां ग्रामकर्मत्वस्येव "कृतपूर्वी कटम्" इत्यादौ कर्तृवाचकतद्धितेनिप्रत्ययार्थभावनायां कटकर्मकत्वस्यान्वयः। कृदर्थभावनाकर्मणः निष्ठयाभिधानेऽपि तद्धितार्थभावनाकर्मणोऽनभिधानान्न द्वितीयानुपपत्तिः। तथा च कृदुपात्ताया भावनायाः कर्मण्येव षष्ठी न तु तद्धितार्थभावनाया इत्यावेदयितुं सूत्रे कृतीति निर्दिष्टमिति। यदाह हरिः —

ततः क्रियावता कर्त्रा योगो भवति कर्मणाम्।
अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः।।
क्रिया संबध्यते तद्वत् कृतपूर्व्यादिषु स्थिता।

इति। कर्त्रा कर्तृसंज्ञकेन क्रिया भावना। तद्वता योगः तद्वदेकदेशभावनायामन्वयः। अविग्रहा प्रधानकारकान्वयिनीति तदर्थ इति वदन्ति।

तच्चिन्त्यम्। कृतशब्दार्थस्य करणकर्मणः तद्धितार्थभावनायामन्वये कटमिति द्वितीयान्तार्थस्यानन्वयापत्तेः। एककर्मावरुद्धायां कर्मान्तरान्वयस्यानाकाङ्क्षितत्वात्।

किं च भावनायामेव कारकान्वय इति न संभवति। "ओदनस्य पाकः" इत्यादौ षष्ठ्यर्थकर्मणोऽनन्वयप्रसङ्गात्। भावकृतां भावनाबोधकत्वविरहात्। तथात्वाभ्युपगमे तु कर्मकर्तृभावनाभ्यां कर्मकर्त्रोराक्षेपेऽनभिहिताधिकारीययोः कर्मकर्तृषष्ठ्योरनुपपत्तिप्रसङ्गात्।

न च "ओदनस्य पाकः चैत्रस्य पाकः" इत्यादौ शेषषष्ठीव कृद्योगषष्ठी कर्मकर्तृकृत्सु चोपेयत वाच्यम्। "उभयप्राप्तौ कर्मणि"[१] इति सूत्रस्य निर्विषयकत्वापत्तेः। न च करणादिकृत् तद्विषय इति वाच्यम्। करणादिकृतोऽपि भावनाबोधकत्वविरहात्। कर्तृकर्मणोरन्वयाप्रसक्त्या निर्विषयत्वतादवस्थ्यात्।

---

[१] सू. २.३.६६

यदि च गुणानां चेति न्यायेन भावनायां कारकत्वेनान्विते धात्वर्थे न कारकान्वय इत्येवाभ्युपेयते, न तु घञाद्यन्तेन प्रधानवदुपस्थापिते तस्मिन्निति, तदा भावकृदन्तार्थे षष्ठ्यर्थकारकान्वयः। तावता न नः कापि क्षतिः।

ननु "कृतपूर्वी कटम्" इत्यादौ कृतशब्दार्थस्य करणकर्मणस्तद्धितार्थ-भावनायामनन्वयेऽसामर्थ्यात् वृत्त्यनुपपत्तिः। अन्वये तु तेनैव कर्माकाङ्क्षाशान्तेः कटादेः कर्मतया तत्रान्वयासंभवः। सूत्रे कृतीति व्यर्थम्, षष्ठ्यप्रसक्तेः कर्मणः अभिधानात्। अत्रापि "कटम्" इति द्वितीयानुपपत्तिरिति चेत् —

शाब्दिकमतानुवादः

अत्र शाब्दिकाः। "कृतम्" इति भावक्तान्तमविवक्षितकर्मकं पूर्वशब्देन समासमासाद्य कर्तृतद्धितस्य प्रकृतिर्भवतीति कृतपूर्वीशब्दः सिद्धः प्राक्कालिक-करणकर्तेति शाब्दबोधमर्जयति। तत्र भावक्तान्तकृञर्थे घटकर्मत्वस्यान्वय इति वदन्ति।

तत्खण्डनम्

अत्र गुरुचरणाः। भावक्तान्ते कर्मान्वयो न युज्यते। अविवक्षितकर्मण एव भावप्रत्ययात्। अन्यथा "गतं गम्यते वा" इत्यादौ भावप्रत्ययान्ते "ग्रामम्" इति द्वितीयान्तार्थस्य ग्रामकर्मकत्वस्यान्वयप्रसङ्गात्। कर्मणो विवक्षायां भावप्रत्ययस्य (अ)विवक्षायां कर्मान्वयस्यानुत्पन्नत्वात्।

किं च "कृतपूर्वी" इत्यत्र कृञर्थे कर्मान्वयोपगमे "कृति" इत्यनेन कथं कर्मषष्ठीवारणम्। निष्ठापर्युदासानुसरणे तु किं "कृति" इत्युपादानेन।

तस्मात् "कृतपूर्वी" इत्यत्र कृतादिपदार्थपरित्यागेन तद्धितस्य प्राक्कालिक-भावनावानर्थः। यदि च "पक्वपूर्वी सूपान्, अधीतपूर्वी वेदान्" इत्यादेः पर्यायत्वमाशङ्क्यते तदा पाकादिभावनावानेव तद्धितार्थः। तद्धितार्थैकदेशे पाकादौ षष्ठ्यर्थकर्मत्वान्वयवारणाय सूत्रे कृतीत्युपादानम्।

ननु विग्रहे समासे च विवक्षितस्यापि निष्ठार्थस्य कर्तृतद्धितोत्पत्तौ सत्यां निष्ठाया अविवक्षया निरर्थकत्वं युज्यते न तु धातोः। अतो धात्वर्थे तदुपहित-तद्धितार्थभावनायां वा कर्मान्वयः संभवति। तावतैव कृतीत्युपादानसार्थक्यम्। किं तद्धितानां पाकादिनानाभावनावदर्थकतया नानार्थाभ्युपगमेनेति चेत् —

मैवम्। यतो निष्ठाया निरर्थकत्वाभ्युपगमेऽपि धातोः कृदन्तत्वमक्षतमिति षष्ठीप्रसक्तेर्दुर्वारतया सूत्रे कृतीत्युपादानमनर्थकमिति कृतीत्युपादानसामर्थ्यादेव

क्तान्तं निरर्थकमवसीयत इति तद्धितेनिप्रत्ययस्य नानार्थकत्वमनन्यगतिकतयाभ्युपेयते।

क्तान्तं तु प्रकरणादिवत् तत्तद्भावनावन्तमुपस्थापयति। "पक्वपूर्वी" इत्यत्र पाकानुकूलभावनावान् "कृतपूर्वी" इत्यत्र करणानुकूलभावनावान् प्रतीयते। तत्र तद्धितार्थैकदेशे पाके भावनायां वा ओदनकर्मकत्वस्य करणे भावनायां वा कटकर्मकत्वस्य विवक्षायाम् ओदनपदात् कटपदाच्च षष्ठीं वारयति सूत्रे कृतीति। द्वितीया तु सामान्यतो विहिता भवत्येवेति "पक्वपूर्वी ओदनं, कृतपूर्वी कटम्" इत्यादौ कर्मणि न षष्ठी, किं तु द्वितीयैवेति पदवाक्यरत्नाकरे प्राहुः।

शाब्दिकनव्यास्तु

कृतं पूर्वमनेनेति विग्रहे अविवक्षितकर्मतया भावे क्तप्रत्यये कृते कर्मसापेक्षत्वाभावात् समासतद्धितौ भवत एव। तथा च कृतपूर्वीति अयं पूर्वं कृतवानित्यनेन समानार्थकः संपद्यते। तद्धिते सति वृत्तिभेदात् कर्मविवक्षायां गुणभूतयापि क्रियया कारकाणां संबन्धस्य "कटं कृतवान्" इत्यादौ दर्शनात् अत्रापि कटकर्मत्वान्वयः। तत्र कर्मणि षष्ठीवारणाय सूत्रे कृतीत्युक्तम्। न च क्तस्य कृत्त्वात् कृदुपादानेऽपि षष्ठीप्रसक्तिर्दुर्वारेति वाच्यम्। सूत्रे कृत्पदस्य प्रत्ययान्तराप्रकृतिभूतस्यैवोपादानात् कृतपूर्वशब्दस्य तद्धितप्रकृतितया क्तान्तकृतशब्दस्य तद्धितप्रकृतित्वात् (तद्धितप्रकृत्यन्तर्भूतत्वात्) "तण्डुलस्य पाचकतम" इत्यादौ षष्ठ्या असाधुत्वमिष्टमेव। अत एव "तण्डुलं पाचकतम" इत्यदिप्रयोगं साधुं कालापा मन्यन्त इत्याहुः।

तत्खण्डनम्

तच्चिन्त्यम्। विग्रहवाक्येऽविवक्षितकर्मकस्य वृत्तिवाक्ये सकर्मकतया अदृष्टचरत्वात्। अन्यथा 'शोभनं पचनमत्र' इति विग्रहेऽविवक्षितकर्मतया भावे ल्युट्प्रत्यये पचनशब्दस्य समासतद्धितयोः कर्मविवक्षायां "तण्डुलं शोभनपचनवद्गृहम्" इति प्रयोगापत्तिः।

यदपि प्रत्ययान्तराप्रकृतित्वं कृतो विशेषणं, तदपि न सुन्दरम्। "तण्डुलं पाकतरः, तण्डुलं पाकवद्गृहम्" इति प्रयोगापत्तेश्च।

वस्तुतस्तु भावप्रत्ययमात्रस्याकर्मकेभ्यो न विधानम्; "ओदनस्य भुक्तं तण्डुलस्य पाकः" इत्यादौ षष्ठ्यर्थकर्मत्वस्यानन्वयप्रसङ्गात्। किं तु भावे लकारस्यैव। "लः कर्मणि च भावे चाकर्मकेभ्यः"[१] इत्यनुशासनेन तद्विधावकर्मकेभ्य इत्युपादानात्।

न चैवम् "ओदनं भुक्तं, तण्डुलं पाकः" इत्यादिकः कर्मद्वितीयासमभिव्याहृतः प्रयोगः स्यादिति वाच्यम्। कृति षष्ठ्या द्वितीयापवादात्। एतदर्थमेव सूत्रे कृतीत्युपादानम्। अन्यथा सामान्यतः कर्मणि द्वितीयाषष्ठ्योरुभयोर्विधाने वैकल्पिकतापत्तेः।

नन्वेवं "कृतपूर्वी कटम्" इत्यादौ निष्ठास्वरूपकृद्योगस्यावैकल्यात् कर्मणि षष्ठीप्रसङ्गः द्वितीयापवादप्रसङ्गश्च। न च न लोकेति सूत्रेण निष्ठायोगे षष्ठीनिषेधान्नैवमिति वाच्यम्। "क्तस्य च वर्तमाने नपुंसके भावे उपसंख्यानम्"[२] इति वार्तिकेन भावे क्तयोगे षष्ठीप्रतिप्रसवादिति चेत् —

मैवम्। सूत्रे कृतीत्यत्र कृत्पदस्य विशेषपरत्वात्। तथा हि कृत्प्रकृतिकत्वेन विहितस्य प्रत्ययस्य प्रकृतिभूतो यः कृत् तद्योग एव कर्तृकर्मणोः षष्ठीविधानम्। "सपूर्वाच्च"[३] इति सूत्रेणेनिप्रत्ययविधाने पूर्वशब्दस्य सपूर्वकत्वं क्तान्तशब्दपूर्वकत्वमेव। अन्यथा कुड्यपूर्वीत्यादिप्रयोगापत्तेः। क्तान्तपूर्वकपूर्वशब्दप्रकृतिकत्वेन विहितस्येनिप्रत्ययस्य विशिष्टप्रकृतिकतया विशेषणक्तान्तप्रकृतिकत्वेनापि विधानमिति इनिप्रकृतिभूतक्तान्तकृच्छब्दस्य विवक्षितकृत्त्वविरहात् तद्योगे तु न षष्ठीप्रसक्तिः। द्वितीया तु सामान्यतो विहिता भवत्येवेति नानुपपत्तिः।

इत्थं च "तण्डुलस्य पाचकतरः, तण्डुलस्य पाकवान्" इत्यादौ ण्वुल्घञादेर्विवक्षितकृत्त्ववत्त्वात् तद्योगे कर्मषष्ठ्या नानुपपत्तिः। तरब्मतुबादेः कृत्प्रकृतिकत्वेनाविधानात् अतिशायनसंबन्धाद्यर्थे विहितस्य तस्य गुणवत्तरः "सौन्दर्यवान् पुरुषः, कपोति गृहम्" इत्यादौ तद्धितप्रकृतिकत्वेन दर्शनात्।

अत एव "कर्तुरीप्सिततमं कर्म"[४] इत्यत्र कर्तरि षष्ठीनिर्देशः। अन्यथा तमप्प्रकृतिक्तान्तयोगे कर्तरि तृतीयाया एव निर्देशः स्यादिति।

एवम् "इष्टी सुरान्" इत्यादौ क्तान्तप्रकृतिकत्वेनेनेर्विधानात् क्तस्य विवक्षितकृत्त्वविरहात् तद्योगे कर्मणि न षष्ठी, किं तु द्वितीया सप्तमी च। अत एव "ग्रामं

---

[१] सू. ३.४.६९
[२] वा. १५१४
[३] सू. ५.२.८७
[४] सू. १.४.४९

गतवान्" इत्यादौ कृदर्थभावनायां ग्रामकर्मत्वस्येव "कृतपूर्वी कटम्" इत्यादौ तद्धितार्थभावनायां कटकर्मकत्वस्यान्वयः। तत्र निष्ठादिभिन्नकृदर्थभावनायां षष्ठ्यर्थकर्मत्वस्यान्वयो न तु तद्धितार्थभावनायामित्यावेदयितुं सूत्रे कृतीत्युपादानमिति भाट्टमतेन कृतीति समर्थनमित्यपि न युक्तम्। भाट्टमतेऽपि भाव्यसंस्कार्याभ्यामतिरिक्तस्य भावनाकर्मत्वविरहात्। "ग्रामं गतः" इत्यादौ गमनभावनायां ग्रामकर्मकत्वाभावात् "ग्रामम्" इति द्वितीयान्तार्थः ग्रामसंबन्धः गमने तद्भावनायां वान्वेतीत्यस्य द्वितीयाविवरणे "सक्तून् जुहोति" इत्यत्रोक्तत्वात्। भाव्यस्यापि कटस्य तद्धितार्थभावनायां नान्वयः। द्वितीयार्थकर्मत्वान्वयस्य तिङर्थे कृदर्थे वा भावनायां व्युत्पन्नत्वात्। तद्धितार्थे व्युत्पत्तिविरहात्। अन्यथा "नावा तरति" इति विग्रहव्युत्पन्ननाविकशब्दयोगे द्वितीयापत्त्या नदीनाविक इति प्रयोगप्रसङ्गात्।

न च तद्धितार्थभावनायां द्वितीयार्थस्य कर्मत्वस्यान्वये धातुसमभिव्याहारस्तन्त्रमिति "कृतपूर्वी कटम्" इत्यत्र कृत्समभिव्याहारस्य तथात्वात् द्वितीयार्थकर्मत्वस्यान्वयः। "नाविकः" इत्यत्र धातुसमभिव्याहारविरहान्नान्वय इति वाच्यम्। तथापि "शीर्षहारेण हारेण वा हरति" इति विग्रहव्युत्पन्नस्य शीर्षहारिकशब्दस्य हारिकशब्दस्य वा योगे द्वितीयापत्त्या भारं शीर्षहारिको हारिको वेति प्रयोगप्रसङ्गात्। धातुसमभिव्याहारस्यात्र सत्त्वात्। "भस्त्रादिभ्यष्ठन्"[1] इति सूत्रेण ठन्विधानात् शीर्षहारिकहारिकयोः सिद्धशीर्षहारहारशब्दयोः भस्त्रादिगणे पाठादित्यलं विस्तरेण।

उभयप्राप्तौ कर्मणि[2] इति सूत्रार्थः

उभयप्राप्ताविति बहुव्रीहिः। कृतीति विशेष्यमनुवर्तते। उभयोः प्राप्तिः यस्मिन् कृति तत्र कमण्येव षष्ठी स्यात्। एकस्मिन् कृति सति उभयोः कर्तृकर्मणोः षष्ठीप्रसक्तौ कर्मण्येव षष्ठी स्यात् न तु कर्तरीति यावत्। "आश्चर्यो गवां दोहोऽगोपेन"। अगोपकर्तृकः गोकर्मको यो दोहः सोऽद्भुत इत्यर्थः।

स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः[3]

स्त्रियां क्तिन् इत्यधिकारे विहितयोः अकाकारप्रत्यययोः कृतोः प्रयोगे कर्मण्येवेत्युक्तनियमो नास्तीत्यर्थः। कर्तर्यपि षष्ठी भवतीति फलितम्। "भेदिका बिभित्सा वा रुद्रस्य जगतः"। रुद्रकर्तृकं जगत्कर्मकं भेदनं भेदनेच्छा वा इत्यर्थः।

[1] सू. ४.४.१६
[2] सू. २.३.६६
[3] वा. १५१३

भेदिका — धात्वर्थनिर्देशे भिदधातोः ण्वुल्। अकादेशः टाप्। प्रत्ययस्थात् इति इत्वम्। बिभित्सा भिदेः सन्नन्तात् 'अ प्रत्ययात्' इति अकारप्रत्ययः।

शेषे विभाषा[1]

अकाकारप्रत्ययव्यतिरिक्तप्रत्यययोगे उभयप्राप्तौ इति नियमो विकल्प्यत इत्यर्थः। उक्तविकल्पः स्त्रीप्रत्यययोगे सत्येव भवतीति एके मन्यन्ते। "विचित्रा-जगतः कृतिः हरेः हरिणा वा"। हरिकर्तृका जगत्कर्मिका कृतिः सृष्टिः इत्यर्थः। केचिदविशेषेण विभाषामिच्छन्ति। अकाकारभिन्ने स्त्रीप्रत्यये अस्त्रीप्रत्ययस्य च कृति प्रयुज्यमाने उक्तविकल्प इत्यर्थः। शब्दानामनुशासनमाचार्येण — आचार्यस्य वा । आचार्यकर्तृकं शब्दकर्मकमनुशासनम्। अनुशासनमसाधुभ्यो विवेचनम्।

पदवाक्यरत्नाकरे[2] उभयप्राप्ताविति सूत्रव्याख्यानम्

कर्मण्येवोभयप्राप्तौ, तृतीया कर्तरीदृशी।
व्यवस्था प्रायिकी तेन क्वचित् षष्ठ्यपि कर्तरि।।

पूर्वसूत्रेणैव कर्मणि षष्ठ्याः संभवे कर्तृकर्मणोरुभयोरेव षष्ठीप्राप्तौ कर्मण्येव षष्ठी न तु कर्तरीति नियमार्थं सूत्रम्। अनुक्ते कर्तरि तृतीयाया विधानात् भावप्रत्य-यान्तदोहादिपदसमभिव्याहारे कर्तुरनभिहितत्वात् 'अगोपेन' इति कर्तृवाचकपदात् तृतीयैव। ईदृशी व्यवस्था — कर्तृकर्मणोरुभयोः समभिव्याहारे कर्मणः षष्ठी कर्तुस्तृतीयेति व्यवस्था प्रायिकी न तु सर्वत्र। तेन "आश्चर्यो गवां दोहोऽगोपेन" इत्यादौ कर्तरि तृतीयावत् षष्ठ्यपि प्रमाणम्। शब्दानामनुशासनमाचार्यस्येति निर्देशात्। अत्र कर्तृकर्मणोरुभयोः षष्ठ्येव साधुः। "भेदिका रुद्रस्य जगतो बिभित्सा वा" इत्यत्र रुद्रकर्तृको जगत्कर्मको भेदो भेदाभिलाषश्च वाक्यार्थः।

विभक्त्यर्थनिर्णये[3] उभयप्राप्ताविति सूत्रव्याख्यानम्

कर्मणि षष्ठीं नियमयति "उभयप्राप्तौ कर्मणि"[4] इति सूत्रम्। उभयप्राप्तिरिति बहुव्रीहिः। उभयोः कर्तृकर्मणोः प्राप्तिर्यस्मिन् कृति सोऽयमुभयप्राप्तिः। तत्र कर्मण्येव षष्ठी भवतीत्यर्थः। पूर्वसूत्रेण षष्ठ्यां सिद्धायां पुनः कर्मणि षष्ठीविधानं नियमार्थम्। नियमस्तु कर्मणि षष्ठी न तु कर्तरीत्याकारकः। "आश्चर्यो गवां

---

[1] वा. १५१३, सू. २.३.६६/६२४
[2] पृ. २१५-२१६
[3] पृ. ४२५
[4] सू. २.३.६६

दोहोऽशिक्षितेन गोपेन" इत्यादौ षष्ठ्याः कर्मत्वं तृतीयायाः कर्तृत्वमर्थो दोहेऽन्वेति। यद्यत्र न कर्मषष्ठीप्रयोगस्तदा कर्तृषष्ठी साधुरेव। उभयप्राप्तावित्यनेनं उभयषष्ठी कर्तरि षष्ठी न साधुरिति ज्ञाप्यते। तेन "नलस्य पाको भीमस्य पाकः" इत्यादिप्रयोगाणां नानुपपत्तिः। गोपस्य दोह इत्यादिप्रयोगोऽपीष्ट एव।

अकाकारयोः स्त्रीप्रत्यययोः प्रयोगे न शेषे विभाषेति वक्तव्यमिति वार्तिकं स्त्रीप्रत्ययेऽकप्रत्ययान्ते अकारप्रत्ययान्ते च न कर्तर्यपि षष्ठीनिषेधः। शेषे उक्तोभयप्रत्ययान्तभिन्ने स्त्रीप्रत्यये कर्तरि विभाषा षष्ठी भवतीत्यर्थकम्। तेन ण्वुल्प्रत्ययान्ते स्त्रीप्रत्ययान्ते कर्तृकर्मणोरुभयोः षष्ठी यथा "रुद्रस्य भेदिका जगतः"। रुद्रकर्तृकं जगत्कर्मकं भेदनं वाक्यार्थः। भावे ण्वुल्विधानात् भेदनमर्थः। अकारप्रत्ययान्ते स्त्रीप्रत्ययान्ते तदुभयोः षष्ठी यथा "रुद्रस्य बिभित्सा जगतः" इत्यादौ रुद्रकर्तृका जगत्कर्मकभेदनेच्छा वाक्यार्थः। "अ प्रत्ययात्"[१] इत्यनेन भावेऽकारविधानात् भेदनेच्छा अर्थः। एवं "भेदिका देवदत्तस्य काष्ठानां, चिकीर्षा यज्ञदत्तस्य कटस्य" इत्यादौ दर्शितरीत्या वाक्यार्थो बोध्यः।

शेषे कर्तरि विभाषा षष्ठी यथा विचित्रा सूत्रस्य कृतिः पाणिनेः पाणिनिना वेत्यादौ। अत्र सूत्रपदोत्तरषष्ठ्याः कर्मत्वमर्थः। पाणिनिपदोत्तरषष्ठीतृतीययोः कर्मत्वमर्थः कृतावन्वेति। पाणिनिकर्तृकसूत्रकर्मककृतिर्वाक्यार्थः।

काशिकावृत्तौ "सुट्तिथोः"[२] इति सूत्रव्याख्याने — "सीयुटो लिङ्वागमी, तेन भिन्नविषयत्वात् सुटा बाधो न भवति" इत्युक्तम्। तत्र बाधशब्दः पुमानेव। यदि बाधशब्दः स्त्रीप्रत्ययान्तस्तदा सीयुट इति शेषे षष्ठी। लिङ्गागमिनोऽन्वयानुरोधात्। षष्ठ्यर्थसंबन्धस्यानुषङ्गेण बाधायामन्वयः। तत्र सुट्हेतुकत्वाभावः प्रतीयते। कर्तुः आकाङ्क्षायाः अनिवृत्तेः।

केचित् अविशेषेण विभाषामिच्छन्ति। अविशेषेण स्त्रीप्रत्ययाकाकारप्रत्यययोर्विवक्षां विनेत्यर्थः। विभाषामित्यत्र कर्तरि षष्ठ्या इत्यादि। यथा "शब्दानामनुशासनम् आचार्येणाचार्यस्य वा" इत्यादौ शब्दशब्दोत्तरषष्ठ्याः कर्मत्वमाचार्यपदोत्तरतृतीयाषष्ठ्योः कर्तृत्वमर्थोऽनुशासनेऽन्वेति।

'गुणकर्मणि वेष्यते'[३] इतीष्ट्या "नेता अश्वस्य सुघ्नस्य सुघ्नं वा" इत्यादौ सुघ्नादौ गुणकर्मणि वैकल्पिकीं षष्ठीं शाब्दिका उदाहरन्ति। तत्रेयमिष्टिर्न युज्यते,

---

[१] सू. ३.३.१०२

[२] सू. ३.४.१०७, काशिका.vol.III, पृ. २३४

[३] वा. ५०४२, सू. २.३.६५/६२३ परिशिष्ट कैयटाद्युक्तः

"गवां दोहः" इत्यादौ गुणकर्मणि गवादौ द्वितीयाया अप्रयोगात्। यदि युज्यते तदा नयत्यादिगणगुणकर्मण्येवेति।

भाट्टरहस्ये[१] उभयप्राप्ताविति सूत्रव्याख्यानम्

एवम् "उभयप्राप्तौ कर्मणि"[२] इति सूत्रात् यस्मिन् कृति उभयोः कर्तृकर्मणोः षष्ठ्याः प्राप्तिः, तद्योगे कर्मण्येव षष्ठी स्यात्, कर्तरि तु तृतीयैवेत्यर्थकात् "आश्चर्यो गवां दोहोऽगोपेन" इत्यादौ कर्तरि न षष्ठी। अत्र दोह इत्ययं भावे कृत्। स च सकर्मकाकर्मकधातुसाधारणः, न तु लकारनिष्ठादिवदकर्मकधातुपरः एवेति तत्रोभयप्राप्तिः। अत्रापि घञर्थकृतौ कारकान्वयः "ओदनस्य पाकः" इत्यत्र पूर्वोक्तरीत्यनुसारेण बोध्यः।

अयं चोभयप्राप्तौ कर्तरि षष्ठ्याः निषेधः अकप्रत्ययअकारप्रत्ययरूपयोः स्त्रीप्रत्यययोर्योगे न भवति इति वार्तिकात् अवगम्यते। "भेदिका बिभित्सा वा रुद्रस्य जगतः"। भेदिका — भेदनम्। भावे अकः। बिभित्सेत्यत्र भावे अकारः। या तु "सुटा यासुटो बाधा न" इति काशिका तस्यां सुटेति करणत्वे तृतीया। उभयविधप्रत्यभिन्नकृति उभयप्राप्तौ तु विकल्पः कर्तरि। "शेषे विभाषा"[३] इति वचनात्। "शोभना व्याकरणस्य कृतिः पाणिनेः पाणिनिना वा"। स्त्रीप्रत्ययविषयमेवेदम्। केचित् अविशेषेण विकल्पमिच्छन्ति — "शब्दानामनुशासनमाचार्यस्य आचार्येण वा"। तन्मते "आश्चर्यो गवां दोहोऽगोपेन", 'अगोपस्य' इत्यपि भवतीति ध्येयम्।

क्तस्य च वर्तमाने[४] इति सूत्रव्याख्यानम्

वर्तमानार्थकस्य क्तस्य योगे षष्ठी स्यात्। "न लोक०"[५] इति निषेधस्यापवादः। "राज्ञां मतो बुद्धः पूजितो वा"। मनुधातोः बुधधातोः पूजधातोश्च "मतिबुद्धिपूजार्थेभ्यश्च"[६] इति सूत्रेण वर्तमाने क्तप्रत्ययः। तत्र मतिरिच्छा। बुद्धेः पृथग्ग्रहणात्। राजकर्तृकवर्तमानेच्छाविषयः राजकर्तृकवर्तमानज्ञानविषयः राजकर्तृकवर्तमानपूजाश्रयः इति क्रमेण बोधः।

---

[१] पृ..१५०

[२] सू. २.३.६६

[३] वा. १५१३, सू. २.३.६६/६२४

[४] सू. २.३.६७

[५] सू. २.३.६९

[६] सू. ३.२.१८८

"पूजितो यः सुरासुरैः" "त्वया ज्ञातो घटः" इत्यत्र तु भूते क्तप्रत्ययो बोध्यः। न च "मतिबुद्धि०" इत्यनेन भूतक्तस्य बाधः शङ्क्यः। "तेन"[१] इत्यधिकारे 'उपज्ञातः'[२] इति लिङगात् तदबाधज्ञापनादित्याहुः।

विभक्त्यर्थनिर्णये[३]

निष्ठायोगे निषेधस्यापवादार्थं षष्ठीं ज्ञापयति "क्तस्य च वर्तमाने"[४] इति सूत्रम्। वर्तमानकालार्थकस्य क्तस्य योगे षष्ठी भवतीत्यर्थकम्। "मतिबुद्धिपूजार्थेभ्यश्च"[५] इति सूत्रेण वर्तमानधात्वर्थकर्मणि क्तस्य विधानात् वर्तमानार्थत्वमुक्तम् — "राज्ञा मतो बुद्धः पूजितो वा" इत्यादौ। मतिरिच्छा बुद्धिर्ज्ञानं, क्तस्य विषयः धात्वर्थ-फलस्य विषयत्वस्याश्रयो वार्थः। पूजा प्रीणनं प्रीत्यनुकूलो व्यापारः। क्तस्य समवाय्यर्थः। षष्ठ्या मत्याद्यन्वयि कर्तृत्वमर्थः। तथा च राजकर्तृकाया मतेर्बुद्धेर्वा विषयो विषयत्वाश्रयो वा राजकर्तृकव्यापारप्रयोज्यप्रीतिसमवायी च वाक्यार्थः।

"क्तस्य च वर्तमाने नपुंसके भाव उपसंख्यानम्"[६] इति वार्तिकं "नपुंसके भावे क्तः"[७] इति सूत्रेण विहितस्य क्तस्य योगे कर्तृकर्मणोः षष्ठी भवतीत्यर्थकम्। तेन "कृष्णस्य शयितं छात्रस्य हसितं चैत्रस्य गमनम्" इत्यादौ षष्ठ्याः कर्तृत्वमर्थः शयनादौ भावे क्तार्थेऽन्वेति। "शास्त्रस्याधीतं, शब्दानित्यताया मतम्, ओदनस्य भुक्तं, ग्रामस्य गतम्" इत्यादौ षष्ठ्याः कर्मत्वमर्थः क्तार्थेऽध्ययनादौ भावेऽन्वेति। शास्त्रकर्मकमध्ययनमित्यादिर्वाक्यार्थः।

भाट्टरहस्ये[८]

एवं "क्तस्य च वर्तमाने"[९] इति सूत्रात् वर्तमानार्थकक्तस्य योगे षष्ठी स्यात् इत्यर्थकात् "राज्ञां मतो बुद्धः पूजितो वा" इत्यत्र षष्ठी। अत्र "मतिबुद्धि-पूजार्थेभ्यश्च"[१०] इत्यनेन वर्तमाने क्तः, तद्योगात् 'राज्ञाम्' इति कर्तरि षष्ठी। कर्मणः क्तप्रत्ययेनाभिहितत्वात्। "राज्ञो मतम्" इत्येवं नपुंसके भावे चानेनैव सूत्रेण षष्ठी।

---

[१] सू. ४.३.११२
[२] सू. ४.३.११५
[३] पृ. ४२७
[४] सू. २.३.६७
[५] सू. ३.२.१८८
[६] वा. १५१४, सू. २.३.६७
[७] सू. ३.३.११४
[८] पृ. १५२
[९] सू. २.३.३७
[१०] सू. ३.२.११८

न च "कर्तृकर्मणोः कृति"[१] इत्यनेनैव गतार्थत्वात् सूत्रमिदं व्यर्थमिति वाच्यम्। "न लोकाव्ययनिष्ठ०"[२] इति वक्ष्यमाणसूत्रेण निष्ठासामान्यविषये पर्युदस्तायाः षष्ठ्याः निष्ठाविशेषे क्तप्रत्यये प्रतिप्रसवार्थत्वात्।

न चैवं "पूजितो यः सुरासुरैः" इति तृतीयानुपपत्तिरिति वाच्यम्। तत्रत्यक्तप्रत्ययस्य भूतार्थकत्वेनोपपत्तेः। न हि मतिबुद्धिपूजार्थेभ्यो वर्तमाने एव क्त इति नियमः। अतीतार्थे धात्वर्थे उक्तधातूनां क्तान्तानां लोके प्रयोगदर्शनेन तत्सूत्रस्य भूतार्थकक्तप्रत्ययबाधकत्वायोगात्।

न चैवं वर्तमानार्थकमत्यादिधातूत्तरक्तप्रत्ययभिन्नप्रत्यययोगे "छात्रस्य हसितम" इत्यादौ षष्ठ्यनापत्तिः इति वाच्यम्। तस्याः शेषषष्ठीत्वेनोपपत्तेः। अत एव तत्र कर्तृत्वत्वेन कर्तृत्वविवक्षायां तृतीयैव।

अधिकरणवाचिनश्च[३] इति सूत्रार्थः

अधिकरणवाचकस्य क्तस्य योगे षष्ठी स्यात्। "इदमेषामासितं शयितं गतं भुक्तं वा"। एषामिति कर्तरि षष्ठी। 'आस्तेऽस्मिन् इति आसितं, शेतेऽस्मिन्निति शयितम्'। "न लोक०"[४] इति षष्ठीनिषेधस्यापवादभूतमिदं सूत्रम्। अत्र सर्वत्र अधिकरणे क्तप्रत्ययः। इदमेषां भुक्तमोदनस्य इत्यत्र तु कर्तृकर्मणोर्द्वयोरपि षष्ठी। उभयप्राप्तौ इति नियमस्तु न प्रवर्तते। मध्येऽपवादन्यायेन "कर्तृकर्मणोः कृति"[५] इति षष्ठ्या एव तन्नियमाभ्युपगमात्।

विभक्त्यर्थनिर्णये[६]

कर्मविषयषष्ठ्या निष्ठायां निषेधोऽप्रामाणिक एवेत्युक्तम्। पुनरपवादार्थं षष्ठीं ज्ञापयति "अधिकरणवाचिनश्च"[७] इति सूत्रम्। अधिकरणार्थकस्य क्तस्य योगे कर्तृकर्मणोः षष्ठी भवतीत्यर्थकम्। "क्तोऽधिकरणे च"[८] इति. सूत्रेण विधानात् क्तस्याधिकरणवाचित्वमुक्तम्। "इदमेषामासितं शयितं वा" इत्यादौ षष्ठ्याः कर्तृत्वमर्थः शयनादौ धात्वर्थेऽन्वेति। क्तस्याधिकरणमर्थः। तथा चेदंकर्तृकशय-

---

[१] सू. २.३.६५
[२] सू. २.३.६९
[३] सू. २.३.६८
[४] सू. २.३.६९
[५] सू. २.३.६५
[६] पृ. ४२८
[७] सू. २.३.६८
[८] सू. ३.४.६७

नाधिकरणाभिन्नमिदमित्यादिः बोधः। "इदमेषामोदनस्य भुक्तं ग्रामस्य यातं वा" इत्यादौ इदंपदोत्तरषष्ठ्याः कर्तृत्वम् ओदनग्रामपदोत्तरयोः षष्ठ्योः कर्मत्वमर्थः। तथा चेदंकर्तृताकौदनकर्मताकभोजनाधिकरणाभिन्नमिदमित्यादिरन्वयबोधः।

भाट्टरहस्ये[१]

भूतार्थकक्तप्रत्ययस्यापि अधिकरणवाचित्वे पूर्ववत् षष्ठीप्रतिप्रसवः "अधिकरणवाचिनश्च"[२] इति सूत्रात्। तत्रापि अकर्मकेभ्यः कर्तर्येव षष्ठी इदमेषां शयितमिति। शयितं शयनाधिकरणम्। क्तप्रत्ययेनोक्तत्वात् इदमिति प्रथमा। सकर्मकेभ्यस्तु अधिकरणे क्तप्रत्यये कृते कर्तृकर्मणोर्द्वयोरपि षष्ठी। अनभिहितत्वाविशेषात् — इदमेषां भुक्तमोदनस्य। भुक्तं भोजनस्थानम्। न तु कर्मण्येव। "उभयप्राप्तौ कर्मणि"[३] इत्यस्य "कर्तृकर्मणोः कृति"[४] इत्येतदुत्तरं पाठेन तत्सूत्रविहितषष्ठ्या एव तेन नियमकरणात्।

न लोकाव्ययनिष्ठाखलर्थतृनाम्[५] इति सूत्रार्थः

एषां प्रयोगे षष्ठी स्यात्। एषां = ल, उ, उक, अव्यय, निष्ठा, खलर्थ, तृन् एषामित्यर्थः। उ, उक इत्यत्र सवर्णदीर्घे सति ऊक इति भवति। तत ल ऊकेत्यत्र आद्गुणे लोकेति भवति। ल इति लडादीनां सामान्येन ग्रहणम्। तेषां साक्षात्प्रयोगाभावात् लादेशानां ग्रहणम्।

लादेशस्योदाहरणं कुर्वन् कुर्वाणो वा सृष्टिं हरिः। लटः शतृशानचावादेशौ। इह कर्मणि षष्ठीनिषेधात् द्वितीया।

उ इत्यनेन उकारान्तः कृत्प्रत्ययो गृह्यते। तस्योदाहरणम् — "हरिं दिदृक्षुः अलंकरिष्णुर्वा"। दृशेः सन्नन्तात् "सनाशंसभिक्ष उः"[६] इति उप्रत्ययः कृत्। व्यपदेशिवद्भावेन उकारान्तोऽयम्। हरिकर्मकदर्शनेच्छावानित्यर्थः। अलंकरिष्णुः इत्यत्र "अलंकृञ्०"[७] इत्यादिना ताच्छील्यादौ इष्णुच्। हरिकर्मकालंकरणशील इत्यर्थः। उवर्णस्यैव ग्रहणे तु अत्र निषेधो न स्यात्।

---

[१] पृ. १५३
[२] सू. २.३.६८
[३] सू. २.३.६६
[४] सू. २.३.६५
[५] सू. २.३.६९
[६] सू. ३.२.२६८
[७] सू. ३.२.१३६

उक इत्यस्योदाहरणम् — "दैत्यान् घातुको हरिः"। हन धातोः तच्छील्यादिषु कर्तरि उकञ्। दैत्यघातनशीलः दैत्यघातनधर्मा दैत्यघातनसाधुकारी वा हरिरित्यर्थः।

कमेरनिषेधः[१] इति वार्तिकार्थः

उकान्तकर्मयोगे षष्ठ्या निषेधो नेत्यर्थः। लक्ष्म्याः कामुको हरिः। लक्ष्मीविषयककामनावान् इत्यर्थः।

अव्ययस्योदाहरणम् — "जगत् सृष्ट्वा, सुखं कर्तुम्"। 'जगत् सृष्ट्वा हरिरास्ते' इति शेषः। समानकर्तृकयोः इति क्त्वाप्रत्ययः। "क्त्वातोसुन्कसुनः"[२] इति अव्ययसंज्ञा।

"सुखं कर्तुम्" इत्यत्र भक्तस्य हरिः प्रभवतीति शेषः। "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्"[३] इति तुमुन्। "कृन्मेजन्तः"[४] इत्यव्ययत्वम्। इह कृदव्ययमेव गृह्यत इति केचित्। वस्तुतस्तु अविशेषादकृदन्तमपि गृह्यत इति तत्त्वम्। "देवदत्तं हिरुक्"। देवदत्तकर्मकं वर्जनमित्यर्थः। निष्ठा — क्तक्तवतू। उदाहरणम् — "विष्णुना हता दैत्याः"। "दैत्यान् हतवान् विष्णुः"।

खलार्थाः — "ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्"[५] इत्यादयः प्रत्ययाः। ईषत्करः प्रपञ्चो हरिणा। अर्थग्रहणात् "आतो युच्"[६] इति खलर्थको युजपि गृह्यते। "ईषत्पानः सोमो भवतः"।

तृन् इति प्रत्याहारः शतृशानचौ इति तृशब्दादारभ्य आ तृनो नकारात्। शानन् — "सोमं पवमानः"। चानश् — "आत्मानं मण्डयमानः"। शतृ — "वेदमधीयन्"। तृन् — "कर्ता लोकान्"।

विभक्त्यर्थनिर्णये[७]

"कर्तृकर्मणोः कृति"[८] इति प्राप्तषष्ठ्याः केषुचित् कृत्सु निषेधेनासाधुतां ज्ञापयति "न लोकाव्ययनिष्ठाखलर्थतृनाम्"[९] इति सूत्रम्। उकाव्ययनिष्ठाखलर्थतृन्

---

[१] वा. १५१९, सू. २.३.६९
[२] सू. १.१.४०
[३] सू. ३.३.१०
[४] सू. १.१.३९
[५] सू. ३.३.१२६
[६] सू. ३.३.१२८
[७] पृ. ४२८
[८] सू. २.३.६५
[९] सू. २.३.६९

इत्येतेषां योगे कर्तृकर्मणोः षष्ठी न भवतीत्यर्थकम्। ल इत्यनेन शतृशानचौ कानच् क्वसुः किकिनौ च गृह्यन्ते। शतृ — "ओदनं पचमानः"। कानच् — "ओदनं पेचानः"। क्वसुः — "ओदनं पेचिवान्"। किकिनौ — "पपिः सोमं ददिर्गाः"। "आदृगमहनजनः किकिनौ लिट् च"[1] इत्यनुशासनेन तच्छीलादिष्वर्थेषु आदन्तात् ऋदन्तात् गमिहन्तिजनिभ्यश्च लिट्कार्यकारिणौ किकिनौ प्रत्ययौ विधीयेते। लिट्कार्यं द्वित्वादि। आत् — "पपिः ददिः"। ऋत् — "बभ्रिर्वज्रम्"। गमि — "जग्मिर्युवा"। हन — "जघ्निर्वृत्रम्"। जनि — "जज्ञिर्बीजम्"। एतद्विधानं छन्दसि। "भाषायां धाञ्कृगमिजनिनमिभ्यः"[2] इत्यनुशासनेन लोके पृथग्विधानात्। दधिर्दण्डं चक्रिर्घटं सस्रिरन्तिकं जग्मिः ग्रामम् एवं जज्ञिः नेमिः पपिः इत्यादेः पानशीलादिरर्थः। तथा च सोमकर्मकपानशीलः इत्यादिरन्वयबोधः "सोमं पपिः" इत्यादौ बोध्यः। उ — "चिकीर्षुः कटं, बुभुक्षुरोदनम्, अलंकरिष्णुः कन्याम्"। उक — "दैत्यान् घातुकः"। "वाराणसीं गामुकः"। उप्रत्ययस्य उकप्रत्ययस्य च तच्छीलादिरर्थः। "उकप्रतिषेधे कमेर्भाषायामप्रतिषेधः"[3] इति "लक्ष्म्याः कामुकः" इत्यादौ लोके षष्ठी। अव्यये — "कटं कृत्वा ओदनं भोक्तुम्"। "अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः"[4] इति "पुरा वत्सानामपाकर्तोरास्ते" इत्यादौ तोसुन्प्रत्यये षष्ठी। वत्सानपाकर्तुमास्त इति वाक्यार्थः। "पुरा क्रूरस्य विसृपो विरप्सिन्" इत्यादौ कसुन्प्रत्यये षष्ठी। क्रूरान् विसर्पितुं विरप्साशील इत्यर्थः। विरप्सा — विरोधः। अथ वा विरप्सिन् विरोधेत्यर्थः। तोसुन्कसुनौ छान्दसौ तुमर्थौ बोध्यौ। निष्ठायां — "विष्णुना हता दैत्याः, ओदनं भुक्तवान्, ग्रामं गतः" इत्यादौ। खलर्थे — "ईषत्करः प्रपञ्चो हरिणा"। हरिकर्तृकेषत्करणकर्म प्रपञ्च इत्यर्थः। अर्थग्रहणात् युच्प्रत्ययेऽपि "ईषत्पानः सोमो भवता" इत्यादौ भवकर्तृकेषत्पानकर्म वाक्यार्थः। तृन्निति प्रत्याहारः। स च "लटः शतृशानचा"[5] इति सूत्रे तृशब्दमारभ्य "तृन्"[6] इति सूत्रे न्शब्दं यावत् बोध्यः। तेन शानन् चानश् शतॄणामपि ग्रहणम्। शानन् — "सोमं पवमानः"। चानश् — "आत्मानं मण्डयमानः"। शतृ — "वेदमधीयन्"। तृन् — "कर्ता लोकान्"। "द्विषः शतुर्वावचनम्"[7] इति "मुरस्य मुरं वा द्विषन्" इत्यादौ वैकल्पिकी षष्ठी।

---

[1] सू. ३.२.१७१
[2] वा. २१४४
[3] वा. १५१९
[4] वा. १५२०
[5] सू. ३.२.१२४
[6] सू. ३.२.१३५
[7] वा. १५२२

शाननः कर्ता अर्थः। सोमकर्मकपवनकर्ता वाक्यार्थः। चानशादीनां ताच्छील्यादिकमर्थः। आत्मकर्मकमण्डनशील इत्यादिर्वाक्यार्थः।

द्विषः शतुर्वा[1]

शत्रन्तद्विषधातुयोगे षष्ठीनिषेधो वा वक्तव्य इत्यर्थः। "मुरस्य मुरं वा द्विषन्"।

सर्वोऽयं कारकषष्ठ्याः प्रतिषेधः

"अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा" इति न्यायात्। शेषे षष्ठी तु स्यादेव — "ब्राह्मणस्य कुर्वन्"। "नरकस्य जिष्णुः"। ब्राह्मणसंबन्धिसृष्ट्यनुकूलव्यापारवान्। नरकसंबन्धिजयवान्। उभयत्र कर्मत्वविवक्षायां द्वितीयैव।

प्रौढमनोरमायाम्[2]

शेषे षष्ठी तु स्यादेवेति। एतेन — "इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" "अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम्" इत्यादि व्याख्यातम्। यद्वा इक्ष्वाकूणां सिद्धय इत्यन्वयः न तु इक्ष्वाकूणां दुराप इति। तथा वागधिपस्य विस्मयमित्यन्वयः न तु वागधिपस्य दुर्वचम् इति।

पदवाक्यरत्नाकरे[3]

पूर्वोक्तं सर्वं समानम्। अन्यश्च विशेषः एवम् — "इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" इत्यत्र इक्ष्वाकूणां सिद्धय इति, "अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम्" इत्यत्र वागधिपस्य विस्मयम् इति च योजना। तेन खलर्थयोगे षष्ठीप्रतिषेधात् "इक्ष्वाकुभिर्दुरापे" "वागधिपेन दुर्वचम्" इति तृतीयया भाव्यमिति शङ्कायाः नावकाशः। इक्ष्वाकुवागधिपयोः खलर्थयोगाभावात् षष्ठीप्रतिषेधाप्रसक्तेः इति।

भाट्टरहस्ये विशेषाः[4]

तदेवं कृद्योगे सर्वत्र "कर्तृकर्मणोः कृति"[5] इत्यनेन षष्ठीप्राप्तौ "न लोकाव्ययनिष्ठाखलर्थतृनाम्"[6] इति सूत्रेण तत्पर्युदासः।

---

[1] वा. १५२२, सू. २.३.६९
[2] पृ. ९५१
[3] पृ. ८१७
[4] पृ. १५३
[5] सू. २.३.६५
[6] सू. २.३.६९

लः — लादेशाः, ते च कृत्संज्ञकाः शतृशानजादय एवेह गृह्यन्ते। तिङः कृद्ग्रहणेनैव निवृत्तत्वात्। तेन "ओदनं पचन् पचमानः" इत्यादौ न षष्ठी, अपि तु द्वितीयैव। अत्र च लकारग्रहणेन तत्कार्यापन्नानामपि ग्रहणम्। तेन किकिनोर्लादेशत्वाभावेऽपि लिट्कार्यापन्नत्वात् विशेषातिदेशे च सामान्यातिदेशस्यावश्यकत्वात् तयोरपि ग्रहणम्। अत एव च 'बभ्रिर्वज्रम्' इत्यादिप्रयोगा अपि संगच्छन्ते।

उ — "कटं चिकीर्षुः, कन्यामलंकरिष्णुः"।

उक — दैत्यान् घातुकः। "कमेर्भाषायामनिषेधः" इति वचनात्तु "लक्ष्म्याः कामुको हरिः" इत्यत्र षष्ठी।

अव्यय — "कटं कृत्वा"। "तोसुन्कसुनोरप्रतिषेधः" इति वचनाच्च "पुरावत्सानामपाकर्तोः" "पुरा क्रूरस्य विसृपो विरप्सिन्"[1] इत्यादौ षष्ठी।

निष्ठा — "ओदनं भुक्तवान्, चैत्रेण कृतम्"।

खलर्थः — "सुकरः प्रपञ्चो हरिणा"।

तृन् — तृन् इति प्रत्याहारः, स च शतृशानचाविति तृशब्दात् आरभ्य आतृनो नकारात्। तेन शानन्प्रभृतीनामपि ग्रहणम्। शानन् — "सोमं पवमानः"। चानश् — "आत्मानं मण्डयमानः"। शतृ — "वेदमधीयन्"। तृन् — "लोकस्य कर्ता"।

द्विषधातूत्तरशतृयोगे तु विकल्पेन षष्ठी। "द्विषः शतुर्वा"[2] इति वचनात्। "मुरस्य मुरं वा द्विषन्"।

सर्वश्चायं कारकषष्ठ्याः पर्युदासः, न तु शेषषष्ठ्याः। आनन्तर्येण तदेकवाक्यताया एव न्याय्यत्वात्। अत एव "ब्राह्मणस्य कुर्वन्, नरकस्य जिष्णुः, छात्रस्य हसितम्" इत्यादिप्रयोगा अपि संगच्छन्ते।

अकेनोर्भविष्यदाधमर्ण्ययोः[3] इति सूत्रार्थः

नेत्यनुवर्तते। अकश्च इन् च तयोः इति विग्रहः। भविष्यच्च आधमर्ण्यं च तयोरिति द्वन्द्वः। यथासंख्यं नेष्यते, भाष्यात्। भविष्यति आधमर्ण्ये च वर्तमानयोः अकेनोर्योगे षष्ठी नेति फलितम्। तत्र आधमर्ण्यांशः अकेन नान्वेति। "आवश्य-

---

[1] तै.सं. १-५-३ मा.सं. १-२६ का.सं. १-४५

[2] वा. १५२२, सू. २.३.६९

[3] सू. २.३.७०

काधमर्ण्ययोर्णिनिः''[१] इत्युक्तेः। अतः भविष्यदंश एवाकेऽन्वेति। इनेस्तु भविष्यदाधमर्ण्ययोरुभयोरप्यन्वयः। संभवात्। तथा च भविष्यदर्थकस्याकस्य भविष्यदर्थकस्य आधमर्ण्यार्थकस्य च इनश्च योगे षष्ठी न स्यात् इति सूत्रार्थः।

उदाहरणम् — "सतः पालकोऽवतरति"। सज्जनान् पालयिष्यन् हरिः प्रादुर्भवतीत्यर्थः। "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्"[२] इति भविष्यति ण्वुल्। तत्र "भविष्यति गम्यादयः"[३] इत्यतः भविष्यतीत्यनुवृत्तेः। "ओदनस्य पाचकः" इत्यत्र तु न षष्ठीनिषेधः। "ण्वुल्तृचौ"[४] इत्यस्य भविष्यति विधानाभावात्।

व्रजं गामी — "गमेरिनिः"[५] इत्यौणादिकः इनिः। स च भविष्यति विहितः। "भविष्यति गम्यादयः"[६] इत्युक्तेः। गोष्ठं गमिष्यन् इत्यर्थः।

शतं दायी — ऋणत्वेन गृहीतं शतमृणं प्रत्यर्पयतीत्यर्थः। "आवश्यकाधमर्ण्ययोर्णिनिः"[७] इत्याधमर्ण्ये णिनिः। तस्य भविष्यति विधानाभावात् भविष्यदर्थकतया गतार्थत्वं न शङ्क्यम्।

पदवाक्यरत्नाकरे[८]

"सज्जनं पालकोऽवतरति" इत्यत्र पालने भविष्यत्त्वमर्थात् अवगम्यते। तथा हि "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्"[९] इत्यनेन ण्वुलोऽत्र अवतरणप्रयोजकेऽर्थे विधानात् प्रयोजकस्य प्रयोज्यपूर्वकत्वमावश्यकमिति अवतरतीत्यनेन वर्तमानावतरणस्य बोधनेन तदुत्तरत्वस्य पालने आवश्यकतया भविष्यदर्थकत्वविरहेऽपि तत्र पालने भविष्यत्त्वं गम्यते। ततश्च भविष्यदर्थकत्वादत्राकस्य न षष्ठीनिमित्तत्वम्।

"व्रजं गामी" इत्यत्र भविष्यद्व्रजकर्मकगमनकर्तरि "शतं दायी" इत्यत्र शताधमर्ण्यप्रयुक्तदानकर्तरि च विवक्षितत्वेन इनः न षष्ठीनिमित्तत्वम्। भाट्टरहस्ये नास्ति कोऽपि विशेषः।

---

[१] सू. ३.३.१७०
[२] सू. ३.३.१०
[३] सू. ३.३.३
[४] सू. ३.१.१३३
[५] उणादिसूत्रपाठः ४४६
[६] सू. ३.३.३
[७] सू. ३.३.१७०
[८] पृ. ८१९
[९] सू. ३.३.१०

विभक्त्यर्थनिर्णये[१]

कृदन्तरेऽपि कृद्योगषष्ठ्या असाधुतां ज्ञापयति "अकेनोर्भविष्यदाधमर्ण्ययोः"[२] इति सूत्रम्। अकस्य भविष्यति काले गम्यमाने इनस्तु भविष्यदाधमर्ण्ययोर्योगे षष्ठी न भवतीत्यर्थकम्। "सज्जनान् पालकोऽवतरति, ओदनं भोजको व्रजति" इत्यादौ क्रियार्थक्रियायां ण्वुलो विधानात् पालनादिक्रियायाः भविष्यत्त्वमर्थादवगम्यते। "भविष्यति गम्यादयः"[३] इत्यधिकारे विधानात् तुमुल्ण्वुलोर्भविष्यत्कालार्थकत्वमित्यन्यदेतच्चिन्त्यम्। गम्यादिशब्दानां निपातनात् भविष्यद्गमनकर्तृवाचकत्वम्। गम्यादौ प्रकृतिप्रत्ययव्युत्पादनं रूढगवादिशब्द इवाचार्यसामर्थ्यमेव गम्यादाविन्प्रत्ययस्यैव वा भविष्यत्कालार्थकत्वं न तु ण्वुल इति। क्रियार्थक्रियायां ण्वुलो भविष्यदधिकारे विधानस्य निष्प्रयोजनत्वात्। न ह्यतीताया वर्तमानाया वा क्रियायाः क्रियार्थकत्वं संभवतीति।

एवं "सज्जनं पालकोऽवतरिष्यति भविष्यति वा" इत्यादौ कर्तरि ण्वुल्विधानेऽपि पालनेऽर्थात् भविष्यत्त्वावगमे कर्मणि न षष्ठी।

"व्रजं गमी गामी वा" इत्यादौ भविष्यत्त्वावगमात् इनो योगे कर्मणि न षष्ठी। "शतं दायी दायो वा" इत्यादौ आधमर्ण्यावगमात् इनादियोगे कर्मणि न षष्ठी।

सर्वोऽयं निषेधः कारकषष्ठ्याः न तु शेषे षष्ठ्याः। अत एव "ब्राह्मणस्य कुर्वन् उत्तमर्णस्य दायी" इत्यादौ षष्ठी। "इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः" इत्यत्र, "अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम्" इत्यत्र च खलर्थयोगे कर्तरि न षष्ठी किं तु शेषे। स च दुरापे सिद्धौ वा, दुर्वचे विस्मये वान्वेति।

"विश्वस्य गोप्ता भुवनस्य कर्ता" इत्यादौ तृचा योगे कर्मणि षष्ठी साधुरेव। "ण्वुल्तृचौ"[४] इति सूत्रेण सामान्यतः कर्तरि ण्वुल्तृचोर्विधानात्। तृचः तृन्प्रत्याहारान्तर्भावविरहात्।

न चैवं "न लोक०"[५] इति सूत्रे तृनो ग्रहणं व्यर्थम्। सर्वत्र तृचैव षष्ठ्युपपत्तेरिति वाच्यम्। तृच्शतृतृनां स्वरे भेदात् छन्दसि शतृतृनोः प्रयोगे षष्ठीनिषेधार्थत्वात्।

---

[१] पृ. ४३०

[२] सू. २.३.७०

[३] सू. ३.३.३

[४] सू. ३.१.१३३

[५] सू. २.३.६९

शाब्दिकमतखण्डनम्

शाब्दिकास्तु — "कर्तृकर्मणोः कृति"[१] इति षष्ठीविधिरनित्य एव। "तदर्हम्"[२] इति निर्देशात्। अत एव "धायैरामोदमुत्तमम्" इति भट्टिकाव्यं संगच्छते। अत एव निषेधोऽप्यनित्यः, इक्ष्वाकूणामित्यादिदर्शितप्रयोगादित्याहुः।

तन्मन्दम्। "तदर्हम्"[३] इति निर्देशे तदित्यव्ययस्य लुप्तषष्ठ्यन्तत्वात् तथैव साहचर्यात्। "तत्र तस्येव"[४] इति पूर्वसूत्रेण सप्तम्यन्तषष्ठ्यन्ताभ्यामिवार्थे वतेर्विहितत्वात्। काशिकावृत्तौ तु तदिति द्वितीयासमर्थात् अर्हतीत्येतस्मिन्नर्थे वतिप्रत्ययो भवतीति व्याख्यातम्। तत्र अर्हतीति तिङन्तानुरोधेन द्वितीया-समर्थादित्युक्तम्। वस्तुतः तस्येति षष्ठीसमर्थात् अर्हमित्यर्थे वतिः प्रत्ययो भवतीति व्याख्यानमुचितम्। "धायैरामोदम्" इत्यादौ प्रकरणादिना भविष्यत्त्वावगमात्। णप्रत्ययस्याकारेण योगे न षष्ठी। न चाकारयोगे कुतः षष्ठीनिषेध इति वाच्यम्। अकेनोरिति सूत्रेऽकारस्यापि ग्रहणात्। अकश्च अश्च अकाः अकाश्च इन् च अकेनौ तयोरित्याकारग्रहणात्। अका इति "सर्वो द्वन्द्वो विभाषैकवद्भवति" इत्येकवचनम्। एतदर्थमेव भविष्यदाधमर्ण्ययोः गम्यमानयोः इति व्याख्यातम्। गम्यमानत्वं तु प्रकृतिप्रत्ययाभ्यामन्येन ज्ञाप्यमानत्वम्। शतं दायीत्यादावपि णिनिप्रत्ययस्य कर्तैवार्थः। आधमर्ण्यं तु मानान्तरगम्यमेव। "इक्ष्वाकूणाम्" इत्यादौ षष्ठ्युपपत्तिर्दर्शितैवेत्यलं विस्तरेण।

कृत्यानां कर्तरि वा[५] इति सूत्रार्थः

कृत्या इत्यधिकृत्य विहिताः कतिपयकृत्प्रत्ययविशेषाः। तद्योगे कर्तरि षष्ठी वा स्यात्। "मया मम वा सेव्यो हरिः"। मत्कर्तृकसेवनकर्म हरिः इति बोधः।

कर्तरि इति किम्। "गेयो माणवकः साम्नाम्"। सामकर्मकगानकर्ता माणवक इति बोधः। "भव्यगेय०"[६] इत्यादिसूत्रेण कर्तरि. यद्विधानादनभिहितं कर्म।

अत्र योगो विभज्यते। "कृत्यानां०"[७] "उभयप्राप्तौ०"[८] इति न इति चानुवर्तते। "नेतव्याः व्रजं गावः कृष्णेन"। ततः कर्तरि वा। उक्तोऽर्थः।

---

[१] सू. २.३.६५
[२] सू. ५.१.११७
[३] सू. ५.१.११७
[४] सू. ५.१.११६
[५] सू. २.३.७१
[६] सू. ३.४.६८
[७] सू. २.३.७१
[८] सू. २.३.६६

पदवाक्यरत्नाकरे[१]

कृत्यानां तव्यादीनां प्रत्ययानां योगे द्विकर्मकधातौ अनभिहिते कर्तरि गौणकर्मणि च यथायथं तृतीयाद्वितीये न तु षष्ठी। "गोविन्देन नेतव्या व्रजं गावः, न तु गोविन्दस्य व्रजस्य" इति। "गेयो माणवकः साम्नाम्" इत्यादौ कर्तरि कृत्प्रत्यये कर्मणि षष्ठ्यवसेया। "मम मया वा सेव्यो हरिः" इत्यत्र कर्तरि षष्ठी तृतीया च प्रमाणम्।

लिट्कार्यकारिणोः षष्ठी किकिनोः प्रतिषिध्यते।
प्रतिप्रसूयते तोसुन्कसुनोस्तन्निमित्तता।।

"आदृगमहनजनः किकिनौ लिट् च"[२] इत्यनुशासनेन आदानात् ऋदन्तात् गमिहनिजनिभ्यश्च, लिडर्थे किकिनौ विधीयेते। तत्रापि षष्ठीनिषेधः। वज्रस्य परोक्षातीतभरणकर्तेत्यर्थे "वज्रं बभ्रिः" इति, तथा "जलं पपिः, दण्डं दधिः, ग्रामं जग्मिः, शत्रुं जघ्निः" इत्यादिप्रयोगात्।

"वत्सानपाकर्तुम्" इत्यर्थे पुरा वत्सानामपाकर्तोः इति इत्यत्र तोसुन्, "क्रूरान् विसर्पितुम्" इत्यर्थे पुरा क्रूरस्य विसृपः इत्यत्र कसुन्। "अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः"[३] इति वार्तिकमत्रानुसन्धेयम्। अव्ययावपि तोसुन्कसुनौ षष्ठ्यपवादकाविति तयोः कृत्त्वेन प्रसक्तायाः अव्ययत्वेन प्रतिषिद्धायाः षष्ठ्याः प्रतिप्रसवोऽयम्।

विभक्त्यर्थनिर्णये[४]

कृत्प्रत्यययोगे वैकल्पिकीं षष्ठीं ज्ञापयति "कृत्यानां कर्तरि वा"[५] इति सूत्रम्, कृत्यानां प्रत्ययानां योगे कर्तरि वा षष्ठी भवतीत्यर्थकम्। "मया मम वा सेव्यो हरिः" इत्यादौ तृतीयाषष्ठ्योः कर्तृत्वमर्थः सेवने धात्वर्थेऽन्वेति। तथा च मत्कर्तृकसेवनकर्म हरिर्वाक्यार्थः। एवं 'भवता भवतो वा कटः कर्तव्यः' इत्यादावपि वाक्यार्थो बोध्यः। कर्तरीत्युपादानात् कर्मणि न षष्ठ्या विकल्पः यथा "गेयो माणवकः साम्नाम्" इत्यादौ। अत्र "भव्यगेय०"[६] इति सूत्रेण कर्तरि भव्यगेयादिशब्दानां निपातनात्। अनभिहिते कर्मणि कृद्योगे षष्ठी। "पचेलिमा

---

१ पृ. ८१९
२ सू. ३.२.१७१
३ वा. १५२०, सू. २.३.६९
४ पृ. ४३२
५ सू. २.३.७१
६ सू. ३.४.६८

माषाः'' इत्यादौ कर्मकर्तरि केलिमरादौ कर्मकर्त्रोरुभयोः अभिधानात् कृद्योगे न षष्ठी। ''उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधो वक्तव्यः'' इति गुणकर्मणि षष्ठ्याः निषेधः। यथा ''नेतव्याः व्रजं गावः कृष्णेन कृष्णस्य वा'' इत्यादौ। अत्र व्रजादौ गुणकर्मणि न षष्ठी। इति कारकषष्ठ्यर्थनिर्णयः

भाट्टरहस्ये[1]

''कृत्यानां कर्तरि वा''[2] इति सूत्रे भाष्यकारेण योगविभागकरणात् कृत्यानाम् इत्यस्य भिन्नसूत्रत्वं कर्तरि वेत्यस्य भिन्नसूत्रत्वं चावगम्यते। तत्र प्रथमसूत्रे ''उभय-प्राप्तौ कर्मणि''[3] इति सूत्रात् उभयप्राप्ताविति ''न लोक०''[4] इति सूत्रात् नेति चानु-वर्तते। उभयोः कर्तृकर्मणोः अनभिधानप्रयुक्तषष्ठीप्रसक्तौ कृत्यानां योगे षष्ठी न स्यादित्यर्थः। ततश्च ''नेतव्या व्रजं गावः कृष्णेन'' इत्यत्र न षष्ठी, अपि तु द्वितीया तृतीया च। अत्र हि नयतेः द्विकर्मकत्वात् मुख्यकर्मणः कृत्येनभिधानात् गोषु प्रथमा। अमुख्यकर्मणो व्रजस्य तु अनभिधानात् तत्र द्वितीया। यत्र तु कर्तृकर्म-णोर्मध्येऽन्यतरस्य कृत्प्रत्ययेनाभिधानात् नोभयत्र प्राप्तिः तादृशकृत्प्रत्ययस्य योगे कृद्योगषष्ठ्याः नियमेन प्रसक्तौ ''कृत्यानां कर्तरि वा''[5] इति द्वितीययोगेन कर्तरि षष्ठी विकल्पेन विधीयते। ''कर्तव्यमिदं कृष्णेन कृष्णस्य वा'' इत्युदाहरणम्।

न च भावकर्मणोरेव कृत्यप्रत्ययविधानात् तत्र च कर्मणः कृत्यप्रत्यये-नाभिधानादेव षष्ठ्याः अप्राप्तेः परिशेषात् कर्तर्येव विकल्पविधेरुपपत्तेः कर्तृग्रहण-वैयर्थ्यमिति वाच्यम्। ''भव्यगेय०''[6] इति सूत्रेण कर्तर्यपि यत्प्रत्ययाख्यकृत्य-विधानात् तद्योगे अनभिहिते कर्मणि षष्ठीप्राप्तेः तत्र विकल्पव्यावृत्त्यर्थं कर्तृ-ग्रहणोपपत्तेः, यथा ''गेयो माणवकः साम्नाम्'' इति। अत्र गेय इति कर्तरि कृत्यः। सामकर्मकगानकर्ता माणवकः इति शाब्दबोधः।

तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्[7] इति सूत्रार्थः

तुल्यार्थैर्योगे तृतीया वा स्यात् पक्षे षष्ठी। शेषषष्ठ्यां नित्यप्राप्तायां तृतीया-विकल्पोऽयम्। तुल्यैरिति बहुवचनादेव पर्यायग्रहणे सिद्धे अर्थग्रहणं पदान्तर-

---

[1] पृ. १५४
[2] सू. २.३.७१
[3] सू. २.३.६६
[4] सू. २.३.६९
[5] सू. २.३.७१
[6] सू. ३.४.६८
[7] सू. २.३.७२

निरपेक्षश्चेत् तुल्यार्थः तेषां ग्रहणार्थम्। तेन "गौरिव गवयः" इत्यादौ नेत्याहुः। अतुलोपमाभ्यामिति पर्युदासात् अनव्यययोग एवेदमित्यन्ये।

तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा। अतुलोपमाभ्यां किम्। तुला उपमा वा कृष्णस्य नास्ति।

प्रौढमनोरमायाम्[१]

कथं तर्हि "तुलां यदारोहति दन्तवाससा"[२] इति कालिदासः, "स्फुटोपमं भूतिसितेन शम्भुना"[३] इति माघश्च, "अतुलोपमाभ्याम्" इति तृतीयापर्युदासात् इति चेत् — उच्यते। तत्र "सहयुक्तेऽप्रधाने"[४] इति तृतीया, "स्वबालभारस्य तदुत्तमाङ्गजैः समं चमर्येव तुलाभिलाषिणः" इत्यत्र यथा। उक्तं हि विनापि सहयोगं तृतीयेति।

पदवाक्यरत्नाकरे[५]

शब्दैस्तुलोपमाभिन्नैर्योगे सादृश्यवाचिभिः।
प्रतियोगिनि षष्ठी च तृतीया चानुशिष्यते।।

सादृश्यवाचिभिः तुल्यसदृशादिशब्दैर्योगे "चन्द्रेण चन्द्रस्य वा सदृशः" इत्यादौ तृतीया षष्ठी च प्रतियोगित्वमभिधत्ते। चन्द्रस्य तुला चन्द्रस्योपमेत्यत्र तु शेषषष्ठी, न तृतीया। "तुलां यदारोहति दन्तवाससा"[६] इत्यत्र "स्फुटोपमं भूतिसितेन शम्भुना"[७] इत्यत्र च सहार्थे तृतीया, "समं चमर्येव तुलाभिलाषिणः" इतिवत्।

ततश्च "चन्द्रेण चन्द्रस्य वा सदृशः" इत्यत्र तृतीयाषष्ठ्योः प्रतियोगित्वमर्थः। आधेयतासंबन्धेन प्रकृत्यर्थस्य चन्द्रस्य तत्रान्वयः। प्रतियोगित्वस्य निरूपकतासंबन्धेन सदृशपदार्थैकदेशे सादृश्येऽन्वयः। चन्द्रनिष्ठप्रतियोगितानिरूपकसादृश्यवानिति वाक्यार्थः।

"चन्द्र इव मुखम्" इत्यादाविवादिशब्दयोगे न तृतीया षष्ठी वा। सूत्रे बहुवचनेनैव "कडारा" इत्यादाविव तुल्यप्रभृतिशब्दलाभे अर्थग्रहणसामर्थ्येन यथेवा-

---

[१] पृ. ९५२
[२] कु.सं. ५-२५
[३] माघ. १-४
[४] सू. २.३.१९
[५] पृ. ८२१
[६] कु.सं. ५-२५
[७] माघ. १-४

दिशब्दानां पर्युदाससिद्धेः। एतदुक्तं भवति — "कडाराः कर्मधारये"[1] इति सूत्रे प्रभृत्यर्थकशब्दाभावेऽपि बहुवचनेन कडारप्रभृतीनां लाभात् खञ्जगडुलादिशब्दानामपि कर्मधारये पूर्वं प्रयोगः यथा ज्ञाप्यते, तथा अत्रापि सूत्रे "तुल्यैः" इति बहुवचनेनैव तुल्यप्रभृतिलाभेन सदृशादिशब्दयोगेऽपि तृतीयाषष्ठ्योरुपपत्तौ अर्थग्रहणं व्यर्थं सत् यथेवादिशब्दभिन्नतुल्यार्थकशब्दानां योगे एव तृतीया षष्ठी च साधुरिति ज्ञापयति। तेन इवादिशब्दयोगे न तृतीयाषष्ठ्योः साधुत्वम् इति।

भाट्टरहस्ये[2]

एवं "तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्"[3] इति सूत्रात् तुल्यार्थकैस्तुलोपमादिशब्दभिन्नैः शब्दैर्योगे तृतीया स्यात् पक्षे षष्ठीत्यर्थकात् "तुल्यः सदृशः समो वा कृष्णेन कृष्णस्य वा" इत्यत्र पक्षे षष्ठी। अत्र अतुलोपमाभ्याम्" इति द्विवचनं छान्दसम्। अन्यथा विशेषणविभक्तित्वेन बहुवचनापत्तेः। इदं च सूत्रं मण्डूकप्लुत्या शेषषष्ठ्या एव विकल्पविधायकम्, न तु कारकषष्ठ्याः, तुल्यशब्दस्य यत्प्रत्ययरूपतद्धितान्तत्वेन कारकषष्ठ्या अप्राप्तेः। "कर्तृकर्मणोः कृति"[4] इत्यादिना कृदन्तयोग एव कारकषष्ठ्याः प्राप्तेः। अत एव तुला उपमा वा कृष्णस्य नास्तीत्यत्र शेषे तृतीयाया अविधानात् न तृतीया।

कथं तर्हि "तुलां यदारोहति दन्तवाससा"[5] "स्फुटोपमं भूतिसितेन शम्भुना"[6] इत्यादौ काव्ये तुलादिशब्दयोगे तृतीयेति चेत् — तस्याः तोलनोपमानादिरूपधात्वर्थं प्रति करणत्वविवक्षयोपपत्तेः। सहयोगनिमित्तका वा तत्र तृतीया। साहित्यं च निरूपकत्वम्। दन्तवासोनिष्ठनिरूपकताकतुलामित्यर्थः। निरूपकत्वत्वेन निरूपकत्वं तृतीयया बोध्यते। प्रकृतसूत्रं तु तुलोपमाभ्यां योगे शेषत्वार्थकतृतीयायाः पर्युदासकं न तु साहित्यार्थकतृतीयया इति न कश्चित् विरोधः।

अत्र तुल्यार्थैः इति बहुवचननिर्देशेनैव तुल्यपर्यायाणां ग्रहणोपपत्तौ अर्थग्रहणं पदान्तरनैरपेक्ष्येण बोधकपरम्। तेन "गौरिव गवयः, यथा गौः तथा गवयः" इत्यादौ न षष्ठ्यादिः।

---

[1] सू. २.२.३८
[2] पृ. १५४
[3] सू. २.३.७२
[4] सू. २.३.६५
[5] कु.सं. ५-२५
[6] माघ. १-४

चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः[१] इति सूत्रार्थः

आयुष्य, मद्र, भद्र, कुशल, सुख, हित एतदर्थकैः शब्दैर्योगे चतुर्थी वा स्यात् पक्षे षष्ठी, आशिषि विवक्षिते।

"आशिष्यं चिरञ्जीवितं कृष्णाय कृष्णस्य वा भूयात्"। एवं 'मद्रं भद्रं कुशलं निरामयं सुखं शम् अर्थः प्रयोजनं हितं पथ्यं वा भूयात्'। आयुष्यपर्यायश्चिरं जीवितमिति। कुशलं निरामयमिति मद्रभद्रपर्यायौ। शमिति सुखपर्यायः। प्रयोजनमिति अर्थपर्यायः। पथ्यमिति हितपर्यायः। "हितयोगे च"[२] इति नित्यचतुर्थी तु नाशिषि ज्ञेया। व्याख्यानात् सर्वत्र पर्यायग्रहणम्। मद्रभद्रयोः पर्यायत्वात् अन्यतरो न पठनीयः।

पदवाक्यरत्नाकरे[३]

आयुष्यमद्रकुशलसुखप्रभृतिभिर्हितैः।
योगे चतुर्थी षष्ठी वा तत्राशिष्यनुशिष्यते।।

आयुष्यं चिरजीवितम्, मद्रममङ्गलनिवृत्तिः, कुशलमनामयम्, सुखम् एतदर्थकैः हितशब्देन च योगे तस्मै तस्य वा आयुष्यं भूयात् इत्यादावाशीरर्थकलकारयोगे षष्ठी चतुर्थी च साधुः। भट्टोजिना द्वन्द्वसमासः आश्रितः। अत्र तु बहुव्रीहिगर्भो द्वन्द्व इति विशेषः।

विभक्त्यर्थनिर्णये[४]

नामार्थान्वयिनः षष्ठ्यर्था अकारकतया संज्ञायन्ते। तत्र शेषः "षष्ठी शेषे"[५] इति सूत्रविवेचने प्रागेव दर्शितः। शेषत्वेन प्रतियोगित्वादिकं न षष्ठ्यर्थः। किं तु प्रतियोगित्वत्वादिनेति ज्ञापयितुं "तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्"[६] इति सूत्रम्। तदेतत् तृतीयाविवरणे व्याख्यातम्।

चतुर्थ्या सह वैकल्पिकीं षष्ठीं ज्ञापयति "चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः"[७] इति सूत्रम् आशिषि गम्यमानायाम् आयुष्यमद्रभद्रकुशल-

---

[१] सू. २.३.७३
[२] वा. १४६१
[३] पृ. ८२६
[४] पृ. ४३३, ४३४
[५] सू. २.३.५०
[६] सू. २.३.७२
[७] सू. २.३.७२

सुखार्थहित इत्येतैः शब्दैर्योगे चतुर्थीविभक्तिर्भवति चकारात् षष्ठी भवतीत्यर्थकम्। मद्रभद्रशब्दयोः पर्याययोः ग्रहणात् दर्शितशब्दानां पर्यायशब्देन योगेऽपि चतुर्थी भवति। "आयुष्यं चिरजीवितं वा कृष्णाय कृष्णस्य वा भूयात्" इत्यत्र चतुर्थीषष्ठ्योः संबन्धोऽर्थः आयुष्येऽन्वेति। आयुष्यं दीर्घजीवितम्। तथा च कृष्णसंबन्धि दीर्घजीवितम् आशंसाविषयभवनकर्तृ इत्यन्वयबोधः।

"मद्रं भद्रं वा ब्राह्मणाय ब्राह्मणस्य वा भूयात्" इत्यत्र मद्रममङ्गलनिवृत्तिः "कुशलमारोग्यं सुखम् आनन्दो वा शिष्याय शिष्यस्य वा भूयात्"। सुखं स्वतः काम्यो गुणविशेषः अर्थः प्रयोजनं वा शिष्याय शिष्यस्य वा भूयात्। हितं कालान्तरभाविन इष्टस्य साधनम्। आशिषीत्युपादानात् "मार्कण्डेयस्यायुष्यमस्ति" इत्यादौ न चतुर्थी।

"षष्ठ्यर्थे चतुर्थी वक्तव्या"[१] इति वार्तिकं, षष्ठ्यर्थे शेषे चतुर्थीमपि विधत्ते छन्दसि। यथा वा नखानि कृन्तते तस्यै 'कुनखं' जायते, यथा वा "अहल्यायै जार" इत्यादौ। चतुर्थ्याः संबन्धोऽर्थः कुनखादावन्वेति। लोके तु "तस्याः कुनखम्" "अहल्यायाः जार" इति षष्ठ्येव साधुः।

अतसर्थप्रत्यययोगे षष्ठीं विधत्ते "षष्ठ्यतसर्थप्रत्ययेन"[२] इति सूत्रम्। "दक्षिणोत्तराभ्यामतसुच्"[३] इत्यनेन अतसुच् विधीयते। अत एव अतसुजर्था ये प्रत्ययाः तैः योगे षष्ठी भवतीत्यर्थः। "ग्रामस्य दक्षिणतः उत्तरतो वा नदी" इत्यत्र षष्ठ्याः पूर्वोक्तमवधिमत्त्वमर्थः दक्षिणादावन्वेति। सप्तम्यन्तादिभ्यो विधानात् अतसर्थप्रत्ययानामाधेयत्वमर्थः नद्यादावन्वेति। तथा च ग्रामावधिकदक्षिणदेशविन्ध्यवृत्तिर्नदीत्यादिरन्वयबोधः।

"विन्ध्यात् दक्षिणतः" इत्यादौ विन्ध्यमारभ्येति ल्यबन्तलोपे पञ्चमी बोध्या। पुरः अधः इत्यत्रासिप्रत्ययः। "पुरस्तात्, अधस्तात्" इत्यत्र अस्तातिप्रत्ययः। नगरस्य पुरः पुरस्ताद्वा आरामः। पर्वतस्य अधः अधस्ताद्वा काननम्। उपरि उपरिष्टात् इति निपातयोर्योगे पर्वतस्योपरि उपरिष्टाद्वा मेघः। पश्चादिति निपातयोगेऽपि, "नृपस्य पश्चादुपविशामः"। ततः पश्चात् स्रंस्यते इति भाष्यप्रयोगात् पश्चाच्छब्दयोगे पञ्चम्यपि।

---

[१] वा. १५०९, सू. २.३.६२
[२] सू. २.३.३०
[३] सू. ५.३.२८

एनबन्तयोगे द्वितीयां ज्ञापयति "एनपा द्वितीया"[१] इति सूत्रम्। "षष्ठ्यपीष्यते" इतीष्ट्या षष्ठ्यपि एनपा योगे भवति। "ग्रामं ग्रामस्य वा दक्षिणेन नदी ग्रामं ग्रामस्य वोत्तरेण नदी" इत्यादौ द्वितीयाषष्ठ्योरवधिमत्त्वमर्थः। एनप्प्रत्ययस्य आधेयत्वमर्थः। ग्रामावधिकदक्षिणदेशवृत्तिः नदी, ग्रामावधिकोत्तरदेशवृत्तिर्नदी इत्यन्वयबोधः।

"तत्रागारं धनपतिगृहादुत्तरेणास्मदीयं दूराल्लभ्यं सुरपतिधनुश्चारुणा तोरणेन" इत्यादावुत्तरेणेति नैनबन्तं, किं तु तृतीयान्तं तोरणेनेत्यस्य विशेषणमित्याहुः।

वस्तुतस्तु दक्षिणेन याहीत्यादाविव "प्रकृत्यादिभ्यः०"[२] इति वार्तिकेनाधेयत्वार्थिका प्रकृतेऽप्युत्तरेणेति तृतीयेत्यतो धनपतिगृहादिति पञ्चम्या नानुपपत्तिः।

भाट्टरहस्ये[३]

एवम् — "चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः"[४] इति सूत्रात् आयुष्याद्यर्थकशब्दयोगे आशिषि शेषे चतुर्थी स्यात् पक्षे षष्ठीत्यर्थकात् "आयुष्यादि अस्यै अस्य वा भूयात्" इति चतुर्थी, पक्षे षष्ठी। आयुष्यं चिरं जीवितं, मद्रं भद्रमेव। उभयोः पर्यायत्वेऽपि आयुष्यादिपदानामर्थपरत्वख्यापनाय उभयोपादानम्।

यत्तु — व्याख्यानात् सर्वत्रार्थपरत्वोपपत्तेः मद्रभद्रयोः अन्यतरन्न पठनीयमिति कैश्चिदुक्तम्, तद् भाष्यकारेणैतत्सूत्रस्य अव्याख्यानात् उपेक्षितम्। कुशलं — निरामयम्। सुखं — शम्। अर्थः — प्रयोजनम्। हितं — पथ्यम्। न च "हितयोगे चतुर्थी वक्तव्या"[५] इति वार्तिकादेव तत्सिद्धेः हितग्रहणवैयर्थ्यमिति वाच्यम्। अनाशिषि तेन वार्तिकेन चतुर्थीनियमनेऽपि अस्य सूत्रस्य आशिषि विकल्प-

---

[१] सू. २.३.३१
[२] वा. १४६६, सू. २.३.१८
[३] पृ. १५५
[४] सू. २.३.७३
[५] वा. १४६१

विधायकत्वस्योपपत्तेः। अत एव आयुष्यादौ अनाशिषि षष्ठ्येव चैत्रस्य आयुष्यमस्तीति। सर्वथा षष्ठ्यर्थः सर्वोऽप्याख्यातार्थभावनायामन्वेतीति सिद्धम्।

इति षष्ठ्यर्थविचारः

अथ सप्तम्यर्थविचारः

आधारोऽधिकरणम्[1] इति सूत्रार्थः

कारके इत्यधिकृतं प्रथमान्ततया विपरिणम्यते। तच्च आधारस्य विशेषणम्। आधारः कारकमधिकरणमिति लभ्यते। क्रियान्वयि कारकम्। कस्याधार इत्याकाङ्क्षायाम् उपस्थितत्वात् क्रियाया इति लभ्यते। क्रिया च कर्तृकर्मगता विवक्षिता। तदाधारत्वं च न साक्षात्, किं तु कर्तृकर्मद्वारैव, व्याख्यानात्। तथा च कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारभूतं कारकमधिकरणसंज्ञकं स्यात् इति सूत्रार्थः।

सप्तम्यधिकरणे च[2] इति सूत्रार्थः

अधिकरणे सप्तमी स्यात् चकारात् दूरान्तिकार्थकेभ्यः। औपश्लेषिकः वैषयिकः अभिव्यापकश्चेति आधारः त्रिविधः। उपश्लेषः संयोगादिसंबन्धः तत्प्रयोज्य आधारः औपश्लेषिकः। विषयतासंबन्धकृत आधारः वैषयिकः। सकलावयवव्याप्तिकृतः आधारः अभिव्यापकः।

"कटे आस्ते देवदत्तः"। अत्र साक्षात् देवदत्तात्मककर्तृगतामासनक्रियां प्रति कटस्य संयोगसंबन्धं पुरस्कृत्य देवदत्तद्वारा तदाधारत्वात् अधिकरणत्वम्।

"स्थाल्यां पचति तण्डुलान्"। अत्र साक्षात् कर्मभूततण्डुलगतां पाकक्रियां प्रति स्थाल्याः संयोगसंबन्धं पुरस्कृत्य तण्डुलद्वारा आधारत्वात् अधिकरणत्वम्।

"रूपे रूपत्वमस्ति, शरीरे चेष्टास्ति" इत्यादौ समवायेन औपश्लेषिकमाधारत्वम्।

"मोक्षे इच्छास्ति"। अत्र कर्तृभूतेच्छागतां सत्ताक्रियां प्रति मोक्षस्य विषयसंबन्धपुरस्कारेण इच्छाधारत्वात् अधिकरणत्म्।

सर्वस्मिन् आत्मास्ति। अत्रात्मरूपकर्तृगतां सत्ताक्रियां प्रति कृत्स्नव्याप्तिं पुरस्कृत्य आत्मद्वारा सत्ताधारत्वात् सर्वस्याधिकरणत्वम्।

---

[1] सू. १.४.४५

[2] सू. २.३.३६

"वनस्य दूरेऽन्तिके वा"। दूरमन्तिकम् इत्यर्थः। प्रातिपदिकार्थमात्रे विधिरयम्। "दूरान्तिकार्थेभ्यः०"[१] इति विभक्तित्रयेण सह चतस्रोऽत्र विभक्तयः फलिताः।

वस्तुतस्तु — उप = समीपे श्लेषः = संबन्धः तत्कृतमौपश्लौषिकमिति व्युत्पत्त्या सामीपिकमेवाधारत्वमौपश्लेषिकम्। अत एव "अधिकरणं नाम त्रिप्रकारम् व्यापकमौपश्लेषिकं वैषयिकमिति। शब्दस्य तु शब्देन कोऽन्योऽभिसंबन्धो भवितुमर्हति अन्यदत उपश्लेषात् "इको यणचि"[२], अचि उपश्लिष्टस्य इति "संहितायाम्"[३] इति सूत्रस्थं भाष्यं संगच्छते। "अच्युपश्लिष्टस्य अच्समीपोच्चारितस्येत्यर्थः" इति कैयटः। अत एव "मासेऽतिक्रान्ते दीयते" इत्यत्र मास औपश्लेषिकमधिकरणमिति "तत्र च दीयते कार्यं भववत्" इत्यत्र भाष्यं संगच्छते। अत एव "तदस्मिन्नधिकम् इति दशान्ताड्डः"[४] इत्यत्र 'एकादश माषा अधिका अस्मिन् कार्षापणशते' इत्यत्र "अधिकानामेकादशानां कथं शतमधिकरणमित्याक्षिप्य व्यापकवैषयिकाधिकरणासंभवात् औपश्लेषिकमधिकरणं विज्ञायते" इति भाष्यं संगच्छते।

एवं च "कटे आस्ते" इत्यादौ औपश्लेषिकाधारोदाहरणं मूलोक्तमनुपपन्नमेव। उक्तभाष्यविरोधात्। अतः "कटे आस्ते" इत्यादौ एकदेशव्याप्त्या गौणमभिव्यापकाधारत्वम्। सर्वावयवव्याप्तिकृताधारत्वमेव मुख्यम्, वैषयिकमौपश्लेषिकं च गौणमित्यर्थस्य भाष्यसंमतत्वात्।

अत एव "स्वरितेनाधिकारः"[५] इति सूत्रे "साधकतमं करणम्"[६] इति सूत्रे च भाष्ये — "अधिकरणमाचार्यः किं मन्यते, यत्र कृत्स्नमाधारमात्मा व्याप्तो भवति, तर्हि इहैव सप्तमी स्यात् 'तिलेषु तैलम' इति 'दध्नि सर्पिः' इति, 'गङ्गायां घोषः', 'कूपे गर्गकुलम' इत्यत्र तु न स्यात्। गौणमुख्ययोः मुख्य एव कार्यसंप्रत्ययात् इत्याशङ्क्य, स्वरितेनाधिकं कार्यं भवतीति वचनात् तमब्ग्रहणाच्च न दोषः इति समाहितम्। एवं च "कटे आस्ते, गङ्गायां घोषः" इत्यादौ गौणमप्यधिकरणं सप्तम्यर्थ एव। यदि तु "गङ्गायां घोषः" इत्यादौ सामीपिकमधिकरणत्वं न विवक्ष्यते तदा लक्षणेति बोध्यम्। विस्तरस्तु शब्देन्दुशेखरे द्रष्टव्य इति बालमनोरमा।

---

[१] सू. २.३.३५
[२] सू. ६.१.७७
[३] सू. ६.१.७२
[४] सू. ५.२.४५
[५] सू. १.३.११
[६] सू. १.४.४२

भूषणसारे[1]

सप्तम्या अपि द्वितीयादीनामिव आश्रयोर्थः। "सप्तम्यधिकरणे च"[2] इत्यधिकरणे सप्तमी। अधिकरणं च "आधारोऽधिकरणम्"[3] इति सूत्रात् आधारः। आधारत्वं च आश्रयत्वम्। तत्र आश्रयांशः शक्यः। आश्रयत्वं शक्यतावच्छेदकम्। न च आश्रयत्वमात्रेण कर्तृकर्मकरणानामाधारसंज्ञा स्यात्, स्यादेव यदि ताभिरस्याः बाधो न स्यात्।

यद्यपि कारके इत्यधिकृत्य विहितायाः सप्तम्याः क्रियाश्रय इत्येव तात्पर्यम्। तथाप्यत्र कर्तृकर्मद्वारा क्रियाश्रयत्वमस्त्येव स्थाल्यादेः भूतलकटादेश्चेति "स्थाल्यां पचति, भूतले वसति, कटे शेते" इत्याद्युपपद्यते। एतदुक्तं भवति — कारकाधिकारीयेण एतत्सूत्रेण क्रियान्वय्याधारस्याधिकरणसंज्ञा विधीयते।

क्रिया च धात्वर्थः। साक्षात् क्रियाधारयोः पराभ्यां कर्तृकर्मसंज्ञाभ्यामाक्रान्तत्वात् इदं सूत्रमनवकाशं सत् परंपरया धात्वर्थाश्रयस्याधिकरणसंज्ञाविधानेन चरितार्थम्। परम्पराघटके च कर्तृकर्मणी एवेति परया कर्मसंज्ञया बाधादेव "मोक्षे इच्छास्ति" इतिवत् 'मोक्षे इच्छति भवति' इति न प्रयोगः। उक्तं च वाक्यपदीये —

कर्तृकर्मव्यवहितमसाक्षाद्धारयत् क्रियाम्।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।। इति।

अधिकरणं च त्रिविधम् औपश्लेषिकं, वैषयिकम्, अभिव्यापकं च। तत्राद्यस्य "कटे आस्ते, गुरौ वसति" इत्युदाहरणे। द्वितीयस्य "मोक्षे इच्छास्ति" इति। तृतीयस्य "तिलेषु तैलम्" इति। एतच्च "संहितायाम्"[4] इति सूत्रे भाष्ये स्पष्टम्।

लघुमञ्जूषायाम्[5]

अधिकरणसप्तम्याः अधिकरणत्वशक्तिमानर्थः। अधिकरणे सप्तमीति सूत्रात्। सा च शक्तिः कर्तृकर्मद्वारा क्रियाश्रयनिष्ठा। तदुक्तं हरिणा —

कर्तृकर्मव्यवहितमसाक्षात् धारयत् क्रियाम्।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।। इति।

---

[1] पृ. १७६
[2] सू. २.३.३६
[3] सू. १.४.३४
[4] सू. ६.१.७२
[5] पृ. १३२२-१३३०

लोके द्रव्यगुणक्रियाविषयमधिकरणम्। अत्र शास्त्रे कारकाधिकारात् क्रियाविषयमेव तत्। साक्षात् क्रियाश्रययोः कर्तृकर्मणोः ते संज्ञे बाधिके। अतः तद्व्यवहितमिति।

यद्यपि कालः साक्षात् क्रियाधारः, तथापि कारकाधिकारे तरतमयोगो नास्तीति परंपरया क्रियाधारस्यापि ग्रहणम्। किं च कालस्य साक्षात् क्रियाश्रयत्वविवक्षायां "कालः पचति भूतानि" इतिवत् कर्तृत्वम्। व्यवहितमित्यनेनैव असाक्षादिति लाभात् असाक्षादिति पुनः कथनं लोकानुसारेणान्वयोऽपि परम्परयैवेति सूचनाय। "'कटे आस्ते, स्थाल्यां पचति' इत्यादौ अधृते कर्तृकर्मणी क्रियां न संपादयतः इति अधिकरणं क्रियाधारमुपकुर्वत् तत्स्थां क्रियामुपकरोतीत्यर्थः" इति हेलाराजः।

न च "तण्डुलं पचति" इत्यादौ धात्वर्थस्य विक्लित्तिरूपफलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वेन कर्मतया तादृशकर्मणः आश्रये तण्डुले तद्द्वारा धात्वर्थाश्रयत्वमस्तीति अधिकरणसंज्ञा स्यात्, ततश्च सप्तमी स्यादिति वाच्यम्। तण्डुले धात्वर्थव्यापारजन्यफलाश्रयतया कर्मसंज्ञाया अपि सत्त्वेन परया कर्मसंज्ञया अधिकरणसंज्ञायाः बाधान्न दोष इति।

एतेन फलद्वारा व्यापाराश्रयत्वेन कर्तृत्वात् कर्तृद्वारा व्यापाराश्रयत्वात् तण्डुलस्य कर्तृत्वं स्यादित्यपि निरस्तम्। फले स्वभिन्नव्यापाराश्रयत्वाभावेन तण्डुलस्य सुतरां तदाश्रयत्वाभावाच्च।

न च 'मोक्षे इच्छास्ति' इतिवत् मोक्षे इच्छति भवति इत्यस्यापत्तिरिति वाच्यम्। अन्तरङ्गत्वेन परत्वेन च कर्मत्वस्यैव प्रवृत्तेः। अयमाशयः — "पच्यादयः क्रियाः भवतिक्रियायाः कर्त्र्यो भवन्ति" इति भूवादिसूत्रभाष्यानुसारेण इच्छा भवतिक्रियायाः कर्त्री। विषयतासंबन्धेन तदाधारस्य मोक्षस्य इच्छारूपकर्तृद्वारा भवतिक्रियाश्रयत्वमस्तीति अधिकरणसंज्ञा स्यात् इति शङ्का। समाधानं तु — इच्छानुकूलमनस्संयोग इच्छतेरर्थः। तदर्थेच्छारूपफलाश्रयत्वेन मोक्षस्य कर्मत्वं प्राप्तम्। इच्छाद्वारा बहिर्भूतभावनाश्रयत्वेनाधिकरणत्वं च प्राप्तम्। उभयप्राप्तौ पूर्वोपस्थितेच्छारूपफलाश्रयत्वेन अन्तरङ्गत्वात् कर्मत्वमेव मोक्षस्य नाधिकरणत्वम्। अन्तरङ्गबहिरङ्गभावानाश्रयणेऽपि परत्वात् कर्मत्वमेवेति।

न चैवं सति 'मोक्षे इच्छास्ति' इति कृदन्तस्थलेऽपि मोक्षस्याधिकरणत्वानापत्तिरिति वाच्यम्। तत्र हि "इच्छा"[१] इति सूत्रेण इषेर्भावे शः यगभावश्च निपात्यते। तत्र सिद्धावस्थापन्नस्य भावस्य कृद्वाच्यतया प्राधान्यम्।

---

[१] सू. ३.३.१०१

तादृशेच्छाद्वारा मोक्षस्यास्तिक्रियायामन्वयो विवक्षितः। ततश्च कृत्प्रत्ययार्थेच्छारूपो भावः प्रधानम्। तस्य चास्तिक्रियायां कर्तृत्वम्। तद्द्वारा मोक्षस्य सत्तारूपक्रिया-श्रयतया अधिकरणसंज्ञा। तत्रैव इषिधातूपात्तसाध्यरूपेच्छाद्वारा मोक्षस्य सत्ता-क्रियायामन्वये तु कर्मत्वात् कृद्योगलक्षणा कर्मणि षष्ठ्येव मोक्षस्य इच्छास्तीति।

अधिकरणं त्रिधा औपश्लेषिकं वैषयिकम् अभिव्यापकं चेति। तदुक्तं हरिणा —

उपश्लेषस्य चाभेदः तिलकाशकटादिषु।
उपकारास्तु भिद्यन्ते संयोगिसमवायिनाम्।।

अविनाशो गुरुत्वस्य प्रतिबन्धे स्वतन्त्रता।
दिग्विशेषावच्छेद इत्याद्या भेदहेतवः।।

अभेदः अनुगतत्वम्। औपश्लेषिकवैषयिकाभिव्यापकेषु त्रिष्वपि उपश्लेषः अस्त्येव। उपश्लेषः संबन्धः। तद्भेदात् त्रित्वेन व्यवहारः। "कटे आस्ते" इत्यादौ संयोगिन्याधारे कतिपयावयवव्याप्त्यैव संबन्धः। "तिलेषु तैलम्" इत्यादौ समवा-यिन्याधारे समस्तावयवव्याप्त्या संबन्धः।

खे शकुनयः इत्यत्र आकाशस्य तात्त्विकावयवाभावात् कल्पितदेशत्वात् वैषयिकत्वम्। कल्पितदेशापेक्षया चात्रापि उक्तयोरन्यतरः उपश्लेषः। विषयोऽ-नन्यभावः तत्कृतं वैषयिकम्।

"गुरौ वसति" इत्यत्र शिष्यस्य गुर्वधीनायां वृत्तौ वैषयिकाधिकरणं गुरुः। उपश्लेषोऽत्र बौद्धः।

"युद्धे संनह्यति" इत्यत्र युद्धोद्देशेन कवचादिसंवहनप्रवृत्तेः युद्धं विषयः। "गङ्गायां घोषः" इत्यत्र गङ्गाशब्दः सामीप्यात् देशवृत्तिरिति औपश्लेषिकमेव तत्। अत्र गङ्गायां सामीप्यात् देशवृत्त्यधिकरणत्वारोपो बोध्यः।

"शत्रोरभावे सुखम्" इत्यादौ बौद्धमेवाधिकरणत्वम्। "उपकुर्वन् क्रियासिद्धौ" इत्युक्तमाधारस्याधेयोपकारकत्वं प्रतिपादयति — अविनाशो गुरुत्वस्येति। अवि-नाशः तिलकृत उपकारस्तैलस्य। तिलनाशे हि तैलं विकीर्णं नश्येत्।

"पर्यङ्के शेते" इत्यादौ शयितृगतगुरुत्वस्य प्रतिबन्धे पर्यङ्कस्य स्वतन्त्रता उपकारः। चैत्रस्य पर्यङ्के शयने पर्यङ्कः तदीयगुरुत्वं प्रतिबध्नाति। तदेव उपकारः। अन्यथा गुरुत्वात् चैत्रस्य पतनमेव भवेत्।

"खे शकुनयः" इत्यादौ दिग्विशेषसंबन्धात् स्वीयपरिवर्तनमुपकारः। विभावाकाशे शकुनीनां दिग्विशेषेण संबन्धो जातः। तेन स्वीयं यत् अनुकूलपरिवर्तनं तदेवोपकार इत्यर्थः।

"गुरौ वसति" इत्यत्र गुरुणा शिष्यस्य संस्कार उपकारः इत्येवमादय उपकारा ऊह्या इति हेलाराजः।

केचित्तु — औपश्लेषिकमित्यस्य उप = समीपे श्लेषः = संबन्धः तत्कृतमित्यर्थः। पूर्वमौपश्लेषिकपदस्य यत्किंचिदवयवावच्छेदेन व्याप्तिरुपश्लेषः तत्कृतमौपश्लेषिकमित्यर्थ उक्तः। इदानीं तु यत्किंचिदवयवसंबन्धाभावेऽपि समीपवृत्तित्वमात्रेण औपश्लेषिकमधिकरणत्वं सिध्यतीत्युच्यते इति भेदः। अत्र प्रमाणं तु — "तत्र च दीयते कार्यं भववत्"[1] इति सूत्रस्थं "यन्मासेऽतिक्रान्ते दीयते तस्य मास औपश्लेषिकमधिकरणम्" इति भाष्यम्। सप्तम्यन्तात् कालवाचिनः दीयते, कार्यम् इत्यर्थद्वये भवार्थे इव प्रत्ययाः स्युः इति सूत्रार्थः। प्रावृषि दीयते कार्यं वा प्रावृषेण्यम्। एवं शरदि दीयते कार्यं वा शारदम्। तत्र यद्धि मासे कार्यं मासे भवं तद् भवति। अतः कार्यग्रहणमनर्थकमिति कात्यायनेन सूत्रे कार्यग्रहणस्य वैयर्थ्यमाशङ्कितम्। ततः यन्मासे दीयते तदपि मासे भवं भवति। अतः सूत्रे दीयतेग्रहणमपि व्यर्थमित्याशङ्क्य "न तन्मासे दीयते, किं तर्हि मासे गते" इति समाधाय पुनः "एवं तर्हि औपश्लेषिकमधिकरणं विज्ञास्यते" इत्युक्तं भाष्यकृता। एवं च दीयतेग्रहणस्यापि वैयर्थ्यमापादितं भवति। तस्य भाष्यस्यार्थतोऽनुवाद एव "यन्मासेऽतिक्रान्ते दीयते तस्य मास औपश्लेषिकमधिकरणम्" इति। अयमर्थः —

मासेऽतिक्रान्ते किंचित् धनादिकं दत्तं, तस्यापि मासः औपश्लेषिकमधिकरणं भवति इति भाष्यार्थः। एतच्च भाष्यम् उप समीपे श्लेषः संबन्धः तत्कृतमौपश्लेषिकमित्यर्थस्वीकार एव संगच्छते। दीयमानस्य धनादेः समीपस्थत्वात् मासस्य अधिकरणत्वं सिध्यति। किंचिदवयवावच्छेदेन व्याप्तिः उपश्लेषः तत्कृतमौपश्लेषिकमिति पूर्वोक्तार्थस्यैव स्वीकारे तु मासस्य धनादिना किंचिदवयवावच्छेदेन संबन्धाभावात् मासस्यौपश्लेषिकमधिकरणत्वं भाष्योक्तमसंगतं स्यात्।

"तदस्मिन्नधिकम्०"[2] "संहितायाम्"[3] इति सूत्रे भाष्ये च स्पष्टमेतत्। तदस्मिन्नधिकमित्यर्थे दशन् शब्दात् डः स्यात्, सोऽपि शतसहस्रमिति सूत्रार्थः। तत्र कटस्य चैत्राधिकरणत्वमिव शतस्यैकादशाधिकरणत्वासंभवात् तदस्मिन्निति

[1] सू. ५.१.९६
[2] सू. ५.२.४५
[3] सू. ६.१.७२

सप्तम्यन्तनिर्देशः सूत्रे नोपपद्यत इत्याक्षिप्य "तदस्मादधिकम्" इति पञ्चमीनिर्देशः कर्तव्यः इति वार्तिककारः शिक्षितवान्। ततो भाष्यकारः — "यद्यपि तावत् व्यापके वैषयिके वा अधिकरणत्वे संभवो नास्ति, औपश्लेषिकमधिकरणं विज्ञास्यते। एकादश कार्षापणा उपश्लिष्टा अस्मिन् शते एकादशं शतम्" इति पाणिनिन्यासमेव समर्थयामास। अनेन शतस्यौपश्लेषिकमधिकरणत्वं स्पष्टमुक्तम्। पूर्वोक्तार्थस्वीकारे शतस्याधिकरणत्वासंभवात् एतद्भाष्यविरोधः। अस्मिन्मते तु शतस्य समीपवर्तित्वमात्रेणाधिकरणत्वं सिध्यति। अस्मिन्नुपश्लिष्टा एतत्समीपवर्तिन एकादश कार्षापणाः इति तदर्थः।

"संहितायाम्"[1] इति सूत्रे भाष्येऽपि स्पष्टमेतत्। तत्र हि — अयं योगः शक्योऽवक्तुम्। कथम्? अधिकरणं नाम त्रिप्रकारं व्यापकमौपश्लेषिकं वैषयिकमिति। शब्दस्य च शब्देन कोऽन्योऽभिसंबन्धो भवितुमर्हति अन्यदत उपश्लेषात्। "इको यणचि"[2] अचि उपश्लिष्टस्येति। तत्रान्तरेण संहिताग्रहणं संहितायामेव भविष्यति इत्युक्तम्।

अत्रापि पूर्वोक्तकल्पेऽचः किंचिदवयवव्याप्त्यभावात् अधिकरणत्वानुपपत्त्या एतद्भाष्यविरोधः स्पष्टः। एवं च औपश्लेषिकाधिकरणसप्तम्यन्तस्थले उपश्लेषपदाध्याहारेण सप्तमीति उक्तभाष्यद्वयसंदर्भाल्लभ्यते।

एवं यत्किंचिदवयवावच्छेदेन व्याप्तिरप्युपश्लेषः। यथा "कटे आस्ते" इति। एवं गङ्गैकदेशे तरन्तीषु गोषु कूपैकदेशे स्थिते गर्गकुले "गङ्गायां गावः, कूपे गर्गकुलम्" इत्यादौ बोध्यम्।

वैषयिकं तु अप्राप्तिपूर्वकप्राप्तिरूपसंयोगसमवायैतद्भिन्नसंबन्धेन यदधिकरणं तत्। यथा "खे शकुनयः" इत्यादौ।

अभिव्यापकं तु यत्र सर्वावयवावच्छेदेन व्याप्तिः तत् यथा "तिलेषु तैलं दध्नि सर्पिः" इति।

एतदेव (अभिव्यापकमेव) मुख्यमधिकरणम्। "आचार्यः किमधिकरणं न्याय्यं मन्यते यत्र कृत्स्न आधारात्मा व्याप्तः" इति "स्वरितेनाधिकारः"[3] "साधकतमं करणम्"[4] इति सूत्रयोर्भाष्ये कथनात्। अस्य न्याय्यत्वं च प्रकृत्यर्थतावच्छेदकविशिष्टे संपूर्णे तद्भानात्। एकादेशस्तु न प्रकृत्यर्थतावच्छेदकविशिष्टः।

---

[1] सू. ६.१.७२

[2] सू. ६.१.७७

[3] सू. १.३.११

[4] सू. १.४.४२

औपश्लेषिकवैषयिकयोस्तु गौणमाधारत्वम्। तच्च पूर्वोदाहृतसूत्रद्वयभाष्य एवोक्तम्। तत्र हि, सूत्रे आधारपदमहिम्ना न्याय्यस्याधिकरणस्य ग्रहणे "तिलेषु तैलं, दध्नि सर्पिः" इत्यत्रैवाधिकरणत्वं स्यात्, "गङ्गायां गावः, कूपे गर्गकुलम्" इत्यत्र न स्यादित्युक्तम्। अनेन स्पष्टमेव सूच्यते व्यापकादन्यस्याधिकरणस्य गौणत्वम्।

ननु उप समीपे श्लेषः उपश्लेषः तत्कृतमौपश्लेषिकमित्यर्थस्वीकारे "गङ्गायां घोषः" इत्यादावपि औपश्लेषिकाधिकरणसप्तम्यैवोपपत्तौ तत्र सर्वेषां तान्त्रिकाणां लक्षणाव्यवहारः अनुपपन्न इति चेत् — न। अव्यवहितसामीप्यमेवौपश्लेषिकाधारत्वनियामकं न तु व्यवहितसामीप्यमिति भाष्ये एव ध्वनितत्वात्।

तथा हि — "शब्दस्य शब्देन कोऽन्योऽभिसंबन्धो भवितुमर्हति अन्यदत उपश्लेषात्। इको यणचि — अजुपश्लिष्टस्येति अन्तरेण संहिताग्रहणं संहितायामेव भविष्यति" इति भाष्यम्। इको यणचीत्यादौ अचीत्यस्य औपश्लेषिकसप्तम्यन्तत्वाश्रयणेन संहिताधिकारः प्रत्याख्यातो भाष्यकृता। अजुपश्लिष्टस्येत्यस्य अच्सामीप्यवत इत्यर्थः। संहिताधिकारे कृते यत्प्रयोजनं तदनेन साध्यत इति अधिकारसूत्रमनावश्यकमिति भाष्यतात्पर्यम्। "परः संनिकर्षः संहिता"[१] इति सूत्रेणाव्यवहितानां वर्णानां संहितासंज्ञा कृता। तेन व्यवहितानां न संहितासंज्ञा तत्प्रयोजनं प्रत्याख्यानपक्षेऽप्यावश्यकम्। अतोऽव्यवहितसामीप्यमेवौपश्लेषिकाधिकरणत्वसंपादकम्। अन्यथा आरम्भप्रत्याख्यानयोः फलभेदेन प्रत्याख्यानायोगात् इति।

व्यवहितसामीप्ये "गङ्गायां घोषः" इत्यादौ गङ्गापदस्य तीरे लक्षणा। तत्रापि गौणमेवाधारत्वम्। सर्वावयवावच्छेदेन तीरस्य घोषसंबन्धाभावात्। गौणाधारादीनामपि कारकाधिकारे स्वरितगुणकस्याधारशब्दस्य पाठेनाधिकरणसंज्ञादिबोधनात् सर्वत्र विभक्तेः शक्तिरेवेति बोध्यम्।

एतदुक्तं भवति — "साधकतमं करणम्"[२] इति सूत्रे तमब्ग्रहणेन कारकाधिकारे तरतमभावो नास्तीति ज्ञाप्यते। तेन गौणाधारस्याप्यधिकरणसंज्ञा सिध्यति। किं च "स्वरितेनाधिकारः"[३] इति सूत्रस्य स्वरितस्वरेणाधिकं कार्यं भवतीत्यर्थ उक्तः अधिकारशब्दोऽधिकव्यापारवाची। "आधारोऽधिकरणम्"[४] इति सूत्रे आधारपदे स्वरितत्वमासज्यते। तेन न्यायप्राप्तादधिकोऽपि व्यापारो ग्राह्य इति तद्भावः। न्यायप्राप्तमधिकरणत्वं व्यापकस्यैव। आधारपदग्रहणसामर्थ्यात्। ततोऽ-

---

[१] सू. १.४.१०९
[२] सू. १.४.४२
[३] सू. १.३.११
[४] सू. १.४.४५

प्यधिकव्यापारग्रहणात् तद्भिन्नस्य औपश्लेषिकवैषयिकरूपस्य गौणस्यापि अधिकरणत्वं सिध्यति। इदं स्वरितेनाधिकार इति सूत्रस्य प्रयोजनम्। यत्र स्वरितत्वमासज्यते तत्राधिकार्थावगतिरिति सूत्रस्यार्थः। आधारपदे स्वरितत्वप्रतिज्ञायां किं मानमिति चेत् — करणसंज्ञासूत्रे तमप्ग्रहणमेव मानं भवितुमर्हति, तेन हि कारकाधिकारे उद्देश्यवाचकपदे स्वरितत्वं प्रतिज्ञातमिति ज्ञाप्यते। तेन गौणमुख्यसाधारण्येनाधिकरणसंज्ञा सिध्यति। करणसंज्ञासूत्रे तु तमपो ग्रहणेन तत्र तदभावो बोध्यते। तत्प्रयोजनं तु व्यवधानेन फलोत्पादके करणत्वोपचारेण तृतीयान्तप्रयोगस्यासाधुत्वबोधनम्। एवं च प्रकृते गौणस्याप्यधिकरणसंज्ञा सेत्स्यतीति। ''कटे शेते'' इत्यादौ कटाधिकरणकं शयनमिति बोध इत्याहुः।

परे तु सप्तम्यर्थस्याधिकरणस्य कर्त्रादावेवान्वयः, न तु क्रियायाम्। एवं च ''कटे शेते'' इति वाक्यात् कटाधिकरणकः यः चैत्रः तत्कर्तृकं शयनमिति बोधः। ''स्थाल्यामोदनं पचति'' इति वाक्यात् स्थाल्यधिकरणको य ओदनः तत्कर्मकः पाक इत्येव बोधः। न चाधिकरणस्य क्रियान्वयित्वाभावे कारकत्वं न स्यादिति वाच्यम्। कर्तृकर्मद्वारा क्रियान्वयित्वेन कारकत्वोपपत्तेः। कारकाणां भावनान्वय इति व्युत्पत्तिरपि ''आधारोऽधिकरणम्''[1] इति शास्त्रबलात् कर्तृकर्मद्वारकान्वयविषयापि। एवं च साक्षात् क्रियाजनकानां साक्षादेव भावनान्वयः। परंपरया तज्जनकानां तु परंपरयैवान्वयः। अधिकरणस्य कर्तृकर्मणोरेवान्वयस्वीकारादेव अक्षशौण्डः इत्यादौ ''सप्तमी शौण्डैः''[2] इति सूत्रेण समासः। अन्यथा अक्षाणां क्रियायामेवान्वये शौण्डपदार्थेनान्वयाभावेन असामर्थ्यात् समासो न स्यात्। अत एव भाष्ये तत्रासामर्थ्यशङ्का न कृता।

एवं चान्तर्भूतक्रियाद्वारा सामर्थ्यमिति कैयटादयः चिन्त्या एव। 'अक्षशौण्डः' 'अक्षप्रवीणः' इत्यादौ 'दध्योदनः' इत्यादौ दध्युपसिक्त ओदन इत्यादिवत् क्रियान्तर्भावेण बोधस्याननुभवात्। अक्षविषयकप्रावीण्यवानित्येव प्रतीतेः। ध्वनितं चेदं ''कर्तृकर्मव्यवहिताम्'' इत्यादि हरिकारिकायाम् ''असाक्षाद्धारयत् क्रियाम्'' इति तृतीयान्तेन — इत्याहुः।

''मूले वृक्षः कपिसंयोग्यस्ति'' इत्यादौ अव्याप्यवृत्तिसंयोगादिधर्मवत्कर्तृकक्रियासमभिव्याहारे मूलाधिकरणको यः कपिसंयोगः तद्विशिष्टो वृक्षः तत्कर्तृका सत्तेति बोधः। तेन मूलान्यावयवे कपिसंयोगविशिष्टवृक्षाभावप्रतीतेः कपिसंयोगे मूलावच्छेद्यत्वं फलति। एवं चैतदर्थं अवच्छेद्यतायाः सप्तम्यर्थत्वस्वीकारो नैया-

---

[1] सू. १.४.४५
[2] सू. २.१.४०

यिकानां नोचितः। शिरसि वेदनेत्यादाववच्छेदकतासंबन्धस्याप्याधारतानियामकत्वान्न दोषः। वेदनानिरूपितावच्छेदकतासंबन्धावच्छिन्नाधारतायाः शिरसि सत्त्वात्।

न च "चैत्रो ग्रामं प्रविशति" इत्यादौ चैत्ररूपकर्तृद्वारा क्रियाश्रयत्वात् ग्रामस्याधिकरणत्वापत्तिरिति वाच्यम्। प्रवेशनक्रियाजन्यसंयोगरूपफलाश्रयत्वेन ग्रामस्य कर्मत्वमप्यस्तीति परया कर्मसंज्ञया अधिकरणसंज्ञायाः बाधात्। कर्तृद्वारा क्रियाश्रयत्वविवक्षायाः धात्वर्थसंयोगाश्रयत्वं विना असंभवात्। एवं च गच्छतियोगे ग्रामपदोत्तरं सप्तम्याः नैव साधुत्वम्। इदं च "आकडार०"[१] सूत्रे[२] "हलदन्तात्०"[३] इति सूत्रे च भाष्ये[४] स्पष्टम्।

तथाहि — आकडारसूत्रे "अधिकरणं कर्म गेहं प्रविशति"[५] इति वार्तिककृता आकडारसूत्रस्य प्रयोजनमुक्तम्। "अधिकरणसंज्ञां कर्मसंज्ञा बाधते। क्व? गेहं प्रविशति" इति तत्र भाष्यम्[६]। उभयोः कर्मसंज्ञाधिकरणसंज्ञयोः प्रसङ्गे कर्मसंज्ञायाः अधिकरणत्वबाधकत्वं स्पष्टमनेन भाष्येणोक्तम्। एतद्धातुयोगेऽधिकरणत्वस्यापि स्वीकारे ऋष्युक्तस्याधिकरणत्वबाधनस्य वैफल्यं स्यात्।

"हलदन्तात् सप्तम्याः संज्ञायाम्"[७] इत्यलुक्सूत्रे "हृद्द्युभ्यां ङेरुपसंख्यानम्"[८] इति वार्तिकम्। "हृद्द्युभ्यां ङेरुपसंख्यानम्, हृदिस्पृक्, दिविस्पृक्" इति तत्र भाष्यम्[९]। अनन्तरम् "अन्यार्थे च"[१०] इति वार्तिकम्। अन्यार्थे चैषा सप्तमी द्रष्टव्या। हृदयं स्पृशतीति हृदिस्पृक्, दिवं स्पृशतीति दिविस्पृक् इति तद्भाष्यम्[११]। स्पर्शनक्रियायां हृदयस्य कर्मत्वं न तु अधिकरणत्वम्। अतः सप्तमी न सिध्यति। हृदयादिनिष्ठसंयोगानुकूलव्यापारवान् इत्यर्थे एते प्रयोगा इष्टाः। अतो वृत्तिविषये द्वितीयार्थे सप्तमी वक्तव्येति भाष्यवार्तिककारयोराशयः। विवक्षावशेन खण्डदेवाद्युक्तरीत्या सप्तम्युपपादने तु ज्ञापकात् सप्तमीसाधनं भाष्यवार्तिककारयोरसंगतं स्यात्। अतो भाष्यवार्तिकप्रामाण्येन एतद्विषये सप्तम्यन्तप्रयोगस्य असाधुत्वमेवेति।

---

[१] सू. १.४.१

[२] म.भा.vol.II, पृ. १९१

[३] सू. ६.३.९

[४] म.भा.vol.V, पृ. २१६

[५] वा. ९९५

[६] म.भा.vol.II, पृ.२०२

[७] सू. ६.३.९

[८] वा. ३८८५

[९] म.भा.vol.V, पृ. २१६

[१०] वा. ३८८६

[११] म.भा.vol.V, पृ. २१६

कारकचक्रग्रन्थरीत्या अधिकरणत्वविचारः[१]

अधिकरणत्वं च न धर्मसंबन्धः। संबन्धस्य संयोगादिरूपस्य द्विनिष्ठत्वेन बदरादेरपि कुण्डाद्याधारत्वापत्त्या 'कुण्डे बदरम' इतिवत् 'बदरे कुण्डम' इत्यपि प्रयोगापत्तेः।

न च कुण्डं न बदरधर्म इति वाच्यम्। तर्हि स्वधर्मसंबन्धः अधिकरणत्वमिति पर्यवसितम्। स्वधर्मत्वं च स्वाधेयत्वम्। स्वाधेयत्वं च यदि स्वनिष्ठाधिकरणतानिरूपकत्वम्, तदा अन्योन्याश्रयः, अधिकरणत्वज्ञानाधीनमाधेयत्वज्ञानम्, आधेयत्वज्ञानाधीनमधिकरणत्वज्ञानमिति।

नापि उत्पत्तये स्थितये ज्ञप्तये चापेक्षणीयत्वम् अधिकरणत्वम्। उत्पत्तयेऽपेक्षणीयं च कार्यस्य समवायिकारणम्, स्थितयेऽपेक्षणीयं घटादेर्भूतलादि, ज्ञप्तयेऽपेक्षणीयं जात्यादेः समवायिव्यक्तिः संयुक्तसमवायरूपसंनिकर्षघटकतया, अभावसमवाययोश्च स्वरूपसंबन्धी इति वाच्यम्।

अपेक्षणीयत्वं हि न जनकत्वम्। अतीन्द्रियजात्यधिकरणेऽव्याप्तेः। तस्य लौकिकप्रत्यक्षाभावेन संनिकर्षाद्यघटकत्वेन जनकत्वाभावात्। दण्डादेर्घटाद्यधिकरणत्वापत्तेश्च, घटाद्युत्पत्तयेऽपेक्षणीयत्वात्।

नापि तद्भिन्नत्वे सति तत्पतनप्रतिबन्धकसंयोगवन्मूर्तत्वम् पतनवद्द्रव्याधिकरणत्वम्। स्वस्मिन् स्वपतनप्रतिबन्धकसंयोगसत्त्वात् स्वस्य स्वाधिकरणत्ववारणाय तद्भिन्नत्वे सतीति। सत्यन्तदलमात्रोक्तौ तच्छून्यस्यापि देशस्य तद्भिन्नत्वात् तदधिकरणत्वापत्तिः। तद्वारणाय विशेष्यदलम्। एकवस्तुपतनप्रतिबन्धकसंयोगवति अन्यवस्त्वधिकरणत्ववारणाय तत्पतनेति तत्पदम्। मूर्तत्वेन विशेषणात् ब्रह्माण्डधारकसंयोगाश्रयेऽपीश्वरे नातिव्याप्तिः। पतनशून्यस्य च मूर्तस्य अधिकरणत्वं विलक्षणसंयोगवत्त्वरूपम्। अत एव कमलकोरकान्तर्वर्त्युत्पन्नविनष्टभ्रमणाद्यधिकरणेऽपि तत्पतनाप्रसिद्ध्या नाव्याप्तिः। गुणक्रियाजात्यादेश्च तत्समवायित्वमधिकरणत्वम्। अभावभूतलादीनां च तत्स्वरूपसंबन्धित्वमधिकरणत्वम्। एवं परम्परासंबन्धेनापि निर्वाच्यमिति वाच्यम्। अननुगमात्। "भूतले घटः" इत्यादौ तत्पतनेत्यादिक्रमेण सप्तम्यर्थतायां गौरवात्, अननुभवाच्च।

किं तु प्रतियोगित्वानुयोगित्ववत् आधेयत्वमधिकरणत्वं च विलक्षणप्रतीतिसाक्षिकः स्वरूपसंबन्धविशेषः। स चातिरिक्तोऽनतिरिक्तो वेत्यन्यदेतत्।

---

[१] पृ. ७५

''गृहे चैत्रः पचति'' इत्यादौ अधस्संतापनरूपस्य पाकस्य साक्षात् गृहावृत्तित्वेऽपि स्वाश्रयकर्तृमत्वरूपकर्तृघटितपरंपरासंबन्धेनाधिकरणत्वमाधेयत्वं वा सप्तम्यर्थः पाकादिक्रियान्वयी।

''स्थाल्यामोदनं पचति'' इत्यादौ अधस्संतापनस्य पाकस्य साक्षात् स्थाल्यवृत्तित्वेऽपि स्वाश्रयकर्मवत्त्वरूपपरम्परासंबन्धेन अधिकरणत्वमाधेयत्वं वा सप्तम्यर्थः पाकादावन्वेति। अनुभवबलेन तथैव व्युत्पत्तेरिति वृद्धाः। तदाहुः —

कर्तृकर्मव्यवहितामसाक्षात् धारयत् क्रियाम्।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।। इति। (वाक्यपदीये)

एवं च कर्तृकर्मान्यतरद्वारा क्रियाश्रयत्वे सति तत्क्रियोपकारकत्वमधिकरणत्वमिति पर्यवसन्नम्।

वस्तुतस्तु — कर्तृकर्मान्यतरद्वारेत्येतत् परित्यज्य परंपरया क्रियाश्रयत्वमधिकरणत्वमित्येव वक्तव्यम्। अत एव प्राङ्गणस्थेन दीर्घदण्डादिना काष्ठादिचालनद्वारा गृहान्तर्वर्तिपाककरणे कर्तृद्वारा क्रियानाश्रयत्वेऽपि गृहस्य, ''गृहे पचति'' इति प्रयोग उपपद्यते।

न चैवं परंपरयेति व्यर्थमिति वाच्यम्। साक्षात् क्रियाश्रयेऽतिव्याप्तिवारकतया तत्सार्थक्यात्। तथाहि — अधस्संतापनं हि अधोवह्निसंयोगानुकूलकाष्ठवह्न्यादिव्यापारः, तस्य च साक्षात् वह्न्यादिवृत्तित्वात् 'काष्ठे वह्नौ वा पचति' इति प्रयोगः स्यात्। तद्वारणाय परंपरयेति।

एवं 'पथि गच्छति' इतिवत् 'स्वस्मिन् गच्छति' इति प्रयोगवारणमपि परंपरयेति निवेशस्य प्रयोजनम्।

न चैवं क्रियानिरूपिताधिकरणत्वस्यैव सर्वत्र सप्तम्यर्थत्वे विना क्रियायोगं 'भूतले घटः' इत्यादिप्रयोगो न स्यादिति वाच्यम्। इष्टत्वादिति वैयाकरणाः।

अधिकरणत्वमाधेयत्वं वा सप्तम्यर्थः। स च यत्र क्रियान्वयी तत्र कारकत्वव्यवहारः। अत एव 'भूतले घटः' इत्यादिक्रियाशून्यवाक्यात् भूतलनिरूपिताधेयतावान् घट इति शाब्दबोधो भवत्येवेति नैयायिकाः।

तत्र प्राञ्चः — ''गृहे स्थाल्यामोदनं पचति'' इत्यत्र परंपरासंबन्धेन गृहाधिकरणकस्थाल्यधिकरणकौदनकर्मकपाकानुकूलकृतिमानित्यन्वयधीः। ''भूतले घटः'' इत्यादौ सप्तम्या अधिकरणत्वमर्थः। तत्र प्रकृत्यर्थस्याधेयतासंबन्धेनान्वयः। अधिकरणत्वस्य निरूपकतासंबन्धेन घटेऽन्वयः। तथा च भूतलनिष्ठाधिकरणतानिरूपको घट इत्यन्वयधीरित्याहुः।

नव्यास्तु — निरूपकत्वस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकतया नञा निरूपकत्वसंबन्धावच्छिन्नप्रतियोगिताकाधिकरणत्वाभावस्य बोधयितुमशक्यतया "भूतले न घटः" इति वाक्यार्थानुपपत्तिरिति "भूतले घटः" इत्यादावाधेयत्वमेव सप्तम्यर्थः। तत्र प्रकृत्यर्थस्य निरूपितत्वसंबन्धेनान्वयः। आधेयत्वस्याश्रयता-संबन्धेनान्वयः। भूतलनिरूपिताधेयताश्रयो घट इति बोधः। "भूतले न घटः" इति वाक्यात् भूतलनिरूपिताधेयतानिष्ठाश्रयतासंबन्धावच्छिन्नप्रतियोगिताकाभाववान् घट इति बोधः। आश्रयत्वस्य वृत्तिनियामकत्वात् प्रतियोगितावच्छेदकत्वसंभवात् नानुपपत्तिरित्याहुः।

शब्दशक्तिप्रकाशिकानुसारेण अधिकरणसप्तम्यर्थनिरूपणम्[१]

यत्क्रियायां यादृशार्थः सप्तम्या विग्रहस्थया।
बोध्यस्तस्यां तदेवाधिकरणं नाम कारकम्।।

क्रिया धात्वर्थः। यद्धातूपस्थाप्ययादृशार्थे विग्रहस्थया सप्तम्या यो यः स्वार्थोऽनुभाव्यते तदेव तद्धातूपस्थाप्यतादृशक्रियायां अधिकरणं नाम कारकम्। 'ग्रामे गन्ता' इत्यत्र धात्वर्थे गतौ ग्रामनिष्ठमधिकरणत्वं तन्निरूपितमाधेयत्वं वा सप्तम्या अनुभाव्यत इति तदेव तद्धातूपस्थाप्यतादृशक्रियायामधिकरणकारकम्। अत एव ग्रामगन्तेत्यादिकस्तत्र समासः।

यद्यपि चैत्रादिनिष्ठायाः गतेः समवायादिना ग्रामादिवृत्तित्वं बाधितम्। कालिकादिना तद्वृत्तित्वं चातिप्रसक्तम्। 'स्पन्दे गच्छति' इत्यपि प्रयोगापत्तेः। तथापि 'ग्रामे गच्छत्ययं न तु गृहादौ' इत्यनुभवसाक्षिकेन स्वरूपसंबन्धविशेषेण ग्रामादिवृत्तित्वं बोध्यम्।

'घटत्वं घटे भासत' इत्यत्र विषयतापर्यवसन्ने धात्वर्थे भासने घटनिष्ठं विशेष्यत्वमवच्छेद्यतासंबन्धेन सप्तम्या अनुभाव्यत इति तत्रापि तदेव = विशेष्यत्वमेवाधिकरणतानामकं कारकम्। अत्रावच्छेद्यत्वं निरूपितत्वम्। घट-निष्ठविशेष्यतानिरूपितविषयताश्रयो घटत्वमिति बोधः।

"ज्ञाने घटत्वं भासते" इत्यादौ निरूपितत्वं अधिकरणत्वनामकं कारकम्। ज्ञाननिरूपितविषयताश्रयो घटत्वम् इति बोधः।

"घटे पटत्वं जानाति" इत्यादौ तु विशेष्यतारूपः सप्तम्यर्थः न धात्वर्थेऽन्वेति। पटः घटश्चेति समूहालम्बनप्रमास्थलेऽपि ज्ञाने घटविशेष्यकत्वस्य घटत्वप्रकार-

---

[१] श.श.प्र.पृ. ३१४

कत्वस्य पटविशेष्यकत्वस्य पटत्वप्रकारकत्वस्य च सत्त्वेन "घटे पटत्वं जानाति" इति प्रयोगस्य प्रामाण्यापत्तेः। किं तु द्वितीयार्थे पटत्वप्रकारताया-मवच्छेद्यत्वसंबन्धेन वा निरूपितत्वसंबन्धेन वान्वेति। घटनिष्ठविशेष्यतानिरूपित-पटत्वनिष्ठप्रकारतानिरूपकज्ञानवानिति बोधः। उक्तसमूहालम्बनप्रमीयपटत्वनिष्ठ-प्रकारतायां घटनिष्ठविशेष्यतानिरूपितत्वविरहात् न तादृशप्रयोगस्य प्रामाण्यापत्तिः। घटे पटत्वस्य भ्रमीयपटत्वनिष्ठप्रकारतायां घटनिष्ठविशेष्यतानिरूपितत्वसत्त्वात् 'घटे पटत्वं जानाति' इति प्रयोगस्य प्रामाण्योपपत्तिः।

अधिकरणपदस्य शक्यतावच्छेदकं तु न संबन्धमात्रम्। घटे घटतादात्म्य-रूपसंबन्धसत्त्वेन घटस्य घटाधिकरणत्वापत्तेः। नापि वृत्तिनियामकः संबन्धस्तथा। कुण्डे बदरस्येव बदरेऽपि कुण्डस्याधिकरणत्वापत्तेः, वृत्तिनियामकसंयोगस्य द्विष्ठत्वात्।

नाप्याधेयतानिरूपकत्वमधिकरणत्वम्। तुल्यन्यायेन अधिकरणतानिरूपकत्व-स्यैव आधेयतारूपत्वेन अन्योन्याश्रयप्रसङ्गात्।

परं तु आधेयतावत् पदार्थान्तरमेवाधिकरणत्वम्। तच्च नैकम्। सर्वस्य सर्वाधिकरणत्वापत्तेः। किं तु आधेयताभेदेन नानैव। अनुगतप्रतीतिस्तु इत्थम् — यथा रूपादीनां नानात्वेऽपि रूपत्वजातेरनुगतत्वात् तदवच्छिन्नविषयताकत्वेन रूपमित्यनुगतप्रतीतिः, तथा अधिकरणत्वानां नानात्वेऽपि अधिकरणतात्व-रूपाखण्डधर्मावच्छिन्नविषयताकत्वेन अधिकरणमित्यनुगतप्रतीतिरुपद्यत इति।

न चैकधर्मावच्छिन्नाधिकरणत्वं लाघवात् एकमेवोचितमिति वाच्यम्। रूपत्वेन नीलस्याधिकरणं स्फटिकमिति प्रयोगापत्तेः, शुक्लनिरूपिताधिकरणतायां नीलस्यापि निरूपकत्वात्।

अत एव तद्रूपरसयोः समनियतमप्यधिकरणत्वं भिन्नमेव, अन्यथा तद्रूपत्वेन तद्रसाधिकरणं घट इत्यादेरपि योग्यतापत्तेः।

व्युत्पत्तिवादोक्तरीत्या अधिकरणसप्तम्यर्थः[१]

आधारसप्तम्या आधेयत्वमर्थः। तस्य क्रियायामन्वयः। आधारत्वस्य सप्तम्यर्थत्वे "भूतले न घटः" इत्यादौ निरूपकत्वसंबन्धावच्छिन्नप्रतियोगिताकः एवाधिकरण-त्वाभावो बोधनीयः। स च वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितानवच्छेद-कत्वपक्षे न संभवतीति आधारत्वस्य सप्तम्यर्थत्वमुपेक्षितम्।

---

[१] पृ. २६८

आधाराधेयभावश्च न संयोगादिरूपसंबन्धात्मकः। कुण्डादिसंयोगिनो बदरादेरपि कुण्डाधारताप्रसङ्गात्। संयोगस्य समवायेनोभयत्र सत्त्वात्। अपि तु पदार्थान्तरमेव।

अथ वा उक्तातिप्रसङ्गभिया संयोगेनाधारत्वमेवातिरिक्तम्। समवायावच्छिन्नमाधारत्वं तु समवायरूपमेव। अयमाशयः — संबन्धान्तरस्य विशिष्टबुद्ध्यनुरोधेनैव कल्पनीयतया संयोगस्य न तथात्वम्। तस्य प्रत्यक्षप्रमाणेन द्विष्ठतया सिद्धस्यैव संबन्धत्वात्। एवं च संयोगस्याधारत्वरूपत्वे बदरे कुण्डाधारत्वप्रसङ्गो दुर्वारः। उक्ताधिकरणत्वस्य तु विशिष्टबुद्ध्यनुरोधेनैव कल्पनीयतया यत्रैव विशिष्टप्रतीतिस्तत्रैव कल्पनाददोषः। न च संयोगवत् समवायस्यापि संबन्धत्वेन द्विनिष्ठतया पटस्य रूपाधिकरणतावत् रूपस्य पटाधिकरणताप्रसङ्ग इति वाच्यम्। तथा सति अधिकरणत्वस्यापि संबन्धत्वेन द्विनिष्ठतया तादृशातिप्रसङ्गस्य दुर्वारत्वात्।

यदि चाधारताया आधारेऽनुयोगित्वं संबन्धः, आधेये च प्रतियोगित्वमिति संबन्धवैलक्षण्यान्नातिप्रसङ्गः, आधारतानुयोगिताया एवाधारव्यवहारप्रयोजकत्वात् रूपादौ आधारतानुयोगित्वविरहात् इत्युच्यते तदा समवायस्यापि आधारेऽनुयोगित्वं संबन्धः आधेये च प्रतियोगित्वमिति संबन्धवैलक्षण्येनातिप्रसङ्गवारणसंभवात् अतिरिक्ताधारतायां प्रमाणाभावः।

यत्तु स्पर्शाद्याधारवाय्वादे रूपाद्याधारतावारणाय आधेयभेदेनाधारत्वमतिरिक्तमिति। तदसत्। आधेयभेदेन भिन्नानामधिकरणतानां समवायस्य च कल्पनामपेक्ष्य आधेयभेदेन समवायभेदस्यैव उपगन्तुं युक्तत्वात्।

अथ संयोगेनाधिकरणत्वमपि संयोगरूपमेवास्तु, कुण्डबदरादिसंयोगानां कुण्डादिकमनुयोगि न तु बदरादिकमिति नातिप्रसङ्गः, बदरे संयोगानुयोगिताविरहात्।

न चैवमपि कुण्डस्य कुण्डनिष्ठः यः बदरसंयोगः तदनुयोगितया कुण्डाधारतापत्तिरिति वाच्यम्। तादृशसंयोगस्य कुण्डनिष्ठत्वेऽपि कुण्डप्रतियोगिकत्वानङ्गीकारात् तत्प्रतियोगिकसंबन्धानुयोगिताया एव तदाधारताव्यवहारप्रयोजकत्वात्। कुण्डे कुण्डप्रतियोगिकसंयोगाधारता नास्तीति न कुण्डाधारताप्रसङ्गः।

न चासौ संयोगः कुण्डे बदरविशिष्टबुद्धिप्रयोजकतया बदरे कुण्डविशिष्टबुद्धिप्रयोजकतया च उभयानुयोगिकः उभयप्रतियोगिकश्चेति बदरे कुण्डाधारत्वं दुर्वारमिति वाच्यम्। आधेये अधिकरणविशिष्टबुद्धेरप्रामाणिकत्वात्। कुण्डे बदरमित्यादिविशिष्टबुद्धौ संयोगप्रतियोगिताया एव संबन्धत्वात्, "घटे रूपम्" इत्यादौ समवायप्रतियोगितावत्। अन्यथा तादृशविशिष्टबुद्धिबलात् रूपादावपि घटादि-

समवायानुयोगिताप्रसङ्गादिति चेत् — मा भूत् संयोगसंबन्धावच्छिन्नाधारत्वमप्यतिरिक्तम्।

यत्तु — तत्पतनप्रतिबन्धकसंयोगवत्त्वं तदाधारत्वम्। कुण्डादिपतनप्रतिबन्धकसंयोगवत्त्वं च न बदरादौ तत्संयोगसत्त्वेऽपि कुण्डस्य पतनादिति। तन्न। यस्य पतनमप्रसिद्धं तदाधारस्य असंग्रहात्। स्वस्मिन् (बदरे) स्वपतनप्रतिबन्धककुण्डसंयोगसत्त्वेन स्वस्यापि स्वाधारताप्रसङ्गाच्च।

न च स्वान्यत्वे सति स्वपतनप्रतिबन्धकसंयोगवत्त्वम् स्वनिरूपितमाधारत्वम् अतो नोक्तदोष इति वाच्यम्। एतदज्ञानेऽप्यधिकरणमिति व्यवहारात्।

एवं च आधारत्वमतिरिक्तः पदार्थः। अथ वा तत्तत्संबन्धावच्छिन्नाधारत्वं तत्तत्संबन्धरूपं, नातिरिक्तम् इति पक्षद्वयं भट्टाचार्याभिमतमिति निर्णीयते।

आक्षेपः समाधानं च

अथ आधारसप्तम्याः आधेयतार्थकत्वे ''भूतले वर्तते घटः'' इत्यादौ धात्वर्थस्य वृत्तेः आधेयतारूपत्वेन तत्र भूतलाधेयत्वाभावेन अयोग्यत्वात् अनन्वयप्रसङ्ग इति चेत् — तत्र निरूपकत्वस्यैवाधारतारूपत्वेन निरूप्यत्वस्यैव सप्तम्यर्थत्वात्। तथा च ''भूतले वर्तते घटः'' इत्यत्र सप्तम्याः निरूप्यत्वमर्थः। तत्र निरूपितत्वसंबन्धेन भूतलस्य अन्वयः। सप्तम्यर्थस्य निरूप्यत्वस्याश्रयतासंबन्धेन वृतुधात्वर्थे आधेयत्वेऽन्वयः। तस्य निरूपितत्वसंबन्धेन आख्यातार्थे आश्रयत्वेऽन्वयः। आश्रयत्वस्य स्वरूपसंबन्धेन प्रथमान्तार्थघटेऽन्वयः। भूतलनिरूपितनिरूप्यत्वाश्रयाधेयतानिरूपिताश्रयतावान् घट इति बोधः।

अत एव ''इति हेतुस्तदुद्भवे'' इत्यादौ हेतौ हेतुत्वे वा उद्भवपदार्थोत्पत्तिवृत्तित्वाभावेऽपि हेतुतायामुत्पत्तिनिरूपितत्वसत्त्वेन सप्तम्युपपत्तिः। इति त्रयः समुदिताः काव्योत्पत्तिनिरूपितहेतुतावदभिन्ना इति बोधः।

अथ वा ''भूतले घटो वर्तते'' इत्यत्र सप्तम्याः आधेयत्वमेवार्थः। तत्र निरूपितत्वसंबन्धेन भूतलस्यान्वयः। वृतुधातोराधारत्वमर्थः। तत्र सप्तम्यर्थस्याधेयत्वस्य आश्रयतासंबन्धेनान्वयः। आख्यातार्थः निरूपकत्वरूपं कर्तृत्वम्। तस्य आश्रयतासंबन्धेन घटेऽन्वयः। भूतलनिरूपिताधेयत्वाश्रयाधिकरणतानिरूपकः घटः इति बोधः। भूतलनिष्ठाधिकरणतानिरूपक इति यावत्।

अथ आधारसप्तम्या धात्वर्थे प्रकृत्यर्थाधिकरणकत्वं यदि बोध्यते तदा ''चैत्रे चैत्रो गच्छति'' इति प्रयोगापत्तिः। तत्र धात्वर्थक्रियायाः चैत्रवृत्तित्वात्। ''भुवि

गच्छति'' इति प्रयोगश्च न स्यात्। चैत्रनिष्ठक्रियायाः भूवृत्तित्वाभावात् इति चेत् — न। तत्र स्वाश्रयकर्त्राश्रयत्वरूपपरम्परासंबन्धावच्छिन्नाधारताया एव सप्तम्यर्थत्वात्। परम्परासंबन्धस्यापि प्रतीतिबलेन क्वचिदाधाराधेयभावनियामकत्वोपगमात्।

एवमवच्छेद्यताविशेषोऽप्याधारसप्तम्यर्थः। यथा ''वीणायां शब्दः, वृक्षाग्रे कपिसंयोगः'' इत्यादौ। वीणावच्छेद्यः शब्दः वृक्षाग्रावच्छेद्यः कपिसंयोग इति बोधः। एषु कारकतानिर्वाहाय भवतीत्यध्याहारः।

अथ वा ''सप्तम्यधिकरणे च''[१] इति चकारेण अकारकाधारवाचिनोऽपि सप्तमी। अत एव साध्यवद्भिन्नसाध्याभाववदवृत्तित्वमित्यत्र साध्यवद्भिन्ने यः साध्याभाव इति सप्तमीतत्पुरुषेण व्याख्यानं संगच्छते। तत्र क्रियाध्याहारे समासाघटकतत्सापेक्षतया असामर्थ्येन समासानुपपत्तेः।

पदवाक्यरत्नाकरानुसारेण आधारसप्तम्यर्थनिरूपणम्[२]

अधिकरणत्वमाधेयत्वं वा सप्तम्यर्थः। तच्चाधेयत्वं ''स्थाल्यामोदनं पचति'' इत्यादौ स्वाश्रयौदनवृत्तित्वरूपेण कर्मघटितपरम्परासंबन्धेन धात्वर्थे फलेऽन्वेति। स्वं विक्लित्तिरूपं फलम्। स्थालीनिरूपिता या आधेयता तदाश्रयओदनवृत्तिविक्लित्त्यनुकूलव्यापारानुकूलकृतिमानिति बोधः।

''गेहे चैत्रः पचति'' इत्यादौ सप्तम्यर्थस्याधेयत्वस्य स्वाश्रयचैत्रवृत्तित्वरूपेण कर्तृघटितपरम्परासंबन्धेन धात्वर्थक्रियायामन्वयः। गेहनिरूपिताधेयताश्रयचैत्रवृत्तिः या विक्लित्त्यनुकूलाक्रिया तदनुकूलकृतिमांश्चैत्र इति बोधः।

''यस्मिन्नग्नौ पचेदन्नं तत्र होमो विधीयते'' इत्यादावग्निपदमग्न्यधिष्ठितस्थालीपरम्। तन्निरूपितमाधेयत्वं स्वाश्रयान्नवृत्तित्वसंबन्धेन पच्यर्थफलेऽन्वेति।

अथ वा वह्निनिरूपिताधेयत्वाश्रयवृत्तित्वं सप्तम्यर्थः। स्वं प्रकृत्यर्थः। तस्य यथायथं फले क्रियायां वा अन्वयः। अत एव 'तत्र होमो विधीयत' इत्यत्र तच्छब्देन वह्नेः परामर्शो घटते।

''मिथिलास्थो राजा पाटलिपुत्रे ब्राह्मणेभ्यो ददाति'' इत्यादौ सप्तम्यर्थो न संप्रदानघटितसंबन्धेन धात्वर्थे अपि तु साक्षात् ब्राह्मणेषु। पाटलिपुत्रनिष्ठब्राह्मणेभ्यो ददातीत्यर्थः।

---

[१] सू. २.३.३६

[२] प.वा.र.पृ. ८२७

एवं "गिरौ वृक्षात् पर्णं पतति" इत्यत्रापि सप्तम्यर्थो वृक्षेऽन्वेति। न तु अपादानघटितपरंपरया पतने।

यदाहुः —

कर्तृकर्मव्यवहितामसाक्षात् धारयत् क्रियाम्।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।। इति।

अन्ये तु दैशिककालिकान्यतरसंसर्गावच्छिन्नमधिकरणत्वमाधेयत्वं वा सप्तम्यर्थः, यथा "भूतले घटोऽस्ति, इदानीं घटोऽस्ति" इत्यादौ। तादृशं च क्रियाधिकरणत्वं कर्तृकर्माधिकरण एव स्वीक्रियते, न संप्रदानाद्यधिकरणे इति वदन्ति। संप्रदानादीनां धात्वर्थफलव्यापारयोरेकतरस्याप्यनधिकरणत्वात् इति तेषामाशयः।

अत्र च क्वचिदाख्यातोपस्थितकालावच्छिन्नमधिकरणत्वमेव सप्तम्या प्रत्याय्यते। गृहान्निर्गत्याङ्गणे पचमाने चैत्रे 'गेहे चैत्रः पचति' इति न प्रयोगः। क्वचिदन्यकालावच्छिन्नमप्यधिकरणत्वं सप्तम्या प्रत्याय्यते, यथा — भाविनीं चैत्राधिकरणतामभिसन्धाय 'ग्रामे गच्छति' इति।

"आतपे तिष्ठति" इत्यादावातपपदं तत्संयुक्तप्रदेशपरम्।

सविषयार्थकधातुसंवलिता सप्तमी विशेष्यतानिरूपकप्रकारतास्वरूपां वैज्ञानिकीमाधेयतामभिधत्ते। "शुक्तौ रजतत्वं जानाति इच्छति वा" इत्यादौ शुक्तिनिष्ठविशेष्यतानिरूपकप्रकारत्वं रजतत्वात्मककर्मघटितपरंपरया (स्वाश्रयरजतत्वप्रकारकत्वसंबन्धेन?) धात्वर्थज्ञानादावन्वेति।

विभक्त्यर्थनिर्णये[१] आधारसप्तम्यर्थनिरूपणम्

ङि ओस् सुप् इति त्रयः प्रत्ययाः। अत्र ङकारः पकारश्च अनुबन्धः क्वचिदप्यश्रूयमाणत्वान्न वाचकताकुक्षिप्रविष्टः। "सरसि सरसोः सरःसु वा संचरति" इत्यादौ श्रूयमाणत्वात् इकारस्य इत्वेन ओसस्तत्वेन सोः सुत्वेन वाचकत्वम्। अनुशासनसिद्धश्च सप्तम्या अर्थः "सप्तम्यधिकरणे च"[२] इति। चकारात् दूरान्तिकार्थकशब्देभ्योऽपि सप्तमी भवति यथा दूरे विप्रकृष्टे सविधे अन्तिके इत्यादौ। तत्राधिकरणमधिकरणत्वमाधेयत्वं वा सप्तम्या अर्थ इति वक्ष्यते। अधिकरणपदसंकेतग्राहकं पूर्वमुक्तम् "आधारोऽधिकरणम्"[३] इति सूत्रं कर्तृकर्मद्वारा क्रियाया

[१] पृ. ४३६ - ४३९
[२] सू. २.३.३६
[३] सू. १.४.४५

आधारोऽधिकरणसंज्ञः स्यादित्यर्थकम्। अनभिहितेऽधि करणे सप्तमी भवति। 'पचनी स्थाली' इत्यादौ न सप्तमी। अधिकरणादेः सप्तम्यर्थस्य कर्तृकर्मान्यतरद्वारकस्यैव क्रियायामन्वयात् कारकत्वम्, न तु कारकान्तरद्वारकाधिकरणस्य क्रियायामन्वयः।

यदाहुः —

कर्तृकर्मव्यवहितमसाक्षाद्धारयत् क्रियाम्।
उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्।।

इति। उपकुर्वत् क्रियासहकारि। निरधिकरणयोः कर्तृकर्मणोः क्रियासिद्ध्यनुपार्जकत्वात् अधिकरणस्य क्रियासिद्धिसहकारित्वम्। न च "गगनमस्ति गगनं जानाति" इत्यादौ निरधिकरणस्य कर्तुः कर्मणश्च क्रियासिद्ध्युपयोगित्वात् नेदं युक्तमिति वाच्यम्। कालाधिकरणस्य गगनादेः सत्तादिक्रियाकर्तृत्वकर्मत्वयोगित्वात् 'इदानीं गगनमस्ति' 'इदानीं गगनं जानाति' इति प्रत्ययात्।

न चैवं "काशीस्थो राजा मथुरायां ब्राह्मणेभ्यो ददाति, गिरौ वृक्षात् पर्णमधो गच्छति" इत्यादौ संप्रदानापादानाधिकरणयोः क्रियाविषयकप्रतीतिविषयत्वात् क्रियायां कुतो नान्वय इति वाच्यम्।

निर्वर्त्यविकार्ययोरेव कर्मणोः कर्तृत्वविवक्षायां कर्मवद्भावस्येव कर्तृकर्माधिकरणयोरेव क्रियायामन्वयस्य आचार्यैरभ्युपगमात्। तस्मात् कर्तृकर्मान्यतरद्वाराधिकरणं क्रियान्वयित्वात् कारकमिति।

"एवं कटे आस्ते चैत्रः, गेहे पचति मैत्रः" इत्यादौ कर्तृघटितपरंपरासंबन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थः। तच्च प्रकृत्यर्थविशेषितं व्यापारेऽन्वेति। "स्थाल्यामोदनं पचति चैत्रः, तरौ फलं गच्छति शकुनिः" इत्यादौ कर्मघटितपरम्परासंसर्गावच्छिन्नाधेयत्वं सप्तम्यर्थः। तच्च प्रकृत्यर्थविशेषितं फलेऽन्वेति। तथा च कटनिरूपितस्वाश्रयचैत्राश्रयत्वसंबन्धावच्छिन्नाधेयत्वाश्रयः उपवेशनम् (स्वं उपवेशनक्रिया) गेहनिरूपितस्वाश्रयमैत्राश्रयत्वसंबन्धावच्छिन्नाधेयताश्रयः पचनं, स्थालीनिरूपितस्वाश्रयौदनाश्रयत्वसंबन्धावच्छिन्नाधेयतावत् यत् फलं (विक्लित्तिः) तदनुकूलो व्यापारः, तरुनिरूपितस्वाश्रयफलाश्रयत्वसंबन्धावच्छिन्नाधेयताश्रयः यः संयोगः तदनुकूलो व्यापारः इत्यन्वयबोधः।

ननु दर्शिततत्तत्संसर्गावच्छिन्ननानाविधाधेयत्वस्य सप्तम्यर्थत्वे गौरवात् अधिकरणमेव सप्तम्यर्थो लाघवात्। अधिकरणस्य स्वनिरूपिततत्तत्संबन्धावच्छिन्ना-

धेयत्वेन संबन्धेन फलव्यापारयोरन्वयाभ्युपगमान्नानुपपत्तिरिति शाब्दिकमतमेव सम्यगिति चेत् —

मैवम्। अधिकरणताविशिष्टस्याधिकरणस्य तथात्वे गौरवात् आधेयत्वस्य तथात्वे लाघवात् इत्यादेः द्वितीयाविवरणे दर्शितत्त्वात्।

न चाधिकरणतात्वस्याखण्डोपाधितया शक्यतावच्छेदकलाघवात् अधिकरणत्वस्य तथात्वमस्तु इति शक्यम्। परम्परान्वयिनोऽधिकरणत्वस्यापेक्षया साक्षादन्वयिनः आधेयत्वस्यैव तथात्वौचित्यात्।

न च नानासंबन्धावच्छिन्नत्वस्याधेयत्वे प्रवेशात् गौरवमिति वाच्यम्। अधिकरणत्वादावपि तुल्यत्वात्। यदि च अधिकरणत्वादेर्नानासंसर्गावच्छिन्नाधेयत्वेन संबन्धेनान्वय इति मन्यते, तदा आधेयत्वमेव सप्तम्यर्थः। तस्य कर्तृघटितपरंपरासंबन्धावच्छिन्नाधेयत्वीयस्वरूपसंबन्धेनान्वय इति नानुपपत्तिः।

वृत्त्यनियामकसंबन्धस्य प्रतियोगितानवच्छेदकत्वमतेऽधिकरणत्वादेः सप्तम्यर्थत्वं न युज्यते। "गेहे न पचति पक्ता वा" इत्यादौ निषेधप्रतीत्यनुपपत्तेरित्यादिकं द्वितीयाविवरणे दर्शितम्।

फलव्यापारयोः स्वाश्रयसंबन्धावच्छिन्नाधेयत्वस्य सप्तम्यर्थस्यान्वयोऽभ्युपेयते। स्वाश्रयसंबन्धस्तु क्वचित् संयोगः, यथा "कटे आस्ते चैत्रः" इत्यादौ कर्तृसंयोगः, "स्थाल्यामोदनं पचति" इत्यादौ कर्मसंयोगः। क्वचित् समवायः "घटे रूपमस्ति" इत्यादौ कर्तृसमवायः। "अमुष्मिन् गां विक्रीणीते" इत्यादौ कर्मणो गोः स्वामित्वम्। तथा "घटे नीलरूपं करोति" इत्यादौ कर्मसमवायः। क्वचित् कालिकविशेषणता यथा "पौर्णमास्यां चन्द्रं ग्रसते राहुः" इत्यादौ कर्तृकर्मणोः कालिकविशेषणता। क्वचित् विषयता यथा "मोक्षे इच्छा अस्ति" इत्यादौ कर्तृविषयता। "घटे चाक्षुषं जनयति सूयते वा चक्षुष्मान्" इत्यादौ कर्मविषयता। क्वचिदन्यादृशोऽपि स्वाश्रयसंबन्धः प्रयोगानुसारात् बोध्यः।

अपादानादेः फलव्यापारयोरनधिकरणत्वात् तदधिकरणनिरूपितस्य दर्शितसंबन्धावच्छिन्नाधेयत्वस्याप्रसिद्धेः अपादानाद्यधिकरणस्य न कारकत्वमित्यतः कर्तृकर्मणोरेवाधिकरणयोः कारकत्वमाचार्या मन्यन्ते।

गुरुचरणास्तु — "कटे आस्ते चैत्रः" इत्यादौ संयोगावच्छिन्नमाधेयत्वं कर्तृनिष्ठं, "स्थाल्यामोदनं पचति" इत्यादौ संयोगावच्छिन्नमाधेयत्वं कर्मनिष्ठं सप्तम्यर्थः। कर्तृकर्मनिष्ठाधेयत्वयोः सामानाधिकरण्येन संबन्धेन व्यापारफलयोरन्वय इत्यपादानादिनिष्ठाधेयत्वस्य सामानाधिकरण्येन धात्वर्थेऽन्वयासंभवात् नापादानाद्यधि-

करणस्य कारकत्वम्। एवमाधेयत्वं क्वचिदाख्यातोपस्थापितकालावच्छिन्नं सप्तम्या प्रत्याय्यते। अतो गेहान्निर्गत्य प्राङ्गणे पचमाने चैत्रे "गेहे चैत्रः पचति" इति न प्रयोगः। क्वचिदन्यकालावच्छिन्नमप्याधेयत्वं तथा, यथा भाविनीं चैत्राधिकरणतामादाय "चैत्रो ग्रामे गच्छति" इति प्रयुज्यते। आतपे तिष्ठतीत्यादावातपपदमातपसंयुक्तदेशपरम्। अतो नानुपपत्तिः।

सविषयकार्थकधातुयोगे विशेष्यतानिरूपितप्रकारत्वस्वरूपं वैज्ञानिकमाधेयत्वं सप्तम्यर्थः। यथा "शुक्तौ रजतं जानाति" इत्यादौ शुक्तिनिष्ठविशेष्यतानिरूपितप्रकारत्वं रजतत्वात्मककर्मघटितपरंपरया ज्ञानादावन्वेतीति पदवाक्यरत्नाकरे प्राहुः।

सप्तमीविधाने "क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्"[१] इति वार्तिकं क्तान्तप्रकृतिकेनिप्रत्यययोगे कर्मणि सप्तमीं विधत्ते। कर्मणि सप्तमीविधानं नित्यमित्येके। वैकल्पिकमित्यन्ये। "अधीती वेदेषु वेदान्वा" इत्यादौ "इष्टादिभ्यश्च"[२] इति सूत्रेण विहितस्य तद्धिते निप्रत्ययस्य कर्ता अर्थः। सप्तमीद्वितीययोः कर्मत्वमर्थः। तथा च वेदकर्मताकाध्ययनकर्तेत्यन्वयबोधः।

एवम् "इष्टी सुरेषु सुरान्वा" इत्यादौ संप्रदानत्वस्वरूपं कर्मत्वं सप्तमीद्वितीययोरर्थः। तथा च सुरसंप्रदानताकयजनकर्तेत्यन्वयबोधः।

"परिगणिती याज्ञिके याज्ञिकं वा" इत्यादौ याज्ञिककर्मताकपरिगणनकर्ता वाक्यार्थः। "आम्नीती छन्दसि छन्दो वा" इत्यादौ छन्दःकर्मकाम्नानकर्ता वाक्यार्थः। आम्नानमुच्चारणम्।

भाट्टरहस्यानुसारेण आधारसप्तम्यर्थनिरूपणम्[३]

एवं सप्तम्यर्थोऽपि भावनायामेवान्वेति। स च "सप्तम्यधिकरणे च"[४] इति सूत्रानुशिष्टमधिकरणत्वम्। तच्च "आधारोऽधिकरणम्"[५] इति सूत्रनिरुक्तम्।

पूर्वपक्षः

ननु किं नाम अधिकरणत्वम्। न तावत् येन केनचित् संबन्धेन संबन्धित्वम्। रूपरसादीनामपि परस्पराश्रयत्वापत्तेः, कालिकसंबन्धेन संबन्धित्वात् तेषाम्। नापि स्वाधेयसंबन्धित्वम्। आधेयत्वस्यैव निर्वक्तुमशक्यत्वात्। तस्य स्वाधिकरण-

[१] वा. १४८५
[२] सू. ५.२.८८
[३] भा.र.पृ. १५७
[४] सू. २.३.३६
[५] सू. १.४.४५

संबन्धित्वरूपत्वेऽन्योन्याश्रयप्रसङ्गात्। नापि कारणत्वम्। निमित्तकारणादावति-व्याप्तेः। नापि समवायिकारणत्वम्। संयोगेन घटाद्याश्रये भूतले, घटत्वादिजात्याश्रये घटादौ, समवायाश्रये च घटादौ अव्याप्तेः। तेषां घटादिनिरूपितसमवायि-कारणत्वविरहात्।

नैयायिकैकदेशिमतम्

यत्तु — तद्भिन्नत्वे सति तत्पतनप्रतिबन्धकसंयोगवन्मूर्तत्वं पतनवन्निरूपिताधि-करणत्वम्। पर्णपतनप्रतिबन्धकवृक्षपर्णसंयोगस्य द्विनिष्ठतया पर्णेऽपि सत्त्वात् पर्णस्य पर्णाधिकरणत्वापत्तिः। तद्वारणाय सत्यन्तम्। ब्रह्माण्डादिधारकसंयोगा-श्रयेश्वरवारणाय मूर्तपदम्।

वस्तुतस्तु "यस्मिन् सर्वं प्रतिष्ठितम्, येनेदं धार्यते जगत्" इत्यादिवचनात् ईश्वरेऽप्यस्त्येवाधिकरणत्वम्। इतरथा ब्रह्माण्डादिधारकत्वस्यैवानुपपत्तेः। अतो मूर्तपदं नैव देयम्।

लक्ष्यं तु द्रव्यनिरूपिताधिकरणत्वम्। आकाशादीनां तु प्रमाणाभावादेव न द्रव्याधारत्वम्, आधेयत्ववत्। ईश्वरे तु उक्तवचनात् आधारत्ववत् आधेयत्वमपि "यः पृथिव्यां तिष्ठन् पृथिवीमन्तरो यमयति" "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति"[१] इत्यादिश्रुतिस्मृतिवशादस्त्येव। गुणादिनिरूपितमधिकरणत्वं समवायि-त्वम्। समवायादिनिरूपितं च तत्तत्स्वरूपसंबन्धित्वमिति मतम्। तन्न। अननुग-मात्, सप्तम्याः नानार्थकत्वापत्तेश्च।

सिद्धान्तः

अत्रोच्यते। अनुगताकारप्रतीत्या प्रतियोगित्वादिवत् अधिकरणत्वम् आधेयत्वं चाखण्डोपाधिरूपम्। शक्यतावच्छेदकैक्यानुरोधेन करणत्वादिवत् पदार्थान्तर-कल्पने बाधकाभावात्। यत्र हि सखण्डपदार्थस्यैव शक्यतावच्छेदकतया प्रतीति-रानुभविकी न तत्र पदार्थान्तरकल्पनम्। यथा विश्वादिपदेषु?

यत्र तु तद्धटकपदार्थाप्रतीतावपि तत्प्रतीतिः तत्र शाब्दव्यवहारानुरोधादपि तत्कल्पनमसकृदावेदितम्।

---

[१] गी. १८-६१

तार्किकमतम्

तत्र आधेयत्वम् आधेयत्वत्वेन सप्तम्यर्थः। तत्र निरूपकत्वसम्बन्धेन (निरूपितत्वसंबन्धेन?) प्रातिपदिकार्थस्य भूतलादेरन्वयः सप्तम्यर्थस्याधेयत्वस्यानुयोगिता (आश्रयता) संबन्धेन घटादावन्वयः। तेन "भूतले घटः" इत्यत्र भूतलनिरूपिताधेयतावान् (भूतलवृत्तिः) घट इति शाब्दबोध इति तार्किकाः।

तन्मतखण्डनम्

तन्न। "सप्तम्यधिकरणे च"[1] इत्यनुशासनविरोधात्। "भूतले घटः, गृहे पचति" इत्यादौ सर्वत्र ऐकरूप्येण अन्वयानङ्गीकारेण अनेकव्युत्पत्तिकल्पनापत्तेश्च।

अतोऽधिकरणत्वमेव सप्तम्यर्थः।

स्वमतम्

यद्यपि संयोगसमवायाद्यवच्छिन्नाधिकरणत्वानि भिन्नानि। तथाप्यधिकरणत्वत्वस्य शक्यतावच्छेदकस्यैकत्वात् न नानार्थकत्वम्।

"भूतले घटः" इत्यत्र अस्तीत्यध्याहारात् सप्तम्यर्थस्य अधिकरणत्वस्य स्वनिरूपकघटवृत्तित्वसंबन्धेन आख्यातार्थे धात्वर्थसत्तानिरूपिते आश्रयत्वेऽन्वयः। भूतलनिष्ठाधिकरणतानिरूपकघटवृत्तिवर्तमानसत्ताश्रयत्वं घटवृत्तीति च शाब्दबोधः।

न च पूर्वं घटे भूतलस्थे संप्रति चाधिकरणान्तरस्थे 'भूतले घटोऽस्ति' इति प्रयोगापत्तिरिति वाच्यम्। यादृशकालबोधकप्रत्ययबोध्यक्रियायां सप्तम्यर्थाधिकरणत्वान्वयः तद्बलेन तादृशकालावच्छिन्नाधिकरणत्वस्यैव व्युत्पत्तिविशेषेण सप्तम्या बोधनात्।

"गृहे चैत्रः पचति" इत्यत्र सप्तम्यर्थस्याधिकरणत्वस्य स्वनिरूपकचैत्रवृत्तित्वसंबन्धेन आख्यातार्थपाकभावनायामन्वयः। गृहनिष्ठाधिकरणतानिरूपकचैत्रवृत्तिः पाकानुकूला भावना चैत्रवृत्तिः इति बोधः। "स्थाल्यामोदनं पचति" इत्यत्र सप्तम्यर्थस्याधिकरणत्वस्य स्वनिरूपकौदनकर्मकत्वसंबन्धेन तस्यामेवान्वयः। गृहनिष्ठाधिकरणतानिरूपकौदनकर्मिका (कर्मकपाकानुकूला) पाकानुकूला चैत्रवृत्तिः भावनेति शाब्दबोधः।

अत एव सर्वत्र सप्तम्यर्थस्य स्वनिरूपककर्तृकर्मान्यतरद्वारक एवाख्यातार्थान्वयः, न तु कारकान्तरद्वारकः साक्षाद्वा। "काश्यां ब्राह्मणेभ्यः प्रयच्छति"

[1] सू. २.३.३६

इत्युक्ते कर्तुरेव झटिति काशीस्थत्वप्रतीतेः, न तु संप्रदानभूतब्राह्मणानां काशीस्थत्वं प्रतीयते।

यत्र तु "पाटलिपुत्रे स्थितो राजा काश्यां ब्राह्मणेभ्यः प्रयच्छति" इत्यादौ ब्राह्मणेषु काशीवृत्तित्वप्रतीतिः, तत्रापि स्थितेभ्यः इति पदाध्याहारेण स्थिति-कर्तृद्वारैव सप्तम्यर्थस्याधिकरणत्वस्य भावनायामन्वयः।

अत एव "भूभृति वृक्षात् पर्णं पतति" इत्यत्र स्थितात् इति पदाध्याहारं विना न झटिति भूभृद्वृत्तित्वप्रतीतिः भावनायाः। साक्षात्तु सप्तम्यर्थस्य भावनान्वयो गृहादीनां (गृहाद्यन्वितस्य?) बाधित एव। चैत्रादौ (चैत्राद्यन्वितस्य) तु सप्तम्यर्थस्य भावनान्वयः परया कर्तृसंज्ञया बाधितः। अतः सिद्धं कर्तृकर्मान्यतरद्वारक एव सप्तम्यर्थस्य भावनायामन्वय इति।

नन्वेवं कर्माविवक्षायां "ग्रामे गच्छति, ग्रामे गम्यते" इति प्रयोगानुपपत्तिः। ग्रामस्य कर्तृकर्मद्वारा गमनाधिकरणत्वाभावात्। न च तत्र सप्तम्याः लक्षणया उद्देश्यत्वमर्थः, ग्रामोद्देश्यकत्वं गमनेऽस्तीति नानुपपत्तिरिति वाच्यम्। तथापि पाके ओदनोद्देश्यकत्वविवक्षया 'ओदने पचति' इति प्रयोगापत्तेः। अत एव "ग्रामे गच्छति" इत्यत्र धात्वर्थतावच्छेदकसंयोगरूपफलद्वारा क्रियाधिकरणत्वं ग्राम-स्येत्यपि निरस्तम्। ओदनस्य विक्लित्तिरूपफलद्वारा क्रियाधिकरणत्वेन 'ओदने पचति' इति प्रयोगापत्तेः इति चेत् —

न। "ग्रामे गच्छति" इत्यत्र ग्रामस्य कर्तृद्वारा गमनाधिकरणत्वसंभवात्। यद्यपि गमनकाले ग्रामः न कर्तुश्चैत्रस्य अधिकरणम् अपि तु अन्यः प्रदेशः तथापि चैत्राधिकरणत्वं ग्रामस्य भावि इति चैत्रस्य भाविग्रामाधिकरणकत्वमादाय ग्रामाधिकरणकचैत्रवृत्तिगमनानुकूलकृतिमत्त्वस्य चैत्रेऽबाधात् 'ग्रामे गच्छति चैत्रः' इति प्रयोगे नानुपपत्तिः कापि। पाककर्तुस्तु सर्वदा ओदनाधिकरणकत्वाभावात् न 'ओदने पचति' इति प्रयोगापत्तिः।

नन्वेवमपि "अग्नौ पचति" "आतपे तिष्ठति" "आकाशे पक्षी गच्छति" "आकाशे तिष्ठन्नाकाशमन्तरो यमयति" इत्यादि प्रयोगाणामनुपपत्तिः। कर्तृकर्मा-न्यतरद्वारा अग्न्याद्यधिकरणकत्वस्य पाकादावभावात्। न च 'अग्नौ पचति' इति प्रयोगो नास्त्येवेति केषांचिदुक्तिर्युक्ता। "यस्मिन्नग्नौ पचेदन्नं तस्मिन् होमो विधीयते" इति बहुतरप्रयोगदर्शनात्।

न चाग्निसंयुक्तस्थालीसंयोगः पाककर्मणः ओदनस्य वर्तते। ततश्च संयुक्त-संयोगसंबन्धेन अग्न्यधिकरणकौदनकर्मकत्वात् पाकस्य, कर्मद्वारा उक्तसंबन्धेन

पाकाधिकरणत्वमग्नेरस्तीति नानुपपत्तिरिति वाच्यम्। संयुक्तसंयोगस्य वृत्त्यनियामकतया अधिकरणतावच्छेदकत्वाभावात्। अन्यथा "आकाशे मनुष्यस्तिष्ठति, चैत्रो मैत्रात्मनि तिष्ठति" इत्यादिप्रयोगापत्तेः। आकाशसंयुक्तभूतलादिसंयोगस्य मनुष्ये, मैत्रात्मसंयुक्तप्रदेशसंयोगस्य चैत्रे च सद्भावादिति चेत् —

'अग्नौ पचति' इत्यादिस्थले 'गङ्गायां घोषः' इत्यत्रेव अग्न्यादिपदस्य अग्न्यादिसंबन्धिस्थाल्यादिलक्षणया तन्निष्ठाधिकरणत्वस्य कर्तृकर्मान्यतरद्वारा क्रियान्वयोपपत्तेः। तेन 'अग्नौ पचति' इत्यस्य अग्निसंयुक्तस्थाल्यां पचतीत्यर्थः। 'आतपे तिष्ठति' इत्यस्य आतपसंयुक्ते गृहे तिष्ठतीत्यर्थः।

"आकाशे पक्षी गच्छति" आकाशपदस्य गमनप्रतिबन्धकभूप्रदेशानवच्छिन्नप्रदेशे लक्षणा। स प्रदेशः अन्तरिक्षमित्युच्यते। सप्तम्या अवच्छेदकत्वमर्थः। विषयत्वादिवत् तस्य विभक्त्या लक्षणायामपि न दोषः। तस्य उद्देश्यत्वादिवत् साक्षात्संबन्धेनैव गमनसंबन्धित्वम्। कर्तृकर्मद्वारा धात्वर्थसंबन्धित्वमिति नियमस्तु सप्तमीवाच्यस्याधिकरणत्वस्यैव, न तु सप्तमीलक्ष्यस्यावच्छेदकत्वादेः। धातुना च निराधारं गमनमुच्यते। तथा च गमनप्रतिबन्धकभूप्रदेशानवच्छिन्नप्रदेशनिष्ठावच्छेदकताकनिराधारगमनानुकूलकृतिः पक्षिनिष्ठेति बोधः।

"आकाशे तिष्ठन्नाकाशमन्तरो यमयति" इत्यादौ सप्तम्याः लक्षणया संयुक्तसंयोगावच्छिन्नसंबन्धित्वमर्थः। षष्ठ्यर्थस्यापि तस्य "सुपां सुलुक्०"[१] इत्यनुशासनसंमतं सप्तमीलक्ष्यत्वम्। तस्यापि धात्वर्थद्वारा कर्तृद्वारा वा भावनान्वयः। आकाशसंयुक्तसंयोगवाच्छिन्नसंबन्धिस्थित्यनुकूलभावना इति वा आकाशसंयुक्तसंयोगावच्छिन्नसंबन्धिईश्वरकर्तृका स्थित्यनुकूला भावना इति वा बोधः।

वस्तुतस्तु आकाशस्यापीश्वरोपादानकत्वात् उपादानत्वमेव सप्तम्यर्थः। तस्य कर्तृद्वारा भावनायामन्वयः। आकाशनिरूपितोपादानत्वाश्रयेश्वरकर्तृका स्थितिभावनेति बोधः। आकाशे उपादानकारणत्वादनुगतः तिष्ठन्निति फलितोऽर्थः।

अस्तु वा एतच्छ्रुतिवचनबलादेव आकाशेऽपि शब्दनिरूपिताधारतावत् अन्तर्यामीश्वरनिरूपिताधारत्वमपीति सप्तम्याः आधारत्वमेवार्थः। न तु लक्षणया अन्योऽर्थः। आकाशनिष्ठाधारतानिरूपकेश्वरकर्तृका स्थितिभावनेति शाब्दबोधः।

न चैवम् "अग्नौ पचति" इत्यादिप्रयोगाणां लक्षणयोपपादने "आकाशे मनुष्यस्तिष्ठति" इत्यादिप्रयोगापत्तिरिति वाच्यम्। यत्र प्रयोगः प्रामाणिकः तत्र

---

[१] सू. ७.१.३९

लक्षणया उपपादनम्, न तु क्वचिल्लक्षणाङ्गीकारमात्रेण अन्यत्रापि तथाङ्गीकारेण प्रयोगापत्तिः। आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इति न्यायात्। अन्यथा "गङ्गायां घोषः" इत्यादौ गङ्गापदेन गङ्गासंबन्धितीरलक्षणायाः सर्वसंमतत्वेन भवदुक्तप्रयोगापत्तेः निवारयितुमशक्यत्वात्।

यस्तु गृहात् बहिः स्थितेन कर्त्रा दीर्घदण्डादिना काष्ठचलनद्वारा गृहमध्ये पाककरणे 'गृहे पचति' इति प्रयोगः स कर्मकारकस्य तण्डुलादेः परंपरया गृहाधिकरणकत्वात् कर्मद्वारकगृहाधिकरणकत्वस्य पाके सत्त्वेन नानुपपन्नः।

भूतले घटो नास्ति इत्यादौ बोधविचारः

नन्वेवमपि "भूतले घटो नास्ति, चैत्रो गृहे न पचति" इत्यादौ सप्तम्यर्थस्याधारत्वस्य कथं कर्तृकर्मान्यतरद्वारकोऽन्वयः। न हि तत्र भूतलनिष्ठाधिकरणतानिरूपकघटवृत्ति सत्ताश्रयत्वम् अभावप्रतियोगि इत्येवं शाब्दबोधः संभवति। भूतले घटसत्तादशायामपि "भूतले घटो नास्ति" इति प्रयोगापत्तेः, भूतलाधिकरणकघटवृत्तिसत्ताश्रयत्वस्य भूतलावृत्तिपटवृत्त्यभावप्रतियोगित्वात्। न च तत्र नञा घनिष्ठाभावो लक्ष्यते, भूतलनिष्ठाधिकरणतानिरूपकघटनिष्ठसत्ताश्रयत्वं घटनिष्ठाभावप्रतियोगीति शाब्दबोध इति वाच्यम्। प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनोऽप्रसिद्धेः। घटस्य भूतले असत्त्वे हि घटनिष्ठाभावप्रतियोगित्वं सत्ताश्रयत्वे भवेत्। तथा चेत् भूतलनिष्ठाधिकरणतानिरूपकघटनिष्ठसत्ताश्रयत्वं कथं प्रसिध्येत्।

अपि च "भूतले घटो नास्ति" इति वाक्यात् अनुभूयमानस्य घटत्वावच्छिन्नप्रतियोगिताकभूतलाधिकरणकाभावबोधस्यापलापापत्तिश्च।

न च भूतलनिष्ठाधिकरणतानिरूपकः घटत्वावच्छिन्नप्रतियोगिताकोऽभावोऽस्तीति बोधः तस्मात् वाक्यात् जायत इति वाच्यम्।

भूतलनिष्ठस्याधिकरणत्वस्य सप्तम्यर्थस्याभावद्वारकत्वापत्त्या कर्तृकर्मद्वारकत्वनियमभङ्गापत्तेः। घटस्य प्रतियोगितासंबन्धेनाभावेऽन्वये धात्वर्थाश्रयत्वाभावेन कर्तृत्वाभावात् घटपदोत्तरं प्रथमानुपपत्तेश्च। भूतलवृत्तिघटप्रतियोगिकाभावस्य कर्तृत्वोक्तौ तस्यैकत्वात् 'घटौ न स्तः' इति द्विवचनानुपपत्तेश्च। 'घटौ नास्ति' इति प्रयोगापत्तेश्च।

न च नञर्थाभावस्य प्रतियोगितासंबन्धेन घटेऽन्वयः, अभावे च भूतलाधिकरणकत्वस्यान्वयः, भूतलाधिकरणकाभावप्रतियोगी घटोऽस्तीति शाब्दबोध

इत्यङ्गीकारात् न पूर्वोक्तदोष इति वाच्यम्। अतीते भाविनि वा 'घटे अस्ति' इति वर्तमानकालान्वयानुपपत्तेः 'घटो नास्ति' इति प्रयोगानुपपत्तिः। एतेन 'भूतलाधेयत्वाभाववान् घटोऽस्ति' इति शाब्दबोधः इत्यपि प्रयुक्तम्।

प्रकारान्तरनिराकरणम्

यत्तु — एतद्दोषपरिहाराय सप्तम्यर्थस्याधिकरणत्वस्य निरूपकतासंबन्धेन धात्वर्थेऽन्वयः। अस्धात्वर्थः कालसंबन्धः। तत्रैव काले लडर्थस्य वर्तमानत्वस्यान्वयः। धात्वर्थस्याख्यातार्थे आश्रयत्वे निरूपितत्वसंबन्धेनान्वयः। तस्य च प्रतियोगितासंबन्धेन नञर्थे अन्वयः। नञर्थस्याभावस्य स्वरूपसंबन्धेन प्रथमान्तार्थे घटादावन्वयः। तथा च भूतलनिष्ठाधिकरणतानिरूपकवर्तमानकालसंबन्धाश्रयत्वप्रतियोगिकाभाववान् घटः ठइति शाब्दबोधः। नञ्समभिव्याहारस्थले भावनान्वय्यभावानुयोगिनि संख्यान्वयः। इति मतम् —

तदपि न। सप्तम्यर्थस्य साक्षात् धात्वर्थान्वयाव्युत्पत्तेः। अन्यथा कर्तृत्वाविवक्षायां "चैत्रे पच्यते" इति भावे प्रयोगापत्तेः। अत एव सप्तम्यर्थस्य धात्वर्थान्वये परम्परापदोपादानं कर्तृकर्मान्यतरद्वारकत्वोपादानं वा प्रामाणिकानाम्।

न च नञ्समभिव्याहारस्थले साक्षात्संबन्धेन सप्तम्यर्थस्य धात्वर्थेऽन्वय इति व्युत्पत्तिकल्पनान्न दोष इति वाच्यम्। 'चैत्रे न पच्यते' इति प्रयोगस्य एवमपि वारयितुमशक्यत्वात्।

अपि च तन्मते भावनान्वयिनि संख्यान्वय इति औत्सर्गिकव्युत्पत्तिमुल्लङ्घ्य नञ्समभिव्याहारस्थले भावनान्वय्यभावान्वयिनि संख्यान्वयस्वीकारेण व्युत्पत्त्यन्तरकल्पनापत्तिश्च।

मतान्तरनिराकरणम्

अन्ये तु — नञ्समभिव्याहारस्थले धातुना शक्यार्थाभावो लक्ष्यते। नञस्तु द्योतकत्वात् तात्पर्यग्राहकत्वमेव। सप्तम्यर्थस्याधिकरणत्वस्य व्युत्पत्तिविशेषकल्पनया [सप्तम्यर्थाधिकरणत्वनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधं प्रति धातुलक्ष्याभावप्रतियोगिनिष्ठविशेष्यतासंबन्धेनोपस्थितिः कारणम् इति कार्यकारणभावकल्पनया] धात्वर्थभूताभावप्रतियोगिनि शक्यार्थे कालसंबन्धादावन्वयः। तथा च "भूतले घटो नास्ति" इति वाक्यात् भूतलनिष्ठाधिकरणतानिरूपकवर्तमानकालसंबन्धप्रतियोगिकाभावाश्रयत्वं घटवृत्ति इत्याकारकः शाब्दबोधो जायते। भावनासंख्ययोः अन्वयार्थं न व्युत्पत्त्यन्तरं कल्प्यत इत्याहुः।

तदपि न। सप्तम्यर्थान्वये नञ्स्थले व्युत्पत्त्यन्तरकल्पनगौरवस्य तदवस्थत्वात्। 'चैत्रे न पच्यते' इति चैत्राधिकरणकपाकाभावविवक्षया प्रयोगापत्तेश्च। 'गृहे न पचति' इति प्रयोगानापत्तेश्च। गृहस्य साक्षात् पाकाधिकरणत्वाभावात्।

अथ "गृहे न पचति" इत्यत्र अधिकरणत्वस्य कर्तृद्वारा पाकेऽन्वयः स्वीक्रियते गृहाधिकरणकः यः चैत्रः तत्कर्तृकपाकाभावः तत्र बोध्यते। 'भूतले घटो नास्ति' इत्यत्रैव तु सप्तम्यर्थस्याधिकरणत्वस्य धात्वर्थभूताभावप्रतियोगिनि कालसंबन्धेऽन्वयः स्वीक्रियत इति चेत् — न। तथा सति अस्त्याख्य-धातुघटितनञ्समभिव्याहारस्थले व्युत्पत्त्यन्तरकल्पनादतिगौरवात्।

'गृहे न पचति' इत्यादौ च गृहाधिकरणकचैत्रवृत्तिपाकस्याप्रसिद्धेः न तदभावो धातुना बोधयितुं शक्यत इति तत्र शाब्दबोधानुपपत्तिस्तदवस्थैवेति चेत्—

स्वमते भूतले घटो नास्ति इति वाक्यात् बोधप्रकारः

अत्रोच्यते। इदानीं "भूतले घटो नास्ति" इत्यादौ भूतलाधिकरणकघटवृत्ति सत्ताश्रयत्वं घटनिष्ठाभावप्रतियोगीत्येव शाब्दबोधः। प्रसिद्धं हि घटस्य भूतलाधि-करणकत्वं कालान्तरे। अतो न प्रतियोगिनोऽप्रसिद्धिः। न वा व्युत्पत्त्यन्तर-कल्पनम्।

तथा हि — सप्तम्यर्थस्याधिकरणत्वस्य स्वनिरूपकघटवृत्तित्वसंबन्धेन आख्या-तार्थे आश्रयत्वेऽन्वयः। प्रथमार्थस्य घटस्यापि स्ववृत्तित्वसंबन्धेन तत्रैव। नञः परं लडाद्यर्थकालावच्छिन्नाभावे लक्षणा। लडादिश्च तात्पर्यग्राहकमात्रम्।

इदानींपदार्थस्यापि निपातार्थत्वात् नञर्थेऽभावेऽन्वयेऽपि न क्षतिः। संभवति हि भूतलाधिकरणघटवृत्तिसत्ताश्रयत्वाभावः वर्तमानकालावच्छेदेन घटे। एतस्मिन् काले एतद्भूतले घटाभावात्। अत एव भूतलवृत्तिघटाभावस्यापि अर्थादनुभूय-मानस्य नापलापः।

यत्र त्वधिकरणे कदापि न कर्त्रादिसत्ता प्रसिद्धा तत्रापि न कर्तुः घटत्वादिना संसर्गघटकता। किं तु प्रकृतक्रियाश्रयत्वेनैव। अतः प्रतियोग्यप्रसिद्धिशङ्काया नावकाशः। तथा च भूतलनिष्ठाधिकरणतानिरूपकवृत्ति वर्तमानसत्ताश्रयत्वं भूतलवृत्तिपरमाण्वादावेव प्रसिद्धम्। तस्य च घटनिष्ठाभावप्रतियोगित्वबोधः। अयमेव प्रकारः "गृहे न पचति" इत्यादावानुसंधेयः। एवं लडाद्यर्थस्यापि धात्वर्थेऽन्वयो न त्यक्तो भवति। तात्पर्यग्राहकत्वस्यापि लडादौ स्वीकारात् तत्कालावच्छिन्नाभावप्रतियोगित्वं उक्तविधसत्ताश्रयत्वेऽव्याहतम्। तथा च भूतल-

निष्ठाधिकरणतानिरूपकघटवृत्ति वर्तमानसत्ताश्रयत्वं वर्तमानकालावच्छिन्नघट-निष्ठाभावप्रतियोगीति बोधः।

यदि तु अस्मिन् पक्षे घटस्याख्यातार्थे साक्षात्संबन्धेनानन्वयात् कर्तृत्वानुपपत्तिराशङ्क्येत, तदास्तु आख्यातस्यैवोक्ताश्रयत्वप्रतियोगिकोक्तविधाभावे सप्तमी-नञुभयसमभिव्याहारे लक्षणा। नञ्पदं च तात्पर्यग्राहकमात्रम्। तस्मिंश्चाभावे घटस्याधेयत्वसंबन्धेनैवान्वयान्न व्युत्पत्त्यन्तरकल्पना। भूतलनिष्ठाधेयतानिरूपक-वृत्तिवर्तमानसत्ताश्रयत्वप्रतियोगिकाभावः घटवृत्तिः इति बोधः।

उक्तविधाश्रयत्वत्वावच्छिन्नप्रतियोगिकाभावश्च घटे, न घटस्य भूतलवृत्ति-तादशायाम् इत्यर्थात् भूतलाधिकरणकघटाभावबोधः।

वायौ रूपं नास्तीत्यादौ बोधप्रकारः

एवं "वायौ रूपं नास्ति" इत्यत्र वायुनिष्ठाधिकरणतानिरूपकवृत्तिवर्त-मानकालसंबन्धाश्रयत्वाभावः रूपवृत्तिः इति बोधः। "ह्रदे वह्निर्नास्ति" इत्यत्र ह्रदनिष्ठाधिकरणतानिरूपकवृत्तिवर्तमानकालसंबन्धाश्रयत्वाभावः वह्निवृत्तिः इति बोधः। "जातौ सत्ता नास्ति" इत्यतः जातिनिष्ठाधिकरणतानिरूपकवृत्तिवर्तमान-कालसंबन्धाश्रयत्वाभावः सत्तावृत्तिः इति बोधः।

न च समवायसंबन्धेन जातिवृत्तेरप्रसिद्ध्या समवायसंबन्धावच्छिन्ना जाति-निष्ठाधिकरणता अप्रसिद्धा। तथा च तद्धटितस्य समवायसंबन्धावच्छिन्नजाति-निष्ठाधिकरणतानिरूपकवृत्तिवर्तमानकालसंबन्धाश्रयत्वस्याप्रसिद्ध्या कथं तदभावस्य सत्तायां बोधः इति वाच्यम्। जातौ साक्षात् स्वरूपसंबन्धेन वृत्तेः जातित्वादौ प्रसिद्धतया जातिनिष्ठाधिकरणतानिरूपक(जातित्व)वृत्तिवर्तमानकालसंबन्धाश्रयत्व-स्याभावः सत्तावृत्तिः इति बोधे नानुपपत्तिः।

समवायेन जातौ सत्ता नास्तीति प्रयोग एव क्लेशः। समवायसंबन्धावच्छिन्न-जातिनिष्ठाधिकरणताया अप्रसिद्धेः। स चैवं समर्थनीयः — निरुक्ताश्रयत्वस्यैव व्यधिकरणसंबन्धावच्छिन्नप्रतियोगिकाभावमादाय।

एतदुक्तं भवति — जातिनिष्ठाधिकरणतानिरूपकवृत्तिवर्तमानकालसंबन्धा-श्रयत्वनिष्ठा या समवायसंबन्धावच्छिन्नजातिनिष्ठाधिकरणतानिरूपकवृत्तिवर्तमान-कालसंबन्धाश्रयत्वत्वावच्छिन्ना प्रतियोगिता तन्निरूपकमभावमादायेत्यर्थः। प्रति-योगितावच्छेदककोटिप्रविष्टायां जातिनिष्ठाधिकरणतायां व्यधिकरणस्य समवाय-संबन्धस्य घटकत्वात् अभावे व्यधिकरणसंबन्धावच्छिन्नत्वोक्तिः इति। एवं च

समवायेनेत्यस्य आख्यातार्थे अभावे स्वावच्छिन्नाधिकरणताघटितप्रतियोगिताकत्वसंबन्धेनान्वयः इति न काचिदनुपपत्तिरिति।

गृहे चैत्रो न पचति इत्यत्र बोधप्रकारः

एवं "गृहे चैत्रो न पचति" इत्यादौ गृहाधिकरणकवृत्तिवर्तमानपाकाश्रयत्वाभावः चैत्रवृत्तिः इति बोधः। अथवा गृहाधिकरणकवृत्तिपाकाश्रयत्वं वर्तमानकालावच्छिन्नचैत्रनिष्ठाभावप्रतियोगीति बोधः। आद्यपक्षे चैत्रस्य गृहस्थत्वे पाकाश्रयत्वाभावमादाय, पाकाश्रयत्वे गृहाधिकरणकत्वाभावमादाय उभयाभावे चोभयाभावमादाय विशिष्टाभावः संपादनीयः। तत्तदभावबोध एव तात्पर्यभेदेन फलम्।

एवं "स्थाल्यां तण्डुलं न पचति" इत्यत्रापि स्थाल्यधिकरणकतण्डुलकर्मकपाकाश्रयत्वाभावः चैत्रवृत्तिः इति बोधः। तत्र तण्डुलस्य स्थाल्यवृत्तित्वे तात्पर्ये स्थाल्यधिकरणकत्वाभावप्रयुक्तः विशिष्टाभावः। तण्डुलस्य पाककर्मत्वाभावे तात्पर्ये तण्डुलकर्मकत्वाभावप्रयुक्तः विशिष्टाभावः। पाकस्य चैत्रवृत्तित्वाभावे तात्पर्ये पाकाश्रयत्वाभावप्रयुक्तः विशिष्टाभावः इत्यूहनीयम्।

तात्पर्यग्राहकप्रमाणाभावे च उक्तस्थले स्थालीपदवैयर्थ्यभिया पूर्वोक्तेष्वभावेषु आद्याभाव एव तण्डुलस्य स्थालीवृत्तित्वाभाव एव झटिति अर्थात् प्रतीयते।

अत एव — "न जीवत्पितृकः कुर्यात् तिलैः कृष्णैश्च तर्पणम्" (स्मृत्यर्थसारे) इत्यादौ जीवत्पितृकः कृष्णत्वविशिष्टतिलकरणकतर्पणं न कुर्यात् इति वाक्यार्थबोधानन्तरं तात्पर्यवशात् तिले कृष्णात्वाभाव एव प्रतीयते न तु तिलतर्पणाभाव इति व्याचक्षते वृद्धाः।

"नान्तरिक्षे अग्निश्चेतव्यः" इत्यत्र अन्तरिक्षाधिकरणकाग्नेरप्रसिद्ध्या सप्तम्यर्थस्य अधिकरणत्वस्य कर्तृकर्मद्वारा क्रियान्वयो न संभवति। अतस्तत्र नञ्सप्तम्यन्ताभ्यामन्तरिक्षवृत्त्यभावलक्षणया तत्प्रतियोगित्वमाख्यातार्थेऽनूद्यत इति तस्य नित्यानुवादता। अग्निकर्मकचयनभावना अन्तरिक्षवृत्त्यभावप्रतियोगिनी इति शाब्दबोधः। तत्र सप्तम्यर्थस्य स्वनिरूपकाभावप्रतियोगित्वपरंपरासंबन्धेन भावनायामन्वयः न तु साक्षादिति नास्ति व्युत्पत्त्यन्तरकल्पना कापि।

अत एव पदद्वयलक्षितस्याप्यर्थस्य आख्यातार्थे अन्वयस्य स्वीकारादेव अर्थवादवाक्यलक्ष्यप्राशस्त्यस्यापि आख्यातार्थभावनान्वय उपपद्यते।

"अन्तरिक्षे घटो न पचति" इत्यादौ च सप्तम्यन्तनञ्धातुभिः अन्तरिक्षवृत्तित्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकपाकाभावो लक्ष्यते। आख्यातेन

चाश्रयत्वं लक्ष्यते। तथा चोक्तविधाभावाश्रयत्वं घटवृत्तीति शाब्दबोधः। अतोऽत्रापि न सप्तम्यर्थान्वय इति न कुत्रापि सप्तम्यर्थस्य कर्तृकर्मान्यतरद्वारकत्वव्यभिचारः।

चैत्रो न पचति इत्यत्र बोधप्रकारः

यत्र तु न सप्तम्यन्तपदसमभिव्याहारः "चैत्रो न पचति" इत्यादौ तत्र नञर्थस्य चैत्रवृत्त्यभावस्य चैत्रवृत्तिकृतौ प्रतियोगितासंबन्धेनान्वयः। चैत्रवृत्तिकृतिः चैत्रवृत्त्यभावप्रतियोगिनी इति। अत्र अभावो वर्तमानकालावच्छिन्नो ग्राह्यः। नातो विरोधः।

अथ वा वर्तमानपाकानुकूलकृत्यभावमाख्यातेन लक्षयित्वा तस्मिन् चैत्रस्यान्वयः। वर्तमानपाकानुकूलकृत्यभावः चैत्रवृत्तिः इति बोधः।

चैत्रो न पचेत् इत्यत्र बोधप्रकारः

एवं लिङ्गादिसमभिव्याहारेऽपि "चैत्रो न पचेत्" इत्यादौ यत्र चैत्रवृत्तिकृतिप्रसिद्धिः तत्र तस्यां कृतौ "न कलञ्जं भक्षयेत्" इत्यत्रेव विध्यर्थस्य स्वप्रयोज्याभावप्रतियोगित्वसंबन्धेन अन्वयः। नञर्थस्य चैत्रवृत्त्यभावस्य प्रतियोगितासंबन्धेन अन्वयः चैत्रवृत्तिकृतिः प्रवर्तनाप्रयोज्याभावप्रतियोगिनी चैत्रवृत्त्यभावप्रतियोगिनी चेति बोधः। अप्रसिद्धौ तु आख्यातेन पाकानुकूलकृत्यभावं लक्षयित्वा तस्मिन् विध्यर्थस्य प्रयोज्यत्वेन चैत्रस्य चाधेयत्वेनान्वयः। पाकानुकूलकृत्यभावः प्रवर्तनाप्रयोज्यः चैत्रवृत्तिश्चेति बोधः।

अधिकरणत्वत्रैविध्यम्

तच्चाधिकरणत्वं त्रिविधम् — औपश्लेषिकं, वैषयिकम्, अभिव्यापकं चेति। "कटे आस्ते, घटे ज्ञानमस्ति, मोक्षे इच्छा अस्ति, सर्वस्मिन्नात्मा अस्ति, तिलेषु तैलमस्ति"। उपश्लेषः सावच्छिन्नवृत्तित्वम्। वैषयिकं विषयतासंबन्धावच्छिन्नवृत्तित्वम्। अभिव्यापकम् अवच्छेदकावच्छेदेन वृत्तित्वम्।

"सप्तम्यधिकरणे च"[१] इति चकारात् दूरान्तिकार्थेभ्योऽपि सप्तमी। "वनस्य दूरे अन्तिके वा ग्रामः"। दूरे दूरत्वावच्छिन्नप्रदेशे। प्रतियोगित्वं षष्ठ्यर्थः। यद्यप्यत्र अधिकरणत्वादेव सप्तमी प्राप्यते; तथापि द्वितीयादिविभक्तित्रयेण विशेषविहितेन बाधप्रसक्तौ प्रतिप्रसवार्थश्चकारः।

---

[१] सू. २.३.३६

क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्[1] इति वार्तिकार्थः

इन्-प्रत्ययान्तः यः क्तप्रत्ययान्तः तस्य कर्मणि सप्तमी वाच्या। अधीती व्याकरणे। अधीतमनेनेति विग्रहे भावक्तान्तात् अधीतशब्दात् कर्तरीनिप्रत्यये अधीतीत्यस्य अधीतवानित्यर्थः पर्यवस्यति। किमधीतवानिति कर्मविशेषजिज्ञासायां व्याकरणमध्ययने कर्मत्वेन अन्वेति। व्याकरणकर्मकाध्ययनकर्तेत्यर्थः।

शेखरे[2]

इनो विषयस्य इन्प्रकृतेः क्तान्तस्य इत्यर्थः। तेन "कृतपूर्वी कटम्" इत्यत्र न। क्तान्तस्य इन्प्रकृतित्वाभावात्। उदाहरणे न कर्मणि क्तः। अभिहितत्वेन सप्तम्यनापत्तेः। किं तु भावे । अत्र कर्मशब्देन कालादिव्यतिरिक्तमेव गृह्यते, व्याख्यानात्। तेन "मासमधीती व्याकरणे" इत्यत्र मासशब्दात् सप्तमी नेति कैयटः।

लघुमञ्जूषायाम्[3]

"अधीती व्याकरणे" इत्यत्र कर्म सप्तम्यर्थः। कर्मण्युपसंख्यानमित्युक्तेः। भावक्तान्तात् अधीतशब्दात् "इष्टादिभ्यश्च"[4] इतीनिः। व्याकरणकर्मकाध्ययनकर्तेति बोधः।

पदवाक्यरत्नाकरे[5]

सप्तमी स्यात् कर्मणि वा यदीष्टादिपदादिनिः।
अन्ये तु नित्यमेवात्र सप्तमीत्याचचक्षिरे।।

इष्टादिगणादुत्पन्नस्य कर्तरि इनिप्रत्ययस्य योगे कर्मणि सप्तमी विकल्पेनानुशिष्यते। तेन "अधीती वेदान् वेदेषु वा" इत्यादौ वेदकर्मकाध्ययनकर्तेति बोधः। अत्र मुख्ये कर्मण्येव सप्तमी न तु गौणे। तेन "मासमधीती" इत्यादयः प्रयोगाः सूपपादाः।

भाट्टरहस्ये[6]

एवं "क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्"[7] इति वार्तिकात् इन् — इन्नन्तशब्दः विषयः — वर्तनभूमिः यस्य क्तान्तस्य यदुपरि इन् प्रत्यय इत्यर्थः।

---

[1] वा. १४८५
[2] पृ. ७२५
[3] पृ. १३३०
[4] सू. ५.२.८८
[5] पृ. ८३०
[6] पृ. ९६५
[7] वा. १४८५

तादृशक्तप्रत्ययस्य वस्तुतो यत्कर्म तस्मिन् सप्तमी। अधीती व्याकरणे। अधीतमनेनेति विग्रहः। "इष्टादिभ्यश्च"[1] इति कर्तरि इनिप्रत्ययस्य विधानात्। एतस्य च तद्धितत्वेन कृतपूर्वी कटम् इतिवत् द्वितीयायां प्राप्तायां कर्मणि तद्बाधेन सप्तमीविधिः। व्याकरणकर्मकाध्ययनभावनेति बोधः। कर्म चात्र मुख्यमेव विवक्षितम्, न तु गौणं मासादि। तेन "मासमधीती व्याकरणे" इत्यत्र काले द्वितीयैव।

विभक्त्यर्थनिर्णये[2] अधिकरणादिसप्तम्यर्थ विचारः

अकारकान्वयिनः दर्शितान्ये क्रियान्वयिनश्च सप्तम्यर्था अकारकतया संज्ञायन्ते। तत्र "सप्तम्यधिकरणे च"[3] इति सूत्रे चकारः दूरान्तिकार्थकशब्देभ्य इव कतृकर्माघटितेनापि संबन्धेनाधिकरणेऽवच्छिन्नाधेयत्वे वा सप्तमीं विधत्ते। अत एव "भूतले घटः" इत्यादौ न सप्तम्यनुपपत्तिः।

यत्तु "भूतले घटः" इत्यादौ अस्तीति क्रियाध्याहारेण सप्तम्युपपत्तिरिति शाब्दिकैरुक्तम्। तदसत्। "गिरौ वृक्षात् भूमिं गच्छति विहगः" इत्यादौ अध्याहारस्य कर्तुमशक्यत्वात्। पञ्चम्यन्तार्थस्य तिङर्थे कर्तृत्वेनान्वयस्याव्युत्पन्नत्वात्। अत एव — "वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदर्भैः" इत्यादौ न सप्तम्यनुपपत्तिः। न चोत्थानकर्तुरधिकरणं शैल इति शङ्क्यम्। यत उत्थानाधिकरणमूर्ध्वदेश एव। न हि शैलः शिखरादूर्ध्वो भवतीति।

संबन्धमात्रावच्छिन्नमाधेयत्वं सप्तम्यर्थः। सूत्रेऽधिकरणपदोपादानात्। तत्र स्वाश्रयसंबन्धावच्छिन्नमाधेयत्वं क्रियान्वयि कारकतयोपेयत इति तु परमार्थः।

एवं च "भूतले घटः" इत्यादौ संयोगावच्छिन्नमाधेयत्वं सप्तम्यर्थो घटादावन्वेति। तथा च भूतलनिरूपितसंयोगसंबन्धावच्छिन्नाधेयतावान् घटः [भूतलवृत्तिर्घटः] इत्यादिरन्वयबोधः।

"घटे रूपम्" इत्यादौ समवायावच्छिन्नं, "स्फटिके जपालौहित्यम्" इत्यादौ परंपरासंबन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थः। "धनं दुरधिकारिणि" इत्यादौ स्वामित्वावच्छिन्नाधेयत्वं सप्तम्यर्थः।

---

[1] सू. ५.२.८८

[2] पृ. ४४०

[3] सू. २.३.३६

"स्फटिके लौहित्ये जपाकुसुममुपाधिः" इत्यादौ स्वेतरविशेष्यताकस्वधर्मप्रकारताकज्ञानजनकः उपाधिशब्दार्थः। तत्र लौहित्यनिरूपिताधेयत्वं प्रकारतायां स्फटिकनिरूपिताधेयत्वं विशेष्यतायामन्वेति। स्फटिकनिष्ठविशेष्यतानिरूपकलौहित्यनिष्ठप्रकारतानिरूपकज्ञानजनकाभिन्नं जपाकुसुममित्यन्वयबोधः।

"स्फटिकलौहित्ये जपाकुसुममुपाधिः" इत्यत्र स्वप्रकारकज्ञानविशेष्यत्वसंबन्धावच्छिन्नाधेयत्वाश्रयात्मकस्फटिकपदलक्ष्यः तादात्म्येन लौहित्येऽन्वेति। तादृशलौहित्याधेयत्वस्योपाधिशब्दैकदेशे प्रकारत्वेऽन्वयः, व्युत्पत्तिवैचित्र्यात्। तथा च स्फटिकनिरूपितस्वप्रकारकज्ञानविशेष्यत्वसंबन्धावच्छिन्नाधेयत्वाश्रयाभिन्नलौहित्यनिरूपिताधेयत्वाश्रयप्रकारताकज्ञानजनकाभिन्नं जपाकुसुममित्यन्वयबोधः।

"धूमे साध्ये वह्नौ हेतावार्द्रेन्धनमुपाधिः" इत्यत्र साध्यव्यापक उपाधिशब्दार्थः तादात्म्येन आर्द्रेन्धनेऽन्वेति। तादृशार्द्रेन्धने व्याप्यत्वसंबन्धावच्छिन्नं धूमनिरूपितमाधेयत्वमन्वेति। अत एव व्याप्यत्वव्यभिचारित्वसंबन्धौ वृत्त्यनियामकाविति तान्त्रिकाः। साध्यशब्दार्थस्तु सिषाधयिषोद्देश्यसिद्धिविधेयतावच्छेदकधर्मवान् बोध्यः।

"प्रभाते गोष्ठे मध्याह्ने कच्छे गौः" इत्यादौ कालिकसंबन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थः। यदि कालिकाधेयत्वं गोष्ठादिदेशविशेषणतया भासते तदावच्छेदकतात्वेन व्यपदिश्यते। अत एवावच्छेदकत्वार्थिका सप्तमीति मन्यन्ते तान्त्रिकाः। न हि स्वरूपसंबन्धविशेषोऽतिरिक्तं वा अवच्छेदकत्वं सप्तम्यर्थः संभवति। अनुशासनविरहात्।

एवं यदि गोष्ठादिदेशाधेयत्वं प्रभातादिकालविशेषणतया प्रतीयते तदा तदपि दैशिकावच्छेदकतात्वेन व्यपदिश्यते। न च देशाधेयत्वेन प्रभातादि कालविशेषणं संभवति, अव्यावर्तकत्वात् इति वाच्यम्। दीपान्तरप्रभातव्यावर्तकैतद्द्वीपवृत्तित्वस्येव गोष्ठादिवृत्तित्वस्यापि व्यावर्तकत्वसंभवात्।

यत्र तु दैशिककालिकाधेयत्वयोः कालदेशयोर्न विशेषणत्वम् अव्यावर्तकत्वात्, तत्र नावच्छेद्यावच्छेदकभाव उपेयते यथा इदानीं गुणे सत्तेत्यादौ। अत्र गुणाधेयत्वं न प्रत्यक्षकाले प्रत्यक्षकालवृत्तित्वं वा गुणे विशेषणम्, अव्यावर्तकत्वात्। किं तु प्रत्यक्षकालाधेयत्वं गुणाधेयत्वं च स्वातन्त्र्येण सत्तायामेव प्रतीयते। अन्यथानुपपत्तेरिति।

एवं "वृक्षे शाखायां कपिसंयोगः" इत्यादौ शाखाधेयत्वं वृक्षविशेषणमिति शाखावच्छेदकत्वेन व्यपदिश्यत इति।

"यस्मिन्नग्नौ पचेदन्नं तत्र होमो विधीयते" इत्यादौ प्रयोजकव्यापारस्वरूपः संबन्धो वृत्तिनियामकः तत्संबन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थः वह्निविशेषितः पाकेऽन्वेति। अत एव व्यापारस्तत्प्रयोज्यत्वं वा सप्तम्यर्थ इति तान्त्रिकवाक्ये दर्शिताधेयत्वमेव व्यापारादिशब्देन व्यपदिश्यत इति।

क्वचित् व्यापकतासंबन्धोऽपि वृत्तिनियामकः। यथा कारणतायामनन्यथासिद्धिः नियतपूर्ववृत्तित्वं वेत्यादौ। अत्र व्यापकतासंबन्धावच्छिन्नमाधेयत्वं सप्तम्यर्थः अन्यथासिद्धिविरहे नियतपूर्ववृत्तित्वे चान्वेति। व्यापकत्वार्थिका सप्तमीति तान्त्रिकवाक्ये व्यापकत्वशब्देन व्यापकत्वसंबन्धावच्छिन्नमाधेयत्वं प्रत्याय्यते। अतो व्यापकत्वस्य न सप्तम्यर्थत्वमनुशासनविरहादिति प्रत्युक्तम्।

साधुशब्दस्य संकेतसंबन्धोऽपि वृत्तिनियामकः। यथा "कर्तरि कृत्"[1] "भू सत्तायाम्" इत्यादावनुशासने "विनायके विघ्नराजद्वैमातुरगणाधिपाः" इत्यादौ कोशे। अत्र संकेतसंबन्धावच्छिन्नाधेयत्वं सप्तम्यर्थः। कृच्छब्दार्थे तिङन्यप्रत्यये भूधातौ विघ्नराजादिशब्दे चान्वेति। कर्तृनिरूपितसंकेतसंबन्धावच्छिन्नाधेयत्वाश्रयः कृत् इत्यादिरन्वयबोधः।

ननु भू सत्तायामित्यत्र भूशब्दे कथं सप्तम्यर्थान्वयबोधः। स्वरूपपरशब्दस्य सुप्प्रकृतेरेव साधुत्वात्।

न च स्वरूपपरस्यापि धातुशब्दस्य अधातुरिति पर्युदासात् प्रातिपदिकसंज्ञाविरहात् सुप्प्रकृतित्वविरहेऽपि साधुत्वान्नानुपपत्तिरिति शाब्दिकमतं युक्तमिति वाच्यम्। तथा सति "भुवो वुग्लुङ्लिटोः"[2] इत्यत्र "भाषायां सदवसश्रुवः"[3] इत्यत्र च निर्देशे धातुशब्दस्य सुप्प्रकृतित्वविरहप्रसङ्गात्। न च श्रोत्रोपस्थिते भूशब्दे सप्तम्यर्थस्यान्वयबोध इति वाच्यम्। वृत्त्या शब्देनोपस्थापित एवार्थे तथाभूतस्यार्थस्यान्वयबुद्धेर्व्युत्पत्तिसिद्धत्वात् वृत्त्यनुपस्थापितार्थेऽन्वयबोधस्याप्रामाणिकत्वात्। अन्यथा श्रोत्रोपस्थिते मृदङ्गशब्दे गुणपदोपस्थापितगुणस्य तादात्म्येनान्वयबोधप्रसङ्गादिति चेत्—

गुरुचरणमतम्

यदर्थशक्त्या धातुत्वं निपातत्वं वा शब्दानां तदर्थसंबन्धस्वरूपलक्षणायामपि तेषां शब्दानां धातुत्वं निपातत्वं वा अक्षतमेवेति। यथा वाशब्दस्य गत्याद्यर्थकत्वे

[1] सू. ३.४.६७
[2] सू. ६.४.८८
[3] सू. ३.२.१०८

धातुत्वं, विकल्पाद्यर्थकत्वे निपातत्वम्। तत्तदर्थस्वरूपसंबन्धलक्षणायां धातुत्वं निपातत्वं चेति भूशब्दस्य स्ववाच्यवाचकत्वस्वरूपलक्षणायां धातुत्वं निपातत्वं चेति भूशब्दस्य स्ववाच्यवाचकत्वस्वरूपलक्षणायां धातुत्वं निराबाधमिति भूशब्दस्य न सुप्प्रकृतित्वमिति भूधात्वर्थे स्ववाच्यवाचकत्वेन लक्ष्ये भूशब्दे सप्तम्यर्थस्यान्वय इति न काप्यनुपपत्तिरिति प्राहुः।

केचित्तु — अनुकरणशब्दाः साधव इति सामान्यत एव भू सत्तायामित्यनेन ज्ञाप्यते। अत एव "गवित्याह" "प्रतिजानीत प्रत्यक्षावित्यादि" इत्यादिषु अनुकरणनिरर्थकशब्दान्तर्गतस्य एचोऽवादेशः "हेलयो हेलय इति वदन्तोऽसुराः पराबभूवुः" इति श्रुतापभ्रंशानुकरणालयशब्दान्तर्गतस्याकारस्य पूर्वरूपत्वं संगच्छते। अन्यथा अवादिविधीनां साधुशब्दमात्रविषयतया "गोआलाकेऽलञ्चिअई" इत्यादौ भाषायामिव प्रसक्तिर्न स्यादिति अनुकरणसाधुभूते भूशब्दे श्रोत्रोपस्थिते सप्तम्यर्थस्यान्वयः। अत एव श्रोत्रोपस्थिते "पचति" इति शब्दे पाकं करोतीति विवरणवाक्यार्थस्य पाककर्तृत्वस्य प्रतिपादकतया संसर्गेणान्वयः। विवरणवाक्ये तिङः साधुत्वार्थं प्रयोगः।

अथ वा विवरणवाक्यं पाककर्मत्वमिव करणाश्रयत्वमधिकं प्रतिपादयदपि पाककर्तृत्वमर्थात् प्रतिपादयतीति पाककर्तृत्वस्य प्रतिपादकतया विव्रियमाणे 'पचति' इति वाक्येऽन्वयः। न हि विवरणविव्रियमाणवाक्ययोरन्यूनानतिरिक्तार्थकतानियमः। एवं चान्वाचयसमाहार इतरेतरसमुच्चय इत्यादावप्यन्वयो बोध्य इत्याहुः।

तन्न सुन्दरम्। अनुकरणशब्दस्यान्वयोपगमेऽप्यनुकार्यशब्दस्यान्वयानुपपत्तेश्च। अनुकार्यस्य साधुतायाः केनाप्यज्ञापनात्। 'पचति' इत्यादौ तु पचेः पचतिपदे तिङः प्रतिपाद्यत्वे लक्षणा पचतिप्रतिपाद्यत्वविवरणवाक्यार्थे पाककर्तृत्वेऽन्वेति। तिङर्थस्य प्रथमान्तार्थ इव तिङन्तार्थेऽप्यन्वयोपगमात्। अत एव "पचति भवति" इत्यादावन्वयोपपत्तिः। चान्वाचय इत्यादौ चशब्दस्य निपाततया तदर्थवाचकत्वलक्षणायामपि निपाततया भू सत्तायामित्यादाविवान्वयोपपत्तिः संभवतीति गुरुचरणदर्शितरीतिः।

वस्तुतस्तु शब्देनार्थ इवार्थेन शब्दः स्मार्यते। शब्दार्थयोरुभयोः संकेतसंबन्धेन संबन्धित्वात्। अत एवार्थं ज्ञात्वा अर्थेन तद्वाचकशब्दं स्मृत्वा वाक्यं प्रयुञ्जते प्रयोक्तारः। तथा च यथा "किं पचति भवति" इति प्रश्ने वधूपदर्शितकलायादौ कलायादिदर्शनेन कलायादिवाचकं कलायादिपदं द्वितीयान्तं स्मृतवतः प्रष्टुः

'कलायां भवती पचति' इत्यन्वयबोधो भवति। तथा भूशब्दस्वरूपेणार्थेन स्वरूपपरो भूशब्दः प्रथमतः स्मार्यते। तेन तु भूशब्दस्वरूपोऽर्थः स्मार्यते। तत्र भूशब्दे संकेतसंबन्धावच्छिन्नस्य सत्ताधेयत्वस्यान्वय इति न काप्यनुपपत्तिः।

यदि च वधूपदर्शितकलायादौ 'कलायं पचति' इति मानसोपनीतभानमेव। इयमेव रीतिः चान्वाचय इत्यादौ पचति पाकं करोतीति विवरणे च बोध्या।

एवं वाचकत्वार्था सप्तमीति तान्त्रिकवाक्ये वाचकत्वशब्देन संकेत-संबन्धावच्छिन्नाधेयत्वमेव व्यपदिश्यते। अतो वाचकत्वस्य सप्तम्यर्थत्वेऽनु-शासनविरहेऽपि न क्षतिः।

"दाने बलिः, काव्ये कालिदासः, तपसि धूर्जटिः अयम्" इत्यादौ बलिप्रभृतिपदानां बल्यादिसदृशे लक्षणा। कर्तृतानिरूपकत्वसंबन्धावच्छिन्नं दानाद्याधेयत्वं इदंपदार्थे पुंस्यन्वेति। विशिष्टान्वयबलात् दानवैशिष्ट्यमपि पुंसि प्रतीयते। तथा च बल्यादिसादृश्यं दानादिकं प्रतीयते। अथ वा सप्तम्यन्त-दानादिशब्दसमभिव्याहारबलात् दानादिस्वरूपतादात्म्येन बल्यादिपदार्थानामिदंपदार्थे पुंस्यन्वयः। यथा "समवायेन नीलः" इत्यादौ तृतीयान्तसमभिव्याहारबलात् समवायेन नीलवैशिष्ट्यं प्रतीयते।

"पटे कुविन्दोऽयम्" इत्यादौ जन्यतासंबन्धावच्छिन्नं पटाधेयत्वमिदंपदार्थे पुंस्यन्वेति। कुविन्दपदलक्ष्यकुविन्दसदृशस्य तादात्म्येनान्वयः। पटनिरूपितजन्य-तासंबन्धावच्छिन्नाधेयत्वाश्रयोऽयं कुविन्दसदृशाभिन्न इति वाक्यार्थः।

अथ वा पटजनकत्वस्वरूपतादात्म्येन कुविन्दादेरन्वये सप्तम्यन्तपटादिसमभि-व्याहारस्तन्त्रम्।

क्रियान्वयी सप्तम्यर्थः

कारणतावच्छेदकेऽप्रामाण्यज्ञानाभावो निविशतेऽनुप्रविशति वेत्यादौ। धातोः घटकत्वमर्थः। तच्च विषयिताव्यापकविषयिताकत्वम्। तत्र निरूपकत्वसंबन्धा-वच्छिन्नमाधेयत्वं सप्तम्यर्थोऽन्वेति। तथा च निरूपकतया कारणतावच्छेदकवृत्ति-विषयिताव्यापकविषयिताकत्वाश्रयोऽप्रामाण्यज्ञानाभाव इत्यन्वयबोधः। निरूपक-त्वार्थिका सप्तमीति तान्त्रिकवाक्येऽपि निरूपकत्वशब्देन निरूपकत्वसंबन्धा-वच्छिन्नमाधेयत्वमेव व्यपदिश्यते।

"रजते शुक्तौ वा रजतत्वं जानाति" इत्यादौ विशेष्यतासंबन्धावच्छिन्नाधेयत्वं सप्तम्यर्थो धात्वर्थे ज्ञानेऽन्वेति। रजतादिविशेष्यतानिरूपितरजतत्वप्रकारकत्वमर्थतः

ज्ञानस्य प्रतीयते। विशेष्यत्वार्थिका सप्तमीति तान्त्रिकवाक्ये विशेष्यत्वशब्देन विशेष्यतासंबन्धावच्छिन्नाधेयत्वमेव व्यपदिश्यते।

"पर्वते वह्निमनुमिनोति आपादयति वा" इत्यादौ उद्देश्यतासंबन्धावच्छिन्नाधेयत्वं सप्तम्यर्थः धात्वर्थेऽनुमितावापत्तौ वान्वेति। पर्वतोद्देश्यतानिरूपितवह्निविधेयताकत्वमनुमितेरापत्तेर्वा अर्थतः प्रतीयते। उद्देश्यत्वार्थिका सप्तमीति तान्त्रिकवाक्ये उद्देश्यत्वशब्देन उद्देश्यतासंबन्धावच्छिन्नाधेयत्वमेव व्यपदिश्यते।

क्वचित् घटकतासंबन्धोऽपि वृत्तिनियामकः। यथा "न्यायेऽवयवाः प्रतिज्ञादिकं वा" इत्यादौ घटकतासंबन्धावच्छिन्नाधेयत्वं सप्तम्यर्थोऽवयवादावन्वेति। घटकत्वं तु विषयिताव्यापकविषयिताकत्वं पूर्वोक्तम्। न्यायविषयिताव्यापकविषयिताकाः अवयवा इति बोधः। घटकत्वार्थिका सप्तमीति तान्त्रिकवाक्ये घटकत्वशब्देन घटकत्वसंबन्धावच्छिन्नाधेयत्वमेव व्यपदिश्यते।

एवमन्यत्रापि सप्तम्यर्थतया यद्यत् तान्त्रिका व्यपदिशन्ति तत्तत्संबन्धावच्छिन्नाधेयत्वमेव सप्तम्यर्थतयावगन्तव्यम्।

साध्वसाधुप्रयोगे च[1] इति वार्तिकार्थः

साधु असाधु अनयोः शब्दयोः प्रयोगे सप्तमी वक्तव्या। "साधुः कृष्णो मातरि, असाधुर्मातुले। साधुः हितकारी। असाधुः अहितकारी"। उभयत्र शेषषष्ठ्यपवादः। कृष्णः मातृसंबन्धिहितकारी, मातुलसंबन्ध्यहितकारी इति बोधः। "साधुनिपुणाभ्यामर्चायाम्"[2] इत्येव सिद्धे इह साधुग्रहणमनर्चार्थम्। यथा साधुर्भृत्यो राजनि। इह तत्त्वकथने तात्पर्यम्। "साधुनिपुणाभ्यामर्चायामप्रतेः" इत्यत्र साधुग्रहणं तु अर्चायां प्रत्यादियोगे सप्तमीनिवृत्त्यर्थमिति वक्ष्यते। अर्चाग्रहणं निपुणार्थम् इति च।

विभक्त्यर्थनिर्णये[3]

"साध्वसाधुप्रयोगे सप्तमी वक्तव्या"[4] इति वार्तिकात् साध्वसाधुशब्दयोगे सप्तमी भवति। "साधुः कृष्णो मातरि, असाधुर्मातुले" इत्यादौ प्रियकर्तृत्वं साधुत्वम्, अप्रियकर्तृत्वमसाधुत्वम्। प्रियमिष्टम् अप्रियं द्विष्टम्। सप्तम्याः समवेतत्वमर्थः इच्छायां द्वेषे चान्वेति। तथा च मातृसमवेतेच्छाविषयकर्ता, मातुलसमवेतद्वेषविषयकर्ता कृष्णः इत्यन्वयबोधः।

---

[1] वा. १४८६

[2] सू. २.३.४३

[3] पृ. ४४७

[4] वा. १४८६

"रणे साधुः" इत्यादौ साधुशब्दार्थः समर्थः। सप्तम्या निरूपितत्वमर्थः सामर्थ्येऽन्वेति। सामर्थ्यं स्वरूपयोग्यत्वम्। तथा च रणनिरूपितसामर्थ्यवानित्यन्वयबोधः। "साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः"[1] इति सूत्रेण साधुशब्दयोगेऽर्चार्थकसप्तमीविधानेऽपि नास्य वार्तिकस्य वैयर्थ्यम्। अर्चाभिन्नार्थकसप्तमीविधानादिति।

भाट्टरहस्ये[2]

"साध्वसाधुप्रयोगे च"[3] इति वार्तिकात् "साधुः कृष्णः मातरि भवति, असाधुर्मातुले" इत्यत्र सप्तमी। अत्र वैषयिकत्वादिना अधिकरणसप्तम्यैव सिद्धौ पुनर्वचनं षष्ठीनिषेधार्थम्।

न च "साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः"[4] इति वक्ष्यमाणसूत्रेणैव साधुशब्दयोगे सप्तमीसिद्धेः एतद्वार्तिके साधुशब्दग्रहणं व्यर्थमिति वाच्यम्। अनर्चायां प्रतिना योगे च साधुशब्दयोगे सप्तमीत्येवं सार्थक्यात्।

न चैवं "साधुर्भृत्यो राज्ञः" इत्येवं षष्ठीप्रयोगानुपपत्तिरिति वाच्यम्। तत्र राज्ञो भृत्यः साधुर्भवति इत्यन्वयात् राज्ञः भृत्यद्वारको भावनान्वयः न तु साधुद्वारक इति स्वीकारात्।

न चैवमप्यर्चानर्चादिसाधारण्येन साधुशब्दप्रयोगे सप्तमीविधौ वक्ष्यमाणसूत्रेऽर्चाग्रहणं व्यर्थमिति वाच्यम्। निपुणपदप्रयोगेऽर्चायामेव सप्तमीत्येवं सार्थक्यात्।

न चैवमेतद्वार्तिकेनैव साधुशब्दयोगे सप्तमीसिद्धेः वक्ष्यमाणसूत्रे साधुशब्दग्रहणवैयर्थ्यमिति वाच्यम्। उत्तरभाविवार्तिकेन पूर्वभाविसूत्रे वैयर्थ्यशङ्कायाः अनुचितत्वात्।

निमित्तात् कर्मयोगे[5] इति वार्तिकव्याख्यानम्

कर्मयोगे निमित्तवाचकात् शब्दात् सप्तमी वाच्येत्यर्थः। निमित्तशब्देन हेतुभूतं फलमुच्यते। कर्मयोगो नाम कर्मणा साकं संयोगसमवायात्मकः संबन्धः।

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः।।

---

[1] सू. २.३.४३
[2] पृ. १६६
[3] वा. १४८६
[4] सू. २.३.४३
[5] वा. १४९०

चर्मार्थं व्याघ्रं हन्ति। अत्र कर्मणा व्याघ्रेण निमित्तस्य चर्मणः समवायः संबन्धः। दन्तार्थं कुञ्जरं हन्ति। अत्रापि कुञ्जरेण कर्मणा दन्तयोः समवायः। केशार्थं चमरीनामकं मृगविशेषं हन्ति। अण्डकोशार्थं पुष्कलकं गन्धमृगं हन्ति। अत्रापि समवायः। अत्र सर्वत्र हेतौ तृतीया प्राप्ता। तदपवादेन सप्तमी विधीयते। कर्मयोगे किम्। "वेतनेन धान्यं लुनाति"। अत्र वेतनस्य धान्येन संयोगसंबन्धो नास्तीति न सप्तमी।

अत्र सर्वत्र फलं सप्तम्यर्थः। तस्य जनकतासंबन्धेन क्रियायामन्वयः। चर्माभिन्न-फलजनकं व्याघ्रकर्मकहननमिति बोधः। एवमन्यत्रापि। कर्मयोगस्तु स्वरूपसन्नेव सप्तमीप्रयोजकः। अतः न सप्तम्यर्थः। शाब्दबोधे च स न भासते। चर्मणः फलत्वं च हननक्रियायाः तल्लाभादिविषयकेच्छाधीनत्वादिति लघुमञ्जूषायाम्।[१]

व्युत्पत्तिवादे

चर्मणि द्वीपिनं हन्ति इत्यादौ "निमित्तात् कर्मयोगे"[२] इत्यनेन सप्तमी प्रकृत्यर्थस्य चर्मादेः हननक्रियानिमित्तत्वं बोधयति। निमित्तत्वं च न कारणत्वम्। चर्मादेः हननक्रियाकारणत्वे प्रमाणाभावात्। पूर्ववृत्तित्वेऽपि इच्छाकृत्यादिना अन्यथा सिद्धत्वात्। अपि तु क्रियाजनिका या विनियोज्यत्वेनेच्छा तद्विषयत्वम्। सप्तम्याः विषयित्वाश्रयेच्छाधीनत्वमर्थः। विषयित्वे निरूपितत्वसंबन्धेन प्रकृत्यर्थस्य चर्मणोऽन्वयः। चर्मनिरुपितविषयित्वाश्रयेच्छाधीनव्याघ्रकर्मकहननानुकूलकृतिमा-निति बोधः। चर्मणः व्याघ्रस्य च यः संबन्धः न स सप्तम्यर्थः। अपि तु सप्तम्याः साधुत्वे स्वरूपसन्नपेक्षितः।

कारकचक्रे[३]

"चर्मणि द्वीपिनं हन्ति" इत्यादौ निमित्तसप्तमी। निमित्तत्वम् उद्देश्यत्वम्। तच्च फलत्वेन फलवत्त्वेन वा इच्छाविषयत्वम्। प्रथमस्योदाहरणं "मशकनिवृत्तौ धूमं करोति" इति। द्वितीयस्य "चर्मणि द्वीपिनं हन्ति" इत्यादि। चर्मणः सिद्धत्वेन फलत्वाभावात् इच्छाविषयत्वाभावेऽपि यथेष्टविनियोगरूपफलवत्त्वेनोद्देश्यत्वात् = इच्छाविषयत्वात् निमित्तत्वम्। तत्र यथायोग्यं फलत्वप्रकारकेच्छा फलवत्त्व-प्रकारकेच्छा च सप्तम्यर्थः। तस्य प्रयोज्यत्वसंबन्धेन धात्वर्थेऽन्वयः। सप्तम्यर्थे प्रकृत्यर्थस्य स्वविशेष्यकत्वसंबन्धेनान्वयः। मशकनिवृत्तिविशेष्यकफलत्वप्रकारके-

---

[१] पृ. १३३०

[२] वा. १४९०

[३] पृ. ८१

च्छाप्रयोज्यधूमानुकूलव्यापाराश्रयः चर्मविशेष्यकयथेष्टविनियोगरूपफलप्रकारके-च्छाप्रयोज्यव्याघ्रकर्मकहननानुकूलकृतिमान् इति यथाक्रममन्वयबोधः।

अत्र च "निमित्तात् कर्मयोगे"[१] इत्यनुशासनात् यत्किंचित्कर्मप्रकारक-बोधजनकधातुप्रयोगो नियामकः। सकर्मकधातौ कर्मबोधकपदसमभिव्याहारेण कर्मप्रकारकबोधजनकता। यथा "द्वीपिनं हन्ति" इत्यादौ। अकर्मकधातौ च कर्म-विशिष्टस्वार्थशक्त्या कर्मप्रकारकबोधजनकता। यथा "आदित्यो रजनीक्षये यदु-देति" इत्यत्र उदयशिखरमारोहति इत्यर्थकरणात् कर्मविशिष्टबोधजनकत्वम्। रजनीक्षयस्य सूर्योदयाजन्यत्वेऽपि निमित्तत्वं लोकज्ञानविषयत्वेनोद्देश्यत्वम्। तेन लोकानां रजनीक्षयज्ञानार्थं यदुदेतीत्यर्थः।

"शरदि पुष्यन्ति सप्तच्छदाः" इत्यत्र उत्पत्तिः सप्तम्यर्थः। शरत्कालोत्पत्ति-कपुष्पाश्रयाः सप्तच्छदाः (तन्नामानो वृक्षाः) इति वाक्यार्थः। न च शरदुत्पत्तिक-पुष्पाश्रये चम्पकादावपि "शरदि पुष्यन्ति चम्पकाः" इति प्रयोगापत्तिः इति वाच्यम्। सप्तच्छदस्य पुष्पाश्रयत्वे लब्धे तुल्यवित्तिवेद्यतया सप्तच्छदवृत्तित्वस्यापि पुष्पे लाभात् सप्तच्छदवृत्तित्वावच्छेदेन शरदुत्पत्तित्वान्वयस्य व्युत्पत्तिसिद्धत्वात्। चम्पकवृत्तिपुष्पत्वावच्छेदेन शरदुत्पत्तिकत्वाभावेन तथा प्रयोगाभावात्। धातोर्वा सप्तच्छदीयपुष्पे लक्षणेति कश्चित्।

शब्दशक्तिप्रकाशिकायाम्[२]

> हन्तेः कर्मण्युपष्टम्भात् प्राप्तुमर्थे तु सप्तमीम्।
> चतुर्थीबाधिकामाहुश्चूर्णिभागुरिवाग्भटाः।।

इति हरिस्मरणात् "चर्मणि द्वीपिनं हन्ति" इत्यत्र चर्म प्राप्तुं द्वीपिनं हन्तीत्यर्थः। "चर्मणे द्वीपिनं बध्नाति, हिनस्ति" इत्यादौ द्वीपिप्रभृतिकं न हन्तेः कर्म। "वित्ताय विप्रं हन्ति" इत्यादौ हन्तेः कर्मणि विप्रादौ संयुक्तमपि वित्तादिकं न तदुपष्टब्धम्। दन्तकेशत्वगादिष्वेव प्राणिनामुपष्टम्भाख्यसंयोगस्योपगमात्।

अत एव शृङ्गं प्राप्तुमित्यर्थे "शृङ्गे हरिणं हन्ति" इत्यादिको न प्रयोगः। समवायिना समं द्रव्यस्य तदभावात्।

> मुक्ताफलाय करिणं हरिणं पलाय सिंहं निहन्ति भुजविक्रमसूचनाय।
> का नीतिरीतिरियती रघुवंशवीर शाखामृगे जरति यस्तव बाणमोक्षः।।

---

[१] वा. १४९०

[२] पृ. ३८९

इत्यादौ तु करिण्युपष्टब्धमपि मुक्ताफलं प्राप्तुमिति नार्थः, अपि तु आहर्तुमित्यर्थः। अतस्तत्र "क्रियार्थोपपदस्य च कर्मणि स्थानिनः"[१] इति चतुर्थी।

"उपरागे स्नानम्, विवाहे श्राद्धम्" इत्यादौ स्नानादावुपरागादिजन्येष्टजनकत्व-लक्षणमुपरागादिनिमित्तकत्वं सप्तम्या बोध्यते।

"गोवधे प्रायश्चित्तम्" इत्यादौ तु दुरितनाशकत्वेन विहितत्वरूपस्य प्रायश्चित्तस्य एकदेशे दुरितादौ गोवधादिजन्यत्वलक्षणं तन्निमित्तकत्वं बोध्यते।

व्युत्पत्तिवादे

व्युत्पत्तिवादे तृतीयाकारके प्रसङ्गवशात् 'शरदि पुष्प्यन्ति सप्तच्छदाः' इति वाक्यस्यार्थः वक्ष्यमाणरीत्या गदाधरभट्टाचार्यैरुपवर्णितः। अन्वयितावच्छेदकाव-च्छिन्नत्वमेव विशेषणसंबन्धे भासत इति नास्ति नियमः। "शरदि पुष्प्यन्ति सप्तच्छदाः" इत्यत्र वाक्यर्थानुपपत्तेः। तत्र हि आख्यातान्तस्य पुष्पोत्पत्तिरर्थः। तत्र शरद्वृत्तित्वान्वयो वक्तव्यः। तत्र विकल्प्यते किं पुष्पोत्पत्तित्वावच्छेदेन शरद्वृत्तित्वान्वयः, किं वा पुष्पोत्पत्तित्वसामानाधिकरण्येन, अथ वा सप्तच्छद-पुष्पोत्पत्तित्वावच्छेदेनेति। तत्र न तावदाद्यः, पुष्पोत्पत्तित्वावच्छेदेन शरद्वृत्तित्वस्य बाधात्। न हि सर्वाणि पुष्पाणि शरत्काले उत्पद्यन्ते। न द्वितीयः, शरदि 'पुष्प्यन्ति सप्तच्छदाः, शरदि पुष्प्यन्ति चम्पकाः' इत्यविशेषेण प्रयोगापत्तेः। चम्पक-पुष्पाणामपि कदाचित् शरत्काले उत्पत्तेः। नापि तृतीयः, सप्तच्छदपुष्पोत्पत्तित्वस्य अन्वयितानवच्छेदकतया तदवच्छिन्नत्वस्य शरत्कालवृत्तित्वे भानासंभवात्। पदात् पदद्वयाद्वा अनुपस्थितस्य न हि अन्वयितावच्छेदकत्वम्।

तस्मात् अन्वयितानवच्छेदकावच्छिन्नत्वमपि विशेषणसंबन्धे भासत इति स्वीकृत्य शरत्कालसंबन्धे सप्तच्छदपुष्पोत्पत्तित्वावच्छिन्नत्वभानमङ्गीकृत्य 'शरदि पुष्प्यन्ति चम्पकाः' इति प्रयोगो वारणीय इति भट्टाचार्याशयः। प्रकारान्तरेण वाक्यार्थोऽपि यदि चेत्यादिना तैः वर्णितः। उक्तस्थलेऽवच्छेदकावच्छेदेनान्वय एव नोपेयते। शरदि इति सप्तम्यन्तार्थस्य शरद्वृत्तित्वस्य नाख्यातार्थे कर्तृत्वे धात्वर्थे पुष्पोत्पत्तौ वान्वयः। किं तु सप्तच्छदे अन्वयः। कर्तृत्वं च क्रियानिमित्तत्वरूप-कारकत्वगर्भम्। शरत्संबन्धविशिष्टसप्तच्छदे पुष्पोत्पत्तिनिमित्तत्वगर्भकर्तृत्वान्वयात् विशेषणे शरत्संबन्धेऽपि तदन्वयात् शरत्संबन्धनिमित्तकत्वं पुष्पोत्पत्तौ भासत इति चम्पकपुष्पोत्पत्तौ शरत्संबन्धनिमित्तकत्वाभावात् 'न शरदि चम्पकाः पुष्प्यन्ति' इति प्रयोगापत्तिः इति उपवर्णितम्। अनेन 'शरदि पुष्प्यन्ति सप्तच्छदाः' इति

---

[१] सू. २.३.१४

वाक्यात् शरत्कालसंबन्धविशिष्टसप्तच्छदाः पुष्पोत्पत्तिनिमित्तत्वे सति पुष्पोत्पत्तिकर्तारः (आश्रयाः) इति बोधो भवति। मानसः पुष्पोत्पत्तौ शरत्कालसंबन्धनिमित्तकत्वबोधः।

यद्वा शरत्कालसंबन्धविशिष्टसप्तच्छदमुद्दिश्य पुष्पोत्पत्त्याश्रयत्वविधानात् उद्देश्यविधेयभावस्थले विधेये उद्देश्यतावच्छेदकप्रयोज्यत्वभानस्य "धनवान् सुखी" इत्यादौ दर्शनात् पुष्पोत्पत्तौ शरत्संबन्धप्रयोज्यत्वं भासत इति स्वीकरणीयम्। तथा च चम्पकपुष्पोत्पत्तौ शरत्संबन्धप्रयोज्यत्वबाधात् न तद्वाक्यस्य प्रामाण्यमिति। शरत्कालवृत्तिसप्तच्छदाः शरत्कालवृत्तित्वप्रयोज्यपुष्पोत्पत्त्याश्रयाः इति बोधः इति।

पदवाक्यरत्नाकरे[१]

निमित्तात् कर्मसंयोगे या सप्तम्यनुशिष्यते।
चतुर्थ्या इव तादर्थ्यमर्थोऽस्या इति शाब्दिकाः।।

"चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः।।"

इत्यादौ सप्तमी चतुर्थीवत् तादर्थ्यम् अथवा तृतीयावत् निमित्तत्वमभिदधत्ते चर्मार्थं द्वीपिहननमिति वाक्यार्थः। सीमा अण्डकोशः। पुष्कलको गन्धमृगः।

"सीमाघाटस्थितिक्षेत्रेष्वण्डकोशेषु च स्त्रियाम्।
अथ पुष्कलको गन्धमृगे क्षपणकीलयोः।।"

इति मेदिनी। सीमा घाटः तज्ज्ञानार्थं पुष्कलकः शङ्कुः हतो निखात इत्यर्थ इति हरदत्तः। अत्र कर्मणा संयोगः समवायो वा निमित्ते स्वरूपसन्नेव सप्तमीसाधुतायां प्रयोजको न शाब्दबोधविषय इति शाब्दिकाः।

कर्म क्रिया तद्योगे तादर्थ्यं सप्तम्यर्थ इति वार्तिकार्थः। तथा च क्रियासंबन्धे निमित्तवाचकात् सप्तमीत्यर्थः। निमित्तं तु यत्प्राप्तीच्छाप्रयोज्या यत्प्रयोज्या च क्रिया तदुभयम्। आद्ये " चर्मणि द्वीपिनं हन्ति" इत्युदाहरणम्। चर्मप्राप्तीच्छाप्रयोज्या द्वीपिकर्मकहननक्रियेति वाक्यार्थः। द्वितीये —

"विद्यासूर्योदयोद्रेकात् अविद्यारजनीक्षये।
यदुदेति नमस्तस्मै कस्मैचिद्विश्वतस्त्विस्विषे।।"

अविद्यारजनीक्षयप्रयोज्या उदयक्रियेति बोधः। इत्यपरे —

---

[१] पृ. ८३८

अत्र व्याख्याकारः — अत्र व्याख्याकारः इदमुपलक्षणम्, सहकारित्वं जनकत्वं च निमित्तत्वम्! तत्राद्यं यथा — उपरागे स्नानम्, विवाहे श्राद्धम् इत्यादौ। तत्र सप्तम्याः स्वजन्येष्टविशेषजनकत्वमर्थः स्नानादावन्वेति। एवं गृहस्थादौ "आरे भग्ने इन्द्रबाहुर्बद्धव्यः" इत्यादौ स्वजन्येष्टजनकत्वम् आरे इति सप्तम्याः अर्थः इन्द्रबाहुबन्धनादावन्वेति। द्वितीयं यथा — "गोवधे प्रायश्चित्तम्" इत्यादौ। तत्र प्रायश्चित्तशब्दार्थः दुरितनाशकः। सप्तम्यर्थो जन्यत्वं प्रायश्चित्तशब्दार्थैकदेशे दुरितेऽन्वेति, गोवधजन्यदुरितनाशक इति बोधः।

भर्तृहरिमतम्

"हन्तेः कर्मण्युपष्टम्भात् प्राप्तमर्थे तु सप्तमीम्।
चतुर्थीबाधिकामाहुश्चूर्णिवागुरिवाग्भटाः।।"

इति कारिकया हन्धातोः कर्मणि उपष्टम्भात् संयोगविशेषाश्रयवाचकात् पदात् प्राप्तुमित्यर्थे "क्रियार्थोपपदस्य०"[१] इत्यादिना प्राप्तचतुर्थीबाधिका सप्तमीत्याह। संयोगविशेषश्च द्वीपिनि हननकर्मणि अवयवे आरम्भकसंयोगस्वरूपः। न चावयवे द्वीपित्वाभावात् कथमिति वाच्यम्। गोत्वादिवत् द्वीपित्वजातेः अवयवावयवि-विवृत्तित्वात् अवयवस्यापि द्वीपित्ववत्त्वात्। कुञ्जरे हननकर्मणि दन्तयोरति-दृढत्वरूपः संयोगविशेषः। "हन्तेः"[२] इत्युपादानात् "चर्मणे द्वीपिनं बध्नाति हिनस्ति" इत्यादौ। "उपष्टम्भात्" इत्युपादानात् "वित्ताय विप्रं हन्ति" इत्यादौ चर्मादिपदान्न सप्तमी। दन्तकेशत्वगादिष्वेव प्राणिनामुपष्टम्भकसंयोगोपगमात् वित्तस्य तदनाश्रयत्वात्। अत एव शृङ्गं प्राप्तुमित्यर्थे 'शृङ्गे हरिणं हन्ति' इत्यादिको न प्रयोगः। समवायिना समं द्रव्यस्य तदभावात्। "प्राप्तुम्" इत्युपादानात् —

"मुक्ताफलाय हरिणं करिणं फलाय सिंहं निहन्ति भुजविक्रमसूचनाय।
का नीतिरीतिरियती रघुवंशकेतो शाखामृगे जरति यस्तव बाणमोक्षः।।"

इत्यत्र न सप्तमी। तत्र मुक्ताफलान्याहर्तुमित्यर्थात् चतुर्थीबाधिकेत्यनेन "क्रियार्थोप-पदस्य" इति सूत्रस्य अत्र चारितार्थ्यं सूचितम्।

विभक्त्यर्थनिर्णये[३]

"निमित्तात् कर्मयोगे सप्तमी वक्तव्या"[१] इति वार्तिकं कर्मयोगे सति निमित्तवाचकपदात् सप्तमी भवतीत्यर्थकम्। कर्म धात्वर्थफलशालि, तस्य योगः

---

[१] सू. २.३.१४
[२] सू. ८.४.२२
[३] पृ. ४४७

क्वचित् समवायः क्वचित् संयोगः। द्वीपिनः कर्मणः चर्मणि समवायः। कुञ्जरस्य कर्मणः दन्तयोः संयोग इति शाब्दिकाः।

यस्य प्राप्तिः क्रियाफलं तन्निमित्तम्। तत्र सप्तमी भवति। यथा —

चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः।।

इत्यादौ सप्तम्याः प्राप्तिः स्वस्वामिभावादिसंबन्धोऽर्थः। स तु धात्वर्थे हननादावनुकूलतयान्वेति। तथा च चर्मप्राप्तिफलकं द्वीपिहननमित्यादिर्वाक्यार्थः। सीमा = अण्डकोशः। पुष्कलो = गन्धमृगः।

सीमाघाटस्थितक्षेत्रेष्वण्डकोशेषु च स्त्रियाम्।
अथ पुष्कलको गन्धमृगे क्षपणकीलयोः।।

इति मेदिनीकारः। सीमा घाटः तज्ज्ञानार्थं पुष्कलकः शङ्कुर्निहतः निखाता इत्यर्थ इति हरदत्तः।

निमित्तं फलम्। तत्र हेतुतृतीयावत् तादर्थ्यचतुर्थीवत् सप्तमी भवतीति शाब्दिकाः।

तत्तु चिन्त्यम्। न हि चर्म द्वीपिहननफलम्। हननात् प्रागेव द्वीपिचर्मणः स्थितत्वात्। "अध्ययनेन वसति यूपाय दारु च" इत्यादौ वासात् प्रागध्ययनस्य दारुतः प्राक् यूपस्य चासिद्धत्वात् भवति वासस्य अध्ययनफलकत्वं दारुणो यूपार्थकत्वं च।

यदि च द्वीपिनं हन्तुर्न चर्मप्राप्तिः। किं तु बलादाहर्तुरन्यस्य। तत्रापि दर्शितप्रयोगोऽभ्युपगम्यते तदा सप्तम्याः प्राप्तीच्छैवार्थः। तस्याः प्रयोज्यतया धात्वर्थे हननेऽन्वयः। अत एव —

हन्तेः कर्मण्युपष्टम्भात् प्राप्तुमर्थे तु सप्तमीम्।
चतुर्थीवाधिकामाहुः शिलिभागुरिवाग्भटाः।।

इति हरिरप्याह। उपष्टम्भः संयोगविशेषः। स च कुञ्जरे हननकर्मणि दन्तयोरतिदृढः। द्वीपिनि हननकर्मण्यवयवे आरम्भकसंयोगस्वरूपः गोत्वादिवत् द्वीपित्वादिजातेरवयवावयविवृत्तित्वात् अवयवस्यापि द्वीपित्वम्। "क्रियार्थोपपदस्य०"[२] इति सूत्रेण प्रसक्तायाश्चतुर्थ्याः हन्तिकर्मोपष्टब्धे वाधिका सप्तमी, न तु सर्वत्र। तथा सति क्रियार्थोपपदस्येति सूत्रवैयर्थ्यापत्तेः।

---

[१] वा. १४९०
[२] सू. २.३.१४

दार्शनिकास्तु — कर्म क्रिया, तस्या योगे संबन्धे निमित्तवाचकात् सप्तमी भवतीति वार्तिकार्थः। निमित्तं तु यत्प्राप्तीच्छाप्रयोज्या यत्प्रयोजिका क्रिया तदुभयम्। तत्राद्ये "चर्मणि द्वीपिनम्" इत्यादौ सप्तमी। "अन्तेऽविद्यारजनीक्षये यदुदेति" इत्यादौ सप्तमी। तथा च "चर्मणि" इत्यत्र सप्तम्याः प्राप्तीच्छैवार्थः। "अविद्यारजनीच्छाये यदुदेति" इत्यादौ तादर्थ्यमनुकूलत्वं सप्तम्यर्थः। अनुकूलत्वे चतुर्थी तृतीया सप्तमी भवतीति न परस्परं तासां बाध्यबाधकभावः।

एवं सहकारित्वं जनकत्वं च निमित्तत्वम्। तत्राद्यं यथा "उपरागे स्नानं, विवाहे श्राद्धम्" इत्यादौ। अत्र सप्तम्याः स्वजन्येष्टविशेषजनकत्वमर्थः स्नानादावन्वेति।

एवं "गृहरथादावारे भग्ने इन्द्रबाहुर्बद्धव्यः, पायसं ब्राह्मणो भोजयितव्यः" इत्यादावपि स्वजन्येष्टविशेषजनकत्वमर्थः इन्द्रबाहुबन्धनादावन्वेति।

द्वितीयं यथा "गोवधे प्रायश्चित्तम्" इत्यादौ। अत्र दुरितनाशकत्वं प्रायश्चित्तशब्दार्थः। सप्तम्या जन्यत्वमर्थः प्रायश्चित्तैकदेशे दुरितेऽन्वेति। गोवधजन्यदुरितनाशकमिति बोधः। एवमन्यत्रापि निमित्तत्वं बोध्यम्।

भाट्टरहस्ये[१]

एवं "निमित्तात् कर्मयोगे"[२] इति वार्तिकात् —

"चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्।
केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः।।"

इत्यादौ सप्तमी। अत्र निमित्तं फलत्वादिना क्रियाप्रयोजकम्। अत एव प्रयोज्यत्वं सप्तम्यर्थः। साक्षात्संबन्धेन क्रियान्वयी। तस्य च कर्मकारकयोगः संयोगसमवायादिः वास्तव एव सप्तमीप्रयोजकः, न तु शाब्दबोधे ज्ञातः। अत एव संयोगसमवायाद्यभावे "वेतनेन धान्यं लनाति" इत्यादौ "हेतौ"[३] इत्यनेन तृतीयैव। तृतीयापवादत्वेनैव चायं सप्तमीविधिः। तादर्थ्यचतुर्थ्यपवादत्वेन वा। तदा "वेतनाय धान्यं लुनाति" इत्यपि प्रयोगः। अत्र त्रिषूदाहरणेषु समवायाख्यः कर्मकारकेण संबन्धः निमित्तस्य। अवयवावयविभावात्। चतुर्थे तु संयोगः। सीम्नो ज्ञानार्थं पुष्कलः शङ्कुः हतः निखातः इति तदर्थः।

---

[१] पृ. १६६
[२] वा. १४९०
[३] सू. २.३.२३

यस्य च भावेन भावलक्षणम्[1] इति सूत्रार्थः

यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्। गोषु दुह्यमानासु गतः। देवदत्तः कदा गत इति प्रश्ने उत्तरमिदम्। अत्र लक्षकत्वसंबन्धे सप्तमी। शेष-षष्ठ्यपवादः। वर्तमानदोहनविशिष्टाभिः गोभिः ज्ञाप्यगमनवान् इत्यर्थः। अत्र दोहनक्रियायाः साक्षात् लक्षकता। गवां तु तदाश्रयतया। ततश्च गोदोहनदशायां गत इत्युत्तरं पर्यवस्यति। "गोषु दुग्धासु गतः" इत्यत्र तु अतीतदोहनविशिष्टाभिः गोभिः ज्ञाप्यमानगमनवानित्यर्थः। गोदोहनोत्तरकाले गत इति फलितम्। इदं कर्मगतक्रियाया उदाहरणम्। कर्तृगतक्रियायास्तु "ब्राह्मणेष्वधीयानेषु गतः" इत्युदाहार्यम्।

"उदिते आदित्ये जुहोति" इत्यत्र तु सामीपिकमधिकरणत्वं सप्तम्यर्थः। उदितादित्यसमीपकाल इत्यर्थः। आदित्योदयोत्तरसमीपकाल इति पर्यवसन्नोऽर्थः। "उपरागे स्नायात्" इत्यत्र तु उपरागपदेन उपरागाश्रयकालो लक्ष्यत इत्यधि-करणसप्तम्येव।

अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च[2] इति वार्तिकार्थः

सत्सु तरत्सु असन्त आसते। असत्सु तिष्ठत्सु सन्तस्तरन्ति। सत्सु तिष्ठत्सु असन्तस्तरन्ति। असत्सु तरत्सु सन्तस्तिष्ठन्ति।

प्रौढमनोरमायाम्[3]

निर्ज्ञातकाला क्रिया अनिर्ज्ञातकालायाः क्रियायाः कालं परिच्छिनत्तीति लक्षणम्। तादृशज्ञापकक्रियाश्रययोः कर्तृकर्मणोः बोधकात् इयं सप्तमी। तत्र "ब्राह्मणेष्वधीयमानेषु गतः" इति कर्तर्युदाहरणम्। "गोषु दुह्यमानासु गतः" इति कर्मण्युदाहरणम्। इह अधीयानानां ब्राह्मणानां दुह्यमानानां गवां च प्रतीयमानं लक्षकत्वं विशेषणीभूतयोरध्ययनगोदोहनक्रिययोर्विश्राम्यति।

लघुशब्देन्दुशेखरे[4]

भावः क्रिया। ततः — ज्ञापकक्रियाश्रयवाचकात्। तेन गोपददुह्यमान-पदयोरुभयोरपि सप्तमी सिद्धा। क्रियाश्रयः कर्ता कर्म च। तत्र काचित् क्रिया

---

[1] सू. २.३.३७
[2] वा. १४८७-१४८८
[3] पृ. ९५
[4] पृ. ७२६

स्वाधारकालेनान्यां क्रियां परिच्छिनत्ति, यथा 'गोषु दुह्यमानासु गतः' इति। काचित्तु स्वाधारकालाव्यवहितपूर्वकालेन यथा 'गोषु धोक्ष्यमाणासु गतः' इति। काचित् स्वाधारकालानन्तरकालेन यथा 'गोषु दुग्धासु गतः' इति। ज्ञापकत्वं सप्तम्यर्थः। तस्य च क्रियायामेवान्वयः, भावलक्षणमित्युक्तेः।

लक्ष्यलक्षणभावः शब्दबोध्य एवैतच्छास्त्रप्रवृत्तौ निमित्तं, न तु तस्य भूयो-दर्शनादिरूपमानान्तरेण ग्रहणापेक्षा। अन्यथा 'उदिते आदित्ये तमो नष्टम्' इत्यादावेव स्यात् न तु प्रकृते। कदाचिद्धि गोषु दुह्यमानास्वसौ गतः।

न च सप्तम्यर्थज्ञापकत्वे कृदन्तार्थविशेषणतापन्नक्रियायाः आधेयतासंबन्धे-नान्वयो न संभवति। "एकत्र विशेषणतयोपस्थितस्यान्यत्र विशेषणतया नान्वयः" इति व्युत्पत्तिविरोधादिति वाच्यम्। प्रकृत्यर्थस्य क्रियाविशिष्टकृदन्तार्थस्य आधेय-तयान्वयस्वीकारात्। विशेष्ये ज्ञापकत्वबोधेऽपि विशेषणे तात्पर्यम्। स्वर्गी ध्वस्त इति यथा। सप्तम्यर्थस्य ज्ञापकत्वस्य स्वनिरूपितज्ञाप्यत्वसंबन्धेन गतशब्दार्थ-घटकगमनक्रियायामन्वयः। तथा च दोहनकर्मगोनिष्ठज्ञापकतानिरूपितज्ञाप्यताश्रय-गमनवानिति बोधः।

भैरवमिश्रास्तु

क्रिययोः ज्ञाप्यज्ञापकभावः सूत्रप्रवृत्त्या पदस्य साधुतायामुपयुज्यते। सप्तम्यास्तु ज्ञापकत्वेनाभिमता क्रियैवार्थः। तस्याश्च समानकालिकत्वं ज्ञाप्यक्रियायां संबन्धः। 'गोषु दुह्यमानासु गतः' इत्यादौ वर्तमानार्थककृत्समभिव्याहारे। एवं च दुह्यमान-गोवृत्तिदोहनसमानकालिकगमनकर्तेति शाब्दबोधः। यत्र भविष्यदर्थककृत्समभि-व्याहारः तत्र 'गोषु धोक्ष्यमाणासु गतः' इत्यादौ सप्तम्यर्थदोहनक्रियायाः प्राक्कालि-कत्वसंबन्धेन ज्ञाप्यगमनक्रियायामन्वयः। यत्र तु भूतार्थकः कृत् तत्र 'गोषु दुह्यमानासु गतः' इत्यादौ सप्तम्यर्थदोहनक्रियायाः उत्तरकालिकत्वसंबन्धेन गमन-क्रियायामन्वयः इत्यूह्यमित्याहुः।

"राहूपरागे स्नायात्" इत्यत्र राहूपरागपदेन तदाश्रयकाल उच्यत इति अधि-करणसप्तम्येव। "विवाहे नान्दीमुखं कुर्यात्" इत्यत्र विवाहपदेन तत्प्राक्काल उच्यते। "गवां दोहे आगतः" इत्यत्राप्यधिकरणसप्तम्येव।

लघुमञ्जूषायाम्[१]

"ब्राह्मणेष्वधीयानेषु गतः, गोषु दुह्यमानासु गतः" इत्यत्र "यस्य च भावेन भावलक्षणम्"[२] इति सूत्रेण सप्तमी। यस्य भावेन क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमीति तदर्थः। तत इत्यस्य ज्ञापकक्रियाश्रयवाचकात् इत्यर्थः। गोपददुह्यमनपदयोरुभयोरपि तद्वाचकत्वात् उभाभ्यामपि सप्तमी। निर्ज्ञातदेशकालक्रिया अनिर्ज्ञातदेशकालक्रियायाः संबन्धिदेशकालपरिच्छेदकत्वेन लक्षणमिति बोध्यम्। "देवदत्तः कदा गतः" इति प्रश्ने इदं समाधानम्। तत्र ब्राह्मणकर्तृकाध्ययनस्य कालो ज्ञातः। देवदत्तकर्तृकगमनकालस्तु अनिर्ज्ञातः। तेन निर्ज्ञातकाला अध्ययनक्रिया अनिर्ज्ञातकालक्रियासंबन्धिनं कालं परिच्छिनत्ति = ज्ञापयति।

एतेन भूयोदर्शनमाश्रित्य ज्ञाप्यज्ञापकभावो भवतीति "उदिते आदित्ये तमो नष्टम्" इत्यादावेव स्यात्, न त्वत्र, कदाचिद्धि गोषु दुह्यमानासु अयं गतः इति शङ्का अपास्ता।

तथा च प्रकृतसूत्रे भाष्यम् — "सकृदपि यत् निमित्तत्वाय कल्पते तदपि लक्षणं भवति। तद्यथा अपि भवान् कमण्डलुपाणिं छात्रमद्राक्षीत्" इति। सकृदसौ कमण्डलुपाणिः दृष्टश्छात्रः, तस्य तदेव लक्षणं भवतीति। कालादि-परिच्छिन्नत्वेन ज्ञापकत्वमेवात्र लक्षणत्वमिति।

(तथा चाधीयानब्राह्मणवृत्तिज्ञापकतानिरूपितज्ञाप्यतावद्गमनाश्रयः, दुह्यमानगोवृत्तिज्ञापकतानिरूपितज्ञाप्यतावद्गमनाश्रय इति बोधः।)

क्रियायाः क्रियान्तरपरिच्छेदकत्वं सर्वत्र नैकरूपम्। किं तु भिन्नरूपम्। तथाहि — तत्र काचित् क्रिया स्वाधारकालेनान्यां क्रियां परिच्छिनत्ति यथा 'गोषु दुह्यमानासु गतः' इति। काचित्तु स्वाधारकालाव्यवहितपूर्वकालेनान्यां क्रियां परिच्छिनत्ति यथा 'गोषु धोक्ष्यमानास्वागतः' इति। काचित् स्वाधारकालानन्तरकालेन, यथा 'गोषु दुग्धासु आगतः' इति।

ज्ञापकत्वं च अधीयानदुह्यमानादिशब्दबोध्यत्वेन विवक्षितमेवैतच्छास्त्रप्रवृत्तौ मूलम्, न तु तस्य मानान्तरेण नियमतो ग्रहणापेक्षेति नेदं भूयोदर्शनाश्रयम्।

देशोदाहरणं सति गुणे द्रव्यत्वमस्तीत्यादि। पृथिव्यां गन्धो गुणोऽस्ति। तया गुणसत्तया द्रव्यसत्ता ज्ञाप्यते।

---

[१] पृ. १३३१

[२] सू. २.३.३७

ज्ञाप्यज्ञापकभावः सप्तम्यर्थः। अस्य च क्रियायामेवान्वये साधुत्वम्, उक्तसूत्रस्वारस्यात्। अत्र अधीयानानां ब्राह्मणानां दुह्यमानानां गवां च शब्दतः प्रतीयमानं लक्षकत्वं विशेषणीभूताध्ययनादिक्रियाकालद्वारकं विश्राम्यति। अधीयानब्राह्मणज्ञापककगमनाश्रयः दुह्यमानगोज्ञापककगमनाश्रय इति क्रमेण बोधः। 'गोषु धोक्ष्यमानासु' इत्यादौ भविष्यद्दोहनादेरपि बुद्ध्युपारूढस्य स्वपूर्वकालादिद्वारकं ज्ञापकत्वं बोध्यम्।

"विवाहे नान्दीमुखं कुर्यात् राहूपरागे स्नायात्" इत्यादौ प्रकृतसूत्रेण सत्सप्तमीति जगदीशतर्कालंकारैरुक्तम्। तन्न युक्तम्। तत्र प्रकृतसूत्रप्रवृत्तेरयोगात् प्रकृतसूत्रं हि यत्र मानान्तरसिद्धस्यार्थस्य कालादिविशेषसंबन्धादिप्रतिपादनाय शब्दप्रयोगः तत्रैव प्रवर्तते। तथैव सूत्रभाष्यस्वरसात्। अनेन हि सूत्रेण अन्यदीयभावेनान्यदीयभावस्य लक्षणे सप्तमी विधीयते। उभयोरपि भावयोर्ज्ञातत्वेऽज्ञातत्वे वा लक्षणकथनमसंगतं स्यात्। तथा अज्ञातेन ज्ञातस्य लक्षणमपि न घटते, अयुक्तत्वात्। अतो ज्ञातेन भावेन अज्ञातो भावो लक्ष्यत इति सूत्रतात्पर्यमवगम्यते। तथा भाष्ये सकृदपि यन्निमित्तत्वाय कल्पते तदपि लक्षणं भवतीति वचनेन निरुक्तार्थो भाष्यकृत्संमत इति ज्ञायते। एष चार्थः "यच्च निर्ज्ञातकालं हवनादिकमनिर्ज्ञातकालस्य सकृदपि कालपरिच्छेदनिमित्तं भवति तत्तस्य लक्षणमित्यर्थः" इति कैयटेन स्पष्टीकृतः। "विवाहे नान्दीमुखम्" इत्यादौ करिष्यमाणे इत्यध्याहारेण "यस्य च भावेन भावलक्षणम्"[१] इति सप्तमीति जगदीशाशयः। तन्न युक्तम्। "उपपदविभक्तेः कारकविभक्तिर्बलीयसी"[२] इति न्यायात् अधिकरणसप्तम्या एवोचितत्वात्, निरुक्तव्यवस्थया प्रकृतसूत्रस्य अप्रवृत्तेश्च। ततश्च विवाहपदेन तत्प्राक्कालो लक्ष्यते। अधिकरण एव सप्तमी। विवाहप्राक्कालाधिकरणकं नान्दीमुखकरणमिति बोधः।

एवं "राहूपरागे स्नायात्" इत्यत्र राहूपरागपदेन तदाश्रयः काल उच्यते। राहोः उपरागो यस्मिन्निति बहुव्रीहिसमासेन तल्लाभः। अत्राप्यधिकरण एव सप्तमी। न च सप्तम्या अधिकरणार्थकत्वे राहूपरागस्य स्नाननिमित्तत्वव्यवहारानुपपत्तिरिति वाच्यम्। अन्वयितावच्छेदकावच्छेदेनान्वयस्य औत्सर्गिकत्वात् राहूपरागकालावच्छेदेन स्नानविधाने तस्य निमित्तत्वस्यार्थाल्लाभात्। (अन्वयितावच्छेदकमुद्देश्यतावच्छेदकम्।)

---

[१] सू. २.३.३७

[२] परि. १०३

यत्तु राहूपरागपदं तत्काललक्षकम्। सतीत्यध्याहारात् यस्य च भावेनेति सप्तमी। राहूपरागादेः निमित्तत्वं तु सिद्धसाध्यसमभिव्याहारस्थले "सिद्धं साध्यायोपदिश्यते" इति न्यायेन फलतीति।

तन्न। प्रवर्तनारूपविधिविषयत्वं क्रियाया एव, न दध्यादेरिति "दध्ना जुहोति" इत्यादौ दध्नः कथं विधेयत्वम् इत्याशङ्क्य अनेन न्यायेन विधेयत्वमुक्तं न्यायविद्भिः। सिद्धं साध्यायोपदिश्यत इत्यस्य अज्ञातं ज्ञाप्यत इत्यर्थश्च व्याख्यातः। एवं च तेन न्यायेन द्रव्यस्याज्ञातज्ञाप्यत्वरूपं विधेयत्वं स्वक्रियोपरागेण च प्रवर्तनाविषयत्वमुक्तमिति प्रकृते तन्न्यायविषयाभावात् राहूपरागस्य द्रव्यत्वाभावात्। स्नानस्य मानान्तरादप्राप्तेः एतत्सूत्राप्राप्तेश्च। राहूपरागस्य निर्ज्ञातकालत्वाभावाच्च।

एवं —

भिद्यते हृदयग्रन्थिच्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।।

इत्यादावप्युक्तदिशैव भावसप्तम्यर्थो बोध्य इति जगदीशतर्कालंकाराः। तन्न युक्तम्। तत्रापि प्रकारान्तरेण सप्तम्याः शारीरिकमीमांसाभाष्यव्याख्यातृभिः उपपादितत्वात्।

तथाहि — परं हिरण्यगर्भादि अवरं यस्य तस्मिन् ब्रह्मणि दृष्टे — व्यधिकरणे सप्तम्यौ ब्रह्मविषयकदर्शने दर्शनोत्तरकाले कर्मादिक्षयः इत्यर्थः।

यद्वा दर्शन इति चर्मणि द्वीपिनमितिवत् "निमित्तात् कर्मयोगे"[१] इत्यनेन सप्तमी। तेन ब्रह्मदर्शनार्थं तदपरोक्षज्ञानात् अविद्यादीनां शिथिलीभावः भिद्यत इत्यादिनोच्यते इति "मुक्तोपसृप्यव्यपदेशात्" इति सूत्रभाष्यभामतीतद्व्याख्यानादौ व्याख्यातम्।

कारकचक्रे[२]

सति सप्तम्याः सामानाधिकरण्यमर्थः। तच्च क्वचित् कालिकं = कालिकसंबन्धावच्छिन्नम्। क्वचित् दैशिकं = कालिकान्यसंबन्धावच्छिन्नम्। तत्र आद्यं समानकालीनत्वपर्यवसितम्। यथा "गोषु दुह्यमानास्वागतः, गोषु दुग्धास्वागतः" इत्यादौ। अत्र सप्तम्यर्थः समानकालीनत्वम्। तत्र दोहनमात्रस्य न निरूपकत्वेनान्वयः। महिष्यादिदोहनकालीने आगमने 'गोषु दुह्यमानास्वागतः' इत्यप्रयोगात्। नापि गोदोहनस्य, धातुना गोदोहनत्वेनानुपस्थितेः। किं तु "दण्डी पुरुषः गच्छति"

---

[१] वा. १४९०
[२] पृ. ८५

इत्यादौ यथा परम्परया पुरुषविशेषणतापन्नदण्डसमानकालीनत्वं गमने भासते तथा गोविशेषणतापन्नकर्मताविशेषणतापन्नस्यैव दोहनस्य समानकालीनत्वमागमने भासते। इत्थं च दोहनकर्मताविशिष्टगोदोहनसमानकालीनगमनानुकूलातीतकृतिमानिति वाक्यार्थः।

"गोषु दुग्धास्वागतः" इत्यादौ न तथान्वयः। वर्तमानागमने अतीतदोहनसमानकालीनत्वबाधात्। किं तु वर्तमानध्वंसप्रतियोगिकृतिजन्यदोहनकर्मतापन्नासु 'गोषु आगतः' इति वाक्यार्थः। गोविशेषणकर्मताविशेषणदोहनविशेषणकृतिविशेषणप्रतियोगित्वविशेषणतापन्नस्य वर्तमानध्वंसस्य समानकालीनत्वमागमने भासते। तथा च गोदोहनानुकूलकृतिप्रतियोगिकवर्तमानध्वंससमानकालीनागमनानुकूलातीत (वर्तमान?) कृतिमानिति वाक्यार्थः।

गुणकर्मान्यत्वे सति 'सत्त्वात्' इत्यादौ तु दैशिकं सामानाधिकरण्यं सप्तम्यर्थः। ततो हि गुणकर्मान्यत्वसमानाधिकरणत्वस्य सत्त्वे बोधात्। यद्यपि "यस्य च भावेन भावलक्षणम्"[१] इति सूत्रेण यस्य क्रियया क्रियान्तरं लक्ष्यते इति व्याख्यानात् क्रिययोः सामानाधिकरण्ये सप्तमी अनुशिष्टेति गुणकर्मान्यत्वे सति 'सत्त्वात्' इत्यादौ यद्यपि सप्तमी न युक्ता, तथापि गुणकर्मान्यत्वे सति 'सत्त्वात्' इत्यभियुक्तप्रयोगदर्शनात् सूत्रतद्व्याख्ययोः भावक्रियापदे धर्मपरे। तथा च यस्य धर्मेण धर्मान्तरं निरुक्तसामानाधिकरण्येन प्रतिपद्यते तत्र सप्तमीति सूत्रार्थवर्णनात् उक्तप्रयोगसंगतिः। यस्य क्रियया अन्यस्य क्रियान्तरं लक्ष्यते इति व्याख्यानं तु शाब्दिकानां प्रायिकम्।

शब्दशक्तिप्रकाशिकायाम्[२]

"गोषु दुह्यमानास्वागतः" इत्यत्र गवाद्यभेदान्वयसाकाङ्क्षं कालार्थककृदन्तं यन्नाम तदुत्तरभावसप्तम्याः तादृशकृदन्तनामपदजन्यबोधविषयतावच्छेदकः यः वर्तमानकालः तद्वृत्तित्वमर्थः। शानचः वर्तमानकाले विधानात्। स काल एव प्रकृते भावपदार्थः। न च शब्दजन्यबोधविषयतावच्छेदकस्य भावपदार्थत्वमप्रसिद्धमतः भावपदेन क्रियायाः शक्यतावच्छेदकस्य वा बोधनात् दुह्यमानादिशब्दस्य वाक्यत्वेन शक्त्यभावात् कालस्य क्रियात्वाभावाच्चेति वाच्यम्। पाचकत्वमित्यादाविव शब्दबोध्यतावच्छेदकत्वेन कालस्य भावत्वात्। गोष्विति विशेषणपदम्। तथा च गवाभिन्नानां वर्तमानदोहनकर्मणां संबन्धिनि वर्तमानकाले आगत इति तत्र बोधः। गवां तत्कालवृत्तिदोहनकर्मणां संबन्धिनि तत्काले आगत

---

[१] सू. २.३.३७

[२] पृ. ३८७

इति तु फलितार्थः। सर्वसाधारणस्य वर्तमानत्वस्याभावात् तत्तद्व्यक्तित्वेन कालबोधः।

"गोषु दुग्धास्वागतः" इत्यत्र गवाभिन्नानां वर्तमानध्वंसप्रतियोगिदोहनकर्मणां संबन्धिनि तत्तकाले आगत इति बोधः।

"गोषु दोग्धव्यासु आगतः" इत्यत्र च गवाभिन्नानां विद्यमानप्रागभावप्रतियोगि-दोहनकर्मणां संबन्धिनि तादृशकाले आगत इत्याकारकः बोधः।

"नष्टेषु गोषु आगतः" इत्यादौ वर्तमानकालस्य नष्टाधिकरणत्वाभावेऽपि यथाकथंचित् संबन्धित्वं स्वप्रतियोगिकनाशसंबन्धित्वरूपमस्त्येव।

"क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।"

"भुक्तवत्सु च विप्रेषु पिण्डान् दर्भेषु निर्वपेत्।"

इत्यादावप्युक्तदिशैव भावसप्तम्यर्थो बोध्यः। वर्तमानध्वंसप्रतियोगिदर्शनविषय-परमात्मसंबन्धिवर्तमानकालवृत्तिक्षयप्रतियोगीनि कर्माणीत्यर्थः। एवं विप्राभिन्न-वर्तमानध्वंसप्रतियोगिभोजनकर्तृसंबन्धिवर्तमानकालवृत्तिपिण्डकर्मताकदर्भाधिकरण-कनिर्वाप इष्टसाधनमित्यर्थश्च क्रमेण बोध्यः।

कालार्थककृदन्तेति निवेशस्य प्रयोजनम्

पाचकादिपदं कृदन्तमपि न कालार्थककृदन्तम्, कालार्थकप्रत्ययान्तमपि दृष्टचरादिकं न तदर्थककृदन्तम्। अतः "चैत्रेषु पाचकेषु व्रजति, मैत्रेषु दृष्टचरेषु पश्यति" इत्यादिको न प्रयोगः।

"स्तोकं मैत्रस्य गते तिष्ठति" इत्यादौ स्तोकाद्यभिन्नस्य मैत्रीयातीतगत्यादेः 'काले तिष्ठति' इत्येवमन्वयबोधे कारककृदन्तबोध्यतावच्छेदक एव वर्तमानकालः भावपदार्थो वाच्यः।

निरुक्तश्चायं भावसप्तम्यर्थो धात्वर्थ एवान्वेति, न तु नामाद्यर्थे, तथैव साकाङ्क्षत्वात्। अत एव घटादेः दुह्यमानगवाद्यधिकरणवर्तमानकालवृत्तित्वेऽपि "गोषु दुह्यमानासु घटः" इत्यादिको न प्रयोगः।

यत्तु "गोषु दुह्यमानासु आगतः" इत्यादौ गोपदोत्तरसप्तम्याः कर्मत्वमर्थः। दुह्यमानपदोत्तरसप्तम्याः कालवृत्तित्वमर्थः। शानजादिकृत्प्रत्ययस्य च भावविहि-तत्वात् वर्तमानादिकालमात्रं ताद्रूप्येणार्थः। तथा च गोकर्मकवर्तमानदोहनकाल-वृत्त्यागतिमानित्याकारकस्तत्र बोध इति।

तत्तुच्छम्। गोदुह्यमानयोरभेदबोधस्यापलापापत्तेः। भावक्तान्तनाम्नः नपुंसकत्वनियमात् "गोषु दुग्धासु" इत्यादौ स्त्रीलिङ्गाद्यनुपपत्तेः। "गोषु चैत्रेण दुग्धास्वागतः" इतिवत् "गोषु चैत्रस्य दुग्धासु आगतः" इत्यपि प्रयोगापत्तेः। भावक्तान्तस्य कर्तरि तृतीयावत् षष्ठ्या अपि व्युत्पाद्यमानत्वात्। सप्तम्याः कर्मादिवाचितायामनुशासनाभावेन प्रमाणाभावात्। "गोषु यान्तीषु गच्छति" इत्यादौ कर्तर्येव अनुशिष्टस्य शतृप्रभृतेः भावे विधानायोगाच्चेति दिक्।

व्युत्पत्तिवादे

यत्तु — "गोषु दुह्यमानासु गतः" इत्यादौ "यस्य च भावेन" इत्यनेन गवादिपदात् सप्तमी। तत्समानाधिकरणदुह्यमानपदाच्च "नीलं घटमानय" इत्यादौ नीलादिपदात् द्वितीयावत् विशेषणपदस्य विशेष्यपदसमानविभक्तिकत्वनियमात् सप्तमी। सूत्रे च भावपदं क्रियापरम्। तथा च यद्विशेषणकृदन्तार्थविशेषणतापन्नक्रियया क्रियान्तरस्य लक्षणं व्यावर्तन तद्वाचकपदात् सप्तमीति सूत्रार्थः। उक्तस्थले गमनादिक्रिया दोहनादिसमानकालीनत्वादिपुरस्कारेण बोध्यतयाभिप्रेता। अतो व्यावर्तकविशेषणप्रविष्टतादृशक्रियाया अपि व्यावर्तकतया तत्कर्माद्यभेदान्वयिगवादिपदात् सप्तमी। अत्र तादृशसप्तम्याः समानकालीनत्वादिकमात्रमर्थः। तत्र दुह्याद्युपस्थापितदोहनादेः निरूपितत्वसंबन्धेनान्वयात् दोहनसमानकालीनत्वादिकं गमनादौ लभ्यते इति।

तन्न युक्तम्। दुह्याद्युपस्थापितक्रियायाः कृदर्थविशेषणतयोपस्थितायाः समानकालीनत्वादिविशेषणत्वासंभवात्। एकत्र विशेषणतया उपस्थितस्यान्यत्र विशेषणतया नान्वय इति व्युत्पत्तेः। प्रकृत्यर्थगवादिनानन्वितस्य अर्थस्य सप्तम्या बोधनासंभवाच्च। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेः।

किं तु समभिव्याहृतदोहनादिक्रियैव सप्तम्यर्थः। तस्याश्च समानकालीनत्वादिसंबन्धेन क्रियान्तरेऽन्वयः। दुह्यमानाभिन्नगोकर्मकदोहनसमानकालीनागमनवानिति बोधः। तत्र वर्तमानार्थककृत्समभिव्यहारस्थले समानकालीनत्वम्, "दोग्धव्यासु गतः" इत्यादिभविष्यदर्थककृत्स्थले प्राक्कालीनत्वं "दुग्धासु गतः" इत्यादावतीतार्थकृत्स्थले उत्तरकालीनत्वं संबन्धतया भासते। दोहनकर्माभिन्नगोकर्मकदोहनप्राक्कालीनगमनवान्, दोहनकर्माभिन्नगोकर्मकदोहनोत्तरकालीनगमनवान् इति रीत्या बोधः।

"पाथसि पीते तृष्णा शाम्यति" इत्यादावतीतार्थककृत्समभिव्याहारात् कार्यकारणभावोऽपि संबन्धतया भासते। तथा च पानकर्माभिन्नपाथःकर्मक-पानोत्तरकालीनं तादृशपानहेतुकं यत् शमनं तदाश्रयः तृष्णा इति बोधः।

'गुणकर्मान्यत्वे सति सत्वात्' इत्यादौ सतीत्यनन्तरं सतः इत्यध्याहार्यम्। अन्यथा लक्षणीयक्रियाया अभावेन उक्तसूत्राविषयतया सप्तम्यनुपपत्तेः। सत्त्व-शब्दस्य सत्ताख्यजातिवाचकत्वेन क्रियावाचकत्वाभावात्। तथा च गुणकर्मान्यत्वे सति सतः सत्त्वात् इति वाक्यं सम्पन्नम्। अस्धातोः शत्रन्ततया निष्पन्नः सच्छब्दः। अस्धातोः आधारत्वमर्थः। शतृप्रत्ययस्य निरूपकमर्थः। तस्याभेदसंबन्धेन गुण-कर्मान्यत्वेऽन्वयः। गुणकर्मान्यत्वे इति सप्तम्याः आधारत्वमर्थः। तत्र निरूपि-तत्वसंबन्धेन गुणकर्मान्यत्वस्यान्वयः। सप्तम्यर्थाधारतायाः समानाधिकरणत्व-संबन्धेन पञ्चम्यन्तसच्छब्दार्थैकदेशासधात्वर्थाधारतायामन्वयः। तत्र शतृप्रत्ययस्य निरूपकमर्थः। तस्याभेदेन सत्त्वेऽन्वयः। तथा च आधारतानिरूपकाभिन्न-गुणकर्मान्यत्वनिरूपिताधारतासमानाधिकरणाधारतानिरूपकाभिन्नात् सत्त्वात् इति शाब्दबोधः। अधिकम् अस्मदीयावयवगादाधरीव्याख्यायां भावदीपिकायां द्रष्टव्यम्। (हेतुग्रन्थे) तत्र हि अन्येऽपि प्रकाराः उक्ताः।

"शयानेन चैत्रेण भुक्तम्" इत्यादौ शयनभोजनादिक्रिययोः समानकालीनत्व-भानेऽपि तत्र लट्प्रत्ययेनैव समभिव्याहारात् भोजनादिसमानकालीनत्वं शयनादि-क्रियायां बोध्यते, अतो न सप्तमी। अन्यतस्तदनभिधान एव सप्तमीविधानात् — इत्युपपादितम्।

पदवाक्यरत्नाकरे[१]

यत्कर्मकर्तृको भावः परतन्त्रतया स्थितः।
लक्षकोऽन्यस्य भावस्य ततो भवति सप्तमी।।

कर्म च कर्ता च कर्मकर्तारौ यौ कर्मकर्तारौ यस्येति बहुव्रीहिणा यत्कर्मको यत्कर्तृकश्च भावः क्रिया परतन्त्रतया क्रियान्तरविशेषणतया स्थितः प्रयुक्तः अन्यस्य भावस्य यस्मिन् भावे विशेषणीभूतः तस्य लक्षकः, ततः भाववतः सप्तमी भवति। कालार्थकं यत्पदं यद्वाचकपदसमभिव्याहृतकृदन्तपरम्। सप्तम्याः काल-वृत्तित्वमर्थः। काले प्रकृत्यर्थस्य गवादेः स्वकर्मकदोहनाधिकरणत्वसंबन्धेनान्वयः। दुह्यमानशब्दार्थस्य विद्यमनादोहनकर्मणः गोषु तादात्म्येन अन्वयः। सप्तम्यर्थस्य कालवृत्तित्वस्य क्रियान्तरे गमनादावन्वयः। ततश्च विद्यमानदोहनकर्माभिन्न-गोकर्मकदोहनाधिकरणकालवृत्त्यतीतगमनवानिति बोधः।

---

[१] पृ. ८३५

गोषु आयातासु आगतः आगमनकर्त्रभिन्नगोकर्तृकागमननाशाधिकरणकाल-वृत्त्यागमनवान् इति बोधः। अत्र सप्तम्यर्थैकदेशे काले गवां स्वकर्तृकागमन-नाशाधिकरणत्वसंबन्धेनान्वयः।

गोषु आगमिष्यन्तीष्वागतः, गोषु धोक्ष्यमाणासु आगतः सप्तम्यर्थैकदेशे काले गवादेः स्वकर्तृकागमनप्रागभावाधिकरणत्वसंबन्धेन स्वकर्मकदोहनप्रागभावाधि-करणत्वसंबन्धेन चान्वयः। भविष्यत्कालिकागमनकर्त्रभिन्नगोकर्तृकागमनप्रागभावा-धिकरणकालवृत्त्यागमनवान् भविष्यद्दोहनकर्माभिन्नगोकर्मकदोहनप्रागभावाधिकरण-कालवृत्त्यागमनवानिति च बोधः इति व्याख्यायाम्। अत्र सर्वत्र "कर्तृकर्म-पारतन्त्र्येण भासमाना क्रिया समानकालीनत्वादिसंसर्गेण विशेषणतामापद्यते" इति मूलस्वारस्यात् सप्तम्यर्थकाले गवामधिकरणसंबन्धेन, तद्विशेषणतापन्नदोहन-क्रियायाः समानकालीनत्वादिबन्धेन क्रियान्तरेऽन्वय इति च प्रतीयते। एकत्र विशेषणतया उपस्थितस्यान्यत्र स्वातन्त्र्येणान्वय एवाव्युत्पन्नः। धर्मिपारतन्त्र्ये-णान्वयस्तु न व्युत्पत्तिविरुद्ध इति गोकुलनाथाशयः। कालमात्रं सप्तम्यर्थः। तत्र दोहनादिविशिष्टा गौः दोहनाधिकरणत्वव्याप्यया दोहनविशिष्टगवाधिकरणतयान्वे-तीति निगमनं कृतम्।

विभक्त्यर्थनिर्णये[१]

क्रियान्तरसमभिव्याहारे सति कालार्थककृदन्तात् सप्तमीं ज्ञापयति "यस्य च भावेन भावलक्षणम्"[२]

इति सूत्रम्। भावः क्रिया। यस्य च भावेन क्रियया क्रियान्तरं लक्ष्यते ततो भाववतः सप्तमी भवतीत्यर्थकम्। अत्र भाववान् कालार्थककृदन्तार्थः। कालार्थ-केत्युत्पादनात् 'पुरुषेषु पाचकेषु व्रजति' इति न प्रयोगः। कृदुपादानात् 'पुरुषेषु दृष्टचरेषु गच्छति' इति न प्रयोगः।

एवं "गोषु दुह्यमानासु आगतः" इत्यादौ सप्तम्याः कालवृत्तित्वमर्थः। काले प्रकृत्यर्थस्य स्वसंबन्धिभावस्याधिकरणतया तत्प्रागभावाधिकरणतया तन्नाशाधि-करणतया वा यथायोग्यमन्वयः। विद्यमानदोहनकर्मणां दुह्यमानशब्दार्थानां गोषु तादात्म्येनान्वयः। तथाभूतानां गवां सप्तम्यर्थैकदेशे काले स्वकर्मकदोहनाधि-करणतयान्वयः। तथाभूतस्य सप्तम्यर्थस्य कालवृत्तित्वस्य आगमनादौ क्रियान्तरे-ऽन्वयः। तथा च विद्यमानदोहनकर्माभिन्नानां गवां स्वकर्मकदोहनाधिकरणं यः

[१] पृ. ४५०
[२] सू. २.३.३७

कालः तद्वृत्ति अतीतं यदागमनं तत्कर्तेत्यन्वयबोधः। कर्मपारतन्त्र्येण भासमानायाः दोहनक्रियायाः आगमनेऽपि कालघटितपरंपरयान्वयः। विशिष्टान्वयसामग्रीबलात् क्रियायां परम्परया विशेषणत्वमेवोपलक्षकत्वमिति।

एवं "गोषु धोक्ष्यमाणासु दुग्धासु वागतः" इत्यादौ सप्तम्यर्थैकदेशे काले गवादेः स्वकर्मकदोहनस्य प्रागभावाधिकरणतया नाशाधिकरणतया वा अन्वयः।

भाविदोहनकर्माभिन्नानाम् अतीतदोहनकर्माभिन्नानां वा गवां स्वकर्मकदोहन-प्रागभावाधिकरणं स्वकर्मकदोहननाशाधिकरणं वा यः कालः तद्वृत्त्यागमनकर्तेत्यन्वयबोधः। प्रकृते दोहनादीनां विद्यमानत्वभावित्वातीतत्वानि क्रियान्तरकाल-वर्तमानत्वतथाविधकालवृत्तिप्रागभावप्रतियोगिकालवृत्तित्वतथाविधकालवृत्तिनाश-प्रतियोगिकालवृत्तित्वानि बोध्यानि। न तु शब्दप्रयोगाधिकरणकालघटितानि वर्तमानत्वादीनि। तथा सति "आगतः" इत्यत्र निष्ठार्थातीतत्वादेरन्वयप्रसङ्गात्।

एवं "नष्टेषु धार्तराष्ट्रेषु द्रौणिः सुप्तान् जघान" इत्यादौ सप्तम्यर्थैकदेशे काले स्वकर्मकनाशाधिकरणतया प्रकृत्यर्थस्य धार्तराष्ट्रादेरन्वयः। निष्ठार्थातीतत्वं विद्य-माननाशप्रतियोगिकालवृत्तित्वस्वरूपं नाशेऽन्वेति। तथा च विद्यमाननाश-प्रतियोगिकालवृत्तिनाशप्रतियोग्यभिन्नानां धार्तराष्ट्राणां स्वकर्तृकनाशाधिकरणं यः कालः तत्कालसुप्तकर्मकं यत् अतीतं हननं तत्कर्ता द्रौणिरित्यन्वयबोधः।

कालार्थककृदन्तार्थविशिष्टप्रकृत्यर्थान्वितः प्रदर्शितसप्तम्यर्थः भावे एवान्वेति न तु नामार्थे। अतो "गोषु दुह्यमानासु घटः" इत्यादौ नान्वयबोधः।

यत्तु — "गोषु दुह्यमानास्वागतः" इत्यादौ गोपदोत्तरसप्तम्याः कर्मत्वमर्थः दोहनादौ धात्वर्थेऽन्वेति। कृदन्तोत्तरसप्तम्याः कालवृत्तित्वमर्थः। शानजादिकृतां भावविहितत्वात् वर्तमानत्वमर्थः। तथा च गोकर्मकवर्तमानदोहनकालवृत्त्यागमन-वानित्यन्वयबोध इति।

तन्न सुन्दरम्। गवादौ दुह्यमानाभेदान्वयबोधस्यापलापप्रसङ्गात्। भावशान-जादिकृदन्तस्य नपुंसकत्वनियमात् "गोषु दुह्यमाने समागतः" इत्यादिप्रयोग-प्रसङ्गात्। "गोषु दुह्यमानास्वागतः" इत्यादिप्रयोगस्यासाधुत्वप्रसङ्गात्। सप्तम्याः कर्मत्वार्थकत्वमपि न युज्यते, अनुशासनविरहात्। "गोषु यान्तीषु गच्छति" इत्यादौ कर्तृकृदन्तेऽपि सप्तमीप्रयोगात्। एवं "भुक्तवत्सु च विप्रेषु पिण्डान् दर्भेषु निर्वपेत्" इत्यादौ सप्तम्यर्थैकदेशे कालेऽतीतभोजनकर्तुः स्वकर्तृकभोजननाशाधि-करणतयान्वयः। भोजनस्य तु स्वनाशसमानकालिकतया निर्वापेऽन्वयः, विशि-ष्टान्वयबलात्।

क्वचित् समानकालिकतया क्रिययोरन्वये क्वचित् स्वनाशकालिकतया क्रियोरन्वये प्रयोज्यप्रयोजकभावेनाप्यन्वयः। यथा — "पठत्सु तेषु प्रतिभूपतीनलं विनिद्ररोमाजनि शृण्वती नलम्।" इत्यादौ प्रतिभूपतिपाठननलश्रवणयोः समानकालिकतया अन्वयेऽपि प्रयोज्यप्रयोजकभावेनाप्यन्वयः। यथा वा — "गोविन्दे मथुरां याते व्यथन्ते गोपयोषितः" इत्यादौ गोविन्दगमनस्य स्वनाशकालिकतया गोपीव्यथायामन्वयेऽपि प्रयोज्यप्रयोजकभावेनाप्यन्वयः।

एवं सूत्रे भावलक्षणमित्यत्र भावः स्वभावः स्वरूपमिति यावत्। तथा च स्वरूपस्य लक्षणं विशिष्टतया ज्ञापनमित्यपि सूत्रार्थः। अत एव गुणान्यत्वे सति जातेः सत्त्वाद्वा इत्यादौ न सप्तम्यनुपपत्तिः। गुणान्यत्वसामानाधिकरण्येन विशेषणेन जातेः सत्ताया वा विशिष्टतया ज्ञापनमिति सप्तमी साधुरेव। अत्र शत्रन्तासधात्वर्थस्य वर्तमानकालवृत्तिसत्ताविशिष्टस्य तादात्म्येन गुणान्यत्वादावन्वयात् गुणान्यत्वादिशब्दानन्तरसप्तम्याः अधिकरणवृत्तित्वमेवार्थः। तच्च जातौ सत्तादौ वान्वेति। वर्तमानकालवृत्तिसत्ताविशिष्टस्य तादात्म्यान्वयबलादेव गुणान्यत्वादिकालवृत्तित्वस्यार्थत एव लाभात् न कालवृत्तित्वं सप्तम्यर्थः। अधिकरणवृत्तित्वरूपसप्तम्यर्थलाभार्थमेव सतीति शत्रन्तोपादानम्, न तु तदर्थस्य हेतुतावच्छेदकेऽनुप्रवेशः। गुणान्यत्वविशिष्टजातित्वादेरेव तथात्वादिति दर्शितप्रयोगेऽपि सप्तम्युपपत्तिः।

यत्तु — "शरदि पुष्प्यन्ति सप्तच्छदाः" इत्यादौ उत्पत्तिरूपस्य ज्ञापनार्थम् अथ वा पुष्पोत्पत्तिमत्त्वविशिष्टसप्तच्छदत्वावच्छेदेन शरदादिवृत्तित्वस्यान्वयार्थं कालभावयोरिति कुमारसूत्रेण काले सप्तम्या विध्यन्तरम्। अन्यथा "शरदि पुष्प्यन्ति पलाशाः" इत्यादिप्रयोगप्रसङ्गः शरद्वृत्तित्वस्य पलाशे पुष्पे वा सत्त्वादिति कालापैरुक्तम्।

तदसत्। पुष्यत्यर्थे पुष्पोत्पत्तौ शरद्वृत्तित्वस्यान्वयोपगमादेव दर्शितप्रयोगवारणसंभवात्। कारकान्यसप्तम्यर्थस्य क्रियायां साक्षादन्वयोपगमात् "शुक्तौ रजतत्वं जानाति" इत्यादौ विशेष्यतासंसर्गावच्छिन्नस्य शुक्त्याधेयत्वादेरिव ज्ञानादौ। तथा च न काप्यनुपपत्तिः। अतः काले सप्तमीविध्यन्तरं निष्प्रामाणिकमेव।

"शरदि पुष्प्यन्ति सप्तच्छदाः" इत्यत्र पुष्प्यतेः पुष्पोत्पत्तिरर्थः। तिङः पुष्पघटितपरंपरासंबन्धावच्छिन्नाश्रयत्वमर्थः। सप्तम्याः कालिकसंबन्धावच्छिन्नाधेयत्वमर्थः। तथा च शरद्वृत्तेः पुष्पोत्पत्तेरेवाश्रयाः सप्तच्छदा इत्यन्वयबोधः।

न च पुष्प्यतेः पुष्पमर्थः। तिङः आश्रयत्वम्। अत एव सप्तम्या उत्पत्तिरर्थ इति वाच्यम्। तथा सति 'माल्यं गुणो वा पुष्प्यति' इति प्रयोगापत्तेः।

न च पुष्यतेः पुष्यं तिङः उत्पत्तिरर्थः। उत्पत्तेः परंपरया प्रथमान्तार्थे सप्तम्यर्थस्याधेयत्वस्योत्पत्तावन्वय इति वाच्यम्। सुबर्थतिङर्थयोः परस्परान्वयस्य सर्वत्रानभ्युपेतत्वात्। तिङर्थस्य प्रथमान्तार्थे साक्षादेवान्वयस्य व्युत्पन्नत्वात्। अन्यथा 'ज्ञानं सुखं द्वेषो वा पचति' इति प्रयोगप्रसङ्गात्। तिङर्थकृतेः सामानाधिकरण्येन ज्ञानादेरन्वयसंभवादिति पूर्वोक्तरीतिः श्रेयसीति।

"अर्हाणां च कारकत्वेऽनर्हाणां चाकारकत्वे तद्विपर्याये च सप्तमी वक्तव्या" इति वार्तिकमर्हादिकारके सप्तमीं विधत्ते। अर्हत्वं च क्रियाविशेषितकारकशक्तियोग्यत्वम्। तच्च भोक्तृत्वादेर्धनवत्त्वादिकं बोध्यम्।

तत्रार्हाणां कारकत्वे यथा "ऋद्धेषु भुञ्जानेषु दरिद्रा आसते, ब्राह्मणेषु तरत्सु वृषला आसते"। भोजनकर्तृत्वस्वरूपकारकत्वस्यार्हता ऋद्धानां, तरणकर्तृत्वसद्ब्राह्मणानां प्रसिद्धैव। सप्तम्याः समानकालिकत्वमर्थः आसने धात्वर्थेऽन्वेति। तत्र भुञ्जानऋद्धविशिष्टसमानकालिकत्वं विशेषणभोजनसमानकालिकत्वमप्यादाय पर्यवस्यति, विशिष्टान्वयबलात्। तथा च भुञ्जानऋद्धसमानकालिकासनकर्तारो दरिद्रा इत्यादिः अन्वयबोधः।

'ब्राह्मणेषु पूज्यमानेषु शूद्रास्तिरस्क्रियन्ते' इत्यादावर्हाणां कर्मत्वे सप्तमी। अनर्हाणामकारकत्वे यथा दरिद्रेष्वासीनेषु ब्राह्मणास्तरन्ति। तरणं तु सद्गत्यनुकूलं वैदिककर्म। तद्विपर्यये यथा "ऋद्धेष्वासीनेषु दरिद्रा भुञ्जते, ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति" इत्यादौ। दर्शितरीत्या आसनभोजनयोः आसनतरणयोः समानकालिकत्वं प्रतीयते।

अत्र "यस्य च भावेन भावलक्षणम्"[1] इति सूत्रेणैव क्रिययोः समानकालिकत्वं ज्ञाप्यते। अतो व्यर्थमेवेदं वार्तिकम्। यदि च "ऋद्धेषु भुञ्जानेषु दरिद्रा आसते" इत्यादौ ऋद्धभुञ्जानसमानदेशत्वं आसने प्रतीयमानं विशिष्टान्वयबलात् भोजनसमानदेशत्वमपि आसने प्रत्याययति, तदा क्रिययोः समानदेशत्वप्रतीतिफलकतया नास्य वार्तिकस्य वैयर्थ्यम्।

भाट्टरहस्ये[2]

"यस्य च भावेन भावलक्षणम्"[3] इति सूत्रात् यत्संबन्धिन्या निर्ज्ञातकालया यया क्रियया अनिर्ज्ञातकालायाः क्रियायाः कालपरिच्छेदाख्यं लक्षणं क्रियते तस्याः

---

[1] सू. २.३.३७
[2] पृ. १६७
[3] सू. २.३.३७

क्रियायाः कर्तुः कर्मणो वा स्वक्रियाद्वारकेतरक्रियालक्षकत्वे विवक्षिते तद्बोधकात् सप्तमी स्यात् इत्यर्थकात् "ब्राह्मणेष्वधीयमानेषु गतः, गोषु दुह्यमनासु गतः" इत्यादौ सप्तमी। अत्र कर्तृत्वकर्मत्वान्यतरसंबन्धेन स्वसंबन्धिनी या क्रिया-तत्कालकत्वं सप्तम्यर्थः। तस्य च साक्षात्संबन्धेन आश्रयतासंबन्धेन इतर-क्रियायामन्वयः। पूर्वक्रियायाश्च कर्तृकर्मविशेषणत्वेऽपि सप्तमीलक्ष्यसंबन्धि-संसर्गघटकत्वमपि नानुपपन्नम्। सप्तम्याः लक्ष्यार्थः स्वसंबन्धिक्रियाकालकत्वं तद्धटकत्वं स्वस्याः पूर्वक्रियायाः। एवं च यत्र "इको यणचि"[१] इत्यादौ क्रिया नोपात्ता तत्र सतीति सत्ताक्रिया अध्याहार्या अच्सत्तया यणसत्ता ज्ञाप्या। यत्र तु संबन्धिनो लक्षकत्वं न विवक्षितं तत्र "गावो दुह्यन्ते, चैत्रो गतः" इति वाक्य-द्वयप्रयोगः। अत एव तत्र पूर्वक्रियायाः उत्तरक्रियालक्षकत्वबोधः कविकाव्यादिवत् मानस एव।

अत एव समानार्थकत्वाभावात् न सप्तमीविधिः तस्य वाक्यद्वयस्य बाधकः। अपि तु अपूर्वविधिः। अथ वा षष्ठीबाधक इति ध्येयम्।

यत्तु क्रियार्हाणां क्रियाकर्तृत्वादौ क्रियानर्हाणां च तदभावे विवक्षिते सप्तमी, क्रियार्हाणां कर्तृत्वाद्यभावे क्रियानर्हाणां च कर्तृत्वादौ विवक्षिते सप्तमी इत्येवंरूपं वार्तिकं सत्सु तरत्सु पूज्यमानेषु वा असन्त आसते न पूज्यन्ते वा, असत्सु तिष्ठत्सु अपूज्यमानेषु वा सन्तस्तरन्ति पूज्यन्ते वा, असत्सु तरत्सु पूज्यमानेषु वा सन्तस्तिष्ठन्ति न पूज्यन्ते वा इत्यत्र सप्तमीविधायकम्, तत् "यस्य च भावेन भावलक्षणम्" इत्यनेनैव सिद्धेऽनारम्भणीयमिति केचित्। कैयटादयस्तु — लक्ष्य-लक्षणभावाविवक्षायां सप्तमीविधानार्थं तद्वार्तिकमित्याहुः।

तन्न। लक्ष्यलक्षणभावातिरिक्तसंबन्धस्य अस्माद्वाक्यात् अभानेन तस्मिन्नर्थे सप्तमीविधानवैयर्थ्यापत्तेः। अतोऽर्हत्वाद्यवच्छिन्नकर्तृत्वकर्मत्वान्यतरसंबन्धेन स्व-संबन्धिक्रियाकालिकत्वस्य सप्तम्यर्थत्वद्योतनाय अनुशासनान्तररूपं वार्तिकम्। अत्र प्रथमवाक्यद्वये औचित्यं व्यङ्ग्यम्, अन्त्यद्वये चानौचित्यं व्यङ्ग्यम्। अयमाशयः — सत्पुरुषाणां तरणकर्तृत्वं पूज्यमानानां तत्कर्मत्वमुचितम्। तद्विप-रीतानां तदभाव उचित एव नात्र आश्चर्यमिति भावः। वाच्यवृत्त्या अ लाभात् व्यङ्ग्यमित्युक्तम्। एवम् अयोग्यानां कर्तृत्वकर्मत्वे क्रियायां, योग्यानां तदभावश्चानुचित इति। निरुक्तसप्तम्यर्थः औचित्यानौचित्योपपादकः तद्विशेषणी-भूतार्हत्वाद्युपपादकश्च। तिष्ठत्सु आसते इत्येताभ्यां तरणाभावो लक्ष्यते। सद-सत्पदाभ्यां च वाच्यव्यङ्ग्यविधया क्रियार्हत्वानर्हत्वे व्यज्येते। अतश्च एतादृश-

[१] सू. ६.१.७७

लक्ष्यलक्षणभावस्य गोषु दुह्यमानासु गतः इत्यादिव्यावृत्तस्यात्र विशिष्य अनुभूयमानस्य अपह्नोतुमशक्यत्वात् पृथगनुशासनम् इति खण्डदेवभट्टाचार्यैः निरूपितम्। अयं निरूपणप्रकारः ग्रन्थान्तरेषु अदृश्यमानोऽपूर्वः।

षष्ठी चानादरे[1] इति सूत्रार्थः

अनादराधिके भावलक्षणे षष्ठीसप्तम्यौ स्तः। अनादरे अधिकतया गम्यमाने यस्य क्रियया क्रियान्तरं लक्ष्यते ततः षष्ठी सप्तमी चेत्यर्थः। "रुदति रुदतो वा प्राव्राजीत्"। रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः। कदा संन्यस्तवानितिप्रश्ने उत्तरमिदम्। अत्र लक्षकत्वं षष्ठीसप्तम्योरर्थः। अनादरविशिष्टं प्रव्रजनं धात्वर्थः। षष्ठीसप्तम्यौ तात्पर्यग्राहिके। अनादरश्च लक्षकक्रियाश्रयपुत्रादिविषयकः। वर्तमानरोदनक्रियाविशिष्टपुत्रादिज्ञाप्यं अनादरविशिष्टं प्रव्रजनमिति वाक्यार्थः।

लघुमञ्जूषायाम्

"रुदति रुदतो वा प्राव्राजीत्" इत्यत्र ज्ञाप्यज्ञापकभावः षष्ठीसप्तम्योरर्थः। धातोश्चानादरविशिष्टं प्रव्रजनमर्थः। अत्र षष्ठ्यादि तात्पर्यग्राहकम्। अनादरश्च प्रत्यासत्त्या पुत्रादिविषयक एव। वैशिष्ट्यं च सामानाधिकरण्येन स्वोत्तरकालिकत्वम्। एवं च रोदनकर्तृपुत्रादिज्ञाप्यमनादरविशिष्टं प्रव्रजनमिति बोधः।

विभक्त्यर्थनिर्णये[2]

षष्ठ्या सह वैकल्पिकीं सप्तमीं ज्ञापयति "षष्ठी चानादरे"[3] इति सूत्रम्। अनादरे अधिके भावलक्षकभाववतः षष्ठी भवति चकारात् सप्तमी भवतीत्यर्थकम्। "रुदतो रुदति वा प्राव्राजीत्" इत्यादौ षष्ठीसप्तम्योः पूर्वोक्तं कालवृत्तित्वमनादरोऽधिकश्चार्थः। सोऽपि समानकालिकतया क्रियान्तरेऽन्वेति। अनादरोऽवहेला। सा च समीहितासिद्धिस्वरूपा। रुदतः समीहितं तत्पुरुषस्य गार्हस्थ्यं प्रव्रज्याविरहो वा। तदसिद्धिः प्रव्रजने सति भवत्येव। तथा च रुदत्कालवृत्तिरुदत्समीहितस्य गार्हस्थ्यादेरसिद्धिकालिकी यातीतकालवृत्तिप्रव्रज्या तत्कर्तृत्वं वाक्यार्थः। अनादरस्य नोत्तरकालिकतयान्वयः। समीहितस्य प्रव्रज्याविरहस्याभावः प्रव्रज्या तत्स्वरूपं क्रियान्तरं न तदुत्तरकालिकं भवतीत्यनुपपत्तिप्रसङ्गात्।

---

[1] सू. २.३.३८
[2] पृ. ४५५
[3] सू. २.३.३८

यत्तु क्रोशन्तमनादृत्य प्राव्राजीदिति काशिकावृत्तावुक्तं, तत्तु 'मुखं व्यादाय स्वपिति' इत्यादाविव ल्यपः समानकालिकत्वार्थकत्वाभिप्रायेण। एवं "पश्यतो वा सुवर्णं हरति" इत्यादौ हरणाभाव एव द्रष्टुः समीहितः।

एवं "यतमानानां यतमानेषु वा जयद्रथमवधीत् फाल्गुनः" इत्यादौ यतमानानां जयद्रथस्य रक्षणं वधाभावो वा समीहितः। यदुद्देश्यकेच्छाप्रयोज्या क्रिया क्रियान्तरं लक्ष्यति तस्येच्छोद्देश्यस्यासिद्धिः समीहितासिद्धिर्बोध्या। तेन 'भुञ्जानस्य भुञ्जाने वा स्वर्णं हरति' इति न प्रयोगः। यतः स्वर्णहरणाभावोद्देश्यकेच्छाप्रयोज्या न भोजनक्रियेति, तथाभूतेच्छाप्रयोज्या दर्शनक्रियेति "पश्यति पश्यतो वा हरति" इति प्रयोगे रोदनादिक्रियायाः करुणोत्पादनद्वारा प्रव्रज्याविरहानुगुणत्वावगमात् प्रव्रज्यादिविरहोद्देश्यकेच्छाप्रयोज्यत्वं रोदनक्रियाया इति।

अथ वा तथाविधेच्छोद्देश्यस्य विरोधिनी क्रिया अनादरः। तत्र क्रिया धातूपात्तैव। तथाभूतेच्छोद्देश्यविरोध एव षष्ठीसप्तम्योरर्थः। विरोधस्तु एककालावच्छेदेनैकत्रावर्तमानत्वम्। तथा च इच्छोद्देश्यो यः प्रव्रज्याविरहादिः तद्विरुद्धमतीतकालवृत्ति प्रव्रज्यादिकं वाक्यार्थः।

भाट्टरहस्ये[१]

"षष्ठी चानादर"[२] इति सूत्रात् अनादरविशिष्टलक्ष्यलक्षणभावविवक्षायां षष्ठीसप्तम्यौ विकल्पेन स्याताम्। "रुदति रुदतो वा प्राव्राजीत्"। रुदन्तं पुत्रमनादृत्येत्यर्थः।

स्वामीश्वराधिपतिदायादसाक्षिप्रतिप्रसूतैश्च[३] इति सूत्रार्थः

एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः। षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनम्। "गवां गोषु वा स्वामी"। "गवां गोषु वा प्रसूतः"। गा एवानुभवितुं जात इत्यर्थः। एवं "गवां गोषु वा ईश्वरः"। "गवां गोषु वा अधिपतिः"। "गवां गोषु वा दायादः"। पुत्रादिभिः ग्रहीतुं योग्यः पित्राद्यार्जितधनांशो दायः। तमादत्त इति दायादः। "आतश्चोपसर्गे"[४] इति अङ्विधौ उपसर्गग्रहणे सत्यपि अत एव निपातनात् कः। गोसंबन्धिदायाद इत्यर्थः। गवां च दायेऽन्वयः। नित्य-

---

[१] पृ. १६८
[२] सू. २.३.३८
[३] सू. २.३.३९
[४] सू. ३.१.१३६

साकाङ्क्षत्वात् वृत्तिः। गवात्मकस्यांशस्य आदातेति फलितोर्थः। "यस्मादधिकम्०"[१] इति सूत्रभाष्ये तु दायादशब्दः स्वामिपर्याय इति स्थितम्।

लघुशब्देन्दुशेखरे[२]

शब्दपरत्वात् "विरूपाणामपि" इति नैकशेषः। पर्यायान्तरप्रभ्वादिशब्दसंग्रहापत्त्या स्वाम्यर्थ इति नोक्तम्। दीयत इति दाय इति व्युत्पत्त्या दीयमानांशरूपं दायमादत्त इति सोपसर्गादप्यादन्तात् अत एव निपातनात् कः। गवादिकं च दायशब्दार्थैकदेशे दीयमानेऽन्वति। नित्यसाकाङ्क्षत्वात् वृत्तिः दायादशब्दः स्वामिपर्याय इत्यन्ये।

विभक्त्यर्थनिर्णये[३]

कतिपयशब्दयोगे षष्ठीसमानार्थिकां सप्तमीं ज्ञापयति "स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च"[४] इति सूत्रम्। स्वाम्यादिशब्दैर्योगे षष्ठीसप्तम्यौ विभक्ती भवत इत्यर्थकम्। "गवां गोषु वा स्वामी" इत्यादौ षष्ठीसप्तम्योः स्वामित्वान्वयि निरूपितत्वमर्थः। "गवां गोषु वा ईश्वरः" इत्यादौ च तयोः षष्ठीसप्तम्योः ऐश्वर्यान्वयि निरूपितत्वमेवार्थः। ऐश्वर्यं स्वामित्वमेव। अथ वा ऐश्वर्यं सामर्थ्यं स्वत्वोत्पादकत्वम्। तत्र स्वत्वान्वय्याधेयत्वं तयोरर्थः। गोनिरूपितस्वामित्ववानिति गोनिष्ठस्वत्वनिरूपक इति वा वाक्यार्थः।

"गवां गोषु वा दायादः" इत्यादौ दायादशब्दस्य धनग्राहकोऽर्थः तत्र धनान्वयि तादात्म्यं षष्ठीसप्तम्योरर्थः। गवाभिन्नधनग्राहको वाक्यार्थः।

"गवां गोषु वा साक्षी" इत्यादौ वृत्तनिश्चयप्रमावान् साक्षिशब्दार्थः। वृत्तान्वयिसंबन्धस्तयोरर्थः। गोसंबन्धिवृत्तविषयकनिश्चयात्मकप्रमावानित्यर्थः।

"गवां गोषु वा प्रतिभूः" इत्यादौ अन्यकर्तृकावधिकालिकधनदानाभावप्रयोज्यधनदानकर्ता प्रतिभूशब्दार्थः।

"वादिनो वादिनि वा प्रतिभूः" इत्यादाववधिकालिकदर्शनकर्ता प्रतिभूशब्दार्थः। दर्शनान्वयि विषयत्वं षष्ठीसप्तम्योरर्थः।

---

[१] सू. २.३.९
[२] पृ. ७३०
[३] पृ. ४५६
[४] सू. २.३.३९

"गवां गोषु वा प्रसूतः" इत्यादौ प्रसवकर्म प्रसूतशब्दार्थः। प्रसवान्वयि विज्ञानानुगुणत्वं तयोरर्थः। गोविज्ञानानुगुणप्रसवकर्मेति वाक्यार्थः। अत एव "गवां गोषु वा प्रसूतः" इत्यत्र गा एवानुभवितुं जात इत्यर्थ इति शाब्दिकाः।

वस्तुतस्तु प्रसवान्वयि धर्मोपार्जकत्वं तयोरर्थः। तथा च गोधर्मोपार्जक-प्रसवकर्मेत्यन्वयबोधः। गोधर्मो जाड्यादिः। अत एव "तदन्वये शुद्धिमति प्रसूतः" इत्यत्र तदन्वयधर्मः शुद्धिमत्त्वं प्रसूते दिलीपे युक्तम्।

भाट्टरहस्ये[१]

एवं "स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च"[२] इति सूत्रात् एभिः सप्त-भिर्योगे षष्ठीसप्तम्यौ स्तः। "गोषु गवां वा स्वामी"। निरूपकत्वं विभक्त्यर्थः। तस्य स्वाश्रयस्वामिवत्कर्तृकत्वसंबन्धेन अस्तिक्रियायामन्वयः। समानार्थक-स्वाम्यादित्रयग्रहणं पर्यायान्तरनिवृत्त्यर्थम्। विरूपाणामपि समानार्थकानामिति वार्तिकात् वक्रदण्डावितिवत् (वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ) पदत्रयैक-शेषस्तु शब्दस्वरूपपरत्वात् नाशङ्कनीयः। "गवां गोषु वा प्रसूतः"। गा अनु-भवितुं जात इति हरदत्तः।

आयुक्तकुशलाभ्यां चासेवायाम्[३] इति सूत्रार्थः

आभ्यां योगे षष्ठीसप्तम्यौ स्तः तात्पर्येऽर्थे। (औत्सुक्ये) आयुक्तो व्यापारितः प्रवर्तित इत्यर्थः। आयुक्तः कुशलो वा हरिपूजने हरिपूजनस्य वा। हरिपूजने विषये आयुक्तः प्रवर्तित इत्यर्थः। अत्र वैषयिकाधिकरणत्वविवक्षायां सप्तम्यामेव प्राप्तायां संबन्धमात्रविवक्षायां तु षष्ठ्यामेव प्राप्तायां वचनम्। आसेवायां किम्। आयुक्तो गौः शकटे। ईषद्युक्त इत्यर्थः। आङीषदर्थे तात्पर्यं च तदेकव्यापारतेति शेखरे। विषयसप्तम्यां पक्षे षष्ठी विधीयते। आसेवा = तदेकपरत्वम् इति भाट्टरहस्ये।

विभक्त्यर्थनिर्णये[४]

क्रियाप्रयोजकत्वार्थिकां षष्ठ्या सह सप्तमीं ज्ञापयति "आयुक्तकुशलाभ्यां चासेवायाम्"[५] इति सूत्रम्। आयुक्त इति कुशल इत्येताभ्यां शब्दाभ्यां योगे षष्ठीसप्तम्यौ विभक्ती भवतः आसेवायां गम्यमानायामित्यर्थकम्। आसेवा

---

[१] पृ. १६९
[२] सू. २.३.३९
[३] सू. २.३.४०
[४] पृ. ४५७
[५] सू. २.३.४०

तात्पर्यम्। "आयुक्तः कृष्णपूजनस्य कृष्णपूजने वा" इत्यादौ व्यापृत आयुक्त-शब्दार्थः। तत्र व्यापारान्वयि प्रयोजकत्वं षष्ठीसप्तम्योरर्थः। तथा च कृष्णपूजन-प्रयोजकव्यापाराश्रय इत्यन्वयबोधः।

"कुशलः कृष्णपूजनस्य कृष्णपूजने वा" इत्यादौ कुशलशब्दार्थो दक्षः। स च पुनः पुनः कर्ता। अत्रापि पुनः पुनः करणान्वयि प्रयोजकत्वमेव तयोरर्थः। तथा च कृष्णपूजनप्रयोजकपुनःपुनःकरणाश्रय इत्यन्वयबोधः।

एवमेव "आयुक्तः पटकरणस्य पटकरणे वा कुशलः" पटकरणस्य पटकरणे वा इति काशिकोदाहरणेऽप्यन्वयो बोध्यः।

यत्र क्रियान्तरतात्पर्यं नास्ति तत्र न षष्ठी। यथा "आयुक्तो गौः शकटे" इत्यादौ। आयुक्त इत्यस्य ईषद्युक्त इत्यर्थः। तथा च यत्र व्यापृतादिरायुक्तशब्दार्थः तत्र क्रियान्तरतात्पर्ये सति षष्ठी साधुः।

यतश्च निर्धारणम्[१] इति सूत्रव्याख्यानम्

जातिगुणक्रियासंज्ञाभिः समुदायात् एकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ स्तः। यत इति तत इति च पञ्चम्यर्थे तसिः। यस्मात् समुदायात् एकदेशस्य जातिगुणक्रियासंज्ञाभिः पृथक्करणं स्वेतरव्यावृत्तधर्मविशेषवत्त्वबोधनं निर्धारणशब्दवाच्यं गम्यते तस्मात् षष्ठीसप्तम्यावित्यर्थः। स्वशब्देन एकदेश उच्यते।

जात्या पृथक्करणस्योदाहरणम् — "नृणां नृषु वा ब्राह्मणः श्रेष्ठः" नृशब्दः मनुष्यसमुदाये वर्तते। उद्भूतावयवभेदविवक्षायां बहुवचनम्। ब्राह्मण इति तु जात्यभिप्रायमेकवचनम्। षष्ठीसप्तम्योः अवयवावयविभावरूपः संबन्धोऽर्थः। उक्त-निर्धारणविषयत्वरूपश्च। ततश्च मनुष्यसमुदायैकदेशभूतो ब्राह्मणः स्वेतरव्यावृत्त-श्रैष्ठ्यरूपधर्मवान् इति बोधः। गुणेन पृथक्करणस्योदाहरणम्।

"गवां गोषु वा कृष्णा बहुक्षीरा" गोसमुदायैकदेशभूता कृष्णा गौः स्वेतर-व्यावृत्तबहुक्षीरत्वरूपधर्मवतीत्यर्थः।

क्रियया पृथक्करणस्योदाहरणम् — "गच्छन्तं गच्छत्सु वा धावन् शीघ्रः" गच्छत्समुदायैकदेशभूतो धावन् स्वेतरव्यावृत्तशैघ्र्यधर्मक इत्यर्थः।

संज्ञया पृथक्करणस्योदाहरणम् — "छात्राणां छात्रेषु वा मैत्रः पटुः" छात्र-समुदायैकदेशभूतो मैत्रनामा स्वेतरव्यावृत्तपटुत्वधर्मक इत्यर्थः।

---

[१] सू. २.३.४१

लघुशब्देन्दुशेखरे[१]

जातिगुणक्रियासंज्ञाभिरिति। विशिष्टस्येत्यध्याहारः। जात्यादिविशिष्टस्य एकदेशस्य यतः स्वघटितसमुदायात् स्वेतरसमुदायघटकव्यावृत्तधर्मकरणकं पृथक्करणं तद्वाचकात् षष्ठीत्यर्थः।

अत्र भैरवी — "यतश्च निर्धारणम्"[२] इति सूत्रात् यथाश्रुतात् यस्मात् समुदायात् निर्धारणं पृथक्करणं तादृशसमुदायघटकावृत्तिधर्मवत्त्वबोधनं यत्र तत्र तादृशसमुदयवाचकप्रातिपदिकात् षष्ठीसप्तम्यावित्यर्थः प्रतीयते। परं त्वयं न युक्तः। "नराणां क्षत्रियः शूरः" इत्यत्र नृशब्दस्य समुदायवाचकत्वाभावात्। अतः सूत्रार्थ उक्तो मूले जातिगुणक्रियासंज्ञाभिरिति। एवमपि जात्यादिभिरेव पृथक्करणमिति भ्रान्तिर्भवतीत्यत आह — विशिष्टस्येत्यध्याहार इति। एवमपि जात्यादिविशिष्टस्य यतो निर्धारणमिति भ्रमः स्यात् अतः पूरणेन व्याचष्टे — एकदेशस्येति। एतेन तादृशसमुदायवृत्तिधर्माश्रयस्य लाभः। यथा "नराणां क्षत्रियः शूरः" इत्यत्र नृसमुदायवृत्तिनरत्वाश्रयस्य क्षत्रियस्य जातिविशिष्टस्य लाभः। समुदायवृत्तित्वं च समुदायत्वाश्रयवृत्तित्वमेव, न तु समुदायत्वपर्याप्त्यधिकरणपर्याप्तत्वम्। क्षत्रियत्वस्य तथासंभवात्। न हि नृत्वं समुदायत्वपर्याप्त्यधिकरणे समुदाये पर्याप्तम्। तस्य प्रत्येकपर्याप्तत्वात्। एवं च प्रकृते नृशब्दः नृसमुदायबोधकतया तादृशसमुदाये वर्तमानं यत् समुदायत्वं स्वरूपसंबन्धेन तादृशसमुदायत्वाश्रयक्षत्रियस्य तादृशसमुदायत्वाश्रयवृत्तिनृत्वावच्छिन्नस्य लाभः। क्षत्रियपदार्थश्चात्र एकदेशः। स्वघटितसमुदायात् = नृसमुदायात्। स्वेतरसमुदायघटकेति। स च ब्राह्मणादिः। स्वम् एकदेशो जात्यादिविशिष्टः। स्वेतरेत्यस्य समुदायघटकेऽन्वयः। तस्य च व्यावृत्तौ। तादृशसमुदायघटकावृत्तिर्धर्मः शूरत्वम्, तत्करणकं पृथक्करणं च क्षत्रियस्य शूरत्वाश्रयत्वबोधनमेवेति नृशब्दादत्र षष्ठ्युपपत्तिः।

यद्यपि तद्धर्माश्रयत्वबोधनस्य तद्धर्मप्रकारकबोधनानुकूलव्यापाररूपतया तस्य धर्मस्य कर्मत्वं संभवति। तथापि तद्धर्मवत्त्वबोधने तस्य धर्मस्य करणत्वविवक्षया एवं लेखः।

एवं च जात्यादिविशिष्टस्य यद्धर्मावच्छिन्नस्य तादृशजात्यादिशून्यतद्धर्मावच्छिन्नावृत्तिविधेयवत्त्वबोधनं यत्र तत्र तद्धर्मावच्छिन्नवाचकप्रातिपदिकात् षष्ठीसप्तम्यौ भवत इति सूत्रार्थः पर्यवसन्नः।

---

[१] पृ. ७३०

[२] सू. २.३.४१

यथा क्षत्रियत्वविशिष्टस्य नरत्वावच्छिन्नस्य क्षत्रियत्वशून्यनरत्वावच्छिन्न-ब्राह्मणावृत्तिशूरत्ववत्त्वबोधनं "नराणां क्षत्रियः शूरः" इत्यत्रास्तीति भवति नृशब्दात् विभक्तिः — इति।

यद्धर्मावच्छिन्नस्येत्युपादानात् "नराणां व्याघ्रः शूरः" इति न, किं तु "नरेभ्यो व्याघ्रः शूरः" इत्येव। तादृशजात्यादिशून्येत्युपादानात् विधेयतया विवक्षितस्य शूरत्वस्य नरत्वावच्छिन्नावृत्तित्वबाधेऽपि न क्षतिः। तद्धर्मावच्छिन्नावृत्तित्वं परित्यज्य तादृशजात्यादिशून्ययत्किंचिदवृत्तित्वनिवेशे "नराणां क्षत्रियो गौरः" इत्यपि स्यात्। गौरत्वस्य क्षत्रियत्वशून्यशूद्रावृत्तित्वात्। तादृशजात्यादिशून्य-सामान्यावृत्तित्वनिवेशेऽस्य प्रयोगस्यापत्तिनिवारणेऽपि "नराणां क्षत्रियः शूरः" इत्यत्रैवानुपपत्तिः। शूरत्वस्य विधेयस्य क्षत्रियत्वशून्यसामान्यान्तर्गतराक्षसादि-वृत्तित्वेन क्षत्रियत्वशून्यसामान्यावृत्तित्वबाधात्, अतः तद्धर्मावच्छिन्नावृत्तित्व-निवेशः — इति। सर्वोऽप्ययं भैरवग्रन्थस्थपरिष्कारः व्युत्पत्तिवादमनुकरोति।

यत इति किम्। यस्य जात्यादिविशिष्टस्य स्वेतरव्यावृत्तधर्मवत्त्वबोधनं तत एव मा भूत् क्षत्रियपदात् षष्ठी मा भूत्। न च क्षत्रियपदात् परत्वात् प्रथमैव स्यादिति वाच्यम्। षष्ठ्यपवादत्ववत् प्रथमापवादत्वस्यापि संभवात्। एवं च स्वघटित-समुदायावधिकस्वेतरसमुदायघटकव्यावृत्तधर्मकरणकपृथक्करणरूपनिर्धारणविषयत्व-रूपः अवयवावयविभावरूपश्च संबन्धः विभक्त्यर्थः। नृसमुदायावधिकद्विजेतर-नरव्यावृत्तधर्मकरणकपृथक्करणरूपनिर्धारणविषयः नृसमुदायावयवो द्विजः श्रेष्ठः इति बोधः। संसर्गघटकं करणं च श्रेष्ठत्वादिरूपमेव, प्रत्यासत्तेः। (शब्दत उपस्थितत्वात्) इत्युक्तम्।

लघुमञ्जूषायाम्

"नृणां नृषु वा द्विजः श्रेष्ठः" इत्यादौ "यतश्च निर्धारणम्"[1] इति सूत्रेण षष्ठीसप्तम्यौ भवतः। यतः स्वेतरेभ्यः स्वघटितसमुदायघटकेभ्यः व्यावृत्तेन धर्मेण समुदायात् एकदेशस्य जातिगुणक्रियासंज्ञाविशिष्टस्य पृथक्करणरूपं निर्धारणं ततः षष्ठीसप्तम्यौ स्तः इति तदर्थः। पृथक्करणं च व्यावृत्तधर्मप्रकारकज्ञानविषयीकरणम्। अस्ति च "नराणां विप्रः श्रेष्ठः" इत्यादौ विप्रत्वादिविशिष्टस्य विप्रघटितनर-समुदायघटको यः विप्रेतरः क्षत्रियादिः तद्व्यावृत्तश्रेष्ठत्ववत्तया प्रतीतिः। एवं च निर्धारकधर्मश्रेष्ठत्वादिनिर्धारणावधिनरसमुदाययोः व्यावृत्तत्वाख्यः संबन्धो निर्धा-रणविभक्तेरर्थः। नरादिपदं च नरत्वादिसामान्यरूपेण विप्रेतरनरादिघटित-

---

[1] सू. २.३.४१

समुदायपरम्। विप्रेतरनारादिघटितसमुदायव्यावृत्तश्रेष्ठत्ववान् विप्र इति बोधः। तद्व्यावृत्तत्वं च तदवृत्तित्वम्।

"नराणां क्षत्रिये शौर्यम्" इत्यत्र क्षत्रियेतरनरघटितसमुदायव्यावृत्तं क्षत्रियवृत्ति शौर्यम् इति बोधः।

परे तु — अत्र न सूत्रस्वारस्यम्। "न निर्धारणे"[१] इति सूत्रेण निर्धारणे या षष्ठी सा न समस्यत इत्यर्थकेन निर्धारणस्य विभक्त्यर्थघटकत्वबोधनात्। तस्मात् यतः स्वसजातीयघटितसमुदायात् एकदेशस्य जात्यादिभिः पृथक्करणरूपं निर्धारणं ततः षष्ठीसप्तम्याविति सूत्रार्थः। निर्धार्यमाणविप्रादि निर्धारणावधिनृसमुदाययोः परस्परमन्वयः। निर्धारणावधिस्वेतरसमुदायघटकव्यावृत्तधर्मकरणकनिर्धारणम् (निर्धारणावधिः यः धर्मः स्वेतरघटितसमुदायः तद्घटकः क्षत्रियादिः तद्व्यावृत्तः धर्मः श्रैष्ठ्यं तत्करणकं निर्धारणं भेदज्ञानं), विषयविषयिभावः, अवयवावयविभावरूपश्च संबन्धः विभक्त्यर्थः। नृसमुदायावधिकद्विजेतरव्यावृत्तश्रेष्ठत्वकरणकनिर्धारणविषयः नृसमुदायावयवो द्विजः श्रेष्ठः इति बोधः। संसर्गघटककरणं च श्रेष्ठत्वं प्रत्यासत्तेः।

"नृणां मध्ये द्विजः श्रेष्ठः" इत्यादौ तु मध्यशब्दयोगे संबन्धसामान्ये षष्ठी, न तु निर्धारणे षष्ठी। अत एव 'नृषु मध्ये' इति सप्तम्याः असाधुत्वम्। मध्ययोगे निर्धारणषष्ठ्यां तु सप्तम्या अपि साधुता स्यात्। नृसमुदायसंबन्धिमध्यवर्ती द्विज इति बोधः। श्रेष्ठत्वादौ द्विजेतरनराद्यवृत्तित्वबोधस्तु मानसः, न शाब्दः। 'देवदत्तो वामेनाक्ष्णा पश्यति' इत्युक्ते दक्षिणेन न पश्यतीतिवत्।

एतेन — मध्यशब्दोऽव्ययम्। सोऽपि निर्धारणार्थकः। तथा च "नराणां मध्ये क्षत्रियः शूरः" इत्यादौ निर्धारणार्थकयोः षष्ठीमध्यशब्दयोः सह प्रयोगः कथमिति नाशङ्कनीयम्। निर्धारणवाचिनः मध्ये इत्यव्ययस्य तदर्थकषष्ठ्या संभेदे "हे चैत्र" इत्यादाविव संभेदे नान्यतरवैयर्थ्यम् इति न्यायात्। तेन मध्यशब्दयोगे यतश्च निर्धारणमिति सूत्रप्रवृत्त्या षष्ठ्या सह सप्तम्या अपि साधुत्वमिति तर्कालंकारोक्तं नागेशेन नानुमन्यत इति सिद्धम्।

गोमण्डले वर्तमाना या कृष्णा गौः सा बहुक्षीरा इति आधारसप्तमीघटितवाक्येऽप्युक्तन्यायेन मानस एव कृष्णेतरगोव्यावृत्तत्वबोधः।

ननु "जलपृथिव्योर्जलं स्नेहवत्" इत्यत्र कथं निर्धाणे षष्ठी सप्तमी वा? "नराणां द्विजः श्रेष्ठः" इत्यत्र हि द्विजेतरनराणां सत्त्वात् निर्धार्यमाणद्विजभेदस्य नरपदो-

---

[१] सू. २.२.१०

पस्थाप्ये प्रसिद्धिरस्ति। प्रकृते तु निर्धार्यमाणस्य जलस्य प्रातिस्विकरूपेण निर्धारणावधिबोधकजलपृथिवीपदोपात्तत्वात् तत्र निर्धार्यमाणजलभेदो न सिध्यति। तथा "नराणां द्विजः श्रेष्ठः" इत्यत्र श्रेष्ठत्वे विप्रेतरनरव्यावृत्तत्वमस्ति। प्रकृते जलस्यापि निर्धारणावधिघटकतया तत्र स्नेहस्य सत्त्वेन जलपृथिवीव्यावृत्तत्वं बाधितम् इति चेत् —

उच्यते। इतरेतरद्वन्द्वेऽपि समूहस्य प्राधान्यात् जलपृथिवीसमूहे जलभेदस्य सत्त्वेन समूहव्यावृत्तत्वस्य च स्नेहे सत्वेन न काचित् अनुपपत्तिः। जलपृथिवी-समूहावयवभूतं जलम् समूहव्यावृत्तस्नेहवत् इति बोधः। समूहावयवयोश्च भेदाभेदाविति न "पञ्चमी विभक्ते"[१] इत्यस्य प्रवृत्तिः। यत्र भेद एव भासते, न त्वभेदः तत्रैव पञ्चम्याः प्रवृत्तेः प्रकृते भेदेन सहाभेदस्यापि भानात्।

एतेन सांकाश्यानां पाटलिपुत्रकाणां च पाटलिपुत्रका अभिरूपतमा इति "द्विवचनविभज्योपपदे०"[२] इति सूत्रस्थः भाष्यप्रयोगो व्याख्यातः। तत्समूहे पाटलिपुत्रकभेदस्य सत्त्वेन वस्तुतोऽवयवाभेदस्य च तत्र सत्त्वेन पञ्चम्यप्राप्तेः। समुदायोऽवयवेभ्यो भिन्नाभिन्न इति सिद्धान्तात्।

निर्धारणावधिनिर्धार्यमाणनिर्धारणहेतूनां संनिधान एव निर्धारणविभक्तिः समास-निषेधश्च तेन "पुरुषाणामुत्तमः" इत्यादौ शेषे षष्ठीति पुरुषोत्तम इत्यादौ समासो भवत्येवेति "द्विवचनविभज्योपपदे०"[३] इति सूत्रे कैयटः — इत्याहुः। इति नागेशस्य निरूपणम्।

कारकचक्रे[४]

एवं निर्धारणषष्ठ्यर्थः न्यरूपि — निर्धारणे षष्ठ्याः "गवां कृष्णा संपन्नक्षीरा" इत्यादौ भेदोऽभेदश्चार्थः। कृष्णापदस्य शक्त्या कृष्णा लक्षणया कृष्णान्या चार्थः। षष्ठ्यर्थस्याभेदस्य कृष्णापदशक्यलक्ष्ययोर्द्वयोरन्वयः। विधेयस्य संपन्नक्षीरेत्यस्य अभेदेन कृष्णायामन्वयः, तथा प्रतियोगितासंबन्धेन षष्ठ्यर्थभेदे चान्वयः। भेदस्य चाश्रयतासंबन्धेन कृष्णापदलक्ष्यार्थे कृष्णान्यस्मिन्नन्वयः। तथा च गवाभिन्ना कृष्णा संपन्नक्षीराभिन्ना, गवाभिन्ना कृष्णान्या संपन्नक्षीरप्रतियोगिकभेदवती (संपन्नक्षीर-भिन्ना) इति शाब्दबोधः। प्रपञ्चितमिदमेव कारकार्थविचारेऽस्माभिः — इति।

---

[१] सू. २.३.४२
[२] सू. ५.३.५७
[३] सू. ५.३.५७
[४] पृ. ८८

शब्दशक्तिप्रकाशिकानुसारं निर्धारणषष्ठ्यर्थविचारः[१]

विशेषस्य स्वेतरसामान्यव्यावृत्तधर्मवत्त्वं निर्धारणम्। तच्च समुदितं न षष्ठ्यर्थः। सामान्यतन्निष्ठधर्मयोः तद्वाचकपदोपात्तत्वात्। किं तु विशेषान्यत्वं व्यावृत्तत्वं च षष्ठ्यर्थः। विशेषस्तु समभिव्यहृतः क्षत्रियादिर्विशेष्यः ग्राह्यः। व्यावृत्तत्वं च भेदप्रतियोगित्वम्। विशेषान्यत्वस्य प्रकृत्यर्थे नरत्वावच्छिन्नेऽन्वयः। नरत्वावच्छिन्नाधेयतासंबन्धेन प्रकृत्यर्थस्य भेदेऽन्वयः। शूरतमस्य क्षत्रिये अभेदसंबन्धेन अन्वयः। तथा च क्षत्रियान्यनरत्वावच्छिन्नवृत्तिभेदप्रतियोगित्ववच्छूरतमाभिन्नः क्षत्रियः इत्याकारकस्तत्र बोधः। क्षत्रियान्यनरस्याधेयतामात्रेण भेदेऽन्वये "नराणां क्षत्रियः सुन्दरः" इत्यपि प्रयोगापत्तेः। क्षत्रियान्यकुरूपनरनिष्ठभेदप्रतियोगित्वस्य सुन्दरे सत्त्वात्। एवं च नरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वं शूरतमे बाधितम्। तस्य नरत्वावच्छिन्नक्षत्रियवृत्तिभेदप्रतियोगित्वविरहात्। अतः प्रकृत्यर्थनरे क्षत्रियान्यत्वविशेषणम्।

न च 'घटानां क्षत्रियः शूरः' इत्यपि स्यात्, क्षत्रियान्यघटत्वावच्छेदेन शूरभेदस्य सत्त्वादिति वाच्यम्। 'राहोः शिरः' इत्यादाविव प्रकृतेऽपि क्षत्रियान्वयिनः स्वप्रकृत्यर्थतादात्म्यस्य षष्ठ्या बोध्यत्वात्. घटतादात्म्यस्य च क्षत्रिये बाधात्।

न च संख्यान्यस्य सुबर्थस्य प्रकृत्यर्थं प्रति विशेष्यत्वमिति नियमात् क्षत्रियान्यत्वरूपस्य षष्ठ्यर्थस्य प्रकृत्यर्थनरं प्रति प्रकारत्वं न संभवतीति वाच्यम्। संबोध्यत्वादौ व्यभिचारेण तादृशनियमस्य प्रायिकत्वात्। संबोध्यत्वस्य प्रकृत्यर्थप्रकारतयैव भानात्।

न च 'नराणां क्षत्रियो द्रव्यम्' इत्यपि स्यात्, क्षत्रियान्यनरत्वावच्छेदेन द्वित्वाद्यवच्छिन्नद्रव्यनिष्ठप्रतियोगिताकभेदसत्त्वात् द्रव्ये क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्याबाधात् इति वाच्यम्। द्रव्यत्वादिविशिष्टे धर्मणि द्रव्यत्वाद्यवच्छिन्नस्यैव भेदप्रतियोगित्वस्य बोधने निर्धारणषष्ठ्याः समर्थत्वात् द्वित्वाद्यवच्छिन्नं भेदप्रतियोगित्वमादाय तथा प्रयोगस्यापादयितुमशक्यत्वात्। फलानुरोधित्वात् कल्पनायाः।

यद्यपि भेदः प्रतियोगित्वं चेति द्वयमेव निर्धारणषष्ठ्यर्थः, न तु क्षत्रियभेदः। क्षत्रियशब्देन उपस्थापितस्य क्षत्रियस्य षष्ठ्यर्थे भेदे, तस्य नरे, नरस्य च पुनर्भेदे पुनर्भेदस्य च प्रतियोगित्वेऽन्वयादेव क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्य शूरतमेऽन्वयसंभवात्; तथापि क्षत्रियादिनामपदोपात्तस्य क्षत्रियादेः तादृश-

---

[१] श.श.प्र.पृ. ३८१

नामोत्तरविभक्त्यर्थ एव भेदेनान्वयस्य व्युत्पन्नत्वात् नरपदोत्तरषष्ठ्यर्थे तदन्वयासंभवात् क्षत्रियान्यत्वं विशिष्टमेव षष्ठ्यर्थः, न त्वन्यत्वमात्रम्।

न च निर्धारणस्थले 'नरस्य क्षत्रियः शूरः' इत्येकवचनप्रयोगोऽपि स्यादिति वाच्यम्। इष्टापत्तेः। पाणिपादस्य पाणिः पवित्रम् इत्यत्रेव अन्यत्रापि एकवचनस्य निर्धारणार्थकत्वे क्षत्यभावात्। अत एव "द्वन्द्वः सामासिकस्य च" इति गीतापि संगच्छते।

यदि तु "पाणिपादस्य पाणिः पवित्रम्" इत्यत्र न निर्धारणे षष्ठी। पाणिपादोभयत्वावच्छिन्ने पाणिभेदस्यासत्त्वात्। किं तु संबन्धसामान्ये षष्ठी। एतेन "द्वन्द्वः सामासिकस्य च" इति गीताप्रयोगोऽपि व्याख्यात इति विभाव्यते; तदा एकवचनभिन्नयोरेव षष्ठीसप्तम्योः उक्तनिर्धारणबोधकत्वव्युत्पत्तिं स्वीकृत्य "नरस्य क्षत्रियः सूरः" इति प्रयोगापत्तिर्वारणीया।

ननु "जलपृथिव्योः जलं स्नेहवत्" इत्यादौ जलभिन्नयोः जलपृथिव्योः अप्रसिद्धिः। व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकैकदेशभेदस्यास्वीकारात्। तथा जलान्यजलपृथिव्युभयत्वावच्छिन्नवृत्तिकभेदप्रतियोगिस्नेहवदभिन्नं जलमिति बोधासंभवः।

न च द्विपदद्वन्द्वोत्तरनिर्धारणषष्ठ्याः अन्यतरवृत्तिभेदप्रतियोगित्वमेवार्थः। तद्-धटके चान्यतरस्मिन् एकपदोपात्तत्वेन जलान्यत्वादेः षष्ठ्यर्थान्तरस्यान्वयः। तथा च जलान्यो यः जलपृथिव्योरन्यतरः तन्निष्ठस्य भेदस्य प्रतियोगित्वं स्नेहवति वर्तत एव। अन्यतरत्वस्य अव्यासज्यवृत्तित्वेन तदवच्छिन्ने एकदेशभेदसत्त्वे बाधकाभावादिति वाच्यम्।

तावतापि जलपृथिव्युभयतादात्म्यस्य जले बाधात् उक्तवाक्यस्यायोग्यतातादवस्थ्यात्। जलपृथिव्योस्तेज उष्णम् इत्यादिप्रयोगवारणाय निर्धारणषष्ठ्याः तादात्म्यवाचिताध्रौव्यात्।

न चान्यतरतादात्म्यस्य षष्ठ्यर्थत्वं स्वीकृत्य उक्तप्रयोगो वारणीयः इति वाच्यम्। तथा सति "नरघटयोः क्षत्रियः शूरः" इति प्रयोगापत्तेः। नरघटान्यतरतादात्म्यस्य क्षत्रिये सत्त्वात्।

किं च "घटतद्भिन्नयोः घटः कम्बुग्रीवादिमान्" इत्यादौ घटतद्भिन्नान्यतरत्वाप्रसिद्ध्या तादृशान्यतरवृत्तिभेदस्य बोधयितुमशक्यत्वाच्च — इति चेत् —

न। द्वन्द्वोत्तरनिर्धारणषष्ठ्याः द्वन्द्वघटकपदार्थपर्याप्तसंख्याश्रयेऽपि शक्तत्वेन तस्मिन्नेव एकपदोपात्तत्वेन षष्ठ्यर्थस्य जलान्यत्वरूपनिर्धार्यभेदस्यान्वयेन सर्व-

सामञ्जस्यात्। ''जलपृथिव्योः जलं स्नेहवत्'' इत्यादौ जलभिन्नो यः जलपृथिवीपर्याप्तसंख्याश्रयः (पृथिवी) तत्त्वावच्छिन्नवृत्तिकभेदप्रतियोगी यः स्नेहवान् तदभिन्नं जलपृथिवीपर्याप्तसंख्याश्रयो जलमिति बोधः। द्वित्वत्वावच्छिन्नद्वित्वाश्रये जलभेदस्यासत्त्वेऽपि द्वित्वावच्छिन्नद्वित्वाश्रयवृत्तिकभेदप्रतियोगित्वस्य स्नेहवत्यसत्त्वेऽपि च संख्यात्वावच्छिन्नद्वित्त्वाश्रये जलभेदः अस्ति, संख्यात्वावच्छिन्नद्वित्वाश्रयवृत्तिभेदप्रतियोगित्वं च स्नेहवति अस्ति। संख्यात्वस्य व्यासज्यवृत्तितानवच्छेदकत्वात् इत्याशयः।

''घटपटमठानां घटः कम्बुग्रीवादिमान्'' इत्यत्रापि घटभिन्नो यः घटपटमठपर्याप्तसंख्याश्रयः तदवच्छिन्नवृत्तिकभेदस्य प्रतियोगिकम्बुग्रीवादिमदभिन्नो घटपटमठपर्याप्तसंख्याश्रयः कम्बुग्रीवादिमानित्यन्वयबोधः।

इदं तु बोध्यम् — यत्रोद्देश्यविधेययोः तादात्म्यसंबन्धेनान्वयबोधसामग्री तत्रैव निर्धारणषष्ठ्याः भेदप्रतियोगित्वमर्थः। यत्र तु संबन्धान्तरेणान्वयबोधसामग्री तत्रात्यन्ताभावप्रतियोगित्वमर्थः। अतो ''नराणां क्षत्रिये शौर्यम्'' इत्यादौ क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकात्यन्ताभावप्रतियोगित्वमेव शौर्यादौ प्रतीयते, न तु तादृशभेदप्रतियोगित्वम्। ''नराणां क्षत्रिये रूपम्'' इत्यपि प्रयोगापत्तेः। क्षत्रियान्यनरवृत्तिभेदप्रतियोगित्वस्य रूपे सत्वात्।

''नराणां मध्ये क्षत्रियः शूरः'' इत्यादौ तु निर्धारणवाचिनो मध्ये इत्यव्ययस्य तदर्थकषष्ठ्या सह संभेदे (मेलने) ''हे चैत्र'' इत्यादाविव नान्यतरवैयर्थ्यम्। हेशब्दप्रथमयोर्मिलितयोः संबोधनार्थकत्वात् मध्येशब्दषष्ठ्योरुभयोर्मिलितयोः निर्धारणार्थकत्वात्। संभेदे नान्यतरवैयर्थ्यमिति च न्यायः।

''नरेषु क्षत्रियः शूरः'' इत्यादौ निर्धारणसप्तमीस्थलेपि उक्तदिशैवान्वयबोधः। क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वाश्रयशूरतमाभिन्नः क्षत्रिय इत्याकारकः बोध इति यावत्।

यत्तु — ''नराणां क्षत्रियः शूरतमः'' इत्यादौ राहोः शिरः इत्यत्रेवाभेद एव षष्ठ्यर्थः तादात्म्यं वा। तथा च नराभिन्नक्षत्रियत्वावच्छेदेन शूरतमाभेदः तत्र वाक्यार्थः। तेन 'नराणां क्षत्रियोऽर्जुनः' इत्यादिको न प्रयोगः। नराभिन्नक्षत्रियत्वावच्छेदेनार्जुनाभेदस्यासत्वात्। न वा 'नराणां वानरः पशुः' इति प्रयोगः। वानरे पश्वभेदसत्वेऽपि नराभेदस्य विरहात् इति।

तत्तुच्छम्। ''नराणां क्षत्रियः प्राणी, क्षत्रियाणां नरः शूरः'' इत्यादिवाक्यस्य प्रामाण्यापत्तेः। नराभिन्नक्षत्रियत्वावच्छेदेन प्राण्यभेदस्य, क्षत्रियाभिन्ननरत्वावच्छेदेन शूराभेदस्य च सत्वात्।

केचित्तु — "नराणां क्षत्रियः शूरः" इत्यादौ क्षत्रियान्यो नरः शूरभिन्नः नराभिन्नः क्षत्रियश्च शूरः इत्येवं अन्वयितावच्छेदकधर्मावच्छेदेन धियम् उररीकुर्वन्तः भेदमभेदं च निर्धारणवाचिषष्ठीसप्तम्योरर्थमाहुः।

तच्चिन्त्यम्। नामार्थमुख्यविशेष्यकान्वयबोधे नाम्नः प्रथमान्तत्वस्यापेक्षितत्वात् षष्ठ्यन्तनरशब्दवाच्यस्य मुख्यविशेष्यतया भानानुपपत्तेः 'क्षत्रियान्यो नरः शूरभिन्नः' इति बोधस्यासंभवात्।

न च क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकः शूरभेद इति बोधोऽस्त्विति वाच्यम्। स्वप्रकृत्यर्थावच्छिन्नस्यैव संख्याशून्यसुबर्थस्य शब्दान्तरार्थेन सहान्वयस्य व्युत्पन्नत्वेन षष्ठ्यर्थे केवलभेदे शूरादेरन्वयायोगाच्च — इति तर्कालंकाराः।

व्युत्पत्तिवादानुसारेण निर्धारणविभक्त्यर्थः

गदाधरभट्टाचार्याः व्युत्पत्तिवादे षष्ठीप्रकरणे निर्धारणविभक्त्यर्थं तदन्वयबोधप्रकारं चेत्थं निरूपयांबभूवुः — "नराणां क्षत्रियः शूरः नरेषु वा, अध्वगामिनां रथगामिनः शीघ्रतराः अध्वगेषु वा, गवां कृष्णा संपन्नक्षीरा गोषु वा" इत्यादौ "यतश्च निर्धारणम्"[१] इत्यनेन षष्ठीसप्तम्यौ विधीयेते। तदर्थश्च जात्यादिविशेषणविशिष्टयद्धर्मावच्छिन्नस्य तादृशविशेषणशून्यतद्धर्मावच्छिन्नव्यावृत्तत्वविशिष्टविधेयवत्तया प्रतिपादनं तद्धर्मावच्छिन्नार्थकपदात् षष्ठीसप्तम्यौ भवतः इति। प्रकृते क्षत्रियत्वविशिष्टनरत्वावच्छिन्ने क्षत्रियत्वशून्यनरत्वावच्छिन्नव्यावृत्तत्वविशिष्टशौर्यरूपविधेयसंबन्धोऽभिमत इति नरादिपदात् षष्ठीसप्तम्यौ।

"नरेभ्यः राक्षसाः शूरतमाः" इत्यादौ राक्षसत्वादिविशेषणविशिष्टे तच्छून्यनरव्यावृत्तशून्यतमत्वविवक्षायामपि न निरुक्तनिर्धारणम्। राक्षसत्वविशिष्टस्य नरत्वरूपसामान्यधर्मानवच्छिन्नत्वात्। अतस्तत्र नरपदात् निर्धारणषष्ठीवारणाय यद्धर्मावच्छिन्नस्येत्युक्तम्।

"नराणां क्षत्रियः शूरतमः" इत्यादौ क्षत्रियादिनिष्ठशूरतमत्वादौ नरादिसामान्यव्यावृत्तत्वबाधात् शून्यान्तं व्यावृत्यवधेर्विशेषणम्। शूरतमत्वादौ क्षत्रियत्वशून्यनरसामान्यव्यावृत्तत्वाबाधात् न क्षतिः। तादृशविशेषणशून्यसामान्यव्यावृत्तत्वनिवेशे "नराणां नरेषु वा क्षत्रियः शूरतमः" इत्यादौ तदसंभवः। शूरतमत्वादेः क्षत्रियत्वादिशून्यराक्षसादिव्यावृत्तत्वविरहात्। अतस्तद्धर्मावच्छिन्नेत्युक्तम्। राक्षसादौ नरत्वविरहात् क्षत्रियत्वादिशून्यनरत्वावच्छिन्नव्यावृत्तत्वं शूरतमत्वादावबाधितमिति नोक्तदोषः।

---

[१] सू. २.३.४१

तादृशजात्यादिशून्ययत्किंचिन्नरावृत्तित्वनिवेशे "नराणां क्षत्रियो गौरः" इत्यपि स्यात्। गौरत्वस्य क्षत्रियत्वशून्यशूद्रावृत्तित्वात्। अतस्तादृशजात्यादिशून्यनरत्वावच्छिन्नावृत्तित्वनिवेशः।

अथ विधेये जात्यादिविशेषणशून्यसाधारणधर्मावच्छिन्नान्वितं व्यावृत्तत्वं साधारणधर्मावच्छिन्नवाचकपदोत्तरषष्ठ्यादेरेवार्थो वाच्यः। तावता च नरत्वादिरूपसाधारणधर्मावच्छिन्नव्यावृत्तत्वस्यैव लाभः संभवति, न तु क्षत्रियत्वादिशून्यत्वविशेषितनरादिव्यावृत्तत्वस्य, प्रकृत्यर्थे नरादौ तादृशविशेषणसून्यत्वबोधकपदाभावात्। न च षष्ठ्या एव तदर्थः। शक्त्यानन्त्यप्रसङ्गात्।

न च भेद एव (अपि) षष्ठ्यर्थः। तत्र च क्षत्रियादिपदार्थस्य प्रतियोगित्वेनान्वयः। भेदस्य च प्रकृत्यर्थे नरेऽन्वयः। तथा च क्षत्रियान्यनरव्यावृत्तत्वलाभः इति वाच्यम्। एवमपि संख्यातिरिक्तविभक्त्यर्थस्य प्रकृत्यर्थविशेष्यतयैव भानमिति व्युत्पत्तिविरोधापरिहारात्।

"नरेषु क्षत्रियाणामेव शौर्यम्" इत्यादौ क्षत्रियादेः विभक्त्यर्थविशेषणतया उपस्थितस्य भेदे विशेषणतया भानोपगमे 'एकत्र विशेषणतयोपस्थितस्यान्यत्र विशेषणतया नान्वयः' इति व्युत्पत्यन्तरविरोधाच्च।

अथास्तु लक्षणया नरादिपदादेव क्षत्रियान्यनरत्वादिविशेषरूपेणोपस्थितिरिति चेत् — अस्तु। व्यावृत्तत्वं किं तावत्? कुत्र वा तदन्वयः? व्यावृत्तत्वं तदवृत्तित्वं, शूरतमादिपदोपस्थाप्ये शूरतमत्वादिधर्मे तदन्वय इति चेत् — न। पदार्थतावच्छेदके पदार्थान्तरान्वयासंभवात्, पदार्थः पदार्थेनान्वेति न तु तदेकदेशेनेति व्युत्पत्तेः।

अपि च "पदार्थानां जातिमति सत्ता" इत्यादौ जातिमदन्यपदार्थवृत्तित्वसामान्याभावस्य सत्तादौ बाधः। सत्तायां सामानाधिकरण्यसंबन्धेन जातिमदन्यसामान्यादिवृत्तित्वात्। जातिमदन्यनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वाभावश्च सत्तायां बोधयितुमशक्यः, प्रतियोग्यप्रसिद्ध्या अभावाप्रसिद्धेः।

एवं "द्रव्येषु कम्बुग्रीवादिमान् घटः" इत्यादौ घटत्वादेः अन्वयितावच्छेदकरूपेणानुपस्थितेः तत्र व्यावृत्तत्वान्वयबोधो दुर्घट इति।

अत्र केचित् — "नराणां क्षत्रियः शूरः" इत्यादौ क्षत्रिय इव क्षत्रियान्योऽपि लक्षणया क्षत्रियपदार्थः। शूरपदस्यापि शूर इव तदन्योऽप्यर्थः। षष्ठ्यर्थोऽभेदः। क्षत्रिये तदन्यस्मिंश्चान्वेति। तथा च नराभिन्नः क्षत्रियः शूरः नराभिन्नः क्षत्रियान्यः शूरान्यः इत्यर्थः।

"नराणां क्षत्रियेषु शौर्यम्" इत्यत्रापि क्षत्रियपदं क्षत्रियतदन्योभयार्थकम्। शौर्यपदं च शौर्यतदत्यन्ताभावोभयार्थकम्। तथा च नराभिन्नक्षत्रिये शौर्यं नराभिन्ने क्षत्रियान्यस्मिन् शौर्यात्यन्ताभाव इति बोधः। उद्देश्यविधेययोः यादृशसंबन्धः भावान्वयबोधे भासते तत्संबन्धावच्छिन्नविधेयाभावः उद्देश्यविधेयवाचकपदयोः वैयधिकरण्यस्थले विधेयपदलक्ष्यार्थः। तयोः सामानाधिकरण्यस्थले तु विधेय-धर्मिभिन्नः इति सामान्यतो व्युत्पत्तिः इत्याहुः।

तन्न शोभनम्। तथा सति "तस्मै पुरुषोत्तमाय नमः" इत्यत्र तत्पदार्थ-तत्तदन्ययोः पुरुषपदार्थाभेदान्वयेन पुरुषाभिन्नः सः उत्तमः पुरुषाभिन्नः तदन्यः उत्तमान्यः इति बोधस्वीकारे उत्तमपदेन सामर्थ्यविरहात् पुरुषपदस्य समासा-प्रसक्तेः "न निर्धारणे"[१] इति निषेधाश्रयणेन प्रकाशकृतां निर्धारणषष्ठीसमास-खण्डनानौचित्यप्रसङ्गात्।

एवं "नरेषु शूरस्य क्षत्रियस्येदं राज्यम्" इत्यादौ शूरपदार्थशूरभिन्ना-न्वितक्षत्रियपदार्थक्षत्रियान्यस्य षष्ठ्यर्थसंबन्धे नान्वयः, किं तु शूरान्वयिक्षत्रिय-स्यान्वयः इत्येतन्नोपपद्यते। एकपदोपस्थापितयोः द्वयोः अर्थयोः एकस्य तत्प्रकृति-कविभक्त्यर्थे विशेषणतया अपरस्य तदविशेषणतया भानस्य अव्युत्पन्नत्वात्।

अत एव "श्वेतं सैन्धवं भुङ्क्ते" इत्यादौ कर्तृतादिविशेणतया लवणादिबुद्धौ मुख्यविशेष्यतया अश्वादेरभानम्।

एवं "द्रव्येषु क्षितिपाथसी रसवती" इत्यादौ क्षितिजलोभयत्वावच्छिन्नभिन्ने रसवदन्यत्वबोधो न संभवति। रसादिमत्यपि पृथिव्यां जले च प्रत्येकमुभयत्वा-वच्छिन्नभेदसत्त्वात् तत्र रसवदन्यत्वबाधात्। नापि प्रत्येकभेदावच्छिन्ने, तथैव बाधात्।

नाप्येकभेदविशिष्टापरभेदावच्छिन्ने। एकपदस्य तादृशभेदावच्छिन्नलक्षकत्वे-ऽपरपदार्थे रसवदाद्यन्यत्वरूपविधेयस्य अन्वयासंभवात्। द्वन्द्वघटकैकपदार्थमात्रे विधेयान्वयस्य अव्युत्पन्नत्वात्। नापि पदाभ्यां लक्षणया तत्तद्भिन्नोपस्थितौ अभेदेन एकभिन्नान्विते अपरभिन्ने। तथापि पदार्थद्वये विधेयान्वयानुपपादनात्। द्वन्द्वे समस्यमानपदार्थानां परस्परमनन्वयात् इत्यपि चिन्त्यम्।

---

[१] सू. २.२.१०

मतान्तरखण्डनम्

यत्तु "नराणां शूरः क्षत्रियः" इत्यादौ शूरान्वयी अभेदः षष्ठ्यर्थः। नराभिन्न-शूरत्वावच्छेदेन क्षत्रियाभेदान्वयः नराभिन्नशूरः क्षत्रियाभिन्न इति। एवं च क्षत्रि-यान्यनरे अर्थतः शौर्यव्यवच्छेदलाभः इति।

तदत्यन्तमसत्। "नराणां क्षत्रिये शौर्यम्" इत्यादौ "क्षत्रियाणां कर्णः प्रचुरं ददाति" इत्यादौ चानिर्वाहात्। अभेदान्वयस्य बाधितत्वात्।

इदं तु तत्त्वम् — निर्धारणविभक्तेः व्यावृत्तत्वमेवार्थः। व्यावृत्तत्वं चाभेदान्वयि-विधेयसमभिव्याहारस्थले अन्योन्याभावप्रतियोगित्वम्। भेदान्वयिविधेयसमभि-व्याहारस्थले चात्यन्ताभावप्रतियोगित्वम्। तस्य च विधेयतावच्छेदकावच्छिन्ने अन्वयः। अतो न द्वित्वावच्छिन्नाभावमादायातिप्रसङ्गः। अभावे च प्रकृत्यर्थस्य नरादेः क्षत्रियत्वादिरूपोद्देश्यतावच्छेदकावच्छिन्नभेदविशिष्टप्रकृत्यर्थतावच्छेदक-नरत्वव्यापकाधिकरणतानिरूपिताधेयतासंबन्धेनान्वयः। एतावतैव जात्यादिरूप-विशेषणशून्यप्रकृत्यर्थनरादिसामान्यव्यावृत्तेः विधेयधर्मे लाभः। एवं च "नराणां क्षत्रियः शूरः" इति वाक्यात् क्षत्रियत्वावच्छिन्नभेदविशिष्टनरत्वव्यापकाधिकरण-तानिरूपिताधेयतावच्छेदप्रतियोगिशूरत्वावच्छिन्नाभिन्नः क्षत्रियः इति बोधः।

"नराणां क्षत्रिये शौर्यम्" इति वाक्यात् क्षत्रियत्वावच्छिन्नभेदविशिष्टनरत्व-व्यापकाधिकरणतानिरूपिताधेयताश्रयात्यन्ताभावप्रतियोगि क्षत्रियवृत्ति शौर्यम् इति बोधः।

"द्रव्याणां क्षितिपाथसी रसवती" इत्यादौ भेदद्वयविशिष्टद्रव्यत्वव्यापकता संबन्धघटिका। तथा च क्षितिभेदपाथोभेदोभयविशिष्टद्रव्यत्वव्यापकाधिकरणता-निरूपिताधेयत्वाश्रयभेदप्रतियोगिरसवदभिन्ने क्षितिपाथसी इति बोधः।

विधेयस्य शूरतमादेः निर्धारणविभक्तिप्रकृत्यर्थतावच्छेदकनरत्वादिविशिष्ट-तादात्म्यादिरेव संबन्धतया भासते। अतो "नराणां राक्षसः शूरः" इत्यादेः नापत्तिः। राक्षसे नरत्वविशिष्टशूरतादात्म्यविरहात्। अन्यत् स्वयमूह्यम्।

विभक्त्यर्थनिर्णये[१] निर्धारणविभक्त्यर्थविचारः

निर्धारणार्थिकां षष्ठ्या सह सप्तमीं ज्ञापयति "यतश्च निर्धारणम्"[२] इति सूत्रम्। यतो निर्धारणं ततः षष्ठीसप्तम्यौ भवत इत्यर्थकम्। निर्धारणं तु एकदेशस्य

---

[१] पृ. ५४८
[२] सू. २.३.४१

पृथग्भावः। अत एव "समुदायादेकदेशस्य पृथक्करणं निर्धारणम्" इति काशिकायामुक्तम्।

"गवां गोषु वा कृष्णा संपन्नक्षीरतमा, नराणां नरेषु वा क्षत्रियः शूरतमः" इत्यादौ षष्ठीसप्तम्योः निर्धारणमर्थः।

मतान्तरोपन्यासः

अत्र केचित्— "नराणां नरेषु वा क्षत्रियः शूरतमः" इत्यादौ विशेषान्यत्वं व्यावृत्तत्वं तादात्म्यं चेति त्रयः षष्ठीसप्तम्योरर्थाः। विशेषस्तु समभिव्याहृतक्षत्रियादिः विशिष्य ग्राह्यः। व्यावृत्तत्वं च भेदप्रतियोगित्वम्। तथा च क्षत्रियस्य नरविशेषतया क्षत्रियान्यत्वस्वरूपं विशेषान्यत्वं नरेऽन्वेति। तथान्वितस्य नरस्य क्षत्रियान्यनरत्वावच्छिन्नाधिकरणतानिरूपिताधेयतासंबन्धेन भेदे प्रतियोगित्वविशेषणेऽन्वयः। भेदप्रतियोगित्वस्य शूरतमेऽन्वयः। शूरतमस्य तादात्म्येन क्षत्रियेऽन्वयः। तथा च क्षत्रियान्यनरत्वावचछिन्नवृत्तिकभेदप्रतियोगित्ववच्छूरतमाभिन्नो नराभिन्नः क्षत्रियः इत्यन्वयबोधः।

विशेषान्यत्वोपादानात् 'नराणां नरेषु वा क्षत्रियो द्विजातिः' इति न प्रयोगः। क्षत्रियान्यनरवृत्तिभेदप्रतियोगित्वस्य द्विजातौ विरहात्। द्विजातिभेदस्य क्षत्रियान्य चाण्डालादिवृत्तित्वेऽपि क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकत्वविरहात् भेदप्रयोगित्वस्यानुपादाने दर्शितवाक्यस्य अयोग्यत्वप्रसङ्गः। क्षत्रियान्यनरतादात्म्यस्य शूरतमे क्षत्रिये च बाधात्।

न च विशेषान्यत्वभेदप्रतियोगित्वयोरुभयोरपि नोपादानं व्यर्थत्वात्, तादात्म्यस्यैवोपादानादिति वाच्यम्। तथा सति नराणां क्षत्रियः प्राणी इति प्रयोगप्रसङ्गात्। नरतादात्म्यस्य प्राणिनि क्षत्रियेऽपि सत्त्वात्।

तादात्म्यस्यानुपादाने "घटानां क्षत्रियः शूरतमः" इत्यादिप्रयोगप्रसङ्गः। क्षत्रियान्यघटवृत्तिभेदस्य क्षत्रिये सत्वात्।

न च संख्यान्यसुबर्थस्य प्रकृत्यर्थविशेष्यत्वनियमात् क्षत्रियान्यत्वादिस्वरूपस्य षष्ठ्याद्यर्थस्य प्रकृत्यर्थप्रकारत्वायोग इति वाच्यम्। संबोध्यत्वादेः प्रथमार्थस्य प्रकृत्यर्थे प्रकारत्वोपगमेन दर्शितनियमे व्यभिचारात् दर्शितनियमस्य प्रायिकत्वात्।

न च 'नराणां क्षत्रियो द्रव्यम्' इति प्रयोगः स्यात्। क्षत्रियान्यनरत्वावच्छेदेन द्वित्वाद्यवच्छिन्नप्रतियोगिताकद्रव्यभेदस्य सत्वादिति वाच्यम्। द्रव्यत्वादिविशिष्टे धर्मिणि द्रव्यत्वाद्यवच्छिन्नस्यैव भेदप्रतियोगित्वस्य बोधने निर्धारणविभक्तेः समर्थत्वात्।

यद्यपि भेदः प्रतियोगित्वं च द्वयमेव निर्धारणविभक्तेरर्थः युक्तः। तावतैवाभिमतनिर्वाहात्। प्रतियोगितया क्षत्रियान्वितस्य विशेषणतया नरेऽन्वयात्। तथान्वितस्य नरस्य पुनर्भेदे प्रतियोगितयान्वयात्। तथान्वितस्य भेदस्य निरूपकतया प्रतियोगित्वे तथान्वितस्य प्रतियोगित्वस्य शूरतमेऽन्वयसंभवात्;

तथापि क्षत्रियादेर्नामार्थस्य स्वार्थकनामोत्तरविभक्त्यर्थ एव प्रकारतया भेदान्वयस्य व्युत्पन्नत्वात् नरादिनामान्तरोत्तरविभक्त्यर्थे तथा तदन्वयस्याव्युत्पन्नत्वात् न युक्तमेतत्।

न च "नरस्य क्षत्रियः शूरतमः" इति निर्धारणार्थकविभक्त्येकवचनप्रयोगः स्यादिति वाच्यम्। पाणिपादस्य पाणिः पवित्र इत्याद्येकवचनवत् अन्यत्रापि निर्धारणविभक्त्येकवचनप्रयोगे क्षतिविरहात्। अत एव "द्वन्द्वः सामासिकस्य च" इति गीतावाक्यमपि संगच्छते।

ननु "पाथःपृथिव्योर्जलं स्नेहवत्" इत्यादौ जलभिन्नयोः पाथःपृथिव्योरप्रसिद्ध्या पाथःपृथिव्युभयवृत्तिभेदप्रतियोगित्वस्य स्नेहवति बाधेन च जलान्यपाथःपृथिव्युभयत्वावच्छिन्नभेदप्रतियोगिनः स्नेहवतः बोधासंभवः।

न च द्विपदद्वन्द्वोत्तरनिर्धारणविभक्तेरन्यतरवृत्तिभेदप्रतियोगित्वमेवार्थः। तन्निविष्टे चान्यतरस्मिन्नेव एकपदोपात्तत्वेन जलान्यत्वादेः षष्ठ्यर्थान्तरस्यान्वयः। तथा च जलान्यो यः पाथःपृथिव्योरन्यतरः तन्निष्ठभेदप्रतियोगित्वं स्नेहवति वर्तत एवेति वाच्यम्।

तावतावपि पाथःपृथिव्युभयतादात्म्यस्य जले बाधेन उक्तवाक्यस्यायोग्यत्वतादवस्थ्यात्। पाथःपृथिव्योस्तेजस उष्णमित्याद्यप्रयोगेण निर्धारणविभक्तेः तादात्म्यवाचिताध्रौव्यात्। घटतद्भिन्नयोर्घटः कम्बुग्रीवादिमान् इत्यादौ घटतद्भिन्नान्यतराप्रसिद्ध्या तादृशेतरभेदस्य बोधयितुमशक्यत्वादिति चेत् — न। द्वन्द्वोत्तरनिर्धारणषष्ठ्याः पर्याप्तसंख्याश्रयेऽपि शक्तत्वेन तस्मिन्नेवैकपदोपात्तत्वेन षष्ठ्यर्थस्य जलान्यत्वरूपनिर्धार्यभेदस्यान्वयेन सर्वसामञ्जस्यात्। "पाथःपृथिव्योर्जलं स्नेहवत्" इत्यादौ जलभिन्नो यः पाथःपृथिवीपर्याप्तसंख्याश्रयो जलमित्यन्वये बाधकाभावात्।

यत्र तूद्देश्यविधेययोर्न तादात्म्येनान्वयबोधसामग्री किं तु संबन्धान्तरेण तत्र निर्धारणविभक्तेः अत्यन्ताभावप्रतियोगित्वमर्थः। यथा "नराणां क्षत्रिये शौर्यम्" इत्यादौ। अत्र क्षत्रियान्यनरत्वावचछिन्नवृत्तिताकस्यात्यन्ताभावस्य प्रतियोगित्वं शौर्ये प्रतीयते, न तु तादृशभेदस्य। तथा सति "नराणां क्षत्रिये रूपम्" इत्यादिप्रयोगापत्तेः।

"नराणां मध्ये क्षत्रियः शूरतमः" इत्यादौ निर्धारणवाचिनो मध्ये इत्यव्ययस्य निर्धारणविभक्त्या संभेदे हे चैत्रेत्यादाविव नान्यतरवैयर्थ्यमिति वदन्ति।

तत्खण्डनम्

तच्चिन्त्यम्। क्षत्रियान्यत्वादेः निर्धारणेऽनुप्रवेशे निर्धारणविभक्तेर्नानार्थतापत्तेः। यत्र चापूर्वो वाक्यार्थः तत्र "मित्रातनयानां माधवः पण्डितः" इत्यादौ माधवान्यत्वस्यापूर्वतया तत्र निर्धारणविभक्तिवाच्यत्वस्य अग्रहेण अन्वयबोधस्य अनुपपत्तिप्रसङ्गात्। द्रोणैकलव्यकालयवनाद्यवृत्तेः शूरतमभेदस्य क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकत्वबाधात् दर्शितवाक्यस्यायोग्यत्वप्रसङ्गाच्च।

किं च पर्याप्तसंख्याश्रये विभक्तिवाच्यत्वाभ्युपगमेऽपि तत्र विशेषान्यत्वाभ्युपगमो न युक्तः। तथा सति धवखदिरयोर्धवखदिरौ छेद्यावित्यादिप्रयोगापत्तेः। पर्याप्तसंख्याश्रये धवान्यत्वखदिरान्यत्वयोरन्वयसंभवात्।

न च द्वन्द्वस्थले निर्धारणविभक्तेरिव निर्धार्यपदोत्तरविभक्तेरपि पर्याप्तसंख्याश्रयोऽर्थः। तत्रैव निर्धारणान्वय इति वाच्यम्। तथा सति "पाण्डवानां युधिष्ठिरभीमार्जुनाः कौन्तेयाः" इत्यादौ निर्धार्ययुधिष्ठिरादौ निर्धारणान्वयप्रसङ्गात्। भिन्नभिन्नसुबर्थयोः परस्परान्वयस्याव्युत्पन्नत्वाच्च।

अन्यमतखण्डनम्

यत्तु "नराणां क्षत्रियः शूरतमः" इत्यादौ 'राहोः शिरः' इत्यत्रेवाभेद एव षष्ठ्यर्थः। स च क्षत्रियादावन्वेति। तदन्वित तदन्वयितावच्छेदकक्षत्रियत्वाद्यवच्छेदेन शूरतमस्य तादात्म्येनान्वयः। तथा च नराभिन्नक्षत्रियत्वावच्छेदेन शूरतमस्याभेदो वाक्यार्थः। तेन 'नराणां क्षत्रियोऽर्जुनः' इत्यादिको न प्रयोगः। नवा 'नराणां कीरः पशुः' इत्यादिकश्च प्रयोगः। कीरे मानुषाभेदविरहादिति। तत्तुच्छम्। "नराणां क्षत्रियः प्राणी, क्षत्रियाणां नरः शूरः" इत्यादिप्रयोगापत्तेः।

यदपि "नराणां क्षत्रियः शूरः" इत्यादौ भेदोऽभेदश्च निर्धारणविभक्तेरर्थः। प्रकृत्यर्थे विशेषणीभूय भेदः, भेदे विशेषणीभूय प्रतियोगी क्षत्रियादिरन्वेति। व्युत्पत्तिवैचित्र्येण भेदे पुनः प्रतियोगितया विशेषणान्तरस्य शूरादेरन्वयः। शूराद्यन्वितभेदस्तु क्षत्रियादिभेदान्वितप्रकृत्यर्थतावच्छेदकावच्छेदेन विधेयतया अन्वेति। प्रकृत्यर्थविशेषितोऽभेदः क्षत्रियादावन्वेति। प्रकृत्यर्थाभेदान्विते क्षत्रिये शूरस्य तादात्म्येनान्वयः। तथा च क्षत्रियान्यो नरः शूरभिन्नः नराभिन्नः क्षत्रियः शूरः इति मुख्यविशेष्यताद्वयशाली समूहालम्बनाकारो द्विविधो वान्वयबोध इति।

तदसत्। नामार्थमुख्यविशेष्यकान्वयबोधे नामार्थस्य प्रथमान्तार्थतानियमपरित्यागापत्तेः। संख्यान्यसुबर्थविशेषणकप्रातिपदिकार्थविशेष्यकान्वयबोधस्य अव्युत्पन्नत्वात्। एकपदोपस्थाप्यस्य भेदस्य उद्देश्यतावच्छेदकविधेयभावेन कथमप्यन्वये व्युत्पत्तिविरहाच्च। इत्थं च निर्धारणमन्यादृशं बोध्यम्।

स्वमतम्

तथा हि — भेदप्रतियोगितावच्छेदकधर्मवत्त्वं प्रकृत्यर्थतावच्छेदकत्वोपलक्षितधर्मसामानाधिकरण्यं चोभयमेव षष्ठीसप्तम्योरर्थः। दर्शितसामानाधिकरण्यं तु प्रतियोगितावच्छेदकेऽन्वेति। एकपदोपात्तयोरपि तिङर्थकृतिवर्तमानत्वयोरिव, लिङर्थे बलवदनिष्टाननुबन्धित्वेष्टसाधनत्वयोरिव च परस्परान्वयस्य व्युत्पत्तिसिद्धत्वात्।

एवं "नराणां नरेषु वा क्षत्रियः शूरतमः" इत्यादौ भेदप्रतियोगितावच्छेदकधर्मः प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यं च षष्ठीसप्तम्योरर्थः। तत्र दर्शितसामानाधिकरण्यं भेदप्रतियोगितावच्छेदकधर्मेऽन्वेति। तथान्वितः स धर्मः क्षत्रियादावपरपदार्थेऽन्वेति। भेदे प्रकृत्यर्थतावच्छेदकनरत्वादौ च विभक्त्यर्थैकदेशे प्रकृत्यर्थस्याधेयतयान्वयः। क्षत्रियादौ विशेषणपदार्थस्य शूरतमादेः तादात्म्येन अन्वयः। शौर्यादिधर्मस्वरूपस्य विशेषणस्य संबन्धान्तरेण। तथा च नरवृत्तिनरत्वसमानाधिकरणो नरवृत्तिभेदप्रतियोगितावच्छेदको यः तद्वान् क्षत्रियः शूरतमः इति अन्वयबोधः।

"नराणां नरेषु वा क्षत्रिये शौर्यम्, क्षत्रियस्य आयुधजीवनम्" इत्यादौ दर्शितनिर्धारणान्वितस्य क्षत्रियस्य आधेयत्वं शौर्ये संबन्धः आयुधजीवने च। अत्र भेदप्रतियोगितावच्छेदकोऽन्वयितावच्छेदकीभूतयद्धर्मावच्छेदेन भासते भेदप्रतियोगितावच्छेदकत्वेन स एव धर्मो भासते। यथा सत्तावन्ति सर्वाणि निखिलजातिव्यापकजातिमन्ति इत्यादौ सकलजातिव्यापकजातित्वेन सत्तैव भासते। तथा प्रकृतेऽपि क्षत्रियत्वादिः अन्वयितावच्छेदक एव भेदप्रतियोगितावच्छेदकत्वेन भासत इति व्युत्पत्तिः। अत एव क्षत्रियस्य क्षत्रियनिष्ठभेदप्रतियोगितावच्छेदकीभूतक्षत्रियवैश्योभयत्ववत्त्वेऽपि 'क्षत्रियाणां क्षत्रियः शूरः' इत्यादिको न प्रयोगः। न वा द्रव्यस्य तथाभूततादृशोभयत्ववत्त्वेऽपि 'नराणां द्रव्यं शौर्यवत्' इत्यादिकः प्रयोगः।

प्रतियोगितावच्छेदकत्वं प्रतियोगितावच्छेदकधर्मसमनियतत्वं बोध्यम्। अतः पार्थिवपात्राणां कम्बुग्रीवादिमत् जलाहरणम् इत्यादिप्रयोगस्य नानुपपत्तिः। कम्बुग्रीवादिमत्वादेरन्वयितावच्छेदकस्य प्रतियोगितावच्छेदकत्वविरहेऽपि प्रतियोगिताव-

च्छेदकीभूतघटत्वादिसमनियतत्वात्। तथा च अन्वयितावच्छेदकसमनियतो धर्म एव भेदप्रतियोगितावच्छेदकत्वेन प्रकृते भासत इति व्युत्पत्तिः। एतदर्थमेव भेदप्रतियोगित्वमपहाय भेदप्रतियोगितावच्छेदको निर्धारणेऽनुप्रवेशितः।

यदि च प्रतियोगित्वमतिरिक्तपदार्थः। तत्रापि विशेषप्रतियोगितातोऽतिरिक्तं सामान्यधर्मावच्छिन्नप्रतियोगित्वमिति मन्यते, तदापि अन्वयितावच्छेदकसमनियत-धर्मावच्छिन्नप्रतियोगित्वलाभार्थं प्रतियोगितावच्छेदकस्यानुप्रवेशः। तथा च भेदप्रति-योगित्वमेव निर्धारणविभक्तेरर्थः। भेदप्रतियोगितात्वेनान्वयितावच्छेदकसमनियत-धर्मावच्छिन्नप्रतियोगिताव्यक्तिरेव भसत इति व्युत्पत्तिः। भेदप्रतियोगित्वे तद-वच्छेदके वा प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यस्यान्वयोपगमात् 'ब्राह्मणानां क्षत्रियः शूरः' इत्यादिको न प्रयोगः। ब्राह्मणत्वसामानाधिकरणस्य ब्राह्मण-वृत्तिभेदप्रतियोगित्वस्य क्षत्रिये विरहात्।

न च दर्शितप्रयोगवारणार्थं निर्धारणविभक्तेः तादात्म्यमर्थोऽस्तु, तादात्म्यस्य क्षत्रियादावन्वय इति न काप्यनुपपत्तिरिति वाच्यम्। तथा सति नराभेदविशिष्टे क्षत्रिये शूरस्य तादात्म्येन विधेयत्वोपगमेन शूराभेदस्य क्षत्रियविशेषणत्वोपगमे वैयर्थ्यप्रसङ्गात्।

एवं निर्धार्यतावच्छेदकधर्मसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकधर्मवान् निर्धार्यतावच्छेदकव्याप्यनानाधर्मसमानाधिकरणश्च यो धर्मः तद्वान् तादात्म्येन स च धर्मः संबन्धान्तरेण निर्धार्येऽन्वेतीति व्युत्पत्तिः। धर्मवदित्यन्तोपादानात् 'नराणां क्षत्रियो द्विजातिः प्राणी वा' इत्यादिको न प्रयोगः। द्विजातित्वादेः क्षत्रिय-वृत्त्यत्यन्ताभावप्रतियोगितावच्छेदकत्वविरहात्। सामानाधिकरण इत्यन्तोपादानात् 'नराणां नरेषु वा क्षत्रियोऽर्जुनः' इत्यादिको न प्रयोगः। अर्जुनत्वस्य क्षत्रियत्व-व्याप्यनानाधर्मसामानाधिकरण्यविरहात्। नानाधर्मोऽपि परस्परविरुद्धो ग्राह्यः। तेनार्जुनत्वस्य क्षत्रियत्वव्याप्यगुणकर्मादिनानाधर्मसामानाधिकरणत्वेऽपि न दर्शित-प्रयोगः।

न च निर्धार्यतावच्छेदेन विधेयान्वयोपगमादेव न दर्शितप्रयोगः। अर्जुनत्वादेः विधेयस्य निर्धर्मितावच्छेदकक्षत्रियत्वावच्छेदेनान्वयसंभवादिति समानाधिकरणा-न्तोपादानं व्यर्थमेवेति वाच्यम्। तथा सति 'नराणां नरेषु वा क्षत्रियः शूरतमः' इत्यादिप्रयोगानुपपत्तिप्रसङ्गात्। शूरतमादेः विधेयस्य क्षत्रियत्वावच्छेदेन अन्वया-संभवात्। रणभीतक्षत्रियादौ शूरतमतादात्म्यविरहेणायोग्यत्वात्। तादृशधर्म-सामानाधिकरण्यं तु विधेये विधेयतावच्छेदके वा तत्रैव तन्त्रं, यत्र परस्पर-विरुद्धनानाधर्मसमानाधिकरणमुद्देश्यतावच्छेदकं भवति। तेन "पाण्डवानां

धनञ्जयोऽहं गाण्डीवी वा'' इत्यादौ धनञ्जयत्वव्याप्यपरस्परविरुद्धनानाधर्मस्याप्रसिद्ध्या अहंत्वस्य गाण्डीवत्वस्य तादृशधर्मसामानाधिकरण्याप्रसिद्ध्यापि नान्वयानुपपत्तिः।

न चैवं क्षत्रियाणां धनञ्जयो गाण्डीवीत्यादिप्रयोगः स्यादिति वाच्यम्। इष्टत्वात्। यदि च ''द्रव्याणां क्षत्रियः शूरः'' इत्यादिकः प्रयोगो नेष्यते, तदा निर्धार्यतावच्छेदके निर्धारणविभक्तिप्रकृत्यर्थतावच्छेदकस्य साक्षाद्व्याप्यत्वं तत्र तन्त्रमिति मन्तव्यम्। न हि क्षत्रियत्वादिकं द्रव्यत्वसाक्षाद्व्याप्यं, द्रव्यत्वव्याप्यपृथिवीत्वादिव्याप्यत्वात्। भवति च नरत्वसाधाद्व्याप्यमिति दर्शितप्रयोग इष्यते।

न च नरत्वव्याप्यद्विजातिव्याप्यत्वात् क्षत्रियत्वस्य न नरत्वसाक्षाद्व्याप्यत्वमिति कथं दर्शितप्रयोग इति वाच्यम्। क्षत्रियत्वस्य द्विजातित्वाव्याप्यत्वात्। संस्कारविशेषरूपस्य द्विजातित्वस्य अकृतसंस्कारकमृतक्षत्रिये विरहात्।

न च द्विजातीनां क्षत्रियः शूरः इत्यादिकः प्रयोगो न स्यादिति वाच्यम्। इष्टत्वात्।

अत एव क्षत्रियादिपदसमभिव्याहारे द्विजातीनामिति निर्धारणविभक्तिर्न, किं तु नराणामित्येव। यदि च द्विजातित्वव्याप्यत्वेऽपि नरत्वव्याप्यजात्यव्याप्यत्वात् जातिघटितं नरत्वसाक्षाद्व्याप्यत्वं क्षत्रिये नानुपपन्नमिति नराणामित्यादिदर्शितप्रयोगो नानुपपन्नः तदा द्विजातीनामित्यादिदर्शितप्रयोगोऽपीष्ट एव, अत्र व्याप्यता न तन्त्रमिति वक्ष्यते।

ननु ''पाथःपृथिव्योः पृथिवी गन्धवती'' इत्यादौ अन्वयानुपपत्तिः। पृथिवीवृत्तिभेदप्रतियोगित्वस्य पृथिवीत्वसमनियतधर्मावच्छिन्नस्य पृथिव्यामसत्त्वात्। जलनिष्ठभेदप्रतियोगित्वस्य तादृशस्य पृथिव्यां सत्त्वेऽपि तादृशप्रतियोगित्वे जलत्वसामानाधिकरण्यविरहात्। यद्धर्मावच्छिन्ननिष्ठभेदप्रतियोगित्वं निर्धारणं तत्र तद्धर्मसामानाधिकरण्यान्वयस्यैव व्युत्पत्तिसिद्धत्वात्। अन्यथा 'जलानां पृथिवी गन्धवती' इत्यादिप्रयोगः स्यादिति चेत् — न।

भेदप्रतियोगित्वे प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यान्वयस्य विवक्षितत्वात्। द्वन्द्वस्थले प्रकृत्यर्थतावच्छेदकस्य नानात्वादन्वयोपपत्तेः। तथा हि प्रकृते जलत्वं पृथिवीत्वं न द्वयं प्रकृत्यर्थतावच्छेदकम्। तत्र जलत्वावच्छिन्नस्य आधेयतया भेदे पृथिवीत्वसामानाधिकरण्यस्य भेदप्रतियोगित्वेऽन्वयो निराबाधः। 'जलानां पृथिवी' इत्यादौ तु जलत्वस्यैकस्य प्रकृत्यर्थतावच्छेदकत्वात् जलनिष्ठभेदस्य प्रतियोगित्वे पृथिवीत्वसमनियतधर्मावच्छिन्ने जलत्वसामानाधिकरण्यविरहात् नान्वयोपपत्तिरिति।

ननु "जलपृथिव्योः पृथिवी गन्धवती" इत्यत्र पृथिवीत्वे जलत्वव्याप्यत्वविरहात् पृथिवीत्वस्य व्याप्यतायाः सत्त्वेऽपि तत्साक्षाद्व्याप्यत्वविरहात् तदन्यत्वे सति तद्व्याप्यत्वविशिष्टस्य तद्व्याप्यत्वस्य तत्साक्षाद्व्याप्यत्वस्य तदन्यत्वविरहेण विशिष्टाभावसंभवादिति कथं पृथिवीत्वस्य जलनिष्ठभेदप्रतियोगित्वान्वयितावच्छेदकत्वमिति चेत् — न। यतः तदन्यस्य तद्व्याप्यस्याव्याप्यत्वे सति तदन्यतद्व्याप्यत्वं साक्षाद्व्याप्यत्वम्। तत्र विशेष्यदले तदन्यत्वं प्रकृते न प्रवेशनीयम्। तथा च पृथिवीत्वसाक्षाद्व्याप्यत्वं पृथिवीत्वे निराबाधमिति नान्वयितावच्छेदकत्वहानिः।

नन्वेवं निर्धारणविभक्तिप्रकृत्यर्थतावच्छेदकसाक्षाद्व्याप्यत्वस्य निर्धारणान्वयितावच्छेदकत्वे तन्त्रत्वाभ्युपगमे तत एव "ब्राह्मणानां क्षत्रियः शूरः, जलानां पृथिवी गन्धवती" इत्यादिप्रयोगवारणं, क्षत्रियत्वाद्यन्वयितावच्छेदके ब्राह्मणत्वादिप्रकृत्यर्थतावच्छेदकव्याप्यत्वविरहात्। इत्थं च निर्धारणे प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यप्रवेशो व्यर्थ इति चेत् — न।

यतो यत्र प्रकृत्यर्थतावच्छेदकान्वयितावच्छेदकयोः साजात्यं तत्रैव साक्षाद्व्याप्यत्वं तन्त्रं, न तु तयोः वैजात्ये। साजात्यं तु जातित्वादिना बोध्यमिति 'द्रव्याणां क्षत्रियः' इत्यादिको न प्रयोगः। वैजात्ये तु न साक्षाद्व्याप्यता तन्त्रं, यथा "गवां गोषु वा कृष्णा संपन्नक्षीरतमा" इत्यादौ, अत्र प्रकृत्यर्थतावच्छेदकस्य गोत्वस्यान्वयितावच्छेदके कृष्णगुणे साजात्यविरहात् न साक्षाद्व्याप्यताविरहेण अन्वयविरह इति।

एवं च "हंसानां कृष्णः सुचेष्टः, नराणां चतुष्पादो मदोत्कटः" इत्यादिप्रयोगवारणार्थं प्रकृत्यर्थतावच्छेदकसामानाधिकरण्यस्य निर्धारणे प्रवेशः। अन्यथा हंसादिवृत्तिभेदप्रतियोगित्वस्य कृष्णगुणादिमति सत्त्वात् दर्शितप्रयोगस्य दुर्वारतापत्तेः।

तदिदं निर्धारणं जात्या गुणेन क्रियया अन्येनापि धर्मेण भवति। तत्र जात्या — "नराणां नरेषु वा क्षत्रियः शूरः" इत्यादिकम्। गुणेन —"गवां गोषु वा कृष्णा" इत्यादिकम्। क्रियया — "गवां गोषु वा वत्सं धावन्ती दुग्धवती" इत्यादिकम्। अत्र वत्सकर्मकधावनक्रियावत्त्वमन्वयितावच्छेदकं गोनिष्ठभेदप्रतियोगितावच्छेदकम् इति। अन्येन धर्मेण — "प्राणिनां प्राणिषु वा चतुष्पादः पशुः" इत्यादिकमुदाहरणम्। जातिक्रियागुणभिन्नमत्र चतुस्संख्याकपादसमवेतत्वमन्वयितावच्छेदकं प्राणिनिष्ठभेदस्य प्रतियोगितावच्छेदकमिति। अत एव काशिकायां — जातिगुणक्रियादिभिः इति पृथक्करणस्य करणाभिधानं स्वरूपकथनं, न च परिसंख्यानमिति।

यत्र प्रकृत्यर्थतावच्छेदकनिर्धार्यतावच्छेदकयोः वैजात्यं तत्र परस्परव्यभिचारितैवान्वयितावच्छेदकत्वे तन्त्रम्। अतो 'द्रव्याणां कृष्णा संपन्नक्षीरतमा' इत्यादिको न प्रयोगः, प्रयोगस्तु "कृष्णानां गौः संपन्नक्षीरतमा, द्विजातीनां क्षत्रियः शूरतमः" इत्यादिकः उपपद्यते।

"हरीणां हरिषु वा शत्रुः सुरश्रेष्ठः" इत्यादौ हरिपदार्थतावच्छेदकं सूर्यत्वविष्णुत्वेन्द्रत्वादिकं नानाविधमेव प्रकृत्यर्थतावच्छेदकम्। तत्र शक्रान्यप्रकृत्यर्थनिष्ठभेदस्य प्रतियोगित्वेऽन्वयितावच्छेदकीभूतशक्रत्वावच्छिन्ने शक्रत्वसामानाधिकरण्यान्वयसंभवात् द्वन्द्वस्थले इवैकशेषेऽपि नानुपपत्तिः।

"द्वन्द्वःसामासिकस्य च" इत्यत्र समासत्वस्यानुगतधर्मतया जातित्वात् जातिगतैकत्वविवक्षायामेकवचनमिति नानुपपत्तिः। "जात्याख्यायाम्०"[१] इति सूत्रेऽनुगतधर्मस्यैव जातित्वेनोपादानम्। अत एव "शरीरमाद्यं खलु धर्मसाधनम्" इति संगच्छते। यतः शरीरत्वं न वैशेषिकसंमता जातिः, न वा एकमात्रशरीरं धर्मसाधनम् इत्यनुगतधर्मस्वरूपजातिगतैकत्वविवक्षायाम् एकवचनोपपत्तिः।

"नक्षत्राणामहं शशी" इत्यत्र नक्षत्रपदस्य शशियुक्तनक्षत्रसमुदाये लक्षणायां निर्धारणे, अन्यथा शेषे स्वस्वामिभावे षष्ठी।

एवं "वित्तेशो यक्षरक्षसाम्" इत्यत्र यदि धनेशो यक्षः तदा "जलपृथिव्योः पृथिवी गन्धवती" इत्यादाविव निर्धारणे, अन्यथा शेषे स्वस्वामिभावे षष्ठी। एवमन्यत्रापि द्रष्टव्यम्।

एवं "नराणां मध्ये क्षत्रियः शूरः" इत्यादौ मध्ये इत्यव्ययस्य भेदप्रतियोगित्वं समभिव्याहृतशब्दार्थतावच्छेदकसामानाधिकरण्यं चार्थः। षष्ठ्याः भेदान्वयी समभिव्याहृतशब्दार्थतावच्छेदकान्वयी च संबन्धोऽर्थः। संबन्धस्तु प्रकृते आधेयत्वमेव। भेदप्रतियोगित्वम् अन्वयितावच्छेदकसमनियतधर्मावच्छिन्नं बोध्यम्। इत्थं मध्येशब्दयोगे षष्ठी न निर्धारणार्थिका, किं तु शेषार्थिका। अत एव — "लोकेशलोकेशयलोकमध्ये तिर्यञ्चमप्यञ्चमृषानभिज्ञरसज्ञतोपज्ञसमज्ञमज्ञम्" इत्यादौ समास उपपद्यते। अन्यथा निर्धारणषष्ठ्यन्तेन सह समासस्य निषेधात् तदनुपपत्तिप्रसङ्गः। एवं "नरमध्ये क्षत्रियः शूरः" इत्यादिप्रयोगानुपपत्तिप्रसङ्ग इति।

[१] सू. १.२.५८

भाट्टरहस्ये[१] निर्धारणविभक्त्यर्थः

"यतश्च निर्धारणम्"[२] इति सूत्रात् जातिगुणक्रियासंज्ञाभिः यतः समुदायात् एकदेशस्य पृथक्करणात्मकं निर्धारणं क्रियते तादृशसमुदायवाचकात् षष्ठीसप्तम्यौ स्तः। "नृणां नृषु वा ब्राह्मणः श्रेष्ठः, गवां गोषु वा कृष्णा बहुक्षीरा, गच्छतां गच्छत्सु वा धावन् शीघ्रगामी, छात्राणां छात्रेषु वा मैत्रः पटुः" इत्यादौ। अत्र विभक्त्यर्थः उक्तविधनिर्धारणम्। तत्र च निरूपकतया प्रकृत्यर्थस्यान्वयः। तस्य च विषयीभूतब्राह्मणादिवृत्तित्वसंबन्धेन क्रियायामन्वयः। इदं च पदोपात्तस्य निर्धारणनिरूपकतावच्छेदकस्य मनुष्यत्वगोत्वादेः निर्धारणविषयीभूतब्राह्मणादौ सत्त्वे एव प्रवर्तते। अतो 'नराणां राक्षसः शूरः' इति न प्रयोगः। अपि तु निर्धारणनिरूपकवाचकात् पञ्चम्येव, "नरेभ्यो राक्षसः शूरः" इति।

पञ्चमी विभक्ते[३] इति सूत्रार्थः

विभागो विभक्तम्। निर्धार्यमाणस्य यत्र भेद एव तत्र पञ्चमी स्यात्। "माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः"। यतश्च निर्धारणम् इत्यनुवर्तते। निर्धारणावधिभूतानां मनुष्यादीनां निर्धार्यमाणानां द्विजादीनां च सामान्यात्मना अभेदः, विशेषात्मना भेदश्च स्थितः। एवं च निर्धारणे सर्वत्र कथंचित् भेदस्य सत्त्वात् विभक्त इत्यनेन भेद एवेत्यर्थो विवक्षितः। ततश्च यत्र निर्धारणावधेः निर्धार्यमाणस्य च भेद एव, न तु केनापि उपात्तरूपेणाभेदः तत्रैवास्य प्रवृत्तिः। अत्रावधिव्यावृत्तधर्मवत्वमेव बोध्यते, न तु समुदायादेकदेशस्येत्यंशो विवक्षितः।

"माधुराः पाटलिपुत्रकेभ्यः आढ्यतरा" इत्यत्र अवधित्वं पञ्चम्यर्थः। मथुरादेशीयाः पाटलिपुत्रकदेशीयापेक्षया अतिशयेनाढ्या इत्यर्थः। अत्र मथुरादेशीयत्वपाटलिपुत्रकदेशीयत्वयोः गोत्वाश्वत्ववत् विरोधात् कथंचिदपि नाभेद इति निर्धारणावधेः पञ्चमीति। पाटलिपुत्रकावधिकनिर्धारणविषयीभूता माथुराः आढ्यतरा इति बोधः।

लघुमञ्जूषायाम्

"माथुराः पाटलिपुत्रकेभ्य आढ्यतरा" इत्यत्र निर्धार्यमाणनिर्धारणावध्योर्भेदस्यैव सत्वेन "पञ्चमी विभक्ते"[४] इत्यनेन पञ्चमी। विभक्तं भेदः। अत्र निर्धारणा-

---

[१] पृ. १६९
[२] सू. २.३.४१
[३] सू. २.३.४२
[४] सू. २.३.४२

वधिव्यावृत्तकरणकनिर्धारणविषयत्वरूपः संबन्धः पञ्चम्यर्थः। पाटलिपुत्रकावधिकतद्व्यावृत्ताढ्यतरत्वकरणकनिर्धारणविषयाः माथुरा आढ्यतरा इति बोधः।

भाष्यकृतस्तु — माथुरपाटलिपुत्रकयोः आढ्यत्वेन साम्यं ज्ञातवान् हि एतद्वाक्यं प्रयुङ्क्ते। तत्र बुद्धिकृतभेदरूपविश्लेषसत्वेन विभक्ता इत्यध्याहारेण अपादान एव पञ्चमी। पाटलिपुत्रकावधिकभेदवन्तो माथुराः आढ्यतरा इति बोधः। भेदप्रयोजकं चाढ्यत्वमेव, उपस्थितेः। "गवां कृष्णा संपन्नक्षीरा" इत्यादौ तु संपन्नक्षीरत्वे ज्ञातेऽपि गोत्ववत्ताबुद्ध्यनिवृत्तेः न विश्लेषप्रतीतिः।

न चैवंरीत्या सूत्रप्रत्याख्यानपक्षो न युक्तः, पाटलिपुत्रकादीनां नामार्थान्वयविवक्षायां प्राप्तायाः षष्ठ्याः बाधनेन पञ्चमीविधानाय सूत्रस्यावश्यकत्वादिति वाच्यम्। प्रत्याख्यानपरभाष्यप्रामाण्येन नामार्थान्वयविवक्षया षष्ठ्या असंभवात्। एवमपादानत्वाविवक्षायामपि षष्ठी न, तत एव भाष्यात्। अत्र पक्षे आढ्यतरत्वे पाटलिपुत्रकव्यावृत्तत्वमार्थम्। अन्यथा आरम्भप्रत्याख्यानयोः फलभेदापत्त्या प्रत्याख्यानं नोपपद्येत — इति निरूपितम्।

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः[१] इति सूत्रार्थः

आभ्यां योगे सप्तमी स्यात् अर्चायाम्, न तु प्रतेः योगे। "मातरि साधुर्निपुणो वा"। कुशल इत्यर्थः। शुश्रूषायामिति शेषः। अर्चायां किं? "निपुणो राज्ञो भृत्यः"। इह तत्त्वकथने तात्पर्यम्। साधुशब्दप्रयोगे तु अर्चां विनापि सप्तमी भवत्येव। "साध्वसाधुप्रयोगे च"[२] इत्युक्तेः। इह साधुग्रहणं तु प्रत्यादियोगे सप्तमीनिवृत्त्यर्थम्। अप्रत्यादिभिरिति वक्तव्यम्। "साधुर्निपुणो वा मातरं प्रति पर्यनु वा"। मञ्जूषाशेखरादौ नास्ति कोऽपि विशेषः।

भाट्टरहस्ये[३]

"साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः"[४] इति सूत्रात् मातरि साधुर्निपुणो वा इत्यत्र सप्तमी। अर्चाया अभावे निपुणो राज्ञो भृत्य इति षष्ठी। प्रतिग्रहणमुपलक्षणम्। साधुः निपुणो वा मातरं प्रति अनु वा।

---

[१] सू. २.३.४३
[२] वा. १४८६
[३] पृ. १६९
[४] सू. २.३.४३

प्रसितोत्सुकाभ्यां तृतीया च[1] इति सूत्रार्थः

आभ्यां योगे तृतीया स्यात्, चकारात् सप्तमी। प्रसितः उत्सुकः हरिणा हरौ वा। हरिविषयकासक्तिमानित्यर्थः। वैषयिकाधिकरणत्वे सप्तम्यामेव प्राप्तायामिदं वचनम्।

भाट्टरहस्ये[2]

"प्रसितोत्सुकाभ्यां तृतीया च"[3] इति सूत्रात् आभ्यां योगे तृतीया स्यात् चात् सप्तमी वा इत्यर्थकात् "प्रसित उत्सुको वा हरिणा हरौ वा" इत्यत्र विकल्पेन सप्तमी। प्रसितः आसक्तः न तु प्रकर्षेण शुक्लः। विषयत्वं विभक्त्यर्थः। पक्षे तृतीयार्थं वचनम्।

विभक्त्यर्थनिर्णये[4] साधुनिपुणाभ्यामिति सूत्रव्याख्यानम्

अर्चार्थिकां सप्तमीं दर्शयति — "साधुनिपुणाभ्यामर्चायामप्रतेः"[5] इति सूत्रम्। साधुनिपुण इत्येताभ्यां योगे अर्चायामर्थे सप्तमीविभक्तिर्भवति प्रतेर्योगे न भवतीत्यर्थकम्। "मातरि साधुर्निपुणो वा" इत्यादौ समर्थः साधुशब्दार्थः। सामर्थ्यं जनकतावच्छेदकधर्मवत्त्वम्। तदेव स्वरूपयोग्यत्वमिति। सावहितकृती निपुण-शब्दार्थः। सावहितकर्तृत्वमप्रमत्तकर्तृत्वम्। तदपि कर्तव्यतागोचरपुनःपुनःस्मरणा-धीनकृतिमत्त्वम्। तत्र सप्तम्यर्थोऽर्चा। सामर्थ्यैकदेशे जनकत्वे निरूपकतया निपुणपदार्थैकदेशे तादृशस्मरणाधीनकृतौ विषयितयान्वेति। अर्चा तु प्रीत्यनुकूलो व्यापारः। तत्र प्रीतौ प्रकृत्यर्थस्य समवेतत्वेनान्वयः। प्रीतिः सुखं सुखसाधनं वा। तथा च मातृसमवेतप्रीत्यनुकूलव्यापारनिरूपितजनकतावच्छेदकधर्मवान् मातृसम-वेतप्रीत्यनुकूलव्यापारविषयिणी कर्तव्यतागोचरपुनःपुनःस्मरणाधीना या कृतिः तद्वानिति वा शाब्दबोधः। अर्चायां गम्यमानायामिति काशिकायामुक्तम्। अत्र सूत्रे अर्चा सप्तम्यर्थत्वेनैव विवक्षिता, न तु मानान्तरगम्यत्वेन। तथा सति "साध्व-साधुप्रयोगे सप्तमी वक्तव्या"[6] इति वार्तिके साधुशब्दोपादानस्य वैयर्थ्यापत्तेः। मातरि साधुरित्यत्र मातृप्रियकारित्वावगमे मात्रर्चाया अवश्यं गम्यमानत्वात्।

---

[1] सू. २.३.४४
[2] पृ. १७०
[3] सू. २.३.४४
[4] पृ. ४७०
[5] सू. २.३.४३
[6] वा. १४८६

सप्तम्या अर्चार्थकत्वे तु वार्तिके साधुशब्दोपादानस्य न वैयर्थ्यमिति प्रागुक्तम्। अर्चाया अविवक्षणे सप्तमी न साधुः।

यथा साधुः "भृत्यो राज्ञः" इत्यादौ। अत्र तत्त्वकथने सप्तमी न भवति। अत्र भृत्यस्य साधुत्वमाज्ञप्तार्थकर्तृत्वम्। अर्चार्थिकापि सप्तमी प्रतियोगे न भवति यथा "मातरं प्रति साधुः" इत्यादौ। अत्र कर्मप्रवचनीयद्योत्यं समवेतत्वं द्वितीयार्थः। प्रियकारी साधुशब्दार्थः। अन्वयः पूर्ववत्। "अप्रत्यादिभिरिति वक्तव्यम्"[1] इति वार्तिकम्। येषां कर्मप्रवचनीयानां योगे सप्तमी विहिता तदन्यकर्मप्रवचनीययोगे सप्तमी न भवतीत्यर्थकम्। तेन "मातरं प्रति परि अनु अभि वा साधुः" इत्यादौ न सप्तमी भवतीति।

नक्षत्रे च लुपि[2] इति सूत्रव्याख्यानम्

नक्षत्रे प्रकृत्यर्थे सति यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थः तत्र वर्तमानात् प्रातिपदिकात् तृतीयासप्तम्यौ स्तः अधिकरणे। "मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्" मूले श्रवणे इति वा। मूलनक्षत्रयुक्ते काले इत्यर्थः। "नक्षत्रेण युक्तः कालः"[3] इत्यण्। "लुबविशेषे"[4] इति तस्य लुप्। अधिकरणे किम्। मूलं प्रतीक्षते। नक्षत्र इति किम्। पञ्चालेषु तिष्ठति। इह "जनपदे०"[5] इति लुप्। लुपि किम्। "पुष्ये शनिः"।

लघुमञ्जूषायाम्

"मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्"। मूले श्रवणे वा। अत्र मूलश्रवणशब्दौ तत्तन्नक्षत्रयुक्तकालबोधकौ। आधाराधेयभावसंबन्धः विभक्त्यर्थः। मूलनक्षत्रयुक्तकालाधारकं देवीकर्मकमावाहनं, श्रवणनक्षत्रयुक्तकालाधारकं देवीकर्मकमावाहनं, श्रवणनक्षत्रयुक्तकालाधारकं देवीकर्मकं विसर्जनमिति बोधः।

भाट्टरहस्ये[6]

"नक्षत्रे च लुपि"[1] इति सूत्रात् नक्षत्रवाचिप्रकृतेः "नक्षत्रेण युक्तः कालः"[2] इत्यनेन अण् प्रत्ययस्य "लुबविशेषे"[3] इति लुपि कृते नक्षत्रयुक्तकालार्थक-

---

[1] वा. १४९३
[2] सू. २.३.४५
[3] सू. ४.२.३
[4] सू. ४.२.४
[5] सू. ४.२.८१
[6] पृ. १७०

प्रातिपदिकात् अधिकरणे तृतीयासप्तम्यौ स्त इत्यर्थकात् "मूलेन मूले वा देवीमावाहयेत्" इत्यादौ। कालिकाधिकरणत्वं विभक्त्यर्थः। अण्प्रत्ययमकृत्वा शुद्धनक्षत्रपरत्वे "पुष्ये शनिः" इत्यादौ सप्तम्येव, न तृतीया। कालपरत्वेऽपि अधिकरणत्वाविवक्षायाम् "अद्य पुष्यः" इत्यादौ प्रथमापि।

सप्तमीपञ्चम्यौ कारकमध्ये[४] इति सूत्रव्याख्यानम्

कारकशब्दः कर्तृत्वादिशक्तिपरः, न तु कर्त्रादिपरः, व्याख्यानात्। मध्यस्यावधिद्वयसापेक्षत्वात् कारकयोः मध्यमिति विग्रहः। तथा च शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यां सप्तमीपञ्चम्यौ स्तः। "अद्य भुक्त्वा अयं द्व्यहे द्व्यहाद्वा भोक्ता"। कर्तृशक्त्योर्मध्येऽयं कालः। सामीपिकाधिकरणत्वे सप्तम्यामेव प्राप्तायां वचनम्। अद्य भुक्त्वा द्व्यहेऽतीते तत्समीपे तृतीयेऽह्नि भोक्तेत्यर्थः। भविष्यति लुट्। अद्यतनभुजिक्रियानिरूपितकर्तृत्वस्य द्व्यहोत्तरदिनगतभुजिक्रियानिरूपितकर्तृत्वस्य च मध्येऽयं कालः इत्यर्थः। कारकशब्दस्य कर्त्रादिपरत्वे तु इह न स्यात्। क्त्वाप्रत्ययस्य कर्त्रेकत्वे विधानात्। कर्तृरूपस्य कारकस्यैकत्वेन भेदनिबन्धनमध्यव्यपदेशायोगात्। कर्तृशक्तिस्तु भुजिक्रियाभेदात् भिद्यत एव।

इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्येऽयं देशः। देशतः सामीपिकमधिकरणत्वं पञ्चमीसप्तम्योरर्थः। इह तिष्ठन्नयं इष्वासः इषुणा क्रोशोत्तरसमीपदेशे लक्ष्यं विध्येत् इत्यर्थः।

लघुमञ्जूषायाम्

षष्ठ्यपवादोऽयम्। स्वानन्तरकालवृत्तित्वादिकं विभक्त्यर्थः। शक्तिद्वयमध्यवर्तित्वं तु वस्तुसत् निमित्तम्, अतो न शाब्दबोधविषयः।

अद्य भुक्त्वा इति वाक्यात् एतद्दिवसाधिकरणकभोजनोत्तरकालिकैतद्दिवसानन्तरद्व्यहानन्तरकालवृत्तिभोजनाश्रय इत्यर्थः बुध्यते। द्व्यहे एतद्दिवसानन्तरत्वं समभिव्याहारबललभ्यम्। इहस्थोऽयं क्रोश इत्यादिवाक्ये स्वानन्तरदेशवृत्तित्वं विभक्त्यर्थः। एतद्देशाधिकरणकस्थित्याश्रयकर्तृकमेतद्देशानन्तरक्रोशानन्तरस्थितलक्ष्यकर्मकं व्यधनमिति बोधः इत्युक्तम्।

---

[१] सू. २.३.४५
[२] सू. ४.२.३
[३] सू. ४.२.४
[४] सू. २.३.७

भाट्टरहस्ये[१]

"सप्तमीपञ्चम्यौ कारकमध्ये"[२] इति सूत्रात् सजातीययोः विजातीययोर्वा कारकमध्ये यौ कालाध्वानौ तत्र सप्तमीपञ्चम्यौ स्तः इत्यर्थकात् "अद्य भुक्त्वा अयं द्व्यहे द्व्यहाद्वा भोक्ता" "इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत्" इत्यादौ विकल्पेन सप्तमी। अत्र यद्यपि भोजनद्वयेऽप्येक एव पुरुषः कर्तृकारकं, तथाप्यद्यतनकालीनभोजनक्रियानिरूपितकर्तृत्वात् द्व्यहकालीनभोजनक्रियानिरूपितकर्तृत्वस्य भेदात् सजातीयकारकद्वयमध्यत्वम्। द्वितीयोदाहरणे तु अयमिति कर्ता, लक्ष्यमिति कर्म इहेत्यधिकरणमिति विजातीयमध्यत्वम्। सर्वत्र अधिकरणत्वं विभक्त्यर्थः। अपादानत्वाद्यसंभवात् पक्षे पञ्चमीप्राप्त्यर्थो विधिः।

अधिकशब्दयोगे पञ्चमी

कौमुद्याम्

अधिकशब्देन योगे सप्तमीपञ्चम्याविष्येते। "तदस्मिन्नधिकम्०"[३] "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी"[४] इति च सूत्रनिर्देशात्। "लोके लोकाद्वा अधिको हरिः" अवधित्वरूपः संबन्धः सप्तमीपञ्चम्योरर्थः। लोकावधिकश्रेष्ठत्ववान्, लोकापेक्षया श्रेष्ठ इत्यर्थः।

शेखरे[५]

कर्तरि क्तप्रत्ययान्ताध्यारूढशब्दार्थकाधिकशब्दयोगे लोकशब्दात् निरूपितत्वार्थकषष्ठ्यां प्राप्तायां सूत्रद्वयनिर्देशरूपात् ज्ञापकात् पञ्चमीसप्तम्याविष्येते, न तु "सप्तम्यधिकरणे च"[६] इति सूत्रेण सप्तमी, क्रियायोगाभावात्। यस्तु कर्मार्थकाध्यारूढशब्दात् कनि कृते उत्तरपदलोपे च सिद्धोऽधिकशब्दस्तद्योगे तु अधिको लोको हरिणेति प्रथमैव। "तदस्मिन्नधिकम्०"[७] इति सूत्रे भाष्ये तु उपश्लिष्टपदाध्याहारेण औपश्लेषिकेऽधिकरणे सप्तमीत्युक्तम्।

---

[१] पृ. १७०
[२] सू. २.३.७
[३] सू. ५.२.४५
[४] २.३.९
[५] पृ. ७३४
[६] सू. २.३.३६
[७] सू. ५.२.४५

भाट्टरहस्ये[1]

एवम्, अधिकशव्देनापि योगे "लोके लोकाद्वा अधिको हरिः" इत्यादौ पञ्चमीसप्तम्यौ ज्ञेये। "तदस्मिन्नधिकम्०"[2] "यस्मादधिकं०"[3] इति च सूत्रीय-द्विविधनिर्देशात्। निरूपितत्वं विभक्त्यर्थः। तस्य स्वसंबन्ध्याधिक्याश्रयवृत्तित्व-संसर्गेण क्रियायामन्वयः। उपपदं तात्पर्यग्राहकम् इति प्रतिपादितम्।

अधिरीश्वरे[4] — स्वस्वामिसंवन्धे अधिः कर्मप्रवचनीयसंज्ञः स्यात्।

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी[5] इति सूत्रार्थः

अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात्। "उप परार्धे हरेर्गुणाः"। परार्धावधिकाधिक्यवन्तः परार्धादधिकाः हरेर्गुणा इत्यर्थः। अवधित्वं सप्तम्यर्थः। "उपोऽधिके च"[6] इति उपेत्यस्य कर्मप्रवचनीयसंज्ञायाः इदं फलम्। ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी। "अधि भुवि रामः"। "अधि रामे भूः"। अयं भावः — 'यस्येश्वरवचनम्' इत्यस्य यत्संबन्धी ईश्वर उच्यते ततः सप्तमी इति एकोऽर्थः। इह यच्छब्देन स्वमुच्यते। एवं च स्ववाचकात् सप्तमीति लभ्यते — "अधि भुवि रामः" इति। संबन्धः सप्तम्यर्थः। अधिशब्दस्य स्वामीत्यर्थः। भुवः स्वामी रामः इति बोधः। निरूपितत्वात्मकोऽत्र संबन्धः। भूनिरूपितस्वामित्ववानिति पर्यवस्यति। यस्येश्वरत्वमुच्यते ततः सप्तमीति अन्योऽर्थः। यन्निष्ठमीश्वरत्वमुच्यते ततः सप्तमीति यावत्। एवं च स्वामिवाचकात् सप्तमीति लभ्यते। यथा "अधि रामे भूः"। निरूपितत्वरूपः संबन्धः सप्तम्यर्थः। अधिशब्दस्य स्वमित्यर्थः। रामनिरूपितस्वत्ववती भूरिति बोधः।

"सप्तमी शौण्डैः"[7] इति समासपक्षे तु "रामाधीना भूः"। शौण्डादिगणे अधिशब्दस्य पठितत्वेन तेन अधिशब्देन रामे इति सप्तम्यन्तस्य समासे सति "सुपो धातुप्रातिपदिकयोः"[8] इति सुब्लुकि रामाधिशब्दात् "अषडक्षाशितङ्ग्वलं-

---

[1] पृ. १७१
[2] सू. ५.२.४५
[3] २.३.९
[4] सू. १.४.९७
[5] सू. २.३.९
[6] सू. १.४.८७
[7] सू. २.१.४०
[8] सू. २.४.७१

कर्मालंपुरुषाध्युत्तरपदात्खः"[१] इति खप्रत्यये "आयनेयीनीयियः०"[२] इति तस्य ईनादेशे रामाधीना इति सिध्यति। रामस्वामिकेति तदर्थः। विभक्त्यर्थेऽव्ययीभावे तु अधिरामं भूः। रामाधिकरणिका भूरित्यर्थः। खप्रत्ययस्तु न, अध्युत्तरपदत्वाभावात्।

भाट्टरहस्ये[३]

"यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी"[४] इति सूत्रात् आधिक्यार्थककर्मप्रवचनीययुक्ते सप्तमी स्यात् इत्यर्थकात् "उप परार्धे हरेर्गुणाः" इत्यादौ सप्तमी। प्रतियोगित्वं सप्तम्यर्थः। स्वसंबन्ध्याधिक्याश्रयगुणवृत्तित्वसंबन्धेन अस्तिक्रियायामन्वेति। उपपदं तात्पर्यग्राहकम् — इत्युक्तम्। तत्रैव —

अधिरीश्वरे[५] इति सूत्रव्याख्यानम्

एवम् — अधिरीश्वरे इति सूत्रेण ऐश्वर्ये अधेः कर्मप्रवचनीयसंज्ञा भवति। तद्युक्ते ऐश्वर्यप्रतियोगिनि तदनुयोगिनि च "अधिरामे भूः, अधिभुवि रामः" इत्यादौ पर्यायेण सप्तमी। अत्र क्रमेणानुयोगित्वं प्रतियोगित्वं च सप्तम्यर्थः। स्वसंबन्ध्यैश्वर्यसंबन्धीतरवृत्तित्वमाख्यातार्थे संसर्गः। अधिस्तात्पर्यग्राहकः। रामप्रतियोगिकस्वत्वाश्रयः, भूवृत्तिस्वप्रतियोगी राम इति च फलितोऽर्थः।

विभाषा कृञि[६] इति सूत्रव्याख्यानम्

कृञ्धातौ परे अधिः कर्मप्रवचनीयो वा स्यादीश्वरेऽर्थे। 'यदत्र मामधिकरिष्यति'। विनियोक्ष्यत इत्यर्थः। अस्मिन् विषये मां विनियोक्ष्यत इति यत् तद्युक्तमित्यर्थः। कर्मत्वादेव द्वितीयायाः सिद्धौ कर्मप्रवचनीयसंज्ञायाः प्रयोजनं गतिसंज्ञायाः बाधः। तेन "तिङि चोदात्तवति"[७] इति निघातो न। उदात्तवति तिङि परे गतिरनुदात्त इति तदर्थः। अत्र करिष्यतीति तिङन्तमुदात्तवत्। तस्मिन् परे अधेः गतित्वात् अनुदात्तः प्राप्तः। कर्मप्रवचनीयत्वे तु स न भवति। तेन गतित्वस्य बाधात्। अतः अधेः अनुदात्ताभावार्थमिदं सूत्रमिति सिद्धम्।

---

[१] सू. ५.४.७
[२] सू. ७.१.२
[३] पृ. १.७१
[४] सू. २.३.९
[५] सू. १.४.९७
[६] सू. १.४.९८
[७] सू. ८.१.७१

विभक्त्यर्थनिर्णये[1]

पञ्चम्या सह वैकल्पिकीं सप्तमीं दर्शयति "सप्तमीपञ्चम्यौ कारकमध्ये"[2] इति सूत्रम्। कारकयोर्मध्ये यौ कालाध्वानौ ताभ्यां सप्तमीपञ्चम्यौ विभक्ती भवत इत्यर्थकम्। "अद्य भुक्त्वा द्व्यहे द्व्यहाद्वा भोक्ता" इत्यादौ सप्तमीपञ्चम्योः परत्वनिरूपितापरत्वाधिकरणकालवृत्तित्वमर्थः। परत्वे समवेतत्वेन प्रकृत्यर्थस्य अन्वयः। क्त्वार्थोऽनन्तरत्वं द्व्यहेऽन्वेति। तथा चाद्यवृत्तिभोजनानन्तरद्व्यह-वृत्तिपरत्वनिरूपितापरत्वाधिकरणकालवृत्तिभोजनकर्तेति शाब्दबोधः। अत्र भोजन-कर्तृतास्वरूपकारकशक्त्योर्मध्ये कालः।

"इहस्थोऽयं धानुष्कः क्रोशे क्रोशाद्वा लक्ष्यं विध्यति" इत्यादौ दैशिक-परत्वनिरूपितपरत्वाधिकरणदेशवर्तित्वं सप्तमीपञ्चम्योरर्थः। तच्च कर्मद्वारा धात्वर्थ-फलेऽन्वेति। विध्यतेरवयवविभागानुकूलो व्यापारोऽर्थः। छिदेस्तु आरम्भक-संयोगानर्जकावयवविभागानुकूलो व्यापारोऽर्थ इति न छिदिपर्यायता। तथा च क्रोशवृत्यपरत्वनिरूपितपरत्वाधिकरणदेशवृत्तिर्यो लक्ष्यवृत्तिरवयवविभागः तदनु-कूलव्यापारकर्ता इहस्थधानुष्कोऽयम् इत्यन्वयबोधः। अत्र कर्तृकर्मशक्त्योर्मध्ये-ऽध्वा।

वस्तुतस्तु कारकयोर्मध्येऽर्थे सप्तमीपञ्चम्यौ विभक्ती भवत इत्येव सूत्रार्थः। तत्र मध्यत्वं कालिकमपरत्वसमानाधिकरणपरत्वं दैशिकमपरत्वमेव। तत्रापरत्वे प्रकृत्यर्थयोः कालदेशयोः समवेतत्वेनान्वयः। अवधितया कारकस्य कारकाधि-करणस्य चान्वयः। कालिकमध्यत्वघटकपरत्वस्य निरूपकतया दैशिकपरत्वस्य स्वनिरूपितपरत्वसमवायेन कारकाधिकरणे परम्परया वा कारकेऽन्वयः। तच्च कारकं योग्यतावशात् कर्तृकर्मादिकं बोध्यम्। "अद्य हविष्यं भोक्ता द्व्यहे द्व्यहाद्वा निरामिषं भोक्ता"। अत्र हविष्यकर्मकभोजनकर्ता तदधिकरणेनाद्यकालेन वावधि-मद्द्व्यहवृत्ति यदपरत्वं तत्समानाधिकरणपरत्वस्य निरूपको निरूपककालवृत्तिर्वा निरामिषकर्मकभोजनकर्ता इत्यन्वयबोधः।

इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्यतीत्यादौ वेधकेन तदधिकरणदेशेन वावधिमत् यत् परत्वं तन्निरूपकक्रोशवृत्यपरत्वस्य निरूपकं तदधिकरणं तादृशदेशवृत्ति वा यल्लक्ष्यं तत्कर्मकवेधकर्ता इहस्थोऽयमित्यन्वयबोधः।

---

[1] पृ. ४७१ - ४७६

[2] सू. २.३.७

इह अद्यशब्दार्थयोः देशकालयोः अवधित्वार्थ इहाद्यशब्दयोरुपादानम्। अवधिमत्वस्य अवधिमत्परत्वनिरूपकत्वस्य अधिकरणकालवृत्तित्वस्य चोल्लेखः संसर्गमर्यादया बोध्यः।

अथ वा मध्यशब्दोऽन्तरकालवाची। तथा चान्तरकालत्वेऽर्थे सप्तमीपञ्चम्यौ भवतः इति सूत्रार्थः। तत्र कालिकमन्तरालत्वं परस्परनिरूपितकालिकपरत्वापरत्वाधिकरणयोरनधिकरणत्वमत्यन्ताभाववत्त्वमिति यावत्। दैशिकं तु दैशिकपरत्वस्य अवधिसमवायिनोरनधिकरणत्वमत्यन्ताभाववत्त्वमिति यावत्। तथा च कालिकपरत्वापरत्वयोरधिकरणकारकयोः अधिकरणकालवृत्तिकारकशक्त्योः तत्तत्कारकस्वरूपयोः, एवं दैशिकपरत्वस्यावधिनोः कारकयोः अवधिसमवायिदेशवृत्तिकारकशक्त्योर्वा सुप्तिङादितो लाभात् कालाध्ववाचकपदोत्तरयोः सप्तमीपञ्चम्योरत्यन्ताभावप्रतियोगित्वमर्थः। तत्र कालनिष्ठात्यन्ताभावप्रतियोगित्वं कारके चेदन्वेति कालिकविशेषणतासंबन्धावच्छिन्नमेव। देशनिष्ठात्यन्ताभावप्रतियोगित्वं तु कारकीयदैशिकसंसर्गावच्छिन्नं कारके कारकशक्तौ तु स्वनिरूपककारकघटितपरंपरासंबन्धावच्छिन्नमन्वेति। इत्थं च संबन्धान्तरावच्छिन्नप्रतियोगित्वमादाय न प्रयोगातिप्रसङ्गः। प्रतियोगित्वमन्वयितावच्छेदकधर्मावच्छिन्नमेव भासते व्युत्पत्तिवैचित्र्यात्। अतो द्वित्वावच्छिन्नाभावप्रतियोगित्वमादाय न प्रयोगातिप्रसङ्गः। अत्यन्ताभावे प्रकृत्यर्थस्य स्वावच्छेदकधर्मव्यापकाधिकरणतानिरूपिताधेयतयान्वयः।

एवमद्य भोक्ता द्व्यहे द्व्यहाद्वा भोक्तेत्यादौ द्व्यहव्यापकवृत्त्यत्यन्ताभावप्रतियोगिभोक्त्रभिन्नोऽद्य भोक्ता अथ वा द्व्यहव्यापकवृत्त्यन्ताभावप्रतियोगिभोक्तृत्ववदभिन्नोऽद्य भोक्तेत्यन्वयबोधः।

एवं इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्यतीत्यादौ क्रोशव्यापकवृत्त्यत्यन्ताभावप्रतियोगि यल्लक्ष्यभिन्नमधिकरणं लक्ष्यनिरूपितमाधेयत्वं वा तद्वृत्तिस्तद्वान्वा योऽवयवविभागः तदनुकूलव्यापारकर्तायमित्यन्वयबोधः।

इत्थं च प्रतिदिनं भुञ्जाने द्व्यहे द्व्यहाद्वा भोक्तेति न प्रयोगः। न वा एकप्रहारेण पादक्रोशार्धे च लक्ष्यं विध्यति पुरुषे क्रोशाद्वा लक्ष्यं विध्यतीति प्रयोगः। अत्यन्ताभावे व्यापकवृत्तित्वे प्रकृत्यर्थस्य अन्वयोपगमात् स्नानादिकालावच्छेदेन द्व्यहनिष्ठात्यन्ताभावप्रतियोगिभोक्तृत्वस्य प्रतिदिनं भुञ्जाने सत्वान्न दर्शितप्रयोगः। कर्तृशक्तिमध्य एव कालः।

"गिरेः क्रोशे क्रोशाद्वा वनं गच्छति विहगः" इत्यादौ कर्मापादानयोर्मध्ये देशः। "शिखरादुपत्यकायां क्रोशे क्रोशाद्वा पतति शिला" इत्यादौ अपादानाधिकरणयोर्मध्ये देशः।

"पाटलिपुत्रेश्वरः विंशतौ योजनेषु विंशतेर्योजनेभ्यो वा काशीस्थाय ददाति" इत्यादौ कर्तृसंप्रदानयोर्मध्ये देशः। करणकारकान्तरयोर्मध्ये देशोऽपि न भवति। एवमन्यत्रापि कारकयोर्मध्ये देशः कालश्च बोध्यः।

शाब्दिकास्तु "तदस्मिन्नधिकम्०"[1] "यस्मादधिकं०"[2] इति सूत्रनिर्देशात् अधिकशब्दयोगे सप्तमीपञ्चम्यौ विशिष्येते। अतो "लोके लोकाद्वा अधिको हरिः" इत्यादौ सप्तमी पञ्चमी च साधुः इत्याहुः।

तच्चिन्त्यम्। 'लोकेऽधिको हरिः' इत्यादौ निर्धारणे सप्तम्युपपत्तेः। 'लोकादधिको हरिः' इत्यादौ "पञ्चमी विभक्ते"[3] इति सूत्रेण पञ्चम्युपपत्तेरित्यस्य प्रागुक्तत्वात्।

विभक्त्यर्थनिर्णये अधिरीश्वर इत्यादिसूत्रव्याख्यानम्

"अधिरीश्वरे"[4] इति सूत्रं ईश्वरेऽर्थे द्योत्ये अधिः कर्मप्रवचनीयसंज्ञः स्यादित्यर्थकम्। अधीत्यव्ययशब्दस्य कर्मप्रवचनीयसंज्ञां विधत्ते। कर्मप्रवचनीययुक्ते सप्तमीं ज्ञापयति "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी"[5] इति सूत्रं यदवधिकस्याधिकस्वरूपार्थस्य द्योतकः यन्निरूपितस्येश्वरार्थस्य द्योतकः कर्मप्रवचनीयस्तत्र कर्मप्रवचनीययुक्ते सप्तमी भवतीत्यर्थकम्। उपशब्दस्याधिकार्थद्योतकत्वेऽपि कर्मप्रवचनीयसंज्ञाविधायकम् "उपोऽधिके च"[6] इति सूत्रं द्वितीयाविवरणे प्रदर्शितम्। "उप सुरेषु हरिः" इत्यादौ उपशब्दद्योत्यं सप्तम्या आधिक्यमर्थः। तत्र प्रकृत्यर्थस्यावधिमत्त्वसंबन्धेनान्वयः। तथाविधस्याधिक्यस्य हरावन्वयः। तथा च सुरावधिकाधिक्यवान् हरिरित्यन्वयबोधः। आधिक्यं तु प्रकृते निरवधिदयावत्त्वम् अथ वा बहुत्वव्याप्यसंख्याविशेषवद्गुणवत्वं बोध्यम्। उपाचार्येषु द्रोण इत्यादावपि काशिकोदाहरणे अनया रीत्या अन्वयो बोध्यः।

'उपनिष्के कार्षापणम' इत्यादावपि मूल्यगता अवयवगता वा बहुत्वव्याप्यसंख्यैव आधिक्यमिति पञ्चमीविवरणे प्रोक्तम्।

---

[1] सू. ५.२.४५
[2] सू. २.३.९
[3] सू. २.३.४२
[4] सू. १.४.९७
[5] सू. २.३.९
[6] सू. १.४.८७

यस्य चेश्वर इत्येतावन्मात्रेणैव स्वामिद्योतकाधियोगे सप्तमीसिद्धौ यस्य चेश्वरवचनमित्यभिधानं स्वस्वामिनोरुभयोर्मध्ये द्योतकस्याधिकशब्दस्य योगे सप्तमीं ज्ञापयति। अत एव यस्य चेश्वरवचनमिति स्वस्वामिनोर्द्वयोरपि पर्यायेण सप्तमी भवतीति काशिका।

"अधि भुवि रामः" इत्यादौ अधिशब्दद्योत्यं सप्तम्याः स्वामित्वमर्थः। तत्र भुवो निरूपकतयान्वयः। तथाविधस्वामित्वस्य रामेऽन्वयः। तथा च भूनिरूपित-स्वामित्ववान् राम इत्यन्वयबोधः।

अधिरामे भूरित्यादावधिशब्दद्योत्यं सप्तम्याः स्वत्वमर्थः। तत्र. निरूपकतया प्रकृत्यर्थस्यान्वयः। तथा च रामनिरूपितस्वत्ववती भूरित्यन्वयबोधः। "अधि ब्रह्मदत्ते पञ्चालाः, अधिपञ्चालेषु ब्रह्मदत्तः" इत्यादौ काशिकोदाहरणेऽप्यनया रीत्या अन्वयः बोध्यः। ब्रह्मदत्तः पाञ्चालराजः।

"विभाषा कृञि"[१] अधिः करोतौ कर्मप्रवचनीयसंज्ञो वा स्यादित्यर्थकम्। अत्रेश्वरद्योतकस्याधेः योगे सप्तमी न भवति यथा "यदत्र मामधिकरिष्यति" इत्यादौ। अत्र धातोर्विनियोगोऽर्थः। सप्तम्याः आदेशत्रलः कर्मघटितसंबन्धावच्छिन्न-माधेयत्वमर्थः। इदंपदार्थः कर्मविशेषः। तथा चेदंकर्मविशेषवृत्तिमत्कर्मकयदभिन्न-भाविनियोगकर्तृत्वं वाक्यार्थः। करोतियोगेऽधेः कर्मप्रवचनीयसंज्ञाविधानं दर्शित-करोतिप्रयोगे गतिसंज्ञाप्रयुक्तस्य "तिङि चोदात्तवति"[२] इति सूत्रेण प्रसक्तस्य निघातस्य निषेधार्थम्। कर्मप्रवचनीययोगे द्वितीयापञ्चमीसप्तमीविधानं शेषषष्ठी-बाधकम्। "सर्वा ह्युपपदविभक्तयः शेषषष्ठ्यपवादिकाः" इत्युक्तेरिति शाब्दिकाः।

तच्चिन्त्यम्। अपवादे प्रमाणाभावात्। सूत्रभाष्यवार्तिकवृत्तिग्रन्थादावपवादकत्व-स्यानभिधानात्। मम प्रतिभातीत्यादौ शेषे षष्ठ्या दर्शनाच्च। कर्मप्रवचनीयस्य स्वरूपसतो वा प्रतेर्योगे द्वितीयाविधानात्।

अत एव "बुभुक्षितं न प्रतिभाति किंचित्" इत्यादौ द्वितीयोपपद्यते। एवं च तस्य ते परिपन्थिन इत्यादावपि शेषे षष्ठ्युपपद्यते। अन्यथा परिपन्थि-घटकपरिशब्दयोगेऽपि कर्मप्रवचनीययोगे द्वितीयादर्शनात् "परिपन्थं च तिष्ठति"[३] इति निर्देशात् उपपदविभक्तेः शेषषष्ठ्यपवादकत्वे दर्शितषष्ठ्या असाधुत्वप्रसङ्गात्।

---

[१] सू. १.४.९८
[२] सू. ८.१.७१
[३] सू. ४.४.३६

ननु उपपदविभक्तेः शेषषष्ठ्यपवादकत्वविरहे पूर्वं प्रदर्शितं "सर्पिषो बिन्दुना योगो न त्वपिनेति" अभियुक्तवाक्यमनर्थकं स्यात्। अपिना योगेऽपि शेषे षष्ठ्याः साधुत्वात् उपपदविभक्तेरपवादकत्वविरहादिति चेत् —

न। सर्पिरपि स्यादित्यादिप्रयोगे द्वितीयाया असाधुत्वज्ञापनेन दर्शितस्याभियुक्त-वाक्यस्य सार्थकत्वात्।

येषां कर्मप्रवचनीयस्य द्योत्यानां वाच्यानां वा हीनत्वाधिक्यवर्जनमर्यादादीनां न शेषत्वं तत्र अयोग्यत्वादेव कर्मप्रवचनीययोगे न षष्ठी। यथा "अनु हरिं सुराः, उप सुरेषु हरिः, उपत्रिगर्तेभ्यो वृष्टो देवः, आकडारादेका संज्ञा" इत्यादौ। यत्र तु योग्यता तत्र षष्ठी भवत्येव। अत एव "उपर्युपरिबुद्धीनां चरन्तीश्वरबुद्धयः" इत्यादौ शेषे षष्ठी संगच्छते इति।

इति सप्तम्यर्थविचारः

इति महामहोपाध्यायेन राष्ट्रपतिसंमानितेन

एन्. एस्. रामानुजताताचार्येण विरचितायां

शाब्दबोधमीमांसायां सुबर्थविचारात्मकः

द्वितीयो भागः

अनुबन्धाः

उदाहृतग्रन्थानां सूची

अद्वैतसिद्धिः मधुसूदनसरस्वतीकृता, बलभद्रकृतसिद्धिव्याख्या-गौडब्रह्मानन्द-सरस्वतीकृतगौडब्रह्मानन्दी-विठलेशकृतविठलेशी-मधुसूदनसरस्वतीकृताद्वैत-मतसंरक्षण-संपादककृतचतुर्ग्रन्थीसहिता, संपा. एन्. एस्. अनन्तकृष्णशास्त्री, निर्णयसागरप्रेस्, मुम्बयी, १९१७.

अनुमानमणिः द्र० तत्त्वचिन्तामणिः.

अनुव्याख्यानम् द्र० न्यायसुधा.

अभाववादः (तत्त्वचिन्तामणिप्रत्यक्षखण्डे एकं प्रकरणम्) द्र० तत्त्वचिन्तामणिः.

अमरकोषः अमरसिंहविरचितः, भानुजिदीक्षितकृतसुधाव्याख्यासहितः चौखम्बा संस्कृतप्रतिष्ठान, दिल्ली, १९९७. (निर्णयसागरमुद्रितपुस्तकस्य मुद्रणप्रतिकृतिः).

आगमप्रामाण्यम् न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतम् .

आश्वलायनश्रौतसूत्रम् नारायणकृतवृत्तिसमेतम्, संपा. पट्टाभिरामशास्त्रि-रामनाथदीक्षितौ, लालबहादूरशास्त्रिकेन्द्रीयविद्यापीठम्, नूतनदिल्ली, १९८४-१९८५.

ऋग्वेदप्रातिशाख्यम् शौनकविरचितम्, उवटभाष्यसहितम्, संपा. अनुवादकश्च वीरेन्द्रकुमारवर्मा, काशीहिन्दूविश्वविद्यालयग्रन्थमाला, शोधप्रकाशनयोजना पुष्पम् ५, वाराणसी, १९७०.

कल्पतरुः द्र० ब्रह्मसूत्रशांकरभाष्यम्.

कारकचक्रम् वागीशभट्टाचार्यप्रणीतम्, माधवतर्कालङ्कारविरचितया माधवी-टीकया, तथा सीताशरणत्रिपाठिना कृतया प्रदीपटिप्पण्या चाभ्युपेतम्। ब्रह्मशङ्करशास्त्रिणा संशोधितम्। चौखाम्बा संस्कृत सीरज आफीस्, बनारस, १९४२.

कारिकावली (मुक्तावलीसहिता) श्रीविश्वनाथतर्कपञ्चाननकृता, प्रभा-मञ्जूषा-दिनकरी-रामरुद्री-गङ्गारामीव्याख्याभिः समन्विता, सम्पादकः श्री सी. शंकर-रामशास्त्री, (व्रजजीवनप्राच्यभारतीग्रन्थमाला सं० २९) चौखम्बासंस्कृतप्रति-ष्ठान, दिल्ली, १९८८. (बालमनोरमाग्रन्थावलि सं० ६, १९२३, संस्करणस्य मुद्रणप्रतिकृतिः).

काव्यप्रकाशः मम्मटप्रणीतः, गोकुलनाथोपाध्यायकृतविवरणसहितः, संपा. बद्रीनाथः झा, वाराणसेयसंस्कृतविश्वविद्यालयः, वाराणसी, १९६१.

काव्यादर्शः दण्डिप्रणीतः, रङ्गाचार्यविरचितप्रभाव्याख्योपेतः, भण्डार्कर् प्राच्यविद्यासंशोधनालयः (Government Oriental Series: class A; no. 4) पुणे, १९३८.

कैयटः द्र० महाभाष्यम्.

खण्डनखण्डखाद्यम् श्रीहर्षविरचितम्, विद्यासागरीयखण्डनफक्किकाविभजनसंपादककृतखण्डनपञ्जिकासहितम्, संपा. स्वामी योगीन्द्रानन्दः, षड्दर्शनप्रकाशनप्रतिष्ठानम्, वारणसी, १९७९.

गणसूत्रम् द्र० सिद्धान्तकौमुदी.

गूढार्थतत्त्वालोकः द्र० व्युत्पत्तिवादः १.

चित्सुखी द्र० तत्त्वप्रदीपिका.

जैमिनिसूत्राणि द्र० मीमांसादर्शनम् १.

जैमिनीयन्यायमालाविस्तरः विद्यारण्यकृतः, संपा. के. ए. रामनाथशास्त्रि-पट्टाभिरामशास्त्रिणौ, (काशीसंस्कृतसिरीस् सं० १२६) वाराणसी, १९३७.

तत्त्वचिन्तामणिः श्रीमद्गङ्गेशोपाध्यायविरचितः, प्रत्यक्षखण्डः मथुरानाथकृतरहस्यजयदेवकृतालोकटीकासहितः (प्रथमभागः); अनुमित्यादिबाधान्तम् अनुमानखण्डः, मथुरानाथकृतरहस्यनामकटीकासहितः (द्वितीयो भागः प्रथम परिच्छेदः); शब्दखण्डमारभ्य उच्छन्नप्रच्छन्नवादपर्यन्तम्, मथुरानाथकृतरहस्यजयदेवमिश्रकृताऽऽलोकटीकासहितः (चतुर्थो भागः प्रथमपरिच्छेदः); विधिवादादिप्रमाणचतुष्टयप्रामाण्यवादान्तं शब्दखण्डः, मथुरानाथकृतरहस्यजयदेवमिश्रकृताऽऽलोकटीकाभ्यां रघुनाथशिरोमणिकृतेन आख्यातवादेन नञ्वादेन च सहितः (चतुर्थो भागः द्वितीयः परिच्छेदः), परिशोधकः संपादकश्च कामाख्यानाथः, चौखम्बासंस्कृतप्रतिष्ठान, दिल्ली, १९९०. (एशियाटिक्सोसायटीसंस्करणस्य १८८४-१९०१ वर्षीयस्य मुद्रणप्रतिकृतिः).

तत्त्वचिन्तामणिव्याख्याप्रकाशः, रुचिदत्तकृतः, संपा. सुखरञ्जनसहा-प्रद्योतकुमारमुखोपाध्यायौ, जादवपुरविश्वविद्यालयः, १९९१. (बनारस् संस्कृतकालेज्संस्करणस्य मुद्रणप्रतिकृतिः).

तत्त्वप्रदीपिका, चित्सुखाचार्यविरचिता, नयनप्रसादिनीटीकोपेता, संपा. पं. काशीनाथशास्त्री, निर्णयसागरप्रेस्, मुम्बयी, १९१५.

तत्त्वबिन्दुः, वाचस्पतिमिश्रकृतः, तत्त्वविभावनाव्याख्योपेतः, संपा. वि. ए. रामस्वामी शास्त्रि, नवरङ्ग, नवदेहली, १९९१. (१९३६ वर्षीयस्य अण्णामलै विश्वविद्यालयसंस्कृतसीरिस् सं० ३ संस्करणस्य मुद्रणप्रतिकृतिः).

तत्त्वमुक्ताकलापः वेदान्तदेशिककृतः, स्वोपज्ञसर्वार्थसिद्धिसहितः, वाधूलश्रीनिवासकृतगूढार्थविवृति-सौम्यवरदरामानुजकृतगूढार्थप्रकाश-संपादककृतालभ्यलाभाख्यपूर्णव्याख्यानोपेतः, संपा. टी. वीरराघवाचार्यः, उभयवेदान्तग्रन्थमाला, मद्रास्, १९७३.

तत्त्वरत्नाकरः न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतः .

तर्ककौमुदी लौगाक्षिभास्करकृता, संपा. एम्. एन्. द्विवेदी, बनारस्संस्कृत सिरीस् ३२, वाराणसी १८८६.

तर्कताण्डवम् व्यासतीर्थकृतम्, राघवेन्द्रयतिविरचितन्यायदीपसमेतम्, संपा. डि. श्रीनिवासाचार्य-वि. वि. मध्वाचार्यौ, (प्राच्यविद्यासंशोधनालयग्रन्थमाला सं० ७४, ७७, ७९, ८२) मैसूर्, १९३२, ३५, ३८, ४३.

तर्कभाषा केशवमिश्रप्रणीता, तत्त्वप्रबोधिनीव्याख्योपेता, संपा. परमेश्वरनारायणशास्त्री, कृष्णप्रभा प्रकाशन, यल्लापुरम्, १९९५.

तर्कसंग्रहः अन्नम्भट्टविरचितः, गोवर्धनमिश्रकृतन्यायबोधिन्या, मेरुशास्त्रिकृतवाक्यवृत्त्या, जगन्नाथशास्त्रिकृतनिरुक्त्या, पट्टाभिरामशास्त्रिकृतटिप्पण्या, तथा रामरुद्रकृतरामरुद्रीय-रायनरसिंहशास्त्रिकृतनृसिंहप्रकाशिका-नीलकण्ठशास्त्रिकृतनीलकण्ठप्रकाशिका-पट्टाभिरामशास्त्रिकृतपट्टाभिरामप्रकाशिकेतिव्याख्याचतुष्टयसमुपेतस्वोपज्ञतर्कसंग्रहदीपिकया च समेतः, सत्कारिशर्मणा वङ्गीयेन सम्पादितः, (काशीसंस्कृतग्रन्थमाला सं० १८७) वाराणसी, १९६९. (प्रथममुद्रणं बालमनोरमाप्रेस्, मद्रास् १९१६, १९२०).

तात्पर्यवृत्तिविचारः (लेखः), लेखकः वायुनन्दनपाण्डेयः, पृ. १४८-१६९, सारस्वतीसुषमा (संपूर्णानन्दसंस्कृतविश्वविद्यालयानुसंधानपत्रिका), संपा. भगीरथप्रसादत्रिपाठी, वाराणसी, भाद्रपदपूर्णिमा वै. सं. २०३१, सेप्टेम्बर् १९७४.

तैत्तिरीयसंहिता, संपा. टि. एम्. नारायणशास्त्री, शारदाविलासमुद्राक्षरशाला, कुम्भकोणम्, १९३०-१९३१.

दर्पणः द्र० वैयाकरणभूषणसारः.

दिनकरीयम् द्र० कारिकावली.

दीपिकाव्याख्या नृसिंहप्रकाशिका द्र० तर्कसंग्रहः.

दीपिकाव्याख्या रामरुद्री द्र० तर्कसंग्रहः.

नागेशः द्र० वैयाकरणसिद्धान्तमञ्जूषा.

निरुक्तम् यास्काचार्यप्रणीतम्, निघण्टुपाठसमुपेतम्, दुर्गाचार्यकृतऋज्वर्थाख्यवृत्त्या समेतम्, टिप्पण्यादिकर्ता महादेव हरि भडकमकरः, संपा. गोविन्दात्मजरामकृष्णः, प्रथमो भागः, (Bombay Sanskrit and Prakrit Series no. 73) भण्डार्कर्प्राच्यविद्यासंशोधनालयः, पुणे, पुनर्मुद्रणम् १९८५. (प्रथमसंस्करणम् १९१८).

निरुक्तभाष्यम् द्र० निरुक्तम्.

नीलकण्ठप्रकाशिका द्र० तर्कसंग्रहः.

नीलकण्ठीयम् द्र० नीलकण्ठप्रकाशिका.

नृसिंहप्रकाशिका द्र० तर्कसंग्रहः.

न्यायकणिका द्र० विधिविवेकः.

न्यायकन्दली द्र० प्रशस्तपादभाष्यम्.

न्यायकुसुमाञ्जलिव्याख्या विस्तरः द्र० न्यायकुसुमाञ्जलिः.

न्यायकुसुमाञ्जलिः उदयनाचार्यकृतः, उत्तमूर् टि. वीरराघवाचार्येण विरचिताभ्यां कुसुमाञ्जलिविस्तरसमाख्यविशदव्याख्यान-विशेषविषयटिप्पणाभ्यां समुल्लासितः, पुनर्मुद्रणम् (केन्द्रीयसंस्कृतविद्यापीठ-ग्रन्थमाला, सं० ३१) तिरुपतिः, १९८०. (प्रथमप्रकाशनम् तिरुपतिः १९४१).

न्यायकोशः झळकीकरभीमाचार्यरचितः, अभ्यंकरोपाह्ववासुदेवशास्त्रिणा समुपबृंहितः संशोधितश्च, (Bombay Sanskrit and Prakrit Series no. 49) भण्डार्कर्प्राच्यविद्यासंशोधनालयः, पुणे, १९९६. (चतुर्थसंस्करणस्य मुद्रणप्रतिकृतिः).

न्यायकौस्तुभः महादेवपुणताम्बेकरविरचितः, (शब्दपरिच्छेदः) संपा. वे. सुब्रह्मण्यशास्त्री, (तञ्जावूर्सरस्वतीमहल्ग्रन्थालयग्रन्थावलिः सं० १८८) तञ्जावूर्, १९८२.

न्यायदर्शनम् गोतमकृतम्,

१. (प्रथमो भागः) वात्स्यायनकृतभाष्य-उद्द्योतकरकृतवार्त्तिक-वाचस्पति-मिश्रकृतटीका-उदयनकृतपरिशुद्धिसहितम् (प्रथमाध्यायः), संपा. अनन्त-लालठक्कुरः, मिथिलाविद्यापीठम् (Mithila Institute Series, Ancient Text No. 20), दर्भाङ्गा, १९६७.

२. विश्वनाथीयवृत्ति-वात्स्यायनभाष्यसहितम्, न्यायसूचीनिबन्धोपेतम्, संपा. एल्. एस्. द्रविड, टि. एस्. भण्डारी, वि. पी. द्विवेदी, (काशीसंस्कृत-सिरीस् सं० ४३), वाराणसी १९२०.

न्यायपरिशुद्धिः, वेदान्तदेशिककृता, संपादककृतन्यायतत्त्वप्रकाशिकाव्याख्या-समेता, संपा. टी. वीरराघवाचार्यः, उभयवेदान्तग्रन्थमाला, मद्रास्, १९७८.

न्यायबोधिनी द्र० तर्कसंग्रहः.

न्यायभाष्यम् द्र० न्यायदर्शनम् १.

न्यायभूषणम् भासर्वज्ञकृतम्, स्वोपज्ञन्यायसारव्याख्यानम्, संपा. स्वामी योगीन्द्रा-नन्दः, षड्दर्शनप्रकाशनप्रतिष्ठानम्, वारणसी, १९६८.

न्यायमञ्जरी जयन्तभट्टकृता, संपादककृतन्यायसौरभव्याख्यासहिता, संपा. के. एस्. वरदाचार्यः, (प्राच्यविद्यासंशोधनालयग्रन्थमाला सं० ११६, १३९) मैसूर्, १९७०, ८३.

न्यायरत्नमाला पार्थसारथिमिश्रप्रणीता, रामानुजाचार्यकृतनायकरत्नव्याख्योपेता, संपा. ए. सुब्रह्मण्यशास्त्री, (Library Rare Texts Publication Series No. 4), संपूर्णानन्दविश्वविद्यालयः, वाराणसी १९८२.

न्यायलीलावती वल्लभकृता, वर्धमानकृतप्रकाश-शंकरमिश्रकृतकण्ठाभरण-भगीरथ-ठक्कुरकृतविवृतिसहिता, संपा. हरिहरशास्त्रि-ढुण्ढिराजशास्त्रिणौ, (चौखम्बा-संस्कृतसिरीस् सं० ६४), पुनर्मुद्रणं वाराणसी, १९९०.

न्यायवार्त्तिकम् द्र० न्यायदर्शनम् १.

न्यायवार्त्तिकतात्पर्यटीका वाचस्पतिविरचिता,

१. द्र० न्यायदर्शनम् १ (प्रथमाध्यायपर्यन्तम्)

२. संपा. राजेश्वरशास्त्रिद्रविडः, (चौखम्बासंस्कृतग्रन्थमाला सं० २४) वाराणसी, १९२५.

न्यायवार्त्तिकटीकापरिशुद्धिः द्र० न्यायदर्शनम् १.

न्यायसुदर्शनम् न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतम्.

न्यायसुधा जयतीर्थविरचिता, (आनन्दतीर्थविरचितानुव्याख्यानटीका), विद्याधीशतीर्थविरचितवाक्यार्थचन्द्रिका-सत्यव्रततीर्थविरचितसुधाविवृति-राघवेन्द्रयतिकृतपरिमल-यदुपत्याचार्यकृतसुधाटिप्पणी-श्रीनिवासतीर्थकृतटीकाऽधृतसुधावाक्यार्थविवरण-मन्नारीकृष्णाचार्यविरचितचषक इति षट्टिप्पणीभिः समेता, (षड्भागेषु) मध्वसिद्धान्ताभिवृद्धिकारिणीसभा, उत्तरादिमठः, बेङ्गलूर्, १९८२.

न्यायसुधा (राणकम्) द्र० मीमांसादर्शनम् २.

न्यायसूत्राणि द्र० न्यायदर्शनम् १, २.

पञ्चपादिका पद्मपादकृता, चित्सुखकृततात्पर्यदीपिका-प्रकाशात्मकृतविवरण-नृसिंहाश्रमकृतभावप्रकाशिका-आत्मस्वरूपकृतप्रबोधपरिशुद्धि-विज्ञानात्मकृततात्पर्यद्योतिनीव्याख्याभिः सहिता, संपा. एस्. श्रीरामशास्त्रि-एस्. आर्. कृष्णमूर्तिशास्त्रिणौ, (Madras Government Oriental Series no. 155) १९५८.

पदवाक्यरत्नाकरः गोकुलनाथोपाध्यायकृतः, जदुनाथमिश्रकृतगूढार्थदीपिकाव्याख्यासहितः, संपा. नन्दिनाथमिश्रः, (सरस्वतीभवनग्रन्थमाला सं० ८८) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९६०.

पदार्थतत्त्वनिर्णयः आनन्दानुभवकृतः, अडयार्ग्रन्थालयस्थमातृका (Adyar MS. D. IX 926).

परिमलः द्र० ब्रह्मसूत्रशांकरभाष्यम्.

पाणिनिसूत्राणि द्र० सिद्धान्तकौमुदी.

पातञ्जलयोगदर्शनम्, वाचस्पतिमिश्रविरचिततत्त्ववैशारदी-विज्ञानभिक्षुकृत-योगवार्त्तिकविभूषितव्यासभाष्यसमेतम्, संपा. नारायणमिश्रः, भारतीय विद्या प्रकाशन, वारणासी, १९७१.

पुण्यराजः द्र० वाक्यपदीयम्.

प्रकरणपञ्चिका, शालिकनाथविरचिता, जयपुरनारायणभट्टकृतव्याख्यया संपादककृतटिप्पण्या च समेता, संपा. ए. सुब्रह्मण्यशास्त्री, धर्मविज्ञानसंकायः, बनारसहिन्दूविश्वविद्यालयः, वाराणसी, १९६१.

प्रकाशः द्र० तत्त्वचिन्तामणिव्याख्याप्रकाशः.

प्रकाशः द्र० व्युत्पत्तिवादः २.

प्रज्ञापरित्राणम्, न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतम्.

प्रदीपः (महाभाष्यप्रदीपः) द्र० महाभाष्यम्.

प्रभा द्र० कारिकावली.

प्रमाणसमुच्चयः हिस्टरी आफ् इण्डियन् लाजिक् ग्रन्थे उद्धृतः. सतीशचन्द्र-विद्याभूषणः, पुनर्मुद्रणम् दिल्ली, १९७१. (प्रथममुद्रणम् कल्कत्ता, १९२१).

प्रशस्तपादभाष्यम् (पदार्थधर्मसंग्रहाख्यम्), श्रीधरभट्टप्रणीतया न्यायकन्दली-व्याख्यया संवलितम्, संपा. हिन्दीभाषानुवादकश्च दुर्गाधरझाशर्मा, वारणासेय-संस्कृतविश्वविद्यालयः, (गङ्गानाथझाग्रन्थमाला सं० १) वाराणसी, १९६३.

प्रौढमनोरमा भट्टोजिदीक्षितप्रणीता, (अव्ययीभावान्ता) हरिदीक्षितविरचित-लघुशब्दरत्नव्याख्यया, भैरवमिश्रविरचितशब्दरत्नप्रकाशिका(भैरवी)व्याख्यया च समलङ्कृता। सभापतिशर्मोपाध्यायनिर्मितरत्नप्रभानामकटिप्पण्या च विलसिता, चौखाम्बा संस्कृत सीरज आफीस्, बनारस, १९८३.

बृहट्टीका कुमारिलभट्टकृतत्वेन व्याख्यानेषूदाहृता.

बृहती, प्रभाकरमिश्रप्रणीता (शाबरभाष्यव्याख्या) शालिकनाथमिश्रप्रणीतऋजु-विमलापञ्चिकया सहिता (तर्कपादान्ता), संपा. शे. कृ. रामनाथशास्त्री, (मद्रपुरीयविश्वविद्यालयग्रन्थावलिः सं० ३) (प्रथमो भागः) मद्रास्, १९३४.

बृहद्वैयाकरणभूषणम् श्रीमत्कौण्डभट्टविरचितम्, (श्रीमद्भट्टोजिदीक्षितकृत-वैयाकरणमतोन्मज्जनव्याख्यात्मकम्), संपादककृतरूपालीटिप्पणीपरिशिष्टादिभि-स्समेतम्, संपा. श्रीमनुदेवभट्टाचार्यः, (हरजीवनदासप्राच्यविद्याग्रन्थमाला सं० २) चौखम्बा अमरभारती प्रकाशन्, वारणासी, १९८५.

बृहन्मञ्जूषा नागेशभट्टविरचिता, कालिकाप्रसादशुक्लमहोदयेन संपादिता। वारणासीस्थसंपूर्णानन्दसंस्कृतविश्वविद्यालयेन प्रकाशिता, १९७७.

ब्रह्मसूत्राणि द्र० श्रीभाष्यम्.

ब्रह्मसूत्रशांकरभाष्यम्, वाचस्पतिमिश्रकृतभामती-अमलानन्दकृतकल्पतरु-अप्पय्य-दीक्षितकृतपरिमळसहितम्, संपा. अनन्तकृष्णशास्त्री, वासुदेवलक्ष्मणपणशीकरः च, चौखम्बासंस्कृतसिरीस्आफीस्, वाराणसी, १९८२. (१९१७ वर्षीयस्य निर्णयसागरप्रेस्संस्करणस्य मुद्रणप्रतिकृतिः).

भट्टिकाव्यम् (भट्टिकविप्रणीतम्) अन्वितार्थप्रकाशिकाभिधया टीकया विभूषितम्। चौखाम्बा संस्कृतसंस्थानम्, वारणासी। १९८९-९१.

भागवतम् महर्षिवेदव्यासप्रणीतम्, (मूलमात्रम्)

१. (काशीसंस्कृतसिरीस् सं० २५५) वाराणसी, १९८७, (निर्णयसागर-प्रेस्संस्करणस्य मुद्रणप्रतिकृतिः).

२. गीताप्रेस्, गोरखपुर, वि.सं. २०५४.

भाट्टकौस्तुभः द्र० मीमांसाकौस्तुभः.

भाट्टचिन्तामणिः गागाभट्टविरचितः, संपा. सूर्यनारायणशुक्लः, (चौखाम्बासंस्कृत-सिरीस् सं० २५, २७) वाराणसी, १९३३, १९३८.

भामती द्र० ब्रह्मसूत्रशांकरभाष्यम्.

भूषणसारः द्र० वैयाकरणभूषणसारः.

मथुरानाथीयम् द्र० तत्त्वचिन्तामणिः.

महाभाष्यम् पतञ्जलिकृतम्, कैयटप्रणीतभाष्यप्रदीप-नागेशकृतोद्द्योतसहितम्, संपा. भार्गव शास्त्री, (व्रजजीवनप्राच्यभारतीग्रन्थमाला सं० २३) (षड्भागेषु) चौखम्बासंस्कृतप्रतिष्ठान, देहली, १९९१. (निर्णयसागरप्रेस् संस्करणस्य मुद्रणप्रतिकृतिः).

मीमांसाकोषः केवलानन्दसरस्वतीकृतः, (सप्तभागेषु) प्राज्ञपाठशालामण्डलम्, वाई, १९५२-६६.

मीमांसाकौस्तुभः श्रीखण्डदेवविरचितः, संपा. अ. चिन्नस्वामिशास्त्रि-पट्टाभिराम-शर्माणौ, (चौखम्बासंस्कृतग्रन्थमाला सं० ५८) वाराणसी, १९२४-१९३३.

मीमांसादर्शनम् जैमिनिकृतम्,

१. श्रीवैद्यनाथशास्त्रिकृतप्रभाव्याख्या-कुमारिलकृततन्त्रवार्त्तिक-टुप्टीका-समेत-शाबरभाष्योपेतम्, संपा. सुब्बाशास्त्री, (आनन्दाश्रमसंस्कृतसिरीस् सं० ९७) (पञ्चभागेषु) पुणे, १९२९-१९३४.

२. श्रीमद्गोविन्दमुनिकृतभाष्यविवरण-कुमारिलकृततन्त्रवार्त्तिक-भट्टसोमेश्वर-कृत-न्यायसुधोपेतशाबरभाष्योपेतम्, संपा. महाप्रभुलालगोस्वामी, तारा प्रिण्टिङ्ग वर्क्स्, (भागचतुष्टयम्) वाराणसी, १९८४.

मीमांसान्यायप्रकाशः आपदेवकृतः, चिन्नस्वामिकृतसारविवेचिनीव्याख्यासहितः, संपा. एम्. आर्. दीक्षितः, (हरिदाससंस्कृतसिरीस् सं० २५) वाराणसी, १९२५.

मीमांसाबालप्रकाशः शंकरभट्टकृतः, संपा. मुकुन्दशास्त्री, (चौखाम्बासंस्कृतसिरीस् सं० १६) वाराणसी, १९०२.

मीमांसावार्त्तिकम् द्र० मीमांसादर्शनम्, श्लोकवार्त्तिकम्.

मीमांसासूत्रम् द्र० मीमांसादर्शनम्.

मुक्तावलिः द्र० कारिकावली.

रहस्यम् द्र० तत्त्वचिन्तामणिः.

राममिश्राः न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृताः.

रामरुद्रीयम् द्र० तर्कसंग्रहः.

योगसूत्राणि द्र० पातञ्जलयोगदर्शनम्.

योगभाष्यम् द्र० पातञ्जलयोगदर्शनम्.

लघुचन्द्रिका द्र० अद्वैतसिद्धिः.

लघुमञ्जूषा द्र० वैयाकरणसिद्धान्तमञ्जूषा.

लघुशब्देन्दुशेखरः नागेशभट्टप्रणीतः (अव्ययीभावान्तः) भैरवमिश्रविरचितया चन्द्रकलाख्यया टीकया समेतः। चौखाम्बा संस्कृत सीरज आफीस्, बनारस, १९८३.

वरदविष्णुमिश्राः न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृताः.

वाक्यपदीयम् भर्तृहरिकृतम्, रघुनाथशर्मकृताम्बाकर्त्रीव्याख्यासमेतम्, पदकाण्डे वृत्तिसमुद्देशे जातिद्रव्यसंबन्धसमुद्देशेषु च रघुनाथशर्मकृताम्बाकर्त्री-हेलाराज-कृतप्रकाशसमेतम्, ब्रह्मकाण्डे हरिवृषभकृतस्वोपज्ञव्याख्या-रघुनाथशर्मकृता-म्बाकर्त्रीभ्यां सहितम्). (सरस्वतीभवनग्रन्थमाला सं० ९१) संपूर्णानन्द-विश्वविद्यालयः, वाराणासी, १९६३, ६८, ७४.

वाक्यपदीयव्याख्या द्र० वाक्यपदीयम्.

वाक्यवृत्तिः द्र० तर्कसंग्रहः.

वार्त्तिकम् (व्याकरणवार्त्तिकम्) द्र० सिद्धान्तकौमुदी, महाभाष्यम्.

वार्त्तिकन्यायसुधा द्र० मीमांसादर्शनम् २.

विधिविवेकः मण्डनमिश्रकृतः, वाचस्पतिमिश्रकृतन्यायकणिकाव्याख्यासहितः, संपा. महाप्रभुलालगोस्वामी, (प्राच्यभारतीग्रन्थमाला सं० ८) रत्ना पब्लिकेशन्स्, वाराणसी, १९७८.

विभक्त्यर्थनिर्णयः गिरिधरोपाध्यायकृतः, संपा. जीवनाथमिश्रः (चौखाम्बासंस्कृत-सिरीस् सं० १२) वाराणसी, १९०२.

विवरणम् न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतम्.

विवरणम् द्र० काव्यप्रकाशः.

विस्तरः द्र० न्यायकुसुमाञ्जलिः.

विस्तरः द्र० जैमिनीयन्यायमालाविस्तरः.

वेदान्तपरिभाषा, धर्मराजाध्वरीन्द्रविरचिता, अमरदासकृतमणिप्रभा-रामकृष्णाध्वरि-कृतशिखामण्युपेता, संपा. स्वामिगोविन्दसिंहसाधुः, वेंकटेश्वरप्रेस्, मुम्बई, १९८५. (१९२८ वर्षीयस्य तृतीयसंस्करणस्य पुनर्मुद्रणम्).

वेदार्थसंग्रहः रामानुजाचार्यकृतः, सुदर्शनकृततात्पर्यप्रदीपिकासहितः, संपा. के. वि. एन्. सुदर्शनाचार्यः, तिरुमलतिरुपतिदेवस्थानम्, तिरुपति, १९५३.

वैद्यनाथशास्त्री द्र० मीमांसादर्शनम् १.

वैद्यनाथीयम् (शाबरभाष्यव्याख्या) द्र० मीमांसादर्शनम् १.

वैयाकरणभूषणम् द्र० बृहद्वैयाकरणभूषणम्.

वैयाकरणभूषणसारः कौण्डभट्टविरचितः, बालकृष्णपञ्चौलीकृतप्रभा-श्रीहरिवल्लभ-शास्त्रिकृतदर्पणाख्यव्याख्याद्वयोपेतः, संपा. श्रीबालकृष्णपञ्चौली, (काशीसंस्कृत-ग्रन्थमाला १८८) वारणासी, १९६९. (द्वितीयसंस्करणम्).

वैयाकरणसिद्धान्तमञ्जूषा श्रीनागेशभट्टविरचिता, दुर्बलाचार्यविरचितकुञ्जिका-बालम्भट्टविरचितकला इति टीकाद्वयेन संवलिता, संपा. माधवशास्त्रिभण्डारि-मदनमोहनपाठकौ (तस्याः शक्तिप्रकरणमारभ्य स्फोटप्रकरणपर्यन्तः प्रथमो भागः), (चौखाम्बासंस्कृतग्रन्थमाला सं० ४४) वाराणसी, १९१३-१९२६. (पुनर्मुद्रणम् १९८९).

वैशेषिकदर्शनम् कणादमुनिप्रणीतम्, उत्तमूर्वीरराघवाचार्यविरचितरसायनाख्य-व्याख्योपेतम्, प्रकाशकाः वि. एस्. वेंकटराघवाचार्य इत्यादयः, मद्रास्, १९५८.

व्युत्पत्तिवादः गदाधरभट्टाचार्यकृतः,

१. धर्मदत्तझाविरचितगूढार्थतत्त्वालोकसहितः, संपा. कीर्त्यानन्दझा, चौखाम्बा अमरभारती प्रकाशन, वाराणसी, १९७६. (१९११ वर्षीयस्य निर्णय-सागरसंस्करणस्य मुद्रणप्रतिकृतिः).

२. लक्ष्मीनाथशर्मविरचितप्रकाशव्याख्यासहितः, चौखाम्बासंस्कृतसंस्थानम्, वाराणसी, संवत् १९८८.

शक्तिवादः, गदाधरभट्टाचार्यकृतः, हरिनाथटीकोपेतः, संपा. दामोदरशास्त्रि-गोस्वामी, (चौखाम्बासंस्कृतसिरीस् सं० ७७) वाराणसी, १९२९.

शब्दकौस्तुभः भट्टोजिदीक्षितकृतः, जयकृष्णविरचितस्फोटचन्द्रिकासमेतः, संपा. विन्ध्येश्वरीप्रसादद्विवेदि-गणपतिशास्त्रिमोकाटे, (चौखम्बासंस्कृतसिरीस् सं० २) वाराणसी, १८९८-१९१७. (पुनर्मुद्रणम् १९९१).

शब्दमणिः द्र० तत्त्वचिन्तामणिः.

शब्दशक्तिप्रकाशिका, जगदीशतर्कालंकारविरचिता, कृष्णकान्तविद्यावागीशकृत-कृष्णकान्ती-रामभद्रसिद्धान्तवागीशकृतप्रबोधिनीव्याख्यासहिता, संपा. ढुण्ढिराज-शास्त्री, (काशीसंस्कृतसिरीस् सं० ११९) वाराणसी, २००२. (तृतीयमुद्रणम्).

शांकरभाष्यम् द्र० ब्रह्मसूत्रशांकरभाष्यम्.

शाबरभाष्यम् (प्रथमाध्याये प्रथमपादः) द्र० मीमांसादर्शनम् १.

शाब्दतरङ्गिणी, वे. सुब्रह्मण्यशास्त्रिविरचिता, संस्कृत एजुकेशन् सौसैटि, मद्रास्, १९६९.

शाब्दनिर्णयः प्रकाशात्मकृतः, संपा. टि. गणपतिशास्त्री, (त्रिवेन्द्रंसंस्कृतसिरीस् सं० ५३) तिरुवनन्तपुरम्, १९१७.

शास्त्रदीपिका पार्थसारथिमिश्रप्रणीता, सोमनाथप्रणीतमयूखमालिकाव्याख्यासहिता, (प्रत्यधिकरणविभक्तजैमिनीयन्यायमालायुता च), तत्र च प्रथमस्तर्कपादः श्रीमद्रामकृष्णप्रणीतयुक्तिस्नेहप्रपूरणीसिद्धान्तचन्द्रिकाव्याख्यायुक्तः स्वोपज्ञ-सिद्धान्तचन्द्रिकागूढार्थविवरणसहितश्च, सम्पादकः श्रीधर्मदत्तझा (बच्चाझा), कृष्णदास अकादमी, वारणासी, १९८८. (१९१५ वर्षीयस्य निर्णयसागर-संस्करणस्य मुद्रणप्रतिकृतिः).

शिखामणिः द्र० वेदान्तपरिभाषा.

श्रीभाष्यम् रामानुजाचार्यविरचितम्, सुदर्शनसूरिविरचितश्रुतप्रकाशिकाव्याख्या-समेतम्, संपा. उत्तमूर् ति. वीरराघवाचार्यः (भागद्वयम्), उभयवेदान्तग्रन्थ-माला, मद्रास्, १९६७.

श्रुतप्रकाशिका द्र० श्रीभाष्यम्.

श्लोकवार्तिकम् कुमारिलभट्टविरचितम्, पार्थसारथिमिश्रविरचितया न्यायरत्नाकर-व्याख्यया सनाथम्, संपा. परिष्कारकश्च स्वामी द्वारिकादासशास्त्री, (प्राच्य-भारतीग्रन्थमाला सं० १०), तारा पब्लिकेशन्स्, वाराणसी, १९७८.

षडर्थसंक्षेपः न्यायपरिशुद्धौ वेदान्तदेशिकैः उदाहृतः.

संक्षेपशारीरकम् सर्वज्ञात्मकृतम्, रामतीर्थकृतान्वयार्थप्रकाशिकासहितम्, संपा. बि. एस्. वझे, (काशीसंस्कृतसिरीस् सं० २) वाराणसी, १९१३. पुनर्मुद्रणम्.

सङ्गीतरत्नाकरः शार्ङ्गदेवकृतः, संपादककृताङ्ग्लानुवादसमेतः, संपा. आर्. के. श्रिङ्गि, (प्रेमलतामहाभागाया आध्यक्ष्ये संपादितः) (भागद्वयम्) मोतीलाल बनारसी-दास, नवदेहली, १९७८-८९.

सप्तपदार्थी (वैशेषिकप्रकरणम्) शिवादित्यमिश्रप्रणीतम्, रामशास्त्रिणा संशोधितम्, E.J. Lazarus & co काशी १८९३.

सर्वार्थसिद्धिः द्र० तत्त्वमुक्ताकलापः.

सांख्यकारिका, ईश्वरकृष्णविरचिता, वाचस्पतिमिश्रविरचितसांख्यतत्त्वकौमुदी-संपादककृतसारबोधिनीव्याख्यासमेता, संपा. शिवनारायणशास्त्री, निर्णयसागर-प्रेस्, मुम्बयी, १९४०.

सांख्यतत्त्वकौमुदी द्र० सांख्यकारिका.

सांख्यसूत्राणि कपिलप्रणीतानि, विज्ञानभिक्षुभाष्य-सटीकतत्त्वसमाससूत्र-सांख्य-सारसमेतानि, सांख्यसूत्रानुवाद-शब्दानुक्रमणी-टिप्पण्यादियुतानि, संपा. राम-शंकरभट्टाचार्यः, भारतीयविद्याप्रकाशनम्, वाराणसी, १९६६.

सिद्धान्तकौमुदी भट्टोजिदीक्षितविरचिता, ज्ञानेन्द्रसरस्वतीकृततत्त्वबोधिनीटीका-जयकृष्णविरचितसुबोधिनीभ्यां सूत्रपाठादिना च समेता, संपा. वासुदेवशर्मा पणशीकरः, मेहरचन्द लछमनदास, नवदेहली, पुनर्मुद्रणम् १९८५.

सोमनाथीयम् द्र० शास्त्रदीपिका.

स्फोटवादः नागेशप्रणीतः, संपा. वि. कृष्णमाचार्यः, (अडयार्संस्कृतसिरीस् सं० ५५) १९४६.

स्फोटसिद्धिः मण्डनमिश्रकृता, संपा. एन्. आर्. भट्ट-टि. रामानुजौ, अनुवादिका. एम्. बियार्दो, (फ्रेञ्च् इन्स्टिट्यूट् इण्डालजि सिरीस् सं० १३) पाण्डिचेरी, १९५८.

हेलाराजः द्र० वाक्यपदीयम्.

सुबर्थविचारे उदाहृतानां श्लोकानामकारादिक्रमेण सूची

अकरर्मकत्वात् सत्येवं (वा.प.) 739
अकाण्डशक्तिनिर्भिन्ने 71
अङ्गादङ्गात् संभवति 640, 643
अतसर्थयुतात् षष्ठी (प.वा.र.) 719
अतिविततगहनसरणि 356
अथ प्रजानामधिपः (र.वं.) 221
अदृष्टत्वात् प्रतिनिधेः (वा.प.) 307
अध्याहृततुमन्तस्य (प.वा.र.) 534, 649
अनिराकरणात् कर्तुः (वा.प.) 454
अनुरागमयेन भूयसा 260
अन्यत्रामन्त्रणाल्लिङ्ग (प.वा.र.) 43
अन्यलभ्यतया जाति (प.वा.र.) 44
अपादानसंप्रदान 577
अपाये यदुदासीनं (वा.प.) 565, 568, 579, 582
अपि वागधिपस्य दुर्वचं 761
अयमपि खरयोषित् 189
अयाचितारं न हि (कु.सं.) 226
अविग्रहा गतादिस्था (वा.प.) 739, 744, 748
अविनाशे गुरुत्वस्य (वा.प.) 779
अश्मानं दृषदं मन्ये 561
असंख्याताः सहस्राणि 55
आचम्य चाम्बु तृषितः (घटकर्पर) 491, 493
आत्मानमात्मना वेत्सि (र.वं.) 344
आधारोऽतिशयत्यादे (प.वा.र.) 239
आमं शूद्रस्य पक्वान्नं 711
आयुष्यमद्रकुशल (प.वा.र.) 770
आरभ्य तस्यां दशमीं तु यावत् 265
आलापात् गात्रसंस्पर्शात् 386
आश्रयोषवधिरुद्देश्यः (भू.सा.) 142

आहारो हि मनुष्याणां 407
इक्ष्वाकूणां दुरापेऽर्थे (र.वं.) 761
इतरार्थानवच्छिन्ने (श.श.प्र.) 7
उक्तार्थानामप्रयोगात् (प.वा.र.) 64
उत्पत्तेः प्रागसद्भावो (वा.प.) 166
उपकारकता नाम (प.वा.र.) 527
उपश्लेषस्य चाभेदः (वा.प.) 779
उपावृत्तस्य दोषेभ्यः 238, 239
उभसर्वतसोः कार्या (वा) 242, 246, 248, 249, 256
उभावप्यध्रुवौ मेषौ (वा.प.) 566, 571, 580, 582
एकादशीमुपवसेत् 238
एति जीवन्तमानन्दः (रामा) 721
एतेन कर्मसंज्ञा सर्वा 169
ऐक्यद्वित्वबहुत्वानां (प.वा.र.) 43
ऐषीकमस्त्रमुदपास्यत् 419
औदासीन्येन यत् प्राप्यं (वा.प.) 155, 200
कर्तृकर्मव्यवहितं (वा.प.) 777, 786, 7926, 793
कर्मण्येवोभयप्राप्तौ (प.वा.र.) 753
कर्मणि देशकालाध्व (प.वा.र.) 202
कलक्कणितगर्भेन 431
कष्टा बोधव्यथा कष्टं 78
कस्य बिभ्यति देवाश्च (रामा) 605
कारकैर्व्यपदिष्टे च (वा.प.) 706, 713, 730
कारकार्थेतरार्था च 17
कारणं कार्यभावेन (वा.प.) 166
कालभावाध्वदेशानां (वा.प.) 201, 240
कालानामध्वमानानां (श.श.प्र.) 201
कालान्तरगते भानौ 366
किंचिद्गुणान्तरोत्पत्त्या (वा.प.) 165
किमेकयैव विंशत्या (पुराण) 55
कुमार्य इव कान्तस्य 501, 504
कृतमनुमतं दृष्टं वा यैः (वे.सं.) 71

कृदन्तधातुयोगेन (प.वा.र.) 742
क्रियाकृतविशेषाणां (वा.प.) 155, 157, 158, 163, 166
क्रियाक्तायं भावनायां (प.वा.र.) 746
क्रियाधर्मिणि यः स्वार्थः (श.श.प्र.) 575
क्रियानिवृत्तिजनक (प.वा.र.) 621
क्रियाप्रकारीभूतोऽर्थः (वा.प.) 17
क्रियायाः परिनिष्पत्तिः (वा.प.) 330, 332, 347, 348
क्षीयन्ते चास्य कर्माणि (उपनिषद्) 827
ङसिभ्यां ङ्यस इत्येषा (प.वा.र.) 579
गतिबुद्ध्यशनार्थेषु (प.वा.र.) 217
गतिभोजनधीप्राप्ति (वा.प.) 215
गत्यादिभिन्ने धात्वर्थे (श.श.प्र.) 461
गुणक्रियायां स्वातन्त्र्यात् (वा.प.) 205, 218, 223
गुणभूतैरवयवैः (वा.प.) 57
गुरुर्धरित्री क्रियतेतरां त्वया 740
गुरुविप्रतपस्विदुर्गतानां 724
चतुर्थ्यर्थौ ज्ञापितत्वं (प.वा.र.) 531
चर्मणि द्वीपिनं हन्ति 813, 817, 819, 820
जानीहि नाथ दीनोऽस्मि 76
जाने कोपपराङ्मुखी (का.प्र.) 508
जायाप्रतिग्राहित (र.वं.) 226
ततः क्रियावता कर्त्रा (वा.प.) 742, 744, 748
ततः प्रभृति संक्रान्तौ 668
तत्रागारं धनपति (मे.सं.) 716, 720
तदुत्तमाङ्गजैः समं (नैषध) 447
तद्धितेन चतुर्थ्या वा (कु.वा.) 480, 550, 553
तन्निवर्त्यं विकार्यं तु (वा.प.) 163, 165
तरोर्विभजते पत्रं 581
तादात्म्यभिन्ने स्वार्थे या (श.श.प्र.) 40
तिङा विकरणाक्तस्य (श.श.प्र.) 310
तुमर्थात् भाववचनात् (प.वा.र.) 538
तृणाय मत्वा रघुनन्दनोऽथ (भट्टि) 558, 559

तोयं वा पत्रं वा यद्वा (पुराण) 495
ददैर्दुःखस्य मादृग्भ्यो (भट्टि) 738
दम्पत्योर्मध्यगं धनं (स्मृति) 467
दिक्शब्दाञ्चूत्तरपद (प.वा.र.) 661
दिवोऽर्थकरणे कर्म (प.वा.र.) 371
दुह्याच्पचदण्डुधिप्रच्छि 167
दुहयाचिरुधिप्रच्छि 199
दूरादावसथान्मूत्रं (म.भा.) 701
दूरेण तं परिहरन्ति सदैव 701
देवाधिनाथेन सह क्षितीशः 407
दोषायोगमहःस्थिति 400
द्रव्यादिविषयो हेतुः (वा.प.) 433
द्विष्ठोऽप्यसौ परार्थत्वात् (वा.प.) 708
धनपतिगृहादुत्तरेण (मे.सं.) 719
धात्वर्थेन विशिष्टस्य (श.श.प्र.) 41
न जीवत्पितृकः कुर्यात् 804
नदीं यावन्मम परं 262, 265
न नावं मन्यते योऽश्वं 558
न नीखाद्यादिशब्दाय (वा.प.) 235
नमः स्वस्तिस्वधास्वाहा (प.वा.र.) 545
न ममेति स्वस्वतायाः (वृद्धवासिष्ठ) 480
नवपल्लवसंस्तरेऽपि ते 75
नवमे दशमे मासि 405
नवानधोऽधो बृहतः (माघ) 246
नाग्निस्तृप्यति काष्ठानां (रामा) 711
नामगोत्रे समुच्चार्य (वृद्धवासिष्ठ) 480, 549, 552
नाम्नो द्विधैव संबन्धः (वा.प.) 243, 244
निदाघधामानमिवाधि (माघ) 276
निमित्तमन्तरा शब्द (प.वा.र.) 147
निमित्तात् कर्मसंयोगे (प.वा.र.) 817
निमित्तेभ्यः प्रवर्तन्ते (वा.प.) 307
निरूढा लक्षणाः काश्चित् (कु.वा.) 127, 232

निर्दिष्टविषयं किंचित् (वा.प.) 568
निर्वर्त्यं च विकार्यं च (वा.प.) 154, 156, 163, 165, 200
निष्ठायां कर्मविषया (वा.प.) 706
पततो ध्रुव एवाश्वो (वा.प.) 566, 579, 582
परत्वादन्तरङ्गत्वात् 219, 223
परस्परेण स्पृहणीयशोभां 501, 504
परिक्रयस्य करणे (प.वा.र.) 522
पापाद्विरमतीत्यादौ (प.वा.र.) 602
पार्थ एव घटो नास्ति (प.वा.र.) 64
पूर्वस्मिन् या क्रिया सैव 457
प्रकृतेस्तु विवक्षायां (वा.प.) 156, 165
प्रकृत्यर्थस्य यः स्वार्थे (श.श.प्र.) 7
प्रकृत्यर्थे स्वार्थसंख्या (श.श.प्र.) 8
प्रकृत्यादिगणाज्ज्ञाता (प.वा.र.) 354, 424
प्रकृत्युच्छेदसंभूतं (वा.प.) 155, 157, 158, 163, 165
प्रतियोगिपदादन्यत् 346
प्रधानकर्मण्याख्येये 172, 200, 213, 220
प्रधानविषया शक्तिः (वा.प.) 395, 402, 409
प्रधानेतरयोर्यत्र (वा.प.) 395, 402
प्रयत्नवृत्तिविषयि (प.वा.र.) 317
प्रसिद्धे लिङ्गवचने (प.वा.र.) 44
प्रागन्यतः शक्तिलाभात् 307
प्रासोष्ट शत्रुघ्नमुदार 386, 404
ब्राह्मणः प्रतिगृह्णीयात् 463
ब्रूते त्यजिजहात्यादिः (प.वा.र.) 580
भजे शम्भोश्चरणयोः 709
भिद्यते हृदयग्रन्थिः (उपनिषद्) 825
भुक्तवत्सु च विप्रेषु 827
भ्रातस्तावदहं शठेन (का.प्र.) 508
मन्यतेः कर्मणो यस्मात् (श.श.प्र.) 558, 561
महाशरीरे वैजात्य (प.वा.र.) 415
मातुर्निलीयते कृष्णः 631, 633

मुक्ताफलाय करिणं 815, 818
मूलेनावाहयेद्देवीं 446, 862
मेघाद्विद्युत् प्रभवतितरां 646
मेषान्तरक्रियापेक्षं (वा.प.) 566, 571, 580, 582
यः स्वेतरस्य यस्यार्थे (वा.प.) 6, 15
यगन्तधातोरर्थो यः (श.श.प्र.) 87
यगन्तभिन्नधात्वर्थ 311
यतो द्रव्यं गुणाः कर्म 639
यतोऽध्वकालनिर्माणं (प.वा.र.) 651
यत्कर्मकर्तृको भावः (प.वा.र.) 829
यत्क्रियायां यादृशार्थः (श.श.प्र.) 787
यत्पथावधिरणुः परमा सा 208
यत्त्वकथितं पुरस्ता 169
यथानुशासनं ण्यन्त (प.वा.र.) 220
यथाहेः कुण्डलीभावो (वा.प.) 166
यदसञ्जायते यद्वा (वा.प.) 155, 156, 158
यदुत्पत्तिस्वरूपेण (प.वा.र.) 162
यशसा सह मूर्छतीह 407
यस्य धातोर्यदर्थे यः (श.श.प्र.) 170
याजनं योनिसंबन्धं 386
यादृशार्थे प्रकृत्यन्यो (श.श.प्र.) 4
ये देशान्तरसंयोग (प.वा.र.) 581
योऽर्थो विकरणात्तस्य (श.श.प्र.) 343
लब्धावष्टगुणं पुण्यं (स्मृति) 456
लब्ध्वा चाष्टगुणं पुण्यं (स्मृति) 462
लिट्कार्यकारिणोः षष्ठी (प.वा.र.) 766
लीयतिर्दर्शनाभाव (प.वा.र.) 631
वल्मीकाग्रात् प्रभवति धनुः 644, 646
वस्तुतस्तदनिर्देश्यं (वा.प.) 330, 332, 347, 348
वाताय कपिला विद्युत् 532
विद्यासूर्योदयोद्रेकात् 817
विभक्तिः प्रथमा तेषु (प.वा.र.) 43

विभक्तो यः पुनः पित्रा (बृहस्पति) 456
विभक्त्यन्तरबोधेभ्यो (प.वा.र.) 711
विशेषकर्मसंबन्धे (वा.प.) 739
विश्वरूपकृतविश्व कियत्ते 76
वैदर्भीकेलिशैले 807
वैश्येभ्यः क्षत्रियाः शूराः 702
व्यापारसान्तरो हेतुः (प.वा.र.) 347
व्यावर्तनीयमधितिष्ठति (सप्तपदार्थी) 426
शतमागांसि सोढाहे 518
शनिरशनिश्च तमुच्चैः (का.प्र.) 506
शब्दान्तरमपेक्ष्यैव (श.श.प्र.) 2
शब्दैस्तुलोपमाभिन्नैः (प.वा.र.) 768
शिशुः पयो धास्यति 393, 408
शोचनीयासि वसुधे 76
संविदागूः प्रतिज्ञानं (अमर) 516, 517
संशय्य कर्णादिषु (भारवि) 490
संसृष्टिनस्तु संसृष्टि (या.स्मृ.) 456
संख्यात्वव्याप्यसामान्यैः (श.श.प्र.) 7
संचारो रतिमन्दिरावधि 6
संज्ञान्तरसमाविष्टे 218
सती वाविद्यमाना वा (वा.प.) 155, 156, 158, 162, 165
सदृशत्वं तृणादीनां (आपिशलि) 559, 560, 562
संदर्शनं प्रार्थनायां (वा.प.) 457
सप्तमी स्यात् कर्मणि वा (प.वा.र.) 806
सप्त वित्तगमा धर्म्याः (मनु) 462, 469
स बाल आसीद्वपुषा (माघ) 416
संबन्धः कारकेभ्योऽन्यः (वा.प.) 707
संबोधनपदं यच्च (वा.प.) 77, 81
सर्वनामसानाधि (प.वा.र.) 718
सहैव दशभिःपुत्रैः 384, 388, 389, 397
सहैव पुत्रैर्दशभिः 380
सादृश्यमपकर्षो वा (प.वा.र.) 559

सामानाधिकरण्यादिः(प.वा.र.) 389
सा सहोक्तिः सहार्थस्य (का.प्र.) 380
सिद्धं साध्यं फलं चेति (वत्सेश्वर) 229
सिद्धस्याभिमुखीभाव (वा.प.) 81
सीमाघाटस्थितिक्षेत्रे (मेदिनी) 817, 819
सुपां कर्मादयोऽप्यर्थाः (वार्तिक) 124, 230
सुबन्तं हि यथानेकं (वा.प.) 77
सुबर्था एव नामार्थाः (प.वा.र.) 64
सूत्रेण प्रातिपदिका (प.वा.र.) 44
सेवनवेतनमृणमिह 498, 500
स्त्रीषु प्रवीर जननी जननी 503
स्पृहणीयगुणैर्महात्मभिः 501
स्पृहयन्ति गुणान् मनीषिणः 504
स्वकर्मफलनिर्दिष्टां 75
स्वाश्रये समवेतानां (वा.प.) 21
स्वेतरार्थानवच्छिन्न (श.श.प्र.) 3, 6
स्वोपस्थाप्ययदर्थस्य (श.श.प्र.) 4
हन्तेः कर्मण्युपष्टम्भात् (श.श.प्र.) 815, 818, 819
हा राम हा देवर तात मातः 251
हिंसायामेव भुज्यर्थ (स्मृति) 215
हृक्रोस्तु कर्तुः कर्मत्वं (श.श.प्र.) 234
हे चण्ड हे मुण्ड बलैः 71
हेतुत्वे कर्मसंज्ञायां (वा.प.) 496
हेतौ तृतीया हेतुस्तु (प.वा.र.) 439
हे सौमित्रे सखा यस्ते 71

शाब्दबोधवर्णनार्थमुदाहृतानां वाक्यानां सूची

अकरुणं धिक् 245
अक्षाः दीव्यन्ति देवनीया वा 373
अक्षाणां देविता 370
अक्षान् दीव्यति 370, 372
अक्षान्तं धिक् 245
अक्षैः अक्षान् वा दीव्यति 369, 371, 373
अक्षैः अक्षान् वा दीव्यति मत्स्यः 373
अक्षैर्दीव्यति 371
अक्ष्णा काणः 413, 414, 416, 417, 422
अग्नये कृत्तिकाभ्यो वा हविः स्वाहा 555
अग्नये छागस्य हविषो वपाया मेदसोऽनुब्रूहि प्रेष्य वा 734
अग्नये छागस्य हविषो वपायाः मेदसः प्रेष्य अनुब्रूहि वा 734
अग्नये स्वाहा 541
अग्निः श्यामं घटं रक्तं करोति 161
अग्निमनुजपति 167
अग्नेः माणवकं वारयति 618, 627, 628
अग्नौ घृतं जुहोति 99
अग्नौ जुहोति 99
अग्नौ पचति 798, 798
अङ्कुरेणानेकान्तः 363
अजा ग्रामं नीयते 196, 199
अजा ग्रामं याप्यते चैत्रेण 216
अजां ग्रामं नयति 196, 197, 100
अजां ग्रामं नयति हरति कर्षति वहति वा 196
अजां ग्रामं यापयति 217
अजां ग्रामाय नयति 471, 478, 481
अजिग्रहत्तं जनको धनुस्तत् 215, 222
अज्ञानात् बद्धः 685
अणुत्वेन द्रव्यत्वम् 436
अति देवान् कृष्णः 285
अतीतमनागतं वा जानाति 222
अदितिः श्रीः धेनुः 52
अद्य भुक्त्वा अयं द्व्यहे द्व्यहाद्वा भोक्ता 864
अद्य भुक्त्वा द्व्यहे द्व्यहाद्वा भोक्ता 867
अद्य भोक्ता द्व्यहे द्व्यहाद्वा भोक्ता 868
अद्य हविष्यं भोक्ता द्व्यहे द्व्यहाद्वा निरामिषं भोक्ता 867
अधर्मात् जुगुप्सति 600
अधर्मात् जुगुप्सते 601
अधर्माद्विरमति 602
अधि ब्रह्मदत्ते पञ्चालाः 870
अधि भुवि रामः 865, 866, 870
अधिपञ्चालेषु ब्रह्मदत्तः 870
अधिरामे भूः 866, 870
अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः 235, 241
अधिशेते, अधितिष्ठति, अध्यास्ते, अभिनिविशते, उपवसति अनु-वसति वा जनपदम् 239

अधीतपूर्वी वेदान् 746
अधीती वेदान् वेदेषु वा 806
अधीती वेदेषु वेदान्वा 795
अधीती व्याकरणे 806, 807
अधोऽधश्चन्द्रमसं रविः 245
अधोऽधश्चन्द्रमसम् 248
अधोऽधो मेघमम्भः 243
अधोऽधोलोकं हरिः 242
अध्यधि गगनं रविः 245, 248
अध्यधि लोकं हरिः 242
अध्यधि शिखरं घनः 243
अध्ययनस्य हेतोर्वसति 444
अध्ययनात् पराजयते 614, 615
अध्ययनाय वसति 525
अध्ययनेन वसति 441, 443, 449
अध्वगामिनां रथगामिनः शीघ्रतराः अध्वगेषु वा 847
अध्वर्युणा सह सदस्याय ददाति 391
अनु हरिं सुराः 270, 272
अनुदेवं दानवाः 272
अनुभवेन स्मरणम् 441
अनुभवेन स्मरति 349
अन्तरा त्वां मां च हरिः 259
अन्तरा त्वां मां हरिः 258
अन्तरा हरिं न सुखम् 258
अन्तरिक्षे घटो न पचति 804
अन्तरेण हरिं न सुखम् 259, 261
अन्तरेणान्तरा विना वा नरः शोच्यः 259
अन्नं भोक्तुं व्रजति 535
अन्नस्य हेतोः वसति 716, 717
अन्नात् हेतोः वसति 717
अन्नाय ओदनाय वा व्रजति 535
अन्यो भिन्न इतरो वा कृष्णात् 654
अन्योन्यस्मान्मेषावपसरतः 595
अप गृहात् भुक्तः 671
अप त्रिगर्तेभ्यः 672
अप हरेः परि हरेर्वा संसारः 671
अपहरेः परि हरेर्वा संसारः 673
अपहरेः, परिहरेः संसारः 670
अपि वागधिपस्य दुर्वचं वचनं तद्वदधीत विस्मयम् 761, 764
अपि स्तुयाद्विष्णुम् 285
अपि स्तुहि 286
अभितः कृष्णं गोपाः 242
अभितः कृष्णम् 249
अभितः परितो वा कृष्णं गोपाः 247, 251
अभिमन्युरर्जुनात् प्रति 681
अभिवादयते विश्वामित्रं रामेण रामं वा दशरथः 211
अभ्यवहारयति ओदनं तनयं तनयेन वा जननी 234
अमुष्मिन् गां विक्रीणीते 794
अयं जानाति आत्मत्वात् न द्रव्यत्वात् 687
अयं शत्रून् प्रति धावति 284
अयमस्मात्तारो मन्द्रो वा 702
अयमस्माद्दीर्घः 702
अयस्कान्तमयो दर्शयति 211
अयाचितारं न हि देवदेवमद्रिः सुतां ग्राहयितुं शशाक 222
अरातीन् दिगन्तं गमयति 218
अर्जुनेनार्जुनात् अर्जुनं वा विना पाण्डवाः सैन्धवेन वारिताः 699

अर्ध्यादिकया सपर्यया पर्यपूपुजत् 356
अलं जगते 555
अलं जगते प्रभुः समर्थः शक्तो भगवान् 551
अलं महीपाल तव श्रमेण 443
अलं श्रमेण 433, 434, 449
अलंकरिष्णुः कन्याम् 760
अलमनेन 544
अल्पेन अल्पाद्वा मुक्तः 700
अविनीतं विनयं याचते 179
अश्वात् पतति 568
अश्वाय घासः 527, 528
अश्वेन पथा दीपिकया व्रजति 332
अश्वो रथात् प्रति 681
असंख्याताःसहस्राणि ये रुद्रा अधि-भूम्याम् 56
असत्सु तरत्सु सन्तस्तिष्ठन्ति 821
असत्सु तिष्ठत्सु सन्तस्तरन्ति 821
असाधुर्मातुले 812
अस्थ्नो मांसं विभजते कौणपः 581
अस्थ्नो विभजते मांसं कौणपः 592
अस्माद्ध्रस्वः 702
अस्य पिता 715
अस्य पुत्रः 715
अहं ब्रवीमि 56
अहल्यायाः जारः 771
अहल्यायै जारः 771
अहेः आत्मानं रक्षति 607
अह्ना क्रोशेन वा अनुवाकोऽधीतः 374, 376, 539
आ कीटात् आ कैटभारेः अभीष्ट-लाभप्रयुक्तकृतकृत्यता 679
आ गृहात् उद्यानम् 671
आ चैत्राच्छीतं भवति 679
आ देहात् वस्त्रम् 671
आ परमाणोः 673
आ परमाणोः पृथिवी 672, 678
आ परमेश्वरात् आत्मनां कर्मबन्धः 675
आ पाटलिपुत्रात् वृष्टो देवः आ मथुरायाः 677
आ प्रयागात् अन्तर्वेदिः 679
आ मरणाद्धि तमभिसन्धत्ते धीरः 676
आ मुक्तेः संसारः 670, 671, 673
आ शैशवादधीतमा यौवनात् 678
आ सकलात् ब्रह्म 670, 671
आ समुद्रात् क्षितिः 676
आ समुद्रात् मृदः 671, 673
आ समुद्रात् यशः 672, 673
आकडादारेकासंज्ञा 608, 671, 675
आकाशे तिष्ठन्नाकाशमन्तरो यमयति 798
आकाशे पक्षी गच्छति 798
आकृष्णनवमीपूर्वतिथि आशुक्लदशमि देवीं पूजयेत् 677
आक्षिकं शतं जयति 192, 193
आचार्येण बोध्यते बोधितो वा धर्मं माणवकः 322
आतपात् कुसुमं रक्षति वा 613
आतपे तिष्ठति 792, 795
आत्मना जानाति 350
आत्मने वै पुत्रः प्रियो भवति 472, 477, 478

आत्मानं मण्डयमानः 762, 760, 759
आत्मानमात्मना वेत्सि 237, 344, 569
आदयति खादयति वा अन्नं वटुना 222, 206
आदित्यो रजनीक्षये यदुदेति 815
आद्यक्षणमारभ्य 657
आपाटलिपुत्रमामथुरं वृष्टो देवः 677
आमं शूद्रस्य पकान्नं पक्वमुच्छिष्ट-मुच्यते 711
आमयाविने हितं भेषजम् 532
आम्नीती छन्दसि छन्दो वा 795
आयुक्तः कुशलो वा हविपूजने हरिपूजनस्य वा 838
आयुक्तः कृष्णपूजनस्य कृष्णपूजने वा 839
आयुक्तः पटकरणस्य पटकरणे वा कुशलः 839
आयुक्तो गौः शकटे 839
आयुष्यं चिरजीवितं वा कृष्णाय कृष्णस्य वा भूयात् 771
आयुष्यादि अस्यै अस्य वा भूयात् 772
आरम्भ तस्यां दशमीं तु यावत् प्रपूजयेत् पर्वतराजपुत्रीम् 265
आरात् वनात् 654
आरे भग्ने इन्द्रबाहुर्बद्धव्यः 820
आवां ब्रूवः 56
आशिष्यं चिरञ्जीवितं कृष्णाय कृष्णस्य वा भूयात् 770
आश्चर्यो गवां दोहोऽगोपेन 745, 752, 753, 755
आश्चर्यो गवां दोहोऽशिक्षितेन गोपेन 754
आसनाच्चलति 570
आसनाच्चलितः 572, 589
आसनाच्चलिता 598
आसनात् प्रेक्षते 648, 649
आसयत्यतिथिम् 218
आहारो हि मनुष्याणां जन्मना सह जायते 407
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः 764
इति हेतुस्तदुद्भवे 790
इदमन्तं सनकादिमनुष्येभ्यो हन्त 556
इदमन्नं पितृभ्यः स्वधा 555
इदमेषां भुक्तमोदनस्य 758
इदमेषां शयितम् 758
इदमेषामासितं शायितं गतं भुक्तं वा 757
इदमेषामाशितं शयितं वा 757
इदमेषामोदनस्य भुक्तं ग्रामस्य यातं वा 758
इदानीं गगनं जानाति 793
इदानीं गगनमस्ति 793
इदानीं गुणे सत्ता 808
इदानीं घटोऽस्ति 792
इन्द्राय स्वाहा 546
इष्टकां चिनोति 189
इष्टकां भित्तिं चिनोति 189
इष्टादन्नादंशं ददाति 629
इष्टी सुरान् 751
इष्टी सुरेषु सुरान्वा 795
इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत् 864
इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्यति 868

इहस्थोऽयं धानुष्कः क्रोशे क्रोशाद्वा लक्ष्यं विध्यति 867
ईश्वरः पचति 310
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति 796
ईषत्करः प्रपञ्चो हरिणा 760, 759
ईषत्पानः सोमो भवतः 759
ईषत्पानः सोमो भवता 760
उत्तमर्णस्य दायी 764
उत्तरेण ग्रामं ग्रामस्य वा 718
उदिते आदित्ये जुहोति 821
उदिते आदित्ये तमो नष्टम् 823
उद्भिदा यजेत पशुकामः 332
उप परार्धे हरेर्गुणाः 272, 865, 866
उप सुरेषु हरिः 869
उप हरिं सुराः 272, 273
उपकुर्वन् क्रियासिद्धौ 779
उपखार्यां द्रोणः 272
उपत्यकाभ्यो गिरिमधिरोहत्यारोहति वा 591
उपनिष्के कार्षापणम् 869
उपरागे स्नानम् 818
उपरागे स्नायात् 821
उपर्युपरि बुद्धीनां चरन्तीश्वरबुद्धयः 246
उपर्युपरि भूलोकम् 248
उपर्युपरि लोकं रविः 245
उपर्युपरि लोकं हरिः 242, 250
उपर्युपरि, अधोऽधः, अध्यधि वा लोकं हरिः 247
उपर्युपरिबुद्धीनां चरन्तीश्वरबुद्धयः 248, 250
उपवसति अनुवसति अधिवसति आवसति वा वैकुण्ठं हरिः 237, 241
उपाचार्येषु द्रोण 869
उपाध्याय गां ददाति 472
उपाध्यायः तस्मै चपेटिकां ददाति 481
उपाध्यायादधीते 633
उपाध्यायादन्तर्धत्ते 631
उपाध्यायादन्तर्धत्ते छात्रः 631
उपार्जुनं क्षत्रियाः 273
उभयतः कृष्णं गोपाः 241, 247, 249
उभयतः सुभद्रां संकर्षणवासुदेवौ 243, 244
उह्यते भारो ग्रामं चैत्रेण 196
ऋणात् बद्धः 683
ऋणेन बद्धः 682
ऋते कृष्णात् 654
ऋते कृष्णात् नोत्पद्यते सुखम् 655
ऋते कृष्णान्न किंचित् 669
ऋते वातं वृक्षः पतति 655
ऋद्धेषु भुञ्जानेषु दरिद्रा आसते 833
ऋद्धेष्वासीनेषु दरिद्रा भुञ्जते 833
एकः 39
एकादश्यां रात्रौ जागृयात् 289
एकेनैव सुपुत्रेण सिंही स्वपिति निर्भया 378
एको घटः 65
एको व्रीहिः 56
एतस्मात् सविषान्नात् मित्रं वारयति 619
एधांसि पचन्ति 308
एधेभ्यो व्रजति 534
एधोदकस्योपस्कुरुते 705, 723, 715

एधोदकस्योपस्कुरुते पाचकः 723, 724
एनं ब्रह्म व्याहारयति 218
एवं कटे आस्ते चैत्रः 793
एषोऽर्घ्यः शिवाय नमः 541, 544
ऐन्द्रं दधि 146, 549, 552
ऐन्द्रं दधि भवत्यमावास्यायाम् 554
ओदनं करोति 229
ओदनं पक्वपूर्वी 746
ओदनं पक्वौ भुज्यते चैत्रेण 63
ओदनं पचति 158, 163, 451
ओदनं पचन् पचमानः 762
ओदनं पचमानः 760
ओदनं पेचानः 760
ओदनं पेचिवान् 760
ओदनं भुक्तवान् 760, 762
ओदनं भुङ्क्ते 111, 164
ओदनं भोक्तुम् 760
ओदनं भोजको व्रजति 764
ओदनः सिध्यति 314
ओदनस्य पाकः 742, 747, 755
ओदनस्य भुक्तम् 756
ओदनेन तृप्तिः 441
औषधभोजनेन परंपरया क्रमेण पुष्टिं संपादयेत् 351
कं हेतुं वसति 717
कटं करोति 158, 159, 162, 164
कटं कृतपूर्वी 746
कटं कृत्वा 760, 762
कटं चिकीर्षुः 762
कटे आस्ते 776, 779, 805
कटे आस्ते चैत्रः 794
कटे आस्ते देवदत्तः 775
कटे शेते 776, 783
कनकं कुण्डलं करोति 159, 162, 163, 165, 166
कन्यया शोकः 443
कन्यया सह रमणीयो वरः 399
कन्यामलंकरिष्णुः 762
कपालेभ्यो घटः 642
कमण्डलुना जटाभिः 430
करस्य करभो बहिः 668
कर्णस्यावतंसः 714
कर्णाय ईर्ष्यति फाल्गुनः 510
कर्तरि कृत् 809
कर्ता लोकान् 759, 760
कस्माद्धेतोर्वसति 717
कस्मिन् हेतौ वसति 717
कस्मिन्निमित्ते वसति 445
कस्मै निमित्ताय 445, 717
कस्मै हेतवे वसति 717
कस्य निमित्तस्य 445
कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे 605, 612
कस्य हेतोः 717
कस्य हेतोर्वसति 444, 716
काकेन देवदत्तगृहाः 425, 427, 428
काकेभ्यो दधि रक्षति 613
काननाय वृष्टिः 528
कान्तस्य त्रस्यति 714
कामिने युवतिः 528
कामुकस्य क्षयिष्यत्यनवरतरतम् 725
कायेन दशवक्त्रः 413, 415
कारणतायां प्रविशति निविशते वा 237

कारणतायामनन्यथासिद्धिः नियतपूर्ववृत्तित्वं वा 809
कारणतावच्छेदकेऽप्रामाण्यज्ञानाभावो निविशतेऽनुप्रविशति वा 811
कारीरीमनुवृष्टिः 269
कार्तिकमारभ्य आ चैत्राच्छीतं भवति 675
कार्तिकमारभ्य आ चैत्राच्छीतम् 678
कार्तिकमारभ्य चैत्रं यावच्छीतं भवति 267
कार्तिक्याः आग्रहायणी मासे 650, 653, 657
कार्तिक्याः आग्रहायणी मासः 654
कार्तिक्याः चैत्रं यावच्छीतम् 671
कार्तिक्याः त्रिमासे त्रिषु मासेषु वा माघी 653
कार्तिक्याः प्रभृति 668
कार्तिक्याः प्रभृति आरभ्य वा सेव्यते गङ्गा 668
कार्तिक्याः मासे आग्रहायणी 652
कार्यते हरिणा 308
कार्यमात्रात् पूर्वो भगवान् 666
कालिकेन नीलः स्पन्दः 363
काव्ये कालिदासः 811
काशान् कटं करोति 158, 159, 161
काशीतः आ कौशिक्याः व्रजति 674
काशीतः आपाटलिपुत्रात् वृष्टो देवः 675, 678
काशीतः पाटलिपुत्रं यावत् वृष्टो देवः 267, 268, 671
काशीमनुवसति 238
काश्यनूष्यते 238
काश्याः बहिर्मिथिला 668
काष्ठं पचति 308, 312, 313
काष्ठं भस्म करोति 156, 157, 160, 162, 165
काष्ठं भिनत्ति 159, 163
काष्ठात् भस्म भवति 642
काष्ठेन पच्यते 312
काष्ठैः स्थाल्यामोदनं पचति 308
काष्ठैः स्थाल्यामोदनस्य पाचकः अन्नं भुङ्क्ते 62
काष्ठैरोदनं पचति 140, 141
किं कारणं वसति 717
किं निमित्तम् 445
किं निमित्तं वसति 717
कुठारेण च्छिनत्ति 351
कुड्यात् पततोऽश्वात् पतति 582
कुण्डलाय हिरण्यम् 525, 526, 528
कुतो भवान्, पाटलिपुत्रात् 568, 572
कुतो भवान्, पाटलीपुत्रात् 599
कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च 501, 503, 505
कुरवः सुप्यन्ते 203
कुरुक्षेत्रात् चत्वारि योजनानि चतुर्षु योजनेषु वा पृथूदकम् 653
कुरुणा क्षेत्रम् 423, 425, 429
कुरून् स्वपिति 200, 201, 202, 203, 204
कुरून् स्वपिति तिष्ठति वा 203
कुर्वन् कुर्वाणो वा सृष्टिं हरिः 758
कुशलः कृष्णपूजनस्य कृष्णपूजने वा 839
कुशलमारोग्यं सुखम् आनन्दो वा शिष्याय शिष्यस्य वा भूयात् 771
कुशूलं भिनत्ति 162

कुसुमानि मौक्तिकानि वा स्रजं करोति 161
कुसुमानि स्रजं करोति 158
कुसूलात् पचति 599
कूपगमनं कूपसंयोगं वा वारयति पान्थः 627
कूपादन्धं वारयति 617, 618, 619, 620, 621, 622, 628
कूपे गर्गकुम् 782
कूपे गर्गकुलम् 781
कृच्छ्रेण कृच्छ्राद्वा मुक्तः 700
कृतपूर्वी कटम् 737, 740, 740, 742, 752
कृष्णः सुन्दरः 37
कृष्णस्य कृतिः 736, 740, 742, 747
कृष्णस्य शयितम् 756
कृष्णात् ऋते दुःखम् 655
कृष्णात् ऋते नरः शोच्यः 655
कृष्णात् परोऽर्जुनः 656
कृष्णात् पूर्वो हलायुधः 657, 666, 667
कृष्णात् पृथक् 669
कृष्णात् प्राक् हलायुधः 667
कृष्णादन्यः 668
कृष्णादितरः 669
कृष्णादृते जनः गोवर्धनासह 665
कृष्णादृते न धनुर्धरः 655
कृष्णादृते व्रजो विरसः 665
कृष्णानां गौः संपन्नक्षीरतमा 858
कृष्णाय तिष्ठते गोपी 490, 494
कृष्णाय राध्यति ईक्षते वा 513, 515
कृष्णाय राध्यति ईक्षते वा गर्गः 514
केन निमित्तेन 445, 717
केन हेतुना वसति 444, 716, 717
केशेषु चमरीं हन्ति 813, 820
केशैः केशेषु वा उत्सुकः 445
केशैः केशेषु वा प्रसितः 445
कैरवं हतवान् राजा भृङ्गेण सह सत्वरम् 407
को हेतुः वसति चैत्रः 717
कोशमास्ते 200, 202, 240, 290
क्रूरमभिक्रुध्यति अभिद्रुह्यति वा 512, 513
क्रोशं कुटिला नदी 241, 287, 288, 290
क्रोशं गिरिः 287
क्रोशं तत्सेनाया स्थितम् 202
क्रोशं योजनं वा रमते सांयात्रिकः 203
क्रोशं रमते 202, 203
क्रोशमधीते 287
क्रोशमास्ते 202, 204
क्रोशे क्रोशाद्वा लक्ष्यं विध्यति 867
क्रोशो रम्यते 203
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते 246, 248, 262
क्षत्रियस्य आयुधजीवनम् 854
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे 827
क्षीरसागरं कौस्तुभं मथ्नाति 194
क्षुदुपहन्तुं शक्या 48, 49
खगः वृक्षं त्यजति 90
खगे तरुं गच्छति खगः 87
खगेन त्यज्यते वृक्षः 90
खगो भूमिं गच्छति न तु स्वम् 114

खण्डिकोपाध्यायः शिष्याय चपेटां ददाति 454, 452, 471
खपुष्पं पश्य 112
खलं क्षेत्रं वा धान्यं चिनोति 189
खे शकुनयः 780, 781
खे शकुनस्य 779
गगनमृते द्रव्यं न शब्दवत् 262
गङ्‌गां स्पृशति 164
गङ्गायां गावः 781, 782
गङ्गायां घोषः 782, 798
गङ्गास्नानाद्वारयति 629
गच्छतां गच्छत्सु वा धावन् शीघ्रगामी 859
गच्छन्तं गच्छत्सु वा धावन् शीघ्रः 839
गजस्यालानम् 714
गन्धं वहति वायुः 197
गन्धं विना वायुः 698
गन्धादृते पाषाणः 662
गन्धेन सह पृथिवी 397
गमयति कृष्णं गोकुलम् 144, 308
गमयति दिगन्तमरातीन् 218, 222, 225
गरलात् बडवानलाद्वा दाहवदान्यतां शिक्षते 635
गर्गं शतं दण्डयति 182
गर्गान् शतं दण्डयति 182
गर्गाय शतं धारयति 498
गर्जितेन सह वृष्टिः 403
गवां कृष्णा संपन्नक्षीरा 843
गवां कृष्णा संपन्नक्षीरा गोषु वा 847
गवां गोषु वा अधिपतिः 836
गवां गोषु वा ईश्वरः 736, 837
गवां गोषु वा कृष्णा 857
गवां गोषु वा कृष्णा बहुक्षीरा 839, 859
गवां गोषु वा कृष्णा संपन्नक्षीरतमा 851
गवां गोषु वा दायादः 836, 837
गवां गोषु वा प्रतिभूः 837
गवां गोषु वा प्रसूतः 836, 838
गवां गोषु वा वत्सं धावन्ती दुग्धवती 857
गवां गोषु वा साक्षी 837
गवां गोषु वा स्वामी 836, 837
गवां दोहे आगतः 822
गवा दानं संपादयति 351
गवा सह धनं लभते 391
गवां पयो दोग्धि 170, 173
गां ग्रामं ददाति 471
गां ददाति 471
गां ददाति ब्राह्मणाय 471
गां दोग्धि 167
गां दोग्धि पयः 168, 169, 170, 171, 174, 371
गां दोग्धि पयः गोपालः 173
गां पयसो दोग्धि 174
गां पयो दोग्धि गोपः 170
गां पयो दोग्धि मैत्रः 170
गां व्रजं रुणद्धि 184
गामवरुणद्धि व्रजम् 183
गिरेः क्रोशे क्रोशाद्वा वनं गच्छति विहगः 869
गिरौ वृक्षात् पर्णं पतति 792
गुञ्जाया अधिको यवः 703
गुणाद् भेदो द्रव्यस्य 664
गुणान्न पतति 588

गुणो द्रव्यात् भिन्नः 658
गुरवे गां ददाति 461
गुरवे गां धारयते 496
गुरवे गां प्रतिश्रृणोति, आशृणोति 516
गुरवे शिष्यं शपते 493
गुरुं धर्मं पृच्छति 185
गुरुणा टीका 423, 425, 429
गुरुणा व्याहार्यते व्याहारितो वा ब्रह्मैषः 322
गुरुणा श्राव्यते श्रावितो वा धर्मं शिष्यः 322
गुरुमभिवादयते सुतं सुतेन वा गृहस्थः 234
गुरुविप्रतपस्विदुर्गतानां प्रतिकुर्वीत भिषक् स्वभेषजैः 724
गुरूननुज्ञापयति 215
गुरौ वसति 776, 779, 780
गृहं परितः सर्वत्र उभयतो वा 243
गृहं यावत् वनं तव 265
गृहमभितः पुरतरुणा 243
गृहस्थेन मासमास्यते आसितो वा अतिथिः 322
गृहाच्चलितः 595
गृहात् गङ्गा मम परा काश्याः सैवापरा मम 656
गृहात् गङ्गा मम परा काश्याः सैवापरा मम 658
गृहान्निर्गच्छति 581
गृहे गृहे अश्वः 280
गृहे चैत्रः पचति 716, 786, 797
गृहे चैत्रः स्थाल्यां तण्डुलं पचति 341
गृहे चैत्रो न पचति 804
गृहे पचति 797, 800
गृहे स्थाल्यामोदनं पचति 351, 786
गेयो माणवकः साम्राम् 765, 766, 766
गेहे चैत्रः पचति 791
गेहे पचति मैत्रः 793
गोत्रेण गार्ग्यः 353, 355, 361, 368, 369
गोदोहं तिष्ठति 202, 203
गोदोहः स्थीयत 203
गोदोहमास्ते 200, 204
गोदौ ग्रामः 55
गोपी स्मरात् कृष्णाय शपते 489
गोपी स्मरात् कृष्णाय श्लाघते 489, 494
गोपी स्मरात् कृष्णाय ह्नुते 489
गोपी स्मरात् कृष्णाय तिष्ठते 489
गोपेन गौः पयो दुह्यते 169
गोभ्यः पयांसि दोग्धि 590, 592
गोभ्यो दोग्धि पयः 171, 173
गोमयात् वृश्चिक उत्पद्यते 642
गोमिथुनमादाय कन्यां ददाति पिता 473
गोवधे प्रायश्चित्तम् 818, 820
गोविन्दे मथुरां याते व्यथन्ते गोपयोषितः 832
गोविन्देन नेतव्या व्रजं गावः, न तु गोविन्दस्य व्रजस्य 766
गोषु गवां वा स्वामी 838
गोषु चैत्रेण दुग्धास्वागतः 828
गोषु दुग्धासु गतः 821, 822
गोषु दुग्धास्वागतः 826, 827
गोषु दुह्यमानासु आगतः 825, 826, 827, 831

गोषु दुह्यमानासु गतः 821, 821, 822, 823, 827, 828, 834
गोषु दोग्धव्यासु आगतः 827
गोषु धोक्ष्यमाणासु गतः 822
गोषु धोक्ष्यमाणासु दुग्धासु वागतः 831
ग्रामं गच्छति 91, 92, 104, 116, 121, 130, 135, 148, 162
ग्रामं गच्छति त्यजति 90
ग्रामं गच्छन् तृणं स्पृशति 164, 200
ग्रामं गतः 760
ग्रामं ग्रामस्य वा दक्षिणेन नदी 772
ग्रामं ग्रामस्य वोत्तरेण नदी 772
ग्रामं ग्रामाय वा गच्छति 563, 564, 472
ग्रामं जग्मिः 766
ग्रामं निकषा 250
ग्रामं भारं वहति 196
ग्रामं भारं वहति पुरुषः 197
ग्रामं समया 242, 250
ग्राममजां नयति 195, 197
ग्रामस्य गतम् 756
ग्रामस्य ग्रामाद्वा अन्तिकं सविधं वा 701
ग्रामस्य ग्रामाद्वा अन्तिकम् अन्ति-केनान्तिकाद्वा 701
ग्रामस्य ग्रामाद्वा दूरं विप्रकृष्टं वा 701
ग्रामस्य ग्रामाद्वा दूरे विप्रकृष्टे वा सविधे अन्तिके वा 701
ग्रामस्य दक्षिणतः 667, 720
ग्रामस्य दक्षिणतः उत्तरतो वा नदी 771
ग्रामस्य दक्षिणतः पुरः पुरस्तात् उपरि उपरिष्टात् 720
ग्रामस्य दक्षिणतः, पुरः, पुरस्तात्, उपरि, उपरिष्टात् 718
ग्रामस्य दूरं दूरात् दूरेण वा 704
ग्रामस्य दूरं दूरात् दूरेण वा अन्तिकम् अन्तिकात् अन्तिकेन वा 703
ग्रामस्य दूरात् दूरेण दूरं वा आगतम् 704
ग्रामस्य दूरेऽस्ति 704
ग्रामस्योत्तरतः 720
ग्रामस्योपरि 720
ग्रामस्योपरिष्टात् 720
ग्रामात् गच्छति 574
ग्रामात् दक्षिणा, दक्षिणाहि वा 661
ग्रामात् पूर्वम् आरामः 667
ग्रामात् पूर्वस्तटाकः 666
ग्रामात् पूर्वो दक्षिणः पश्चिम उत्तरो वा आरामः 665
ग्रामात् प्राक् तडागः 661
ग्रामात् बहिः 655
ग्रामात् योजनं योजने वा वनम् 651
ग्रामादजां वनं नयति 591
ग्रामादायाति 565, 570
ग्रामादारात् तटाकः 665
ग्रामादुत्तरो दक्षिणः 657
ग्रामाद्योजने योजनं वा वनम् 652
ग्रामाय गच्छति 478
ग्रामे गच्छति 792, 798
ग्रामे गन्ता 787
ग्रामेण सह गृहं गच्छति 448
ग्रामो गम्यत 87
ग्रीष्मात् पूर्वो वसन्तः 657

घटं करोति 143, 157, 161, 163, 164, 227
घटं कुरुते 167
घटं जानाति 95, 110, 126, 143, 164, 227, 228
घटं न जानाति 227
घटं पश्यति 142, 157, 229, 291
घटं रक्तं करोति 161
घटः पटो न 327, 658
घटः पृथिवी न गन्धात् न पटत्वात् 690
घटः पृथिवीगन्धात् न पटत्वात् 689
घटत्वं घटे भासते 787
घटत्वेन जन्यत्वं, प्रकारत्वम् 354
घटत्वेन जानाति 343
घटत्वेन सह घटमवगाहते बुद्धिः 383
घटत्वेन साजात्यम् 354
घटपटमठानां घटः कम्बुग्रीवादिमान् 846
घटस्य कारणम् 710
घटस्य रूपम् 712
घटात् भेदः 659
घटात् श्यामं रूपं वारयति पाचकः 626
घटादन्यः 655, 659
घटादन्यः, भिन्नः, पृथक् 658
घटादन्यत्वम् 659
घटाद्भिन्नः 572, 655, 659
घटाय दण्डः 527, 528
घटायालं समर्थः शक्तो वा कुलालः 555
घटेन नश्यते 321
घटे चाक्षुषं जनयति सूयते वा चक्षुष्मान् 794
घटे जलं घटात् बहिः 668
घटे ज्ञानमस्ति 805
घटे नीलरूपं करोति 794
घटे पटत्वं जानाति 787
घटे रूपमस्ति 794
घटे रूपम् 807
घटेन घटात् घटं वा पृथक् पटः 699
घटेन शून्यः विधुरो रहितः 437
घटेन सह पटवत् गृहम् 383
घटेनाभावः 431
घटो जायते 314
घटो दण्डात् 691
घटो न 662
घटो न पटौ 327
घटो न पारिमाण्डल्यात् 692
घटो न पारिमाण्डल्येन 441, 442
घटो नश्यति 325
घटो नास्ति 51, 324
घटो नीलः 46, 47
घटो भवति 307, 324
घनान्निस्सृत्य विद्योतते 649
घृतं जुहोति 99, 376
घृतस्य घृतेन वा यजते 735
घृतेनात्ति जुहोति 343
चक्रेण सार्धं दण्डेन जनितः 382
चक्षुषा पश्यति 349
चण्डालात् कनकं वारयति दाता 626
चतुर्भुजो हलायुधः मकरध्वजः 52
चतुष्पादः पाशुः 857
चन्द्रेण चन्द्रस्य वा तुल्यं मुखम् 446
चन्द्रेण चन्द्रस्य वा सदृशः 768
चन्द्रेण सहोपमीयते तुल्यते 447
चरितेन दान्तः 352

चर्मणि द्वीपिनं हन्ति 813, 814, 815, 820
चिकीर्षया प्रवर्तते 347, 349
चिकीर्षा यज्ञदत्तस्य कटस्य 754
चिकीर्षुः कटम् 760
चित्राणां गवामयम् 714
चेष्टया पचति 440
चेष्टाविशेषेण पचति 442
चैतन्यमात्मनः प्रकृतिः 360
चैतन्येन प्रतिबिम्ब्यते 321
चैत्रं यावच्छीतम् 248
चैत्रं यावत् शीतम् 246
चैत्रः 46, 59
चैत्रः ग्रामं गच्छति 85
चैत्रः तण्डुलं पचति 109, 305
चैत्रः पक्ता 325
चैत्रः पचति 50, 61, 108, 264, 304, 313, 324
चैत्रः पचति जानाति नश्यति 323
चैत्रः पाचकः 325
चैत्रः मैत्रेण पाचयति 133, 303, 313
चैत्रः मैत्रेण सह न भुङ्क्ते 386
चैत्रः स्वं गच्छति 102
चैत्रस्तण्डुलं पचति 121
चैत्रस्य गमनम् 756
चैत्रस्य द्रव्यम् 710
चैत्रस्य पाकः 325
चैत्रस्य सुखम् 531
चैत्रस्य स्वम् 710
चैत्रस्य हस्तः 710
चैत्रात् परः 656
चैत्रात् पूर्वं माघः 656
चैत्रात् पूर्वः फाल्गुनः 654, 655, 669
चैत्रात् भिन्नः, पृथक् 661
चैत्रादन्य इतरः 662
चैत्राय कुप्यति क्रुध्यति 507
चैत्राय मोदते, रोचते, स्वदते मोदकः 487
चैत्राय शतं धारयति 496, 500
चैत्रेण कृतम् 762
चैत्रेण न पच्यते 587
चैत्रेण पच्यते 587
चैत्रेण ओदनं खादयति 235
चैत्रेण ओदनस्य पाकः 316
चैत्रेण गम्यते उच्यते 317
चैत्रेण गम्यते ग्रामः 88
चैत्रेण गम्यते स्पन्द्यते 319
चैत्रेण ग्रामो गम्यते 97, 104, 119, 131, 136
चैत्रेण ग्रामो गम्यते न तु स्वात्मा न वा मनुष्यः 119, 121
चैत्रेण ज्ञायते 319
चैत्रेण ज्ञायते इष्यते गम्यते 312
चैत्रेण ज्ञायते गम्यते 316
चैत्रेण दुह्यते गौः क्षीरम् 172
चैत्रेण पक्व ओदनः 131, 303
चैत्रेण पक्वम् 316, 343
चैत्रेण पच्यते 319, 328
चैत्रेण पच्यते ओदनः 311, 315
चैत्रेण पच्यते तण्डुलः 310, 319
चैत्रेण पच्यते, शय्यते 311
चैत्रेण पाकः क्रियते 328
चैत्रेण याप्यते ग्राममजा 217
चैत्रेण शय्यते 321
चैत्रेण सूपः पच्यते 316
चैत्रेषु पाचकेषु व्रजति 827

चैत्रो ग्रामं गच्छति 86, 87, 88, 89, 96, 114, 129, 131, 139, 142, 143, 148, 170
चैत्रो ग्रामं गच्छति न मनुष्यम् 115
चैत्रो ग्रामं गमयति मैत्रम् 133
चैत्रो ग्रामं भावयते 215
चैत्रो जानाति घटम् 230
चैत्रो न पचति 324, 805
चैत्रो न पचेत् 805
चैत्रो मनुष्यं न गच्छति 150
चोरस्य रुजति रोगः 725
चोरस्य रोगस्य रुजा 726
चोरात् त्रायते 605, 606
चोरात् धनिकं त्रायते 613
चोरात् बिभेति 605, 613
चोरात् बिभेति त्रायते वा 605
चौरस्य निप्रहणनं, प्रणिहननं, निहननं, प्रहणनं वा 727
चौरस्य रुजति रोगः 725
चौरस्य रोगस्य रुजा 724
चौरस्योज्ञासयति निप्रहन्ति प्रणिहन्ति निहन्ति प्रहन्ति उन्नाटयति उत्क्राथयति पिनष्टि वा 727
चौरात् बिभेति 608
चौरात् बिभेति त्रायते 607
चौरेभ्यो बिभेति उद्विजते वा 612
छत्रेण सह उपानहौ दधाति 403
छात्रस्य हसितम् 762, 756
छात्राणां छात्रेषु वा मैत्रः पटुः 839, 859
छात्रेणार्थं निर्णाययति 235
छेत्तुं सांप्रतं वृक्षः 50
जगतः कर्ता कृष्णः 736, 740
जगतः सृष्टिः 747
जगतामीशनम् 722
जगतामीष्टी 722
जगते प्रभुः भगवान् 555
जगते समर्थः शक्तो वा भगवान् 555
जगत् सृष्ट्वा 759
जगत् सृष्ट्वा हरिरास्ते 759
जग्मिर्युवा 760
जघ्निर्वृत्रम् 760
जज्ञिर्बीजम् 760
जटाभिस्तापसः 423, 424, 425, 426, 428, 429, 431, 432
जन्यज्ञानात् पूर्वो जीवः 666
जपमनु प्रावर्षत् 269, 270
जम्भारये कस्तिष्ठते 492
जलं द्रव्यत्ववत् न गन्धात् 695
जलं द्रव्यत्ववत् स्पर्शात् न तु गन्धात् 696
जलं द्रव्यत्ववत् स्पर्शात्, पृथिवी द्रव्यत्ववती गन्धात् 694
जलं द्रव्यत्वात् स्पर्शान्न गन्धात् 694
जलं पपिः 766
जलं विना निःस्नेहो गन्धो वा 698
जलपृथिव्योः जलं स्नेहवत् 842, 845
जलपृथिव्योः पृथिवी गन्धवती 858
जलस्य कर्पूरगन्धः 553
जलस्य शैत्यम् 360
जलादुद्गच्छति उन्मज्जति वा पद्मम् 591
जलादृते गन्धः 662
जलाशयेभ्यः उष्णोपगमः 527, 528
जले जलाद्वा विभजते 592

जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः 207
जाड्यात् जाड्येन वा बद्धः 683, 691, 697
जाड्यात् बद्धः 685
जातीपुष्पेण सह नीपपुष्पम् 397
जातौ सत्ता नास्ति 803
जातौ समवायेन सत्ता नास्ति 326, 327
जात्या ब्राह्मणः 354, 355, 361
जात्या सह व्यक्तिं घटत्वेन सह घटं वा जानाति 411
जात्या सह व्यक्तिः भासते 412
जात्या सह व्यक्तिमवगाहते बुद्धिः 412
जानपदं पन्थानं पृच्छति पथिकः 186, 187
जानाति 380, 310
जायाप्रतिग्राहितगन्धमाल्याम् 210, 222
जारजं न द्विजं मन्ये 558
जाराय निह्नुते 591
जाराय ह्नुते बन्धकी 490
जीवः कर्ता बुद्धेः 688
ज्ञानाय निमित्ताय 717
ज्ञाने घटत्वं भासते 787
ज्ञानेन निमित्तेन हरिः सेव्यः 717
ज्यायान् पुरस्क्रियते 547
तटाकादारात् वनम् 665
तण्डुलं पचति 110, 113, 160
तण्डुलं पचति न तु गगनम् 121
तण्डुलः पच्यते स्वयमेव 308
तण्डुलः पच्यते 50
तण्डुलपाकं करोति 229
तण्डुलमोदनं करोति 160
तण्डुलस्य पाकवान् 751
तण्डुलस्य पाचकतरः 751
तण्डुलानोदनं पचति 158, 160, 162, 165, 180
तण्डुलान् ओदनं पचति 181, 330
ततः परेण नायमनुवर्तते 719
ततः पश्चात् 718
ततः पश्चात् स्रंस्यते 720, 771
ततः प्रभृति संक्रान्तावुपरागादिपर्वसु 668
तत आरभ्य तां देवीमा दशम्याः प्रपूजयेत् 677
तत्रागारं धनपतिगृहादुत्तरेणास्मदीयम् 719
तदन्वये शुद्धिमति प्रसूतः 838
तदुत्तमाङ्गजैः समं चमर्येण तुलाभिलाषिणः 447
तन्तुभिः तन्तूनां मिलनेन वा पटः 441
तन्तुभ्यः पटः 642
तन्तुभ्यः पटो जायते 640
तपसि धूर्जटिः अयम् 811
तप्ते पयसि दध्यानयति 196
तरुं त्यजति खगः 92
तरुं पुष्पं चिनोति 188
तरुं पुष्पं चिनोति मालाकारः 188
तरोः पत्रं पतति 579
तरोः पत्रं पतति न पत्रात् 586
तरोः पत्रं विभजते 581
तरोस्त्यजति 589
तरौ फलं गच्छति शकुनिः 793
तव मम चान्तरा कमण्डलुः 259

तस्मात् स्थूलः कृशो वा 703
तस्मादयमधिकः 703
तस्मै पुरभिदे नमः 554
तस्मै पुरुषोत्तमाय नमः 849
तस्य परमाम्रेडितम् 662
तस्याः कुनखम् 771
तस्यामारभ्य तां देवीमा दशम्याः प्रपूजयेत् 673
तान्यक्ष्णा बधिराणि पन्नगकुलान्यष्टौ 421
तापायोशीरम् 527, 528
तिलानस्मै प्रतियच्छति 463
तिलेभ्यः प्रतियच्छति माषान् 680, 682
तिलेषु तैलमस्ति 805
तिलेषु तैलम् 776, 779, 781, 782
तिलैः सह माषान् वपति 379, 381
तिस्रः कोट्योऽर्धकोटी च तीर्थानां वायुरब्रवीत् 56
तीर्थस्य दयते 723
तीर्थात् प्रमाद्यति 604
तुरगमस्मै विक्रीणीते 463
तुरगो गच्छति 109
तुलां यदारोहति दन्तवाससा 768, 769
तुल्यः सदृशः समो वा कृष्णस्य कृष्णेन वा 768
तुल्यः सदृशः समो वा कृष्णेन कृष्णस्य वा 769
तृणं छिनत्ति 159, 162
तृणं स्पृशति 167
तृणाभ्यां मन्यते कामक्रोधौ यः पञ्च कारयन् 562
तृणाय त्वां मन्यते 559
तृणाय मत्वा रघुनन्दनस्तद्रक्षःप्रधानं प्रधनान्निरास्थत् 560, 562
तृणाय मत्वा रघुनन्दनोऽथ बाणेन रक्षः प्रधनान्निरस्थत् 559
तृणेन सह काष्ठेन पचति 401
तेजसा सूर्यः 363
तेजसोऽधिके क्षितिपाथसी 703
त्रस्तादश्वात् पतति 569
त्रस्तादश्वात् पतितः 568
त्वचा अस्पृशक 421
त्वया ज्ञातो घटः 756
त्वां मां चान्तरा अन्तरेण वा हरिरस्ति 261
त्वां शुने कीटाय वा मन्ये 560
दक्षिणा ग्रामात् 654, 669
दक्षिणाभिः सहेत्यहम् 398
दक्षिणाहि ग्रामात् 654, 669
दक्षिणेन ग्रामं ग्रामस्य वा 718, 720
दण्डं दधिः 766
दण्डं विना न घट उत्पद्यते 262
दण्डं विना न घटः 263
दण्डं विना न घटोत्पत्तिः 262
दण्डकावनतरून् सीतां याचते 177
दण्डमनु घटः 276, 283
दण्डात् घटो जायते 639
दण्डात् जायते घटः 638
दण्डात् दण्डेन दण्डं वा विना न घटः 699
दण्डेन घटः 432, 433, 435, 439, 441, 448
दण्डेन पुरुषः 423, 426
दण्डेन पुरुषमानय 429

दण्डेन सह चक्रेणोत्पद्यते घटः 391
ददिः 760
दधि घृतं मथ्नाति 194
दध्नः दुग्धं शरस्य शृङ्गं भस्मनः काष्ठं प्रकृतिः 642
दध्ना सह ओदनो भुज्यते 385
दध्नि सर्पिः 781, 782
दन्तयोर्हन्ति कुञ्जरम् 813, 820
दन्तिने नवबन्धः 527, 528
दरिद्रमनुयाचते 271
दर्शयति हरिं भक्तान् 207
दर्शेन पौर्णमासेन 448
दश शतान्यम्भोजसंवर्तिका 56
दस्युभ्यो रक्षति 607
दाने बलिः 811
दानेन कल्पतरुरयम् 363
दारैः क्रन्दयति 235
दासाय भक्ष्यं ददाति 463
दास्या संयच्छते 433
दास्या संयच्छते कामुकः 376, 433, 449
दाहाय मणिः 527
दाहाय मणिः 528
दिनं स्वपिति 290
दिवसं सुप्यते सुन्दरीभिः 202
दीनस्य दयते 723
दीनस्योपकुरुते कारुणिकः 724
दीनारमादाय मौक्तिकं ददाति वणिक् 473
दुःखात् बिभेति 612
दुःखेन धनम् 443
दुःखेन विद्या 443
दुःखेनाधीतम् 443
दुःखेनार्जितम् 443
दुग्धं दधि करोति 160
दुग्धात् दधि जायते 639
दुग्धात् दधि भवति 642
दुनोति चन्द्रात् पृथगप्यनङ्गः 658
दुह्यन्ते क्षीराणि 172
दूरं निकटं ग्रामस्य ग्रामाद्वा 719
दूरः पन्थाः 701
दूरमन्तिकं ग्रामस्य ग्रामात् 720
दूरादावसथान्मूत्रं दूरात् पादावनेजनम् 703
दूरादावसथान्मूत्रम् 701
दूराय पथे स्पृहयति 701
दूरेण तं परिहरन्ति सदैव रोगाः 701
देवदत्तं शतं मुष्णाति 194, 195
देवदत्तं हिरुक् 759
देवदत्तस्य गौः ब्राह्मणाय गेहात् गङ्गायां हस्तेन मया दीयते 145
देवदत्तात् जुगुप्सते 603
देवदत्ताय असूयति 511, 509
देवदत्ताय ईर्ष्यते 509
देवदत्ताय क्रुध्यति द्रुह्यति वा 509, 512
देवदत्ताय द्रुह्यति 509
देवदत्ताय द्रुह्यति यज्ञदत्त 510
देवदत्ताय निह्नुते 493
देवदत्ताय शतं धारयति 497, 499, 500
देवदत्ताय श्लाघते 491
देवदत्तायासूयति यज्ञदत्तः 510
देवदत्तायेर्ष्यति 511
देवना अक्षा 370
देवना अक्षा 371, 372, 373

देवाधिनाथेन सह क्षितीशो भृशं धराप्रीतिमसौ विधत्ते 407
दैत्यान् घातुकः 760, 762
दैत्यान् घातुको हरिः 759
दैत्यान् हतवान् विष्णुः 759
दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्तः 541
दैत्येभ्यो हरिरलं, प्रभुः समर्थः 543
दैवाद्विषं भुज्यते 465
द्रव्यं पटः 61
द्रव्यत्वेन गुणवान् 423
द्रव्यत्वेन सह धूमः 397
द्रव्यत्वेन साधर्म्यम् 362
द्रव्याणां क्षितिपाथसी रसवती 850
द्रव्यात् कर्मादिभ्यश्च भिद्यते गुणः 664
द्रव्यादन्यो गुणः 659
द्रव्येषु क्षितिपाथसी रसवती 849
द्रुतं गच्छति 94
द्रोणैः षोडशभिः खारी 362
द्रोणो व्रीहिः 37, 39, 40, 42, 44, 53, 65
द्वन्द्वः सामासिकस्य च 853
द्वन्द्वःसामासिकस्य 858
द्विजान् भोजयति 215
द्विजातीनां क्षत्रियः शूरतमः 858
द्विजाय गां प्रतिशृणोति 516
द्विजाय गां प्रतिशृणोति आशृणोति वा 516
द्वितीयाद्धि भयम् 611
द्विद्रोणेन त्रिद्रोणेन वा धान्यं क्रीणात्ययम् 367
द्विद्रोणेन धान्यं क्रीणाति 353, 358, 365, 368, 369
द्विद्रोणेन धान्यं, स्वर्णं माषेण क्रीणाति 367
द्विरहनि भुङ्क्ते 736
द्विरहन्यध्ययनम् 736
द्विरह्नो भोजनम् 736
द्वीपं सांयत्रिकं वहति नौः 197
द्वौ 39
धनं दुरधिकारिणि 807
धनपतिगृहादुत्तरेणास्मदीयम् 720
धनमन्तरेण न सुखम् 260, 261
धनात् विद्योतते विधुः 581
धनुषा विध्नाति 570
धनेन कुलम् 435, 443, 697
धनेन निमित्तेन वसति 718
धनेन सह गां लभते 391
धर्ममधर्मं वा शास्ति गुरुः 192
धर्ममर्थं वा ग्राहयति शिष्यम् 210
धर्मात् प्रमाद्यति 599, 601, 602, 604
धर्मादुत्पद्यते सुखम् 638
धर्माद्विरमति 601
धान्येन धनम् 354
धान्येन धनवान् 353, 368
धान्येन धनी 355, 361, 369
धायैरामोदमुत्तमम् 765, 747
धावतोऽश्वात् अश्ववारः पतति 574
धावतोऽश्वात् पतति 565, 568, 595
धिक् कृष्णाभक्तम् 242, 250
धिक् कृष्णाभक्तम् 244, 245, 247
धिक् क्रुद्धम् 245
धिक् पुत्रम् 243
धिक् लुब्धम् 245
धिक् शाक्यान् 244, 247

धिक् स्वस्तिवाचनिकान् 245
धिगध्ययनहीनं जनम् 245
धिगव्याधम् 245
धिगस्तु तृष्णातरलं भवन्मनः 244
धिगस्तु तृष्णातरलं भवन्मनः 247
धिङ् मूर्ख 244, 245
धिङ्माम् 244
धिङ्मूर्ख 247
धूमं विना वह्निः 698
धूमत्वेन वह्निव्याप्तिः 357
धूमस्य धूमत्वेन वह्निव्याप्तिः 363
धूमात् अग्निमान् 683, 688
धूमात् वह्निः 684
धूमादग्निमान् पर्वतः 688
धूमादृते वह्निः 662
धूमाद् वह्निमान् धूमेन वा 685
धूमे साध्ये वह्नौ हेतावार्द्रेन्धनमुपाधिः 808
धूमेन वह्निः 436, 439, 442, 443
धूमेन वह्निः 684
धूमेन वह्निमनमिनोति 438
धूमेन वह्निमनुमिनोति न घटेन 438
ध्रुवं दर्शयते भार्यां भार्यया वा पतिः 234
ध्वनन्तं शङ्खं शृणोति 108
न चैत्रस्येदम् 659
न तृणाय युवां मन्ये 559
न त्वं कीटो मतो मम 558, 560
न त्वा तृणाभ्यां मन्ये 559
न त्वां तृणं तृणाय वा मन्ये 561, 562
न त्वां तृणं मन्ये तृणाय वा 557
न त्वां तृणाय तृणं वा मन्ये 558, 559
न त्वां तृणाय मन्ये 558, 560, 561, 562
न त्वां नावं मन्ये 557
न त्वां शुने कीटाय वा मन्ये 562
न त्वां शुने मन्ये 563, 557
न त्वामन्नं काकं शृगालं वा मन्ये 564
नक्षत्राणामहं शशी 714, 858
नखानि कृन्तते तस्यै 771
नगरात् प्राक् अवाक् प्रत्यगुदग्वा क्रीडापर्वतः 667
नगरात् प्राचीन आरामः 667
नगरादुत्तरा उत्तराहि वा कासारः 667
नगराद् बहिः आरामः 668
नगराद्दक्षिणा दक्षिणाहि वा पर्वतः 667
नगराद्वनं गमयत्वरातीन् 532
नटात् नाट्यं शिक्षते 635
नदीं यावन्मम पुरम् 265
नदीं यावन्मम पुरम्, गृहं यावत् धनं तव 262
नदीमन्ववसिता सेना 270, 271
नमस्करोति देवान् 540, 541, 551
नमस्कुर्मो नृसिंहाय 533, 534, 536, 542
नमो हरये 546
नरः 44
नरकं पतति 101
नरकस्य जिष्णुः 761, 762
नरकात् पापाद्वा पितॄनुद्धरति 593
नरकात् पापाद्वा मुच्यते 593
नरकात् बिभेति 608, 612
नरकाय दीपदानम् 527, 528
नरकाय पापम् 526

नरपतये श्लाघते 490, 491
नराणां क्षत्रियः शूरः 840, 848, 850
नराणां क्षत्रियः शूरः नरेषु वा 847
नराणां क्षत्रियः शूरतमः 847
नराणां क्षत्रिये शौर्यम् 842, 846, 850
नराणां क्षत्रियेषु शौर्यम् 849
नराणां नरेषु वा क्षत्रियः शूरः 857
नराणां नरेषु वा क्षत्रियः शूरतमः 853, 854
नराणां नरेषु वा क्षत्रिये शौर्यम् 854
नराणां मध्ये क्षत्रियः शूरः 846, 858
नराणां मध्ये क्षत्रियः शूरतमः 853
नराणां विप्रः श्रेष्ठः 841
नरेभ्यः राक्षसाः शूरतमाः 847
नरेभ्यो राक्षसः शूरः 859
नरेषु क्षत्रियः शूरः 847
नरेषु शूरस्य क्षत्रियस्येदं राज्यम् 849
नलस्य पाको भीमस्य पाकः 754
नलोऽश्वहृदयवर्णायाक्षहृदयात् प्रतियच्छति 681
नश्यति 308, 310
नष्टेषु गोषु आगतः 827
नष्टेषु धार्तराष्ट्रेषु द्रौणिः सुप्तान् जघान 831
नाग्निस्तृप्यति काष्ठानां न पुंसां वामलोचना 71१
नान्तरिक्षे अग्निश्चेतव्यः 804
नाम्ना चन्द्रकल 352
नाम्ना चन्द्रमुखी 354
नाम्ना सुतीक्ष्णः 352, 353
नाम्ना सुतीक्ष्णश्चरितेन दान्तः 355, 361
नाययति वाहयति वा भारं भृत्येन 205
नारदाय रोचते कलहः 487, 488
नारायणो नमस्क्रियते 547
नावा सह नद्यां तिष्ठन्ति 391
निकषा लङ्काम् 242
निर्वाणेन सुगतमुपास्ते जाल्मः 441, 443
निर्वैरेण सह वैरायते 447
नीलः पटः घटो दण्डः 48
नीलो घटो जलपूर्णः 48
नृणां नृषु वा द्विजः श्रेष्ठः 841
नृणां नृषु वा ब्राह्मणः श्रेष्ठः 839, 859
नृणां मध्ये द्विजः श्रेष्ठः 842
नृपं हितं ब्रवीति 191
नृपमर्थं प्रार्थयते याचते भिक्षते 175
नृपस्य पश्चादुपविशामः 771
नृपात् गां प्रतिगृह्णाति 592
नृपेण गम्यते गमितो वा दिगन्तं शत्रुः 321
नेतव्याः व्रजं गावः कृष्णेन 765, 767
नेतव्याः व्रजं गावः कृष्णेन कृष्णस्य वा 767
नेता अश्वस्य सुद्युम्नस्य सुद्युम्नं वा 754
नेता अश्वस्य स्रुघ्नस्य स्रुघ्नं वा 736
नेत्राभ्यामन्धः 421
न्यायेऽवयवाः प्रतिज्ञादिकं वा 812
पक्तुं गच्छति 538
पक्वं भुङ्क्ते 62
पक्व ओदन 136
पक्वपूर्वी सूपान् 746
पक्वस्तण्डुलो देवदत्तेन 305
पचति 42, 308, 310
पञ्चकृत्वोऽह्नो भुङ्क्ते 729, 736

पञ्चकृत्वोऽह्नो भोजनम् 736
पञ्चकेन पशून् क्रीणाति 367
पञ्चभिः हलैः कर्षति गृही 313
पटः पटत्वेन सह भासते 383
पटत्वेन घटात् भिद्यते पटः 660
पटत्वेन घटो नास्ति 357, 363
पटस्य नीलिमा 714
पटाय तन्तवः 527, 528
पटाय यतते 535, 536
पटीयास्तन्तवः ओदनीयः पाकः 350
पटे कुविन्दोऽयम् 811
पटेन सह घटं साक्षात्करोति 411
पठत्सु तेषु प्रतिभूपतीनलं विनिद्र-रोमाजनि शृण्वती नलम् 832
पण्डितात् पुराणं शृणोति 634, 635
पतितैः सह न भुञ्जीत 404
पत्न्या सह पक्त्वा भुङ्क्ते ओदनं पतिः 395
पत्न्या सह यजते 392, 402
पत्न्या सहाग्निमादधीत 383
पत्ये शेते 451, 452, 453, 457, 465, 467, 479
पत्ये शेते प्रौढा वधूः 472, 473, 477
पथि गच्छति 786
पन्थानं पथिकं दर्शयति 235
पपिः 760
पपिः सोमं ददिर्गाः 760
पयतो वा सुवर्णं हरति 835
पयसामभिषेकः 714
पयो दोग्धि 167, 171
परमाणुं योगिधियं दर्शयति 211
परशुना छिनत्ति 342
परशुना छिनत्ति न दात्रेण 342, 351
परस्परस्मात् मेषावपसरतः 565, 569, 597
परस्वेभ्यः पाणिं निवारयति 619
परस्वेभ्यः पाणिं वारयति 622, 624
परामर्शेन अनुमिमीते 349
परामर्शेन अनुमीयते 347, 349
परि गृहात् गतः 671
परि त्रिगर्तेभ्यो वा वृष्टो देवः 672
परिगणिती याज्ञिके याज्ञिकं वा 795
परितः कृष्णं गोपाः 242
परितः कृष्णम् 249
परेभ्यः शरीरं वारयति 624
पर्यङ्कात् पीठे समुपविशति 589
पर्यङ्कादुपविशति पीठे 591
पर्यङ्के शेते 779
पर्वतात् पततोऽश्वात् पतति 566
पर्वते वह्निमिनुमिनोति आपादयति वा 812
पर्वतो धूमेन वह्निमान् 439
पर्वतो धूमेन वह्निमान् 684
पर्वतो वह्निमान् 685
पर्वतो वह्निमान् गुणवान् धूमात् द्रव्यत्वात् 694
पर्वतो वह्निमान् धूमात् 685, 690, 692, 695
पर्वतो वह्निमान् धूमात् धूमेन वा 686
पर्वतो वह्निमान् धूमात् न द्रव्यत्वात् 694
पर्वतो वह्निमान् धूमात् न द्रव्यत्वात् नापि महानसत्वात् 686
पशुना रुद्रं यजते 451, 459, 469, 524
पश्यति पश्यतो वा हरति 835
पाकस्य गृहम् 714
पाकाय व्रजति 537, 538, 539

पाकेन सौरभं माधुर्यं रक्तिमा वा क्षीरस्य 441
पाचकः पचति 108
पाचकात् पाकं शिक्षते 635
पाचयति 225, 309
पाचयति चैत्रेण मैत्रः 224, 307
पाचयति चैत्रो मैत्रेण 324, 326
पाचयत्योदनं सहायेन 216
पाटलिपुत्रे स्थितो राजा काश्यां ब्राह्मणेभ्यः प्रयच्छति 798
पाटलिपुत्रेभ्य आढ्यतरा माथुराः 702
पाटलिपुत्रेश्वरः विंशतौ योजनेषु विंशतेर्योजनेभ्यो वा काशीस्थाय ददाति 869
पाणिना कुणिः 420
पाणिभ्यां कुणिः 420
पाण्डवैः पाण्डवेभ्यः पाण्डवान् वा विना प्रीतिर्दुर्योधनस्य 699
पादेन खञ्जः 413, 415, 420
पान्थं पन्थानं पृच्छति 185
पापकर्म स्वस्य वारयति विद्वान् 627
पापात् जुगुप्सते 599, 603
पापात् जुगुप्सते विरमति 604
पापाद्विरमति निवर्तते वा 604
पापान्निवर्तते 602
पाषाणात् भेको भवति 642
पिकाद्वने शृणोति 635
पितरमभि परि प्रति अनु वा चैत्रः 277
पितुरधिको युधिष्ठिरः 703
पितृभ्यः श्राद्धं दद्यात् 455
पितृभ्यः स्वधा 460, 541, 546, 550
पितृभ्यो दद्यात् 467
पित्रा पितरं वा संजानीते 375, 432
पित्रा सह मातुः स्मरति 391
पित्रे पुत्रं शपते 493
पीठस्योपवेशनम् 714
पीठेन सह गृहे आस्ते 401
पुण्येन दृष्टो हरिः 432, 448
पुण्येन ब्रह्मवर्चसम् 433
पुण्येन स्वर्गं भुङ्क्ते 351
पुत्रं धर्ममनुशास्ति 191
पुत्रं विना गतः 264
पुत्रमक्षराणि जल्पयति 208
पुत्रमक्षराणि जल्पयति पिता 208
पुत्रमक्षराणि जल्पयति श्रावयति ग्राहयति दर्शयति वा 220
पुत्रमसूयति 507
पुत्रात् प्रमोदो जायते 637
पुत्रान् प्रीतिं प्रापयति 215
पुत्राय असूयति 507
पुत्राय ईक्षते 514
पुत्राय क्रुध्यति 507
पुत्राय राध्यति 514
पुत्रार्थं कन्यां याचते 179
पुत्रेण आगतः 384, 385
पुत्रेण मित्रमभिवादयति 235
पुत्रेण मित्रमाह्वाययति 235
पुत्रेण समं मित्राय दानम् 382
पुत्रेण सह आगच्छति 390, 392, 403, 447
पुत्रेण सह आगच्छति पिता 386
पुत्रेण सह आगतः 382
पुत्रेण सह आगतः आगच्छति वा 401

पुत्रेण सह आगतः पिता 377, 379, 380, 384, 385, 388, 390
पुत्रेण सह आगमनं पितुः 379
पुत्रेण सह ओदनं भुङ्क्ते 404
पुत्रेण सह गतं चैत्रेण 382
पुत्रेण सह गतिः 383
पुत्रेण सह गोमान् पिता 398, 399
पुत्रेण सह नागच्छति 388
पुत्रेण सह नागच्छत्ययम् 387
पुत्रेण सह पचति 404
पुत्रेण सह पितुः गौः 379
पुत्रेण सह यः स आगतः 380
पुत्रेण सह स्थूलः 379, 380, 383, 397, 381
पुत्रेण सह स्थूलः पिता 399
पुत्रेण सहागत्य तिष्ठति 390
पुत्रेण सहागमनं देवदत्तस्य 381
पुत्रैः सह मूर्च्छति शत्रुः 402
पुनर्वसुर्नक्षत्रमदितिर्देवता 57
पुनर्वसूनक्षत्रमदितिर्देवता 57
पुमान् देवदत्तः 65
पुरस्कृत्य शिखण्डिनम् 547
पुरा क्रूरस्य विसृपः 766
पुरा क्रूरस्य विसृपो विरप्सिन् 760, 762
पुरा वत्सानामपाकर्तोः 762, 766
पुरुषमनुदण्डः 284
पुरुषस्य दण्डः 714
पुरुषाणां राजा 714
पुरुषाराधनमृते 661, 669
पुष्पं जिघ्रति 108, 292
पुष्पं शिवाय नमः 549, 552, 553
पुष्पमिदं परमात्मने नमः 543
पुष्पमिदं विष्णवे नमः 543
पुष्पाणां स्पृहयति 501, 505
पुष्पेभ्यः आतपं वारयति 625, 628
पुष्पेभ्यः आतपं 624
पुष्पेभ्यः आतपं वारयति 622
पुष्पेभ्यः स्पृहयति 501, 502, 503, 504
पुष्येण पुष्ये वा क्षौरमस्य 445
पूजितो यः सुरासुरैः 756, 757
पूर्वं कायस्य 654, 667, 669
पूर्वेण ग्रामं ग्रामस्य वा 718
पूर्वो ग्रामात् 654, 655, 657
पूर्वो ग्रामात् तडागः 661
पूर्वो ग्रामाद्देशः 669
पृथग् रामेण रामात् रामं वा 697
पृथग् विना नाना रामं रामात् रामेण वा 698
पृथग्ग्रामात् रामेण रामम् 699
पृथिव्या गन्धः 360
पृथिव्यादीनां नवानां द्रव्यत्वेन गुणवत्त्वेन वा साधर्म्यम् 362
पृथिव्यामेव गन्धः 263
पौरवं गां याचते विप्रः 175
पौर्णमास्यां चन्द्रं ग्रसते राहुः 794
प्रकृत्या कृपणः 353
प्रकृत्या चारुः 352, 354, 355, 359, 368
प्रजाः शतं दण्डयति 182
प्रजापतये जुहोति 480, 483
प्रजाभ्यः स्वस्ति 541, 542, 550
प्रतिबिम्बते 320
प्रतियोगिना अभावे धर्मान्तरानुपनयनाच्च 425

प्रतियोगिना घटेनाभावः 425
प्रद्युम्नः कृष्णात् प्रति 680, 681, 682
प्रभाते गोष्ठे मध्याह्ने कच्छे गौः 808
प्रभासत आ गङ्गासागरात् मृदः 675
प्रभुर्बुभूषुर्भुवनत्रयस्य 541, 551, 556, 557
प्रयागात् प्रभृति आकाश्याः वृष्टो देवः 670
प्रयागादुत्तरं काशी 656
प्रसितः उत्सुकः हरिणा हरौ वा 860
प्रसितः उत्सुको वा हरिणा 445
प्रसितः उत्सुको वा हरिणा हरौ वा 861
प्रसितः उत्सुको वा हरौ 445
प्राक् ग्रामात् 720
प्राक् प्रत्यग्वा ग्रामात् 669, 654, 657
प्राक्केकयीतो भरतस्ततोऽभूत् 639
प्राणिनां प्राणिषु वा 857
प्रायेण याज्ञिकः 352, 353, 368
प्रासादात् प्रेक्षते 576, 648, 649, 653
प्रासादे आस्ते 62
प्रासोष्ट शत्रुघ्नमुदारचेष्टमेका सुमित्रा सह लक्ष्मणेन 386, 404
फलानां तृप्तः 707, 714, 715
फलेभ्यो गच्छति 535, 536
फलेभ्यो याति 533, 536
फलेभ्यो व्रजति 534
फल्गुन्यो माणविके 56
बन्धनान्निगडाद्वा मुच्यते 593
बभ्रिर्वज्रम् 760, 762
बर्हिर्जुहोति 110
बलिं याचते वसुधां हरिः 178
बहवः 39
बाहुलकं प्रकृतेस्तनुदृष्टेः 697
बिलात् सर्पोऽपसृतः 592
बुद्धौ चैतन्यं प्रतिबिम्बते 321
बुद्ध्या युक्तः 697
बुभुक्षितं न प्रतिभाति किंचित् 242, 247, 250
बुभुक्षुरोदनम् 760
बृहन्नलम् 44
बोधयति धर्मं माणवकम् 225
बोधयति धर्मं माणवकान् 218
ब्रह्मैनं व्याहारयति 225
ब्रह्मणः प्रजाः प्रजायन्ते 636, 638
ब्राह्मणस्य कुर्वन् 761, 762, 764
ब्राह्मणस्य दानम् 714
ब्राह्मणाय गां ददाति 151, 463, 466, 470, 474, 476
ब्राह्मणाय गौर्नमः 549, 552
ब्राह्मणाय ददाति 471
ब्राह्मणाय दधि 525, 527, 528
ब्राह्मणाय दधि तिष्ठति 528
ब्राह्मणाय दानं धनस्य 461
ब्राह्मणाय हितम् 530
ब्राह्मणाय हितम्, सुखं वा 533
ब्राह्मणेन दानं साधयति 342, 351
ब्राह्मणेन हतः पतति 56
ब्राह्मणेभ्यो नमो नित्यम् 543
ब्राह्मणेषु तरत्सु वृषला आसते 833
ब्राह्मणेष्वधीयमानेषु गतः 821, 834
ब्राह्मणेष्वधीयानेषु गतः 821, 823
ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति 833
भक्तस्य हरिः प्रभवति 759
भक्ताय धारयति मोक्षं हरिः 495
भक्तिः ज्ञानात्मना परिणमते 529

भक्तिः ज्ञानाय कल्पते 529
भक्तिः ज्ञानाय जायते 530
भक्तिर्ज्ञानाय जायते 529
भक्तिर्ज्ञानाय संपद्यते 530
भक्तो विष्णुं प्रति 274
भक्तो विष्णुं प्रति परि अनु वा 276
भक्तो हरिमभि 282
भक्तोऽयं विष्णुं प्रति परि अनु वा 278
भक्षयति बलीवर्दान् सस्यम् 106, 222
भक्षयत्यन्नं वटुना 206
भजे शम्भोश्चरणयोः 707
भयात् त्रायते 613
भयात् भेतव्यम् 612
भवत आसिका शायिका वा 747
भवता भवतो वा कटः कर्तव्यः 766
भवात् प्रभृति आरभ्य वा सेव्यो हरिः 654, 657, 668
भवात् प्रभृति सेव्यो हरिः 670
भवादारभ्य 657
भिक्षिता शतमखी 177
भिक्षिता शतमखी न सुकृतं यत् 177
भुक्तवत्सु च विप्रेषु पिण्डान् दर्भेषु निर्वपेत् 827
भुञ्जानस्य भुञ्जाने वा स्वर्णं हरति 835
भुवि गच्छति 790
भू सत्तायाम् 809
भूतलात् पातालाद्वा न पतति 588
भूतले घटः 786, 797, 797, 807
भूतले घटोऽस्ति 792
भूतले न घटः 659
भूतले पतति 100
भूतले वर्तते घटः 790
भूतले वसति 776
भूभृति वृक्षात् पर्णं पतति 798
भूमिं पतति 100
भूमिं शाखां कर्षति फलार्थी 198
भूमिः विहगेन गम्यत 104
भूमौ पतति 100
भृतकाय वेतनं ददाति 463
भेदिका देवदत्तस्य काष्ठानाम् 754
भेदिका बिभित्सा वा रुद्रस्य जगतः 752, 755
भेदिका रुद्रस्य जगतो बिभित्सा वा 753
भोक्तुं व्रजति 536
भोक्तू रुजति बहुभोजनम् 725
भोजको व्रजति 536
भोजयति मिष्टमतिथीन् 225
भ्रमस्य रजतम् 714
भ्रम्या घटं करोति 351
मगधान् विदेहानन्तरा गङ्गा 259, 260
मणिना दीप्यते 321
मत्सरः खलस्य 355, 360
मद्रं भद्रं कुशलं निरामयं सुखं शम् अर्थः प्रयोजनं हितं पथ्यं वा भूयात् 770
मद्रं भद्रं वा ब्राह्मणाय ब्राह्मणस्य वा भूयात् 771
मधुनो जानीते 722
मनसोऽभिरामः 359
मनोऽभिरामः नयनाभिरामः 354
मन्दं गच्छति 94
मन्दुराभ्यो हयान् रथे युनक्ति 592

मम मया वा सेव्यो हरिः 766
मया मम वा सेव्यो हरिः 765, 766
मया हरिः सेव्यते 308
मल्लात् मल्लोऽपयाति 664
मल्लाय प्रभुः समर्थः शक्तो वा मल्लः 555
मल्लो मल्लं गच्छति 114, 116
मशकनिवृत्तौ धूमं करोति 814
मशकाय धूमः 528
मशकेभ्यो धूमः 527, 528
महोल्कासंभवो राष्ट्रभङ्गाय 532
मांसभोजनं पुत्रस्य वारयति मुनिः 627
माणवकं धर्मं ब्रूते शास्ति वा 190
माणवकं पन्थानं पृच्छति 184, 185
माणवकं प्रतिभान्ति वेदाः 249, 251
माणवकं सूर्यं दर्शयत्याचार्यः 210
मातरं प्रति साधुः 277
मातरि साधुर्निपुणो वा 860, 861
मातुः स्मरणम् 706, 712, 722
मातुः स्मरति 705, 707, 715, 722
मातुः स्मृतम् 722
मातुरध्येति 722
मातुरध्येति स्मरति चिन्तयति वा 723
मातुरन्तर्धत्ते निलीयते वा 633
मातुर्निलीयते 630
मातुर्निलीयते कृष्णः 630, 631, 633
मातुर्निलीयते बालः 631, 632
मात्रा मातरं वा संजानीते 432
माथुराः पाटलीपुत्रेभ्यः आढ्यतराः 565, 859
माधवात् पूर्वो मधुः 661, 666, 667
माधवात् प्राक् मधुः 667
मार्दङ्गिकं कुण्डलि गायनं बृहन्नलम् 52
माषानस्मै तिलेभ्यः प्रतियच्छति 681
मास आस्यते 202, 203
मासं कल्याणी 287
मासं गुडधानाः 287
मासं रमणीया 241
मासं संवत्सरं वा आस्ते 203
मासंकल्याणी 288
मासमधीती 806
मासमधीती व्याकरणे 807
मासमधीते 240, 287, 288, 289, 291
मासमास्ते 200, 202, 203, 204, 240
मासश्चैत्रेण जीव्यते, जीवितः 202
मासेन अनुवाकोऽधीतः 375
मासेन यजते 448
मित्राय दूतं प्रेरयति 460
मित्राय द्रुह्यति 506, 507
मिथिलास्थो राजा पाटलिपुत्रे ब्राह्मणेभ्यो ददाति 791
मिथ्याज्ञानमा परमात्मनः 677
मुक्तये हरिं भजति 525, 528
मुखं प्रतिबिम्बते 320
मुखेन तुल्यं मुखं तस्याः 446
मुखेन त्रिलोचनः 413, 415, 416
मुखेन पूर्णेन्दुमुखस्त्रिलोचनः 416
मुखेन प्रतिबिम्ब्यते 321
मुद्‌गरेण नाश्यते घटः 322
मुद्रया सह कुण्डली देवदत्तः 398
मुनिमभि विकासमुपेयुषी विलोचने 276
मुरस्य मुरं वा द्विषन् 760, 761, 762

मूत्राय कल्पते संपद्यते जायते वा यवागूः 530
मूत्रेभ्यो यवागूः 530
मूले वृक्षः कपिसंयोग्यस्ति 783
मूले श्रवणे 862
मूले श्रवणे वा 862
मूलेन मूले वा देवीमावाहयेत् 863
मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् 446, 862
मृत् घटाय कल्पते संपद्यते जायते वा 532
मृत्तिकाभ्यो घटो जायते 639
मृत्पिण्डात् घटो जायते 639, 640
मृदं घटं करोति 155
मृदु पचति 253, 257
मेघाद्विद्युत्प्रभवतितराम् 646
मेषात् मेषोऽपसरति 595, 664
मैत्राय रोचते मोदकः 487
मैत्राय हितम् 531
मैत्रेषु दृष्टचरेषु पश्यति 827
मोक्षे इच्छा अस्ति 775, 776, 794, 805
मोदकेन स्वद्यते रुच्यते 319
मोहाय तत्त्वज्ञानम् 528
मौक्तिकं विक्रीणीते राज्ञि नागरिके वा 367
यः पृथिव्यां तिष्ठन् पृथिवीमन्तरो यमयति 796
यजमानं सूक्तमनुवाकं वा श्रावयति 208
यजमानेन भोज्यते भोजितो वा पायसं ब्राह्मणः 322
यजेतेति वेदेन याग इष्टसाधनम् 440
यज्ञमनु प्रावर्षत् 269
यतो द्रव्यं गुणाः कर्म 639
यत् कर्तव्यं तदनया सह 384, 395, 402
यदग्नये च प्रजापतये च जुहोति 471, 475, 550, 552, 554
यदत्र मामधिकरिष्यति 866, 870
यदधीते तेन हेतुना तस्य हेतोर्वा वसति 444
यदादिशन्ति पूज्यपादाः 54
यन्मां प्रति परि वा तद्देहि 278
यवागुं जुहोति 376
यवाग्वा जुहोति 376
यवेभ्यो गां वर्जयति 627
यवेभ्यो गां वारयति 616, 617, 618, 620, 622, 622, 624
यशसा सह मूर्च्छति श्रीः 402
यशसा सह मूर्च्छतीह शत्रुः 402, 407
यशसा सह मूर्छति शत्रुः 392
यस्मिन् सर्वं प्रतिष्ठितम् 796
यस्मिन्नग्नौ पचेदन्नं तत्र होमो विधीयते 791, 809
यागाय याति 537, 540
यागेन स्वर्गः 441
याचमानः शिवं सुरान् 177
युद्धाय संनह्यते 452, 457, 469, 473
युद्धे संनह्यति 779
युधिष्ठिराय हितः कृष्णः 532
यूपं छिनत्ति 107
यूपाय दारु 525, 526, 528
यूयं गुरवः 56
यो मां प्रति स्यात् 279
योगेन स्वर्गं गच्छति 349

रक्तोपरागो युद्धाय 532
रघोरजोऽजायते 640
रजकस्य वस्त्रं ददाति 173, 452, 454, 469, 481
रजतत्वेन पुरोवर्तिनं जानाति इच्छति करोति द्वेष्टि 357, 364
रजतादधिकं हिरण्यम् 703
रजते शुक्तौ वा रजतत्वं जानाति 811
रणात् पराजयते 614, 615, 616
रणे साधुः 813
रथेन गम्यते 305, 317, 319
रथो गच्छति 108
रन्धनाय स्थाली 525, 527, 528
रसात् पृथक् 568
राजानं कनकं प्रार्थयते भिक्षुः 176
राजानं कनकं याचते भिक्षुः 175, 176, 177
राजानं कनकं याचते भिक्षुः राजा च भिक्षवे न प्रतिशृणोति 176
राज्ञः पुरुषः 705, 707, 712, 714
राज्ञां मतो बुद्धः पूजितो वा 755, 756
राज्ञा सह सेना आगच्छति 378, 381
राज्याच्चलितः 595
रामः परस्त्रीगमनात् विरतो निवृत्तो वा 604
रामात् अधीतः संदेशः 633
रामादृते न लक्ष्मणः 665
रामादृते भक्तिः प्रीतिर्वा न लक्ष्मणस्य 665
रामेण बाणेन हतो वाली 331
रामो रावणस्य कल्की म्लेच्छस्य हन्ता 50
रासभं विना घटः 263
रासभं विनापि घट उत्पद्यते 262
राहूपरागे स्नायात् 822, 824
रिपुणा सह मूर्च्छति यशः 403
रुदति रुदतो वा प्राव्राजीत् 835
रुद्रस्य बिभित्सा जगतः 754
रुद्रस्य भेदिका जगतः 754
रुध्यते गां व्रजः 184
रूपं न गच्छति 114
रूपं पश्यति 162
रूपवन्तं गच्छति 305
रूपे रूपत्वमस्ति 775
रूपेण रूपात् रूपं वा विना स्पर्शः 699
रूपेण सह रसः 397
रेणुकायै स्पृहयति गिरिजा 502
रोगस्य चौरज्वरः चौरसंतापो वा 725
रोगस्य चौरज्वरः चौरसंतापः 726
लक्षणस्वरूपप्रामाण्यादिभिरनुमाने निरूपणीयः 364
लक्ष्मीं हरिं प्रति परि अनु वा 278
लक्ष्मीः 44
लक्ष्मीः हरिं प्रति परि अनु वा 279, 284
लक्ष्मीर्हरिं प्रति 274, 278
लक्ष्म्याः कामुकः 760
लक्ष्म्याः कामुको हरिः 759, 762
लङ्कां निकषा समया वा हनिष्यति 251
लोकस्य कर्ता 762
लोके लोकाद्वा अधिको हरिः 864, 865, 869
वज्रं बभ्रिः 766
वज्रेण सह इन्द्रः 398

वणिग्गृहात् कनकं स्वगृहं हरति तस्करः 591
वणिजं हिरण्यं मुष्णाति 195
वनं कच्छं वा शुष्कगोमयानि चिनोति 189
वनस्य दूरे अन्तिके वा ग्रामः 805
वनस्य दूरेऽन्तिके वा 776
वनात् आरात् 662
वनात् ग्रमो योजनं योजने वा 650
वनात् ग्रामो योजनं योजने वा 654
वनादारात् ग्रामः 669
वने उपवसति 237, 241
वयं ब्रूमः 56
वर्णान् पदं वा जल्पति 208
वलयौ मित्राय कुण्डलाभ्यां प्रतियच्छति 681
वलाहकात् विद्युत् विद्योतते 595
वलाहकात् विद्योतते विद्युत् 567, 568, 572, 599
वलाहकाद्विद्योतते विद्युत् 649
वलिकायाः स्तम्भः 714
वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डस्य 644
वल्मीकादाविर्भवति प्रादुर्भवति वा शक्रधनुः 646
वषडग्नये 556
वषडिन्द्राय 541, 543, 551, 556, 557
वहति यः परितः कनकस्थलीः 197
वह्नावयःपिण्डेन धूमव्यभिचारः 357, 363
वह्निः पचति 108
वह्नित्वेन वह्निं जानामि 353
वह्निधूमयोः पर्वतेन सहभावः 357
वह्निना घर्मः 441
वह्निना दीप्यत 321
वह्निना पचति 349
वह्निना वह्नेः वह्निं वा पृथक् नाना वा जलम् 699
वह्निना वह्नेः वह्निं वा विना जलम् 699
वह्निना वह्नेः वह्निं वा विना न धूमः 699
वह्निना सह धूमसंयोगः 397
वह्निना सह धूमो भस्म वा 396
वह्निमनुमिनोमि आपादयामि 228
वह्नेः पटं रक्षति 613
वाजपेयेन यजनम् 354
वाजपेयेन यजेत 356, 362
वाताय कपिला तडित् 531
वाताय कपिला विद्युत् 350, 531
वाताय कपिला विद्युत् विद्योतते 533
वादिने असूयति 508, 509, 511
वादिनो वादिनि वा प्रतिभूः 838
वामे बहून् कुशान् 54
वायोर्जातः 639
वायौ रूपं नास्ति 326, 803
वायौ समवायेन रूपं नास्ति 327
वाराणसीं गामुकः 760
वारिदः सुखमाप्नोति सुखमक्षय्यमन्नदः 51
वाहयति रथं वाहान् सूतः 206
विकारयति चित्तं चित्तेन वा वसन्तः 234
विक्लिद्यन्ति तण्डुलाः 326
विचित्रा जगतः कृतिः हरेः हरिणा वा 753

विचित्रा सूत्रस्य कृतिः पणिनेः पाणिनिना वा 754
वित्तेशो यक्षरक्षसाम् 858
विद्यया यशः 443
विना वातं वृक्षः पतितः 264
विनायके विघ्नराजद्वैमातुरगणाधिपाः 809
विन्ध्यात् दक्षिणतः 720, 771
विपणेः पण्यभारं गृहं वहति 591
विप्राय ओदनः 525
विप्राय गां ददाति 455, 458, 459, 468, 473, 477, 479, 480, 481, 483
विप्राय गां प्रतिश्रृणोति आशृणोति वा 515, 516, 517, 519
विप्राय शतं धारयति 497
विप्राय हितम् 531
विप्रायान्नं निर्वपति 471, 475
विवादात् पराजयते 616
विवाहे नान्दीमुखं कुर्यात् 822
विवाहे नान्दीमुखं कुर्यात् राहूपरागे स्नायात् 824
विवाहे नान्दीमुखम् 824
विवाहे श्राद्धम् 818
विशाखानक्षत्रमिन्द्राग्नी देवता 57
विशाखे नक्षत्रमिन्द्राग्नी देवता 57
विश्वस्य गोप्ता भुवनस्य कर्ता 764
विषं भुङ्क्ते 157, 167
विषमनुक्रुध्यति 167
विषमेण गच्छति 357
विषमेणैति 353, 364
विषाद् बालं निवारयति 619
विषाय सुधा 527, 528
विष्णुं प्रति पर्यनु वा भक्तः 283
विष्णुना हता दैत्याः 759, 760
विहगः भूमिं गच्छति न तु स्वम् 115
विहगो भूमिं गच्छति 103
वीणायां शब्दः 791
वीरणं कटं करोति 162, 165
वृक्षं जलेन सिञ्चति 282
वृक्षं त्यजति 572
वृक्षं प्रति अभि परि अनु वा द्योतते विद्युत् 275
वृक्षं प्रति जलं सिञ्चति 282
वृक्षं प्रति परि अनु वा विद्योतते चन्द्रमाः 276
वृक्षं प्रति परि अनु वा विद्योतते विद्युत् 273, 274
वृक्षं फलानि अवचिनोति 188
वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति 279, 282, 284
वृक्षं वृक्षं प्रति सिञ्चति 274, 280, 281
वृक्षं वृक्षमभि परि प्रति अनु वा वायसाः 280
वृक्षमवचिनोति फलानि 187, 188
वृक्षस्य पर्णं पतति 597
वृक्षस्य शाखा 714
वृक्षाग्रे कपिसंयोगः 791
वृक्षाच्छाखां भूमिं कर्षति 591
वृक्षात् पतति गच्छति वा पत्रम् 591
वृक्षात् पतनं पत्रस्य न तु पत्रात् 588
वृक्षात् पतितः 575
वृक्षात् पत्रं पतति न तु पत्रात् 588
वृक्षात् पर्णं पतति 569, 571, 573, 577, 579, 594, 595
वृक्षात् पर्णं पतति, न स्वस्मात् 578

वृक्षात् पर्णम् 598
वृक्षात् पुष्पं चिनोति 592
वृक्षात् फलं त्यजति 572
वृक्षात् भूमिं पतति 569
वृक्षात् भूमिं पर्णं पतति 572
वृक्षात् वस्त्रं पतति 595
वृक्षात् विभजते 578, 590, 599
वृक्षात् विभजते पर्णम् 575
वृक्षात् स्पन्दते 576, 595
वृक्षात्पर्णं पतति 599
वृक्षादपैति 576
वृक्षाद्विभजते खगः 577
वृक्षाद्विभजते पत्रं वायुः 592
वृक्षाद्विभजते पर्णम् 572
वृक्षान्न पतति पर्णम् 578
वृक्षाय सेचकः 462
वृक्षायोदकं सिञ्चति 471, 475, 478, 484
वृक्षायोदकमासिञ्चति 459, 460, 465, 466, 467
वृक्षे शाखायां कपिसंयोगः 808
वृद्धो यूना तल्लक्षणश्चेदेव विशेषः 377
वेणुदलं वक्रं करोति 162, 165
वेदमधीते जैमिनिः 406
वेदमधीयन् 759, 760, 762
वेदाः प्रमाणम् 55, 56
वेदेन प्रवर्तते 442
वैकुण्ठमधिशेते हरिः 137, 235
वैकुण्ठमधिशेतेऽध्यास्तेऽधितिष्ठति वा हरिः 236
वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदर्भैः 807
वैपणिकात् मौक्तिकं क्रीणाति 367, 592
वैशम्पायनादधिको व्यासः 703
वैशम्पायनेन सह जैमिनिः वेदमधीते 405, 406
वैशम्पायनेन सह वेदं जैमिनिरधीते 406
वैश्याय शतं धारयति 496
व्याघ्रात् गां त्रायते 608, 610
व्याघ्रात् गां त्रायते रक्षति च 612
व्याघ्रात् बिभेति 607, 611
व्याघ्रात् बिभेति, त्रस्यति 606
व्याघ्रात् बिभेति, शत्रोः परित्रायते 606
व्याघ्रात् भयात् बिभेति 612
व्रजं गमी गामी वा 764
व्रजं गां रुणद्धि 183
व्रजं गां रुणद्धि गोपालः 184
व्रजं गामी 763
व्रजमवरुणद्धि गाम् 183
व्रीहीनवहन्ति 164, 167
व्रीहीन् प्रोक्षति 164, 167
शक्रपदेन सह स्वर्गात् पतति 391
शक्रादन्यो नहुषः 663
शक्रादितरः परो भिन्नो भेदवान् वा 664
शक्राय शपते 492
शक्राय शपते दुर्वासाः 493
शङ्खेन शब्दाययति 235
शतं जयति देवदत्तम् 192
शतं दायी 763
शतं दायी दायो वा 764
शतं धार्तराष्ट्राः 56
शतस्य दीव्यति 732

शतस्य पणनम् 728
शतस्य व्यवहरणं पणनं वा 728
शतस्य व्यवहरणम् 728
शतस्य व्यवहरते वा पणते वा 729
शतस्य शतं वा प्रतिदीव्यति 732, 733
शतात् बद्धः 682, 683
शतात् वियुज्यन्ते शुध्यन्ति वा दामिता 593
शतेन क्रीणाति 367
शतेन बन्धितः 682
शतेन वत्सान् पाययति पयः 449
शतेन विक्रीणीते 367
शतेन शताय वा क्रीतः 521, 524
शतेन शताय वा परिक्रीतो वृषः 522
शतेन शताय वा परिक्रीतो वृषभः 522, 523
शतेन शतेन वत्सान् पाययति पयः 433
शत्रवे क्रुध्यति 508, 512
शत्रवे द्रुह्यति 508
शत्रवेऽस्त्रं मुञ्चति 460
शत्रुं जघ्निः 766
शत्रुं महीं जयति 193
शत्रुं हिनस्ति 159, 162, 163, 164
शत्रूनगमयत् स्वर्गम् 204
शत्रून् पराजयते 614, 615, 616
शत्रून् प्रति धावति 278
शत्रोरभावे सुखम् 779
शब्दं शृणोति अनुभवति 229
शब्दात् पूर्वं गगनम् 666
शब्दानामनुशासनमाचार्यस्य आचार्येण वा 755
शब्दानामनुशासनमाचार्येण, आचार्यस्य वा 753, 754
शब्दानित्यताया मतम् 756
शब्दाययति देवदत्तेन 207
शब्दाययति सैनिकैः 222
शब्देन शृणोति 347
शम्भोर्भजे चरणयोः 715
शय्यामुपवसति 238
शरदि पुष्यन्ति पालाशाः 832
शरदि पुष्यन्ति सप्तच्छदाः 815, 832
शरीरमाद्यं खलु धर्मसाधनम् 858
शरीरस्य दक्षिणाहि तिलः 667
शरीरे चेष्टास्ति 775
शरेभ्यः शरीरं वारयति 622
शरैः शातितपत्रोऽयम् 345
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव 51
शशीयत्वेन शृङ्गो नास्ति 357, 363
शाकस्य भोजनं न सुधया सह 383
शाकेन सह पक्वौदनो भुज्यते 395
शाखया कपिसंयोगी वृक्षः 364
शास्त्रमधीते 406
शास्त्रस्य ज्ञाता 714
शास्त्रस्याधीतम् 756
शिखया परिव्राजको वर्तते 423
शिखरादुपत्यकायां क्रोशे क्रोशाद्वा पतति शिला 869
शिखी विनष्टः 48, 49
शिरसि वेदना 784
शिशवे शपते 490
शिशुः पयो धास्यति सागरैः सह 393, 408
शिष्यं धर्मं ब्रूते 191

शिष्यं धर्मं वदति वक्ति ब्रूते उपदिशति आचष्टे 191
शिष्यं धर्ममधर्मं वा शास्ति 192
शिष्यमीर्ष्यति 507
शिष्यान् पाठयति 215
शिष्याय ईर्ष्यति 507
शिष्याय चपेटां ददाति 476
शिष्येण सह आगतो गुरुः 388
शिष्येण सह उपाध्यायः सुन्दरः 384
शिष्येण सह उपाध्यायो ब्राह्मणः 384
शिष्यैः सह जटावन्तो मुनयः 400
शुक्तौ रजतं जानाति 795
शुक्तौ रजतत्वं जानाति 832
शुक्तौ रजतत्वं जानाति इच्छति वा 792
शूरमनुयुध्यते 271
शृङ्गाच्छरो वा जायते 642
शृङ्गात् धनुर्जायते 639
शृङ्गात् शरो जायते 641, 642
शृङ्गे हरिणं हन्ति 815
शैवालेन सह जलेन संयुज्यते बकः 412
शोभया प्रतिभायते प्रकाश्यते वा 319
श्यामाकमञ्जरीभिः सह कङ्गुमञ्जरी 403
श्यामेन घटः 431
श्रमेण यदुपार्जितम् 443
श्राद्धाय निगर्हते 452, 457, 473
श्रोत्रेण बधिरः 415, 421
श्वपचेभ्यो दातारं वारयति 622, 624
श्वपाकात् यवनो नीचः 702
श्वशुरात् जिह्रेति 648
स बाल आसीद्वपुषा चतुर्भुजः 416, 421
संकर्षणेन सह वासुदेवः 389
संपन्ना व्रीहयः 56
संपन्नो व्रीहिः 56
संपन्नौ व्रीहियवौ 56
संयोगो द्रव्यस्य 355, 360
संवाहकस्य चरणं ददाति 469
संशय्य कर्णादिषु तिष्ठते यः 490, 494
सकलकलं पुरं चन्द्रमण्डलमिव 394
सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव 409
सखे अपि सिञ्च, अपि स्तुहि शम्भुम् 286
सज्जनं पालकोऽवतरति 763
सज्जनं पालकोऽवतरिष्यति भविष्यति वा 764
सज्जनान् पालकोऽवतरति 764
सतः पालकोऽवतरति 763
सतां गतम् 705, 714, 715
सत्तावान् गुणत्वात् 685
सत्सु तरत्सु असन्त आसते 821
सत्सु तिष्ठत्सु असन्तस्तरन्ति 821
सदसोऽपसरति 581
सदसोऽपसरति निस्सरति अपगच्छति निर्गच्छति अपैति निरेति वा 592
सनकादिमनुष्येभ्यो हन्त 551
सपत्नीभिः सह कान्तस्य त्रस्यति 401
सपत्नीभ्य ईर्ष्यति 508
सपत्न्यै द्रुह्यति स्त्री 510

समया ग्रामम् 243
समया निकषा वा ग्रामम् 247
समवायसंयोगेन लौहित्यवत् स्फटिकशकलम् 362
समवायादभावाद्वा न पतति 588
समवायेन जातौ सत्ता नास्ति 803
समवायेन ध्वंसो नास्ति 357, 363
समवायेन नीलः पटः 363
समवायेन रूपवान् 357, 368
समवायेन लौहित्यवत् जपाकुसुमम् 362
समवायेन सह घटत्वं प्रतियोगितामवच्छिनत्ति 410
समेन एति 353, 357, 364, 368
सर्पः मूलदेशादग्रदेशं गच्छति 134
सर्पाद्वारयति 629
सर्पिष ईष्टे 723
सर्पिष ईशनम् 722
सर्पिषः ज्ञानम् 706
सर्पिषो जानीते 705, 715, 721, 722
सर्पिषो ज्ञानम् 721, 712
सर्पिषो दयते 722
सर्पिषो दयनम् 722
सर्पिषो नाथते 726
सर्पिषो नाथनम् 726, 727
सर्पिषो मधुनो वा दयते 723
सर्पिषोऽपि स्यात् 285
सर्पो वृक्षं गच्छति 134
सर्वतः कृष्णं गोपाः 242, 244, 247, 249
सर्वपापैः स मुच्यते 593
सर्वस्मिन् आत्मास्ति 775, 805
सह दिवसनिशाभ्यां दीर्घाः श्वासदण्डाः 400
सह दिवसैः दीर्घाश्वासदण्डाः 390
सह पत्न्या पतिः 390
सह रूपेण रसः 389
सहस्रं भानोः कराः 56
सहैव दशभिः पुत्रैः भारं वहति गर्दभी 378, 380, 384, 388, 389
सहैव पुत्रैर्दशभिर्भारं वहति गर्दभी 397
सांकाश्यानां पाटपुत्रकाणां च पाटलिपुत्रका अभिरूपतमा इति 843
साधुः कृष्णो मातरि 812
साधुः कृष्णो मातरि, असाधुर्मातुले 812
साध्यवद्भिन्ने यः साध्याभावः 791
सार्थात् हीयते 570
सार्थात् हीयते पाशुः 598
साहस्रेण पशून् क्रीणाति 367
सिंहो माणवकः 37, 38
सीम्नि पुष्कलको हतः 813, 820
सुकरः प्रपञ्चो हरिणा 762
सुखं कर्तुम् 759
सुखं स्वपिति 253, 255
सुखवन्तमात्मनमिच्छति 108
सुखहेतुं चेष्टते चेतते यतते वा 253
सुखहेतुं पचति 251
सुखाय पुण्यम् 526
सुखायालं समर्थो योग्यं वा भोजनम् 544
सुखेन दुःखेन वा याति 353
सुखेन याति 368, 369
सुतान् स्नापयति 215

सुधां क्षीरनिधिं मथ्नाति 193
सुधां समुद्रं मथ्नाति 193
सुरभि चन्दनं जिघ्रति 108
सुरभिचन्दनमाघ्रातम् 48
सुवर्णं कुण्डलं करोति 155, 157
सूपेन सह ओदनं पुत्रेण सह पचति पिता 404
सूपेन साकं भुक्तः 382
सूर्यं दर्शयते माणवकेन माणवकं वा आचार्यः 213
सूर्याय अर्घ्यं ददाति 454
सेतुं कारयति वानरैर्वानरा वा रामः 213
सोमं पवमानः 759, 760, 762
स्तोकं पचति 61, 248, 251, 252, 253, 254, 255
स्तोकं मैत्रस्य गते तिष्ठति 827
स्तोकं स्यन्दते 252
स्तोकाद्दते पचति 662
स्तोकेन विषेण हतः 700
स्तोकेन स्तोकाद्वा मुक्तः 700
स्तौति शाक्यान् धिक् 286
स्त्र्यधिकारात् परेण वासरूपविधिर्न 719
स्थलीमधिशेते 240
स्थल्याः अधिशयिता 240
स्थाली पचति 303, 308
स्थाल्यां तण्डुलं न पचति 804
स्थाल्यां तण्डुलं पचति 716
स्थाल्यां पचति 776, 777
स्थाल्यां पचति तण्डुलान् 775
स्थाल्याः पुलाकमुद्धरति 581
स्थाल्या ओदनमुद्धरति 591
स्थाल्या पचति 330, 351
स्थाल्यामोदनं पचति 783, 786, 791, 794
स्थाल्यामोदनं पचति चैत्रः 793
स्फटिकलौहित्ये जपाकुसुममुपाधिः 808
स्फटिकस्य जपालौहित्यम् 553
स्फटिके जपालौहित्यम् 807
स्फटिके लौहित्ये जपाकुसुममुपाधिः 808
स्फुटोपमं भूतिसितेन शम्भुना 447, 768, 769
स्मारयति घ्रापयति देवदत्तेन 207
स्मारयत्येनं वनगुल्मः स्वयमेव 209, 221
स्रजं करोति 158
स्वगृहं परधनं हरति तस्करः 198, 199
स्वभावेन सरलः 353
स्वयंभुवे नमस्कृत्य 535, 548, 551, 557
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् 610
स्वस्ति गोभ्यो भूयात् 541, 556
स्वस्ति प्रजाभ्यः 544, 554
स्वस्ति ब्राह्मणेभ्यो भूयात् 542, 556
स्वस्ति भवते 548
स्वस्त्यस्तु गोभ्यः 542
स्वस्त्यस्तु प्रजाभ्यः 544
स्वाङ्गात् बाणं वारयति 620
स्वात्मसाक्षात्कारस्योपकरोति 724
हंसीव धवला कीर्तिः 51
हन्तुः पृष्ठं ददाति 469
हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति 505

हरये क्रुध्यति द्रुह्यति ईर्ष्यति असूयति वा 506
हरये नमः 540, 541, 557
हरये रोचते भक्तिः 485, 486
हरिं दिदृक्षुः अलंकरिष्णुर्वा 758
हरिं परि 670
हरिणां हरिषु वा शत्रुः सुरश्रेष्ठः 858
हरिणाय वागुरा 527, 528
हरिमभि वर्तते 284
हविरग्नये स्वाहा 550
हस्तेन रुणद्धि 343
हा कृष्णा भक्तम् 242
हा कृष्णाभक्तम् 242, 247, 250
हा पितः क्वासि हे सुभ्रु 243
हा पुत्रम् 243
हा राम हा देवर तात मातः 251
हा साधून् 249, 251
हारयति कारयति दर्शयतेऽभिवादयते पिता पुत्रेण पुत्रं वा 234
हारयति कारयति वा पटं कुविन्देन 234
हारयति भारं भृत्येन भृत्यं वा प्रभुः 213
हिमवतो गङ्गा प्रभवति 643, 644, 645, 646, 647
हिमानां गिरिः 714
हिरण्येन सह गां पुत्रेण सह लभते पिता 403
हिरण्येन सह गां लभते 401, 402
हृदयस्य हारः 714
हृदयाय नमः 556
ह्रदे वह्निर्नास्ति 803
होत्रे प्रतिगृणाति 519
होत्रे प्रतिगृणात्यनुगृणाति वा अध्वर्युः 520
होत्रेऽनुगृणाति प्रतिगृणाति वा 520
ह्रदे वह्निर्नास्ति 324, 326, 327

विवृतानां पदानां सूची

अकर्मकत्वम् 91
अग्निप्रक्षेपः 101
अतदावेशः 566, 580, 582
अतिशयः 335, 338
अत्यन्तसंयोगः 287, 289, 376
अधःपदार्थः 245
अधमर्णः 495, 496
अधमर्णत्वम् 498, 499
अधस्सन्तापनम् 786
अधिकरणत्वम् 785, 786
अधिकरणम् 330
अधिकरणम् 786, 787
अधिकरणम् 775, 777
अधिकारः 782
अधिपूर्वकरोहतेरर्थः 591
अधिशब्दार्थः 245
अधीङोऽर्थः 405, 406, 634
अधीते 634
अध्यवसायः 457
अनिराकर्तृसंप्रदानम् 467
अनिष्टम् 610, 611
अनुगृणोतेरर्थः 519,520
अनुमिनोतेरर्थः 230
अनुयुक्तत्वम् 712
अनुशब्दार्थः 269
अनुशब्दार्थः 270, 271
अनुशासनम् 191
अन्तरापदार्थः 259
अन्तरेणशब्दार्थः 261
अन्तर्धिः 630, 631, 632
अन्यशब्दार्थः 663
अन्वयित्वम् 382
अपकारकत्वम् 527
अपपूर्वकचिधात्वर्थः 187
अपवर्गः 374
अपसरणम् 569
अपसरत्यर्थः 592
अपादानत्वम् 566, 573, 575, 577, 579, 594
अपादानम् 565, 568, 574
अपायः 565, 568, 580, 594
अपेक्षितक्रियम् 568
अप्रमत्तकर्तृत्वम् 861
अप्राधान्यम् 378, 380
अभिनिपूर्वकविशधातोरर्थः २३६
अभिलषतेरर्थः 486
अभिविधिः 678
अभिव्यापकः 775
अभिव्यापकम् 777, 779, 781, 805
अभेदः 779
अभ्युपगमः 175
अर्चा 861
अर्थनियमः 230, 233
अवच्छिन्नत्वम् 325
अवधित्वम् 565, 574, 583
अवधिमत्त्वम् 575
अवधिमात्रम् 567

अवरुधेरर्थः 183
अशक्तिः 127
अशिष्टः 433
असूया 509, 510, 511, 512
आकाङ्क्षात्वम् 95
आख्याता 633
आख्यानम् 634
आङ्पूर्वकयाधात्वर्थः 570
आङ्पूर्वकरोहतेरर्थः 591
आधारत्वम् 776
आधेयत्वम् 786
आप्तिः 502
आयुक्तः 838
आयुष्यम् 770
आरभ्यशब्दार्थः 677
आरम्भः 557
आराच्छब्दार्थः 654
आरादुपकारकम् 338
आरोहतेरर्थः 209
आवरणम् 227
आवरणम् 229
आशासनम् 726
आशृणोतेरर्थः 516
आसेवा 838
आस्थितः 564
इच्छतेरर्थः 230, 778
इत्थंभूतः 373
इत्थंभूतलक्षणम् 422
ईक्षते 513
ईक्षतेरर्थः 513
ईप्सा 502
ईप्सितत्वम् 502
ईर्ष्यतेरर्थः 509
ईर्ष्या 505, 506, 509
उच्चारणम् 405, 634
उत्कटत्वम् 488
उत्तमर्णः 495, 499
उत्तमर्णत्वम् 498, 499, 500
उत्पत्तिः 167
उत्पद्यतेरर्थः 638
उत्पातः 530
उत्पादः 638
उदासीनम् 565, 579
उद्देश्यत्वम् 453
उद्धरतेरर्थः 591, 592
उपकरणम् 724
उपकारकत्वम् 527
उपकारकम् 329
उपकुर्वत् 793
उपचयः 475
उपदेशः 192
उपलक्षणम् 423, 424, 425, 426
उपवासः 238
उपविशतेरर्थः 591
उपश्लेषः 779, 805
उपहितम् 318, 347
उपात्तविषयम् 568
उपेक्षा 463
ऋणत्वम् 680
ऋणम् 495, 497, 499
ऋतेशब्दार्थः 259, 655, 662
औपश्लेषिकः 775, 782
करणत्वम् 339, 340, 341, 343, 350
करणम् 330, 332, 334, 335, 336, 337, 343, 344, 347, 348

करोतेरर्थः 230
कर्ता 230, 303, 305
कर्तृत्वम् 87, 216, 304, 308, 309, 310, 311, 324
कर्तृरूपम् 318
कर्तृव्यापारविषयत्वम् 342
कर्त्रभिप्रेतत्वम् 463
कर्म 142, 167, 230, 227
कर्मता 170
कर्मत्वम् 87, 94, 99, 148, 150, 201, 227, 229, 240,464
कर्मत्ववता संबन्धः 464
कल्पनम् 530
काणः 416, 419, 422
कारकत्वम् 18, 19, 20, 22, 24, 26, 28
कारकम् 15, 16, 26, 34
कारकविभक्तित्वम् 378
कालगतमर्यादात्वम् 670
कालनिष्ठं सीमात्वम् 265, 673
किंशब्दार्थः 444
कुणिः 420
कृतपूर्वी 737, 739, 745, 746
कृतिः 192
कृषेरर्थः 198
कृषेरर्थः 591
क्रयः 592
क्रयकर्मत्वम् 358
क्रिया 54, 230
क्रियाकर्मत्वम् 151, 463
क्रियाक्ता 746
क्रियानाश्रयत्वम् 596
क्रियार्था क्रिया 533
क्रुधेरर्थः 506
क्रोधः 512
क्लीबत्वम् 52
क्षरणम् 169
क्षेमः 600
खञ्जः 413, 416, 420
गतत्वम् 623
गर्गः 513
गुणत्वम् 685, 697
ग्रहणम् 181
ग्रामसंस्कारः 452
चपेटः 452, 476
चरितार्थत्वम् 355
चारुशब्दार्थः 354
चिधात्वर्थः 187
चिनोतेरर्थः 188, 189
चिनोत्यर्थः 592
जयतेरर्थः 192, 193
जल्पतेरर्थः 208
जानातेरर्थः 230
जानात्यर्थः 228
जिज्ञासा 444
जुगुप्सते 599
जुगुप्सतेरर्थः 600
ज्ञाधातोरर्थः 230
ज्ञाधात्वर्थः 228
ज्ञानप्रयोज्यत्वम् 686
ज्ञीप्स्यमानः 491
णीञ्-धात्वर्थः 195
तत्तद्धातुकर्मत्वम् 95
तत्तद्धात्वर्थः 138
तत्तद्धात्वर्थकर्मत्वम् 86

तत्पर्यन्तत्वम् 265
तत्प्रथमत्वम् 645
तदभिव्याप्तत्वम् 265
तद्धात्वर्थकर्तृत्वम् 310
तादर्थ्यम् 525, 527
तिङः 7
तिष्ठतेरर्थः 490, 494
तुमर्थाः 538
तुमुनर्थः 536
त्यागः 182, 470, 541, 544, 545, 555, 735
त्यागाङ्गत्वम् 454
त्राणम् 607, 608, 609, 610
दण्डधात्वर्थः 181, 182
ददातेरर्थः 461
ददात्यर्थः 463, 469, 475, 476
दाधातोरर्थः 469
दाधात्वर्थः 455, 458, 481
दानम् 176, 366, 452, 463
दानरूपक्रियासंप्रदानत्वम् 468
दायादः 836, 837
दीप्यतेरर्थः 321
दुहेरर्थः 168, 169, 172, 173
दूरत्वम् 665
दृशधात्वर्थः 448
दृशेरर्थः 211, 230
देवता 549
देवतात्वम् 549
देशगतमर्यादात्वम् 670
दैवम् 514
दोहनम् 170
द्युतधात्वर्थः 567
द्युतेरर्थः 599
द्यूतम् 729
द्रुहेरर्थः 508, 509, 511
द्रोहः 512
द्विद्रोणत्वम् 365
द्विद्रोणम् 358
द्विषेरर्थः 230
धात्वर्थः 303
धारणम् 496
धारयतेरर्थः 498, 499
धिक्शब्दार्थः 244, 245
धिगर्थः 245
धृङ्-धातोरर्थः 496
ध्रुवत्वम् 582
ध्रुवम् 565, 568, 574, 595
नतिः 543, 546, 550
नमःपदार्थः 541, 549, 551, 552
नमस्कारः 211
नयतेरर्थः 196, 197, 591
नाथतेरर्थः 726
निन्दा 600, 601
निपुणः 861
निमित्तत्वम् 813
निरूढलक्षणा 232
निरूपकम् 410
निर्दिष्टविषयम् 568
निर्धारणम् 702, 839, 840, 841, 844, 850
निर्वर्त्यम् 154, 155, 156, 158, 162, 163, 166
निलीयतेरर्थः 631, 632, 633
निवारणम् 619
निह्नुतिः 493

पचधात्वर्थः 180
पचेरर्थः 180, 181, 316
पणनम् 728
पतधात्वर्थः 591, 594
परकीयत्वम् 573
परसमवेतत्वम् 66, 78
पराजेरर्थः 614, 615
परायत्तीकरणम् 469
परार्थत्वम् 708
परिक्रयः 522, 523
परिक्रयणम् 521, 523
परिचायकत्वम् 275
परिचेयत्वम् 275
परिच्छिन्नत्वम् 358
परिमाणम् 42, 44, 53
पितृत्वम् 555
पुंस्त्वम् 52
पुराणम् 635
पुष्टिः 475
पृच्छतेरर्थः 185, 186, 187
पच्छा 185
प्रकाशः 644, 645
प्रकृतिः 3, 4, 352, 360, 638, 641
प्रकृतिकर्म 155, 156
प्रकृतित्वम् 640, 641
प्रकृष्टम् 330
प्रच्छेरर्थः 184, 185
प्रतिक्रिया 724
प्रतिगृणातेरर्थः 519
प्रतिग्रहः 366, 455, 592
प्रतिघातः 320
प्रतिदानम् 680, 681, 682
प्रतिद्वन्द्वित्वम् 405
प्रतिनिधिः 680, 681, 682
प्रतिबिम्बः 320, 321
प्रतिभा 247
प्रतिभूः 837
प्रतियत्नः 723
प्रतियुक्तत्वम् 712
प्रतिशृणोतेरर्थः 516, 517
प्रतिश्रवः 175
प्रतिषेधः 620, 622
प्रतिष्ठा 350
प्रत्ययः 4, 6, 12
प्रत्ययत्वम् 12
प्रत्ययनियमः 231, 233
प्रथमत्वम् 645
प्रथमा 40
प्रथमार्थः 43
प्रधानकर्मत्वम् 175
प्रभवः 643
प्रभवत्यर्थः 645
प्रभवनम् 644
प्रमाणम् 338
प्रमाद्यति 601, 604
प्रवृत्तिविघातः 617
प्रसूतः 838
प्रातिपदिकार्थः 44, 58
प्राधान्यम् 303
प्रापणम् 196
प्राप्तिः 167, 260
प्राप्यम् 154, 155, 156, 158, 162, 163, 166
प्रायः 352, 368
प्रार्थना 557

प्रीतिः 488, 861
प्रीयमाणः 485, 486, 488
प्रोत्साहनम् 519
फलत्वम् 108, 227
फलम् 230
फलायोगव्यवच्छिन्नम् 344
फलेनोपहितः 347
फलोपधानम् 578
फलोपधायकम् 344
बधिरः 415
ब्राह्मणम् 733
ब्रुवेरर्थः 191
ब्रूञोऽर्थः 190
भयम् 607, 608, 609, 610, 611
भवनम् 645
भाववचनाः 538
भुक्तम् 758
भुग्नत्वम् 163
मथ्नातेरर्थः 193, 194
मर्यादापदार्थः 670, 671
मुख्यकर्तृत्वम् 328
मुच्यतेरर्थः 593
मुञ्चतेरर्थः 593
मुषेरर्थः 194, 195
मुष्णातेरर्थः 195
मोचनम् 169
याचतेरर्थः 176, 177, 178
याचत्यर्थः 175
याचेरर्थः 175, 178, 179
यावत्पदार्थः 265, 266
यावद्भ्रमभिन्नत्वम् 685
युजेरर्थः 592
राधेरर्थः 514
राध्यति 513
रुचधात्वर्थः 486
रुचिः 486, 488
रुचेरर्थः 486
रुधेरर्थः 183, 184
लक्षणत्वम् 268, 274, 423
लक्षणम् 423
लक्ष्यत्वम् 269
लक्ष्यत्वम् 274
लज्जेरर्थः 107
लयः 722
लिङ्गम् 43
लीयतेरर्थः 631
वचनम् 44, 53
वदप्रभृतिधात्वर्थः 191
वलाहकः 567, 572
वषट् 551, 556
वषट्-पदार्थः 551
वसतेरर्थः 237
वहेरर्थः 198
वामनः 415
वारणम् 616, 619, 620
वारयत्यर्थः 617, 618, 619, 622, 624, 625
विकरणाक्तम् 310
विकार्यम् 154, 155, 156, 158, 159, 162, 163, 166
विक्रयः 456
विक्लित्तिः 180
विनापदार्थः 263, 264
विनार्थः 699
विपूर्वकद्युतधात्वर्थः 572

विप्रश्नः 513, 514
विभक्तम् 859
विभक्तिः 7
विभक्तित्वम् 8
विभजतेरर्थः 592
विभागः 702
विरमतेरर्थः 600, 601, 602
विरहोद्देश्यकत्वम् 631
विशेषणम् 425, 426, 427, 428
वैज्ञानिकमाधेयत्वम् 795
वैषयिकः 775
वैषयिकम् 777, 779, 781, 805
व्यधधातोरर्थः 570
व्याक्रिया 534
व्यापकत्वम् 289
व्यापारसान्तरः 347
व्यापारः 350
व्याप्यमानत्वम् 479
व्यावृत्तत्वम् 844
शंसनम् 519
शतं दायी 763
शपेरर्थः 490, 491, 493
शयतेरर्थः 321
शासनम् 182
शासेरर्थः 190
शास्तेरर्थः 192
शेषः 705
शेषत्वम् 713
शेषित्वम् 451, 453
शोकः 219
श्लाघधातोरर्थः 489, 490
श्लाघा 494
श्लाघेरर्थः 490
षूङोऽर्थः 405
संचारविरोधित्वम् 184
संज्ञानम् 375
संदर्शनम् 457
संनिपत्योपकारकम् 338
संपत्तिः 529, 530
संप्रदानत्वम् 151, 456, 458, 459, 461, 463, 465, 466, 468, 479, 480, 482, 484, 485
संप्रदानम् 451, 452, 453, 455, 460, 481
संबन्धः 708
संबन्धत्वम् 711
संसृष्टः 456
संस्कारः 167
संस्कार्यम् 167
सकर्मकत्वम् 91, 95, 106
सहशब्दार्थः 379, 382, 383, 384, 385, 387, 389, 390, 392, 395, 396, 397, 399, 400, 401, 402, 404, 411, 412
सांप्रतिकी लक्षणा 232
साक्षी 837
साधकतमत्वम् 348, 350
साधकतमम् 329, 334, 338
साध्यत्वम् 582
सामर्थ्यम् 861
सामीप्यम् 246, 665
साहित्यम् 271, 379, 381, 382, 384
सुपः 8
स्तुतिः 489
स्त्रीत्वम् 52
स्थाधात्वर्थः 490
स्थानिनः 469

स्थानी 533
स्पृहधातोरर्थः 502
स्यन्दनत्वम् 172
स्वतन्त्रकर्तृप्रेरणा 216
स्वतन्त्रत्वम् 312, 453
स्वत्वम् 456
स्वधाशब्दार्थः 543, 550
स्वस्तिशब्दार्थः 548
स्वस्वामिभावः 708
स्वातन्त्र्यम् 303, 318, 319
स्वाहाशब्दार्थः 543, 546, 550
स्वीकारः 179, 463, 480
हन्तशब्दार्थः 556
हरतेरर्थः 199, 591
हाशब्दार्थः 251
हितम् 530, 531
हिरुक् 759
हुधातोरर्थः 550
हेतुः 433
हेतुत्वम् 269, 432, 435, 439, 685
हेतुमत्त्वम् 439
ह्नुतेरर्थः 490
ह्नुधात्वर्थः 490, 491
ह्नुवनम् 494

ŚĀBDABODHAMĪMĀṂSĀ

Part II - Case Terminations and Their Significance

Under the project entitled *An Inquiry into Indian Theories of Verbal Cognition* consisting of four volumes, the present one is the second in the series. It deals with the significance of the nominal case terminations. In this volume, Professor Ramanuja Tatacharya offers a profound and well-organized account of the views of the Naiyāyikas, Vaiyākaraṇas and the Mīmāṃsakas in regard to this subject. Clearness of thought, soundness of reasoning, and freedom from bias underlie the presentation of the view points of the authors of these schools of thought.

Professor Ramanuja Tatacharya is one of the senior authorities in the fields of *Nyāya, Vyākaraṇa, Pūrvamīmāṃsā* and *Uttaramīmāṃsā*. Since retiring as Vice-Chancellor of the Rashtriya Sanskrit Vidyapeetha of Tirupati, he has been associated with the French Institute of Pondicherry as Honorary Professor.

Professor Ramanuja Tatacharya has published commentaries on the higher texts of *Nyāya* such as the *Nīlakaṇṭhaprakāśikā*, the *Gādādharī* on the *Pañcalakṣaṇī, Caturdaśalakṣaṇī, Pakṣatā*, and *Avayava*. His commentary on the *Muktāvalīdinakarī* is awaiting publication. His work entitled *Pratyakṣatattvacintāmaṇivimarśa* is an interpretative exposition of the *Pratyakṣakhaṇḍa* of the *Tattvacintāmaṇi* of *Gaṅgeśa*. He has critically edited and commented on the *Pratyakṣakhaṇḍa* and the *Anumānakhaṇḍa* of that work. In the field of *Vyākaraṇa* he made a critical edition of the *Jñāpakasaṅgraha* of *Nāgeśa* with his commentary, the *Vivṛti*. He has also written an independent work entitled the *Jñāpakasaṅgrahapariśiṣṭa*, with an auto commentary. His commentary on the *Gopālasahasranāmastotra* entitled the *Bhagavadguṇaratnapeṭikā* may best be characterized as a *bhāṣya* thereon.

In recognition of Professor Ramanuja Tatacharya's profound scholarship, His Excellency the President of India has conferred upon him the Certificate of Honour for Proficiency in Sanskrit, and the Head of the Sri Raghavendra Svami Matha at Mantralaya and the Vedantadesika Sampradaya Sabha, have bestowed on him the titles of *Tarkavācaspati* and *Śāstraratnākara* respectively. He has also received the Ramakrishna Dalmia Srivani Alankaran of the Ramakrishna Dalmia Srivani Nyas, and Vacaspati Puraskar of the Birla Foundation.